VOLUME - 3 [PURĀNA - PRASTHĀNAM]

SARVA-MŪLA-GRANTHĀH

SRI BHĀGAVATA - TĀTPARYA - NIRNAYA

A COMMENTARY ON

SRI BHĀGAVATA MAHĀ PURĀNA

[With the oldest and authentic version and various readings]

SRI ĀNANDATĪRTHA BHAGAVATPĀDA

[SRI MADHVACHARYA]

*

Edited by

BANNANJE GOVINDACHARYA

*

AKHILA BHĀRATA MĀDHVA MAHĀ MANDALA

PUBLICATION

1980

SARVA-MŪLA-GRANTHĀH
[WORKS OF SRI MADHVA]
VOLUME—3 [PURĀNA - PRASTHĀNA]
SRI BHĀGAVATA TĀTPARYA NIRNAYA

1980, January

Edited by
Bannanje Govindacharya
Īsāvāsyam, Ambalapadi
Udupi – 576 103

Financing by
K. Narayana Rao
Gadag

Printed at
Sri Dharmabodha Vidyunmudranalaya
Car Street, Udupi–576 101

Copies available at
(1) S. M. S. P. Sanskrit College
Sales & Publications Division
Udupi–576 101

(2) Poornaprajna Vidyapeetha
Poornaprajna Nagara
Bangalore–560 028

Rs. **100**/— (Complete set)

सम्पुटः—३ [पुराणप्रस्थानम्]

सर्वमूलग्रन्थाः

भागवततात्पर्यनिर्णयः

[मूलकोशानुसारी पाठान्तरटिप्पण्यादिना योजितः शोधितः पाठः]

श्रीमदानन्दतीर्थभगवत्पादाः

टिप्पण्यादिसंयोजनेन
शोधयिता सम्पादकश्च
बन्नञ्जे गोविन्दाचार्यः

अखिलभारतमाध्वमहामण्डलप्रकाशनम्
1980



भुजगभोगाभमुद्यम्य हृद्यं निजभुजं दक्षिणं लक्षणाढ्यम् ।
ललितमुद्रिक्तविज्ञानमुद्रं भज भजानन्तमित्यालपन्तम् ॥
भवदवोष्णेन तातप्यमानान् भुवि परं नाथमप्रेक्षमाणान् ।
भुवनमान्येन चान्येन दोष्णा भवतु भीर्मेति नः सान्त्वयन्तम् ॥
प्रणतवान् प्राणिनां प्राणभूतं
प्रणितिभिः प्रीणये पूर्णबोधम् ।

सम्पादकीयम्

श्रीमदानन्दतीर्थभगवत्पादप्रणीतानां प्रबन्धानामयं तृतीयो भागः पुराणप्रस्थानं नाम । यत्र श्रीभागवतभाष्यं श्रीभागवततात्पर्यनिर्णयो नाम प्रस्तूयते । यदु हवै निर्णिक्त श्रीभागवतभावं मुखत एव निर्णयति न केवलम्, पुनरुपधाऽपि भवति निखिलपुराणानां हृदयस्य व्याकरणे । यदपि च पुराणप्रस्थानेषु पततां पान्थानां परमः सखा । जगाद च यदन्तरेण श्रीसुमध्वविजयप्रबन्धा श्रीनारायणपण्डिताचार्यः —

पुराणस्थानपान्थानामभाषात्रयवेदिनाम् ।
भवता सुसखा चक्रे श्रीभागवतनिर्णयः ॥

(म. वि. १५–७७)

प्रथमद्वितीयावाद्यौ द्वौ तुरीयपञ्चमावन्त्यौ द्वाविति चत्वारो भागाः प्रथममेव प्राकाश्यन्त । अयमवशिष्टः केवलमेकः पुनर्मध्यमो भागः । स च वक्तव्यं बहुलमस्तीति चरमं निवेशितः । सोऽयं सम्प्रति समुपहारीक्रियते । एवमनेन भागवतसङ्गतेन प्रबन्धेन सह भगवत्पादप्रणीतानां समग्राणामपि प्रबन्धानां यथामूलपाठं प्रकटनमुपसंहृतं भवति ।

तदियं पञ्चतयी सम्पुटानाम्, यत्र वाव किल भगत्पादशिष्यप्रवरेण श्रीहृषीकेशतीर्थश्रीपादेन लिखितो मूलपाठः, यत्रक्वचन तदनुपलम्भस्तत्र च तदनुगामितया प्रमितः प्रतनतमश्च पाठस्तमोगर्भात् प्राकाश्यमुपनीतः । एतावन्तं महान्तमपि समयम्, प्रायः सप्तशतीं वर्षाणाम्, अज्ञातचरोऽयमधिकृतः सर्वमूलपाठः सम्प्रत्यहो खल्विदमुपक्रमं तत्त्वबुभुत्सूनां हस्ते चकास्ति । महदिदमामोदपदमधीतिनां माध्वेषु समयेषु । नूनमिष्टेन सतः संयोजयितुमनुग्रहोन्मुखं दिष्टम् । ये पुनः प्रभातेऽपि तमःप्रणयादक्षिणी नोन्मिमीलयिषन्ति तेषां न किमपि शरणम् । तमसस्तानपि ज्योतिर्गमयतु भगवान् ।

सम्प्रत्येतं सम्पुटमन्तरेण किञ्चिद् वक्तव्यम् । तदिदं भागवतभाष्यम्, भागवततात्पर्यनिर्णय इति यस्य प्रथितं नाम, यस्य च भागवततात्पर्यमिति, भागवतनिर्णय इति, भागवततात्पर्यप्रकाशिकेति च क्वचित्क्वचिन्नामान्तरं पठ्यते, स्वव्याख्येयभागवतमूलभागेन विनैव केवलं मुद्रितमेतावत्पर्यन्तम् । अस्मिंस्तु सम्पुटे तानि च भागवतमूलवचनानि सहैव भाष्येण तत्रतत्र मुद्रितानि । अध्यायश्लोकसङ्ख्या च निर्दिष्टा यथा सुकरमध्येतॄणां भवति । तेनेयं कृतिरर्थपारायणेनाध्ययनोपयुक्ताऽपि सञ्जाता या पुरा पदपारायणमात्रशरणाऽऽसीत् ।

बहवश्च मुद्रणदोषाः पूर्वं प्रकटितेषु सर्वेष्वपि पुस्तकेषु । तेन क्वचिदर्थस्यानवगम एव; क्वचित्पुनरपार्थस्यैवावगमः । शुद्धपाठस्यानुपलम्भाद् व्याख्यातृष्वप्यनैककण्ठ्यं क्वचित्, स्खालित्यं च क्वचित्, प्रमादप्रचुरता च बहुलम् । भागवतमूलपाठेऽपि बहवः परस्परं न संवदन्ते । एकस्य व्याख्यातुरेकः पाठः, अपरस्यापर एव । भाष्यभावग्रहणेऽपि कान्दिशीकाः केचन भाष्यमपि बलात् पथः प्रच्याव्य विदूष्य च स्वकादनवबोधाद् यथाकथाच व्याख्यन् । तदेवं सर्वं तात्पर्यप्रस्थानं व्याकुलमिवाऽऽसीत् ।

सोऽयं सर्वोऽपि दोषसार्थोऽत्र सम्पुटे यथासम्भवं परिजिहीर्षितः । श्रीभागवते तद्भाष्ये च बहूनां मूलकोशानां संवादेन यथायोगं मूलपाठ उट्टङ्कितः प्रकाशितश्च । हरिपदमुपगतानां श्रीरामतीर्थ(काणियूरु) मठाधीशानां श्रीविद्यासमुद्रतीर्थश्रीपादानां सङ्ग्रहे समुपलब्धादपूर्वाद् भागवतमूलकोशादत्र भागवतमूलपाठो निरधारि ।

यद्यपि विजयध्वजीयानुसारी मूलपाठ इति पूर्वमेव कश्चन पाठः प्रकाशित उपलभ्यते । स न तावदत्यन्तं विजयध्वजीयानुसारी; नाप्येकान्ततो भाष्यानुसारी वा । विजयध्वजीयमप्यशुद्धमाविद्धं च साम्प्रतमुपलब्धम् ।

तत् कुतोऽपि हेतोरुपप्लवे मूलस्य केश्चनाबोधविक्लवैस्तत्रतत्र यथामतिविभवं विहितप्रक्षेपमिव प्रतिभाति यतस्तत्रतत्र प्रायोऽनुपपत्तिप्रचुरमपेशलं तात्पर्यपरिपन्थि च । तदेतद् यथावसरं समुचितस्थलेषु टिप्पण्यां स्फुटमुपदर्शितमिति न तिरोहितं बुभुत्सूनाम् । विजयध्वजीयः शुद्धपाठः सम्प्रत्यप्यन्वेष्टव्य एव वर्तते । यस्य पञ्चमस्कन्धगतानां कतीनाञ्चनैवाध्यायानां व्याख्यानभागः श्रीमदधोक्षजतीर्थ[पेजावर]मठे सुरक्षितस्तिष्ठति । उर्वरितोऽपि शुद्धः पाठो नातिचिरेण दृष्टिपथमायात्विति भागधेयं प्रार्थ्यते । तस्मादत्र तात्पर्यस्य तदनुगुणतया भागवतमूलस्य च समन्वयेन समीचीनोऽर्थः क्वचिदपि विस्तरत एव सुनिरूपितः । अन्यान्यव्याख्यानेष्वर्थौचित्यानौचित्ये अपि चर्चिते । क्वचित्क्वचिदपूर्वोऽर्थः प्रकाशितः । तदेतत् सर्वं प्रकटं टिप्पणीदृशाम् ।

अपूर्वं च व्याख्यानद्वयमत्र संशोधनकर्मणि महदिवोपचकार । तत्रैकमनन्ततीर्थीयम्, यदाद्यस्कन्धत्रयमात्रगतमुपलब्धम् । अपरं च यादवेन्द्रतीर्थीयं प्रथमद्वितीयस्कन्धगतमेकादशस्कन्धगतं च । द्वयमप्येतत् तत्रतत्रापूर्वमर्थजातमाविष्कुर्वत् सुन्दरममुद्रितचरं च । अनयोर्व्याख्ययोर्योऽर्थविशेषः प्रकटितः स सर्वोऽप्यत्र टिप्पण्यां समुद्धृत्य निरूपितः । अपि च भागवतमधिकृत्य यानि परकीयव्याख्यानानि वल्लभशुकदेवश्रीधरस्वामिजीवगोस्वामिसुदर्शनसूरिप्रभृतिभिरुपनिबद्धानि तान्यपि समालोड्य तेषूपयुक्तः संवादी चांशोऽत्र टिप्पण्यां सङ्गृहीतः, येन तौलनिकाध्ययनेन भगवत्पादभाष्यस्यानितरसाधारणं प्रागल्भ्यं सामञ्जस्यं च स्फुटतमं व्यज्येत । तत इदं विमर्शनकुशलानामनन्यदेकं विदुषामुपायनं चित्तरसायनं समर्प्यते । अमत्सरग्रस्ता बोद्धार एव परिणतप्रज्ञास्तत्र प्रमाणम् ।

यद्यपि हृषीकेशतीर्थीये मूलकोशे भागवततात्पर्यं सम्प्रति नोपलभ्यते । तथाऽपि मूलकोशानुसारिणा कण्वतीर्थमठगतेन सम्प्रति श्रीपेजावरमठे सुरक्षितेन प्राचीनकोशेन, अपरेण च तादृशेन श्रीहृषीकेशतीर्थ(पलिमारु)मठीयश्रीरघुरत्नतीर्थयतिलिखितेन कोशान्तरेण प्रतनपाठनिर्णयः सुकृतः ।

अथचात्र यः पाठो निर्दिष्टः, याश्च तत्र टिप्पण्यः, तत्र पृष्ठतः महान्तमनेहसं भूयान् शोधनपरिश्रमः समस्तीति न विस्मर्तव्यम् । अत्राभिव्यक्तोऽभिप्रायः प्रायोऽणुनाऽपि पदेन पर्वतसारस्याध्यवसायस्य नितान्ताध्ययनस्य च प्रतिप्रसव इति सप्रश्रयमावेद्यते ।

यः पुनरेतद् बहुमूल्यसाध्यं बृहत् प्रकाशनं सुकरं चकार तदर्थं च समग्रं मुद्रणादिनिमित्तं वित्तं विश्राणयाम्बभूव, यश्च पुनर्मुद्रितस्य सर्वमूलशुद्धपाठस्य सुधीषु समर्पणमेव जीवितपुरुषार्थममन्यत स श्रीमान् गदगवासी के. नारायणराव् इति सुगृहीतनामधेय एतस्य चरमसम्पुटस्य प्रकाशनात् पूर्वमेव द्यामध्यतिष्ठदिति महद् व्यसनपदम् । ऐहिकीं प्रसिद्धिमप्यनपेक्ष्य केवलं कर्तव्यमिति विहितविश्राणनतया कृतबहुसुकृतस्य तस्य स्वकृतेनैव सुकृतसञ्चयेन परत्रापि भगवत्तमो भगवत्पादश्च भूयसीं शान्तिमनुगृह्णीतामिति तावेव प्रार्थ्येते । तस्य प्रायणानन्तरमपि यथापूर्वं मुद्रणव्ययभारं निरुह्य तदेव विश्राणनताच्छील्यं श्रद्धासौशील्यं च प्रदर्श्य यावत् प्रकाशनसमापनं निरन्तरं वित्तसाहाय्यं वितीर्णवतस्तज्जामातुः श्रीमतो नारायण राव् इत्येवनामधेयस्य च सौजन्यं वदान्यभावं च चिरं स्मरामः ।

मुद्रणकार्ये सौन्दर्याधानेन सहकृतवतां धर्मबोधविद्युन्मुद्रणालयाधिकृतानां च कर्तव्यप्रज्ञा नूनं कृतज्ञतामर्हति !

ईशावास्यम्
उडुपी – ५७६ १०३

भगवत्पादकृपालेशाकांक्षी
बन्नञ्जे गोविन्दाचार्यः

पुराणप्रस्थानम्

श्रीभागवततात्पर्यनिर्णयः

विषयानुक्रमणिका

पुराणप्रस्थानम्

श्रीभागवततात्पर्यनिर्णयः[१]

ॐ ॥ सृष्टिस्थित्यप्ययेहानियतिदृशितमोबन्धमोक्षाश्च यस्मा-
दस्य श्रीब्रह्मरुद्रप्रभृतिसुरनरद्यूवीशशश्वात्मकस्य ।
विष्णोर्व्यस्ताः समस्ताः सकलगुणनिधिः सर्वदोषव्यपेतः
पूर्णानन्दोऽव्ययो[२] यो गुरुरपि परमश्चिन्तये तं महान्तम् ॥

"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यं सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि" इति[३] ।

तं परं धीमहि । अन्वयात् । "यतो वा इमानि—" इत्यादि[४]श्रुतिस्मृतिभ्यः । इतरतः तर्कतः । चेतनाद्धि पित्रादेः पुत्रादिरुत्पद्यते[५] । अभिज्ञः सर्वज्ञः । अतो युज्यते । "यं कामये तन्त-मुग्रम्—", "मम योनिरप्सु—" इत्यन्येषां[६] तदपेक्षत्वात् । नचान्यापेक्षोऽसौ—स्वराट् । कुतः ?

---

१ "भागवततात्पर्यम्" इति प्रचलितं नाम । श्रीहृषीकेशतीर्थलिखितकोशे तु नायं ग्रन्थ उपलभ्यते । ततश्च बहुषु प्रतनकोशेषु पाठसंवादेन पाठनिर्णयोऽत्र कृतः । श्रीहृषीकेशतीर्थीयपाठस्य नितरां संवादी कालतः तत्समीपतरः श्रीपेजावरमठीयः पुरातनश्च कोशोऽत्र बहुलमन्वस्रियत । तत्र, अपरत्र च बहुषु प्राचीनकोशेषु "श्रीभागवतता-त्पर्यनिर्णयः" इत्येव ग्रन्थनाम पठ्यते । क्वचित् "श्रीभागवततात्पर्यप्रकाशिका" इति च । एकस्मिन्नेव कोशे "श्रीभागवततात्पर्यनिर्णये प्रकाशिकायाम्" इति अध्यायान्ते द्वेधाऽपि नाम पठितम् ।

२ "पूर्णानन्दाव्ययः" इति क्वचित् ।

३ प्राचीनपाठे त्वेवं समग्रप्रतीकग्रहणम् । प्र. पाठे तु "जन्माद्यस्येत्यादि" इतीयदेव पठित्वा ततः "तं परं धीमहि" इत्याद्युत्तरभाष्यं पठ्यते ।

४ "इमानि भूतानि जायन्त इत्यादि–" इति प्र. पाठः । "इमानि भूतानीत्यादि—" इति क्वचित् ।

५ इतः परं प्र. पाठे "अर्थेषु सर्वपदार्थेषु" इत्यधिकं प्रमादपतितम् ।

६ "तन्तमुग्रं कृणोमि, मम योनिरित्यन्येषाम्" इति प्र. पाठः । "तन्तमुग्रम्, मम योनिरित्यन्येषाम्" इति क्वचित ।

तेने ब्रह्म हृदा य आदिकवये। स हि "विश्वा जातानि परि ता बभूव"। नान्यः। हृदा स्नेहात्[१]। "यो ब्रह्माणम्[२]—" इति च। आत्मत एव हि बुद्धिप्रकाशः[३]। नच प्रसादं विना ज्ञातुं शक्यः— मुह्यन्ति यं सूरयः। नचातृप्तः प्रवर्तते[४]। किन्तु? मृषा वृथैव। "भित्त्वा मृषाश्रुः[५]—" इतिवत्। "देवस्यैषः स्वभावोऽयम्—" इति हि[६]। यत्रेति विशेषणान्नान्यत्र। तद्विषय एव वृथा[७]। जीवेश्वरजडानां सर्गस्त्रिसर्गः[८]। एकस्य तेजसो बहुत्ववदीश्वरसर्गः। वारिनिमित्तप्रतिबिम्बवज्जीवसर्गः। मृदो घटादिवदव्याकृताज्जडसर्गः[९]। नच मायामयी सृष्टिः—धाम्ना स्वेन सदा निरस्तकुहकम्। तद्धाम्ना श्रियो[१०] निरस्तकुहकत्वम्, मुक्तानां च। नच मुक्तवत् पूर्वबन्धभाक्त्वम्[११]। सत्यं निर्दुःखनित्यनिरतिशयानन्दानुभवस्वरूपम्[१२]। परं सम्पूर्णगुणम्[१३]। परत्वसाधकं जन्मादीत्यादि[१४]॥

---

१ "स्नेहेन" इति प्र. पाठः। "हृदा मनसैव" इति श्रीधरस्वामी विश्वनाथचक्रवर्त्याद्याश्च। तन्न युज्यते। मुखतोऽपि भगवतो वेदोपदेशश्रवणात्। "हृदा साकल्येन" इति वीरराघवः। तदपि न चारु। नहि हृदयमिति स्वरसतः साकल्यमुच्यते। "पुराणं हृदयं स्मृतमिति वचनात् हृदा पुराणेन सह" इति च सुबोधिन्याम्। तदपि चिन्त्यम्। न हि सर्गादौ पुराणानि भवन्ति। अनियतानुपूर्वीकाणि हि तानि। करिष्यति हि व्यासरूपेण स्वयमेव। अतः हृदा स्नेहादित्येवार्थः। तदेतद् वल्लभाचार्योऽप्यूरीचकार—"हृदा मनःपूर्वकम्" इति व्याचक्षाणः।

२ "यो ब्रह्माणं विदधाति पूर्वम्" इतीयान् श्रुतिभागः प्र. पाठे पठ्यते। क्वचित् कोशेष्वपि तथा।

३ "स्वात्मत एव हि तस्य बुद्धिप्रकाशः" इति प्र. पाठः। "स्वात्मत एव तद्बुद्धिप्रकाशः" इति चान्यत्र। अस्य वाक्यस्यायमर्थः। आदिकवेरपि वेदोपदेष्टा भवतु ततः परमः। किन्तु तमपि यो बुद्ध्या संयोजयति स तस्मादप्युत्तमो वक्तव्यः। नेत्याह—आत्मत एव हि भगवतो बुद्धिप्रकाशः। एतेन स्वराडित्येतदर्थान्तरपरतया पुनर्व्याख्यातं भवति। स्वयमेव राजते बुद्धिप्रकाशवान् भवतीति। ननु तत्रापि किं मानम्? अस्यापीदमेवोत्तरम्—आत्मत एव हि बुद्धिप्रकाशः। एतेन "तं ह देवमात्मबुद्धिप्रकाशम्" इति श्रुतिमर्थतो गृह्णाति। तदनेन वाक्येन स्वराडिति मूलपदविवरणम्, तन्मूलश्रुतिस्फोरणम्, तद्विग्रहप्रदर्शनेनार्थप्रकाशनं चेति त्रयमसकृत् कृतं भवति। तदियमीदृशी भगवत्पादभाष्यसरणिरिति दिङ्मात्रप्रदर्शनम्।

४ "नच तृप्तः प्रवर्तते" इति क्वचित् प्र. पाठः प्रमाद एव। आक्षेपस्योत्तरवाक्येऽन्वयाभावात्।

५ तथाहि दशमे—"सञ्जातकोपस्फुरितारुणाधरः सन्दश्य दद्भिर्दधिमण्डभाजनम्। भित्त्वा मृषाश्रुर्दृषदश्मना रहो जघास हैयङ्गवमन्तरं गतः" (१०.१०.६.) इति।

६ "इति च" इति प्र. पाठः। क्वचित् "इति" इतीयदेव पठ्यते।

७ "स्वविषय एव वृथा" इति प्र. पाठः।

८ "त्रिसर्गः। तेजसो—" इत्यादि क्वचित्।

९ "अव्यक्ताज्जडसर्गः" इति प्र. पाठः।

१० "श्रियोऽपि" इति प्र. पाठः।

११ इतः परं क्वचित् "सदा निरस्तकुहकत्वात्" इत्यधिकम्। सदा निरस्तकुहकमिति प्रतीकग्रहणेनैव गतार्थमिवैतद् वाक्यम्।

१२ "नित्यनिर्दुःखनिरतिशयानन्दानुभवरूपम्" इति प्र. पाठः। निर्दोषतैव सत्त्वमिति निर्दुःखता सत्पदार्थः। सदा सत्त्वात् सदिति नित्यत्वमप्युच्यते। तीत्यानन्दः। निर्विशेषितश्च निरतिशय एव भवितुमर्हति। सातिशयश्च दुःखसम्भिन्न इति सत्पदेनापि निरतिशयता बोध्यते। तदेवं नित्यत्वं निर्दुःखत्वं निरतिशयत्वं चेति त्रयं सत्पदार्थः। तीत्यानन्द इत्युक्तम्। ज्ञानवाची यकारोऽनुभवस्वरूपतामाह।

१३ "परं पूर्णगुणम्" इति क्वचित्।

१४ "जन्मादीति" इति क्वचित्।

तन्त्रभागवते च—

"सृष्टिस्थित्यप्ययेहादेः[१] श्रुतिस्मृतिसमन्वयात्[२] । युक्तितश्चेत्तृपूर्वादेः[३] श्रीब्रह्मभवपूर्विणः । सुरगन्धर्वमनुजपितृदैत्यात्मनः पृथक् । कर्ता विष्णुरजोऽचिन्त्यः[४] सर्वज्ञत्वान्नचापरः । अनन्याधिपतिश्चासौ गरीयान् ब्रह्मणो यतः । तत्प्रसादमृते तस्य नान्यो वेत्ताऽस्ति[५] कश्चन । तेजसो रूपवद् रूपं बहुधा कुरुते हरिः । वारिस्थतेजःप्रतिमा जीवास्तस्माद् विनिर्गताः । कुलालेन मृदा यद्वन्निर्मीयन्ते घटादयः । विष्णुनैवं प्रकृत्यैव निर्म्यते जडमीदृशम्[६] । एष [७]त्रिसर्गो विष्णोस्तु वृथा लोकस्य चावृथा । इन्द्रजालविधां सृष्टिं मन्यन्ते ज्ञानदुर्बलाः । नित्यं निरस्तेन्द्रजाले स्वत एव कथं भवेत् । अक्षमाः सत्यसृष्टौ हि मायासृष्टिं वितन्वते । अनन्ताचिन्त्यविभवः कथं तामीहते हरिः । निर्दुःखपूर्णानन्दत्वाद्[८] यमाहुः सत्यमच्युतम् । निर्दोषगुणपूर्णत्वात् परं चाऽहुर्जनार्दनम् । एवंविधानुभावो यः स कथं निन्दितं सृजेत् । स्वप्नादिकं परो देवः प्राणादिस्थस्तनोत्यसौ । केवलस्य परस्यास्य मायासृष्टिर्न युज्यते । तस्माद् बाधायुताः सर्वे स्वप्नाद्या ये त्वकेवलाः[९] । इदं न बाध्यते सर्वं जगत् केवलजं यतः । मोक्षवत्

---

१ जन्मस्थितिभङ्गं जन्मादिपदार्थं इति बहवः । जन्मस्थितिभङ्गमोक्षं समासार्थं इति तु नैम्बार्कः शुकदेवः । तदुभयमपि प्रमाणवचनेनानेन परास्तम्— सृष्टिस्थित्यप्ययेहादेरिति । पक्षद्वयेऽपि ह्यादिपदं न युज्यते । प्रथमपक्षे तु न किञ्चिदवशिष्यते यदादिपदेन गृह्येत । द्वितीये यद्यपि मोक्षोऽस्ति मुखतोऽनुक्तः । तथाऽपि न तावन्मात्रमादिपदेन बोध्यते । नह्येकमनुक्तं सङ्ग्रहीतुं क्वाप्यादिपदं प्रभवति । नहि घटस्य पटस्य चेति वक्तव्ये घटादेरिति प्रयोगो भवति । यत्र हि बहवोऽनुक्ताः विवक्षिताश्च तत्र ह्यादिपदं प्रयुज्यते । तद्यथा घटादयः पदार्था इति । तेन सृष्ट्याद्यष्टकमेवात्र विवक्षितमिति भाष्यमङ्गलपद्य एव स्थितम् । जडं प्रधानमपि कथञ्चित् सृष्टिस्थित्यप्ययहेतुरिति तद्वैलक्षण्यज्ञापनाय ईहेति चेतनधर्ममाह । "ईहोद्यमवाञ्छयोः" इत्यभिधानम् ।

२ एतेन अन्वयादिति पदस्य द्वेधा योजनोक्ता भवति । अन्वयात् श्रुतिस्मृतिसमन्वयादित्येका प्रमाणवाक्योक्ताः । अन्वयात् यतो वा इत्यादिश्रुतिस्मृतिभ्य इत्यपरा भाष्यकारेण स्ववचनोक्ता । एतत्पक्षे प्रमाणवचनं तात्पर्यानुवादि । तथाहि यादवेन्द्रतीर्थीयम्—"अन्वीयते अर्थेन सम्बद्ध्यत इत्यन्वयः । यतो वेत्यादिश्रुति(स्मृति)-समुदायः । तस्मात्, ब्रह्मणि उपक्रमादिनिर्णीतमहायोगमहातात्पर्यलक्षणसम्बन्धोपेतश्रुत्यादिभ्यः परस्यैव सर्वकर्तृत्वम्" इति ।

३ "चेतृपूर्वादेः" इति प्र. पाठः प्रामादिकः । चेत्ता चेतयिता । चेतन इति यावत् । "स चेत्ता देवता पदम्" (ऋ. १.२२.५.) इति हि श्रौतः प्रयोगः ।

४ "विष्णुरजो नित्यः" इति प्र. पाठः ।

५ "वेत्ता नान्योऽस्ति" इति क्वचित् ।

६ "जगदीदृशम्" इति प्र. पाठः । निर्म्यते निर्मीयते । निर्माणे स्वातन्त्र्यबोधनाय वर्णलोपः ।

७ प्राचीनकोशे "एषस्त्रिसर्गः" इति पठ्यते । तथात्वे तु "देवस्यैषः स्वभावोऽयम्" इतिवत् एषः इच्छारूप इति व्याख्येयम् ।

८ इदमुपलक्षणं पूर्णज्ञानस्यापि । अत एवानुभवस्वरूपमिति भाष्ये । सत्यः सच्चिदानन्द इति यावत् । तथा ह्यनन्ततीर्थीयम्—"सच्छब्द उत्तमं ब्रूयादानन्दं तीति वै वदेत् । येतिज्ञानं समुद्दिष्टं पूर्णानन्ददृशिस्तत इति वचनान्निर्दुःखनित्यनिरतिशयानन्दानुभवरूपं सत्यम्" इति ।

९ "यत् त्वकेवलाः" इत्येकस्मिन् कोशे पाठः । सोऽपि स्वरससम्भवी । "ये तु" इति पाठे च बहुसंवादः ।

केवलस्यास्य शक्त्या सम्यग् विजृम्भितम् । एतद् रहस्यं परमं ब्रह्मसूत्रपदोदितम् । ये त्वेतन्न[1] विजानन्ति ते हि यान्त्यधरं तमः । ये त्वेतदभ्यसूयन्तो[2] नानुतिष्ठन्ति मे मतम् । सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः । ये त्वेतदनुतिष्ठन्ति पारम्पर्यागतं मम । ते यान्ति परमं स्थानं [3]ममैवोदितमञ्जसा" इत्यादि ।

"वैधर्म्याच्च न स्वप्नादिवत्" इति च । "प्रघा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम्" इत्यादि च[4] ।

ब्रह्मसूत्रमहाभारतगायत्रीवेदसम्बन्धश्चायं ग्रन्थः । उक्तं च गारुडे—

"अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः । गायत्रीभाष्यरूपोऽसौ वेदार्थपरिबृंहितः । पुराणानां साररूपः[5] साक्षाद् भगवतोदितः । द्वादशस्कन्धयुक्तोऽयं[6] शतविच्छेदसंयुतः[7] । ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः" इति ॥*॥

अधिकारिविषयफलान्युच्यन्ते—

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुद्ध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ २ ॥

धर्म इति । प्रोज्झितकैतवोऽफलापेक्षया[8] । ईश्वरार्पणेन परमः ।

"तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम् । अजातशत्रवः शान्ताः साधवः साधुभूषणाः[9] । मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम्[10]" इत्यादि सतां लक्षणम् ।

---

१ "ये त्वेवं न" इति प्र. पाठः । २ "यदेतदभ्यसूयन्तः" इति क्वचित् ।

३ "मयैवोदितमञ्जसा" इति प्र. पाठः । प्राचीनपाठस्यायमर्थः-ये त्वेतत् पारम्पर्यागतं मम मतमनुतिष्ठन्ति ते ममैव परमं स्थानं यान्ति । तदेतच्छ्रुतिस्मृतिभिराञ्जस्येनैवोदितम् । अञ्जसोदितं स्थानं वा ।

४ प्र. पाठे "इत्यादि" इतीयदेव पठ्यते ।

५ पुराणानां सामरूप इति पठित्वा वेदेषु सामवत् पुराणेषु श्रेष्ठ इति व्याकुर्वन् जीवगोस्वामी भ्रान्तः ।

६ "-स्कन्धसंयुक्तः" इति प्र. पाठः ।

७ सूतशौनकसंवादसमाहारो विच्छेद इति वदन्ति । शौनककृतस्य प्रश्नस्य यावता सूतस्य प्रतिवचनं भवति स एको विच्छेदः । पुनः शौनकेन प्रश्नोपक्षेपः तत्प्रतिवचनं च सूतेनेत्येतादृशाः शतमत्र विच्छेदा इति व्याचक्षते । तच्चिन्त्यम् । सूतशौनकसंवादरूपाणां विच्छेदानां शतस्यात्रादर्शनात् । न च शतमिति बहुत्वमात्रार्थम् । द्वादशस्कन्धसंयुक्त इत्यष्टादशसाहस्र इति च प्रकरणविरोधात् । केवलं कथाविच्छेदो विच्छेद इति वक्तव्यमिति भाति ।

८ "-कैतवः फलानपेक्षया" इति प्र. पाठः । ९ "साधुभाषणाः" इति क्वचित् ।

१० तदिदं तृतीयस्कन्धे षड्विंशाध्याये भगवतैवोदितं सतां लक्षणम्-"त एते साधवः साध्वि सर्वसङ्गविवर्जिताः" इत्यन्तेन ।

सतां च [1]मात्सर्यमर्जुनस्यैकलव्य इव कुत्रचिद् दृश्यते । तद् वर्जनीयमुत्तमेषु[2] ज्ञानार्थिना । महासंहितायां च—

"उत्तमे स्वात्मनो नित्यं[3] मात्सर्यं परिवर्जयेत् । कुरुते यत्र मात्सर्यं [4]तत्तत् तस्य विहीयते" इति ।

नित्यनिरस्तदोषपूर्णगुणं[5] वास्तवम् । नित्यसंहितायां च—

"निरस्ताखिलदोषं यदानन्दादिमहागुणम् । सर्वदा परमं ब्रह्म तस्माद् वास्तवमीर्यते" इति ।

वस्तु अप्रतिहतनित्यम्[6] । स्कान्दे च—

"वसनाद् वासनाद् वस्तु नित्याप्रतिहतं यतः । वासेनेदं यतस्तुन्नमतस्तद् ब्रह्म शब्द्यते" इति ।

किं वा परैरर्थकामादिकथनैः? गारुडे च—

"धर्मार्थकाममोक्षाणामेकमेव परं पदम्[7] । अवरोधो हृदीशस्य पृथग् वक्ष्ये न तानहम्" इति ।

सद्यःशब्दः आपेक्षिक इति तत्क्षणादिति । नचासम्पूर्णाधिकारिणां[8] तत्क्षणादवरुद्ध्यत इति सद्यःशब्दः । अधिकारिविषयफलानां स्मरणात् फलाधिक्यं भवति । वामने च—

"अधिकारं फलं चैव प्रतिपाद्यं च वस्तु यत् । स्मृत्वा प्रारभतो ग्रन्थं करोतीशो महत् फलम्" इति ॥ * ॥

ज्ञातफलस्यापि प्रशंसाविधिभ्यां क्षिप्रप्रवृत्तिर्भवतीति प्रशस्य विधत्ते—

निगमकल्पतरोर्गळितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः[9] ॥ ३ ॥

निगमकल्पतरोरिति[10] । भगवता गळितम्[11] । शुकेन द्रवीकृतम्[12] । उक्तं च ब्रह्माण्डे—

"धर्मपुष्पस्त्वर्थपत्रः कामपल्लवसंयुतः । महामोक्षफलो वृक्षो वेदोऽयं समुदीरितः ।

---

१ "सतां मात्सर्यम्" इति प्र. पाठः । "अर्जुनस्य कर्ण इव" इत्युदाहरणान्तरमनन्ततीर्थीये ।

२ "–मुत्तमेषु । महासंहितायां च" इति क्वचित् ।

३ "उत्तमेष्वात्मनो नित्यम्" इति प्र. पाठः ।

४ "तत् तस्यैव विहीयते" इति प्र. पाठः ।

५ "–दोषगुणपूर्णम्" इति क्वचित् ।

६ "अप्रतिहतं नित्यं च" इति प्र. पाठः ।

७ "–मेव पदं यतः" इति प्र. पाठः ।

८ "–पूर्णाधिकाराणाम्" इति क्वचित् । बहुव्रीहिनिर्वाहेऽपि मत्वर्थीयो भवति । महतां प्रयोगात् ।

९ "भावुकाः भवनवन्तः भूतिमन्तः सज्जना इति यावत् । अत एव च प्रमाणे "रसान् पिबत सज्जनाः" इत्युक्तम् । तथाहि यादवेन्द्रतीर्थीयम्—"भावुकाः पुनःपुनर्भवनवन्तः कुशलवन्तः" इति ।

१० "निगमकल्पतरोर्गलितमिति" इति प्र. पाठः क्वचित् !

११ "गलितम्" इति प्र. पाठः ।

१२ एतेन शुकमुखादिति मुखशब्दः प्रवचनवचनः प्रभृतिवचनश्चेति सूचितम् । मुखमिति मुखव्यापारः प्रवचनमित्येकोऽर्थः । शुकप्रभृतिभिर्मुनिभिरित्यपरः । समुदायवचनं च भवति । तदेतत् प्रमाणेऽभिहितम्—"शुकप्रभृतिभिर्जनैः" इति । यादवेन्द्रतीर्थीयेऽप्युक्तम्—"शुकात् तन्मुखात् तदादिऋषिभ्यश्च" इति ।

शातितानि फलानीह कृष्णद्वैपायनेन तु[१] । भारताख्यानि[२] यानीह तथा भागवतं भुवि । आर्द्रीकृतानि तानीह शुकप्रभृतिभिर्जनैः । ख्यापयद्भिर्गुरुप्रोक्तान् वेदार्थान् ग्रन्थनिष्ठितान्[३] । कानिचिद् दर्शयामास वृक्षस्याग्रे फलानि तु । व्याचक्षमाणो वेदार्थं भगवान् लोकपूजितः । एतेषामथ तेषां वा रसान् पिबत सज्जनाः । आ[४] मोक्षान्महती तृप्तिरहो मे पश्यतो भवेत्" इति[५] ॥ * ॥

नैमिशे[६]ऽनिमिषक्षेत्रे ऋषयः शौनकादयः ।
सत्रं स्वर्गाय लोकाय[७] सहस्रसममासत ॥ ४ ॥

प्रकारान्तरेणापि पुरुषार्थाशङ्का[८] निवृत्त्यर्थमाख्यायिका । पाद्मे च—
"आख्यायिकाः[९] प्रदृश्यन्ते वेदेष्वपि हि सर्वशः । द्योतयन्त्यस्तु महतां तात्पर्यं तत्र तत्र ह । अलाभः पुरुषार्थस्य प्रोक्तमर्थमृते त्विति । द्योतनाय महाराज श्रद्धावृद्ध्यर्थमेव च" इति ॥ * ॥

यानि[१०] वेद विदां श्रेष्ठो भगवान् बादरायणः ।
अन्ये च मुनयः सूत परापरविदो[११] विदुः ॥ ७ ॥
वेत्थ त्वं सौम्य तत् सर्वं तत्त्वतस्तदनुग्रहात् ।
ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ८ ॥

यानि[१२] भगवज्ज्ञातानि तान्यन्यैरप्यृषिभिर्ज्ञायन्ते । तानि वेत्थ । उक्तं हि ब्राह्मे[१३]—
"द्वैपायनेन यद् बुद्धं ब्रह्माद्यैस्तन्न बुद्ध्यते । सर्वबुद्धं स वै वेद तद्बुद्धं नान्यगोचरम्" इति ॥ * ॥

---

१ "–द्वैपायनेन हि" इति क्वचित् । २ "भारतादीनि" इति प्र. पाठः ।

३ "ब्रह्मनिष्ठितान्" इति क्वचित् ।

४ आलयमित्यामोक्षात् । "आलयं अज्ञानलक्षणबन्धलयपर्यन्तम्" इति प्राचीनटीका ।

५ "इति च" इति क्वचित् ।

६ "नैमिषे" इत्यर्वाचीनः पाठः । नैमिश इति प्राचीनः सर्वव्याख्यातृसम्मतश्च । "नैबिशे" इत्यप्येके पठन्ति निविशन्त्यत्र मुनय इति । नेमिविशरणान्नैमिशमित्यन्ये व्याख्यातारः । "निमिशा नाम ऋषिभोज्यफलोपेता वृक्षविशेषाः, तेषां समूहो नैमिशं वनम्" इति यादवेन्द्रतीर्थाः । "निमिशा ऋषिसेव्यफला वृक्षविशेषाः, तेऽस्मिन् सन्तीति नैमिशम् । निमिशनाम्ना ऋषिणा वा यत्र तपश्चीर्णम्" इति तु विजयध्वजीयम् ।

७ "स्वर्गे लोकेऽमृतत्वं भजन्त इति श्रुतेः स्वर्गलोको भगवल्लोकः" इति शुकदेवः ।

८ "प्रकारान्तरेण पुरुषार्थशङ्का–" इति प्र. पाठः । ९ "प्रदर्श्यन्ते सर्ववेदेषु सर्वशः" इति प्र. पाठः ।

१० "विदां ज्ञानिनां मध्ये श्रेष्ठो बादरायणः यानि शास्त्राणि वेद" इति यादवेन्द्रतीर्थाः ।

११ "परावरविदः" इत्येव प्रचुरः पाठः । "परापरविदः स्वतन्त्रास्वतन्त्रविदः" इति तु प्राचीनटीका । विजयध्वजीयेऽपि तथा । १२ "भगवज्ज्ञातान्यन्यैरप्यृषिभिः" इति प्र. पाठः ।

१३ "ब्रह्माण्डे" इति प्र. पाठः । "ब्रह्मवैवर्ते" इति क्वचित् । सम्पातायातमेतत् ।

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ।
नरः सद्यो विमुच्येत यं बिभेति स्वयं भवः[१] ॥ १४ ॥

विवशः बह्वभ्यासात्[२] । उक्तं च ब्रह्मवैवर्त्ते[३]—

"शारीराद् वाचिकाभ्यासो वाचिकान्मानसो भवेत् । मानसाद् विवशान्मुच्येन्नान्यथा मुक्तिरिष्यते" इति ॥ * ॥

अथाऽख्याहि हरेर्धीमन्नवतारकथाः शुभाः ।
लीला विदधतः स्वैरमीश्वरस्याऽत्ममायया ॥ १८ ॥

आत्ममायया स्वरूपभूतेच्छया[४] ।

"महामायेत्यविद्येति नियतिर्मोहनीति[५] च । प्रकृतिर्वासनेत्येवं[६] तवेच्छाऽनन्त कथ्यते" इति हि स्कान्दे[७] । विष्णुसंहितायां च—"इच्छाशक्तिर्ज्ञानशक्तिः क्रियाशक्तिरिति त्रिधा[८] । शक्तिशक्तिमतोश्चापि न भेदः कश्चनेष्यते" इति ॥ * ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते
श्रीभागवततात्पर्यनिर्णये[९]
[प्रथमस्कन्धे] प्रथमोऽध्यायः

---

१ "यद् बिभेति स्वयं भयम्" इत्यर्वाचीनाः पठन्ति । "यद् बिभेति स्वयं भवः" इति वीरराघवः । प्राचीनपाठे यं प्रतीत्यध्याहारेण योजना । "भवः संसारः, पुंसामहङ्कारेण बन्धको भवो रुद्रोऽपि यं प्रति बिभेति" इत्यनन्ततीर्थाः । "मृत्युर्धावति पञ्चमः" इति हि श्रुतिः । "ननु संसृतिरहङ्कारलक्षणो बन्धः । स तन्नियामकमहेश्वरान्निवृत्तो भवेत् । कृष्णस्मरणेन कथं तन्निवृत्तिरित्यत आहुः—यं बिभेतीति । भवः स्वयमपि यं बिभेति यं भगवन्तमुल्लङ्घयितुं भयवान् भवति, यस्माद् बिभेतीति वा" इति यादवेन्द्रतीर्थाः ।

२ "बह्वभ्यासवशाद् भक्तिविवशो भूत्वा" इत्यनन्तीर्थाः ।

३ "उक्तं च ब्रह्मवैवर्ते" इत्येतत् क्वचिन्न पठ्यते ।

४ "आत्ममाया तदिच्छा स्याद् गुणमाया जडात्मिका" इति महासंहितावचनात् "आत्ममायया निजेच्छारूपया शक्त्या" इति जीवगोस्वामी । "आत्ममायया स्वरूपसामर्थ्येन" इत्यनन्ततीर्थाः । "सङ्कल्परूपज्ञानेन" इति वीरराघवः । सर्वं चैतत् सम्मतम् । "माया वयुनम्" इति हि वैदिकनिघण्टुः ।

५ "मोहिनीति" इति प्र. पाठः । ६ "वासनेत्येव" इति प्र. पाठः । ७ "इति स्कान्दे" इति प्र. पाठः ।

८ इच्छा, ज्ञानं, सर्वसामर्थ्यं चेति त्रयोऽप्यत्र मायापदगोचरा इत्यप्यनेन सूचितम् ।

९ "श्रीभागवततात्पर्यनिर्णये प्रकाशिकायाम्" इति क्वचित् कोशे पठ्यते । "श्रीभावततात्पर्यप्रकाशिकायाम्" इति चापरत्र । "श्रीभागवततात्पर्ये" इति प्र. पाठः ।

यं प्रव्रजन्तमनुपेतमपेतकृत्यं
द्वैपायनो विरहकातर आजुहाव ।
पुत्रेति तन्मयतया तरवोऽपि नेदु-[१]
स्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥ २ ॥

अनुपेतं देहादिभिः । अनभिमानात् । अकातरः कातरवद् दर्शयामास[२] । उक्तं च स्कान्दे—
"नित्यतृप्तः परानन्दो योऽव्ययः परमेश्वरः । यस्य पुत्रफलं नैव यज्ज्ञातं जगदीदृशम् । यदधीनश्रियोऽपाङ्गाद् ब्रह्मरुद्रादिसंस्थितिः । स पुत्रार्थं तपस्तेपे व्यासो रुद्रस्य चेश्वरः । कातर्यं दर्शयामास वियोगे[३] लौकिकं हरिः । कुतः कातरता तस्य नित्यानन्द-महोदधेः" इति । "ईशन्नपि हि लोकस्य सर्वस्य जगतो हरिः । कर्माणि कुरुते नित्यं[४] कीनाश इव दुर्बलः" इति चोद्योगे । "देवत्वे देववच्चेष्टा मानुषत्वे[५] च मानुषी" इति च श्रीविष्णुधर्मे[६] ।

सर्वभूतहृदयोऽहङ्कारात्मकत्वात्[७]—
"अहङ्कारात्मको रुद्रः शुको द्वैपायनात्मजः" इति स्कान्दे ॥ * ॥

यः स्वानुभावमखिलश्रुतिसारमेक-
मध्यात्मदीपमतितितीर्षतां[८] तमोऽन्धम् ।
संसारिणां करुणयाऽऽह पुराणगुह्यं
तं व्याससूनुमुपयामि गुरुं मुनीनाम् ॥ ३ ॥

---

१ "तरवोऽभिनेदुः" इत्यर्वाचीनः पाठः । "तरवो विनेदुः" इति यादवेन्द्रतीर्थसम्मतः पाठ इति भाति । तथाहि तद्व्याख्यानम्—"विनेदुरिव प्रत्युत्तरमकुर्वन्निव । अथवा तस्याऽह्वानशब्दस्य उच्चैः प्रवृत्ततया तरवः वृक्षा अपि विनेदुः । सहैवाऽह्वानशब्दं चक्रुः । स्थावरा अपि यत्राऽदरं चक्रुरिति भावः" इति ।

२ "कातरवददर्शयत्" इति प्र. पाठः ।

३ "वियोगम्" इति क्वचित् । न केवलं कातर्यमेव भगवतः प्रदर्शनम्, किन्तु विरहोऽपि । नहि सर्वगतस्य केनापि विरहो नाम सम्भवति । यस्य वियोग एव नास्ति तस्य कुतः कातरता ।

४ "कुरुते विष्णुः" इति प्र. पाठः । कीनाशः कर्षकः कदर्यो वा । क्षुद्र इति यावत् । "कदर्यदीनकीनाशकिम्प-चानमितम्पचाः । कृपणः क्षुल्लकः क्लीबः क्षुद्र एकार्थवाचकाः" इति हलायुधः ।

५ "मनुष्यत्वे" इति क्वचित् ।

६ "इति श्रीविष्णुधर्मे" इति क्वचित् । "इति विष्णुधर्मे" इति प्र. पाठः ।

७ "सर्वभूतहृदयम् । अहङ्कारात्मकत्वात्" इति प्र. पाठः ।

८ अत्र तितीर्षतामिति पञ्चाक्षराणि तितीर्षतामिति विश्लेषेण । एकाक्षराधिकश्च पादः । वीरराघवस्तु अक्षराधिक्यवारणाय अतितीर्षतामित्येव पठित्वा "तर्तुमिच्छारहितानामपि संसारिणां तमोऽन्धम्, तमः संसृतिरुचिजनकमज्ञानमन्धयति तिरोधापयति निवर्तयतीति तथा" इति व्याचख्यौ ।

स्वानुभवं ब्रह्म[1] ॥ * ॥

वदन्ति तत् तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ ११ ॥

अद्वयं असमाधिकम् । तथाच भाल्लवेयश्रुतिः—

"स पुरुषः सोऽद्वय इति । नह्येनमभि कश्चन[2] । नह्येनमति कश्चनेति" इति[3] । "सोऽद्वयः पुरुषस्तस्मान्न समो नाधिको ह्यतः" इति महामीमांसायाम्[4] ।

तत्त्वशब्दार्थस्तत्रैवोक्तः[5]—

"अतीतानागते काले यत् तादृशमुदीर्यते । कुतश्चिदन्यथा नेयात् तत् तत्त्वं तत्त्वतो विदुः" इति ॥ * ॥

[6]सत्तामात्रं तु यत्किञ्चित् सदसच्चाविशेषणम् ।
उभाभ्यां भाष्यते साक्षाद् भगवान् केवलः स्मृतः ॥ १२ ॥

सत्तामात्रमानन्दमात्रम्[7] । तथाच पैङ्गिश्रुतिः—

"अथ कस्मादुच्यते सत्तेति । नन्दति नन्दयति चेति" इति[8] । न कार्यकारणविशेषित[9]वैषयिकज्ञानम् । केवलमेव तज्ज्ञानम् । स्रष्टृत्वादिभिः कार्यकारणविशेषितं च[10] । तन्त्रभागवते च—

---

१ "स्वानुभावं ब्रह्म" इति प्र. पाठः । प्रा. पाठे–स्वानुभवं ब्रह्म, प्रतिपादकतया तत्सम्बन्धि स्वानुभावं पुराणगुह्यं भागवताख्यम् । तथाह्यनन्ततीर्थीयम्–"स्वयमेव स्वात्मानमनुभवति जानातीति स्वानुभवं (ब्रह्म) । तत्प्रतिपादकत्वेन स्वानुभावम्" इति । यादवेन्द्रतीर्थीये तु "स्वानुभावं ब्रह्म" इत्येव पाठं विवक्षित्वा "स्वत एवानुभावः सामर्थ्यं यस्य तद् ब्रह्म उद्दिश्य । तत्प्राप्त्यर्थमित्यर्थः" इति व्याख्यातम् ।

२ इदं वाक्यं क्वचिन्न पठ्यते । क्वचिच्च "नह्येनमभि कश्चन" इत्येव द्विः पठ्यते । क्वचिच्च "नह्येनमति कश्चन" इति द्विः ।

३ "कश्चन इति च । सोऽद्वयः" इत्यादि प्र. पाठः ।

४ "महासंहितायाम्" इति प्र. पाठः ।

५ "तत्रोक्तः" इति क्वचित् ।

६ इतरव्याख्यातृभिरनुद्धृतोऽयं श्लोकः । श्रीधरवल्लभविश्वनाथशुकदेवादिभिर्न व्याख्यात इत्यर्वाचीनपुस्तकेषु न मुद्रितश्च ।

७ दोषवन्तं ह्यसन्तमाहुः । तेन सत्तेति निर्दुःखानन्द उच्यते । "सत्तामात्रं स्वत एव दुःखासंस्पृष्टानन्दरूपम्" इति यादवेन्द्रतीर्थीयम् । आनन्द एव च सत्त्वम् । अत एव निरानन्दास्तमोगा असन्त इत्युच्यन्ते । तेन सत्तामात्रमानन्दमात्रम् । देहवचनो वाऽत्र मात्राशब्दः । "सत्तामात्रं केवलानन्ददेहम्" इति चानन्ततीर्थीयम् ।

८ "नन्दयतीति" इति क्वचित् पाठः ।

९ "कार्यकारणविषयविशेषित–" इति प्र. पाठः । "कार्यकारणविशेषितं वैषयिकं ज्ञानम्" इति क्वचित् ।

१० "–विशेषितं वा" इति क्वचित् ।

2

"विषयापेक्षि न ज्ञानं विषयैश्च विशेषितम्[1] । यत्तदानन्दमात्रं च तद् ब्रह्मेत्यवधार्यताम्" इति[2] ॥

यत्किञ्चिदलोकसिद्धम् ॥ * ॥

तच्छ्रद्दधाना मुनयो [3]ज्ञानवैराग्ययुक्तया ।
पश्यन्त्यात्मनि[4] चाऽत्मानं भक्त्या श्रुतिगृहीतया[5] ॥ १३ ॥

यस्मात् परमात्मैव तत्त्वं तस्मात् तमेव पश्यन्ति मुनयः ॥ * ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि दृष्ट एवाऽत्मनीश्वरे ॥ २२ ॥

आत्मनीश्वर इति[6] न जीवैक्यमुच्यते । परेषामपि ब्रह्मादीनां यतोऽवरत्वं स परावरः[7] ।

"भेददृष्ट्याऽभिमानेन—" इति हि कापिलेये[8] । "ब्रह्म प्रधानमुपयान्त्यगताभिमानाः" इति च । "विद्याऽऽत्मनि भिदाबोधः", "यत्र हि द्वैतमिव भवति—", "अन्यमीशमस्य महिमानमिति–" "अनश्नन्नन्यो अभिचाकशीति" इति च[9] । "छायातपौ ब्रह्मविदो वदन्ति", "एको बहूनां यो विदधाति[10] कामान्", "सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये", "सत्यमेनमनु विश्वे मदन्ति[11] रातिं देवस्य गृणतो मघोनः", "यत्र पूर्वे साध्याः सन्ति देवाः", "शृण्वे वीर उग्रमुग्रं दमायन्—" इत्यादि च ।

---

१ "विशेषणैः" इति क्वचित् ।

२ बहुषु कोशेषु "इति" इति न पठ्यते ।

३ "ज्ञानं ध्यानरूपम्" इति यादवेन्द्रतीर्थाः ।

४ "आत्मनि हृदि" इत्यनन्ततीर्थादयः । "आत्मनि जीवे स्थितं परमात्मानम्" इति वीरराघवः । "आत्मनि मनसि" इत्यन्ये । "आत्मनि देहे" इति यादवेन्द्रतीर्थाः ।

५ "श्रुतगृहीतया" इत्यौत्तरेयाणां पाठः । वल्लभाचार्यस्तु "श्रुतिगृहीतया" इत्येव पपाठ ।

६ "आत्मनि आत्मस्वरूपभूते ईश्वरे" इति श्रीधरस्वामी । "ईश्वरे आत्मत्वेन दृष्टे" इति वल्लभः । एतादृशीं भ्रान्तिं निवारयितुमाह–आत्मनीश्वर इति न जीवैक्यमुच्यते । तर्हि कोऽर्थः? "आत्मानि हृदये" इत्यनन्ततीर्थाः । "आत्मनि परमात्मनि" इति वीरराघवः । "आत्मनि परमात्मनि, बिम्बे वा । अत्मनि हृदयाकाशे वा" इति यादवेन्द्रतीर्थाः ।

७ तथाहि श्रुतिः– "भिद्यते हृदयग्रन्थिच्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति ।

८ "इति कापिलेये" इति क्वचित् ।

९ प्र. पाठे "इति च" इति न पठ्यते । क्वचित् चकारविरहितं केवलं "इति"पदं पठ्यते ।

१० बहूनां विदधाति" इति प्र. पाठः ।

११ "मदन्ति । यत्र पूर्वे" इति प्र. पाठः ।

"मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेत्", "बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु", "नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह" इत्यादि च मोक्षधर्मे[१]। "भेददृष्ट्याऽभिमानेन पश्यन्तो यान्ति तत्पदम्" इत्यादि वायुप्रोक्ते[२]। "अनुपपत्तेस्तु न शारीरः", "भेदव्यपदेशाच्च[३]", "शारीरश्चोभयेऽपि हि भेदेनैनमधीयते", "पृथगुपदेशात्" इत्यादि च।

सत्यत्वं च भेदस्योक्तं भाल्लवेयश्रुतौ[४]—

"स्थाणुर्होच्चक्राम स प्रजापतिमुवाच। कोऽसि के स्म[५] कः स इति। स होवाच योऽस्मि ये स्थ यः स इति। अथ हैनमुपाक्रोशत्। सत्यं भिदा सत्यं भिदा सत्यं भिदेति। मैवारुवण्यो[६] मैवारुवण्यो मैवारुवण्य इति" इति। "सत्यमेनम्—", "सत्यः सो अस्य[७]—" इति चोक्तम्।

महासंहितायां च—

"त्रिविधं जीवसङ्घं च परमात्मानमद्वयम्[८]। तेषां भेदं च ये सत्यं विदुर्मोहविवर्जिताः। ते यान्ति परमं स्थानं विष्णोरेवाचलं ध्रुवम्। जीवेश्वरभिदां भ्रान्तिं केचिदाहुरपण्डिताः। अनारम्भं[९] तमो यान्ति परमात्मविनिन्दनात्। पराधीनश्च बद्धश्च स्वल्पज्ञानसुखेहितः। अल्पशक्तिः सदोषश्च जीवात्माऽनीदृशः परः। यो वदाति तयोरैक्यं[१०] किं तेनादुष्कृतं कृतम्। अन्तर्याम्यैक्यवाचीनि[११] वचनानीह यानि तु। तानि दृष्ट्वा भ्रमन्तीह[१२] दुरात्मानोऽल्पबुद्धयः[१३]। अस्यस्मित्वमहंस्वात्मेत्यभिदागोचरो यतः[१४]। सर्वान्तरत्वात् पुरुषस्त्वन्तर्यामी नियामयन्। अतो भ्रमन्ति वचनैरासुरा[१५]

---

१ "इति मोक्षधर्मे" इति प्र. पाठः। "इत्यादि मोक्षधर्मे" इति क्वचित्।

२ "इति वायुप्रोक्ते" इति क्वचित्।

३ "भेदव्यपदेशात्" इतीयदेव क्वचित्।

४ "सत्यं चोक्तं भाल्लवेयश्रुतौ" इत्येकस्मिन् प्राचीनकोशे।

५ "के ष्म" इति क्वचित्। कस्त्वं के वयं कश्च भगवान्, किं भिन्ना उताभिन्नाः सर्वे इति रुद्रप्रश्नः। यादृशोऽहं यादृशा यूयं यादृशोऽपिच भगवान् तेते धर्माः सत्या एवेति भेद एव सत्य इत्युत्तरम्।

६ क्वचित् कोशे "मैवाऽरुवण्यः" इति सकृदेव पठ्यते। क्वचिच्च द्विः। प्रतनतमे च त्रिरेव।

७ प्र. पाठे "सत्यः सो अस्य महिमा" इतीयान् पठ्यते।

८ "परमात्मानमव्ययम्" इति प्र. पाठः।

९ "अनारतम्" इति प्र. पाठः।

१० "वदता तु तयोरैक्यम्" इति प्र. पाठः। "यो वदेत तयोरैक्यम्" इति च कोशेषु पठ्यते। "वदाति" इति तु प्रतनतरकोशे। वदाति सतात्पर्यं वदतीत्यर्थः। "आधिक्येऽधिकम्" इति वचनात्। भूयांसश्चैतादृशाः प्रयोगा भवन्ति पुराणेषु ग्रन्थेषु।

११ "–ऐक्यवादीनि" इति क्वचित्।

१२ "भवन्तीह" इति क्वचित्।

१३ "अल्पचेतसः" इति प्र. पाठः।

१४ "अभिधागोचरो यतः" इति प्र. पाठः। क्वचित् कोशेषु च तथा। प्राचीनपाठे सर्वान्तरत्वादभिदाया गोचरः। अन्तर्याम्यैक्यवाचीनीत्युपक्रमात्। सर्वान्तरत्वाद् याऽभिदा श्रुतिपठिता तां सर्वरूपत्वादेवाभिदामज्ञा मन्यन्ते।

१५ "वचनैरसुराः" इति क्वचित्।

मोहतत्परैः । तन्मोहने परा प्रीतिर्देवानां परमस्य च । अतो महान्धकारेषु पतन्त्यज्ञानमोहिताः" इत्यादि ॥ * ॥

सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तै-
र्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति[1] सञ्ज्ञाः
श्रेयांसि तत्र खलु सत्त्वतनौ नृणां[2] स्युः ॥ २४ ॥

विष्णोरेव त्रिसञ्ज्ञाः । वामनपुराणे च[3]—

"ब्रह्मविष्णवीशरूपाणि त्रीणि विष्णोर्महात्मनः । ब्रह्मणि ब्रह्मरूपः स[4] शिवरूपी शिवे स्थितः । पृथगेव स्थितो देवो विष्णुरूपो[5] जनार्दनः" इति ।

त्रयोऽपि गुणा विष्णवाश्रयाः[6] । तथाऽपि सत्त्वतनौ जीवे श्रेयांसि स्युः ॥ * ॥

पार्थिवाद्[7] दारुणो धूमस्तस्मादग्निस्त्रयीमयः ।
तमसस्तु रजस्तस्मात् सत्त्वं यद् ब्रह्मदर्शनम् ॥ २५ ॥

मेघरूपत्वाद् धूम उत्तमः ॥ * ॥

---

१ "हरिविरिञ्चिहरेति-" इति पाठान्तरम् ।

२ "सत्त्वतनोर्नृणाम्" इत्यर्वाचीनः पाठः ! सत्त्वप्रवर्तकाद् विष्णोरेव श्रेयांसि स्युः । न रजस्तमःप्रवर्तकाभ्यां ब्रह्मरुद्राभ्यामिति हि व्याचक्षते । असङ्गतमिदम् । नह्यत्र ब्रह्मरुद्रौ प्रसक्तौ । येन तयोर्निषेधः क्रियेत । किन्तु तद्वा-देपदाभ्यामपि निगदितः सत्त्वस्येव रजस्तमसोरपि प्रवर्तको विष्णुरेवेति ह्युच्यते । तेन सत्त्वतनोर्विष्णोरिति ग्राख्याने रजःप्रेरयिता तमःप्रेरयिता च विष्णुर्न श्रेयःप्रदः केवलं सत्त्वप्रेरक एव तथेति पर्यवसानं स्यात् । देतदनिष्टं परेषामपि । तस्मात् सत्त्वतनाविति पाठः सात्त्विके जीव इति चार्थः सुसङ्गतः ।

३ "वामने च" इति प्र. पाठः । "पाद्मपुराणे च" इति क्वचित् ।

४ "ब्रह्मरूपश्च" इति प्र. पाठः । "ब्रह्मरूपी सः" इति क्वचित् । "ब्रह्मरूपोऽसौ" इति च ।

५ "विष्णुरूपी" इति प्र. पाठः ।

६ "त्रयो गुणा विष्णवाश्रिताः" इति क्वचित् । कोशान्तरे चेदं वाक्यं न पठ्यते । उत्तरवाक्येऽपि "तथा सत्त्वतनौ–" इत्याद्यपिशब्दविरहितमेव पठ्यते ।

७ पार्थिवात् काष्ठादान्तरिक्षो मेघात्मा धूमस्ततोऽपि स्वर्ग्योऽग्निस्त्रयीमय उत्तमः । एवमूर्ध्वगतिहेतुत्वात्तमसो रज उत्तमं रजसोऽपि सत्त्वमिति । "यद्यपि धूमेनाऽव्रियते वह्निः । तथाऽपि मेघरूपधूमः दीपाच्छादकदारुफलकवत् प्रतिबन्धको न भवति विरळावयवत्वेन सूर्यचन्द्राद्याच्छादकत्वाभावात् । तेन दारुणः सकाशादुत्तमः" इति प्राचीनटीकायामर्थान्तरमप्युक्तम् । दृष्टान्ते दार्ष्टान्तिके चाभिमानिविवक्षया चेदमुत्तमत्वं बोध्यम ।

मुमुक्षवो घोरमूढान्[1] हित्वा भूतपतीनथ ।
नारायणकलाः शान्ता भजन्ति ह्यनसूयवः ॥ २७ ॥

सात्त्विकानां वासुदेवे भक्तिरुत्पद्यते ॥ * ॥

रजस्तमःप्रकृतयः समशीलान्[2] भजन्ति वै ।
पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः[3] ॥ २८ ॥

भूतेशप्रजेशादीन् ॥ * ॥

स एवेदं ससर्जाग्रे भगवानात्ममायया ।
सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः ॥ ३१ ॥

आत्ममायया स्वरूपेच्छया[4] । सदसद्रूपया प्रकृत्या च[5] ॥ * ॥

तया विलसितेष्वेषु गुणेषु गुणवानिव ।
अन्तःप्रविष्ट आभाति विज्ञानेन विजृम्भितः ॥ ३२ ॥

तया सदसद्रूपया । विज्ञानेन विजृम्भितः विज्ञानसम्पूर्णः[6] ॥ * ॥

---

१ "घोरान् भयङ्करान् मूढान् निस्सीमशक्तिरहितान् भूतपतीन् वीरभद्रभैरवादीन्" इति च । घोरा इति राजसा उच्यन्ते । मूढा इति तामसाः । "घोरान् राजसान् प्रजेशादीन् मूढान् तामसान् भूतेशादीन्" इत्यनन्ततीर्थीयम् ।

२ "समशीलाः" इत्यौत्तरेयः पाठः श्रीधरीयादिसमादृतः । रजस्तमःप्रकृतय इति तेषां भजकानां शीलस्य निगदितत्वात् तत्समशीलता भूतेशादिष्वेव वक्तव्येति समशीलानित्येव सुन्दरम् ।

३ "श्रिया सह ऐश्वर्यं प्रजां चेप्सन्ति" इति श्रीधरादयः । न वक्तव्यमेतत् । श्रियैश्वर्यप्रजेप्सव इत्येकं पदम् । 'श्र्यैश्वर्य-इति वक्तव्ये 'श्रियैश्वर्य-' इति तु क्षिप्रसंयोगविश्लेषो वैदिकव्यकरणसिद्धः वेदवैदिकेषु बहुलं प्रयोगसिद्धश्च । तद्यथा- त्रियम्बकमित्यादि सुवरित्यादि । "धनकनकादिसम्पत् श्रीः । छत्रचामरादिकमैश्वर्यम् । प्रजा सन्ततिः" इति प्राचीनम् । "श्रीकामाः प्रजापतीन् भजन्ति । ऐश्वर्यकामा भूतेशान् रुद्रादीन् भजन्ति । प्रजाकामाः पितॄन्" इति च । "श्रीकामा मायां देवीम्, ऐश्वर्यकामा भूतेशान्, प्रजाकामाः पितॄन् प्रजापतींश्च भजन्ति" इति यादवेन्द्रतीर्थीयम् ।

४ "स्वेच्छया" इति पाठान्तरम् । "परप्रेरणं विनेत्यर्थः" इति यादवेन्द्रतीर्थीयम् ।

५ "प्रकृत्याऽपि" इति क्वचित् । इदमप्यात्ममाययेत्यस्य व्याख्यानान्तरमात्माधीनया माययेति । "आत्ममायया स्वेच्छया, सदसद्रूपया स्थूलसूक्ष्मरूपया गुणमय्या त्रिगुणविकारया आत्ममायया आत्माधीनया जडप्रकृत्या च" इत्यनन्ततीर्थीयम् ।

६ "विज्ञानेनैव सम्पूर्णः" इति प्र. पाठः ।

असौ गुणमयैर्भावैर्भूतसूक्ष्मेन्द्रियात्मभिः ।
स्वनिर्मितेषु निर्विष्टो भुङ्क्ते भूतेषु[1] तद्गुणान् ॥ ३४ ॥

तद्गुणानेव भुङ्क्ते । न दोषान् ।

"सर्वत्र सारभुग् देवो नासारं स कदाचन" इति वामनपुराणे ।

"अनश्नन्—" इत्यशुभापेक्षया परवशत्वापेक्षया क्लृप्त्यपेक्षया च—

"अक्लृप्त्या वै[2] स्वतन्त्रत्वादशुभस्य च वर्जनात् । अभोक्ता शुभभोक्तृत्वाद् भोक्तेत्येव च तं विदुः । अन्यूनानधिकत्वाच्च पूर्णः स्वानन्दभोजनात् । विरागाच्च परस्यास्य भोक्तृत्वप्रतिषेधनम्" इति स्कान्दे ॥ * ॥

इति प्रथमस्कन्धे द्वितीयोऽध्यायः

जगृहे पौरुषं रूपं भगवान् महदादिभिः ।
सम्भूतं षोडशकलमादौ लोकसिसृक्षया ॥ १ ॥

व्यक्त्यपेक्षया जगृह इति[3] । तथाहि तन्त्रभागवते[4]—

"अहेयमनुपादेयं यद् रूपं नित्यमव्ययम् । तदेवापेक्ष्य[5] रूपाणां व्यक्तिमेव जनार्दनः । अगृह्णाद् व्यसृजच्चेति कृष्णरामादिकां[6] तनुम् । पठ्यते भगवानीशो मूढबुद्धिव्यपेक्षया । तमसा ह्युपगूढस्य यत् तमःपानमीशितुः । एतत् पुरुषरूपस्य ग्रहणं समुदीर्यते । कृष्णरामादिरूपाणां लोकव्यक्तिव्यपेक्षया[7]" इति ।

---

१ भूतेषु ब्रह्मादिस्तम्बपर्यन्तानां देहेषु निर्विष्टः नितरां प्रविष्टः । निर्विष्ट इति प्रयोगविशेषाच्च गुणानेव भुङ्क्ते न दोषानिति सूचितम् । रमणं हि निर्वेशः । "निर्वेश उपभोगः स्यात्" इत्यभिधानम् । अन्यथा निविष्ट इत्येवावक्ष्यत् ।

२ "अक्लृप्त्या च" इति प्र. पाठः ।

३ अत्र जीवगोस्वामी—"जगृहे प्राकृतलये स्वस्मिन् लीनं सत् प्रकटतया स्वीकृतवान्" इति । विश्वनाथस्तु महदादिभिर्लोकसिसृक्षया सम्भूतं रूपं जगृहे इत्यन्वयं विवक्षित्वा व्याचख्यौ—"सम्यग्भूतं परमसत्यं पूर्वमपि सदैव स्वरूपेण स्थितमेव रूपं जगृहे लोकसृष्ट्यर्थमुपादत्त । ग्रहणस्य विद्यमानवस्तुविषयत्वात् । घटस्याविद्यमानत्वे घटं जग्राहेति प्रयोगादर्शनाच्च । राजा सेनान्यं दिग्विजिगीषया स्वसङ्गे जग्राहेतिवत्" इत्यादि । सर्वेऽप्येतेऽविरुद्धा अर्था ग्राह्याः ।

४ "जगृह इति । तन्त्रभागवते" इति क्वचित् ।

५ "स एवापेक्ष्य" इति प्र. पाठः । प्राचीनपाठे त्वयमर्थः—यन्न हातुमुपादातुं च शक्यं तदेव हि शरीरं नित्यमित्युच्यते । नित्यरूपश्च भगवान् । तस्माद् रूपाणां व्यक्तिमेवापेक्ष्य तथा पठ्यते भगवान् ।

६ "विष्णुरामादिकाम्" इति क्वचित् ।

७ "लोकव्यक्तिमपेक्षया" इति प्र. पाठः ।

महदादिभिः सम्भूतं अन्तर्गतमहदादि[१]। न महदादिशरीरम्। षोडशकलम्[२]—"यस्मिन्नेताः षोडशकलाः प्र भवन्ति" इति हि श्रुतिः[३]।

"यत्किञ्चिदिह लोकेऽस्मिन्[४] देहबद्धं विशाम्पते। सर्वं पञ्चभिराविष्टं भूतैरीश्वरबुद्धिजैः। ईश्वरो हि महद् भूतं[५] प्रभुर्नारायणो विराट्। भूतान्तरात्मा विज्ञेयः सगुणो निर्गुणोऽपि हि[६]। भूतप्रळयमव्यक्तं[७] शुश्रूषुर्नृपसत्तम" इति मोक्षधर्मे। "नाऽसीदहो न रात्रिरासीन्न सदासीत्[८] तन्महद्वपुस्तदाऽभवद् विश्वरूपं[९] सा विश्वरूपस्य रजन्ती[१०]" इति च[११] भाल्लवेयश्रुतिः। "न तस्य प्राकृता मूर्तिर्मांसमेदोस्थिसम्भवा। न योगित्वादीश्वरत्वात् सत्यरूपाच्युतो विभुः[१२]" इति वाराहे। "सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः। हानोपादानरहिता नैव प्रकृतिजाः क्वचित्। परमानन्दसन्दोहा ज्ञानमात्राश्च सर्वशः[१३]। सर्वे सर्वगुणैः पूर्णाः सर्वदोषविवर्जिताः[१४]। अन्यूनानधिकाश्चैव गुणैः सर्वैश्च सर्वतः। देहिदेहभिदा चात्र[१५] नेश्वरे विद्यते क्वचित्। तत्स्वीकारादिशब्दस्तु हस्तस्वीकारवत् स्मृतः। वैलक्षण्यान्नवा तत्र ज्ञानमात्रार्थमीरितम्[१६]। केवलैश्वर्यसंयोगादीश्वरः प्रकृतेः परः। जातो गतस्त्विदं रूपं तदित्यादि

---

१ क्रमसन्दर्भेऽप्येवमेवोक्तम्—"महदादिभिः सम्भूतं मिलितम्। अन्तर्भूतमहदादितत्त्वमित्यर्थः। 'सम्भूयाम्भोधिमभ्येति महानद्या नगापगा' इत्यादौ हि सम्भवतिर्मिलनार्थः। तत्र हि महदादीनि लीनान्यासन्निति। तदेवम्—'विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः। एकं तु महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम्। तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते' इति नारदीयतन्त्रादौ महत्स्रष्टृत्वेन यत् प्रथमं पुरुषाख्यं रूपं श्रूयते तदेव जगृह इति प्रतिपादितम्" इत्यादि। "महदादिभिः सम्भूतं सहभूतं प्रळयकाले स्वोदरनिविष्टमहदादिदेवतायुक्तम्। षोडशकलं षोडशकलाभिमानिदेवतासहितम्" इत्यनन्ततीर्थाः। अण्डसंस्थितं रूपमेतदिति च प्राचीनटीकाकाराः। महतः स्रष्टृ अण्डसंस्थितं चेति पुरुषाख्यं रूपद्वयमप्यत्र सङ्कलय्योक्तमिति प्रतीयते।

२ क्वचित् "षोडशकलम्" इति न पठ्यते।

३ "इति श्रुतिः" इति प्र. पाठः।

४ "लोके वै" इति प्र. पाठः। प्राचीनपाठे–इहेति स्वपदमेव विवृतं लोकेऽस्मिन्निति।

५ "ईश्वरो हि जगत्स्रष्टा" इति क्वचित्।

६ "निर्गुणोऽपि च" इति प्र. पाठः।

७ "भूतप्रकृतिरव्यक्तम्" इति क्वचित्। भूतलयकारणं मूलप्रकृतिरपि तस्य शुश्रूषुः।

८ "नासदासीत्" इति प्र. पाठः प्रामादिकः। सत् कार्यं नाऽसीदिति हि वक्तव्यम्।

९ "तन्महदभवद्विश्वरूपम्" इति क्वचित्।

१० "रजनी" इति प्र. पाठः। रञ्ज रागे। पचादिः। तेन रजन्तीत्यपि रजनीत्येवार्थः।

११ "इति भाल्लवेयश्रुतिः" इति प्र. पाठः।

१२ "सत्यरूपोऽच्युतो विभुः" इति प्र. पाठः।

१३ "सर्वतः" इति क्वचित्।

१४ सर्वे भेदविवर्जिताः" इति प्र. पाठः। "सर्वभेदविवर्जिताः" इत्यपि पठ्यते।

१५ "चैव" इति प्र. पाठः।

१६ "ज्ञानमात्रमितीरितम्" इति क्वचित्।

व्यवह्रयते[१]" इति महावराहे[२]। "एकमेवाद्वितीयं नेह नानाऽस्ति किञ्चन" इति[३],
"एवं धर्मान् पृथक् पश्यन्" इत्यादि च ।

तस्यैवास्थूल[४]त्वाद्यैश्वर्ययोगात् । तथाच कौर्मे—

"अस्थूलश्चानणुश्चैव[५] स्थूलोऽणुश्चैव सर्वतः । अवर्णः सर्वतः प्रोक्तः श्यामो रक्तान्तलोचनः । ऐश्वर्ययोगाद् भगवान् विरुद्धार्थोऽभिधीयते । तथाऽपि दोषाः परमे नैवाऽहार्याः कथञ्चन । गुणा विरुद्धा अपितु समाहार्यास्तु[६] सर्वतः" इति ।

विष्णुधर्मोत्तरे च—

"गुणाः सर्वेऽपि युज्यन्ते ह्यैश्वर्यात् पुरुषोत्तमे । दोषाः कथञ्चिन्नैवात्र युज्यन्ते परमो हि सः । गुणदोषौ माययैव केचिदाहुरपण्डिताः । न तत्र माया मायी वा[७] तदीयौ तौ कुतो ह्यतः । तस्मान्न मायया सर्वं सर्वमैश्वर्यसम्भवम् । अमायो हीश्वरो यस्मात् तस्मात् तं परमं विदुः" इति ॥ * ॥

यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः ।
तद् वै[८] भगवतो रूपं विशुद्धं सत्त्वमूर्जितम् ॥ ३ ॥

यस्यावयवसंस्थानैः[९] । "नाभ्या आसीदन्तरिक्षम्—" इत्यादि । सत्त्वं ज्ञानबलरूपम्[१०]—
"बलज्ञानसमाहारः सत्त्वमित्यभिधीयते" इति मात्स्ये ॥ * ॥

एतन्नानावताराणां निधानं[११] बीजमव्ययम् ।
यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ॥ ५ ॥

---

१ "व्यवक्ष्यते" इति प्र. पाठः प्रामादिक एव । व्यवह्रयते व्यवह्रियते । छान्दसं रूपम् ।

२ "महावाराहे" इति प्र. पाठः ।

३ प्र. पाठे "इति"शब्दो न पठ्यते ।

४ "तस्यैव स्थूल–" इत्यादि क्वचित् ।

५ "अस्थूलः सोऽनणुश्चैव" इति क्वचित् ।

६ "सामाहार्याश्च" इति प्र. पाठः ।

७ "माया मायावी" इति प्र. पाठः ।

८ "जगृहे पौरुषं रूपमित्यत्र प्रस्तुतं परमपुरुषाख्यं रूपम्, यस्याम्भसि शयानस्येत्यत्र प्रतिपादितं पद्मनाभाख्यं रूपम् । यस्यावयवसंस्थानैरित्यत्र प्रतिपादितं पुरुषाख्यं रूपमिति परमपुरुषपद्मनाभपुरुषाख्यमेतद् रूपत्रयमपि विशुद्धं निर्दोषम्, ऊर्जितं सत्त्वं वै सम्पूर्णबलज्ञानादिसर्वसाधुगुणसमुदायरूपं हि" इत्यनन्ततीर्थीयम् । "लोकविस्तरः यस्यावयवसंस्थानैः नाभ्यादिज्ञानरूपावयवैः कल्पितः उत्पादितः स्थापितश्च तद् भगवतः रूपं सत्त्वं बलज्ञानसमाहाररूपम् । जडमिश्रितमिति भ्रान्तिवारणाय विशुद्धमिति । अत एव ऊर्जितमविनाशि" इति यादवेन्द्रतीर्थीये तु केवलपुरुषरूपपरतयैतद् व्याख्यातम् ।

९ "यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः" इति समग्रं पूर्वार्द्धं क्वचित् पठ्यते ।

१० "सत्त्वं साधुगुणत्वं ज्ञानबलरूपं च" इति प्र. पाठः । "ज्ञानबलरूपं वा" इति क्वचित् ।

११ "एतत् क्षीरोदार्णवशायि पद्मनाभाभिधं रूपं नानावताराणां मत्स्यादीनां बीजं व्यञ्जकम् । नानावतारास्तत एवाविर्भवन्तीति यावत् । निधानं च । निधीयन्तेऽस्मिन्निति निधानम् । नानावतारा अस्मिन्नेकीभवन्ति चेत्यर्थः" इति प्राचीनम् ।

निधानम्, अत्रैकीभवन्त्यन्त[1] इति । अंशांशेन सामर्थ्यैकदेशेन । ब्राह्मे च—
"यच्छक्त्येकांशसम्भूतं[2] जगदेतच्चराचरम्" इति ॥ * ॥

स एव प्रथमं देवः कौमारं सर्गमाश्रितः ।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम् ॥ ६ ॥

"कुमारो नाम[3] भगवान् स्वयं स्वस्मादजायत । दिदेश ब्रह्मणे ब्रह्म ब्रह्मचर्ये स्थितो विभुः । यस्मात् सनत्कुमारश्च ब्रह्मचर्यमपालयत् । यः स्थाणोः स्थाणुतां प्रादाद् भगवानव्ययो हरिः" इति ब्राह्मे ॥ * ॥

तृतीयमृषिसर्गं[4] वै देवर्षित्वमुपेत्य सः ।
तत्र[5] सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥ ८ ॥

"अवतारस्तृतीयोऽस्य देवर्षिः प्रथितो दिवि[6] । महिदासस्त्वैतरेयो यस्तन्त्रं नारदेऽवदत्" इति च ॥ * ॥

तुर्यं[7] धर्मकलासर्गे नरनारायणावृषी ।
भूत्वाऽऽत्मोपशमोपेतमकरोद् दुश्चरं तपः ॥ ९ ॥

धर्मकलासर्गः धर्मे स्वांशावतारः[8] । लोकदृष्ट्याऽऽत्मशमोपेतम् ॥ * ॥

पञ्चमः कपिलो नाम[9] सिद्धेशः कालविप्लुतम् ।
प्रोवाचासुरये साङ्ख्यं तत्त्वग्रामविनिर्णयम् ॥ १० ॥

---

१ "अत्रैकीभवन्त्यन्तत इति" इति प्र. पाठः । "अत्रैकीभवन्त्यत इति" क्वचित् ।

२ "यच्छक्त्यंशांशसम्भूतम्" इति क्वचित् ।

३ सनत्कुमार इत्यर्थः । सनकादिष्वेकः सनत्कुमारोऽस्ति । स तु भिन्नः भगवताऽनुविष्टः । अयं तु ततः प्राक्तनः भगवतोऽवतार इत्याशयः । एतेन "कौमारं चतुःसनरूपम्" इत्यादि वदन्तो भ्रान्ताः ।

४ "ऋषेर्विशालनाम्नः सकाशात् सर्गमवतारं महिदासत्वमुपेत्य" इत्यनन्ततीर्थीयम् ।

५ "तन्त्रम्" इत्यर्वाचीनः पाठः ।

६ "भुवि" इति क्वचित् । देवर्षिपदभ्रान्त्या 'नारदावतारोऽयम्' इति व्याख्यातारोऽनेन निराकृताः ।

७ "तुर्ये" इति क्वचित्पठ्यते । "अत्र तुर्यमित्येकवचनेन नर आवेशावतार इति ज्ञापयति" इति यादवेन्द्रतीर्थाः । वल्लभाचार्योऽप्याह—"नारायणोऽवतारः । नरे आवेशः" इति ।

८ "धर्मस्वांशावतारः" इति च पाठान्तरम् । धर्मात् यमात् स्वांशावतारः, धर्मेण स्वांशावतारः इत्यादि च व्याचक्षते ।

९ "कपिलो नाम कपिलवासुदेव इति प्रख्यातः" इत्यनन्ततीर्थाः ।

3

तन्त्रसाङ्ख्यं[१] वेदानुसारि । पाद्मे च—

"कपिलो वासुदेवाख्यस्तन्त्रसाङ्ख्यं[१] जगाद ह । ब्रह्मादिभ्यश्च देवेभ्यो भृग्वादिभ्यस्तथैव च । तथैवाऽसुरये सर्ववेदार्थैरुपबृंहितम्[२] । सर्ववेदविरुद्धं च कपिलोऽन्यो जगाद ह । साङ्ख्यमासुरयेऽन्यस्मै कुतर्कपरिबृंहितम्[३]" इति[४] ॥ * ॥

षष्ठमत्रेरपत्यत्वं[५] वृतः प्राप्तोऽनसूयया ।
आन्वीक्षिकीमळर्काय[६] प्रह्लादादिभ्य ऊचिवान् ॥ ११ ॥

आन्वीक्षिकीं तत्त्वविद्याम्—

"आन्वीक्षिकी कुतर्काख्या तथैवाऽन्वीक्षिकी परा[७]" इति मात्स्ये ॥ * ॥

ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः[८] ।
दुग्धथानोषधीर्विप्रास्तेनायं स उशत्तमः ॥ १४ ॥

पृथुशरीराविष्टं रूपम्[९]—

"आविवेश पृथुं देवः शङ्खी चक्री चतुर्भुजः" इति हि पाद्मे[१०] ।

उश इच्छायाम् । सत्यकामः ॥ * ॥

---

१ "तन्त्रं साङ्ख्यम्" इति प्र. पाठः । वेदपरतन्त्रं साङ्ख्यं तन्त्रसाङ्ख्यम् । वेदविरोधिसाङ्ख्यव्यावृत्तये चैतद् वक्तव्यमित्याह—वेदानुसारीति ।
२ "सर्ववेदार्थपरिबृंहितम्" इति क्वचित् ।

३ तदेतन्निम्बार्कमतानुयायिना शुकदेवेनाप्युक्तं सिद्धान्तप्रदीपे— "आसुरये शिष्याय । हेयसाङ्ख्यप्रवर्तकोऽन्य इत्याकरे स्थितम्" इति ।
४ "इति च" इति क्वचित् ।

५ "षष्ठे अत्रेरपत्यत्वम्" इति प्र. पाठः प्रामादिकः सर्वव्याख्यानविरुद्धश्च ।

६ "अळर्काय अळर्काख्यराजर्षये प्रह्लादादिभ्यश्च" इत्यनन्ततीर्थाः ।

७ अनुमानेन केवलं यत्र तत्त्वानीक्ष्यन्ते साऽऽन्वीक्षिकी कुतर्काख्या । वेदाद्यनुसारेण च यत्र तत्त्वानीक्ष्यन्ते सा सत्तर्कविद्या मुख्याऽऽन्वीक्षिकी ।

८ "पार्थवं वपुः" इति क्वचित् पाठः । "पार्थिवं वपुः" इत्येव सर्वसम्मतः प्राचीनः पाठः । "पृथुत्वात् पृथिव्यां कृतत्वात् पार्थिवं वपुः पृथ्वाख्यचक्रवर्तिजीवशरीरं भेजे आविवेश" इत्यनन्ततीर्थीयम् । "पार्थिवं वपुः राजदेहं पृथुचक्रवर्तिनो देहमित्यर्थः । भेजे अंशेनाऽविष्टवान्" इति यादवेन्द्रतीर्थाः ।

९ "पृथुशरीराविष्टरूपम्" इति क्वचित् । पार्थिवस्य राज्ञ इदं पार्थिवं वपुः राजशरीरमिति मूलस्य तात्पर्यकथनमिदम् । प्राचीनटीकासु तथा व्याख्यातत्वात् । प्रकरणबलादेव हि स राजा पृथुरिति सिद्ध्यति । अथवैवं व्याख्येयम्—पृथोरिदं पार्थवं तदेव पार्थिवम् । पृथुशरीराविष्टम् । तृतीयोऽतिशये । पृथुनाम्नो भगवतः सन्निधानादेव हि पृथो राज्ञः सर्वक्षत्रातिशायितेति । अयमावेशावतार इति परैरप्युक्तम्— "पार्थिवं पृथोः सम्बन्धि अंशेनानुप्रविष्टम् । पृथ्वाख्यजीवानुप्रवेशेनावतीर्ण इत्यर्थः" इति वीरराघवः । "आवेशावतारयोरविशेषेण निरूपणम् । कार्यकाले सङ्क्रमणमावेशः" इति सुबोधिनीकारः ।

१० "इति पाद्मे" इति प्र. पाठः ।

ततः सप्तदशे जातः सत्यवत्यां पराशरात् ।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥ २१ ॥

रामात् पूर्वमप्यस्ति व्यासावतारः—

"तृतीयं युगमारभ्य व्यासो बहुषु[१] जज्ञिवान्" इति कौर्मे[२] ॥ * ॥

एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ।
रामकृष्णाविति भुवो भगवानहरद् भरम् ॥ २३ ॥

आवेशो बलभद्रे[३] ।

"शङ्खचक्रभृदीशेशः श्वेतवर्णो महाभुजः । आविष्टः श्वेतकेशात्मा शेषांशं रोहिणीसुतम्" इति वाराहे[४] ॥ * ॥

ततः कलौ सम्प्रवृत्ते[५] सम्मोहाय सुरद्विषाम् ।
बुद्धो नाम्ना जिनसुतः[६] कीकटेषु[७] भविष्यति ॥ २४ ॥

"मोहनार्थं दानवानां बालरूपी पथि स्थितः[८] । पुत्रं तं कल्पयामास मूढबुद्धिर्जिनः स्वयम् । ततः सम्मोहयामास जिनाद्यानसुरांशकान् । भगवान् वाग्भिरुग्राभिरहिंसावाचिभिर्[९]हरिः" इति ब्रह्माण्डे ॥ * ॥

---

१ वैवस्वतमन्वन्तरस्य तृतीयं द्वापरमारभ्य बहुषु । तृतीयद्वापरे, सप्तमद्वापरे, षोडशद्वापरे, पञ्चविंशद्वापरे, अष्टाविंशद्वापरे चेत्यर्थः । तथाच रामावतारात् पूर्वं चतुर्वारं व्यासावतार इति तस्य पूर्वं निर्देशः । एतेन "प्रथमं द्वितीयमित्यादिशब्दा निर्देशमात्रविवक्षया, नावतारक्रमविवक्षया" इति वदन्तः परास्ताः । भागवत एव क्रमविवक्षा स्फुटं प्रतीयते । तथाह्युत्तरश्लोके "चक्रे वीर्याण्यतः परम" इति व्यासावतारादनन्तरं रामावतार इति स्फुटमुक्तम् ।

२ "इति हि कौर्मे" इति क्वचित् ।

३ नरनारयणावेव हि रामकृष्णौ । तेन नर इव बलभद्रे शेषावतारे भगवत आवेशः । नारायणः कृष्णश्च भगवानेव स्वयमिति ।

४ "महावाराहे" इति प्र. पाठः ।

५ "ततः कलौ सम्प्रवृत्ते कलियुगपूर्वसन्ध्यायां सम्प्रवृत्तायां सत्याम् । कलियुगप्रारम्भ इति यावत् । नतु कलियुगे । 'युगत्रयावतारत्वात् त्रियुगो विष्णुरुच्यते' इत्यभिधानात्" इत्यनन्ततीर्थाः । "कलौ युगे । कलाववतारं घटयति– सम्प्रवृत्त इति । आदिभाग इत्यर्थः" इति यादवेन्द्रतीर्थाः ।

६ "अञ्जनसुतः", "अजनसुतः" इति च पाठभेदः प्रामादिकः । यथाश्रुतं पठन्तोऽपि 'अजिनसुतः' इति पदं छिन्दन्तः शुकदेवादयोऽपि भ्रान्ताः ।

७ "कीकटेषु निन्दितेषु मगधदेशेषु" इति प्राचीनम् । "कीकटेषु मध्ये गयाप्रदेशे" इति च । "बुद्धो गयाख्येऽजनि" इति च भगवत्पादवचनम् ।

८ "बालरूपी परः स्थितः" इति क्वचित् पाठः ।

९ अहिंसावाचिभिर्वाग्भिरिति लिङ्गव्यत्ययच्छान्दसः । यथा महाभारततात्पर्यनिर्णये 'दाशोदिताभिर्वचोभिः' इति ।

अवतारा ह्यसङ्ख्येया हरेः सत्त्वनिधेर्द्विजाः ।
यथा विदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ २६ ॥

विदासिनः उन्नतात्, भिन्नाद् वा ।

"त्रिविधाः पुरुषा लोके नीचमध्यविदासिनः" इति ब्राह्मे । "चतुर्द्धा वर्णरूपेण[१] जगदेतद् विदासितम्" इति च ॥ * ॥

एते स्वांशकलाः[२] पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति[३] युगेयुगे ॥ २८ ॥

एते प्रोक्तावताराः[४] । मूलरूपी स्वयमेव[५] ।

"जीवास्तत्प्रतिबिम्बांशा वराहाद्याः स्वयं हरिः[६] । दृश्यते बहुधा विष्णुरैश्वर्यादेक एव तु"[७] इति ब्रह्मवैवर्ते ॥ * ॥

एतद् रूपं भगवतो ह्यरूपस्य चिदात्मनः ।
मायागुणैर्विरचितं महदादिभिरात्मनि ॥ ३० ॥

---

१ "वर्णभेदेन" इति क्वचित् ।

२ "एते चांशकलाः" इत्यौत्तरेयः पाठः । अत्रैवं प्राचीनटीका—"एते कौमारं सर्गमाश्रित इत्यादिना कल्की जगत्पतिरित्यन्तेनोक्ता अवताराः स्वांशकालाः स्वरूपांशावताराः । नत्वंशिनो भिन्ना इति स्वशब्दार्थः । नन्वत्यन्तभेदाभावेऽपि स्वांशः किं भिन्नाभिन्नः? नेत्याह—कृष्णस्तु भगवान् स्वयमिति । कृष्णः मेघवत् कृष्णवर्णः भगवान् पद्मनाभः स्वयं मूलरूप्येव । अवतारेभ्यो न भिन्नाभिन्न इत्यवधारणार्थस्तुशब्दः । अथवा नारसिंहादिवत् कृष्णो भगवान् पद्मनाभः कस्यांश इति शङ्कां परिहरति—स्वयमिति । मूलरूप्येवेत्यर्थः । कृष्णः पूर्णसुखः पद्मनाभः स्वयमुक्तावतारापेक्षया मूलरूपीत्यर्थः" इति । "पुंसः परमपुरुषस्य स्वांशकलाः स्वरूपांशा अवताराः । कलाशब्दोऽवतारवाची" इति च । वल्लभाचार्योऽप्यत्र संवदते—" यस्यांशाः पुरुषादयः स भगवान् कृष्ण इत्यर्थः" इति हि सुबोधिनी ।

३ "मृडयन्ति सुखयन्ति" इत्यनन्ततीर्थाः । "रक्षन्ति" इति यादवेन्द्रतीर्थाः । 'मृड रक्षणे' इति च पठनीयम् ।

४ "प्रोक्ता अवताराः" इति प्र. पाठः ।

५ "मूलरूपी कृष्णः स्वयमेव" इति प्र. पाठः । "कृष्णो मूलरूपी स्वयमेव" इति क्वचित् ।

६ स्वयं हरिरिति प्रमाणवाक्येन कृष्णस्तु भगवान् स्वयमित्येतद् व्याख्यातम् । यथा हरिरिति धर्मपुत्रावतारस्य नामापि मूलरूपे प्रयुज्यते तथा कृष्ण इत्यपि मूलरूपे युक्तमिति । यथा वासुदेव इति न केवलं वसुदेवसुतावतारः, यथा वा नारायण इति न केवलं धर्मसुतावतारः किन्तु पञ्चमूर्त्यादिः स्वयं भगवानप्युच्यते तथेहापि कृष्ण इति मूलरूप्येवोच्यते ।

७ "ऐश्वर्यादिक एव तु" इति प्र. पाठः प्रामादिकः ।

एतत् जडरूपम् ।

"नारायणवराहाद्याः परमं रूपमीशितुः । जैवं तु प्रतिबिम्बाख्यं जडमारोपितं[1] हरेः ।
एवं हि त्रिविधं तस्य रूपं विष्णोर्महात्मनः" इति पाद्मे ॥ * ॥

यथा[2] नभसि मेघौघा रेणुर्वा पार्थिवोऽनिले ।
एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥ ३१ ॥

दृश्यत्वं जडरूपत्वम् ।

"अविज्ञाय परं देहमानन्दात्मानमव्ययम् । आरोपयन्ति जनिमत् पञ्चभूतात्मकं जडम्"
इति स्कान्दे ॥ * ॥

अतः परं यदव्यक्तमव्यूढगुणबृंहितम् ।
अदृष्टाश्रुतवस्तुत्वात् स जीवो यः पुनर्भवः[3] ॥ ३२ ॥

अतः परं जडेश्वररूपयोः[4] परम् । अव्यूढगुणबृंहितम् । अनादिकाले कदाचिदप्यनपगत-सत्त्वादि[5]बृंहितम् । अदृष्टाश्रुतवस्तुत्वात् पुनर्भवः ॥ * ॥

यत्रेमे सदसद्रूपे[6] प्रतिषिद्धे स्वसंविदा ।
अविद्ययाऽऽत्मनि कृते इति तु ब्रह्मदर्शनम् ॥ ३३ ॥

अविद्यया जीवे कृते । परमेश्वरे प्रतिषिद्धे इति[7] ब्रह्मदर्शनम् ॥ * ॥

---

१ आरोपितमिति न मिथ्याभूतमित्यर्थः । यथ प्रतिमां दृष्ट्वा भगवान् दृष्ट इत्यज्ञा व्यवहरन्ति तद्वद् विकार-सम्पादकरूपरहितस्यापि हरेरज्ञलोकव्यवहाराश्रयेण इदं जगद् रूपमित्युच्यत इति ।

२ अत्रैवं प्राचीनटीका—"यथा नभसि मेघौघाः, अनिले वायौ पार्थिवो वा रेणुर्यथा सम्बद्धाः न विकारहेतव-स्तथा ब्रह्माण्डमीश्वरस्य न विकारापादकमिति । एवं सति द्रष्टरि दृश्यत्वं जडरूपत्वं विकारित्वमबुद्धिभिरारो-पितम्" इति । विश्वनाथोऽप्याह—"यथा नभसि आकाशे मेघसमूहः । अनिले च पृथ्वीविकारो रेणुः । तथा आत्मनि एतद् विराड्रूपमिति पूर्वेणान्वयः । मञ्चस्थः पुरुषो यथा मञ्च उच्यते तथा भगवति स्थितो विराडपि भगवानुच्यते । एवमेवाधिष्ठितधर्मो दृश्यत्वमपि भगवत्यारोपितम् । अबुद्धिभिः अल्पबुद्धिभिः" इति । यथा मेघधर्मान् नैल्यचलनादीन्, रेणुधर्मांश्च कालुष्यादीन् नभसि वायौ च भ्रान्त्या व्यवहरन्ति तथेति च व्याख्येयम् । "आरोपितं रूपं प्रतिमा" इत्यनन्ततीर्थीयम् ।

३ "यत् पुनर्भवः" इति च पाठान्तरम् । "यः यस्मिन् चेतने पुनर्भवः संसारो भवति" इति चार्थान्तरं प्राचीनटीकायाम् ।

४ "जडेश्वरयोः" इति प्र. पाठः । "जडरूपेश्वरयोः" इति च क्वचित् ।

५ "सत्त्वादिगुणबृंहितम्" इति प्र. पाठः ।

६ "सदसद्रूपे कार्यकारणरूपे दुःखाज्ञाने मूर्तामूर्ते वा" इति प्राचीनम्

७ क्वचित् "प्रतिषिद्ध इति" इत्यप्रगृह्यैव पठ्यते ।

यद्येषोपरता देवी माया[1] वैशारदी मतिः ।
सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते ॥ ३४ ॥

विशारदः परमेश्वरः । तन्मतिर्माया । यदा नैनं शोचयामीत्युपरता तदा सम्पन्न एव ॥ * ॥

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य[2] च ।
वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः[3] ॥ ३५ ॥

"अप्रयत्नात्[4] स्वतन्त्रत्वात् फलानां च विवर्जनात् । क्रियायाश्च स्वरूपत्वादकर्तेति च तं विदुः । कर्तृत्वं भ्रान्तिजं प्राहुरतत्तत्त्वविदो जनाः । ऐश्वर्यजं तु कर्तृत्वं सम्यक् तत्तत्त्ववेदिनः[5]" इति पाद्मे ॥ * ॥

इदं भागवतं नाम[6] पुराणं ब्रह्मसम्मितम् ।
उत्तमश्लोकचरितं चकार भगवानृषिः ॥ ४० ॥

"धर्मः कं शरणं गतः" इत्यस्य तमेव व्यासरूपिणामिति परिहार उच्यते– इदं भागवतमित्यादिना ॥ * ॥

इति प्रथमस्कन्धे तृतीयोऽध्यायः

---

१ "माया मायाख्या । 'मायेति भगवत्प्रज्ञा' इति श्रुतेः । विशारदो विविधविचित्रजगन्निर्माणादिपटुतरः परमेश्वरः । तदीया वैशारदी मतिरीश्वरबुद्धिः" इत्यनन्ततीर्थाः । यादवेन्द्रतीर्थीये त्वन्यथा व्याख्यातम्–"यदि यदा वैशारदी मतिः माया बन्धिका सती । माया ईश्वरेच्छा वा । उपरता नैनं शोचयामीत्येवंरूपा सम्पन्ना तदा वैशारदी मतिः । विशरदः परमेश्वरः तद्विषयिणी मतिः देवी प्रकाशमाना भवति । अज्ञानं निवर्तयतीत्यर्थः । तदा प्रयत्नविशेषं विना जीवः सम्पन्नः उद्रिक्तभक्त्या परमप्रसादेन च सम्पन्नः परमात्मनाऽपि सम्पन्नो भवति" इति । एते सर्वेऽप्यर्था भाष्यवचनादेव प्रतीयन्ते ।

२ "अजनस्य । देहे जात आत्मानं जातं मन्यते स जनः जीवः । तद्भिन्नस्य । अकर्तुः कर्मवश्यतया शुभाशुभकर्मकर्ता जीवस्तद्भिन्नस्य" इति नैम्बार्कः शुकदेवः । "अजनस्य जीववत् कर्मायत्तजननरहितस्य । अकर्तुस्तद्वदेव पुण्यपापात्मककर्मरहितस्य" इति वीरराघवः । "अजनस्य विकारप्रापकदेहसम्बन्धरहितस्य जन्मानि । अकर्तुः फलोद्देशेन करणरहितस्य कर्माणि । वेदगुह्यानि विक्षिप्य प्रतिपादितत्वात्, स्पष्टं ज्ञानाविषयान्, उपनिषत्प्रतिपाद्यानि वा, अयोग्यान् प्रति गोप्यानीति वा वर्णयन्ति" इत्यादि प्राचीनटीका ।

३ "हृत्पतेः लक्ष्म्याः प्राणवल्लभस्य" इत्यनन्ततीर्थाः । "हृदि स्थित्वा पालकस्य" इति यादवेन्द्रतीर्थाः ।

४ "अप्रियत्वात्" इति प्र. पाठः प्रामादिकः । ५ "सत्तत्त्ववेदिनः" इति क्वचित् ।

६ "भागवतं भगवदवतारचरितावेदकमत एव भागवतं नाम भागवतपुराणमिति लोके प्रख्यातम्" इत्यनन्ततीर्थाः ।

तस्य पुत्रो महायोगी समदृङ् निर्विकल्पकः ।
एकान्तगति[1]रुन्निद्रो गूढो मूढ इवेयते ॥ ४ ॥

निर्विकल्पकः[2] । मदीयं तदीयमिति भेदमपहाय सर्वमीश्वराधीनमिति स्थितः ।

"साम्यमीश्वररूपेषु सर्वत्र तदधीनताम् । पश्यति ज्ञानसम्पत्त्या विनिद्रो यः स योगवित्" इति ब्राह्मे ॥ * ॥

द्वापरे समनुप्राप्ते तृतीये युगपर्यये ।
जातः पराशराद् योगी वासव्यां कलया हरेः ॥ १३ ॥

तृतीये द्वापरे । युगपर्यवसाने प्राप्ते सति[3] ॥ * ॥

दुर्भगांश्च जनान् वीक्ष्य मुनिर्दिव्येन चक्षुषा ।
सर्ववर्णाश्रमाणां यद् दध्यौ चिरममोघदृक्[4] ॥ १७ ॥

नित्यज्ञानस्य चिरदृष्टिर्लोकदृष्ट्यपेक्षया[5]—

"सर्वज्ञोऽप्यज्ञवद् देवः सर्वशक्तिरशक्तिवत्[6] । प्रत्याययति[7] लोकानामज्ञानां मोहनाय च[8]" इति कौर्मे ॥ * ॥

---

१ "एकान्तमतिः" इति यादवेन्द्रतीर्थीयः पाठः । श्रीधरादिसर्वव्याख्यातृसम्मतः प्रचलितः पाठोऽपि स एव । अनन्ततीर्थीये विजयध्वजतीर्थीये च "एकान्तगतिः" इति । तथाह्यनन्ततीर्थीयम्—"सर्वोत्तमत्वादेकान्तो हरिः । तस्मिन् मनोगतिर्यस्यासौ तथा" इति । "एकान्तमतिः सर्वव्यापी परमात्मा स्वामीति धारणया स्थितः । एकः मुख्यः अन्तः निश्चयः परमात्मा सर्वस्वामीति निश्चयरूपा मतिर्यस्य सः" इति यादवेन्द्रतीर्थीयम् ।

२ अत्र विशेषः प्राचीनटीकायाम्–"विकल्पः विविधारोपः । इदं मदीयं इदं तदीयमिति जीवेषु स्वामित्वारोपः । तं करोतीति विकल्पकः । तस्मान्निर्गतः निर्विकल्पकः । जीवेषु स्थितो यः वस्तुस्वामित्वस्वातन्त्र्ययोरारोपः तद्रहितः सन्" इति । "अब्रह्मात्मकस्वतन्त्रवस्तुरहितः" इति वदन् वीरराघवोऽप्यत्र संवदते !

३ "युगे पर्यवसानं प्राप्ते सति" इति क्वचित् । युगेषु तृतीये द्वापरे युगे समनुप्राप्ते । तत्रापि युगपर्यये युगावांसने समनुप्राप्ते सतीत्यर्थः ।

४ अत्र बहवः पाठभेदाः– "सर्ववर्णाश्रमाणां यद् दध्यौ हितममोघदृक्" इति प्र. पाठः । "सर्ववर्णाश्रमाणां यद् दध्यौ चिरममोघदृक्" इति यादवेन्द्रतीर्थसम्मतः पाठः । तथाहि तद्वाक्यं– "सर्ववर्णाश्रमाणां यत् उपदेश्यं तत् दिव्येन चक्षुषा निर्दोषज्ञानकरणेन चिरं दध्यौ एवं दर्शयामास" इति । एतत्पक्षे मूले उपदेश्यमित्यध्याहारः । अनन्ततीर्थीयेऽपि तथैव पाठः—"सर्ववर्णाश्रमाणां यत् हितमिति शेषः । तत् चिरं दध्यौ" इति हि तद्व्याख्यानम् । "हितं सर्वाश्रमाणां यद् दध्यौ चिरममोघदृक्" इति विजयध्वजतीर्थसम्मतः पाठः ।

५ "नित्यज्ञानस्य चिद्दृष्टिर्लोकदृष्टिव्यपेक्षया" प्र. पाठः प्रमाद एव । एतेन प्रमाणश्लोकोऽयमिति भ्रान्त्या "चिद्दृष्टिः कादाचित्कदृष्टिः" इत्यादिव्याख्यानं च प्रमाद एवेति स्थितम् । भाष्यकारवचनमेवेदम्, न कौर्मम् । प्रचीनव्याख्यानदृशां स्फुटमिदम् । तथाहि विजयध्वजतीर्थीये–"सर्वज्ञस्य चिरध्यानमज्ञजनदृष्ट्यपेक्षया दुष्टमोहनाय च" इति । सर्वज्ञस्य चिरध्यानमज्ञजनदृष्ट्यपेक्षया" इति चानन्ततीर्थीयम् ।

६ "अशक्तवत्" इति प्र. पाठः ।   ७ "प्रत्यापयति" इति प्र. पाठः ।

८ "अज्ञानं मोहनाय च" इति मुद्रितः पाठः । प्रमाद एव । "अज्ञानां मोहनाय वै" इति क्वचित् । "दैत्यानां मोहनाय च" इत्यपि क्वचित् ।

स्त्रीशूद्रब्रह्मबन्धूनां[१] त्रयी न श्रुतिगोचरा ।
कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ।
इति भारतमाख्यानं कृपया मुनिना कृतम् ॥ २४ ॥

"भारतं ब्राह्मणादीनां वेदार्थपरिपत्तये[२] । तदेव वेदस्त्वन्येषां[३] नर्ते तत् कस्यचित् सुखम्" इति स्कान्दे ॥ * ॥

एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः ।
सर्वात्मकेनापि[४] यदा नातुष्यद्धृदयं ततः ॥ २५ ॥
नातिप्रसन्नहृदयः[५] सरस्वत्यास्तटे शुचौ ।
वितर्कयन् विविक्तस्थ इदं चोवाच[६] धर्मवित् ॥ २६ ॥

अतोषोऽनलम्बुद्धिः[७]—
"श्रुत्वा कथां न तुष्यामि हरेरव्यक्तकर्मणः" इति हि मात्स्ये[८] ।
अप्रसादश्च सैव[९]—
"कः प्रसन्नो भवेद् दिव्यां कथां शृण्वन् हरेः पराम्" इति च ॥ * ॥

धृतव्रतेन हि मया छन्दांसि गुरवोऽग्नयः ।
मानिता निर्व्यलीकेन गृहीतं चानुशासनम् ॥ २७ ॥

आचारापेक्षया धृतव्रतत्वादि परिपूर्णस्य ॥ * ॥

---

१ "—द्विजबन्धूनाम्" इति पाठान्तरम् ।

२ "–परिवित्तये" इति प्र. पाठः।

३ "तदेव वेदास्त्वन्येषाम्" इति प्र. पाठः ।

४ "सर्वात्मकेनापि भारतादिसर्वस्वरूपेणापि श्रेयःसाधनेन" इति प्राचीनम् ।

५ "नातिप्रसीदद्धृदयः" इत्यौत्तरेयाणां पाठः ।

६ "इति प्रोवाच", "इदं प्रोवाच" इति च पाठान्तरम् । इदं स्वगतं वच इति सर्वे व्याख्यातारः। यादवेन्द्रतीर्थीये तु–"निकटस्थं प्रीतिविषयं शिष्यं प्रति इदमुवाच" इति व्याख्यातम् ।

७ एतेन "नातुष्यत् न जहर्ष" इति व्याकुर्वन्तः परे परास्ताः।

८ "इति मात्स्ये" इति प्र. पाठः ।

९ "स एव" इति प्र. पाठः । सैव अनलम्बुद्धिरेव ।

अथापि बत मे देह्यो[१] ह्यात्मा चैवाऽऽत्मना विभुः ।
असम्पन्न इवाऽऽभाति ब्रह्मवर्चस्यसत्तमः[२] ॥ २९ ॥

देह्यः[१] देहरूपः । आत्मना विभुः स्वत एव व्याप्तः ।

"तस्य सर्वावतारेषु न विशेषोऽस्ति कश्चन । देहिदेहविभेदश्च[३] न परे विद्यते क्वचित् । सर्वेऽवतारा व्याप्ताश्च सर्वे सूक्ष्माश्च तत्वतः । ऐश्वर्ययोगाद् भगवान् क्रीडत्येवं जनार्दनः" इति महासंहितायाम् ।

अवतारप्रयोजनासम्पत्त्या असम्पन्न इव । ब्रह्मवर्चसयुक्तानामुत्तमः[४] ॥ * ॥

किंवा भागवता धर्मा न प्रायेण निरूपिताः ।
प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ॥ ३० ॥

पुनरपेक्षितत्वान्न प्रायेण निरूपिताः ।

"यथा तु[५] भारते देवो न तथाऽन्येषु केषुचित् । उच्यते न तथाऽपीशं जानन्त्यज्ञा जनार्दनम्" इति हि स्कान्दे[६] ॥ * ॥

तस्यैवं खिन्नमात्मानं[७] मन्यमानस्य खिद्यतः ।
कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतम् ॥ ३१ ॥

खेदोऽनलम्बुद्धिः—

---

१ "दैह्यः" इति प्र. पाठः । देह्य इत्येव च सर्वप्राचीनव्याख्यानसम्मतः पाठः । न क्वापि दैह्य इति । "देह्यः देह एव । देहरूप इत्यर्थः । आत्मा स्वरूपं, मनः, चेतना वा" इति यादवेन्द्रतीर्थाः ।

२ "ब्रह्मवर्चस्विसत्तमः" इति च पाठान्तरम् । "ब्रह्मवर्चसेन युक्ता ब्रह्मवर्चस्याः" इति प्राचीनम् । "ब्रह्मवर्चस्युशत्तमः" इति च केचित् पठन्ति । "ब्रह्मवर्चस्व्यसत्तमः" इति च कश्चित् पपाठ ।

३ "देहदेहिविभेदश्च" इति प्र. पाठः ।

४ एतेन सत्तम इत्येतदुत्तम इति व्याख्यातम् । "ब्रह्मवर्चसं वृत्ताध्ययनर्द्धिः । तद्युक्तानां सतां मध्ये उत्तमः" इति तु प्राचीनम् । एतेन भाष्यवचनेन "ब्रह्मवर्चसी, असत्तमः" इति पदं पठन्तः परे परास्ताः ।

५ "यथा हि" इति क्वचित् ।

६ "इति स्कान्दे" इति प्र. पाठः ।

७ "खिलमात्मानम्" इत्यौत्तरेयाणां पाठः । "खिन्नं शास्त्रकरणेनालम्बुद्धिरहितम्" इति प्राचीनटीका । यद्यपि खिन्नं मन्यमानस्य खिद्यत इति पुनरुक्तमिति भाति । एवं व्याख्येयम्—आत्मानं स्वेच्छयाऽलम्बुद्धिरहितं मन्यमानस्य, खिद्यतः अलम्बुद्धिरहितमिवाऽऽत्मानमज्ञानां दर्शयत इति । "खिन्नमसम्पूर्णं मन्यमानस्य, खिद्यतः पुनःपुनर्नालमिति निरूपयतः" इति चानन्ततीर्थीयम् । अत्र तु न पुनरुक्तिप्रसक्तिरिति ।

4

"अतुष्टिरप्रसादश्च खेदोऽतृप्तिस्तथैव च । अनलत्वं वदन्त्येते सर्वे पर्यायवाचकाः"
इति हि ब्राह्मे[१] ।

मन्यमानस्य स्वेच्छया ॥ * ॥

इति प्रथमस्कन्धे चतुर्थोऽध्यायः

पाराशर्य महाभाग भवतः कच्चिदात्मना ।
परितुष्यति शारीर आत्मा मानस एव वा[२] ॥ २ ॥

शारीरमानसयोरभेदादुभयथाऽपि युज्यते । स्वतन्त्रत्वादात्मनैव ह्यलम्बुद्धिः ॥ * ॥

जिज्ञासितमधीतं च ब्रह्म यत्तत् सनातनम् ।
तथाऽपि शोचस्यात्मानमकृतार्थ इव प्रभो ॥ ४ ॥

शोचसि प्रकाशयसि[३] । "अजस्रेण शोचिषा शोशुचानः" इति हि श्रुतिः[४] ॥ * ॥

अस्त्येव मे सर्वमिदं त्वयोक्तं तथाऽपि नाऽऽत्मा परितुष्यते मे ।
तन्मूलमव्यक्तमगाधबोधं[५] पृच्छामहे त्वाऽऽत्मभवात्मभूतम् ॥ ५ ॥

"ज्ञानशक्तिस्वरूपोऽपि ह्यज्ञाशक्तं वदेद्धरिः । अज्ञानां मोहनायेशस्तेन मुह्यन्ति मोहिताः" इति पाद्मे ॥ * ॥

यथा धर्मादयो ह्यर्था मुनिवर्यानुवर्णिताः ।
न तथा वासुदेवस्य महिमा ह्यनुवर्णितः[६] ॥ ९ ॥

धर्मादीनामल्पकथनेन[७] पूर्तिः । न वासुदेवमहिम्नोऽतिकथितस्यापि ॥ * ॥

---

१ "इति ब्राह्मे" इति प्र. पाठः ।

२ "शारीरः शरीररूपः मानसः मनोरूपो वा आत्मा स्वरूपम् । शरीरं मानसं चेति यावत्" इत्यनन्ततीर्थाः ।

३ एतेन "शोचसि शोचन्निव लक्ष्यसे" इति गौणार्थतया परव्याख्यानमनपेक्षितमिति सूचितम् ।

४ "इति श्रुतिः" इति च पाठः ।

५ "अगाधबुद्धिम्" इति च प्राचीनकोशेषु पाठान्तरम् । "अगाधबोधं बहुप्रज्ञम्" इति यादवेन्द्रतीर्थाः । "अतलस्पर्शार्णवसमबुद्धिम्" इत्यनन्ततीर्थाः ।

६ अत्र प्राचीनटीकायामर्थविशेषः– "धर्मादयः अर्थाः ज्ञातव्याः यथा एकदा वर्णिता ज्ञायन्ते । वासुदेवस्य महिमा तथा धर्मादिवत् एकदा बहुधा वाऽनुवर्णितः न सम्यग् ज्ञायते । अद्भुतत्वादिति भावः" इति ।

७ "–कथनेनापि" इति क्वचित् ।

न तद् वचश्चित्रपदं हरेर्यशो
जगत्पवित्रं न गृणीत कर्हिचित्[1] ।
तद् वायसं[2] तीर्थमुशन्ति मानसा
न यत्र हंसा न्यपतन् मिमङ्क्ष्या[3] ॥ १० ॥

वायसं तीर्थं वयोमात्रानुजीवि शास्त्रम् ॥ * ॥

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्[4] ।
कुतः पुनः शश्वदभद्रमीश्वरे नचार्पितं कर्म यदप्यकारणम्[5] ॥ १२ ॥

परोक्षज्ञानं न शोभते । अपरोक्षज्ञानं न भक्त्या विनोत्पद्यते ।

"यस्य देवे परा भक्तिः—", "यमेवैष वृणुते तेन लभ्यः—", "यद् वासुदेवशरणा विदुरञ्जसैव" इत्यादेः ॥ * ॥

अतो[6] महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः ।
उरुक्रमस्याखिलबन्धमुक्तये समाधिनाऽनुस्मर यद् विचेष्टितम् ॥ १३ ॥

शुचिश्रवाः विष्णुः । समाधिना समाधिभाषया । स्मरणं ग्रन्थकृतिः । "स्मरन्ति च" इत्यादेः ॥ * ॥

जुगुप्सितं धर्मकृतेऽनुशासनं[7]
स्वभावरक्तस्य महान् व्यतिक्रमः ।

---

१ "न यद् वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित्" इति प्र. पाठः । प्राचीनपाठे नञ्द्वयस्येत्थं योजना–यद् वचः हरेर्यशो न गृणीत तद् वचो न, वचनमेव न भवति । अशास्त्रमिति यावत् । अथवा तद्वचः न, निन्दितमित्यर्थः । निन्दार्थे नञ् । आद्योऽनन्ततीर्थाभिमतः । द्वितीयस्तु यादवेन्द्रतीर्थोदितः ।

२ "वयःशब्दः पिशाचवाचकः । वयोवत् पिशाचवद् वर्तत इति वायसः कामुकः । तन्मात्रोपादेयं वायसम् । यद्वा वयः देहानुबद्धः कालः तन्मात्रमुपजीव्य प्रवृत्तं कामशास्त्रं वायसम्" इति यादवेन्द्रतीर्थीये । "वयोमात्रनिर्वर्तकत्वेन जीवनोपायभूतं शास्त्रम्" इत्यनन्ततीर्थीये ।

३ "निरमन्त्युशिक्क्षयाः" इत्यर्वाचीनः पाठः ।

४ "अच्युतभाववर्जितं भगवद्भक्तिवर्जितं नैष्कर्म्यं सर्वसङ्गपरित्यागात्मकः सन्यासो न शोभते । निरञ्जनं यथार्थत्वेन दोषरहितं ज्ञानं शास्त्रश्रवणजनितं परोक्षज्ञानं चाच्युतभक्तिरहितं न शोभते" इति प्राचीनम् । "अलं सम्पूर्णं सर्वतत्त्वविषयम्" इति च ।

५ "अकारणं अनित्यफलकारणाद् भिन्नं यत् कर्म धर्मः ईश्वरे नचार्पितं चेत् तदपि न शोभते" इति प्राचीनटीका ।

६ "अथो" इत्यर्वाचीनः पाठः । ७ "धर्मकृतेऽनुशासतः" इत्यर्वाचीनः पाठः ।

यद् वाक्यतोऽधर्म इतीतरस्थितो[१]
न मन्यते तस्य निवारणं जनः ॥ १५ ॥

प्रवृत्तिधर्मकृते ॥ * ॥

विचक्षणोऽस्यार्हति वेदितुं विभोरनन्तपारस्य निवृत्तितः सुखम् ।
प्रवर्तमानस्य गुणैरनात्मनस्ततो भवान् दर्शय चेष्टितं विभोः[२] ॥ १६ ॥

अनन्तपारस्य विभोः सकाशाद् यत् सुखम् ॥ * ॥

इदं हि विश्वं भगवानिवेतरो
यतो जगत्स्थाननिरोधसम्भवः[३] ।

---

१ यत्, वाक्यतः, अधर्मः, इति, इतरस्थितः–इत्येका विधा । यद्वाक्यतः, धर्मः, इति, इतरः स्थितः–इत्यपरा । आद्या यादवेन्द्रतीर्थाभिमता । तथाहि तद्व्याख्यानम्–"स्वभावरक्तस्य परप्रेरणं विना विषयासक्तस्य । तं प्रतीत्यर्थः । धर्मकृते प्रवृत्तधर्मप्रयोजनसिद्धये यदनुशासनं कर्म कुर्विति विधिः तत् जुगुप्सितं निन्दितम् । अप्रवृत्तप्रवर्तनारूपत्वाभावादिति भावः । अथवा दुःखानुबद्धसुखरूपत्वादिति भावः । काम्यकर्मसु प्रवृत्तेरनिवारणेऽपराधोऽस्तीत्याह–यद् वाक्यत इति । इतरस्थितः ब्रह्मणि निवृत्तमार्गे च स्थितः सक्तः जनः चेतनः वाक्यतः विष्णुप्रीतिकरो धर्म इत्यादिवाक्यतः (काम्यं कर्म) अधर्म इति तस्य काम्यकर्मकर्तुः साधोः निवारणं काम्यकर्मनिवारणं न मन्यते नानुमन्यते न करोतीत्यर्थः । नानुमन्यत इति यत् स महान् व्यतिक्रमः महापराधः" इति । द्वितीयाऽनन्ततीर्थीया । तथाहि तद्वचनम्–"स्वभावरक्तस्य स्वत एव धर्मार्थकामेषु रागिणः जनस्य धर्मकृते हरिविमुखधर्मादिकरणार्थमनुशासनं विधानं जुगुप्सितं निन्दितम् । कूपे निपतितस्य मुसलताडनवत् तथाऽनुशासनं महान् व्यतिक्रमश्च अन्यायश्च भवति । कुतः? यद्वाक्यतः यस्य भवादृशस्य महापुरुषस्य वाक्याद् यः पुरुषस्तदुक्त एव धर्म इति स्थितः तद्धर्ममनुतिष्ठति इतरो जनः महापुरुषः तस्य तदुक्तधर्मानुष्ठातुः पुरुषस्य निवारणं न मन्यते । कुतः? धर्मादिप्रतिपादकवाक्यवक्तुः महापुरुषत्वेन तद्वाक्यस्य प्रमाणत्वात्" इति । इतरः प्राकृतो जनः यद्वाक्यबलात् प्रवृत्तिधर्म एव धर्म इति स्थितः स तस्य निवारणं निवारणीयत्वं हेयत्वमिति यावत् न मन्यत इति महदनिष्टं स्यादित्यपि व्याख्यातुं शक्यम् ।

२ "विभो" इति क्वचित् पाठः । निवृत्तधर्मानुष्ठानेन अनन्तपारस्य विष्णोः सकाशाद् यत् सुखं भवति तद् भवादृशो विचक्षणः स्वयं वेत्तुं प्रवृत्तिनिरतान् जनान् वेदयितुं चार्हति । तस्मात् अनात्मनः प्रकृतेर्गुणैः सृष्ट्यादौ प्रवर्तमानस्य विष्णोर्लीलाविचेष्टितं अनात्मनो गुणैरेव विषयेषु प्रवर्तमानस्य जीवस्य कृते भवान् दर्शयतु ।

३ यस्मात् स भगवान् जगत्स्थाननिरोधसम्भवः, जगतः स्थाननिरोधसम्भवाः यस्मात् स तादृशः, ततः स विश्वस्मात् विश्वादितर एव । तथाऽपि इदं विश्वमिव स श्रुतिषु श्रूयते हि–सर्वं खल्विदं ब्रह्मेत्यादौ । तदपि कुतः? अस्य कारणत्वेन तत्स्वामित्वात् । जगतश्च तदधीनत्वात् । राजा जनपद इतिवत् । सादृश्याच्च कार्यकारणयोरैक्यव्यपदेश इत्यपि इवेत्युक्तः । पितैव पुत्र इतिवत् । अत्र "यतो जगत्स्थाननिरोधसम्भवाः" इति प्रचुरः पाठः । यद्यपि प्राचीनटीकासम्मतोऽपि पाठः स एवेति भाति । तथाहि यादवेन्द्रतीर्थाः–"यतः परमात्मनः सकाशात् जगतः स्थानं स्थितिः, निरोधो लयः, सम्भवश्च, एते भवन्ति स भगवान् विश्वस्मादितरोऽपि सन् विश्वमिव । विश्वस्य परमात्माधीनत्वात्;

तद्धि स्वयं वेद[1] भवांस्तथाऽपि
प्रादेशमात्रं भवतः प्रदर्शितम् ॥ २० ॥

इतरोऽपि भगवान् विश्वमिव । स्वातन्त्र्यात् ॥ * ॥

तस्मिंस्तदा लब्धरुचेर्महामते[2] प्रियश्रवस्यस्खलिता मतिर्मम ।
ययाऽहमेतत् सदसत् स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे ॥ २७ ॥

मयि स्थिते ब्रह्मणि । स्थीयतामत्रेतीश्वरेच्छया कल्पितम्[3] ॥ * ॥

त्वमप्यदभ्रश्रुत विश्रुतं[4] विभोः समाप्यते येन विदां बुभुत्सितम् ।
प्रख्याहि दुःखैर्मुहुरर्दितात्मनां सङ्क्लेशनिर्वाणमुशन्ति नान्यथा ॥ ४० ॥

त्वमीश्वरोऽपि[5] ॥ * ॥

इति प्रथमस्कन्धे पञ्चमोऽध्यायः

परमात्मनस्तु स्वतन्त्रत्वात्" इति । अनन्ततीर्था अप्याहुः-"विश्वस्मादितरो भगवान् इदं विश्वमिव स्थितः । स्वातन्त्र्यात् । जगत्स्थाननिरोधसम्भवा यतो भवेयुः स स्वतन्त्र एव भवति" इति । तथाप्यर्थानुवादोऽयमिति सन्तोष्टव्यम् । प्राचीनकोशेषु सम्भव इत्येकवचनस्यैव दर्शनात् । तत्त्वदीपिकाकृत्परिगृहीतत्वाच्च । तथाहि पण्डिताचार्यवचनम्- "इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भव इति हि भागवते । इदं विश्वं भगवानिव । तदधीनत्वात् तत्, स त्वितरः । यस्माद् भगवतो जगत्सृष्ट्यादिकम्" इति । यत इत्यस्यार्थः यस्माद् कारणादिति । भगवतो जगत्सृष्ट्यादिकमिति जगत्स्थाननिरोधसम्भव इत्यस्य । एतेन भगवान् विश्वमिव, विश्वं च भगवानिवेति द्वेधाऽपि योजनाऽत्र विवक्षितेत्युक्तं भवति । "जगत् स्थापयति, निरोधयति संहरति, सम्भावयति उत्पादयतीति तथोक्तः" इति च विजयध्वजीयम् । स्थाननिरोधाभ्यां सहितः सम्भवो वा स्थाननिरोधसम्भवः ।

१ यत् जगत्स्थाननिरोधसम्भवकारणं ब्रह्म तद्धि स्वयं भवानेव । तस्माद् भवान् सर्वं वेद च ! न तत्र मया किञ्चिज्ज्ञापनीयम् ।

२ "महामुने" इत्यौत्तरेयः पाठः । "महामतेः" इति च क्वचित् ।

३ "परिकल्पितम्" इति प्र. पाठः । अत्र नैम्बार्कः शुकदेवोऽपि भगवत्पादभाष्यमेवानुसरति स्म—"यया मत्या मयि ध्यातरि विस्फुरमाणे परे ध्येये ब्रह्मणि जगत्कारणे भगवति एतत् स्थूलसूक्ष्मात्मकं स्वमायया स्वकीयया प्रकृत्या भगवच्छक्त्या कल्पितं निष्पादितं पश्ये दृष्टवानस्मि" इति । "कल्पितं क्लृप्तीकृतं स्थापितमिति यावत्" इति विश्वनाथः । "मयीति सप्तम्या अधिकरणत्वमर्थः । मयि स्थिते, परे मत्तो विलक्षणे ब्रह्मणि सदसत् कार्यात्मकं कारणात्मकं च जगत् मायया इदमत्र स्थीयतामितीश्वरेच्छया कल्पितं समर्पितम्" इति प्राचीनटीका ।

४ "अदभ्रश्रुतविश्रुतम्, अदभ्रैः महद्भिः श्रुतं विश्रुतं माहात्म्यम्" इत्यर्थान्तरं च प्राचीनटीकायाम् ।

५ "ईश्वरावतारस्य तव अवाप्तसकलकामत्वात् ग्रन्थकरणादिना यद्यपि प्रयोजनं नास्ति, अथापीति भावः" इति प्राचीनटीका ।

स्फीतान् जनपदांस्तत्र पुरग्रामव्रजाकरान्[१] ।
खेटान् पट्टनवाटीश्च[२] वनान्युपवनानि च ॥ ११ ॥

"मृगयाजीवनं[३] खेटो वाटी पुष्पोपजीविनाम् । ग्रामो बहुजनाकीर्णो[४] राजराजाश्रयं[५] पुरम् । जलस्थलायति स्फीतं पट्टनं[६] कीर्त्यते बुधैः" इति स्कान्दे ॥ * ॥

प्रेमातिभारनिर्भिण्णपुळकाङ्गो[७]ऽतिनिर्वृतः ।
आनन्दसम्प्लवे लीनो नापश्यमुभयं मुने ॥ २१ ॥

उभयं द्वितीयं[८] नापश्यम् । तमेवापश्यम् ॥ * ॥

इति प्रथमस्कन्धे षष्ठोऽध्यायः

---

१ "आकरः लवणोत्पत्तिस्थानम्" इति प्राचीनम् । "रत्नाद्यालय आकरः" इति बहवः ।

२ "खेटखर्वटवाटीश्च" इति प्र. पाठः ।

३ "मृगयाजीविनाम्" इति प्र. पाठः । मृगयैव यत्र आजीवनं स खेटः । व्याधानां पल्ली । मृगयास्थानं वा । "खेटान् मृगयास्थानानि" इत्यनन्ततीर्थाः । "मृगयाजीविनां स्थानानि" इति यादवेन्द्रतीर्थाः । "खेटः कृषीवलग्रामः" इति वदन्तः श्रीधरादयश्चिन्त्याः । आखेटं हि मृगयां वदन्ति । तेन मृगयाजीवनं खेट इति सुश्लिष्टम् । अत एव चास्यैव तद्भवं 'खेड्डा'पदं कर्णाटभाषायां मृगयाविशेषस्थाने व्यवहरन्ति ।

४ बहुविधजनाकीर्ण इत्यर्थः । यथा खेटवाट्यादिषु निवसतां जनानामेकविधमाजीवनं न तथा ग्रामे । तत्र बहुविधमाजीवनमाश्रित्य बहवो निवसन्ति । असङ्कीर्णा पल्ली, सङ्कीर्णो ग्राम इति यावत् ।

५ नपुंसकत्वमार्षम् । राजराजाश्रय इत्यर्थः । अत एव "राजराजाश्रयः पुरम्" इत्येवानन्ततीर्थाः पेठुः । अथवा राजा राजाश्रया अधिकृताश्च यत्र निवसन्ति तद् राजराजाश्रयम् । बहुजनाकीर्णत्वमत्रापि साधारणो धर्मः । राजाश्रयत्वं त्वसाधारणमिति ।

६ "पत्तनम्" इति प्र. पाठः । "पट्टणम्" इति क्वचित् । "पट्टनं कथ्यते" इत्यपि पाठान्तरम् । यत्र जलस्य स्थलस्य चाऽयतिः संयमः, अनेनैतावदेव जलं स्थलं च उपयोज्यमिति नियमः, राजाधिकृतत्वात्, वाणिज्यप्रधानत्वात्, बहुमूल्यसाध्यत्वाच्च । अत एवानन्ततीर्थाः–"पट्टनानि वणिजामावासस्थानानि" इत्याहुः ।

७ "प्रेमातिभरनिर्भिन्नपुलकाङ्गः" इत्यर्वाचीनः पाठः ।

८ द्वित्वविशिष्टे ह्युभयपदप्रयोगः । द्वितीयमिति च स एवार्थः । उभयशब्देन द्वित्वसङ्ख्याऽपि बोध्यत इति विशेषः । किन्त्वशिष्यं तत् । अत एवोभयमित्येकवचनमेव प्रयुज्यते । यद्वा द्वितीयमिति उभयमित्यस्य फलितार्थकथनम् । द्वयमपि नापश्यमिति नार्थः । किन्तु तमेवापश्यम्, ततो द्वितीयं नापश्यमितीति ।

ब्रह्मनद्याः सरस्वत्या[१] आश्रमः पश्चिमे तटे ।
शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्द्धनः ॥ २ ॥

शम्यां प्रास्य तत्र शालां कृत्वा यत्र यज्ञः क्रियते स शम्याप्रासः[२] ॥ * ॥

भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले ।
अपश्यत् पुरुषं पूर्णं[३] मायां च तदपाश्रयाम् ॥ ४ ॥

भक्तियोगेन सम्यक् प्रणिहिते लोकानां मनसि ॥ * ॥

भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि ।
उपाहरद् विप्रियमेतदस्य[४] जुगुप्सितं कर्म विगर्हयन्ती[५] ॥ १४ ॥
माता सुतानां निधनं शिशूनां निशम्य घोरं परितप्यमाना ।
तदाऽरुदद् बाष्पकलाकुलाक्षी तां सान्त्वयन्नाह किरीटमाली ॥ १५ ॥

स्वात्मन एव विप्रियम्, न भर्तुः । प्रयोजनाभावाद् विप्रियमिव[६] । तस्य प्रियमिति स्वापोक्तम्[७] ॥ * ॥

स्वप्नोऽयम्[८]—

---

१ "ब्रह्मनद्यां सरस्वत्याम्" इत्यर्वाचीनः पाठः । "ब्रह्मनद्याः ब्राह्मणकुलप्रियाया नद्याः प्राचीनसरस्वत्याख्यायाः" इत्यनन्ततीर्थाः ।

२ "शमी प्रास्यते यूपत्वेनेति शम्याप्रासः" इत्यनन्ततीर्थीय उक्तम् । तत्पक्षे भाष्यसङ्गमनं नातिश्लिष्टम् । "पादसदृशयज्ञायुधः शम्या । तां प्रास्य क्षिप्त्वा, भूसंस्कारार्थमिति भावः, तत्र शालां कृत्वा यत्र यज्ञः क्रियते स शम्याप्रासः" इति प्राचीनटीका तु सुश्लिष्टतरा ।

३ "पुरुषं पूर्वम्" इत्यर्वाचीनाः । ४ "विप्रियमेव तस्य" इति प्र. पाठः ।

५ "विगर्हयन्ति" इति प्र. पाठः । प्राचीनपाठे—यदा द्रौणिः सुतानां शिरांस्युपाहरत् तदा माता द्रौपदी शिशूनां निधनं जुगुप्सितं विगर्हयन्ती अरुददित्येकान्वयः ।

६ "विप्रियमेव" इति क्वचित् पाठः प्रामादिकः । अनेन 'विप्रियमेतदस्य' इत्यस्यार्थान्तरमुच्यते । अस्य दुर्योधनस्यापि विप्रियमिवेति । नहि पाण्डवेषु जीवत्सु तत्पुत्राणां हननेन दुर्योधनस्य प्रयोजनं सम्पद्यते । तेन विफलत्वाद् विप्रियमिव । "अर्जुनादिवधं परित्यज्य बालवधेन राज्ञोऽपि प्रयोजनाभावात्" इति हि यादवेन्द्रतीर्थीयम् । एतेन "तदसौ वध्यतां पाप आततायात्मबन्धुहा । भर्तुश्च विप्रियं वीर कृतवान् कुलपांसनः" (श्लो. ३९) इत्युत्तरत्र वक्ष्यमाणकृष्णवचनविरोधोऽपि परिहृतः । तत्रापि विफलमेव विप्रियमित्युच्यत इति न पूर्वोत्तरग्रन्थविरोध इति ।

७ "प्रियमिति हि प्रस्वापोक्तम्" इति प्र. पाठः । क्वचित् कोशेऽपि तथा ।

८ अयं एतदध्यायनिगदितः कथाभागः द्रौणेः पार्थेन बन्धनं द्रौपद्या विमोचनमित्यादिरूपः ।

"पार्थानुयातमात्मानं द्रौणिः स्वप्ने ददर्श ह । बन्धनं चाऽऽत्मनस्तत्र द्रौपद्या चैव मोक्षणम्" इति स्कान्दे ।

तस्मान्नैषीकविरोधः ॥ * ॥

इति प्रथमस्कन्धे सप्तमोऽध्यायः

तथा परमहंसानां मुनीनाममलात्मनाम् ।
भक्तियोगविधानार्थं कथं पश्येमहि[१] स्त्रियः ॥ २३ ॥

भक्तियोगविधानविषयम्[२] ॥ * ॥

विपदः सन्तु नः शश्वत् तत्रतत्र जगत्पते[३] ।
भवतो दर्शनं यत् स्यादपुनर्भवदर्शनम् ॥ २८ ॥

अपुनर्भवं दर्शयति[४] ॥ * ॥

मन्ये त्वां कालमीशानमनादिनिधनं परम्[५] ।
समं चरन्तं सर्वत्र भूतानां यन्मिथः कलिः ॥ ३१ ॥

तत्तद्योग्यतया समत्वम् ॥ * ॥

---

१ "पश्येमहि" इति समस्तं पदमिति प्राचीनपदपाठविदां सम्प्रदायः ।

२ "योगः उपायः । विधानं विधिराचरणं वा । भक्तियोगविधानस्य अर्थः विषयः" इति प्राचीनटीका । "भक्त्याख्यसाधनमनुष्ठाय विषयीकर्तुं योग्यम्" इति च । "भक्तियोगप्रपञ्चस्य अर्थं विषयभूतं भक्तियोगद्दश्यम्" इति वीरराघवोऽप्येतमेवार्थमाह । क्वचित् "भक्तियोगविधानार्थम्" इत्येव भाष्यवाक्यं पठ्यते । अर्थस्तु न स्फुटः ।

३ "जगद्गुरो" इत्यर्वाचीनः पाठः ।

४ पुनरपि भवं न दर्शयतीति व्याख्यानमप्यन्ततोऽत्रैव पर्यवस्यतीति भाष्याविरोधीति मन्तव्यम् ।

५ "विभुम्" इत्यर्वाचीनः पाठः । अत्र प्राचीनटीकायां विशेषः—"भूतानां यन्मिथः कलिः येन कालेन कौरवाणां मिथः कलहः तं त्वां कालं सर्वभूभारच्छेदकं (कल च्छेदने इति हि धातुपाठः) मन्ये । ईशानम्, ईशान् लोकेशान् अनयति व्यापारेषु प्रवर्तयति नियमयतीति यावत्, तम् । अनादिनिधनम्, आदिः स्वकारणं निधनमवसानं ताभ्यां रहितम् । अनस्य सर्वव्यापारकर्तुः प्राणस्य उत्पत्तिस्थित्यादिकर्तारमिति वा । परं सर्वत्र व्याप्तं सर्वविलक्षणमिति वा । सर्वत्र सर्वेषु अन्तर्यामिमूर्तिभिः स्थित्वा चरन्तं विषयभोक्तारम्, सर्वज्ञमिति वा । समं सर्वमूर्तिषु सर्वगुणैः समम् । सर्वत्र भूतेषु विषये समं तत्तद्भूतयोग्यतामनुसृत्य फलदातारमिति वा" इति ।

ते वयं[1] नामरूपाभ्यां यदुभिः सह पाण्डवाः ।
भवतो दर्शनं यर्हि हृषीकाणामिवेशितुः ॥ ४१ ॥

यर्हि भवतो दर्शनं[2] तदा यदूनामस्माकं च नामरूपे[3] ॥ *[4] ॥

[5]नैनो राज्ञः प्रजाभर्तुर्धर्म्यो युद्धे[6] वधो द्विषाम् ।
इति मे नतु बोधाय कल्प्यते शाश्वतं वचः[7] ॥ ५३ ॥

"यः पदातिं हन्ति स भवति चातुर्मास्ययाजी यः सादिनं[8] सोऽग्निष्टोमस्य यो हन्ति गजरथौ सोऽश्वमेधराजसूयाभ्याम्" इत्यादि शाश्वतं वचः ॥ * ॥

इति प्रथमस्कन्धेऽष्टमोऽध्याय.[9]

शितविशिखहतो विशीर्णदंसः[10] क्षतजपरिप्लुत आततायिनो मे ।
प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान् मुदे मुकुन्दः[11] ॥ ३८ ॥

---

१ "के वयम्" इत्यर्वाचीनः पाठः । तत्पक्षे भवतः अदर्शनम् इति च्छेदः ।

२ "भगवतो दर्शनम्" इति क्वचित् पाठः ।

३ "यदूनामस्माकं नामरूपे" इति प्र. पाठः । अत्रानन्ततीर्थीयम्–"यदा भवतो दर्शनं भवेत् तदा वयं पाण्डवा यदुभिः सह नामरूपाभ्यां सह वर्तामहे । जीवनवन्तो भवाम इत्यर्थः । नामरूपवतः खलु जीवनं भवति । त्वद्दर्शनाभावे मृतकप्राया इति भावः । हृषीकाणामिन्द्रियाणामधिपतेः मुख्यप्राणस्य स्वदेहे स्थितिसद्भावे सत्येव प्राणिनां जीवनं, नान्यदा, तद्वदित्यर्थः" इति । "वयं नामरूपाभ्यां पाण्डवा इति लोके गण्या भवामः । अन्यदा वयं गण्या न भवाम इति भावः" इति यादवेन्द्रतीर्थीयम् ।

४ अत्र प्र. पाठे "इति श्रीभागवततात्पर्येऽष्टमोऽध्यायः" इति व्याख्यानपरिसमाप्तिः पठ्यते । प्राचीनटीकासु च तथा । किन्तु सर्वत्र प्राचीनकोशेषु नाध्यायपरिसमाप्तिः ।

५ प्राचीनटीकाद्यनुसारेणायं नवमाध्याये पञ्चमः श्लोकः । श्रीधराद्यौत्तरेयपाठानुसारेण त्वयमष्टमाध्याय एवान्तर्गतः । तात्पर्यप्राचीनकोशेष्वपि तथा । विजयध्वजतीर्थप्रभृतयस्तु नवमाध्याय एवामुं पठन्ति । अत्र निर्णयः कथं क्रियेत । भगवान् सन्देह एव शरणम् ।

६ "धर्मयुद्धे" इत्यौत्तरेयः पाठः । "धर्मो युद्धे" इति क्वचित् ।

७ "कल्पते शासनं वचः" इति प्र. पाठः । ८ "यः सादिनं हन्ति" इति क्वचित् ।

९ पूर्वश्लोकव्याख्यान एवाध्यायसमाप्तेः प्र. पाठेऽत्राध्यायसमाप्तिर्नास्ति । अनुवर्तते नवमोऽध्यायः ।

१० "विशीर्णदंशः" इति प्र. पाठः । "विशिखहतोऽप्यविशीर्णदंशः" इति शुकदेवो व्याचख्यौ ।

११ "भगवान् गतिर्मुकुन्दः" इति प्र. पाठः । विजयध्वजीयाद्यनुसारेणेदं नवमाध्याये पंचचत्वारिंशं पद्यम् ।

5

"असङ्गश्चाव्ययोऽमेद्योऽनिग्राह्यो[1]ऽशोष्य एव च । विद्धोऽसृगञ्चितो बद्ध इति विष्णुः प्रदृश्यते[2] । असुरान् मोहयन् देवः क्रीडयैव सुरेष्वपि[3] । मानुषान् मध्यया दृष्ट्या न मुक्तेषु कथञ्चन" इति स्कान्दे ॥ * ॥

इति प्रथमस्कन्धे नवमोऽध्यायः

निशम्य भीष्मोक्तमथास्य चोदितं[4] प्रवृत्तविज्ञानविधूतविभ्रमः ।
शशास गामिन्द्र इवाजिताश्रयः[5] प्रणिध्युपात्तामनुजानुवर्तितः[6] ॥ ४ ॥

"अमात्या मन्त्रिणो दूताः श्रेणयश्च[7] पुरोहिताः । पुरं जनपदं चेति सप्त प्रणिधयः स्मृताः" इति ब्राह्मे ॥ * ॥

अश्रूयन्ताऽशिषः सत्यास्तत्रतत्र द्विजेरिताः ।
नानुरूपाऽनुरूपाश्च निर्गुणस्य गुणात्मनः[8] ॥ २० ॥

---

१ "असङ्गश्चाव्ययोऽमेद्योऽनिग्राह्यः" इति प्र. पाठः । "असङ्गश्चाप्यथोऽमेद्योऽनिर्ग्राह्यः" इति क्वचित् ।

२ "प्रदर्श्यते" इति प्र. पाठः प्रामादिकः ।

३ क्रीडयैष सुरेष्वपि" इति क्वचित् ।

४ "भीष्मोक्तमथाच्युतोक्तम्" इति प्र. पाठः । "अच्युतोदितम्" इति च क्वचित् । "अथ युधिष्ठिरो भीष्मोक्तं धर्मसर्वस्वमस्य कृष्णस्योदितं वचनं च निशम्य" इति प्राचीनटीका । "अस्य कृष्णस्य उदितं वचनमथ भीष्मोक्तं च निशम्य" इति चान्यत्र ।

५ "अच्युताश्रयः" इति केषाञ्चित् पाठः । "गां पृथ्वीं स्वर्गं च । अजितः श्रीकृष्णः उपेन्द्रश्च" इति विश्वनाथः ।

६ "परिध्युपान्तामनुजानुवर्तितः" इत्यर्वाचीनः पाठः । "प्रणिध्युपात्तां गूढपुरुषैः स्ववशीकृताम् । सप्तप्रणिधिभिः सहितामिति वा" इत्यनन्ततीर्थीयम् । "वामनाश्रय इन्द्र इवानुजानुवर्तितः, अनुजैरनुसृतः, सप्तप्रणिधिभिः उपात्तां युक्तां गां भूमिं शशास" इति यादवेन्द्रतीर्थीयम् ।

७ अमात्याः यैः सहक्रियते राजा सकलकार्येषु, ये च सदा राज्ञा सहैव वर्तन्ते । मन्त्रिणः यैः सह राजा मन्त्रयते । दूता ये राज्ञः सन्देशान् हरन्ति । श्रेणयः ये राज्ञोऽङ्गरक्षायामधिकृताः ।

८ "निर्गुणस्य सत्त्वादिगुणरहितस्य ब्रह्माण्डान्तर्बहिर्व्याप्ततया स्थितस्य ब्रह्मणः 'अस्मान् पालय, दुष्टान् कालय' इत्याद्याशिषो नानुरूपाः । नानुकूला इव । अथ गुणात्मनः सत्त्वादिप्रेरकस्याण्डान्तःस्थितस्य पद्मनाभादेः कृष्णादेश्चानुरूपाः । तेषां दुष्टनिग्रहाद्यर्थमवतीर्णत्वात्" इत्यनन्ततीर्थाः । "निर्गुणस्य सत्त्वादिगुणव्यापाररहितस्य अण्डान्तर्बहिर्व्याप्तनारायणरूपस्य नानुरूपाः, राज्यं पालय, दुष्टान् जयेत्याद्याशिषः, गुणात्मनः सत्त्वादिगुणव्यापारकरणपालनादिकर्तुः, पुरुषादिरूपेणेति भावः, अनुरूपा भवन्ति । पालनादिशक्तिव्यक्तेः पुरुषादिरूपे सत्त्वादिति भावः । एवं राज्यं रक्ष, शत्रून् जहि इत्याद्याशिषः परमात्मनो नानुरूपा भवन्ति । विरोधाभावादिति" इति यादवेन्द्रतीर्थाः ।

"पालनानुग्रहजयान् गौणेऽण्डे संस्थितो हरिः । करोत्यसौ बहिःसंस्थो न करोतीव निर्गुणः" इति पाद्मे ।

अतो नानुरूपानुरूपाश्च[१] ॥ * ॥

स वै किलायं पुरुषः पुरातनो
य एक आसीदविशेष आत्मनि ।
अग्रे गुणेभ्यो जगदात्मनीश्वरे
निमीलितात्मा निशि सुप्तशक्तिषु[२] ॥ २२ ॥

सत्त्वादिषु[३] ॥ * ॥

स एव भूयो निजवीर्यचोदितां
स्वजीवमायां[४] प्रकृतिं सिसृक्षतीम् ।
अनामरूपात्मनि रूपनामनी[५]
विधित्समानोऽनुससार शास्तिकृत्[६] ॥ २३ ॥

"श्रीभूर्दूर्गेति[७] या भिन्ना जीवमाया महात्मनः । आत्ममाया तदिच्छा स्यात्[८] गुणमाया

---

१ अत्र मूले नानुरूपानुरूपा इति त्रीणि पदानि–न, अनुरूपाः, अनुरूपाः इति । नसमासेन नानुरूपाः अनुरूपा इति द्वे पदे वा । चकारस्वारस्यादेवं वक्तव्यमिति भाति । प्राचीनटीकानुगुण्याच्च । नानुरूपा अनुरूपाश्चेति वक्तव्ये सन्धिगर्भः सन्धिः पुनरार्षः । उक्तं चैतत् सारस्वते व्याकरणे–"लोपशि पुनर्न सन्धिः । छन्दसि तु भवति" इति ।

२ "निमीलितात्मन् निशि सुप्तशक्तिषु" इत्यर्वाचीनः पाठः । गुणशब्दः कार्यपरः । गुणेभ्यः अग्रे सृष्टेः पूर्वम् । जगत् आत्मनि स्वोदरे यस्य स जगदात्मा तस्मिन् । सत्त्वादिषु गुणेषु सुप्तशक्तिषु सत्सु, निशि प्रळये ।

३ "सत्वादिशक्तिषु" इति प्र. पाठः । क्वचित् कोशेष्वपि तथा ।

४ जीवाच्छादिका मायेत्येकोऽर्थः । तदा प्रकृतिरिति चित्प्रकृतिः जडप्रकृतिश्च । सोऽयं यादवेन्द्रतीर्थानां पक्षः । जीवभूता चेतनभूता माया चेतनप्रकृतिरेवात्र विवक्षितेत्यपरः । सोऽयमनन्ततीर्थानां सम्मतः । आद्येऽनुससारेति प्रेरयामासेत्यर्थः द्वितीये गर्भमाधत्तेति । तथाहि यादवेन्द्रतीर्थीयम्– "स्वस्य परमात्मनः अधीना जीवमाया जीवाच्छादिका माया जीवं प्रति परमाच्छादिका वा । श्रीभूदुर्गारूपा चित्प्रकृतिर्जडा च" इति । अनन्ततीर्थीयं च– "स्वजीवमायां भार्यां महालक्ष्मीं अनुससार तस्यां वीर्यमाधात्" इति ।

५ "अनामरूपात्मनि कार्त्स्न्येन स्वगुणबोधकं यन्नाम तेन, यत् प्राकृतं रूपं तेन च रहित आत्मा तस्मिन् । स्वाधारतयेत्यर्थः । रूपं महदादिरूपं वा, चतुर्मुखादिरूपं वा । नाम महत्तत्त्वमिति नाम, चतुर्मुख इति नाम च । एवमादिरूपनामनी विधित्समानः रूपनामात्मकप्रपञ्चं स्रष्टुकामः" इति प्राचीनटीका ।

६ "शास्त्रकृत्" इत्यर्वाचीनः पाठः । ७ "श्रीभूदुर्गेति" इति प्र. पाठः । "श्रीभूर्दुर्गेति" इति क्वचित् ।

८ "तदिच्छा सा" इति प्र. पाठः ।

जडात्मिका[१]" इति महासंहितायाम् । "अप्रसिद्धेस्तद्गुणानामनामाऽसौ प्रकीर्तितः । अप्राकृतत्वाद् रूपस्याप्यरूपोऽसावुदीर्यते" इति वासुदेवाध्यात्मे ॥ * ॥

यदा ह्यधर्मेण तमोऽधिका नृपा[२]
जीवन्ति तत्रैष हि सात्त्वतः[३] किल ।
धर्मं[४] भगं सत्यमृतं दयां यशो
भवाय रूपाणि दधद् युगेयुगे[५] ॥ २६ ॥

सात्त्विकानामनुग्राहकः ।

"अगुणोऽपि परो देवो ह्यनुगृह्णाति सात्त्विकान् । देवांस्तु मानुषान्[६] मध्यानुपेक्ष्य क्लेश्यतेऽसुरान्[७]" इति ब्रह्मदर्शने । "सात्त्वतः सात्त्विकस्नेहात् सत्वो ह्यानन्दरूपतः[८]" इति ब्रह्मवैवर्ते । "धारकत्वाद् धर्मरूपो ह्यैश्वर्यादेर्भगो ह्यसौ । सत्य[९] आनन्दरूपत्वादृतो ज्ञानस्वरूपतः । यशो ह्यलं प्रसिद्धत्वाद् दया हि करुणाकरः" इति तन्त्रभागवते । एवंविधगुणस्वरूपाणि[१०] रूपाणि दधद् युगेयुगे ॥ * ॥

एताः पुरा स्त्रीत्वमवाप्तये समं
निरस्तशोकं[११] बत साधु कुर्वते ।

---

१ "जडात्मका" इति क्वचित् ।

२ "तमोधियो नृपाः" इत्यौत्तरेयः पाठः । "तमोजुषो नृपाः" इति क्वचित् ।

३ "सत्त्वतः" इत्यर्वाचीनः पाठः । ४ "धत्ते भगम्" इत्यर्वाचीनः पाठः ।

५ युगेयुगे प्रतियुगमिति वीप्सा । तथाचैकपद्यम् । कालेकाल इत्यर्थः । अथवा भिन्ने एते पदे । तथाच प्राचीनटीका—"यदा यस्मिन् काले तमोधिकाः तामसा असुरा इत्यर्थः । नृपाः अधर्मेण विष्णुभक्तविरोधाचरणेन जीवन्ति तदा तत्र देशे । सात्त्वतः सात्त्विकेषु स्नेहवान् । सात्त्विकैर्ब्रह्मादिभिः अवतारार्थं भक्त्या प्रसादितत्वादिति भावः । सात्त्विकभक्तिविषय इति वा । सात्त्विकानामनुग्राहकः एषः जगत्सृष्ट्यादिकर्ता युगे कस्मिंश्चिद् युगे धर्मं धारकं रूपं दधत् दधानः स्वजनान् पाति । युगे कस्मिंश्चिद् युगे भगं ऐश्वर्याद्युपेतं रूपं दधानः पाति । सत्यं चाऽनन्दमूर्तिं दधत्, ऋतं ज्ञानमूर्तिं दधत्, दयां दयामूर्तिं दधत्, यशो यशोमूर्तिं दधत्, आस्ते । भवाय अधर्मपरिहाराय भक्तानां मोक्षाय च" इति ।

६ "मानवान्" इति प्र. पाठः ।

७ क्लेश्यते क्लेशयते । क्लेशस्य नैबिड्यद्योतनाय संश्लेषः । "क्लेशतेऽसुरान्" इति क्वचित् ।

८ "–नन्दरूपकः" इति क्वचित् ।

९ "सत्यमानन्दरूपत्वात्" इति प्र. पाठः ।

१० "–गुणस्वरूपाणि दधद् युगेयुगे" इति क्वचित् ।

११ "एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचम्" इत्यर्वाचीनः पाठः ।

यासां गृहात् पुष्करलोचनः पतिः
न जात्वपैत्याकृतिभिर्हृदि स्पृशन्[१] ॥ ३१ ॥

"अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्तारं च जगद्योनिं वासुदेवमजं विभुम्"
इति महाकौर्मे ॥ * ॥

अजातशत्रुः[२] पृतनां गोपीथाय मधुद्विषः ।
परेभ्यः शङ्कितः स्नेहात् प्रायुङ्क्त चतुरङ्गिणीम् ॥ ३३ ॥

स्नेहमात्रात् ॥ * ॥

तत्रतत्र च[३] तत्रत्यैर्हरिः प्रत्युद्यतार्हणः ।
सायं भेजे दिशं पश्चाद्[४] गविष्ठो गां गतस्तदा ॥ ३७ ॥

गविष्ठ आदित्यः—
"असौ वाव गविष्ठो[५]ऽप्सूदेत्यप्स्वस्तमेति" इति[६] हि माध्यन्दिनायनश्रुतिः[७] ॥ * ॥

यर्ह्यम्बुजाक्षाश्वति माभवो भवान्[८] कुरून् मधून् वाऽथ सुहृद्दिदृक्षया[९] ।
तत्राब्दकोटिप्रतिमः क्षणो भवेद् रवेर्विनाऽक्ष्णामिव[१०] नस्तवाच्युत ॥ ४६ ॥

कुरूणां मधूनां च नः ॥ * ॥

---

१ "आहृतिभिर्हृदि स्पृशन्" इति च । "पुष्करलोचनः पतिः सन् आकृतिभिः स्वमूर्तिभिः विविधव्यापारैर्वा यासां हृदि स्पृशन् हृदयारूढः सन् जातु कदाचिदपि गृहादपि नापैति एताः समं सर्वा मिळित्वा पुरा अग्निपुत्रत्वावस्थायां स्त्रीत्वमवाप्तये अवार्तुं निरस्तशोकम्, निरशनादिश्रमादिजनितं दुःखं परिभूयेत्यर्थः, क्रियाविशेषणमेतत् । साधु शोभनधर्मान् कुर्वते कृतवत्यः किल" इति प्राचीनटीका ।

२ "अजातशत्रुरपि परेभ्यः शत्रुभ्यः शङ्कितः । मधुद्विषोऽपि गोपीथाय । तत्र हेतुः स्नेहादिति । एवमैश्वर्यज्ञानस्य दुर्बलत्वं बोधितम्" इति जीवगोस्वामी । "बन्धुरिति स्नेहमात्रात् । माहात्म्यज्ञानतिरोधानं चेश्वरमाययेति भावः" इति प्राचीनटीका ।

३ "तत्रतत्र ह" इत्यर्वाचीनः पाठः ।

४ पश्चाद् दिशं पश्चिमां दिशम् ।

५ "दिविष्ठो-" इति क्वचित् ।

६ "इति माध्यन्दिनायन-" इति प्र. पाठः ।

७ यद्यपि भागवते प्र. पाठेऽत्राध्यायसमाप्तिर्दृश्यते । अनन्ततीर्थीयेऽपि तथा । तथाऽपि बहुप्राचीनकोशसंवादात् यादवेन्द्रतीर्थीयादिसंवादाच्च नात्राध्यायसमाप्तिरिति निश्चीयेत । तथाच यत्र प्र. पाठे भागवत एकादशाध्यायपूर्तिस्तत्रैव दशमाध्यायपूर्तिरिति भाष्यकारहृदयम् ।

८ "यर्ह्यम्बुजाक्षापससार भो भवान्" इत्यर्वाचीनाः पठन्ति । "–नो भवान्" इति च केचित् ।

९ "बान्धवादिदर्शनेच्छया कुरून् देशान् प्रति यर्हि यदा अञ्चति प्राप्तो भवति अथ कुरून् परित्यज्य आनर्तान् वा भवान् प्राप्नोति तत्र तदा तव त्वां विना नः तेषामस्माकं च कुरुणां मधूनां च" इति प्राचीनटीका ।

१० "रविं विनाऽक्ष्णोरिव" इत्यर्वाचीनः पाठः । "रविं विनाऽक्ष्णामिव" इत्यपि क्वचित् प्राचीनपाठः ।

यत्तदीशनमीशस्य[1] प्रकृतिस्थोऽपि तद्गुणैः ।
न युज्यते सदाऽऽत्मस्थैर्यथा बुद्धिस्तदाश्रया ॥ ७५ ॥

तदाश्रया बुद्धिः । तज्ज्ञानिनामपि प्रकृतिस्थानां न तत्सङ्गः[2] । किमु तस्येति व्यत्यासदृष्टान्तः[3] ।
"व्यत्यासोऽनन्वयश्चैव प्रसिद्धोऽभूत एव च । सर्वसंहारिकश्चेति[4] दृष्टान्तः पञ्चधा स्मृतः[5]" इति ब्राह्मे ॥ * ॥

तं मेनिरे खला मूढाः स्त्रैणं चानुव्रतं हरेः[6] ।
अप्रमाणविदो[7] भर्तुरीश्वरं मतयो यथा ॥ ७६ ॥

मतयो यथा यथामति मेनिरे ॥ * ॥

इति प्रथमस्कन्धे दशमोऽध्यायः

पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः ।
ब्रह्मण्यः सत्यसन्धश्च रामो दाशरथिर्यथा ॥ १९ ॥

रामो दाशरथिर्यथा । अधिकदृष्टान्तः ।

---

१ "एतदीशनमीशस्य" इति प्र. पाठः । "तदेव ईशनं सामर्थ्यं विकारकारणे सत्यपि विकाराभावसम्पादकमेव सामर्थ्यमिति भावः" इति प्राचीनटीका ।

२ "तत्सङ्गमः" इति क्वचित् ।

३ "व्यत्यासो दृष्टान्तः" इति क्वचित् प्र. पाठः ।

४ "सर्वसांहरिकश्चेति" इति प्र. पाठः ।

५ कैमुत्यदृष्टान्तो व्यत्यास इति स्फुटम् । दृष्टान्ते दार्ष्टान्तिके वा विशेषणानां यत्र सामस्त्येनान्वयाभावः किन्त्वेकदेशेन, स द्वितीयः । यथा 'नळिनाभं मुखं तस्या यूनां चित्तप्रलोभनम्' इति । यद्वा उपमेयेऽन्वयाभावेऽपि उपमानबलाद्यदुपमानान्तरमादीयते सोऽनन्वयः । यथा भगवत्पादप्रयोगः–"पुरुहूतवैरिबलवन्मातङ्गमाद्यद्घटा-कुम्भोच्चाद्रि–" इत्यादि । अत्रोपमेयेऽनन्वितः कुम्भः पुरुहूतवैरिणां मातङ्गत्वोपमानबलादेवाद्रित्वेनोपमीयत इति । प्रसिद्धः लोकव्यवहारकविसमयाभ्यां सिद्धस्तृतीयः । यद्वा व्यत्यास इत्यूनदृष्टान्तः । अनन्वय इत्यधिकदृष्टान्तः । प्रसिद्ध इति समदृष्टान्त उच्यते । अभूतः "रामरावणयोर्युद्धं रामरावणयोरिव" इत्यादिः । न्यायशास्त्रप्रसिद्धोऽनुमानावयभूतः सर्वोपसंहाररूपः पञ्चम इति ।

६ "ते मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः" इत्यर्वाचीनः पाठः ।

७ "अप्रमाणविदो हर्तुः" इति क्वचित् पठ्यते । अत्र प्राचीनटीकायां विशेषः–"सर्वकल्याणगुणं स्वतन्त्रपूर्णानन्दानुभवरूपं प्रमाणशब्दार्थः । तं न जानन्तीत्यप्रमाणविदः । स्त्रैणं स्त्रीजितं मेनिरे । गोवर्द्धनोद्धरणादिना ईश्वरत्वज्ञानसम्भवात् कथमप्रमाणविद इत्यत आह–मतयो यथेति । यथा मतयः तथा मेनिरे । तामसबुद्ध्यनुसारेणेत्यर्थः" इति ।

"ऊर्णनाभ्यादिको विष्णोर्विष्णुर्विष्णोस्तथैव च । विष्णुर्जीवस्य दृष्टान्ता ऊनसाम्याधिकाः[१] क्रमात्" इति ब्राह्मे ॥ * ॥

स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः ।
आपूर्यमाणः पितृभिः काष्ठाभिरिव चान्वहम्[२] ॥ ३१ ॥

"पूरयन्ति दिशः सोमं देवा गावः सरस्वती" इति गारुडे ॥ * ॥

इति प्रथमस्कन्धे एकादशोऽध्यायः

प्रत्युज्जग्मुः प्रहर्षेण प्राणांस्तन्व इवाऽगतान्[३] ।
अभिसङ्गम्य विधिवत् परिष्वङ्गाभिवादनैः ॥ ५ ॥

"तत् प्राणे प्रपन्न उदतिष्ठत्" इति[४] ॥ * ॥

---

१ 'दृष्टान्त ऊनसाम्याधिकः" इति क्वचित् ।

२ "सोऽन्वहम्" इत्यपि पाठान्तरम् । तत्पक्षे तच्छब्दयोरपौनरुक्त्याय स उडुप इत्यन्वयमाश्रित्य प्रसिद्धश्चन्द्र इति व्याख्येयम् ।

३ "प्राणं तन्व इवाऽगतम्" इति प्र. पाठः । यद्यपि भाष्योदाहृतप्रमाणानुसारेण प्राणमित्येकवचनान्ततैव युक्तेति भाति । मुख्यप्राण आगते ब्रह्मशरीरमुदतिष्ठदिति । तथाऽपि नात्र ब्रह्मशरीरं दृष्टान्तः । तन्व इति बहुवचनविरोधात् । तस्मान्न श्रौतदृष्टान्तोऽयम् । अत एव "आगतान् प्राणान् दृष्ट्वा भोगायतनानि शरीराणीव" इति विजयध्वजीयेऽप्युक्तम् । नच तथाऽपि सर्वजीवशरीरेष्वपि मुख्यप्राण एक एवेति बहुवचनविरोधः । तत्तज्जीवनियामकरूपापेक्षया बहुवचनोपपत्तेः । प्रतिशरीरं च पञ्चरूपत्वाद् बहुवचनम् । अत एव च "असवः प्राणाः" इति भूम्न्येव पदं पठन्ति । तर्हि भाष्यवाक्यस्य का सङ्गमनिका? अयमत्र भाष्याभिसन्धिः–अत्र प्राण इति नासिक्यो वायुर्जीवो वेति बहवो व्याख्यतारो भ्रान्ताः । तन्व इति चावयवविवक्षया बहुवचनमिति च । तथाहि– "तन्वः कराङ्घ्र्यादयः" इति श्रीधरः । "तन्व इव करचरणादय इव" इति वल्लभः । तामेतां द्वयीं भ्रान्तिं वारयिष्यन्नाह–तत् प्राणे प्रपन्न उदतिष्ठदिति श्रुतिरिति । एतदुक्तं भवति । नात्र प्राणा इति नासिक्यो वायुर्जीवो वा । नापि तन्व इति करचरणादयः । मुख्ये सम्भवत्यमुख्यग्रहणानुपपत्तेः । किन्तु "तत् प्राणे–" इति श्रुताविव मुख्यप्राणः शरीराणि चोच्यन्त इति । तन्मूला हीयमुपमा । यथा ब्रह्मशरीरं तथाऽन्येषामपि शरीराणीति । एतेनात्र प्राणतनूपदयोर्मुख्यार्थग्रहणे श्रुत्यनुग्रहोऽप्यस्तीत्याह । लोके क्वाप्यदर्शनात् ब्रह्मशरीरस्यैवात्र निदर्शनत्वमिति व्याख्यानं तु चिन्त्यमेव । तथाह्यनन्ततीर्थीयेऽपि––"यथा आगतान् प्राणान् प्रति तन्वः शरीराण्युत्तिष्ठन्ति तद्वत् । कुतश्चित् कारणान्मूर्छाद्यवस्थां गतानां पुरुषाणां तदवस्थापगमे आगतान् प्राणान् प्राप्य यथा तन्व उत्तिष्ठन्ति तद्वदित्यर्थः । तत् प्राणे प्रपन्न उदतिष्ठदिति श्रुतेः" इति ।

४ "इति श्रुतिः" इति प्र. पाठः ।

इत्युक्तो धर्मराजेन सर्वं तत् समवर्णयत् ।
यथानुभूतं भ्रमता[1] विना यदुकुलक्षयम् ॥ १२ ॥

यदुकुलक्षयं एष्यत्[2] ।

"शापं श्रुत्वा ब्राह्मणानामुद्धवः खिन्नमानसः । उदासीनं तथा कृष्णमिव सुप्रीतमेव च । नशिष्यमाणं स्वकुलं स्वर्यियासुं च केशवम् । ज्ञात्वा पप्रच्छ भगवत्स्वरूपं[3] तमुपह्वरे । मैत्रेयोऽपि तदैवाऽगाज्जिज्ञासुस्तत्त्वमुत्तमम् । तयोरदात् स भगवान् ज्ञानं निर्मलमञ्जसा । षड्विंशद्वत्सरात् पूर्वं स्वर्गतेः पुरुषोत्तमः । प्रेषयामास च हरिरुद्धवं बदरीमनु । कलापग्रामिणां वक्तुमेतत् तत्त्वमशेषतः[4] । विदुरं तीर्थयात्रास्थमन्तराळे[5] स उद्धवः । दृष्ट्वा नशिष्यमाणं च कुलं जिगमिषुं हरिम् । कथयित्वा बदर्यां च कलापग्रामवासिनाम् । प्रोच्य तत्त्वमशेषेण वासुदेवमुखोद्गतम्[6] । षड्विंशद्वर्षगमने पुनरागतिमात्मनः । तेषामुक्त्वा पुनः कृष्णसन्निधौ विचचार ह । मैत्रेयो विदुरायैतदूचिवान् कृष्णचोदितः । विदुरः पाण्डवानां च विना यदुविनाशनम् । षड्विंशद्वर्षतः[7] पूर्वं ज्ञात्वाऽप्यप्रियमेव तत् । नावोचद् विदुरो धीमांस्तस्मान्नाप्रियमावदेत्" इति हि पाद्मे[8] । "तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः[9]" इति चोपरि । "विदुरं चाऽगतं पुनः[10]" इति च ।

भारते चैकविंशद्वर्षात् पूर्वं विदुरस्य युधिष्ठिरभाव उक्तः ॥ * ॥

---

१ "यथाऽनुभूतं क्रमशः" इत्यर्वाचीनः पाठः ।

२ एष्यदिति एष्यन्तमित्यर्थः । सामान्ये नपुंसकम् । यदुकुलक्षयो न वृत्तं वस्तु किन्तु एष्यदिति । क्षयः क्षपणमित्यन्तर्नीतणिच्त्वज्ञापनाय च नपुंसकप्रयोगः । प्रमाणश्लोकसंवादश्चैवं सति भवति । यद्वा यदुकुलक्षयमिति मूले एष्यदित्युपस्कर्तव्यमित्यर्थः । एष्यद्यदुकुलक्षयमिति । "यदुकुलक्षयं जानन्नपि न वर्णयामास" इति वदन् शुकदेवोऽपि भाष्यकृदाशयमेवानुमन्यते ।

३ "भगवान् स्वरूपम्" इति क्वचित् प्र. पाठः प्रामादिकः ।

४ "भक्तिविशेषतः" इति क्वचित् ।

५ "अन्तराले" इति प्र. पाठः ।

६ "वासुदेवमुखाद् गतम्" इति क्वचित् ।

७ "षट्त्रिंशद्वर्षतः" इति क्वचित् प्र. पाठः प्रमादिकः ।

८ "इति पाद्मे" इति प्र. पाठः ।

९ इत्थं व्रजन् भारतमेव वर्षं कालेन यावद् गतवान् प्रभासम्" (भाग.३.१.२०.) इति पूर्वार्द्धम् । तत्र हीतः परं विदुरेण प्रभाससन्दर्शनसमयेऽपि पार्थोऽजितेन कृष्णेन सह क्षितिं शशासेत्युच्यते । तेनोत्तरविरोधादेव नात्र यदुकुलक्षयो भूतः । किन्तु एष्यन् ।

१० "गान्धारीं धृतराष्ट्रं च विदुरं चाऽगतं पुनः" इत्यानुपूर्वी (१०.९८.५) । यद्यपि "विदुरं च महामतिम्" इत्येव दशमस्कन्धे पाठः । "विदुरं चागतं पुनः" इति त्वाचार्यसम्मतः पाठ इति भाति ।

अविभ्रदर्यमा दण्डं यथाघमघकारिषु ।
यावद् बभार[१] शूद्रत्वं शापाद् वर्षशतं[२] यमः ॥ १५ ॥

योऽर्यमा[३] दण्डमविभ्रत् स वर्षशतं यावच्छूद्रत्वं बभार ।

"न देवानां न दैवानां[४] सामस्त्येन जनिर्भुवि । अंशांशेनैव जायन्ते सर्वे त्वाजानजादयः" ॥ * ॥

प्रतिक्रिया न यस्येह कुतश्चित् कर्हिचित् प्रभो ।
स एष भगवान् कालः सर्वेषां नः समागतः ॥ ३० ॥

"संहर्ता भगवान् विष्णुः काल इत्यभिधीयते । अथवा गुणसर्वस्वं कालशब्दो व्यनक्ति हि" इति च स्कान्दे[५] ॥ * ॥

अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् ।
इतोऽर्वाक् प्रायशः कालः पुंसां गुणविकर्षणः ॥ २८ ॥

स्वैरज्ञातगतिः विविक्तगतिः[६] ॥ * ॥

---

१ "यावद् दधार" इति प्र. पाठः ।

२ "वर्षाणि कतिचिदधिकानि शतं च" इति जीवगोस्वामी ।

३ यमोऽर्यम्णः सूर्यस्य सुतत्वादर्यमेत्युक्तः" इत्यनन्ततीर्थाः !

४ "न देवानां न देवीनाम्" इति प्र. पाठः । देव्योऽप्येकशेषेण देवशब्देनैव गृह्यन्त इति न पृथग्वक्तव्यमेतत् । देव्यश्च देवाश्च देवाः । दैवा इति देवगन्धर्वादयः । प्रयोगसिद्धं चैतत् "दैवाश्च पितरश्चिराः" इत्यदौ । एतेनैतत्प्रमाणविरोधात् यमे चात्राऽगते कोऽमुत्र दण्डधर इत्याशङ्कापरिहारायेदं प्रवृत्तमिति व्याचक्षणाः परे परास्ताः

५ "इति स्कान्दे" इति प्र. पाठः । "न देवानाम्-" इति पूर्वश्लोकोदाहृतप्रमाणवचनस्यापि स्कान्दीयत्वं द्योतयितुं चकार इति प्रतीयते । वल्लभोऽप्येवमेव व्याचख्यौ-"स एवेति यः पूर्वं कृष्णाख्यः त्वत्पुत्रादीनुपसंहृतवान् स एवेदानीं त्वामुपसंहर्तुमागतः । कलयति सर्वानाकलयतीति कालः" इत्यादि ।

६ इतः पूर्वं "अविज्ञातगतिर्जह्यात् स वै धीर उदाहृतः"(२६) इत्युक्तेस्तत्संवादेनात्रापि स्वैः अज्ञातगतिः इतिच्छेद इति भाति । तद्वारणायेदमुदितम् । स्वैरमेव ज्ञाता गतिः नतु सर्वस्य लोकस्य । एकान्तं कञ्चन वनोद्देशं स्वयमेव निश्चित्य तत्र तपश्चरन् तिष्ठेत्यर्थः । एतेनाविज्ञातगतिरित्येतदपि व्याख्यातम्-अविज्ञाता लोकैरविदिता विविक्ता गतिर्वर्तनं यस्य अविज्ञाते विविक्ते स्थाने गतिर्यस्य वा । अथवा स्वैः अज्ञातगतिरित्येव च्छेदः । तस्येदं तात्पर्यमुच्यते विविक्तगतिरिति । अस्य पदपुञ्जस्य सर्वथाऽप्येकान्तस्थितावेव तात्पर्यम्; न पाण्डवैरप्यविदितस्थलवासे । भारतादिविरोधादिति । तथाहि यादवेन्द्रतीर्थाः-"गम्यत इति गतिर्विविक्तप्रदेशः । स्वैरज्ञातः अप्राप्तः गतिर्यस्य सः । विविक्तगतिरित्यर्थः । (एतेन) पाण्डवैर्धृतराष्ट्रगतिज्ञानेऽपि न विरोधः" इति । पाण्डवानां धृतराष्ट्रगतिज्ञानेऽपि यत्र गतं तद्विविक्तं न ज्ञातपूर्वमिति च गमनिकान्तरं यादवेन्द्रतीर्थाभिमतं प्रतीयते । अनन्ततीर्थास्तु "स्वैरं सम्यक् ज्ञाता गतिर्यस्य । पाण्डवैर्विज्ञातगमन एव भवान् यात्वित्यर्थः" इति व्याचक्रुः । "विरक्तगतिः" इति क्वचित् पाठः ।

6

अजातशत्रुः कृतमैत्रो हुताग्नि-
र्विप्रान् नत्वा तिलगोवस्त्ररुग्मैः[1] ।
गृहान् प्रविष्टो गुरुवन्दनाय[2]
नचापश्यत् पितरौ सौबलीं च ॥ ३१ ॥

पितरौ कुन्तीधृतराष्ट्रौ । नचापश्यत्, तस्य मनसि तेषां विपद्भावो बभूव । अन्यथा महाभारत-विरोधात्[3] । स्कान्दे च[4]—

"भीमसन्तर्जितो राजस्त्वनुज्ञां प्राप्य यत्नतः । धृतराष्ट्रो वने वासमकरोद् वत्सरत्रयम् । विदुरस्तद्दिदृक्षार्थमागतेषु वनं पुरा[5] । पाण्डवेषु तु राजानं प्रविश्यैकत्वमागतः । ततो दावाग्निना दग्धं धृतराष्ट्रं च सौबलीम् । श्रुत्वा कुन्तीं च चिन्तां त आपुः[6] पाण्डुसुतास्तदा । तांस्तदा नारदो विद्वान् शमयामास धर्मवित् । उक्त्वोत्तमां गतिं तेषां निष्ठां तात्कालिकीं तथा" इत्यादि ॥ * ॥

तत्र सञ्जयमासीनं पप्रच्छोद्विग्नमानसः ।
गावल्गणे[7] क्व नस्तातो वृद्धो हीनश्च नेत्रयोः ।
अम्बा वा हतपुत्राऽऽर्ता पितृव्यौ क्व गतावितः[8] ॥ ३२ ॥

---

१ "तिलगोभूमिरुक्मैः" इति प्र. पाठः ।

२ "गुरूणां धृतराष्ट्रगान्धारीकुन्तीनां वन्दनाय, तेषां गतत्वात् तत्पादपीठवन्दनाय गृहान् तेषामावासगृहं प्रविष्टो युधिष्ठिरः तत्र तदा नमस्कुर्वन् पितरौ कुन्तीधृतराष्ट्रौ सौबलीं च जीवनयुक्तान् मनसा नापश्यत् । सम्प्रति ते मृता इति तस्य मनसि प्रत्यभात् । दैवज्ञत्वात् तस्य" इत्यनन्ततीर्थाः । "माता च पिता च पितरौ । अत्र माता कुन्ती । पिता धृतराष्ट्रः । सौबलीमिति गान्धर्याः पृथगुपादानात् । गुरुवन्दनाय स्मरन् नचापश्यत् । तस्य मनसि तेषामसत्वं तदा प्रतिभातमभूदित्यर्थः" इति तु यादवेन्द्रतीर्थाः । विदुरस्य पूर्वमेव धर्मराजेनैक्यात् विदुर-धृतराष्ट्रौ पितराविति चापेशलम् ।

३ "अन्यथा भारतविरोधात्" इति क्वचित् ।

४ "भारते च" इति क्वाचित्कः पाठः प्रमादपतितः ।

५ "वनं पुरात् । पाण्डवेषु च" इति क्वचित् ।

६ "ते प्रापुः" इति प्र. पाठः ।

७ "गावल्गणे" इति प्र. पाठः । गवल्गणस्य पुत्रो गावल्गणिः सञ्जयः ।

८ "पितृव्यः क्व गतः सुहृत्" इति प्र. पाठः । अयमेव च यादुपत्योभिमतः । "पितृव्यः क्व गतो इतः" इति च क्वचित् । तात्पर्यदीपिकाकृत्सम्मतश्चायम् । अनयोरन्यतर एव विजयध्वजीयाभिमतश्च पाठः । "पितृव्यौ क्व गतावितः" इति भागवतमूलकोशे पठ्यते । अनन्ततीर्थयादवेन्द्रतीर्थयोरभिमतः पाठोऽप्ययमेव । यद्यपि पितृव्योऽपि धृतराष्ट्र एवेति भाष्यसंवादात् पितृव्यः क्व गत इत्येकवचनान्त एव पाठः स्वरस इति मुखतो भाति । तथाऽपि प्राचीनबहुकोशव्याख्यानादिसंवादेन द्विवचनान्त एव पाठोऽत्राऽऽदृतः । एतस्मिन्नपि पाठे भाष्यं स्वरस-

ब्रह्माण्डे च[१]—

"धृतराष्ट्रे मृते सूतः सञ्जयः पाण्डुसूनवे। गतिं शशंस कुन्त्याश्च गान्धारीधृतराष्ट्रयोः"
इत्यादि।

पितृव्योऽपि धृतराष्ट्र एव। द्विरुक्तिस्तात्पर्यार्थे[२]।

"यत्राधिकं तत्परता बहुवारमपि ध्रुवम्। तद् वदन्ति महाप्राज्ञा लोकवेदानुसारतः"
इति ब्रह्मतर्के[३]॥ *॥

पितर्युपरते पाण्डौ सर्वान् नः सुहृदः शिशून्।
अरक्षतां व्यसनतः पितृव्यौ क्वगताबितः॥ ३४॥

पितृव्यौ गान्धारीधृराष्ट्रौ[४]॥ *॥

सङ्गमं भवति। तथाहि भाष्यार्थः— ननु धृतराष्ट्रस्य पितृत्वेन पूर्वं निर्देशात् पितराविति, तात इति चास्मिन्नेव श्लोके, पितृव्य इति क उच्यते? आह—पितृव्योऽपि धृतराष्ट्र एव। न केवलं पूर्वमुक्तः पिता धृतराष्ट्र। किन्तु पितृव्योऽपि स एव। तर्हि क्व नस्तात इति पूर्वार्द्धेन पुनरुक्तं भवति। न भवति। यतस्तात्पर्यार्थे द्विरुक्तिर्भवति। तर्हि द्विवचनस्य कोऽर्थः? एतच्छङ्कापरिहराय "पितृव्यौ गान्धारीधृतराष्ट्रौ" इत्युत्तरश्लोकभाष्यमत्राप्यनुवर्तते। यतः पितृव्यपदेनापि धृतराष्ट्र एवोच्यते तेन पितृव्याविति गान्धारीधृतराष्ट्रौ भवतः। ननु तर्हि "अम्बा वा हत-पुत्राऽऽर्ता" इति तृतीयचरणेन पुनरपि पुनरुक्तिर्भवति। न भवति। यतो द्विरुक्तिस्तात्यर्थे इत्येतदेवात्राप्युत्तरं भवति। नन्वथापि न पुनरुक्तिः पर्यह्रियत। अत्र पूर्वोत्तरार्द्धयोरार्थिकपुनरुक्तेः परिहारेऽपि पुनरुत्तरश्लोके पितृव्यौ क्व गताविति इति वाचनिक्येव पुनरुक्तिर्गले लगति। तदपि नेत्याह— द्विरुक्तिस्तात्पर्यार्थे। आर्थिक्या अपि पुनरुक्तेर्वाचनिकी दृढतरं तात्पर्यमवगमयतीति भूषणमेतत्। ननु पुनरुक्तिः परिहृता। अनुक्तिस्तु सम्प्रति बाधते। केवलं गान्धारीधृतराष्ट्रावेव पृष्टौ। न कुन्ती। साऽपि हि प्रस्तुता "पितरौ सौबलीं च" इति। तत्कथं न दोषः? अत आह–ब्रह्माण्डे चेति। पुराणान्तरे "कुन्त्याश्च गान्धारीधृतराष्ट्रयोः" इति स्फुटं श्रवणात् अत्रापि कुन्तीविषयः प्रश्नोऽध्याहार्यः। अथवा मुखत एवोच्यताम्, किमध्याहारेणोपलक्षणया वा? तथा हि श्लोकार्थः— हतपुत्रा हतकपुत्रा, यस्या वयं पुत्रहतका इत्यर्थः। पञ्च नः पुत्रानपि प्रसूय कुन्ती कष्टं जीवतीति दुःखेनाऽऽत्मानं हतकमाह राजा। "आक्षितो हतकः स्मृतः" इत्यभिधानम्। "मनोहतो हतः" इति च। तादृशी अत एवाऽऽर्ता अम्बा कुन्ती। पितृव्यौ गान्धारीधृतराष्ट्रौ च क्व गताः। ननु यद्यपि गान्धारी पूर्वं नोक्ता। धृतराष्ट्रांशे पौनरु-क्त्यं भवति। तस्य पूर्वार्द्धोक्तत्वात्। नेत्याह–द्विरुक्तिस्तात्पर्यार्थे। एवमनन्तान्यर्थरत्नानि भाष्याब्धावातलमव-गाढानां भासन्ते।

१ "ब्राह्मे च" इति क्वचित्।

२ "द्विरुक्तिस्तात्पर्यार्था" इति प्र. पाठः। "तात्पर्यार्थम्" इति च। "बहुवारप्रश्नो विलापप्रसङ्गान्न पौनरुक्त्य-दोषमावहतीति वा ज्ञातव्यम्" इत्यनन्ततीर्थाः।

३ "इति हि ब्रह्मतर्के" इति प्र. पाठः। "इति च ब्रह्मतर्के" इति क्वचित्।

४ पितृव्यो धृतराष्ट्र इति पूर्वमुक्तम्। तर्हि पितृव्याविति विदुरधृतराष्ट्रौ स्यातां परैस्तथा व्याख्यानादिति भ्रान्तिवारणायेदमुदितम्।

अहं च व्यंसितो राजन्[1] पित्रोर्वः कुलनन्दन ।
न वेद साध्व्या गान्धार्या[2] मुषितोऽस्मि महात्मभिः ॥ ३७ ॥

मुषितोऽस्मीति प्रलापः ॥ * ॥

नाहं वेद गतिं पित्रोर्भगवन् क्व गताविति[3] ।
कर्णधार इवापारे सीदतां पारदर्शनः[4] ॥ ४० ॥

क्व गतावितीत्यदृष्टापेक्षया[5] ॥ * ॥

यन्मन्यसे ध्रुवं [6]लोकमध्रुवं वाऽथवोभयम्[7] ।
सर्वथा हि न शोच्यास्ते[8] स्नेहादन्यत्र मोहजात् ॥ ४४ ॥

अपरिहार्यत्वादशोच्याः ॥ * ॥

धृतराष्ट्रः सह भ्रात्रा गान्धार्या च स्वभार्यया ।
दक्षिणेन हिमवत ऋषीणामाश्रमं गतः[9] ॥ ५१ ॥

गमनकाले सह भ्रात्रा ॥ * ॥

---

१ "नाहं वेद्मि व्यवसितम्" इति प्र. पाठः । "न केवलं त्वमेव न वेत्सि । अहं च वः पित्रोः कुन्तीधृतराष्ट्रयोः परलोकगतिं न वेद । कीदृशः? व्यंसितः । मृतत्वादेव वियोजितः" इत्यनन्ततीर्थाः । अत्र सञ्जयप्रतिवचने कुन्तीग्रहणात् तद्विषयः प्रश्नोऽपि मूले विवक्षित इति ज्ञायते ।

२ "गान्धार्या वा महाबाहो" इति प्र. पाठः ।

३ "क्व गतावितः" इति च पाठान्तरम् । प्राचीनटीकास्वपि क्वचित्स पाठ आदृतः । इतः परं प्र. पाठे "अम्बा वा हतपुत्राऽऽर्ता क्व गता च तपस्विनी" इत्यधिकम् । कुन्तीसद्गतिविषये धर्मराजस्य नातीव सन्देहः । पुत्रापराधेन गान्धारीधृतराष्ट्रयोरनिष्टलेपः स्यादिति भिया शङ्कमानस्तावेव क्व गताविति पुनःपुनः सतात्पर्यं पृच्छति ।

४ "भगवान् पारदर्शकः" इत्यर्वाचीनः पाठः ।

५ "क्व गतावित्यदृष्ट्यपेक्षया" इति प्र. पाठः । "क्व गताविति ह्यदृष्टापेक्षया" इति क्वचित् ।

६ "लोकं पित्रादिशरीरम्" इत्यनन्ततीर्थाः । "लोकं देहविशिष्टं जनम्" इति यादवेन्द्रतीर्थाः ।

७ "चाथवोभयम्" इति पाठान्तरम् । "वा नचोभयम्" इत्येके । "वा नवोभयम्" इत्यन्ये ।

८ "सर्वथा नहि शोच्यास्ते" इत्यर्वाचीनः पाठः ।

९ धृतराष्ट्रः भ्रात्रा विदुरेण, स्वभार्यया च, कुन्त्या च सहितः कुरुपुरान्निर्गत्य हिमवत्पर्वतस्य दक्षिणेन दक्षिणतः, दक्षिणतट इति यावत्, सप्तर्षीणामाश्रमं सप्तस्रोतोनामकं गतः तद्भवतोऽपि सिद्धं मन्यित्यर्थः" इत्यनन्ततीर्थाः ।

स्नात्वाऽनुसवनं[1] तस्मिन् हुत्वा चाग्नीन् यथाविधि ।
अब्भक्ष उपशान्तात्मा स आस्ते विगतेक्षणः[2] ॥ ५३ ॥

आस्त इत्याद्यतीतार्थं ।

"स एष एतर्ह्यध्यास्त[3] आसनं पार्थिवोचितम्" इत्यादिवत् । "सुपूतिङ्उपग्रहलिङ्ग-[4] नराणां कालहलच्स्वरकृत्सयङां[5] च । व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपिच सिद्ध्यति बाहुलकेन" इत्यादि[6] महाव्याकरणे ।

"व्यासादयो वर्तमानमतीतानागते तथा । व्यत्ययस्यापि वदन्त्यद्धा मोहनार्थं दुरात्म-नाम् । पौर्वापर्यं यतो नैव सदैव परिवर्तनात् । अतश्च व्यत्ययादेतद् वदन्ति ज्ञान-चक्षुषः" इति ब्राह्मे[7] ॥ * ॥

विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तम् ।
ब्रह्मण्यात्मानमाधारे घटाम्बरमिवाम्बरे[8] ॥ ५५ ॥

"विज्ञानात्मा विरिञ्चोऽयं यस्तस्मिन् लीयते जगत् । यादांसि सागरे यद्वत् स क्षेत्रज्ञे

---

१ "अनुसवनं त्रिषवणमित्यर्थः" इति प्राचीनटीका ।

२ "तत्राऽस्ते विगतैषणः" इति प्र. पाठः । "स आस्ते विगतैषणः" इति च । "विगतेषणः" इति च । "विग-तेक्षणः अन्यचिन्तारहितः आस्ते पूर्वं स्थित आसीत्" इत्यनन्ततीर्थाः । "विगतेक्षणः निरस्तविषयबुद्धिः तस्मिन्ना-श्रमे आस्ते पूर्वं स्थित इत्यर्थः" इति यादवेन्द्रतीर्थाः ।

३ "स एष तर्ह्यध्यास्ते" इति क्वचित् प्र. पाठः प्रामादिकः ।

४ "सुपूतिङ्पदग्रह-" इति प्र. पाठः प्रामादिकः ।

५ "स्वरकर्तृयङां च" इति प्र. पाठः । कृदिति कृत्प्रत्ययः । सेति सन्नन्तम् । तद्यथा रिरक्षिषेति प्रयोक्तव्ये रिरक्षेति व्यत्ययेन प्रयुज्यते ।

६ "इति च महाव्याकरणे" इति प्र. पाठः ।

७ "इति च ब्राह्मे" इति क्वचित् । क्वचित् "ब्राह्मे" इति न पठ्यते ।

८ "विज्ञानं विज्ञानतत्त्वं जीवचेतनो वा । तस्याऽत्मा नियामकः ब्रह्मा । तस्मिन् सृष्टं सर्वं संयोज्य लीनं भवेदिति ज्ञात्वा तं विरिञ्चं क्षेत्रज्ञे जीवान्तर्यामिणि देहहृदिस्थे वा संयोज्य तत्समीपस्थं तत्प्रविष्टं वा ध्यात्वा तमात्मनं अन्तर्यामिणं ब्रह्मणि व्याप्ते संयोज्य एकत्वेन ध्यात्वा । ऐक्ये दृष्टान्तमाह—घटाम्बरमिति । घटाम्बरं द्विविधम् । घटविशेषितः अव्याकृताकाशभागः, घटेन सह जातः भूताकाशश्चेति । तत्र घटविशेषितस्याव्याकृता-काशस्य महाकाशेनात्यन्तमैक्यम् । अथवा आधारे सर्वाश्रये ब्रह्मणि आत्मानं जीवं संयोज्य तदधीनं ज्ञात्वा आस्ते । कथमिव? घटे जन्याकाशस्य महाकाशाधीनत्वमिव । घटाकाशस्य जन्यस्य महाकाशेन भेदस्य सत्त्वादिति भावः" इति प्राचीनटीका । अत्र वीरराघवोऽप्याह—"अम्बरदृष्टान्तेन जीवब्रह्मणोरैक्यमनुसन्धायेति न भ्रमितव्यम् । संश्लेषदशायामपि घटाकाशमहाकाशयोर्भेदोऽस्त्येव । उपाध्यपगमेन समानाकारत्वमात्राभिप्रायक एवायं दृष्टान्तः" इति । शुकदेवोऽपि व्याचख्यौ —"नच घटाम्बरशब्दाम्बरयोः स्वरूपैक्यवत् जीवब्रह्मणोरपि स्वरूपै-

जनार्दने । हृदिस्थेऽथ[1] स च व्याप्ते स्वात्मन्येकीभवत्युत । प्रळयौ भेदवन्तौ तौ[2] पूर्वोक्तौ ब्रह्मकृष्णयोः । अन्तस्थस्य बहिष्ठे तु[3] तस्य तस्मिन्नभेदतः" इति ब्रह्मवैवर्ते ।

काले तस्य तत्र लयो भविष्यतीति ध्यानमात्रं विलापनम् ।

"सुविद्यमानमपि यो ध्यायेतैव सुनिश्चितः[4] । उच्यते तस्य कर्तेति यथैव[5] मुनयोऽमलाः । जगद् विलापयामासुरित्युच्यन्तेऽथ तत्स्मृतेः । नच तत्स्मृतिमात्रेण लयो भवति निश्चितम्" इति नारदीये[6] ।

"स्वरूपं जायमानं च आकाशं तु[7] घटे द्विधा । स्वरूपं जायमाने तु[8] घटे निर्भेदमेव तु । भिन्नवद् व्यवहारस्य[9] समर्थं तल्लये च यत्[10] । तद्वदेवावतारेषु देहस्थश्च हरिः स्वयम् । भिन्नवद् व्यवहाराय शक्तो लीने[11] जगत्यपि । स एव पूर्ववज्ज्ञेयो निर्विशेषेण केशवः । जायमानं घटे जाते जायते तल्लये तु न[12] । तस्माद् भिन्नं महाकाशादेवं जीवोऽपि कीर्तितः । उपाधेश्चैव नित्यत्वान्नैव जीवो विनश्यति[13] । स्वरूपत्वादुपाधेश्च न भिन्नोपाधिकल्पनम्[14] । नचाभिन्नत्वमीशेन चिन्मात्रं च न युज्यते[15]" इति ब्रह्मतर्के[16] ॥ * ॥

क्यमिति वाच्यम् । जीवब्रह्मणोर्नैर्मल्ये, जीवस्याल्पत्वे, ब्रह्मणोऽनल्पत्वे च दृष्टान्तसम्भवात् । अन्यथाऽम्बरवद् ब्रह्मणि जडत्वभौतिकत्वप्रसङ्गापत्तेश्च । वस्तुतस्तु घटाम्बरशुद्धाम्बरयोः पञ्चीकृतपदार्थत्वेन स्वरूपैक्यमपि नास्ति" इत्यादि ।

१ "हृदिस्थे च" इति प्र. पाठः ।

२ "प्रलये भेदवन्तौ तु" इति प्र. पाठः ।

३ "बहिस्थे तु" इति क्वचित् ।

४ "अविद्यमानमपि यो ध्यायेतैवं विनिश्चितः" इति प्र. पाठः । सुविद्यमानमपि, नतु स्वेन सृष्टं, य एवं ध्यायेत्, स तस्याकर्ताऽपि तथा ध्यानमात्रेण तस्य कर्तेत्युच्यते । "अविद्यमानमपि–" इत्यादिः प्र. पाठस्त्वस्वरसः कथञ्चिन्नेयार्थः ।

५ "तथैव" इति प्र. पाठः ।

६ "इति हि नारदीये" इति क्वचित् ।

७ "आकाशं च" इति प्र. पाठः ।

८ "जायमानं तु" इति प्र. पाठः प्रमाद एव ।

९ "व्यवहाराय" इति प्र. पाठः ।

१० "तल्लये भवेत्" इति प्र. पाठः । "तल्लये च तत्" इति क्वचित् ।

११ "शक्तोऽधीने" इति क्वचित् ।

१२ "तल्लये नतु" इति प्र. पाठः । "तल्लये च न" इति क्वचित् ।

१३ "जीवोऽपि नश्यति" इति प्र. पाठः ।

१४ "–कल्पना" इति क्वचित् ।

१५ "चिन्मात्रत्वं च युज्यते" इति प्र. पाठः । क्वचित् कोशेषु च तथा । प्राचीनपाठे उपाधिप्रहाणेन चिन्मात्रं ब्रह्मैवावशिष्यते इति वादोऽपि न युज्यत इत्यर्थः । एतेन–"घटाम्बरमिति चिद्रूपत्वेनैवाभेदांशे दृष्टान्तः" इत्यादि व्यचक्षाणाः परे परास्ताः ।

१६ "इति च ब्रह्मतर्के" इति क्वचित् ।

ध्वस्तमायागुणोद्रेकनिरुद्ध[१]करणाशयः ।
निवर्तिताखिलाहार आस्ते स्थाणुरिवाधुना[२] ॥ ५६ ॥

"त्रिगुणात्मिकाऽथ ज्ञानं च विष्णुशक्तिस्तथैव च । मायाशब्देन भण्यन्ते शब्दतत्त्वार्थवेदिभिः" इति नाममहोदधौ ।

अत्र सत्त्वादयो मायागुणाः ॥ * ॥

स वा अद्यतनाद् राजा[३] परतः पञ्चमेऽहनि ।
कळेबरं हास्यति ह[४] तच्च भस्मीभविष्यति ॥ ५७ ॥

"परावरे तथैवाऽरादुभयार्थाभिधायिनः[५]" इति च[६] ॥ * ॥

विदुरस्तु तदाश्चर्यं निशाम्य[७] कुरुनन्दन ।
हर्षशोकयुतस्तस्माद् गन्ता तीर्थनिषेवकः ॥ ५९ ॥

एतत् सर्वं पूर्वमेव ज्ञात्वा तस्मादेव कारणाद् विदुरस्तीर्थानि ययौ ॥ * ॥

इति प्रथमस्कन्धे द्वादशोऽध्यायः

व्यतीताः कतिचिन्मासास्तदा तु शतशो नृपः[८] ।
ददर्श घोररूपाणि निमित्तानि भृगूद्वह[९] ॥ २ ॥

---

१ "–गुणोद्रेको निरुद्ध–" इति क्वचित् पाठः । "गुणोदर्को निरुद्ध–" इत्यर्वाचीनः पाठः । "माया प्रकृतिस्तस्या गुणाः सत्त्वादयः तेषामुद्रेकः प्रवृद्धिः । तद्रहितत्वेन परमात्मन्येव निरुद्धाशेषेन्द्रियमनोवान्" इत्यनन्ततीर्थाः ।

२ "स्थाणुरिवाचलः" इति क्वचित् । "अधुना तदानीं मृतिकाले स्थाणुरिव निश्चलः आस्ते आसीत्" इति प्राचीनम् ।

३ "राजन्" इत्यर्वाचीनः पाठः । ४ "कलेवरं हास्यति स्वम्" इत्यर्वाचीनः पाठः ।

५ "आरा उभयार्थाभिधायिनः" इति मुद्रितः पाठः प्रामादिकः ।

६ "इति च नाममहोदधौ" इत्यत्रापि क्वचित् कोशेषु पठ्यते ।

७ "निशम्य" इति क्वचित् पाठः प्रामादिकः । नहि श्रवणमत्रापेक्षितोऽर्थः । किन्तु ध्यानदृशा दर्शनम् । निशामनं हि दर्शनम् । "विदुरः निशाम्य एतत् सर्वं पूर्वमेव ज्ञात्वा, तस्मात् एतज्ज्ञानरूपकारणात् तीर्थानि प्रति ययौ" इति प्राचीनम् ।

८ "तदा नाऽयात् ततोऽर्जुनः" इत्यौत्तरेयाणां पाठः ।

९ "कुरूद्वहः" इति प्र. पाठः । "मासाः चिन्तायुक्ताहानि । निमित्तानि अनिष्टज्ञानसाधनानि । हे भृगूद्वह हे शौनक" इति यादवेन्द्रतीर्थाः ।

मासशब्देनाहान्युच्यन्ते । तथा हि महाभारते ।

"अहस्तु मासशब्दोक्तं यत्र चिन्तायुतं व्रजेत् । एवं वत्सरभाद्यं[१] च विपरीते विपर्ययः" इति च नाममहोदधौ[२] ॥ * ॥

अपि देवर्षिणाऽऽदिष्टः स कालः प्रत्युपस्थितः[३] ।
[४]यदाऽऽत्मनोऽङ्गमाक्रीडं भगवानुत्सिसृक्षति ॥ ८ ॥

अङ्गं पृथिवीम्[५] ।

"यदा त्यागादिरुच्येत पृथिव्याद्यङ्गकल्पना । तदा ज्ञेया नहि स्वाङ्गं कदाचिद् विष्णुरुत्सृजेत्" इति ब्रह्मतर्के[६] ॥ * ॥

मृत्युदूतः[७] कपोतोऽयावुलूकः क्षपयन् मनः[८] ।
प्रत्युलूकश्च हुङ्कारैर्विनिद्रौ[९] शून्यमिच्छतः ॥ १४ ॥

अग्नौ पदं करोति ।

"यदुलूको वदति मोघमेतद् यत् कपोतः पदमग्नौ कृणोति" इति हि श्रुतिः ॥ * ॥

---

१ "संवत्सराद्यम्" इति क्वचित् ।

२ "इति नाममहोदधौ" इति प्र. पाठः । "इति हि नाममहोदधौ" इति क्वचित् ।

३ "स कालोऽयमुपस्थितः" इत्यर्वाचीनः पाठः ।

४ "यत्राऽत्मनोऽङ्गम्" इत्यपि क्वचित् । "यत्र यस्मिन् काले" इति प्राचीनव्याख्यानात् ।

५ "अङ्गं शरीरं पृथिव्याख्यम् । यस्य पृथिवी शरीरमिति श्रुतेः" इति यादवेन्द्रतीर्थाः । अन्येऽप्याहुः— "शुद्धसत्त्वमयमप्राकृतं शरीरमुत्सिसृक्षति भूमेर्विश्लेषयितुमिच्छति" इति वीरराघवः । "आत्मनोऽङ्गमिति युधिष्ठिरस्य बन्धुशोकानुरूपैवोक्तिर्नतु सिद्धान्तस्पर्शिनी । सरस्वती तु तन्मुखे समुचितमेवाऽह । आत्मनोऽङ्गमंशरूपं उत्सिसृक्षति ऊर्ध्वं वैकुण्ठं प्रति प्रस्थापयितुमिच्छति" इति विश्वनाथः । "अङ्गं स्नेहास्पदमङ्गतातादिपदवाच्यमस्मदादिजनम्, आक्रीडं क्रीडास्थानं लोकं च उत्सिसृक्षति" इति च शुकदेवः ।

६ "इति हि ब्रह्मतर्के" इति क्वचित् ।

७ "मृत्युदूतः मृत्युसूचकः कपोतः पारावतः अग्नौ 'पदं करोति' इति शेषः । अग्निहोत्रगृहाग्निकुण्डे भस्मनि कपोतपदलाञ्छनं मृत्युसूचकमिति हृदयम्" इत्यनन्ततीर्थाः । "कपोतः अग्नौ पदं करोति एतत् स्वप्नदर्शनमिति वदन्ति" इति यादवेन्द्रतीर्थाः ।

८ "कपोतोऽयमुलूकः कम्पयन् मनः" इत्यर्वाचीनपाठः । "मनः श्रोतॄणां मनोधैर्यं क्षपयन् उलूकः प्रत्युलूकश्च उभौ हुङ्कारैः प्रतिवचनरहितैर्हुङ्कारमात्रैः विनिद्रौ दिवानिशं निद्रारहितौ शून्यं क्षयं इष्टवस्तुनाशमिच्छतः सूचयतः" इत्यनन्ततीर्थाः । "मनः क्षपयन् हृदयं विभिन्दन् उलूकः कौशिकः प्रत्युलूकश्च विनिद्रः सन् (?) उभौ मिथो हुङ्कारैः पालकरहितं लोकमिच्छत इव तिष्ठतः" इति यादवेन्द्रतीर्थाः ।

९ "कुह्वानैरनिद्रौ" इत्यर्वाचीनः पाठः । "कुह्वानैर्विश्वं वै" इत्यपि केचित् पठन्ति ।

भगवानपि गोविन्दो ब्रह्मण्यो भक्तवत्सलः ।
कच्चित् पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः ॥ ३४ ॥

यथाऽन्येषां सुखं भविष्यति तथा[१] । नित्यसुखत्वाद्धरेः ।

"अत्युत्तमानां कुशलप्रश्नो लोकसुखेक्षया[२] । नित्यदाऽऽप्तसुखत्वात्तु न तेषां युज्यते कचित्" इति हि नारदीये[३] ॥ * ॥

कच्चित् तेऽनामयं तात भ्रष्टतेजा विभासि मे ।
अलब्धमानोऽवज्ञातः किंवा तात चिरोषितः[४] ॥ ३९ ॥

पूर्वं चिरोषितः ॥ * ॥

इति प्रथमस्कन्धे त्रयोदशोऽध्यायः

पत्न्यास्तवापि[५] मखक्लृप्तमहाभिषेक-
श्लाघिष्ठचारु कबरं कितवैः सभायाम् ।
स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्यो[६]
यैस्तत्स्त्रियो न्यकृत तत् स विमुक्तकेश्यः[७] ॥ १० ॥

---

१ अत एव– "सुखमास्ते सुहृद्वृत इति । सुहृदां सुखं कुर्वन्नास्ते" इति वल्लभः ।

२ "–सुखेच्छया" इति प्र. पाटः ।

३ "इति नारदीये" इति प्र. पाठः ।

४ "पूर्वं चिरमुषितः द्वारवत्यां स्थितः यतः अतः अवज्ञातः किम्? अतिपरिचयस्यावज्ञाकारणत्वात्" इति यादवेन्द्रतीर्थाः ।

५ "पत्न्यास्तवाधिमख–" इति प्र. पाठः ।

६ "पतिताश्रुमुख्याः" इति प्र. पाठः ।

७ "यस्तत्स्त्रियोऽकृत हतेशविमुक्तकेशाः" इति प्र. पाठः । अत्र प्राचीनटीकासु अर्थविशेषो यथा—"तव युधिष्ठिरस्य यो मखः तत्र क्लृप्तः अवश्यं कर्तव्यः यः महाभिषेकः तेन श्लाघिष्ठमत्यन्तश्लाघ्यं कबरं केशबन्धविशेषः, कितवैः दुःशासनादिभिः स्पृष्टं यत् तत्कबरं विकीर्य स्थितायाः पत्न्याः द्रौपद्याः सम्बन्धी यः यत्पदयोः पतितः रोदनपुरस्सरं मुखस्य पादयोर्विन्यासादिति भावः । अश्रुमुख्यः । मुख्यशब्दः प्रधानवाची । अश्रुप्रधानः । स प्रधानाश्रुकणः यैर्दुःशासनादिभिः कबरं स्पृष्टं तत्स्त्रियः-कर्म विमुक्तकेश्यः विकीर्णकेशसहिताः न्यकृत कृतवान् । अयं भावः–दुःशासनस्पृष्टकबराया द्रौपद्या नेत्रबिन्दुः कृष्णपादयोः पतितः सन् यत्पादस्पर्शबलादेव दुःशासनादिस्त्रीणां कबरमोकं कृतवान् तेन कृष्णेन मुषितः वञ्चित इति" इति यादवेन्द्रतीर्थाः । एतत्पक्षे अश्रुशब्दस्य नपुंसकत्वेनाश्रुमुख्यमिति वक्तव्ये पुंस्त्वमार्षमिति वक्तव्यम् । अश्रुषु मुख्यः कण इति वा । एतामरुचिं मनसि निधायैवानन्ततीर्थाः पतितान्यश्रूण्येव मुख्यं प्रधानकारणं यस्य स भीमः पतिताश्रुप्रधान इति व्याचक्रुः । तथाहि तद्वचनम्–"तव पत्न्या द्रौपद्या राजसूयमखे क्लृप्तेन कृतेन महाभिषेकेण श्लाघ्यतमं चारु केशबन्धनं कौरवसभायां कितवैः

7

यत्पदयोः[1] पतिताश्रुप्रधानः[2]। यैः कबरं स्पृष्टं तत्स्त्रियः तत् पदयोः पतितत्वादेव स विमुक्तकेश्यो[3] न्यकृत ॥ * ॥

तद् वै धनुस्त इषवः स रथो हयास्ते
सोऽहं रथी नृपतयो यत आमनन्ति ।
सर्वं क्षणेन यदभूदसदीशरिक्तं
भस्मन् हुतं कुहकराद्धमिवोप्तमूषे[4] ॥ २१ ॥

स रथो हयास्त इति तादृशा इत्यर्थः। त इषव इतिवत्[5]।

"सदृशे वा प्रधाने वा कारणे वा तदित्ययम्। शब्दः सङ्घटते भेदे विद्यमानेऽपि तत्त्वतः" इति ब्रह्मतर्के। तद्रथहयानां दाहोक्तेः ॥ * ॥

इति प्रथमस्कन्धे चतुर्दशोऽध्यायः[6]

वासुदेवाङ्घ्र्यभिध्यान[7]परिबृंहितरंहसा ।
भक्त्या निर्मथिताशेषकषाय[8]धिषणोऽर्जुनः ॥ १ ॥

स्पृष्टं यस्य कृष्णस्य पदयोर्विकीर्य पतिताश्रुमुख्यः अश्र्वाख्यमुख्यकारणोपेतः, पदयोः पतितायाः अश्रूण्येव मुख्यकारणानि कृत्वा वर्तमानः तत्स्त्रियः तेषां दुःशासनादीनां स्त्रियः सविमुक्तकेश्यः सह युगपदेव विमुक्तकेश्यः विकीर्णकेशबन्धाः न्यकृत" इति। साध्व्या अश्रूणि कृष्णचरणयोः पतितानीति तत्प्रतिकर्तुं भगवदाशयविदग्रणीर्भीमः कितवानहन्निति यावत्। अर्थद्वयेऽपि भाष्यवचनं सावकाशम्।

१ "यत्पादयोः" इति क्वचित्।

२ "पतिताया अश्रुप्रधानः" इति प्र. पाठः प्रामादिकः। नह्यत्र पतिताया अश्रूणीत्यर्थः। किन्तु पतितान्यश्रूणीति।

३ "पतितत्वादेव विमुक्तकेश्यः" इति प्र. पाठः। "सह विमुक्तकेश्यः" इति क्वचित्। अनन्ततीर्थसम्मतश्चायं पाठः। सह युगपदेवेति तद्व्याख्यानात्। सः अश्रुप्रधानः न्यकृत इति यादवेन्द्रतीर्थादयः।

४ "ऊष्याम्" इत्यर्वाचीनः पाठः। "कुहकेन दुष्टेन राद्धं दुष्कृतमिव। ऊषे ऊषरायां भूमौ उप्तमिव न्यस्तबीजमिव" इति प्राचीनम्।

५ "इतीव" इति प्र. पाठः।

६ प्र. पाठे नात्राध्यायपरिसमाप्तिः। अनन्ततीर्थीयेऽपि तथा।

७ "वासुदेवाङ्घ्र्यनुध्यान–" इत्यर्वाचीनः पाठः। भक्त्या परिबृंहितरंहसा वासुदेवाङ्घ्र्यभिध्यानेन, वासुदेवाङ्घ्र्यभिध्यानपरिबृंहितरंहसा भक्त्या वा। तथाहि यादवेन्द्रतीर्थीयम्—"भक्त्या अङ्घ्र्यभिध्यानलक्षणस्य उपायस्य परिबृंहितं समृद्धं रंहः वेगः प्रवाह इत्यर्थः, तेन, परिबृंहितं रंहः यस्या भक्त्येति वा" इति।

८ "कषायाः प्रारब्धपापरागादिज्ञानप्रतिबन्धकविशेषाः। अशेषकषायः कृत्स्नान्तःकरणमलं वा" इति प्राचीनम्।

ज्ञानिनां प्रारब्धस्यैव निर्मथनम्[1]। योग्यस्यैव[2]।

"महता कारणेनैव प्रारब्धान्यपि कानिचित्। कर्माणि क्षयमायान्ति ब्रह्मदृष्टिमतः क्वचित्" इति भविष्यत्पर्वणि।

तेषामपि काम्यकर्मफलदृष्टेश्च ॥ * ॥

गीतं भगवता ज्ञानं यत्तत् सङ्ग्राममूर्द्धनि[3]।
कालकर्मतमोरुद्धं[4] पुनरध्यगमद् विभुः ॥ २ ॥
विशोको ब्रह्मसम्पत्त्या सञ्छिन्नद्वैतसंशयः।
लीनप्रकृतिनैर्गुण्यादलिङ्गत्वादसम्भवः ॥ ३ ॥

तमआदिरोधश्च[5] प्रारब्धकर्मणैव।

"ज्ञानादिव्यक्तिरव्यक्तिः सुखदुःखादिकं तथा। सुदृष्टब्रह्मतत्त्वानां भवत्यारब्धकर्मणा" इति ब्रह्मवैवर्ते।

ब्रह्मसम्पत्तिरवगतिः[6]।

"भगवन्तं विनाऽन्यत्र प्रवृत्त्यादिप्रकाशनम्। प्रारब्धकर्मणैव स्यात् कदाचिज्ज्ञानिनामपि। तां द्वैतदृष्टिं मे देव च्छिन्धि ज्ञानवरासिना" इति ब्राह्मे।

---

१ "विनिर्मथनम्" इति च क्वचित् पाठः।

२ "योग्यस्य।" इतीयदेव क्वचित् पठ्यते। "ज्ञानिनः प्रारब्धस्य पापस्य कस्यचिदेव भक्तिज्ञानरंहसा निर्मथनम्। कस्यचिद् भोगेन निर्मथनमिति ज्ञातव्यम्" इत्यनन्ततीर्थाः। अयमर्थः- अप्रारब्धं तु कर्म अपरोक्षसमनन्तरमेव नश्यति हि। अवशिष्टे च प्रारब्धकर्मणि नाशयोग्यमखिलं भगवद्भक्तिभरेण नाशितवानर्जुन इति।

३ "सङ्ग्राममूर्द्धनि कुरुपाण्डवसंग्रामस्य आदौ गीतं मधुरवचनेन प्रापितमित्यर्थः" इति प्राचीनम्।

४ "बहुकालेन, प्रारब्धकर्मणा, तमसा मूलाविद्यया चावरुद्धम्" इत्यनन्ततीर्थाः। "कालव्यवधानेन, कर्मणा प्रारब्धपापेन, युद्धोद्योगादिरूपकर्मव्यासङ्गेन वा, तमसा प्रारब्धसहकृततमोगुणस्य कार्येण द्वेषराज्यरागादिना" इति यादवेन्द्रतीर्थाः।

५ "तमआदिनिरोधश्च" इति प्र. पाठः।

६ "ब्रह्मसम्पत्त्या ब्रह्माहमिति ज्ञानेन" इति श्रीधरः। भ्रान्तिरेवेयमित्याह-ब्रह्मसम्पत्तिरवगतिरिति। नहि पदशास्त्रविदुषां सम्पत्तिपदेन कदाचिदप्यभेदबोधो भवति। तर्हि अवगतिरित्यपि कथम्? पततिं हि गतौ पठन्ति। स च स्वरसत एवावगतिं बोधयति। तदेतत्स्फोरणायैव अवगतिपदं प्रायोजि। "ब्रह्मसम्पत्त्या, पत्लृ गतौ। गत्यर्थश्च बुद्ध्यर्थः। ब्रह्मविषयकसम्यग्ज्ञानेन" इति वीरराघवः। "नराकारपरब्रह्मसाक्षात्कारेण" इति जीवगोस्वामी। "प्रपञ्चगतां सम्पत्तिं त्यक्त्वा ब्रह्मसम्पत्त्या" इति विश्वनाथः। "ब्रह्मणि सम्पत्तिर्ज्ञानम्।'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः' इत्युक्तरूपम्" इति शुकदेवः।

तदेव सञ्छिन्नद्वैतसंशयत्वम्[१] । लीनप्रकृतित्वं नैर्गुण्यं च लीनप्रकृतिनैर्गुण्यम् । तस्मादसूक्ष्मशरीरत्वादनारब्धपुनरुत्पत्तिवर्जितः । ज्ञानोदयकाल एवैवम्भूतः सन् पुनरध्यगमत्[२] ।

"प्रकृतिं स्वात्मसंश्लिष्टां[३] गुणान् सत्त्वादिकानपि । कर्माणि सूक्ष्मदेहं च जायमाना हरेर्दृशिः । दहेदथापि[४] वै दग्धेन्धनवत् तत् पुनःपुनः । यावदारब्धकर्म स्यादाविर्वाऽपि तिरो व्रजेत्" इति ब्रह्मतर्के ॥ * ॥

स्वराट् पौत्रं विनीतं तमात्मनोऽनवमं गुणैः[५] ।
तोयनीव्याः पतिं भूमेरभ्यषिञ्चद् गजाह्वये ॥ ७ ॥

पौत्रत्वे[६] योग्यत्वमनवमत्वम् ।

"इन्द्राद्युत्तमताऽन्येषां समता वा स्वके कुले । उत्तमत्वमुपास्त्यादियोग्यता वा निगद्यते" इति च[७] ब्रह्मतर्के ॥ * ॥

वाचं जुहाव मनसि तत् प्राण इतरे[८] परम् ।
धृत्याऽप्यपानं[९] सोत्सर्गं तत्परत्वे[१०] ह्यजोहवीत् ॥ १० ॥

---

१ "भगवन्तं विना जीवादेः स्वत एव प्रवृत्त्यादिशक्तिरस्ति नवेति संशयः द्वैतसंशयः" इत्यनन्ततीर्थाः । अन्येऽप्याहुः-"आत्मनि देहगतदेवादिभ्रमरहितः" इति वीरराघवः । "इयं मम चेतसि स्फूर्तिरेव । साक्षात्कारस्त्वन्य इति द्वैतसंशयः" इति जीवगोस्वामी । "द्वैतप्रपञ्चे देहादौ संशयः" इति वल्लभः । "द्वैते संशयः देहेन सह मम सम्बन्धोऽस्ति नास्ति वेति सन्देहः" इति विश्वनाथः ।

२ "पुनरप्यध्यगच्छत्" इति प्र. पाठः ।

३ प्रकृतिरिति न जीवप्रकृतिः । नापि मूलप्रकृतिः । तयोः सर्वथाऽनाशात् । किन्त्वहम्ममेत्यादिरूपा बन्धनहेतुराच्छादकत्वेन जीवसंश्लिष्टा प्रकृतिरेव ।

४ "दहेदथापि सन्दग्धेन्धनवत्" इति प्र. पाठः । "दहेदथापि दग्धेन्धनवत्" इति क्वचित् । एकस्मिन् प्रतनतरे कोशे तु "देहे तथाऽपि" इति पठ्यते । तदा तु हरेर्दृशिः प्रकृत्यादिकं देहे ददाह । तथाऽपि पुनरारब्धकर्मणः आविर्भावं तिरोभावं वा व्रजेत् ।

५ "सम्राट् पौत्रं विनियतमात्मनः सुसमं गुणैः" इत्यर्वाचीनः पाठः । "स्वराट् पौत्रं विनयिनमात्मनः सदृशं गुणैः" इति च । "स्वराट् चक्रवर्ती युधिष्ठिरः विनीतं तं पौत्रं आत्मनः पौत्रत्वेऽनवमं गुणैः योग्यम् गजाह्वये हस्तिनपुरे अभ्यषिञ्चत्" इत्यनन्ततीर्थाः ।

६ "पौत्रत्वयोग्यत्वम्" इति प्र. पाठः ।

७ क्वचित् 'च'कारो न पठ्यते ।

८ "इतरे च तम्" इत्यर्वाचीनः पाठः । "परं प्राणमुख्यं इतरे अपाने" इति यादवेन्द्रतीर्थाः । "परं प्राणाख्यं वायुस्वरूपमितरे इतरस्मिन्नपानाख्ये वायुस्वरूपे" इत्यनन्ततीर्थाः ।

९ "मृत्यात्रपानम्" इत्यर्वाचीनः पाठः । "धृत्या ह्यपानम्" इति विजयध्वजीयपाठः । "धृत्या स्थिरबुद्ध्या" इति यादवेन्द्रतीर्थाः । "धृत्या मनस एकाग्रतया समम्" इत्यनन्ततीर्थाः ।

१० "तं पञ्चत्वे" इत्यर्वाचीनपाठः । "सोत्सर्गं उत्सर्जनव्यापारप्रवर्तकं अपानं तत्परत्वे ततः अपानात् परत्वं पूर्वत्वं यस्य तस्मिन् व्याने अजोहवीत्" इति यादवेन्द्रतीर्थाः । "उत्सर्गाख्यस्ववृत्तिसहितमपानं तत्परत्वे तदुत्तरतत्वे

त्रित्वे हुत्वाऽथ पञ्चत्वं तच्चैकत्वेऽजुहोन्मुनिः[१] ।
[२]सर्वमात्मन्यजुहवीद् ब्रह्मण्यात्मानमव्यये[३] ॥ ११ ॥

प्राणमपाने । तं व्याने । समानोदानौ तेषु । तांश्च मूलप्राणे । आत्मा हृदिस्थो विष्णुः[४] । ब्रह्म सर्वगतः[५] ।

"उमा वागात्मिका रुद्राज्जाता[६] सा मनआत्मनः । प्राणाद्बयात् स वायोश्च[७] सोऽपानादात्मरूपतः । स्वरूपादेव स व्यानादुदानो व्यानतस्तथा । तस्मात् समानो व्यानाच्चाप्यपानः[८] प्राण एवच । अपानात् तिसृभिश्चापि समानोदानयोर्जनिः ।

व्यानाख्ये । सोत्सर्गमित्यनेन प्राणादीनामपि स्वस्वकर्मणा सहैव स्वस्वकारणेषु होममुपलक्षयति" इत्यनन्ततीर्थाः । एतत्पक्षे परतत्वे इति वक्तव्ये छान्दसेनैकतकारलोपेन परत्वे इत्युक्तम् ।

१ "प्रकारान्तरमाह– त्रित्व इति । त्रयाणां समुदायः त्रित्वं तस्मिन् प्राणापानव्यानेषु अवशिष्टौ समानोदानौ हुत्वा, एवं हुतं यत् पञ्चत्वं प्राणादीनां समुदायरूपं तत् एकत्वे मूलमुख्यप्राणे । एक एव एकत्वं तस्मिन्" इति यादवेन्द्रतीर्थाः । "अथ समानोदानौ त्रित्वे त्रितत्वेषु स्वकारणेषु प्राणापानव्यानेषु हुत्वाऽथ तत् पञ्चत्वं पञ्चप्राणात्मकं तत्त्वं एकत्वे मूलरूपेऽजुहोत्" इत्यनन्ततीर्थाः ।

२ "सर्वं सर्वव्यापारकर्तारं मूलमुख्यप्राणं आत्मनि स्वहृदिस्थे विष्णौ" इति यादवेन्द्रतीर्थाः । "स च प्राणो हरेर्जातो हृदिस्थात्" इति भाष्यानुगुणमेतत् । अनन्ततीर्थास्तु–"वाङ्मनःप्राणादिकं सर्वं हृदि स्थिते आत्मनामके विष्णुस्वरूपे" इति व्याचक्षते ।

३ "ब्रह्मण्यात्मानमद्वये" इत्यनन्ततीर्थसम्मतः पाठः । तथाहि तद्व्याख्यानम्–"आत्मानं स्वान्तर्यामिणं च अद्वये सभाधिकरहिते ब्रह्मणि ब्रह्मनामके सर्वव्याप्तविष्णुरूपे अजुहवीत्" इति । "अव्यये अनित्यत्वादिदोषरहिते ब्रह्मणि गुणकालदेशव्याप्ते अजुहवीत् एकत्वेनाचिन्तयत्" इति यादवेन्द्रतीर्थाः ।

४ "हृदि स्थितो विष्णुः" इति क्वचित् ।

५ "सर्वगतम्" इति प्र. पाठः । सर्वगत इत्येव वक्तव्यम् । हृदिस्थो विष्णुरात्मा, सर्वगतो विष्णुर्ब्रह्मेति ।

६ अत एव वाङ्मनआदिपदानामभिमानिपरत्वमजानन्तोऽपि शास्त्रसंस्कारबलाद् वाङ्मनसोः पतिपत्नीभावं व्यवहरन्ति । वल्लभोऽप्याह हि–"मनसो हि भार्या वाक्" इति ।

७ अत्रैवं योजना––सः पञ्चरूपेष्वेकः प्राणः आत्मस्वरूपादेवापानात् जातोऽभिव्यक्तः । सः अपानः पुनः स्वरूपादेव व्यानादिति । अथाभिव्यक्तौ प्रकारान्तरमुच्यते–उदानो व्यानतस्तथेति । तथेति पक्षान्तरे । व्यानादुदानः । तस्मादुदानात् समानः । समानजननानन्तरं व्यानदेवापानः । अपानादेव च प्राण इति । ननु प्रथमपक्षे समानोदानयोः कदा कस्माच्च जनिः? आह–तिसृभिः प्राणापानव्यानैः सङ्गत्य समानोदानयोर्जनिरिति । तथाच– आदौ व्यानः, ततः अपानः, तस्मात् प्राणः, तैस्त्रिभिराहत्य उदानसमानौ जायेते इत्येका विधा । आदौ व्यानः, तत उदानः, उदानात् समानः, पुनर्व्यानादेवापानः, अपानाच्च प्राणो जायत इत्यपरा । तत्राद्या विधाऽत्र भागवतश्लोकगदितेति ।

८ "व्यानादप्यपानः" इति क्वचित् । "व्यानाद्वाऽप्यपानः" इति यादुपत्यसम्मतः पाठः न क्वापि प्रतनकोशेषु पठ्यते ।

त्रयाणामथ[1] पञ्चानामनाद् वा प्राणतो भवः । एकस्यैव स्वरूपाणि प्राणस्यैतानि पञ्च च । स च प्राणो हरेर्जातो हृदिस्थादात्मनो मतः[2] । स आत्मा ब्रह्मणो जातो विश्वरूपाज्जनार्दनात् । एतेषां ब्रह्मपर्यन्तं विलयोत्पत्तिचिन्तनम् । ब्रह्मयज्ञ इति प्रोक्तः सर्वसंसारमोचकः" इति नारायणाध्यात्मे । "अस्यास्मिन् विलयो भावीत्येवं[3] विज्ञानमाहुतिः । नतु तत्कालविलयस्त्वन्यो वा[4] तस्य दर्शनात्" इति ब्रह्मतर्के[5] ॥ * ॥

उदीचीं प्रविवेशाऽऽशां गतपूर्वां महात्मभिः ।
हृदि ब्रह्म परं ध्यायन् नाऽऽवर्तेत यतो गतः ॥ १३ ॥

नाऽवर्तेत वीरगतिम्[6] ॥ * ॥

ते साधुकृतसर्वार्था ज्ञात्वाऽऽत्यन्तिकमात्मनः[7] ।
मनसा धारयामासुर्वैकुण्ठचरणाम्बुजम् ॥ १५ ॥

आत्मनः स्वरूपमात्यन्तिकं ज्ञात्वा ॥ * ॥

इति प्रथमस्कन्धे पञ्चदशोऽध्यायः

---

१ प्राणादिजनने पुनर्विधान्तरमुच्यते-त्रयाणामित्यादि । अयमर्थः— त्रयाणां प्राणापानव्यानानां मूलरूपादेव मुख्यप्राणाज्जनिः । ततश्च तैस्त्रिभिः समानोदानयोर्जनिरिति । इयमपरा विधा । अथच विधान्तरम्-पञ्चानामनाद् वा प्राणतो भवः । किमवान्तरजननप्रक्रियया । पञ्चाप्येते मूलरूपादेव मुख्यप्राणाज्जायन्त इति । अत्र प्राणतो भव इत्युक्ते पञ्चस्वेकात् प्राणत इति भ्रान्तिः स्यात् । अतः अनात् प्राणत इत्युक्तम् । अयं भावः-यथा अन इति मूलं पदं प्राद्युपसर्गभेदेन पञ्चरूपतामापद्यते तथाऽयमनो मुख्यप्राणोऽपि पञ्चात्मा भवतीति ।

२ यद्यप्यत्र प्राचीनटीकादिपर्यालोचनया "हृदिस्थादात्मनामतः" इत्येव पाठः स्वरस इति भाति । प्रतनतरकोशे त्वयं भागो गलितः । अन्यत्र सर्वत्रापि "आत्मनो मतः" इत्येव पठ्यते ।

३ "भवतीत्येवम्" इति प्र. पाठः ।

४ अन्यो वा अभूतस्यापि विलयस्य भूतत्वेन चिन्तनं वा न । कुतः? अविलीनस्यैव तस्य अभिमानिगणस्य दर्शनात् । दृष्टिविरुद्धं च चिन्तनं स्ववञ्चनमेव । मिथ्योपास्तित्वादनर्थसाधनं च ।

५ "इति च ब्रह्मतर्के" इति क्वचित् ।

६ "यतः यत्र वीराध्वनि गतो वीरो नाऽवर्तेत तं वीराध्वानं करिष्यन्नुत्तरां दिशं विवेशेत्यर्थः" इत्यनन्ततीर्थाः ।

७ "साधु सम्यक् कृताः सम्पादिताः चतुर्विधा धर्माद्यर्थाः यैस्ते । भोगापेक्षारहिता इति भावः । अथवा असाधुकृताः असाधुत्वेन निश्चिताः सर्वार्थाः सर्वभोग्यानि यैस्ते । आत्मनः परमात्मनः स्वरूपमात्यन्तिकं उत्कृष्टस्वभावं ज्ञात्वा" इति यादवेन्द्रतीर्थाः ।

कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः ।
नृदेवचिह्नधृक् शूद्रः कोऽसौ[1] गां यः पदाऽहनत् ॥ ५ ॥

कोसावित्याक्षेपः[2] । 'कलिम्' इत्युक्तत्वात् ॥ * ॥

तत् कथ्यतां महाभाग यदि विष्णुकथाश्रयम्[3] ।
अथ वाऽस्य पदाम्भोजमकरन्दलिहां सताम् ।
किमन्यैरसदालापैरायुषो यदसद्व्ययः ॥ ६ ॥

अथेति पक्षान्तरे । वा यदि । अन्यथा चेदायुषोऽसद्व्यय इत्यर्थः ।

"यद्यर्थे च विकल्पार्थे वाशब्दः समुदीर्यते" इति नाममहोदधौ ।

एतदर्थं हि भगवानाहूतः परमर्षिभिः ।
अहो नृलोके पीयेत हरिलीलामृतं वचः ॥ ८ ॥

एतदर्थं हि मृत्युरुपहूतः[4] । अहो नृलोके पीयेतेति ॥ * ॥

सारथ्यपार्षदसुसेवन[5]सख्यदौत्य-
वीरासनानुगमनस्तवनप्रणामैः[6] ।

---

१ "शूद्रकोऽसौ" इत्यौत्तरेयः पाठः ।

२ "यो गां पदाऽहनत् असौ नृपलिङ्गधरः शूद्रः कः कष्टः शूद्रादप्यतिकष्टो हि । आक्षेपार्थे द्वितीयः किंशब्दः" इत्यनन्ततीर्थाः ।

३ "कृष्णकथाश्रयम्" इति प्र. पाठः । "मया पृष्टं विष्णुकथाश्रयं यदि तदा तत् कथ्यताम् । अथवेति न पूर्वोक्तपरित्यागः । अथेति पक्षान्तरे । अस्य विष्णोः (पदाम्भोजयोः) मकरन्दलिहां आस्वादनकर्तॄणां सतां कथाश्रयं वा यदि तदा पृष्टं कथ्यताम्" इथि यादवेन्द्रतीर्थाः ।

४ "मृत्युरूपाहूतः" इति क्वचित् । "अमृतं वचः पीयेतेत्येतदर्थं सत्रस्य श्रवणस्य च विघ्नपरिहारार्थं मृत्यु-र्भगवानुपहूतः" इति यादवेन्द्रतीर्थाः । "मृत्युर्मारको नरसिंहः" इति च । अनन्ततीर्थीये तु "सम्प्रति नृलोके मृत्युविदूरतया स्थितैर्मर्त्यैर्हरिलीलामृतप्रतिपादकं वचः पीयेतेत्येतदर्थं हि भगवान् मृत्युः मारको यमः इहोपहूतः प्रसाद्य स्थापितश्च" इति व्याख्यातम् ।

५ "-पार्षदसेवन-" इति श्रीधरः । -पारिषदसेवन-" इत्यन्ये ।

६ अर्वाचीनास्तु "-प्रणामान्" इति पठित्वा सारथ्यादीन् श्रुत्वा स्मरन्निति वाऽध्याहारेण कथञ्चिद् योज-यन्ति । "सारथ्यं सारथेः कर्म । पार्षदं पार्षदस्य निकटस्य भृत्यस्य कर्म । सेवनं स्वामिदेहोपयुक्तपरिचर्या । सख्युः कर्म सख्यम् । दौत्यं सन्देशहरणम् । वीरासनस्य सिंहासनस्य अनु पश्चात् रक्षणार्थं गमनम् । वीरासनं रात्रौ जागरणं वा । अनुगमनं अन्याधीनतया सहसञ्चारो वा । स्तवनं अन्यमनःप्रसादार्थं गुणोक्तिः । प्रणामः प्रह्वीभावः । एभिर्व्यापारैर्जगत्प्रणतस्य कृष्णस्य चरणारविन्दे भक्तिं करोति" इति यादवेन्द्रतीर्थाः । "पार्षदं सभापति-कर्म । सेवनं उक्तकर्मकरणम् । वीरासनानुगमनं सिंहासनमुपोपासकतयोपवेशनम्" इत्यनन्ततीर्थाः ।

स्निग्धेषु पाण्डुषु जगत्प्रणतस्य विष्णो[१]-
र्भक्तिं करोति नृपतिश्चरणारविन्दे ॥ १६ ॥

स्निग्धेषु पाण्डुषु विष्णोः सारथ्यादिभिर्विशेषतो भक्तिं करोति[२] ॥ * ॥

सत्यं शौचं दया दानं[३] त्यागः सन्तोष आर्जवम्[४] ।
शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम्[५] ॥ २६ ॥
ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो धृतिः स्मृतिः[६] ।
स्वातन्त्र्यं कौशलं कान्तिः सौभगं मार्दवं क्षमा[७] ॥ २७ ॥

त्यागो मिथ्याभिमानवर्जनम् ।

"मिथ्याभिमानविरतिस्त्याग इत्यभिधीयते" इति नारायणाध्यात्मे ।

एकान्ततः शुभभागित्वं सौभाग्यम्[८] ।

---

१ "जगत्प्रणतिं च विष्णोः" इति प्र. पाठः ।

२ "स्निग्धेषु भक्तेषु पाण्डुषु जगत्प्रणतस्यापि विष्णोः सारथ्यादिभिर्निमित्तैः कृष्णस्य चरणारविन्दे विशेषतो भक्तिं करोति । सामान्यतः स्वाभाविकभक्तिमानेव, अहो मुकुन्दश्चरणानतेषु कृपासागरो नन्विति द्रुतहृदयो भक्तिं करोतीति भावः" इत्यनन्ततीर्थाः ।

३ "दया क्षान्तिः" इत्यर्वाचीनः पाठः ।

४ "आर्जवं प्रार्थनाविषयत्वम्, मौर्ख्याभाव इत्यर्थः । मनोवाचामेकविषयता वा" इति यादवेन्द्रतीर्थाः । "निर्दुःखानन्दानुभवः सत्यम् । नित्यशुद्धिः शौचम् । सज्जनेषु कृपा दया । भक्ताभक्तमध्यमेषु सुखदुःखमिश्रफलप्रदानं दानम् । अस्वकीये स्वकीयत्वबुद्धिर्मिथ्याभिमानस्तद्राहित्यं त्यागः । स्वरूपलाभेनैवान्यत्रालम्बुद्धिः सन्तोषः । वाक्कायमनस्स्वेकविषयता आर्जवम्" इत्यनन्ततीर्थाः । "सत्यमाप्ततमत्वम् । यथार्थबोधकवेदप्रवर्तकत्वात् । शौचं नित्यशुद्धविग्रहादिमत्त्वम्" इति शुकदेवः ।

५ "तपः युक्त्यनुसन्धानम्" इति यादवेन्द्रतीर्थाः । "आलोचनम्" इत्यनन्ततीर्थाः, शुकदेवश्च । "साम्यमविकारः । सर्वगुणेषु सर्वावतारेषु पूर्णत्वरूपं वा साम्यम्" इति यादवेन्द्रतीर्थाः । "स्वस्वरूप एव रतिरुपरतिः । सर्वश्रवणवत्त्वं श्रुतम्" इत्यनन्ततीर्थाः ।

६ "तेजो बलं स्मृतिः" इत्यर्वाचीनः पाठः । "सार्वज्ञ्यं ज्ञानम् । स्वेतरत्रासारताबुद्धिर्विरक्तिः । धृतिः सर्वधारणम् । स्मृतिः अतीतानागतब्रह्माण्डादिस्मरणम्" इत्यनन्ततीर्थाः । "विरक्तिर्विषयासक्त्यभावः । अविस्मृतिः स्मृतिः स्थैर्यं वा । उचितज्ञानं वा" इति यादवेन्द्रतीर्थाः । "स्मृतिः यथापूर्वं विश्वरचनानुसन्धानम्" इति शुकदेवः ।

७ "कान्तिर्धैर्यं मार्दवमेव च" इति प्र. पाठः । "सौभाग्यं मार्दवं क्षमा" इति चानन्ततीर्थसम्मतः पाठः । "क्षमा भक्तेषु क्रोधानुत्थानम्" इत्यनन्ततीर्थाः । "विचित्रकार्यकरणशक्तिः कौशलम् । विषयेषु दोषज्ञानशक्तिर्वा । मार्दवं प्रेमविषयानुसारित्वम्" इति यादवेन्द्रतीर्थाः ।

८ सौभगमिति मूलस्यार्थतोऽनुवादोऽयम् । यादवेन्द्रतीर्थीयविजयध्वजीयप्राचीनकोशादिसंवादात् । अनन्ततीर्थीयपक्षे सौभाग्यमित्येव मूलपाठ इति यथाश्रुतमेव प्रतीकग्रहणम् ।

"शुभैकभागी सुभगो दुर्भगस्तद्विपर्ययः" इति गीताकल्पे। "शमः प्रियादिबुद्ध्युज्झा[1] क्षमा क्रोधाद्यनुत्थितिः। महाविरोधकर्तुश्च सहनं तु तितिक्षणम्" इति पाद्मे। "स्वयं सर्वस्य कर्तृत्वात् कुतस्तस्य प्रियाप्रिये" इति च पाद्मे[2]। "प्रियमेव यतः सर्वमप्रियं नास्ति कुत्रचित्। स्वयमेव यतः कर्ता शान्तोऽतो हरिरीश्वरः" इति ब्रह्मतर्के ॥ * ॥

[3]प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः।
गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहङ्कृतिः ॥ २८ ॥

मानः परेषाम्[4] ॥ * ॥

इमे[5] चान्ये च भगवन् नित्या यत्र महागुणाः।
प्रार्थ्या[6] महत्त्वमिच्छद्भिर्नच यान्ति स्म[7] कर्हिचित् ॥ २९ ॥

"गुणैः स्वरूपभूतैस्तु गुण्यसौ हरिरीश्वरः। न विष्णोर्नच मुक्तानां कोऽपि भिन्नो गुणो मतः[8]" इति च ब्रह्मतर्के[9] ॥ * ॥

इति प्रथमस्कन्धे षोडशोऽध्यायः

---

१ "–बुद्ध्युत्सादः" इति क्वचित् प्र. पाठः प्रामादिकः। क्वचित् कोशेषु तु "–बुद्ध्युत्सा" इति पठ्यते।

२ प्र. पाठे "प्रियाप्रिय इति च" इत्यप्रगृह्य पठ्यते। "पाद्मे" इति न पठ्यते। यद्यपि चकारणैव पाद्म इत्यनुवृत्तिः सूचिता। तथाऽपि स्पष्टत्वाय मुखत एवोदितम्। एवमुत्तरत्रापि।

३ "प्रागल्भ्यं उचितज्ञानविषयशक्तिः धाष्टर्यं वा। शीलं सन्तोषकरस्वभावव्यापारः। सहः निष्ठुरसहनशक्तिः। ओजः प्रतिबन्धनशक्तिः। बलं पर्वताद्युद्धरणसामर्थ्यम्, अपेक्षितसाधनसामर्थ्यं वा। भगः ज्ञानविज्ञानादिकम्। गाम्भीर्यं चापलाभावः। पराज्ञेयचित्तवृत्तिर्वा। स्थैर्यं बुद्धिभेदाभावः। स्थिरचित्तता वा। धर्मरक्षणे स्थिरता वा। आस्तिक्यं वेदवेदान्तसम्प्रदायप्रवर्तनम्। अत्रोक्तमस्तीति ज्ञानं वा। कीर्तिः पुण्यकीर्तिः। अनहङ्कृतिः अहङ्कारलक्षणदोषाभावः जीववत् भ्रमप्राप्तविकाराभावो वा" इति प्राचीनम्। "बलं स्वतन्त्रकरणशक्तिः। भगो भाग्यम्। गाम्भीर्यमनवगाह्यता। अस्वरूपे अहमिति बुद्धिराहित्यमनहङ्कृतिः" इति च। "प्रागल्भ्यं प्रतिभातिशयः" इत्यन्ये। "सभासु धाष्टर्यम्" इत्येके। "भग ऐश्वर्योत्कर्षः। मानः सर्वपूज्यत्वम्। अनहङ्कृतिः सर्वेश्वरत्वेऽपि गर्वाभावः" इति च।

४ "मानः परेषां मानकर्तृत्वम्। परेषां शत्रूणां मध्ये मानवत्त्वं वा" इति यादवेन्द्रतीर्थाः।

५ "एते" इत्यर्वाचीनः पाठः। इमे चत्वारिंशद् अन्ये चानुक्ता असाधरणा गुणाः।

६ "प्रार्थ्या उपासनार्थम्" इति प्राचीनम्। "प्रार्थ्या उपास्याः" इत्यनन्ततीर्थीयम्। "तत्र केचिद् भगवदसाधारणतया ज्ञेयाः। अन्ये यथावस्थमात्मनि सम्पादनीयत्वेन प्रार्थ्या इति विवेकः" इति शुकदेवः। "मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकमिति भगवदुक्त्या गुणातीतस्यापि तस्य गुणवत्त्वान्महागुणा अप्राकृताश्चिन्मयाः स्वरूपभूताः" इति विश्वनाथः।

७ "न वियन्ति स्म" इति प्र. पाठः।

८ "भिन्नगुणो मतः" इति क्वचित्।

९ "इति ब्रह्मतर्के" इति प्र. पाठः।

8

वृषं मृणाळधवळं मेहन्तमिव बिभ्यतम् ।
वेपमानं पदैकेन सीदन्तं[1] शूद्रपीडितम्[2] ॥ २ ॥

बिभ्यतमिव मेहन्तम्[3] ॥ * ॥

धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृषरूपधृक् ।
यदधर्मकृतः स्थानं सूचकस्यापि तद् भवेत् ॥ २१ ॥
अथवा देवमायाया नूनं गतिरगोचरा ।
चेतसो वचसश्चापि भूतानामिति निश्चयः ॥ २२ ॥

असतां सूचकस्य न दोषः, तथाऽपि सतां न सूचनीयमिति दर्शयितुम् । ज्ञातुं शक्तत्वाच्च[4] राज्ञः ।
"यद्यधर्मः कृतः सद्भिः स न वाच्यः[5] कथञ्चन । असत्कृतमधर्मं तु वदन् धर्ममवाप्नुयात्" इति व्यासस्मृतौ ।

तस्य गोचरत्वेऽपि भूतानामगोचरेति ज्ञापयितुं वा ॥ * ॥

न वर्तितव्यं तदधर्मबन्धो धर्मेण सत्येन च वर्तितव्ये[6] ।
ब्रह्मावर्ते यत्र यजन्ति यज्ञैर्यज्ञेश्वरं ब्रह्मवितानयज्ञाः[7] ॥ ३२ ॥

ब्रह्मयज्ञा वितानयज्ञाश्च[8] ॥ * ॥

यस्मिन् हरिर्भगवानिज्यमान [9]इष्टात्ममूर्तिर्यजतां शं तनोति ।
कामानमोघान् स्थिरजङ्गमानामन्तर्बहिर्वायुरिवेश आत्मा[10] ॥ ३३ ॥

इष्टात्ममूर्तिः इच्छातनुः ॥ * ॥

---

१ "भयात् वेपमानम् । एकेन पदा सीदन्तं गमनोद्युक्तम् । अवस्थानसामर्थ्याभावेन सीदन्तमिव पतन्तमिव स्थितमिति वा" इति प्राचीनटीका ।
२ "शूद्रताडितम्" इति प्र. पाठः ।
३ "बिभ्यतमिव स्थितं भयोपेतमिव स्वात्मानं दर्शयन्तम्" इति, "अत एव मेहन्तं शकृन्मुञ्चन्तं किञ्चिन्मूत्रयन्तं च" इति च प्राचीनम् ।
४ "शक्यत्वाच्च" इति प्र. पाठः ।
५ "न स वाच्यः" इति प्र. पाठः ।
६ "धर्मेण सत्येन च वर्तितव्ये प्रवर्तितव्ये सति । स्थातुमुचिते सतीति वा" इति प्राचीनम् ।
७ "यज्ञवितानविज्ञाः" इत्यर्वाचीनः पाठः । "यज्ञविज्ञानविज्ञाः" इति च क्वचित् ।
८ "ब्रह्मयज्ञाः वेदाध्ययनरूपाः । अग्निष्टोमादयो वितानयज्ञाः" इति प्राचीनम् ।
९ "इज्यात्ममूर्तिः" इत्यर्वाचीनः पाठः । "इज्यामूर्तिः" इति च ।
१० "वायुरिवैव आत्मा" इति प्र. पाठः । "स्थिरजङ्गमानां अन्तरात्मा अन्तर्यामी बहिः ईशः सर्वशक्त्युपेतः स्वामी । भक्तस्य स्वस्वरूपद्वयं दृष्टान्तेन स्पष्टयति—वायुरिवेति । बहुमूर्तीः समर्थयते—इष्टात्ममूर्तिः । स्वेच्छोपात्ताः आत्मभूताः स्वभावसिद्धाः मूर्तयः यस्य । इच्छातनुः" इति प्राचीनम् ।

अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् ।
विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः[१] ॥ ४० ॥

विहितातिरेकेण न सेवेत[२] ॥ * ॥

इति प्रथमस्कन्धे सप्तदशोऽध्यायः

उत्सृज्य सर्वतः सङ्गं विज्ञानार्जितसंस्थितिः[३] ।
वैयासिकेर्जहौ[४] शिष्यो गङ्गायां स्वकलेबरम्[५] ॥ ३ ॥

"विज्ञानमात्मयोग्यं स्याज्ज्ञानं साधारणं स्मृतम्" इति भागवततन्त्रे ॥ * ॥

तुलयाम लवेनापि न स्वर्गं[६] नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताऽशिषः[७] ॥ १३ ॥

"सम्यक् 'स्वरूपस्याव्यक्तिरभावो जननस्य च । अल्पयत्नात्[९] ततो वृद्धिहेतोः सत्सङ्गतिर्वरा" इति वायुप्रोक्ते ॥ * ॥

---

१ "लोकगुरुः पतिः" इति केचित् पठन्ति ।

२ "न सेवेतेति" इति प्र. पाठः । अन्येऽप्याहुः—"स्त्रीसुवर्णयोरसेवनं नाम तयोरनासक्तिः" इति । "स्त्रियं परकीयामेव न सेवेत" इति विश्वनाथः ।

३ "विज्ञाताजितसंस्थितिः" इत्यर्वाचीनः पाठः । "सर्वतः देहतदनुबन्धिकळत्रराज्यादिषु सर्वतः अशेषतः सङ्गं प्रीतिं रागं वा उत्सृज्य विज्ञानेन आर्जिता संस्थितिर्यस्य । आत्मनि योगाभ्यासपाटवेन परमात्मनि स्वतःप्राप्तमनःस्थैर्योपेत इत्यर्थः । विज्ञानेन आत्मयोग्येन सम्पन्ना संस्थितिः स्वबिम्बसंस्था ज्ञानं यस्येति वा" इति यादवेन्द्रतीर्थाः ।

४ "वैयासकेर्जहौ" इति प्र. पाठः । वैयासिकिरित्येव शुकस्य नाम प्रतनग्रन्थेषु पठ्यते ।

५ "स्वं कलेवरम्" इति प्र. पाठः । ६ "स्वर्ग्यम्" इति पाठान्तरम् । यादवेन्द्रतीर्थसम्मतश्चायं पाठः ।

७ अत्र प्राचीनटीकायां विशेषः—"भगवत्सङ्गी परमात्मगुणेषु प्रीतिविशेषयुक्तः । तेन प्राप्तः सङ्गः परमात्मगुणानुरागः । तत्प्राप्तं सुखमित्यर्थः । तेन अपुनर्भवं अपक्वयोगिनां सम्यगनभिव्यक्तमोक्षसुखं न तुलयामं । स्वर्ग्यं सुखं भगवत्सङ्गिसङ्गस्य लवेनापि न तुलायाम । मर्त्यानामाशिषः ऐश्वर्यजन्यं सुखं लवेनापि न तुलायाम इति किमुत" इति । "भगवत्सङ्गिनो वैष्णवाः तत्सम्भाषणादिरूपसङ्गस्य" इत्यनन्ततीर्थाः ।

८ "स्वरूपाभिव्यक्तिः" इति प्रचलितः पाठस्तदनुसारीणि व्याख्यानानि च प्रामादिकान्येव । सकलग्रन्थविरोधात् । "सम्यगनभिव्यक्तमोक्षसुखम्" इति हि यादवेन्द्रतीर्थीयम् । "सम्यक्स्वरूपानभिव्यक्तिरूपमोक्षमपि न तुलायामः" इत्यनन्ततीर्थीयम् ! "सम्यक्स्वरूपाव्यक्तिजननाभावलक्षणं कैवल्यम्" इति च विजयध्वजीयम् । जननाभावमात्रेण न सन्तोष्टव्यम् । स्वरूपाभिव्यक्तिहेतुभगवद्गुणश्रवणाय पुनःपुनर्जननमपि ततो वरमिति मथितार्थः । ९ "अप्रयत्नात्" इति प्र. पाठोऽपि प्रामादिकः ।

कुतः पुनर्गृणतो नाम तस्य महत्तमैकान्तपरायणस्य ।
योऽनन्तशक्तिर्भगवाननन्तो महद्गुणत्वाद् यमनन्तमाहुः ॥ १९ ॥

अनन्तः कालतो देशतश्च[१] ॥ * ॥

यत्रानुरक्ताः सहसैव धीरा
व्यपोह्य देहादिषु रूढसङ्गम्[२] ।
व्रजन्ति तत् पारमहंस्यसत्यं[३]
यस्मिन्नहिंसोपरमश्च धर्मः[४] ॥ २२ ॥

परमहंसाश्रमप्राप्यं[५] सत्यं ब्रह्म ॥ * ॥

प्रतिरुद्धेन्द्रियप्राणमनोबुद्धिमुपागतम् ।
स्थानत्रयात् परं प्राप्तं[६] ब्रह्मभूतमविक्रियम् ॥ २६ ॥

"[७]स्वतो मनस्थितिर्विष्णौ ब्रह्मभाव उदाहृतः[८]" इति ब्रह्माण्डे ॥ * ॥

---

१ "अनन्तो देशतः कालतश्च" इति प्र. पाठः ।

२ "सङ्गमूढम्" इति पाठान्तरम् । प्राचीनटीकासु च स एव पाठः समादृत इति भाति । भागवतमूलकोशे त्वयमेतादृशः पाठः । ऊढं सङ्गमिति रूढसङ्गमिति चैक एवार्थः ।

३ "पारमहंस्यमन्त्यम्" इत्यर्वाचीनः पाठः ।

४ "–शमः स्वधर्मः" इत्यर्वाचीनः पाठः । "–शमश्च धर्मः" इति च पाठान्तरम् । "यस्मिन् यत्प्राप्त्यर्थं अहिंसा दुःखानुत्पादलक्षणधर्मः, उपरमः सर्वभोग्यपरित्यागलक्षणधर्मश्च प्रवर्तते तत् पारमहंस्यं परमहंसाश्रमप्राप्यं सत्यं पूर्णानन्दानुभवस्वरूपं ब्रह्म व्रजन्ति प्राप्नुवन्ति । यस्मिन् परमहंसाश्रमे वा" इति यादवेन्द्रतीर्थाः । "यस्मिन् परब्रह्मगमने अहिंसा उपरत्याख्यधर्मश्च साधनमिति वा" इत्यनन्ततीर्थाः । "उपरतिरनवरतहरिचिन्तनम्" इति च । एतेन "यस्मिन्नहिंसोपरतिश्च धर्मः" इत्यनन्ततीर्थीयसम्मतः पाठ इति भाति ।

५ परमहंसानामिदं पारमहंस्यं परमहंसाश्रमः । पारमहंस्येन प्राप्यं पारमहंस्यमिति पुनःसमासः । यद्वा परमहंसैः प्राप्यं पारमहंस्यम् । सन्यासविशेषवाचकेन परमहंसपदेन तुर्याश्रमसामान्यं गृह्यत इति बोधनाय भाष्ये परमहंसाश्रमेत्युक्तम् ।

६ "स्थानत्रयात् जाग्रत्स्वप्नसुषुप्त्याख्यावस्थात्रयात् परं ध्यानरूपं तुरीयावस्थाविशेषं प्राप्तम्, अत एव ब्रह्मभूतं अप्रयत्नेन ब्रह्मणि प्रसृतमतिम्" इत्यनन्ततीर्थाः । "हृत्कण्ठचक्षूंषि प्राज्ञतैजसविश्वमूर्तीनां स्थानत्रयम् ; तेभ्यः परं तुरीयं वासुदेवमूर्तिं प्राप्तम् । इदं च यानं न सर्वयोगिसाधारणमिति स्तौति–ब्रह्मभूतमिति । स्वतः प्रयत्नं विना विष्णौ मनस्थित्युपेतमित्यर्थः" इति यादवेन्द्रतीर्थाः ।

७ इतः पूर्वं "ब्रह्मभूतं ब्रह्मणि भूतम्" इति वाक्यमधिकं प्र. पाठे ।

८ "स्वात्मभाव उदाहृतः" इत्येकस्मिन् कोशे पठ्यते । एतेन ब्रह्मणि विष्णौ भूतं मनस्थित्युपेतमिति, ब्रह्माख्यं विष्णुं भूतं मनसा प्राप्तमिति वा विग्रहः प्रदर्शितो भवति । परेऽप्येवं व्याचक्षते–"ब्रह्मभूतं ब्रह्मविषयकभावनयाऽन्वितम्" इति वीरराघवः । "ब्रह्म ध्येयं भूतं प्राप्तं येन तम्" इति शुकदेवः ।

अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ।
ब्राह्मणं प्रत्यभूद् ब्रह्मन् मत्सरो मन्युरेव च ॥ २९ ॥

"अप्रीतिर्मद्वशो नायमिति मत्सर ईरितः" इति नाममहोदधौ ॥ * ॥

इत्युक्त्वा रोषताम्राक्षो वयस्यानृषिबालकान्[१] ।
कौशिक्यप[२] उपस्पृश्य वाग्वज्रं विससर्ज ह ॥ ३६ ॥

कौशिकी कुशापाणिः[३] ॥ * ॥

अरक्षमाणे[४] नरदेवनाम्नि रथाङ्गपाणावयमङ्ग लोकः ।
तदैव चोरप्रचुरो[५] विनङ्क्ष्यत्यरक्ष्यमाणो विवरूथवत्[६] क्षणात् ॥ ४३ ॥

"सेना वरूथिनी[७] प्रोक्ता वरूथो गुप्तिरुच्यते" इत्यभिधाने[८] ॥ * ॥

तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य पशोर्विलुम्पकाः[९] ।
परस्परं घ्नन्ति शपन्ति वृञ्जते[१०] पशून् स्त्रियोऽर्थान् पुरुदस्यवो जनाः[११] ॥ ४४ ॥

---

१ "-बालकः" इति प्र. पाठः ।

२ "कौशिक्यापः" इत्यौत्तरेयः पाठः । "कौशिकी कुशपाणिः । कौशिक्याख्यनदीजलं स्पृष्ट्वेति वा" इत्यनन्ततीर्थाः । "अप उपस्पृश्य शुद्धाचमनं कृत्वा, कौशिकी, कुशकृतं पवित्रं कौशिकम्, तदुपेतः पवित्रपाणिः सन्" इति प्राचीनटीका ।

३ "कुशपाणिः" इति प्र. पाठः । आबन्तः स्त्रीलिङ्गोऽपि कुशाशब्दो वर्तते। "कुशाच्छन्दस्तुत्युपगानवत्" इति हि ब्रह्मसूत्रेषु । "कुशाग्रहणस्तुत्युपगानवत्" इति च भाष्यम् । "कुशा वानस्पत्याः स्थः ता मा यात" इति श्रुतिः । "अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य" (८.३.४६) इति च पाणिनिसूत्रम् । 'अयस्कुशा' इति चोदाहरन्ति । अत एव "-काशकुश-" इति पुन्नपुंसकाधिकारे पठ्यते ।

४ "अलक्ष्यमाणे" इति प्र. पाठः । "नरदेवनाम्नि राज्ञि स्थिते रथाङ्गपाणावरक्षमाणे प्रजारक्षणमकुर्वति सति । नरदेवलक्षणाधिष्ठानाभावादिति भावः" इति यादवेन्द्रतीर्थाः ।

५ "तदा हि चौरप्रचुरः" इति प्र. पाठः ।

६ "अविवरूथवत्" इति पदं विभज्यार्वाचीना 'मेषसङ्घवत्' इति व्याचक्षते । "विवरूथवत् रक्षारहितसैन्यवत्" इति यादवेन्द्रतीर्थाः । "विवरूथवत् अरक्षितवस्तुवत्, रक्षारहितरथवदिति वा । 'रथ गुप्तिर्वरूथिका' इति ह्यभिधानम्" इत्यनन्ततीर्थाः ।

७ "सेना पराकिणी" इति प्र. पाठः । "पराकिनी" इत्येकस्मिन् कोशे। "पताकिनी" इति च । यद्यप्ययं कोशभागः प्रकृतानुपयुक्तः । तथाऽपि विवरूथं किमिति जिज्ञासायां सैन्यवदिति विशेष्यसूचनायेदमुदितम् ।

८ "इत्यभिधानम्" इति प्र. पाठः । ९ "वसोर्विलुम्पकात्" इति प्र. पाठः ।

१० "वृञ्जते वृत्तिच्छेत्तारो भवन्ति" इति प्राचीनम् । "अपहरन्ति" इत्यनन्ततीर्थाः ।

११ "पुरदस्यवः" इति पाठान्तरम् । "नगरनाशकाश्चोराः" इत्यनन्ततीर्थाः ।

"विड् राष्ट्रं पशुरुत्सेको भ्रमरश्चेति कथ्यते" इति च ॥ * ॥

साधवः प्रायशो लोके[१] परैर्द्वन्द्वेषु योजिताः ।
न व्यथन्ते[२] न हृष्यन्ति यत आत्मा गुणाश्रयः ॥ ५० ॥

स्वकृतो गुणः स्वस्यैव यतः[३] ॥ * ॥

इति प्रथमस्कन्धेऽष्टादशोऽध्यायः

इति स्म राजा व्यवसाययुक्तः[४]
प्राचीनकूलेषु[५] कुशेषु धीरः ।
उदङ्मुखो दक्षिणकूल आस्ते
समुद्रपत्न्याः स्वसुतन्यस्तभारः[६] ॥ १७ ॥

गङ्गायामुदक एव किञ्चिद्दक्षिणभागे प्रासादे[७] । तथा हि महाभारते ॥ * ॥

इति प्रथमस्कन्धे एकोनविंशोऽध्यायः

श्यामं सदाऽऽवीच्य[८] वयोङ्गलक्ष्म्या
स्त्रीणां मनोज्ञं रुचिरस्मितेन ।

---

१ "प्रायशः साधवो लोके" इति प्र. पाठः ।

२ "न व्यथन्ति" इति च पाठान्तरम् ।

३ "गुणस्तस्यैव यतः" इति प्र. पाठः । "आत्मा जीवः स्वयमेव गुणाश्रयः । स्वकृतस्य गुणस्य शुभस्याशुभस्य चाऽश्रयो यतस्तस्मात्" इत्यनन्ततीर्थाः । "स्वकृतो गुणः पापादिः स्वस्यैव यतः अतः परान् प्रति न व्यथन्ति । स्वकृतपापं विना परैरपमानाद्यकरणात्" इति यादवेन्द्रतीर्थाः ।

४ "राजाऽध्यवसाययुक्तः" इति प्र. पाठः ।

५ "प्राचीनमूलेषु" इति प्र. पाठः । "प्राचीनकूलेषु प्राचीनाग्रेषु" इति प्राचीनम् ।

६ "स्वसुते न्यस्तभारः" इति क्वचित् ।

७ "दक्षिणे भागे प्रासादे" इति क्वचित् । "समुद्रपत्न्या गङ्गाया उदक एव, प्रवाहमध्ये प्रासादावस्थानासम्भवात् नदीमध्यात् किञ्चिद् दक्षिणभागे । कूलशब्दोऽत्र भागवाची" इत्यनन्ततीर्थाः । "दक्षिणकूले दक्षिणकूलसमीपे" इति यादवेन्द्रतीर्थाः ।

८ "सदाऽऽपीच्य—" इति प्र. पाठः ।

प्रत्युत्थिता मुनयश्चाऽसनेभ्य[१]-
स्तल्लक्षणज्ञा अपि गूढवर्चसम् ॥ ४ ॥

"कैशोरयौवनाभ्यन्तःकाल आवीच्यमुच्यते" इत्यभिधाने[२] ॥ * ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते
श्रीभागवततात्पर्यनिर्णये
विंशोऽध्यायः[३]

इति प्रथमः स्कन्धः

---

१ "प्रत्युत्थितास्ते मुनयः स्वासनेभ्यः" इति प्र. पाठः ।

२ "आपीच्यमुच्यते इत्यभिधानम्" इति प्र. पाठः । "आवीच्यं षोडशवर्षीयं वयो यस्य तस्याङ्गस्य लक्ष्म्या" इति प्राचीनम् ।

३ अनन्ततीर्थीयपाठे तु नायं विंशोऽध्यायः । तत्पक्षे आस्कन्धसमाप्ति ऊनविंश एवाध्यायोऽनुवर्तते । भागवते प्र. पाठेऽपि तथा ।

द्वितीयस्कन्धः

ॐ ॥ वरीयानेष ते प्रश्नः कृतो लोकहितं नृप[1] ।
आत्मवित्सम्मतः पुंसां श्रोतव्यादिषु यः परः ॥ १ ॥

यः पर इति[2] ॥ * ॥

श्रोतव्यानीह[3] राजेन्द्र नृणां सन्ति सहस्रशः ।
अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम् ॥ २ ॥
निद्रया ह्रियते नक्तं व्यवायेन नवं वयः[4] ।
दिवा चार्थेहया राजन् कुटुम्बभरणेन वा ॥ ३ ॥

अपश्यतां निद्रया[5] ॥ * ॥

---

१ "लोकहितो नृप" इति क्वचित् पाठः ।

२ श्रोतव्यादिषु यः पर इत्येष ते प्रश्नः वरीयान् । तथाहि प्राचीनटीका—"नृणां सहस्रशः श्रोतव्यादीनि सन्ति । पुंसां तेषु श्रोतव्यादिषु यः पर इति यः कः पर उत्तम इति एष ते प्रश्नः वरीयान् । श्रोतव्योत्तमविषयत्वात् । आत्मविदामत्रस्थितानां सर्वऋषीणां सम्मतः सन्तोषकरश्च । किञ्च लोकहितं यथा भवेत् तथा कृतः । एवमितिशब्दाध्याहारे सति अन्तिमपादस्यान्वयो घटते । अर्थतः परीक्षित्प्रश्नानुवादोऽयम् । अथवा श्रोतव्यादिषु य आत्मा पर इति हेतोः ते प्रश्नः वरीयान्" इत्यादि ।

३ "श्रोतव्यादीनि" इति प्र. पाठः । यद्यपि प्राचीनटीकायामपि स एव पाठः पठ्यते । तथाऽपि प्राचीनकोशेषु "श्रोतव्यानीह" इत्येव पाठात्, "इह कर्मभुवि" इत्यनन्ततीर्थीये व्याख्यानाच्च स एवात्र समादृतः । श्रोतव्यानीत्यपि श्रोतव्यादीनीत्येवार्थः । बहुवचनमाद्यर्थे ।

४ "व्यवायेन च वा वयः" इति प्र. पाठः ।

५ आत्मतत्त्वमपश्यतां सहस्रशः श्रोतव्यादीनि सन्तीति पूर्वार्द्धेनान्वय इति परे व्याचक्षते । तामेतामन्वयभ्रान्तिं निवारयति—अपश्यतां निद्रया । एतेन आत्मतत्त्वमपश्यतामित्येतत् निद्रया ह्रियते नक्तमित्याद्युत्तरश्लोकेनान्वितं न पूर्वार्द्धेनेत्युक्तं भवति । तथाचैवं समग्रान्वयः—यद्यपि नृणां सहस्रशः श्रोतव्यादिनि सन्ति । तथाऽपि आत्मतत्त्वमपश्यतां गृहेषु सक्तानां न तत्र स्वरसा प्रवृत्तिभवति । यतस्तेषां सर्वमायुर्निद्रया व्यवायेनार्थेहया कुटुम्बभरणेन वा ह्रियते ।

देहापत्यकळत्रादिष्वात्मदैन्येष्वसत्स्वपि[1] ।
तेषु प्रसक्तो निधनं[2] पश्यन्नपि न पश्यति ॥ ४ ॥

असत्सु[3] अभद्रेषु । "सद्भावे साधुभावे च" इति वचनात् ॥ * ॥

प्रायेण मुनयो राजन् निवृत्ता विधिनिषेधत.[4] ।
नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ॥ ७ ॥

ध्यानापेक्षया प्रायेण । नैर्गुण्यस्था मुक्ताः । "एतत् साम गायन्नास्ते" इति श्रुतेः[5] ॥ * ॥

इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्[6] ।
अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम् ॥ ८ ॥

द्वापरे च, आदौ च[7] कृष्णावतारापेक्षया ।

"व्यासः षट्शतवर्षीयो धृतराष्ट्रमजीजनत्" इति स्कान्दे ॥ * ॥

---

१ "-कलत्रादिष्वात्मसैन्येष्वसत्स्वपि" इति प्र. पाठः ।

२ "तेषां प्रमत्तो निधनम्" इति प्र. पाठः । "आत्मनः दैन्येषु दैन्यकारणेषु । असत्सु अभद्रेषु, दुःखकारणेष्वित्यर्थः । तेषु स्वकर्मार्जितेषु प्रसक्तः निधनं तेभ्यो नाशं दुःखप्राप्तिरूपं पश्यन् अनुभवन्नपि न पश्यति तत्परिहारोपायं न जानाति । ज्ञानावरकविषयाभिनिवेशेनेति भावः" इति प्राचीनम् । "निधनं स्वतोऽन्येषां देहापत्यादिनाशं पश्यन्नपि (स्वस्य न पश्यति)" इत्यनन्ततीर्थाः ।

३ विश्वनाथोऽपि व्याचख्यौ "असत्स्वपि असाधुष्वपि" इति । "अनित्येषु" इति शुकदेवादयः ।

४ "निवृत्ता विधिषेधत." इति प्र. पाठः । "विधिनिषेधतः विधिनिषेधात्मकवेदबोधितात् काम्यकर्मणो निवृत्ताः" इति वीरराघवः । "विधिनिषेधतः निवृत्ताः विधिनिषेधभयरहिताः सर्वकर्मणां निवृत्तत्वात् । गुणेभ्यः सत्वादिभ्यः निष्क्रान्तः निर्गुणः तेन प्राप्यं नैर्गुण्यं वैकुण्ठादि तत्र स्थिता अपि बन्धभयरहिता अपि, हरेः प्रायो गुणानुकथने रमन्ते, ध्यानापेक्षया प्रायेण, गुणानुकथनाभावसमये ध्यानेन रमन्त इत्यर्थः । रसज्ञानां तूष्णीमवस्थानासम्भवात्" इति प्राचीनम् । "नैर्गुण्यस्थाः सत्त्वादिगुणसम्बन्धविधुरकेवलज्ञानात्मके निजरूपे स्थिताः" इत्यनन्ततीर्थाः ।

५ "इत्यादिश्रुतेः" इति क्वचित् ।

६ "उपनिषदर्थप्रतिपादकत्वात् पञ्चमवेदत्वाद् वा ब्रह्मसम्मितं वेदसमम्" इति प्राचीनटीका ।

७ "द्वापरे आदौ च" इति क्वचित् पाठः । अत्र त्रयः पक्षाः । मूले द्वापरे आदौ इति पदद्वये स्थिते संहितायां द्वापर आदौ इति रूपसिद्धौ छन्दसि तु पुनःसन्धिरपि भवतीति सारस्वतवचनात् शिरोपधानमितिवद् द्वापरादाविति भवतीत्येकः पक्षः । तथा च पदद्वयस्यार्थ उच्यते द्वापरे च, आदौ चेति । द्वापरस्य आदिः कृष्णावतारापेक्षया पूर्वतनः कालः द्वापरादिः तस्मिन्निति द्वितीयः पक्षोऽनन्ततीर्थाभिमतः । अत्र पक्षे द्वापरे चेति भाष्यं तात्पर्यप्रदर्शनरम् । द्वापरं च आदिश्च द्वापरादी, तयोः द्वापराद्योः छान्दसेन वचनव्यत्ययेन द्वापरादाविति रूपमिति तृतीयः पक्षः यादवेन्द्रतीर्थाभिमतः । द्वापरे आदविति मूले पदद्वयमिति तु भाष्येण सुश्लिष्टतरम् । अन्येऽप्यत्र व्याचक्षते —
"कृष्णावतारादनतिपूर्वमेव सत्यवत्यां द्वैपायनस्य प्रादुर्भावाद् द्वापरादाविति न सङ्गच्छते । तस्माद् द्वापरशब्देनात्र

9

परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया ।
गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥ ९ ॥

परिनिष्ठितोऽपि मुक्तिरस्य[१] भविष्यतीति निश्चितोऽपि ।

"उदरं संशयः प्रोक्तः परिनिष्ठा विनिश्चयः" इत्यभिधाने । "ऋष्युत्तमा देवताश्च विमुक्तौ परिनिश्चिताः । तथाऽप्यधिकसौख्यार्थे यतन्ते शुभकर्मसु । विमुक्तास्तु स्वभावेन नित्यं ध्यानादितत्पराः" इति गारुडे ॥ * ॥

नियच्छेद् विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः ।
मनः कर्मभिराक्षिप्तं[२] शुभार्थे धारयेद् धिया ॥ १८ ॥

शुभार्थे भगवति ॥ * ॥

तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा ।
मनो निर्विषयं युङ्क्त्वा ततः किञ्चिन्न संस्मरेत्[३] ॥ १९ ॥

विषयेभ्यो निर्गत्य[४] तत्रैव मनो युङ्क्त्वा अन्यन्न संस्मरेत्[५] ॥ * ॥

यस्यां सन्धार्यमाणायां[६] योगिनो भक्तिलक्षणः ।
आशु सम्पद्यते योग आश्रयं भद्रमीक्षतः ॥ २१ ॥

भद्रं हरिम्[७] ॥ * ॥

यथा सन्धार्यते ब्रह्मन् धारणा यत्र सम्मता ।
यादृशी वा हरेदाशु पुरुषस्य मनोमलम् ॥ २२ ॥

द्वापरान्त एव लक्ष्यते" इति राधारमणदासः । "द्वापर आदिर्यस्य स द्वापरादिः कलियुगादिः । शन्तनुचक्रवर्ति-समकालत्वप्रसिद्धेर्व्यासावतारस्य" इति भागवतचन्द्रिका । "द्वापरादौ वृक्षशाखादिवत् तदग्रत्वव्यवहारेण द्वापरान्त इत्यर्थः । यद्वा द्वापर एवाऽदिर्यस्य तत्र, सन्ध्यांशे इत्यर्थः" इति जीवगोस्वामी । "द्वापरस्य द्वापरान्तस्य आदौ द्वापरोपान्ते" इति विश्वनाथः । "द्वापर आदिर्यस्य द्वापरान्तस्य तस्मिन् काले" इति शुकदेवः ।

१ "अस्येति स्वस्मिन् परोक्षनिर्देशः" इति प्राचीनटीका ।

२ "कर्मभिः मनोदोषैः आक्षिप्तं निरस्तं परित्यक्तमित्यर्थः । कर्मभिः विषयेषु क्षिप्तमिति वा । कर्माणि च निरस्येति भावः" इति प्राचीनटीका ।

३ "युक्त्वा ततः किञ्चन न स्मरेत्" इति प्र. पाठः ।

४ "विनिर्गत्य" इति क्वचित् ।

५ "युक्त्वा अन्यन्न स्मरेत्" इति प्र. पाठः ।

६ "यतः सन्धार्यमाणायाम्" इति, "यत्र सन्धार्यमाणायाम्" इति च क्वचित् । "यस्यां धारणायाम्, सन्धार्यमाणायां एकाग्रमनसा (सादरं निरन्तरं) क्रियमाणायां सत्याम्" इति प्राचीनम् ।

७ "भद्रं हरिः" इति क्वचित् प्र. पाठः । "आश्रयं सर्वाधारं (प्राप्तव्यं च) भद्रं सर्वजगदेकसुन्दरं विष्णुमीक्षतः चिन्तयतो योगिनः भक्तिलक्षणो योगः निरन्तरध्यानमाशु सम्पद्यते सम्पूर्णो भवति" इति प्राचीनम् ।

यच्छब्दः प्रश्ने । "यतश्चोदेति सूर्यः" इत्यादिवत् ।

"यच्छब्दस्तु परामर्शे प्रश्नार्थे वाऽपि भण्यते[१]" इत्यभिधाने ॥ * ॥

जितासनो जितश्वासो जितसङ्गो जितेन्द्रियः ।
स्थूले भगवतो रूपे मनः सन्धारयेद् धिया ॥ २३ ॥

यथेत्यस्य जितासन इत्यादि । यत्र स्थूले[२] ॥ * ॥

विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम् ।
यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च यत्[३] ॥ २४ ॥

यादृशीत्यस्य विशेष इत्यादि । विशेष आण्डकोशः[४] ।

"शिलावत् तस्य देहोऽयमाण्डकोशस्तु[५] सावृतिः । तत्तन्त्रत्वान्न तत्संस्थदुःखभोगेन तु क्वचित्[६]" इति ब्रह्मवैवर्ते ॥ * ॥

आण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते ।
वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः ॥ २५ ॥

"आण्डकोशो विराट्[७] प्रोक्तो विशेषेण प्रकाशनात् । वैराजस्तद्गतो विष्णुरथवा सर्वतो वरः" इति भागवततन्त्रे ॥ * ॥

---

१ "चापि भण्यते" इति पाठान्तरम् । "चाभिभण्यते" इति प्र. पाठः ।

२ यथा सन्धार्यत इत्यस्य जितासन इति पूर्वार्द्धमुत्तरम् । यत्र धारणा सम्मता इति प्रश्नस्य च स्थूले भगवतो रूप इत्युत्तरमितिः

३ "भवच्च सत्" इति केचित् पठन्ति ।

४ "शब्दादिगुणाः पृथिव्यां विशेषतः सन्तीति पृथिवी विशेष इत्युच्यते । विशेषतः पृथिव्यात्मकत्वादण्डकोशोऽपि विशेष इत्युच्यते" इत्यनन्ततीर्थाः । "विशेषः सुवर्णपृथिव्यात्मकः ब्रह्माण्डकोशः" इति यादवेन्द्रतीर्थाः ।

५ "देहोऽयमण्डकोशस्तु" इति प्र. पाठः ।

६ न तत्संस्थदुःखभोगेन देहोऽयम् । किन्तु तत्तन्त्रत्वादेव । नहीदं शरीरमिति भगवतो भोगायतनं भवति । किन्तु तदधिष्ठितं तदधीनं शीर्यमाणं चेत्येव शरीरमित्यर्थः । अत्र बहवः पाठभेदाः "तत्तन्त्रत्वान्न तत्संस्थदुःखभोगोऽस्य न क्वचित्" (?) इति प्र. पाठः । "तत्तन्त्रत्वाच्च तत्संस्थ—" इत्याद्यन्यत्र । "-—दुःखभोगो नतु क्वचित्" इति च पाठान्तरम् । "तत्तन्त्रत्वान्न तत्संस्थदुःखभोगोऽस्य तु क्वचित्" इति च क्वचित् । "-—तत्संस्थं दुःखभोगेन तु क्वचित्" इत्येकस्मिन् पठ्यते । बिन्द्वाधिक्यं लिपिकृत्प्रमाद इति सम्भाव्यते ।

७ "अण्डकोशो विराट्" इति प्र. पाठः । "अण्डसम्बन्धी आण्डः । स एव कोशः । मुकुलितकमलरूपः । स एव शरीरम् । यो भगवान् धारणाया आश्रयः तस्याऽश्रयः कोशः । यथा अयोगोलकस्थो वह्निः । यथा वा कमलस्थितो भ्रमरः । यथा वा प्रासादस्थितो राजा" इति सुबोधिनीकृदप्याह ।

पाताळमेतस्य हि पादमूलं
पठन्ति पार्ष्णिप्रपदे रसातळम् ।
महातळं विश्वसृजः सुगुल्फौ[१]
तळातळं वै पुरुषस्य जङ्घे ॥ २६ ॥

प्रतिमापेक्षयाऽङ्गानि । स्वरूपापेक्षया तज्जानि[२] तदाश्रितानि च ॥ * ॥

छन्दांस्यनन्तस्य गिरो गृणन्ति[३]
दंष्ट्राऽर्यमेन्दूडुगणा द्विजानि[४] ।
हासो जनोन्मादकरी हि माया[५]
दुरन्तसर्गो यदपाङ्गमोक्षः ॥ ३१ ॥

बहुरूपत्वाद् दंष्ट्राऽर्यमेन्द्वित्यादि[६] ।

"प्रतिमापेक्षयाऽङ्गानि भूरादीनि स्वरूपतः । तदाश्रितानि तज्जानि बह्वङ्गत्वं बहुत्वतः[७]"
इति ब्रह्मतर्के ॥ * ॥

इति द्वितीयस्कन्धे प्रथमोऽध्यायः

शब्दस्य[८] हि ब्रह्मण एष पन्था
यन्नामभिर्ध्यायति धीरपार्थैः ।

---

१ "विश्वसृजोऽथ गुल्फौ" इति प्र. पाठः ।

२ "तज्जातानि" इति च कोशेषु पाठान्तरम् । "पाताळादीनि ब्रह्माण्डलक्षणप्रतिमापेक्षया अङ्गानीत्युच्यन्ते । स्वरूपापेक्षया परमात्मज्ञानदेहापेक्षया तज्जानि तदाश्रितानि चेति ज्ञातव्यानि" इति प्राचीनटीका ।

३ "शिरो गृणन्ति" इति प्र. पाठः । "यशो गृणन्ति" इति केचित् । "गिरः वागिन्द्रियं, गायत्र्यादिच्छन्दांसि गिर इति वा, गृणन्ति उपदिशन्ति" इति प्राचीनम् ।

४ दंष्ट्रा यमः स्नेहकला द्विजानि" इति प्र. पाठः ।

५ "–करी च माया" इति प्र. पाठः ।

६ "दंष्ट्रार्यमेन्दू इत्यादि" इति प्र. पाठः । प्राचीनकोशेषु तु भागवत इव तात्पर्येऽप्यप्रगृह्यैव पठनम् । "दंष्ट्रार्यमेत्यादि" इतीयदेव क्वचित् । अर्यमा यमः सूर्यो वा । तथाहि प्राचीनटीका—"अर्यमेन्दू दंष्ट्रा । बहुरूपत्वात् अर्यमेन्द्वित्यादिदेवानां बहुरूपसद्भावात् "चक्षुरभूत् पतंगः" (३०)इति सूर्यस्य, "इन्द्रादयो बाहवः" (२९) इत्यत्र दिक्पालयमस्य च ग्रहणेऽपि पुनरर्यमशब्देन यमस्य सूर्यस्य वा ग्रहणं युज्यते" इति । इदमुपलक्षणम् । अत्रेन्दुपदेन चन्द्रग्रहणेऽपि "मनश्च स चन्द्रमाः" (३४) इति पुनरुत्तरत्र ग्रहणं च युज्यत इति वक्तव्यम् ।

७ बह्वङ्गजत्वं बहुरूपत्वादित्येतत् । ८ "शाब्दस्य" इति प्र. पाठः ।

परिभ्रमंस्तत्र न विन्दतेऽर्थान्
मायामये वासनया शयानः[1] ॥ २ ॥

अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः ।
सिद्धेऽन्यथाऽर्थे न यतेत तत्तत्[2] परिश्रमं तत्र समीक्षमाणः ॥ ३ ॥

एष हरिः । यदपार्थैर्ध्यायति तत्रार्थान् न विन्दते ।

"सर्वनामा यतो विष्णुस्तदन्यार्थान् नतु स्मरेत् । स्मरंस्तु यावदर्थः स्यादन्यथा सोऽत्महा[3] स्मृतः" इति ब्रह्माण्डे ॥ * ॥

एवं स्वचित्ते स्वत एव सिद्ध[4]
आत्मा प्रियोऽर्थो भगवाननन्तः[5] ।

---

१ "मायामये प्रकृतिविकाररूपे, ईश्वरेच्छानियम्ये वा संसारे परिभ्रमन् कर्मभिः नानाशरीराणि प्राप्नुवन्, विषयवासनया शयानः दुःखरूपसंसारादुत्थानोपायरहितः, ध्यायतीति धीः संसारपरिहारोपायचिन्तको जीवः, यद् दैवतम्, यदपार्थैः यस्मिन् प्रतिप्राद्यगुणरहितैः नामभिः ब्रह्मरुद्रादिभिरग्नीन्द्रादिभिर्वा (पदैः) ध्यायति बन्धविमोक्षार्थमनुसन्धत्ते । तत्र दैवते अर्थान् प्रतिपाद्यान् गुणपूर्णत्वादीन् न विन्दते स्वात्मवदेव दैवतं परतन्त्रं जानाति । ततश्च तेभ्यः पुरुषार्थांश्च न विन्दते । अतः एष परमात्मा शब्दस्य ब्रह्मणः वेदादिसर्वशब्दराशेः पन्था मुख्यतो विषयः" इति प्राचीनम् ।

२ "तत्र" इति प्र. पाठः । "अग्निसूर्यगणपत्यादिशब्दानां परमात्मविषयत्वे अग्निसूर्याद्युपस्थानं कर्मसु कथं स्यादित्याशङ्क्याऽऽह—अतः कविरिति । कविः स्वतन्त्रास्वतन्त्रज्ञानवान्, व्यवसायबुद्धिः अन्तर्यामी मुख्यतया देवादिनामभिः वाच्यः पूज्यश्च इति निश्चयज्ञानवान्, अप्रमत्तः पूर्णापूर्णनामार्थज्ञाने जागरूकः, अतः अस्मिन् अग्न्याद्यन्तर्यामिणि प्रवृत्तेषु अग्न्यादिनामसु यावदर्थः स्यात् पूर्णार्थलाभवान् स्यात् । अथवा अतः एषु अग्न्यादिदेवेषु प्रवृत्तनामसु यावदर्थः तत्रोचितज्ञानवान् स्यात् । शब्दस्य मुख्यामुख्यार्थयोरङ्गीकारात् । एवमन्यथा प्रकारान्तरेण वेदानामर्थे सिद्धे आग्रहेण सौरगाणपतादिसमयमवलम्ब्य वा तत्र सूर्याग्न्यादीनां मुख्यार्थत्वे न यतेत । कुतः? तत्तत्परिश्रमं तत्तदर्थसाधनेऽपि विषयासिद्ध्या परिश्रमं समीक्षमाणः अनुभवन्" इति प्राचीनम् ।

३ "स्वात्महा" इति प्र. पाठः । "छन्दस्याङ्यादेरात्मनः" इत्यत्र आङीति न वक्तव्यम् । छन्दस्यादेरिति पर्याप्तम् । तेन सोत्महा इति भवति । यावदर्थः भगवानेव पूर्णार्थ इति ज्ञानवान् स्यात् । अन्यथा आत्महा । भगवत्तत्त्वस्यापरिज्ञानात् । केवलमग्न्यादय एवाग्न्यादिपदमुख्यार्थ इत्यन्यथाज्ञानात् । अथच लोकव्यवहारे यावता शरीरयात्रादिरर्थः स्यात् तावदन्यवाचित्वमप्यमुख्यतया जानीयात्, व्यवहरेच्च । अन्यथा शरीरनिर्वाहस्याप्यसम्भवेन स किलाऽत्महा स्यात्—इत्युभयथाऽपि योजनाऽत्र विवक्षिता ।

४ "स्वस्य ध्यातुः चित्ते, एवं बह्वभ्यासेन, स्वत एव प्रयत्नविशेषं विना, सिद्धे ध्यानेन सम्पन्ने सति, निर्वृतः स्वरूपानन्दानुभववान्" इति प्राचीनम् । "स्वतः स्वतन्त्रपरमात्मप्रसादेन सिद्धे स्ववशे सति" इति च ।

५ "यः आत्मा स्वामी अन्तर्यामी वा, अनन्तः सकलकल्याणमहागुणः, प्रियोऽर्थः अत्यन्तं प्रेमविषयश्च भगवान् तं नियतार्थो भजेत" इति प्राचीनम् ।

तं निर्वृतो नियतार्थो भजेत[1]
संसारहेतूपरमश्च यत्र[2] ॥ ६ ॥

"एतमितः प्रेत्याभि[3] सम्भवितास्मि" इति नियतार्थः ॥ * ॥

[4]स सर्वविद्धयनुभूश्च सर्व
आत्मा यथा सुप्तजनेक्षितैकः ।
तं सत्यमानन्दनिधिं भजेत
सर्वात्मनाऽतोऽन्यत आत्मघातः[5] ॥ ७ ॥

"यथैकस्तु बहून् सुप्तानसुप्तः पश्यति प्रभुः । एवमीशो बहून् जीवानज्ञान् पश्यति[6] नित्यदृक्" इति व्योमसंहितायाम् । "स्वप्नेन शारीरमभि प्रहत्यासुप्तः सुप्तानभि चाकशीति" इति च ।

"यथेष्टभवनाद् विष्णुरनुभूः[7] परिकीर्तितः । उदधिः कर्मणामीशः सर्वः पूर्णगुणो यतः । सत्यः[8] केवलसारत्वान्नियमो नियतेरजः" इति बृहत्संहितायाम्[9] ॥ * ॥

अदीनलीलाहसितेक्षणोल्लसद्-
भ्रूभङ्गसंसूचितभूर्यनुग्रहम् ।

---

१ "तं निर्वृतः सन् नियतार्थो भजेत" इति क्वचित् ।

२ "यत्र परमात्मनि स्थितस्य, यस्मिन् भगवति सेव्यमाने सति वा, संसारहेतूनां निःशेषं परिहारो भवति" इति च ।

३ "एतमितस्तं प्रेत्याभि" इति प्र. पाठः ।

४ प्र. पाठेऽयं प्रथमाध्यायान्तिमश्लोकतया पठ्यते किञ्चिद्व्यत्यासेन । "स सर्वधीवृत्त्यनुभूतसर्वः" इति प्रथमपादे "स्वप्नजनेक्षितैकः" इति द्वितीये, "नान्यत्र सज्जेद् यत आत्मपातः" इति च चतुर्थे पाठभेदः । "यथा लोके कश्चित् स्वयमसुप्तः सन् सुप्तान् जनान् पश्यति तथैवायं भगवान् एकः प्रकृतिप्राकृतसम्बन्धरहितत्वादज्ञानरहितः सुप्तजनेक्षिता" इत्यनन्ततीर्थीयम् । "एकः तत्त्वदेवताप्रेरणारहितः सुप्तजनेक्षिता सर्वसुप्तजीवद्रष्टा मुख्यप्राणः यथा तथा यः हृदि स्थितः आत्मा अन्तर्यामी" इति यादवेन्द्रतीर्थाः ।

५ "सर्वात्मना आधिव्याध्याक्रान्तो वा गृहादिषु प्रसक्तो वा भजेत । अतः परमात्मभजनात् अन्यतः विषयव्यासङ्गात् अभजनाच्च आत्मनः परमात्मनः घातः भवति । विषयासक्तस्य स्वस्मिन् स्वातन्त्र्याद्यारोपेण परमात्मापलापप्राप्तेः । अथवा आत्मनः स्वानन्दरूपस्य घातो भवति । कामक्रोधमहापापैरिति भावः" इति प्राचीनम् । एतेन "स्मरंस्तु यावदर्थः स्यादन्यथा सोतमहा स्मृतः" इति प्रमाणवाक्यशेषः एतत्श्लोकव्याख्यानरूपश्चेत्युक्तं भवति ।

६ "जीवान् ज्ञानात् पश्यति" इति क्वचित् ।

७ "अनुभूः पुनःपुनरवताराविर्भाववान्, स्वातन्त्र्येण विद्यमानो वा" इति प्राचीनम् ।

८ "सत्यं जडामिश्रसाररूपम्" इति प्राचीनम् ।

९ "इति च बृहत्संहितायाम्" इति क्वचित् ।

वीक्षेत[1] चिन्तामयमेनमीश्वरं[2]
यावन्मनो धारणयाऽवतिष्ठते ॥ १३ ॥

चिन्तामयं चिन्ताप्रधानम्[3] ।

"यस्मात् स चिन्तितो[4] विष्णुश्चिन्तितं प्रददात्यजः । तस्माच्चिन्तामयं देवं वदन्ति ज्ञान-चक्षुषः" इति बृहत्संहितायाम्[5] ॥ * ॥

यावन्न जायेत परावरेऽस्मिन्
विश्वेश्वरे द्रष्टरि भक्तियोगः ।
तावत् स्थवीयः पुरुषस्य रूपं
क्रियावसाने प्रयतः स्मरेत ॥ १५ ॥

स्थवीयः "पाताळमेतस्य[6]" इत्यादि ॥ * ॥

स्थिरं सुखं चाऽऽसनमास्थितो यति-[7]
र्यदा जिहासुरिममङ्ग लोकम् ।
काले च देशे च मनो न सज्जेत्[8]
प्राणान्नियच्छेन्मनसा[9] जितासुः ॥ १६ ॥

"भक्त्या प्राणं वशं नीत्वा जितप्राणो भवत्युत" इति षाड्गुण्ये ॥ * ॥

मनश्च बुद्ध्या[10]ऽमलया नियम्य
क्षेत्रज्ञ एतां निनयेत्[11] तमात्मनि ।

---

१ "ईक्षेत" इति पाठान्तरम् २ "—मेतमीश्वरम्" इति क्वचित् ।

३ "चिन्ता ध्यानं यस्यानुग्रहसाधनेषु प्रधानं स चिन्तामयः" इति प्राचीनम् ।

४ "सञ्चिन्तितः" इति प्र. पाठः । ५ प्र. पाठे "इति च ।" इतीयदेव पठ्यते ।

६ "पातालमेतस्य" इति प्र. पाठः । ७ "—माश्रितो यतिः" इति प्र. पाठः सर्वव्याख्यानविरुद्धः ।

८ "न सज्जयेत्" इत्यर्वाचीनाः । "न सज्जेत् न सज्जयेत्, सक्तं न कुर्यात्" इति प्राचीनटीका ।

९ "प्राणं नियच्छेन्मनसा" इति क्वचित् पाठः । "मनसा सह प्राणान् रसनादीन्द्रियाणि नियच्छेत् । विषयव्या-वृत्तान् कुर्यात् । अथवा प्राणान् नियच्छेत् कुम्भकं कुर्यादित्यर्थः । ततः जितासुर्भवेत् । भक्त्या प्राणं स्ववशं नयेदित्यर्थः" इति यादवेन्द्रतीर्थाः । "मनसा मनोबलेन विषयेषु धावदिन्द्रियगणं विजित्य प्राणान् नियच्छेत् । अथच प्राणान् इन्द्रियचेष्टकदिगादिदेवान् मनसि मनोऽभिमानिनीन्द्रे नियच्छेत् तदधीना इति चिन्तयेत्" इत्यनन्ततीर्थाः । १० "मनः स्वबुद्ध्या" इत्यर्वाचीनाः ।

११ "निलयेत्" इति केचित् । "मनश्च मनोभिमानिनमिन्द्रं च अमलया धिया बुद्ध्यभिमानिन्या उमया नियम्य उमाधीनं स्मृत्वा एतां बुद्धिमुमां च रुद्रवाणीविरिञ्चलक्ष्मीद्वारा क्षेत्रज्ञे जीवान्तर्यामिणि हरौ निनयेत् तदधीनां

आत्मानमात्मन्यवरुद्धय धीरो
लब्धोपशान्तिर्विरमेत कृत्यात् ॥ १७ ॥

"जीवस्थो भगवान् विष्णुः क्षेत्रज्ञ इति गीयते । ह्वद्गतस्तु[1] स एवाऽत्मा व्याप्तोऽप्यात्मेति भण्यते" इति तत्त्वनिर्णये । "हरौ हरेर्भवेन्नीतिस्तदेकत्वस्य चिन्तनम् । अन्यत्र तन्नियम्यादिचिन्तनं नीतिरुच्यते" इति प्रकाशसंहितायाम् ॥ * ॥

न यत्र कालोऽनिमिषप्रभुः प्रभुः[2]
कुतो नु देवा जगतां य ईशिरे[3] ।
न यत्र सत्त्वं न रजस्तमश्च
न वै विकारो न महान् प्रधानम्[4] ॥ १८ ॥

कालो वायुः ।

"हरिश्च प्रकृतिश्चैव ब्रह्मवायू तथैव च । सुपर्णशेषरुद्राश्च शक्रः सूर्ययमावपि । अग्निर्यमानुजश्चैव कालशब्दोदिताः[5] क्रमात् । पूर्वोक्तास्त्वपरोक्तानां[6] प्रभवः[7] सर्वशो मताः" इत्युदारसंहितायाम्[8] ॥ * ॥

नाभ्यां स्थितं हृद्यवरोप्य[9] तस्मा-
दुदानगत्योरसि तं नयेन्मुनिः ।

चिन्तयेत् । तं जीवान्तर्यामिणमात्मनि देहमध्यस्थे हरौ निनयेत् तदैक्येन चिन्तयेत् । आत्मानं देहमध्यस्थं विष्णुमात्मनि सर्वव्याप्ते विष्णुस्वरूपे अवरुध्य एकीभावेन चिन्तयित्वा" इत्यादि प्राचीनम् ।

१ "देहस्थोऽपि" इति पाठान्तरम् ।

२ "कालोऽनिमिषां परः प्रभुः" इत्यर्वाचीनः पाठः । "अनिमिषप्रभुः रुद्रादिसर्वदेवानां स्वामी कालप्रेरको मुख्यप्राणश्च न प्रभुः । कालसामर्थ्योद्भूता जननमरणादयो न सन्तीत्यर्थः" इत्यनन्ततीर्थाः । "कालः वायुः प्रभुः न, अशनायापिपासादिस्वव्यापारसम्पादको न" इति यादवेन्द्रतीर्थाः ।

३ "ये जगतामीशिरे अधिपतयः रुद्रादयः प्रभवो न भ्रान्त्यादिजनका न भवन्तीति कुतो नु? शङ्काऽप्ययुक्तेत्यर्थः" इति च ।

४ "सत्त्वं रजसा मिश्रसत्त्वम्, विकारः अहङ्कारः तद्विकारभूतादिश्च न प्रभुः । न महान् महत्तत्वं स्वकार्याहङ्कारतत्त्वजनकं न । प्रधानं प्रकृतिरपि न प्रभुः । बन्धका न भवति" इति प्राचीनम् । "सत्त्वादिगुणत्रयम्, अहङ्कारः, महत्तत्त्वम्, जडप्रकृतिश्च न विद्यते" इत्यनन्ततीर्थाः ।

५ "–शब्देरिताः" इति प्र. पाठः । ६ "पूर्वोक्तास्तु परोक्तानाम्" इति क्वचित् ।

७ "प्रभवाः" इत्येकस्मिन् कोशे पठ्यते । तत्पक्षे प्रभवाः उत्पत्तिकारणानि ।

८ "उद्दामसंहितायाम्" इति प्र. पाठः । "उद्दालसंहितायाम्"(?) इति क्वचित् ।

९ "हृद्यधिरोप्य" इति प्र. पाठः ।

ततोऽनुसन्धाय धिया मनस्वी
स्वतालुमूलं शनकैर्नयेत ॥ २१ ॥

उदानगत्या ब्रह्मनाड्या। "अथैकयोर्ध्व उदानः" इति श्रुतेः।

"प्राणापानाविडायां च पिङ्गलायां च वर्ततः। व्यानः सन्धिषु सर्वत्र उदानो ब्रह्मनाडिगः। सर्वत्रैव समानस्तु समं चरति सर्वगः[1]" इति भारते ॥ * ॥

तस्माद् भ्रुवोरन्तरमुन्नयेत निरुद्धसप्ताश्वपथोऽनपेक्षः[2]।
स्थित्वा मुहूर्तार्द्धमकुण्ठदृष्टिर्निर्भिद्य मूर्द्धन् विसृजेत् परं गतः ॥ २२ ॥

परं चिन्तयन् ॥ * ॥

यदि प्रयास्यत्यथ[3] पारमेष्ठ्यं वैहायसानामुत यद् विहारम्।
अष्टाधिपत्यं गुणसन्निवापे[4] सहैव गच्छेन्मनसेन्द्रियैश्च ॥ २३ ॥

"चिन्मात्राणीन्द्रियाण्याहुर्मुक्तानामन्यदैव तु। तान्येव जडयुक्तानि ह्यभिन्नानि[5] स्वरूपतः" इति ब्राह्मे ॥ * ॥

---

१ "सर्वशः" इति क्वचित्।

२ "—सप्तायतनोऽनपेक्षः" इति प्र. पाठः। निरुद्धसप्तास्वयनोऽनपेक्षः" इति केचित् पठन्ति। "सप्ताश्वाः इन्द्रियाणि, पन्थानः वायुमार्गाः। ते निरुद्धा येन। साक्षिणा सह बुद्ध्या सह वा सप्तेन्द्रियाणि। तेषां पन्थानः विषया इति वा। सुखं साक्षिणो विषयः। मनसो मनोरथो विषयः। ते निरुद्धाः परित्यक्ता येन" इति प्राचीनम्।

३ "प्रयास्यन् नृप" इति प्र. पाठः।

४ "—सन्निवाये" इति प्र. पाठः। "सन्निपाते" इति यादवेन्द्रतीर्थीयपाठः। तथाहि तद्वचनम्—"यदि पक्वयोगी चेदित्यर्थः। पारमेष्ठ्यं सत्यलोकं प्रयास्यति। उत यदि, तदन्यश्चेत्, अपक्वयोगी चेदित्यर्थः। अष्टानामणिमादीनामाधिपत्यं यस्मिन् भवेत् तादृशं वैहायसानां वैमानिकानां देवानां विहारस्थानं तन्महः प्रयास्यति जनं तपो वा। गुणः तमोगुणप्रयोज्यो देहः तस्य सन्निपाते सति। 'सन्निवापे' इति पाठे गुणानां ज्ञानादीनां सन्निवापे सम्यक् प्राप्तौ मनसेन्द्रियैश्च चिद्रूपैः प्राकृतैश्च सहैव गच्छेत्। अथवा गुणानां सन्निपातः समावेशः यत्र स गुणसन्निपातः अमुक्तस्थानम्। तस्मिन्। परममुक्तौ तु चिन्मात्रेन्द्रियैः सह गच्छति" इति। "यदि सम्यगपरिपक्वभक्त्यादिमान् वैकुण्ठलोकमप्राप्य पारमेष्ठ्यं लोकमथ उत्क्रमणानन्तरं प्रयास्यति। यदि वैहायसानां विहायसा वर्तमाननां सिद्धानां विहारं विनोदस्थानं महर्लोकादिकं प्रयास्यति। अष्ट इन्द्रादयोऽधिपतयो यस्य सोऽष्टाधिपत्यः। तादृशं स्वर्गं यदि प्रयास्यति तर्ह्यपि सूक्ष्मरूपमनसा इन्द्रियैश्च सहैव गच्छेत्। आरब्धकर्मनाशपर्यन्तं तेषां स्थित्युक्तेः। किं बहुना गुणसन्निवापे त्रिगुणसृष्टे अन्तरिक्षमारभ्य सत्यलोकपर्यन्तं सर्वत्र सहैव गच्छेत्" इत्यनन्ततीर्थाः।

५ "विभिन्नानि" इति बहुषु कोशेषु पठ्यते। तथाप्यनन्ततीर्थैः "अभिन्नानि" इति पाठस्यैव ग्रहणादर्थस्वारस्याच्च स एवात्र समादृतः। विभिन्नानीति पाठे—अन्यदा अमुक्तिदशायां तानि चिन्मात्राणीद्रियाणि जडेन्द्रिययुक्तान्येव भवन्ति इत्येकं वाक्यम्। तानि च जडेन्द्रियाणि विभिन्नानि स्वरूपत इत्यपरमिति भिन्नवाक्यतया योजनीयम्।

10

योगेश्वराणां गतिमामनन्ति बहिस्त्रिलोक्याः पवनान्तरात्मा[१] ।
न कर्मभिस्तां गतिमाप्नुवन्ति विद्यातपोयोगसमाधिभाजाम्[२] ॥ २४ ॥

पवनस्याप्यन्तरात्मा यस्तम् । पवनश्चान्तरात्मा[३] चेति वा ।

"ईयुस्त्रीन् कर्मणा लोकान् ज्ञानेनैव तदुत्तरान् । तत्र मुख्या हरिं यान्ति तदन्ये वायुमेव तु । अपक्वा ये न ते यान्ति वायुं वा हरिमेव वा । स्थानमात्राश्रितास्ते तु पुनर्जातिविवर्जिताः[४]" इति ब्रह्मतर्के ॥ * ॥

वैश्वानरं याति विहायसा गतः
सुषुम्नया[५] ब्रह्मपथेन शोचिषा ।
विधूतकल्कोऽथ हरेरुदस्तात्
प्रयाति चक्रं नृप शैंशुमारम्[६] ॥ २५ ॥

---

१ "गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनाम्" इत्यर्वाचीनः पाठः ।

२ "वेदादिशास्त्रं विद्या । मासोपवासादिकं तपः । योगो ज्ञानम् । समाधिर्निरन्तरध्यानम् । एतद्युक्तानां योगेश्वराणां त्रिलोक्या बहिरुपरि स्थिते यत्र पवनान्तरात्मा नित्याविर्भूतत्वेन तिष्ठति तं सत्यादिलोकं गतिं प्राप्यस्थानमामनन्ति प्राज्ञाः । पवन एवान्तरात्मा पवनस्याप्यन्तरात्मा इत्युभयथा चात्र समासोऽङ्गीकर्तव्यः । अत्रायं विभागः– यदि सम्यक् परिपक्वभक्त्यादिमानुत्क्रम्य गच्छति तर्हि यत्र लोके पवनस्यान्तरात्मा विकुण्ठनाथस्तिष्ठति तत्र वैकुण्ठे अमुक्तस्थाने अमुक्तैर्देवादिभिरुपास्यमानं हरिं गच्छति । यदि ततः किञ्चिदनुत्तमाधिकारी उत्क्रम्य गच्छति तर्हि यत्र पवनश्चासावन्तरात्मेति मुख्यप्राणो विरिञ्चश्च तिष्ठतः तं सत्यलोकं गच्छति । अग्निष्टोमादिकर्तारः कर्मयोगिनस्तां गतिं केवलकर्मभिर्नाऽप्नुवन्ति" इत्यनन्ततीर्थाः । "अप्रतीकालम्बनश्चेत् यः पवनस्याप्यन्तरात्मा वायोरपि नियामकः तं विकुण्ठं प्रयास्यति । अप्रतीकालम्बनः अमुक्तस्थानं वैकुण्ठं यातीति भावः । प्रतीकालम्बनश्चेत् पवनश्चासावन्तरात्मा सर्वनियामको वायुस्तं ब्रह्माणं च प्रयास्यति । प्रतीकालम्बनः सत्यलोकं गच्छतीत्यर्थः । विद्या अपरोक्षज्ञानम् । तपः शास्त्रमननम् । योगः सर्वदा ब्रह्मानुस्मरणम् । समाधिरयत्नेनाभिलषितगुणमूर्तिध्यानम् । एतान् भजन्तीति तेषां योगीश्वराणां त्रिलोक्या बहिः भूम्यन्तरिक्षस्वर्गाख्यलोकत्रयाद् बहिर्भूता या गतिः तामामनन्ति" इति यादवेन्द्रतीर्थाः । अत्र "योगीश्वराणां गतिमामनन्ति" इति यादवेन्द्रतीर्थाभिमतः पाठ इति भाति ।

३ "पवनश्चासावन्तरात्मा" इति क्वचित् पाठः । "पवनश्चाप्यन्तरात्मा" इति च ।

४ "पुनर्जनिविवर्जिताः" इति प्र. पाठः । ५ "सुषुम्णया" इत्यर्वाचीनाः पठन्ति ।

६ "शैशुमारम्" इत्यर्वाचीनः पाठः । "ब्रह्मपथेन ब्रह्मणो मार्गभूतेन । सुषुम्नया विहायसा सुषुम्नाख्यया नाड्या । विहायःशब्दो नाडीवाची । शोचिषा सुषुम्नाख्यनाडीगतसुषुम्नाख्यरश्मिप्रकाशेन प्रकाशितमार्गः । गतः शरीरादुत्क्रान्तः । वैश्वानरं प्रधानाग्निं याति । अथ तदनन्तरमेव विधूतकल्मषः सन् हरेः शैंशुमारं चक्रं कुण्डलाकारं शिंशुमारस्वरूपं उदस्तात् वैश्वानरलोकादुपरिष्टात् स्थितं प्रयाति" इत्यनन्ततीर्थाः । "ब्रह्मपथेन ब्रह्मप्राप्त्युपायेन । शोचिषा आदित्यरश्मिप्रकाशोपेतया सुषुम्नाख्यनाड्या । विहायसा ब्रह्मरन्ध्राकाशेन गतः अर्चिरादिकं प्राप्तः सन् वैश्वानरं याति । अथ विधूतकल्कः निरस्तप्रारब्धाल्पपापसमुदायः योगीश्वरः उदस्तात् वैश्वानरादुपरितनं शैंशुमारं चक्रं ज्योतिस्समूहं प्रयाति" इति यादवेन्द्रतीर्थाः ।

हरेः शैंशुमारं चक्रम्[१] । वैश्वानरोदस्तात्[२] ।

"वैश्वानरे द्युनद्यां वा सूर्ये वा देह एव वा[३] । विधूय सर्वपापानि यान्ति किंस्तुघ्नकेशवम्[४]" इति ब्रह्माण्डे ॥ * ॥

[५]योऽन्तः पचति भूतानां यस्तपत्यण्डमध्यगः ।
सोऽग्निर्वैश्वानरो मार्गो देवानां पितॄणां मुनेः[६] ॥ २६ ॥

देवयानं पिङ्गलाभिरहान्येति शतायुषा ।
रात्रीरिडाभिः पितॄणां विषुवत्तां सुषुम्नया[७] ॥ २७ ॥

"पितृयानं देवयानं ब्रह्मयानमिति त्रिधा । गच्छन् वैश्वानरं याति तस्मान्मार्गः[८] स ईरितः । दक्षिणाः पिङ्गलाः सर्वा इडा वामाः प्रकीर्तिताः । नाड्योऽथ मद्ध्यमा प्रोक्ता[९]

---

१ "शिंशुमारं चक्रम्" इति क्वचित् । "शैशुमारचक्रम्" इति च ।

२ "वैश्वानरोऽधस्तात्" इति क्वचित् कोशे । लिपिकृत्प्रमादः स्यात् । शिंशुमारस्य हरेरधस्तात् वैश्वानर इति तत उदस्ताद् शैंशुमारं चक्रमिति वा योज्यम् ।

३ एतेन 'वैश्वानरं याति अथ विधूतकल्कः भवति' इति, 'विधूतकल्कः सन् वा वैश्वानरं याति' इति च द्वेधा मूलयोजना सूचिता ।

४ अत्र न क्वाप्येकरूपः पाठः । "किंस्तुब्धकेशवम्" इति क्वचित् । "किंस्निग्धकेशवम्" इत्यन्यत्र । "किंस्तुग्धकेशवम्" इति प्रतनतरे । "किंस्तुघ्न–" इत्यप्येकस्मिन् कोशे पठ्यते । किन्तुघ्न एव किंस्तुघ्नः । शिशुमार एव शिंशुमारः । पृषोदरादिः ।

५ इदं श्लोकद्वयं (२६–२७) अर्वाचीनैर्मूले न पठ्यते । न व्याख्यातं च श्रीधरादिभिः । "योन्तश्चरति" इति क्वचित् कोशे पठ्यते ।

६ "यो भूतानामन्तः जठराग्नौ स्थित्वा, विश्वनरसम्बन्धित्वाद् वैश्वानर इति भावः, उदरान्तस्थान्नोदकपाककर्ता, यः ब्रह्माण्डमध्यगः तपति प्रकाशते प्रकाशयति च, वैश्वानराख्यः स प्रधानाग्निः देवानां पितॄणां च लोकान् गन्तुः मुनेः ज्ञानयोगिनः कर्मयोगिनश्च मार्गो गम्यः" इति प्राचीनम् ।

७ "पिङ्गलाभिः शरीरदक्षिणपार्श्वस्थपिङ्गलाख्यनाडीभिः शतायुषा शतायुःसम्पूर्तिरूपमरणाख्योत्क्रमणेन अहानि अहरादिकालाभिमानिदेवताप्राचुर्यादहःशब्दवाच्यं देवयानमेति । इडाभिः शरीरवामपार्श्वस्थेडाख्यनाडीभिः शतायुषा शरीरत्यागेन रात्र्यादिकालाभिमानिदेवताप्राचुर्याद् रात्रिसंज्ञं पितॄणां यानमेति । मध्यस्थया सुषुम्नया नाड्या, शतायुषा विशिष्टसुखवत्त्वात् विषुवत्ताख्यं ब्रह्मयानमेति । "द्वावेव मार्गौ प्रथितौ" इत्यादौ देवयानब्रह्मयानभेदोऽवान्तरो ज्ञातव्यः" इति प्राचीनम् ।

८ "तस्माद् भोगः" इति "तस्माद् भागः" इति च क्वचित् पठ्यते । प्रमादः सम्भाव्यते ।

९ "मध्यमाः प्रोक्ताः" इति प्र. पाठः नाड्य इति बहुवचनान्तपदसन्निधानाद् भ्रान्त्या प्रवृत्तः । एकैव हि मध्यमा नाडी सुषुम्ना नाम ।

सुषुम्ना वेदपारगैः" इति भागवततन्त्रे । "देवयानस्य मार्गस्था अहःशब्दाभिसञ्ज्ञिताः । पितृयानस्य मार्गस्था रात्रिशब्दाभिधा मताः[१]" इति बृहत्तन्त्रे । "शतायुर्मरणं चैव कालिकं पारमावृतिः[२]" इत्यभिधाने ।

पिङ्गलाभिः शतायुषा अहःसञ्ज्ञं[३] देवयानमेति । इडाभी रात्रिसञ्ज्ञं पितृयानम्[४] ।

"विषुवत्ता ब्रह्मयानो[५] विशेषेण सुखं यतः । पिङ्गला देवयानः[६] स्यात् पिङ्गाख्यसुखदं[७] यतः । इडाऽन्नदानात् 'पितृणामेवं मार्गाः प्रकीर्तिताः" इति ब्रह्मतर्के ॥ * ॥

तद् विश्वनाभिं त्वभिपद्य[९] विष्णो-
रणीयसा विरजेनाऽत्मनैकम्[१०] ।

---

१ "रात्रिशब्दाह्वया मताः" इति प्र. पाठः । क्वचित् कोशेऽपि तथा । देवयानमेव यस्य यानं स ज्ञानयोगी देवयान उच्यते । तस्य यो मार्गो गम्यः तत्रस्था अर्चिरादयः अहःशब्दाभिसञ्ज्ञिताः । पितृयानमेव यस्य यानं तस्य कर्मयोगिनः यो गम्यो मार्गस्तत्रस्था धूमादयो रात्रिशब्दाभिधा मताः ।

२ "परमावृतिः" इति प्र. पाठः । पारम्, आवृतिः—इति च्छेदः । परम्, आवृतिः इति परमा आवृतिरिति वा च्छेदः प्रामादिकः ।

३ "अहःशब्दम्" इति क्वचित् । देवयानस्था अर्चिराद्यो देवा अहःशब्दवाच्या इति पूर्वमुक्तम् । इदानीं तैरधिष्ठितो मार्गोऽप्यहःसञ्ज्ञ उच्यते । प्रथमपक्षे 'देवयानं एति, तत्र च अहःसञ्ज्ञान् देवानेति' इति मूलयोजना द्वितीयपक्षे त्वहानि देवयानमहःसंञ्ज्ञं देवयानमिति सामानाधिकरण्येनैवान्वयः । तदात्वे तु अहानीति "बहुवचनमेकत्वार्थे" इति प्राचीनटीकायामुक्तम् । एवं रात्रीरित्यपि पक्षद्वयं बोध्यम् ।

४ "पितृयाणम्" इत्येकस्मिन् प्रतनकोशे पठ्यते ।

५ "ब्रह्मयानम्" इति सर्वे व्याख्यातारः पठन्ति । विजयध्वजीयेऽपि तथा । किन्तु सर्वत्र कोशेषु "ब्रह्मयानः" इत्येव पाठः । मुद्रितः प्रचलितः पाठोऽपि तथैव । प्रा. पाठे ब्रह्म प्रति यानं प्रयाणं यस्मात् स ब्रह्मयानो मार्गः । एवं मार्गा इत्युत्तरत्र मार्गशब्दस्य विशेष्यतया निर्देशात् ।

६ "देवयानम्" इति प्र. पाठः । क्वचित् कोशेष्वपि तथा । देवान् अर्चिरादीन् प्रति यानं यस्मात् स देवयानो मार्गः ।

७ यस्मात् तद् देवान् प्रति यानं पिङ्गाख्यसुखदं ततः स मार्गो देवयानः स्यात् इति समासघटकयानपदानुवृत्त्या योजना । अन्यथा नपुंसकत्वं नोपपद्येत । "पिङ्गाख्यसुखदा यतः" इति विजयध्वजीये पठ्यते । तत्पक्षे न काऽप्यनुपपत्तिः । किन्तु न क्वपि कोशे तथा पठ्यते । ८ पितृणाम्" इति क्वचित् प्र. पाठः प्रामादिकः ।

९ "त्वतिवर्त्य" इति प्र. पाठः । अत्र "विश्वनाभिं प्रतिपद्य" इति च प्राचीनं पाठान्तरम् । तदेतद् यादवेन्द्रतीर्थपरिगृहीतं "विश्वाधाररूपं प्रतिपद्य" इति भाष्यसंवादि च । अथापि भागवतमूलकोशेषु "अभिपद्य" इत्येव पाठात्, अस्य अनन्ततीर्थविजयध्वजतीर्थादिभिः परिगृहीतत्वाच्च स एवात्राऽऽदृतः । भाष्ये प्रतिपद्येति न प्रतीकग्रहणम्, किन्त्वर्थानुवादः ! तथाह्यनन्ततीर्थाः-—"अभिपद्य प्राप्य तदनुज्ञया विरजेन" इति । "तुशब्दसूचितां तदनुज्ञामादाय" इति विजयध्वजीयम् । तदेतद् भाष्येऽपि सूचितम्-—"नत्वा तं यान्ति" इति प्रमाणोपन्यासेन ।

१० "एकः" इति पाठान्तरम् । "एकः प्रारब्धपापेनासंयुतः । एकमिति वा । मुख्यमित्यर्थः" इति यादवेन्द्रतीर्थाः ।

नमस्कृतं[१] ब्रह्मविदामुपैति
कल्पायुषो विबुधा यद् रमन्ते[२] ॥ २८ ॥

"अशेषजगदाधारः शिंशुमारो हरिः परः । सर्वै ब्रह्मविदो नत्वा तं यान्ति परमं पदम्" इति ब्रह्माण्डे ।

तद् विष्णोर्विश्वाधाररूपं[३] प्रतिपद्य यत्र कल्पायुषस्तं महर्लोकमुपैति ।

"मन्वन्तरायुषः स्वर्ग्या महर्लोके तु काल्पिकाः । आब्रह्मणो[४] जनाद्यास्तु महर्लोकेऽपि ये वराः" इति ब्राह्मे ॥ * ॥

न यत्र शोको न जरा न मृत्यु-
[५]र्नाऽधिर्नचोद्वेग ऋते कुतश्चित् ।
यश्चित्ततोदः क्रिययाऽनिदंविदां[६]
दुरन्तदुःखप्रभवानुदर्शनात् ॥ ३० ॥

ऋते सत्यलोके । अनिदंविदां अब्रह्मविदाम्[७] । दुरन्तदुःखं च प्रभवश्च ।

"सर्वदुःखविहीना ये मुक्ताः प्रायस्तु तादृशाः । अमुक्ताश्च[८] जनाद्येषु विशेषेण तु सत्यगाः" इति वाराहे । "विष्णोर्लोकं तदैवैके यान्ति कालान्तरे परे[९] । आज्ञयैव हरेः केचिदपूर्तैः केचिदञ्जसा । विहृत्यैवान्यलोकेषु मुच्यन्ते ब्रह्मणा सह" इति वामने ॥ * ॥

ततो विशेषं प्रतिपद्य निर्भयस्तेनाऽत्मनाऽपोऽनलमूर्ध्नि च त्वरन्[१०] ।
ज्योतिर्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिङ्गम् ॥ ३१ ॥

---

१ "विश्वनाभिं विश्वाधारम्, ब्रह्मविदां च नाभिमाधारम्, सर्वैर्नमस्कृतम्, विष्णोस्तत् शिंशुमाररूपम्" इत्यनन्ततीर्थाः ।
२ "कल्पायुषो यद् विबुधा रमन्ते" इति प्र. पाठः ।

३ "विश्वाधारस्वरूपम्" इति क्वचित् । "विश्वाधारं स्वरूपम्" इति चान्यत्र । "विश्वाधारं रूपम्" इति च ।

४ "आब्रह्माणः" इति क्वचित् ।

५ "नाऽर्तिर्नचोद्वेगः" इत्यौत्तरेयः पाठः । "आधिः मनोव्यथा कर्मबन्धो वा" इति प्राचीनम् । "उद्वेगः इन्द्रियविकारजो बाधः" इति च ।

६ "यच्चित्ततोऽदः(-तोदः) कृपयाऽनिदंविदाम्" इत्यर्वाचीनाः पठन्ति । "अनिदंविदां अब्रह्मविदां क्रियया कर्मकरणेन अपरिहार्यदुःखस्य च जननादेश्चानुदर्शनात् आलोचनात् जनस्य यश्चित्ततोदः 'बत पतिष्यामो हीतः इति मनोदुःखं च नास्ति" इति प्राचीनटीका ।

७ एकस्मिन् प्रतनकोशे "अब्रह्मविदाम्" इत्येतन्न पठ्यते । "इदं सर्वकर्तृ अन्तर्यामिरूपम् । ये तन्न विदन्ति अहङ्कारिण इत्यर्थः, तेषाम्" इति प्राचीनम् ।

८ "अमुक्तास्तु" इति प्र. पाठः ।
९ "कालान्तरेऽपिच" इति क्वचित् ।

१० "अनलमूर्तिरत्वरन्" इत्यर्वाचीनः पाठः ।

घ्राणेन गन्धं रसनेन वै रसं रूपं तु दृष्ट्या स्पर्शं[1] त्वचैव ।
श्रोत्रेण चोपेत्य नभोगुणं तत् प्रायेण नाऽऽवृत्तिमुपैति[2] योगी ॥ ३२ ॥

स भूतसूक्ष्मेन्द्रियसन्निकर्षात्[3] सनातनोऽसौ भगवाननादिः ।
मनोमयं देवमयं विकार्यं संसाद्य मत्या सह तेन याति ॥ ३३ ॥

विज्ञानतत्त्वं गुणसन्निरोधं तेनाऽत्मनाऽऽत्मानमुपैति शान्तिम् ।
आनन्दमानन्दमयोऽवसाने सर्वात्मके ब्रह्मणि वासुदेवे ।
एतां गतिं भागवतो गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग[4] ॥ ३४ ॥

---

१ संहितापाठकाले "स्पर्शम्" इति विश्लिष्य पठनीयं छन्दःसौहित्याय । "श्वसनम्" इति त्वर्वाचीनः पाठः ।
२ "नभोगुणत्वं प्राणेन चाऽकूतिमुपैति" इत्यर्वाचीनाः पठन्ति ।
३ एतौ श्लोकौ किञ्चिद्व्यत्यासेन प्र. पाठे पठ्यते । तद्यथा—

"स भूतसूक्ष्मेन्द्रियसन्निकर्षं मनोमयं देवमयं विकार्यम् ।
संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसन्निरोधम् ॥
तेनाऽत्मनाऽऽत्मानमुपैति शान्तमानन्दमानन्दमयोऽवसाने ।
एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग" इति ॥

४ अस्य श्लोकचतुष्टयस्य (३१–३४) प्राचीनटीका–"देवानां मुक्तिप्रकारमाह–ततो विशेषमिति । अत्रानुक्तमन्यतो ग्राह्यम् । देवसङ्घः ततः यथायोगं गरुडशेषमार्गाभ्यां ब्रह्मप्रवेशानन्तरं तेन ब्रह्मणा प्राणेन च सह विशेषं प्रतिपद्य निर्भयः तेनाऽत्मना पृथिव्यात्मना पृथिवीनियामकदेवेन नीतः अपः ब्रह्माण्डावरणोदकं प्रतिपद्य । अत्र तत्तत्कार्यजडानां तत्तत्कारणजडेषु लयः । तत्तद्देवानां सदेहानां तत्तदुत्तमदेवेषु प्रवेशः । तत्तद्गतेश्वरांशस्य तत्तद्गतांशिना योगः । विरिञ्च्यांशानामपि तत्तद्गतानां अंशिना योग इति लयप्रकारः । तेनाऽत्मनेत्यावृत्तिः । उदकस्थपरमात्मनाऽन्तर्यामिणा चतुर्मुखांशेन प्राणेन च अनलमूर्ध्नि मुखे स्थापितः त्वरन् त्वरया युतः । सङ्कर्षणमुखाग्निघातेन विळम्ब्य गमनायोगादिति भावः । अथवा अनिष्टनिवृत्तिसहितेष्टप्राप्त्यर्थं त्वरावान् । ज्योतिर्मयः अग्निदेवप्रधानः । अवरदेवापेक्षया प्राधान्यमुत्तमदेवानां सर्वेषामस्तीति ज्ञापनायेयमुक्तिः । वायुमुपेत्य वाय्वात्मना वायुनियामकदेवेन निमित्तेन । तदानुकूल्योपेत इत्यर्थः । यत् बृहत् देशकालव्याप्त्युपेतम् । आत्मलिङ्गं दृष्टान्ततया परमात्मव्याप्तिस्वभावविशेषज्ञापकम् । अथवा बृहदात्मनः पूर्णात्मनः लिङ्गं स्वयं किञ्चिदपूर्णमपीति भावः । खं आकाशदेवं प्राणं च काले द्विपरार्धावसानकाले प्रविशतीति शेषः ॥ * ॥

"मुक्तानां भोगप्रकारमाह– घ्राणेनेति । घ्राणादीन्द्रियतद्विषयमात्राणां लयं तद्देवमुक्तिं चाऽह–घ्राणेन गन्धमिति । योगी घ्राणेन देवेन सह गन्धदेवमुपेत्य गन्धे लीनः । एवमुत्तरत्रापि । नभोगुणं शब्दलक्षणं विषयम् । एवंमार्गोपेतः आवृत्तिं संसारं नोपैति । कुत इत्यत आह–तदिति । तस्मात् ईश्वरापरोक्षानुग्रहप्राप्तत्वादित्यर्थः । ईश्वरसेवार्थं वायुरुद्रादीनां केषाञ्चित् पुनरावृत्तिरस्तीति प्रायेणेति । महरादिलक्षणमार्गे भोगं वाऽऽह घ्राणेनेति ॥ * ॥

ब्रह्मणा सह[1] विशेषं पृथिवीम्[2] । तेनाऽत्मना पृथिव्यात्मना । ज्योतिर्मयः अग्निप्रधानः[3] । "आकाशवत् सर्वगतश्च नित्यः" इति परमात्मसदृशं किञ्चित्[4] ॥ * ॥

"ज्ञानिनः प्रळये सर्वे ब्रह्मणा सह पार्थिवम् । परमात्मानमाविश्य वारिस्थं तत्समन्विताः । अग्निस्थं तद्युताश्चैव तेन नीताश्च वायुगम् । नभोगतं तेन नीता मनस्थं तद्युतास्तथा । ततो बुद्धिस्थमीशेशं ततोऽहङ्कारगं हरिम् । ततो विज्ञाननामानं महत्तत्त्वगतं हरिम् । तत आनन्दनामानमव्यक्तस्थं जनार्दनम् । प्राप्ता नाऽवृत्तिमायान्ति शीतीभूता[5] निरामयाः । येषां पदान्तरापेक्षा वाय्वादीनां महात्मनाम् । आवृत्य ते पुनर्यान्ति ज्ञानिनोऽपि निरामयाः । अनावृत्तिमसम्मूढाः

"भगवान् पूर्णैश्वर्याद्युपेतः, अनादिः कार्यगतोऽपि कारणरहितः, सनातनः नादयुक्तः आकाशस्य नादशक्तिप्रदत्वादिति भावः । सः आकाशे गतः असौ प्राणेन सहितः सन् सर्वनेता विष्णुः । भूतसूक्ष्मेन्द्रियसन्निकर्षात्, भूतैः आवरणभूतैः अण्डान्तस्थभूतादीनां बहिस्थेषु प्रवेशात्, सूक्ष्माणि जीवा इत्यर्थः, तैः, इन्द्रियैश्च, मात्राभिश्चेति ग्राह्यम् । सन्निकर्षात् सम्बन्धात्, एभिः सहेत्यर्थः । विकार्यं विविधकार्ययुक्तं देवमयं देवेषु प्रधानं मनोमयं मनस्थं स्वात्मानं संसाद्य प्राप्य । योऽसावनादिर्मनोमयस्तमिति वा सम्बन्धः । योगीति जीवस्य पूर्वं गतिरुक्ता । इदानीं भगवाननादिरिति परमात्मनो गतिरुच्यते । एवं विपर्ययेणोक्तिः परमात्मन एव गतं तत्वदेवादीनां तदनुसारेण गमनमिति ज्ञापनाय । ततो मतिदेवमासाद्य, मत्या मतिस्थितेन, तेन मनस्थेन च देवेन सह सः मतिस्थोऽपि विष्णुः, अहङ्कारस्थं हरिमिति योज्यम्, याति ॥ * ॥

"ततः विज्ञानतत्त्वम्, वाणीगतं प्राप्य महत्तत्त्वगतं च प्राप्येत्यर्थः । महत्तत्त्वगतः तेनाऽत्मना तन्नियामकेन सह शान्तिं चित्प्रकृतिस्थमानन्दं आनन्दनामानं जनार्दनं याति । तेनाऽत्मना अव्यक्तगतैः सर्वैः सह, अवसाने द्विपरार्द्धावसाने, गुणसन्निरोधं निर्गुणं गुणकार्याकरणादिति भावः, आत्मानं वासुदेवमुपैति । भागवतः भगवद्भक्त्या सर्वदोषविरोधिन्या युक्त इति भावः, यः एतां अपरोक्षपरमप्रसादप्राप्तां गतिं मुक्तिमार्गं गतः प्राप्तः सन् सर्वात्मके सर्वान्तर्यामिणि सर्वजीवोपेते वा ब्रह्मणि सम्पूर्णसर्वकल्याणगुणसम्पन्ने वासुदेवे तदाश्रयेण वर्तत इत्यर्थः । तदा सः परमात्मना ब्रह्मणा प्राणेन च मुक्तिं प्राप्तः इत्यर्थः । इह मुक्तिस्थेषु भोगेषु न विषज्जते रागलक्षणदोषादिमान् न भवतीत्यर्थः" इत्यादि ।

१ "ब्रह्मणा सह" इतीयान् क्वचिन्न पठ्यते ।

२ वीरराघवोऽप्याह– "विशेषशब्दः पृथिवीवाचकः । 'महदादयो विशेषान्ताः' इति प्रयोगात् । अत्रापि 'विशेषस्तु विकुर्वाणादम्भसो गन्धवानभूत्' इति वक्ष्यमाणत्वाच्च" इति ।

३ अग्निस्थितं अग्निनामानं परमात्मानं पुरस्कृत्येत्यर्थः । "ज्योतिर्मयः अनलस्थपरमात्मना सहितः" इत्यनन्ततीर्थाः ।

४ "सूक्ष्मत्वेन परमात्मनो दृष्टान्तभूतं खमाकाशं तद्वतं विष्णुं च प्रतिपद्यते" इत्यनन्ततीर्थाः ।

५ "शान्तिभूताः" इति प्र. पाठः । "शान्तीभूताः" इति च क्वचित् । शीतीभूता इत्येव स्वरसः पाठः । प्राचीनबहुकोशसम्मतश्च । शीतीभूता मुक्ता इत्यर्थः । "मोक्षः शीतीभावः शमोऽमृतम्" इत्यभिधाने पुरुषोत्तमदेवकृते । "तापत्रयशून्यत्वाच्च मोक्षस्य शीतीभावपदवाच्यत्वम्" इति च व्याचक्षते ।

परानन्दैकभोजिनः[१]" इति ब्रह्मतर्के । "भूम्यब्ग[२]मन्ननामानं प्राणमग्न्यादिसंस्थितम् । मानसं मनआदिस्थं विज्ञानं महति स्थितम् । आनन्दमव्यक्तगतं क्रमशो यान्ति देवताः । ब्रह्माद्याः केचिदेवात्र तदन्ये क्रमशः परान्[३]" इति बृहत्तन्त्रे[४] ॥ * ॥

"पञ्चेन्द्रियैर्ये विषया एष्टव्याः सर्वतो वराः । मानसांश्चाखिलान् प्राप्य मुक्ता मोदन्ति[५] देवताः । तथोद्रिक्तनिजानन्दा नित्यानन्दा असंवृताः" इति षाड्गुण्ये ॥ * ॥

भूतसूक्ष्मेन्द्रियैश्च सह अनादिर्भगवानाकाशगो मनोमयं याति । नादवत्त्वात् सनातनः[६] ।

"नादेन तेन महता सनातन इति स्मृतः" इति हि मोक्षधर्मे[७] ।

विविधकार्ययुक्तं विकार्यम् । देवमयं देवप्रधानम् ।

"मनस्थितो हरिर्नित्यं सर्वदेवेषु संस्थितः । देवप्रधानकान् लोकान् करोत्यनुगतः सदा" इति वाराहे ।

भूतसूक्ष्माणि पञ्चभूतानि जीवाश्च[८] ।

"पञ्चभूतैश्च शब्दाद्यैरिन्द्रियैर्जीवराशिभिः । युक्त आकाशगो विष्णुर्मनस्थमुपगच्छति" इति वामने[९] ।

योऽसावनादिर्मनोमय इति वा[१०] । विपर्ययश्चेत्[११] तस्यैव गन्तृत्वमिति ज्ञापयितुम् । मतिस्थेन तेन मनस्थेन च सह विज्ञानतत्त्वं[१२] याति । गुणसन्निरोधं निर्गुणं वासुदेवम् । एतां गतिं गतो न विषज्जते[१३] ।

"वासुदेवाश्रिता देवा ब्रह्माद्या मुक्तबन्धनाः । भेददृष्ट्याऽभिमानेन चाऽवृत्तिं नैव यान्ति

---

१ "परानन्दैकभागिनः" इति प्र. पाठः । "–भोगिनः" इति क्वचित् । "–भाजिनः" इति च क्वचित् ।

२ "भूम्यब्जम्" इति, "भूम्यब्दम्" इति च क्वचित् पाठः प्रामादिकः । पृथिव्यां जले च अन्ननामा अन्नमयनामा भगवान् । तेजोवाय्वाकाशेषु प्राणमयनामा । मनआदिष्विति मनोबुद्ध्यहङ्कारेषु मानस इति मनोमयनामा । महत्तत्त्वे विज्ञानमयः । अव्यक्ते चाऽनन्दमय इति ।

३ "क्रमशोऽपरान्" इति प्र. पाठः । क्रमशः परान् स्वोत्तमानित्यर्थः ।

४ "ब्रह्मतन्त्रे" इति क्वचित् ।

५ "मुक्तौ मोदन्ति" इति प्र. पाठः ।

६ "सनातनः सनादनः नादप्रेरकत्वेनाऽकाशगतो भगवान्" इत्यनन्ततीर्थाः ।

७ "इति मोक्षधर्मे" इति प्र. पाठः ।

८ भूतानीति पञ्चभूतानि । सूक्ष्माणीति जीवाः । च शब्देन शब्दादयस्तन्मात्राश्च ग्राह्याः इति प्राचीनम् । अर्वाचीनास्तु भूतसूक्ष्माणि जीवा इति भूतपदावृत्त्या व्याचक्षते । "पञ्चभूताभिमानिभिः सूक्ष्माणां शब्ददीनमभिमानिभिः, इन्द्रियाभिमानिभिश्च देवैः सहितः" इत्यनन्ततीर्थाः ।

९ क्वचित् "इति वामने" इति न पठ्यते ।

१० "मनोमयस्तमिति वा" इति प्र. पाठः ।

११ "विपर्ययश्च" इति क्वचित् ।

१२ "मनस्थेन च विज्ञानतत्त्वम्" इति क्वचित् ।

१३ "नेह विषज्जते" इति पाठान्तरम् । क्वचित् "गतोऽङ्गतो(?) नेह विषज्जते" इति पठ्यते ।

ते । भुञ्जते तु पृथग् भोगान् नाऽनन्दं तत्स्वरूपकम् । स्वरूपं च पृथक्त्वेषामाविष्ट-[१] ग्रहवद् भवेत्" इति ब्रह्माण्डे ॥ * ॥

नह्यतोऽन्यः शिवः पन्था विश्रुतः संसृताविह[२] ।
वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥ ३६ ॥

यद् भगवानाह[३] अतो भागवताख्याद् ग्रन्थाच्छिवः पन्था न ॥ * ॥

भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया ।
तदध्यपश्यत् कूटस्थे[४] रतिरात्मन् यतो भवेत् ॥ ३७ ॥

तद् भागवतं पुराणमपश्यत् ।

"नित्यज्ञानेन सिद्धं च पुनःपुनरवेक्षते[५] । लीलयैव हरिर्देवो दुष्टानां मोहनाय च"[६] इति पाद्मे[७] ॥ * ॥

भगवान् सर्वभूतेषु लक्षितश्चाऽत्मना[८] हरिः ।
दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥ ३८ ॥

---

१ "पृथक् तेषामाविष्ट–" इति प्र. पाठः । क्वचित् कोशेषु च तथा ।

२ "विशतः संसृताविह" इति पाठान्तरम् । "संसृतौ स्थित्वा नित्यलोकं विशतः प्रविशतः चेतनस्य" इति प्राचीनटीका । "विश्रुतः प्रमाणसिद्धः" इत्यनन्ततीर्थाः ।

३ "यतो भगवानाह" इति क्वचित् ।

४ "तदध्यवस्यत् कूटस्थो–" इति प्र. पाठः । "तदध्यवस्य कूटस्थे" इत्यन्यत्र । तदपश्यद्धि कूटस्थे" इति विजयध्वजीयः पाठः । "करतळामलकवदनालोचनेनैव नित्यविज्ञाताखिलवेदार्थोऽपि भगवान् बादरायणः केवल-लीलयाऽसुरमोहनाय च ब्रह्म वेदं कार्त्स्न्येन सर्वात्मना मनीषया त्रिवारमन्वीक्ष्य आलोच्य यतो जीवानां आत्मनि सर्वान्तर्यामिणि कूटस्थे निर्विकारे रतिर्भक्तिर्भवेत् तद् भागवतमध्यपश्यत् विरचयामास" इत्यनन्ततीर्थाः । "यतः कूटस्थे निर्विकारे, कूटमाकाशम्, परमात्मनि रतिः विषयान्तरपरित्यागेनाऽसक्तिश्च भवेत् तद् भागवतम्, ब्रह्म वेदं कार्त्स्न्येन पुराणादिलक्षणवेदेन सह मनीषया त्रिरन्वीक्ष्यैव मनसा अनुसन्धायैव अध्यपश्यत् । सर्ववेदेतिहास-पुराणेषु सारभूतं भागवतमेव शिवः पन्था इत्यपश्यदित्यर्थः" इति तु यादवेन्द्रतीर्थाः ।

५ "पुनःपुनरपेक्षते" इति क्वचित् । ६ "मोहनाय वै" इति क्वचित् ।

७ "इति ब्रह्मतर्के" इति क्वचित् प्र. पाठः ।

८ "लक्षितः स्वात्मना हरिः" इति च पाठान्तरम् । तथाहि यादवेन्द्रतीर्थीयम्—"भागवतार्थमप्यपश्यदित्या-शयेनाऽह—भगवान् सर्वभूतेष्विति । लक्षणैः अतिव्याप्तिदोषरहितैरिति भावः । दृश्यैः जीवेच्छानधीनतया ज्ञातैः अनुमापकैः जीवादन्यो नियन्ताऽस्तीत्येतदर्थानुमितिजनकैः बुद्ध्यादिभिः बुद्धिसुखदुःखेच्छाप्रयत्नैः स्वात्मना स्वसामर्थ्येन द्रष्टा पूर्णज्ञानसम्पन्नः भगवान् सर्वेश्वरः सर्वभूतेषु स्थित इति लक्षितः, अस्मिन् पुराणे सर्वजीवनियन्ता बुद्धिसुखदुःखादिप्रद इति प्रतिपादित इति भावः" इत्यादि ।

11

लक्षितश्चास्मिन् पुराणे बुद्ध्यादीनां पारवश्यदर्शनादन्यो नियन्ताऽस्तीति ।

"समाधावसमाधौ च निःस्वतन्त्रस्य देहिनः । अन्यो नियन्ता भगवान् वासुदेवः परः पुमान्[1]" इति ब्रह्मतर्के ॥ * ॥

तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो[2] भगवान् नृणाम् ॥ ३९ ॥

यस्माद् भगवतैष एवोक्तस्तस्मात्[3] स एव श्रोतव्यादिः ॥ * ॥

इति द्वितीयस्कन्धे द्वितीयोऽध्यायः

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ १० ॥

[4]"अकामो धर्मकामो वा मोक्षकामोऽपि यो भवेत् । अथवा सर्वकामो यः[5] स विष्णुं पुरुषं यजेत्[6]" इति स्कान्दे ॥ * ॥

आयुर्हरति वै पुंस[7] उद्यन्नस्तं च यन्नसौ ।
तस्यर्ते यः क्षणो नीत[8] उत्तमश्लोकवार्तया ॥ १७ ॥

तस्याऽयुषो य उत्तमश्लोकवार्तयर्ते क्षणः[9] स नीत एव वृथा[10] ॥ * ॥

इति द्वितीयस्कन्धे तृतीयोऽध्यायः

---

१ "परः प्रभुः" इति प्र. पाठः ।

२ "सति वक्तरि श्रोतव्यः । सति श्रोतरि कीर्तितव्यः । उभयाभावेऽपि स्मर्तव्यः" इति शुकदेवः । "सद्गुरुभ्यः श्रोतव्यः । सच्छिष्येभ्यः कीर्तितव्यः" इत्यनन्ततीर्थाः ।

३ "भगवतैष प्रोक्तस्तस्मात्" इति क्वचित् ।

४ "अकामः । अकामो धर्मकामो वा--" इत्यादि क्वचित् । तत्पक्षे प्रथममकाम इति मूलप्रतीकम् । ततः प्रमाणवचनमिति ।

५ "सर्वकामो वा" इति क्वचित् पाठः ।

६ "व्रजेत्" इति क्वचित् ।

७ "पुंसाम्" इति प्र. पाठः । यादवेन्द्रतीर्थीयेऽप्येवम् ।

८ "यत् क्षणो नीतः" इति प्र. पाठः ।

९ "तस्याऽयुष उत्तमश्लोकवार्तया ऋते यः क्षणः" इति प्र. पाठः ।

१० "नीत एव, वृथा गत एव, न सफल इत्यर्थः" इत्यनन्ततीर्थाः । "स क्षणः वृथा नीत एव । अथवा नीत एवेत्यस्यार्थः वृथेति । निष्फल इत्यर्थः" इति द्वेधा योजना यादवेन्द्रतीर्थीये ।

आत्मजायात्मजागार[1]पशुद्रविणबन्धुषु ।
राज्ये चाविकले नित्यं निरूढां ममतां जहौ ॥ २ ॥

अन्येषां नित्यरूढाम्[2] । तदा विशेषतो जहौ ॥ * ॥

संस्थां विज्ञाय सन्न्यस्य कर्म त्रैवर्गिकं च यत् ।
वासुदेवे भगवति स्वात्मभावं[3] दृढं गतः ॥ ४ ॥

"आप्तेः सर्वगुणानां य आत्मनामतया हरिम् । उपास्ते नित्यशो विद्वानाप्तकामस्तदा भवेत्[4]" इति वामने ॥ * ॥

नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया[5] ।
गृहीतशक्तित्रितयाय[6] देहिनामन्तर्ध्रुवायानुपलभ्यवर्त्मने[7] ॥ १२ ॥

गृहीतशक्तित्रितयायेति—

"इच्छा ज्ञानं क्रिया चेति नित्याः शक्तय ईशितुः । स्वरूपभूता अपितु भेदवद् व्यावहारिकाः" इति प्रकाशसंहितायां वचनान्नित्यगृहीतत्वमेव[8] ॥ * ॥

भूयो नमः सद्वृजिनच्छिदेऽसता[9]-
मसम्भवायाखिलसत्त्वमूर्त्तये[10] ।

---

१ "आत्मजायासुतागार—" इति प्र. पाठः ।

२ "नित्यं निरूढाम्" इति प्र. पाठः । "नित्यनिरूढाम्" इति क्वचित् । प्राचीनपाठे नित्यं निरूढामिति मूलस्यार्थतोऽनुवादोऽयम् । "नित्यनिरूढां ममतां जहौ" इत्येव भागवतपाठोऽनन्ततीर्थाभिमत इति भाति ।

३ "आत्मभावम्" इति प्र. पाठः । "स्वात्मभावं स्वस्वामित्वानुसन्धानम्, स्वतन्त्रात्मनि कल्याणगुणे भक्तिं वा गतः प्राप्तः" इति प्राचीनम् ।

४ "—कामः सदा भवेत्" इति क्वचित् ।

५ "सतः विश्वस्य उद्भवस्थाननिरोधरूपलीलया लीलार्थम् । विश्वस्य त्रैकालिकनिषेधवारणाय सदित्युक्तिः" इति प्राचीनम् । "सृष्ट्याद्यर्थं लीलया गृहीतम्" इति चानन्ततीर्थाः ।

६ "गृहीतं नित्यं स्ववशं शक्तित्रितयं ज्ञानशक्तिक्रियाशक्तीच्छाशक्तिलक्षणं यस्य येन वा तस्मै । अभिव्यक्त्यपेक्षया गृहीतत्वव्यपदेशः । अमुख्यं गुणलक्षणं शक्तित्रितयं वा" इति प्राचीनम् ।

७ "अन्तर्भवायानुपलक्ष्यवर्त्मने" इति प्र. पाठः । "अन्तर्भवायानुपलभ्यवर्त्मने" इति च । यादवेन्द्रतीर्थसम्मतश्चायं पाठः । "अन्तर्भवाय देहकरणान्तर्विद्यमानाय व्यापारेषु प्रेरणार्थम्" इति हि तद्व्याख्यानम् । "अन्तर्नियामकतया ध्रुवाय नित्याय" इत्यनन्ततीर्थाः ।

८ "प्रकाशसंहितावचनान्नित्यगृहीतशक्तित्वमेव" इति प्र. पाठः । "गृहीततत्त्वमेव" इति क्वचित् ।

९ "असतामसम्भवाय न विद्यते मोक्षसुखस्य सम्भवः येन तस्मै" इति प्राचीनम् ।

१० "सत्त्वरूपा निर्दोषमूर्तिर्यस्य तस्मै प्राकृतमूर्तिविकाररहितायेति भावः" इति च ।

पुंसां पुनः पारमहंस्य आश्रमे
व्यवस्थितानामनुमृग्यदाशुषे[१] ॥ १३ ॥

अखिलसत्त्वमूर्तये पूर्णसाधुगुणरूपाय[२] ।

"निःशेषगुणपूर्णत्वात् सत्त्व इत्येव तं विदुः" इति महासंहितायाम् ॥ * ॥

स एष आत्माऽऽत्मवतामधीश्वर[३]स्त्रयीमयो[४] धर्ममयस्तपोमयः ।
गतव्यलीकैरजशङ्करादिभिर्वितर्क्यलिङ्गो[५] भगवान् प्रसीदताम् ॥ १९ ॥

"वेदानुसारिवशगः स्वेच्छया तु हरिर्यतः । अतः स्वतन्त्रमप्याहुः प्राज्ञा वेदमयेति ह" इत्यध्यात्मे ॥ * ॥

इति द्वितीयस्कन्धे चतुर्थोऽध्यायः

देवदेव नमस्तेऽस्तु भूतभावन पूर्वज[६] ।
तद् विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनम्[७] ॥ १ ॥

विजानीहि[८] विज्ञापय । "व्यत्ययो भेदस्वातन्त्र्यकरणेषु[९]" इति वचनात् ॥ * ॥

---

१ "अनुमृग्यं अन्वेषणीयं स्वपादकमलं तद्दाशुषे दात्रे । अनुमृग्यं मोक्षानन्तरसुखं वा" इति यादवेन्द्रतीर्थाः । "अनुमृग्यो जिज्ञास्यः, दाश्वान् फलप्रदाता । अनुमृग्यश्चायं दाश्वांश्च । योगिभिर्विचार्यस्तेषां मोक्षादिफलदाता च" इत्यनन्ततीर्थाः ।

२ "पूर्णसाधुभावस्वरूपाय" इति प्र. पाठः ।

३ "आत्मवतां अपरोक्षीकृतपरमात्मतत्त्वानां अधीश्वरः" इत्यनन्ततीर्थाः । "आत्मवतां मनस्विनां आत्मा अन्तर्यामिमूर्तिभिः सर्वव्यापारकर्ता । तत्त्वदेवतानामपि स्वामीत्याशयेनाऽह—अधीश्वर इति" इति यादवेन्द्रतीर्थाः । "आत्मा श्रीभगवानुपास्यतया विद्यते येषां तेषामात्मा आश्रयः" इति शुकदेवः ।

४ "त्रयी वेदाः प्रधानं यस्य सः त्रयीमयः । स्वप्राप्तिसाधनेषु वेदाख्यप्रधानसाधनोपेतः" इति प्राचीनम् ।

५ "वितर्क्यलिङ्गः पुनःपुनरनुसन्धेयरूपः । अथवा अजशङ्करादिभिरपि स्वस्वसामर्थ्येन अतर्क्यस्वरूपः । ईश्वरानुग्रहेणैव सर्वेषां ज्ञानमिति भावः" इति च प्राचीनम् ।

६ "भूतभावनपूर्वज" इत्येकं वा पदम् । "भूतानि भावयति उत्पादयति भूतभावनः पुरुषः पद्मनाभो वा । तस्मात् पूर्वमुत्पन्न" इति यादवेन्द्रतीर्थाः । "पूर्वः पुराणपुरुषः तस्माज्जातत्वात् पूर्वज" इत्यनन्ततीर्थाः ।

७ "–तत्त्वविमर्शनम्" इति केचित् पठन्ति । "परमात्मतत्त्वप्रदर्शकं ज्ञानजनकत्वात् ज्ञानाख्यं भागवतशास्त्रं विजानीहि विशेषेण ज्ञापय" इत्यनन्ततीर्थाः ।

८ क्वचित् "जानीहि" इतीयदेव पठ्यते ।

९ "अत्र वक्तृज्ञातृव्यत्ययः ब्रह्मज्ञानदाने भगवानस्मदपेक्षया स्वतन्त्र इति ज्ञापनाय । विरिञ्चस्य ज्ञानकरणप्रेरकत्वात् ज्ञानकरणत्वज्ञापनाय वा" इति प्राचीनटीका ।

यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ।
यत्संस्थं यत्परं यच्च तत् तत्त्वं वद तत्त्वतः ॥ २ ॥

"तद्वशत्वादिदं रूपं हरेनैव स्वरूपतः" इति मानसंहितायाम्[१] । "अधिष्ठानमिति प्रोक्तं मूलाधारं विचक्षणैः । यत्स्थितं दृश्यते वस्तु संस्थानं तदुदीरितम् । उभयं हरिरेवास्य जगतो मुनिपुङ्गव" इति वामने । "हरिः परोऽस्य जगतो ह्यव्यक्तादेश्च कृत्स्नशः । अतस्तत्परमेवेदं वदन्ति मुनयोऽमलाः" इति सात्वतसंहितायाम् । "यदधीना यस्य सत्ता तत् तदित्येव भण्यते । विद्यमाने विभेदेऽपि मिथो नित्यं स्वरूपतः" इति भविष्यत्पर्वणि ॥ * ॥

एकः सृजसि भूतानि भूतैरेवाऽत्ममायया ।
आत्मन् भावयसे तानि न पराग् भावयेः[२] स्वयम् ।
आत्मशक्तिमवष्टभ्य [३]सूत्रनाभिरिवाक्रमः ॥ ४ ॥

तदधिकं ज्ञातुं पूर्वपक्षं दर्शयति—एकः सृजसीत्यादिना ॥ * ॥

नाहं वेद परं त्वस्मान्नापरं[४] न समं विभो ।
नामरूपगुणैर्भाव्यं सदसत् किञ्चिदन्यतः[५] ॥ ५ ॥

"त्वदधीना यतः सत्ता [६]अवरस्यापि केशव । अतः स्वरूपतः सम्यक् सति भेदेऽपि तद् भवान्" इति मात्स्ये ॥ * ॥

नानृतं बत[७] तच्चापि यथा मां प्रब्रवीषि भो[८] ।
अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥ ९ ॥

नानृतमित्याक्षेपः[९] ॥ * ॥

---

१ "मानससंहितायाम्" इति प्र. पाठः ।

२ "न पराभावयन्" इति प्र. पाठः । "पराक् त्वत्तो बहिः । त्वदन्येनेति यावत् । नोत्पादयसि" इत्यनन्ततीर्थाः । "न पराद् भावयेः" इति यादवेन्द्रतीर्थीयः पाठ इति भाति । तथाहि तद्वचनम्—" स्वयं परात् परस्मात् भूतानि न भावयेः नोत्पादयेः" इति ।

३ "ऊर्णनाभिरिवाक्रमः" इति प्र. पाठः । सूत्रनाभिरित्यूर्णनाभिरिति चैकोऽर्थः ।

४ "तस्मान्नावरम्" इति यादवेन्द्रतीर्थसम्मतः पाठ इति भाति । "त्वस्मान्नावरम्" इति क्वचित् पाठः ।

५ "किञ्चिदप्यन्यतः न जायते । अतस्त्वमेव सर्वकर्तेत्यर्थः" इति प्राचीनम् ।

६ "अपरस्यापि" इति क्वचित् ।

७ "तव" इति प्र. पाठः ।

८ "भोः" इति प्र. पाठः ।

९ अत्र प्राचीनटीकाकारा द्वेधा व्याचक्षते—"भो पुत्रक, मत्तः परमन्यं सर्वजगत्कर्तारं नारायणमविज्ञाय

नमस्तस्मै भगवते[1] वासुदेवाय धीमहि[2] ।
यन्मायया दुर्जयया मां ब्रुवन्ति[3] जगद्गुरुम् ॥ ११ ॥

"मुख्या माया[4] हरेः शक्तिरमुख्या प्रकृतिर्मता । अथामुख्यतमा चैव मयादीनां[5] प्रकीर्तिता" इति ॥ * ॥

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।
वासुदेवात् परो ब्रह्मन् नचान्योऽर्थोऽस्ति तात्त्वतः[6] ॥ १३ ॥

परः अधिकः ।

"तद्वदेव स्थितं यत्तु तात्त्वतं[7] तत् प्रचक्षते" इति कौर्मे ॥ * ॥

नारायणपरा वेदा देवा नारायणाङ्गजाः ।
नारायणपरा लोका नारायणपरा मखाः ॥ १४ ॥

नारायणपरो योगो नारायणपरं तपः ।
नारायणपरं ज्ञानं नारायणपरा गतिः ॥ १५ ॥

त्वमेकः सृजसीत्यादि यद् वाक्यं मां प्रति प्रब्रवीषि तद् वाक्यमपि अनृतं असत्यं न बत न किम्? असत्यमेवेत्यर्थः । कस्मात्? मे मम एतावत्त्वं हि तद्रोचिषा रोचितरोचकत्वमेव, नातोऽधिकसामर्थ्यमस्ति, तस्मादित्यर्थः" इत्यनन्ततीर्थाः । "मे मयि विद्यमानं यतः यस्मात् परमात्मनः सकाशात् एतावत्त्वं अपकृष्टत्वं अविज्ञाय, मत्तः परं निरवधिकपूर्णं परमात्मानं च अविज्ञाय मां प्रति यथा उत्तमादिराहित्यलक्षणं यं प्रकारं प्रब्रवीषि नाहं वेद परमित्यादि तद् वचनं भो नारद, नानृतमित्याक्षेपः स्वरविशेषेण ज्ञेयः । अनृतं न किम्? अनृतमेव, स्वसिद्धान्तप्रकटनालाभात् । बत अतिगर्हितं च । श्रवणानर्हमित्यर्थः" इति यादवेन्द्रतीर्थाः ।

१ "तस्मै नमो भगवते" इति प्र. पाठः ।

२ "तस्मै भगवते नमः, वासुदेवाय धीमहि इति स्वजप्यमन्त्रप्रतिपाद्यानुसन्धानम्" इति प्राचीनटीका ।

३ "वदन्ति" इति क्वचित् पाठः । ४ "मुख्यमाया" इति क्वचित् पाठः ।

५ मयादीनामसुराणां माया अमुख्यतमा । "माया हीना प्रकीर्तिता" इति प्र. पाठः, "माया दीना" इति क्वाचित्कश्च पाठः प्रामादिकः ।

६ "तत्त्वतः" इति प्र. पाठः । यद्यपि "तत्त्वतः विचार्यमाणे सति" इति व्याख्यानादनन्ततीर्थसम्मतोऽपि पाठः स एवेति भाति । किन्तु तात्त्वतपदनिर्वचनपरभाष्यवचनस्य तत्पक्षे का सङ्गमनिकेति न स्फुटम् । प्राचीनटीकायां तु तात्वत इत्येव पदं परिगृह्य द्वेधा व्याख्यातम्--"अन्यः वासुदेवाद् भिन्नः अर्थः तात्त्वतः शश्वदेकप्रकारो नास्ति । विकारोपेत एवेत्यर्थः । अतः अन्यः वासुदेवात् परः उत्तमः नच नैव । वासुदेव एव सर्वोत्तम इत्यर्थः । तात्वतः वासुदेवसदृशो वा नास्तीत्यर्थः" इति ।

७ "तात्त्विकम्" इति प्र. पाठः । क्वचित् कोशेष्वपि तथा । अनन्ततीर्थाभिमतः पाठोऽपि स एवेति भाति ।

वेदप्रतिपाद्येषु स पर इत्यादि[१]।

"गम्येज्यज्ञेयवाच्येषु योज्येषु[२] च परो हरिः। तपसा पूज्यमानानां[३] सर्वलोकेभ्य एव च" इति वाराहे ॥ * ॥

सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः।
स्थितिसर्गनिरोधेषु गृहीता मायया[४] विभोः ॥ १७ ॥

युगपत् क्रमशोऽपि वेत्यस्य[५] परिहारः—सत्त्वं रजस्तम इति।

"नित्यं गृहीताः सत्त्वाद्या स्थित्यादिषु विशेषतः। युगपत् क्रमशश्चैव गृह्णाति भगवान्[६] हरिः" इति ब्रह्मवैवर्ते ॥ * ॥

कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः[७]।
बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥ १८ ॥

"ज्ञानेन्द्रियैश्च मनसा सत्त्वं बध्नाति पूरुषम्। रजः कर्मेन्द्रियैर्नित्यं शरीरेण तमस्तथा। आन्तरं यत्तु कर्तृत्वं तत् सत्त्वेनाभिमन्यते। रजसा त्वभिमन्येत करणैः कर्मकारणैः। शारीरं वेदनाद्यं तु तमसा [८]त्वभिमन्यते। अकर्ता करणैर्हीनः शरीरेण विवर्जितः। नित्यज्ञान[९]स्वरूपोऽसौ गुणैरेवाभिमन्यते। एवं जीवः परेणैव प्रेरितः संसृतिं व्रजेत्। न परः संसृतिं क्वापि स्वातन्त्र्यादधिकत्वतः। एवं जीवपरौ भिन्नौ किमन्यच्छ्रोतुमिच्छसि" इति पाद्मे[१०]।

---

१ नारायणः स्वप्रतिपाद्येषु परः मुख्यः येषां ते नारायणपरा इत्यादि। प्राचीनटीकायां तु "नारायणः परः अधिकः येषां ते वेदाः वेदवाच्याः। वाच्यवाचकयोरभेदोक्तिः। वेदप्रतिपाद्येषु नारायणः अधिक इत्यर्थः" इति व्याख्यातम्।

२ "याज्येषु" इति प्र. पाठः प्रामादिकः। इज्यपदेन पुनरुक्तेः। योज्येषु ध्यानादियोगेनानुसन्धेयेष्वित्यर्थः।

३ "युज्यमानानाम्" इति प्र. पाठः। "तपसा आराधनीयेषु नारायणः परः" इति प्राचीनटीका।

४ "निर्गुणस्य गुणेभ्योऽतिक्रान्तस्य अधीना ये गुणाः ते त्रयोऽपि स्थितिसर्गनिरोधलक्षणव्यापारार्थं मायया प्रकृत्या सह गृहीता व्यापारवन्तः कृताः। मायया स्वेच्छया वा। सृष्टिस्थित्यादीनां क्रमिकत्वात् गुणानां क्रमेण प्रवर्तनमीशः करोतीति भावः" इति प्राचीनटीका।

५ "क्रमशो वेत्यस्य" इति क्वचित्। अनन्ततीर्थाभिमतश्चायं पाठः।

६ "भगवान् स्वयम्" इति प्र. पाठः।

७ "द्रव्याणि भूतानि, ज्ञायन्त एभिरिति ज्ञानानि ज्ञानेन्द्रियाणि षट्, क्रियन्त एभिरिति क्रियाः कर्मेन्द्रियाणि पञ्च, एतेषामाश्रया उपचयसम्पादकाः, कार्यकारणकर्तृत्वे, कार्याणि विकार्याणि स्थूलशरीराणि, कारणानि (कर्मकारणानि) इन्द्रियाणि, कर्तृत्वं विषयसुखादिभोक्तृत्वम्, एषु गुणैः सम्पादितेषु सत्सु, पुरुषं देहिनं मायिनं ज्ञानस्वभावमपीत्यर्थः, अज्ञानिनमिति वा। बध्नन्ति विषयेष्वपरायत्तताभ्रमं सम्पादयन्ति" इति प्राचीनटीका।

८ "तमसा ह्यभिमन्यते" इति प्र. पाठः। "तमसाऽप्यभिमन्यते" इति क्वचित्।

९ "नित्यं ज्ञान—" इति क्वचित्।

१० "इति च पाद्मे" इति क्वचित्।

मायिनं ज्ञानिनं स्वतः ॥ * ॥

स एष भगवाँल्लिङ्गैस्त्रिभिरेतैरधोक्षजः[१] ।
स्वलक्षितगतिर्ब्रह्मन्[२] सर्वेषां मम चेश्वरः ॥ १९ ॥

[३]एतैर्लिङ्गैः स्वप्रसादात् जीवेन लक्षितगतिः ।

"स्वप्रसादादिमं जीवः पश्येत् तेन स्वलक्षितः" इति षाड्गुण्ये ॥ * ॥

कालं कर्म स्वभावं[४] च मायेशो मायया स्वया[५] ।
आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥ २० ॥

स्वमायया[६] स्वशक्त्या ।

"यत्रान्यहेत्वभावः स्यादीश्वरेच्छादिना विना । तदिच्छा हि यदृच्छा स्यादतस्तत्र यदृच्छया[७]" इति ब्रह्मतर्के । "कालकर्मस्वभावादि नित्ययेशेच्छया सदा । प्राप्तमेव विशेषेण सृष्ट्यादावुन्नयत्यजः" इति च ।

विबुभूषुः बहुधा बुभूषुः[८] ।

"ईशो बह्वीः पुरः सृष्ट्वा तत्रैव बहुरूपताम् । तत्तन्नियामकतया प्राप्तुं कालाद्युपाददे" इति च ॥ * ॥

---

१ "त्रिभिरेभिरधोक्षजः" इत्यर्वाचीनः पाठः ।

२ "ब्रह्मन् ज्ञानसम्पन्न । ज्ञात्वाऽपि आदरात् पृच्छसीति भावः" इति प्राचीनम् ।

३ इतः पूर्वं प्र. पाठे "लिङ्गैर्ज्ञापकैस्त्रिगुणैः" इति यदधिकं पठ्यते तत्प्रक्षिप्तमेव । न क्वापि मूलकोशेष्वेतत् पठ्यते । नाप्यत्र त्रिभिरिति त्रिगुणैरित्यर्थः । तथाहि प्राचीनटीका—"एतैः त्रिभिः देहेन्द्रियमनोभिः, त्रिभिर्वेदैः सह वा, लिङ्गैर्ज्ञापकैः अधोक्षजोऽपि इन्द्रियादिजन्यज्ञानाविषयोऽपि स्वलक्षितगतिः स्वीयेनैवाघटितघटनाशक्त्युपेतानुग्रहेण लक्षितः ज्ञातः गतिः प्राप्यश्च भवति । जीवैः ज्ञातव्यापारो वा" इति । "सर्वेन्द्रियेष्वधःकृतेषु सत्सु जायमानत्वादधोक्षजनामा लिङ्गैः गमकैः एतैस्त्रिभिः देहेन्द्रियमनोभिर्ज्ञानोपायैः स्वलक्षितगतिः स्वभक्तानां स्वप्रसादात् प्रदर्शितनिजस्वरूपः" इत्यनन्ततीर्थाः । विजयध्वजीयेऽप्येवम् । एतेन स्वीयेन प्रसादेन स्वीयैर्जीवैर्लक्षितगतिरिति स्वशब्दावृत्त्या योजनोक्ता भवति ।

४ "प्रकृतेः परिणामस्वभावः जीवानां हठो वा" इति यादवेन्द्रतीर्थाः । "सात्त्विकादिजीवस्वभावम्" इत्यनन्ततीर्थाः ।

५ यद्यपि "मायेशोऽथ स्वमायया" इति प्राचीनटीकासम्मतः पाठ इति भाति । तथाहि यादवेन्द्रतीर्थाः— "स्वमायया स्वशक्त्या" इति । "स्वमायया स्वसामर्थ्येन" इति चानन्ततीर्थाः। विजयध्वजीयेऽपि तथा । भाष्ये च "स्वमायया" इत्येव प्राचीनपाठोऽत्र संवदते । तथाऽपि भागवतमूलकोशेषु तादृशपाठस्य साम्प्रतमदर्शनात् "मायया स्वया" इत्येव पाठोऽत्र स्वीकृतः ।

६ "स्वया मायया" इति प्र. पाठः ।

७ अन्येऽप्येवं व्याचक्षते— "यदृच्छया स्वैरितया" इति विश्वनाथादयः। "यदृच्छया स्वेतरनिमित्तं विना" इति शुकदेवः ।

८ "बहुधा बुभूषुः" इतीयान् क्वचिन्न पठ्यते ।

कालाद् गुणव्यतिकरात् परिणामस्वभावतः[१] ।
कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥ २१ ॥

प्रकृतेः परिणामस्वभावतः[२] ।

"गुणकालस्वभावेभ्य ईशेनाधिष्ठितत्वतः । जगदादि महत्तत्त्वमभूत् तस्येच्छया हरेः" इति षाड्गुण्ये ॥ * ॥

महतस्तु विकुर्वाणाद् रजस्सत्त्वोपबृंहितात् ।
तमःप्रधानस्त्वभवद् द्रव्यज्ञानक्रियात्मकः ॥ २२ ॥

"भूतानि द्रव्यनामानि ज्ञानं ज्ञानेन्द्रियाण्यपि । क्रिया[३] कर्मेन्द्रियाण्याहुस्तन्मूलत्वादहं त्रिधा" इति गारुडे ॥ * ॥

सोऽहङ्कार इति प्रोक्तो विकुर्वन् समभूत् त्रिधा ।
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ।
द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभोः[४] ॥ २३ ॥

"विशिष्टकार्यशक्तित्वाद् देवा वैकारिकाः स्मृताः । अतिजाज्वल्यमानत्वात् तैजसानीन्द्रियाण्यपि । तामसानि तु भूतानि यतस्तावन्नतूभयम्" इति पाद्मे । "ज्ञानेन्द्रियाणां देवानां ज्ञानशक्तिरुदीरिता । क्रिया कर्मेन्द्रियाणां च भूतानां द्रव्यशक्तिता" इति स्कान्दे । "द्रव्यं तु द्रवणप्राप्यं द्वयोर्विवदमानयोः । पूर्वं वेगाभिसम्बन्धादाकाशश्च[५] प्रदेशतः" इति प्रकाशसंहितायाम्[६] ॥ * ॥

---

१ "गुणव्यतिकरः परिणामः स्वभावतः" इति प्र. पाठः । "कालात् सृष्टिकालेन, कर्मणः हिरण्यगर्भादृष्टेन च उपकृतात् गुणव्यतिकरात्, गुणानां सत्त्वादीनां व्यतिकरो विषमीभावो यस्मिन् तत्, एवं गुणव्यतिकरनाम्नः परिणामस्वभावतः विकारस्वभावयुक्तात् पुरुषाधिष्ठितात् विष्णुना क्षोभ्यमाणात् प्रकृतेः सकाशात् महतः महत्तत्वाभिमानिविरिञ्चस्य तदभिमन्यमानमहत्तत्वस्य च जन्माभूत्" इति प्राचीनम् ।

२ "परिणामः स्वभावः" इति क्वचित् ।

३ "क्रियाम्" इति प्र. पाठः ।

४ "प्रभो" इति प्र. पाठः । "प्रभोः परमेश्वरात् प्राप्ता या द्रव्यशक्तिः या च क्रियाशक्तिः ज्ञानशक्तिरिति एवंरूपैः भेदः इत्यर्थः" इति प्राचीनम् । "द्रव्यनामकपञ्चभूतोत्पादकशक्तिमत्त्वात् तामसाहङ्कारो द्रव्यशक्तिरित्युच्यते । क्रियानामककर्मेन्द्रियोत्पादकत्वात् तैजसाहङ्कारः क्रियाशक्तिः । ज्ञानेन्द्रियमनोदिगादिदेवोत्पादनशक्तिमत्त्वाद् वैकारिकाहङ्कारो ज्ञानशक्तिरित्युच्यते । एवं प्रभोरहङ्कारस्य भेदोऽवगन्तव्य इति शेषः" इत्यनन्ततीर्थाः ।

५ "आकाशस्तु" इति प्र. पाठः ।

६ "प्रकाशिकायाम्" इति क्वचित् ।

12

तामसादपि भूतादेर्विकुर्वाणादभून्नभः ।
तस्य मात्रा गुणः[1] शब्दो लिङ्गं[2] यद् द्रष्टृदृश्ययोः ॥ २४ ॥

"पञ्चेद्रियाभिमेयत्वान्मात्रा गुण इतीरितः[3]" इति मात्स्ये । "शब्देनैव परो द्रष्टा ज्ञायते[4] जगदेव च" इति विष्णुसंहितायाम् ॥ * ॥

नभसोऽथ विकुर्वाणादभूत् स्पर्शगुणोऽनिलः ।
परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलम्[5] ॥ २५ ॥

सर्वचेष्टयितृत्वात्तु प्राणोऽभिभवशक्तितः । ओजस्त्वनभिभाव्यत्वात् सहश्च स्वेच्छया कृतेः । बलं विधारकत्वाच्च विधृतिर्वायुरुच्यते" इति च भारते[6] ॥ * ॥

वैकारिकान्मनो जज्ञे देवा वैकारिका दश ।
[7]दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः[8] ॥ २९ ॥

"अनाद्यनन्तोऽपि हरिर्वैकारिकगणेष्वजः । अवतीर्णः पदाङ्गुष्ठमध्यास्ते विश्वभुग् विभुः । पाददेवस्तु यज्ञोऽन्यस्तं प्रविश्य हरिः स्वयम् । सर्वं विधारयन् देहं[9] वर्तते सर्वशक्तिधृक्[10]" इति वह्निपुराणे ॥ * ॥

तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः ।
सदसत्त्वमुपादाय नो भयं[11] ससृजुर्ह्यदः ॥ ३२ ॥

---

१ मात्रा गुण इति भिन्ने पदे । "आकाशस्य गुणः शब्दः । मात्रा श्रोत्रेण मेयं सत् यत् शब्दस्य वर्णविशिष्टरूपं द्रष्टुः परमात्मनः दृश्यस्य प्रपञ्चस्य च लिङ्गं ज्ञापकं भवति" इति यादवेन्द्रतीर्थाः । "शब्दस्तस्याऽकाशस्य गुणः सन् केवलश्रोत्रेण ग्राह्यत्वान्मात्रेत्युच्यते" इत्यनन्ततीर्थाः । मात्रागुण इति समस्तं पदमिति च व्याचक्षते ।

२ "लीनमर्थं गमयतीति लिङ्गं प्रमाणमित्यर्थः । ईश्वरज्ञानार्थमतीन्द्रियजगज्ज्ञानार्थं च शब्दो मुख्यप्रमाणमिति हृदयम्" इत्यनन्ततीर्थाः ।

३ "उदीरितः" इति क्वचित् । गुणः शब्दादिः मात्रा इतीरितः ।

४ "जायते" इति क्वचित् । तथात्वे अभिव्यज्यते इति व्याख्येयम् ।

५ "सर्वचेष्टकत्वात् प्राण इत्युच्यते । अभिभवशक्तिप्रदत्वादोज इति । अनभिभवशक्तिदत्वात् सह इति । स्वेच्छाकरणशक्तिदत्वात् बलमित्युच्यते । एतद्गुणात्मकोऽनिल इति तात्पर्यम्" इत्यनन्ततीर्थाः ।

६ "इति भारते" इति प्र. पाठः ।

७ "दिक्शब्देन दिग्देवता उच्यन्ते" इत्यनन्ततीर्थाः । श्रोत्रदिगभिमानी यमः" इति यादवेन्द्रतीर्थाः ।

८ "मित्रनामा कश्चिद् देवः । सूर्य इति केचित् । कः दक्षः" इत्यनन्ततीर्थाः ।

९ "देहे" इति प्र. पाठः ।

१० "अनन्तशक्तिधृक्" इति प्र. पाठः । "–शक्तिधृत्" इति क्वचित् ।

११ "चोभयम्" इत्यौत्तरेयः पाठः । दाक्षिणात्यास्तु "नोभयम्" इत्येव पठित्वा न उभयमिति च्छिन्दन्ति ।

सदसत्त्वं व्यक्ताव्यक्तत्वम्[१] । नः । अदः ब्रह्माण्डम् । ब्रह्माण्डं हि वदन्ति[२] जीवानां भयकारणम् । तत्र हि संसृतिः ।

> **"आकाशवायू त्वव्यक्ते[३] इतरेऽण्डे प्रकाशिताः । तथात्वाद् बाह्यभूतानामण्डस्थाना च सा गतिः" इति मात्स्ये ॥ * ॥**

वर्षपूगसहस्रान्ते तदण्डमुदकेशयम् ।
कालकर्मस्वभावस्थो[ऽ]जीवो[ऽ]जीवमजीजनत्[४] ॥ ३३ ॥

कालकर्मस्वभावस्थः अजीवः परमेश्वरः अजीवं स्वात्मानमजीजनत्[५] । तदण्डं यथा स्वात्मानं प्रसूते तथा चकार ।

> **"यः प्राणधारणं प्राणप्रसादात् कुरुतेऽनिशम् । स जीव इति सन्दिष्टस्तदन्योऽजीव उच्यते । यत्प्रसादात् स तु प्राणः कुरुते स्वस्य धारणम्" इति वायुप्रोक्ते । "कालकर्मस्वभावस्थो वासुदेवः परः पुमान् । अकरोदण्डमुद्वृद्धमात्मप्रसवकारणम्" इति ब्रह्माण्डे ।**

जीव इति वा ।

> **"प्राणं धारयते यस्मात् स जीवः परमेश्वरः । अजीवोऽपि महेतेजास्त्वथवा जीवयन् जगत्" इति स्कान्दे ॥ * ॥**

स एष[६] पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः ।
सहस्रोर्वङ्घ्रिबाह्वक्षिसहस्राननशीर्षवान् ॥ ३४ ॥

---

१ "सतां व्यक्तानां पृथिव्यप्तेजसाम्, असतोः अव्यक्तयोः वाय्वाकाशयोः भावः सदसत्त्वम् । एतन्मेळनमित्यर्थः" इति प्राचीनम् । मूर्तामूर्तत्वमित्येतत् । "सच्छब्दवाच्यं पृथिव्यादिभूतत्रयम्, तथाऽव्यक्तत्वादसच्छब्दवाच्यं भूतद्वयं च उपादाय उपादनीकृत्य" इत्यनन्ततीर्थाः । एतत्पक्षे भावप्रधानो निर्देशः ।

२ "ब्रह्माण्डं हि वदन्तीति" इति प्र. पाठः प्रमाद एव । "ब्रह्माण्डं वदन्ति" इति क्वचित् ।

३ "त्वव्यक्तौ" इति प्र. पाठः ।

४ "अजीवयत्" इति प्र. पाठः । अत्र अजीवः जीवः इति अजीवं जीवमिति च द्वेधाऽपि च्छेदः । "अजीवः सर्वजीवेभ्यो व्यतिरिक्तः श्रीनारायणः अण्डं अजीवं अजीवस्याऽत्मनोऽभिव्यक्तिकारणं अजीजनत् अकरोत् । सोऽजीवः परमात्माऽजीवं स्वात्मानं तत्राण्डान्तर्विराट्पुरुषरूपेण अजीजनत् व्यञ्जयामासेति चार्थो द्रष्टव्यः । अथाजीवः परमात्मा जीवं सर्वजीवप्रधानं ब्रह्माणं तत्राजीजनत् जनयामासेति च योजनीयम्" इत्यनन्ततीर्थाः । "यदुदकेशयमण्डं तत् प्रविश्येति शेषः । अजीवः जीवविलक्षणः अजीवं तथाविधमेव स्वांशं अण्डान्तःपुरुषरूपं अजीजनत् व्यक्तं चकार । जीव इति पदविभागे जीवः सर्वप्राणधारकः परमात्मा जीवं विरिञ्चिपुरुषरूपं अजीजनत्" इति यादवेन्द्रतीर्थाः । "जीवयतीति जीवः परमात्मा" इति श्रीधरादयः । "अजीवः जीवव्यतिरिक्तो भगवान्" इति वल्लभः ।

५ "अजीवः स्वात्मानमजीजनत्" इति प्र. पाठः प्रामादिकः । ६ "स एव" इत्यर्वाचीनः पाठः ।

"अण्डे जातौ पुमांसौ द्वौ हरिर्ब्रह्मा तथैव च । अनादिस्तु हरिस्तत्र ब्रह्मा सादिरुदाहृतः" इति स्कान्दे[१] ॥ * ॥

यस्येहावयवैर्लोकान् कल्पयन्ति[२] मनीषिणः ।
ऊर्वादिभिरधः[३] सप्त सप्तोर्ध्वं जघनादिभिः ॥ ३५ ॥

"हरेरवयवैर्लोकाः सृष्टा इति विकल्पनम् । साक्षात् सत्यमतोऽन्यस्माद् व्यावहारिकमुच्यते" इति मात्स्ये ॥ * ॥

पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ।
ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रो व्यजायत[४] ॥ ३६ ॥

"ब्राह्मणो मुखमित्येव मुखाज्जातत्वहेतुतः[५] । यथाऽवदच्छ्रुतौ तद्वज्जीवो ब्रह्मेति वाग् भवेत्[६]" इति ब्राह्मे ॥ * ॥

इति द्वितीयस्कन्धे पञ्चमोऽध्यायः

रूपाणां तेजसां चक्षुर्दिवः[७] सूर्यस्य चाक्षिणी[८] ।
कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ॥ ३ ॥

तीर्थानां शास्त्राणाम्[९] ॥ * ॥

---

१ "इति च" इति प्र. पाठः ।

२ "कल्पयन्ति समर्थयन्ते" इति प्राचीनटीका । "ज्ञानसामर्थ्येन पश्यन्ति" इत्यनन्ततीर्थाः ।

३ "कट्यादिभिरधः" इत्यर्वाचीनः पाठः ।

४ "शूद्रोऽभ्यजायत" इति प्र. पाठः ।

५ शुकदेवोऽप्याह—"ब्रह्म ब्राह्मणः पुरुषस्य मुखं मुखजम् । क्षत्रं क्षत्रियः बाहवः बाहुजम्" इति ।

६ "ब्रह्मेति वा भवेत्" इति क्वचित् ।

७ "दिवः द्युलोकाभिमानिनः" इति यादवेन्द्रतीर्थाः । "स्वर्गलोकस्य" इत्यनन्ततीर्थाः । "ज्योतिश्चक्रस्य" इत्यपरे ।

८ अत्र चक्षुरितीन्द्रियम् । अक्षिणी इति गोळके । एवं कर्णाविति गोळके श्रोत्रमितीन्द्रियमिति विजयध्वजीये स्थितम् । यादवेन्द्रतीर्थीयेऽपि तथा । अनन्ततीर्थीये तु "चक्षुराख्यं गोळकम्, अक्षिणी इतीन्द्रियम्" इति व्याख्यातम् ।

९ क्रमसन्दर्भेऽप्युक्तम्—"तीर्थानामागमानाम्" इति । वल्लभस्तु "तीर्थानां गङ्गादीनाम्" इत्याह । अनन्ततीर्थास्तूभयथाऽपि याचक्षते—"तीर्थानां शास्त्राणां गङ्गादितीर्थानां च" इति । तत्र बीजं मृग्यम् ।

रोमाण्युद्भिजजातीनां[१] यैर्वा यज्ञस्तु सम्भृतः ।
केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम् ॥ ५ ॥

"याज्ञिका रोममूलस्था रोमान्तस्थास्तु तत्परे । उद्भिजो[२] वासुदेवस्य लिङ्गगास्तु[३] जरायुजाः" इति पाद्मे । "हरेः श्मश्र्वाश्रया [४]विद्युच्छिलालोहा नखाश्रयाः[५]" इत्याग्नेये ॥ * ॥

बाहवो लोकपालानां प्रायशः क्षेमकर्मणाम्[६] ।
विक्रमो भूर्भुवस्स्वश्च क्षेमस्य शरणस्य च ।
सर्वकामवरस्यापि[७] हरेश्चरणमास्पदम्[८] ॥ ६ ॥

ब्राह्मणवैश्यादीन् वर्जयितुं प्रायश इति ।

"मोक्षः शान्तिश्च शरणं निर्वाणं चाभिधीयते" इति ब्राह्मे । "भेजे खगेन्द्रध्वजपाद-मूलम्" इति च[९] । "स्वोत्पत्त्यङ्गेषु देवानामन्येषां पादमूलतः । मुक्तिस्तु विहिता विष्णोर्निर्दिष्टेषु यथावचः" इत्यध्यात्मे ॥ * ॥

धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च ।
विज्ञानस्य च तत्त्वस्य[१०] परस्याऽऽत्मा परायणम् ॥ ११ ॥

"कुमारब्रह्मरुद्राद्या हरेर्मध्यात् समुद्गताः[११]" इति वामने । "आत्मेति मध्यदेहश्च सर्व-देहोऽपि वा भवेत् । मनो बुद्धिरहङ्कारश्चित्तं जीवश्च कथ्यते । अथवा स्वयमेवेति वायु-र्ब्रह्माऽपि वा भवेत्[१२] । मुख्यतो ब्रह्म परममात्मशब्देन भण्यते" इति नाममहोदधौ । "देहेन्द्रियादिभेदेन निर्भेदोऽपि हरिः स्वयम् । भण्यते केवलैश्वर्यादनाद्यानन्दचिद्-घनः" इति गारुडे ॥ * ॥

---

१ "उद्भिज्जजातीनाम्" इत्यर्वाचीनः पाठः । उद्भिद्य जायन्त इत्युद्भिज उद्भिजा वा । पृषोदरादित्वाद् वर्णलोपः ।

२ "उद्भिदो—" इति प्र. पाठः । ३ "लिङ्गजास्तु" इति क्वचित् ।

४ वल्लभोऽप्याह—"विद्युतां श्मश्रूणि । हिरण्यश्मश्रुत्वात्" इति ।

५ "–लोहाश्रया नखाः" इति क्वचित् । शिलाः लोहाश्च । शिलारूपा लोहा इति वेति प्राचीनम् । "केशान् विदुरम्बुवाहान्" इति पूर्वमेवोक्तत्वादवशिष्टयोरेव प्रमाणोदाहरणम् ।

६ "प्रायशः क्षेमकर्मणां प्रजापालनकर्मवतां लोकपालानामिन्द्रादीनां राज्ञां च । आस्पदमुत्पादक आश्रयश्च । प्रायश इति प्रायःशब्दः किञ्चित्प्रजापालनकर्तॄन् ब्राह्मणवैश्यशूद्रान् वर्जयितुम्" इति प्राचीनटीका ।

७ "क्षेमस्य पालनादेः, शरणस्य मोक्षस्य, काम्यन्त इति कामाः, तेषु वरस्य आनन्दस्य" इति यादवेन्द्रतीर्थाः ।

८ "चरण आस्पदम्" इति पाठान्तरम् । ९ क्वचित् "च" कारो न पठ्यते ।

१० "सत्त्वस्य" इत्यौत्तरेयः पाठः । "विज्ञानतत्त्वस्य तन्नियामिकायाः सरस्वत्याश्च" इति प्राचीनटीका ।

११ "समुत्थिताः" इति क्वचित् । १२ "ब्रह्मेति वा भवेत्" इति क्वचित् ।

सर्वं पुरुष[१] एवेदं भूतं भव्यं भवच्च यत् ।
तेनेदमावृतं विश्वं वितस्तिमधितिष्ठता[२] ॥ १५ ॥

"सर्वं पुरुष एवेति भण्यते भेदवज्जगत् । तदधीनं तु सत्तादि यतो ह्यस्य सदा भवेत्" इति ब्रह्मतर्के । "वितस्तिमात्रं हृदयमास्थाय व्याप्नुते जगत्" इति गारुडे[३] ॥ * ॥

स्वधिष्ण्यं प्रतपन् प्राणो[४] बहिश्च प्रतपत्यसौ ।
एवं विराजं प्रतपंस्तपत्यन्तर्बहिः पुमान् ॥ १६ ॥

"पश्यन् स्वधिष्ण्यं देहं स बहिष्ठान् विषयानपि । एवमण्डान्तरं पश्यन् बहिः सर्वं च पश्यति[५]" इति वामने[६] ॥ * ॥

सोऽमृतस्याभयस्येशो मर्त्यमन्नं[७] यदत्यगात् ।
महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः ॥ १७ ॥

"अव्यक्तमात्मनोऽन्नं च महदादि विनाशि च । यदतीतः परो विष्णुः स एवातो विमोक्षदः" इति नारदीये ॥ * ॥

पादोऽस्य सर्वभूतानि पुंसः स्थितिविदो विदुः[८] ।
अमृतं क्षेममभयं[९] त्रिमूर्ध्नोऽधायि मूर्धसु ॥ १८ ॥

---

१ "पुरुष एव पुरुषाधीनमित्यर्थः" इति प्राचीनम् । वादिराजतीर्थाः "सर्वं पुरुषे स्थितम्" इति सप्तमीमाहुः ।

२ "–तिष्ठति" इत्यर्वाचीनः पाठः । "वितस्तिं नाभेर्द्वादशाङ्गुलोपरिस्थितं हृदयमधितिष्ठता तेन पुरुषेण वासुदेवेन वा इदं विश्वमावृतं व्याप्तम्" इति प्राचीनम् ।

३ "इति च गारुडे" इति क्वचित् ।

४ "असौ प्राणः हृदयादिषु स्थित्वा सर्वव्यापारकर्ता पुरुषः स्वधिष्ण्यं स्वाधिष्ठितं देहं तदन्तस्थं च प्रतपन्, तप आलोचने, जानन्" इत्यादि प्राचीनटीका ।

५ "सर्वं प्रपश्यति" इति क्वचित् ।

६ "इति हि वामने" इति क्वचित् ।

७ अत्र द्वेधा योजना भवति—अन्नमदनीयं मर्त्यं महदहङ्कारादि यतोऽत्यगात् अतोऽमृतत्वस्येश इत्येका । मर्त्यं मरणशीलं महदहङ्कारादि क्षरम्, अन्नं भगवद्भोग्यमक्षरं श्रीतत्त्वं च यतोऽत्यगादित्यपरा । समतीतक्षराक्षर इति यावत् । आद्याऽनन्ततीर्थीया । तथाहि तद्व्याख्या—"मर्त्यं देहनाशादिना विनाशिनम्, अन्नं अद्यत्वात् संहार्यत्वादन्नसञ्ज्ञं महदादितत्त्वाभिमानिनं सर्वजीवसमुदायं अनाद्यनन्तकालतोऽत्यगात्" इति । द्वितीया यादवेन्द्रतीर्थीया । तथाहि तद्वचनम्—"मर्त्यं मरणोपेतं महदादि, अन्नं भोग्यं चित्प्रकृतिं (च) अत्यगात् सर्वसामर्थ्यैः अतिक्रान्तः तेभ्यः उत्तमः" इति । "अव्यक्तमात्मनोऽन्नम्" इति भाष्यं चात्रानुकूलं भवति ।

८ "पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः" इत्यर्वाचीनः पाठः । "पादोऽस्य सर्वा भूतानि" इत्यनन्ततीर्थाभिमतः पाठः । "स्थितिविदः सर्वपदार्थानां याथात्म्यविदः ज्ञानिनः, सर्वा सर्वाणि भूतानि जीवाः अस्य पुंसः परमपुरुषस्य पादः भिन्नांश इति विदुः" इति हि तद्व्याख्यानम् ।

९ "अमृताख्यः (अनन्तासनः) अनन्तासने तिष्ठति । क्षेमाख्यो वैकुण्ठो वैकुण्ठे । अभयाख्यः पद्मनाभः क्षीराब्धौ" इत्यनन्ततीर्थाः । "अमृतमनन्तासनम् । क्षेममिति वैकुण्ठः । अभयमिति श्वेतद्वीपः" इति यादवेन्द्रतीर्थाः ।

"स्वरूपांशो विभिन्नांश इति द्वेधांऽश इष्यते । अनन्तासनवैकुण्ठपद्मनाभाः स्वयं हरिः । जीवा इमे विभिन्नांशा धर्माधर्मादिसंयुताः" इति वामने ।

सर्वस्य यथावत् स्थितिविदः ।

"त्रिमूर्द्धा सन् हरिर्धत्ते द्युत्रयं मूर्द्धभिस्त्रिभिः । अनन्तासनवैकुण्ठनारायणपुराणि तु । बहुलक्षोच्छ्रितेष्वेषु स वसत्यमृतो हरिः" इति मात्स्ये ॥ * ॥

पादास्त्रयो बहिस्त्वासन्नप्रजानां य आश्रयाः[1] ।
[2]अन्तस्त्रिलोक्यास्त्वपरो गृहमेधैर्बृहद्धुतः[3] ॥ १९ ॥

"अनन्तासनवैकुण्ठनारायणपुराणि तु । त्रीणि धामानि वै विष्णोस्त्रिलोकाद् बहिरेव हि[4] । अदायदास्तु पुत्राणामुद्रिक्तज्ञानचक्षुषः । नारायणपरा देवा एव[5] तान्याप्नुवन्ति च । स एवान्यस्वरूपेण शक्रलोकसमीपगः । इज्यो यज्ञपुमान्नाम ज्ञानिनां गृहिणां पदम् । यतीनां ध्रुवलोकस्थो वनिनां[6] मेरुमद्ध्यगः । आदित्यमण्डलस्थस्तु ज्ञानिनां ब्रह्मचारिणाम्" इति ब्रह्माण्डे ॥ * ॥

सृती विचक्रमे विष्वक्[7] साशनानशने उभे ।
यदविद्या च विद्या च पुरुषस्तूभयाश्रयः[8] ॥ २० ॥

"त्रिपात् स एव भगवान् सर्वप्राणिषु संस्थितः[9] । निरन्नेषु सुविद्वत्सु[10] त्रिदशेष्वितरेषु च" इत्यध्यात्मे ॥ * ॥

---

१ "बहिश्चाऽसन्नप्रजानां य आश्रमाः" इति प्र. पाठः ।

२ "अन्तस्त्रिलोक्याम्" इति प्राचीनकोशेषु पाठान्तरम् ।

३ "गृहमेधोऽबृहद्व्रतः" इत्यर्वाचीनः पाठः । "त्रिमूर्ध्नोऽपरः मूर्तिविशेषः त्रिलोक्या अन्तः स्थितः सन्, गृहमेधैः, उपलक्षणमिदम्, तत्तदाश्रमस्थैः, स्वयं बृहदपि पूर्णोऽपीत्यर्थः, हुतः यथोचितं पूजाविषयः" इति प्राचीनटीका।

४ "बहिरेव तु" इति प्र. पाठः । ५ "एवम्" इति क्वचित् प्र. पाठः ।

६ "वर्णिनाम्" इति क्वचित् पाठः प्रामादिकः ।

७ "विष्वङ्" इति पाठन्तरम् ।

८ "अविद्या विद्या चेति ये वर्तेते तदुभयाश्रयः, उभयप्रवर्तक इत्यर्थः, पुरुषः साशनानि अन्नसहितानि, असुरा मनुष्याः, अनशनानि अशनरहितानि देवाः, उभे सृती तदुभयरूपमार्गौ सुखदुःखप्रापकौ विचक्रमे ज्ञानाज्ञानादिदानार्थं अन्तर्यामिरूपैः सर्वान् प्रविष्ट इत्यर्थः" इति प्राचीनटीका । "उभयाश्रयः देवमनुष्याख्योभयजात्याश्रयः । अज्ञानरूपत्वादविद्या मनुष्यजातिः । विद्या ज्ञानरूपत्वाद्देवजातिः" इत्यनन्ततीर्थाः ।

९ "सर्वप्राणिषु च स्थितः" इति क्वचित् ।

१० "निरन्नेषु च विद्वत्सु" इति प्र. पाठः । "निरन्नेषु तु विद्वत्सु" इति क्वचित् ।

तस्मादण्डाद्[१] विराड् जज्ञे भूतेन्द्रियगुणाश्रयः[२] ।
तद् द्रव्यमत्यगाद् विश्वं गोभिः सूर्य इवाऽऽश्रयम्[३] ॥ २१ ॥

यदाऽस्य [४]नाभ्यां नळिनादहमासं महात्मनः ।
नाविदं यज्ञसम्भारान् पुरुषावयवादृते[५] ॥ २२ ॥

"तस्माद्धरेरण्डमभूदण्डादपि चतुर्मुखः । स विराण्णामकस्तस्मादधिको हरिरेव तु[६] । अण्डाज्जातस्य तस्यान्यद् रूपं पश्चादभूद्धरेः । तथोभयात्मको जज्ञे[७] ब्रह्मा लोकपितामहः । तदैव सोऽतिरिक्तोऽभूत् शर्वपूर्वापराज्जनात्[८] । त्रिलोकस्थादसौ[९] विष्णुमयजश्च समाहितः । तद्रूपभूतांस्त्रीन् लोकान् पशून् कृत्वा महामनाः" इति गारुडे ॥ * ॥

नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च ।
देवतानुक्रमः[१०] कल्पः सङ्कल्पः सूत्रमेव च[११] ॥ २५ ॥

सूत्रं मीमांसासूत्रम् ॥ * ॥

---

१ "यस्मादण्डम्" इत्यर्वाचीनः पाठः । "यस्मादण्डात्" इति केचित् पठन्ति ।

२ "–गुणात्मकः" इत्यर्वाचीनः पाठः ।

३ "इवातपन्" इत्यर्वाचीनः पाठः । "इवाऽश्रयः" इति यादवेन्द्रतीर्थाभिमतः पाठः । तथाहि तद्व्याख्यानम्— "अण्डात् अण्डरूपात् तस्मात् विराट्परमपुरुषात् भूतेन्द्रियगुणाः शब्दादयः तदाश्रयः विराड् ब्रह्मा जज्ञे । तत् स विरिञ्चः द्रव्यं तामसानि भूतानि अत्यगात् । भूतलक्षणज्ञानावरणरहितोऽभूदिति भावः । अतः गोभिः ज्ञानलक्षणप्रकाशैः विश्वं जीवजातं अत्यगात् । सूर्य इव विश्वस्याऽऽश्रयश्च" इति । "भूतेन्द्रियगुणाश्रयः पृथिव्यादिभूतानां एकादशेन्द्रियाणां शब्दादिगुणानां तदभिमानिदेवानां सर्वजीवानां चाऽश्रयः । स जातस्तदैव तत् द्रव्यं शर्वादिसर्वजगत् अत्यगात् । कथमिव? गोभिः रश्मिभिः स्वस्याऽऽश्रयमन्तरिक्षमिव" इत्यनन्ततीर्थाः ।

४ "नाभ्या नलिनात्" इति वल्लभः पठति । "नाभ्यान्नळिनात्" इति प्राचीनः संहितापाठः । तस्य च द्वेधा पदविभागो भवति—नाभ्यां नळिनात् इति, नाभ्यात् नळिनात् इति च । आद्यः पक्षः यादवेन्द्रतीर्थादिसम्मतः । द्वितीयः श्रीधरादिपरिगृहीतः । "परमात्मनः नाभ्यां स्थितात्" इति यादवेन्द्रतीर्थाः । "नाभ्यां जातान्नळिनात्" इत्यनन्ततीर्थाः ।

५ "पुरुषावयवान्नृते" इति पाठान्तरम् । "पुरुषावयवात् पुरुषावयवेभ्यः समुत्पन्नान् ग्रीष्मवसन्तादीन् कालावयवविशेषान्नृते" इत्यनन्ततीर्थाः । "पुरुषावयवान् विनाऽन्यत्र यज्ञोपयुक्तार्थान् नाविदं नाज्ञासिषम्" इति यादवेन्द्रतीर्थाः ।

६ "स विराण् नामतस्तस्मादधिको हरिरेव वा" इति क्वचित् पठ्यते ।

७ "यदोभयात्मको जज्ञे" इति प्र. पाठः । "तदोभयात्मको जज्ञे" इति च पाठान्तरम् ।

८ "शर्वपूर्वपरात्" इति प्र. पाठः । "सर्वपूर्वापरात्" इति च कोशेषु पाठान्तरम् ।

९ "त्रिलोकस्थानगं विष्णुम्" इति प्र. पाठः । "त्रिलोकस्थानगाद् विष्णुम्" इति क्वचित् ।

१० देवता अनुक्रमः इति भिन्ने पदे इति यादवेन्द्रतीर्थाः । समस्तमित्यनन्ततीर्थाः ।

११ "तन्त्रमेव च" इति प्र. पाठः । "अग्निरिन्द्र इत्यादिनामधेयानि । अश्वमेध इत्यादीनि च । मन्त्राः द्रव्यदेव-

नारायणे भगवति तदिदं विश्वमाहितम् ।
गृहीतमायोरुगुणे सर्गादावगुणे स्वतः[१] ॥ ३० ॥

यस्मात् तमेवायजंस्तस्मादिदं तस्मिन्नेवाऽहितम्[२] ।

"नित्यं गृहीताः सत्त्वाद्या जीववज्जडवन्नतु । मिथ्यामानात् स्वरूपत्वात् स्वातन्त्र्याद् बहिरेव तु" इति ब्रह्मतर्के ॥ * ॥

इति तेऽभिहितं तात यथेदमनुपृच्छसि[३] ।
नान्यद् भगवतः किञ्चिद् भाव्यं[४] सदसदात्मकम् ॥ ३२ ॥

"सदिति व्यक्तमुद्दिष्टमसद्व्यक्तमुच्यते[५] । गम्यागम्यस्वरूपत्वात् तत्सत्तादि हरेर्यतः[६] । अतस्तस्मादन्यदेव ह्यनन्यदिति भण्यते" इति च ॥ * ॥

नतोऽस्म्यहं तच्चरणं[७] समीयुषां
भवच्छिदं स्वस्त्ययनं सुमङ्गलम् ।

ताप्रकाशकाः 'इन्द्राय सुतमाजुहोमि' इत्यादिकाः । व्रतानि ब्रह्मचर्यपयोव्रतमौनादीनि । इज्यदेवताः इन्द्रविष्ण्वादयः । अनुक्रमः अनुष्ठानक्रमः पाठक्रमश्च । देवतानुक्रमो देवतामीमांसाशास्त्रं वा । कल्पः कल्पसूत्रम् । विष्णुप्रीत्यर्थमनेन यक्ष्य इति सङ्कल्पः । फलसङ्कल्पविधानं वा । सूत्रं ब्रह्मसूत्रम्" इति प्राचीनम् ।

१ "गृहीतमायोरुगुणः सर्गादावगुणः स्वतः" इत्यर्वाचीनः पाठः ।

२ "तस्मिन्नाहितम्" इति प्र. पाठः । एतेन मूले तदित्यव्ययस्य तस्मादिति तस्मिन्निति चार्थद्वयमुक्तं भवति । तथाहि यादवेन्द्रतीर्थाः—"तत् तस्मिन् भगवति इदं यजनादितत्पूजासाधनं विश्वं कर्त्रा च मया सहितं आहितम्" इति । अत्र "यस्मात् तमेवायजं तस्मादिदम्—" इत्यादि विजयध्वजतीर्थसम्मतः पाठः । अयजन्निति पाठे तु न केवलमहं किन्तु मन्वाद्याश्च यस्मात् तमेवायजन् इति भाष्ययोजना । अव्यवहितपूर्वश्लोके मन्वादिप्रस्तावादनुवृत्तिलाघवायायजन्निति बहुवचननिर्देशः ।

३ "यद् यथा अनुपृच्छसि तत् तथा, प्रश्नोत्तरयोः सामानाधिकरण्यमनुल्लङ्घ्येत्यर्थः, अथवा यथा यथावदेव, वञ्चनां विनेत्यर्थः, अभिहितम्" इति प्राचीनम् ।

४ "भाव्यं पुरुषव्यापारविषयः, भाव्यं प्रमेयमिति वा, सत्ताद्युपेतमित्यर्थः" इति यादवेन्द्रतीर्थाः । "भगवतो नारायणात् अन्यत् तदनधीनत्वेन वर्तमानं न भाव्यं न निरूपणीयम्" इति त्वनन्ततीर्थाः ।

५ "सत् व्यक्तं ब्रह्माण्डतदन्तर्गतम्, असत् अव्यक्तं बहिष्ठं महदादि । अथवा सत् प्रत्यक्षं तेजोबन्नानि, असत् अप्रत्यक्षं आकाशवायू" इति प्राचीनम् ।

६ "तत्सत्तादिर्हि हरेर्यतः" इति प्र. पाठः ।

७ चरणं नतोऽस्मि इति स्वरसप्रतीतोऽर्थः । तत् चरणं इति भिन्ने पदे इति कृत्वाऽन्योऽप्यर्थः प्राचीनटीकायाम्— "यत् स्वस्त्ययनं क्षेमाश्रयः, सौख्यप्रापकमित्यर्थः, सुमङ्गलं परमशोभनं तत् चरणं समीयुषां भजतां भवच्छिदं तं नतोऽस्मि" इत्यादि ।

13

य:[१] स्वात्ममायाविभवं स्वयं गतो
नाहं नभस्वांस्तमथापरे कुतः[२] ॥ ३५ ॥

"सर्वजीवनिकायेषु ब्रह्मवायू हरेर्विदौ । नचान्यस्तादृशो वेत्ता यावद् वेत्ति हरिः स्वयम् । तावत् तावपि नो विष्णुं जानीतो लोकवन्दितौ" इति ब्रह्माण्डे ॥ * ॥

स एष आद्यः पुरुषः कल्पेकल्पे सृजत्यजः ।
आत्माऽऽत्मन्यात्मनाऽऽत्मानं[३] स संयच्छति पाति च[४] ॥ ३८ ॥

"स्वयमेव स्वरूपाणि मत्स्यकूर्मादिकान्यजः । स्वात्मन्येवेच्छया सृष्ट्वा तैर्देवादीन् प्रपात्यसौ । संयच्छत्यसुरान् विष्णुः कल्पेकल्पे जगत्प्रभुः । तिरोहितं स्वरूपं तु[५] प्रकाशयति शास्त्रतः[६]" इति भागवततन्त्रे ॥ * ॥

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितम् ।
सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम्[७] ॥ ३९ ॥

ऋतं विन्दन्ति[८] मुनयः प्रशान्तात्मेद्रियाशयाः ।
यदा तदैवासत्तर्कैस्तिरोधीयेत विप्लुतम्[९] ॥ ४० ॥

---

१ "यो ह्यात्ममाया—" इत्यादि यादवेन्द्रतीर्थाभिमतः पाठ इति भाति– "आत्ममायया स्वशक्तिभिः विभवं विविधमूर्तिभिरवस्थानं अहं न गतः, नभस्वान् वायुः न गतः, अथापरे कुतो जानीयुः, यः स्वयं गतः जानाति तं नतोऽस्मि" इति तद्वचनात् ।

२ "यो ह्यात्ममायाविभवं स्म पर्यगाद् यथा नभः स्वान्तमथापरे कुतः" इत्यर्वाचीनः पाठः ।

३ "आत्मन्येवाऽत्मनाऽऽत्मानं" इति प्रतनकोशेषु पठ्यते । परन्तु न क्वापि व्याख्याने प्रतनेऽर्वाक्तने वाऽयं पाठः समादृतः । "स्वयमेव स्वरूपाणि" इति भाष्योदाहृतं प्रमाणवचनं च "आत्माऽऽत्मनि–" इति पाठस्यैवानुगुणम् । "स एष आद्यः पुरुषः आत्मा स्वयमेव आत्मनि स्वाधारे आत्मना स्वेच्छया आत्मानं स्वात्मानमेव मत्स्यकूर्माद्यवताररूपेण कल्पेकल्पे सृजति" इत्यनन्ततीर्थाः । " स महदादिस्रष्टा, एषः मम जनकः, आत्मा अनन्तकल्याणगुणः, कल्पेकल्पे इति वीप्सया तदन्यस्य न कदाऽपि सृष्टिपालनादिकर्तृत्वमिति ज्ञापयति । किमधिष्ठानमवलम्ब्य सृजति? आत्मनि स्वस्मिन् आधारे जगत् सृजति आत्मानं स्वावतारान् (च) सृजति । तैरवतारैः आत्मानं (आत्मीयं) साधुजीवजातं पाति, असाधुजीवान् संयच्छति निगृह्णाति च" इति प्राचीनटीकायामर्थान्तरम् ।

४ "संयच्छति च पाति च" इति चतुर्थचरणः क्वचित् पठ्यते ।

५ "स्वरूपं च" इति प्र. पाठः ।   ६ "शाश्वतः" इति क्वचित् प्र. पाठः प्रामादिकः ।

७ "निर्बाणं नित्यमद्वयम्" इत्यनन्ततीर्थाः पेठुः । "प्राकृतशरीररहितम्" इति च व्याचक्रुः । "निर्गुणं सत्त्वरजस्तमोगुणैरविकृतम्" इति यादवेन्द्रतीर्थाः ।

८ "ऋत्रे विदन्ति" इति प्र. पाठः । "ऋतं स्वविषयकम् । अतो न विषयपरतन्त्रमिति भावः" इति प्राचीनम् । "विन्दन्ति आपरोक्ष्येण दृष्ट्वा प्राप्नुवन्ति" इति च ।

९ "तदेवासत्तर्कैः–" इत्याद्यर्वाचीनः पाठः । अत्र यादवेन्द्रतीर्थीयेऽर्थविशेषः—"प्रशान्ताः परब्रह्मैकविषयाः

"ऋतं तदात्मना ज्ञप्तेः[१] सत्यं साधुत्वतः परम् । सम्यक् संस्थमदूष्यत्वाच्छुद्धं दोषोज्झितत्वतः । केवलं तादृशाभावात् प्रत्यगन्तरवस्थितेः । एतदेतादृशं तत्त्वं यो वेद स विमुच्यते" इति ब्रह्मतर्के ॥ * ॥

आद्योऽवतारः पुरुषः परस्य कालः[२] स्वभावः सदसन्मनश्च ।
द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु[३] भूम्नः ।
अहं भवो यज्ञ[४] इमे प्रजेशा दक्षादयो ये भवदादयश्च ॥ ४१ ॥

यत्किञ्च लोके भगवन्महस्वदोजःसहस्वद् बलवत् क्षमावत् ।
ह्रीश्रीविभूत्यात्मवदद्भुतार्णं तत्तत् पदं[५] रूपवदस्वरूपम्[६] ॥ ४४ ॥

"यः शेते प्रळये विष्णुः शून्यनामा महाकृतिः । स तु नारायणो नाम नराणामयनत्वतः । रूपं द्वितीयं भवति दीपाद् दीपान्तरं यथा । सिसृक्षोस्तस्य पुरुष इत्याहुस्तद् विदो जनाः । स रमाया[७] द्वितीये तु रूपे प्रकृतिसञ्ज्ञिते[८] । वीर्यमाधत्त पुरुषो महां-

---

आत्मा देहः, इन्द्रियं वाक्, आशयः मनः येषां ते, मुनयः यदा एभिर्गुणैरुपेतं ब्रह्म विन्दन्ति विदन्ति अपरोक्षतो जानन्ति तदा असत्तर्कैः, अस्ति चेदुपलभ्येत इत्यादितर्कैः विलुप्तं अन्तःकरणं तिरोधीयेत उपद्रवरहितं भवेत् । सात्विकस्वभावेन परमात्मन्येव सन्न्यस्तमनोवाक्कायानां ईश्वरस्वरूपावधारणेन सर्वभ्रान्तिनिवृत्तिरिति भावः" इति ।

१ आत्मना स्वत एव स्वविषयकतयेति यावत् ज्ञप्तेस्तद् ब्रह्मतत्त्वं ऋतमित्येकोऽर्थः । अयं यादवेन्द्रतीर्थाभिमतः । अत्र पक्षे तत् आत्मना ज्ञप्तेः इति पदविभागः । अर्थान्तरे च तदात्मना इत्येकं पदम् । तेनैव पूर्वावगतेन आत्मना रूपेण ज्ञप्तेर्ज्ञायमानत्वादिति चार्थः । अयमनन्ततीर्थाद्यभिमतः ।

२ "कालादिस्तत्सन्निधानमात्रेण तस्यावतार इत्युपचर्यते" इत्यनन्ततीर्थाः । शुकदेवोऽप्याह–"पुरुषादीनां स्वरूपतोऽभेदः । अन्येषां तत्पृथक्स्थितिप्रवृत्त्याद्यभावात् तज्जत्वादिना चाभेदः" इति । "कालः उत्पत्तिकालादिः । सर्वत्र चेतनाश्च ग्राह्याः । रूपवदस्वरूपमिति सर्वत्र सम्बन्धः । स्वभावः प्रकृतेः परिणामस्वभावः । चेतनस्य योग्यता वा" इति यादवेन्द्रतीर्थाः ।

३ "स्थास्नु स्थावरं वृक्षपर्वतादि, चरिष्णु जङ्गमं गङ्गादि" इति प्राचीनम् ।

४ "यज्ञोऽङ्गुष्ठाभिमानी कश्चिद् देवः" इत्यनन्ततीर्थाः । "यज्ञो रुद्रांशः" इति यादवेन्द्रतीर्थाः ।

५ "तत्त्वं परम्" इत्यर्वाचीनः पाठः । प्राचीनपाठे चात्र विकल्पः–'तत्तत् परम्' इत्येकः । 'तत्तत् पदम्' इत्यपरः । परमिति विजयध्वजतीर्थसम्मतः पाठः । "तत्तत् परं विशिष्टं सर्वं नारयणस्य रूपवत् प्रतिभावत्" इति तद्व्याख्यानात् । पदमिति यादवेन्द्रतीर्थाः । तथाहि तद्व्याख्यानम् –अद्भुतार्णं आश्चर्यसमुद्रं एवमादि यद्यदस्ति तत्तत् भूम्नः पूर्णस्वभावस्य पदं आवासस्थानम् । अस्वरूपमपि ईश्वरस्वरूपभिन्नमपि एतत्सर्वं रूपवद् भवति ईश्वरदेहवदेव भवति । ईश्वरस्य एष्ववस्थानात्" इति । "तथाऽप्येषु हरिः स्थितः" इति भाष्यं चात्रानुगुणम् । अनन्ततीर्थास्तूभयथाऽपि व्याचक्रुः—"तत्तत् परं विशिष्टं परस्य नारायणस्य रूपवत् प्रतिमावत् पदमधिष्ठानम् । अतः अस्वरूपं निजरूपं न भवति" इति ।

६ "रूपवतः स्वरूपम्" इति कश्चित् पपाठ ।

७ "रमायाम्" इति क्वचित् ।

८ "प्रकृतिसञ्ज्ञके" इति क्वचित् ।

स्तस्मादजायत । योऽसौ हिरण्यगर्भाख्यः पुरुषः सोऽपि भण्यते । श्रद्धेत्युक्ता हि[१] तत्पत्नी साऽपि प्रकृतिरुच्यते । प्रळये त्वशरीरौ तौ विभागेन व्यवस्थितौ । शरीरं प्राप्य पुरुषात् संयोगं तौ प्रचक्रतुः । ततः पुनर्महत्तत्त्वं प्रजातं जगदङ्कुरम् । स्वस्यैव पुत्रतां यातमहङ्कारस्ततोऽजनि" इति व्योमसंहितायाम् ।

पुरुष एवाऽद्योऽवतारः[२] । कालादयो रूपवत्, अस्वरूपमपि प्रियत्वात् ।

"पुरुषाद्या हरे रूपं ब्रह्माद्यास्तत्प्रियाः स्मृताः । स्वरूपभूता नैवैते तत्सन्निधियुता अपि" इति पाद्मे । "कालो वस्तुस्वभावश्च प्रकृतिः प्राण एव च । मनश्च पञ्च भूतानि विकारस्त्रिगुणा अपि[३] । न स्वरूपं हरेरेतत्[४] तथाऽप्येषु हरिः स्थितः" इति ब्राह्मे[५] ।

सत् प्राणः । "सदिति प्राणः" इति श्रुतेः ।

"द्रव्यं तु[६] पञ्च भूतानि विकारोऽण्डमुदाहृतम्[७] । विराजं गरुडं प्राहुः स्वराळिन्द्र[८] उदाहृतः" इति षाड्गुण्ये । "सर्वं तु रूपवद् विष्णोर्विशेषेण तु भूतिमत्[९] । अतिप्रियत्वान्नैवैतत् स्वरूपमपि भण्यते" इति स्कान्दे । "[१०]यज्ञशब्दोदितौ द्वौ तु देवौ लोकपुरस्कृतौ[११] । एको नारायणस्तत्र रुद्रच्छिन्नस्तथाऽपरः । स तु यज्ञाभिमानी स्यात् तत्पतिः केशवः स्मृतः" इति पाद्मे । "स्वतो महत्त्वं तु महो विशेषप्रातिशक्तिता[१२] । विभूतिर्लक्षणोन्नाहो लक्ष्मीशब्देन भण्यते" इति ब्रह्मतर्के ॥ * ॥

प्राधान्यतो यानृषय आमनन्ति[१३]
लीलावतारान् पुरुषस्य भूम्नः ।

---

१ "श्रद्धेत्युक्ता तु" इति प्र. पाठः ।

२ "पुरुषस्तस्यैवाऽद्योऽवतारः" इति प्र. पाठः । "पुरुष आद्योऽवतारः" इति क्वचित् कोशे ।

३ "विकारास्त्रिगुणा अपि" इति च क्वचित् प्राचीनकोशेषु पठ्यते ।

४ "हरेरेते" इति, "हरेरेव" इति च क्वचित् ।

५ "इति पाद्मे" इति क्वचित् प्र. पाठः सम्पातायातो भवेत् ।

६ "द्रव्यं च" इति क्वचित् । ७ "विकारोऽण्डमुदाहृतः" इति क्वचित् ।

८ "स्वराडिन्द्र" इति प्र. पाठः । छन्दसि तु डकारस्य ळकारः । "अजमध्यस्थडकारस्य ळकारं बह्वृचा जगुः" इति श्रवणात् । एतेन यत् क्वचित् 'षाळ्गुण्ये' इति पठ्यते सा भ्रान्तिरेव ।

९ "विशेषेण विभूतिमत्" इति प्र. पाठः ।

१० इतः परं "इति पाद्मे" इति यावत् श्लोकद्वयं प्र. पाठेऽत्र न पठ्यते । किन्तु अध्यायान्ते "इति व्योमसंहितायाम्" इत्यतः परम् । क्वचित् कोशेषु च तथा ।

११ "लोके पुरस्कृतौ" इति क्वचित् ।

१२ "–शक्तता" इति क्वचित् ।

३१ "यानृत्र आमनन्ति" इत्यर्वाचीनः पाठः । प्रा. पाठे एकाक्षराधिकः पादः ।

आपीयतां [1]कर्मकषायशोषा-
ननुक्रमिष्ये त इमान् सुपेशलान्[2] ॥ ४५ ॥

"प्रधानत्वेन सर्वेषां मत्स्यकूर्मादयो हरेः । अवताराः श्रुतौ ख्याताः स एवैते ततः स्मृताः । न स्वरूपं तु ब्रह्माद्याः स्मृता मायाविभूतयः । स्वेच्छयैषां विशिष्टत्वं कुरुते तत् तथा स्मृताः[3]" इति व्योमसंहितायाम् ॥ * ॥

इति द्वितीयस्कन्धे षष्ठोऽध्यायः

जातो रुचेरजनयत् सुयशाः[4] सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायाम् ।
लोकत्रयस्य महतीमहरद् य आर्तिं[5] स्वायम्भुवेन मनुना हरिरित्यनूक्तः ॥ २ ॥

"क्रियाभिमानाद्[6] यज्ञोऽसाविन्द्रसूनुः प्रकीर्तितः । यज्ञेशत्वात् स्वयं विष्णुर्यज्ञो रुचिसुतः स्मृतः" इति पाद्मे ।

हरिरिति ज्ञात्वा ईशावास्यमित्यादिनाऽनूक्तः ।

"त्रयी श्रुतिर्नित्यवाक् च[7] वेदोऽनुवचनं तथा" इति ह्यभिधानम्[8] ॥ * ॥

अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो दत्तो मयाऽहमिति यद् भगवान् स दत्तः ।
यत्पादपङ्कजपरागपवित्रदेहा योगर्द्धिमापुरमयीं[9] यदुहैहयाद्याः[10] ॥ ४ ॥

अमयीं विष्णुप्रधानाम् ॥ * ॥

---

१ "कर्णकषाय—" इत्यर्वाचीनः पाठः ।

२ "सुपेशान्" इत्यर्वाचीनः पाठः । "आपीयतां स्वविषयकथामृतं पिबताम्, कर्मकषायशोषान्, कषायः विषजलम्, पापकर्माख्यं विषजलं तस्य शोषो शोषणं यैस्ते तान्, प्राधान्यतः प्रधानान्, सुपेशालान् मनःसन्तोषकरान्, भूम्नः पुरुषस्य लीलावतारान् ऋषय आमनन्ति, ये ऋषीणां प्रवचनविषया इति भावः । यान् प्राधान्यतः सर्वलोकप्रधानत्वेन ऋषयः आमनन्ति उपदिशन्तीति वा । तान् अवतारान्, प्राधान्यतः प्रधानान्, दशावतारादीनिति भावः, इमान् लोकरक्षान् ते तुभ्यं अनुक्रमिष्ये क्रमेण कथयामि । त्वया आपीयतामिति वा । प्राधान्यतः प्राधान्येन स्थितान् अन्तर्यामिविभूतिविलक्षणानित्यर्थः" इति प्राचीनटीका ।

३ "स्मृतः" इति प्र. पाठः प्रामादिकः ।

४ "सुयमान्" इत्यर्वाचीनः पाठः ।

५ "यदार्तिम्" इत्यर्वाचीनः पाठः ।

६ "क्रियाभिमानी" इति क्वचित् ।

७ "नित्यवाक्यम्" इति क्वचित् ।

८ "इत्यभिधानम्" इति च कोशेषु । "इत्यभिधाने" इति च क्वचित् ।

९ "योगर्द्धिमापुरुभयीम्" इत्यर्वाचीनः पाठः । "अमयीं विष्णुप्रधानां मुख्यतो विष्णुसम्बन्धिनीं योगर्द्धिं योगप्राप्यमणिमाद्यैश्वर्यं आपुः" इति यादवेन्द्रतीर्थाः । "अमयीं विष्णोः प्राधान्यप्रतिपादिकां योगर्द्धिं ज्ञानसम्पदम्" इत्यनन्ततीर्थाः ।

१० यत् उ हैहयाद्याः इति पदत्रयमिति केचित् ।

तप्तं तपो विविधलोकसिसृक्षया मे
आदौ सनात् सुतपसस्तपतः स नोऽभूत्[१] ।
प्राक्कल्पसम्प्लवविनष्टमिहाऽऽत्मतत्त्वं
सम्यग् जगाद मुनयो यदचक्षताऽऽत्मन्[२] ॥ ५ ॥

मे तपतः सतः । सः नः अर्थे । सनात् पूर्वम् ।

"ब्रह्मणस्तपतः पूर्वं विष्णुर्जात उरुक्रमः । सर्वलोकहितार्थाय येन रूपं प्रकाशितम् । यश्च पाति सदा लोकानजितो जयतां वरः । तस्माद् रुद्रः समुत्पन्नः सर्वसंहारकृद् विभुः । एते त्रिपुरुषाः प्रोक्ताः सृष्टिस्थित्यन्तकारिणः । निमित्तमात्रं तौ देवौ विष्णुः सर्वस्य कारणम्" इति स्कान्दे ॥ * ॥

धर्मस्य दक्षदुहितर्यजनि स्वमूर्त्यां[३] नारायणो नर इति स्वतपःप्रभावः[४] ।
दृष्टात्मनो[५] भगवतो नियमावलोपं देव्यस्त्वनङ्गपृतना घटितुं न शेकुः ॥ ६ ॥

"नरो नारायणश्चैव हरिः कृष्णस्तथैव च । चत्वारो धर्मतनया हरिरेव त्रयो मताः[६] । अनन्तो नरनामाऽत्र तस्मिंस्तु नरनामवान् । विशेषेण स्वयं विष्णुर्निवसत्यम्बुजेक्षणः । तस्माच्चतुर्द्धा धर्मस्य जातो विष्णुरितीर्यते[७]" इति षाड्गुण्ये ॥ * ॥

विद्धः सपत्न्युदितपत्रिभिरन्ति राज्ञो
बालोऽपि सन्नुपगतस्तपसे वनाय[८] ।
तस्मा अदाद् ध्रुवगतिं गृणते प्रसन्नो
दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात् ॥ ८ ॥

---

१ "स्वतपसः स चतुःसनोऽभूत्" इत्यर्वाचीनः पाठः ।

२ "अदौ पूर्वं मे मया विविधलोकसृष्टीच्छया तपस्तप्तम् । एवं सुतपसः शोभनतपोयुक्तस्य मे तपस्तपतः कुर्वतः सतः सनात् सनकाद्युत्पत्तेरप्यादौ पूर्वमेव सः भगवान् नः अस्मदर्थे विष्णुरूपेणावततार । प्राक्कल्पस्य सम्प्लवे प्रळये विनष्टं तिरोभूतमात्मतत्त्वं मम जगाद इह सज्जने च जगाद । मुनयः सर्वज्ञाः यत् तत्त्वमात्मन् हृदयकर्णिकायामचक्षतापश्यन्" इति प्राचीनटीका ।

३ "–दुहितर्यजनिष्ट मूर्त्याम्" इति प्र. पाठः । "–दुहितर्यभवत् स मूर्त्याम्" इति क्वचित् ।

४ "स्वतपः स्वविषयज्ञानरूपः प्रभावरूपश्च" इति प्राचीनम् । "स्वरूपभूतज्ञानात्मकसामर्थ्यस्वरूपः" इति च ।

५ "दृष्ट्वाऽऽत्मानः" इति प्र. पाठः । "दृष्टात्मनः नित्यव्यक्तचिदात्मनः, स्वैर्ज्ञातात्मनः इति वा" इति प्राचीनम् ।

६ "मतः" इति प्र. पाठः ।

७ "विष्णुरितीरितः" इति प्र. पाठः ।

८ "वनानि" इत्यर्वाचीनः पाठः ।

"अवतारो महाविष्णोर्वासुदेव इतीरितः[१] । यो ध्रुवाय निजं प्रादात् स्थानमन्यानधिष्ठितम्" इति प्रकाशसंहितायाम् ॥ * ॥

यद् वेनमुत्पथगतं[२] द्विजवाक्यवज्र-
निष्पिष्टपौरुषभगं[३] निरये पतन्तम् ।
ज्ञात्वाऽर्थितो[४] जगति पुत्रपदं च लेभे
दुग्धा वसूनि वसुधा सकलानि येन ॥ ९ ॥

"पृथुर्नाम महाराजस्तत्र विष्णुः स्वयं प्रभुः । पृथुनामा चतुर्बाहुः प्रविष्टस्तेन हेतुना[५]" इति महासंहितायाम् ॥ * ॥

नाभेरसावृषभ आस सुदेविसूनु-
र्यो वै चचार समदृग्घृदि योगचर्याम्[६] ।
यत् पारमहंस्यमृषयः पदमामनन्ति
स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः[७] ॥ १० ॥

यद् रूपं परमहंसप्राप्यमामनन्ति[८] ॥ * ॥

---

१ जीवगोस्वामी चाऽह–"श्रीवासुदेव एवायं ध्रुवार्थमवतीर्णः । तस्य द्वादशाक्षरविद्योपासकत्वात्" इति । रूपगोस्वामिप्रभृतयस्तु पृश्निगर्भाख्योऽयमवतार इत्याहुः ।

२ "वेनं यदुत्पथगतम्" इति यादवेन्द्रतीर्थसम्मतः पाठ इति भाति । "यदुत्पथगतं येषां निरीश्वरवादिनां उत्पथः स्वातिरिक्तेश्वरापलापः तं गतम्" इति तद्व्याख्यानम् । अत्रौत्तरेयास्तु केचित् "वेनम्" इति वक्तव्ये "वेणम्" इति मूर्धन्यान्तं नाम पठन्ति ।

३ "–विप्लुष्टपौरुषभगम्" इति प्र. पाठः ।

४ "त्रात्वाऽर्थितः" इत्यर्वाचीनाः पठन्ति ।

५ "प्रविष्टस्तेन चार्थितः" इति प्र. पाठः । प्रा. पाठे तत्र राज्ञि पृथुनामा विष्णुः प्रविष्ट इति यत् तेन हेतुना पृथुर्विष्णोरवतार इति पुराणेषूच्यते । अनन्ततीर्थीये चैवं पाठः ।

६ "समदृक् जडयोगचर्याम्" इत्यर्वाचीनः पाठः । "हृदि योगचर्यां ध्यानं चचार" इति प्राचीनटीका । "सर्वेषां हृदि अन्तर्यामितया वर्तमानः समदृक् सर्वज्ञः" इत्यनन्ततीर्थाः ।

७ "स्वस्थः स्वाधारः, प्रशान्तकरणः प्रशस्तपरिपूर्णसुखात्मकसकलेन्द्रियः, परिमुक्तसङ्गः निस्सङ्गः" इत्यनन्ततीर्थाः । "स्वस्थः स्वे महिम्नि स्थितः, प्रशान्तकरणः विषयेभ्यो व्यावृत्तेन्द्रियः, परिमुक्तसङ्गः बाह्यविषयप्रीतिरहितः" इति यादवेन्द्रतीर्थाः ।

८ "–प्राप्यं पदमामनन्ति" इति च पाठान्तरम् । पदमित्यस्य रूपमिति व्याख्यानमिति पक्षे पदमिति पुनर्न पठनीयम् । तथाह्यनन्ततीर्थाः—"यत् यस्य ऋषभस्य भगवतः पदं स्वरूपम्" इति । यदित्यनूद्य रूपमिति व्याख्यानमिति पक्षे तु "परमहंसप्राप्यं पदमामनन्ति" इति भाष्यपाठः । तथाहि यादवेन्द्रतीर्थाः–"यत् स्वरूपं पारमहंस्यं परमहंसप्राप्यं पदं स्थानमामनन्ति" इति । प्र. पाठोऽप्येतादृशः । कोशेषु तु द्वेधाऽपि पठ्यत इति कथं निर्णयेम?

सत्रे ममाऽस भगवान् हयशीर्ष एष[१]
साक्षात् स यज्ञपुरुषस्तपनीयवर्णः[२] ।
छन्दोमयो मखमयोऽखिलदेवतात्मा[३]
वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥ ११ ॥

"छन्दांसि च मखाश्चैव देवा लोकाश्च सर्वशः । सर्वे विष्णौ स्थिता यस्मादतः सर्वमयो ह्यसौ" इति महासंहितायाम् ॥ * ॥

मत्स्यो युगान्तसमये मनुनोपलब्धः
क्षोणीमयो निखिलजीवनिकायकेतः ।
विस्रंसितानुरुभये सलिले मुखान्म
आदाय तत्र विजहार ह वेदमार्गान् ॥ १२ ॥

क्षोणीमयनौकाश्रयत्वात् क्षोणीमयः[४] ॥ * ॥

स्मृत्वा[५] हरिस्तमरणार्थिनमप्रमेय-
श्चक्रायुधः पतगराजभुजाधिरूढः[६] ।
चक्रेण नक्रवदनं विनिपाट्य तस्माद्[७]
हस्ते प्रगृह्य भगवान् कृपयोज्जहार ॥ १६ ॥

---

१ "हयशीर्षाऽथो" इत्यर्वाचीनः पाठः ।

२ "तपनीयवर्णः रजतवच्छुभ्रः" इत्यनन्ततीर्थाः । "तपनीयं सुवर्णं तस्य वर्ण इव वर्णो यस्य सः" इति याद-वेन्द्रतीर्थाः । अत एवैतत्सङ्गमनाय विजयध्वजतीर्था आहुः– "मूलावताररूपापेक्षयोभयवर्णत्वं युक्तम्" इति । तेन मूलरूपे सुवर्णवर्णः । हयशीर्षाख्यावताररूपे रजतवर्णः ।

३ "छन्दोमयः वेदाधारः, वेदप्रतिपाद्येषूत्तम इति वा । मखमयः (यज्ञाधारः) मखभोक्तृषूत्तम इति वा । अखि-लदेवतासु आत्मानः अन्तर्यामिमूर्तयः यस्य सः" इति प्राचीनम् । "मखमयः यज्ञाराध्यः, अखिलदेवतानामात्मा 'स आत्मा अङ्गान्यन्या देवताः' इति श्रुतेः" इति वीरराघवशुकदेवौ ।

४ "भूमेः प्रधानः, प्लवरूपभूमेः मुख्याश्रयः सन्नित्यर्थः" इति प्राचीनम् ।

५ "श्रुत्वा"इत्यर्वाचीनः पाठः । "अरणार्थिनं स्वरक्षार्थिनं तं गजेन्द्रं स्मृत्वा अनुसन्धाय" इति प्राचीनम् ।

६ "भुजा भुजयोर्मध्यभागः पृष्ठमित्यर्थः" इति जीवगोस्वामी । भुजां भुजं वाऽऽरूढः ।

७ "तस्मात् नक्रवदनात्" इति शुकदेवादयः । "तं गजं हस्ते प्रगृह्य तस्मात् सरसः उज्जहार तीरं प्रापितवान् । तस्मात् गजदेहप्रापकशापात् उज्जहार विमोचनं कृतवानिति वा" इति प्राचीनटीका । हस्ते स्वहस्ते गजशुण्डाया-मिति वा ।

"हरिस्तापसनामाऽसौ[1] जातस्तपसि वै मनुः। गजेन्द्रं मोक्षयामास[2] ससर्ज च जगद्विभुः" इति च मात्स्ये[3] ॥ * ॥

नाथो बलेरयमुरुक्रमपादशौच-
मम्भः शिवं धृतवतो[4] विबुधाधिपत्यम्।
यो वै प्रतिश्रुतमृतेऽपि च शीर्षमाण-
मात्मन्यमङ्ग मनसा[5] हरयेऽभिमेने ॥ १८ ॥

"ऐन्द्रं पदं नाऽन्तरीयं फलं तु हरितोषणम्। जगद् दातुर्बलेर्यस्मादानन्दोद्रिक्तता भवेत्" इति ब्रह्मतर्के।

शीर्षाख्यं मानम्[6] ॥ * ॥

तुभ्यं च नारद भृशं भगवान् विवृद्ध-
भावेन साधु परितुष्ट उवाच[7] योगम्।
ज्ञानं च भागवतमात्मसुतत्त्वदीपं[8]
यद् वासुदेवशरणा विदुरञ्जसैव ॥ १९ ॥

---

१ तापसनामाऽयं भगवान् हरिरित्यपि व्यवह्रियत इत्यनेन वचनेन ज्ञायते। अत एव मूलेऽपि "स्मृत्वा हरिः—" इत्युक्तम्। प्राचीनटीकाकारा अप्याहुः—"अयं हरिस्तापसमनुः। हरिसञ्ज्ञया व्यवहृतो वा" इति। श्रीधरादयः सर्वेऽपि हरिसञ्ज्ञकोऽयमवतार इत्याहुः। २ "मोचयामास" इति पाठान्तरम्।

३ "इति मात्स्ये" इति प्र. पाठः। क्वचित् कोशेषु च तथा।

४ "–शौचमापः शिखा धृतवतः" इत्यर्वाचीनाः पठित्वा "आपः अपः शिखा शिखायां धृतवतः" इति व्याचक्षते।

५ "प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमङ्ग शिरसा" इत्यर्वाचीनः पाठः। "उरुक्रमपादशौचं भगवत्पादप्रक्षाळनसाधनं शिवमम्भः शिरसा धृतवतः बलेर्यद् विबुधाधिपत्यं उपरितनमन्वन्तरे इन्द्रपदं लप्स्यते अयं तस्य सुकृतस्यार्थो मुख्यफलमिति वक्तुं नालम्। यो बलिः दास्यामीति प्रतिश्रुतं पदत्रयमृतेऽपि 'किं दत्वा ममास्य सम्प्रीतिर्भवति' इति निरूप्य, आत्मन्यं स्वकीयं शीर्षमाणं शीर्षाख्यं मेयप्रदेशं हरयेऽर्पयामीति मनसाऽभिमेने जगाद च–'भगवन्, ते तृतीयपदस्य परिमेयाभावे मदीयमेतच्छिरः परिमिमीहि' इति" इत्यनन्ततीर्थाः। "प्रतिश्रुतं दास्यामीति प्रतिज्ञातं राज्यं तद्दते" इति यादवेन्द्रतीर्थाः।

६ "शीर्षाख्यमानम्" इति क्वचित्। "शिर एव मानम्, पदत्रयमितिपूरकमित्यर्थः" इति प्राचीनटीका।

७ "परिपृष्ट उवाच" इति पाठान्तरम्। "साधु विनयादिपुरस्सरं परिपृष्टः सन्" इति यादवेन्द्रतीर्थाः। "विवृद्धभावेन भक्त्या साधु परितुष्टः" इत्यनन्ततीर्थाः।

८ "–सतत्त्वदीपम्" इत्यर्वाचीनाः पठन्ति। "आत्मसुतत्त्वं आत्माख्यं अनन्तकल्याणगुणपूर्णस्वरूपं तस्य दीपं अत्यन्तं प्रकाशकम्, अपरोक्षजनकमित्यर्थः, भागवतं भगवद्भक्तानां परमप्रियम्, भागवताख्यं वा ज्ञानम्" इति प्राचीनटीका।

14

"ऐतेरयो हरिः प्राह[1] नारदाय स्वकां तनुम् । यत् प्रापुर्वैष्णवा नान्ये यद्दते न सुखं परम्[2]" इति ब्राह्मे ॥ * ॥

चक्रं[3] च दिक्ष्ववितं दशसु स्वतेजो
मन्वन्तरेषु मनुवंशधरो बिभर्ति ।
दुष्टेषु[4] राजसु दमं विदधत्[5] स्वकीर्तिं
सत्ये निविष्ट उशतीं[6] प्रथयंश्चरित्रैः ॥ २० ॥

"मन्वन्तरेषु भगवांश्चक्रवर्तिषु संस्थितः । चतुर्भुजो जुगोपैतद् दुष्टराजन्यनाशकः । "राजराजेश्वरेत्याहुर्मुनयश्चक्रवर्तिनाम्[8] । वीर्यदं परमात्मानं शङ्खचक्रगदाधरम्" इति सत्यसंहितायाम् ॥ * ॥

कृत्स्नप्रसाद[9]सुमुखः कलया कलेश
इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ।
तिष्ठन् वनं सदयितानुज आविवेश
यस्मिन् विरुद्ध्य दशकन्धर आर्तिमार्च्छत् ॥ २३ ॥

प्राणादिकलेशः ॥ * ॥

---

१ एतेन प्रमाणोपन्यासेन हंसावतारोऽयमिति वदन्तः श्रीधरादयो निरस्ताः ।

२ "न परं सुखम्" इति क्वचित् पाठः । अनन्ततीर्थीयेऽपि तथा ।

३ "स्वतेजः स्वसामर्थ्यात्मिकां चक्रं आज्ञाम्" इत्यनन्ततीर्थाः । "स्वतेजश्चक्रम्, कार्यकारणयोरभेदोक्तिः, स्वप्रभावप्राप्तमित्यर्थः । आज्ञालक्षणं चक्रम्, चक्रवत् परिवर्तमानं शास्त्रोक्ततत्तद्धर्ममित्यर्थः" इति यादवेन्द्रतीर्थाः ।

४ "दृप्तेषु" इति केचित् पठन्ति ।

५ "व्यदधात्" इत्यर्वाचीनः पाठः । अत्र "राजसु चक्रवर्तिषु स्थितः दुष्टेषु दमं निग्रहं विदधत्" इति गमनिकान्तरं प्राचीनटीकायाम् ।

६ "सत्ये त्रिपृष्ठ उशतीम्" इत्यर्वाचीनः पाठः । "सत्ये धर्मे निविष्टः" इति प्राचीनम् ।

७ एकस्मिन् प्रतनकोशे "राजराजेत्याहुः" इतीयदेव पठ्यते । "राजराजसञ्ज्ञितेनावतारेण" इति वदन्तोऽनन्ततीर्था अप्यमुमेव पाठं पुष्णन्ति । अथापि बहुकोशसंवादात्, यादवेन्द्रतीर्थीयादिबहुतरटीकासंवादात्, छन्दःसौहित्याच्च "राजराजेश्वरेत्याहुः" इत्येव पाठः साधुरिति निश्चीयते ।

८ "चक्रवर्तिनम्" इति प्र. पाठः प्रामादिकः ।

९ "अस्मत्प्रसाद—" इत्यर्वाचीनः पाठः ! "कृत्स्नप्रसादः पूर्णानुग्रहः, तेन सुमुखः परमात्मा । अथवा कृत्स्नप्रसादः पूर्णानुभावः तेन सुमुखः सुस्मितमुखः । गुरोर्निदेशे तिष्ठन् कृत्स्नप्रसादसुमुख इति वा । वनप्रवेशेन चिन्तारहित इति भावः" इति प्राचीनटीका । "कृत्स्नप्रसादः सम्पूर्णानन्दः तेन शोभनं मुखं यस्यासौ तथोक्तः" इत्यनन्ततीर्थाः । कृत्स्ने सज्जनसमुदाये प्रसादोन्मुख इति वा ।

यस्मा[१] अदादुदधिरूढभयाङ्गवेपो
मार्गं सपद्यरिपुरं हरवद् दिधक्षोः ।
दूरेसुहृन्मथितरोषसुशोषदृष्ट्या[२]
तातप्यमानमकरोरगनक्रचक्रः ॥ २४ ॥

दूरस्था सुहृद् यस्य भगवतः स दूरेसुहृत् । सुशोषोऽग्निः ।

"अग्निः सुशोषः कक्षघ्नस्तिमिरारिर्हिरण्यदः" इति ह्यभिधाने[३] ॥ * ॥

वक्षस्थलस्पर्श[४]रुग्णमहेन्द्रवाह-
दन्तैर्विळम्बितककुब्जयरूढहासः[५] ।
सद्योऽसुभिः सह विनेष्यति दारहर्तु-
[६]र्विष्फूर्जितैर्धनुष उच्चरितैः ससैन्यः[७] ॥ २५ ॥

विनेष्यति विनाशं प्राप्नोति[८] । दारहर्तुः भगवतः ।

"धनुर्विष्फूर्जितैर्नष्टो[९] रावणः पूर्वमेव तु । पुनः शरै राममुक्तैः सानुबन्धो विनेष्यति[१०]" इति स्कान्दे ॥ * ॥

---

१ "तस्मा अदात्—" इति विजयध्वजीयः पाठ इति प्रतीयते । "दिधक्षोः दग्धुमिच्छवे यस्मै श्रीरामाय" इति प्राचीनटीका ।

२ "–सुशोणदृष्ट्या" इत्यर्वाचीनाः ।

३ "इत्यभिधाने" इति क्वचित् ।

४ छन्दःसौहित्याय संहितापाठे "—स्पर्श—"इति पठनीयम् ।

५ "दन्तैर्विडम्बितककुब्जुष ऊढहासम्" इत्यर्वाचीनः पाठः । "ककुब्जयरुढहासम्" इत्येके पठन्ति । वक्षस्थलस्पर्शेन दशकन्धरस्य वक्षस्थलघातेन, दिग्जय इति भावः । रुग्णाः अग्रे विशीर्णाः महेन्द्रवाहस्य ऐरावतस्य ये दन्ताः तैः विळम्बितः, यः ककुभां दिशां तत्स्थानां जयः, तेन रूढहासः सञ्जाताट्टहासः । शीघ्रं दिशो जेष्यामीति बुद्ध्या आगतस्य दशकन्धरस्य ऐरावतयुद्धाज्जयविळम्बे सति हास उत्पन्नः, अतिबलोपेतत्वान्न कोप उत्पन्न इति भावः" इति प्राचीनटीका ।

६ विस्फूर्जितैः" इति च पाठान्तरम् ।

७ "उच्चरतोऽधिसैन्ये" इत्यर्वाचीनः पाठः । "उच्चलितैः ससैन्यः" इति यादवेन्द्रतीर्थाभिमतः पाठः । "दारहर्तुः श्रीरामस्य धनुषः उच्चलितैः निर्गतैः विष्फूर्जितैः ज्यानिनादैः" इति तद्व्याख्यानम् । "दशकन्धरः ससैन्यः सेनापुत्रमित्रादियुक्तः, दारहर्तुः स्वाभाया सीतां स्वपुरं प्रति नेतुः रामस्य, धनुषो विष्फूर्जितैः विष्फारशब्दैरेव, तस्य लङ्काप्रवेशे सद्य एव, असुभिः सह विनेष्यति विनाशं गतः। असुभिः सह विनाशो नाम असुभिः सहावस्थाने विनष्टोऽहमिति विषादप्राप्तिः । तदनन्तरं तस्य रामस्य उच्चरितैः उत्कृष्टपराक्रमैः विनाशमियाय" इत्यनन्ततीर्थाः । "ससैन्यः मूलबलादिसहितः" इति च प्राचीनम् ।

८ "विनाशमेष्यति" इति प्र. पाठः ।

९ "धनुर्विस्फूर्जितैर्नष्टः" इति प्र. पाठः ।

१० "विनश्यति" इति प्र. पाठः प्रामादिकः । "सानुबद्धो विनेष्यति" इति क्वचित् । एतेन विपूर्वस्य नयतेः नाशार्थकत्वे निरवकाशः प्रयोगोऽपि दर्शितो भवति ।

भूमेः सुरेतरवरूथविमर्दितायाः
क्लेशव्ययाय कलया सितकृष्णकेशः ।
जातः करिष्यति जनानुपलक्ष्यमार्गः
कर्माणि चाऽत्ममहिमोपनिबन्धनानि ॥ २६ ॥

"राम एको ह्यनन्तांशस्तत्र रामाभिधो हरिः । शुक्लकेशात्मकस्तिष्ठन् रमयामास वै जगत्" इति ब्राह्मे । "विष्णोर्नान्येन कर्माणि परेषां तन्निबन्धनम्" इति मात्स्ये ॥ * ॥

तोकेन जीवहरणं यदुलूपिकाया[१]-
स्त्रैमासिकस्य च पदा शकटोऽपवृत्तः[२] ।
यद् रङ्गता[३]ऽन्तरगतेन [४]दिविस्पृशोर्वा
उन्मूलनं त्वितरथाऽर्जुनयोर्न भाव्यम् ॥ २७ ॥

"सहस्रधनुषस्तूर्ध्वं द्युशब्देनापि भण्यते" इति तन्त्रमालायाम्[५] ।
इतरथा विष्णुर्न चेत्, स्वमहिमनिबन्धनत्वेन[६] न भाव्यम् ॥ * ॥

तत् कर्म दिव्यमिव यन्निशि निःशयानं
दावाग्निनाऽऽशु विपिने[७] परिदह्यमाने ।
उन्नेष्यति व्रजमितो[८]ऽवसितान्तकालं
नेत्रे पिधाप्य[९] सबलोऽनधिगम्यवीर्यः ॥ २९ ॥

दिव्यमिव स्तुत्यमिव तदपेक्षया[१०] । अन्येषां स्तुत्यमेव ॥ * ॥

---

१ "यदुलूकिकायाः" इत्यर्वाचीनाः । पूतना उलूकरूपेणाऽगतेति तथा निर्देश इति च व्याचक्षते ।

२ "शकटोपवृत्तिः" इति केचित् पठन्ति ।

३ "रिङ्गता" इत्यर्वाचीनः पाठः । "रङ्गता बालैः सह क्रीडता सता" इति प्राचीनटीका । "सोऽवनिमध्ये रङ्गन्" इत्येतत्प्रसङ्गे चाऽचार्यपादप्रयोगो महाभारततात्पर्ये ।

४ "अत्र द्युशब्देनाऽकाश उच्यते न स्वर्गः" इत्यनन्ततीर्थाः । "अत्युन्नतयोरित्यर्थः" इति प्राचीनम् ।

५ "मन्त्रमालायाम्" इति क्वचित् ।

६ "स्वमहिमानिबन्धनत्वेन" इति क्वचित् पठ्यते ।

७ "दावाग्निना शुचिवने" इत्यर्वाचीनः पाठः ।

८ "व्रजमतो—" इति पाठान्तरम् ।

९ अत्र "पिधाप्य" इति "पिधाय" इति च पाठान्तरम् । निःशयानमिति, नेत्रे पिधाप्येति च पूर्वोत्तरार्द्ध-योर्विरोधपरिहाराय एकं यमुनातीरे, अन्यच्च मुञ्जाटव्यां संवृत्तमिति व्याचक्षते । प्राचीनटीकायां तु रीत्यन्तरेण विरोधः परिहृतः—"निशि अज्ञाने सति, दावाग्निसञ्जातभयेनेति भावः, निःशयानं कर्तव्यज्ञानरहितम्, विपिने दावाग्निना परितः सर्वतः दह्यमाने सति अवसितः निश्चितः अन्तकालः नाशकालः यस्य तथाविधं व्रजं, नेत्रे व्रज-स्थानां नेत्रे पिधाय उन्नेष्यति" इत्यादि ।

१० "अनन्तब्रह्माण्डपालनादिकर्तुस्तस्य दिव्यमिव स्तुत्यमिव । तदन्येषां दिव्यमिव आश्चर्यमेव" इत्यनन्ततीर्थाः ।

गृह्णीत यद्यदुपबद्धुममुष्य[१] माता
शुल्बं सुतस्य नतु तत्तदमुष्य माति ।
यज्जृम्भतोऽस्य वदने भुवनानि गोपी
संवीक्ष्य शङ्कितमनाः प्रतिबोधितस्य[२] ॥ ३० ॥

यत् तच्च दिव्यमिव[३] ॥ * ॥

नन्दं च मोक्ष्यति भयाद् वरुणस्य पाशाद्
गोपान् बिलेषु पिहितान् मयसूनुना च ।
जल्प्यावृतं[४] निशि शयानमतिश्रमेण
लोके विकुण्ठ उपधास्यति गोकुलं सः[५] ॥ ३१ ॥

"अन्यथाज्ञानहेतुर्या वाक् सा जल्पिः प्रकीर्तिता" इति तन्त्रमालायाम्[६] । "यत् तु सर्वात्मनाऽज्ञानं निशा सा परिकीर्तिता" इति कौर्मे ॥ * ॥

क्रीडन् वने निशि निशाकररश्मिगौर्यां
रासोन्मुखः[७] कळपदायतमूर्च्छितेन ।

---

१ "यद्यदुपबन्धममुष्य" इति प्र. पाठः ।   २ "प्रतिबोधिताऽऽसीत्" इत्यर्वाचीनाः ।

३ अत्र यदर्वाचीनाः "अन्येषां स्तुत्यमेव यत् तस्य तच्च दिव्यमिव" इति पूर्वश्लोकभाष्यसाङ्कर्येण एकवाक्यतया पठन्ति, तस्येति च पदमधिकमुपक्षिपन्ति स प्रमाद एव । इदं हि भिन्नं वाक्यं श्लोकान्तरव्याख्यानरूपम्––यदमुष्य उदरे शुल्बं दाम न माति तत्, यच्च गोपी वदने भुवनानि वीक्ष्य शङ्कितमना भीतचित्ता आसीत् तच्च दिव्यमिव, स्वमहिमनिबन्धनत्वेन दिव्यमिव स्तुत्यमेव, अत एवेतरथा न भाव्यं चेति । स्पष्टमिदं प्राचीनकोशटीकादिविदुषाम् । "यत् तच्च दिव्यमेव वर्तते" इति क्वचित् पठ्यते ।

४ "अह्वयावृतम्" इत्यर्वाचीनाः पाठः ।

५ "लोकं विकुण्ठमुपनेष्यति गोकुलं स्म" इत्यर्वाचीनाः । "–गोकुलं स्वम्" इत्यप्येके पठन्ति । "यत् तच्च दिव्यमिव" इति भाष्यवचनमत्र सर्वत्र श्लोकेष्वन्वेति । तथाहि प्राचीनटीका– "अजगरग्रासादिभयात् वरुणस्य पाशाच्च नन्दं स्नानार्थमकाले जले प्रविष्टं मोक्ष्यति मोचयिष्यतीति यत् कर्म, मयसूनुना व्योमाख्येनासुरेण बिलेषु, बिलस्य महत्त्वाद् बहुवचनम्, गोपानां बहुत्वाद् बहुषु बिलेष्विति वा, पिहितान् गोपान् मोक्ष्यतीति यत् कर्म, सः कृष्णः, निशि अत्यन्ताज्ञाने शयानम् स्थितम्, निशि अज्ञाने सति शयानं स्वेष्टज्ञानरहितं वा, अतिश्रमेण अत्यन्तदुःखेन कंसप्राप्तमनोव्यसनेन वा सहितम्, अत एव जल्प्यावृतं तत्त्वमार्गविरुद्धबहुप्रलापिनम्, मोक्षोपायेन रहितमपीति भावः, गोकुलं विकुण्ठे लोके उपधास्यतीति यत् कर्म तदपीतरथा न घटते" इति । एतेन "दिव्यमिव" इत्यव्यवहितपूर्वश्लोकगतम्, तथा "इतरथा न भाव्यम्" इति तत्पूर्वतनश्लोकगतं चेति द्वयमप्युत्तरश्लोकान्वयीत्यसूचि ।

६ "मन्त्रमालायाम्" इति क्वचित् ।   ७ "रागोन्मुखः" इति प्राचीनकोशे पाठान्तरम् ।

उद्दीपितस्मररुजां व्रजसद्वधूनां[1]
हर्तुर्हरिष्यति शिरो धनदानुगस्य[2] ॥ ३३ ॥

कळपदं च[3] आयतं च ।

"सर्वस्वर[4]समाहारो मूर्च्छनेति प्रकीर्तिता" इति गान्धर्वे ॥ * ॥

ये च प्रलम्बखरदर्दुर[5]केश्यरिष्ट-
मल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः ।
अन्ये च साल्वकपिवल्कलदन्तवक्र[6]-
सप्तोक्षशम्बरविदूरथरुग्मिमुख्याः ॥ ३४ ॥

ये वा मृधे समितिशालिन आत्तचापाः
काम्बोजमत्स्यकुरुसृञ्जयकैकयार्णाः[7] ।

---

१ "व्रजभृद्वधूनाम्" इति प्र. पाठः ।

२ "धनदानुजस्य" इति वल्लभः पठति । "निशाकरस्य पूर्णचन्द्रस्य रश्मिभिः गौर्यां गौरवर्णोपेतायां निशि रात्रौ, वने, कळानि मधुराणि पदानि यस्य तत्, आयतं च, मूर्च्छितं च सर्वस्वरसमाहारयुक्तं च तत् तेन गानविशेषेण, रासोन्मुखः रासक्रीडायामभिमुखः सन्, व्रजस्त्रीभिः क्रीडन् कृष्णः, तदा उद्दीपितस्मररुजम्, उद्दीपिता अशान्ता अधिका वा स्मरेण प्राप्ता रुक् पीडा यासाम्, कळपदायतमूर्च्छितेन उद्दीपितस्मररुजां वा, व्रजसन्तः ये गोपाः तेषां वध्व इव वध्वः, अप्सरसामवताराः, तासाम्, व्रजे सतीनां विद्यमानानां वा, हर्तुः धनदानुगस्य शङ्खचूडस्य शिरो हरिष्यतीति यत् कर्म तदपीतरथा न भाव्यम्" इति प्राचीनम् । व्रजसदां वधूनामिति वा ।

३ "कलपदं च" इति प्र. पाठः ।

४ "सप्तस्वर—" इति पाठान्तरम् । "सर्वस्वर—" इत्येव च प्राचीनकोशपठितः प्राचीनटीकासम्मतश्च पाठः ।

५ अयं दर्दुरः क इति न स्फुटम् । नहि कोऽपि दर्दुरनामाऽसुरः कृष्णेन हतः प्रसिद्धः । दर्दुर इति देशविशेषस्य नाम प्राचीनग्रन्थेषु पठ्यते । तद्देशवासी कश्चनासुर इति तु स्यात् । दर्दुरदेशीयो दर्दुरः । मत्स्यदेशीयो मत्स्य इति यथा । परन्तु किन्नामाऽयमसुर इति तु न ज्ञायते । बक इति तु बहवो व्याख्यातारः । जलवाससाम्यात् दर्दुर इव दर्दुरो बक इति व्याख्यानं तु न हृदयङ्गमम् । "दर्दुरसञ्ज्ञो बकः" इति विश्वनाथादयः । वल्लभस्तु—"दर्दुरः कश्चिदल्पः यथा बकस्तथा सोऽपि । बक एव वा । अघासुरो वा दर्दुर इति केचित्" इत्यनिर्णयमेव पुरश्चकार ।

६ "शाल्वकपिबल्वलदन्तवक्त्र—" इति प्र. पाठः । इल्वलसुतो वल्कलः । तत्रैव बल्वल इत्यर्वाचीनं नाम । कथ्यते हि दशमस्कन्धे—"इल्वलस्य सुतो घोरो वल्कलो नाम दानवः" इति ९६तमे अध्याये । वल्कलो नाम जनपदः श्रूयते—"तथैव विन्ध्यचुलिकाः पुलिन्दा वल्कलैः सह" (महाभा. भी. ९. ६२) इत्यादौ । अयमपि तद्देशीयः सम्भाव्यते । बल्वल इति चास्य नामान्तरमपि भवेत् ।

७ "—कुरुकैकयसृञ्जयाद्याः" इत्यर्वाचीनः पाठः । "—सृञ्जयार्णाः" इति च क्वचित् । सृञ्जयाः पाञ्चालाः । अर्णा इति दशार्णाः ।

यास्त्वन्त्यदर्शनमिता बलभीमपार्थ[1]-
व्याजाह्वयेन हरिणा निलयं तदीयम् ॥ ३५ ॥

"विद्वेषिणोऽप्युदासीना भक्ता अपि न संशयः । हरेर्हि सदनं यान्ति व्यक्तं भक्तैस्तु गम्यते । आरभ्य तम आमुक्तेः कृष्णस्य सदनं यतः । अव्यक्तहरिलोकत्वादन्येषामन्यलोकता" इति बृहत्संहितायाम् । "रामभीमार्जुनादीनि विष्णोर्नामानि सर्वशः । रमणाभयवर्णाद्याः[2] शब्दवृत्तेर्हि हेतवः । हरिर्हि तत्रतत्रस्थो रमणादीन् करोत्यजः । अतस्तस्यैव नामानि व्याजादन्यगतानि तु । व्यवहारप्रवृत्त्यर्थं दुष्टानां मोहनाय च" इति स्कान्दे[3] ॥ * ॥

कालेन [4]मीलितदृशामवमृश्य नृणां
तोकायुषां स्वनिगमो बत दूरपारः ।
आविर्हितस्त्वनुयुगं स हि सत्यवत्यां
वेदद्रुमं विटपशो विभजिष्यति स्म[5] ॥ ३६ ॥

---

१ "यास्त्वन्त्यदर्शनमलं बलपार्थभीम—" इत्यर्वाचीनः पाठः ।

२ यद्यपि प्रतनतरेषु कोशेषु "मरणाभयवर्णाद्याः" इति, उत्तरश्लोके च "मरणादीन् करोत्यजः" इति च पठ्यते । विजयध्वजीये च मूलकोशेष्वेवमेव पाठः । तस्यापि साधुता सम्भाव्यते । मा भीः अभयं भक्तानां यस्मादिति यथा वर्णव्यत्ययेन निर्वचनं तद्वदत्रापि मारयती राम इति भवति । मारकत्वं च रामरूपस्योपपन्नम् । यमसभाधिष्ठितदैवतत्वात् । उक्तं हि भारते—"रामो यमसभातळे" इति । "रामद्वयसुदैवते" इति चाऽऽचार्याः।

३ क्वचित् "स्कान्दे" इति न पठ्यते ।

४ "मीलितधियामवमृश्य नृणां स्तोकायुषाम्" इति प्र. पाठः । अनन्ततीर्था अपि "स्तोकायुषाम्" इत्येव पेठुः, प्रथमचरणे च "मीलितदृशाम्" इत्येव ।

५ अत्र प्राचीनटीका—"कालेन मीलितदृशां तिरोहितज्ञानानाम्, तोकायुषां स्वल्पायुषाम्, नृणां द्वापरयुगस्थानां मनुष्याणां अवमृश्य विद्याग्रहणधारणशक्तिमल्पामालोच्य, स्वनिगमः स्वतन्त्रतत्वप्रतिपादको वेदः दूरपारः अपार इति चावमृश्य, अथवा स्वविषयकः निगमो यस्य सः, दूरपारः, ज्ञानानन्दादिगुणानां पारः इयत्ता तद्रहितः, यः अनुयुगं भवति युगेयुगे, (सः) अष्टाविंशतिमे द्वापरे सत्यवत्यां अभिव्यक्तः वेदद्रुमं शाखाभेदेन विभजिष्यति । बतेति हर्षे । स्मेति ऐतिह्योक्तिः" इति । "कालबलात् नष्टज्ञानानां अल्पायुषां नृणां स्वनिगमः स्वस्ववेदः दूरपारः दुःशकपाठः इत्यवमृश्य मन्वन्तरेमन्वन्तरे, अनुयुगं तृतीये द्वापरे, सप्तमे द्वापरे, षोडशे द्वापरे, सप्त(?)विंशेऽष्टाविंशे (च) द्वापरे स नारायणः सत्यवत्यां व्यासनाम्नाऽऽविर्हितोऽवतीर्णो मूलवेदाख्यं वृक्षं विटपशः शाखारूपेण विभजिष्यति अन्यैर्विभाजयिष्यति । कृष्णावतारादुपरि व्यासावतारकथनं तदुपरितनमन्वन्तरेष्वपि व्यासावतारसद्भावादविरुद्धम्" इत्यनन्ततीर्थाः । "स्वनिगमः स्वविषयो वेदः" इति विजयध्वजीये । अत्र "अनुयुगं मीलितदृशाम्" इति दूरान्वयेन यत् श्रीधरादयो व्याचक्षते तत् शास्त्रप्रमेयापरिज्ञानमूलमिति भाष्योदाहृतप्रमाणवचनादेव स्फुटं प्रतीयत इति न तत्र बहु वक्तव्यम् । अत एवानुयुगं प्रतिद्वापरं व्यासावतार इति वदन् वल्लभोऽप्यपास्त एव ।

"तृतीये सप्तमे[1] चैव षोडशे पञ्चविंशके[2]। अष्टाविंशे युगे[3] कृष्णः सत्यवत्यामजायत[4]। व्यासाचार्यस्तु पूर्वेषु चरमे स्वयमेव तु। विव्यास वेदांश्चक्रे च भारतं वेदसम्मितम्" इति च ॥ * ॥

सर्गे तु योऽहमृषयो[5] नव ये प्रजेशाः
स्थानेऽथ[6] धर्ममखमन्वमरावनीशाः।
अन्ते त्वधर्महरमन्युवशासुराद्या
मायाविभूतय इमाः पुरुशक्तिभाजः[7] ॥ ३९ ॥

"हरीच्छया विभूतिर्यद्[8] ब्रह्मादीनां सदा भवेत्। इच्छया वा बहुविधस्तेषु विष्णुः स्वयं स्थितः। अतो मायाविभूतित्वं तेषां मत्स्यादयः[9] स्वयम्" इत्यध्यात्मे ॥ * ॥

नान्तं विदाम्यहममी मुनयः प्रजेशाः[10]
मायाबलस्य[11] पुरुषस्य कुतोऽपरे ये।
गायन् गुणान् दशशतानन आदिदेवः
शेषोऽधुनाऽपि समवस्यति नास्य पारम् ॥ ४१ ॥

विदुर्नान्तम्, अनन्तत्वात् ॥ * ॥

---

१ "पञ्चमे" इति क्वचित् पाठः प्रामादिकः।

२ "सप्तविंशके" इत्यनन्ततीर्थीये पठ्यते। विजयध्वजीयेऽपि प्रतनकोशेषु तथा। प्रमादः सम्भाव्यते।

३ "अष्टाविंशयुगे" इति क्वचित्।

४ तृतीयादिषु पञ्चसु द्वापरेषु यत् पञ्चकृत्वो व्यासावतारः तत्र सर्वत्रापि सत्यवत्यामेव जननमिति अनन्ततीर्थाद्यभिमतः पक्षः। अन्ये चार्वाञ्चो व्याख्यातारस्तमेव पक्षमवलम्बन्ते। चरमे अष्टाविंश एव युगे कृष्णः स्वयमेव सत्यवत्यामजायत, तृतीये सप्तमे षोडशे पञ्चविंशके चेति पूर्वेषु युगेषु अन्ये व्यासाः अन्यास्वेव मातृष्वजायन्त। तेषामयं स्वयमाचार्य इति यादवेन्द्रतीर्थानामभिमतमिति भाति। एवं व्याख्यानं तु भाष्येण नितरां संवदते।

५ "सर्गे तपोऽहमृषयः" इति प्र. पाठः। ६ "स्थाने च" इति क्वचित्।

७ "सर्गे सृष्ट्यर्थं नियुक्तः योऽहं हिरण्यगर्भः, ये ऋषयः मरीच्यादयः, ये नव प्रजेशाः कर्दमादयः ते, अथ सृष्ट्यनन्तरं स्थाने स्थित्यर्थं धर्मः दिक्पालः, मखः इन्द्रांशः, मनवः स्वायम्भुवादयः, अमराः (–रेशाः) इन्द्राश्चतुर्दश ये ते, अन्ते संहारार्थं अधर्मः निरृतिः, हरः, मन्युवशा असुराः क्रोधमया असुराः, एतेषु ब्रह्मादिषु पुरुशक्तिभाजः पूर्णसर्वसृष्ट्यादिशक्तिसम्पन्नस्य परमात्मनः मायाविभूतयः स्वेच्छाधीनमूर्तयः सन्तीत्यर्थः" इति प्राचीनम्।

८ "विभूतिर्या" इति प्र. पाठः। ९ "मत्स्यादिकाः" इति प्र. पाठः।

१० "मुनयोऽग्रजास्ते" इत्यर्वाचीनाः। ११ "महालक्ष्म्या अपि बलप्रदस्य" इत्यनन्ततीर्थाः।

एषां[1] स एव भगवान् दययेदनन्तः
सर्वात्मना श्रितपदो यदि निर्व्यलीकम् ।
ते वै विदन्त्यतितरन्ति[2] च देवमायां
येषां ममाहमिति न श्वसृगालभक्ष्ये[3] ॥ ४२ ॥

देवमायां विदन्ति संसारमतितरन्ति च ॥ * ॥

ते वै विदन्त्यतितरन्ति च देवमायां
स्त्रीशूद्रहूणशबरा अपि पापजीवाः[4] ।
यद्यद्भुतक्रमपरायणशीलशिक्षा[5]-
स्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥ ४६ ॥

---

१ "येषाम्" इति प्र. पाठः । अनन्ततीर्थविजयध्वजतीर्थादिसम्मतश्च स एव ।

२ "ते दुस्तरामतितरन्ति" इत्यर्वाचीनः पाठः ।

३ "नैषां ममाहमिति धीः श्वश्रृगालभक्ष्ये" इति सार्वत्रिकः पाठः । दन्त्यादि सृगालपदं पठित्वा एतमेव पाठमनन्ततीर्थादयोऽपि परिजगृहुः । अत्रोपात्तः प्राचीनपाठस्तु गीताभाष्ये भगवत्पादोदाहृतानुपूर्वीसंवादी यादवेन्द्रतीर्थपरिगृहीतश्च । तथाहि तेषां व्याख्यानम्—"तादृशो विष्णुः कुतो न दृश्यत इत्यत आह एषामिति । येषां चेतनानां श्वसृगालभक्ष्ये शुनां सृगालादीनां च भक्ष्ये देहे, सर्वेषां भोग्ये साधारणे वस्तुनीति भावः । ममैवायं देहः, अहमेव देहेन भोक्ता इति धीः यदि न, देहतदनुबन्धिविषयेषु विरक्ता इत्यर्थः, ये चेतनाः निर्व्यळीकं वञ्चनां विना, फलानुसन्धानं विनेत्यर्थः, सर्वात्मना मनोवाक्कायादिभिः, श्रितपदः आश्रितचरणाश्च यदि एषां एतेषामेव सः (अनन्तः) अप्रमेयः, भगवान् पूर्णैश्वर्यादिसम्पन्नः दययेत् दयां कुर्यात् । (ते वै) देवमायां परमात्मनः माहात्म्यं विदन्ति एकदेशेन जानन्ति, मायाबन्धं अतितरन्ति च, परमात्ममाहात्म्यज्ञानादिति भाव." इति । "यदि भगवान् भक्तैः श्रितपदः तदा स्वयमेव नैतान् संसारयामीति दयां कुर्यात्" इत्यनन्ततीर्थाः ।

४ "पापजीवाः पापनिर्मितशरीराः । ये सर्वलोकेष्वपि स्त्रीशूद्रशबरत्वेन क्लृप्तजीवास्तेषां शरीरं पापनिमित्तं न भवति । तस्मात् स्त्रीशूद्रहूणशबराश्च पापजीवाश्चेति विभागेन योजनीयम्" इत्यनन्ततीर्थाः ।

५ "अद्भुतपराक्रमो नारायण एव आश्रयो येषां ते तथा । तेषां शीलं तद्वदाचरणम्, तेषां शिक्षा उपदेशश्च येषां ते तथोक्ताः" इत्यनन्ततीर्थाः । "अद्भुतक्रमः त्रिविक्रमः स एव परायणं मुख्याश्रयो ययोस्ते (शीलशिक्षे) । शीलं सदाचारः । परमात्मप्रीतये आचारपरा इति भावः । शिक्षा नियमितबुद्धिः । परमात्मन्येव न्यस्तकरणा इति भावः । ते (शीलशिक्षे) येषां ते" इति यादवेन्द्रतीर्थाः । व्याख्यानद्वयमपि रीत्यन्तरेण प्रवृत्तम् । विजयध्वजीये तु "स एव परायणं तस्य शीलं तस्य शिक्षा च येषाम्" इति भाष्यवचनानुगुण्येनैव व्याख्यातम् । यद्वा भाष्यादेवैतेऽर्थाः प्रतीयन्ते । तथाहि–"ये तत्परायणा जनास्तद्वच्छीलास्तच्छिक्षिताश्च" इति यच्छब्दाध्याहारेण अनन्ततीर्थीयोऽप्यर्थः भाष्योदित एव भवति । अथच व्याख्यानान्तरम्-–भाष्ये आद्यस्तच्छब्दः अद्भुतक्रमपरः । द्वितीयतृतीयौ त्वद्भुतक्रमपरायणपरौ । एवं च स्वयं भगवत्परायणाः, तत्परायणशीलाः तत्परायणशिक्षाश्च ये तादृशा इत्युक्तं भवति । अयमेव पक्षः साधीयान् मूलेन सुसङ्गमश्च । तदेवं यादवेन्द्रतीर्थोदितोऽप्यर्थः साक्षादेव भाष्योदितः ।

15

तत्परायणास्तच्छीलास्तच्छिक्षाश्च[1] ॥ * ॥

शश्वत् प्रशान्तमभयं प्रतिबोधमात्रं
शुद्धं समं सदसतः परमात्मतत्त्वम् ।
शब्दो न यत्र पुरुकारकवान् क्रियार्थो
माया परैत्यभिमुखेव[2] विलज्जमाना ॥ ४७ ॥

"अव्यक्ताद्यनहंमानादात्मतत्त्वं हरिः स्मृतः । अशब्दश्चाप्रसिद्धत्वाच्छान्तः पूर्णसुखत्वतः"[3] इति ब्रह्मतर्के ॥ * ॥

स श्रेयसामपि विभुर्भगवान् यतोऽस्य
भावस्वभावविहितस्य सतः प्रसिद्धः[4] ।
देहे स्वधातुविगमे तु विशीर्यमाणे[5]
व्योमेव तत्र पुरुषो न विशीर्यतेऽजः[6] ॥ ४९ ॥

---

१ "तच्छिक्षिताश्च" इति क्वचित् ।

२ "परैत्यभिमुखे च" इति पाठान्तरम् । अभिमुख इव इति वक्तव्ये अभिमुखेवेति सन्धिगर्भः सन्धिरार्ष इति पुरस्तादेवोक्तम् । भवन्ति चैतादृशाः प्रयोगा बहवो व्यासनिबन्धेषु–"जगद् वशे वर्ततेदं कृष्णस्य सचराचरम्" इत्याद्याः । यद्वा अभिमुखे व इत्येव च्छेदः । इवार्थे वकारः । "शात्रवं व वशः पपुः" इत्यादि रघुवंशे पठन्ति हि वङ्गाः । दाक्षिणात्यास्तु "शात्रवं च" इत्येव । तेन विलज्जमाना व विलज्जमानेव इत्यर्थः । तथाह्यस्य समग्रपद्यस्य व्याख्या यादवेन्द्रतीर्थीया–"शश्वत् सदा प्रशान्तं पूर्णसुखम्, शश्वत् अभयं भयेन विकाररहितम्, प्रतिबोधमात्रं ज्ञानस्वभावम्, जडविकाररहितमित्यर्थः । शश्वत् शुद्धं अज्ञानकर्मलेपरहितम्, सर्वरूपेषु सर्वगुणैः समम्, सदसतः परं विलक्षणम् । व्यक्ताव्यक्तं मूर्तामूर्तं वा सदसत् । सदसतां मध्ये परं सर्वोत्तममिति वा । आत्मतत्त्वम्, आत्मा चासौ तत्त्वं च, विकाररहितमित्यर्थः । जीवस्तु प्रकृतिसम्बन्धादतत्त्वम् । नीचताविकारोपेत इति भावः । पुरुकारकवान् बहुकर्तृकर्मादिकारकवाचकः, कारकपदोपेत इति वा । क्रियार्थः धर्मादिप्रतिपादकः शब्दो वेदः, यत्र परमात्मनि विषये न प्रवर्तते साकल्येन प्रतिपादनार्थमिति भावः, माया प्रकृतिः बन्धकशक्तिरपीत्यर्थः, यस्याभिमुखे स्थातुं विलज्जमानेव परैति निवर्तते, भक्तान् न बध्नाति" इति । "शश्वत् एकप्रकारम् । मा लक्ष्मीः, तया सर्वदा सहितं समम् । पुरुकारकवान् ब्रह्मादिसकलदेवताप्रतिपादकः, क्रियार्थः अग्निष्टोमादियज्ञक्रिया उद्दिश्य वर्तमानः शब्दोऽनन्तो वेदः, यत्र भगवति न प्रवर्तते साकल्येन तन्महिमानं वक्तुं न शक्तः" इत्यनन्ततीर्थाः । शुकदेवस्तु अर्थविशेषमप्याह–"यत्र यस्मिन् प्रतिपाद्ये सति पुरुकारकवान् क्रियाङ्गभूतबहुयजमानादिकारकवाचकोऽपि शब्दः वेदः क्रियार्थो न भवति । विवित्सोपयोगितया परमात्मपरत्वात्" इत्यादि ।

३ "पूर्णगुणत्वतः" इति क्वचित् ।

४ "प्रसिद्धिः" इत्यर्वाचीनाः ।

५ "–विगमेऽनुविशीर्यमाणे" इत्यर्वाचीनाः ।

६ "स भगवान्, भावस्वभावविहितस्य. भावो भक्तिः, तत्सहितस्वभावेन युक्ततया निर्मितस्य सतः ज्ञानिपुरुषवर्गस्य श्रेयसां मोक्षादिपुरुषार्था द्धः, अतोऽपरोक्षदर्शनस्य मोक्षः फलमित्यर्थः ।

भावस्वभावो भक्तिस्वभावः । तथा निर्मितस्य[1] सत्पुरुषस्य प्रसिद्धः ।
"भावो भक्तिः प्रणामश्च प्रावण्यमपि[2] चाऽदरः" इत्यभिधानात् ॥ * ॥

सोऽयं तेऽभिहितस्तात भगवान् विश्वभावनः ।
समासेन [3]हरेर्नान्यदन्यस्मात् सदसच्च यत् ॥ ५० ॥

"सत्तादिर्यत् स्वतो विष्णोस्तस्मादन्यः स सर्वतः । यत् सत्तादिरतोऽन्यस्य नान्यत्वं भेदिनोऽपितु" इति ब्रह्माण्डे ॥ * ॥

[4]नृजन्मनि न तुष्येत किं फलं यमनश्वरे ।
कृष्णे यद्यपवर्गेशे भक्तिः स्यान्नानपायिनी[5] ॥ ५१ ॥

ज्ञानिपुरुषदेहस्थितो हि तज्ज्ञानविषयः, तस्य तद्देहनाशे नाशप्राप्तौ फलदानायोग इत्यत आह—देह इति । स्वारम्भकाणां पृथिव्यादीनां धातूनां अपगमे सति देहे विशीर्यमाणे (च) सत्यजो हरिः व्योमेव देहान्तस्थाकाशमिव न विशीर्यते । तस्मादक्षयत्वादक्षयपददाता हरिरेवेति सिद्धम्" इत्यनन्ततीर्थाः । "भावस्वभावः परमात्मभक्तिस्वभावः तेन विहितस्य अस्य सतः सज्जीवसमुदायस्य प्रसिद्धः सन् हृदयादौ साक्षात्कृतः सन् श्रेयसामपि विभुः श्रेयःप्रदानेऽपि समर्थः यतोऽतः समर्थत्वादेव सः स्वधातुविगमे देहारम्भकाणां धातूनां पृथिव्याद्यवयवानां विश्लेषे सति देहे विशीर्यमाणे तत्र देहे स्थितः अजो भगवान् व्योमेव नित्याकाशमिव न विशीर्यते । अतो निर्दोषश्चेति भावः" इति यादवेन्द्रतीर्थाः ।

१ "तेन निर्मितस्य" इति प्र. पाठः । यादवेन्द्रतीर्थाभिमतश्चायं पाठः ।

२ "प्रावण्यमिति" इति क्वचित् ।

३ "हरेर्नान्यदन्यत् तत्" इत्येके पठन्ति । "हरिर्नान्यदन्यस्मात्" इति प्राचीनकोशे पाठान्तरम् । "अन्यस्मात् जगतः विलक्षणात् हरेः यत् सदसत् कार्यात्मकं कारणात्मकं च जगत् तत् अन्यत् न तदधीनस्वरूपसत्ताद्युपेतमित्यर्थः" इति प्राचीनटीका ।

४ औत्तरेयाः श्लोकमेतमुत्तरं च मूले न पठन्ति । वीरराघवस्तु किञ्चिद् व्यत्यासेन पठति । तद्यथा—

"नृजन्मनि न तुष्येत कृतेन भगवान् यदि ।
धर्मार्थकामैः किं तर्हि कार्यं सिद्ध्यति नश्वरैः ।
कृष्णे न चोत्तमश्लोके चेद् भक्तिरनपायिनी ।
किं स्याद् वर्णाश्रमाचारदानहोमादिभिः कृतैः" इति ।

५ "नृजन्मनि स्थितानां चेतनानाम्, नृजन्म येषां तेष्विति वा, कृष्णेऽनपायिनी स्थिरा भक्तिर्यदि न स्यात्, तर्हि कृष्णः न तुष्येत । तदा किं फलम्? न किमपि । भोगकारणदेहलाभ एव फलमित्याशङ्क्याऽह—यमनश्वर इति । यमेन नश्वरे यमभटनिग्रहविषये, व्याध्यादिना च नाशशीले सतीत्यर्थः । किं फलम्? लौकिकभोगोऽपि स्वेच्छया न भवतीति भावः" इति यादवेन्द्रतीर्थाः । "यदि नृजन्मापि हरिभक्त्यादिरहितं तर्हि तस्मिन् नृजन्मन्यपि न तुष्येत" इत्यनन्ततीर्थाः ।

किं स्याद् वर्णाश्रमाचारैः किं दानैः किं तपःश्रुतैः ।
सर्वाघघ्नोत्तमश्लोके न चेद् भक्तिरधोक्षजे ॥ ५४ ॥

"आक्षिप्यते किमित्येतद् यत्राऽल्पफलता[१] भवेत् । वस्तुनो यस्य चाल्पत्वं पुंसो वा नेति चोच्यते" इति प्रकाशसंहितायाम् ॥ * ॥

इति द्वितीयस्कन्धे सप्तमोऽध्यायः

पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः ।
लोकैरमुष्यावयवाः सपालैरिति शुश्रुमः[२] ॥ ११ ॥

निजावयवेभ्यः सृष्टिः[३] । बाह्यावयवा लोकैः कल्प्यन्ते ॥ * ॥

यस्मिन् कर्मसमावापो[४] यथा येनोपगृह्यते ।
गुणानां गुणिनां चैव परिमाणं सुविस्तरम्[५] ॥ १४ ॥

जीवे कर्मसमावापः[६] । परमेश्वरेण गृह्यते । गुणिनां महदादिजीवानां[७] सामर्थ्यपरिमाणम्[८]–"देवासुरेभ्यो मघवान्"[९] इत्यादि ॥ * ॥

नृणां साधारणो धर्मः सविशेषश्च यादृशः ।
श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवताम्[१०] ॥ १८ ॥

श्रेणीनामङ्गरक्षकाणाम् । युद्धेषूच्यते[११] ॥ * ॥

---

१ "यतोऽल्पफलता" इत्यर्वाचीनः पाठः । २ "शुश्रुम" इति पाठान्तरम् ।
३ "सृष्टाः" इति प्र. पाठः । ४ "कर्मसमावायः" इत्यर्वाचीनः पाठः ।
५ "परिमाणमभीप्सताम्" इत्यर्वाचीनः पाठः । "कर्मसमावापः कर्मपरिपाकः कर्मलेपो वा, यस्मिन् कस्मिन्? जीवे वा ईश्वरे वा? कर्मसमावापो यथा कथं भवति? येन च पुरुषेण उपगृह्यते प्रेर्यते? गुणानां सत्त्वादीनां मध्ये परिमाणम्, कस्याऽधिक्यमित्यादि । सत्त्वरजस्तमसामन्योन्यप्रविष्टभागानां परिमाणमियत्ताम्, गुणिनां गुणप्राप्तविकारवतां महदादिजीवानां परिमाणं तारतम्यं उत्कर्षापकर्षौ च ब्रूहि" इति प्राचीनम् । "परिमाणं सविस्तरम्" इत्यनन्ततीर्थीयपाठः ।
६ "कर्मसमवायः" इति क्वचित् । ७ "महदादीनाम्" इति क्वचित् ।
८ "सामर्थ्यं परिमाणम्" इति प्र. पाठः । ९ "मघवान् प्रधान इत्यादि" इति क्वचित् ।
१० "धर्मकृच्छ्रेषु जीविनाम्" इत्येके पठन्ति । "धर्मः कृच्छ्रेषु जीविनाम्" इत्यनन्ततीर्थीयः पाठः ।
११ "श्रेणीनामङ्गरक्षकाणां धर्मः कः? युद्धे प्रवर्तनीयो धर्मः क इत्यर्थः" इति यादवेन्द्रतीर्थाः । अनन्ततीर्थास्तु "श्रेणीनां सज्जनसमूहे मुख्यानाम्" इति व्याचक्षते ।

तत्त्वानां परिसङ्ख्यानं लक्षणं हेतुलक्षणम् ।
पुरुषाराधनविधिर्योगस्याऽध्यात्मिकस्य च[१] ॥ १९ ॥

हेतुलक्षणं ब्रह्मलक्षणम्[२] ॥ * ॥

योगेश्वरैश्वर्यगतिं लिङ्गभङ्गं च[३] योगिनाम् ।
वेदोपवेदधर्माणामितिहासपुराणयोः[४] ॥ २० ॥

योगतो लिङ्गभङ्गः पूर्वोक्तः । "पानेन ते देव" इत्यादि पश्चात् ॥ * ॥

यथाऽऽत्मतन्त्रो भगवान् विक्रीडत्यात्ममायया ।
विसृज्य च[५] यथा मायामुदास्ते साक्षिवद् विभुः ॥ २३ ॥

"द्वेधा वावाऽऽत्ममाया तद्रूपा तद्वशेति[६] । तद्वशया संसारयति स्वरूपया विमोचयत्युदास्ते तद्वशां विमुक्तस्थ[७] इतरयैनं रमयत्येष आत्मैष आनन्दः" इति सौकरायणश्रुतिः ॥ * ॥

अत्र प्रमाणं हि भवान्[८] परमेष्ठी यथाऽऽत्मभूः ।
अपरे ह्यनुतिष्ठन्ति[९] पूर्वेषां पूर्वजैः कृतम् ॥ २५ ॥

यस्मादनुतिष्ठन्ति तस्मात् परमेष्ठी प्रमाणम् ॥ * ॥

स उपामन्त्रितो राज्ञा कथायामिति सत्पतेः ।
ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि ॥ २७ ॥

---

१ "आत्मनि देहे विद्यमानः अन्तर्यामी अध्यात्मम्, तस्मिन् विषये प्रवर्तमानः आध्यात्मिकः । तस्य योगस्य ध्यानस्येत्यर्थः । विधिः कः?" इति प्राचीनटीका । "सर्वात्मभ्योऽधिकत्वादध्यात्मा परमात्मा । तत्सम्बन्धिनो योगस्य ध्यानस्य" इत्यनन्ततीर्थाः ।

२ "हेतुः मूलकारणं ब्रह्मेत्यर्थः" इति प्राचीनम् ।

३ "योगेश्वरैश्वर्यगतिर्लिङ्गभङ्गस्तु" इत्यर्वाचीनः पाठः । "योगेश्वराणां सनकादीनां ऐश्वर्यप्रकारं वा" इति प्राचीनम् । "योगिनां परमात्मनः उत्तमप्रसादयोगिनां तत्सम्पन्नानां लिङ्गशरीरनाशं च" इति च ।

४ वेदानामुपवेदानां तद्धर्माणामितिहासपुराणयोश्च सम्भव इत्युत्तरश्लोकस्थसम्भवपदेनान्वयः । तथाह्यनन्ततीर्थाः—"वेदा ऋगादयः । उपवेदाः आयुर्वेदधनुर्वेदगान्धर्वस्थापत्यान्युच्यन्ते । स्थापत्यं वास्तुलक्षणादिप्रतिपादकं विश्वकर्मीयादि शास्त्रम् । धर्माः वर्णाश्रमादिविहिताः । इतिहासो भारतम् । पुराणमष्टादशपुराणानि । वेदानामुद्धृतिरेव सम्भवः" इति ।

५ "विसृज्य वा" इत्यर्वाचीनः पाठः ।

६ "तद्वशा चेति" इति प्र. पाठः ।

७ "विमुक्तस्य" इति मुद्रितः प्र. पाठः प्रामादिकः ।

८ "अत्र प्रमाणं भगवान्" इत्यपि केषाञ्चित् पाठ इति प्रतीयते ।

९ "परे चेहानुतिष्ठन्ति" इत्यर्वाचीनाः ।

"बालोऽपि स गुरुत्वेन मुनिभ्यो ब्रह्मणा यतः । दत्तोऽतो ब्रह्मरातेति नाम वैयासिकेरभूत्[1]" इति ब्राह्मे[2] ॥ * ॥

आह[3] भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
ब्रह्मणे भगवता प्रोक्तं[4] ब्रह्मकल्प उपागते ॥ २८ ॥

"यत्र ब्रह्मान्तरोत्पत्तिर्ब्रह्मकल्पः स ईरितः" इति च ॥ * ॥

इति द्वितीयस्कन्धेऽष्टमोऽध्यायः

आत्ममायामृते राजन् परस्यानुभवात्मनः ।
न घटेतार्थसम्बन्धः स्वप्ने द्रष्टुरिवाञ्जसा[5] ॥ १ ॥

बहुरूप इवाऽभाति मायया बहुरूपया ।
रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥ २ ॥

यर्हि चायं महित्वे स्वे[6] परस्मिन् कालमाययोः ।
रमेत गतसम्मोहस्त्यक्त्वोदास्ते तदोभयम्[7] ॥ ३ ॥

---

१ "वैयासकेरभूत्" इत्यर्वाचीनः पाठः । २ "इति च ब्राह्मे" इति क्वचित् ।
३ "प्राह" इत्यर्वाचीनः पाठः ।
४ "भगवत्प्रोक्तम्" इति पाठान्तरम् । यादवेन्द्रतीर्थीयेऽपि तथा ।
५ "स्वप्नद्रष्टुरिवाञ्जसा" इत्यर्वाचीनाः । ६ "यर्हि वाव महिम्नि स्वे" इत्यर्वाचीनाः ।
७ "अस्य श्लोककदम्बस्य प्राचीनटीका—"यदधातुमत इत्यस्य प्रश्नस्योत्तरमाह—आत्ममायामिति । अनुभवात्मनः अज्ञानविरोधिस्वभावस्य, अत एव अञ्जसा स्वभावतः, परस्य विकारस्वभाववद्व्यतिरिक्तस्य अर्थसम्बन्धः दुःखकार्श्यादीनां चेतने आरोपपुरःसरं चेतनस्य नीचतादिसम्पादक इति भावः । आत्ममायामृते ईश्वरसामर्थ्यं विहाय न घटेत । जडापेक्षया चेतनस्य प्रभुत्वादिति भावः । एतदनुरूपं दृष्टान्तमाह—स्वप्न इति । द्रष्टुः जीवस्य अर्थसम्बन्धः वासनापरिणतदेहसम्बन्धः आत्ममायां तैजसेच्छां विना यथा न घटते तथेहापि जडमात्रेण चेतनस्य बन्धाभावेऽपि परमात्मप्रेरितप्रकृत्या बन्ध इत्यर्थः ॥ * ॥

"उक्तबन्धस्यानुवृत्तौ कारणमाह—बहुरूप इवाऽभातीति । बहूनि रूपाणि देहादिविकाराः यस्याः तया मायया भूतादिप्रकृत्या बहुरूप इव नानादेहधर्मसम्बन्धवानिव आभाति कृशोऽहं स्थूलोऽहं चक्षुष्मानित्यादिप्रतीतिविषयो भवति । अस्याः इन्द्रियसङ्घातदेहरूपायाः प्रकृतेः गुणेषु विषयेषु रममाणः विषयानुभवेन वर्तमानः, ममैवायं देहः, भोग्यमपि मदीयमेव, अहमेव करणैः सर्वप्रयोजनलाभाय व्यापारकर्ता इति मन्यते । एवम्बुद्ध्या विषयलाभार्थं पापादिकं कुर्वन् बद्ध्यत इति भावः ॥ * ॥

आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतम् ।
ब्रह्मणेऽदर्शयद् रूपमव्यलीकव्रतादृतः[1] ॥ ४ ॥

परस्य अर्थव्यतिरिक्तस्य[2] । "यद्धातुमतः—" इत्यस्य ह्युत्तरम् ॥ * ॥ [3]यतो भगवदुक्तं प्रमाणमतस्तदुक्तं पुराणं त्वत्प्रश्नानामुत्तरत्वेन वक्ष्ये[4] ॥ * ॥

"अशरीरस्य जीवस्य शरीरोत्पत्तिकारणम् । ईश्वरेच्छा प्राथमिका तां विना नहि किञ्चन । द्वितीया प्रकृतिः प्रोक्ता तद्रूपा हि गुणास्त्रयः । तेषां सम्पातजो भावो ममाहमिति या मतिः । देहात् परस्य देहित्वमहम्भावमृते कुतः । यथा रजस्तमोभावैर्विना स्वाप्नो[5] न जायते । निद्राकामाद्यभावेन तद्वद् देहः क्व तान् विना । तस्मात् प्रकृत्यैव पुमान् मानुषादिविहारया[6] । मानुषादिरिवाऽभाति नित्यचैतन्यरूपवान् । यदा स्वरूपं जानाति कालप्रकृतिवर्जितम्[7] । वासुदेवप्रसादेन तदा मुक्तो भवत्यसौ" इति भविष्यत्पुराणे ॥ * ॥

दिव्यं सहस्राब्दममोघदर्शनो[8] जितानिलात्मा विजितोभयेन्द्रियः ।
अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः[9] ॥ ८ ॥

"मुक्त्युपायमाह—यर्हि चायमिति । यर्हि यस्मिन् काले, ईश्वरानुग्रहप्राप्तश्रवणादिसम्पत्तिकाल इत्यर्थः । महित्वे महिमस्वभावे परमात्मनि, रमेत ध्यानापरोक्षादिनेति भावः । तदा कालमाययोः परस्मिन्, कालप्रकृतिप्राप्ताद् विशिष्टाकाराद् विलक्षणे, स्वे जीवस्वरूपे, गतसम्मोहः अहङ्कारममकाररहितः, अहं दुःखीत्याद्यारोपितरहितः सन्, उभयं प्रकृतिकालात्मकं बन्धं त्यक्त्वा तिरस्कृत्येत्यर्थः । उदास्ते दुःखानुषक्तविषयादिसम्पादने यत्नरहितो भवति । पूर्णसुखानुभवसम्पन्नत्वादिति भावः" इति ॥ * ॥

१ "ब्रह्मणो दर्शयन् रूपमव्यलीकव्रतादृतः" इत्यर्वाचीनः पाठः । प्राचीनपाठे पूर्वोत्तरार्द्धे भिन्नवाक्ये । उत्तरार्द्धं चोत्तरश्लोकेनान्वेति । तथाहि यादवेन्द्रतीर्थाः—"त्वत्प्रश्नस्योत्तरत्वेन भागवतं वक्ष्य इत्याह—आत्मतत्त्वेति । परमात्मतत्त्वस्य अनारोपितरूपस्य विशुद्ध्यर्थं सम्यगवधारणार्थं यत् ऋतं प्रमाणरूपं भागवतं आह अतस्तद् वक्ष्ये इति शेषः । ददृशे येन तद्रूपमित्यस्योत्तरमाह—ब्रह्मणेऽदर्शयदिति । व्यलीकं अप्रियम्, लौकिकफलार्थं प्राप्तम्, अव्यलीकं ईश्वरप्रसादार्थं कृतं यद् व्रतं तपः, तेन आदृतः प्रीतिमान् भगवान् स्वरूपं ब्रह्मणे चतुर्मुखायादर्शयत्" इति ।

२ परस्य ह्यर्थव्यतिरिक्तस्य" इति क्वचित् ।

३ चतुर्थश्लोकव्याख्यानरूपमिदं वाक्यं प्र. पाठे "अशरीरस्य—" इत्यादि "इति भविष्यत्पुराणे" इत्यन्तं समग्रं प्रमाणवचनं पठित्वा तदन्ते पठ्यते ।

४ "वक्ष्यते" इति क्वचित् ।

५ "स्वप्नो–" इति प्र. पाठः ।

६ "मानुषादिविकारया" इति प्र. पाठः । कोशेषु च क्वचित् तथा ।

७ "–वर्जितः" इति क्वचित् ।

८ "अमोघदर्शनः फलसम्पादनसमर्थज्ञानवान् । मोघदर्शनं भ्रमः । तद्रहितो वा" इति प्राचीनम् ।

९ "समाहितः जामितारहितः, ध्येये एकाग्रतायुक्तो वा, चित्तचापलरहितो वा" इति च ।

तपो ब्रह्म । "तपसोऽध्यजायत" इति श्रुतेः[१] । अखिललोकप्रकाशनं[२] तत् तदाऽऽलोचयामास । तपतां तपीयानित्यनेनात्युत्तमोत्तमत्वमुक्तं भवति ।

"महन्महीयसामादि[३] ब्रूयादत्युत्तमोत्तमम् । यच्चाधिकं[४] पदं किञ्चिज्ज्ञेयोऽर्थस्तत्र चाधिकः" इति व्यासनिरुक्ते । "तपोरूपं परं ब्रह्म ब्रह्माऽचिन्तयदञ्जसा" इति षाड्गुण्ये ॥ * ॥

तस्मै स्वलोकं[५] भगवान् सभाजितः सन्दर्शयामास परं न यत् पदम् ।
व्यपेतसङ्क्लेशविमोहसाध्वसं[६] सन्दृष्टवद्भिर्विबुधैरभिष्टुतम् ॥ ९ ॥

यत् यतः[७] ॥ * ॥

न वर्तते[८] यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं नच कालविक्रमः ।
न यत्र माया किमुतापरे[९] हरेरनुव्रता यत्र सुरासुरार्चिताः[१०] ॥ १० ॥

---

१ "इति श्रुतिः" इति क्वचित् ।

२ "–प्रकाशनं यत् तदालोचयामास" इति प्र. पाठः । "अखिललोकतापनं सूर्यादिषु स्थित्वा सकललोकप्रकाशकम्" इति यादवेन्द्रतीर्थाः । "सृष्ट्या अखिललोकप्रकाशनम्" इत्यनन्ततीर्थाः ।

३ "महान् महीयसामादिम्" इति प्र. पाठः प्रामादिकः । "महान् महीयसामादि" इति क्वचित् । आदिपदेन महतां महीयान् इति विपर्ययप्रयोगः, तपतां तपीयानित्यादि प्रयोगान्तरं च गृह्यते ।

४ "यत्राधिकं वदेत् किञ्चित्" इति प्र. पाठः । "यच्चाधिकं वदेत् किञ्चित्" इति प्राचीनकोशेषु पाठान्तरम् । "यच्चाधिकं भवेत् किञ्चित्" इति च । प्रतने विजयध्वजीयकोशेऽपि—"यच्चाधिकं पदं किञ्चित्" इत्येव पठ्यते ।

५ "तस्मै स लोकम्" इति पाठान्तरम् । "स्वलोकं श्वेतद्वीपम् । वैकुण्ठमिति च वर्णयन्ति" इति प्राचीनम् ।

६ "व्यपेतसङ्क्लेशविमुक्तसाध्वसम्" इत्यनन्ततीर्थसम्मतः पाठः । "व्यपेतसङ्क्लेशं च तद् विमुक्तसाध्वसमिति विग्रहः" इति तद्वचनम् । "सङ्क्लेशाः विविधदुःखानि, विमोहः अतस्मिन् तद्ग्रहः, परायत्तताभ्रमः, स्वस्मिन् दुःखतादात्म्यभ्रमश्च । साध्वसानि भयानि । दुःखतत्कारणरहित इति भावः" इति यादवेन्द्रतीर्थाः ।

७ इतः परं प्र. पाठे—"यत्तदित्यादयः शब्दाः पञ्चम्यन्ताः प्रकीर्तिता इति च" इत्यधिकं पठ्यते । यद् यतः इत्यतः परं "मायातीतत्वात्" इत्युत्तरश्लोकभाष्यमत्राप्यनुवर्तते–यद् यतः स्वलोकात् परमुत्तमं पदं नास्ति स्वलोकस्य मायातीतत्वादिति । एतेन एतच्छ्लोकोक्तप्रमेयस्य उत्तरश्लोके न यत्र मायेत्यादि कारणप्रदर्शनं क्रियत इति पूर्वोत्तरश्लोकयोर्हेतुहेतुमद्भावः सूचितो भवति ।

८ "प्रवर्तते" इत्यर्वाचीनाः पठन्ति ।

९ "माया ज्ञानाच्छादिका प्रकृतिः गुणकारणं च नास्ति, अपरे चिन्तासन्तापादयः न सन्तीति किमुत" इति, "माया स्वगुणाच्छादिका बन्धकशक्तिः न वर्तते । अपरे प्राकृतशरीरधर्माः व्याध्यादयस्तत्र न वर्तन्त इति किमुत" इति च प्राचीनम् ।

१० असुरार्चिताः असुरपूजिताः सुराः रुद्रादयः अनुव्रताः ईश्वरेच्छानुसारिणः यत्र वर्तन्ते । परस्परं विरुद्धमतिरहिता इति भावः । अथवा सर्वदुःखनिरसनात् असुः परमात्मा, तस्मिन् ध्यानाद्यावृत्त्या रमन्ते क्रीडन्तीत्यसुरा मुक्ताः । तैरर्चिताः सुराः ब्रह्मादयः" इति यादवेन्द्रतीर्थाः । "असुषु केवलचिदानन्दशरीरेषु रमन्त इत्यसुराः । सर्वैर-

मायातीतत्वात्[1] ॥ * ॥

श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः ।
प्रेङ्खश्रिता याः कुसुमाकरानुगैः[2] विगीयमाना प्रियकर्म गायती[3] ॥ १३ ॥

प्रेङ्खश्रिताः याः विभूतयः ॥ * ॥

ददर्श [4]तत्राखिलसात्त्वतां पतिं श्रियःपतिं यज्ञपतिं [5]जगत्पतिम् ।
सुनन्दनन्दप्रबलार्हणादिभिः स्वपार्षदमुख्यैः परिसेवितं विभुम्[6] ॥ १४ ॥

र्चितत्वादर्चिताः । सुरा एवासुरार्चिताः सुरासुरार्चिताः" इत्यनन्ततीर्थाः । आचार्या अप्याहुः–"असुरूपसुरैश्च वन्द्यः" इति तात्पर्यनिर्णये । अत एवात्र न पृथग् व्याख्यानम् । "असुरैश्च भक्तैरर्चिताः" इत्यपि व्याचक्षते ।

१ पूर्वोत्तरश्लोकयोर्हेतुहेतुमद्भावपरतयेदं पुरस्तात् व्याख्यातम् । अथ च व्याख्यानान्तरम् । किमुतापरे इत्युक्तं कैमुत्यं स्पष्टयति—मायातीतत्वादिति । मायातीतत्वाद् यत्र मायैव नास्ति तत्रापरे मायाविकारा नेति किमुत? असुरशब्दस्य असुरमणरूपार्थान्तरपरत्वेऽपीयमेव गमनिका । नहि मायाप्रधानैरसुरैरर्च्यन्ते मुक्ताः । मायातीतत्वादिति सत्त्वरजस्तमांसि तत्र न वर्तन्त इत्यत्राप्ययं हेतुः । तेषां मायागुणत्वात् तस्य च लोकस्य मायातीतत्वात् । मायाबद्धे हि कालस्यापि विक्रमः । न मायातीत इति । तदेवमेकेन पदेन समस्तं पद्यं विवृतं भवति । तथा च न यत्र मायेत्येतत् देहलीदीपन्यायेन कारणसमर्पकतया पूर्वेणोत्तरेण च सम्बध्यत इत्यभिहितं भवति । हेतुगर्भं हि विशेषणं न यत्र मायेति । तदेतदाह—मायातीतत्वादिति ।

२ "प्रेङ्खं श्रिता या कुसुमाकरानुगैः" इति प्र. पाठः ।

३ "गायति" इत्यपि केचित् पठन्ति । अत्र प्राचीनटीका–"यत्र लोके याः प्रेङ्खं श्रिताः परमात्मास्थितरत्नडोलायां परमात्मपादसंवाहनार्थमास्थिताः । परमात्मस्थितरत्नडोलासुवर्णरज्जुपरिग्रहेण डोळाचालनं कुर्वन्त्य इति वाऽर्थः । ताभिः विभूतिभिः स्वमूर्तिभिः । कुसुमाकरः वसन्तः तस्यानुगैः मधुकरादिभिः । कबरकुसुमसुगन्धमधुलोलुपैरिति भावः । विगीयमाना उपगानं प्रापिता । स्वयं गीयमानेव स्थितेति वा प्रियकर्म भक्तपालनादिकं गायती श्रीः बहुधा रूपिणी सती चामरव्यजनादिभिः परमात्मसेवार्थमिति भावः । बहुमूर्तिभिरुपेता । रूपिणी सौन्दर्याढ्येति वा । उरुभिः मुक्तामुक्तब्रह्मादिभिः गीयत इत्युरुगायः परमात्मा । तस्य पादयोः श्रीचरणयोः बहुधा मानं सेवां करोति तं लोकं ददर्श । स्वलोकस्थविचित्रवस्तुप्रदर्शनं च सृष्ट्युपयुक्तसदृशवस्तुज्ञानार्थम्" इति । "प्रेङ्खं श्रिताः भगवद्रूपैः सहाऽन्दोळेषु स्थिताः । कुसुमाकरानुगाः भृङ्गकोकिलादयः । तद्वदाकारमिता मुक्तब्रह्मादयः कुसुमाकरानुगा इत्युच्यन्ते । तैर्विविधं गीयमाना ! स्वयं मुकुन्दस्य भर्तुः कर्म गायती अनन्तवेदादिभिर्गायन्ती मानं करोति" इत्यनन्ततीर्थाः ।

४ "ददर्श यत्राखिल–" इत्यपि क्वचित् पाठान्तरम् । ५ "यज्ञपतिं मुक्तेन्द्रादीनां पतिम्" इति प्राचीनम् ।

६ "सुनन्दनन्दप्रबलानां द्वारपालानां अर्हणादिभिः पूजादिभिः उपचारैश्च परिसेवितम् । स्वपार्षदमुख्यैः ब्रह्मरुद्रविष्वक्सेनादिभिः परिसेवितम् । विभुं मुक्तनियमनेऽपि समर्थम्" इति यादवेन्द्रतीर्थाः । "विभुं व्याप्तम् । सुनन्दादिभिर्भृत्यैः पूर्वमुक्तैर्ब्रह्मादिभिश्च परितः सेवितम्" इत्यनन्ततीर्थाः । एतत्पक्षे अर्हण इत्यपि पार्षदेष्वन्यतमस्य नाम । अन्येऽपि तथैव व्याचक्षते ।

16

"सत्त्वं तु शोभनत्वं स्यात् तद्युक्ताः सात्त्वता मताः" इत्यध्यात्मे । "मुक्तैः पार्षदैः[१] पूर्वैर्ब्रह्माद्यैश्चैव संयुतम् । ब्रह्मा ददर्श तपसा भगवन्तं हरिं प्रभुम्" इति गारुडे ॥ * ॥

अभ्यर्हणीयासनमास्थितं परं[२] वृतं चतुःषोडशपञ्चशक्तिभिः ।
युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन् रममाणमीश्वरम् ॥ १६ ॥

[३]इच्छाद्या मोचिकाद्याश्च अणिमाद्याश्च शक्तयः । प्रदिष्टा वासुदेवाद्या दामोदरपरास्तथा । अङ्गानि विमलाद्यास्तु प्रह्व्याद्यात्मादिका मताः । एवं षोडशभिश्चैव पञ्चभिश्च हरिः स्वयम् । चतुर्भिश्च वृतो नित्यं तत्स्वरूपाश्च शक्तयः" इति भागवततन्त्रे ॥ * ॥

[४]मनीषितानुभावोऽयं मम लोकावलोकनम् ।
यदुपश्रुत्य रहसि चचर्थ[५] परमं तपः ॥ २१ ॥

---

१ "मुक्तैः स्वपार्षदैः" इति प्र. पाठः । प्राचीनपाठे संहितायां 'पार्ष्वदैः' इति विश्लिष्य पठनेन पादस्याष्टाक्षरत्वं भवति । भवन्ति चैतादृशाः प्रयोगा वेदवैदिकेषु बहव इति पूर्वमेवोक्तम् ।

२ "विभुम्" इति क्वचित् पाठः । "अध्यर्हणीयासनं रत्नासनं आस्थितम् । परं सम्पूर्णगुणम्, सर्वविलक्षणमिति वा" इति प्राचीनम् । "अभ्यर्हणीयासनं मुक्तशेषात्मकं योगसिंहासनमास्थितम् । मुक्तशेषपर्यङ्के शयानम्" इत्यनन्ततीर्थाः । तथाच "अभ्यर्हणीयासनमास्थितम्" इति तत्सम्मतः पाठः । श्रीधरादयोऽपि तथैव पेठुः ।

३ इच्छाद्याः इच्छा ज्ञानं क्रिया बलमिति चतुःशक्तय इत्येकः पक्षः । अथ पक्षान्तरम्– प्रह्व्यादीति । विमलादिषु नवसु स्वरूपशक्तिष्वन्त्याश्चतस्रः चतुःशक्तयः । प्रह्वी, सत्या, ईशाना, अनुग्रहा चेति । अथान्योऽपि पक्षः —आत्मादिका मताः । आत्मान्तरात्मज्ञानात्मपरमात्माख्याश्चतुःशक्तय इति । अथ मोचिकाद्या अष्टौ, अणिमाद्याश्चाष्टाविति आहत्य षोडश शक्तयः । "मोचिका चैव सूक्ष्मा च तथा सूक्ष्मामृताभिधा । ज्ञानामृताऽऽप्यायिनी च व्यापिनी व्योमरूपिणी । अनन्ता चेति सम्प्रोक्ता मोचिकाद्यास्तु शक्तयः" इत्युक्ता मोचिकाद्या अष्टौ । अणिमा महिमा चैव लघिमा गरिमा तथा । प्राप्तिः प्राकाश्यमीशित्वं प्राकाम्यं चेति सिद्धयः" इत्यणिमाद्या अष्टौ । तदेतदुक्तम्—मोचिकाद्याश्च अणिमाद्याश्च षोडश शक्तयः प्रदिष्टा इति । "अणिमा महिमा चैव गरिमा लघिमा तथा प्राप्तिः प्राकाम्यमीशित्वं वशित्वम्" इत्युक्ता वा अणिमाद्याः । यादवेन्द्रतीर्थीये तु—"मोचिका–सूदना–सूक्ष्मा–अमृता–ज्ञानामृता–आप्यायिनी–व्यापिनी– व्योमरूपिणी– अनन्ता– निर्मला– लघिमा– प्राप्ति–प्राकाश्य–ईशित्व–वशित्व–प्राकाम्याख्याभिः" इति व्याख्यातम् । अस्मिन् पक्षे मोचिकाद्या दश शक्तयो भवन्ति । मूलं तु मृग्यम् । अथ च पक्षान्तरम्– वासुदेवाद्याः वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाश्चत्वारः, दामोदरपराः केशवादिदामोदरान्ताः द्वादश चेत्याहत्य वा षोडशशक्तयः । पञ्चशक्तय उच्यन्ते– अङ्गानीति । मूलमन्त्रे पञ्चाङ्गेषु न्यस्यमानाः पञ्चमूर्तय इत्यर्थः । तदुक्तमनन्ततीर्थीये– "क्रुद्धोल्कमहोल्कवीरोल्कद्युल्कसहस्रोल्काख्याः पञ्चशक्तयः" इति । अथ चार्थान्तरम्– विमलाद्यास्तु इति । विमलादिष्वाद्याः पञ्च । तदुक्तं यादवेन्द्रतीर्थीये– "विमलोत्कर्षिणीज्ञानाक्रियायोगाख्याभिः पञ्चशक्तिभिर्वृतम्" इति ।

४ "मनीषितस्य ध्यानरूपस्य त्वत्तपसः अनुभावः फलम्" इत्यनन्ततीर्थाः । "मनीषितस्य ममानुमतस्य तपसः अनुभावः महिमा इति यादवेन्द्रतीर्थाः ।

५ "चकर्थ" इति पाठान्तरम् ।

मनीषितं तपः ॥ * ॥

प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते ।
[1]तपो मे हृदयं साक्षादात्माऽहं तपसोऽनघ ॥ २२ ॥

सृजामि तपसैवेदं ग्रसामि तपसा पुनः ।
बिभर्मि तपसा विश्वं वीर्यं मे दुस्तरं तपः[2] ॥ २३ ॥

कर्मविमोहिते इदं कार्यमित्यजानति । हृदयं प्रियम्—

"हृदयं प्रियमुच्चित्कं[3] कान्तमित्यभिधीयते" इत्यभिधानात् । "तपः प्रियं सदा विष्णोस्तपसैवाऽप्यते हरिः । स्वयं च तपसैवेदं बिभर्ति ज्ञानमेव हि । तपःशब्दाभिधं प्रोक्तं ज्ञानरूपो हरिर्यतः । ज्ञानवीर्यो ज्ञानबलो ज्ञानानन्द उदीरितः[4]" इति बृहत्संहितायाम्[5] ॥ * ॥

ज्ञानं परमगुह्यं मे यद् विज्ञानसमन्वितम्[6] ।
सरहस्यं तदङ्गं[7] च गृहाण गदितं मया ॥ ३० ॥

"येनयेन यथा ज्ञात्वा नियतं मुक्तिराप्यते । तद् विज्ञानमिति प्रोक्तं ज्ञानं साधारणं स्मृतम्" इति वामने ॥ * ॥

अहमेवाऽसमग्रे च[8] नान्यद्[9] यत् सदसत् परम् ।
पश्चादहं त्वमेतच्च[9] योऽवशिष्येत सोऽस्म्यहम् ॥ ३२ ॥

---

१ "जगत् सृजेति वचनं विहाय तपः कुर्विति किमर्थमादिष्टमित्यत आह–तप इति । मे तपः मज्ज्ञानं साक्षान्मुख्यतो मम प्रियम् । तत् कुतः? अहं तपस आत्मा ज्ञानस्वरूप इत्यर्थः" इत्यनन्ततीर्थाः । "तपसः ज्ञानस्य साक्षात् आत्मा स्वरूपः । साक्षादिति न भिन्नभिन्न इत्यर्थः" इति यादवेन्द्रतीर्थाः ।

२ "दुश्चरं तपः" इत्यर्वाचीनाः । "इदं जगत् तपसा ज्ञानेन सृजामि, ग्रसामि संहरामि, बिभर्मि पालयामि । सर्वसुरासुरैर्दुस्तरं मे वीर्यं पराक्रमश्च तपः, ज्ञानरूपं नतु जडमित्यर्थः" इत्यनन्ततीर्थाः । "किञ्च ज्ञानरूपं तपः मे मयाऽपि दुस्तरमुपेक्षणीयं नेत्यर्थः । अथवा मे मद्विषयं तपः दुस्तरं फलार्थिना उपेक्षणीयं न भवतीत्यर्थः" । इति यादवेन्द्रतीर्थाः ।

३ "प्रियं हृदयमुद्रिक्तम्"इति प्र. पाठः प्रामादिकः । "प्रियं हृदयमुत्सिक्तम्" इति क्वचित् । "प्रियं हृदयमुच्चित्कम्" इति च विजयध्वजीयमूलकोशे ।

४ "उदाहृतः" इति प्र. पाठः । ५ "ब्रह्मसंहितायाम्" इति क्वचित् ।

६ "विज्ञानं नियतमुक्तिकारणं बिम्बविषयज्ञानम् । तेन समन्वितं ज्ञानं वेदपञ्चरात्रादिज्ञानम्" इति प्राचीनम् ।

७ "सरहस्यं उपनिषज्ज्ञानसहितम् । तदङ्गं वेदाङ्गनिरुक्तादिज्ञानं च" इति च । "तदङ्गं तयोर्ज्ञानविज्ञानयोः साधनं अनन्तवेदपुराणादिकम्" इत्यनन्ततीर्थाः । ८ "अहमेवाऽसमेवाग्रे नान्यद्" इति प्र. पाठः ।

९ "यदेतच्च" इत्यर्वाचीनः पाठः ।

परं स्वतन्त्रं न ।

"विष्णोरधीनं प्राक् सृष्टेस्तथैव च लयादनु । अस्य सत्त्वप्रवृत्त्यादि विशेषेणाभिगम्यते । स्वातन्त्र्यं स्थितिकाले तु कथञ्चिद् बुद्धिमोहतः । प्रतीयमानमपि तु तस्मान्नैवेति गम्यताम्[१] । जनिष्येऽहं लयिष्येऽहमिति[२] नह्यभिसन्धितः । अतो जीवनमप्येतद्[३] भवेदीशाभिसन्धितः[४] । अतः स्वरूपभेदेऽपि ह्यात्मैवेदमिति श्रुतिः । वदत्यस्येशतन्त्रत्वाद् यथाऽशक्तस्त्वसन्निति[५] । विद्यन्ते[६] हि तदा जीवाः कालकर्मादिकं तथा । क्वान्यथा हि पुनः सृष्टिः पूर्वकर्मानुसारिणी" इति ब्रह्मतर्के ।

[त्वमेतच्च परं न भवति स्वतन्त्रं न[७]] ॥ * ॥

ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चाऽऽत्मनि ।
तद् विद्यादात्मनो मायां यथाभासो यथातमः[८] ॥ ३३ ॥

यथा महान्ति भूतानि भूतेषूच्चावचेषु तु[९] ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम्[१०] ॥ ३४ ॥

---

१ "गम्यते" इति प्र. पाठः ।
२ "हनिष्येऽहं तपिष्येऽहमिति" इति क्वचित् ।
३ "लयो जीवितमप्येतत्" इति क्वचित् ।
४ "भवेदीशाभिसंहितम्" इति प्र. पाठः ।
५ "यदशक्तस्त्वसन्निति" इति क्वचित् प्र. पाठः ।
६ "भिद्यन्ते" इति क्वचित् ।

७ क्वचित् कोशेष्विदं वाक्यं न पठ्यते । प्राचीनटीकाकारणां पक्षे च नेदं वाक्यं भाष्यगतम् । तथाहि—"पश्चात् सृष्ट्यनन्तरं त्वं चतुर्मुखः महदादिदेहविशिष्टः, एतत् सदसच्च भवति । अहं चास्मि पालनकर्ता भवामि" इति यादवेन्द्रतीर्थाः । "पश्चात् सृष्टेरूर्ध्वं स्थितिकाले अहं चास्मि, त्वं चासि, एतज्जगच्चास्ति । तदानीं सदसतोरपि किञ्चित् स्वातन्त्र्याभासस्य विद्यमानत्वात्" इत्यनन्ततीर्थाः । विजयध्वजीयेऽपि तथा । अथचेदं वाक्यं भाष्यगतमिति पक्षे इत्थं योजना—यद्यपि सृष्टेः पश्चात् अहमासम्, त्वमासीः, एतच्च जगदासीत् । तथाऽपि यथाऽहं पर एवाऽसं तथा त्वमेतच्च परं न भवति । परमिति किं भिन्नम्? नेत्याह पूर्वोक्तं ज्ञापयन्—स्वतन्त्रं नेति । "त्वमेतच्च परं न भवेत्" इति क्वचित् प्र. पाठः । कोशान्तरे च द्वितीयनञ्विरहितं "परं न भवति स्वतन्त्रम्" इतीयदेव पठ्यते ।

८ "यद्यपि आत्मनि यथा यथावत् अनारोपितं यत् तमः अज्ञानम्, यथा अनारोपितः आभासः कर्मप्रेरकः जीवश्च प्रतीयेत प्रतीयते । अथापि आत्मनि सर्वसामर्थ्योपेते परमात्मनि अज्ञानकर्मादिकं अर्थमृते स्वकार्यमृते विकारासम्पादकमेव प्रतीयते । आत्मनि अर्थं जनयत् न प्रतीयते । निरनिष्टो निरवद्य इत्यादिश्रुतेः । तत् प्रकृतिरूपाज्ञानकर्मजीवादिकं आत्मनः सर्वकल्याणगुणसम्पन्नस्य मायां सामर्थ्यं विद्यात् । सामर्थ्याधीनं विद्यादित्यर्थः । पुरुषोऽयं ग्राम इतिवदभेदोक्तिः । यद्वा अधीनत्वं षष्ठ्यर्थः । मायां अज्ञानादिकं आत्माधीनं विद्यादित्यर्थः" इति प्राचीनटीका । यथाभासः, यथातम इति समस्ते पदे । यथेति भिन्नं वा ।

९ "भूतेषूच्चावचेष्वनु" इत्यर्वाचीनः पाठः । "उच्चावचेषु च" इति च पाठान्तरम् ।

१० "उच्चावचेषु स्थूलसूक्ष्मेषु देहेषु प्रविष्टानि महान्ति भूतानि तेजोबन्नानि अप्रविष्टानि बहिरपि वर्तन्ते । अतः देहापेक्षारहितानि । तथा तेषु देहेषु स्थितोऽहं तेषु स्थितो न भवामि । व्याप्तिस्वाभाव्यात्" इति प्राचीनटीका ।

अर्थवदिव प्रतीयते । नच परमात्मन्यर्थवत् प्रतीयते । अर्थं प्रयोजनमृते । नहि जीवप्रकृतिभ्यामीश्वरस्यार्थः ।

"मुख्यतो विष्णुशक्तिर्हि मायाशब्देन भण्यते । उपचारतस्तु प्रकृतिर्जीवश्चैव हि भण्यते" इति च[१] ।

यथाभासो जीवः ॥ * ॥

"सर्वं परे स्थितमपि नैव तत्रेति भण्यते । यतो हरेर्न जीवेन जीवनं न हरौ ततः । जीवः प्रकृतिरप्यत्र यतो नैव हि बन्धकृत् । कर्म चाफलदातृत्वात्[२] कालश्चापरिणामनात्[३] । यथा छत्रधराद्यास्तु रथस्था अपि सर्वशः । रथिनो नैव भण्यन्त एवं हरिगता अपि । यथा महान्ति भूतानि शरीरेषु बहिस्तथा । एवं हरिश्च भूतेषु बहिश्च व्यप्तिहेतुतः । तस्मात् तत्स्थो न तत्स्थश्च प्रोच्यते हरिरीश्वरः" इति च ॥ * ॥

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा[४] ॥ ३५ ॥

अन्यभावाभावकाले देशे [तद्विद्यमानाविद्यमानशक्तिमान्[५]] चेत्यन्वयव्यतिरेकः[६] ॥ * ॥

"पञ्च महाभूतानि" इत्यनन्ततीर्थविजयध्वजतीर्थौ । "महान्ति भूतानि आकाशवायुतेजांसि भौतिकेषु प्रविष्टान्यप्यप्रविष्टान्येव भेदच्छेदनाद्यस्पृष्टत्वात्" इति वीरराघवादयः ।

१ क्वचिदत्र 'च'कारो न पठ्यते । २ "कर्म वाऽफलदातृत्वात्" इति पाठान्तरं कोशेषु ।

३ "कालश्चापरिणामवान्" इति क्वचित् ।

४ "परमात्मनः स्वरूपं सर्वत्र सर्वदा अन्वयव्यतिरेकाभ्यां जगताऽन्वितदेशे जगताऽन्वितकाले चेत्यन्वयेन, जगद्रहितदेशे जगद्रहितकाले चेति व्यतिरेकेण स्थितं स्यादिति यत् प्रमेयम्, सर्वजगत्सहितदेशकालयोः, सर्वजगद्रहितदेशकालयोश्च यत् प्रवर्तते एतावदेव परमात्मतत्त्वजिज्ञासुना जिज्ञास्यम्" इत्यनन्ततीर्थाः । "अन्वयव्यतिरेकाभ्यां कार्याणां भावाभावाभ्यां युक्ते काले देशे च, सर्वस्मिन् काले सर्वस्मिन् देशे च जिज्ञास्यानां मध्ये यत् सर्वशक्त्युपेतं स्यात् तदेतावदेव ब्रह्मेत्येव, मनोविक्षेपसमये गुणान्तरध्यानस्य अयोगेऽपीति भावः, जिज्ञास्यं ध्येयम् । उक्तं च 'ब्रह्मदृष्टिरुत्कर्षात्' इति । बहुषु ध्येयेषु एतावदेव सदा ध्येयमित्यर्थः" इति यादवेन्द्रतीर्थाः । "अन्वयव्यतिरेकाभ्यां अयोगान्ययोगव्यवच्छेदाभ्यां जिज्ञास्यम् । एवं जिज्ञास्यमेवेत्यन्वयः । नान्यज्जिज्ञास्यमिति व्यतिरेक." इत्यपि केचिद् व्याचक्षते । तथाह्ययोगान्ययोगव्यवच्छेदबोधिनी श्रुतिः—"तमेवैकं जानथ आत्मानमन्या वाचो मुञ्चथ" इति । "तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते" इत्यादि च । "अन्वयव्यतिरेकाभ्यां विधिनिषेधाभ्याम्" इत्यन्ये । विधिमुखेन निषेधमुखेन च भगवानेव जिज्ञास्य इति । तद्यथा स्मर्तव्यः सततं विष्णुरिति विधिमुखेन । विस्मर्तव्यो न जातुचिदिति निषेधमुखेन । तदेतदेवोक्तम्—"मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्य इत्यहम्" इत्यादि ।

५ [ ] एतदन्तर्गतो भागः बहुषु प्राचीनकोशेषु न पठ्यते । प्राचीनटीकाकृद्भिरपरिगृहीतश्च ।

६ – "व्यातिरेकौ" इति प्र. पाठः ।

अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलिः[१]।
सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ॥ ३८ ॥

"सर्वस्यापि प्रधानत्वात् स सर्वमय ईर्यते" इति च ॥ * ॥

मायां [२]विविदिषुर्विष्णोर्मायेशस्य महात्मनः[३]।
महाभागवतो राजन् पितरं पर्यतोषयत् ॥ ४१ ॥

मायां माहात्म्यं विविदिषुः। अन्येषां माहात्म्यपतेः[४]।

"मुख्यतो विष्णुमाहात्म्यं मायाशब्दोदितं भवेत्। प्रधानत्वाच्च[५] मातृत्वान्मेयत्वाच्चैव तस्य हि[६]" इति च ॥ * ॥

नारदः प्राह मुनये सरस्वत्यास्तटे नृप।
ध्यायते ब्रह्म परमं व्यासायामिततेजसे[७] ॥ ४४ ॥

"हरिर्व्यासादिरूपेण सर्वज्ञोऽपि स्वयं प्रभुः। शृणोति नारदादिभ्यो मोहायैषां प्रसिद्धये[८]" इति पाद्मे ॥ * ॥

यदुताहं त्वया पृष्टो वैराजात् पुरुषादिदम्।
यथाऽऽसीत् तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ॥ ४५ ॥

---

१ "हरयेऽवहिताञ्जलिः" इति पाठान्तरम्। "अन्तर्हितेन्द्रियार्थाय इन्द्रियविषयस्वरूपाच्छादकाय विहिताञ्जलिः सर्वभूतमयः, सर्वभूतं विद्यमानं जगत् तस्य प्रधानः, भूतानां प्रधान इति वा। सर्वगुणसंपन्न इति भावः। पूर्ववत् पूर्वकल्पानुसारेण, ब्रह्मकल्पानुसारेण वा, विश्वं ससर्ज" इति प्राचीनम्।

२ "विविदिषन्" इति प्र. पाठः।

३ "महामुनिः" इति पाठान्तरम्। "नारदः महात्मनः पूर्णस्वभावस्य मायेशस्य, माया माहात्म्यं अन्यदीयम्, तदीशस्य विष्णोः सम्बन्धिनीं मायां अमितमाहात्म्यं विविदिषुः" इति प्राचीनम्। "मायेशस्य लक्ष्मीकान्तस्य" इत्यनन्ततीर्थः। "मायया कृपया, माया वयुनं ज्ञानमिति कोशात् ज्ञानेन वा ईष्टे सर्वं वशीकरोतीति मायेशः" इत्यपि व्याचक्षते।

४ "माहात्म्यपतिः" इति च क्वचित् प्राचीनकोशेषु पठ्यते।

५ "प्रधानत्वाच्चैव" इति क्वचित् पठ्यते। ६ "मेयत्वं चैव तस्य हि" इति च पाठान्तरम्।

७ "सरस्वत्यास्तटे परमं ब्रह्म ध्यायते ध्यानं गत इव स्थिताय व्यासाय नारदः प्राहेव। नारदः स्वस्य ज्ञानस्थैर्यार्थं पुनरनुसन्धानं कृतवानित्यर्थः" इति प्राचीनटीका। "नारदः स्वकीर्तिवितरणाय पृच्छते व्यासाय विज्ञापयामास" इत्यनन्ततीर्थः।

८ एषां नारदादीनां ज्ञानस्य प्रकर्षेण सिद्धये स्थैर्यार्थं तथा प्रसिद्धये तेषां कीर्तिवितरणाय चेत्यर्थः।

"विराड् ब्रह्मा समुद्दिष्टस्तद्गतः परमो यतः। अतो वैराज[1] इत्येनमाहुरीशत्वतो विराट्" इति बृहत्संहितायाम्[2] ॥ * ॥

इति द्वितीयस्कन्धे नवमोऽध्यायः

---

[3]भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः ।
ब्रह्मणो गुणवैषम्याद् विसर्गः पौरुषः स्मृतः ॥ ३ ॥

"महदाद्यण्डपर्यन्तः सर्गोऽण्डाद्[4] ब्रह्मणस्तु यः[5] । अनुसर्ग इति प्रोक्तः पौरुषश्चेति कथ्यते । पञ्चभूतसमूहेन जातः पुरुष उच्यते । बहुत्वात् तत्र भूतानां तावत्त्वात् तत्त्वमेकजम्" इति व्योमसंहितायाम् ॥ * ॥

निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः ।
मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः ॥ ६ ॥

"अनुप्रविश्य परमं जीवस्य शयनं तु यत् । सहैव शक्तिभिः स्वीयैरिच्छाद्यैरप्रकाशितैः । स निरोध[6] इति प्रोक्तो विमुक्तिर्यत्र मोक्षिणाम्" इति[7] नारदीये ॥ * ॥

---

१ "वैराजमित्येन–" इति प्र. पाठः । २ "ब्रह्मसंहितायाम्" इति क्वचित् ।

३ "भूतानि पञ्च, मात्राः शब्दायः पञ्च, इन्द्रियाणि दश, धीः अन्तःकरणम् ("धियः मनोबुद्ध्यहङ्कारचित्तानि" इत्यनन्ततीर्थाः) एतेषां (चतुर्विंशतितत्त्वानां) महदादिपुरस्सराणां अण्डाद् बहिः अण्डस्य चेति ग्राह्यम्, पुरुषेण यज्जन्म स सर्ग उच्यते । गुणवैषम्यात् गुणकार्यात् ("गुणविकारजन्यत्वेनगुणसञ्ज्ञानां चतुर्विंशतितत्त्वानां वैषम्यात् विकारात्, चतुर्विंशतितत्त्वजन्यब्रह्माण्डादिति यावत्" इत्यनन्ततीर्थाः)ब्रह्मणः सकाशात् अण्डान्तस्थानां जन्म विसर्ग इत्युच्यते । अयं विसर्गः पैरुष इत्यप्युच्यते । ब्रह्मणोऽपि पुरुषत्वेन प्रसिद्धेः । भौतिकदेहवतोऽपि पुरुषशब्दार्थत्वात्" इति यादवेन्द्रतीर्थाः । अनन्ततीर्थास्तु विसर्गशब्दार्थमन्यथा वर्णयन्ति–"ब्रह्मणः विरिञ्चस्य यदण्डजत्वेन पुनर्जन्म स विसर्गः स्मृतः । पुनर्विशेषेण स्थूलाकारेण जननाद्विसर्ग इति प्रसिद्धः" इत्यादि ।

४ "सर्गोऽण्डे" इति प्र. पाठः । अण्डात् अण्डसृष्टेः परं ब्रह्मणः सकाशाद् या चराचरसृष्टिः सोऽनुसर्गः विसर्गः पौरुषश्चेति कथ्यत इति । अनन्ततीर्थपक्षे पञ्चभूतमयस्थूलदेहवतया पुरुषपदवाच्यस्य चतुर्मुखस्यैव परमपुरुषात् सृष्टिः पौरुषी सृष्टिः । यादवेन्द्रतीर्थपक्षे पुरे पञ्चभूतमये देहे शेत इति पुरुषो ब्रह्मा तस्माद् या जीवजडसृष्टिः सा पौरुषीति भेदः । उभयथाऽपि "अण्डात्" इत्येव तात्पर्यपाठः ।

५ "ब्रह्मणो हि यः" इति क्वचित् । ६ "सन्निरोधः" इति प्र. पाठः ।

७ "मोक्षणम्" इति केचित् पठन्ति । मोक्षिणां यत्र परमानुप्रवेशः सा विमुक्तिः ।

आभासश्च निरोधश्च यतस्तद् यत्र मीयते[1] ।
स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥ ७ ॥

"सृष्टिस्थित्यप्ययाभासा यद्बलाद् यत्र च स्थिताः[2] । तद् ब्रह्म जगदाधारं वासुदेवेति तं विदुः[3]" इति भागवततन्त्रे ॥ * ॥

आध्यात्मिको यः पुरुषः[4] सोऽसावेवाऽधिदैविकः ।
यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः[5] ॥ ८ ॥

आधिभौतिकेन रूपेण हि चक्षुःप्रकाशयोः[6] सम्यक्परिज्ञानम्[7] ॥ * ॥

---

१ "यतश्चाध्यवसीयते" इत्यर्वाचीनः पाठः। "यतस्तत्त्रयमीयते" इति केषाञ्चित् पाठः भ्रान्तः। आभासनिरोधयोर्द्वयोरेव पूर्वप्रस्तुतत्वेन त्रयमित्ययुक्तेः। अथ यदि चशब्दसूचितयोः सृष्टिस्थित्योरपि ग्रहणं तर्हि चतुष्टयमेति वक्तव्यमिति सर्वथा तत्त्रयमेति पाठो न भवति। सृष्टिस्थित्योरेकीकरणेन त्रित्वमिति त्वगतिका गतिरिति न श्लिष्यति। अत एव यत इति मूलपदस्यैव यत्र च स्थिता इति तात्पर्ये व्यख्यानान्तरमित्यपि न युज्यते। अतः "तद् यत्र मीयते" इत्येव पाठः। तथाहि यादवेन्द्रतीर्थाः—"निरोधो नाम देहबन्धपरिहारः। तेन सृष्टिराक्षिप्यते। चशब्देन स्थितिर्गृह्यते। आभासश्च ज्ञानप्राप्तिश्च, एते यतः आश्रयाद् भवन्ति, यत्र तत् सृष्टं मीयते यदाधारेण वर्तत इति ज्ञायते, आत्मा व्याप्तः, परं ब्रह्म निरतिशयकल्याणगुणपूर्णः सः आश्रयः इति शब्द्यते" इत्यादि। अनन्ततीर्थास्तु—"जगतः आभासः आ समन्तात् भासनरूपः सर्गः निरोधः संहारश्च यतो यस्माद् भवति, तज्जगद् यस्मिन् स्थितमिति मीयते सर्ववेदादिभिः प्रतिपाद्यते स आश्रय इत्युच्यते। स एव परम्ब्रह्मपरमात्मेत्यादिशब्दैः प्रतिपाद्यते" इति मूलार्थं वर्णयन्ति। विजयध्वजीयेऽपि तथा। एतत्पक्षे मूलतात्पर्ययोः सङ्गमनं नातिश्लिष्टम्। तात्पर्यवचने सृष्टेः पृथगेवाभासस्योल्लेखात्। यादवेन्द्रतीर्थीयं तु सुश्लिष्टतमम्। अथच सृष्ट्याद्यष्टकमप्यत्र मूले विवक्षितमिति वक्तुं शक्यते। अभास इति सृष्टिः, चशब्दात् स्थितिः, निरोधः संहारः नियमनं च, चशब्दाद् वा नियमनम्, पुनराभास इति ज्ञानम्, निरोधः इत्यज्ञानं बन्धश्च, पुनः स्वरूपावभासो मुक्तिराभास इति। तात्पर्यवचनेऽप्येतदुपलक्षणीयमिति।

२ चराचराणां यद्बलात् सृष्ट्यादयो भवन्ति, यत्र चाऽश्रये चराचरपदार्थाः स्थिता इत्यर्थः। प्राचीनटीकासु तज्जगद् यस्मिन् स्थितमिति व्याख्यानात्। सृष्टिस्थित्यप्ययाभासाः यत्र स्थिता इत्यपि व्याचक्षते।

३ "तद्विदुः इति पाठान्तरम्। तं वासुदेव इति विदुरिति विधेयप्राधान्यात् पुंस्त्वम्।

४ "योऽध्यात्मिकोऽयं पुरुषः" इत्यर्वाचीनाः।

५ "–विच्छेदः पुरुषो ह्याधिभौतिकः" इति चार्वाचीनाः।

६ "रूपेण चक्षुःप्रकाशयोः" इति क्वचित्।

७ "सम्यकत्वपरिज्ञानम्" इति पाठान्तरम्। एतेन उभयोः अध्यात्माधिभूतपदगदितयोः आध्यात्मिकाधिदैविकपदप्रस्तुतयोः चक्षुःप्रकाशयोः विच्छेदः यस्मात् घटादिभूतगतभगवद्रूपात् इति मूलार्थ उक्तो भवति। अधिभूतमेवाधिभौतिकम्। यद्वा घटादिषु भूतेषु स्थिताः रूपादयस्तन्मात्रा अधिभूतपदेनोच्यन्ते। तत्र नियामकतया गतं भगवद्रूपमाधिभौतिकमित्युच्यते। अत एव भाष्ये रूपेणेत्यस्य घटादिगतशुक्लादिरूपेण तदाकृतिविशेषेण, तन्नियामकतया तद्गतभगवद्रूपेण चेत्यर्थः। अत्रानन्ततीर्थाः– "भौतिकघटादिरूपेण आध्यात्मिकाधिदैवसञ्ज्ञितयोश्चक्षुःप्रकाशयोः सम्यक्त्वविज्ञानं भवति। रूपाभावे केवलाकाशे चक्षुःप्रकाशयोर्ग्रहणमेव न स्यात्। कस्यचिद्रूपस्य सद्भाव

एतदेकतमाभावे[1] यदा नोपलभामहे ।
त्रितयं तत्र यो वेद[2] स आत्मा स्वाश्रयाश्रयः[3] ॥ ९ ॥

सुप्त्यादावपि[4] यः सर्वं वेत्ति जीवानां स परः । "स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति" इति श्रुतेः[5] । सुष्ठ्वाश्रयाणामप्याश्रयः[6] ॥ * ॥

पुरुषोऽण्डं विनिर्भिद्य यदाऽसौ स विनिर्गतः ।
आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥ १० ॥

तास्ववात्सीत् स्वसृष्टासु सहस्रपरिवत्सरान् ।
तेन नारायणो नाम यदापः पुरुषोद्भवाः ॥ ११ ॥

विनिर्गतः प्रकाशितः—

"अण्डं प्रविष्टो यो विष्णुः सोऽण्डं भित्त्वा प्रकाशितः । सोऽपोऽसृजत् ततो नारा नरोऽनाशात् परो यतः" इति नारायणाध्यात्मे ॥ * ॥

एव कीदृशमिति केनचित् पृष्टे यदि रूपं विद्यमानमेव ब्रूते तर्हि तस्य चक्षुः समीचीनमिति प्रत्येतुं शक्यते । नहि रूपाभावे चक्षुषः सम्बन्धो भवति । एवमन्धकारगृहादिषु स्थितं घटादिरूपं यद्यालोकेन दृश्यते तदैवाऽऽलोकस्य सामीचीन्यं प्रतीतं भवति । तस्मादाधिभौतिकेन आध्यात्मिकाधिदैविकयोः समीचीनत्वविश्वासो भवति" इति । तद्धि चक्षुषश्चक्षुष्ट्वं यद् रूपं विचष्टे । तदेव चाऽऽलोकस्याऽऽलोकत्वं येन रूपमालोकयति लोकः । यादवेन्द्रतीर्थीयपक्षे तु सम्यक् परिज्ञानमित्येव भाष्यपाठः । तथाहि तद्वचनम्—"तत्र ज्ञानोपकारकेषु यः उभयविच्छेदः उभाभ्यां चक्षुःप्रकाशाभ्यां प्राप्यमाणः विच्छेदः परिच्छेदः ज्ञानं येन भवति सः । 'इन्द्रियेभ्यः परा ह्यर्थाः' इत्युक्तेः विषयः उत्तमाधिष्ठानम् । तत्र स्थितस्याभिव्यक्तिविशेषोऽस्ति । यथार्थज्ञानविषयत्वसम्पादकत्वादिति भावः" इति । एतत्पक्षे चक्षुःप्रकाशयोः सकाशाद् यत् परिज्ञानं जायते तदाध्यात्मिकेन रूपेणेति भाष्ययोजना ।

१ "एकमेकतराभावे" इत्यर्वाचीनः पाठः । "एतेषां मध्ये एकतमाभावे चक्षुषः, सूर्यादिप्रकाशस्य वा घटादिपदार्थस्य वाऽभावे" इत्यनन्ततीर्थाः । "उक्तानां परमात्ममूर्तीनां मध्ये एकस्याभावेऽपि नोपलभामहे विषयं न जानीमः" इति यादवेन्द्रतीर्थाः ।

२ "तत्र चेतनानां मध्ये जाग्रत्स्वप्नसुषुप्तिलक्षणं त्रितयम्, आध्यात्मिकादित्रितयं वा स्वतः एव यो जानाति स आत्मा अन्तर्यामी" इति प्राचीनम् ।

३ "आत्मा त्वाश्रयाश्रयः" इत्यपि केचित् पठन्ति ।

४ "सुप्तावपि" इति प्र. पाठः ।

५ "इति श्रुतिः" इति क्वचित् ।

६ अत्र द्वेधा योजना प्राचीनटीकासु "जगतां सुष्ठ्वाश्रयाणां लक्ष्मीब्रह्मादीनां आश्रयत्वात् स्वाश्रयाश्रयः" इत्यनन्ततीर्थाः । विजयध्वजीयेऽपि तथा । "इन्द्रियाश्रयाणां तत्वदेवोत्तमानामपि सुष्ठु सम्यगाश्रयः" इति यादवेन्द्रतीर्थाः ।

एको नानात्वमन्विच्छन् योगतल्पात् समुत्थितः ।
वीर्यं हिरण्मयं देवो[1] मायया व्यसृजत् त्रिधा[2] ॥ १३ ॥

"तत्तन्नियामकत्वेन बहुत्वं प्राप्तुमीश्वरः । अण्डं स्ववीर्यं तत्स्थः सन् कामादन्तस्त्रिधा व्यधात्" इति च । "अन्तःस्थितहरेः कामादण्डे ब्रह्मतनोर्जनिः[3] । तत्र देवाश्च सञ्जाताः पुनस्तत्त्वात्मकाः प्रभोः" इति च[4] ॥ * ॥

उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम् ।
ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः[5] ॥ २७ ॥

"मलादिकं कदाचित्तु ब्रह्मा लोकाभिव्यक्तये । आत्मनो निर्ममे कामात् सर्वेषामभवत् ततः । वशित्वात् तस्य दिव्यत्वादिच्छया भवति प्रभोः" इति च ॥ * ॥

एतद् भगवतो रूपं स्थूलं ते व्याहृतं मया ।
मह्यादिभिश्चाऽऽवरणैरष्टभिर्बहिरावृतम् ॥ ३३ ॥

"स्थूलं भगवतो रूपं ब्रह्मदेह उदाहृतः । तत्तन्त्रत्वात्तु[6] सूक्ष्मं च शङ्खचक्रगदाधरम्" इति चाध्यात्मे ॥ * ॥

---

१ "हिरण्मयं देहम्" इत्येके पठन्ति ।

२ "एकरूपेण स्थितः नारायणः, नानात्वं तत्तद्वस्तुनियामकरूपाणि अन्विच्छन्, योगतल्पात् ज्ञानयुक्ततल्पात् ज्ञानविरोधिनिद्रासम्बन्धरहितात्, समुत्थित इव देवः सन् क्रीडमानः सन् मायया स्वेच्छया हिरण्मयं स्वर्णवर्णमण्डभागं वीर्यं व्यसृजत् परिणतं चकार । प्रथमं ब्रह्माणमसृजदित्यर्थः । वीर्यं त्रिधा च व्यसृजत्" इति यादवेन्द्रतीर्थाः । "योगनिद्रासाधनात् शेषपर्यङ्कात् समुत्थितः हिरण्मयवीर्यात्मकाण्डान्तःस्थितं विराट्पुरुषसञ्ज्ञितं विरिञ्चशरीरं मायया त्रिधा व्यसृजत्" इत्यनन्ततीर्थाः ।

३ "ब्रह्मा ततोऽजनि" इति प्र. पाठः ।

४ क्वचित् कोशेऽत्र 'च'कारो न पठ्यते । इति च नारायणाध्यात्मे ।

५ "गुदं द्वारं निरभिद्यत । ततः तस्मिन् पायुसञ्ज्ञमिन्द्रियम्, ततः तस्मिन् मित्रः तन्नियामकदेवता आसीत् । उत्सर्गः मलोत्सर्गशक्तिः व्यपारो वा" इति यादवेन्द्रतीर्थाः । "गुदं पाय्विन्द्रियगोळका गुदद्वारं निरभिद्यत । ततो गुदात् पायुनामकमिन्द्रियम्, पाय्विन्द्रियात् मित्राख्यः तदभिमानी देवः । उभयाश्रयः इन्द्रियेन्द्रियाभिमानिदेवताश्रयः उत्सर्गः मलोत्सर्गाख्यं कर्म चाऽऽसीत्" इत्यनन्ततीर्थाः ।

६ "तत्तन्त्रत्वाच्च" इति प्र. पाठः ।

अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणम् ।
अनादिमध्यनिधनं नित्यं वाङ्मनसोः परम्[1] ॥ ३४ ॥

निर्विशेषणं[2] निरतिशयम्—

"अस्य काव्यस्य कवयो न समर्था विशेषणे" इतिवत् ॥ * ॥

अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते[3] ।
उभे अपि न गृह्णन्ति मायासृष्टेऽविपश्चितः[4] ॥ ३५ ॥

मायासृष्टे जगति ये अविपश्चितः[5] ॥ * ॥

स वाच्यवाचकतया भगवान् ब्रह्मरूपधृक् ।
नामरूपक्रिया धत्ते सकर्माऽकर्मकः परः[6] ॥ ३६ ॥

"नामैव वाचकत्वेन नामरूपक्रिया अपि । वाच्यत्वेन हरिर्देवो नियामयति चैकराट्" इति च । "कर्तृत्वात्तु सकर्माऽसौ निष्फलत्वादकर्मकः" इति च ॥ * ॥

---

१ "वाङ्मनसः परम्" इति प्र. पाठः । अत्र प्राचीनटीका—"परमात्मनः निजरूपं अतः परम्, विराड्ब्रह्मरूपाद् विलक्षणम् । वैलक्षण्यमुपपादयति— सूक्ष्मतममिति । प्रतिघातरहितमित्यर्थः । विराड्रूपस्य त्रिविक्रमचरणनखेन प्रतिघातोऽस्ति । अव्यक्तम्, ब्रह्मविराड्रूपं जीवशक्त्या प्रत्यक्षीक्रियते परमात्मरूपं जीवकरणज्ञानशक्तिविषयो न भवतीत्यर्थः । विशेषणं अतिशयः, परमात्मरूपमेव सर्वगुणैरतिशयितमित्यर्थः । नित्यं च । एतदेव विवृणोति— अनादीति । नित्यस्यापि विशिष्टरूपेणोत्पत्त्यादिकमस्ति । ईश्वरमूर्तेरेतन्नास्तीति वाऽऽह— अनादिमध्यनिधनमिति । आदिः कारणम्, उत्पत्तिकालो वा, मध्यं स्थितिकारणम्, निधनं लयः तद्रहितं परमनित्यमित्यर्थः । वेदवेद्यत्वात् कथमव्यक्तत्वमित्यत आह—वाङ्मनसोः परम् । वाङ्मनसविषयाद् विलक्षणमित्यर्थः । अन्यशक्त्यविषयस्यापि स्वेच्छया वागादिविषयत्वमिति भावः" इति ।

२ "निर्विशेषम्" इति च पाठः । ३ "ते अनुवर्णिते" इति प्र. पाठः ।

४ "मायासृष्टेविपश्चितः" इति वीरराघवः पठति । अत्र प्राचीनटीकायामर्थविशेषः— "विपश्चितः वस्तुतत्त्वपरीक्षकाः, उभे अपि रूपे मायासृष्टे प्रकृतिप्राप्ते इति न गृह्णन्ति नाङ्गीकुर्वन्ति । निजरूपस्याप्राकृतत्वे प्रमाणदर्शनात् । अथवा निरीश्वरवादमवलम्ब्य रूपद्वये त्वया अविश्वासो न कर्तव्यः । यतः, अविपश्चितः मन्दाः उभे न गृह्णन्ति, विपश्चितस्तु मायासृष्टे ईश्वरेच्छाप्राप्ते उभे अपि गृह्णन्तीति भावः । मायासृष्टे जगति वा" इत्यादि ।

५ "मायासृष्टे जगति अविपश्चितः" इत्यपि पाठान्तरम् ।

६ "ब्रह्मरूपधृक् ब्रह्मादिजगत्यन्तर्यामितया स्थितः, सकर्मा सकलजगत्कर्ता, अकर्मा कर्मफलरहितः, नामरूक्रियाः वाच्यवाचकतया धत्ते । नामानि इन्द्रादीनि वाचकतया धत्ते प्रेरयति । चतुर्मुखादिरूपाणि जगत्सृष्ट्यादिक्रियाश्च वाच्यतया धत्ते" इत्यनन्ततीर्थाः । "परः सर्वकल्याणगुणपूर्णः, सः ध्येयः, भगवान् परमात्मा, ब्रह्मरूपाणि

प्रजापतीन् मनून् देवानृषीन् पितृगणान् पृथक् ।
सिद्धचारणगन्धर्वान् विद्याध्रासुरगुह्यकान्[1] ॥ ३७ ॥

प्रजापत्यादीन् धत्ते ॥ * ॥

सत्त्वं रजस्तम इति तिस्रः सुरनृनारकाः ।
तत्राप्येकैकशो राजन् भिद्यन्ते गतयस्त्रिधा[2] ॥ ४१ ॥

यदैवैकतमोऽन्याभ्यां[3] स्वभाव उपहन्यते ।
तदैवेदं[4] जगद्धाता भगवान् धर्मरूपधृक् ।
पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरात्मभिः[5] ॥ ४२ ॥

"तामसास्तामसा दैत्याः प्रधाना देवशत्रवः । तामसा राजसास्तेषामनुगास्तेषु सात्त्विकाः । अनाख्यातासुराः प्रोक्ता मानुषा दुष्टचारिणः । राजसास्तामसाश्चैव मध्या राजसराजसाः । राजसाः सात्त्विकास्तत्र मानुषेषूत्तमा गणाः । देवाः पृथ-

---

गुणपूर्णरूपाणि धत्त इति ब्रह्मरूपधृक् सन्, वाच्यवाचकभावेन सम्पन्नाः याः नामरूपक्रियाः, रूपं मूर्तिः, वस्तु वा, ताः धत्ते तत्स्वामीत्यर्थः । सकर्माऽपि कर्मकर्ताऽपि भक्ताभीष्टसिद्ध्यर्थमिति भावः, अकर्मकः कर्मफलदुःखरहितः । स्वप्रयोजनार्थं कर्मकर्ता नेति वा" इति यादवेन्द्रतीर्थाः ।

१ "– गुह्यगान्" इति च मूलकोशेषु पाठान्तम् । गुह्यका एव गुह्यगाः । "विद्याध्रान् सुरगुह्यकान्" इति च क्वचित् । विद्याध्रा इति विद्याधराः ।

२ "सत्वं रजस्तम इति गुणत्रितयहेतुकाः सुरनृनारकाः । नरकप्राप्तियोग्यत्वान्नारका असुराः । सुरनृनारकाख्यास्तिस्रः गतयः जातयः । तत्रापि ता अपि जातयः एकैकशः सात्त्विकसात्त्विकाः, सात्त्विकराजसाः, सात्त्विकतामसाः, राजससात्त्विकाः, राजसराजसाः, राजसतामसाः, तामससात्त्विकाः, तामसराजसाः, तामसतामसा इति त्रिधा भिद्यन्ते" इत्यनन्ततीर्थाः । "नरः नित्यसंसारिणः, नारका नरके नित्यवासिनः । तत्रापि सात्त्विकेष्वपि, राजसेष्वपि, तामसेष्वपि एकैकशः प्रत्येकं गतयः त्रिधा भिद्यन्ते" इति यादवेन्द्रतीर्थाः ।

३ "यदैकैकतरोऽन्याभ्याम्" इत्यर्वाचीनः पाठः । "यदैवैकतरः" इति च पाठान्तरम् ।

४ "स एवेदम्" इत्यर्वाचीनः पाठः ।

५ "त्रिषु सात्विकराजसतामसेषु एकतमो भावः, सात्त्विकसात्त्विकः सात्त्विकराजसः सात्त्विकतामसो वा स्वभावोऽन्याभ्यां राजसतामसाभ्यां स्वभावाभ्यां यदोपहन्यते बाध्यते तदैव तस्मिन्नेव काले जगद्धारणपोषणकर्ता धर्मरूपधृक् वर्णाश्रमविहितधर्माणां धारणकृद् भवेत् । तिर्यङ्नरसुरात्मभिः मत्स्यरामोपेन्द्रादिरूपैरवतीर्य विश्वं स्थापयन् सत्त्वेन पालयन् पुष्टीकरोति" इत्यनन्ततीर्थाः । "एकतरः सात्विकस्वभावः अन्याभ्यां रजस्तमोभ्यां उपहन्यते, असुरा यदि देवान् बाधन्ते इत्यर्थः । तदा धाता धर्मरूपधृक् धर्मस्वरूपसम्पादकः भगवान् इदं जगत् पुष्णाति । यः विश्वं स्थापयन्नास्ते विष्णुः स तिर्यगाद्यवतारैः पुष्णातीत्यर्थः" इत्यादि यादवेन्द्रतीर्थाः ।

गनाख्याताः स्मृताः सात्त्विकतामसाः । अतात्त्विकास्तथाऽऽख्याताः स्मृताः सात्त्विकराजसाः । सात्त्विकाः सात्त्विकास्तत्र तात्त्विकाः परिकीर्तिताः । तेषां च सात्त्विकाः शेषगरुत्मद्रुद्रतत्स्त्रियः । ततोऽपि देवी ब्रह्माणी ब्रह्मा चैव ततः स्वयम् । सात्त्विकेषु त्रिषु यदा त्वेकस्य प्रतिबाधनम् । रजस्तमोभ्यां विष्णुर्हि तदा प्रादुर्भवत्यजः । राजसांस्तामसान् हत्वा सात्त्विकं[1] वर्द्धयिष्यति" इति स्कान्दे ॥ * ॥

ततः कालाग्निरुद्रात्मा[2] यत्सृष्टमिदमात्मनः ।
सन्नियच्छति तत् काले[3] घनानीकमिवानिलः[4] ॥ ४३ ॥

"मत्स्यादिरूपी पोषयति[5] नृसिंहो रुद्रसंस्थितः । विलाययेद्[6] विरिञ्चस्थः सृजते विष्णुरव्ययः" इति वामने[7] ॥ * ॥

इत्थम्भावेन कथितो भगवान् भगवत्तमः[8] ।
नेत्थम्भावेन हि परं द्रष्टुमर्हन्ति सूरयः[9] ॥ ४४ ॥

भगवत्तमः ना पुरुषः[10] ॥ * ॥

---

१ "सात्त्विकान्" इति पाठान्तरम् ।

२ "कालाग्निरुद्रयोरन्तर्यामी" इत्यनन्ततीर्थाः । "कालो यमः, कालाग्निरुद्राणामन्तर्यामी नृसिंहः" इति यादवेन्द्रतीर्थाः ।

३ "सन्नियच्छति कालेन" इत्यर्वाचीनः पाठः । "आत्मनः ब्रह्मस्थपरमात्मनः सकाशात् यत् सृष्टं चेतनजातं तत् सन्नियच्छति बन्धरहितं करोति । जडस्य च लयं करोति" । इत्यादि प्राचीनम् ।

४ "अनायासेन चासुरादिसंहार इति ज्ञापनायोक्तम्-घनानीकमिवानिल इति । मेघसमूहं वायुर्यथा संयच्छति तथा" इति प्राचीनम् ।

५ "पालयति" इति क्वचित् ।

६ "विलापयेत्" इति प्र· पाठः ।

७ "इति च वामने" इति क्वचित् ।

८ "भगवान् भगवत्तमाः" इति केचित् पठन्ति ।

९ "ये सूरयः इत्थम्भावेन विश्वकर्तृत्वादिकल्याणगुणपूर्णत्वेन परं सम्पूर्णगुणं द्रष्टुमर्हन्ति तान् प्रति भगवत्तमः इत्थम्भावेन कथितः" इति प्राचीनम् । "भगवद्भ्यो ब्रह्मादिभ्योऽप्यत्यन्तपूज्यः भगवान् ज्ञानानन्दादिगुणशाली ना परमपुरुषः इत्थम्भावेन सर्वस्रष्टृत्वाद्यनन्तगुणवत्त्वेन कथितो व्याख्यातः । परं केवलं सूरय एव इत्थम्भावेन द्रष्टुं तं भगवन्तं ज्ञातुमर्हन्ति नेतरे" इत्यनन्ततीर्थाः । "भगवत्तम एवेत्थम्भावेन विश्वकर्तृत्वेन कथितः । अतः सूरयः विवेकिनः परं भगवदितरं कालकर्मादिकं इत्थम्भावेन विश्वकारणत्वेन द्रष्टुं नार्हन्ति" इति शुकदेवः ।

१० एतेन मूले भगवत्तमः ना इत्थम्भावेन इति च्छेद इत्युक्तं भवति । प्राचीनकोशेषु तु एतत्स्थाने "अव्ययः ना पुरुषः" इति तात्पर्यवाक्यं पठ्यते । पाठौचित्यं तु चिन्त्यम् ।

नचास्य[1] जन्मकर्माणि परस्य न विधीयते[2] ।
कर्तृत्वं प्रतिषेधार्थं[3] माययाऽऽरोपितं हि तत्[4] ॥ ४५ ॥

जन्मकर्माणि विधीयत इति क्रियाविशेषणम् ।

"प्रतिषेधाय बन्धस्य जीवानां परमेशितुः । स्वेच्छयैव तु कर्तृत्वं नित्यारूढं चिदात्मकम्" इति भविष्यत्पुराणे ।

"रुपोपरिभावे" इति च धातुः[5] । "सुभद्रां रथमारोप्य" इत्यादिवच्च । "स्वाभाविकी ज्ञानबलक्रिया च" इति च ॥ * ॥

अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः ।
विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ॥ ४६ ॥

अन्यकल्पानां साधारणः । यत्रैव प्राकृतवैकृताः[6] सर्गाः । अन्यब्रह्मकल्पानां[7] च साधारणः ॥ * ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते
श्रीभागवततात्पर्यनिर्णये दशमोऽध्यायः

इति द्वितीयः स्कन्धः

---

१ "नह्यस्य" इति पाठान्तरम् ।

२ "नास्य कर्मणि जन्मादौ परस्यानुविधीयते" इत्यर्वाचीनाः । "नास्य कर्मणि जन्मादिः–" इत्यप्येके । "नचास्य जन्मकर्माणि परस्यानुविधीयते" इति यादवेन्द्रतीर्थाभिमतः पाठः ।

३ "कर्तृत्वप्रतिषेधार्थम्" इत्यवाचीनाः ।

४ अत्रैवं प्राचीनटीकाकारा व्याचक्षते–"परस्यास्य हरेर्जन्मकर्माणि यथा भवन्ति तथा न विधीयत इति न । किन्तु श्रुतिपुराणादिभिर्विधीयत एव । श्रुत्यादिविहितत्वाज्जन्मकर्मादीनि मृषा न भवन्ति । ईश्वरस्य यज्जगत्कर्तृत्वं श्रुत्या विधीयते तत् नेह नानेति प्रतिषेधार्थमिति यन्मायिमतं तन्मायया श्रुतितात्पर्यापरिज्ञानजातया भ्रान्त्याऽऽरोपितं कल्पितं हि । तस्मात् तदनादरणीयमित्यर्थः । अथवा अस्य परस्य जन्मकर्माणि पूर्वकर्मफलानि यथा भवन्ति तथा न विधीयते तथा कर्तृत्वं कर्मकरणमपि पूर्वकर्मफलतया न विधीयते । तर्हि कीदृशम् ? तत् जन्म कर्माणि च मायया स्वेच्छया आरोपितमात्मन्यापादितं हि । किमर्थम् ? प्रतिषेधार्थम् । जीवानां संसारबन्धनाशनार्थमिति" इत्यनन्ततीर्थाः । "परस्यानुविधीयते" इति पाठमूरिकृत्य यादवेन्द्रतीर्थाः व्याचक्रुः–"जीवस्य जन्म कर्माणि च यथा भवन्ति तथा मायया परेच्छया अनुविधीयते प्रवर्त्यते । नच, प्रयोजनपरतन्त्रं नेत्यर्थः । परस्य आरोपितं नित्यारुढम्, प्रतिषेधार्थम्-प्रतिषेधः जीवबन्धस्य परिहारः अर्थः प्रयोजन यस्य तत् कर्तृत्वं सृष्ट्यादिकर्तृत्वं जन्मानि कर्माणि च । अतः तत्स्वाभाविकम्" इति ।

५ "रूप उपरिभाव इति धातुः" इति प्र॰ पाठः ।

६ "प्राकृतवैकृताः सर्वसर्गाः" इति प्र॰ पाठः ।

७ "-ब्रह्मकालानाम्" इति क्वचित् ।

तृतीयः स्कन्धः

ॐ ॥ एवमेतत् पुरा पृष्टो मैत्रेयो भगवान् किल ।
क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत् ॥ १ ॥

यदा त्वयं[1] मन्त्रकृद् वो भगवानखिलेश्वरः ।
पौरवेन्द्रपुरं[2] हित्वा प्रविवेशाऽऽत्मसात्कृतम् ॥ २ ॥

"युद्धकाले तु[3] विदुरस्तीर्थयात्रां गतोऽपि सन् । प्राय आस्ते गजपुरे पाण्डवानां व्यपेक्षया[4]" इति स्कान्दे ॥ * ॥

यदा तु राजा स्वसुतानसाधून् पुष्णन्नधर्मेण विनष्टदृष्टिः ।
भ्रातुर्यविष्ठस्य सुतान् विबन्धून् प्रवेश्य लाक्षाभवने ददाह ॥ ६ ॥

यदा सभायां कुरुदेवदेव्याः केशाभिमर्शं सुतकर्म गर्ह्यम् ।
न वारयामास नृपः स्नुषाया [5]आस्रैर्हरन्त्याः कुचकुङ्कुमानि[6] ॥ ७ ॥

---

१ "यद्वा अयम्" इति प्र. पाठः ।

२ "पौरवेन्द्रगृहम्" इति पाठान्तरम् । "पौरवेन्द्रपुरं हस्तिनपुरं हित्वा आत्मसात्कृतं मदीयमिदमिति निश्चितं उपप्लाव्यं पाण्डवनिवेशनं पुरं विवेश । मम प्राणा हि पाण्डवा इत्युक्तत्वात् पाण्डवैरधिष्ठितं पुरमपि कृष्णपुरमेव" इत्यनन्ततीर्थाः ।

३ "युद्धकालेऽपि" इति क्वचित् ।

४ "हितेच्छया" इति क्वचित् मुद्रितः पाठः ।

५ "स्वास्रैर्हरन्त्याः" इति प्र॰ पाठः । "अस्रैर्हरन्त्याः" इत्यपि केचित् पठन्ति । आस्रैरित्येव साधुः पाठः । आस्राणामास्रत्वं तदुत यदास्रवन्तीति ।

६ "कुचकुङ्कुमानीत्युपरिवस्त्राभावः, कुङ्कुमानामपि गमनेऽतिलज्जा, एवं प्रत्यक्षतोऽतिक्रौर्यं निरूपितम्" इति वल्लभाचार्यः । "रिपुस्त्रीणां वा कुचकुङ्कुमानि तद्भर्तृवधेन हरन्त्याः" इति श्रीधरादयः ।

यदा ददाह तदा केशाभिमर्शः[1] प्राप्त इति हेत्वर्थे यदाशब्दः[2]।
"यदा तदेति हेत्वर्थे कालार्थेऽपिच भण्यते[3]" इत्यभिधाने[4] ॥ * ॥

तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निनाऽऽश्रयम्[5] ।
संस्पर्द्धया दग्धमथानुशोचन् सरस्वतीं प्रत्यगियाय तूष्णीम् ॥ २१ ॥

सुहृद्विनष्टिं यदुविनष्टिमेष्याम्[6] ।

"विदुरस्तु प्रभासस्थः शापं सङ्क्षेपतोऽशृणोत् । यदूनां विस्तरात् पश्चादुद्धवाद् यमुनामनु" इति स्कान्दे[7] ।

भारतविरोधाच्चान्यथा[8] ॥ * ॥

---

१ प्र. पाठे तु "यदा ददाह यदा केशाभिमर्शः प्राप्तः" इत्येव पठ्यते । आपाततः स एव च स्वरस इव भाति । नहि केशाभिमर्शस्य दाहो हेतुरिति तदेति पाठोऽनन्वित इव च प्रतीयते । किन्तु "तदा केशाभिमर्शः" इत्येव सकलव्याख्यानसम्मतः प्राचीनकोशपठितश्च पाठः । तर्हि कोऽर्थः? अयमर्थः—यदेत्यस्य कालार्थकत्वे यस्मिन् काले लाक्षागृहदाहस्तस्मिन्नेव काले केशाभिमर्शनतदनिवारणादिकं विदुरवनगमनं च सम्पन्नमित्यर्थः स्यात् । अयुक्तं चैतत्कालान्तरभाविनामैकपद्यम् । तेन यदा यस्मादिति हेत्वर्थकत्वमेव युक्तमिति । तथाचैवं भाष्ययोजना—"यदेत्यस्य कालार्थकत्वे यदा यत्काले ददाह तदा तस्मिन्नेव काले केशाभिमर्शोऽपि प्राप्त इति हेतोर्न कालार्थे यदाशब्दः, किन्तु हेत्वर्थे" इति । अयुक्तश्च "यदा केशाभिमर्शः प्राप्तः" इति पाठः । तदात्वे तु "यदा केशाभिमर्शं न वारयामास" इत्येव पठितव्यं स्यात्, न केशाभिमर्शः प्राप्त इति । यदाशब्दस्य हेत्वर्थकत्वं च मूल एवोत्तरश्लोके स्फुटम्–"न याचितोऽदात् समयेन दायं तमो जुषाणो यदजातशत्रोः" इति । एतेनात्रापि यत्पदस्य यदेति कालार्थकत्वं वदतां केषाञ्चिन्मतिवैपरीत्यं शोच्यमेव । "लाक्षाभवने निवेश्य ददाहेति यदा यस्मात् तस्माच्च दुष्कृतात्... विनष्टवंशो बभूवेति शेषः । इदं विदुरतीर्थयात्रायां च निमित्तमिति ज्ञातव्यम्" इत्यनन्ततीर्थाः । अत्र "केशाभिमर्शं प्राप्तः" इति क्वचित् पाठः प्रामादिकः ।

२ "इति यदाशब्दो हेत्वर्थः" इति प्र॰ पाठः । ३ "कालार्थे चापि भण्यते" इति प्र. पाठः ।

४ "इत्यभिधानम्" इति प्र. पाठः ।

५ "वेणुजवह्निसंश्रयम्" इति प्र. पाठः । "वेणुजवह्निना वेण्वाश्रयं वनं यथा दग्धं भवति तथा" इत्यनन्ततीर्थाः ।

६ "यदुकुलविनष्टिमेष्याम्" इति प्र. पाठः । एतेन "सुहृदां कौरवाणां विनष्टिं विनाशम्" इति वदन्तः श्रीधरादयः परास्ताः । अत एव जीवगोस्वमी चाऽह–"सुहृद्विनष्टिमिति यादवानां विनष्टिमित्येव ज्ञातव्यम्" इति ।

७ "इति च स्कान्दे" इति क्वचित् ।

८ "अतीतं यदुकुलनाशं शुश्रावेत्यङ्गीकारे भारतविरोधादेष्यन्तं यदुकुलक्षयं षड्विंशद्वत्सरात् पूर्वं शुश्रावेत्यङ्गीकरणीयम्" इत्यनन्ततीर्थाः ।

अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः ।
[1]प्रत्यङ्गमुख्याङ्कितमन्दिराणि यद्दर्शनात् कृष्णमनुस्मरन्ति ॥ २३ ॥

प्रत्यङ्गमुख्यो विष्णुः ।

"ब्रह्मा प्रत्यङ्गवान्[2] सम्यग् विष्णुर्लक्षणवत्तमः" इति तन्त्रमालायाम्[3] ॥ * ॥

कच्चित् पुराणौ पुरुषौ स्वनाभ्य[4]पद्मानुवृत्त्येह किलावतीर्णौ ।
आसात उर्व्याः[5] कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे ॥ २६ ॥

"पद्मो ब्रह्मा[6] समुद्दिष्टः पद्मा श्रीरपि चोच्यते" इति ब्राह्मे । "लोकानां सुखकर्तृत्वमपेक्ष्य कुशलं विभोः । पृच्छ्यते सततानन्दात्[7] कथं तस्यैव पृच्छ्यते" इति पाद्मे ॥ * ॥

कच्चित् कुरूणां परमः सुहृन्नो भामः[8] स आस्ते सुखमङ्ग शौरिः ।
यो वै स्वसॄणां पितृवद् ददाति वरान् वदान्यो वरतर्पणेन ॥ २७ ॥

वरतर्पणेन भर्तृतर्पणेन ॥ * ॥

कच्चित् सुखं सात्त्वतवृष्णिभोज[9]दशार्हकाणामधिपः स आस्ते ।

---

१ "प्रत्यङ्गमुख्याङ्कित –" इति प्र. पाठः । "अङ्गोपाङ्गादिषु प्रतिप्रति शास्त्रोक्तलक्षणसामग्र्यात् प्रत्यङ्गा ब्रह्माद्याः, तेभ्योऽपि मुख्यत्वात् प्रत्यङ्गमुख्यो भगवान्, तस्य शङ्खचक्राद्यङ्किताः प्रतिमा अङ्किता इत्युच्यन्ते । ताभिः सहितानि मन्दिराणि येष्वायतनेषु तानि तथोक्तानि" इत्यनन्ततीर्थाः ।

२ "प्रत्यङ्गवान् विष्णुः सम्यग्लक्षण–" इति प्र . पाठः ।

३ "मन्त्रमालायाम्"इति क्वचित् ।

४ "–पाद्मानुवृत्त्येह" इति प्र. पाठः ।

५ " उर्व्याम् " इति पाटान्तरम् । " पूर्णानन्दस्य कुशलाभिप्रायं स्वयमेवाऽह–उर्व्याः कुशलं विधायेति । तदेव तयोः कुशलमिति भावः " इत्यनन्ततीर्थाः ।

६ "पाद्मो ब्रह्मा" इति क्वचित् पाठस्तु प्रामादिकः ।

७ "सकलानन्दात्" इति क्वचित् ।

८ "भामः पूज्यः" इति विजयध्वजतीर्थाः । भगिनीपतिरित्यनन्ततीर्थाः । तथाहि तद्व्याख्यानम्–"नः अस्माकं भामः अस्मत्सहोदरस्य पाण्डोर्भामत्वात्" इति । कुन्ती वसुदेवभगिनीति लोकरीत्या देवक्यपि पाण्डुभगिनी भवति । यद्वा भगिनीपतिरिव पत्नीसोदरोऽपि भामशब्दार्थः । तेन पाण्डुभामो वसुदेवः । विदुरस्यापि पाण्डुभ्रातृत्वाद् भामः । वसुदेवभार्यास्वेका पौरवी नाम । सा तु विदुरभगिनीति साक्षादेव भगिनीभर्ता वसुदेवो विदुरस्य भामो भवतीत्यपि व्याचक्षते ।

९ "–दाशार्हकाणामधिपः" इति प्र· पाठः ।

18

यमभ्यषिञ्चच्छतपत्रनेत्रो नृपासनाधिं[1] परिहृत्य दूरात् ॥ २९ ॥

"आधिर्मनो[2] वरूथं च आत्मा खमिति चोच्यते[3]" इत्यभिधाने[4] ॥ * ॥

किंत्रा कृताघेष्वघमत्यमर्षी भीमो गदी[5] दीर्घतमं व्यमुञ्चत् ।
यस्याङ्घ्रिपातं रणभूर्न सेहे मार्गं गदायाश्चरतो विचित्रम् ॥ ३७ ॥

अघं व्यमुञ्चत् पुनरपराधिबुद्धिं[6] मुक्त्वाऽऽस्ते[7] ॥ * ॥

अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसाम् ।
नत्वन्यथा[8] कोऽर्हति देहयोगं परो गुणानामुत कर्मतन्त्रम् ॥ ४४ ॥

"न देहयोगो हि जनिर्विष्णोर्व्यक्तिर्जनिः स्मृता" इत्याग्नेये । "हरिः कर्ताऽप्यकर्तेति फलाभावेन भण्यते" इति च[9] ॥ * ॥

इति तृतीयस्कन्धे प्रथमोऽध्यायः

यद् धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः ।
कार्त्स्न्येन चात्रोपगतं[10] विधातुरर्वाक्सृतौ कौशलमित्यमन्यत ॥ १३ ॥

---

१ "नृपासनाशाम्" इति प्र· पाठः। "नृपासनाधिं स्वस्य नृपासनेच्छाम्, नृपासने ययातिशापान्नाऽसितव्यमिति मनोदुःखमिति वा" इत्यनन्ततीर्थाः ।

२ आधिरिति मन उच्यते । तद्व्यापारत्वादिच्छा दुःखं चोच्येते इत्यभिप्रायेणानन्ततीर्थीयप्रवृत्तिः ।

३ "स्वमिति चोच्यते" इति प्र· पाठः।

४ "इत्यभिधानम्" इति क्वचिन्मुद्रितः पाठः ।

५ "भीमोऽहिवद् दीर्घ–" इति प्र. पाठः ।

६ "–राधबुद्धिम्" इत्यपि पाठान्तरम् ।

७ "हित्वाऽऽस्ते" इति प्र. पाठः । "मुक्त्वाऽस्त्येव" इति क्वचित् ।

८ "नन्वन्यथा" इति प्र. पाठः । "तस्य जन्म अन्यथा गुणात्मकदेहाभिमानात्मकं ननु । कर्म चान्यथा (फलापेक्षया) न। किन्तु पुंसां ग्रहणाय ज्ञात्वा मुक्तिप्राप्तये, कानिचिद् दृष्ट्वा तेषां तथाकरणाय च भवन्ति" इत्यनन्ततीर्थाः । तथा च ग्रहणायेत्येतत् मोक्षसाधनज्ञानाय लोकसङ्ग्रहरूपशिक्षायै चेति द्वेधा विवृतं भवति ।

९ क्वचित् प्र. पाठेऽत्र 'च'कारो न पठ्यते ।

१० "चात्रेह गतम्" इत्यर्वाचीनाः पठन्ति । "धातुर्विरिञ्चस्य अर्वाक्सृतौ अन्त्यसृष्टौ कार्त्स्न्येन कौशलमत्र कृष्णवपुषि उपगतं पर्याप्तम्" इति विजयध्वजतीर्थाः । अनन्ततीर्थीये त्वर्थान्तरमुक्तम्—"दृक्स्वस्त्ययनं पश्यतां

त्रिलोकस्याज्ञानं बत ।

"आनन्दरूपं दृष्ट्वा तु[1] लोको भौतिकमेव तु । मन्यते विष्णुरूपं च अहो भ्रान्तिर्बहु-त्थिता[2] " इति स्कान्दे ॥ * ॥

मन्येऽसुरान् भागवतांस्त्र्यधीशे संरम्भमार्गाभिनिविष्टचित्तान् ।
ये संयुगेऽचक्षत तार्क्ष्यपुत्रस्यांसे[3] सुनाभायुधमापतन्तम् ॥ २४ ॥

"असुरा अपि ये विष्णुं शङ्खचक्रधरं रणे[4] । भक्तिपूर्वमवेक्षन्ते ज्ञेया भगवता इति । विद्विषन्ति तु[5] ये विष्णुमृषिपुत्रा अपि स्फुटम् । असुरास्तेऽपि विज्ञेया गच्छन्ति च सदा तमः । जीवद्वयसमायोगाद्धिरण्यकमुखाः[6] परे । भक्तिद्वेषयुताश्च स्युर्गतिस्तेषां यथानिजम्[7] । कंसपूतनिकाद्याश्च बान्धवादियुता यतः । जीवद्वयसमायोगाद्[8] गतिद्वयजिगीषवः । सर्वथा भक्तितो मुक्तिर्द्वेषात् तम उदीरितम् । नियमस्त्वनयोर्नित्यं मोहायान्यद् वचो[9] भवेत्" इति ब्रह्मवैवर्ते[10] ॥ * ॥

इति तृतीयस्कन्धे द्वितीयोऽध्यायः

समाहुता[11] भीष्मककन्यया ये श्रियः सवर्णेन जिहीर्षयैषाम्[12] ।
गान्धर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत् सुपर्णः ॥ ३ ॥

दृशां सुखावहं त्रिलोको धर्मसूनो राजसूये यद् वपुर्निरीक्ष्य इत्यमन्यत । कथंविधम् ? विधातुश्चतुर्मुखस्य सृतौ सृष्टौ यत् कौशलं तत् सर्वमपि अत्र श्रीकृष्णवपुषि दृष्टे सति अर्वागुपगतं हीनं जातमित्यमन्यत । अनन्तसौन्दर्यत्वात् कृष्णस्येत्यर्थः" इति । एतत्पक्षे बतेति न खेदे, किन्त्वास्वादे ।

१ "दृष्ट्वाऽपि" इति प्र. पाठः । प्राचीनपाठे 'लोकस्तु' इत्यन्वयः । तेन योग्यताविशेषमाह । त्रिविधो लोक इति च मूले ध्वनितम् ।

२ "बहुस्थिता" इति प्र. पाठः । अन्यत्र कश्चिदेव क्वचिदेव भ्राम्यति । अत्र तु भगवद्रूपे बहवो भ्राम्यन्तीति बहुष्वसकृदियमुत्थिता भ्रान्तिः ।

३ "तार्क्ष्यपुत्रमंसे-" इति प्र. पाठः । "तार्क्ष्यपुत्रस्य काश्यपपुत्रस्य गरुडस्यांसे स्थित्वा" इत्यनन्ततीर्थाः ।

४ "शङ्खचक्रगदाधरम्" इति प्र. पाठः ।

५ "विद्विषन्ति हि" इति क्वचित् ।

६ "हिरण्यप्रमुखाः" इति क्वचित् ।

७ "यथा निजा" इति क्वचिन्मुद्रितः पाठः ।

८ "-समावेशात्" इति क्वचित् ।

९ "मोहायान्यवचो-" इति प्र. पाठः ।

१० "इति ब्राह्मे" इति प्र. पाठः ।

११ "समाहृताः" इत्यपि केचिदर्वाचीनाः पठन्ति ।

१२ "बुभूषयैषाम्" इति प्र. पाठः ।

भीष्मककन्याया अर्थे[१] सवर्णमात्रयोग्यतया[२] आहूताः[३]। एषां श्रियो जिहीर्षयाऽऽह्वानबुद्धिर्भगवता कृता[४]।

"सुपर्णः सुपरानन्दात्[५] काकुत्स्थो वाचि संस्थिते[६]" इति पाद्मे ॥ * ॥

तास्वपत्यान्यजनयदात्मतुल्यानि सर्वतः[७]।
एकैकस्यां दशदश प्रकृतेर्विबुभूषया ॥ ९ ॥

"उत्तमैः सर्वतः साम्यं किञ्चित् साम्यमुदीरितम्[८]" इत्याग्नेये ॥ * ॥

भगवानपि विश्वात्मा लोकवेदपथानुगः।
कामं[९] सिषेवे द्वार्वत्यामसक्तः साङ्ख्यमास्थितः ॥ १९ ॥

"केवलं भगवज्ज्ञानं साङ्ख्यमित्यभिधीयते" इत्यध्यात्मे ॥ * ॥

---

१ "भीष्मककन्यकाया अर्थे" इति क्वचित् प्राचीनपाठः। तदात्वे तु भागवतेऽपि "समाहुता भीष्मककन्यकायाः" इत्येव पाठः स्यात्। तथाच विभक्तिव्यत्यासप्रयासोऽपि नास्ति। परन्तु न क्वापि कोशेषु तथा भागवतपाठः पठितः, न कैरपि व्याख्यातृभिस्तादृशः पाठः समादृत इति "भीष्मककन्यया ये" इत्येव पाठोऽत्र स्वीकृतः। "भीष्मककन्यया भीष्मककन्याया अर्थे" इत्यनन्ततीर्था अप्याहुः। तेन षष्ठ्यर्थे तृतीयेत्येव सर्वसम्मतम्।

२ "सवर्णमात्रतया" इत्यपि पाठान्तरम्। "क्षत्रियत्वेन समानवर्णतया। नतु रुग्मिणीप्राप्तियोग्यतया" इत्यनन्ततीर्थाः।

३ एतेन आहुता इति मूले ह्रस्वश्छान्दस इत्युक्तं भवति।

४ "भीष्मकस्थेन हरिणा राज्ञां पराजयार्थमेव ते समाहूता इति हृदयम्" इत्यनन्ततीर्थाः। तथाचायं मूलार्थः— "भीष्मककन्याया अर्थे, अथवा भीष्मककन्यया निमित्तभूतया, तन्निमित्तं तदर्थमिति यावत्, सवर्णेन क्षत्रियत्वरूपसमानवर्णत्वमात्रनिमित्तेन, ये राजानः तेषां श्रियः विजयश्रियः जिहीर्षयैव भीष्मकेन समाहूताः। यद्यपि भीष्मको न वीर्यजिहीर्षया तानाहूतवान्, अथापि तद्विजयश्रीहरणमिच्छता भगवतैव तेषामाह्वानार्थं भीष्मकस्य मतिर्दत्तेति भावः। एषां राज्ञां मिषतामेव मूर्ध्नि पदं ददत् सुपर्णः परानन्दो भगवान् स्वभागं अनादितः स्वशरीरार्द्धभूतां तां रुग्मिणीं गान्धर्ववृत्त्या गान्धर्वविवाहेन जहार स्वीकृतवान्" इति।

५ "सुपरानन्दः" इति क्वचित्। एतेन "सुपर्ण इति गरुडभावमापन्नो भगवान्" इति वदन् वल्लभाचार्यः परास्तः। अनन्ततीर्थीये तु "सुपर्णः गरुडः स्वभागं अमृतमिवेति वा" इत्यर्थान्तरमुक्तम्।

६ "संस्थितः" इति क्वचित्।

७ "सर्वशः" इत्यपि पाठान्तरम्। अत्र सर्वतः आत्मतुल्यानि इत्यन्वयो बहुव्याख्यातृसम्मतः। अनन्ततीर्थीये तु—"तासु सर्वशः सर्वासु आत्मतुल्यानि पुत्रत्वेनाऽऽत्मनो योग्यानि" इति व्याख्यातम्।

८ "साम्यमुदीर्यते" इति प्र. पाठः। ९ "कामान्" इति प्र. पाठः।

तस्येत्थं[1] रममाणस्य संवत्सरगणान् बहून् ।
गृहमेधेषु योगेषु विरागः समजायत[2] ॥ २२ ॥

"सर्वदाऽपि विरक्तः सन् भासयीत विरागवत्[3] । कादाचित्कः कुतस्तस्य लोकशिक्षार्थमिष्यते" इति पाद्मे ॥ * ॥

दैवाधीनेषु कामेषु[4] दैवाधीनः स्वयं पुमान् ।
को विस्रम्भेत योगेन योगेश्वरमनुव्रतः ॥ २३ ॥

तेनापि विरागः प्रदर्शितः । अतः कोऽन्यो विस्रम्भं कुर्यात् ॥ * ॥

ततः कतिपयैर्मासैर्[5] वृष्णिभोजान्धकादयः ।
ययुः प्रभासं संहृष्टा रथैर्देवविमोहिताः ॥ २५ ॥

"एष्यच्च[6] निश्चितं यत् तदतीतत्वेन भण्यते । चक्रवत् परिवृत्तेर्वा दुष्टानां मोहनाय च[7]" इति नारदीये[8] ॥ * ॥

इति तृतीयस्कन्धे तृतीयोऽध्यायः

भगवानात्ममायाया[9] गतिं तामवलोक्य सः ।
सरस्वतीमुपस्पृश्य वृक्षमूल उपाविशत्[10] ॥ ३ ॥

---

१ "तस्यैवम्" इति पाठान्तरम् ।

२ "गृहमेधेषु गृहस्थाश्रमेषु तद्योगेषु गृहस्थाश्रमसाधनेषु च कळत्रादिषु विरागः समजायत विरागो जात इतीव प्रदर्शयामास" इत्यनन्ततीर्थाः । विश्वनाथचक्रवर्ती चाऽह—"सर्वकालमेव स (विरागः) आसीदेव । तदानीं त्वतिस्पष्टीबभूवेत्यर्थः । गुणेष्वसङ्गो वैराग्यमिति वैराग्यस्य लक्षणत्वाद् गुणातीतेषु शुद्धसत्त्वमयेषु रुग्मिण्यादिविलासेषु वैराग्यं न व्याख्येयम्" इति ।

३ "विरागिवत्" इति प्र. पाठः ।

४ "कार्येषु" इत्यनन्ततीर्थसम्मतः पाठः । "पुत्रमित्रकळत्रादिनिमित्तकार्येषु कृत्येषु" इति हि तद्व्याख्यानम् ।

५ "द्वादशमासात्मकत्वाद् वत्सरस्यात्र मासशब्देन वत्सरा विवक्षिताः" इति प्राचीनटीका । "सुखहेतुत्वान्मासैरिव संवत्सरैः" इति विजयध्वजीयम् ।

६ "एष्यं च" इति क्वचित् । ७ "मोहनाय वा" इति क्वचित् । ८ "इति स्कान्दे" इति प्र. पाठः ।

९ "भगवान् स्वात्ममायायाः" इति प्र. पाठः । "भगवांस्त्वात्ममायायाः" इति क्वचित् ।

१० "वृक्षमूलमुपाविशत्" इति प्र. पाठः ।

अहं चोक्तो भगवता प्रपन्नार्तिहरेण ह।
बदरीं त्वं प्रयाहीति स्वकुलं सञ्जिहीर्षुणा॥ ४॥

आत्ममायायाः आत्मसामर्थ्यस्य[1] गतिं पूर्वमेवावलोक्य[2]।

"ज्ञात्वा कतिपयैर्वर्षैः पूर्वमेव जनार्दनः। मौसलं ज्ञानसन्तत्या[3] उद्धवं बदरीं नयत्[4]। स ज्ञानं[5] तत्र विस्तीर्य पुनर्द्वारवतीं ययौ। पूर्वमेवोपदिष्टोऽपि हरिणा ज्ञानमुद्धवः। स्वर्गारोहणकाले तु पुनः पप्रच्छ केशवम्। पुनः श्रुत्वा बदर्यां तु[6] वर्षत्रयमुवास ह। ज्ञानं संस्थाप्य पश्चाच्च स्वेच्छया स्वर्गतः प्रभुः" इति गारुडे[7]॥ *॥

निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः[8]।
स तु कथमवशिष्ट उद्धवो यत्[9] प्रभुरपि तत्यज आकृतिं त्र्यधीशः॥२८॥

आकृतिं पृथिवीम्[10]—

"शरीरमाकृतिर्देहः कुः पृथ्वी च मही तथा" इति ह्यभिधाने[11]। "पृथिवीलोकसन्त्यागो देहत्यागो हरेः स्मृतः। नित्यानन्दस्वरूपत्वादन्यन्नैवोपपद्यते[12]। दर्शयेज्जनमोहाय सदृशीं मृतकाकृतिम्। नटवद् भगवान् विष्णुः परज्ञानात्मको विभुः[13]" इति

---

१ "आत्मेच्छायाः" इत्यनन्ततीर्थाः। "मायायाः सङ्कल्पस्य" इति शुकदेवः। सर्वं चैतदविरुद्धम्।

२ "पूर्वमेवाऽऽलोच्य" इति पाठान्तरम्। ३ "ज्ञानसम्पत्त्यै" इति क्वचित्।

४ "नयन्" इति पाठान्तरम्। नयत् अनयत्।

५ "तज्ज्ञानम्" इति क्वचित्। "तत्त्वज्ञानं च विस्तीर्य" इत्यपि।

६ "बदर्यां च" इति क्वचित्। ७ "इति च गारुडे" इति क्वचित्।

८ "अधिरथयूथपानामपि यूथपेषु मुख्यः उद्धवः" इति विजयध्वजादयः। अधिरथयूथपयूथपेषु वृष्णिभोजेषु निधनमुपगतेषु सत्स्वपि यादवेषु मुख्यः उद्धवस्त्वेकः कथमवशिष्टः" इत्यनन्ततीर्थाः।

९ "उद्धवोऽयम्" इत्यपि पाठान्तरम्।

१० "आकृतिवत् स्थितां पृथिवीम्। यस्य पृथिवी शरीरमिति श्रुतेः" इत्यनन्ततीर्थाः। अन्येऽप्याहुः—"अत्र भूत्याग एव विवक्षितः। 'सर्वे नित्याः शाश्वताश्च देहास्तस्य महात्मनः' इति स्मरणात्" इति वीरराघवः। "देहं विराडाकारं पृथिवीम्" इति विश्वनाथः, राधारमणजीवगोस्वामिनौ च तथा। "आकृतिं त्रिगुणाभिव्यक्तिरूपं मर्त्यलोकम्" इति शुकदेवः।

११ "इत्यभिधानम्" इति प्र. पाठः।

१२ "नैवोपलभ्यते" इति प्र. पाठः। "अन्यो नैवोपलभ्यते" इति क्वचित्।

१३ "परज्ञानाकृतिः स्वयम्" इति प्र. पाठः। "परज्ञानाकृतिः सदा", "परं ज्ञानाकृतिः सदा" इति च।

स्कान्दे । "राजन् परस्य तनुभृज्जननाप्ययेहा[1] मायाविडम्बनमवैहि यथा नटस्य" इति च ॥ * ॥

नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्निर्जितः[2] प्रभुः ।
अतो मद्वत् पुनर्लोकं[3] ग्राहयन्निह तिष्ठतु ॥ ३२ ॥

"उत्तमैरधिकत्वं वा साम्यं वा विजयोऽपि वा । उच्यतेऽपितु नीचानां मोहनार्थं व्यपेक्षया[4] । मूढदृष्ट्यनुसाराद् वा किञ्चित्साम्येन वा क्वचित्" इति ब्रह्मतर्के ॥*॥

इति तृतीयस्कन्धे चतुर्थोऽध्यायः

परावरेषां भगवन् कृतानि[5] श्रुतानि मे व्यासमुखादभीक्ष्णम् ।
न तृप्नुमः कर्णसुखावहानाम्[6] तेषामृते कृष्णकथामृतौघात् ॥ १० ॥

ऋते अवगमे । "ऋ गतौ" इति धातोः । तेषां तात्पर्यावगमे कृष्णकथामृतौघ एवासौ यतः ॥*॥

मुनिर्विवक्षुर्भगवद्गुणानां सखाऽपि ते भारतमाह कृष्णः ।
यस्मिन्[7] नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता न[8] हरेः कथायाम् ॥१२॥

यस्मिन् भारते । हरेः कथायां ग्राम्यसुखानुवादैर्मतिर्न गृहिता[9] ।

---

१ "-प्ययेहां मायाविडम्बन—" इति, "—प्ययेहां मायां विडम्बन—" इति च क्वचित् ।

२ "गुणैर्नार्दितः" इति प्र. पाठः ।

३ "मद्वयुनं लोकम्" इति प्र. पाठः । "प्रभुरहं यस्य भक्त्यादिगुणैर्निर्जितः वशीकृतः स उद्धवः मत् मत्प्रसादात् ज्ञानप्रवर्तकेषु मद्भक्तेषु अण्वपि किञ्चिदपि न्यूनो न । समर्थ एव । अतः मद्वल्लोकं जनं ज्ञानादिकं ग्राहयन्निह तिष्ठतु इत्यचिन्तयत्" इत्यनन्ततीर्थाः ।

४ "मोहार्थं वाऽप्युपेक्षया" इति प्र. पाठः । व्यपेक्षया इतरापेक्षया वैशिष्ट्यरूपमाधिक्यं ज्ञापनीयमिति विशेषापेक्षया ।

५ "व्रतानि" इति प्र.पाठः ।

६ "अतृप्नुम क्षुल्लसुखावहानाम्" इति प्र.पाठः ।

७ "तस्मिन्" इति क्वचित् ।

८ "नु" इत्यर्वाचीनाः । "अनु" इत्येके पठन्ति ।

९ हरेः कथायां या मतिः सा ग्राम्यसुखानुवादैः न गृहीता, न निगृहीतेत्यर्थः । तस्य तत्पूरकतयैव कथनात् । अथवा ग्राम्यसुखानुवादैः वात्स्यायनादिशास्त्रैः । प्राचीनटीकासम्मतश्चायमर्थः ।

"भारतान्नाधिकं विष्णोर्महिमावाचकं क्वचित् । भारतान्न विरागाय भारतान्न विमुक्तये" इति पाद्मे ॥ * ॥

सा श्रद्दधानस्य विवर्द्धमाना विरक्तिमन्यत्र करोति पुंसः ।
हरेः [1]पदानुस्मृतिनिर्वृतस्य समस्तदुःखाप्ययमाशु[2] धत्ते ॥ १३ ॥

सा [3]ग्राम्यसुखानुवादैर्न गृहीता हरेः कथायां विवर्द्धमाना मतिः[4] ॥ ॥ * ॥

इति तृतीयस्कन्धे पञ्चमोऽध्यायः

---

[5]भगवानेक आसेदमग्र आत्माऽऽत्मनां विभुः ।
आत्मेच्छानुगतो ह्यात्मा नानाशक्त्युपलक्षितः[6] ॥ १ ॥

आत्मनां विभुर्जीवाधिपतिः[7] ॥ * ॥

स वा एष तदा द्रष्टा नापश्यद् विश्वमेकराट्[8] ।
मेनेऽसन्तमिवाऽऽत्मानं सुप्तशक्तिरसुप्तदृक्[9] ॥ २ ॥

"परमात्मा यतो जीवं मेनेऽसन्तमशक्ततः[10] । असन्नसौ ततो नित्यं[11] सत्यज्ञानो यतो हरिः" इत्याग्नेये । "शक्यत्वाच्छक्तयो भार्याः शक्तिः सामर्थ्यमुच्यते" इति ब्रह्मतर्के ।

---

१ "सदानुस्मृति–" इति क्वचित् । २ "–दुःखात्ययमाशु" इति केचित् पठन्ति ।

३ "ग्राम्यकथानुवादैः" इति क्वचित् । ४ "रतिः" इति क्वचित् ।

५ प्रचलितपाठे तु नात्राध्यायारम्भः । पञ्चमाध्याय एवानुवर्तते । तथात्र "भगवानेक–" इत्यादिः पञ्चमाध्यायस्य त्रयोविंशः श्लोकः । प्राचीनकोशेषु त्विदमध्यायान्तरमित्यैककण्ठ्यम् ।

६ "आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः" इत्यर्वाचीनाः पठन्ति । "नानामत्युपलक्षितः" इत्यपरे ।

७ "जीवाधिपः" इत्यपि पाठान्तरम् । अनन्ततीर्थीये तु प्रकारान्तरेण व्याख्यातम्– "विभुः सर्वव्याप्तः, आत्मनां सर्वचेतनानामात्मा स्वामी" इति । "चेतनश्चेतनानाम्" इति हि श्रूयते । उत्तरत्र विभुरिति श्रवणात् आत्मनां जीवानां आत्मा स्वरूपमिति परेषां व्याख्यानमसङ्गतमित्येव हि भाष्यकाराभिप्रायः । तेनेदमप्यर्थान्तरं भगवत्पादसम्मतमेव ।

८ "दृश्यमेकराट्" इति प्र. पाठः । ९ "–रलुप्तदृक्" इति वल्लभाचार्यः पठति ।

१० "–मशक्तितः" इति प्र. पाठः । ११ "असन्नसावतो नित्यम्" इति प्र. पाठः ।

"सुतिस्तु प्रकृतेः प्रोक्ता अतीव भगवद्रतिः। अनास्थाऽन्यत्र च प्रोक्ता विष्णोश्च-क्षुर्निमीलनम्" इति व्योमसंहितायाम् ॥ * ॥

सोऽप्यंशगुणकालात्मा भगवद्दृष्टिगोचरः।
आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया ॥ ६ ॥

अंशो जीवः[1]।

"कालजीवगुणादीनामभिमानी चतुर्मुखः। सर्वजीवाभिमानित्वादंश[2] इत्येव चोच्यते" इति ब्राह्मे ॥ * ॥

कालमायांशयोगेन भगवद्वीक्षितं नभः।
तामसानुसृतं[3] स्पर्शं[6] विकुर्वन्निर्ममेऽनिलम्[4] ॥ १० ॥

अनिलेनान्वितं ज्योतिर्विकुर्वत् परवीक्षितम्।
आधत्ताम्भो रसमयं[5] कालमायांशयोगतः ॥ १२ ॥

ज्योतिषाऽम्भोऽनुसंसृष्टं विकुर्वद् ब्रह्मवीक्षितम्[6]।
महीं गन्धगुणामाधात् कालमायांशयोगतः ॥ १३ ॥

---

१ "अंशा जीवाः, गुणाः सत्त्वादयः। कालो लवादिः प्रळयान्तः। एतेषां त्रयाणामात्मा अभिमानी, ब्रह्मा भगवद्दृष्टिगोचरः भगवता प्रसन्नदृष्ट्या प्रेरितः अस्य विश्वस्य सिसृक्षया, आत्मानं आत्मनाऽभिमन्यमानं महत्तत्त्वं व्यकरोत् सृष्ट्यभिमुखं चकार" इत्यनन्ततीर्थाः। अन्येऽप्याहुः–"अंशः चिदाभासो जीवशक्तिः" इति श्रीधर-राधारमणदासौ। "अंशो जीवः। 'अंशो नानाव्यपदेशात्', 'ममैवांशो जीवलोके जीवभूतः सनातनः' इति प्रयोगात्" इति वीरराघवः। "अंशः पुरुषः" इति जीवगोस्वामी विश्वनाथश्च। अंशः जीवपुरुषः" इति शुकदेवः।

२ अंशशब्दस्य जीववाचित्वे प्रमाणसमर्पकतयेदमुत्तरार्द्धमप्युदाहृतम्। अंशा हि जीवाः। तदभिमानित्वाद् ब्रह्माऽप्यंश उच्यते अभिमानिव्यपदेशाधिकरणनयेन। उत्तरश्लोकेषु प्रयुक्तस्यांशशब्दस्य ब्रह्मवाचित्वद्योतनाय चेदमुदितम्।

३ "नभसोऽनुसृतम्" इत्यर्वाचीनः पाठः।

४ "कालः सृष्टिकालः, माया लक्ष्मीः जडप्रकृतिश्च, अंशो जीवाभिमानी ब्रह्मा, कार्यानुविष्टैरेतैः सहितं भगवद्वीक्षितं स्वकारणेन तामसाहङ्कारेणानुसृतं प्रविष्टं विकुर्वत् परिणामवत् नभः आकाशम् स्पर्शतन्मात्रं निर्ममे, तस्मादनिलं निर्ममे" इति प्राचीनटीका।

५ "रसमयं रसतन्मात्रकार्यं अम्भः उदकं आधत्त अजनयत्" इति प्राचीनटीका।

६ "परवीक्षितम्" इति पाठान्तरम्।

19

कालमायांशयोगतः[१]। कालपरिणामात्[२] प्रकृतेर्हिरण्यगर्भाच्च ॥ * ॥

एते देवाः कला विष्णोः कालमायांशलिङ्गिनः ।
नानात्वात् स्वक्रियानीशाः प्रोचुः प्राञ्जलयो विभुम् ॥ १५ ॥

कालमायांशलिङ्गिनः तन्निमित्तशरीराः । हिरण्यगर्भस्यैव कालाभिमानि जीवाभिमानि च[३] द्विविधं रूपम् ।

"कालजीवाभिमानेन रूपद्वन्द्वी चतुर्मुखः" इति पाद्मे ॥ * ॥

ऋते यदस्मिन्[४] भव ईश जीवास्तापत्रयेणाभिहता[५] न शर्म ।
आत्मन् लभन्ते भगवंस्तवाङ्घ्रे[६]श्छायांशविद्यामत आश्रयेम ॥ १७ ॥

"ब्रह्मविद्या हरेश्छाया तदंशा हि[७] सुरेष्वपि । सर्वविद्याः श्रियः प्रोक्ताः 'प्रधानांशश्चतुर्मुखे" इति ब्राह्मे ॥ * ॥

मार्गन्ति यत् ते मुखपद्मनीडै[९]श्छन्दःसुपर्णैर् ऋषयो विविक्ते ।

---

१ कालमायांशयोगेनेति दशमश्लोकोक्तस्यापीदमुपलक्षणम् । मध्येस्थितस्य ग्रहणेन पूर्वोत्तरयोर्ग्रहणं भवतीतीदमुदितम् । योगत इति पदस्य द्विवारमावृत्तेः प्राधान्याच्च ।

२ "कालात् परिणामात्" इति प्र. पाठः । कालपरिणामादित्येव साधुः । मूले कालपदस्य कालपरिणामादित्यर्थः । सृष्ट्युन्मुखकालादिति यावत् । मायापदव्याख्यानं प्रकृतेरिति । प्रकृतिरिति द्वे अपि प्रकृती चित्प्रकृतिः जडप्रकृतिश्च । अंश इति हिरण्यगर्भः । "चतुर्मुखः सर्वजीवाभिमानित्वादंश इत्येव चोच्यते" इति हि पूर्वमेवोक्तम् ।

३ "कालाभिमानी जीवाभिमानीति" इति प्र. पाठः प्रामादिकः । मायेति जडप्रकृतिमानिनी रमा । अंश इति जीवाभिमानी ब्रह्मा । काल इति का देवता? तदेतदाह–हिरण्यगर्भस्यैवेति । कालाभिमानिरूपेण, जीवाभिमानिरूपेण च चतुर्मुखस्तत्त्वदेवानां शरीरमापादयतीति द्विविधमपि निर्दिष्टमित्यर्थः । अनन्ततीर्थीये तु अभिमन्यमानपरतयाऽपि व्याख्यातमिति भाति । तथाहि तद्वचनम्–"कालः सृष्टिकालः, माया प्रकृतिः, अंशो ब्रह्मा, एतन्निमित्तशरीरवन्तः" इति ।

४ "धातर्यदस्मिन्" इत्यर्वाचीनः पाठः । "ऋते–" इत्येव बहुव्याख्यातृसम्मतः पाठः । "तापत्रयेण पीडिताः जीवाः सर्वेऽपि यत् पदाश्रयणं ऋते विना आत्मनि स्वात्मनि शर्म न लभन्ते यत् अतः" इति प्राचीनटीका ।

५ "तापत्रयेणोपहताः" इत्यर्वाचीनः पाठः ।

६ "तवाङ्घ्रिच्छायां सविद्याम्" इत्यर्वाचीनः पाठः ।

७ "तदंशो हि" इति पाठान्तरम् ।

८ "प्रधानांशाश्चतुर्मुखे" इति पाठान्तरम् ।

९ "स्वमुखपद्मनीळैः छन्दःसुपर्णैः ज्ञानिनः यत्पदं मार्गन्ति । यथा हंसखगैर्विष्णुपदमाकाशं कश्चिन्निमार्गयति । पूर्वतनाः पक्षिभिः स्वकार्याणि साधयन्ति हि" इत्यनन्ततीर्थाः । "भगवन्मुखपद्मनीडैः छन्दःसुपर्णैः यत् पदं मार्गन्ति । यथा पक्षिणो नीडादुद्गतास्तत्रैव विशन्ति तथा वेदा अपि त्वत्त उद्गतास्त्वय्येव पर्यवस्यन्ति । अतो वेदानाश्रित्य त्वत्पदं मृगयन्ते" इत्यपरे ।

[1]यच्चाघमर्षो द्युसरिद्धरायाः परं पदं तीर्थपदः प्रपन्नाः ॥ १८ ॥

द्युसरितो धरायाश्च ॥ * ॥

तथा परे[2] त्वात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् ।
त्वामेव धीराः पुरुषं विशन्ते[3] तेषां श्रमः स्यान्नतु सेवया ते ॥ २४ ॥

"वायोश्च प्रकृतेर्विष्णोर्जयो भक्त्यैव नान्यथा" इति दत्तात्रेययोगे ॥ * ॥

तत् ते वयं लोकसिसृक्षयाऽद्य [4]त्वया विसृष्टास्त्रिभिरात्मभिः स्म[5] ।
सर्वे वियुक्ताः स्वविहारतन्त्रं न शक्नुमस्तत् प्रतिकर्तवे[6] ते ॥ २५ ॥

त्रिभिरात्मभिः कालमायांशैः ॥ * ॥

ततो वयं सत्प्रमुखा[7] यदर्थे बभूविमाऽत्मन् करवाम किं ते ।
त्वं नः स चक्षुः[8] परिदेहि शक्त्या[9] देव क्रियार्थे यदनुग्रहेण[10] ॥ २८ ॥

सत्प्रमुखाः महदादयः ॥ * ॥

इति तृतीयस्कन्धे षष्ठोऽध्यायः[11]

---

१ "यस्याघमर्षोदसरिद्वरायाः परं पदम्" इत्यर्वाचीनः पाठः । "यच्चाघमर्षम्—" इति च पाठान्तरम् । "यत्पदं प्रपन्नानामघमर्षः । अघं मार्जति नाशयति । यत्पदं द्युसरितो गङ्गाया धराया भूमेश्च पदमुत्पत्तिस्थानं आश्रयभूतं च । तीर्थपदः शुद्धपादस्य ते तत्परं पदं वयं प्रपन्नाः" इत्यनन्ततीर्थाः ।

२ "परे चाऽत्म—" इति प्र. पाठः । "आत्मसमाधिर्मनस एकाग्रता । भगवति निरन्तरमनोवृत्तिर्योगः" इत्यनन्ततीर्थाः ।

३ "विशन्ति" इति प्र. पाठः ।

४ "त्वयाऽनुसृष्टा—" इति प्र. पाठः ।

५ "आत्मभिर्ये" इति क्वचित् । "आत्मभिः स्वे" इत्यन्यत्र । "आत्मभिः स्मः" इत्यपि पाठान्तरम् ।

६ "प्रतिहर्तवे" इत्यर्वाचीनाः ।

७ "मत्प्रमुखाः" इति केचित् पठन्ति ।

८ "स्वचक्षुः" इति प्र. पाठः ।

९ "शक्त्या" इति प्र. पाठः ।

१० "यदनुग्रहाणाम्" इत्यर्वाचीनाः ।

११ प्र. पाठेऽत्र पञ्चमोऽध्यायः ।

इति तासां स्वशक्तीनामसतीनां समेत्य सः[१] ।
प्रसुप्तलोकतन्त्राणां निशाम्य[२] गतिमीश्वरः ॥ १ ॥

कालसञ्ज्ञां ततो मायां[३] बिभ्रच्छक्तिमुरुक्रमः ।
त्रयोविंशतितत्त्वानां गणं युगपदाविशत् ॥ २ ॥

सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम् ।
भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥ ३ ॥

"शक्यत्वाच्छक्तयो विष्णोर्महदाद्या रमा तथा । स्वरूपशक्तिः शक्तित्वान्मुख्यशक्तिर्हि सा यतः" इति ब्रह्मतर्के ।

समेत्य असतीनां असमेतानाम् । प्रसुप्तलोकतन्त्राणां अनाविर्भूतलोकसृष्टिशक्तीनाम् ।

"तनुतेऽनेन[४] कार्यं यत् तन्त्रं साधनमुच्यते । कारणानां स्वशक्तिर्वा प्रधानं साधनं यतः" इति ब्रह्मतर्के ॥ * ॥ "शब्दाद्या नभआद्याश्च मनोयुक्तेन्द्रियाणि च । अहङ्कारो महांश्चैव त्रयोविंशतिको गणः । देवतेन्द्रिययोरैक्यान्न[५] पृथक् गणनं तयोः । प्रकृतिस्तु चतुर्विंशा पञ्चविंशो हरिः स्वयम् । यदा जडांशस्वीकारो जीवस्तत्पञ्चविंशकः । षड्विंशको महाविष्णुः श्रिया वा सप्तविंशकः" इति तत्त्वनिर्णये । "त्रयोविंशतितत्त्वानि प्राविशद् रमया सह । कालाख्यया स्वया विष्णुः[६] शक्यत्वाच्छक्तिरूपया । सर्वचेष्टकरूपेण स्वसामर्थ्येन केशवः । तानि भिन्नानि तत्त्वानि योजयामास चांशतः" इति च ॥ * ॥

प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः ।
प्रेरितोऽजनयत् स्वाभिर्मात्राभिरधिपूरुषम्[७] ॥ ४ ॥

मात्राभिः अंशैः ॥ * ॥

---

१ "स्वशक्तीनां सतीनामसमेत्य सः" इति प्र. पाठः । २ "निशाम्य" इति क्वचित् ।
३ "तदा देवीम्" इति प्र. पाठः । "यदा देवीम्" इत्यपि केचित् पठन्ति ।
४ "तनुते येन" इति प्र. पाठः । "तनुते तेन" इति क्वचित् ।
५ "देवतेन्द्रिययोरैक्यं न" इति क्वचित् । ६ "स्वयं विष्णुः" इति प्र. पाठः ।
७ "अभिपूरुषम्" इति पाठान्तरम् । "अपि पूरुषम्" इति च । "दैवेन हरिणा प्रविश्य प्रेरितोऽत एव प्रबुद्धकर्मा अभिव्यक्तजगत्सृष्टिनिमित्तादृष्टः त्रयोविंशतिको गणः स्वाभिर्मात्राभिः स्वकीयैरंशैः पुरुषेण ब्रह्मणाऽधिष्ठितत्वादधिपूरुषाख्यं ब्रह्माण्डमजनयत्" इत्यनन्ततीर्थाः ।

स वै विश्वसृजां गर्भो [1]दैवकर्मात्मशक्तिमान् ।
विबभाजाऽत्मनाऽऽत्मानमेकधा दशधा त्रिधा[2] ॥ ७ ॥

"ईश्वरो दैवमुद्दिष्टं सर्वस्यापि प्रभुत्वतः[3]" इति च ।

आत्मशक्तिः प्रकृतिः ॥ * ॥

एष ह्यशेषसत्त्वानामात्मांऽशः परमात्मनः ।
आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते[4] ॥ ८ ॥

साध्यात्मं साधिभूतं च साधिदैवमिति त्रिधा[5] ।
विराट्प्राणो दशविध एकधा हृदयेन च[6] ॥ ९ ॥

"पुरुषेणाऽत्मभूतेन" इति योऽसृजत्[7] स एष इत्युक्तः ।

---

१ "देवकर्मात्म-" इति प्र. पाठः ।

२ "आत्मना स्वेच्छयैव आत्मानं ब्रह्मदेहं, एकधा दशधा, एकादशधा, श्रोत्रादिदशेन्द्रियमनोभेदेनैकादशधा, विबभाज । प्राणादिपञ्चकं नागादिपञ्चकं मनश्चेत्येकादशधा (वा) । पुनरध्यात्माधिभौतिकाधिदैविकभेदेन त्रिधा विबभाज । हरिरात्मानं स्वस्वरूपं च एकादशेन्द्रियनियामकत्वेनाध्यात्मादिनियामकतया च एकादशधा त्रिधा च विबभाजेति ज्ञातव्यम्" इत्यनन्ततीर्थाः । "एकधा हृदयस्थरूपेण, प्राणादिनियामकतया दशधा" इत्यन्ये व्याख्यातारः ।

३ एतेन दैवशक्तिः प्रभुत्वम्, कर्मशक्तिरिति क्रियाशक्तिः, अत्मशक्तिरिति स्वभार्या प्रकृतिरिति व्याख्यातं भवति । एतेनैव प्रमाणवचनेन "प्रबुद्धकर्मा दैवेन" इति पूर्वश्लोकोक्तं दैवपदं च व्याख्यातम् ।

४ "अशेषसत्त्वानां अशेषजीवानां आत्मा अन्तर्यामी, एष परमपुरुषः परमात्मनः मूलरूपिणः पद्मनाभस्य अंशो हि अवतारो हि । तत्राप्याद्यः प्रथमोऽवतारः । जगृहे पौरुषं रूपमित्यादौ प्रसिद्धत्वात् । असौ भूतग्रामः सर्वजीवसमूहः यत्र येन परमपुरुषेण विभाव्यते विशेषतो विविधं सृज्यते" इत्यनन्ततीर्थाः । "यत्र यस्मिन् विभाव्यते दृश्यते" इति विजयध्वजतीर्थाः ।

५ "साध्यात्मः साधिदैवश्च साधिभूत इति त्रिधा" इत्यर्वाचीनः पाठः ।

६ "अध्यात्मसाहित्येन वर्तमानं रूपं साध्यात्मम्, अधिभूतेन सह वर्तमानं साधिभूतम्, अधिदैवेन सहितं साधिदैवम् । विराळाख्यब्रह्मणः प्राणः इन्द्रियसमूहः दशविधः । ततस्तदन्तर्यामिणो दशविधत्वं सिद्ध्यति । हृदयेन मनसा सहैकविधो ब्रह्मा । तेन तदन्तर्यामिहरिरूपस्यैकविध्यं सिद्ध्यति" इत्यनन्ततीर्थाः । तेन एकधा दशधेति पूर्वोक्तं प्रत्येकमपि व्याख्येयमिति गम्यते । तात्पर्ये प्राणापानादय इति व्याख्यानान्तरं नैतद्विरोधि । अत एव विजयध्वजीयेऽप्युक्तम्—"अध्यात्मादित्रिषु श्रोत्रादीन्द्रियेषु हृदये च" इत्यादि ।

७ "योऽण्डमसृजत्" इति प्र. पाठः ।

"आद्योऽवतारो विष्णोस्तु पुरुषो नाम कीर्तितः । असृजत् स महत्तत्त्वं स एवाण्डं समाविशत् । स ब्रह्मणो हृदिस्थत्वाद्धृदयं चेति कीर्त्यते[1]" इति च । "प्राणादिपञ्चकं चैव तथा नागादिपञ्चकम्[2] । एवं तु दशधा प्राण अध्यात्मादि[3] त्रिधाऽखिलाः" इति व्योमसंहितायाम्[4] ॥ * ॥

निर्भिण्णान्यथ[5] चर्माणि लोकपालोऽनिलोऽविशत् ।
प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते ॥ १६ ॥

"प्राणः प्रथमजो यस्तु प्रधानो वायुरीरितः[6] । त्वगात्माद्यास्तु तत्पुत्रा द्विधा भूतमुदाहृतम्[7]" इति तत्त्वनिर्णये ॥ * ॥

आत्मानं चास्य निर्भिण्णं वाचस्पतिरथाऽविशत् ।
बुद्ध्या स्वांशेन येनासौ निश्चयं प्रतिपद्यते ॥ २४ ॥

अहमस्य विनिर्भिण्णमभिमानोऽविशत् पदम्[8] ।
कर्त्राऽशेन च[9] येनासौ कर्तव्यं प्रतिपद्यते ॥ २५ ॥

सत्त्वं चास्य विनिर्भिण्णं[10] महान् धिष्ण्यमुपाविशत् ।
चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते[11] ॥ २६ ॥

---

१ "कीर्तितः" इति क्वचित् ।

२ इतः परं प्र. पाठे–"सनागकूर्मकृकलदेवदत्तधनञ्जयाः" इत्यधिकं प्रक्षिप्तम् । इदमेव च क्वचित् "सनाग–कूर्मकृकला देवदत्तधनञ्जयाः" इति "तन्नागकूर्मकृकलदेवदत्तधनञ्जयाः" इति च पठ्यते । सर्वथा चेदं प्रक्षिप्तम् ।

३ "प्राणो अध्यात्मादि" इति प्र. पाठः । "प्राणा अध्यात्मादि" इति क्वचित् ।

४ "इति च व्योमसंहितायाम्" इति प्र. पाठः ।

५ "निर्भिन्नान्यस्य" इति प्र· पाठः ।

६ "प्रथमो वायुरीरितः" इति क्वचित् ।

७ अत्र प्राचीनटीका–"लोकपालः अनिलः मुख्यप्राणपुत्रो वायुः निर्भिण्णानि चर्माणि त्वगिन्द्रियस्थानानि प्राणेनांशेन स्पर्शेन्द्रियाख्येन स्वांशेन सहाविशत् । पूर्वमुक्तो दशविधः प्राणो मुख्यप्राण एव । अयं तु तत्पुत्र इति भेदः" इति ।

८ अस्य सार्द्धश्लोकस्य स्थाने प्र. पाठे "आत्मानं चास्य निर्भिन्नमभिमानोऽविशत् पदम्" इतीयदेव पठ्यते ।

९ "कर्त्रा स्वांशेन" इति पाठान्तरम् । "कर्मणांऽशेन" इति प्र. पाठः ।

१० "विनिर्भिन्नम्" इति प्र. पाठः ।

११ श्लोकत्रयस्यास्य प्राचीनटीका—"अथ वाचस्पतिः वाचा (? बुद्ध्या) स्वांशेन सह आत्मानं आत्माख्य-नाडीं आविशत् । अहं अहन्नाडीं अभिमानः अहङ्कारदेवता रुद्रः कर्ता स्वांशेन अहं कर्तेत्यभिमानेन, कर्तव्यं

"अहं सत्त्वमिति द्वेगा ब्रह्मनाडया अवान्तरम् । कर्तृनामा[१] त्वहङ्कारस्त्वहन्नाडयां व्यवस्थितः । सत्त्वनाडयां तथा[२] चित्तमभिमानो हरस्तथा । अहन्नाडयां सत्त्वनाड्यां ब्रह्मा चैव व्यवस्थितः । आत्मनाडयां तथा बुद्धिस्तत्रस्थश्च बृहस्पतिः" इति च ॥ * ॥

मुखतोऽवर्तत ब्रह्म पुरुषस्य कुरूद्वह ।
यत्तोन्मुखत्वाद्[३] वर्णानां मुख्योऽभूद् ब्राह्मणो गुरुः[४] ॥ ३० ॥

बाहुभ्योऽवर्तत क्षत्रं[५] क्षत्रियस्तमनुव्रतः[६] ।
यो जातस्त्रायते वर्णान् पुरुषान् कण्टकक्षतान्[७] ॥ ३१ ॥

विशोऽवर्तन्त तस्योर्वोर्लोकवृत्तिकरीर्विभोः ।
वैश्यस्तदुद्भवो वार्तां नृणां यः समवर्तयत्[८] ॥ ३२ ॥

आत्मनोऽनात्मत्वं अनात्मन आत्मत्वमित्यादिकं प्रतिपद्यते । ब्रह्मणस्तदवभास एव । सत्त्वं च सत्त्वाख्यनाडीं च महान् ब्रह्मा चित्ताख्यस्वांशेन सहाविशत् । येन चित्तेन विज्ञानं ईश्वरादिविषयं विशिष्टज्ञानम्" इति ।

१ "कर्तृनामा ह्यहङ्कार-" इति प्र. पाठः ।

२ "सत्त्वनाडयास्तथा" इति प्र. पाठः । "तत्त्वनाडयास्तथा" इति मुद्रितः पाठः प्रमाद एव ।

३ "यस्तून्मुखत्वात्" इत्यर्वाचीनाः । "यत्तन्मुखत्वात्" इत्यपरे ।

४ "पुरुषस्य ब्रह्मान्तर्यामिणो मुखतः ब्रह्मजातिस्तदभिमानी भृगुश्चोत्पन्नौ । यत्र अध्ययनाध्यापनादिमुखकर्मणि उन्मुखत्वादुद्युक्तत्वात् ब्राह्मणस्त्रिवर्णानां मुख्यो गुरुरभूत्" इति प्राचीनटीका । "यत्र हराबुन्मुखत्वात्" इति विजयध्वजीयम् । "यत्र वेदे विषये" इत्येके ।

५ "बाहुभ्यां वर्तत क्षत्रम्" इत्यनन्ततीर्थसम्मतः पाठः । तथाहि तद्व्याख्यानम्- "क्षत्रं क्षत्रजातिस्तदभिमानी स्वायम्भुवो मनुश्च बाहुभ्यां पुरुषस्य बाह्वोः वर्तत अवर्तत । अतः क्षत्रियस्तं ब्राह्मणमनुव्रतः अनुसृत्य वर्तमानः अभूदिति शेषः । क्षत्रियत्वेन जातो यः वर्णान् त्रिवर्णस्थान् पुरुषान् कण्टकक्षतान् कण्टकसदृशैः शत्रुचोरादिभिर्बाधितान् त्रायते" इति ।

६ "तदनुव्रतः" इति पाठान्तरं प्राचीनकोशेषु पठ्यते । श्रीधराद्यभिमतश्च स एव पाठः ।

७ "पौरुषः कण्टकक्षतात्" इति प्र. पाठः । "पुरुषम् कण्टकक्षतात्" इति क्वचित् ।

८ "तस्य विभोः ऊर्वोः लोकवृत्तिकरीः कृषिवाणिज्यादिलोकजीवनकर्यः विशः वैश्यजातयः अवर्तन्त । तदभिमानी वास्तुपुरुषाख्यो देवश्चोत्पन्नः । यो नृणां वार्तां कृषिगोरक्षादिकर्म समवर्तयत् स वैश्यस्तदुद्भवः तस्यां वैश्यजात्यामुत्पन्नः" इति प्राचीनटीका ।

पद्भ्यां भगवतो जज्ञे शुश्रूषा कर्मसिद्धये[1]।
तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः ॥ ३३ ॥

"ब्रह्माभिमानी तु[2] भृगुरजनि ब्रह्मणो मुखात्। क्षत्राभिमानी तु[3] मनुर्ब्रह्मबाह्वोरजायत। ऊर्वोर्विडभिमानी च वास्तुः पादात् कृतिस्तथा[4]। एते पूर्वं[5] हरेर्जाता ब्रह्मणस्तदनन्तरम्। एवं रुद्राच्च वायोश्च तदन्तस्थहरेर्यतः" इति षाड्गुण्ये ॥ * ॥

एतत् क्षत्तर्भगवतो दैवकर्मात्मरूपिणः।
कः श्रद्दधादुदाहर्तुं[6] योगमायाबलोदयम् ॥ ३५ ॥

"अधिकत्वाद् देवशब्दा देवास्तेष्वधिको यतः[7]। दैवं हरिः कर्म मूलं कृतिरित्येव भण्यते[8]। व्याप्तत्वादात्मशब्दश्च[9] श्रीपतित्वाच्च माधवः" इति च ॥ * ॥

अहो भगवतो माया[10] मायिनामपि मोहिनी।
यत् स्वयं चाऽऽत्मवर्त्माऽऽत्मा न वेद किमुतापरे[11] ॥ ३९ ॥

यतोऽप्राप्य निवर्तन्ते[12] वाचश्च मनसा सह।
अहं चान्य इमे देवास्तस्मै भगवते नमः ॥ ४० ॥

---

१ "धर्मसिद्धये" इति पाठान्तरं क्वचित्। "भगवतः पद्भ्यां शुश्रूषाख्या शूद्रजातिः त्रिवर्णसेवाख्यकर्मसिद्धये जाता। तदभिमानी कृतिर्देवश्च जातः। पुरा शूद्रस्तस्यां जात्यां जातः। यस्य शूद्रस्य वृत्त्या शुश्रूषया हरिस्तुष्यते" इति प्राचीनटीका।

२ "ब्रह्माभिमानी च" इति क्वचित्।

३ "क्षत्राभिमानी च" इति क्वचित्।

४ "कृतिस्थता" इति मुद्रितः पाठः प्रामादिकः।

५ "एवं पूर्वम्" इति क्वचित्।

६ "श्रद्दध्यादुपाकर्तुम्" इति प्र. पाठः।

७ "देवशब्दो दैवतेष्वधिको यतः" इति प्र. पाठः प्रामादिकः।

८ "कथ्यते" इति क्वचित्।

९ "आप्तत्वादात्मशब्दश्च" इति प्र. पाठः। "सर्वदेवेष्वधिकत्वाद् दैवम्। सर्वकर्तृत्वात् कर्म। व्याप्तत्वादात्मा" इत्यनन्ततीर्थाः।

१० "अतो भगवतो माया" इति क्वचित्। "अहो भगवती माया" इति च।

११ "आत्मवर्त्मा परमात्मज्ञानोपदेशाचार्यः आत्मा ब्रह्मा स्वयमपि भगवन्महिमानं सर्वात्मना न वेद। अपरे न विदुरिति किमुत। भगवन्महिमैवंविधो यदतो भगवतो माया सामर्थ्यं मायिनां ज्ञानिनां ब्रह्मादीनामपि मोहिनी बुद्धिंभ्रंशकरी" इत्यनन्ततीर्थाः।

१२ "न्यवर्तन्त" इति प्र. पाठः। "वाचः वेदवागभिमानिनी रमा च मनसा मनोदेवतया सह अप्राप्य अज्ञात्वा सम्यगनुक्त्वा च यतो भगवतो निवर्तन्ते। अहं च अहङ्काराभिमानी रुद्रश्च इमेऽन्ये लोकाश्च गरुडा–

आत्मा न वेद ब्रह्मा[1] । अहं रुद्रः—

"गुणपूर्तेरात्मशब्दो ब्रह्माऽहीनत्वतो हरः । अहंशब्दस्तथाऽप्येतौ न जानीतो[2] हरिं परम्" इति ब्राह्मे ।

भगवतो मायां महिमानम्[3] ।

"माया तु महिमा प्रोक्ता[4] प्राचुर्ये तु[5] मयड् यतः" इति पाद्मे ।

आत्मवर्त्मा परमात्मगतिः ॥ * ॥

इति तृतीयस्कन्धे सप्तमोऽध्यायः[6]

क्रीडाया मुद्यतोऽर्हस्य कामं चिक्रीडिषाऽन्यतः ।
स्वतस्तृप्तस्य तु कथं निर्वृतस्य सदाऽऽत्मनः[7] ॥ ३ ॥

क्रीडायाः मुत् । अर्हस्य अपूर्णसुखस्य । अन्यतः अरतितः[8] ॥ * ॥

नन्तादिदेवाश्च अप्राप्य यतो निवर्तन्ते तस्मै नमः" इति प्राचीनटीका । तथा च उत्तरार्द्धे "देवास्तस्मै" इत्यस्य स्थाने "लोकास्तस्मै" इत्यनन्ततीर्थाभिमतः पाठ इति स्फुटम् । लोका इत्यनूद्य देवा इति व्याख्यानात् ।

१ "आत्मा ब्रह्मा न वेद" इति प्र. पाठः । २ "जानाते" इति क्वचित् ।

३ "भगवतो मायां भगवतो महिमानम्" इति प्र. पाठः । "भगवतो मायां भगवन्महिमानम्" इति क्वचित् । यद्यपि 'भगवतो माया' इति मूले पाठात् तथैव प्रतीकग्रहणमुचितम्, न मायामिति द्वितीयान्ततया । तथाऽपि यत् स्वप्नमित्युत्तरार्द्धे यदित्यस्य हेत्वर्थकतया कर्मसमर्पकपदान्तराभावात् किं तद् यन्न वेदेति जिज्ञासायां पूर्वार्द्धोक्तं भगवतो मायेत्येतत् द्वितीयान्ततया विपरिणतं सत् कर्मसमर्पकतयाऽत्राप्यनुवर्तत इति सूचनाय भगवतो मयामित्युक्तम् । अत एवोत्तरभाविनोरात्माहम्पदयोः कर्तृसमर्पकतया प्राधान्यात् पूर्वं व्याख्यानम् ।

४ "मायेति महिमा प्रोक्तः" इति पाठान्तरम् । ५ "प्राचुर्येण" इति क्वचित् ।

६ प्रचलिते भागवतपाठेऽत्र षष्ठाध्यायपूर्तिः ।

७ "क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषाऽन्यतः । स्वतस्तृप्तस्य च कथं निवृत्तस्य सदाऽऽन्यतः" इत्यर्वाचीनः पाठः, श्रीधरादिभिः सर्वैर्व्याख्यातृभिः परिगृहीतश्च ।

८ "अरतेः" इति प्र. पाठः । मुत्पदोक्तरतेः प्रकृतत्वात् तदन्यतः अरतितः । अरतितः क्रीडेच्छा जायते । ततश्च क्रीडायां प्रवर्तते । क्रीडया चारतिर्निवर्तते मोदश्च भवतीति । "क्रीडायाः सकाशात् मुत् सुखं अर्हस्य तद्योग्यस्य ततः पूर्वमप्राप्तसुखस्य अपूर्णस्य भवति । कामं यथेच्छं चिक्रीडिषा क्रीडितुमिच्छा च लोके अन्यतः

20

देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः ।
अविलुप्तावबोधात्मा स युज्येताजया कथम् ॥ ५ ॥

भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः ।
अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ॥ ६ ॥

सेयं भगवतो माया न्याय्यं येन विरुद्ध्यते[1] ।
ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम् ॥ ९ ॥

दुर्भगक्लेशिशरीर[2]स्थत्वात् तस्यापि भाव्यम् । नच तद् युज्यते । सेयं भगवतो माया । अयं हि भगवन्महिमा । तस्य कार्पण्यबन्धनादि[3] न युज्यत इति यदुक्तं तन्न्याय्यमेव दुर्भगादिशरीरस्थस्यापि तद्दोषास्पर्श[4] एव तन्महिमेत्यर्थः ।

"कथं देहे परो[5] देवो न लिप्येतेह[6] बन्धनैः । कथं न दुःखी स भवेद् दुःखी चेदीश्वरः कुतः । महिमा परमस्यैष यद् देहस्थो न बद्ध्यते[7] । यद्दुःखी स ईशानो मायेति महिमोच्यते । प्रधानं मय[8] इत्याहुः प्राधान्यान्मायता[9] भवेत् । अतो मायामयं प्राहुर्महामायमनामयम्" इति भाल्लवेयश्रुतिः ॥ * ॥

"[10]अलुप्तबोधरूपत्वान्नासौ प्राकृतदेहवान्[11]" । नच सृष्ट्यादिकं भ्रान्तिर्भ्रान्तिवादा हि

अरतितः आलस्यतः भवतीति यतोऽतः स्वतस्तृप्तस्य अरत्यादिरहितस्य, सदा निर्वृतस्य सुखरूपस्य आत्मनः परमात्मनः चिक्रीडिषा जगत्सृष्ट्यादिना क्रीडितुमिच्छा ततः प्रमोदादिप्रयोजनं च कथं युज्येतेति भावः" इत्यनन्ततीर्थाः । अथवा तद्यथा दह्रमिति दभ्रं भवति तथा अर्हं इत्यर्भो भवति । अर्भोऽर्भकः अल्प इत्यर्थः । तदेवाऽह– अर्हस्य अपूर्णसुखस्येति । तात्पर्यकथनमेतत् ।

१ "यन्नयेन विरुद्ध्यते" इत्यर्वाचीनः पाठः । "ईश्वरस्य ऐश्वर्यमूर्तेर्हरेः कार्पण्यं दीनत्वम्, विमुक्तस्य नित्यमुक्तस्यापि बन्धनं संसारबन्धनं विरुद्ध्यते येन, प्रमाणतो युक्तितश्च विरुद्धमिति यत्, येनेति तृतीया प्रथमार्थे, तस्मादीश्वरस्य कार्पण्यं विमुक्तस्य बन्धनं न युक्तमिति त्वया यदुक्तं तन्न्यायोपेतमेव । तर्हि कथमेतदिति चेदित्थम्, दुर्भगक्लेशिशरीरस्थोऽपि भगवान् दोषैर्न लिप्यत इति यत् सा इयं भगवतो माया हि भगवन्महिमा हि" इति प्राचीनव्याख्यानम् । "येन कारणेन विरुद्ध्यते तस्मात् त्वदुक्तं न्याय्यम्" इत्यन्ये व्याख्यातारः ।

२ "दुर्भगक्लेशशरीर–" इति प्र. पाठः ।

३ "कार्पण्यं बन्धनादि" इति क्वचित् प्र. पाठः । "तस्यास्य कार्पण्यं बन्धनादि" इति क्वचित् कोशे ।

४ "तद्दोषासंस्पर्श एव" इति क्वचित् ।

५ "देहपरो देवः" इति मुद्रितः पाठः प्रामादिकः ।

६ "लिप्येत हि बन्धनैः" इति प्र. पाठः ।

७ "बाध्यते" इति प्र. पाठः ।

८ "माय–" इति क्वचित् ।

९ "प्राधान्यान्मयता" इति प्र. पाठः ।

१० 'अविलुप्त–' इति क्वचिन्मुद्रितः पाठः प्रामादिकः ।

११ "प्रकृतिदेहवान्" इति क्वचिन्मुद्रितः पाठः ।

दानवाः । अतो भ्रान्त्या हि सम्बन्धो[1] नास्य क्वचन युज्यते । भ्रान्त्या जीवस्य संसार ईशज्ञानाद् विलीयते । भ्रान्तिर्हि देहाभिमतिरतो ज्ञानाद्[2] विनश्यति" इति ब्रह्माण्डे ॥ * ॥

यदेन्द्रियोपरामोऽर्थो दृष्टात्मनि[3] परे हरौ ।
विलीयन्ते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः ॥ १३ ॥

इन्द्रियोपरामाख्यः[4] पुरुषार्थो मुक्तिः ॥ * ॥

सञ्छिन्नः संशयो मह्यं तव सूक्तासिना विभो ।
उभयत्रापि भगवन् मनो मे सम्प्रधावति ॥ १५ ॥

[5]साधु तद् व्याहृतं विद्वन्नात्ममायायनं हरेः ।
आभात्यपार्थं निर्मूलं विश्वमूलं न यद् बहिः[6] ॥ १६ ॥

स्वरूपसामर्थ्याश्रयं यद् व्याहृतम्[7] । अपार्थं निर्मूलं च देहसम्बन्धित्वाद्याभाति । विश्वमूलं ब्रह्म च यन्मम ज्ञानाद् बहिर्न भवति । तस्मादुभयत्र धावति ॥ * ॥

---

१ "भ्रान्त्यादिसम्बन्धो–" इति प्र. पाठः ।

२ "भ्रान्तिर्देहाद्यभिमतिरीशज्ञानात्" इति प्र. पाठः ।

३ "-रामोऽथ द्रष्टात्मनि" इति प्र. पाठः । "परे सर्वोत्तमे हरौ दृष्टात्मनि अपरोक्षीकृतस्वरूपे सति यदा इन्द्रियोपरामः अर्थः । इन्द्रियाणां विष्णावेवोपरमणाख्यः पुरुषार्थो भविता तदा सर्वे क्लेशा विलीयन्ते नश्यन्ति, संसुप्तस्य पुरुषस्य सुप्त्यवस्थायां यथा सर्वक्लेशा नश्यन्ति तथेत्यर्थः" इति प्राचीनटीका ।

४ "इन्द्रियोपरमाख्यः" इति पाठान्तरं प्राचीनकोशे । ५ "साध्वेतत्" इति प्र. पाठः ।

६ अत्र प्राचीनटीका– "ईश्वरविषयः संशयः तव सूक्तासिना सञ्छिन्नः । कुतः? हरेरात्ममायायनं स्वरूपसामर्थ्यावलम्बनं 'सेयं भगवतो माया' इति यद् व्याहृतं तत् साधु उपपन्नमिति यत् तस्मात् । अथ योऽयं जीवात्मविषये संशयः, अयमपि 'दृश्यतेऽसन्नपि द्रष्टुः' इति तवोक्त्यसिना सञ्छिन्न एव । तथाऽपि जीवात्मविषये मम मनः उभयत्राऽपि तस्यानात्मत्वे चिदात्मत्वे च धावति । कुतः? अपार्थं अविद्यमानत्वेन त्वयोक्तम्, निर्मूलं प्रमाणरहितं च यदात्मनोऽनात्मत्वादिकं तदविद्यमानमप्याभाति । तथाऽनुभावात् । यत् परं ब्रह्म विश्वमूलं प्रतीयमानस्य देहात्मत्वादेर्मूलभूतं प्रेरकतया कारणभूतं मायया मोहकं तत् परं ब्रह्म च बहिः मम मनसो बहिः न भवति । अयं भावः– जीवात्मनोऽनात्मत्वादिकमविद्यमानमेव ईश्वराज्ञानादीश्वरप्रेरणया भातीति त्वद्वचनात् मया मनसि निरूप्यते । अनुभवतस्तु देहात्मत्वादिकं विद्यमानमेवाऽभाति । तस्मादुभयत्रापि मम मनो धावतीति" इति ।

७ "स्वरूपसामर्थ्यात् तद् व्याहृतम्" इति क्वचित् ।

यश्च मूढतमो लोके यश्च बुद्धेः परं गतः ।
तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः ॥ १७ ॥

अर्थाभावं विनिश्चित्य प्रतीतस्याप्यनात्मनः[१] ।
तां चापि युष्मच्चरणसेवयाऽहं पराणुदे[२] ॥ १८ ॥

तस्मादन्तरितोऽस्मि । तथाऽपि तां प्रतीतिं पराणुदे ।

"आत्मनस्तु गुणाभावं वदतो न त्वसत्यता । अपृष्टस्य[३] दमार्थं च गुणायैव भविष्यति[४]" इति व्यासस्मृतेर्विद्यमानमप्यनुभवमन्यथा वदति विदुरः । "द्रोणद्रौणिकृपाः पार्थो[५] भीष्मो विदुरसञ्जयौ । ये चान्ये तत्र देवांशाः सम्यक् तत्त्वापरोक्षिणः" इति स्कान्दे ॥ * ॥

सृष्ट्वाऽग्रे महदादीनि सविकाराण्यनुक्रमात् ।
तेभ्यो विराजमुद्धृत्य तमनु प्रविशद् विभुः ॥ २१ ॥

यमाहुराद्यं पुरुषं सहस्राङ्घ्र्यूरुबाहुकम् ।
यत्र विश्व इमे लोकाः सविकासं समासते ।
यस्मिन् दशविधः प्राणः सेन्द्रियार्थेन्द्रियस्त्रिवृत्[६] ॥ २२ ॥

विराजं ब्रह्माणम्—

"ब्रह्माणं प्राविशद् विष्णुः सहस्राक्षः सहस्रपात्" इति ब्राह्मे । "अनुप्रविश्य ब्रह्माणं प्राणं दशविधं तथा । इन्द्रियाणीन्द्रियार्थांश्च वर्णांश्चैवासृजद्धरिः" इति गारुडे ॥ * ॥

---

१ "प्रतीतस्यापि नाऽऽत्मनः" इति प्र. पाठः ।

२ "भ्रान्त्या प्रतीतस्यापि अनात्मनः आत्मनोऽनात्मत्वादेः देहाहम्ममतादेः अर्थाभावम्, अर्थे जीवस्वरूपे अभावं निश्चित्य तां भ्रान्तिप्रतीतिं युष्मच्चरणसेवया त्वद्वचनश्रवणेन च पराणुदे तिरस्करोमि" इत्यनन्ततीर्थाः ।

३ अपृष्टस्य दमार्थम्, अपृष्टत्वस्य निवारणार्थम् । यद्वा गुणान् प्रत्यपृष्टस्याप्यात्मनः गुणाभवोक्तिः दमार्थं भविष्यति । आत्मनिग्रहाय भवतीति यावत् । लोकोपकाररूपगुणाय स्वज्ञानवृद्धिरूपगुणाय च भविष्यति ।

४ "गुणायैव भवत्यपि" इत्यपि पाठः । ५ "द्रोणो द्रौणिः कृपः पार्थः" इति क्वचित् ।

६ "प्रभुर्नारायणोऽग्रे सविकाराणि इन्द्रियेन्द्रियार्थादिकार्यसहितानि महदादीनि तत्वानि सृष्ट्वा तेभ्यो विराजं ब्रह्माण्डं च सृष्ट्वा तदन्तर्विराळाख्यं ब्रह्मदेहं च सृष्ट्वा तं ब्रह्माणमनुप्राविशत् । यं ब्रह्मान्तर्यामिणं विष्णुमाद्यं पुरुषमाहुः । परमं विराट्पुरुषमाहुः । विश्वे इमे लोकाः यत्रान्तर्यामिणि सविकारमसम्बाधं समासते । सेन्द्रि-

वर्णाश्रमविभागांश्च रूपशीलस्वभावतः[1] ।
ऋषीणां जन्म कर्माणि[2] वेदस्य च विकर्षणम् ॥ २९ ॥

विकर्षणं विभागः[3] ॥ * ॥

इति तृतीयस्कन्धे अष्टमोऽध्यायः[4]

ॐ ॥ स्वमेव धिष्ण्यं बहु मानयन्तं यं वासुदेवाभिधमामनन्ति ।
प्रत्यग्धृताक्षाम्बुजकोशमीषदुन्मीलयन्तं विबुधोदयाय[5] ॥ ४ ॥

"आधार आश्रयो धिष्ण्यं निधानं चाभिधीयते" इत्यभिधाने[6] ॥ * ॥

[7]तस्याऽत्मसूक्ष्माभिनिविष्टदृष्टेरन्तर्गतोऽर्थो रजसा तनीयान् ।
गुणेन कालानुगतेन विद्धः '[8]शुष्यंस्तदाऽभिद्यत नाभिदेशात्'[9] ॥ १३ ॥

"उदकं वायुना शुष्कं भिन्नं पद्ममभूद्धरेः" इति पाद्मे[10] ॥ * ॥

त्यार्थेन्द्रियः इन्द्रियार्थैः शब्दादिभिः इन्द्रियैश्च सह वर्तमानः त्रिवृत् ओजः सहो बलमिति त्रिरूपः दशविधः प्राणो यस्मिन्नुत्पन्नः यास्मिन्नास्ते" इत्यनन्ततीर्थाः । अत्र यद्यपि 'सविकारं समासते' इत्यनन्तीर्थपाठ इति भाति । तथाऽपि असम्बाधमिति व्याख्यानानुगुण्यात् सविकासमित्येव पाठः साधीयान् ।

१ "रूपं लक्षणम्, शीलं वर्तनम्, स्वभावो धर्मः । एतैः कृतान् वर्णाश्रमविभागांश्च" इत्यनन्ततीर्थाः ।

२ "जन्मकर्मादि" इति प्र. पाठः ।

३ "विकर्षणं विभागम्" इति च पाठान्तरम् । विकर्षणमिति द्वितीयान्तत्वात् तदप्युपपन्नम् ।

४ प्रचलिते भागवतेऽत्र सप्तमाध्यायपूर्तिः ।

५ "यं नारायणं वासुदेवाभिधानामनन्ति, स्वधिष्ण्यं स्वाधारभूतं तमेव हरिं समाधिनाऽऽराधयन्तम् । 'वासुदेवात् सङ्कर्षणो नाम जीवो जायते' इति पञ्चरात्रोक्तत्वाद् वासुदेवः पितृत्वेनाऽधारभूतः । प्रत्यगन्तर्यामिणि हरौ धृताक्षाम्बुजकोशम्, धृतनयनकमलकुड्मळं विबुधोदयाय विबुधानां ज्ञानाद्यनुग्रहसम्पदे ईषदुन्मीलयन्तं किञ्चिद् विकासयन्तम्" इति प्राचीनटीका ।

६ "इत्यभिधानम्" इति प्र पाठः । ७ "तस्यार्थसूक्ष्माभि–" इत्यर्वाचीनः पाठः ।

८ "सूष्यंस्तदा–" इत्यर्वाचीनः पाठः ।

९ "आत्मसूक्ष्माभिनिविष्टदृष्टेः आत्मनि स्थितेषु जीवेषु सृजाम्येतानित्यभिनिविष्टदृष्टेः निर्णीतमनसः तस्य भगवतोऽन्तर्गतः उदरे स्थितः तनीयानूतिसूक्ष्मः, योऽर्थः उदकरूपप्रकृत्याख्यो यः पदार्थः स तदा कालानुगतेन सृष्टिकालप्रेरितेन रजसा गुणेनानुविद्धः प्रेरितो वायुना शुष्यन् शुष्कः, नाभिदेशात् पद्मतयाऽभिद्यत उदपद्यत । उदकप्रचुरो लोकात्मकपद्मोपादानरूपः प्रकृत्याख्यः पदार्थः पद्ममभूदिति भावः" इति प्राचीनटीका ।

१० "इति गारुडे" इति क्वचित् ।

स पद्मकोशः सहसोदतिष्ठत् कालेन कर्मप्रतिबोधितेन[1] ।
स्वरोचिषा तत् सलिलं विशालं विद्योतयन्नर्क इवाऽऽत्मयोनिः[2] ॥१४॥

आत्मा विष्णुरस्य योनिः ॥ * ॥

तल्लोकपद्मं स उ एव विष्णुः[3] प्रावीविशत् सर्वगुणावभासम् ।
तस्मिन् स्वयं वेदमयो विधाता स्वयम्भुवं यं प्रवदन्ति[4] सोऽभूत्[5] ॥१५॥

"पद्मसंस्थाद्धरेस्तत्र ब्रह्माऽजनि चतुर्मुखः" इति च ।

सर्वगुणावभासं पृथिव्यात्मकम् । पृथिव्यां हि शब्दादयः सर्वेऽवभास्यन्ते[6] ।

"तस्याऽऽसनविधानार्थं पृथिवी पद्ममुच्यते" इति च मोक्षधर्मेषु[7] ॥ * ॥

क एष योऽसावहमब्जपृष्ठ एतत् कुतो वाऽब्जमनन्यदप्सु ।
अस्ति ह्यधस्तादिह किञ्चनैतदधिष्ठितं यत्र सता नु भाव्यम्[8] ॥ १८ ॥

---

१ "कर्मप्रतिबोधनेन" इति पाठान्तरम् । अर्वाचीनपाठोऽपि तथैव ।

२ "भगवन्नाभेरुत्पन्नः स पद्मकोशः कर्मप्रतिबोधितेन जगन्निर्माणभूतादृष्टप्रेरितेन कालेन प्रेरितश्चतुर्दशभुवन-गर्भं उदतिष्ठदुच्चत्वेन ववृधे । आत्मा विष्णुः योनिः कारणं यस्य स तथोक्तः" इति प्राचीनटीका ।

३ "स्वकमेव धिष्ण्यम्" इतिं च क्वचित् पठ्यते । ४ "यं स्म वदन्ति" इत्यर्वाचीनः पाठः ।

५ "स उ एव स एव विष्णुः । उ इत्येतदवधारणार्थे । उ इत्यस्य विवरणमेवेति । गन्धाद्याः शब्दपर्यन्ताः सर्वे गुणाः पृथिव्यामवभासन्ते यत् तस्मात् पृथिवी सर्वगुणावभासा । विशेषतः पृथिव्यात्मकत्वात् पद्ममपि सर्व-गुणावभासम् । विवेश । यं स्वयम्भुवं वदन्ति जनाः वेदमयो वेदप्रतिपाद्यो विधाता जगत्कर्ता स विरिञ्चः स्वय-मभूज्जातः" इति प्राचीनटीका । "उ इति सम्बोधने विस्मये वा" इति वीरराघवादयः । "उकारेण रूपान्तरेण प्रवेशं सूचयति" इति विजयध्वजतीर्थीयम् ।

६ "पृथिव्यां हि सर्वे शब्दादयः गुणा अवभासन्ते" इति प्र. पाठः । "पृथिव्यां हि शब्दादयः सर्वेऽपि भास्य-न्ते" इति च कोशान्तरे । "पृथिव्यां शब्दादयः सर्वेऽवभास्यन्ते" इति च क्वचित् ।

७ "इति मोक्षधर्मे" इति प्र. पाठः । "इति मोक्षधर्मेषु" इति च क्वचित् ।

८ "योऽसावब्जपृष्ठे निषण्ण एषोऽहं कः? अप्सु परिदृश्यमानमनन्यत् प्रधानं एतदब्जं कुतो वोत्पन्नम्? एतत् पद्मं यत्राधिष्ठितं तत् किञ्चन पद्मकारणभूतं किञ्चिद् वस्तु पद्माधस्तादस्त्येव हि । नहि कार्यमकारणमित्यादेः कार्यस्य पद्मस्य दृश्यमानत्वात् कारणेनापि केनचिद् भाव्यम् । तच्च न पृथिव्याद्यन्यतमत् । तेषामनुत्पन्नत्वात् । अतो ब्रह्मैतन्मूलकारणमिति परिशिष्टमाह—सतेति । सता परब्रह्मणा पद्मकारणत्वेन अनुभाव्यम् अनुभवसिद्धत्वेन भवितव्यम् । प्रायः परब्रह्मणैव भाव्यमस्य मूलदेशे" इति प्राचीनटीका । एतेन सता अनुभाव्यम्, सता नु भाव्यम् इति द्वेधाऽपि च्छेदः अनन्ततीर्थसम्मत इति प्रतीयते ।

"प्रधान[1]वाचकास्त्वेकश्चानन्यः केवलः स्वयम्" इति ब्राह्मे ।

सता ब्रह्मणा —

"स ब्रह्माऽचिन्तयत् कुतो नु पद्मं ब्रह्मणः स्यादिति[2]" इति सौकरायणश्रुतिः[3] ॥ * ॥

पुंसां स्वकामाय विविक्तमार्गैरभ्यर्चतां कामदुघाङ्घ्रिपद्मम् ।
प्रदर्शयन्तं कृपया नखेन्दुमयूखभिन्नाङ्गुलिचारुपत्रम्[4] ॥ २८ ॥

भिन्नमन्येभ्यो विलक्षणम् ॥ * ॥

परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दण्डसहस्रशाखम् ।
अव्यक्तमूलं भुवनाङ्घ्रिपेन्द्रमहीन्द्रभोगैरधिवीतवल्कम्[5] ॥ २९ ॥

"तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम" इति मोक्षधर्मे[6] ॥ * ॥

---

१ "–वाचकस्त्वेक-" इति प्र. पाठः । एतेनैव पुराणवचनेन पूर्वश्लोकगतं स्वयम्भूपदमपि व्याचख्यौ भगवत्पादः । स्वयमिति सर्वप्रधनो भगवान् । ततो भवतीति स्वयम्भूरिति । अत एव तन्त्रन्यायेनात्रोदाजहार ।

२ कुतो नु पद्मम् ? इति प्रश्नः । तदेतदुक्तम्– "एतत् कुतो वाऽब्जमनन्यदप्सु" इति । ब्रह्मणः स्यादित्युत्तरम् । एतदप्युक्तम्–"सता नु भाव्यम्" इति । "सदेव सोम्येदमग्र आसीत्" इति प्रसिद्धं हि ।

३ "इति मैत्रायणश्रुतिः" इति प्र. पाठः । "इत्यादि मैत्रायणश्रुतिः" इति क्वचित् ।

४ "स्वकामाय स्वाभीष्टप्राप्त्यर्थम्, विविक्तमार्गैः परस्परभिन्नैर्वैदिकतान्त्रिकमार्गैः अभ्यर्चतां पुंसां सर्वकामधेनुं अङ्घ्रिपद्मं प्रदर्शयन्तम् । नखेन्दूनां मयूखैः भिन्नानि विकसितानि अङ्गुल्य एव चारुपत्राणि दलानि यस्य तत्तथोक्तम् " इत्यनन्ततीर्थाः भिन्नपदं विकासार्थमेव व्याचख्युः । नैतावता तात्पर्यविरोधः शङ्कनीयः । अनेन तात्पर्योदितार्थस्यैव पुष्टिलाभात् । तथाहि प्रथमं तावत् भिन्नं विकसितमित्येवार्थः । ननु कथमिदमुच्यते– इन्दुमयूखेन विकसितानि पद्मपत्राणीति लोकविरुद्धम् ? अत्राऽह भगवत्पादः–भिन्नमन्येभ्यो विलक्षणमिति । तदिदं लोकविलक्षणं पद्मं तत उक्तं युज्यत इति । अत एव विजयध्वजीयेऽप्युक्तम्–"इतरपद्मविलक्षणमिदमङ्घ्रिपद्ममित्यर्थः" इति । "पद्मस्यास्य चन्द्ररश्मिविकसितत्वादद्भुतत्वमुक्तम्" इति च विश्वनाथचक्रवर्ती । न केवलमितरपद्मविलक्षणमिदं भगवदङ्घ्रिपद्मम् । किन्तु रमाब्रह्मादिसकलदेहिपादपद्मविलक्षणं च सर्वातिशायिसौन्दर्यशालित्वात् । एतदप्युक्तं भिन्नमन्येभ्यो विसक्षणमिति । वल्लभाचार्योऽप्याह— "भिन्नाः सर्वदेहविलक्षणाः याः अङ्गुलयः" इति । तस्मादनेकार्थगर्भमिदं तात्पर्यवाक्यं त्रिभिः पदैस्त्रिविक्रमलीलामनुकरोति ।

५ "–वीतवल्शम्" इत्यर्वाचीनः पाठः । "परार्ध्यैरनर्घैः केयूरैरङ्गदैः, मणिप्रवेकाः मणिश्रेष्ठा येषां तैः कङ्कणैश्च पर्यस्तमलङ्कृतं दोर्दण्डसहस्रमेव शाखा यस्य स तथोक्तः । अव्यक्तं निगूढं मूलं कन्दं यस्य स तथोक्तः भगवांस्तु अव्यक्तस्य प्रकृतेः कारणभूतः । चतुर्दशभुवनाङ्घ्रिपाणामिन्द्रं श्रेष्ठम् । अहीन्द्रस्य शेषस्य भोगैः संवीतत्वचम् । चन्दनवृक्षादेर्भोगिवेष्टितत्वं प्रसिद्धम्" इत्यनन्ततीर्थाः ।

६ "मोक्षधर्मेषु" इति क्वचित् ।

निवीतमाम्नायमधुव्रताश्रय[1]स्वकीर्तिमय्या वनमालया हरिम् ।
सूर्येन्दुवाय्वग्न्यगमत्त्रिधामभिः[2] परिक्रमत्प्राधनिकैर्दुरासदम् ॥ ३१ ॥

सूर्येन्दुवाय्वग्न्यादिभिस्त्रिधाम्नो विष्णोरगच्छद्भिः प्राधनिकैः[3] ।

"मुक्तवाय्वादिभिर्विष्णुं वृतं ब्रह्मा ददर्श ह । तदन्याभावतो नान्यदतस्तत् स्रष्टु-मैच्छत" इति ब्रह्माण्डे ॥ * ॥

इति तृतीयस्कन्धे नवमोऽध्यायः[4]

ॐ ॥ ज्ञातोऽसि मेद्य सुचिरान्ननु देहभाजां
न ज्ञायते भगवतो गतिरित्यवद्यम् ।
नान्यत् त्वदस्ति भगवन्नपि तत् त्वशुद्धं[5]
मायागुणव्यतिकराद् यदुरुर्विभासि[6] ॥ १ ॥

---

१ "–मधुव्रतश्रिया" इत्यर्वाचीनः पाठः ।

२ "सूर्येन्दुवाय्वग्न्यगमं त्रिधामभिः" इत्यर्वाचीनः पाठः । "सूर्येन्दुताराग्न्यगमम्" इति क्वचित् । "आम्नायाख्यमधुव्रतानामाश्रयया स्वकीर्तिरूपिण्या वनमालया निवीतं संवीतं कण्ठ इति शेषः । सूर्येन्दुवाय्वग्न्यगमत्त्रिधामभिः । त्रिधाम्नो विष्णोरगच्छद्भिः विष्णुं मुक्त्वाऽन्यत्र न गच्छद्भिः सूर्यादिभिश्च, परित्क्रमत्प्राधनिकैः, परिक्रमाः परिवाराः तेषु प्राधनिकैः प्रधानैः विश्वक्सेनाद्यैश्च परिवृतम्, तेषां प्रसादं विना दुरासदम्" इति प्राचीनटीका । परिक्रमाः इत्यर्थानुवादः । यद्वा "परिक्रमप्राधनिकैः" इति तकारविरहित एव मूलपाठः ।

३ "प्राधानिकैः" इति पाठान्तरम् । तदात्वे तु भिन्नं वाक्यमिदम् । सूर्यादिभिः, प्राधानिकैर्विश्वक्सेनादिभिश्चेति । अनन्ततीर्थादिसम्मतश्चायं पाठः । प्राधनिकैरित्येव पाठे तु सूर्यादीनां विशेषणमित्येकवाक्यता । भगवत्सेनाभूतैरिति च तदर्थः ।

४ प्रचलितपाठेऽत्राष्टमोऽध्यायः ।

५ "तन्न शुद्धम्" इत्यर्वाचीनः पाठः ।

६ "सुचिरान्मया दिदृक्षितस्त्वमद्य ज्ञातोऽसि दृष्टोऽसि नन्विति यत् तस्मात् भगवतो गतिः, गम्यत इति रूपम्, देहभाजां न ज्ञायते न दृश्यते, अतो मनोवाचामगोचरं इत्येतन्मतमवद्यम् । अज्ञानमूलदोषरूपम् । त्वत्तोऽन्यद् जगदिदं स्वतो नास्ति । स्वतन्त्रं न । त्वदधीनमेव अपि विद्यमानमपि तदशुद्धं सदोषम् । त्वमेक एव शुद्धः । मायायाः प्रकृतेर्गुणानां व्यतिकरात् परस्परसम्बन्धाज्जातेषु महदादिषु अन्तर्यामित्वेनावतारैश्च उरुर्बहुरूपो विभासि इति यत् तत् स्थानभेदात् प्रतीयमानमपि तव नानात्वं नास्त्येव" इति प्राचीनटीका ।

स्वतो नास्ति[1] । तदधीनं [2]विद्यमानमप्यशुद्धम् । यच्च नानात्वं[3] तदपि स्थानभेदादसदेव भाति ।

"एकोऽपि स्थाननानात्वान्नानेव हरिरीयते । सर्वान्तर्यामिणस्तस्य न भेदो विद्यते क्वचित्" इति ब्रह्मवैवर्ते ॥ * ॥

रूपं यदेतदवबोधरसोदयेन[4]
शश्वन्निवृत्ततमसः सदनुग्रहाय ।
आदौ गृहीतमवतारशतैकबीजं
यन्नाभिपद्मभवनादहमाविरासम् ॥ २ ॥

नातः परं परम यद् भवतः स्वरूप-
मानन्दमात्रमविकारमविद्धवर्चः[5] ।
पश्यामि विश्वसृजमेकमविश्वमाद्यं[6]
भूतेन्द्रियात्मकमदस्त उपाश्रितोऽस्मि[7] ॥ ३ ॥

[8]यन्नाभिपद्मभवनादहमाविरासम्, यच्चेदं [9]भगवतः स्वरूपमानन्दमात्रं पश्यामि, [10]यच्चाऽश्रितोऽस्मि अतः परं नास्ति । अतो न ज्ञायत [11]इत्यवद्यमत्युत्तमापेक्षया । अनादि-

---

१ राधारमणगोस्वामी चाऽह—"अन्यत् स्वतन्त्रसत्ताकं वस्तु नास्त्येवेति ज्ञेयम्" इति । "त्वत्तः अन्यन्नास्ति । त्वज्ज्ञानेनैव सर्वस्य ज्ञातत्वात्, ज्ञातव्यान्तराभावात् त्वमेव ज्ञातव्य इत्यभिप्रायः" इति तु वीरराघवः । वल्लभाचार्योऽपि—"त्वत्तः अन्यन्नास्त्येव, यज्ज्ञातव्यं स्यात् । त्वमेव परं तथा भवसि, अतस्तव गतिर्ज्ञातव्या भगवन्निति" इति । "त्वत्तोऽन्यन्नास्ति यत् किल ज्ञानार्थमुपादेयम्" इति विश्वनाथचक्रवर्ती ।

२ "तदधीनविद्यमान-" इत्यादिः प्र. पाठस्तु न स्वरसः ।

३ "यच्च स्वनानात्वम्" इति प्र. पाठः ।

४ "-रसोदयस्य" इति केचित् पठन्ति ।

५ "-मविकल्पमविद्धवर्चः" इत्यर्वाचीनः पाठः ।

६ "-मविश्वमात्मन्" इत्यर्वाचीनः पाठः ।

७ "अवबोधरसो ज्ञानसारः, तदुदयेन तदभिवृद्ध्या शश्वन्निवृत्ततमसः निरस्तसत्त्वादिगुणस्य तव यत् अवतारशतानां व्यञ्जकं आदौ गृहीतमिति प्रकाशितम्, यस्य ते नाभिपद्मसदनादहमाविरासम्, अतस्तव रूपात् परमुत्तमं नास्ति । हे परम, भवतो यत् स्वरूपमानन्दमात्रम्, केवलानन्दरूपम्, अविकारं षड्विकारवर्जितम्, अविद्धवर्चोऽप्रतिहतप्रभम्, विश्वस्य सृष्टिकर्तृ, एकं प्रधानम्, अविश्वं विश्वविलक्षणम्, सर्वस्याऽदिभूतम्, भूतेन्द्रियात्मकं पञ्चभूतदशेन्द्रियव्यापि अदस्तव रूपं पश्यामि, उपाश्रितः शरणं गतश्चास्मि । उत्तमानां ब्रह्मादीनामेवं गोचरत्वादगोचरमिति मायिमतमवद्यमेवेति भावः" इति प्राचीनटीका ।

८ "यन्नाभिपद्मादहमाविरासम्" इसि क्वचित् ।

९ "भगवत्स्वरूप-" इति प्र. पाठः ।

१० "यत्राऽश्रितोऽस्मि" इति क्वचित् ।

११ "इत्यवद्यमित्युत्तमापेक्षया" इत्यपि पाठान्तरम्

21

गृहीतमेव, न गृह्यते[1]—

"यत्तद् दिव्यं हरे रूपं क्षीरसागरमध्यगम् । सज्ज्ञानानन्दैकमात्रं[2] न ततः परमं क्वचित् । अनादिनित्यादव्यक्तात् तस्माज्जज्ञे चतुर्मुखः" इति पाद्मे[3] ।

भूतेन्द्रियाणामात्मकम् । "यच्चाऽऽप्नोति" इत्यादेः[4] ॥ * ॥

ये तु त्वदीयचरणाम्बुजकोशगन्धं
जिघ्रन्ति कर्णविवरैः श्रुतिवातनीतम् ।
भक्त्या गृहीतचरणः परया च तेषां
नापैषि नाथ हृदयाम्बुरुहात् स्वपुंसाम्[5] ॥ ५ ॥

"हृदि व्यक्तं तु यद् रूपं हरेर्गन्धः स उच्यते[6] । गन्धगन्धवतो[7]र्यस्मान्न भेदः 'कश्चने-ष्यते" इति ब्रह्मतर्के[8] ॥ * ॥

---

१ "अनादिगृहीतमेव गृह्यते" इति प्र. पाठः । "–गृहीतमेव च गृह्यते" इति च क्वचित् । प्राचीनपाठे आदौ आदिकाले; अनादित इति यावत् गृहीतमेव, नेदानीं नूतनतया गृह्यते इत्यर्थः । किन्तु व्यक्त्यपेक्षया गृह्यत इवेति च । आदौ गृहीतमनादि, अत एव नेदानीं गृहीतम्" इति हि विजयध्वजीयम् ।

२ "ज्ञानानन्दैकमात्रं च न ततः" इति प्र. पाठः ।

३ "इत्यध्यात्मे" इति प्र. पाठः । "इति च पाद्मे" इति क्वचित् ।

४ एतेनाऽऽत्मकमिति व्यापकमादातृ विषयसारभोक्तृ नियामकतया नित्यसन्निहितमिति चार्थ उक्तो भवति केवलं सुखभोक्तृत्वद्योतनार्थमेव च कशब्दः । "शुभं पिबत्यसौ" इति ह्युक्तम् । "आत्मानं कारणम्" इति श्रीधरः । "भूतानां ब्रह्मादिस्तम्बपर्यन्तानां प्राणिनां तदिन्द्रियाणां च कारणम्" इति शुकदेवश्च । तदेतत् "यदादत्ते" इति गतार्थम् । सृष्ट्यर्थमादानं ह्यादानं नाम । "भूतेन्द्रियाणामात्मकम् । चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमिति श्रुतेः" इति वल्लभाचार्यः ।

५ "ये गुरुमुखेभ्यः श्रुतिवातनीतं श्रवणाख्यवायुना कर्णविवरैरुपदेशमुखेन प्रापितं त्वदीयचरणाम्बुजकोश-गन्धम् । चरणाम्बुजकोशशब्देन क्षीराब्ध्यादिस्थितमूलरूपमुच्यते । गन्धशब्देन ततोऽभिव्यक्तावतारान्तर्याम्यादि-रूपम् । तथाच क्षीराब्ध्यादिस्थितमूलरूपाख्यपद्ममुकुळस्य गन्धमवतारान्तर्याम्यादिरूपं हृद्यभिव्यक्तं जिघ्रन्त्यप-रोक्षीकुर्वन्ति तेषां हृदयाम्बुरुहान्नापैषि न तिरोभवसि" इत्यनन्ततीर्थाः ।

६ इतः परं प्र. पाठे "उत्तमानां तु पादेन सर्वं रूपं तु भण्यते" इत्यर्धं पठित्वा ततो "गन्धगन्ध-वतोः–" इत्यादि पठ्यते । अनन्वयात्, व्याख्यातृभिरपरिग्रहात्, मूलकोशेषु क्वाप्यदर्शनाच्च प्रक्षिप्तमिदमिति स्फुटम् । ग्रन्थान्तरगतमिदं वाक्यमत्र चरणपदार्थविवरणार्थं विजयध्वजादिभिरुल्लिखितम्, न तात्पर्यगतमिति सुवचम् ।

७ गन्धगन्धवतोरिति अवताररूपमूलरूपयोरित्यप्यर्थः ।

८ "क्वचनेष्यते" इति प्र. पाठः ।

यावत् पृथक्त्वमिदमात्मन इन्द्रियार्थं[1]
मायाबलं भगवतो जन ईश पश्येत् ।
तावच्च[2] संसृतिरसौ प्रतिसङ्क्रमेत
व्यर्थाऽपि दुःखनिवहं वहती क्रियार्था ॥ ९ ॥

मायाबलं भगवदिच्छाबलम् ।

"ज्ञेयत्वं दुर्घटस्यापि घटनाऽधिकशक्तिता । अभेद ईश्वरेणापि सृष्ट्यादावन्तरङ्गता । [3]उच्येत यस्याः सा माया हरेरिच्छाऽथवा बलम् । भगवत्तन्त्रता यस्यास्तद्भार्यात्वं सरूपता[4] । उच्येत माया सा तु श्रीर्दोषयुक्ता जडा स्मृता । परिणामिनी च यस्यास्तु दोषाश्चेतनता तथा । शैवली नाम सा माया जगद्बन्धात्मिका[5] सदा" इति ब्रह्मतर्के । "ध्याये मंस्ये तथा पश्ये शृणोमीति विभक्तता । जीवस्य तु हरेरिच्छाबलादिन्द्रियभुक्तये" इति षाड्गुण्ये ।

इन्द्रियाणां भोगार्थम् । व्यर्थाऽपि धर्मक्रियार्था[6] ॥ * ॥

अध्याहृतार्थकरणा[7] निशि निःशयाना
नानामनोरथधियः[8] क्षणभङ्गनिद्राः[9] ।
दैवाद्धतार्थरचना[10] ऋषयोऽपि देव
युष्मत्प्रसङ्गविमुखा इह संसरन्ति[11] ॥ १० ॥

---

१ "इन्द्रियार्थमायाबलम्" इत्यर्वाचीनः पाठः ।

२ "तावन्न" इत्यर्वाचीनः पाठ । "अयं जनः आत्मनः स्वस्य इन्द्रियार्थम्, दर्शनादिभोगार्थम्, इदं पृथक्त्वम्, अहमेव श्रवणादि करोमीत्यादिरूपं स्वातन्त्र्यम्, यावद् यदा भगवतो मायाबलं पश्येत् भगवदिच्छाबलनिमित्तं जानाति ध्यायति च, तावच्च तदैव अस्य संसृतिः प्रतिसङ्क्रमेत निवर्त्तेत । कीदृग्भूता? व्यर्था सुखरहिता, दुःखनिवहं वहती च; अपि तथाऽपि क्रियार्था पुण्यादिक्रियासाधनभूता" इत्यनन्ततीर्थाः । जीवगोस्वामी चाऽह—"भगवतः सकाशादात्मनः पृथक्त्वं स्वातन्त्र्यम्" इति ।

३ "उच्यते यस्याः" इति क्वचित् ।

४ "सुरूपता" इति प्र. पाठः । सरूपतेति अतिशयरूपशालित्वं भगवत्समानरूपता वा ।

५ बन्धात्मिका बन्धकारणमित्यर्थः ।

६ "यज्ञादिक्रियार्था" इति प्र. पाठः । "धर्मादिक्रियार्था" इति क्वचित् ।

७ "अह्न्यापृतार्तकरणाः" इति प्र. पाठः । "अह्न्याहृतार्थकरणाः" इत्यपि क्वचित् ।

८ "-मनोरथधिया" इत्यपि पाठान्तरम् । ९ "क्षणभग्ननिद्राः" इत्यपि पाठः । अनन्ततीर्थसम्मतश्चायम् ।

१० "दैवाहतार्थरचनाः" इत्यर्वाचीनः पाठः ।

११ "अर्थैः शब्दादिभिः अपहृतकरणाः वशीकृतसर्वेन्द्रियाः, निशि अज्ञाने निःशयाना निमग्नाः, दैवाधीनेन

अर्थैरध्याहृतानि करणानि येषाम् ।

"अज्ञानं तु निशा प्रोक्ता दिवा ज्ञानमुदीर्यते" इति स्कान्दे ॥ * ॥

त्वद्भावयोगपरिभावितहृत्सरोजा
ये सच्छ्रुतेक्षितपथा ननु नाथ पुंसाम्[1] ।
यद्यद्धिया त उरुगाय विभावयन्ति
तत्तद् वपुः प्रणयसे तदनुग्रहाय[2] ॥ ११ ॥

तत्तद् वपुस्तेषां प्रणयसे ।

"यादृशो भावितस्त्वीशस्तादृशो जीव आभवेत्" इति तन्त्रसारे[3] । "तं यथायथो-पासते तदेव भवति" इति च ॥ * ॥

नातिप्रसीदसि[4] तथोपचितोपचारै-
राराधितः सुरगणैर्हृदि बद्धकामैः ।
[5]यः सर्वभूतदययाऽसदलभ्ययैको
नानाजनेष्ववहितः सुहृदन्तरात्मा[6] ॥ १२ ॥

सर्वभूतदयया सुरगणैर्हृद्याराधितस्त्वं बद्धकामजनै[7]रुपचितोपचारै[8]र्नातिप्रसीदसि ।

"आराधितो यो ब्रह्माद्यैर्भक्तिज्ञानदयादिभिः । किं तस्य कामुकजनैः [9]कृतया परिच-र्यया" इति सत्यसंहितायाम् ॥ * ॥

हृतानि नाशितानि अर्थैरचनानि अर्थार्जनकर्माणि येषां ते, नानामनोरथयुक्तबुद्धयः, अत एव क्षणेक्षणे भग्न-निद्राः, युष्मत्प्रसादविमुखास्तव कथाश्रवणायाप्यरुचिमन्तो ये जनास्ते ऋषिकुलप्रसूता अपि इह संसरन्त्येव, नतु मुच्यन्ते । किमुतान्यजन्तवः" इत्यनन्ततीर्थाः ।

१ "त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसाम्" इत्यर्वाचीनः पाठः ।

२ "सदनुग्रहाय" इत्यर्वाचीनः पाठः । "हे उरुगाय, पुंसां मध्ये ये त्वद्भक्त्याख्यसाधनेन परिशोधित-हृदयकमलाः, गुरुशुश्रूषापूर्वकभागवतशास्त्रश्रवणेन परिज्ञातभगवत्स्वरूपाश्च, ते स्वधिया तव यद्यद् वपुर्विभाव-यन्ति ध्यायन्ति त्वं तेषां तत्तद् वपुः प्रणयसे तेषामनुग्रहाय प्रकाशयसि" इत्यनन्ततीर्थाः ।

३ "इति सारे" इति क्वचित् ।

४ "नातिप्रसीदति" इत्यर्वाचीनः पाठः ।

५ "यत् सर्वभूत–" इत्यर्वाचीनः पाठः ।

६ "स त्वं हृदि बद्धकामैर्मनुष्यैराराधितोऽपि तथा नातिप्रसीदसि, सुरगणैरसदलभ्यया सर्वभूतदययाऽऽराधितो यथा प्रसीदसि" इत्यनन्ततीर्थाः ।

७ "बद्धकामैर्जनै–" इति प्र. पाठः ।

८ "–चितोपहारै–" इति क्वचित् ।

९ "–जनकृतया" इति क्वचित् प्र. पाठः ।

शश्वत् स्वरूपमहसैव निवीतभेद-[1]
मोहाय बोधधिषणाय[2] नमः परस्मै ।
विश्वोद्भवस्थितिलयेषु निमित्तलीला-
रामाय[3] ते नम इदं चकृमेश्वराय[4] ॥ १४ ॥

"ईशस्यापूर्णताज्ञानं विष्णोरन्यस्य चेशता । भेदस्तस्यावतारेषु जीवस्येशत्वमेव च । तथा जीवत्वमीशस्य जडाभेदस्तयोरपि । भेदमोह इति प्रोक्तः स सदा न हरौ क्वचित् । अन्येषां तत्प्रसादेन शनैर्याति सतामपि" इति स्कान्दे ॥ * ॥

यस्यावतारगुणकर्मविडम्बनानि
नामानि येऽसुविगमे विवशा गृणन्ति ।
ते नैकजन्मशमलं सहसैव हित्वा
संयान्त्यपावृतमृतं तमजं प्रपद्ये[5] ॥ १५ ॥

भक्तिविवशाः—

"ये भक्त्या[6] विवशा विष्णोर्नाममात्रैकजल्पकाः । तेऽपि मुक्तिं व्रजन्त्याशु किमुत ध्यायिनः सदा" इति व्योमसंहितायाम् ॥ * ॥

यो वा अहं च गिरिशश्च विभुः स्वयं च
स्थित्युद्भवप्रळयहेतव आत्ममूलाः[7] ।

---

१ "–निपीतबोध–" इत्यर्वाचीनः पाठः । २ "–मोहावबोधधिषणाय" इत्यपि केचित् पठन्ति ।

३ "–लीलारासाय" इति श्रीधरादयः । "–लीलारागाय" इति वीरराघवः ।

४ "स्वरूपमहसा स्वरूपज्ञानेनैव निवीतभेदमोहाय शश्वत्स्वात्मन्युपहृतान्यथाज्ञानाय, भेदमोहोऽन्यथाज्ञानम् । बोधधिषणाय ज्ञानात्मकान्तःकरणाय, जगत्सृष्ट्यादिषु निमित्तायमानलीलया रममाणाय, इदं नमश्चकृम । नमश्चकृमेति पुनर्वचनं भक्त्यतिशयेन" इति प्राचीनम् । "जीवादिभिस्तव भेदे मोहः, तैः सह भेदो न सम्भवतीति भ्रमः । तद्वैलक्षण्येन तेभ्यो भिन्नतया निश्चितायेत्यर्थः" इति जीवगोस्वामी ।

५ "ये असुविगमे मरणकाले यस्यावतारगुणकर्मविडम्बनानि अवतारादिविषयाणि नारायणादिनामानि भक्तिविवशा गृणन्ति । अपावृतं मायावरणरहितम्, ऋतं सृष्टिप्रळयादिषु विकाररहितम्" इति प्राचीनटीका ।

६ "भक्त्या विवशाः" इति क्वचित् । "भक्तिविवशाः" इति प्र. पाठः ।

७ "आत्ममूलम्" इत्यर्वाचीनः पाठः ।

भूत्वा[1] त्रिपाद् ववृध एक उरुप्ररोह-
स्तस्मै नमो भगवते भुवनद्रुमाय[2] ॥ १६ ॥

"ब्रह्मादिभावो विष्णोस्तु तन्नियामकता भवेत् । मत्स्यादिता[3] स्वभावस्तु नान्यथा क्वचिदिष्यते" इति वामने । "अनन्तासनवैकुण्ठक्षीराब्धिस्थो हरिस्त्रिपात्" इति च ॥
॥ * ॥

लोको विकर्मनिरतः कुशले प्रमत्तः
कर्मण्ययं त्वदुदिते भवदर्चने स्वे ।
यस्तावदस्य बलवानिह जीविताशां
सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै[4] ॥ १७ ॥

"नित्यज्ञानदृशा नित्यं लवकालमपीश्वरः । पश्येत् तात्कालिकं[5] चैव तस्मादनिमिषो हरिः[6] । कालस्यानिमिषत्वं च लवादेर्नित्यवीक्षणात्[7]" इति तन्त्रसारे ॥
॥ * ॥

---

१ "भित्त्वा" इत्यर्वाचीनः पाठः । "हित्वा" इति क्वचित् ।

२ "त्रिपात् अनन्तासनवैकुण्ठश्वेतद्वीपेषु नित्यव्यक्तत्रिरूपः, एकः प्रधानः । आत्ममूलाः, आत्मा नारायणो मूलं येषां ते तथा । यो विभुः स्वयं विष्णुः, यो वा अहं मदन्तर्यामी ब्रह्माख्यः, यो वा गिरिशान्तर्यामी गिरिशाख्यः एते स्थित्युद्भवप्रळयहेतवो भूत्वा अवतीर्य, सृज्येषु पदार्थेषु शाखारूपेषु उरुप्ररोहोऽन्तर्यामित्वेन बहुरूपो ववृधे । भुवनद्रुमाय भुवनाख्यद्रुमाधाराय" इत्यनन्ततीर्थाः । "स्वयमित्यनेन स्थितिं स्वावताररूपेण, सृष्टिसंहारौ ब्रह्मरुद्राख्यजीवान्तःप्रवेशेन करोतीति द्योतितम्" इति वीरराघवः ।

३ "-दिता तत्स्वभावो नान्यथा" इति प्र. पाठः ।

४ "जीविताशां जीवमीतीच्छाम्, आयुरिति यावत्, सद्यः छिनत्ति, अनिमिषाय कालान्तर्यामिणे तस्मै नमः" इत्यनन्ततीर्थाः ।

५ "तत्कालिकम्" इति क्वचित् ।

६ तथाह्यन्यत्रापि प्रयोगः—"नैमिशेऽनिमिषक्षेत्रे" इति । वैष्णवं क्षेत्रमिति हि तदर्थः । श्रीधरोऽप्याह-"अनिमिषो विष्णुः । तस्य क्षेत्रम्" इति । "निमिषोऽनिमिषः स्रग्वी" इति च सहस्रनामसु । निमिष इति चक्षुर्निमीलनम्, अदर्शनमिति यावत्, तदस्य नास्ति, सर्वं सर्वदा साक्षादपरोक्षात् पश्यतीति स एव किल सर्वथाऽनिमिषो भवितुमर्हति । नित्यमित्येतत् लवकालमपीति विवृतम् । सूक्ष्मातिसूक्ष्मकालेऽप्यस्यादर्शनं नाम नास्तीत्यर्थः । अत्यन्तसंयोगे द्वितीया ।

७ निमिष इति विरामोऽप्युच्यते, चक्षुर्निमील्य विश्राम्यन्तीति । लोके सर्वस्यापि वस्तुनः स्वस्वकार्ये मध्ये विरामो विच्छेदः दृश्यते । नतु कालस्य । प्रतिक्षणं लवादेः परिवर्तनात् । न तावत् कालस्येयत्पर्यन्तं प्रवृत्तिः ततः परं कियन्तञ्चित्कालं विश्रान्तिः, ततः पुनः प्रवृत्तिरिति वक्तुं शक्यते । तेन कालोऽनिमिषः । नित्यं विना विश्रान्तिं कालप्रवृत्तिदर्शनात् । न विद्यते निमिषो विश्रान्तिरस्येत्यनिमिष इति । अत्र "लवादेर्निमिषेक्षणात्" इति क्वचित् कोशपाठः न स्फुटार्थः ।

तिर्यङ्मनुष्यविबुधादिषु जीवयोनि-
ष्वात्मेच्छयाऽऽत्मकृतसेतुपरीप्सया यः[1] ।
रेमेऽनिरस्तरतिरप्युपलब्धकाष्ठ-[2]
स्तस्मै नमो भगवते पुरुषोत्तमाय[3] ॥ १९ ॥

अनिरस्तरतिः नित्यरतिः ॥ * ॥

सोऽयं समस्तजगतां सुहृदेक आत्मा
सत्त्वेन यन्मृडयते भगवान् भगेन ।
तेनैव मे दृशमनुस्पृशताद् यथाऽहं
स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोऽसौ[4] ॥ २२ ॥

एष प्रपन्नवरदो रमयाऽऽत्मशक्त्या
यद्यत् करिष्यति गृहीतगुणावतारः ।
तस्मिन् स्वविक्रम इदं[5] सृजतोऽपि चेतो
युञ्जीत कर्मशमलं च यथा विजह्याम्[6] ॥ २३ ॥

---

१ "आत्मकृतसेतुपरिप्लवाय" इति केचित् पठन्ति । "स्वकृतसेतुपरीप्सया यः" इति च ।

२ "रेमे निरस्तरतिरप्यवरुद्धदेहः" इत्यर्वाचीनः पाठः ।

३ "उपलब्धकाष्ठः नित्यानुभूतानन्दः, यः आत्मकृतसेतुपरीप्सया स्वकृतधर्ममर्यादापालनेच्छया तिर्यङ्मनुष्यादिषु जीवयोनिषु आत्मेच्छया उत्पत्तावपि अनिरस्तरतिः अनिरस्तानन्दज्ञानः रेमे" इत्यनन्ततीर्थाः ।

४ "प्रणतिप्रियोऽसौ" इत्यपि केचित् पठन्ति । "सोऽयं परमात्मा भगेन ऐश्वर्यादिरूपेण, सत्त्वेन सत्त्वगुणप्रवर्त्तकेन यत् येन रूपेण मृडयते रक्षति तेन सत्त्वेन मे दृशं सात्त्विकं ज्ञानं अनुस्पृशतात् प्रयच्छतु । यथा येन ज्ञानेन पूर्वकल्पवदिदं जगत् स्रक्ष्यामि" इत्यनन्ततीर्थाः । एतेन आत्मेत्येतत् परमात्मेति व्याख्यातम् । 'आत्मा उत्कृष्टः' इति विजयध्वजीये । द्वयमप्येतदुत्तरत्र तात्पर्ये स्फुटम् । "आत्मा अन्तर्यामी" इति श्रीधरादयः ।

५ "स्वविक्रममिदम्" इत्यर्वाचीनः पाठः ।

६ "शरणागतानां वरप्रदः एष भगवान्, आत्मशक्त्या स्वभार्यया रमया सह गृहीतगुणावतारः, स्वीकृतानन्दादिगुणरूपावतारः यद्यत् दुष्टनिग्रहशिष्टपालनादि कर्म करिष्यति इदं जगत् सृजतो मे चेतः तस्मिन्नेव स्वविक्रमे युञ्जीत प्रेरयतु । यथा (यया) स्वविक्रमे मे चेतःप्रेरणयाऽहं शमलं पापात्मकं कर्म विजह्यां त्यक्ष्यामि" इत्यनन्ततीर्थाः । यद्वा रमया सह आत्मशक्त्या स्वसामर्थ्येन । तदिदमुक्तम्—"स्वसामर्थ्यात् स कर्माणि रमया सह केशवः" इति ।

"स्वसामर्थ्यात् स कर्माणि[1] रमया सह केशवः । कुरुते स्वयमेवैष कानिचित् पुरुषोत्तमः" इति नारदीये । "[2]आत्मशब्दस्य मुख्यार्थो विष्णुरेकः सनातनः । सन्देह[3]देहमनसो बुद्धिजीवाः स्वयं तथा । ब्रह्माऽप्यमुख्याः[4] क्रमश उत्कर्षो ह्यात्मता भवेत्" इति प्रकाशसंहितायाम् ॥ * ॥

मा वेदगर्भ गास्तन्द्रीं[5] सर्ग उद्यममावह ।
तन्मया चोदितं[6] ह्यग्रे यन्मां प्रार्थयते भवान् ॥ २९ ॥

प्रार्थनमपि मत्प्रेरणमेव[7] ॥ * ॥

भूयश्च तप आतिष्ठ विद्यां च मदपाश्रयाम्[8] ।
ताभ्यामन्तर्हृदि ब्रह्मन् लोकान् द्रक्ष्यस्यपावृतान् ॥ ३० ॥

"तप आलोचनं प्रोक्तं विद्या निष्ठा[9] प्रकीर्तिता" इति कपिलसंहितायाम्[10] ॥ * ॥

---

१ "स्वकर्माणि" इति प्र. पाठः प्रामादिकः ।

२ पूर्वश्लोके "सुद्धदेक आत्मा" इत्यात्मशब्दः श्रुतः । अत्रापि श्रूयते "रमयाऽऽत्मशक्त्या" इति । उत्तरत्र च श्रूयते- "तत आत्मनि योगेन" इति (३१); "भूतेन्द्रियगुणात्मभिः" (३६) इत्यादि च । सर्वेषामप्यर्थनिर्णयाय देहलीदीपवन्मध्ये तावदात्मशब्दार्थानाह- आत्मशब्दस्येति । विष्णुरेव मुख्यार्थः । सन्देहाद्याः ब्रह्मान्ता अमुख्यार्थाः । किमेकरूपममुख्यत्वम्? नेत्याह -क्रमशः । अमुख्येष्वपि पुनर्मुख्यामुख्यभावोऽस्ति । तथाचायं क्रमः- सन्देह इत्यमुख्यतमोऽर्थः । सन्देह इति मध्यदेहः । देहैकदेशवचनादपि देहसामान्यवचन आत्मशब्दो मुख्यार्थः । मन इति ततोऽपि मुख्यः । ततोऽपि बुद्धिर्मुख्योऽर्थः । जीवस्ततोऽपि मुख्यार्थः । जीवसामान्यवचनादपि स्वात्मेति मुख्योऽर्थः । ब्रह्मेति त्वमुख्येषु मुख्यतमोऽर्थ इति । तथाच पूर्वश्लोके आत्मेति विष्णुः । आत्मशक्त्येत्यत्र तु स्वयमित्यर्थे । "आत्मनि योगेन" (३१) इत्यत्र आत्मेति जीवश्च देहश्च । "भूतेन्द्रियगुणात्मभिः" इत्यत्र आत्मेति मनश्च बुद्धिश्च । "बुद्धेरात्मा महान् परः" इत्यत्राऽऽत्मेति ब्रह्मा । "स आत्मा स पुच्छम्" इत्यत्राऽऽत्मा सन्देहापरनामा मध्यदेहः । एवं यथासम्भवं यथाप्रकरणं च सर्वत्राऽऽत्मशब्दार्थ उन्नेय इति ।

३ "सन्दोह-" इति क्वचित् प्र॰ पाठः प्रामादिकः । '-मनसः' इति पुंस्त्वमार्षम् ।

४ "ब्रह्माऽप्यमुख्यः" इति क्वचित् ।

५ "मा वेदगर्भ गास्तन्द्रिम्" इत्यनन्ततीर्थाभिमतः पाठः । तथाहि तद्व्याख्यानम्—"तन्द्रिं लोकसंस्थानविज्ञानविषयं परिखेदं मा गाः । एतावत्पर्यन्तं भवान् यन्मां प्रार्थयते तत् 'तप' इति द्व्यक्षरकथनेनाग्रे मयैव प्रेरितं हि" इति ।

६ "तन्मयाऽऽपादितम्" इत्यर्वाचीनः पाठः ।

७ मत्प्रेरणनिमित्तमेवेत्यर्थः ।

८ "भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयाम्" इत्यर्वाचीनः पाठः ।

९ आलोचनमिति ध्यानम् । निष्ठा भगवन्निष्ठा भक्तिः । तथाहि प्राचीनटीका- "तपः परब्रह्मध्यानम् । विद्या तद्भक्तिः" इति ।

१० "प्रकीर्तिता इति च" इतीयदेव प्र. पाठे पठ्यते । कपिलसंहितायामिति न पठ्यते ।

तत आत्मनि योगेन[1] भक्तियुक्तः समाहितः ।
द्रष्टासि मां ततं ब्रह्म मयि लोकांस्त्वमात्मनि[2] ॥ ३१ ॥

"देहेदेहे हरिस्तस्मिन् लोकाः सर्वे प्रतिष्ठिताः । अङ्गुष्ठमात्रेऽपि परे[3] परशक्तिर्यतो विभुः" इति च ।

आत्मनि[4] स्थिते मयि ॥ * ॥

यदा रहितमात्मानं भूतेन्द्रियगुणाशयैः ।
स्वरूपेण मयोपेतं पश्यन् स्वाराज्यमृच्छति[5] ॥ ३३ ॥

स्वरूपेण मयोपेतम्, हृदिस्थजीवरूपं परमेश्वरसहितं भवति[6] ।

"त्यक्त्वा देहाद्यात्मभावं जीवरूपे हृदि स्थिते । दृष्ट्वाऽऽत्मभावं तं चापि हरिपादाब्जसंस्थितम् । यदा पश्यत्यापरोक्ष्यात् तदा मुक्तिं व्रजत्यसौ" इति दत्तात्रेययोगे ॥ * ॥

ज्ञातोऽहं भवता त्वद्य दुर्विज्ञेयोऽपि देहिनाम् ।
यन्मां त्वं मन्यसे युक्तं भूतेन्द्रियगुणात्मभिः[7] ॥ ३६ ॥

"भूतेन्द्रियमनोबुद्धित्रिगुणादिषु[8] सर्वशः । युक्तं नियामकतया पश्यन् जानाति केशवम्" इति च ॥ * ॥

---

१ "आत्मनि लोके च" इत्यर्वाचीनः पाठः । २ "ब्रह्मन् मयि लोकांस्त्वमात्मनः" इति च ।

३ "अङ्गुष्ठमात्रे विवरे" इति क्वचित् । ४ आत्मनीति देहेदेहे, स्वदेहे च, स्वस्मिंश्च ।

५ "आत्मानं जीवाख्यं स्वात्मानं, भूतेन्द्रियगुणाशयैः, पञ्चमहाभूतदशेन्द्रियशब्दादिगुणबुद्ध्यादिभिः रहितं व्यतिरिक्तं यदा पश्यति, तं च जीवात्मानं स्वरूपेण बिम्बभूतेन मया सह ममाऽभिमुख्येन प्रतिबिम्बत्वेनोपेतं मत्पादाब्जस्थितं पश्यति तदा स्वाराज्यं स्वरूपानन्दाविर्भावलक्षणमोक्षं प्राप्नोति" इत्यनन्ततीर्थाः ।

६ "हृदिस्थं जीवरूपं हि परमेश्वरसहितं भवति" इति प्र. पाठः । हृदिस्थं जीवरूपं परमेश्वरसंहितं भवति" इति क्वचित् । "हृदिस्थं परमेश्वरसहितं भवति" इति च ।

७ "अत्र आत्मेति मनोबुद्धी गृह्येते । "भूतेन्द्रियमनोबुद्धि–" इत्यादिदत्तात्रेययोगवचनात् । अहङ्कार इत्यनन्ततीर्थाः । तथाहि तद्वचनम्–"गुणाः शब्दादयः । आत्मा अहङ्कारः । पञ्चमहाभूतादिभिर्नियामकतया युक्तम्, मां मन्यस इति यत् तस्मादद्य त्वया ज्ञातोऽहम्" इति । "अत्मा अन्तःकरणचतुष्टयम्" इत्यन्ये । "आत्मा जीवः" इत्यपरे ।

८ "–त्रिगुणादिषु" इत्यादिपदेन शब्दादयो गुणा गृह्यन्ते । अत एव गुणाः शब्दादय इत्यनन्ततीर्थाः ।

22

प्रीतोऽहमस्तु भद्रं ते लोकानां विजयेच्छया[१] ।
यदस्तौषीद्[२] गुणमयं निर्गुणं माऽनुवर्णयन् ॥ ३९ ॥

"सार्वज्ञ्यादिगुणैर्युक्तं सत्त्वादिगुणवर्जितम् । यो जानाति हरिं तस्य प्रीतो भवति केशवः" इति व्योमसंहितायाम् । "आधिकारिकदेवानां स्वाधिकाराभिकामनम्[३] । भवति प्रीतये विष्णोर्भक्त्यादेरपि[४] यत् सदा" इति च ॥ * ॥

पूर्तेन तपसा यज्ञैर्दानैर्योगसमाधिना ।
[५]राज्यं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतम्[६] ॥ ४१ ॥

निःश्रेयसम् राज्यम् । मोक्षेऽपि रञ्जनीया मत्प्रीतिरेव ।

"मुक्तस्यापि हरेः प्रीतिः सर्वतोऽप्यनुरज्यते" इति वामने ॥ * ॥

अहमात्माऽऽत्मनां[७] धातः प्रेष्ठः सन् प्रेयसामपि ।
अतो मयि रतिं कुर्याद् देहादिर्यत्कृते प्रियः[८] ॥ ४२ ॥

"सर्वतोऽपि प्रियो ह्यात्मा तस्यापि प्रियतां हरिः । आपादयति यत्[९] तस्मात् स्वात्मनोऽपि[१०] प्रियो हरिः" इति ब्रह्मवैवर्ते ॥ * ॥

इति तृतीयस्कन्धे दशमोऽध्यायः[११]

---

१ "लोकानां विजयेच्छया सर्वलोकाधिपत्येच्छया" इत्यनन्ततीर्थाः । "विजयेच्छया सृष्टीच्छया" इत्यपि व्याचक्षते ।

२ "यदस्तौषीः" इत्यपि पाठः । यद् भवानस्तौषीत् ।

३ "स्वाधिकारादिकामिता" इति प्र. पाठः ।

४ "भक्त्याद्यैरपि" इति प्र॰ पाठः प्रामादिकः । भक्त्यादेरपि कामनमित्यन्वयः, भक्त्यादेरपि कारणं भवतीति वा । "भक्त्यादेरपि यः सदा" इति क्वचित् । "भक्तादेरपि सत् सदा" इति च ।

५ "राद्धम्" इत्यर्वाचीनः पाठः ।

६ "पूर्तेन कूपनिर्माणादिकर्मणा, तपसा मासोपवासादिकर्मणा, अग्निष्टोमादियज्ञैः, हिरण्यदानादिदानैः, अष्टाङ्गयोगेन, मनस एकाग्रतारूपेण समाधिना च, निःश्रेयसम्, द्वितीया सप्तम्यर्थे, निःश्रेयसे मोक्षेऽपि राज्यं रञ्जनीयम्, प्रार्थनीयमिति यावत्, मत्प्रीतिर्मत्प्रसादनमेवेति तत्वविन्मतम् । तपोदानादिभिर्मोक्षप्राप्त्यनन्तरमपि प्रार्थनीया भगवत्प्रीतिरेवेत्यर्थः" इत्यनन्ततीर्थाः ।

७ "आत्मनां जीवानामात्मा अधिपतिः" इत्यनन्ततीर्थाः । "आत्मा आश्रयः" इत्येके ।

८ "कलत्रपुत्रादिषु प्रीतिर्देहसम्बन्धेन, देहे प्रीतिर्जीवात्मसम्बन्धेन, जीवात्मनि प्रीतिः परमात्मसम्बन्धेनेति, परमात्मन्येव प्रीतिः स्वाभाविकी" इति विश्वनाथचक्रवर्ती ।

९ "तत् तस्मात्" इति क्वचित् । "यस्तस्मात्" इति च ।

१० "स्वात्मनाऽपि" इति क्वचित् ।

११ श्रीधरीयाद्यनुसारेणात्र नवमाध्यायसमाप्तिः ।

विरिञ्चोऽपि तदा चक्रे[१] दिव्यं वर्षशतं तपः ।
आत्मन्यात्मानमावेश्य यथाऽऽह[२] भगवानजः ॥ ४ ॥

आत्मनि परमेश्वरे मन आवेश्य[३] ॥ * ॥

एतावान् जीवलोकस्य संस्थाभेदः समासतः[४] ।
धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठिनः[५] ॥ ९ ॥

अनिमित्तस्य ब्रह्मार्पणबुद्ध्या कृतस्य । "अः इति [६]ब्रह्म" इति श्रुतेः ॥ * ॥

यदात्थ बहुरूपस्य हरेरद्भुतकर्मणः ।
कालाख्यं लक्षणं ब्रह्मन् यथा वर्णय नः प्रभो[७] ॥ १० ॥

"लक्षणं लक्ष्यमात्मा च स्वरूपमिति कथ्यते" इति ह्यभिधानम्[८] ॥ * ॥

गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः ।
पुरुषस्तदुपादानमात्मानं लीलयाऽसृजत्[९] ॥ ११ ॥

---

१ "तथा चक्रे" इत्यर्वाचीनः पाठः । २ "यदाह" इति पाठान्तरम् ।

३ अत्र सर्वेषां व्याख्यातॄणामैककण्ठ्यम् —"आत्मनि श्रीनारायणे आत्मानं मन आवेश्य" इति श्रीधरविश्वनाथशुकदेवाः । "आत्मनि परमात्मन्यात्मानं मनः" इति वीरराघवः । "भगवत्यन्तःकरणमावेश्य" इति वल्लभाचार्यः । अनन्ततीर्थास्तु योजनान्तरमप्याहुः-"आत्मनि हृदये आत्मानं परमात्मानम्" इति । साधुरेवायमप्यर्थः । अन्तत ऐकार्थ्यात् । ४ "समाहृतः" इत्यर्वाचीनः पाठः ।

५ "परमेष्ठ्यसौ" इत्यर्वाचीनः पाठः । "जीवलोकस्य जीवानामाश्रयस्य चतुर्दशलोकसमूहस्य संस्थाभेदः अवस्थानप्रकारः एतावानियान् सङ्क्षेपेण मया कथित इति शेषः । कीदृशः? परमेष्ठिनः ब्रह्मणः अनिमित्तस्य निष्कामत्वेन ब्रह्मार्पणबुद्ध्या कृतस्य धर्मस्यादृष्टरूपस्य पुण्यस्य विपाकः फलरूपः" इति प्राचीनटीका ।

६ "अ इति ब्रह्म" इत्यविसर्गः प्र. पाठः प्रामादिकः ।

७ "हरेः यत् कालाख्यं लक्षणं रूपं त्वमात्थ सङ्क्षेपेण प्रोक्तवानसि तद् रूपं नः यथावद् विस्तरेण वर्णयेत्यर्थः" इत्यनन्ततीर्थाः । ८ "इत्यभिधानम्" इति प्र. पाठः ।

९ "गुणव्यतिकरं गुणवैषम्यं आकरोति पश्यतीति गुणव्यतिकराकारः । निर्विशेषः सर्वोत्तमः । अप्रतिष्ठितः अनन्याधारः । पुरुषः पूर्णषड्गुणो भगवान् नारायणः । तेषां सत्त्वादीनामुपादानं ग्रहणं तत्कर्त्तारम्, गुणत्रितयं गृहीत्वा सृष्ट्यादिकर्त्तारम्, स्वात्मानमेव लीलया ब्रह्मविष्णुमहेश्वरतयाऽसृजत्" इत्यनन्ततीर्थाः ।

गुणव्यतिकरमाकरोति[१] । तद्दृष्टा । अप्रतिष्ठितः अन्यत्र । "स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि" इति श्रुतेः[२] । तदुपादानं[३] गुणव्यतिकरोपादानकर्तारम् । सृष्ट्याद्यर्थत्वेन तस्य पुरुषस्य [४]ब्रह्मा विष्णुरीश्वर इति त्रीणि रूपाण्यात्मना [५]सृष्टानि ॥ * ॥

विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया ।
ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्तिना[६] ॥ १२ ॥

ब्रह्मनिर्मातृकम्[७] । मायया सामर्थ्येन । तत्र [८]यत् संहर्त्रीश्वराख्यं रूपं तत् कालाख्यम् । "कल च्छेदने" इति धातोः ।

"अथ त्रयी वाव प्रकृतिः सत्त्वं रजस्तम इति तां नारायणः [९]परिपश्यत्यनन्यप्रतिष्ठस्तं[१०] वा एतमाहुः पुरुष इति पूर्णो ह्येष भवति स त्रेधा बभूवैषां गुणानामुपादानाय विष्णुर्वाव सत्त्वस्य रजसो ब्रह्मेशो नाम[११] तमसः स आ विवेश ब्रह्मा [१२]ब्रह्माणं चतुर्मुखमीश ईशानं पञ्चमुखं यो वा ईश ईशानमाविवेश तं वा एतं[१३] काल इत्याचक्षते काल इत्याचक्षते" इति सौकरायणश्रुतिः ॥ * ॥

यथेदानीं तथाऽग्रे च पश्चादप्येतदीदृशम् ।
सर्गो नवविधस्तस्य [१४]प्राकृतो वैकृतश्च यः ।
[१५]कालद्रव्यगुणैरस्य त्रिविधः प्रतिसङ्क्रमः ॥ १३ ॥

---

१ "–माकरोतीति तद्दृष्टा" इति क्वचित् ।
२ "इति श्रुतिः" इति प्र. पाठः ।
३ "यदुपादानम्" इति क्वचित् ।
४ "ब्रह्मविष्णुमहेश्वर इति त्रीणि" इति प्र· पाठः ।
५ "रूपाण्यात्मनः सृष्टानि" इति क्वचित् ।

६ "विश्वं जगत् ब्रह्मतन्मात्रं ब्रह्माख्यनिर्मात्रा निर्म्मितम् । विष्णुसामर्थ्येन संस्थितं पालितम् । अव्यक्तमूर्तिना संहारमूर्तिना कालेन च्छेदकेन ईश्वरेण परिच्छिन्नं संहृतम्" इति प्राचीनटीका ।

७ एतेन ब्रह्मणि स्थितं तत् ब्रह्मनामकं रूपं मात्रं निर्मातृ यस्य तदिति व्याख्यातं भवति । अथवा यथा तज्ज्ञ इति ज्ञ एवोच्यते, तथा तन्मात्रमिति मात्रमित्येवार्थः । मातृत्वान्मात्रमिति भवति । श्रोतृत्वात् श्रोत्रमितिवत् । यथा वा "हिरण्मयेन पात्रेण" इत्यत्र पातृत्वात् पात्रमिति ।

८ "तत्र संहर्त्रीश्वराख्यम्" इति क्वचित् ।
९ "पर्यपश्यदनन्य–" इति प्र. पाठः ।
१० "–प्रतिष्ठितस्तम्" इति क्वचित् ।
११ "ब्रह्मेशानो नाम" इति क्वचित् ।

१२ "ब्रह्माणं नाम चतुर्मुखं ईश ईशानं नाम पञ्चमुखम्" इति प्र. पाठः । "ब्रह्माणं चतुर्मुख ईश ईशानम्–" इत्यपि प्राचीनकोशेषु पठ्यते ।

१३ "तं वा एनम्" इति प्र· पाठः ।

१४ "अण्डोत्पत्तेः पूर्वं प्रकृत्यादिनिर्मितः सर्गः प्राकृतः । अण्डं विकृतमुच्यते । तदन्त.सर्गो वैकृतः" इति प्राचीनटीका ।

१५ "कालसङ्ख्यया नाशः शतवर्षान्ते मरणमित्यादि । द्रव्यतो नाशस्तु विरोधिद्रव्येण । यथा पशोर्व्याघ्रेण । गुणतो नाशः तमोगुणजन्यस्याज्ञानादेः सत्त्वगुणोत्पन्नेन ज्ञानादिना" इति च ।

"सृष्टिश्च प्रळयश्चैव संहारो[1] मुक्तिरेव च । देवा ऋषिप्रभृतयो लोका[2] भूरादयस्तथा । अनाद्यनन्तकालीनाः सर्वदैकप्रकारतः[3] । जगत्प्रवाहः सत्योऽयं नैतन्मिथ्या[4] कथञ्चन । ये त्वेतदन्यथा ब्रूयुः सर्वहन्तार एव ते । देवैर्विष्णवादिभिः[5] शप्ता ऋषिभिर्मानुषादिभिः । सेतिहासैस्तथा वेदैः सर्वे यान्त्यधरं तमः । सर्वब्रह्मत्ववेत्तारो जीवब्रह्मत्ववेदिनः[6] । अन्यसाम्यविदो विष्णोर्विष्णुद्वेष्टार एव च । सर्वे यान्ति तमो घोरं न तेषामुत्थितिः[7] क्वचित्" इति स्कान्दे ॥ "तामसस्य पदार्थस्य सत्त्वं हि लयकारकम्[8] । सात्त्विकस्य तमश्चैव तयोरपि रजः क्वचित् । गुणतोऽयं लयः प्रोक्तो द्रव्यतस्तु विरोधिना । कालतः कालसङ्ख्याजो[9] लयः सर्वस्य वस्तुनः" इति ब्रह्मतर्के ॥ * ॥

आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः ।
द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियादयः[10] ॥ १४ ॥

"तमसो रजस्तु द्विगुणं रजसः सत्त्वमेव च । परिमाणत एवं स्युस्त्रयः प्रकृतिजा गुणाः[11] । तत्र सत्त्वं केवलं स्याद् रजस्यपि शताधिकम् । सत्त्वं रजःशतांशं तु तमस्तत्र प्रकीर्तितम् । तमस्यपि तथा सत्त्वं तमसस्तु दशोत्तरम् । [12]तद्दशांशेन तु रजो

---

१ "प्रलयश्चैव संसारो–" इति प्र. पाठः ।

२ "देवर्षिप्रभृतयो लोका लोका भूरादय-" इति प्र. पाठः ।

३ "–प्रकारकः" इति क्वचित् प्र. पाठः

४ एतत् जगत् न मिथ्या । तेन नपुंसकत्वोपपत्तिः । "नैव मिथ्या" इत्यपि पाठान्तरम् ।

५ "देवैर्ब्रह्मादिभिः" इति प्र. पाठः ।

६ "जीवब्रह्मत्ववादिनः" इति क्वचित् ।

७ "नचैषामुत्थितिः" इति प्र. पाठः ।

८ "लयकारणम्" इति प्र. पाठः ।

९ "कालसङ्ख्याको–" इति प्र. पाठः प्रामादिकः ।

१० "–क्रियोदयः" इत्यर्वाचीनः पाठः । "नवविधसर्गेष्वादिमसर्गस्तु महत्तत्वस्य सर्गः गुणवैषम्यात्मकः । स सर्गश्च प्रकृतेः सकाशाद्भवन् आत्मनः परमात्मनः प्रेरणया भवति । यदा त्रिगुणानां समता तदा प्रळयः । यदा तेषामुपचयांशैर्विषमता तदा महत्तत्वादिजन्मेति भावः । अहमः अहङ्कारस्य सर्गो द्वितीयः । यत्र यस्मिन्नहङ्कारतत्वे पञ्चभूतज्ञानेन्द्रियकर्मेन्द्रियादयः सूक्ष्माकारेण स्थिताः" इति प्राचीनटीका ।

११ "परिणामत एवास्य भूयः प्रकृतिजा गुणाः" इति क्वचित् पाठः । तथाच सृष्टौ राशितः पृथक्कृतानां गुणानामयं परिमाणक्रमः– ४ : २ : १ इति ।

१२ सत्त्वराशौ केवलं सत्त्वं तमसश्चतुर्गुणं रजसश्च द्विगुणमिति स्थितम् । न केवलं तावदेव सत्त्वं नाम । रजस्तमोराश्योरपि सत्त्वानुप्रवेशात् । नहि केवलं सत्त्वमिव केवलं रजः केवलं तम इति वा क्वचिदस्ति । तथाहि रजसि सत्त्वरजस्तमसां परिमाणम्—१०० : १ : १/१०० इति । एको राशिः रजः । ततः शतगुणः सत्त्वराशिः । रजोराशेः शतांशस्तमोराशिः । एवं तमसि सत्त्वरजस्तमसां परिमाणम्– १० : १ : १/१० इति । एको राशिस्तमः । ततो दशगुणः सत्त्वराशिः । तमोराशेर्दशांशो रजोराशिः । इयं सृष्ट्यारम्भे गुणस्थितिः ।

मूलजं यद्रजस्तु तत् । विलये दशांशतः सत्त्व एकांशेन तमस्यपि । मिश्रितं भवति ह्येतां[1] साम्यावस्थां विदुर्बुधाः । यदा तु तद् रजः सर्वं तमसा सह सङ्गतम् । तदा त्वाहुर्महत्तत्त्वं तच्चतुर्भागसम्भवम्[2] । तत्र त्रिभागो[3] रजस एकोंऽशस्तमसस्तथा । तदाहुर्ब्रह्मणो रूपं गुणवैषम्यनामकम् । तदेव केवलं सत्त्वमितरापेक्षया भवेत् । श्रीर्मूलसत्त्वं विज्ञेया भूर्मूलरज उच्यते । मूलं तमस्तथा दुर्गा महालक्ष्मीस्त्रिमूलिका[4] । गुणेभ्यो गुणमूलाच्च योऽतीतः स जनार्दनः । यद्रजो मूलरजसि मूले तमसि यद् रजः । तमश्च मूले तमसि महत्तत्त्वं तदात्मकम्[5] । दशांशास्तत्र सत्त्वं स्यादेको रजस एव च[6] । तद्दशांशं तमो ज्ञेयमहङ्कारस्तदात्मकः[7] । स रुद्रस्तामसो ज्ञेयो विरिञ्चापेक्षयैव तु । इतरापेक्षया सत्त्वं सत्त्वाद्यास्तद्वदस्य तु[8] । तत्तमोंऽशात् सात्विकोंऽशो[9] मनआद्याः प्रकीर्तिताः । राजसों[10]ऽशस्त्विन्द्रियाणि तामसोंऽशस्तु[11] खादयः" इत्यादि तत्त्वविवेके ॥ * ॥

भूतसर्गस्तृतीयस्तु तन्मात्राद्रव्यशक्तिमान्[12] ।

अथ प्रळये अयं रजोराशिः द्वादशधा विभक्तो भवति । दश भागाः सत्त्वे विलीयन्ते । एको भागो रजसि तिष्ठति । अपरश्चैकस्तमसि लीयते । तदेवं सर्वत्र सर्वगुणानां साङ्कर्यात् साम्यावस्थेयमुच्यत इति ।

१ "ह्येतत् साम्यावस्थाम्" इति क्वचित् ।

२ "तच्चतुर्मानसम्भवम्" इति क्वचित् । सत्त्वे लीनः दशभागात्मकः रजोराशिः एको भागः । रजोगत एव भागो द्वितीयः । तमसि लीन एको रजोभागस्तृतीय इति रजसस्त्रयो भागाः । तमोराशौ य एकस्तमोंऽशः स एको भाग इति चतुर्भागसम्भवं चतुर्मुखशरीरम् ।

३ "त्रिभागम्" इति क्वचित् । "तावत् त्रिभागः" इत्यन्यत्र । ४ "त्रिमूर्तिका" इति क्वचित् ।

५ मूले रजसि यद्रज इति भागद्वयम् । सत्त्वराशिस्थं दशभागात्मकं रज एको भागः । रजोराशिस्थ एव चैको भागः । तमोराशिस्थं रजस्तृतीयो भागः । तमश्चैको भाग इति तच्चतुर्भागसम्भवमित्युक्तस्यैव विवरणमिदम् ।

६ "एकांशो रज एव तु" इति प्र. पाठः । "–रज एव च" इति क्वचित् ।

७ तथा च ब्रह्मदेहे गुणपरिमाणं सत्त्वतमोरजसां क्रमेण–१० : १ : १/१० इति । तत्र यस्तमोभागस्तदुपादानकं रुद्रशरीरमिति । तदेवाहङ्कारतत्वमुच्यते ।

८ "तद्वदस्य च" इति च पाठः । सत्त्वरजस्तमसां परिमाणं पूर्ववदेवेत्यर्थः । १० : १ : १/१० मानेन सत्त्वतमोरजांसि तिष्ठन्तीति यावत् । तत्र यस्तमोंऽशः एकभागपरिमितः तत्रापि दश भागाः सत्त्वं । एको भागस्तमः, दशांशं रज इति स्थिते, दशभागात्मकः सात्विको राशिर्मनआदीनि । आदिशब्देन देवतादेहाः । राजसभागोपादनकानीन्द्रियाणि, तमउपादानकानि पञ्चभूतानि पृथिव्यादीनीति ।

९ "सात्विकांशो–" इति प्र. पाठः । १० "रजसोंऽश–" इति प्र. पाठः ।

११ "तमसोंऽशश्च" इति प्र. पाठः । "तमसोंऽशस्तु" इति क्वचित् ।

१२ "तन्मात्रो द्रव्यशक्तिमान्" इत्यर्वाचीनाः पठन्ति । "तन्मात्राद्रव्यशक्तिमान्, तन्मात्राः शब्दादयः, द्रव्याण्याकाशादीनि तत्स्वभाववान् । तन्मात्रारूपेण सूक्ष्मो भूतरूपेण स्थूल इति द्विविधो भूतसर्गस्तृतीयः" इत्यनन्ततीर्थाः । "तन्मात्रद्रव्यशक्तिमान्" इत्यपि पठन्ति ।

चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मक. ।
वैकारिको देवसर्गः पञ्चमो यन्मयं मनः[१] ॥ १५ ॥

"भूतानि द्रव्यशक्तीनि भूतेषु द्रवणं यतः[२] । तथा तन्मात्रशक्तीनि शब्दाद्यात्मकता यतः । क्रियाशक्तीनि वागाद्यानीन्द्रियाणीतराणि तु । ज्ञानशक्तीनि मनसा देवाश्च ज्ञानशक्तयः[३] । एतेषां मूलभूतत्वादहङ्कारस्त्रिशक्तिमान् । मानुषापेक्षया देवाः सात्त्विकाः परिकीर्तिताः । तत्रापि सात्त्विकाः प्रोक्तास्तात्त्विका यास्तु देवताः । तत्रापि सात्त्विको रुद्रस्तत्रापि च[४] चतुर्मुखः । अविकारौ ब्रह्मरुद्रौ देहभेदादि-सम्भवे[५] । विकारवन्त इन्द्राद्यास्तस्माद् वैकारिका मताः । त एवेन्द्रियरूपेण यत-स्त्वतिविकारिणः । ज्ञानमात्रगुणोद्रिक्तास्तस्मात् तैजसनामकाः । अविकारित्वयो-ग्यत्वं निवृत्तं हीन्द्रियेषु तु । वैकारिकत्वनामापि ततस्तेषां न विद्यते[६] । यथा विप्र-कुले मूर्खो मूर्ख इत्यभिधीयते । विद्यायोग्यत्वतः शूद्रो न मूर्खो मूर्ख एव सन् । तामसानि तु[७] भूतानि किञ्चिद् व्यवहितत्वतः । ज्ञानस्य सुष्ठुज्ञत्वेऽपि पूर्णज्ञानो हरिः स्वयम्" इति च[८] ॥ * ॥

षष्ठस्तु तमसः[९] सर्गो यस्त्वबुद्धिकृतः प्रभोः[१०] ।
षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु[११] ॥ १६ ॥

---

१ "ज्ञानेन्द्रियकर्मेन्द्रियरूपः ऐन्द्रियः इन्द्रियसम्बन्धी यः सर्गः स चतुर्थः । वैकारिकाहङ्काराख्यकारणवान् देवसर्गो दिग्वातार्कादीन्द्रियाभिमानिदेवसर्गः पञ्चमः । मनश्च यन्मयम्, यद्वैकारिकाहङ्कारकारणकम्" इति च ।

२ भूतविषये लोकस्य द्रवणमित्यर्थः । द्रव्यन्ते लोकेनेति द्रव्याणि ।

३ मनसा सह देवाश्च ज्ञानशक्तयः । कर्मशक्तयश्च देवाः । अहङ्कारस्त्रिशक्तिमान्, द्रव्यशक्तिमान्, क्रिया-शक्तिमान्, ज्ञानशक्तिमांश्च । उक्तं हि 'द्रव्यज्ञानक्रियादय' इति ।

४ "तत्रापितु" इति च पाठः ।

५ इन्द्राद्याः देहभेदादिरूपे सम्भवे सति विकारवन्त इति वैकारिकाः । देहभेदनिमित्तविकारवत्त्वात् । न तथा ब्रह्मरुद्रौ । महदहंनियमनार्थं देहभेदादिसम्भवाभावात् । अत्र सम्भव इत्युत्पत्तिवचनम् । देहभेदेन आदि-पदादभिमानिरूपेणापि सम्भवे इति वाऽर्थः । देहभेदादेः सम्भवे हि विकारवन्त इति वा ।

६ अविकारित्वयोग्यत्वे सति तन्निवृत्तिर्वैकारिकत्वं, नतु विकारमात्रम् । यथा ज्ञानयोग्यत्वे सति तदभावो मूर्खत्वं नतु ज्ञानाभावमात्रम् । तथाचेन्द्रियाभिमानिषु अतिविकारित्वेनाविकारित्वयोग्यत्वं पूर्वमेव निवृत्तमिति न ते वैकारिकाः । किन्तु विकारेऽप्यविकृतज्ञाना इति तैजसा एवोच्यन्ते ।

७ "तामसानि हि" इति क्वचित् । भूतानि भूताभिमानिनो देवा न वैकारिका उच्यन्ते, नापि तैजसाः । किन्तु तामसा इत्येवोच्यन्ते । कुतः ? तेषां सुष्ठुज्ञत्वेऽपि तदीयज्ञानस्य किञ्चिद्व्यवहितत्वात् ।

८ "इत्यादि च" इति क्वचित् ।

९ "तामसः सर्गो–" इत्यपि पठन्ति ।

१० "प्रभो" इति सम्बोधनमित्यर्वाचीनाः ।

११ "तमो मोहो महामोहस्तामिस्रमन्धतामिस्रमिति पञ्चविधस्य तमसोऽविद्यायाः सर्गः षष्ठः यस्तमःसर्गः प्रभो-

"[1]अबुद्धिपूर्वमिव तु ब्रह्मणो हरिबुद्धितः[2]। तामसानां तु भूतानां सहस्रं सत्त्वभागिनाम्। शतांशरजसामेकतमसां[3] सर्ववेदिनाम्। केवलस्तमसो योंऽशः साऽविद्या पञ्चपर्विका। जाताऽतिकृष्णा[4] तद्देहाद्दैत्यरक्षःपिशाचकाः। यद् रजो भौतिकं तेन मानुषाणां सदा जनिः। तमोगूढेन रजसा त्वितरस्थास्नुचारिणाम्। [5]भौतिकेन तु सत्त्वेन गूढं ब्रह्मण आण्डजम्। रूपं तत्रापि तु तमः शतांशेन प्रकीर्तितम्। तज्जो रुद्रस्ततस्त्वेवमिन्द्रादीनां[6] पुनर्जनिः। गूहेतं भूतरजसा तत् सत्त्वं मानुषा यदा। देवा[7] एवं गुणास्त्वेते सर्वं व्याप्य व्यवस्थिताः। गुणातीतं च यद् रूपं ब्रह्मादीनां सुखात्मकम्। चिद्रूपं तच्च सत्त्वस्यैवोत्कर्षो यत्र विद्यते। [8]तत्रोत्कृष्टं तमो यत्र हीनं तत्र स्वभावतः। [9]उपगूहने तु नैवास्ति विशेषो नित्यचिन्मये। प्रकृतेर्गुणरूपायाः मूलिकायाश्च[10] न क्वचित्। विशेषः परमे तत्त्वे वासुदेवे कुतः पुनः" इति च। अव्य- "क्ताद्याः पृथिव्यन्ताः सर्वाः प्रकृतयः स्मृताः। तदुत्पादनकः सर्गः प्राकृतः[11] परिपठ्यते। अण्डं तु विकृतं ज्ञेयं तज्जो वैकृत उच्यते। पञ्चपर्वा त्वविद्या तु भूतेभ्यो

विरिञ्चस्य अन्तस्थिताबुद्धिकृतः। अः परमात्मा। विशेषतस्तद्बुद्धिकृतत्वादबुद्धिकृतः। ब्रह्मान्तर्यामिभगवदिच्छया कृत इत्यर्थः। प्रभोर्विरिञ्चस्य देहात् तमसो निर्गमनकाले विरिञ्चस्य हरावेकाग्रचित्तत्वात् अबुद्धिपूर्वमिव कृतः। इमे षट् सर्गाः अण्डोत्पत्तेः पूर्वभावित्वात् प्राकृताः प्रोक्ताः" इत्यनन्ततीर्थाः।

१ "अबुद्धिपूर्वमिव कृतः इत्येकोऽर्थः। यथा चक्षुर्निमेषोन्मेषादिर्नातीव बुद्धिपूर्वकत्वमपेक्षते तद्वत्। अथाप्यकारवाच्ये हरौ बुद्ध्या कृत इति चार्थः। ननु सर्वाऽपि सृष्टिः हरिबुद्ध्या कृता? सत्यं कृता। अत्र को विशेषः? तमःसृष्टिरित्येव विशेषः। तथाहि विजयध्वजीयम्- "सदा विष्णुबुद्धित्वेऽपि तमःसंसर्गेण स्वबुद्धिभ्रंष्टा भवतीति भीत्या विशेषतस्तद्बुद्ध्यैवेत्युक्तम्" इति। तथाचानेन तत्वविवेकवचनेन 'अबुद्धिकृतः' इत्यस्यार्थद्वयं विवृतं भवति।

२ इतः परं मुद्रितकोशेषु- "अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः" इत्यधिकं पठ्यते।

३ "शतांशतमसामेकरजसाम्" इति क्वचित् कोशेषु पठ्यते। अर्थौचित्यं मृग्यम्। अयं तावत् श्लोकार्थः- तामसनाम्नां भूताभिमानिनां देवानां देहे तावत्सत्वरजस्तमसामयं परिमाणक्रमः- १०००:१००:१ इति। तत्र केवलं य एकस्तमसोंऽशस्तेन रजस्तमोभ्यामसंस्पृष्टेन पञ्चविधाऽविद्याऽसृज्यतेति।

४ "जाताऽतिदुष्टा" इति क्वचित्।

५ भौतिकेन सत्वेन गृहीतवीर्यं गूढं यद्रजः तेन ब्रह्मण आण्डजं अण्डान्तर्जायमानं रूपं भवति।

६ "रुद्रस्ततस्तेषामिन्द्रादीनाम्" इति क्वचित्।

७ देवा यदा मानुषत्वेन जायन्ते तदा तद् भौतिकं सत्वं भौतिकेन रजसा गूहितं निगृहीतं भवति।

८ "तच्चोत्कृष्टम्" इति प्र. पाठः। यत्र सत्वस्योत्कर्षो दृश्यते तत्रोत्कृष्टं चेतनं विद्यात्। यत्र तम एवोत्कृष्टं दृश्यते तत्र हीनं चेतनं विद्यात्।

९ अवतारेषु रजस्तमोभ्यां गूहनेऽपि नित्यचिन्मये स्वरूपे न कश्चिद् विशेषः।

१० गुणरूपा गुणाभिमन्त्री। मूलिका मूलप्रकृत्यभिमन्त्री।

११ "प्रकृतः" इति मुद्रितः पाठः प्रामादिकः।

हरिणा पुरा। उद्धृत्य[१] ब्रह्मणि क्षिप्ता सा पुनस्तेन निस्सृता । तत्स्रष्टृत्वज्ञापनाय तस्मात् सा प्राकृता मता[२]" इति च ॥ * ॥

रजोभाजो भगवतो लीलेयं हरिमेधसः[३]।
सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः ॥ १७ ॥

"एते गुणा हरेः सम्यक् स्वातन्त्र्यविषयाः सदा। स्वतन्त्राः प्रकृतेश्चापि ब्रह्मणोऽन्येषु तु क्रमात्[४]। देवेष्वेव तदन्येषु परतन्त्रा हि ते मताः" इति च ॥ * ॥

वनस्पत्योषधिलतास्त्वक्सारा[५] वीरुधो द्रुमाः ।
उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशोषिणः[६] ॥ १८ ॥

"स्थास्नुभिर्नियमान्मुख्या स्थितेर्गतिरवाप्यते । प्रायः परोपकर्तृत्वात् ते मुख्यस्रोतसस्ततः[७]। नाधो नोर्ध्वं तिरश्चां तु पुनस्तत्रैव यज्जनिः। यज्ञोपयोगं च सतामुप-

---

१ "उद्धृता ब्रह्मणि क्षिप्ता" इति क्वचित्। "उद्धृत्य ब्रह्मणा क्षिप्ता" इति च ।

२ एतेन यच्छुकदेवेनोक्तम्—"केचित्तु अन्धतामिस्रादिसर्गं षष्ठमाहुः, तच्चिन्त्यम्, तस्य सृज्यमानजीव भावसूचकत्वेन वैकृतसर्गेऽन्तर्भावात्" इति तत् प्रमाणवचनेनैव निरस्तं भवति। एवमप्रमाणकं वदन्तो व्याख्यातारो भवन्तीति ।

३ "रजोभाजः रजोगुणसन्निहितस्य, हरिमेधसः, सर्वदुष्टान् हरति, मेधारूपश्चेति हरिमेधाः, तस्य हरेरियं लीला। अनन्तरं तत्सन्निधानपात्रस्य विरिञ्चस्य लीला" इत्यनन्ततीर्थाः। हरिवत् सूर्यवदग्निवच्च जाज्वल्यमाना मेधा यस्य तस्य नारायणस्येति विजयध्वजादयः। "यद्विषया मेधा संसारं हरति तस्य रजोभाजः रजोगुणयुक्तचतुर्मुखान्तर्यामिणः हरेः" इति शुकदेवादयः। चतुर्मुखपक्षे–हरौ मेधा यस्य। उक्तं हि पूर्वम्–"हरिबुद्धितः" इति।

४ "–न्येषु तत्क्रमात्" इति क्वचित्। "–न्येषु वा क्रमात्" इति च ।

५ "–लतात्वक्सारा–" इत्यर्वाचीनः पाठः ।

६ "विशेषिणः" इत्यर्वाचीनाः। "अन्तःस्पर्शाविशेषिणः" इत्येकं पदमित्यपरे। "पुष्पाणि विना फलन्तोऽश्वत्थादयः पादपा वनस्पतय इत्युच्यन्ते। फलपाकान्ता व्रीह्यादय ओषधयः। (लताः प्रसिद्धाः)। त्वक्सारा वेण्वादयः । वीरुधो गुल्माः । द्रुमाः पुष्पोत्पत्तिपूर्वं फलन्तश्चूतादयः । उत्स्रोतस ऊर्ध्वं वर्धमानाः । तमःप्रायाः अज्ञानप्रचुराः। अन्तःस्पर्शाः अन्तरेव स्पर्शज्ञानिनः, नतु त्वचि। तापाधिक्ये विशोषिणः शोषवन्तः" इत्यनन्ततीर्थाः। अत्र उत्स्रोतस इति अन्तःस्पर्शा इति च पदे अर्थान्तरपरतया व्याख्याते इति न भाष्यविरोधः शंक्यः। "उदूर्ध्वं स्रोतः आहारसंचारो येषां ते" इति ह्यन्येऽपि व्याचक्षते। एवं अन्तःस्पर्शाः नतु त्वचि इत्यपि त्वचि यथाऽस्माकं तथा विशेषतः स्पर्शज्ञानं नास्तीति व्याख्येयम् । सामान्यतः स्पर्शज्ञानं स्थावराणामप्यस्ति हि।

७ "–स्रोतसः स्मृताः" इति प्र. पाठः। परोपकर्तृत्वात् स्थितेः परोपकर्तृत्वरूपायाः स्थितेः परोपकर्तृत्वेन स्थितेर्वा स्थास्नुभिः मुख्या पुण्यगतिरवाप्यते। अतस्ते उत्स्रोतसः उच्चस्रोतस इति मुख्यस्रोतस इति चोच्यन्ते । अत एव तेषां सर्गश्च मुख्यसर्ग इत्युच्यते इत्युक्तप्रायम् । मुख्यस्रोतःसर्ग एव मुख्यसर्ग इति ।

23

कारं विनाऽपि वा[1]। तिर्यक्स्रोतस इत्येव प्रोच्यन्ते ज्ञानिभिस्ततः। प्रायोऽधोगमनं यस्मात् प्रयत्नेन विना भवेत्। अर्वाक्स्रोतस इत्येव[2] मानुषाः परिकीर्तिताः। नियमादूर्ध्वगन्तारो देवा मोक्षैकभागिनः। ऊर्ध्वस्रोतस इत्येव तस्मात् ते परिकीर्तिताः" इति ब्राह्मे। "तिरश्चां स्थावराणां च बुद्धिपूर्वप्रवृत्तिनाम्। असुराणां रक्षसां च[3] पिशाचानां तथैव च। अर्वाक्स्रोतस्त्वमुद्दिष्टं नियमादसुरादिनाम्" इति च।

मुख्यस्रोतस इत्यस्यार्थ उत्स्रोतस इति।

"ऊर्ध्वं इत्येव यः सूच्चतमः सैवाभिधीयते[4]। ऊर्ध्वस्रोतस एतस्माद् देवा एव न तत्परे। उच्छब्द उच्चमात्रेऽपि तस्मात् स्यात्स्तुषु भण्यते" इति च। "तिरश्चीनाः[5] स्थावराश्च अन्तःस्पर्शा इतीरिताः। यतः प्रत्यक्षानुमाभ्यां[6] हृद्गज्ञानं[7] न शास्त्रगाः[8]" इति पाद्मे[9]।

यदप्रयत्नाद्धृदयङ्गमं तदेव जानन्ति न[10] शास्त्रयुक्तिभ्यामित्यर्थः॥ * ॥

तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः।
अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः[11] ॥ १९ ॥

---

१ "विनाऽपिच" इति प्र॰ पाठः। यज्ञोपयोगं सतामुपकारं वा विना ये तिर्यञ्चस्त एव तिर्यक्स्रोतसः। यज्ञाद्युपयोग उच्चस्रोतस्त्वमपि।

२ "इत्येवम्" इति क्वचित्।

३ "रक्षसां वा" इति प्र॰ पाठः। मनुष्याः ऊर्ध्वगमनं प्रति प्रयत्नेन विनाऽधोगन्तार इत्यर्वाक्स्रोतसः। असुरादयश्च प्रयत्नेनाप्यधोगन्तार इति ते नियमेनार्वाक्स्रोतसः। अथच तिर्यक्स्रोतसां तिरश्चामपि यदि बुद्धिपूर्वं पापे प्रवृत्तिः तदा तेऽप्यर्वाक्स्रोतसः क्वचिद् भवन्ति। एवमुच्चस्रोतसः स्थावरा अपि बुद्धिपूर्वं पापे प्रवर्तमानाः क्वचिदर्वाक्स्रोतसो भवन्ति। क्वाचित्कं चेदम्। बाहुल्येन ते मुख्यस्रोतस इत्युत्स्रोतस इत्येवोक्तम्।

४ "यस्तूच्चतम एवाभिधीयते" इति प्र. पाठः। सैवाभिधीयत इति प्राचीनपाठे स एवाभिधीयत इति। पदच्छेदः।

५ एतेन तिर्यक्सर्गेऽपीदं समानमिति सूचितम्। एतदेवोच्यते—"अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः" इति मूले।

६ "यत् प्रत्यक्षानुमानाभ्याम्" इति प्र. पाठः।

७ "हृद्गं ज्ञानम्" इति क्वचित्।

८ "न शास्त्रतः" इति प्र. पाठः। तिरश्चीनाः स्थावराश्च न शास्त्रगाः, न शास्त्रतोऽर्थानवगच्छन्ति। किन्तु यत् प्रत्यक्षतो दृश्यते श्रूयते वा, अथच प्रत्यक्षतुल्येनानुमानेन यदप्रयत्नाज्ज्ञायते, व्याघ्रदर्शनेन मृगशाबस्य भयमिव यदापाततो हृदयग्राहि भवति तावदेव ज्ञानं तेषाम्।

९ "इति च पाद्मे" इति क्वचित्।

१० "नो शास्त्र–" इति प्र. पाठः।

११ "हृदिवेदिनः" इत्यनन्ततीर्थसम्मतः पाठः। तथाहि तद्व्याख्यानम्—"अविदः कार्याकार्याविदः, भूरितमसः अज्ञानप्रचुराः, घ्राणेन जानन्तः, हृदिवेदिनः हृद्येव ज्ञानिनः" इति। येषां ज्ञानं हृद्येव तिष्ठति, न वागादिनाऽभिव्यक्तिरिति तदाशयः। 'हृद्यवेदिन' इति तु 'हृद्गज्ञानं न शास्त्रगाः' इति भाष्यवचनानुकूलम्।

गौरजो महिषः कृष्णः सूकरो गवयो रुरुः ।
द्विशफाः पशवश्चेमे [1]अविरुष्टश्च सत्तम ॥ २० ॥

खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून्[2] ॥ २१ ॥

श्वा सृगालो वृको व्याघ्रो मार्जारः शशशल्यकौ[3] ।
सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः ॥ २२ ॥

कङ्कगृध्रवळश्येना भासवल्लूरबर्हिणः[4] ।
हंससारसचक्राह्वाः[5] काकोलूकादयः खगाः ॥ २३ ॥

"अविदः श्वस्तनाद्यतनादिज्ञानशून्याः । भूरितमसः आहारनिद्रामैथुनभयमात्रनिष्ठाः । घ्राणेनैवेष्टमर्थं जानन्तीति घ्राणज्ञाः, गन्धेन गावः पश्यन्तीतिवत् । हृदि अवेदिनः दीर्घानुसन्धानरहिताः" इति श्रीधरादयः । "हृदि अवेदिनः कार्याकार्यविवेकरहिताः" इति शुकदेवः । "हृद्यं स्वप्रियं वस्त्वेव विन्दन्ति भोजनशयनाद्यर्थं गृह्णन्ति" इति विश्वनाथचक्रवर्ती ।

१ "आविरुष्ट्रश्च" इति क्वचित् कोशे पठ्यते । गवाद्या उष्ट्रान्ता नव द्विशफाः । "कृष्णः कृष्णमृगः । गवयोऽरण्यगौः । रुरुरेणः" इत्यनन्ततीर्थाः । "कृष्णरुरुगौराः मृगविशेषाः" इति श्रीधरादयः । "रुरुर्बहुशृङ्गः । अविर्मेषः" इति वल्लभाचार्यः ।

२ खराद्याश्चमर्यन्ताः षडेकशफाः । आहत्य पञ्चदशाऽऽसन् । गर्दभादश्वायां जातोऽश्वतरः । "गौरो मृगविशेषः । शरभोऽष्टापदो मृगः" इत्यनन्ततीर्थाः । "चमरी गोसदृशो मृग आरण्यः । ग्राम्यचमरीणां द्विशफत्वम्" इति वल्लभाचार्यः । "पञ्चनखा मनुष्या अपि । तद्व्यावृत्त्यर्थं पशूनित्युक्तवान्" इति च ।

३ "शशशल्लकौ" इत्यर्वाचीनः पाठः । "शल्यकः कण्टकाचिताङ्गः सूकरविशेषः" इत्यनन्ततीर्थाः । अत्र कूर्मं विहाय श्वादिगोधान्ता एकादश । आहत्य षड्विंशतिः । कूर्ममकरादयः जलचराः स्सविंशतिः । कङ्कादयः पक्षिणः खेचरत्वेनैका विधेत्याहत्याष्टाविंशतिः । "अत्र कूर्मो जलप्राणित्वान्मकरादिष्वन्तर्भूत एव । तथाऽपि तस्य श्वादिषु गणनं श्वसृगालादिवत् पञ्चनखत्वख्यापनार्थम् । नतु पृथग्गणत्वज्ञापनार्थम् । तथाच गवाद्या मकरान्ताः सप्तविंशतिर्गणाः । कङ्कगृध्रवळादयः सर्वे सम्भूयाष्टविंशतिमगण इति ज्ञातव्यम्" इत्यनन्ततीर्थाः ।

४ "कङ्कगृध्रवटश्येनभासभल्लूकबर्हिणः" इति अर्वाचीनः पाठः । "कङ्कगृध्रबलाः श्येनभासवल्लूरबर्हिणाः" इति क्वचित् ।

५ "-चक्राह्वकाकोलूकादयः" इत्यर्वाचीनः पाठः । कङ्कः क्रौञ्चविशेषः । Heron इत्याङ्ग्लभाषायाम् । वळः काकप्रभेद इति भाति । "बलः काके" इति हलायुधः । बलाका वा । पक्ष्यन्तरं वा । गृध्रो 'गिडुग' इति भाषायाम् । श्येनः 'हृद्द' इति भाषायाम् । भास इति कुक्कुटविशेष इति भाति । गृध्रविशेषो वा । 'पिङ्गलि' इति भाषायामिति केचित् । वल्लूरो नृत्तपक्षीत्याचार्याः स्वयमेवाऽऽहुः ।

"अष्टाविंशद् विशेषेण यज्ञेषूपकृतं यतः । तिरश्चां तावदेतस्माद् गण्यते[1] शास्त्रवेदिभिः । गौरजो महिषः कृष्णः सूकरो गवयो रुरुः । अव्युष्ट्रौ च खराश्वौ च तथैवाश्वतरोऽपरः । गौरश्च शरभश्चैव चमरी श्वसृगालकौ । वृको व्याघ्रश्च मार्जारो हरिश्च शशशल्यकौ । कपिर्गजश्च गोधाद्या जलजाः पक्षिणस्तथा" इति ब्रह्माण्डे ।

कूर्मो जलजत्वेनाष्टाविंशत्स्वन्तर्भूतोऽपि पञ्चनखत्वप्रदर्शनार्थं पृथगुक्तः ।

"तत्तदाकारसंयुक्तान् सृज्यान् स्रष्टारमेव च । यः सदा संस्मरेद् योगी न स भूयोऽभिजायते" इति स्कान्दवचनात् प्रसिद्धानामपि द्विशफादीनां स्मरणविधानार्थमुक्तिः । "उच्यते सुप्रसिद्धं च स्मरणार्थं तु कुत्रचित्[2] । अप्रसिद्धं[3] ज्ञापनार्थं द्विधा शास्त्रवचः स्मृतम्" इति षाड्गुण्ये । "वल्गुरो नृत्तपक्षी च स वल्गूकश्च[4] कथ्यते" इत्यभिधाने । "अष्टाविंशत् प्रधानास्तु तिरश्चां यास्तु जातयः । यो यस्य सदृशस्त्वन्यः स तत्रान्तर्गतो भवेत् । जलजान्तर्गताः सर्पाः कीटाद्या[5] याश्च जातयः । तेषां जलप्रधानत्वाच्छरीरस्य तु सर्वशः[6]" इति सत्यसंहितायाम् ॥ * ॥

अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणाम् ।
रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः[7] ॥ २४ ॥

"रजोनिष्ठास्तमोनिष्ठा द्वेधाऽर्वाक्स्रोतसः स्मृताः । असुराद्यास्तमोनिष्ठा मानुषास्तु रजोधिकाः" इति व्योमसंहितायाम् ।

दुःखे[8] सुखमानिनोऽसुराः ।

"सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी" इति वचनात् । "सुखे सुखैकभावास्तु देवा नैवं तु दानवाः" इति षाड्गुण्ये ॥ * ॥

---

१ "गण्यन्ते" इति क्वचिन्मुद्रितः पाठः प्रामादिकः । २ "स्मरणार्थं च कुत्रचित्" इति प्र. पाठः ।

३ "अप्रसिद्धज्ञापनार्थम्" इति मुद्रितः पाठः प्रामादिकः ।

४ "ललूकश्च" इति मुद्रितः पाठः प्रामादिकः ।

५ "सर्वाः कीटाद्याः" इति क्वचित् । "सर्वे मीनाद्याः" इत्यन्यत्र ।

६ "–रस्य च सर्वशः" इति क्वचित् ।

७ "हे क्षत्तः, नृणां मनुष्याणां सर्गो नवमः । कीदृशः ? अर्वाक्स्रोतस्तु । प्रयत्नं विना प्रायेणाधोलोकगन्ता । स एकविध एव । ते अर्वाक्स्रोतसो मानुषा रजोऽधिकाः । प्रवृद्धरजोगुणाः । अत एव बहुकर्मकरणपराः । असुरा अप्यवार्क्स्रोतस इत्युच्यन्ते, अधोलोकनेतृत्वात् । तेषां लक्षणमाह– दुःखे च सुखमानिनः" इत्यनन्ततीर्थाः । अर्वाक्स्रोता इति वक्तव्ये ह्रस्वश्छान्दसः ।

८ "दुःखे न सुख–" इति प्र. पाठः ।

वैकृतास्त्रय एवैते देवसर्गश्च सत्तम ।
वैकारिकस्तु[१] यः प्रोक्तो कौमारस्तूभयात्मकः[२] ॥ २५ ॥

"कुमरन्तीति[३] कौमारो देवानामण्डजोद्भवः । वैकारिकाणां जननात् प्राकृतो वैकृतश्च सः । वैकारिकेष्वेवान्येषा[४]मीषद् भोगित्वहेतुतः । उभयात्मकत्वेनैव[५] प्रोच्यन्तेऽष्टगणा अपि" इति च ।

देवसर्गश्चेति चकारस्यार्थ[६] उभयात्मक इति[७] । वैकारिकस्तु देवसर्गः प्राकृतत्वेनोक्तः ॥ * ॥

देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः ।
गन्धर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः ।
भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः[८] ॥ २६ ॥

---

१ "वैकारिकश्च" इति पाठान्तरम् ।

२ "एते त्रयः स्थावरतिर्यङ्मानुषविषयाः सर्गाः वैकृताः । अण्डाभ्यन्तरवर्तित्वाद् वैकृता इत्युच्यन्ते । देवसर्गः प्राकृतो वैकृतश्चेति द्विविधः । यो देवसर्गः पूर्वं प्रोक्तः स वैकारिकः कौमारश्चेत्युभयात्मकः द्विविध इत्यर्थः । अण्डोत्पत्तेः पूर्वं प्रकृतेः क्रियमाणो देवसर्गः वैकारिक इत्युच्यते । अण्डोत्पत्त्यनन्तरमण्डान्तर्ब्रह्मदेहाद् भूमौ भवन् देवसर्गः कौमार इत्युच्यते । कौ भूमौ मा निर्माणं अरन्ति गच्छन्तीति कौमारा देवाः । तत्सम्बन्धित्वात् तत्सर्गः कौमारः" इत्यनन्ततीर्थाः । यद्वा कुं भूमिं आ अरन्ति, आर्च्छन्ति इति वक्तव्ये छान्दसं रूपम्, आगच्छन्तीति अण्डान्तः सृज्यमाना देवाः कुमाराः । तेषामयं कौमारः सर्गो वैकृतः । वैकारिकश्च प्राकृत इति दशमो देवसर्गस्तूभयात्मकः ।

३ "कुमारन्तीति" इति च पाठः । अरन्ति ऋच्छन्तीत्यर्थः । आङः संश्लेषेण कुमार इति रूपम् । कुमारन्तीति व्युत्पत्त्या कुमारपदवाच्यानां देवानामण्डान्तर्जात उद्भवः कौमार उच्यते । अनन्ततीर्थीयपक्षे देवा अपि कौमाराः, सर्गोऽपि कौमारः । कौ मा अरन्तीति निर्वचने मा इत्येतदविभक्तिकं पदं निर्माणवचनमिति कथञ्चिद् व्याख्येयम् । "कौ पृथिव्यां मारन्ति निर्माणेन रमन्ति" इति व्याख्यानं तु चिन्त्यमेव ।

४ वक्ष्यमाणाष्टविधदेवगणेषु प्रविष्टानामिन्द्रादिदेवतागणादन्येषां पित्रादीनाम् ।

५ "उभयात्मकत्वं तेनैव" इति मुद्रितः पाठः ।

६ "चकारार्थः" इति प्र. पाठः । उत्स्रोतसः तिर्यक्स्रोतसः अवार्क्स्रोतस इति त्रय एते वैकृता एव । देवसर्गः वैकृतश्च चशब्दात् प्राकृतश्च । तदेव विव्रियते उभयात्मक इति । यः प्राकृतत्वेन प्रोक्तः वैकारिकः स च, वैकृतः कौमारश्चेत्युभयात्मकः ।

७ "उभयात्मकश्चेति" इति क्वचित् ।

८ "देवसर्गश्चाष्टविधः । विबुधाः सर्वे सम्भूयैको गणः । अन्यः पितृगणः । अपरोऽसुरगणः । गन्धर्वाप्सरस इत्यपरो गणः । सिद्धा इत्येकः । यक्षरक्षांसीति कश्चित् । चारणा इति चैकः । भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादय इति बहुजातिसमाहार एको गण इत्यर्थः" इत्यनन्ततीर्थीयम् ।

"प्रोक्ता अष्टविधा देवा विबुधाः सर्व एव तु । पितॄणां शतमेवात्र असुरास्त्रिंशदेव च । गन्धर्वाप्सरसां चैव द्विशतं[1] परिकीर्तितम् । सप्ततिर्यक्षरक्षःसु त्रिंशच्चारणजातिषु । शतं सिद्धास्तथाऽन्यासु सप्ततिः सर्वजातिषु[2] । ऊर्ध्वस्रोतस एवैते अन्येऽर्वाक्स्रोतसः स्मृताः । वैकारिकेषु देवेषु एते वै मुग्धभोगिनः[3] । अभोगिनस्तदन्ये तु देवा एते ततः स्मृताः । सर्वज्ञास्तैः[4] सहाऽराध्या भक्तास्तेष्वन्तरेव च । नृत्तगानादिकर्तारो वहनादि[5]कृतस्तथा । सिद्धं सिद्धेति[6] वक्तारश्चाराश्चैषां क्वचित्क्वचित् । सेवाकारा इति ह्येतैर्भेदैरष्टविधा मताः । अन्ये च ये तु[7] सर्वज्ञा विबुधास्ते प्रकीर्तिताः । तथाऽन्ये[8] कर्मभिस्तैस्तैरष्टभेदान्तरं गताः" इति तत्त्वविवेके । "यदि देवादयो दोषाज्जायेरन् मानुषादिषु । तथाऽपि देवा विज्ञेया असुराद्यास्तथा[9] ध्रुवम्" इति च ॥ * ॥

एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः ।
सृजत्यमोघसङ्कल्प आत्मैवाऽऽत्मानमात्मना[10] ॥ २८ ॥

---

१ गन्धर्वाणां शतमप्सरसां च शतमाहत्यैको गण इत्यर्थः ।

२ सर्वजातिष्विति भूतप्रेतपिशाचविद्याधरकिन्नरकिंपुरुषादिषु । तत्तद्गणेषु एतावत्सङ्ख्याका एव ऊर्ध्वस्रोतस इति देवसर्गे गणिताः । अन्येऽर्वाक्स्रोतसः ।

३ "मुख्यभोगिनः" इति प्र. पाठः प्रामादिकः । वैकारिकेषु देवेषु प्रविष्टा एते पित्रादयः सप्त गणाः मुग्धभोगिनः । ईषद्भोगित्वहेतुत इति पूर्वमुक्तेः किञ्चिद् यज्ञभागभोगिन इत्येव देवा इति गण्यन्ते । येऽभोगिनः शतातिरिक्ताः पितरः, त्रिंशदतिरिक्ता असुराः, द्विशतातिरिक्ता गन्धर्वाप्सरसः, सप्तत्यतिरिक्तानि यक्षरक्षांसि, त्रिंशदतिरिक्ताः चारणाः, शतातिरिक्ताः सिद्धाः, तथा सप्तत्यतिरिक्ताः भूतप्रेतादयश्च, ते सर्वे अभोगित्वादेव अदेवा उच्यन्ते ।

४ "सर्वज्ञास्ते" इति प्र. पाठः प्रामादिकः । अष्टगणानां विभाजकोक्तिरियम् । सर्वज्ञा इति विबुधाः । तैः सहाऽऽराध्या इति पितरः । "अत एव श्राद्धे विश्वेदेवाराधननियमः" इति यादुपत्यम् । तेषु देवेष्वन्तरेव भक्ता इत्यसुराः । नृत्तगानादिकर्तार इति गन्धर्वाप्सरसः । वहनादिकृत इति यक्षरक्षांसि । सिद्धंसिद्धमिति वदन्तः सिद्धाः । चारकृत्यकराश्चारणाः । भूतप्रेतादयः क्वचित्क्वचित्सेवाकरा इति व्यवस्था ।

५ "वाहनादि–" इति प्र. पाठः प्रामादिकः । यक्षरक्षांसि देवान् वहन्ति, नतु वाहयन्ति ।

६ "सिद्धसिद्धेति" इति प्र. पाठः । सिद्धंसिद्धेति वक्तारः सिद्धंसिद्धमिति वक्तारः ।

७ "अन्ये तु ये च" इति क्वचित् । ८ "तथाऽन्यैः" इति क्वचित् ।

९ "विज्ञेया सुराद्यास्तु तथा" इति मुद्रितः प्र. पाठः प्रामादिकः ।

१० "सर्वस्रष्टा स्वयम्भूर्हरिः एवमुक्तप्रकारेण रजःप्लुतः रजोगुणसम्बद्धविरिञ्चादिस्थितः; हरिः कल्पमन्वन्तरादिषु प्रकृत्युपादानेन देवादिदेहान् सृष्ट्वा तन्नियामकतया मत्स्यकूर्मादिभावेन च आत्मा स्वयमेव आत्मना स्वेच्छया आत्मानं स्वस्वरूपं सृजति अभिव्यक्तीकरोति" इत्यनन्ततीर्थाः ।

"गुणाप्लुतो हरिर्नित्यं गुणानां मध्यगो यतः। अनहंवेदनात् तस्य गुणासंस्पर्श एव च" इति च[१]। "सृष्ट्वा देवादिदेहान् स आत्मानं बहुधाऽकरोत्। तन्नियन्तृतयाऽऽत्मानं प्रकृतिं देहभेदतः"[२] इति नारदीये। "कर्ता च करणं चैव कर्म चैव स्वयं हरिः। आत्मनो बहुधाभावे प्रकृतेस्तु स्वतन्त्रता[३]" इत्याग्नेये ॥ * ॥

इति तृतीयस्कन्धे एकादशोऽध्यायः[४]

चरमस्तु विशेषाणामनेकासंयुतश्च यः[५]।
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥ १ ॥

कालपरिमाणं दर्शयितुं द्रव्यपरिमाणं दृष्टान्तत्वेन दर्शयति—

"मनुष्या देवलोकेऽपि विशेषेणैव दर्शने। अंशांशित्वविशेषं तु यस्य द्रष्टुं न शक्नुयुः। चरमो विशेष इति तं मुनयो ब्रूयुरञ्जसा। परमाणुः स विज्ञेयः कणादाद्या निरंशिनम्। अनन्तांशयुतत्वेऽपि यं ब्रूयुर्भ्रान्तिदर्शनात्। ततोऽपि परमाणुत्वं तदंशानां तु यद्यपि। अनन्तत्वाद् विवेकार्थमस्योक्ता परमाणुता" इति तत्त्वविवेके।

अनेकांशैरा समन्ताद् युतः ॥ * ॥

---

१ क्वचिदत्र 'च'कारो न पठ्यते।

२ एतेन आत्मानं सृजतीत्यस्यार्थत्रयमुक्तं भवति। आत्मानमित्यात्मीयां प्रकृतिं सृजति। भूतलोकदेहादिसृष्ट्या बहुभाव एव हि प्रकृतिसर्गः। ततश्च तत्र आत्मानं जीवं बहुधा सुरनरतिर्यगादिरूपेण सृजति। ततस्तत्र नियामकतया स्वात्मानं बहुधा करोतीति।

३ "स्वतन्त्रतः" इति पाठान्तरम्। आत्मनो बहुधाभावे स्वयमात्मा हरिरेव कर्ता करणं कर्म च। न साधनान्तरापेक्षा। अथच प्रकृतेर्बहुधाभावे तु प्रकृतिरूपसाधनान्तरस्वीकारेऽपि आत्मन एव स्वतन्त्रतेति न दोष इत्यर्थः।

४ श्रीधरीयादिरीत्याऽत्र दशमाध्यायसमाप्तिः।

५ "चरमः सद्विशेषाणामनेकोऽसंयुतः सदा" इत्यर्वाचीनाः पठन्ति। "कालाख्यं लक्षणमिति विदुरप्रश्नं परिहर्तुं परमाण्वाख्यकालपरिमाणं द्रव्यपरिमाणदृष्टान्तपूर्वकं ज्ञापयितुं द्रव्यपरिमाणं तावदाह–चरम इति। विशेषाणां पार्थिवानां पदार्थानां यश्चरमोऽन्त्यो विशेषः पदार्थः। अस्य पदार्थस्यांशा बहवः सन्ति, तदंशानां च प्रत्येकमंशांस्तदंशानां चेत्यन्ततो गत्वा यस्यांशस्यांशवत्त्वं देवलोकस्थमनुष्यस्य सूक्ष्मचक्षुषा विशेषतो दर्शने क्रियमाणेऽपि चक्षुषः सामर्थ्याभावाद् द्रष्टुं न शक्यते, देवानां तस्यांशस्याप्यंशवत्त्वं द्रष्टुं शक्यत एव, स चरमो विशेष इति

सत एव पदार्थस्य स्वरूपावस्थितस्य यत् ।
कैवल्यं परममहानविशेषो निरन्तरः[१] ॥ २ ॥

देशतः कालतो गुणतश्च परममहत्त्वं परब्रह्मण एव[२] । सच्छब्दोऽन्यत्राप्युपचारतो भवतीत्यतः पदार्थस्येति । सत्पदस्य यो मुख्याभिधेयस्तस्य[३] —

"मुख्याभिधेयस्त्वर्थः स्याद् वाच्यमन्यच्च भण्यते । अमुख्येष्वर्थशब्दस्तु[४] नीचोपरिहितो भवेत्[५]" इति ब्रह्मतर्के ।

"यद्वेव समः प्लुषिणा" इत्यादिनाऽन्यत्र स्थितस्य तत्परिमाणत्वमप्यस्तीत्यतः स्वरूपावस्थितस्येति । जगदावरकस्य रूपस्य[६] ततः किञ्चिन्महत्त्वमित्यतः कैवल्यमिति । तत्रापि बहुविधानि रूपाणि तस्य सन्तीत्यविशेष इति । सर्वगते प्रादेशमात्रमपि विद्यत इत्यतो निरन्तर इति ।

परब्रह्मणो यः केवलभावः, अण्डाद्यन्तःप्रविष्टं तदावरकं तस्यैव परमपुरुषादि रूपान्तरं तदेकदेशं[७] च विना यत् सर्वगतं रूपं तदेव परममहान् ।

भावः । स एव परमाणुरिति विज्ञेयः । कीदृशश्चरमांशः ? अनेकासंयुतः । अनेकांशैरा समन्ताद्युक्तः । यतो यस्य पदार्थस्य दर्शनात् नृणां कणादाक्षपादादिवादिनां ऐक्यभ्रमः, असावेकोंऽश एव, न त्वंशीति निरवयवत्वभ्रमो जायते स परमाणुर्विज्ञेयः" इत्यनन्ततीर्थीयम् ।

१ "अथ परममहाकालपरिमाणं दर्शयितुं दृष्टान्ततया परममहाद्रव्यपरिमाणं दर्शयति—सत इति । सतः परब्रह्मण एव परममहत्त्वम् । लोके सच्छब्दस्यामुख्येष्वपि व्यवहारात् तद्व्यावृत्त्यर्थं पदार्थस्येति । सत्पदमुख्यार्थस्येत्यर्थः । अणुतरे वस्तुनि स्थितस्य सत्पदमुख्याभिधेयस्य व्यावृत्त्यर्थं स्वरूपावस्थितस्येति । स्वरूपमेवावष्टभ्य स्थितस्य । जगदावरकस्य वासुदेवाख्यस्य हरेः जगत्प्रविष्टरूपात् किंञ्चिन्महत्त्वात् तद्व्यावृत्त्यर्थं कैवल्यमिति विशेषणम् । स्थूलानि वासुदेवादिबहुरूपाणि सन्तीति तद्व्यावृत्त्यर्थमविशेष इत्युक्तम् । सर्वगते प्रादेशमात्रमप्यस्तीति तद्व्यावृत्त्यर्थं निरन्तर इति । तथाचैवं योजना—सतः पदार्थस्य सच्छब्दमुख्यार्थस्य परब्रह्मणो जगदन्तर्यामित्वमन्तरेण स्वस्वरूपेणैवावस्थितस्य यत् कैवल्यं जगद्व्यापिरूपादधिकत्वेन जगत्सम्बन्धाभावात् केवलशब्दवाच्यं सर्वोत्तमत्वादविशेषं स्वान्तर्भेदहीनत्वान्निर्भेदं यद्रूपं सनवावरणब्रह्माण्डाद् बहिःस्थितरूपाद् यद् बहिः स्थितं तत् परममहानित्युच्यते" इति च ।

२ "कालतो देशतो गुणतश्च परममहत्त्वं सतः परब्रह्मण एव" इति च क्वचित् । प्र. पाठश्च तथा ।

३ क्वचित् कोशेऽत्र 'तस्य' इति पदं न पठ्यते ।

४ "अमुख्ये स्वर्थशब्दस्तु" इति मुद्रितः पाठः प्रामादिकः ।

५ नीचस्य शिरसि निहितः मकुट इवामुख्य एव भवेत् । यद्वा नीचः अपरिहितः इति च्छेदः । नीचः अमुख्य इत्यर्थः । अपरिहितः, परिधानं व्याप्तिः, अव्याप्तः अपर्याप्त इति यावत् ।

६ "–वरकस्य स्वरूपस्य" इति, "–वरकस्वरूपस्य" इति च प्र. पाठः । "–वरकरूपस्य" इति च क्वचित् ।

७ अत्र "तदेकदेशं प्रादेशः प्रादेशमात्रादिविशेषं च विना" इति यो मुद्रितः पाठः स प्रामादिक एव ।

'कालकोटिविहीनत्वं कालानन्त्यं विदुर्बुधाः । देशकोटिविहीनत्वं देशानन्त्यं तथैव च । गुणानामप्रमेयत्वं वस्त्वानन्त्यं विदो विदुः । आनन्त्यं त्रिविधं नित्यं हरेर्नान्यस्य कस्यचित् । तस्य सर्वस्वरूपेष्वप्यानन्त्यं तु त्रिलक्षणम् । तथाऽपि देशतस्तस्य परिच्छेदोऽपि विद्यते । परिच्छेदस्तथा व्याप्तिरेकरूपेऽपि युज्यते । तस्याचिन्त्याद्भुतैश्वर्याद् व्यवहारार्थमेव च । गुणतः कालतश्चैव परिच्छेदो न कुत्रचित् । व्याप्तत्वं देशतोऽप्यस्ति सर्वरूपेषु यद्यपि । नच भेदः क्वचित् तेषामणुमात्रोऽपि विद्यते । तथाऽपि विद्यतेऽणुत्वं 'यस्मादैश्वर्ययोगतः । तस्माद् बुद्ध्यवतारार्थमव्याप्तत्वं च भण्यते । यत् तस्य व्यापकं रूपं परं नारायणाभिधम् । शून्यं ब्रह्मेति तत् प्राहुर्द्वितीयं स्रष्टृ यत् ततः । परमः पुरुषो नाम मितं तद् देशतो विभोः । तृतीयं वासुदेवाख्यं जगदावरकं मितम् । देशतो जगदाविष्टं तुरीयं ब्रह्मनामकम्[२]" इति ब्रह्मतर्के ।

सर्वगतस्यापि ब्रह्मरूपस्य कालादिरूपया प्रकृत्या समव्याप्तावपि दार्ष्टान्तिकान्तर्भावात् तदन्यस्मिन्ननवस्थानाच्च[३] स्वरूपावस्थितस्येत्युक्तम् ।

"देव्यां कालादिरूपिण्यां स्थितं ब्रह्मापि सर्वगम् । उच्यतेऽनन्यगं यस्मादात्मवत् सा हरेर्विभोः । महदादिगतं यत्तु तदन्यगतमुच्यते" इति ब्राह्मे ॥ * ॥

एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम ।
संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग् विभुः[४] ॥ ३ ॥

---

१ "तस्मा–" इति क्वचिन्मुद्रितः पाठः ।

२ "तुरीयं विष्णुनामकम्" इति पाठान्तरम् । तथाचैतस्य तुरीयरूपस्य व्यावृत्त्यर्थं स्वरूपावस्थितस्येति । अन्यत्रानवस्थितस्य स्वरूप एवावस्थितस्य । अथापि जगत्यनवस्थितं वासुदेवरूपं प्राप्नोति । ततः कैवल्यमिति । आवरकत्वादिव्यापारमृते केवलमवस्थानं कैवल्यम् । वासुदेवस्त्वावरक इति तद्व्यावृत्तिः । अथापि परमपुरुषाख्ये रूपे गतम् । ततोऽविशेषः । अनावरकेष्वपि ये रूपविशेषा मूलरूपादुद्गतास्तानपि विहाय । तेन शून्यपरब्रह्मादिपदवेदनीयं नारायणाख्यं परं ब्रह्मैव मुख्यतः परममहान् इत्याशयः ।

३ "तदन्यस्मिन्नवस्थानाच्च" इति मुद्रितः पाठः प्रामादिकः ।

४ "दृष्टान्तमुक्त्वा दार्ष्टान्तिकं दर्शयति–एवमिति । सौक्ष्म्ये परमाणुत्वे स्थौल्ये परममहत्त्वे च वर्तमानकालोऽपि एवं भगवद्रूपवदेवानुमितः सम्यग्ज्ञातः । न केवलमुभयविधकालोऽनुमितः, किन्तु तदन्तर्यामी हरिरप्यनुमित इत्याह–संस्थानेति । विभुर्व्याप्तो भगवान् संस्थानभुक्त्या संस्थानयोः परमाणुत्वेन परममहत्त्वेन च व्यवच्छिन्नयोः कालयोः स्थित्या तदन्तर्यामित्वेनाव्यक्तोऽदृश्यः परमाणुः परममहानित्यनुमितो ज्ञातः । कीदृशः? व्यक्तं जगत् संहरतीति व्यक्तभुक्" इत्यनन्ततीर्थीयम् ।

24

स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम् ।
सतोऽविशेषभुग् यस्तु 'कालः स परमो महान्[२] ॥ ४ ॥

अनुमितः शास्त्रलोकानुसारेण ज्ञातः ।

"अनुमेति द्वयं प्राहुर्यथाज्ञानं[३] च लिङ्गजम्" इत्यभिधानम् । "यावन्तं देवलोकस्थो मानुषस्त्ववधारयेत् । महाप्राज्ञो देवजूतः[४] स कालः परमाणुकः । [५]सर्गाद्यैरनवच्छिन्नस्तदनन्तर इत्यपि । तथैव परमाण्वादिविशेषात्माऽपि नो भवेत् । पूर्वापरादिभेदोनः[६] स कालः परमो महान्" इति [७]ब्रह्मतर्के ।

स्वरूपावस्थितस्य, कैवल्यं, अविशेषः, निरन्तर इत्येतानि विशेषणानि क्रमेण परममहतः कालस्याप्यत्रोक्तानि ।

"देशतः कालतश्चैव वस्तुतस्तु त्रिधा हरेः । यथाऽऽनन्त्यं नचान्यस्य प्रकृतेर्देशकालतः । तथा शब्दस्य कालस्य देशानन्त्यं च कालतः[८] । कालशब्दात्मिका सैव तथाऽपि तु हरेः सदा । नास्याः सामर्थ्यलेशोऽपि[९] ज्ञानानन्दगुणेष्वपि । ज्ञेयस्तद-

---

१ "यस्तु स कालः परमो-" इति प्र. पाठः ।

२ "यः कालः कालान्तर्यामी हरिश्च परमाणुतां चरमस्तु विशेषाणामित्याद्युक्तलक्षणपरमाणुत्वं भुङ्क्ते प्राप्नोति स कालो हरिश्च परमाणुर्वै परमाणुनाम्ना वाच्य इति प्रसिद्धः । यः कालः कालान्तर्यामी भगवांश्च सतः परब्रह्मणः अविशेषभुक् अविशेषं सर्वोत्तमं निरन्तरं परमहद्रूपं भुंक्ते प्राप्नोति स कालः कालान्तर्यामी भगवांश्च परममहानिति कथितः । यानि विशेषणानि पदार्थस्येत्यादीनि व्यावर्तकानि कथितानि तानि परममहतः कालस्यापि ज्ञेयानि। तद्यथा यः सर्गस्थितिसंहारैः (अनवच्छिन्नः), सृष्ट्यनन्तरः स्थित्यनन्तरः संहारानन्तरः काल इत्यप्यनवच्छिन्नः, यस्तथैव पूर्वकालो मध्यमकालोऽपरः काल इत्यनवच्छिन्नः स परममहानित्युच्यते" इत्यनन्ततीर्थीयम् ।

३ शास्त्रानुसारेण लोकानुसारेण च यथावज्ज्ञानम् । अनुसृता हि मा अनुमेत्युच्यते ।

४ देवजूतः देवान् प्राप्तः । जू गतौ । इन्द्रजूतमित्यादिप्रयोगदर्शनाद् वेदेषु । "देवजूकः" इत्यपि केचित् पठन्ति । "देवजूको यज्ञादिना प्राप्तदेवप्रसादः" इति यादुपत्यम् । एतेन यो भुङ्क्ते परमाणुतामिति विवृतम् । द्रव्यपरमाणुरिव कालपरमाणुरपि देवलोकगैः मनुष्यैर्ज्ञेयः चरमावयवीति ।

५ परममहतः स्वरूपावस्थितत्वमुक्तम् । तदत्राप्युच्यते–सर्गाद्यैरनवच्छिन्नः । सृष्टिकालः संहारकाल इति सृष्ट्यादिभिरनवच्छिन्नः स्वरूपेणैवावस्थित इति यावत् । यदि सृष्ट्यादिभिरनवच्छिन्नः, तर्हि सृष्ट्यनन्तरः कालः संहारानन्तरः इत्यानन्तर्येणावच्छिन्नः स्यात् । तदपि नेत्याह–तदनन्तर इत्यपि । आनन्तर्येणाप्यनवच्छिन्नः केवलः काल इत्यर्थः । एतेन कैवल्यमिति विशेषणं विवृतम् । परमाण्वादिविशेषात्माऽपि नेत्यविशेष इति व्याख्यातम् । पूर्वापरादिभेदोन इति निरन्तर इत्यस्य विवरणम् ।

६ "भेदो न स कालः" इति प्र. पाठः ।

७ "इति च ब्रह्मतर्के" इति क्वचित् ।

८ "देशानन्त्यं न कालतः" इति प्र. पाठस्तु प्रमाद एव । देशानन्त्यं कालतश्च आनन्त्यमित्यर्थः ।

९ हरेः सामर्थ्यलेशोऽपि नास्या इत्यन्वयः । हरेः यत् सामर्थ्यं तल्लेशोऽपि नास्या इति ।

वरो वायुः शेषवीन्द्रहरास्ततः । अवरास्तत इन्द्राद्या गुणैः सर्वैर्न संशयः" इति ब्रह्मवैवर्ते । "अण्वादिकालसंस्थानभोक्तृत्वात्[1] परमेश्वरः। अण्वादिनामवाच्योऽसौ कालश्चेत्यभिधीयते" इति च ।

सतो ब्रह्मणः अविशेषं स्वरूपं यः कालः कालान्तर्यामी तदेव भुङ्क्ते[2] । तदपि ब्रह्मरूपं परममहान्[3] । तस्यापि त्रिधा [4]परिच्छेदाभावात् ।

"सर्वं सर्वत्र भोक्ताऽपि विशेषादेकभोक्तृवत् । स्थितो हरिरचिन्त्यात्मा निजैश्वर्यादजो विभुः" इति ब्रह्मतर्के[5] ॥ * ॥

अणुर्द्वौ परमणू स्यात् त्रसरेणुस्त्रयः स्मृतः ।
जालार्करश्म्यवगतः खमेवानुपतन्नगात्[6] ॥ ५ ॥

अगात्[7] ॥ * ॥

लघूनि वै समाम्नाता दश पञ्च च नाडिका ।
ते द्वे मुहूर्तः प्रहरः षड् यामः सप्त वा नृणाम्[8] ॥ ८ ॥

राशिभेदादूनातिरेकात् सप्त वेति ॥ * ॥

---

१ नियामकतया तत्र स्थितिरेव हि भोक्तृत्वं नाम ।

२ सतः शून्यनामकस्य अविशेषं यत् परममहत्स्वरूपं तदेव कालान्तर्यामी भुङ्क्ते इत्यविशेषभुक् । "तदेव ब्रह्म भुङ्क्ते" इति पाठान्तरम् । प्र. पाठोऽपि तथा । ३ "ब्रह्म परममहान्" इति प्र. पाठः ।

४ "त्रिविधाऽपि परि–" इत्यादि प्राचीनकोशेषु पठ्यते । अर्थस्तु न स्फुटः ।

५ "इति च ब्रह्मतर्के" इति क्वचित् ।

६ "द्वौ परमाणू मिलितौ अणुः द्व्यणुकः स्यात् । द्व्यणुकनामकास्ते त्रयो मिलिताः त्रसरेणुः त्र्यणुकः । परमाणुद्व्यणुकावयोगिनामगोचरौ । त्रसरेणुस्त्वयोगिनामपि गोचरः । कुत्रेति चेत्, जालार्करश्म्यवगतः । गृहभित्त्यादिषु निर्मितं गवाक्षं जालम् । तद्द्वाराऽन्तर्गतोऽर्करश्मिः जालार्करश्मिः । तेनावगतः प्रकाशितः । खमाकाशमेवानुपतन् आकाश एव वर्तमानः अगाद् दृष्टिपथं प्राप्तोऽभूदित्यर्थः" इत्यनन्ततीर्थाः । अत्र "जालार्करश्म्यवगतम्" इत्यपि क्वचित् प्राचीनकोशे पाठान्तरम् ।

७ नगात् इति च्छेदभ्रान्त्या नगात् पर्वतात् खमाकाशमुत्पतन्निति अर्थभ्रान्तिः सम्भाव्यते । तथा केषाञ्चन "खमेवानुपतन्न गाम्" इति पाठभ्रान्तिश्च दृश्यते । तदुभयव्युदासार्थं भाष्यकारः– अगादित्याह । अर्थस्तु स्फुट एवेति न कथितः । अत्र लकारार्थोऽविवक्षितः । अगाद् गच्छतीत्येकोऽर्थः । इतः परं "दृष्टिविषयं प्राप्य ज्ञात इत्यर्थः" इत्यधिकं मुद्रितपाठेषु पठ्यते स तु प्रक्षेप एव । कोशेषु क्वाप्यदर्शनात् । असङ्गतत्वाच्च । अगादित्यस्याप्यवगत्यर्थकत्वे जालार्करश्म्यवगत इति पुनरुक्तेः । अत एव विजयध्वजीये यादुपत्ये च अगाद् गत इत्येव व्याख्यातम् । अनन्ततीर्थीयं तु तात्पर्यकथनपरमित्यवगन्तव्यम् ।

८ "दश पञ्च पञ्चदश लघूनि मिलितानि नाडिका घटिका आम्नाता । ते घटिके द्वे संयुक्ते मुहूर्तः स्मृतः । षण्णाडिका यामः । सप्त, सार्धसप्तनाडिका वा याम इत्युच्यते । स यामः प्रहर इति नाम्ना चोच्यते । राशिभेदा-

न्यूनातिरेकसम्भवादयं विकल्पः। नृणां मनुष्याणां विवक्षयेयं यामादिकल्पना। न देवादिविवक्षया। तेषां यामादेरतिमहत्त्वात्" इत्यनन्ततीर्थाः। यादुपत्यरीत्या प्रहरयामयोर्भिन्नत्वमेव। तथाहि तद्व्याख्यानम्– "षण्णाडिकाः प्रहरः दिवसस्य पञ्चमो भागः। सप्त वा नाडिका यामः दिवसस्य चतुर्थो भागः" इति। विजयध्वजीयेऽप्येवमिति भाति– "षण्णाडिकाः प्रहरः। सप्तनाडिका यामः" इति तद्वचनात्। श्रीधरादयः सर्वे व्याख्यातारः यामप्रहरौ समानार्थावित्येव व्याचक्षते। कोशकाराश्च सर्वे यामप्रहरौ समावित्येवाऽमनन्ति। तत्पक्षे घटिकासङ्क्रमनं कथमिति तु विचारणीयम्। तथाहि तत्पक्षे क्वचित् दिवसह्रासे षड्घटिको यामः। वृद्धौ सप्तघटिकः। तथाच ह्रसीयसि दिने चतुर्विंशतिर्घटिका भवन्ति। परिवृद्धे त्वष्टाविंशतिः। इदं च वस्तुस्थितिविरुद्धम्। ऊने दिवसेऽष्टाविंशतिः, वृद्धौ द्वात्रिंशद् घटिका इति हि वक्तव्यम्। तथात्र यादुपत्यवचनम्—"कर्कसङ्क्रमणमारभ्य धनुःसङ्क्रमणपर्यन्तं नाडीनामूनात् क्रमेण न्यूनत्वात् धनुःसङ्क्रमणसमये यामस्य सप्तनाडीत्वम्। मकरसङ्क्रमणमारभ्य मिथुनसङ्क्रमणपर्यन्तं नाडीनां क्रमेणातिरेकादाधिक्यात् मिथुनेऽष्टनाडीत्वम्। मेषतुलयोः सार्धसप्तनाडीत्वमित्यादिविशेषसूचनाय वेति विकल्प इति भावः" इति। गणनादृष्ट्या इदमतीव सुसङ्गतमिति भाति। मूले च प्रहरः षट् यामः सप्तेति यामप्रहरयोः स्वरसतो भेद एव प्रतीयते। तर्हि अनन्ततीर्थीयं गणितरीत्या कथं सङ्गमनीयमिति महान्तः प्रमाणम्।

अत्र श्रीधरादयस्तु रीत्यन्तरमाश्रयन्ति—पूर्वोत्तरसन्ध्याकालं विहाय इयं परिगणना। तथाच षण्णाडिको याम इति पक्षे (६×४=२४) चतुर्विंशतिनाडिको दिवसः। नाडिकाद्वयं पूर्वा सन्ध्या, नाडिकाद्वयमुत्तरा सन्ध्या इत्याहृत्य (२४+४=२८) अष्टाविंशतिर्घटिकाः दिनह्रासे। एवं सप्तनाडिको याम इति पक्षे (७×४=२८) अष्टाविंशतिर्घटिका दिनमानम्। नाडिकाचतुष्टयं पूर्वोत्तरसन्ध्यांशं इत्याहृत्य (२८+४=३२) द्वात्रिंशद् घटिका दिनवृद्धाविति। अनेन विधानेन कथञ्चिद् गणितं सुसम्पन्नं भवेत्। अथापि कालपरिगणनसमये सन्ध्यांशत्यागस्य प्रयोजनाभावात्, कारणाभावात्, यामाश्चत्वारश्चत्वार इत्युक्तवचनविरोधाच्चेदं व्याख्यानं परेषामनुपादेयमेव। वल्लभाचार्यस्तु एतं दोषं परिजिहीर्षुः रीत्यन्तरेण व्याचख्यौ—"घटिकापेक्षया स्थूला नाडिका। वृद्धा रात्रिर्दिनं वा, तस्य चतुर्थो भागः सप्तनाड्यात्मकः। ह्रासे तु षण्णाड्यात्मकः। एवमहोरात्रं द्विपञ्चाशन्नाडिका भवन्ति षष्टिनाडिका वा" इति। इदमपि नाडिकाघटिकयोर्विभेदे मानाभावादुपेक्ष्यम्। "ते द्वे मुहूर्तः" इति मूल एव स्फुटं नाडिकाघटिकयोरेकत्वप्रतीतेश्च।

तथाचायं कालगणनाक्रमः—

—	१ परमाणुः	=	$\frac{16}{18225}$	seconds.
२ परमाणू	१ द्व्यणुकः	=	$\frac{32}{18225}$	,,
३ द्व्यणुकाः	१ त्र्यणुकः	=	$\frac{32}{6075}$	,,
३ त्र्यणुकाः	१ त्रुटिः	=	$\frac{32}{2025}$	,,
३ त्रुटयः	१ वेधः	=	$\frac{32}{675}$	,,
३ वेधाः	१ लवः	=	$\frac{32}{225}$	,,
३ लवाः	१ निमेषः	=	$\frac{32}{75}$	,,
३ निमेषाः	१ क्षणः	=	$1\frac{7}{25}$	,,
५ क्षणाः	१ काष्ठा	=	$6\frac{2}{5}$	,,

द्वादशार्द्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः ।
स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थं जलं पिबेत्[1] ॥ ९ ॥

"काकाणिका[2] चतुष्कं तु विंशांशेत्यमिधीयते । कृष्णलेत्यपि तं ब्रूयुस्तैश्चतुर्भिस्तु माषकम्[3] । चतुरङ्गुलदीर्घे तु कृते माषचतुष्टये । [4]यावत् स्यात् परिणाहेन तावद् द्वारं विधीयते । प्रस्थस्य नाडीपात्रस्य षट्पलस्य[5] शुभे जले । भाराधिक्ये-नोदकेन [6]क्षिप्रपूर्तिर्भविष्यति । अतिशैत्ये कळङ्के [7]च मान्द्ये[8] नैव तु पूरणम् । तस्माद् वसन्तकाले च[9] प्रयागस्थोदकेन[10] च । नाडीशुद्धिः परीक्ष्या[11] स्यादन्यथा

---

१५ काष्ठाः	१ लघुः	=	1 minute 36 seconds
१५ लघूनि	१ घटिका	=	24 minutes
२ घटिके	१ मुहूर्तः	=	48 ,,

अत्र श्रीधरादयस्तु त्रुटित्रयं वेध इति पक्षं विहाय शतं त्रुट्य एको वेधकाल इति वदन्ति । तत्पक्षे परमाणुकालो नाम आङ्गलमान रीत्या $\frac{4}{151875}$ seconds भवन्ति । सूर्यप्रकाशस्य परमाणुप्रदेशातिक्रमणकालः परमाणु-काल इति च परमाणुकाललक्षणं ते वर्णयन्ति । तदिदं सर्वं भ्रान्तिविलास इति सम्प्रति विज्ञानिभिर्निर्णीतम् । तथाच second परिमितकाले 1,86,000 क्रोश (miles) परिमितः प्रकाशवेग इति सम्प्रत्यवगतम् । श्रीध-रादिरीत्या second परिमितकाले $37{,}968\frac{3}{4}$ परमाणुपरिमितदैर्घ्यं प्रदेशमेव केवलं प्रकाशः प्रसरतीति । तस्मात् तत् तादृशं च सर्वमपव्याख्यानं तत्वबुभुत्सुभिरुपेक्षणीयम् ।

१ "प्रस्थजलं पिबेत्" इति पाठान्तरम् । "प्रस्थजलप्लुतम्" इति च प्र· पाठः । "द्वादशार्द्धपलैः कृतमुन्मान-मुत्तममान यस्य तत् तयोक्तम्, प्रस्थं तत् पात्रं प्रस्थप्रमाणं च भवेत् । चतुरङ्गुलैः चतुरङ्गुलदीर्घतया निर्मितैः, चतुर्भिः स्वर्णमाषैरेकत्वेन कृतैः कृतच्छिद्रं कृतैकसुषिरं यावता कालेन जलं पिबेत् जलपरिपूर्णं भूत्वा जले निम-ज्जति तावान् कालो नाडिका घटिकेति चोच्यते" इत्यनन्ततीर्थीयम् ।

२ "काकणिका–" इति इति प्र· पाठः । "काकाणीका–" इति क्वचित् । "काकणीका–" "काकिणिका–" इति च पठन्ति ।

३ "माषकः" इत्यपि पाठान्तरम् । अत्र कृष्णल इति गुञ्जोच्यते । गुञ्जामानमेव विंशांश इत्यपि कथ्यते । तथाच चतसृभिर्गुञ्जाभिरेको माषो भवति । एवंरीत्या चतुर्माषपरिमितेन सुवर्णेन चतुरङ्गुलदीर्घा सूची करणीया घटीपात्रवेधार्थमिति ।

४ "यावान् स्यात्" इति क्वचित् । "माषचतुष्टयं यावत् स्यात्" इत्यपि क्वचित् ।

५ अत्र "षट्दलस्य" इति मुद्रितः पाठः प्रमाद एव ।

६ "क्षिप्रं पूर्ति–" इति प्र. पाठः ।

७ "कलङ्के च" इति प्र. पाठः ।

८ "नाद्ये" इति, "माद्ये" इति, "मान्द्ये"(?) इति चात्र पाठान्तराणि ।

९ "–काले तु" इति प्र. पाठः ।

१० "–दकेन तु" इति प्र. पाठः ।

११ "नाडीशुद्धिपरीक्षा स्या–" इति प्र. पाठः ।

न समं भवेत्" इति पाद्मे[1]। "निर्मलेन समोष्णेन नित्यसूर्यांशुवारिणा । प्रवाह-णेन[2] कार्या स्यात् कालशुद्धिः सदैव तु" इति ब्रह्माण्डे ॥ * ॥

यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे ।
पक्षः पञ्चदशाहानि शुक्लः कृष्णश्च मानद ॥ १० ॥

"यत्रोभयोः स शब्दः स्यात् तत्र द्विवचनेऽप्युभे[3]" इत्यभिधानम् ॥ * ॥

तथाचैवं परिमाणकोष्ठकम्—

१ ४ काकाणिकाः	=	१ गुञ्जा	४ कर्षाः	=	१ पलम्
४ गुञ्जाः	=	१ माषः	४ पलानि	=	१ कुडवः
१६ माषाः	=	१ कर्षः	४ कुडवाः	=	१ प्रस्थः

सामान्यतः पलमिति तोलकत्रयमुच्यते । तथाच द्वादशार्धपलेन, षट्पलेन, अष्टादशतोलकपरिमितेन ताम्रेण कपालाकृति घटीपात्रं यावत् प्रस्थजलं पूर्येत तावद्पात्रं निर्मेयम् । चतुर्माषपरिमितस्वर्णरचितया चतुरङ्गुलदीर्घया सूच्या अधस्ताद् वेधः करणीयः । ततस्तज्जलकटाहे निक्षेप्यम् । यावता च पूर्यते निमज्जति च पात्रं सा घटिका नाडी वेति ।

विष्णुपुराणे पठ्यमाने एकस्मिन् श्लोके रीत्यन्तरेण परिमाणमुक्तम्—

"उन्मानेनाम्भसः सा तु पलान्यर्द्धत्रयोदश ।
हेममाषैः कृतच्छिद्रा चतुर्भिश्चतुरङ्गुलैः ।
मागधेन प्रमाणेन जलप्रस्थस्तु संस्मृतः" इति ।

"अर्द्धेन योगे त्रयोदश, सार्द्धद्वादशेत्यर्थः" इति व्याख्यानम् । तथाचैतत्पक्षे न षट्पलं ताम्रपात्रं किन्तु सार्द्धद्वादशपलपरिमितमिति भेदः । अन्यत् समानम् ।

दैवज्ञाः पुना रीत्यन्तरेण कथयन्ति । तद् यथा—

"शुल्बस्य दिग्भिर्विहितं पलैर्यत् षडङ्गुलोच्चं द्विगुणायतास्यम् ।
तदम्भसा षष्टिपलैः प्रपूर्यं पात्रं घटार्धप्रतिमं घटी स्यात् ।
सत्र्यंशमाषत्रयनिर्मिता या हेम्नः शलाका चतुरङ्गुला स्यात् ।
विद्धं तया प्राक्तनमत्र पात्रं प्रपूर्यते नाडिकयाऽम्बुभिस्तत्" इति ।

शुल्बं ताम्रम् । दिग्भिः पलैरिति दशभिः पलैः । षष्टिपलैरिति षष्टिभिर्घटिकाभिः । तथाचात्र पक्षे दशपलपरिमितं ताम्रपात्रमिति भेदः । हेमशलाका च न चतुर्माषपरिमिता, किन्तु सत्र्यंशमाषत्रयनिर्मिता । कथमत्र विरोधसङ्गमनमिति विचिकित्सकैर्विभावनीयम् । प्रदेशभेदेन माषपलादीनामन्यान्यपरिमाणेषु व्यवहारात् सर्वमपि कथञ्चित् सङ्गमनीयं स्यात् । यथा चतुर्गुञ्जाः पञ्चगुञ्जा वा माष इति । अत एव विष्णुपुराणेऽपि मागधेन प्रमाणेनेत्युक्तम् । अन्यत्र प्रस्थप्रमाणस्यान्याद्दशत्वादित्यलम् । २ "प्रवाहणेन" इति क्वचित् ।

३ "–प्युभ इत्यभिधानम्" इत्यप्रगृह्य प्र. पाठः । उभयार्थकः कश्चन शब्दः यत्रोभयोरर्थयोः प्रयुज्यते तत्र द्विवचने वा द्विवचनप्रतिनिधिभूते समुच्चये वा सत्यपि उभे इति प्रयोगः स्यात् । द्विवचने यथाऽत्रैव । समुच्चये

ग्रहर्क्षताराचक्रस्थः[1] परमाण्वादिना जगत् ।
संवत्सरावसानेन पर्येत्यनिमिषो विभुः ॥ १३ ॥

संवत्सरः परिवत्सर इडावत्सर एव च ।
अनुवत्सरो वत्सरश्च विदुरेवं प्रभाष्यते ॥ १४ ॥

"इडावत्सरनामाऽसौ नक्षत्रद्वादशास्थितः[2] । तिथीनां द्वादशावर्ते यो हरिः सोऽनुवत्सरः[3] । वत्सरो यः स्थितस्त्वह्नां षष्ठ्युत्तरशतत्रये[4] । गुर्वावर्तद्वादशांशे[5] यः स्थः स परिवत्सरः । सौरद्वादशके मासे यः स्थः संवत्सरो हरिः[6] । एवं स कालनामाऽपि कालस्थः परमेश्वरः" इति ब्रह्मतर्के ॥ * ॥

"सर्वदा दर्शनात् तस्यानिमिषत्वं विदुर्बुधाः । सततं गमनाद् वाऽपि [7]कालस्थस्य महात्मनः" इति च ॥ * ॥

यथा- "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि" इति गीतायाम् । तत्र प्रकृतिपदेन चिदचित्प्रकृती, पुरुषपदेन च जीवेश्वरावुभावपि गृह्येते इति ज्ञापयितुं किल "उभावपि" इत्युक्तम् । अथवा एवं व्याख्येयम्—अहरित्ययं दिवानक्तमित्युभयोरेकं वचनम् । स शब्दः उभयोः सहैव वाचक इति यावद् । तथाचाहनी इति द्विवचने प्रयुक्तेऽपि अहोरात्रद्वयमित्यर्थः स्यात् । न पुनरहश्च रात्रिश्चेति द्वयमिति । तथाच यत्र विशिष्टवाचकस्य पदस्य उभयोरपि दलयोः प्रत्येकं वाचकत्वेन स शब्दः विवक्षितः स्यात्, तत्र द्विवचनमात्रेण विवक्षितार्थालाभात्, तल्लाभाय द्विवचने प्रयुक्तेऽपि पुनरुभे इति वक्तव्यम् इति ।

१ ग्रहाश्चन्द्रसूर्यादयः । ऋक्षाण्यश्विन्यादीनि सप्तविंशतिः । अन्यानि सप्तर्षिमण्डलध्रुवादीनि नक्षत्राणि ताराः इति व्याख्यातारः । अश्विन्याद्यास्ताराः इतराणि नक्षत्राणीत्यपि सुवचम् । "ग्रहाणां नक्षत्राणां तारकाणाञ्च चक्रे मण्डले स्थितः अनिमिषः कालान्तर्यामी हरिः परमाण्वादिना संवत्सरान्तेन कालेन जगत् पर्येति परितो वर्तयते" इत्यनन्ततीर्थाः ।

२ "-द्वादशे स्थितः" इति पाठान्तरम् । "द्वादशस्थितः" इति "द्वादशस्थितिः" इति च । सप्तविंशतिनक्षत्राणां एकाऽऽवृत्तिरेको मासः । एवं द्वादशावृत्तयो यत्र स कालो नक्षत्रद्वादशः । तस्य चेडावत्सर इति नाम । तस्मिन्नास्थितः भगवानपि तन्नामा ।

३ शुक्लप्रतिपदाद्यमावास्यापर्यन्ततिथीनां द्वादशवारमावर्त आवर्तनानि यत्र स कालः तद्गश्च भगवान् अनुवत्सरः ।

४ षष्ट्युत्तरशतत्रयपरिमितानां दिनानामेकः समुदायो वत्सरः ।

५ "गुर्वावर्ते द्वादशांशे" इति प्र. पाठः प्रामादिकः । गुरोर्य आवर्तः राशेः राश्यन्तरसङ्क्रमणं तत्पर्यन्तः कालः द्वादशवत्सरात्मकः । तस्य द्वादशो भागः परिवत्सरः । अथवा गुरोः एकस्मिन् राशौ यावन्तं कालं आवर्तः वर्तनं, स्थितिरिति यावत्, तस्य कालसमुदायस्य द्वादशांशः परिवत्सरः ।

६ सङ्क्रमणात् सङ्क्रमणपर्यन्तः कालः सौरमासः तादृशे मासद्वादशके संवत्सरसञ्ज्ञा ।

७ कालवत्कालस्थस्य भगवतोऽपि सततगमनात् भगवाननिमिष उच्यते । निमिष इति चक्षुर्निमेषणं विश्रान्तिः । तदभावादनिमिषः सततव्यापृतः । एतदेवोक्तं "सततं गमनाद् वाऽपि" इति ।

यः सृज्यशक्तिमुरुधोच्छ्वसयन् स्वशक्त्या
पुंसोऽभ्रमाय दिवि धावति भूतभेदः ।
कालाख्यया गुणमयीं क्रतुभिर्वितन्वन्
तस्मै बलिं हरत वत्सरपञ्चकाय[1] ॥ १५ ॥

अभ्रमाय भूतभेदकः[2] । क्रतुभिः स्वप्रज्ञाभिः ।

"भूतानां ज्यैष्ठ्यकानिष्ठ्यज्ञप्त्यै यज्ञादिवृत्तये । बोधयन् सृज्यशक्तिं च कालस्थो वर्तते हरिः" इति तन्त्रप्रकाशिकायाम् ॥ * ॥

निशावसान आरब्धो लोककल्पोऽनुवर्तते ।
यावद् दिनं भगवतो मनून् भुञ्जंश्चतुर्दश[3] ॥ २३ ॥

दिनस्थो भगवान् भोक्ता ॥ * ॥

---

१ "यो हरिः कालाख्यया स्वशक्त्या स्वस्वरूपेण सृज्यशक्तिं उत्पाद्यानामोषधिवनस्पतिबीजादीनां सामर्थ्यं गुणमयीं सत्वादिगुणरूपां उरुधा नानाविधां क्रतुभिः स्वेच्छाभिः अस्येयं शक्तिरस्येयं शक्तिरिति ज्ञात्वा उच्छ्वसयन् विकासयन्, तानोषधिवनस्पत्यादीन् वितन्वन्नुत्पादयंश्च पुंसोऽभ्रमाय पुंसां ज्यैष्ठ्यकानिष्ठ्यादिज्ञप्त्यै भूतभेदः भूतानि विवेचयन् ग्रहर्क्षतारामण्डलस्थो भूत्वा दिवि धावति वेगेनाटति । वत्सरपञ्चके स्थित्वा तत्प्रेरणेन मुख्यतः तच्छब्दवाच्याय हरये बलिं पूजां हरत कुरुत हे जनाः" इत्यनन्ततीर्थीयम् । "भूतानां भेदो ज्यैष्ठ्यकानिष्ठ्यभेदज्ञप्तिर्यस्मात्" इति, "पुंसो विहितकर्मकर्तुरभ्रमाय यज्ञादिकर्माङ्गकालभ्रमाभावाय, यज्ञादिप्रवृत्तय इति यावत्" इति च यादुपत्यम् ।

२ अनेन भूतानि मिनत्तीति भेदयतीति वा विग्रह इति सूचितम् । यादुपत्ये तु भूतानां भेदो यस्मादिति व्यख्यातम् ।

३ "निशावसाने चतुर्युगसहस्ररूपब्रह्मरात्र्यवसाने पुनरुत्थाय विरिञ्चेनाऽरब्धो लोककल्पः भूरादिलोकानां तद्गतलोकानां च सृष्ट्यादिः तदनुवर्तते । भगवतो ब्रह्मणः चतुर्दशमनून् भुञ्जन् क्रमेण संहरत् दिनं अहः यावद् वर्तते तावत् सृष्ट्यादि प्रवर्तते। ब्रह्मणोऽह्नि चतुर्दशमनवो भवन्ति । दिनस्य भोक्तृत्व नामोपचारमात्रम् । तत्र यज्ञादिमूर्त्याऽवतीर्णस्य हरेः मुख्यभोक्तृत्वमवगन्तव्यम्" इत्यनन्ततीर्थाः । "हरेर्मुख्यभोक्तृत्वज्ञापनाय भुञ्जन्निति लिङ्गव्यत्ययः" इति विजयध्वजीयम् । अत्रेदमप्यन्यत् सम्भाव्यते । भुञ्जन्निति पदं स्वरसतः लोककल्प इत्यस्य विशेषणतया प्रतीयत इति तद्विहाय लिङ्गव्यत्ययेनापि दिनविशेषणमिति किमर्थं भगवत्पादो व्याचख्याविति न स्फुटम् । तथाचैवं पाठान्तरं सम्भाव्यते– "मनून् भुङ्क्ते चतुर्दश" इति । वल्लभाचार्यसम्मतश्चायं पाठः । यावद् भगवतो ब्रह्मणो दिनं चतुर्दश मनून् भुङ्क्ते तावत्सर्गोऽनुवर्तत इति स्वरसम् । तदेतद् भाष्ये विवृतम्– दिनस्थो भगवान् भोक्तेति ।

स्वंस्वं कालं मनुर्भुङ्क्ते साधिका ह्येकसप्ततिः[1] ।
मन्वन्तरेषु मनवस्तद्वंश्या ऋषयः सुराः ।
भवन्ति चैते युगपत् सुरेशाश्चानु ये च तान्[2] ॥ २४ ॥

"युगैकसप्ततेरूर्ध्वं सार्द्धाष्टादशलक्षकम्[3] । वत्सराणां मनोर्भुक्तिः [4]सहस्रं चतुरुत्तरम् ।

---

१ "साधिकां ह्येकसप्ततिम्" इति, "साधिकामेकसप्ततिम्" इति च केचित् पठन्ति ।

२ "मन्वन्तरधर्मं प्रवर्तयन् मनुः स्वंस्वं कालं भुङ्क्ते अनुभवति । स मन्वन्तरकालः कियानित्यत आह– साधिकेति । साधिका सार्धाष्टादशलक्षाधिका एकसप्ततिर्हि एकसप्ततिचतुर्युगात्मिका हि । एकैकमन्वन्तरेषु मनवः स्वायम्भुवाद्याः, तद्वंशभवा राजानः प्रियव्रतादयः, सप्तर्षयः, सुरा वसुरुद्रादयः, सुरेशा इन्द्राः, तेषामनुगाश्च ये गन्धर्वाद्याः, एवमाद्या एते युगपद् भवन्ति उत्पद्यन्ते विरिञ्चस्थितनारायणात्" इत्यनन्ततीर्थीयम् । "मनुवंश्याः पृथ्वीपालकाः क्रमेण भवन्ति । सप्तर्षिप्रभृतयस्तु युगपद् भवन्ति" इति श्रीधरः । "भूपानां तु स्वस्वसन्ततिद्वारा यौगपद्यम्" इति शुकदेवः ।

३ चतुर्युगसहस्रमितं हि ब्रह्मणो दिनम् । तत्र चतुर्दश मनव इति तत्कालविभागे एकैकस्य महायुगानामेकसप्ततिः भुक्तिकालो भवति— १४) १००० (७१ ततश्च षड्युगचतुष्टयमवशिष्यते । तदपि मन्वन्तरेषु

```
१४) १००० (७१
     ९८
    ----
     २०
     १४
    ----
      ६
```

विभज्य योजनीयमिति दर्शयितुं साधिकेत्युक्तम् । अधिकसंख्या तु भाष्ये स्फुटमुक्ता– सार्धाष्टादशलक्षकमिति । तथाच गणितक्रमः—चतुर्युगस्य १२,००० वर्षाणि देवमानेन भवन्ति । मानुषमानेन तु– १२,००० × ३६० = ४३,२०,००० वर्षाणि भवन्ति । तस्य चैकसप्तत्या गुणने– ४३,२०,००० × ७१ = ३०,६७,२०,००० वर्षाणि । अयमधिकांशं विना मन्वन्तरकालः । तदुक्तं विष्णुपुराणे– "त्रिंशत्कोट्यस्तु सम्पूर्णाः संख्याताः संख्यया द्विज । सप्तषष्टिस्तथाऽन्यानि नियुतानि महामुने । विंशतिश्च सहस्राणि कालोऽयमधिकं विना" इति ततश्चाधिकस्य पूरणे ३०,६७,२०,००० + १८,५०,००० = ३०,८५,७०,००० वर्षाणि आहत्य समग्रो मन्वन्तरकालः ।

४ तथाऽपि कालः कश्चनावशिष्यते । तथाहि षड्युगचतुष्टयकालः– १२,००० × ६ × ३६० = २,५९,२०,००० वर्षाणि । तानि मन्वन्तरेषु विभज्य हि योजनीयानि । तत्र प्रतिमन्वन्तरं १८,५०,००० वर्षाणि योजनीयानीत्युक्तम् । आहत्य च चतुर्दशसु मन्वन्तरेषु (१८,५०,००० × १४ =) २,५९,००,००० वर्षाणि भवन्ति । एवञ्च पुनरपि विंशतिः सहस्राणां कल्पकालेऽवशिष्यते । तथाहि—

षड्युगचतुष्टयस्य कालः	=	२,५९,२०,०००
तत्र मन्वन्तरेषु विभक्तः कालः	=	२,५९,००,०००
अवशिष्टः कल्पकालः	=	२०,०००

एतेषामवशिष्टानां कल्पवत्सराणां मन्वन्तरेष्वप्यनन्तर्भावे कुत्रान्तर्भाव इत्यत आह—सहस्रमित्यादि । शतानां चतुरुत्तरं सहस्रम्, चतुःशतोत्तरं सहस्र(१४००)मित्यर्थः । पञ्चोत्तरमथापिच । अथेति पक्षान्तरे । अथवा,

25

शतानां पञ्चोत्तरं सहस्र(१५००)मिति यावत् । अवशिष्टः विंशतिसहस्रात्मकः कालः मन्वन्तराणां प्रळयकाल इति समग्रसङ्ख्यापूरणं भवति । विंशतिसहस्रपरिमितानां वर्षाणां चतुर्दशसु मन्वन्तरेषु कथं पुनर्विभागः ? अत्र प्रायः सर्वेऽपि विभ्रान्ताः । तथाह्यत्र तात्पर्यदीपिका- "प्रथममनुप्रळयकालः द्विसहस्रम्, द्वयादिषट्पर्यन्तं पञ्चशतोत्तरं सहस्रम्, अवशिष्टाष्टमन्वन्तरप्रळयकालः शतानां चतुरुत्तरं सहस्रम्" इति । तदिदमसङ्गतं भाति । गणितविरोधात् । तथाहि तद्रीत्या गणने प्रथममनुप्रळयकालः २,००० वर्षाणि; तदनन्तराणां पञ्चानामाहत्य (१५००×५=) ७५०० वर्षाणि; अवशिष्टानामष्टानामाहत्य (१४००×८=) ११,२०० वर्षाणि । तथाच समग्रो मनुप्रळयकालः—(२०००+७५००+११,२००=) २०,७०० वर्षाणि भवन्ति । एतत्पक्षे अवशिष्टकल्पकालादप्युपरितानि वर्षाणि सप्तशतानि कुत आनेयानि ? चतुर्दशमन्वन्तरावसाने महाप्रळयस्यैव प्रारम्भात् पुनः मनुप्रळयकालत्वेन १४०० वर्षाणां परिगणनानौचित्याच्च । कथंचित् तत्त्यागे पुनः सप्तशतानि वर्षाणां न्यूनानि भवन्तीति दुरुपपादमेव गणितरीत्या तद्व्याख्यानम् । एवं यादुपत्यमपि । तद्रीत्या हि-आद्येषु षट्सु प्रथमे द्विसहस्रम्, द्वितीये पञ्चशतोत्तरं सहस्रम्, तृतीये चतुःशतोत्तरम्, शिष्टेषु त्रिषु त्रिशतोत्तरं सहस्रम्, अवशिष्टेष्वष्टसु पुनश्चतुःशतोत्तरं सहस्रमिति कालगणना । यद्यपि एतत्पक्षे आहत्य विंशतिसहस्राणि भवन्तीति गणितक्रमः संगच्छ । तथाहि—

आद्यमनुप्रळयकालः	–	२०००	
द्वितीय ,,	–	१५००	
तृतीय ,,	–	१४००	
चतुर्थादित्रिकस्य	–	३९००	(१३००×३)
अवशिष्टाष्टकस्य	–	११,२००	(१४००×८)
आहत्य प्रळयकालः	–	२०,०००	

अत्र त्रिशतोत्तरं शतं मूलानुक्तमधिकं निवेश्यत इत्यरुचिः । अयं गणितक्रमश्च मूलश्लोकान्न कथमपि प्रतीयते । यथाकथञ्चित् यत्किमपि गणितमाश्रित्य सङ्ख्यापूरणं तु न प्रीणयति चेतः । पूर्वव्याख्यानवदत्रापि चतुर्दशमन्वन्तरप्रळयकालपरिगणनमसङ्गतम् ।

अथतर्हि मूलश्लोकस्य कोऽर्थः ? एवं सम्भाव्यते —चतुःशतोत्तरं सहस्रं मनुप्रळयकाल इत्येकः पक्षः । पक्षान्तरमप्यस्तीत्याह—पञ्चोत्तरमथापि चेति । अथ, अथवा पञ्चशतोत्तरं सहस्रं प्रळयकाल इत्यपरः पक्षः । नचानयोः पक्षयोर्विरोधः । कल्पभेदेन व्यवस्थासम्भवात् । तथाच क्वचित्कल्पे १४०० वर्षाणि मनुप्रळयः, क्वचिच्च १५०० वर्षाणीति । कल्पमध्ये च त्रयोदशैवावान्तरप्रळयाः, न चतुर्दश । चतुर्दशस्य महाप्रळये गतत्वात् । नन्वेवमपि न सङ्ख्यापूर्तिः । प्रथमपक्षे (१४००×१३=) १८,२०० वर्षाण्येव सम्भूय भवन्ति । पक्षान्तरे च (१५००×१३=) १९,५०० वर्षाणि । तत्कथं विंशतिसहस्रपूरणम् ? आह—'आद्येषु षट्सु प्रथमे द्विसाहस्रं प्रकीर्तितम्' इति । १४०० वर्षाणीति प्रथममक्षे आद्येषु षट्सु द्विसाहस्रं प्रकीर्तितम् । १५०० वर्षाणीति द्वितीयपक्षे प्रथमे द्विसाहस्रं प्रकीर्तितम् । अयमर्थः । मन्वन्तराणां षट्सुषट्सु विभक्तेषु प्रथमषट्कं द्वितीयषट्कं अवशिष्टं द्वयमिति राशित्रयं भवति । एवं षट्कविभागेन सम्पन्नेषु त्रिषु राशिषु य आद्याः प्रथमसप्तमत्रयोदशाः तेषु द्विसाहस्रं प्रकीर्तितम् । द्वितीयाच्छष्ठपर्यन्तं अष्टमाद् द्वादशपर्यन्तं च चतुःशतोत्तरं सहस्रमेव । तृतीयराशाववशिष्टस्य चतुर्दशस्य महाप्रळय एवान्तर्भावान्न गणना । एवं संख्यापूर्तिर्भवतीति । तथाहि—

प्रथमसप्तमत्रयोदशानां प्रळयकालः	(२०००×३ =)	६०००
अवशिष्टानां दशानां प्रळयकालः	(१४००×१०=)	१४,०००
तथाच समग्रः प्रळयकालः	. . . .	२०,०००

शतानां प्रळयश्चैव पञ्चोत्तरमथापि च। आद्येषु षट्सु प्रथमे द्विसाहस्रं[1] प्रकीर्तितम्। वत्सराणां मनोरन्त[2] एवमिन्द्रादिनां भवेत्'' इति महावराहे[3] ॥ * ॥

तमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः ।
कालेनानुगतः शेष[4] आस्ते तूष्णीं दिनात्यये ॥ २७ ॥

''ब्रह्मणा कालनाम्ना तु सह शेते हरिर्निशि'' इति ब्राह्मे ॥ * ॥

एवंविधैरहोरात्रैः कालगत्युपलक्षितैः[5] ।
[6]अपेक्षितमिवास्यापि परमायुर्वयःशतम् ॥ ३२ ॥

अस्य ब्रह्मणः। ''ब्रह्मणो दिनम्'' (२२) इत्युक्तत्वान्।

''नाऽयुर्मानं भगवतः कस्मिन् रूपेऽपि विद्यते । अनादित्वादमध्यत्वादनन्तत्वाच्च सोऽव्ययः'' इति हरिवंशेषु ॥ * ॥

पञ्चशतोत्तरं सहस्रमिति द्वितीयपक्षे सङ्ख्यापूरणक्रममाह– 'प्रथमे द्विसाहस्रं प्रकीर्तितम्' इति। तथाच क्रमः—

प्रथमप्रळयकालः	. . . . =	२०००
अवशिष्टानां द्वादशानां प्रळयकालः	(१५००×१२=)	१८,०००
आहत्य समग्रः प्रळयकालः	. . . . .	२०,०००

एवं सर्वं सुसम्पन्नं भवति। इतश्च महान्तः प्रमाणम्।

१ ''द्विसहस्रम्'' इति प्र. पाठः।

२ ''मनोरन्तरेव–'' इति प्र. पाठः प्रामादिकः। अयं मनोरन्तः प्रळय इति पूर्वोक्तोपसंहारः। एवं मनुना सह युगपदुत्पन्नानां इन्द्रादीनां च प्रतिमन्वन्तरं भिद्यमानानामेवमेव अन्तः प्रळयक्रमो भवेदिति।

३ ''महावाराहे'' इति प्र· पाठः।

४ ''कालेनानुगताशेषः'' इत्यर्वाचीनः पाठः। ''स भगवान् ब्रह्मणो दिनात्यये तमोमात्रां तमोगुणप्रवर्तिकां निद्राभिमानिनीं दुर्गामुपादाय प्रवर्तयित्वा स्वनिद्रां भावयित्वा कालनाम्ना ब्रह्मणा सह शेषपर्यङ्के प्रतिसंरुद्धविक्रमः निवृत्तजगद्व्यापारस्तूष्णीमास्ते। ब्रह्माऽपि भगवता सह तूष्णीमास्त इति भावः'' इत्यनन्ततीर्थाः। ''तमोमात्रां स्वनियततमोगुणप्रवर्तककालसङ्कर्षणरुद्रादिरूपमुपादाय'' इति विजयध्वजीयम्। ''तमोमात्रां तमोगुणं उपादाय कार्योन्मुखीकृत्य'' इति यादुपत्यम्।

५ ''–गत्योपलक्षितैः'' इत्यर्वाचीनः पाठः।

६ ''अपक्षितमिवा–'' इत्यर्वाचीनः पाठः। ''एवंविधैश्चतुर्युगसहस्रात्मकैरहोरात्रैः कालगत्युपलक्षितैः, पक्षमाससंवत्सराः कालगतय इत्युच्यन्ते। तैरुपलक्षितास्तदात्मकाः, पक्षमाससंवत्सरात्मकैर्दिनैरिति यावत्। अस्य ब्रह्मणो वयःशतं संवत्सरशतं परमायुर्निरूपितम्। कीदृशम्? अस्य ब्रह्मणोऽपि अपेक्षितमिव स्थितम्। यथाऽस्माकमस्मदीयं वत्सरशतं परमायुरस्मिन् मया सर्वथा जीवनीयमित्यपेक्षितम्, तथा ब्रह्मणो विरक्तत्वेऽपि हर्षाज्ञा

कालोऽयं परमाण्वादि[1]द्विपरार्द्धान्त ईरितः[2] ।
नैवेष्टे यः[3] प्रभुर्भूम्न ईश्वरो धाममानिनाम् ॥ ३८ ॥

"यमः कालो मानुषाणां तस्य कालः सुदर्शनः[4] । तस्यापि रुद्रस्तत्कालो ब्रह्मा दुर्गाऽपि तस्य तु । सा ब्रह्मप्रळये देवी वर्तते चक्ररूपिणी । संहरन्ती सदा लोकान् सैव ब्रह्मादिषु स्थिता । तस्या नियामको विष्णुः परः कालः स उच्यते । कालाभिमानिनी[5] सैव प्रभुर्न जगदीशितुः । तस्याः प्रभुः स एवैको विष्णुः सर्वेश्वरेश्वरः" इति च ॥*॥

विकारैः षोडशैर्युक्तो[6] विशेषादिभिरावृतः ।
आण्डकोशो बहिरयं पञ्चाशत्कोटिविस्तृतः ॥ ३९ ॥

दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ।
लक्ष्यन्ते[7]ऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः ॥ ४० ॥

"दशेन्द्रियाणि तु मनो[8] भूतान्यण्डगतानि तु । विकारा इति विज्ञेया भूताहम्महतः परे" इति च । "पृथिवीं विशेष इत्याहुः शब्दादीनां बहुत्वतः । सा सूक्ष्मा त्वावृणो-

---

करणादपेक्षितमिवेतीवशब्दप्रयोगः" इत्यनन्ततीर्थाः । "तावद्भिरपि वर्षैः ब्रह्मण आयुरपेक्षितमिव भवति । तस्यापि ममाऽयुर्बहिति न बुद्धिः" इति वल्लभाचार्यः ।

१ "परमाण्वादिद्विपरा–" इत्यपि पाठान्तरम् । २ "ईश्वरः" इत्यर्वाचीनः पाठः ।

३ "नैवेशितुं प्रभु–" इत्यादि च श्रीधरादिसम्मतः पाठः । "नैवेष्टे स प्रभुः" इति च पाठान्तरम् । "योऽयं परमाण्वादिद्विपरार्द्धान्त ईरितः कालः स प्रभुरपि सामर्थ्ययुक्तोऽपि भूम्नो विष्णोर्नैवेष्टे । स्वकृतविकारं दर्शयितुं न समर्थः । धाममानिनां सत्यादिलोकानामधिपतयो वयमित्यभिमानवतामेवेश्वरः" इत्यनन्ततीर्थाः । "अत्र कालशब्देन सर्वसंहर्त्री श्रीदुर्गैवाभिधीयते" इति विजयध्वजीयम् ।

४ सुदर्शन इति तदभिमानी कामः । ५ एतेन कालः भूम्नः नैवेष्टे इत्येतद् व्याख्यातम् ।

६ "विकारैः सहितो युक्तैः" इति श्रीधराद्यभिमतः पाठः । "विकारैः षोडशभिर्युक्तः" इति च पाठान्तरम् ।

७ "लक्ष्यते" इति च पाठः । "दशेन्द्रियाणि च मनश्च पञ्च भूतानि च विकारा इत्युच्यन्ते । षोडशैरेतैर्विकारैरन्तर्युक्तः आण्डकोशो बहिर्दशोत्तराधिकैः क्रमाद् दशगुणमुत्तरोत्तराधिकैः विशेषादिभिः पृथिव्यादिभिः, पञ्च भूतान्यहंमहत्प्रकृतिरित्यष्टावरणैः आवृतः स्वयं पञ्चाशत्कोटिविस्तृतः । अष्टावरणानि पृथिवीं विना उत्तरोत्तरतो दशगुणाधिकानि । पृथिवी त्वण्डकोशाद् द्विगुणाधिका । एवंविध आण्डकोशो यत्र यस्मिन् देशकालगुणैरनवच्छिन्ने परममहद्रूपे भगवति प्रविष्टः परमाणुवल्लक्ष्यते । अन्ये कोटिशोऽण्डराशयो हरेरन्तर्गता ब्रह्मादियोगिभिर्दृश्यन्ते । एकमेवाण्डमतीताण्डैः सह भगवतोऽनन्तरूपेषु प्रत्येकं धृतत्वेन बहुरूपं प्रतीयते । तस्माद् भगवति कोटिशोऽण्डकोशा अन्तर्गता इति व्यपदेशमात्रम्" इत्यनन्ततीर्थाः ।

८ "–याणि च मनो–" इति च पाठः ।

त्यण्डं[1] द्विगुणा तु दशोत्तराः। अबादयः प्रकृत्यन्ता अष्ट प्रकृतयः स्मृताः" इति च।

"अन्तर्गताः शरीराणि[2]।

"शरीराणां बहुत्वेन अतीतानागतैस्तथा। अस्यैव देवकायेषु प्रतिप्रति च दर्शनात्[3]। विष्णुसामर्थ्यतोऽण्डानां बहुत्वं नान्यतो[4] भवेत्" इति ब्रह्मतर्के[5]। "एकमण्डं बहुत्वेन प्रत्येकं रोमकूपगम्। ब्रह्माऽपश्यत् तथाऽऽत्मानं हरेस्तेषु पृथक्पृथक्" इति ब्रह्माण्डे। "बृहदण्डमभूदेकम्" इति च भारते॥ *॥

[6]यमाहुरक्षरं ब्रह्म सर्वकारणकारणम्।
विष्णोर्धाम परं साक्षात् पुरुषस्य महात्मनः॥ ४१॥

धाम गृहमण्डराशयः[7]॥ *॥

इति तृतीयस्कन्धे द्वादशोऽध्यायः[8]

ससर्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत्।
महामोहं च मोहं च तमश्चाज्ञानवृत्तयः॥ २॥

---

१ "सूक्ष्मत्वाद् वृणोत्यण्डम्" इति प्र. पाठः। स्थूला पृथिवी अण्डान्तः पञ्चभूतेषु। सूक्ष्मा त्वण्डाद् बहिरावरणभूता। "सा सूक्ष्मार्था वृणोत्यण्डम्" इति क्वचित्।

२ शरीराणीति द्वितीया। शरीराणामन्तर्गता इति यावत्। अत एव "अन्तर्गताः शरीराणाम्" इत्यपि क्वचित् कोशेषु पठ्यते।

३ शरीराणां बहुत्वात्, प्रतिशरीरं चाण्डानां दर्शनात्, अतीतानागतैः सहाण्डानामपि बहुत्वात्, अस्यैकस्यैवाण्डस्य प्रतिदेवशरीरं दर्शननिमित्तेन च बहुत्वसम्भवात् कोटिशो ह्यण्डराशय इत्युच्यन्ते।

४ "बहुत्वान्नान्यथा" इति क्वचित्। "बहुत्वं नान्यथा" इति च।

५ "इति च ब्रह्मतर्के" इति क्वचित्।

६ "तदाहु–" इति श्रीधराद्यभिमतः पाठः। "यं विष्णुमक्षरं नाशरहितं जगत्कारणब्रह्मादिकारणमाहुः तस्यायमण्डकोशो गृहायितः" इत्यनन्ततीर्थाः। "धाम देहः" इति विश्वनाथादयः।

७ पूर्वश्लोके प्रस्तुता अण्डराशयः विष्णोर्धाम गृहस्थानीया इति।

८ अत्र श्रीधरीयादिरीत्या एकादशाध्यायसमाप्तिः।

"तमस्तु शार्वरं[1] प्रोक्तं मोहश्चैव विपर्ययः । तदाग्रहो महामोहस्तामिस्रः क्रोध उच्यते । मरणं त्वन्धतामिस्रमविद्या पाञ्चपर्विका[2]" इति भारते । "तमोऽज्ञता[3] विपर्यासो मोहोऽन्ये तु तदाग्रहाः[4]" इति हरिवंशेषु ॥ * ॥

दृष्ट्वा पापीयसीं सृष्टिं नाऽत्मानं बह्वमन्यत[5] ।
भगवद्ध्यानपूतेन मनसाऽन्यांस्ततोऽसृजत् ॥ ३ ॥

सनकं च सनन्दं च सनातनमथाऽत्मभूः ।
सनत्कुमारं च मुनीन् निष्क्रियानूर्ध्वरेतसः[6] ॥ ४ ॥

"कालतो बलतश्चैव ज्ञानानन्दादिकैरपि । सर्वैर्गुणैर्विष्णुरेव श्रेष्ठस्तदवमा[7] रमा । अनन्तांशेन कालात्तु समा तस्याश्चतुर्मुखः[8] । अवरो बहुलांशेन तत्समो वायुरुच्यते । नियमाद् वायुरेवैको ब्रह्मत्वं याति नापरः । तस्मात् समानता मुक्तौ वायुत्वे किञ्चिदूनता । दशवर्षं तु तत्पश्चाज्जननं तत्स्त्रियोरपि । आनन्दादिस्तद्दशांशः[9] कालः संवत्सरात् परः । यावत् पश्चाज्जनिस्तावत् पूर्वं देहक्षयो भवेत् । ब्रह्मवाय्वोस्तु ये देव्यौ तद्दशांशः सुखादिकः । शेषस्य गरुडस्यापि कालो दिव्यसहस्रकः । शेषरुद्रौ ब्रह्मवायू यथा तद्वत् परस्परम् । तद्देव्यस्तद्दशांशाः स्युस्ततस्त्विन्द्राद्यो मताः ।

---

१ "शर्वर्यां प्रतीयमानान्धकारवत् शब्दादिविषयाग्रहरूपाज्ञानं शार्वरम्" इत्यनन्ततीर्थाः ।

२ "पञ्चपर्विका" इति प्र॰ पाठः । "पञ्चपर्वका" इति क्वचित् । "तमो नाम स्वरूपाप्रकाशः । मोहो देहाद्यहम्बुद्धिः । महामोहो भोगेच्छा । तामिस्रं तत्प्रतिघाते क्रोधः । अन्धतामिस्रं तन्नाशेऽहमेव मृतोऽस्मीति बुद्धिः" इति श्रीधरादयः । "मरणं मरणकालीनक्लेशनिमित्ता मूर्च्छा" इति यादुपत्यम् ।

३ "तमोऽज्ञानम्" इति मुद्रितः पाठः ।

४ विपरीतज्ञानं मोहः । तत्र आग्रहो महामोहः । अतितरामाग्रहस्तामिस्रम् । अतितमामन्धतामिस्रम् ।

५ "सृष्टिमात्मानं बह्वमन्यत" इति नञ्विरहितः पाठोऽनन्ततीर्थसम्मतः । तथाहि तद्वचनम्—"विरिञ्चः पापीयसीमविद्यासृष्टिं दृष्ट्वा सृष्टावरुच्या तत्प्रायश्चित्तार्थं आत्मानं परमात्मानं प्रति बह्वमन्यत बहुमानमकरोत्, अपूजयदित्यर्थः । ततो भगवद्ध्यानशुद्धेन मनसाऽन्यानसृजत्" इति । 'आत्मानं न बह्वमन्यत नाभ्यनन्दत्' इति श्रीधरादयः । "मनसाऽन्यां ततोऽसृजत्" इत्यर्वाचीनाः पठन्ति ।

६ "निष्क्रियान् परमहंसान्, ऊर्ध्वरेतसः नैष्ठिकब्रह्मचर्यव्रतान्" इत्यनन्ततीर्थीयम् ।

७ "तदवरा" इति क्वचित् । सर्वैर्गुणैरनन्तांशेन तदवमा रमा । कालात्तु समा । तस्या रमायाः बहुलांशेन कोट्यंशेन अवरश्चतुर्मुखः ।

८ "अनन्तांशेन तस्यास्तु समा कालाच्चतुर्मुखः" इति क्वचित् कोशपाठः न स्फुटार्थः ।

९ "आनन्दादि दशांशांशाः" इति क्वचित् । ब्रह्मवाय्वपेक्षया तत्स्त्रियोः संवत्सरात्परं जननम् । तथा आनन्दादिः दशांशः, प्रमाणान्तरानुसारेण दशगुणितो दशांशः शतांश इति यावत् । एवमुत्तरत्रापि ।

एवं मुक्तौ च पूर्वं च नान्यथा क्वचिदिष्यते । अन्यथोक्तिर्यत्र च स्यात् तन्मोहार्थं भविष्यति । पूर्वापरविपर्यासो बहुरूपत्वहेतुतः" इति विष्णुकृते[१] तत्त्वविवेके । "अथात आनन्दस्य मीमांसा", "देवासुरेभ्यो मघवान् प्रधानः[२]" इत्यादि च । "इन्द्राद्याः सनकाद्याश्च दक्षाद्या[३] येऽपिचापरे । ऋषयो मनवो देवास्तद्वंश्या[४] ये च केचन । उमाया अवराः सर्वे गुणैः सर्वैर्न संशयः । तत्समो न भविष्यो वा न भूतोऽद्यतनोऽपि वा । ऋते हरिब्रह्मवायुशेषवीन्द्रान्[५] सभार्यकान् । शङ्करं चेति वेत्तव्य मन्यन्मोहार्थमिष्यते[६]" इति विष्णुकृते[७] तत्त्वनिर्णये ॥ * ॥

स इत्थं गृणतः पुत्रान् पुरो दृष्ट्वा प्रजापतीन् ।
प्रजापतिपतिस्तन्वीं[८] तत्याज व्रीळितस्तदा ।
तां दिशो जगृहुर्घोरां नीहारं यद् विदुस्तमः[९] ॥ ३३ ॥

"यां तत्याज विभुर्ब्रह्मा मानुषी वाक् तु[१०] सा स्मृता । सरस्वती निजा भार्या दैवीं [११]वाचं तु तां विदुः" इति च ॥ * ॥

ऋग्यजुःसामाथर्वाख्यान् वेदान् पूर्वादिभिर्मुखैः ।
शस्त्रमिज्या स्तुतिः स्तोमः प्रायश्चित्तं यथाक्रमात्[१२] ॥ ३७ ॥

---

१ "विष्णुकृततत्त्वविवेके" इति प्र. पाठः ।

२ "देवासुरेभ्यो मघवान् प्रधानो दक्षादयो ब्रह्मसुताश्च तेषाम् । भवः परः सोऽथ विरिञ्चवीर्यः स मत्परोऽहं द्विजदेवदेव." इति पञ्चमस्कन्धवचनम् ।

३ "दक्षाद्या अपिचापरे" इति क्वचित् ।

४ "देवस्तद्वशा ये च" इति प्र. पाठः ।

५ "ऋते हरिं ब्रह्मवायू शेषवीन्द्रान् (?) सभार्यकान्" इति मुद्रितः पाठः प्रमाद एव ।

६ "मोहार्थमुच्यते" इति पाठान्तरम् ।

७ "विष्णुकृततत्त्वनिर्णये" इति मुद्रितः पाठः ।

८ "तन्वं तत्याज व्रीडित–" इति प्र. पाठः ।

९ "घोरां क्रूरां तां तदा दिशो दिक्स्था जनाः (जगृहुः) नीहारं नीहाररूपं तमः अन्धकारं यद् ययाऽभिमानितं विदुः" इत्यनन्ततीर्थाः ।

१० "वाक् च सा" इति प्र. पाठः । मानुषी वाक् – तमःप्रचुरकुशास्त्राद्यभिमानिनी देवता ।

११ "देवीं वाचम्" इति मुद्रितः पाठः प्रामादिकः । दैवी वाक् – वेदाद्यभिमानिनी देवता ।

१२ "शस्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात् क्रमात्" इति श्रीधरादिसम्मतः पाठः । शस्त्रं ऋङ्मन्त्रशंसनम् । इदं हौत्रं कर्म । इज्या आध्वर्यवमध्वर्युकर्म । स्तुतिस्तोमौ सामवेदगौ मन्त्रौ । तच्छंसनमौद्गात्रं कर्म । प्रायश्चित्तमाथर्वणं ब्रह्मणः कर्म । "शस्त्रमप्रगीतमन्त्रस्तोत्रम्" इति श्रीधरादयोऽप्याहुः । "अप्रगीताः स्वरानुपूर्वीरहिताः" इति राधारमणगोस्वामी । "इज्या देवतोद्देशेन द्रव्यत्यागः" इति च । "सम्प्रगीतं स्वरानुपूर्वीसहितं स्तोत्रं स्तुतिः" इति च । "स्तुत्यर्थं प्रयोज्यः नवसंख्यायुक्तः स्तोमः ऋक्समुदायः" इति च । "कर्मपुरतः क्रिय-

इतिहासपुराणं च[1] पञ्चमं वेदमीश्वरः ।
सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः[2] ॥ ३९ ॥

"अभिमानिनः[3] शब्दतश्च ब्रह्मा वेदान् ससर्ज ह । यज्ञादींश्चक्लृपे वाचा तथा सर्वाभिमानिनः । इतिहासपुराणे तु श्रुत्वा हरिमुखात् स्वयम् । भारतादीन् विना[4] पश्चाद्धरिणाऽन्यैश्च निर्मितान्" इति च[5] ॥ * ॥

सावित्रं प्राजापत्यं[6] ब्राह्मं चाथ बृहत् तथा ।
वार्ताऽसञ्चयशालीनसिलोञ्छ[7] इति वै गृहे ॥ ४२ ॥

माणस्तुतिविशेषः स्तोमः । अन्यदा क्रियमाणा स्तुतिः" इति विजयध्वजतीर्थाः । अनन्ततीर्थास्तु—"शस्त्रमिज्येति हौत्रं कर्म एकस्मान्मुखतः" इति व्याचख्युः । एतत्पक्षे इज्या न याजुषं कर्म । किन्तु मन्त्रशंसनपूर्वकं द्रव्यत्यागः शस्त्रमिज्या च होतुः कर्म । स्तुतिः अध्वर्योः कर्म । स्तोम उद्गातुः कर्म । तथाह्युक्तं तैरेव पूर्वत्र—"शस्त्रमिज्या च हौत्रं कर्म । स्तुतिराध्वर्यवं कर्म । स्तोम औद्गात्रं कर्म । प्रायश्चित्तं ब्राह्मम्" इति ।

१ "इतिहासपुराणानि" इति प्रचलितः पाठः ।

२ "सर्वदर्शनः सर्वज्ञः" इत्यनन्ततीर्थाः । "सर्वाणि दर्शनानि यस्मादुत्पन्नानि सः" इत्यर्थान्तरं च विजयध्वजीये । "सर्वेषामेव वर्णानामवर्णानां स्त्रीशूद्रद्विजबन्धूनामुपयोगं पश्यन् पुराणं सृष्टवान्" इति वल्लभाचार्यः ।

३ "अभिमानितः" इति प्र· पाठः । वेदानां नित्यत्वाद् वेदान् ससर्जेति वेदाभिमानिनः ससर्जेत्यर्थः । अथवा शब्दतो वा ससर्ज । क्रमविशिष्टस्य वेदशब्दस्य सृष्टिकाले प्रथमं ब्रह्मणोच्चारितत्वात् । एवं यज्ञादीनामपि इदमित्थमिति शास्त्रवाचा क्लृप्तिरभिमानिसृष्टिर्वा सृष्टिरित्यर्थः ।

४ पश्चाद् व्यासरूपेण हरिणा कृतान् भारतभागवतादीन् विना अन्यैश्च ऋषिभिः कृतान्युपपुराणादीनि च विना ये इतिहासपुराणे पञ्चरात्रमूलपुराणादिरूपे ते ब्रह्मा ससर्ज । यत्तु अनन्ततीर्थीये "इतिहासपुराणं पञ्चमं वेदं सर्ववेदार्थरूपत्वात् पञ्चमवेदाख्यं भारतम्" इति व्याख्यानं तत्र भारतमिति लिपिकृत्प्रमादपतितमिति सम्भाव्येत । स्फुटं तात्पर्यवचनविरोधात् । भारतस्येतिहासत्वेऽपि पुराणत्वाभावेन इतिहासपुराणं भारतमिति व्याख्यानविरोधाच्च ।

५ प्र. पाठेऽत्र चकारो न पठ्यते ।

६ "प्राजापत्यं च ब्राह्मम्" इति प्र. पाठः । सावित्रं ब्रह्मचर्यमुपनयनादारभ्य गायत्रीमधीयानस्य त्रिरात्रम् । ब्राह्मं वेदग्रहणान्तम् । बृहन्नैष्ठिकम्" इति श्रीधरादयः । "सावित्रमुपनीतस्य गायत्रीशिक्षाकालः मौनादिसहितः त्रिरात्मकः" इति वल्लभाचार्योऽप्याह । विश्वनाथोऽपि—"वेदग्रहणपर्यन्तं ब्राह्मम् । मरणपर्यन्तं बृहत्" इति । यादुपत्येऽप्येवम्—"अत्र सावित्रं ब्रह्मचर्यमुपनयनादारभ्य वेदग्रहणपर्यन्तं गायत्रीमधीयानस्य व्रतम् । ब्राह्मं द्वादशवर्षपर्यन्तं गुरुकुले वेदमधीयानस्य व्रतम् । बृहत्तु यावज्जीवं ब्रह्मचर्यं नैष्ठिकापरनामकम्" इति । अनन्ततीर्थीये तु रीत्यन्तरं श्रूयते—"द्वादशवर्षपर्यन्तमध्ययनं कुर्वन् सावित्रब्रह्मचारीत्युच्यते । एकभार्यत्वेन ऋतुगामित्वं प्राजापत्यब्रह्मचर्यम् । यावद्विवाहमध्ययनं ब्राह्मब्रह्मचर्यम् । यावज्जीवं नैष्ठिकं बृहद्ब्रह्मचर्यम्" इति । विजयध्वजीयेऽपि तथा । अत्र मूलं मृग्यम् ।

७ "-शिलोञ्छ-" इति प्र. पाठः । "वार्ता यायावरवृत्तिः, धान्यादिभिक्षा । असञ्चयः एकाहित्वम्, तत्त-

"प्राजापत्य[1]ब्रह्मचर्यमेकभार्यर्तुगामिता" इति व्यासस्मृतौ। "वार्ता यायावरं ज्ञेयमेकाहित्वमसञ्चयः" इति च[2] ॥ * ॥

वैखानसा वालखिल्योदुम्बराः[3] फेनपा वने ।
न्यासे कुटीचकः पूर्वं बहूदो[4] हंसनिष्क्रियौ ॥ ४३ ॥

"वैखानसा मूलभक्षाः फलभक्षा उदुम्बराः। वालखिल्याः सर्वभक्षाः फेनपा वत्सफेनपाः" इति च ॥ * ॥

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथैव च[5] ।
एवं व्याहृतयश्चाऽसन् प्रणवेनाऽस्पदं गताः[6] ॥ ४४ ॥

द्दिवसार्जितव्रीह्यादेस्तत्तद्दिवस एव व्ययः। शालीनं तु संवत्सरपर्यन्तं स्ववृत्तिहेतोः व्रीह्यादेः कुसूलकुम्भादिषु ग्रहणम्। सिलोच्छवृत्तिस्तु क्षेत्रादिषु व्रीह्यादिना देहयात्रावर्तनम्" इत्यनन्ततीर्थाः। श्रीधरादयस्त्वन्यथा व्याचक्षते– "वार्ता अनिषिद्धकृष्यादिवृत्तिः, सञ्चयो याजनादिवृत्तिः, शालीनमयाचितवृत्तिः, शिलोञ्छः पतितकणिशकणवृत्तिः" इति। "उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्" इति यादवः। सिलं शिलमिति चैकार्थम्। स्यालः श्याल इतिवत्। दन्त्यादित्वं तु प्राचीनम्।

१ "प्राजापत्यं ब्रह्मचर्यम्" इति प्र॰ पाठः। २ प्र. पाठेऽत्र चकारो न पठ्यते।

३ "वालखिल्यौदुम्बराः" इति प्र. पाठः। अत्रानन्ततीर्थीयेऽर्थान्तरम्— "मूलफलभक्षा वैखानसाः। सर्वभक्षा उदुम्बराः वालखिल्याश्च। वत्समुखगळितफेनपानेन वर्तमानाः फेनपाः" इति। अस्मिन् पक्षे तात्पर्यवचनस्याप्यर्थान्तरं वक्तव्यम्—"मूलभक्षाः फलभक्षाश्च वैखानसाः। उदुम्बरा वालखिल्याश्च सर्वभक्षाः। वत्सफेनपाः फेनपाः" इति। अत्रार्थे मूलं मृग्यम्।

४ "बह्वोदो–" इति प्र. पाठः। "सन्यस्यान्यत्र गन्तुं दौर्बल्यात् स्वगृहपरिसर एव वसन् पुत्रादिभिः शुश्रूषितः कुटीचकः। बहूदकः यज्ञोपवीतात्यागेन त्रिदण्डी। हंस एकदण्डी यज्ञोपवीती। चतुर्थः परमहंसो निष्क्रियः हिंसादिक्रियारहितः, एकदण्डी च" इत्यनन्ततीर्थाः। "सवनत्रयस्नानं विना, अकाले तीर्थजलदर्शने तत्र स्नानं कुर्वन् त्रिदण्डी बहूदकः" इति विजयध्वजीयम्।

५ "आन्वीक्षिकी वेदानुसारिणी तन्त्रविद्या। त्रयो वेदास्त्रयी। एतद्द्वयं ब्राह्मणजीवनम्। वार्ता वाणिज्यादिः वैश्यशूद्रयोर्जीविका। दण्डनीतिः राजधर्मः राजजीवनम्। एताः ब्रह्मणः पूर्वादिवक्त्रेभ्यः क्रमेणोत्पन्नाः" इत्यनन्ततीर्थाः।

६ "प्रणवो ह्यस्य दहतः" इति श्रीधरराधारमणयोरभिमतः पाठः। "–ह्यस्य हृद्गतः" इति वीरराघववल्लभाचार्ययोः। "–हृत्खतः" इति विश्वनाथशुकदेवयोः। अत्र चार्थान्तरमनन्ततीर्थीये– "भूः, भुवः, स्वः भूर्भुवःस्वः इति चतस्रो व्याहृतयः वक्त्रचतुष्टयात् क्रमेणाऽसन्। प्रणवेनाऽस्पदं गताः प्रणवाख्याधारं प्राप्ताः, प्रणवपूर्वका इति यावत्" इति। अत्र तात्पर्यवचनविरोधः कथं परिहरणीय इति चिन्त्यम्।

26

"आन्वीक्षिकी तन्त्रविद्या[१] सा च वेदानुसारिणी । विष्णुप्रोक्ता शिवाद्युक्ता ज्ञेया वेद-बहिष्कृता[२] । दण्डनीती राजधर्मस्त्रयी वेदाः प्रकीर्तिताः । वार्ता वाणिज्यकादिः स्यादेताभिर्यत्तु जीवनम् । तदान्वीक्षिक्यादिनाम ब्रह्मणा निर्मितं पुरा" इति च ।

प्रणवः पूर्ववक्त्रात्—

"प्रणवः पूर्ववक्त्रेण भूराद्याश्च मुखत्रयात् । प्रदक्षिणमवर्तन्त वेदाश्चैवाऽऽश्रमास्तथा" इति ब्राह्मे ॥ * ॥

स्पर्शास्तस्याभवन् जीवात्[३] स्वरो देह उदाहृतः ।
ऊष्माण[४] इन्द्रियाण्याहुरन्तस्था बलमात्मनः ॥ ४६ ॥

"स्पर्शास्तस्याभवन् जीवात्[५] स्वरा देहात् प्रजज्ञिरे । ऊष्माण इन्द्रियेभ्यश्च अन्तस्था बलतो विभोः" इति च । "यस्माद् यज्जायते चाङ्गात् तत् तदङ्गाभिधं भवेत्" इति च ॥ * ॥

स्वराः सप्त विहारेण भवन्ति स्म प्रजापतेः ।
शब्दब्रह्मात्मनस्तात[६] व्यक्ताव्यक्तात्मनः प्रभोः[७] ॥ ४७ ॥

---

१ "तर्कविद्या" इति क्वचित् पाठः । वेदार्थान्वीक्षार्थं निर्मितमितिहासपुराणादिकं ब्रह्मतर्कादिकं ब्रह्ममीमांसादिकं चाऽन्वीक्षिकीत्युच्यते ।

२ "बहिष्कृताः" इति क्वचित् ।

३ "स्पर्शस्तस्याभवज्जीवः" इत्यर्वाचीनः पाठः ।

४ "ऊष्माणमिन्द्रिया–" इति च । "ककारादयो मकारान्ता वर्णाः स्पर्शाः । ते विरिञ्चस्य जीवात् चैतन्यात् । व्यक्ता आसन् । स्वरः अकारादिवर्णसमुदायः देहः देहादभिव्यक्तः उदाहृतः । अचः स्वराः । ऊष्माणः शषसहाः इन्द्रियाणि इन्द्रियेभ्यो जाता इत्याहुः । अन्तस्थाः यरलवाः आत्मनो ब्रह्मणो बलं बलतो व्यक्ता इत्यर्थः" इत्यनन्ततीर्थाः । वीरराघवोऽप्याह —"ब्रह्मणो जीवः स्पर्शः कारणे कार्योपचारः । एवमग्रेऽपि । देहः स्वरः देहात् स्वर उत्पन्नः । इन्द्रियाणीन्द्रियेभ्यः ऊष्माणः । बलमन्तस्थाः, तस्मात् ते उत्पन्ना इत्यर्थः" इति । शुकदेवोऽपि– "तस्य ब्रह्मणः स्पर्शः कादिमावसानः वर्णसमूहः जीवः, ततः कादयो वर्णा जाता इति भावः, एवमग्रेऽपि" इति सिद्धान्तप्रदीपे ।

५ "जीवाः" इति क्वचित् पठ्यते।

६ "–त्मनस्तस्य" इत्यर्वाचीनः पाठः ।

७ "–त्मनः परः" इति च । "निषादऋषभगान्धारषट्जमध्यमधैवताः पञ्चमश्चेति सप्तस्वराः विरिञ्चस्य विहारेण शारीरसञ्चरणविशेषेणाभवन् । कीदृशस्य ? शब्दब्रह्मात्मनः । नारायणादिशब्दव्यतिरेकेण सर्ववेदादिशब्दराशेर्विषयस्य । पुनरपि कीदृशस्य? व्यक्ताव्यक्तात्मनः । व्यक्तं ब्रह्माण्डमुद्दिष्टमव्यक्तं महदादि च । तयोर्व्याप्तत्वाद् व्यक्ताव्यक्तात्मा" इत्यनन्ततीर्थाः ।

"शब्दब्रह्मात्मको[1] ब्रह्मा सर्वशब्दाभिधेयतः[2] । ऋते नारायणादीनि नाम्नां स विषयो यतः । व्यक्तं ब्रह्माण्डमुद्दिष्टमव्यक्तं महदादि च । तद्व्यापकत्वाद् ब्रह्मा तु व्यक्ताव्यक्तात्मकः स्मृतः" इति च ॥ * ॥

ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतम् ।
ज्ञात्वा तद्धृदये[3] भूयश्चिन्तयामास कौरव ॥ ४८ ॥

"ऋषीणां भूरिवीर्याणाम्" इति सिंहावलोकना[4] ।

"यत्र पश्चात्तनः श्रेष्ठस्तत्र सिंहावलोकनम्[5]" इति ब्रह्मतर्के ॥ * ॥

एवं युक्तिमतस्तस्य दैवं चापेक्षतस्तदा[6] ।
कस्य रूपमभूद् द्वेधा यत् कायमभिचक्षते ॥ ५१ ॥

केन प्राप्तत्वात्[7] कायः ॥ * ॥

इति तृतीयस्कन्धे त्रयोदशोऽध्याय.[8]

---

१ "शब्दब्रह्माभिधो–" इति क्वचित् पाठान्तरम् ।

२ सर्वशब्दाभिधेयत्वात् । "सर्वशब्दाभिधो यतः" इति पाठान्तरम् ।

३ "तद्धृद्ये" इति पाठान्तरम् । "मरीच्यादीनामृषीणां सकाशादपि सर्गमविस्तृतमसम्पूर्णं ज्ञात्वा तस्मादसम्पूर्णत्वादेव सृष्टिविस्तृत्यर्थं पुनश्चिन्तयामास" इत्यनन्ततीर्थाः ।

४ "-लोकनम्" इति पाठान्तरम् ।

५ आदावुपस्थितस्यापि मुख्यस्य त्यागेन यत्किञ्चिद् वक्तव्यममुख्यं पूरयित्वाऽन्ते विस्तरेण मुख्यस्योपक्रमः सिंहावलोकितन्यायेन भवतीत्यर्थः ।

६ "युक्तकृतस्तस्य दैवं चावेक्षतस्तदा" इति श्रीधराद्यभिमतः पाठः । "एवं युक्तिमतश्चिन्तयतः, दैवं चापेक्षतो ध्यायतः, कस्य ब्रह्मणो रूपं द्वेधाऽभूत् । यद् द्विधाभूतं रूपं कायं केन ब्रह्मणा तथा द्वैविध्येन प्राप्तत्वात् कायाख्यमभिचक्षते" इत्यनन्ततीर्थाः ।

७ "व्याप्तत्वात्" इति मुद्रितः पाठः ।

८ श्रीधरीयादिरीत्याऽत्र द्वादशाध्यायसमाप्तिः ।

तद् विधेहि नमस्तुभ्यं कर्मस्विज्याऽत्मशक्तिषु[१] ।
यत् कृत्वेह यशो विष्वगमुत्र च भवेद् गतिः ॥ ८ ॥

इज्य[२] ॥ * ॥

स्वदंष्ट्रयोद्धृत्य महीं विलग्नां[३] स उत्थितः संरुरुहे[४] रसायाः ।
तत्रापि दैत्यं[५] गदयाऽऽपतन्तं सुनाभसन्दीपिततीव्रमन्युः ॥ ३३ ॥

जघान रुन्धानमसँह्यविक्रमः[६] स लीलयेभं मृगराडिवाम्भसि ।
तद्रक्तपङ्काङ्कितुण्डगण्डो[७] यथा गजेन्द्रो जगतीं विभिन्दन् ॥ ३४ ॥

"ब्रह्मजस्तु हिरण्याख्यः प्रथमं दंष्ट्रया हतः । स एव पार्षदाविष्टो द्वितीयः[८] कर्णताडनात् । पूर्वं लयोदके मग्नां द्वितीयं तेन मज्जिताम् । भुवमुद्धरतैवासौ हरिणा क्रोड-

---

१ "–स्वीड्यात्मशक्तिषु" इति प्र. पाठः ।

२ इदमक्षरद्वयं न क्वापि मुद्रिततात्पर्ये दृश्यते । न कैरपि व्याख्यातं च । प्रमादाद्गलितमेव । परन्तु कोशेषु बहुशः पठ्यत इति निर्विवादमिदं तात्पर्यवचनम् । अनन्वितमिति भ्रान्त्या पश्चात्तैः परित्यक्तम् । तथाहि कर्मस्विज्यात्मशक्तिष्वित्यत्र सन्देहः – किं कर्मसु इज्यात्मशक्तिषु इति पदद्वयमथवा त्रीणि पदानीति । पदत्रित्वेऽपि किमिज्या आत्मशक्तिषु इति च्छेदः उत इज्य आत्मशक्तिष्विति ? एवं प्राप्त आह भगवत्पादः—इज्य । एतेनाक्षरद्वयेनैव सर्वसंशयनिरासो हि भवति । अर्थस्तु फुट एव । तथाह्यनन्ततीर्थीयम्— "आत्मशक्तिषु आत्माधीनेषु कर्मसु नित्यनैमित्तिकेषु इज्य यजनीय इति सम्बोधनम्" इति । तथाच इज्या इति प्रथमान्ततया विजयध्वजीयव्याख्यानं प्रक्षिप्तमिति स्फुटम् ।

३ "निमग्नाम्" इति श्रीधराद्यभिमतः पाठः ।

४ "संरुरुचे" इति च ।

५ "तत्राऽदिदैत्यम्" इत्यपि केचित् पठन्ति ।

६ "–मसह्यविक्रमम्" इति च ।

७ "–पङ्काङ्कितगण्डतुण्डो–" इति पाठान्तरम् । अत्रानन्ततीर्थीयम्—"स भगवान् विलग्नां प्रळयार्णये मग्नां महीं स्वदंष्ट्रयोद्धृत्य रसायाः समुत्थितः संरुरुहे उपर्यारुरोह । तत्र उपर्यारोहसमये गदयाऽपतन्तं भूम्याहरणं रुन्धानं दैत्यमादिहिरण्याक्षं, सुनाभश्चक्रधरः, सुनाभश्चासौ सन्दीपिततीव्रमन्युश्चेति विग्रहः । मृगराडिभमिव तं दंष्ट्रया जघानेत्यन्वयः । कीदृशः ? तस्य दैत्यस्य रक्तपङ्केनाङ्कितौ तुण्डगण्डौ, तुण्डं मुखं, गण्डः कपोलः, तौ यस्य स तथा । जगतीं भूमिं विभिन्दन् दन्तप्रहारेण विदारयन् गजेन्द्र इव शुशुभ इति शेषः" इति । "सुनाभवत् चक्रवत् सन्दीपिततीव्रमन्युः" इति विजयध्वजीयम् । "सुनाभेन सुदर्शनेन सन्दीपितस्तीव्रमन्युश्च" इत्यपि श्रीधरादयः । "सुनाभस्य सुदर्शनस्य सन्दीपितः प्रज्वलितः तीव्रो मन्युर्येन" इति यादुपत्यम् ।

८ "द्वितीयम्" इति क्वचित् ।

मूर्तिना" इति ब्रह्माण्डे । "व्यत्यासेनापि चोच्यन्त[1] अविवेकेन कुत्रचित् । दुष्टानां मोहनार्थाय तत्रतत्र कथाः क्वचित्" इति च स्कान्दे[2] ।

अविवेकेनेत्यस्य विविच्य नोच्यन्त[3] इत्यर्थः । न कर्तुरविवेकः ।

"सर्वज्ञस्य कुतोऽज्ञानं व्यासस्योदारकर्मण.[4]" इत्युक्तत्वात् । "दुष्टानां मोहनार्थाय" इति च ॥ * ॥

इति तृतीयस्कन्धे चतुर्दशोऽध्याय.[5]

ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं हि मायया[6] ।
आज्ञाकरी तस्य पिशाचचर्या अहो विभूम्नश्चरितं विडम्बनम् ॥ २८ ॥

"पिशाचचर्यामचरद् रुद्रो विष्णवाज्ञयैव तु । गर्भिणीवधनोदार्थमहो विष्णुर्विडम्बकृत्" इति वाराहे ॥ * ॥

---

१ "चोच्यन्ते अविवेकेन" इति प्र. पाठे प्रगृह्य पठ्यते । "अनन्यया शक्य अहमेवंविध" इत्यादिवत् "उच्यन्त अविवेकेन" इत्यपि सन्धिः साधुः ।

२ "इति स्कान्दे" इति पाठान्तरम् । ३ "नोच्यत–" इति प्र. पाठः ।

४ इतः परं "इत्युक्तत्वात्" इत्ययं भागः मुद्रितपाठे न पठ्यते । एतत्स्थाने क्वचित् कोशे "इत्युत्तरात्" इति पठ्यते । इत्युत्तरवचनात् स्कान्दे इति तदर्थः ।

५ श्रीधरादिरीत्याऽत्र त्रयोदशाध्यायसमाप्तिः ।

६ "विश्वमिदं च माया" इति श्रीधराद्यभिमतः पाठः । "–मिदं च मायया" इति पाठान्तरम् । ब्रह्मादयो येन हरिणा कृतं धर्मसेतुं तदाज्ञया पालयन्ति; इदं विश्वं च मायया यत्कारणकं विदुः । रुद्रस्य पिशाचचर्या तादृशस्य तस्य विष्णोराज्ञाकरी । आज्ञया क्रियमाणा हि । प्रायश्चित्तमन्तरेण स्वाज्ञामात्रेण दुष्कृतक्षपणं शक्यं हि । तस्मात् किमर्थं रुद्रदुष्कृतपरिहारार्थं पिशाचचर्याख्यं प्रायश्चित्तं विष्णुराज्ञापयामासेत्यत आह— अहो इति । विभूम्नो विष्णोर्विडम्बनं लोकविडम्बनात्मकं चरितमहो अत्यद्भुतम् । विष्णुर्लोकविडम्बनार्थमेव रुद्रं प्रति प्रायश्चित्तमाज्ञापयत् । लोके भृत्ये कृतागसि तत्स्वामी प्रायश्चित्तं विधत्ते हि । अन्यथा विषमत्वापातात्" इत्यनन्ततीर्थाः । "इदं विश्वं यो हरिः कारण निमित्तं यस्य तद् यत्कारणम् । तत्कारणत्वं च मायया स्वेच्छया । न पराधीनतया । हिशब्देन "स हि कर्मफलोज्झितः" इति मानं सूचयति" इति विजयध्वजीयम् ।

श्रुत्वा भागवत्तं पौत्रममोदत दितिर्भृशम् ।
पुत्रयोश्च वधं कृष्णाद् विदित्वाऽऽसीन्महामनाः[१] ॥ ५० ॥

"विष्णुहस्तवधाल्लोको[२] भक्तस्यान्यस्य न क्वचित् । तथाऽप्यसुरमोहाय न विविक्तं क्वचित्क्वचित्" इति च स्कान्दे[३] । "हिरण्यकशिपुश्चापि भगवन्निन्दया तमः" इति च । "स्वतः सद्गतियोग्यस्य पुत्रादेर्हेतुता भवेत् । योग्यताऽनादिभक्तिः स्याद-भक्तस्य[४] कुतो गतिः" इति ब्रह्मतर्के ॥ * ॥

इति तृतीयस्कन्धे पञ्चदशोऽध्यायः[५]

वसन्ति यत्र पुरुषाः सर्वे वैकुण्ठमूर्तयः ।
ये नित्यमनिमित्तेन[६] धर्मेणाऽराधयन् हरिम्[७] ॥ १४ ॥

अनिमित्तेन विष्णवर्पणेन ॥ १४ ॥

वैमानिकाः सललनाश्चरितानि यत्र
गायन्ति लोकशमलक्षपणानि भर्तुः ।
अन्तर्जले तु[८] विलसन्मधुमाधवीनां
गन्धेन खण्डितधियोऽप्यनिलं क्षिपन्तः ॥ १७ ॥

---

१ "महामनाः सन्तुष्टमनाः" इत्यनन्ततीर्थाः । "महामनाः सोत्साहचित्ता, हरिणा सह युद्धेन मरणे पुत्रयोः कीर्तिः सद्गतिश्च भवेदिति" इति श्रीधरीयम् ।

२ "–वधाल्लोकाः" इत्यपि पाठान्तरम् । लोकः पुण्यलोकः ।

३ "इति स्कान्दे" इति च पाठान्तरम् ।

४ "स्यादयोग्यस्य" इति पाठान्तरम् ।

५ श्रीधरीयादिरीत्याऽत्र चतुर्दशाध्यायसमाप्तिः ।

६ "येऽनिमित्तनिमित्तेन" इति श्रीधरीयादिपाठः ।

७ "वैकुण्ठस्य विष्णोः सदृशमूर्तयः, ये वैकुण्ठवासिनः पूर्वं संसारावस्थायां अनिमित्तेन निष्कामेन विष्णवर्पण-रूपेण च धर्मेण हरिमपूजयन्, ते यत्र तिष्ठन्ति" इत्यनन्ततीर्थाः । "वैकुण्ठस्य हरेरिव मूर्तिर्येषाम्" इति श्रीधरः । "वैकुण्ठस्येव नित्यानन्दरूपा मूर्तिः" इति जीवगोस्वामी । "वैकुण्ठमूर्तयः भगवत्सारूप्यवन्तः" इति विश्वनाथः ।

८ "अन्तर्जलेऽनुविकस–" इत्यर्वाचीनः पाठः । अन्तर्जले तु विकस-" इत्यपि पाठान्तरम् । "वैमानिका विमानारूढाः स्वभर्तुर्भगवतः जनानां शमलक्षपणानि पापहराणि चरितानि जगत्सृष्ट्यादिकर्माणि भक्त्या गायन्ति ।

"मुक्ताश्चैवाधिकारस्था द्वेधा वैकुण्ठलोकगाः । अमुक्तानां भ्रमः क्वापि न मुक्तानां क्वचिद् भवेत्" इति भविष्यत्पुराणे । [१]"न रज आदधुः"(२०) इति च ॥ * ॥

पारावतान्यभृतसारसचक्रवाक-
[२]नत्यूहहंसशुकतित्तिरिबर्हिणाद्यैः[३] ।
कोलाहले विरचिते चिरमात्रयोच्चै-[४]
र्भृङ्गाधिपे हरिकथामनु[५] गायमाने ॥ १८ ॥

"तिरश्चीनाः स्थावराश्च सर्वे ज्ञानाद् विकुण्ठगाः । अमुक्ता मुक्तिमायान्ति नियमात् कर्मणः क्षये[६]" इति च ॥ * ॥

मन्दारकुन्दकुरवोत्पलचम्पकोर्ण-[७]
पुन्नागनागबकुळाम्बुज[८]पारिजाताः ।
गन्धेऽर्चिते तुळसिका[९]भरणेन तस्या
यस्मिंस्तपः सुमनसो बहु मानयन्ति[१०] ॥ १९ ॥

कीदृशाः ? अन्तर्जले सरोजलनिकटतटे विलसन्तीनां मधुमासोत्पन्नमाधवीनां पुष्पगन्धेन मदजनकेन खण्डितधियोऽपि, बतायमनिलोऽस्माकं भगवच्चरितगानध्यानविघ्नं करोतीति तमनिलं क्षिपन्तो निरसन्तः" इत्यनन्ततीर्थाः ।

१ प्र. पाठे—"कृष्णात्मनां न रज आदधुः" इतीयत् पठ्यते । तथाह्यस्मिन्नेवाध्याये विंशं पद्यम्—"येषां बृहत्कटितटाः स्मितशोभिमुख्यः कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः" इति ।

२ "–दात्यूह–" इति प्र. पाठः । दात्यूहो नत्यूह इत्येकोऽर्थः । चातक इति श्रीधरादयः । "जलच्चरो वर्षासु क्वक्वेतिप्रायभाषी" इति जीवगोस्वामी ।

३ "–बर्हिणां यः" इति च ।

४ "कोलाहलो विरमतेऽचिरमात्रमुच्चै–" इति च ।

५ "हरिकथामिव गायमाने" इति च । "पारावतः कपोतः । अन्यभृतः कोकिलः । पारावतादिभिर्मोक्षगतैः पक्षिभिः कोलाहले सङ्कुलशब्दे विरचिते सति, भृङ्गाधपे भृङ्गश्रेष्ठे हरिकथामनुगायमा वैमानिका गायन्ति" इत्यनन्ततीर्थाः । "चिरमात्रया त्रिमात्रादिस्वरूपेण कोलाहले कलकललक्षणे कूजने विरचिते सति" इति विजयध्वजीयम् ।

६ "कर्मणो लये" इति क्वचित् ।

७ "चम्पकार्ण–" इति प्र. पाठः । ऊर्णं नाम करवीरपुष्पमिति वदन्ति ।

८ "–बकुलाम्बुज–" इति प्र. पाठः ।

९ "तुलसिका–" इति च ।

१० "यस्मिन् वैकुण्ठलोके मन्दारादिपुष्पजातयः, स्वपुष्पैर्भगवत्यर्चिते सति, तुळसिकाभरणेन अन्यपुष्पमपहाय तुळसीपुष्पस्य भरणेन उद्धरणेन तद्गन्धे घ्राणेनार्चिते सम्भाविते सति, मन्दारादिपुष्पदेवताः तस्यास्तुळस्यास्तपो हरिप्रियगन्धवती भूयासमिति निरूप्य कृतं तपो बहुमानयन्ति । अहो तुळस्या भाग्यमिति सम्भावयन्ति" इत्यनन्त-

[1]भक्तैरर्चिते सति भगवता तुळसिकाभरणे कृते तस्या गन्धार्थं तपो बहु मानयन्ति ॥ * ॥

यन्न व्रजन्त्यघभिदोऽरचनानुवादाः[2]
शृण्वन्ति येऽन्यविषयाः कुकथा मतिघ्नीः ।
यास्तु श्रुता हतभगैर्नृभिरात्तवीर्या-[3]
स्तांस्तान् क्षिपन्त्यशरणेषु तमस्सु हन्त[4] ॥ २३ ॥

अरचनानुवादाः ॥ * ॥

येऽभ्यर्थितामपि च नो नृगतिं प्रपन्ना
ज्ञानं च तत्त्वविषयं सहधर्म यत्र ।
नाऽराधनं भगवतो वितरन्त्यमुष्य
संमोहिता विततया ननु[5] मायया ते ॥ २४ ॥

ये नृगतिं ज्ञानादियोग्यतां[6] न प्रपन्नाः ते मोहाद् भगवदाराधनं न कुर्वन्ति । धर्मज्ञानवर्जिता[7] मानुषा एव न भवन्तीत्यर्थः ॥ * ॥

तीर्थाः । एतेन सुमनस इत्यस्य पुष्पाणि देवता चेत्यर्थद्वयं च विवक्षितमित्युक्तं भवति । नच तदपि कोशानुशासनमात्रेण । बहुमानयन्तीति सौमनस्यं हि स्फुटमुदितम् । "मन्दारपारिजातौ सुरतरुविशेषौ । कुरवस्तिलकवृक्षः । उत्पलं रात्रिविकासि । अम्बुजं दिनविकासि । नागो नागकेसरः" इति श्रीधरः । "कुन्दोऽतिमुक्तलताः" इति वीरराघवः । "पुन्नागः सुरकर्णिकारः" इति विजयध्वजीयम् ।

१ अत्र गन्धे अर्चिते तुळसिकाभरणेन इति त्रीणि पदानि आवृत्त्या व्याख्यातानि । तथाहि—भक्तैः भगवति अर्चिते, तुळसिकाभरणेन च भगवता अर्चनावसरेऽर्पितानि अन्यानि कुसुमानि विहाय तुळसिकाया एव भरणेन स्वीकरणेन निमित्तेन तस्या एव गन्धे अर्चिते सम्भाविते, मन्दाराद्याः सुमनसः, गन्धे एतादृशहरिप्रियगन्धलाभार्थं तस्या यत्तपः पुरा चीर्णं तद् बहु मानयन्तीति ।

२ "-वादाच्छृण्वन्ति" इति श्रीधरादिपाठः । ३ "-रात्तसारा-" इति च ।

४ "अघभिदः भजतां पापभञ्जनस्य हरेः अरचनानुवादाः पराक्रमकीर्तनरहिताः पुरुषाः यं लोकं न व्रजन्ति । ये दुष्टजना अन्यविषयाः स्त्रीवर्णनादिविषयाः कुकथाः शृण्वन्ति ते च तं लोकं न व्रजन्ति । तं लोकं सनकाद्या आपुरिति सम्बन्धः । तर्हि कुकथाश्रोतारः कुत्र गच्छन्ति? आत्तवीर्याः तमःपातने सामर्थ्ययुक्ताः याः कुकथाः हतभगैर्निर्भाग्यैर्यैर्नृभिः श्रुताः तांस्तान् स्वश्रोतॄन् अशरणेषु वृक्षच्छायाद्याश्रयरहितेषु तमस्सु क्षिपन्ति हन्त कष्टम्" इत्यनन्ततीर्थाः ।

५ "विततया बत मायया ते" इति प्रचलितपाठः । ६ "ज्ञानादियोग्याम्" इति प्र॰ पाठः ।

७ "धर्मज्ञानविवर्जिताः" इति क्वचित् । "धर्मज्ञानवर्जिता मानुषा मानुषा एव न भवन्तीत्यर्थः" इति मुद्रितः पाठः । एतेनायं मूलार्थः सूचितः – नोऽस्माकं देवादीनामप्यभ्यर्थितां नृगतिं प्रपन्ना अपि ये नाऽराधनं भगवतो

मत्तद्विरेफवनमालिकया निवीतौ
विन्यस्तयाऽसितचतुष्टयबाहुमध्ये ।
वक्त्रे भ्रुवा कुटिलया स्फुटनिर्गतेन[1]
रक्तेक्षणेन च मनागुत[2] सन्दधानौ ॥ २८ ॥

वक्त्रस्थया भ्रुवा सह निर्गतेन ॥ * ॥

तान् वीक्ष्य वातरशनांश्चतुरः कुमारान्
वृद्धान् दशार्द्धवयसो विदितात्मतत्त्वान् ।
वेत्रेण चास्खलयतामतदर्हणांस्तौ
तेजो विहस्य भगवत्प्रतिकूलशीलौ[3] ॥ ३० ॥

"जयस्य विजयस्यापि कदाचिद् ब्रह्मशापतः । कृष्णावतारपर्यन्तं प्रातिकूल्यं च जायते" इति नारदीये ॥ * ॥

वितरन्ति ते नूनं मूढाः । उक्तं हि ब्रह्मवैवर्त्ते–"प्राप्यापि दुर्लभतरं मानुष्यं विबुधेप्सितम् । यैराश्रितो न गोविन्दस्तैरात्मा वञ्चितश्चिरम्" इत्यादि । ननु कथं विबुधेप्सितमिति? उपरिगतानां देवानां किमवरोहणाकाङ्क्षा? नहि प्राप्तोत्तमपदस्ततोऽवरं पदं लिप्सति प्रज्ञावान् । सत्यम् । प्रौढिवादोऽयम् । यदिदं मानुष्यं दुर्लभमित्येतावन्तमेवार्थं वदति । यद्यर्थवादोऽयमित्यरुचिः तर्हि मुख्य एवार्थः स्वीक्रियताम् । तथाहि– यत्र नृजन्मनि धर्मसहितं तत्त्वज्ञानं सम्भावितं तादृशीं नृगतिं ज्ञानादियोग्यतां पुनरभ्यर्थितामपि ये नो प्रपन्नाः, न प्राप्ताः, ते केवलं द्वाभ्यां पद्भ्यां नरत्वव्यपदेशभाजः । अपरथा पशव एव । ज्ञानादियोग्यतैव हि नरत्वं नाम । भक्तिज्ञानहीना भगवदाराधनविधुरा नरा अपि पशुभ्योऽप्यवरा इति यावत् । "यत्र यस्यां नृगतौ सहधर्मं धर्मसहितं तत्त्वविषयं परमात्मस्वरूपविषयं ज्ञानमापादयितुं शक्यं, तादृशीं नोऽस्माकमपि चाभ्यर्थितां प्रार्थनीयाम्, नृगतिं मनुष्यजन्म प्राप्ता अपि ये पुरुषाः धर्मज्ञानादियुक्ता भगवत आराधनं न कुर्वन्ति ते हरेर्विस्तृतया मायया बन्धकशक्त्या सम्मोहिता ननु । अत एव मनुष्यपशव इत्यर्थः" इत्यनन्ततीर्थाः । एतेनेदमप्यर्थान्तरं विवक्षितमिति ज्ञायते ।

१ "वक्त्रभ्रुवा" इत्यपि पठन्ति । "वक्त्रे भ्रुवा कुटिलया स्फुटनिर्गमाभ्याम्" इत्यर्वाचीनः पाठः ।

२ "मनाग् रभसं दधानौ" इति च । "श्यामळबाहुचतुष्टयमध्ये वक्षसि विन्यस्तया पुष्पमधुपानमत्तभृङ्गवत्या वनमालिकया निवीतौ परीतौ । वक्त्रे स्थितया वक्रया भ्रुवा सह स्फुटनिर्गतेन स्पष्टं विवृतेन रक्तेक्षणेन रक्तकटाक्षेण प्रविशतो निर्गच्छतश्च पुरुषान् मनागीषत् सन्दधानौ अवधार्य पश्यन्तौ" इत्यनन्ततीर्थाः ।

३ " वातो रशना वस्त्रं येषां ते तथा तान् । न केवलं वयसा वृद्धान् किन्तु विदितात्मस्वरूपान् अत एव ज्ञानवृद्धान् । तथाऽपि लोकदृष्ट्या दशार्द्धवयसः पञ्चवर्षान् । चतुरः कुमारान् सनकादीन् वीक्ष्य भगवद्विपरीतकर्माणौ जयविजयौ तेषां तेजो दिगम्बरत्वादिकं वीक्ष्य परिहस्य अतदर्हणान् वारयितुमयोग्यान् वेत्रयष्ट्याऽस्खलयतां प्रवेशविघ्नमकुर्वताम्" इत्यनन्ततीर्थाः । "तेषां या दशा परार्द्धद्वयपरिच्छिन्ना, तदर्धवयसः । एवमस्य परार्द्धस्यातिक्रान्तत्वात्" इति वल्लभाचार्यः ।

27

को वा इहेत्य[1] भगवत्परिचर्ययोच्चै-
स्तद्धर्मिणामपि सतां[2] विषमस्वभावः ।
तस्मिन् प्रशान्तपुरुषे गतविग्रहे वा[3]
को वाऽऽत्मवत् कुहकयोः परिशङ्कनीयः[4] ॥ ३२ ॥

युवयोर्यथा विरुद्धस्वभावत्वं तद्वत् भगवद्विषय इह शङ्कनीयः कः? तस्मान्निषेधो व्यर्थ इत्यर्थः ॥ * ॥

नह्यन्तरं भगवतीह समस्तकुक्षा-
वात्मानमात्मनि नभो नभसीव धीराः ।
पश्यन्ति यत्र युवयोः सुरलिङ्गिनोः किं
व्युत्पादितं ह्युदरभेदि भयं यतोऽस्य[5] ॥ ३३ ॥

समस्तकुक्षौ स्थिते भगवति नहि भेदः । '[6]यस्मिन् लोकेऽन्तस्थं भगवद्रूपं बहिस्थैक्येन[7] पश्यन्ति । नभो नभसीव[8] । तत्र प्रत्युदरभेदनिमित्तं भयं युवाभ्यां व्युत्पादितं किम्? सर्वान्तर्यामित्वेनाभयस्य भयमस्तीति भावः[9] कुतः? अन्यथा किमिति निवारणम्—

---

१ "को वामिहैत्य" इति श्रीधराद्यभिमतः पाठः । २ "-र्मिणां निवसताम्" इति च ।
३ "वाम्" इति च ।
४ "उच्चैः भगवत्परिचर्यया च, तद्धर्मिणां भगवद्विषयधर्मवर्तिनां ब्रह्मादीनां सतां परिचर्यया च इह इमं वैकुण्ठलोकमेत्य को वा पुरुषः विषमस्वभावो निषिद्धकारी भवति । न कोऽपि । तादृशस्यात्राऽऽगमनस्यैवाभावात् । गतविग्रहे विगतकलहे प्रशान्तपुरुषे, प्रशान्ते सुखपूर्णे सर्वपुरेषु शरीरेषु शेत इति पुरुषशब्दवाच्ये तस्मिन् भगवति विषये कुहकयोः कुहकाभ्यां युवाभ्याम्, आत्मवत् युष्मद्वत् को वा परिशङ्कनीयोऽस्ति ? न कोऽपि" इत्यनन्ततीर्थीयम् ।
५ "धीराः इह वैकुण्ठे स्थिता ज्ञानिनः समस्तकुक्षौ सर्वेषां कुक्षिगते सर्वान्तर्यामिणि हरौ, इह वैकुण्ठे स्थिते भगवति च अन्तरं भेदं न पश्यन्ति । आत्मानं स्वकुक्षिस्थितमीश्वररूपं आत्मनि बहिर्व्याप्तेश्वररूपे एकीभूतं पश्यन्ति । नभो घटाकाशं नभसि व्याप्ताकाशे यथा तद्वत् । यत्र यस्मिन् वैकुण्ठलोके स्थितयोः स्थिताभ्यां, अत्र षष्ठी तृतीयार्थे, सुरलिङ्गिनोः देवलक्षणधराभ्यां युवाभ्याम्, उदरभेदि, प्रति प्रत्युदरे स्थितत्वादुदरं परं ब्रह्म तद्गतभेदनिमित्तं भयं भगवतोऽस्मत्सकाशाद् व्युत्पादितं किम्? भयमस्तीति बुद्धिः कृतैव । अस्य परब्रह्मणि भेदद्रष्टुः पुरुषस्य सर्वत्र भयं भवतीति यतः । कुक्षिस्थभगवतो वैकुण्ठस्थे भगवति प्रतिकूलचेष्टाया असम्भवात्, अस्माकं तु तत्प्रेरणां विना वैकुण्ठस्थभगवत्प्रतिकूलचेष्टां कर्तुमशक्यत्वाचास्मन्निषेधो व्यर्थः । प्रत्युतानर्थहेतुश्चेति भावः" इत्यनन्ततीर्थाः । "समस्तं विश्वं कुक्षौ यस्य स समस्तकुक्षिः" इति श्रीधरादयः ।
६ "अस्मिन् लोकेऽन्तस्थभगवद्रूपम्" इति प्र. पाठः । ७ "बहिष्ठैक्येन" इति क्वचिन्मुद्रितः पाठः ।
८ "नभसि च" इति क्वचित् । ९ "भावः कृतः" इत्यपि पाठान्तरम् ।

"सर्वोदरगतं ब्रह्म ये भेदेन विचक्षते । सर्वत्रापि भयं तेषां मृतानां तम एव च" इति तत्त्वविवेके ॥ * ॥

तद् वा अमुष्य[1] परमस्य विकुण्ठभर्तुः
कर्तुं न युक्तमिति[2] धीमहि मन्दधीभ्याम् ।
लोकानितो व्रजतमन्तरभावदृष्ट्या
पापीयसस्त्रय इमे रिपवोऽस्य यत्र[3] ॥ ३४ ॥

त्रयो रिपवः देहत्रये[4] ॥ * ॥

भूयानघाद्धि[5] भगवद्भिरकारि दण्डो
यो नौ हरेत सुरहेळनमप्यशेषम् ।
मा वोऽनुतापकलया भगवत्स्मृतिघ्नो
मोहो भवेदिह तु नौ व्रजतोरधोऽधः ॥ ३६ ॥

सुरहेळनस्यापि[6] दण्डो भवति । अत्र स्थितयोः पुनः पूर्ववन्मोहो न स्यादंशांशिनोः[7] ॥ * ॥

---

१ "तद्वाममुष्य" इति श्रीधराद्यभिमतपाठः । २ "कर्तुं प्रकृष्टमिह धीमहि" इति च ।

३ "तद्वै तस्मात् विकुण्ठलोके स्थितत्वात्, सुरलिङ्गित्वाच्च युवाभ्यां मन्दधीभ्यां परमस्यास्य विकुण्ठनाथस्य तद् भयभावनं कर्तुं न युक्तमिति वयं धीमहि निरूपयामः । तस्मादयुक्तस्यापि भगवद्भयभावनस्य युवाभ्यामिदानीं कृतत्वात्, अन्तरभावदृष्ट्या, अन्तरं भयम्, तस्य भावदृष्टिः सद्भावज्ञानम्, तया युवाम् इतो वैकुण्ठादर्वाग् पतित्वा पापीयसः अतिपापिष्ठान् त्रीन् लोकान् देहान् व्रजतम् । भगवतो भेदसद्भावज्ञानाख्यापराधेन यत्र यादृशापापिष्ठदेहत्रयसम्बन्धे इमे त्रयोऽपि युवयोर्देहाः अस्य हरेः रिपवो भवन्ति, तादृशापापिष्ठदेहान् व्रजतमिति सम्बन्धः" इत्यनन्ततीर्थाः । "अन्तरभावदृष्ट्या भेददर्शनेन" इति विजयध्वजीयम् ।

४ देहत्रयेऽपि शापप्राप्ते इमे त्रयोऽपि देहाः रिपुस्थानीया एव भवन्ति; भगवद्द्वेषसाधनत्वादिति । जयविजयदेहप्रविष्टौ द्वावसुरौ एकत्वेन परिगणितौ जयविजयौ चेति त्रयो रिपव इति यादुपत्यं तु न हृदयङ्गमम् । "यत्र कामः क्रोधस्तथा लोभ इति गीतोक्तास्त्रयो रिपवो भवन्ति" इति श्रीधरादयः ।

५ "भूयादघोनि" इति श्रीधराद्यभिमतः पाठः ।

६ "-हेलनस्यापि" इति प्र. पाठः । 'देहत्रये' इति पूर्ववाक्यं देहलीदीपन्यायेनात्राप्यन्वेति । प्रकृतापराधपरिमार्जनायैकेनापि देहेनालम् । देहत्रयेऽप्यासुरभावरूपशापेन च समस्तस्य सुरहेळनस्यापि दण्डो भवतीति ।

७ अत्र वैकुण्ठे स्थितयोरंशिनोः । अधोऽधो व्रजतोरंशयोरित्यर्थः । तथाचानन्ततीर्थीयम्— "भगवद्भिर्भवद्भिः अस्मत्कृतादघात् अपराधात् भूयानधिकः दण्डः शिक्षाऽकारि । अपराधानुसारी दण्डः लोके दृष्टः । अयमपराधादप्यधिकः कृतः । तेनास्माकं प्रयोजनान्तरं सिद्धमिति ब्रूतः – य इति । यः नौ आवयोः अशेषं बहुकालादारभ्य कृतं देवानामवज्ञापराधं च हरेत । इह वैकुण्टस्थितयोः मूलरूपिणोः नौ, वः अनुतापकलया युष्मद्विषय-

तं त्वागतं प्रतिहृतौपयिकं स्वपुम्भि-
स्तेऽचक्षताक्षविषयं स्वसमाधिगम्यम्[1] ।
हंसश्रियोर्व्यजनयोः शिववायुलोल-[2]
शुभ्रातपत्रशशिकेसरशीकराम्बुम्[3] ॥ ३८ ॥

केसरा रश्मयः[4] ॥ * ॥

[5]कृत्स्नप्रसादसुमुखं स्पृहणीयधाम
स्नेहावलोककलया हृदि संस्पृशन्तम् ।
श्यामे पृथावुरसि शोभितया श्रिया स्व-
ग्रीवामणिं सुभगयन्तमिवाऽऽत्मधिष्ण्यम् ॥ ३९ ॥

पश्चात्तापलेशेन, व्रतास्माभिस्तेषां ब्राह्मणानामपराधः कृत इति, भगवत्स्मृतिघ्नः हरिस्मरणनाशनः मोहः भ्रमः मा भवेत् । कीदृशयोः? अधोऽधः भवच्छापेनाधोलोकादप्यधोलोकं अंशेन व्रजतोः, देवादयः शापेन भूमौ जायमाना मूलरूपेण स्वस्वलोके तिष्ठन्ति, अंशेनावतरन्तीति ज्ञातव्यम्" इति ।

१ "–समाधिभाग्यम्" इति श्रीधराद्यभिमतः पाठः । २ "–लोलच्छुभ्रातपत्र–" इति च ।

३ "सनकादयः स्वपुम्भिः स्वभृत्यैः प्रतिहृतौपयिकं अव्याहृतपूजासाधनं स्वसमाधिगम्यं पूर्वं स्वसमाधिनाऽन्तः प्रत्यक्षभूतं तदानीमक्षविषयं बहिः प्रत्यक्षभूतं अचक्षतापश्यन् । कीदृशम्? हंसवत् धवळयोः व्यजनयोर्निर्गतेन शोभनवायुना चलद्धवळातपत्राख्यशशिमण्डलकेसरेभ्यः रश्मिभ्यः निस्सृतैः शीकारात्मकैः बिन्दुरूपैरम्बुभिः निर्वृताङ्गम्" इत्यनन्ततीर्थाः । "प्रतिहृतमानीतं औपयिकं गमनोपयुक्तं छत्रचामरपादुकादि यस्येति वा" इति यादुपत्यम् । श्रीधरादयोऽपि तथा । "सहसोत्थायाऽऽगमनात् संक्षिप्तवाहनादिगमनयोग्यसाधनं वा" इति विजयध्वजीयम् ।

४ "यथा कौस्तुभादिकं ब्रह्मादिरूपं तथा छत्रमपि चन्द्रमसो रूपम् । तथाच तस्य रश्मिभ्यो गलन्ति शीकराम्बूनीति युक्तम् " इति यादुपत्यम् । "लोलं शुभ्रं च यदातपत्रं स एव शशी अमृतस्रावी चन्द्रः तस्य केसराः अमृतबिन्दुयुक्तकिरणा इव परितो बद्धाः तद्गता मुक्ता एव वायुना लोला शीकराम्बुप्राया भवन्ति" इति वल्लभाचार्यः ।

५ "नित्यप्रसाद–" इत्यनन्ततीर्थाभिमतः पाठ इति भाति । तथाहि तद्व्याख्यानम्–"भक्तजनेषु नित्यप्रसादेन सुस्मितवदनम् । मनोहारिधामवन्तम्, भक्तेषु स्नेहयुताऽवलोककला कटाक्षः, तया हृदि स्पृशन्तं त्वगिन्द्रियसुखं कुर्वन्तम्, विस्तीर्णे उरसि शोभितया श्रीवत्सरूपया श्रीदेव्या आत्मधिष्ण्यं ब्रह्मदैवत्यं स्वकीयग्रीवामणिं कौस्तुभरत्नं सुभगयन्तमिव विकासयन्तमिव" इति । "स्पृहणीयधाम कमनीयतेजःपुञ्जम्, इच्छाविषयस्थानं वा" इति विजयध्वजीयम् । "स्पृहणीयानां गुणानां धाम स्थानम्" इति यादुपत्यम् । श्रीधरादयोऽपि तथा । "हृदि संस्पृशन्तं अहो भक्तवात्सल्यमिति मनो लोभयन्तम्" इति विश्वनाथः । "हृदि संस्पृशन्तमानन्दयन्तम्" इति शुकदेवः ।

"कौस्तुभो ब्रह्मणो रूपं प्राणश्चूळामणि[1]स्तथा" इति च ॥ * ॥

अत्रोपसृष्टमिति [2]चास्मृतमिन्दिरायाः
स्वानां धिया विरचितं बहुसौभगाढ्यम्[3] ।
मह्यं भवस्य भवतां[4] भजनीयमङ्गं
नेमुर्निरीक्ष्य नवितृप्तदृशो मुदा कैः ॥ ४२ ॥

"अविद्यमानकरणं विद्यमानस्मृतिस्तथा । उभयं रचनं प्रोक्तं पूर्वसिद्धेषु तु स्मृतिः[5]" इति शब्दनिर्णये ॥ * ॥

तस्यारविन्दनयनस्य पदारविन्द-
किञ्जल्कमिश्रतुळसी[6]मकरन्दवायुः ।
अन्तर्गतः स्वविवरेण चकार तेषां
सङ्क्षोभमक्षरजुषामपि चित्ततन्वोः ॥ ४३ ॥

अक्षरजुषामपि तद्रूपसेवाभ्यासिनामपि ॥ * ॥

---

१ "प्राणश्चूडामणि–" इति प्र. पाठः । एतेन आत्मधिष्ण्यमित्यत्र मूल आत्मशब्दो ब्रह्मवाचीत्युक्तं भवति ।

२ "चोत्स्मित–" इति श्रीधरादिपाठः । यादुपत्येऽपि तथा । "चोत्स्मृत–" इत्यपि पठन्ति ।

३ "–सौष्ठवाढ्यम्" इति च ।

४ "भवतां च भजन्तमङ्गम्" इति च । "भजन्तमङ्ग" इत्यन्ये । "हरेरङ्गं निरीक्ष्यापि नवितृप्तदृशः अलम्बुद्धिरहितदृष्टयः कैः शिरोभिर्नेमुः । कीदृग्भूतमङ्गम्? इन्दिराया ब्रह्मादिभाग्यदेवताया लक्ष्याश्च अत्र पादादिकेशान्तेष्वङ्गेषु इदमङ्गमुपसृष्टं इत्थम्भूतमिति निश्चितमित्यस्मृतम् । अनन्तत्वादनिरूपितम् । इदमङ्गमीदृग्भूतमिति लक्ष्म्याऽपि सर्वात्मना निश्चेतुमशक्यम्, स्वानां भक्तानां धिया विरचितं विशेषेण ध्यातम्, अनन्तसौन्दर्यादिगुणाढ्यम्" इत्यनन्ततीर्थाः । "मह्यं मम ब्रह्मणः, भवस्य रुद्रस्य, भवतां देवतानां च" इति वीरराघवादयः । "भवस्य शम्भोः भवतामस्मदादीनां च मह्यं महनीयम्" इति विश्वनाथः ।

५ अत एव विरचितमिति ध्यातमित्यर्थः । अखण्डा स्मृतिरेव हि ध्यानम् । अखण्डत्वमेव हि वीत्युपसर्गेणाऽह ।

६ "तुलसी–" इति प्र· पाठः । "पादारविन्दयोः किञ्जल्कैः कैसरैरिव स्थितैः रजोभिः मिश्राया तुळस्याः मकरन्देन मधुना युक्तो वायुः स्वविवरेण नासाविवरेणान्तः प्रविष्टः तेषामक्षरजुषामपि वैराग्यादिगुणैः परब्रह्मध्यायिनामपि, अपरोक्षज्ञानित्वेन निर्विकाराणामपि, चित्ततन्वोः मनःशरीरयोः संक्षोभम्, मनसो द्रवीभावः, अनन्तरमानन्दाश्रुधारासम्पातः, तदनु रोमाञ्च इत्यादिविकारं चकार" इत्यनन्ततीर्थाः ।

[1]नाऽत्यन्तिकं विगणयन्त्यपि ते प्रसादं
[2]किञ्चान्यदर्पितभयं भ्रुव उन्नयैस्ते ।
येऽङ्ग त्वदङ्घ्रिशरणा भवतः कथायाः
कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥ ४८ ॥

"भक्तिज्ञानपरीपाकात्[3] किञ्चित् पूर्वं च मुच्यते । दर्शनेन हरेस्तत्र नाऽनन्दः पूर्णतां व्रजेत्" इति ब्रह्मतर्के ।

अतोऽनपेक्षाणामानन्दोद्रेको मोक्षेच्छुभ्यः[4] । तेषां परिपाकतः पूर्वं ब्रह्मदृष्ट्या मुक्तिप्राप्तेः ।

"मुमुक्षोः केवलो भक्तो मुक्तावपि[5] सुखी भवेत्" इति च ॥ * ॥

कामं भवेम व्रजिनैर्निरयेषु नष्टा-
श्चेतोऽळिवद् यदि हि ते[6] पदयो रमेत ।
[7]वाचस्तु नस्तुळसिवद् यदि तेऽङ्घ्रिशोभाः
पूर्येत ते गुणगणैर्यदि कर्णरन्ध्रः ॥ ४९ ॥

---

१ "अत्यन्तिकं न गणयन्त्यपि" इत्यनन्ततीर्थीयपाठ इति भाति । श्रीधरादीनामपि स सम्मत इति च प्रतिभाति । तथाह्यनन्ततीर्थीयम्—"भक्तिपारवश्यादङ्गेति सम्बोधनम् । अङ्ग हरे, ये त्वदङ्घ्रिशरणाः कीर्तनीयशुद्धकीर्तेः भवतः कथाया रसज्ञाः फलसारविदः त एवाऽत्यन्तिकं प्रसादं मुख्यप्रसादलभ्यं मोक्षं त्वया दीयमानं न गणयन्ति न वाञ्छन्ति । त्वत्सेवामेव वाञ्छन्तीति भावः । कालरूपस्य ते भ्रुव उन्नयैश्चलनैरर्पितभयं प्राप्तभयमन्यत् स्वर्गादिस्थानं न गणयन्तीति किं वक्तव्यम्" इति ।

२ "किन्त्वन्यदर्पित—" इति प्र. पाठः ।

३ अतिशयः परिपाकः परीपाकः । आधिक्येऽधिकमिति सूत्रात् । द्वये तावन्मोक्षयोग्याः श्रूयन्ते । मोक्षापेक्षया भगवत्प्रवणाः, किमप्यनपेक्ष्य केवलं भगवत्प्रवणा इति । तत्र प्रथमेऽधमाधिकारिणः मोक्षेच्छवः हरिदर्शने जाते भक्तिज्ञानपरिपाकात् किञ्चित् पूर्वं च मुच्यन्ते । तेषां मोक्षौत्कण्ठ्यं तत्र कारणम् । अनपेक्षा उत्तमाधिकारिणस्तु अमुक्तिदशायामपि भगवद्भजन एवाधिकमानन्दमनुभवन्तीति न तेषां मुमुक्षाऽपि सम्भवतीत्यर्थः ।

४ मोक्षेच्छुभ्यः सकाशादनपेक्षाणामेकान्तानामानन्दोद्रेकः । उक्तंहि—"एकान्तानां न कस्यचिदर्थे नारयणो देवः सर्वमन्यत् तदर्थकम्" इति ।

५ केवलोऽनपेक्षो भक्तः मुक्तावपि अमुक्तावपि; उभयथाऽपि च्छेदसम्भवात् ।

६ "कामं भवः स्ववृजिनैर्निरयेषु नः स्ताच्चेतोऽलिवद् यदि नु ते" इति प्र. पाठः ।

७ "वाचश्च नस्तुळसि—" इति च पाठान्तरम् । "यदि अस्मच्चेतस्ते पदाम्बुजयोरळिवद् रमेत, अस्मद्वाचश्च तुळसीपुष्पवत् तेऽङ्घ्रिं शोभयन्त्यो यदि भवेयुः, कर्णरन्ध्रस्ते गुणगणैर्यदि पूर्येत तर्हि वयं कामं यथेष्टं निरयेषु पश्वादियोनिषु व्रजिनैर्दुःखैरर्दिता भवेम । दुःखातिरेकेऽपि त्वत्पदारविन्दाद् भक्तिर्न चलति चेत् तद् दुःखमपि तप एवेति भावः" इत्यनन्ततीर्थाः ।

"यावत् परमभक्तैस्तु भुज्यते दुःखमुद्बणम्[१] । तावन्मुक्तो सुखोद्रेकस्तत्र[२] चेद् भक्तिवर्द्धनम्" इति च ॥ * ॥

इति तृतीयस्कन्धे षोडशोऽध्यायः[३]

यस्यामृतामलयशःश्रवणावगाहः
सद्यः पुनाति जगदा श्वपचं विकुण्ठः[४] ।
सोऽहं भवद्भ्य[५] उपलब्धसुतीर्थकीर्ति-
श्छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिम् ॥ ६ ॥

यत् सेवया चरणपद्मपवित्ररेणोः[६]
सद्यःक्षताखिलमलं प्रतिलब्धशीलम् ।
न श्रीर्विरक्तमपि मां विजहाति यस्याः
प्रेक्षालवार्थमितरान्नियमोऽर्हते मत्[७] ॥ ७ ॥

---

१ "दुःखमुल्बणम्" इति प्र. पाठः । उद्बणमिति प्रतनं रूपम् ।

२ तत्र उद्बणदुःखभोगे सत्यपि यदि भक्तिवर्धनं स्यात् तदा मुक्तौ सुखवर्धनं च तत्प्रमाणेनैव स्यादिति ।

३ श्रीधरादिरीत्याऽत्र पञ्चदशोऽध्यायः । ४ "श्वपचाद् विकुण्ठः" इति प्र· पाठः ।

५ "भवद्भिरुपलब्ध–" इत्यपि केचित् पठन्ति ।

६ "–रेणुम्" इति श्रीधराद्यभिमतः पाठः । "–रेणुः" इति क्वचित् ।

७ "प्रेक्षालवार्थं इतरे नियमान् वहन्ति" इति श्रीधरादयः पठन्ति । अत्रानन्ततीर्थीयम्– "यस्य मम अमृतवदमलयशसः श्रवणादिरूपः अवगाहः सद्यस्तत्क्षणादेव आ श्वपचं श्वपचपर्यन्तं जगत् पुनाति, (सोऽहं) भवद्भ्यः विप्रेभ्य उपलब्धसुतीर्थकीर्तिः । भवद्भिर्वेदपुराणेतिहासादिभिर्वर्ण्यमानत्वात् प्राप्तशोभनकीर्तिरहं वो युष्माकं विपरीतवृत्तिं स्वबाहुमपि च्छिन्द्याम् । कीदृशः ? विकुण्ठः प्रतिहतिरहितः । भवतां चरणारविन्दशुद्धरेणोः निरन्तरसेवया प्रतिलब्धशीलं प्राप्तशोभनकर्माणम्, सद्यस्तत्क्षणादेव क्षताखिलमलं नामकीर्तनादिना विनाशिताखिलजगदघम्, विरक्तं रत्यर्थं तदपेक्षारहितमपि मां अनादिकालतो निरतिशयभक्तिमत्त्वात् श्रीर्न जहाति । मत् मत्तः इतरन्नियमः इतरेषां ब्रह्मादीनां यमनियमादिव्रतानुष्ठानं यस्याः श्रीदेव्याः प्रेक्षालवार्थं कटाक्षवीक्षार्थमर्हते क्रियते" इति । "स्वबाहुं स्वस्य बाहुजातं क्षत्रियम्" इति यादुपत्यम् । "स्वबाहुस्थानीयं लोकेश्वरम्" इति श्रीधरादयः । "मद्बाहुरूपमिन्द्रमपि च्छिन्द्याम् । अत एव बृहस्पत्यतिक्रमे इन्द्रस्य महती पीडा संवृत्ता" इति वल्लभाचार्यः । "ममतास्पदयोर्जयविजययोः का वार्ता । अहन्तास्पदं स्वाङ्गमपि च्छिन्द्याम्" इति विश्वनाथचक्रवर्ती ।

"सर्वोत्तमोऽपि भगवान् विप्रादेः पूजनाय तु । गुणलब्धिं ततो ब्रूते नित्यपूर्णगुणोऽपि सन् । ब्रूयुश्चान्ये क्वचित् तत्तु तदुक्तेरनुसारतः । उपादत्ते वरांश्चापि लोकानां मोहनाय वा[1]" इति कौर्मे ॥ * ॥

विप्राणां चरणपद्मपवित्ररेणोः सेवया प्रतिलब्धशीलं श्रीर्न जहातीति यत् । अतश्छिन्द्याम्—

"अनुक्ताश्च गुणा विष्णोरुक्ता दोषा न तस्य तु । अज्ञानाद् दोषविज्ञानं गुणज्ञानं यथार्थतः" इति पैङ्गिश्रुतिः । "विप्राणां चापि भक्तानामन्येषां च जनार्दनः । ब्रह्मणः शङ्कराद् वाऽपि देवताभ्यस्तथैव च । आत्मनश्च श्रियश्चैव सकाशात् प्रियतामपि । पूज्यतामत्ययुक्तं च वदेत क्वापि विमोहयन्" इति स्कान्दे ॥ * ॥

अथ तस्योशतीं देवीमृषिकुल्यां सरस्वतीम् ।
आस्वाद्य मन्युदष्टानां तेषामात्माऽप्यतृप्यत ॥ १३ ॥

देवीं द्योतमानाम् । [3]ऋषिकुलस्तुतिपराम् ॥ * ॥

ते योगमाययाऽऽरब्धपारमेष्ठ्यमहोदयम् ।
प्रोचुः प्राञ्जलयो विप्राः प्रहृष्टाः कम्पितत्वचः[4] ॥ १५ ॥

"तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यम्" इत्युक्तम् ॥ * ॥

---

१ "मोहनाय च" इति प्र. पाठः ।

२ "नाऽस्वाद्य" इति प्र. पाठः । "उशतीं भद्रां, देवीं शोभमानां, ऋषिकुल्यां विप्रकुलप्रशंसापरां वाचमास्वाद्य श्रुत्वा हर्यागमनात् पूर्वं कोपाक्रान्तानामपि तेषामात्मा देहो मनश्च (अतृप्यत)" इत्यनन्ततीर्थाः । "उशतीं कमनीयाम्" इति श्रीधरादयः । "अभीष्टप्रदाम्" इति विजयध्वजीयम् । "सरस्वतीं नदीं वाणीं च, उशतीं कमनीयाम्, पक्षे स्वच्छाम्, देवीं मुनीनां बुद्ध्या सह क्रीडन्तीम्, पक्षे पूज्याम्, ऋषिकुलाय हिताम्, पक्षे ऋषीणां कुल्यां जलाशयरूपामास्वाद्य" इति विश्वनाथचक्रवर्ती । वीरराघवस्तु "दैवीम्" इति पठित्वा "अमानुषीम्" इति व्याचष्ट ।

३ "द्योतमानाम् । ऋषिकुल्यां ऋषिकुलस्तुतिपराम्" इति प्र. पाठः ।

४ "क्षुभितत्वचः" इति श्रीधराद्यभिमतः पाठः । "कुपितत्वचः" इति केचित् पठन्ति । "कूपितत्वचः" इत्यन्ये । "योगमायया स्वसामर्थ्येन आरब्धपारमेष्ठ्यमहोदयं रचितब्रह्मपदसर्वैश्वर्यम् । कंपितत्वचः रोमाञ्चितगात्राः" इत्यनन्ततीर्थाः ।

त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्तव ।
धर्मस्य परमो गुह्यो निर्विकारो भवान् मतः[१] ॥ १८ ॥

धर्मस्यापि दुर्ज्ञेयः ॥ * ॥

यं वै विभूतिरुपयात्यनुवेलमन्यै-
रर्थार्थिभिः स्वशिरसा धृतपादरेणुः ।
धन्यार्पिताङ्घ्रितुळसी[२]नवदामधाम्नो
लोकं मधुव्रतपतेरिव कामयाना ॥ २० ॥

मधुव्रतपतेः सारग्राहिणां पतेः[३] । अङ्घ्रितुळसीलोकं[४] स्थानमुरसिस्थाऽपि स्पर्द्धयेव[५] कामयाना । "लब्ध्वाऽपि वक्षसि पदम्" इति च ॥ * ॥

यस्तां विविक्तचरितैरनुवर्तमानां
नात्याद्रियः[६] परमभागवतप्रसङ्गः ।

---

१ "निर्विकल्पो भवान् मतः" इति केचित् पठन्ति । सनातनो धर्मः त्वत्तः समुद्भूतः । तव तनुभिः मत्स्यकपिलादिभिरेव रक्ष्यते । धर्मदेवताया अपि तव हृदयं न ज्ञातम् । "धर्मः तनुभिः रक्ष्यते" इति विश्वनाथः । "दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम्" इति वचनात् । "धर्मस्य यमस्यापि परमो गुह्यः अत्यन्तं दुर्ज्ञेयः । धर्ममर्यादापालनमनेन ब्राह्मणपूजनेन भवता कृतमिति त्वच्चिकीर्षितं विद्म इति भावः" इत्यनन्ततीर्थाः । यादुपत्येऽपि धर्मस्येति धर्माभिमानिनो यमधर्मस्येति व्याख्यातम् । "धर्मो वायुस्तस्यापि दुर्ज्ञेयः" इति विजयध्वजीये ।

२ "-तुलसी-" इति प्र. पाठः । "अर्थार्थिभिः धर्मार्थकाममोक्षेच्छुभिः अन्यैरत्वदितरैर्ब्रह्मादिभिः स्वशिरसा धृतपादरेणुः विभूतिर्लक्ष्मीदेवी वक्षसि स्थानं लब्ध्वाऽपि धन्यैर्भक्तैरर्पिताङ्घ्रिगततुळसीपुष्पमयनूतनमालाविलासस्य मधुव्रतपतेः सारग्राहिणां पत्युस्तव लोकमङ्घ्र्याख्यं स्थानमपि कामयन्तीवानुवेलं त्रिसन्ध्यासु सभक्तिकं यं भगवन्तमुपयाति सेवते । वक्षस्थलस्थानमनन्यसाधारणं लब्ध्वाऽपि लक्ष्मीर्द्वितीयं तदङ्घ्र्याख्यं स्थानमपि तुळसीदेवीं ततो निष्क्रामयित्वा स्वकीयमेव साधयितुं भगवन्तमुपधावतीवेत्यर्थः" इत्यनन्ततीर्थाः ।

३ पत्युरिति वक्तव्ये पतेरिति प्रयोगः परमवैदिकस्याऽचार्यस्य सुतरां शोभते । अन्यत्राप्याह– "अथो अहल्या पतिनाऽभिशप्ता" इति । अस्य साधुत्वं च पूर्वमेव साधु निरूपितम् ।

४ "अङ्घ्रिस्थतुळसीलोकम्" इति पाठान्तरम् । एतेन मधुव्रतपतेः लोकमिति मूले पूर्वविशेषणप्रस्तुतत्वात् तुळसीस्थानं पदद्वयमुच्यते इति व्याख्यातं भवति । यादुपत्ये तु स्वरूपार्थो धामशब्द इति विवक्षित्वा नवमालिकास्वरूपायास्तुळस्या लोकं स्थानमिति व्याख्यातम् ।

५ मूले कामयानेवेतीवशब्देन लब्धोऽयमर्थः अत्र स्फुटतरमुच्यते स्पर्धयेवेति । न स्पर्धयेत्यभिसन्धिः ।

६ "नात्याद्रियत्" इति श्रीधराद्यभिमतः पाठः ।

28

[1]स त्वं द्विजानुपथपुण्यरजःपुनीतिः[2]
श्रीवत्सलक्ष्म किमगा भगभाजनत्वम्[3] ॥ २१ ॥

परमभागवतात्वेन[4] तस्यामप्यादरः[5] । नतु कामात् ।

"हरिभक्तिर्हरेः प्रीतिर्ज्ञानानन्दादयो गुणाः । अधिकारे च मुक्तौ च ब्रह्मवाय्वोश्च तत्स्त्रियोः । शेषवीन्द्रहराणां च तत्स्त्रीणां वालवादिनाम् । यथाक्रमं तु विज्ञेया भूमौ कारणतोऽन्यथा । देहस्य लक्षणं नैव[6] भूमावप्यन्यथा भवेत् । ब्रह्मादिषु क्रमेणैव नित्यं स्याद् देहलक्षणम् । श्रियोऽधिका गुणाः सर्वे सर्वेभ्यो नियमेन तु । उक्ताश्चैवाप्यनुक्ताश्च ततो विष्णोर्न संशयः" इति[7] तत्त्वनिर्णये ॥ * ॥

धर्मस्य ते भगवतस्त्रियुग त्रिभिः[8] स्वैः
पद्भिश्चराचरमिदं द्विजदेवतार्थम्[9] ।
नूनं भृतं तदभिघाति रजस्तमश्च
सत्त्वेन नो वरदया तनुवा निरस्य ॥ २२ ॥

"धारणाद् भगवान् धर्मो यमनाद् यम उच्यते" इति शब्दनिर्णये । "अनन्तासनवैकुण्ठक्षीरसागरगैस्त्रिभिः । रक्षां करोति भगवान् कपिलः सत्त्ववर्द्धनात् । अस-

---

१ "तं त्वाम्" (?) इति केचित् पठन्ति ।   २ "पुनीतः" इति च । "पुनीते" इति क्वचित् ।

३ "भगभाजनस्त्वम्" इति च । "विविक्तचरितैः विजनस्थलयोग्यशुश्रूषाभिः अनुवर्तमानां सेवमानां श्रियं यस्त्वं नात्याद्रियः, कामितयाऽतिशयेन स्नेहं नाकरोः । तर्हि कथमाद्रियः ? परमभागवतप्रसङ्गः । ममेयं ब्रह्मादिभ्योऽप्यतिशयेन परमभक्तेति प्रसङ्गेन प्रकृष्टकारुण्येन तस्यां भक्त्यनुसारेणैव तामप्याद्रियः । स त्वं, द्विजानुपथो-ब्राह्मणपादः । तदाश्रितशुद्धरजसा पुनीतिः शुद्धिरस्येति द्विजानुपथपुण्यरजःपुनीतिरभूः किम् ? श्रीवत्साख्यलाञ्छनं चागाः किम् ? भगभाजनत्वं गुणपात्रत्वं च विप्रसेवयाऽगाः किम् ? किमित्याक्षेपः" इत्यनन्ततीर्थाः । "विविक्तचरितैः विशुद्धैः परिचरणैः" इति श्रीधरादयः । "विविक्तचरितैरनन्यसाधारणसेवाकरणैः" इति विजयध्वजीयम् । "द्विजानामनुपथं पथिपथि लग्नम्" इति श्रीधरादयः । "दिजानामनुपथेन अनुगमनेन" इति विजयध्वजीये यादुपत्ये च ।   ४ "–भागवतत्वेन" इति च पाठः ।

५ "तस्यामत्यादरः" इति, "तस्यामप्यत्यादरः" इति च पाठान्तरम् ।

६ "चैव" इति प्र॰ पाठः प्रामादिकः ।   ७ "इति च तत्त्वनिर्णये" इति क्वचित् ।

८ "–युगस्त्रिभिः" इति मुद्रितः पाठः प्रामादिकः । व्याख्यातृभिरपरिगृहीतत्वात् ।

९ "निजदेवतार्थम्" इति क्वचित् । "हे त्रियुग युगत्रयावतार, इदं चराचरं सर्वं जगत्, सर्वधारकत्वाद् धर्मशब्दवाच्यस्य तव स्वैः स्वरूपैः त्रिभिः पद्भिः अनन्तासनवैकुण्ठक्षीराब्धिस्थरूपैश्च, नः ज्ञानादिवरदया तन्वा कपिलवासुदेवरूपेण च सत्त्वेन सत्त्वगुणप्रवर्तनेन द्विजदेवतार्थं भृतं पालितम् । किं कृत्वा? तदभिघाति रजस्त-

स्त्वोऽपि रजश्चैव तमश्चापि निरस्य तु" इति मूर्तिभेदे[1]। "कपिलो वरदश्चैव विकल-श्चेति[2] कथ्यते" इति च।

अतः सत्त्वस्य करणत्वमात्रम्[3]। कपिलो वरदा तनुः ॥ * ॥

न त्वं द्विजोत्तमकुलं यदि हाऽत्मगोपं[4]
गोप्ता वृष[5] स्वर्हणेन ससूनृतेन[6] ।
तर्ह्येव नङ्क्ष्यति शिवस्तव देव पन्था[7]
लोकोऽग्रहीष्यदृषभस्य हि यत् प्रमाणम्[8] ॥ २३ ॥

आत्मैव गोपो यस्य[9] तदात्मगोपम् ॥ * ॥

तत् तेऽनभीष्टमिव सत्त्वनिधेर्विधित्सोः
क्षेमं जनाय निजशक्तिभिरुद्धृतारेः[10] ।
नैतावता त्र्यधिपतेस्तव विश्वभर्तु-
स्तेजःक्षतिस्त्ववनतस्य[11] स ते विनोदः ॥ २४ ॥

मश्च जगद्बाधकान् राजसतामसानसुरादीन् रजस्तमोगुणोद्भूताज्ञानविपरीतज्ञानादींश्च निरस्य, निर्मलज्ञानं दत्वा जगदिदं भृतम्" इत्यनन्ततीर्थाः। "त्रीणि युगानि षड्गुणाः सन्त्यस्येति त्रियुगः" इत्यर्थान्तरं च श्रीधरीयादिषु। "द्विजेषु या देवता ब्राह्मणजातिस्तद्रक्षार्थम्" इति शुकदेवः।

१ "मुक्तिभेदे" इति क्वचित्।

२ "विलयश्चेति" इति क्वचित्।

३ "कारणत्वमात्रम्" इति प्रं. पाठः।

४ "–गोप्यम्" इति केचित्।

५ "वृषः" इति श्रीधराद्यभिमतः पाठः।

६ "स्वर्हणेन च सूनृतेन" इति क्वचित्। "स्वर्हणेन सुसूनृतेन" इत्यपि पठन्ति।

७ "शिवस्तव वेदपन्थाः" इत्यपि पठन्ति वीरराघवादयः।

८ "हि तत् प्रमाणम्" इति श्रीधरादिसम्मतः पाठः। "हे वृष सर्वोत्तम, त्वं आत्मगोपं त्वया रक्षितं द्विजोत्तमकुलं ससूनृतेन मधुरवाचा सहितेन स्वर्हणेन सुष्ठु पूजनेन यदि न गोप्तासि, हे देव, तव शिवः पन्थाः त्वया निर्मितोऽयं सुखकरो धर्ममार्गः तर्ह्येव तदैव नंक्ष्यति। शिष्टाचाराभावात्। लोको जनः ऋषभस्य श्रेष्ठस्य यच्चरितं तदेव प्रमाणमिति ग्रहीष्यत् ग्रहीष्यति" इत्यनन्ततीर्थाः। तथाचैतद्रीत्या ग्रहीष्यदिति ग्रहीष्यतीत्यर्थे छान्दसं रूपम्। अपरे सर्वेऽपि अग्रहीष्यदित्येव पेठुः।

९ "गोपो गोपको यस्य" इति मुद्रितपाठेऽधिकं पठ्यते। प्रक्षेप एवायम्।

१० "–रुद्धतारेः" इत्यपि क्वचित्।

११ "त्र्यधिपतेर्बत विश्वभर्तुस्तेजः क्षतं त्ववनतस्य" इति श्रीधराद्यभिमतः पाठः। "त्र्यधिपते" इति सम्बोधनमिति वीरराघवः। "निजशक्तिभिर्विनाशितधर्मविरोध्यसुरादेः, जनस्य क्षेमं रक्षां विधित्सोस्ते तद् धर्ममार्गविनाशनमनभीष्टमिव अनभीष्टमेव। त्रिलोकाधिपतेः, विश्वो मुख्यप्राणः तस्यापि स्वामिनः, ब्राह्मणपादावनतस्य एताव-

"असुरा अप्रियाश्चापि नित्यानन्दाश्च लोकवत् । निषेध्यबुद्धिविषयमप्रियं हि हरेर्मतम्" इति च ।

तस्मादनभीष्टमिव ॥ * ॥

एतौ सुरेतरगतिं प्रतिपद्य सद्यः
संरम्भसम्भृतसमाध्यनुबद्धयोगौ[1] ।
भूयः सकाशमुपयास्यत[2] आशु यो वः
शापो मयैव विहितस्तदवैत[3] विप्राः ॥ २६ ॥

"अन्तर्भक्ता बहिःक्रुद्धा हिरण्याद्या हरिं प्रति । सर्वक्रुद्धाः शम्बराद्या अन्तः[4] क्रोधवशास्तथा" इति च ॥ * ॥

भगवन्तं परिक्रम्य प्रणिपत्यानुमान्य[5] च ।
प्रतिजग्मुः प्रमुदिताः शंसन्तो वैष्णवीं श्रियम् ॥ २८ ॥

"स्वरूपश्रीस्तथा भार्या द्वेधा श्रीस्तु हरेर्मता[6]" इति च ॥ * ॥

मयि संरम्भयोगेन[7] निस्तीर्य ब्रह्महेळनम्[8] ।
[9]प्रत्येष्यथः सकाशं मे कालेनाल्पीयसा पुनः ॥ ३१ ॥

ताऽनेनात्रनामेन तेजःक्षतिः सामर्थ्यभङ्गोऽवमानो (वा) नास्ति । स तव विनोदः लीलाविलास एव" इत्यनन्ततीर्थाः ।

१ "संरम्भसंहतसमाधिः क्रोधसहितध्यानम्, तेन सम्बद्धो योगो भक्तिरनयोरिति तथोक्तौ" इत्यनन्ततीर्थाः । एतेन संरम्भसंहत–" इत्यादिस्तदभिमतः पाठः स्यात् ।

२ आशु मत्सकाशमुपयास्यतः । "–यास्यतमाशु" इति क्वचित् ।

३ "निमितस्तदवैत" इति श्रीधराद्यभिमतः पाठः । " वो युष्माभिर्यः शापो विहितस्तन् स शापः मयैव विहित इत्यवैत जानीध्वम्" इत्यनन्ततीर्थाः ।

४ क्रोधवशा नाम दैत्याः अन्तः स्वरूपमनसि क्रुद्धा द्वेषिणः । बहिश्च भक्ता इव भवन्ति ।

५ "अनुमान्य सम्भावयित्वा, अनुज्ञां चाऽदाय" इत्यनन्ततीर्थाः ।

६ तेन मूले वैष्णवीं श्रियम् भगवतः स्वरूपशोभामित्यर्थ उक्तो भवति । अनन्ततीर्थीये तु "विष्णुस्वरूपश्रियं तद्भार्यां लक्ष्मीं च" इति व्याख्यातम् । अहो भगवतः सर्वातिशायी सौन्दर्यसारः, अहो श्रीदेव्याः सर्वातिशायी तस्मिन् भक्तियोग इति शंसन्त इत्यर्थः ।

७ "संरम्भयोगेन क्रोधयुक्तभक्त्याख्योपायेन" इत्यनन्ततीर्थाः ।

८ "–हेलनम्" इति प्र. पाठः । "ब्राह्मणावज्ञानेनोद्भूतं पापम्" इत्यनन्ततीर्थाः ।

९ "प्रत्येष्यतं निकाशं मे" इति श्रीधराद्यभिमतः पाठः ।

"अन्तर्भक्ता बहिर्वैरा हिरण्याद्या हरेर्मताः । तत्र भक्त्याऽभवन् पूता द्वेष आवेशकान्[1] गतः । ब्रह्मजा असुरा ये तु विष्णोः पार्षदौ गताः[2] । बल्यादींश्च हरेर्द्वेषं ततः कृत्वा तमो गताः" इति च ।

तस्मात् संरम्भोऽवाचीनफलः[3] कथ्यत एव । [4]योग एव ब्रह्महेळननिस्तारकः ॥ * ॥

इति तृतीयस्कन्धे सप्तदशोऽध्यायः[5]

ववौ वायुः सुदुःस्पर्शः फाट्कारखवान्[6] मुहुः ।
उन्मूलयन् नगपतीन् वात्यानीको रजोध्वजः[7] ॥ ५ ॥

"'[8]फाट्कारश्चैव [9]फूत्कारस्तथा किलिकिलादयः[10] । अनुकारशब्दा विज्ञेया ये चान्ये तादृशा मताः" इत्यभिधाने[11] ॥ * ॥

अन्तर्ग्रामेषु मुखतो वमन्तो वह्निमुद्बणम्[12] ।
[13]सृगालाश्चापि ठङ्कारैः प्रणेदुरशिवाः शिवाः ॥ ९ ॥

१ आवेशकान् आविष्टानसुरान् गत इत्यर्थः ।

२ "पार्षदतां गताः । कल्याद्याश्च हरेर्द्वेषमन्तः कृत्वा" इति प्र. पाठः प्रामादिकः । ये ब्रह्मजा असुरा ते विष्णोः पार्षदौ जयविजयौ बल्यादींश्च गताः । ततश्च तत्र द्वेषं कृत्वा तमो गता इत्यर्थः । जयविजयौ प्रविष्टौ द्वावेवासुरौ । बल्यादिगतानामपि सङ्ग्रहेणासुरा इति बहुवचनम् ।

३ "संरम्भोऽल्पफलः" इति प्र. पाठः प्रामादिकः । अवाचीनफलः अवाग्गतिहेतुः, अत कथ्यत एव । एव-शब्दः केवलार्थः । योगेन सह केवलं कथ्यते, वस्तुतः स्थितमिति, नतु ब्रह्महेळननिस्तारणहेतुत्वेन कथ्यत इति ।

४ "भक्तियोग एव ब्रह्महेलन-" इति प्र. पाठः ।

५ श्रीधरीयाद्यनुसारेणात्र षोडशोऽध्यायः ।

६ "पूत्कारानीरयन्" इति श्रीधराद्यभिमतः पाठः । "फट्कारानीरयन्" इति विश्वनाथादयः । "फट्कारारवान्" इत्यपि पठन्ति । "दुःखजनकस्पर्शवान् । फाट्काररवोऽनुकारशब्दोऽस्यास्तीति फाट्काररववान्" इत्यनन्ततीर्थाः ।

७ "वात्यानीतरजोध्वजः" इत्यपि केचित् पठन्ति । "वात्यानां मण्डलवायूनामनीकं समूहो यस्य स तथा। रज एव ध्वजो यस्य स तथा" इत्यनन्ततीर्थाः ।

८ "फट्कार-" इति प्र. पाठः ।

९ "पूत्कार-" इति क्वचित् ।

१० "किलकिलादयः" इति प्र. पाठः ।

११ "इत्यभिधानम्" इति प्र. पाठः ।

१२ "वमन्त्यो वह्निमुल्बणम्" इति प्र. पाठः ।

१३ "सृगालोलूकटङ्कारैः प्रणेदुरशिवं शिवाः" इति च । "गोमायुषु पुमांसः सृगालाः । स्त्रियः शिवाः । ठङ्कारैः निन्दितानुकारस्वरैः" इत्यनन्ततीर्थाः ।

[1]ठङ्कारोऽप्यनुकारशब्दः । सृगालाः पुमांसः[2]।

"नाशस्तत्र सृगालानां शिवानां चान्यथास्वरे" इत्याग्नेये ॥ * ॥

[3]खरोष्ट्राः कर्कशैः क्षत्तः खुरैर्घ्नन्तो धरातळम्[4] ।
[5]खात्काररभसा मत्ताः पर्यधावन् वरूथशः ॥ ११ ॥

खात्कारोऽप्यनुकारशब्दः ॥ * ॥

तं वीक्ष्य दुस्सहजवं रणत्काञ्चननूपुरम् ।
[6]वैजयन्त्या स्रजा जुष्टमंसन्यस्तमहागदम् ॥ २१ ॥

[7]मनोवीर्यमदोत्सिक्तमधृष्यमकुतोभयम् ।
भीता निलिल्यिरे देवास्तार्क्ष्यत्रस्ता इवाहयः ॥ २२ ॥

"न देवानां प्रजापानां विजेता वरतो विना । बले वा[8] विद्यया वाऽपि न समस्तत्पतीन् विना । वरोऽपि तादृशो यावच्छरीरं नान्यदेहगः" इति तत्त्वनिर्णये[9] ॥ * ॥

इति तृतीयस्कन्धे अष्टादशोऽध्यायः[10]

---

१ "टङ्कारो–" इति प्र. पाठः ।

२ "सृगालास्तत्र पुमांसः" इति च । इतः परं यत्क्वचिन्मुद्रितपुस्तकेषु "अपि सम्भावनाप्रश्नगर्हाशङ्कासमुच्चये" इत्यधिकं पठ्यते स प्रमाद एव ।

३ "खराश्च" इति प्र· पाठः ।

४ "धरातलम्" इति च ।

५ "खार्कार–" इति च । "खराः क्रूराश्च ते उष्ट्राश्च खरोष्ट्राः । खाट्कारोऽप्यनुकारशब्दः । तस्य रभसा वेगेन रुवन्तो रासभाश्च पर्यधावन्" इत्यनन्ततीर्थाः । तेन "खाट्कार–" इति पाठस्तत्सम्मत इति ।

६ "पुष्पैश्चतुर्गुणां मालां वैजयन्तीं विदुर्बुधाः" इति प्राचीनम् ।

७ "मनोवीर्यवरोत्सिक्तमसृण्यमकुतोभयम्" इति श्रीधराद्यभिमतः पाठः । "मनोवीर्यमदोत्सिक्तमसृण्य–" इति वल्लभाचार्यः । "मनोभिमतवीर्यजनितमदेनोद्दण्डम्" इत्यनन्ततीर्था व्याचख्युः । "मनसा धैर्येण वीर्यमदेन च" इति यादुपत्यम् । "मन उत्साहः । वीर्यं पराक्रमः । मदो गर्वः" इति वल्लभाचार्यः ।

८ "बलेन विद्यया वाऽपि" इति प्र. पाठः ।

९ हिरण्याक्षकृतदेवपराजयवर्णनात्मकः समग्रोऽध्यायभागः अनेन प्रमाणवचनेन विवृताभिप्रायः ।

१० प्र. पाठेऽत्र सप्तदशोऽध्यायः ।

तयोः स्पृधोस्तिग्मगदाहताङ्गयोः
क्षतस्रवाघ्राणविवृद्धयुद्धयोः[1] ।
[2]विचित्रमार्गांश्चरतोर्जिगीषया
व्यभादिळायामिव[3] शुष्मिणोर्मृधः ॥ १९ ॥

[4]आसन्नशौण्डीरमपेतसाध्वसं [5]कृतप्रतीकारमहार्यविक्रमम् ।
[6]विलक्ष्य दैत्यं भगवान् सहस्रणीर्जगाद नारायणमादिसूकरम् ॥ २१ ॥

अनेककल्पजननेतृत्वात् सहस्रणीः[7] ॥ * ॥

"अक्षतः क्षतवद् विष्णुरसमः समवत् तथा । अजितो जितवच्चैव ज्ञोऽज्ञवच्च प्रकाशयेत् । सर्वरूपेष्वनन्तोऽपि ब्रह्माद्याश्चैव तन्मतेः । अनुसारितया ब्रूयुः[8] कुर्युश्च न स [9]दुःखभाक्" इति ब्रह्माण्डे ॥ * ॥

एषा घोरतरा[10] सन्ध्या लोकच्छम्बट्करी[11] प्रभो ।
उपसर्पति सर्वेषां[12] सुराणां जयमावह ॥ २६ ॥

---

१ "क्षतास्रवघ्राणविवृद्धमन्य्वोः" इति श्रीधराद्यभिमतः पाठः । "क्षतात्स्रवद्घ्राणविवृद्धमन्य्वोः" इति वल्लभाचार्यः । क्षतस्रवं रुधिरम् । २ विचित्रगदाभ्यासप्रकारान् इत्यर्थः ।

३ "-दिलायामिव" इति प्र. पाठः । "इळायां भुवि शुष्मिणोर्मत्तवृषभयोर्युद्धमिव" इत्यनन्ततीर्थाः । इळा गौः, तन्निमित्तं मत्तवृषभयोरिव, इळा भूमिः, तन्निमित्तं हरिहिरण्याक्षयोर्युद्धमिति च व्याचक्षते ।

४ "आसन्नशौण्डीरं तदा विशेषतः सम्प्राप्तयुद्धपाटवम्" इत्यनन्ततीर्थाः ।

५ "हरिणा कृतपराक्रमस्य प्रतिपराक्रमं कुर्वन्तम्" इति च । ६ "विलोक्य" इति वल्लभाचार्यपाठः ।

७ "अत्र कल्पशब्दो दैनन्दिनपरः" इति यादुपत्यम् । "देवसहस्रनेता भगवान् ब्रह्मा" इति वीरराघवः । "ऋषिसहस्राणां नेता" इति श्रीधरादयः ।

८ एतेन जगाद नारायणमिति ब्रह्मविज्ञापनं च व्याख्यातप्रायम् ।

९ "स न दुःखभाक्" इति प्र. पाठः । १० "घोरतमा" इति प्र. पाठः ।

११ "-छंवट्करी" इति श्रीधरादयः । "-च्छम्बष्करी" इत्यपि कोशेषु पठ्यते । अत्र "-शम्बट्करी" इत्यपि पाठान्तरम् । "लोकशम्बट्करी लोकभक्षणी । भक्षणं च तमसाऽच्छादनमेव" इत्यनन्ततीर्थाः । विजयध्वजीययादुपत्ययोरपि तथा । अचार्योदाहृतप्रमाणवचनस्योभयथाऽपि च्छेदसम्भवः संशयबीजम् । शम्बट्, छम्बट् इत्युभयमपि नाशार्थकं कोशेषु पठ्यते । अथापि छम्बडिति वेदेषु प्रयोगदर्शनात् प्राचीनकोशेषु तस्यैव परिग्रहाच्चायमेवात्र पाठः स्वीकृतः । "छम्बट्शब्दो वैदिको नाशवाचकः" इति वल्लभाचार्योऽप्याह ।

१२ "सर्वात्मन् सुराणाम्" इत्यर्वाचीनः पाठः । "सर्वात्मन्नसुराणां जयापहा" इति च क्वचित् ।

"आदरं तु मुखं 'विद्यात्[1]छम्भदकारं तु भक्षणम्" इत्यभिधानम्[2] ॥ * ॥

अधुना योऽभिजिन्नाम[3] योगो मौहूर्तिकोऽभ्यगात्[4] ।
शिवाय नस्त्वं सुहृदामाशु निस्तर दुस्तरम् ॥ २७ ॥

"मध्याह्नस्त्वभिजित् प्रोक्त[5] आषाढोत्तर एव च[6] । श्रवणस्याऽपि पूर्वार्द्धो विषुवं चाभिजित् स्मृतः[7]" इति च ॥ * ॥

इति तृतीयस्कन्धे एकोनविंशोऽध्यायः[8]

गदायामपविद्धायां हाहाकारे विनिर्गते ।
मानयामास तद्धर्मं सुनाभं[9] चास्मरद् विभुः ॥ ५ ॥

---

१ "विन्द्यात्" इति प्र. पाठः प्रामादिकः । २ "इत्यभिधाने" इति क्वचित् ।

३ "अधुनैषोऽभिजिन्नाम" इति प्र. पाठः ।

४ "मौहूर्तिको ह्यगात्" इत्यपि पाठान्तरम् । "योभिजिन्नाम योगो मध्यन्दिनकालमौहूर्तिकः एकमुहूर्तात्मकः स इदानीमभ्यगात् सम्प्राप्तः" इत्यनन्ततीर्थाः । "मौहूर्तिकः मुहूर्ते शुभदः" इति शुकदेवादयः । मुहूर्तं इति घटिकाद्वयम् । त्रिंशद्घटिके दिने पञ्चदशी षोळशी च घटिका अभिजिदित्यर्थः । तथाच "मौहूर्तिकः मुहूर्तत्रयभवः" इति विश्वनाथवचनं चिन्त्यम् ।

५ तथाहि ज्यौतिषग्रन्थेष्वभिजिद्वर्णनम्– "मध्यं व्योम प्रयाते स्फुरदनिलनिभे केसरे चार्कबिम्बे छाया साध्वीव कान्ता प्रचलति पुरुषे यत्र तत्पादलग्ना" इत्यादि । प्रशस्तश्चायं कालः युद्धयात्राद्यर्थम्—"तावत् सौरेर्न दृष्टिः कुजकृतमशुभं नैव ऋक्षस्य योगो लक्ष्मीमारोग्यसम्पत्क्षितिमथ युवतीं तत्र गन्ता लभेत" इत्युक्तेः ।

६ तदुक्तम्—"अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढानामधस्ताच्छ्रोणायाः" इति । "आप्यस्यैवाभिजित् प्रान्ते" इति सूर्यसिद्धान्ते । व्याख्यातं चैतद् रङ्गनाथेन—"आप्यस्य पूर्वाषाढाया अवसाने धनूराशौ विंशतिकलोनसप्तविंशति(२६–४०)भागे अभिजिद्योगतारा" इति । तथाच मूले आषाढस्योत्तरार्धः श्रवणस्य च पूर्वार्धः अभिजिदित्यर्थः ।

७ "स्मृता" इति क्वचित् । विषुवं दिनरात्र्योः साम्यसम्पादकः रवेस्तुलामेषसङ्क्रमणकालः ।

८ प्र॰ पाठेऽत्राष्टादशोऽध्यायः ।

९ "तद्धर्मं तस्य धर्मम् । सुनाभं सुदर्शनचक्रम्" इत्यनन्ततीर्थाः । "स चासौ धर्मश्च" इत्यपरे ।

"धर्मः सत्य इति[1] प्रोक्तो धर्मश्चापि हरेः प्रियः" इति ब्राह्मे । "यथेच्छयैव सर्वं तु मनसा देहतोऽपिवा । कर्तुं शक्तोऽपि [2]चाब्जाद्या लीलैवानन्तशक्तिनः[3]" इति वाराहे[4] ॥ * ॥

इति तृतीयस्कन्धे विंशोऽध्यायः[5]

दैवेन दुर्वितर्क्येण परेणानिमिषेण च ।
जातक्षोभाद् भगवतो महानासीद् गुणत्रयात्[6] ॥ १२ ॥

"सृष्टौ लये तारतम्यं देवानां ज्ञायते स्फुटम् । तारतम्यपरिज्ञाने महातात्पर्यमिष्यते । अतस्तद् बहुशस्तूक्तमन्यच्चैतत्प्रकाशकम्" इति वामने । "महतो ब्रह्मवायू च तद्भार्ये[7] चाभिमानिनः । अहमः शेषवीन्द्रौ च रुद्रेन्द्रौ कामतत्स्त्रियः । मनसस्त्वनिरुद्धश्च चन्द्रश्चान्ये यथोदितम् । एवं क्रमो व्यत्ययस्तु सूक्ष्मस्थूलादिभेदतः[8] । सृष्टौ गुणे च ज्ञानादौ मुक्तिस्थे[9] चाप्ययं क्रमः । नियमेनान्यथोक्तिस्तु मोहायासुरजन्मनाम्" इति वाराहे ॥ * ॥

सोऽशयिष्टाधिसलिले[10] आण्डकोशो निरात्मकः ।
साग्रं वै वर्षसाहस्रमन्ववात्सीत् तमीश्वरः ॥ १५ ॥

निरात्मकः न व्यक्तस्तत्राऽत्मा ॥ * ॥

---

१ "सत्यमिति" इति क्वचित् ।
२ "शक्तोऽपि शब्जाद्या-" इति पाठान्तरम् ।
३ "शक्तितः" इति च ।
४ "इति च वाराहे" इति क्वचित् ।
५ प्र. पाठेऽत्रैकोनविंशोऽध्यायः ।
६ "दुर्वितर्क्येण दुर्विज्ञेयेन दैवेन अदृष्टान्तर्यामिणा हरिणा, परेण सर्वविलक्षणेन अनिमिषेण सृष्टिकालान्तर्यामिणा हरिणा च सर्वेषां मूलकारणात् प्रळयाब्धौ शयानात् भगवतः प्रेरणया च जातक्षोभात् उत्पन्नसिसृक्षुत्वविशेषात् गुणत्रयात् महत्तत्वाभिमानी ब्रह्मा जज्ञे । तदभिमन्यमानं महत्तत्वं च जातम्" इत्यनन्ततीर्थाः ।
७ "तद्भार्या" (?) इति क्वचित् ।
८ "-स्थूलविभेदतः" इति प्र. पाठः । "विस्तारे भीमनिहताः संक्षेपेऽर्जुनपातिताः" इत्यादिवत् सूक्ष्मस्थूलादिभेदो ज्ञातव्यः । सामान्यवचनं हि स्थूलम् । विशिष्य वचने हि सूक्ष्माण्यपि बोध्यन्ते ।
९ "मुक्तिस्थे वाऽप्ययम्" इति प्र· पाठः ।
१० "-ष्टाब्धिसलिले" इति प्र. पाठः । "-ष्टाधिसलिलम्" इत्यपि केचित् पठन्ति । "अधिसलिले सलिलोपरि निरात्मकोऽप्रकाशितपरमात्मस्वरूपः (आण्डकोशोऽशयिष्ट) । साग्रं साधिकं वर्षसाहस्रमीश्वरः तत्सत्तापरिमाणादिप्रेरकतया तमाण्डकोशमन्ववात्सीत् प्रविश्य स्थितोऽभूत्" इत्यनन्ततीर्थाः ।

29

सोऽनुविष्टो भगवता यः शेते सलिलाशये ।
लोकसंस्थां यथापूर्वं निर्ममे संस्थया स्वया[1] ॥ १७ ॥

संस्थया स्वया भगवति [2]स्थितिसामर्थ्येन ॥ * ॥

देवताः प्रभया याया दिव्याः[3] प्रमुखतोऽसृजत् ।
[4]तेऽहार्षुर्देवयन्तो विसृष्टां तां प्रभामहः ॥ २२ ॥

देवोऽदेवान् जघनतः सृजति स्म विलोलुपान्[5] ।
त एनं लोलुपतया मैथुनायाभिपेदिरे ॥ २३ ॥

ततो हसन् स भगवानसुरैर्निरपत्रपैः ।
अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत्[6] ॥ २४ ॥

"जानन्नपि समर्थोऽपि कचिद् ब्रह्मा हरेः प्रियम् । ज्ञात्वा करोति कर्माणि ह्यज्ञवच्चा-
प्यशक्तवत्[7]" इति च ॥ * ॥

सोऽवधार्यास्य कार्पण्यं विविक्ताध्यात्मदर्शनः ।
विमुञ्चाऽऽत्मतनुं घोरामित्युक्तो विमुमोच ह[8] ॥ २८ ॥

---

१ "यो हरिः कल्पलयोदकाख्याश्रये शेते तेनानुविष्टोऽनुप्रविश्य प्रेरितः स ब्रह्मा स्वया स्वतन्त्रपरमात्मप्रेरितया संस्थया सामर्थ्येन पूर्वपूर्वकल्पे यथा तथा लोकसंस्थां चतुर्दशलोकस्थितिं पद्मेन निर्ममे" इत्यनन्ततीर्थाः ।

२ "स्थितसामर्थ्येन" इति प्र. पाठः । स्वा स्वीया या संस्था भगवति स्थितिः । भगवन्निष्ठेति यावत् । सैव संस्था तस्य सामर्थ्यमित्यर्थः ।

३ "दीव्यन्" इति प्र. पाठः ।

४ "ते आहर्षुर्देवयन्तः" इति प्र. पाठः प्रामादिकः । अहार्षुरिति क्षैप्रसंयोगव्यूहेनोच्चारणान्न च्छन्दोभङ्ग इति विदितमेव वैदिकसम्प्रदायविदाम् । अथापि केचित् "तेऽहारिषुर्देवयन्तः" इति पठन्ति । "तेऽहार्षुर्देवयन्तोऽमुम्" इत्यनन्ततीर्थाभिमतः पाठ इति भाति । तथाहि तद्व्याख्यानम्—"दिव्याः क्रीडादिगुणविशिष्टा यायाः देवतास्ताः सर्वाः प्रभाख्यदेहेन, प्रमुखतः तस्य देहस्य पुरोभागादसृजत् । ते देवाः अमुं विरिञ्चं प्रति देवयन्तः क्रीडमानाः तेन विसृष्टां तां प्रभाख्यामहरात्मिकां तनुं जगृहुः" इति ।

५ "स्मातिलोलुपान्" इति प्र. पाठः । "देवो विरिञ्चः अदेवानसुरान् विलोलुपान् अत्यन्तरागयुक्तान् स्त्रीरूपः सन् (सृजति स्म)" इत्यनन्ततीर्थाः ।

६ "क्रुद्धवद् भीतवच्च परापतत् पलायितवान्" इति च ।

७ एतेनोत्तरत्र वक्ष्यमाणं कार्पण्यमित्यादिकं सर्वं व्याख्यातम् ।

८ स भगवान् हरिः अस्य ब्रह्मणः कार्पण्यं दैन्यमवधार्य 'आत्मतनुं घोरां विमुञ्च' इति तमाह । इत्युक्तः सोऽपि तां विमुमोच ह । "विविक्ताध्यात्मदर्शनः भूतानामतिरहस्यान्तःकरणज्ञाता । आत्मतनुं स्त्रीरूपम्" इत्य-

"व्यसृजन्मलवद्[1] देहं बाह्यं नतु निजं पुरा। ब्रह्मा तस्माहरादित्वं प्राप देवादिदैवतम्[2]" इति कौर्मे ॥ * ॥

ऊर्जस्वन्तं मन्यमान आत्मानं भगवानजः।
साध्यान् गणान् पितृगणान् परोक्षेणासृजत् प्रभुः[3] ॥ ४२ ॥

"ऊर्जं सारान्नमुद्दिष्टं तद्[4] देवपितृभक्षणम्" इति ब्राह्मे ॥ * ॥

स आत्मानं मन्यमानः कृतकृत्यमिवाऽऽत्मभूः।
तदा मनून् ससर्जान्ते मनसा लोकभावनान्[5] ॥ ४९ ॥

[6]तेभ्यः स व्यसृजद् देहं परः पुरुष आत्मनः।
तान् दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिम् ॥ ५० ॥

नन्ततीर्थाः। "विविक्तमसन्दिग्धं अध्यात्मदर्शनं परचित्तज्ञानं यस्य" इति श्रीधरादयः। "विविक्तमध्यात्मदर्शनं तत्वदर्शनं यस्मात्" इति शुकदेवः। चेतनाचेतनाभ्यां विविक्तः, अधिकश्च आत्माऽहमिति यस्य दर्शनं स भगवानिति विजयध्वजीये।

१ "विसृजेन्मलवद्–" इति क्वचित्।

२ "दैवाधिदैवतम्" इति क्वचित्। देवादयः अभिमानिदैवतानि यस्य देहस्य तत्। एतेन "विसृष्टां तां प्रभामहः", "जगृहुर्यक्षरक्षांसि रात्रिम्", तं कायं पितरः प्रतिपेदिरे" इत्यादि सर्वं व्याख्यातम्।

३ "आत्मानमूर्जस्वन्तं सारान्नवन्तं मन्यमानो भगवानजः परोक्षेण परोक्षाख्यदेहेन साध्यान् देवगणान् पितृगणांश्च ससर्ज" इत्यनन्ततीर्थीयम्। "परोक्षेण अदृश्यरूपेण" इति श्रीधरादयः। "तथाचादृश्येभ्य एव पितृभ्यो पिण्डानि देयानि। नतु दृश्येभ्यः। अत एव यदा शन्तनुर्भीष्मात् पिण्डग्रहणार्थं स्वहस्तं प्रसारितवांस्तदा भीष्मो न ददाविति पुराणप्रसिद्धिः" इति राधारमणदासगोस्वामी।

४ "तदेव पितृभक्षणम्" इति क्वचित्।

५ "अत्र न मनसा ससर्जेत्यन्वयः। मनूनामपि देहत एव सृष्टेः। स्पष्टं चैतदुत्तरश्लोके। अत एवानन्ततीर्थीयम्—"आत्मभूः ब्रह्मा आत्मानं मनसा कृतकृत्यमिव मन्यमानः अन्ते सर्वेषां सृष्ट्यनन्तरं लोकभावनान् सृष्ट्या पालनेन च लोकवर्द्धनान् मनून् ससर्ज" इति। अत एव "मनसा मनःपूर्वकम्" इति विजयध्वजीयम्। "मनून् मनुष्यान्" इति जीवगोस्वामी। मनूनां मानवानां च सृष्टिरियम्।

६ "तेभ्यः सोऽत्यसृजत् स्वीयं पुरं पुरुषमात्मवान्" इति प्र. पाठः। "–सृजद् देहं पुरं पुरुषमात्मनः" इत्यपि पठन्ति। "स परः पुरुषो ब्रह्मा तेभ्यस्तं देहं व्यसृजद् ददौ। ये पुरा सृष्टा देवादयस्ते तान् मनून् दृष्ट्वा प्रजापतिं प्रशशंसुः" इत्यनन्ततीर्थाः।

[१]अहो एतज्जगत्स्रष्टः सुकृतं बत ते कृतम् ।
प्रतिष्ठिताः क्रिया यस्मिन् साकमन्नमदामहे ॥ ५१ ॥

ये पुरा सृष्टा देवाः ।

"दृष्ट्वा तु पौरुषीं सृष्टिं देवाः सुकृतमूचिरे" इति च ॥ * ॥

तपसा विद्यया युक्तो योगेन च समाधिना[२] ।
[३]आदावृषीन् हृषीकेशः ससर्जाभिमताः प्रजाः ॥ ५२ ॥

"यत्रापि तु हरेर्नाम तदन्यत्र प्रयुज्यते । तदाऽऽन्तरहरेस्तत्र गृहीतिर्नान्यथा भवेत् । स्वातन्त्र्यादवरत्वं च [४]परस्यापि प्रयुज्यते । [५]स्थितस्यापि यथा राज्ञः स्वानां जयपराजयौ" इति पाद्मे[६] ।

अतो हृषीकेशो ब्रह्मान्तर्यामी[७] ॥ * ॥

इति तृतीयस्कन्धे एकविंशोऽध्यायः[८]

तावत् प्रसन्नो भगवान् पुष्कराक्षः कृते युगे ।
दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद् वपुः[९] ॥ ८ ॥

शब्दविषयं ब्रह्म ॥ * ॥

---

१ "भो जगत्स्रष्टः, त्वया कृतमेतत् मानुषकायनिर्माणं सुष्ठुकृतम् । यस्मिन् मानुषशरीरे सर्वेन्द्रियाणां क्रियाश्च सन्ति; न पश्वादिशरीरे । तस्मात् तत्र वागादिसर्वेन्द्रियेषु प्रेरकतया स्थित्वा त्वया साकं वयमन्नमदामः, भोगान् भुञ्ज्महे । तस्मात् सुकृतमिति भावः" इत्यनन्ततीर्थाः । २ "योगेन सुसमाधिना" इति प्र॰ पाठः ।

३ "ऋषीनृषिर्हृषीकेशः" इति च । "हृषीकेशो ब्रह्मान्तर्यामी हरिः कायक्लेशात्मकतपसा, विद्यया ज्ञानेन, अष्टाङ्गयोगेन, असम्प्रज्ञातसमाधिना च सर्वेषामभिमताः प्रजाः प्रजाभूतानृषीन् ससर्ज । नारायण एव ब्रह्मान्तर्यामित्वेन सर्वस्रष्टा, नान्य इति ज्ञापनाय हृषीकेश इत्युक्तम्" इत्यनन्ततीर्थाः । "सर्वस्मादादौ ऋषीन् ससर्ज" इति विजयध्वजीयम् । ४ "वरस्यापि" इति क्वचित् ।

५ युद्धार्थमगतस्य मन्दिर एव स्थितस्यापि राज्ञ एव भटसम्पादितौ जयपराजयौ भवतः, तथा परस्यापि स्वातन्त्र्यादवरशब्दवाच्यत्वं च भवति । ६ "इति च पाद्मे" इति क्वचित् ।

७ एतेन पूर्वश्लोके परः पुरुष इति ब्रह्मणि प्रयोगोऽपि व्याख्यातप्रायः ।

८ प्र॰ पाठेऽत्र विंशोऽध्यायः ।

९ "शाब्दं वेदप्रतिपाद्यं ब्रह्म सर्वगुणपरिपूर्णं वपुर्दधत्" इत्यनन्ततीर्थाः । "शब्दैकवेद्यम्" इति श्रीधरादयोऽपि।

न तेऽजराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतंषष्टिपर्व[1] ।
[2]षण्णेम्यनन्तच्छदि यत् त्रिनाभि[3] कराळस्रोतो जगदाच्छिद्य धावत् ॥
॥ १८ ॥

अनन्तच्छदि अनन्तच्छिदि । अनन्तावयवम्[4] । "तृतीयोऽतिशये" इति महाव्याकरणे[5] । "मथनान्मिथिलो जातः" इत्यादिवच्च ॥ * ॥

नूनं चङ्क्रमणं देव सतां संरक्षणाय ते ।
वधाय चासतां यत् त्वं हरेः शक्तिर्हि पालनी[6] ॥ ५० ॥

योऽर्केन्द्वग्नीन्द्रवायूनां यमधर्मप्रचेतसाम् ।
रूपाणि स्थान आधत्से तस्मै शुक्लात्मने नमः[7] ॥ ५१ ॥

---

१ "षष्टिपर्वम्" इति पाठान्तरम् ।

२ "षण्नेम्यनन्तच्छदि" इति प्र. पाठः । "–च्छिदि" इति क्वचित् ।

३ "त्रिनाभि कराल–" इति प्र. पाठः । "हे अजर अमर, अक्षभ्रमिः अक्षे नाभिद्वारे भ्रमत्, ते कालचक्रं एषामायुर्वृथा न नाशयति । त्वद्भक्तेभ्योऽन्यजगदाच्छिद्याऽयुःक्षयं कृत्वा धावमानम्, अधिमासेन सहत्रयोदशमासाख्यदळवत्, षष्ट्युत्तरत्रिशतदिनाख्यपर्वयुक्तम्, षण्णेमि षडृत्वाख्यधारम्, परमाण्वाद्यनन्तावयवम्, चातुर्मास्यत्रयमेव नाभिर्मध्यं यस्य तत् तथा, कराळस्रोतः क्रूरवेगम् । अतो जीवन्मुक्तानां स्वच्छन्दमृत्युत्वान्न कालभयमिति भावः" इत्यनन्ततीर्थाः । "अजरे जरारहिते परब्रह्मरूपेऽक्षे" इति चार्थान्तरम् । त्रिशतंषष्टिपर्वेत्यत्र शतशब्दे विभक्त्यलोपश्छान्दसः । त्रिशतषष्टिपर्वेत्यर्थः ।

४ "अनन्तच्छदि अनन्तावयवम्" इति प्र. पाठः । अनन्तच्छिदीति न पठ्यते । क्वचित् अनन्तच्छदीति पदं विहाय "अनन्तच्छिदि अनन्तावयवम्" इतीयदेव पठ्यते । छिदिश्छेदः । सूक्ष्मावयव इत्यर्थः । छिदिरेव च्छदिः । अकारादिकारस्य यथा तथेकारादकारस्यापि तृतीयत्वात् ।

५ "इति हि महाव्याकरणे" इति क्वचित् ।

६ "यस्त्वं हरेः शक्तिर्हि पालिनी" इति प्र. पाठः । "सप्तसु प्रथमेति सूत्रात् त्वमिति प्रथमा सप्तम्यर्थे । त्वं त्वयि हरेः पालि(ल)नी सात्विकी शक्तिः सन्निहिता यत् तस्मात् ते चङ्क्रमणं सञ्चरणं संतां रक्षणाय, असतां वधाय च नूनं निश्चितमेव" इत्यनन्ततीर्थाः ।

७ "शुक्लाय ने नमः" इति प्र. पाठः । "अर्कस्य रूपं सर्वप्रकाशकत्वम् । चन्द्रस्याह्लादकत्वम् । अग्नेरधृष्यत्वम् । यमस्य दुष्टदमनम् । धर्मस्य धर्माधर्मविवेचनम् । प्रचेतसो वरुणस्य गाम्भीर्यम् । यस्त्वमेतानि रूपाणि स्थाने तत्तद्विनियोगकाले प्राप्ते आधत्से । शुक्लात्मने शुक्लस्य हरेरधिष्ठानरूपाय" इत्यनन्ततीर्थाः । श्रीधरस्वामी चाऽह—"मनुस्थं विष्णुं प्रणमति" इति । "प्रसङ्गात् स्मृतं भगवन्तं प्रणमति" इति वीरराघवः । "शुक्लस्य हरेः आत्मने प्रतिमारूपाय विशेषावेशसन्निधानस्थानाय" इति विजयध्वजीयम् । "अयं शुक्लः नारायण एव । मनौ तिष्ठतीति तस्मै नमः" इति वल्लभाचार्यः ।

"स्वायम्भुवो मनुश्चैव पृथुश्चैवार्जुनावपि । ब्रह्मशेषविपा रुद्र इन्द्र ऋष्यादयस्तथा ।
विष्ण्वावेशयुताः सर्वे नतु विष्णुस्वरूपकाः" इति तत्त्वनिर्णये ॥ * ॥ * ॥

इति तृतीयस्कन्धे द्वाविंशोऽध्यायः[1]

कामः स भूयान्नरदेव तेऽस्याः पुत्र्याः समाम्नायविधौ प्रतीतः ।
क एव ते तनयां नाऽद्रियेत स्वयैव कान्त्या क्षिपतीमिव श्रियम्[2] ॥ १६ ॥

स्वया[3] कान्त्याऽन्याः क्षिपती[4] श्रीर्यथा तद्वत् स्थिताम् ॥ * ॥

बर्हिष्मती नाम पुरी सर्वसम्पत्समन्विता[5] ।
न्यपतन् यत्र रोमाणि यज्ञस्याङ्गं विधून्वतः[6] ॥ २९ ॥

[7]कुशकाशास्त एवाऽसन् [8]लसद्धरितवर्चसः ।
ऋषयो यैः पराभाव्य यज्ञघ्नान् यज्ञमीजिरे[9] ॥ ३० ॥

---

१ प्र. पाठेऽत्र एकविंशोऽध्यायः ।

२ "यः समाम्नायविधौ 'दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि' इत्यादिरूपे वेदवाक्ये प्रतीतः ख्यातः, हे नरदेव, स कामस्ते तवास्याः पुत्र्याः स्यात् । स्वया स्वाभाविक्या कान्त्या सर्वाः स्त्रियः क्षिपतीं श्रियमिव स्थिताम्" इत्यनन्ततीर्थाः । "स्वया अङ्गकान्त्यैव श्रियं भूषणाद्यन्यशोभां क्षिपतीम्, भूषणभूषणाङ्गीम्" इति श्रीधरादयः ।

३ "स्वकान्त्या" इति क्वचित् । ४ "क्षिपन्ती" इति प्र. पाठः ।

५ "बर्हिष्मतीं नाम पुरीं सर्वसम्पत्समन्विताम्" इत्यनन्ततीर्थाः पठन्ति । तथाहि तद्व्याख्यानम्—"बर्हिष्मतीं नाम पुरीमायान्तं तं प्रत्युदीयुः" इति ।

६ "विधुन्वतः" इति प्र. पाठः । "रसातळाद् भुवमुद्धरतो, यज्ञैरुद्देश्यस्य वराहस्य, कल्पप्रळयोदकार्द्राङ्गं विधून्वतः ज्ञानानन्दादिरूपाणि रोमाणि न्यपतन् । पतितानि तानि रोमाणि सहस्रशोऽवतारा आसन्" इत्यनन्ततीर्थाः ।

७ "कुशाः काशा–" इति प्र. पाठः । ८ "शश्वद्धरित–" इति च ।

९ "कुशकाशाः कुशविशेषाः लसद्धरितवर्चसः भास्वद्दूर्वाङ्कुरश्यामरोचिषः त एवाऽसन् तेभ्य एवाऽसन् । यज्ञं भगवन्तम् (ईजिरे)" इत्यनन्ततीर्थाः ।

"ज्ञानानन्दस्वरूपेभ्यो रोमभ्योऽस्य कुशादयः । विधून्वतः[1] प्रयागे तु वराहवपुषोऽभवन् । रोमाणि तानि देवस्य रूपाण्यासन् सहस्रशः" इति स्कान्दे ।

त एवाऽसन् तेभ्य एवाऽसन् । "सप्तसु प्रथमा" इति सूत्रात् ॥ * ॥

अयातयामास्तस्याऽसन् यामाः स्वान्तरयापनाः ।
[2]शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः ॥ ३५ ॥

"गतसारं यातयामं यामः सार इहोच्यते" इति नारदीये ॥ * ॥

शारीरा मानसा दिव्याः पर्यासे[3] ये च मानुषाः ।
भौतिकाश्च कथं क्लेशं बाधन्ते हरिसंश्रयम् ॥ ३७ ॥

पर्यासे मानुषत्वेनावस्थानेऽपि ॥ * ॥ * ॥

इति तृतीयस्कन्धे त्रयोविंशोऽध्यायः[4]

द्वास्सु विद्रुमदेहळ्या[5] भातं वज्रकवाटिमत्[6] ।
शिखरेष्विन्द्रनीलेषु हेमकुम्भैरधिश्रितम्[7] ॥ १८ ॥

---

१ "विधुन्वतः" इति प्र. पाठः ।

२ "विष्णोः कथाः स्वोत्तमेभ्यः शृण्वतः, विष्णुं ध्यायतः, स्वयं विष्णुविषयं शास्त्रं कुर्वतः, विष्णोः कथाः स्वशिष्येभ्यो ब्रुवतस्तस्य स्वायम्भुवमनोः स्वान्तरयापनाः एकसप्ततिचतुर्युगपरिमितस्वकालवर्तकाः यामा अयातयामा अगतसाराः सफला आसन्" इत्यनन्ततीर्थाः ।

३ "वैयासे" इति प्र. पाठः । "शारीराः क्लेशा ज्वरादयः । मानसाः क्लेशा आधयः । दिव्याः क्लेशा अनावृष्ट्यादयः । पर्यासे मानुषत्वेनावस्थाने ये मानुषाः मनुष्येभ्यो जाताः क्लेशाः । भौतिकाः भूतप्रेतपिशाचादिभ्यो जाताः क्लेशाश्च" इत्यनन्ततीर्थाः ।

४ प्र. पाठेऽत्र द्वाविंशोऽध्यायः ।

५ "-देहल्या" इति प्र. पाठः ।

६ "-कपाटिमत्" इत्यपि पाठान्तरम् । "-कवाटवत्" इति श्रीधराद्यभिमतः पाठः । अनन्ततीर्थानामपि स एव पाठः सम्मत इति भाति । तथाहि तद्व्याख्यानम्—"द्वास्सु द्वारेषु विद्रुमरत्नमयद्वारबन्धेन (भातम्) वज्रमयकवाटयुक्तम्" इति । "कपाटश्च कवाटश्च त्रिषु स्यात्" इति वचनात् त्रिलिङ्गोऽयं शब्दः । तेन कवाटः कवाटं कवाटीति त्रीणि रूपाणि भवन्ति ।

७ "-रधिश्रितम्" इति क्वचित् । इन्द्रनीलमयेषु प्रासादशिखरेषु हेमकुम्भैरधिश्रितम् ।

देहळी द्वारबन्धः[1] ॥ * ॥

हंसपारावतव्रातैस्तत्रतत्र विकूजितम्[2] ।
कृत्रिमान् मन्यमानैः स्वानधिरुह्यावरुह्य च[3] ॥ २० ॥

कृत्रिमान् शोभार्थं कृतान् ॥ * ॥

अथाऽदर्शे स्वमात्मानं स्रग्विणं विरजाम्बरम् ।
विरजं कृतस्वस्त्ययनं[4] कन्याभिर्बहुमानितम् ॥ ३० ॥

आदर्शे ददर्श[5] ॥ * ॥

तस्मिन्नलुप्तमहिमा प्रिययाऽनुषक्तो[6] विद्याधरीभिरुपचीर्णवपुर्विमाने ।
बभ्राज उत्कचक[7] उद्गुणपानवीच्यस्ताराभिरावृत इवोडुपतिर्नभस्थः[8] ॥ ३८ ॥

---

१ देहळीशब्दो हि वस्तुतः द्वाराधस्तनदारुबन्धवाची । यं गृहावग्रहणीत्युदुम्बर इति चाऽहुः । अत्र तु पुनर्न केवलं तावत् । किन्तु समग्रोऽपि द्वारबन्धः (दारन्द इति भाषायाम्) देहळीपदेनोच्यते । समग्रस्यापि विद्रुममयत्वे तात्पर्यादिति । अत्रापि "देहली" इति प्र· पाठः । २ "निकूजितम्" इति प्र. पाठः ।

३ "स्वानधिरुह्याधिरुह्य च" इति च । "कृत्रिमान् शोभार्थं दारुरत्नादिभिः कृतान् पक्षिविशेषानधिरुह्यावरुह्य च स्वानकृत्रिमान् स्वसम्बन्धिपक्षिविशेषान् मन्यमानैः (विकूजितम्)" इत्यनन्ततीर्थाः ।

४ कृतस्वस्त्ययनं दासीभिः कृताशीर्वचनम्, स्वमात्मनं स्वशरीरम् ।

५ अत्र द्वयी गतिः सम्भवति—आदर्शे दर्पण इति प्रतीकं परिगृह्य सप्तम्यन्तस्य तस्यान्वयप्रदर्शनाय ददर्शेत्यध्याहारकथनमित्येकः पक्षः । सकलव्याख्यातृसम्मतश्चायं पन्थाः । आदर्शे इति मूलमनूद्य ददर्शेति तद्विवरणमिति द्वितीयः पक्षः । तथाचाऽदर्श इत्येतच्छान्दसं लकाररूपमित्युक्तं भवति । अत्र कतरः पक्ष आचार्यसम्मत इत्यत्र महान्तः प्रमाणम् । उत्तरपद्य एव "दृष्ट्वा कृतशिरःस्नानम्" इति क्रियापदश्रवणात् ददर्शेत्यध्याहारपक्षे तत्र कारणं च चिन्त्यम् । 'यत्रानवपरोऽन्यत्र' इति हि तद्व्यवस्था । अत्र पुनरादर्श दृष्ट्वेत्याकांक्षापूर्तौ ददर्शेति किमित्यध्याह्रियेत ? अथच दृष्ट्वेतिपदरहितः "स्नातं कृतशिरःस्नानम्" इत्ययमेव पाठः श्रीधरादीनामिवाऽचार्याणामपि सम्मतः ? अत्रापि महान्तः प्रमाणम् ।

६ "-नुरक्तो–" इति प्र. पाठः । ७ "उत्कचकुमुद्गणवानपीच्य–" इति प्र. पाठः ।

८ "विद्याधरस्त्रीभिः उपचीर्णवपुरलङ्कृतशरीरः तस्मिन् विमाने प्रियया सह रममाणः कर्दमो बभ्राजे रेजे । कीदृशः ? तस्यामनुषक्तः । "कचः कळङ्के दोषे च" इत्यभिधानात् उत्कच उद्गतदोषः । उत्कृष्टकच इति वा । उद्गुणपानवीच्यः, उत्कृष्टो गुणो यस्य तदुद्गुणम् । तच्च तत् पानं पातुं योग्यमधरामृतम् । तस्य वीची परम्पराऽस्यास्तीति तादृशः" इत्यनन्ततीर्थाः । "आलिङ्गने चुम्बने वाऽप्यनुषङ्गः" इत्यभिधानात् प्रिययाऽऽलिङ्गितश्चुम्बितो वाऽनुषक्त इति वा ।

उद्गुणपानवीच्यः उत्तमामृतवीचीयुक्तः[१] ॥ * ॥

तस्मिन् विमान उत्कृष्टे[२] शय्यां रतिकरीं श्रिता ।
नचाबुद्ध्यत तं कालं पत्याऽऽवीच्येन[३] सङ्गता ॥ ४५ ॥

"प्राप्तषोडशवर्षः सन्नावीच्य इति कथ्यते" इत्यभिधानम् ॥ * ॥ * ॥

इति तृतीयस्कन्धे चतुर्विंशोऽध्यायः[४]

निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः ।
दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन्[५] ॥ १ ॥

"मालिनी शालिनी काल्या[६] चार्या भार्येति चोच्यते" इति च ॥ * ॥

[७]तस्यां बहुतिथे काले भगवान् मधुसूदनः ।
कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ॥ ६ ॥

---

१ एतेन न केवलं मनोरिदं विशेषणमधरपानवीचीयुक्त इति । किन्तु उपमानस्य चन्द्रस्यापि । अमृतमयकिरणं हि तं वदन्ति । अमृतवीचीति च ज्योत्स्ना । एवमुत्कचक इत्युत्कलङ्कः कलङ्करहित उडुपतिरित्यभूतोपमा सूचिता । अत्र "उद्गुणवानपीच्यः" इति क्वचिन्मुद्रितः पाठः प्रामादिक एव ।

२ "उत्कृष्टाम्" इति प्र. पाठः ।

३ "पत्याऽपीच्येन" इति श्रीधरादयः पठन्ति । "कर्दमपत्नी देवहूती नवरूपिणी तस्मिन् विमाने सुखकरीं शय्यां श्रिता आवीच्येन षोडशवर्षेण पत्या सङ्गता आश्लिष्टा तं अतीतं बहुतरं कालं सुखातिशयेन नाबुद्ध्यत" इत्यनन्ततीर्थाः ।

४ प्र. पाठेऽत्र त्रयोविंशोऽध्यायः ।

५ "अहं त्वद्भार्यायामवतरिष्यामीति शुक्लस्य भगवतो व्याहृतं स्मरन्" इत्यनन्ततीर्थाः ।

६ "माल्या" इति प्र. पाठः प्रामादिकः । "काळ्या" इति क्वचित् । "शालिनी मालिनी भार्या काल्या चार्येति चोच्यते" इत्यनन्ततीर्थीये कोशपाठः । एतेन मूले शालिनीमित्येतद् विवृतम् । वीरराघवोऽप्याह—"शालिनीं स्वगृहिणीम्" इति ।

७ "बहुतिथे अतिबहळे काले एवं स्वपत्युक्तनियमाद्याचरणेन गते सति तस्यां कार्दमं कर्दमस्य विद्यमानं रेत आविष्टः तद्रेतो दग्ध्वा दारुण्यग्निरिव जज्ञे प्रादुर्बभूव" इत्यनन्ततीर्थाः ।

30

"नावतारेष्वपि हरेर्देहः शुक्रादिसम्भवः । तथाऽपि शुक्रसंस्थः सन् मातृदेहं प्रविश्य च । विलाप्य शुक्रं तत्रैव केवलज्ञानरूपकः । उदेति भगवान् विष्णुः काले लोकं विमोहयन्" इति महावराहे[१] ।

"अग्निरिव दारुणि" इति व्यक्तिस्थानमात्रत्वे दृष्टान्तः[२] ॥ * ॥

भगवन्तं परं ब्रह्म सत्त्वेनांशेन शत्रुहन् ।
तत्त्वसङ्ख्यानविज्ञप्त्यै[३] जातं विद्वानजः स्वराट् ॥ १० ॥

"महागुणाभिपूर्णत्वं सत्त्वमित्युच्यते बुधैः" इति वामने ॥ * ॥

अयं सिद्धगणाधीशः साङ्ख्याचार्यैः सुसम्मतः ।
लोके कपिल इत्याख्यां गन्ता ते कीर्तिवर्धनः ॥ १९ ॥

"सम्यग्ज्ञानं तु साङ्ख्यं स्यात् तदर्थो[४] योग उच्यते" इति कापिलेये ॥ * ॥

स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम् ।
विविक्त उपसङ्गम्य प्रणम्य समभाषत ॥ २६ ॥

"युगत्रयेऽवतारेण[५] त्रियुगश्चेति कथ्यते" इति पाद्मे ॥ * ॥

तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव ।
यानियानि च रोचन्ते स्वजनानामरूपिणः[६] ॥ ३१ ॥

---

१ "महावाराहे" इति प्र. पाठः ।

२ यथा दार्वग्नेः व्यक्तिस्थानमात्रं तथा देवहूतिर्भगवत इति व्यक्तिस्थानमात्रत्वे ।

३ "–विज्ञात्यै" इत्यपि प्राचीनकोशेषु पाठान्तरम् । "शत्रुहन् भो विदुर, परं ब्रह्म भगवन्तं देवहूत्यां सत्त्वेनांशेन ज्ञानप्रवर्तकेन चतुर्विंशतितत्वानां संख्यानं सम्यग्ज्ञानं तस्य विज्ञप्त्यै लोके प्रख्यापनाय जातमवतीर्णं विद्वान्, अजः अकारवाच्याद् विष्णोर्जातः स्वराट् सर्वसुराधिपतिर्ब्रह्मा" इत्यनन्ततीर्थाः । "विज्ञप्त्यै विशेषतः, अब्रह्मात्मकप्रधानप्रतिपादकसांख्यशास्त्रवैलक्षण्यतः ज्ञापनाय" इति शुकदेवः ।

४ तदर्थः सम्यग्ज्ञानसाधनभूत उपायो योग उच्यते । ५ "युगत्रयावतारेण" इति क्वचिन्मुद्रितः पाठः ।

६ "भो भगवन्, प्राकृतवैकृतरूपरहितत्वादरूपिणस्तव स्वजनानां भक्तानां ब्रह्मादीनां यानियानि वसुदेवदेवक्यादिरूपाणि अभिव्यक्त्यर्थं रोचन्ते प्रियाणि भवन्ति तान्येव रूपाणि ते तवावतारार्थमभिरूपाणि प्रियाणि । अतः सम्प्रति ब्रह्मादिभक्तानामस्मद्गृहेऽवतारस्य प्रियत्वादस्मत्पुत्रत्वेनावतीर्णोऽसीत्यर्थः" इत्यनन्ततीर्थाः ।

यानियानि ब्रह्मादिरूपाणि[१] रोचन्ते स्वजनानां तान्येव ते व्यक्त्यर्थमभिरूपाणि।

"व्यक्तो भवेद्धरिस्तत्र यत् स्थानं रुचितं[२] सताम्" इति कौर्मे ॥ * ॥

परं प्रधानं पुरुषं महान्तं कालं कविं त्रिवृतं लोकपालम्।
आत्मानुभूत्याऽनुगतप्रपञ्चं स्वच्छन्दशक्तिं कपिलं प्रपद्ये[३] ॥ ३३ ॥

"वेदैर्वृतत्वाद् भगवांस्त्रिवृदित्युच्यते बुधैः[४]" इति च ॥ * ॥

मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके।
अथाजनि मया तुभ्यं यदवोचमृतं मुने[५] ॥ ३५ ॥

[६]सत्यलौकिके यथार्थज्ञानविषये।

"आभासो ज्ञानमालोको लोको भासश्च[७] कथ्यते" इत्यभिधानम् ॥ * ॥

---

१ तथाचायमर्थः—ब्रह्मादिरूपाणीति ब्राह्मणादिरूपाणि। क्वचित् कपिलजामदग्न्यवामनादिषु ब्राह्मणकुले। क्वचिद् रामकृष्णादिषु क्षत्रियकुले। क्वचिच्च मत्स्यकूर्मादितिर्यग्रूपेण च। तथाच यानि रूपाणि ये मत्स्याद्याकाराः भक्तप्रार्थितास्त एव तवापि प्रियाः। अथचार्थान्तरम्— यानि ब्रह्मादिरूपाणि प्रतीकत्वेन भक्तानामिष्टानि। ब्रह्मा हि मुख्यं प्रतीकम्, वायुश्च। अथ यथाक्रमं अग्न्यादिषु च रूपेषु प्रतीकेषु भगवन्तमुपासते तेष्वेव प्रतीकेषु भगवानात्मानमभिव्यनक्ति भक्तानां कृत इति। "रूपंरूपं प्रति रूपो बभूव" इति हि श्रुतिः।

२ "रचितं सताम्" इति प्र. पाठः प्रमाद एव।

३ "परं सर्वतो विलक्षणम्, अत एव प्रधानं सर्वोत्तमम्, पुरि शरीरे शेत इति पुरुषम्, महान्तं त्रिविधानन्त्ययुक्तम्, कालं सर्वसंहारकम्, कविमतीतदर्शिनम्, त्रिभिर्वेदैर्वृतं प्रतिपाद्यम्, सर्वमुक्तामुक्तलोकपालकम्, आत्मानुभूत्या स्वरूपज्ञानेन यथावदवगतसकलप्रपञ्चम्, स्वच्छन्दशक्तिं स्वेच्छयैव सर्वसृष्ट्यादिशक्तियुक्तम्, कपिलम्, कं सुखं पिबत्यनुभवति, भक्तानां लाति ददाति चेति कपिलस्तं प्रपद्ये" इत्यनन्ततीर्थाः।

४ "–च्यते प्रभुः" इति पाठान्तरं प्राचीनकोशेषु।

५ "लोको ज्ञानम्। सत्यलोको यथार्थज्ञानम्। सत्यलौकिके यथार्थज्ञानविषये मया प्रोक्तं वचनमेव हि लोकस्य प्रमाणम्, नान्येन प्रोक्तम्। तस्याज्ञानविप्रलम्भसम्भवात्। एवं सत्यवादित्वादहं त्वां प्रत्यृतं सत्यवचनमेवावोचमिति यदथ तस्मात् मया तव पुत्रत्वेनाजनि जातम्" इत्यनन्ततीर्थाः। "सति सर्वोत्तमे अलौकिके भागवतधर्मे" इति विश्वनाथः।

६ सात्यलौकिके इति वक्तव्य आदिवृद्ध्यभावश्छान्दसः। सत्यो यथार्थश्चासौ लौकिको ज्ञानविषयश्चेति विग्रह इत्यपि वदन्ति। तदानीं तु नाऽदिवृद्धिप्रसङ्गः। लौकिके वेदजन्यज्ञानविषये सत्ये परमार्थतत्व इत्यर्थः।

७ "लोकाभासश्च" इति प्र. पाठः प्रमाद एव।

[1]विश्वमेतद्धि शास्त्रेण विज्ञायाऽत्मानमीश्वरम् ।
मुनिः शान्तमनोवाक्यस्तर्हि न ख्यात्युपप्लवः[2] ॥ ४० ॥

विश्वमेतत् एतादृशम्, असारं यतः[3], अत ईश्वरं विज्ञाय न ख्यात्युपप्लवः[4] । दुःखाज्ञानाद्युपद्रवो न[5] ॥ * ॥

निरहङ्कृन्निर्ममश्च[6] निर्द्वन्द्वः समदृक् स्वदृक् ।
[7]प्रत्यग्रः शान्तधीर्धीरः प्रशान्तोर्मिरिवोदधिः ॥ ४५ ॥

"अनन्याधीनशक्तित्वाद्धरिः स्व इति[8] चोच्यते" इति मात्स्ये ।

प्रत्यग्रतिः[9] ॥ * ॥

आत्मानं सर्वभूतेषु भगवन्तमवस्थितम् ।
अपश्यत् सर्वभूतानि भगवत्यपि चाऽत्मनि ॥ ४७ ॥

---

१ अयं श्लोकः श्रीधराद्यभिमते प्रचलिते भागवतपाठे न पठ्यते ।

२ "–स्तदा नाऽख्यात्युपप्लवः" इति च पाठान्तरं क्वचित् । "विश्वं जगत् एतद्धि एतादृशं हि । अनित्यं सदोषं च । तस्माद् विश्वं विहाय वेदादिशास्त्रेण परमात्मानं विज्ञाय भक्त्या भज । तर्हि तथाकरणे ख्यात्युपप्लवः ख्यातिर्देहादावहंममेतिज्ञानम्, तद्वतां य उपप्लव उपद्रवो जननमरणादिः स नास्ति । उपप्लवः संसारोपद्रवः न न ख्याति न भवतीति वा । कीदृशो भजेत्? मुनिरपरोक्षज्ञानी, निवृत्तप्राकृतलिङ्गशरीररूपमनोवचनादीन्द्रियः" इत्यनन्ततीर्थाः । "मुनिर्मननशीलः । शान्तमनोवाक्यः निवृत्तान्यविषयमनोवाग्व्यापारः" इति यादुपत्यम् ।

३ हीत्यस्यार्थोऽयम् । हि यतः विश्वमेतदसारम्, अत आत्मानमीश्वरं विज्ञाय यदा मुनिर्भवति तदा न ख्यात्युपद्रव इति ।

४ अत्रापि द्वयी गतिः । ख्यात्युपप्लव इत्येकं पदमिति, ख्यातीति भिन्नं तिङन्तरूपमिति । उभयमप्यनन्ततीर्थैः परिगृहीतम् । द्वितीयं विजयध्वजीये यादुपत्ये च ।

५ "दुःखाद्युपद्रवो न" इति क्वचित् ।

६ "निरहङ्कृतिर्निर्ममश्च" इति प्र. पाठः ।

७ "प्रत्यक्प्रशान्तधी–" इति च । "देहे निरहङ्कृत् अहङ्काररहितः, दैहिकेषु ममेदमिति बुद्धिरहितः, निर्द्वन्द्वः शीतोष्णादिसहः । समदृग् यथार्थज्ञानी । स्वः स्वतन्त्रो विष्णुस्तं सर्वत्र व्याप्तं पश्यतीति स्वदृक् । प्रत्यक् अन्तर्हृदिस्थितपरमात्मदर्शनादिना रतिः सुखं यस्यासौ प्रत्यग्रः । शान्तधीः क्रोधरहितबुद्धिः । धीरः सम्पदि विपदि चोच्चनीचत्वरहितः" इत्यनन्ततीर्थाः ।

८ "स्वरिति" इति पाठान्तरम् ।

९ "प्रत्यग्रः प्रत्यग्रतिः" इति प्र. पाठः ।

"भूतगर्भश्च भूतस्थः पूर्ण एव[1] द्विरूपवान् । अत आत्मेति तं प्राहुः [2]सदैवाऽऽत्तगुणो यतः" इति च ॥ * ॥ * ॥

इति तृतीयस्कन्धे पञ्चविंशोऽध्यायः[3]

तं त्वा गताऽहं शरणं शरण्यं स्वभृत्यसंसारतरोः कुठारम् ।
जिज्ञासया प्रकृतेः पूरुषस्य[4] नमामि सद्धर्मविदां वरिष्ठम् ॥ ११ ॥

"नारायणो ब्रह्मवायू वीन्द्रशेषौ हरस्तथा । कामः शक्रगुरू दक्षमन्वाद्या[5] भास्करादयः । सर्वेजीवाश्च[6] क्रमशः पुरुषाख्याभिशब्दिताः । [7]तत्पत्न्यो बन्धशक्तिश्च स्त्रियः सर्वास्तथा जडम् । क्रमात् प्रकृतिशब्दोक्तास्तज्ज्ञानाद् विप्रमुच्यते" इति दत्तात्रेययोगे ॥ * ॥

[8]योग आध्यात्मिकः पुंसां मतो निश्श्रेयसाय मे ।
अत्यन्तोपरतिर्यत्र दुःखस्य च सुखस्य च[9] ॥ १३ ॥

"परमात्मादिकं देहे यदध्यात्मं तदीरितम्" इति च । "सुखं शरीरभोग्यं तु दुःखं सर्वं तथैव च । मुक्तौ विलयमायाति नित्यानन्दस्तु भुज्यते" इति च ॥ * ॥

अहम्ममाभिमानोत्थैः कामलोभादिभिर्मलैः ।
वीतं यदा मनः शुद्धमदुःखमसुखं समम् ॥ १६ ॥

---

१ "एवं द्विरूप-" इति प्र. पाठः । २ "सदैवाऽत्तगुणो-" इति च ।

३ प्र. पाठेऽत्र चतुर्विंशोऽध्यायः ।

४ प्रकृतेः लक्ष्मीसरस्वत्यादीनां ततेः, पुरुषस्य तत्पतीनां हरिविरिञ्चादिदेवानां समूहस्य च स्वरूपजिज्ञासयाऽहं त्वां शरणं गताऽस्मि, नमामि च । प्रकृतेर्बन्धकप्रकृतेः, पुरुषस्य जीवस्य जिज्ञासया च" इत्यनन्ततीर्थाः ।

५ "कामः शक्रो गुरुर्दक्षो मन्वाद्या-" इति प्र. पाठः ।

६ "सर्वे जीवाश्च" इति क्वचित् । ७ "एतत्पत्न्यो बन्धशक्तिः स्त्रियः" इति प्र. पाठः ।

८ "आध्यात्मिकः शरीरमधिकृत्य वर्तमानानां परमात्मादितत्वानां स्वरूपज्ञानात्मको योगः निःश्रेयसाय मोक्षाय मतः मोक्षसाधनमिति निरूपितः" इत्यनन्ततीर्थाः ।

९ "भौतिकशरीरभोग्यसुखस्य च" इत्यनन्ततीर्थाः । "सांसारिकस्य सुखस्य" इति विश्वनाथः । "सुखस्य प्राकृतस्य" इति शुकदेवः । "वैषयिकसुखस्य" इति वीरराघवः ।

तदा पुरुष आत्मानं केवलं प्रकृतेः परम् ।
निरन्तरं स्वयञ्ज्योतिरणिमानमखण्डितम् ॥ १७ ॥

ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चाऽत्मना ।
परिपश्यत्युदासीनां[१] प्रकृतिं च हतौजसम्[२] ॥ १८ ॥

"बाह्ये सुखे त्वनासक्तेरसुखं दुःखवर्जनात् । अदुःखं हरिभक्त्यैव नित्यानन्दं यदा मनः । तदा तं परमात्मानं पश्यत्यात्मप्रसादतः[३]" इति कापिलेये ॥ * ॥

"अभेदात् स्वावतारेषु निरन्तर उदाहृतः । गुणदेहेन्द्रियाभेदात्[४] केवलोऽसदृशत्वतः । अखण्डः [५]पूर्णशक्तित्वादहमेकः सदा[६] मतः" इति च ॥ * ॥

"बन्धशक्तिः प्रकृत्याख्या विष्णुशक्त्या वियुज्यते[७]" इति च ॥ * ॥

---

१ "–त्युदासीनम्" इति प्र. पाठः ।

२ श्लोकत्रयं व्याख्यातमनन्ततीर्थीये–"भक्तिपुरस्सरनिरन्तरश्रवणमनन ध्यानैः हरिज्ञानेन यदा मनोऽहम्ममाभिमानोत्थैः देहदैहिकेषु अहम्भावममत्वाभिमानैरुत्पन्नैः कामलोभादिभिर्दोषैर्वीतं रहितम्, अत एव शुद्धं निर्दोषम्, दुःखास्पर्शनाददुःखम्, परतत्वानुभवेन बाह्यशब्दादिजन्यसुखेऽनासक्तेरसुखम्, बाह्यसुखरहितम्, समं हरिभक्त्यैव नित्यानन्दं भवति तदा पुरुषो जीवो ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चाऽत्मना स्वरूपमनसा स्वस्वरूपापरोक्ष्यपूर्वकं स्वबिम्बभूतनामादिप्राणपर्यन्ताः पोडशकलादेवता अपरोक्षीकृत्य तत्प्रसादात् स्वबिम्बभूतं परमात्मानं प्रत्यक्षीकरोति । प्रकृतिं बन्धकशक्तिं च हतौजसं बन्धनसामर्थ्यहीनाम्, अत एवोदासीनां बन्धनादुद्गत्यासीनां परिपश्यति । कीदृशं परमात्मानम्? केवलं असदृशम्, अवतारगुणदेहादिषु भेदाभावान्निरन्तरम्, अखण्डितं परिपूर्णशक्तिं, प्रकृतेः श्रियः परमुत्तमम्" इति । "शुद्धं चित्स्वरूपं दूरीभूताचिन्मनःसम्पर्कम्" इति विजयध्वजीयम् । "समं निश्चलम्" इति च । "परिपश्यतीत्यत्र परीत्युपसर्गात् प्राणपर्यन्तं परितो वर्तमानाः स्वबिम्बदेवताश्चापरोक्षीकृत्य तत्प्रसादादिति ग्राह्यम्" इति च । "अणिमानमित्यनेन स्वबिम्बरूपमेवोच्यते । य आत्मनि तिष्ठन्नित्यादेः" इति च । "स्वयञ्ज्योतिः स्वप्रकाशम्" इति यादुपत्यम् ।

३ नामादिप्राणपर्यन्तानां स्वान्तर्नियामकतया आत्मशब्दवाच्यानां प्रसादतः, तद्द्वारा च परमात्मप्रसादतः इत्यर्थः । अनन्ततीर्थीये तथा व्याख्यानादयं विशेषोऽवगम्यते ।

४ स्वावतारेषु अभेदात् गुणदेहेन्द्रियाभेदाच्च निरन्तर उदाहृतः । असदृशत्वतः केवल उदाहृतः । यादुपत्ये तु "स्वावतारेषु अभेदान्निरन्तरः, गुणदेहेन्द्रियाभेदात् केवलः, असदृशत्वतः एकः" इति व्याख्यातम् । अनन्ततीर्थीयादिप्राचीनग्रन्थविरोधात् अन्वयास्वारस्याच्च तच्चिन्त्यम् ।

५ "अखण्डपूर्णशक्तित्वात्" इति प्र· पाठः प्रामादिकः । पूर्णशक्तित्वात् अखण्डः अखण्डित उदाहृतः ।

६ "–मेकः सुरा मतः" इति पाठान्तरम् ।

७ एतेन "प्रकृतिं च हतौजसम्" इति व्याख्यातम् ।

मय्यनन्येन भावेन[1] भक्तिं कुर्वन्ति ये दृढाम् ।
[2]मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः ॥ २२ ॥

"यादृशी मयि भक्तिः स्यात् तादृश्यन्यत्र नैव चेत् । अनन्यभक्तिरुद्रेकात् सा यथैव तरेत् सृतिम्" इति च ॥ * ॥

मदाश्रयाः कथा हृष्टाः[3] शृण्वन्ति कथयन्ति च ।
[4]तपन्ति विविधांस्तापानैकात्म्यगतचेतसः ॥ २३ ॥

"एकः पूर्णो हरिर्नान्यस्तदन्ये तद्वशा मताः । इति ज्ञानं स्थिरं यत् तदैकात्म्यज्ञानमुच्यते" इति ब्रह्माण्डे ॥ * ॥

विदित्वाऽर्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाऽभिजातः ।
तत्त्वाम्नायं यत् प्रवदन्ति साङ्ख्यं प्रावोचद् वै[5] भक्तिवितानयोगम् ॥ ३१ ॥

"शुक्लेन जनिरन्येषां हरेः स्वतनुवैव तु । नित्योदितज्ञानतनोः कुतः स्याच्छुक्लतो जनिः" इति गारुडे[6] ॥ * ॥

देवानां गुणलिङ्गानामानुश्रविककर्मणाम्[7] ।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥ ३२ ॥

अनिमित्ता भगवति[8] भक्तिः सिद्धेर्गरीयसी ।
जरयत्याशु या कोशं निगीर्णमनलो यथा ॥ ३३ ॥

---

१ अनन्नेन अन्याविषयेण भावेन" इत्यनन्ततीर्थाः । "अनन्येनाव्यभिचरितेन भावेनान्तःकरणेन" इति वीरराघवः । "न विद्यतेऽन्योऽहमिवाऽराध्यो यस्य तेन भावेन दास्यसख्यादिना" इति विश्वनाथः ।

२ "मत्प्रीत्यर्थं त्यक्तकाम्यकर्माणः" इत्यनन्ततीर्थाः ।

३ "मदाश्रयकथा हृष्टाः" इति क्वचित् । "मदाश्रयाः कथा मृष्टाः" इति प्र. पाठः ।

४ "विविधांस्तापान् तपांसि 'आकण्ठमग्नः शिशिरे' इत्यादीनि तपन्ति कुर्वन्ति" इत्यनन्ततीर्थाः ।

५ "प्रोवाच वै" इति प्र. पाठः । "यत्र यस्यां देवहूत्यां स्वयं सच्चिदानन्दरूपया तन्वाऽभिजातः प्रादुर्भूतः तस्या मातुरित्थमर्थमभिप्रायं विदित्वा भगवान् कपिलो यत् सांख्याख्यं तत्त्वाम्नायं तत्त्वप्रतिपादकं शास्त्रं वदन्ति कवयः तत् सांख्यशास्त्रं मात्रे प्रावोचत् । कीदृशम् ? भक्तिवितानयोगम्, भक्तियोगविस्तारसहितम्" इत्यनन्ततीर्थाः ।

६ "इति च गारुडे" इति क्वचित् ।

७ "–मानुश्राविकर्मणाम्" इति क्वचित् पाठः प्रामादिकः ।

८ "भगवती" इति प्र· पाठः । अनन्ततीर्थीये श्लोकद्वयस्यार्थः स्फुटः—"सर्वजीवेन्द्रियप्रेरकतया गुणलिङ्गानां शब्दादिगुणगमकानां इन्द्रियाभिमानिनाम्, आनुश्रविककर्मणाम् वेदोक्तकर्मानतिलङ्घिनाम्, तात्त्विकसंज्ञानां

"आनुश्रविक[1]कर्माऽसौ श्रुत्युक्तं यो न लङ्घयेत्" इति भविष्यत्पर्वणि। "सदा सर्वगुणाढ्यत्वात् सत्त्वो[2] विष्णुरुदीर्यते" इति कापिलेये ॥ * ॥

"अपूर्णभक्तेर्मुक्तौ तु न सुखं पूर्तिमेष्यति । अतस्तादृशमुक्तेश्च[3] भक्तिः पूर्णा गरीयसी" इति च ॥ * ॥

नैकात्मतां[4] मे स्पृहयन्ति केचिन्मत्पादसेवाभिरता मदीहाः ।
येऽन्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुषाणि ॥ ३४ ॥

"नेच्छन्ति सायुज्यमपि फलत्वेन हरिर्यदि । ददाति भक्तिसन्तुष्टा[5] आज्ञात्वेनैव गृह्यते । तादृशानां सुखाधिक्यं पुनर्मुक्तौ भविष्यति" इति च ॥ * ॥

ब्रह्मादिदेवानां सत्वे साधुगुणरूपे भगवति एकाग्रतया स्थितस्य मनसः या वृत्तिर्वर्त्तनम्, स्वाभाविकी गङ्गाप्रवाहसदृशा, अनिमित्ता फलसङ्कल्परहिता च सा मुख्यभक्तिरित्युच्यते। सा च सिद्धेरपूर्णसुखरूपमुक्तेर्गरीयसी श्रेष्ठा। इदमुक्तं भवति—उत्तमाधिकारिणः पुरुषस्य देहेन्द्रियादिप्रेरकाणां शब्दादिज्ञापकानां हर्याज्ञारूपवेदोक्तमार्गेण प्रवर्तमानानां महदहङ्काराद्यभिमानिनां ब्रह्मादिदेवानां मनसो या भगवत्येकाग्रतया वृत्तिः सा भक्तिरिति। या भक्तिः कोशं लिङ्गशरीरं जरयति नाशयति। निगीर्णं सर्वतो ग्रस्तं काष्ठम्" इति। "निगीर्णं भुक्तमन्नमनलो जाठरो यथा जरयति" इति श्रीधरस्वामी।

१ "आनुश्राविक–" इति मुद्रितपाठः प्रामादिकः। "अनुश्रवो वेदस्तद्विहितमानुश्रविकम्, तदेव कर्म येषाम्" इति श्रीधरादयोऽप्याहुः।

२ "सत्त्वे सत्त्वमूर्तौ हरावेव" इति श्रीधरीयम्। "सान्निध्यमात्रेण सत्त्वगुणोपकारके विष्णौ" इति जीवगोस्वामी। "सत्त्वे शुद्धेऽप्राकृतशरीरिणि भगवति" इति शुकदेवः। ३ "–मुक्तेस्तु" इति क्वचित्।

४ प्राचीनकोशेषु क्वचित् "नैकात्म्यताम्" इत्यपि पाठः पठ्यते। शुकदेवोऽप्येवमेव पठति। अनन्ततीर्थाद्यभिमतश्चायमिति भाति। तथाहि तद्व्याख्यानम्—"ये भागवताः मद्भक्ताः अन्योन्यतः परस्परं प्रसज्य मिळित्वा मम पौरुषाणि कथयन्ति शृण्वन्ति च, ते मम ऐकात्म्यतां सायुज्यरूपां मुक्तिं मया दत्तामपि नेच्छन्ति। तथाऽप्याज्ञात्वेनैव स्वीकुर्वन्ति। ते कियन्तः सन्तीत्यत उक्तं-केचिद् देवादय इति। मदीहाः मद्विषयकर्माणः। एषूत्तमभक्तेषु तवाप्यन्तर्भाव इति भावः" इति। ऐकात्म्यतेति पाठे एकात्मैव ऐकात्म्यम्। तस्य भावः, समानभाव इति यावत्, ऐकात्म्यता। यद्वा ऐकात्म्यमित्येकात्मसम्बन्धि। ऐतादात्म्यमितिवत्। तस्य भाव ऐकात्म्यता, एकात्मसम्बन्धित्वमिति यावत्। सम्बन्धश्च सादृश्यम्। तेन साधर्म्यमेवान्ततः अर्थो भवति। गीताभाष्ये भगवत्पादैरेतदुद्धृतम्। तत्र 'नैकात्मताम्' इत्येव पठ्यते। "एकात्मतां सायुज्यमोक्षम्" इति श्रीधरादयोऽप्याहुः।

५ भक्तिसन्तुष्टाः, सन्तोषस्तृप्तिः, अन्यत्रालम्बुद्धिरिति यावत्। भक्त्यैव केवलं सन्तुष्टाः अन्यदनपेक्षमाणास्तत्फलत्वेन सायुज्यमपि नेच्छन्ति। यदि हरिर्ददाति तर्हि तदाज्ञेति स्वीकुर्वते। "भक्तिसन्तुष्टः" इति प्र. पाठः। तदात्वे हरिविशेषणमिति कर्तृसमर्पकं पदमध्याहार्यं भवति।

न कर्हिचिन्मत्पराः शान्तरूपा[1] नङ्क्ष्यन्ति[2] मे नोऽनिमिषो लेढि हेतिः ।
येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् ॥ ३८ ॥

आदानादिकर्तृत्वादात्मा ॥ * ॥ * ॥

इति तृतीयस्कन्धे षड्विंशोऽध्यायः[3]

---

[4]न जातो न म्रियेताऽत्मा स हि देहाद्युपाधिभिः ।
निमित्तैरात्ततद्धर्मो यथा स्वप्ने तदीक्षिता[5] ॥ ४ ॥

स हि परमो न जायते न म्रियेतेति[6] प्रसिद्धं हि[7] । देहाद्युपाधिभिरात्ततद्धर्मो[8] जीवोऽपि स्वप्नवद् भ्रान्त्यैव[9] जायते म्रियते च । भ्रान्तित्वाद् देहात्मत्वस्य । किमु सर्वज्ञत्वस्वतन्त्रत्वादिवैलक्षण्ययुक्त ईश्वरः ।

---

१ "शान्तरूपे" इति प्र. पाठः ।

२ "नंक्ष्यन्ति नो मेऽनिमिषो-" इति च । "-मेऽनिमिषा" इत्यनन्ततीर्थपाठ इति भाति । तथाहि तद्व्याख्यानम्—"मत्परा एवं मुक्ता मम भक्ता कर्हिचित् कदाचिदपि न नंक्ष्यन्ति । जननमरणाख्यं नाशं न प्राप्नुवन्ति । शान्तरूपाः अलग्बुद्धिगोचरसुखानुभवरूपाः । मे अनिमिषा हेतिः ममायुधेन चक्रेणाभिमन्यमानकालचक्रं तान् नो लेढि न स्पृशति । कालतश्च तेषां नाशो नास्तीत्यर्थः । येषां मुक्तानामहं प्रिय आत्मा स्वामी । सुहृदोऽनिमित्तबन्धवश्च । बहुरूपत्वाद् बहुवचनम्" इति । ३ प्र. पाठेऽत्र पञ्चविंशोऽध्ययाः ।

४ अयं श्लोकः प्र. पाठे न पठ्यते । न व्याख्यातश्च श्रीधरस्वाम्यादिभिः । वीरराघवस्तु किञ्चिद्व्यत्यासेन पठति । तद्यथा- "न जायते न म्रियते सह देहाद्युपाधिभिः । निमित्तैरात्तधर्मोऽयं यथा स्वप्ने तदीक्षिता" इति ।

५ "स्वप्नैस्तदीक्षिता" इत्यनन्ततीर्थसम्मतः पाठ इति भाति । तथाहि तेषां व्याख्यानम्—"स परमात्मा न जातः, न म्रियेत च । 'न जायते म्रियते वा कदाचित्' इत्यादेः । अस्मिन्नर्थे कैमुत्यन्यायमाह—देहाद्युपाधिभिः देहेन्द्रियाद्युपाधिलक्षणैः निमित्तैः कारणैः आत्ततद्धर्मः स्वीकृतजननादिदेहधर्मः जीवोऽपि न स्वरूपतो जायते म्रियते च । किन्तु देहात्मत्वभ्रान्त्या जायते म्रियते च । अत्र दृष्टान्तमाह—यथेति । तदीक्षिता स्वप्नद्रष्टा पुरुषः स्वप्नैः स्वप्नदृष्टैः जननादिभिर्यथा न जायते न म्रियते च तथा । उपाधिसम्बन्धरहितः परमात्मा जननादिमान् नेति किमु वक्तव्यमिति भावः" इति ।

६ "न म्रियत इति" इति प्र. पाठः । "न जातो न म्रियत इति" इति क्वचित् ।

७ "प्रसिद्धा हि" इति क्वचित् । ८ "-रात्तधर्मो-" इति प्र॰ पाठः ।

९ "भ्रान्त्या जायते" इति प्र. पाठः ।

31

"परस्य जन्ममृत्याद्याः स्युः स्वतन्त्रस्य किम्पुनः । जीवस्यापि यतो [1]भ्रान्तिर्जन्ममृत्यादिसङ्गतिः" इति महाकौर्मे ॥ * ॥

स एव[2] प्रकृतिं सूक्ष्मां दैवीं[3] गुणमयीं विभुः ।
यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥ ५ ॥

गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः ।
विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया[4] ॥ ६ ॥

उपगतां[5] समीपस्थाम् ॥ * ॥

मुमुहे मोहयामास । "तदेतन्मे विजानीहि", "कृत्वा विवाहम्" इत्यादिवत्[6] ।

"यत्र कारयिताऽतीव स्वतन्त्रस्तत्र कर्तृता । प्रोच्यते तु[7] यथा ब्रह्म त्वज्ञं संसारभागिति" इति च[8] । "लये वाप्यथया सृष्टावन्तरालेऽपि[9] न कचित् । प्रकृत्या रहितं ब्रह्म कदाचिदवतिष्ठते"[10] इति कापिलेये ॥ * ॥

एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् ।
कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते[11] ॥ ७ ॥

एवं पराभिध्यानेन परमात्मेच्छया प्रकृतेः कर्तृत्वं जीव आत्मनि मन्यते ॥ * ॥

---

१ "भ्रान्त्या जन्म–" इत्यपि पाठान्तरम् । २ "स एष–" इति प्र. पाठः ।

३ "देवीम्" इत्यनन्ततीर्थाः पठन्ति । तथाहि तेषां व्याख्यानम्– "स परमात्मा सूक्ष्मां अतीन्द्रियरूपाम्, सत्त्वादिगुणाभिमानिनीम्, प्रकृतिं देवीं श्रियं देवीम्, यदृच्छया स्वेच्छयैव सदा उपगतां समीपस्थाम्, सिसृक्षतीं जगत्सृष्ट्यर्थं लीलयाऽभ्यपद्यत" इति । दैवीमिति पाठे देवस्य विष्णोरियं दैवी ।

४ "स्वप्रेरणया सत्त्वादिगुणैः सात्त्विकादिभेदेन विचित्राः, सरूपाः करचरणादिमत्त्वेन समानरूपाः प्रजाः सृजन्तीं प्रकृतिं विलोक्य स हरिरिह संसारे ज्ञानगूहया ज्ञानं गूहन्त्या प्रकृत्या सद्य एव तं जीवं मुमुहे मोहयामास" इत्यनन्ततीर्थाः ।

५ "उपागताम्" इति प्र॰ पाठः प्रामादिकः ।

६ विजानीहि विज्ञापय । अभिमन्योः विवाहं कृत्वा कारयित्वा । ७ "उच्यते तु" इति क्वचित् ।

८ "संसारभागिति च" इत्यन्ते पुनरितिकरणरहितः प्र. पाठः प्रामादिकः ।

९ "सृष्टौ त्वन्तरालेऽपि" इति प्र. पाठः । १० "कदाचिदपि तिष्ठति" इति प्र॰ पाठः ।

११ "एवमुक्तप्रकारेण पराभिध्यानेन परमात्मेच्छया प्रकृतेः सत्त्वादिगुणैः सात्त्विकादिकर्मसु प्रकृत्या क्रियमाणेषु सत्सु तस्याः कर्तृत्वं स्वव्यतिरिक्तदेहादावहंममताभिमानेन जीवोऽहं कर्तेत्यात्मनि मन्यते" इत्यनन्ततीर्थाः ।

तदस्य संसृतिर्बन्धः पारतन्त्र्यं च तत्कृतम् ।
भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः[१] ॥ ८ ॥

"विष्णोः सुराणां गुरूणां नित्या जीवस्य तन्त्रता[२] । यत्तु तस्यान्यतन्त्रत्वं तज्ज्ञानाद् विनिवर्तते" इति च ।

अकर्तुरीशस्य सकाशात् ।

"अक्लिष्टत्वादकर्ताऽसावकार्यत्वादथापि वा" इति च । "एष कर्ता न क्रियते कारणं च जगत्पतिः[३]" इति भारते[४] ॥ * ॥

कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः ।
भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम्[५] ॥ ९ ॥

"ब्रह्मादिभिः सर्गवैरी श्रीर्विष्णुबलसंश्रयात् । सुखदुःखप्रदो विष्णुः स्वयमेव सनातनः । कर्तृत्वं सुखदुःखानामन्येषां च[६] तदाज्ञया । भोक्तृत्वं सुखदुःखानां करोत्येको हरिः स्वयम् । भोक्तृत्वमात्रहेतुत्वं जीवे नान्यत्र कुत्रचित्" इति भविष्यत्पर्वणि । "प्रकृतिं पुरुषं चैव विद्ध्यनादी[७]" इति च ॥ * ॥

यत्तत् त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् ।
प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्[८] ॥ ११ ॥

---

१ "तस्मात् कारणात् अस्य जीवस्य तत्कृतः संसृत्याख्यो बन्धः, तत्कृतं पारतन्त्र्यं स्वाधमाधीनता च, अकर्तुरक्लिष्टकारिणः सक्षादीक्षितुः निर्वृतात्मनः सुखरूपस्य हरेः सकाशाद् भवति" इति च ।

२ "जीवस्वतन्त्रता" इति पाठश्चिन्त्यः ।

३ "कारणं जगतः प्रभुः" इति क्वचित् । "कारणं च जगत्प्रभुः" इति प्र· पाठः ।

४ "इति च भारते" इति क्वचित् ।

५ अत्र "पुरुषः प्रकृतेः परः" इत्यनन्ततीर्थानां पाठः । तथाहि तेषां व्याख्यानम्–"कार्याणि शरीराणि, करणानीन्द्रियाणि, कर्तृ मनः । कार्यकारणकर्तृत्वे देहेन्द्रियमनोभिः जीवस्य देहादावहम्ममतादिबन्धापादने प्रकृतिं कारणमाहुः । जीवस्य भोक्तृत्वे सुखदुःखादानशक्त्यापादने च प्रकृतेः परः पुरुषो विष्णुः कारणमित्याहुः" इति ।

६ "–मन्येषां तु तदाज्ञया" इति प्र. पाठः ।

७ "विद्ध्यनादी उभावपि" इति क्वचित् । क्वचिच्च "विद्ध्यनादीतिच" इत्यप्रगृह्य पाठः । क्वचिदन्ते "इति च" इति न पठ्यते ।

८ "यत् तत्त्वं त्रिगुणं सत्त्वादिगुणवत्, अव्यक्तं सूक्ष्मम्, नित्यमविनाशि, सदसदात्मकं व्यक्ताव्यक्तात्मकम्, ज्ञानिनस्तत् तत्त्वं प्रधानमिति प्रकृतिरिति च प्राहुः । कीदृशम् ? अविशेषम् अकार्यमनुत्पत्तिमदिति यावत् । विशे-

"व्यक्ताव्यक्तात्मकं यत्तद् विद्याद्[1] सदसदात्मकम् । असर्गा केवलाऽव्यक्ता सिसृक्षुरुभयात्मिका । व्यक्तैव कार्यरूपा तु प्रकृतिस्त्रिविधा मता[2] । कार्यतः सा प्रधानत्वात् प्रधानमिति [3]कीर्त्यते । अविशेषा ह्यकार्यत्वात् सा च श्रीर्विष्णुसंश्रया" इति हरिवंशेषु । "विशेषः कार्यमुद्दिष्टं विशेषाद् दृश्यते यतः" इति पाद्मे ॥ * ॥

मनो बुद्धिरहङ्कारश्चित्तमित्यन्तरात्मनः[4] ।
चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥ १५ ॥

"बुद्धिरध्यवसानाय संशयं कुरुते मनः । अभिमाने त्वहङ्कार[5]श्चित्तं स्मरणकारणम्" इति स्कान्दे ॥ * ॥

एतावानेव सङ्ख्यातो ब्रह्मणः सगुणस्य हि[6] ।
सन्निवेशो मया प्रोक्तो यः कालः पञ्चविंशकः ॥ १६ ॥

"हरिस्तु निर्गुणं ब्रह्म श्रीर्ब्रह्म सगुणं स्मृता । तदङ्गजानि तत्त्वानि तस्माद् तद्रूपमुच्यते" इति हरिवंशेषु ॥ * ॥

प्रभावं पौरुषं प्राहुः कालमेके यतो भयम् ।
अहङ्कारविमूढस्य कर्तुः प्रकृतिमीयुषः[7] ॥ १७ ॥

षवत् महदादिकार्ययुक्तं च । अत्रायं विवेकः—जडप्रकृत्यभिमानिनी सृष्टेर्निवृत्ता श्रीरव्यक्ता असदित्युच्यते। सृष्ट्यभिमुखी तु व्यक्ताव्यक्तत्वात् सदसदित्युच्यते । कार्यरूपा तु जडा प्रकृतिः सदित्युच्यत इति" इत्यनन्ततीर्थाः ।

१ "विन्द्यात्" इति प्र. पाठः प्रामादिकः ।

२ "केवला सृतिकर्मोदासीनाऽव्यक्ता । सिसृक्षुत्वविशेषोपेता व्यक्ताव्यक्ता । महदादिकार्यव्यापिनी व्यक्तैवेति त्रिरूपिणी श्रीरुच्यते । एवं जडरूपा प्रकृतिरपि प्रधानरूपाऽव्यक्ता । उपादानरूपा व्यक्ताव्यक्ता । महदादित्वेन परिणीयमाना व्यक्तैव" इति विजयध्वजीयम् ।

३ "गीयते" इत्यनन्ततीर्थाः पठन्ति ।

४ "–रात्मकम्" इति श्रीधराद्यभिमतः पाठः । "अन्तरात्मनो मनसो लक्षणरूपया सङ्कल्पादिस्वभावरूपया वृत्त्या" इत्यनन्ततीर्थाः ।

५ "अभिमानो ह्यहङ्कार–" इति प्र. पाठः ।

६ "सगुणस्य ह" इति प्र. पाठः । "सगुणस्य त्रिगुणसहितस्य ब्रह्मणः प्रधानस्य तदभिमानिन्याः श्रियश्च" इत्यनन्ततीर्थाः ।

७ "एके सम्यग्ज्ञानिनः कालं पौरुषं पुरुषो विष्णुस्तत्सम्बन्धि प्रभावं प्रकर्षेण भावं व्याप्तरूपमाहुः । अहङ्कारममकाराभ्यां विमूढस्य मिथ्याभिमानिनः प्रकृतिबद्धस्य जीवाख्यकर्तुः यतः कालान्मरणादिभयं भवतीत्यर्थः" इति च ।

"पुरुषो हृदिस्थः परमः कालः सर्वगतो हरिः । अथवा रुद्रदेहस्थो हरिः काल इतीरितः" इति ब्राह्मे ।

पौरुषं प्रभावम् । पुरुषस्य प्रकर्षेण भावं व्याप्तरूपम्[१] । एके सम्यग्ज्ञानिनः । न प्राकृताः[२] ॥ * ॥

दैवात् क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् ।
आधत्त वीर्यं साऽसूत महत्तत्त्वं हिरण्मयम्[३] ॥ २० ॥

"प्रकृतेः क्षोभकं रूपं दैवं नारायणाभिधम्[४] । प्रकृतौ जगतः स्रष्टृ[५] परमः पुरुषो मतः । तदेव वासुदेवाख्यं महत्तत्त्वनियामकम् । सङ्कर्षणाख्यस्तु हरिः सूक्ष्माहङ्कारयामकः । स्थूलाहङ्कारनियमी[६] विष्णुः प्रद्युम्ननामकः । अनिरुद्धो मनस्तत्त्वनियन्ता भगवान् हरिः । महत्तत्त्वादिजीवास्तु ब्रह्मा शेषोऽङ्गजस्तथा[७] । सूक्ष्मस्थूलविभेदेन कामजश्चानिरुद्धकः" इति कापिलेये ॥ * ॥

विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः ।
स्वतेजसाऽपिबत् तीव्रमात्मप्रस्वापनं तमः ॥ २१ ॥

"अङ्के रमयते यस्मात् केशवो जगदङ्कुरः । महान्तं योऽसृजज्जीवमोहकं[८] च तमोऽग्रसत्" इति च ॥ * ॥

---

१ "व्याप्तं रूपम्" इति प्र. पाठः ।

२ तेषां कालाद्वयमेव, न कालज्ञानमित्यर्थः । "अप्राकृताः" इति प्र. पाठः ।

३ "दैवाख्यनारायणप्रेरणात् क्षुभितधर्मिण्यां मनसि रागाख्यक्षोभवत्यां स्वस्यां योनौ स्वभार्यायां प्रकृतिसंज्ञायां श्रीदेव्यां परः पुमान् मूलरूपादभिव्यक्तपरमपुरुषाख्यद्वितीयरूपवान् परमात्मा वीर्यमाधत्त गर्भमदधात् । सा हिरण्मयं महत्तत्वं ब्रह्मणाऽभिमन्यमानमसूत" इत्यनन्ततीर्थाः । "हिरण्मयं प्रकाशबहुलम्" इति श्रीधरस्वामी ।

४ "नारायणात्मकम्" इति प्र. पाठः ।

५ "प्रकृतौ महतः स्रष्टा" इति प्र. पाठः । जगतः स्रष्टृ रूपं परमः पुरुषः परमपुरुषाख्यम् ।

६ "-नियमो-" इति क्वचिन्मुद्रितः पाठः । ७ "ब्रह्मशेषाङ्गजास्तथा" इति प्र. पाठः ।

८ एतेन "आत्मप्रस्वापनम्" इत्येतद् व्याख्यातम् । आत्माऽत्र जीवः । अनन्ततीर्थीये तु रीत्यन्तरेण व्याख्यातम्—"कूटमाकाशस्तद्वन्निर्विकारत्वेन स्थितः, जगदङ्के निक्षिप्य रमयति पिता पुत्रं यथा तस्माज्जगदङ्कुरः, परमपुरुषः आत्मगतं विश्वं व्यञ्जयन् श्रियां गर्भाधानात् पूर्वमेव आत्मप्रस्वापनमात्मने योगनिद्राकारणं तीव्रं निबिडं तमः स्वतेजसा स्वरूपप्रभया अपिबत् व्यनाशयत्" इति । एतदप्यर्थान्तरं ग्राह्यमेव, भाष्याविरोधात् ।

यत्तत् सत्त्वगुणं स्वच्छं शान्तं भगवतः पदम् ।
यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम्[1] ॥ २२ ॥

यद् वासुदेवाख्यं भगवतः स्वरूपं[2] ततो महदात्मकं चित्तं जायते ।

"सत्त्वशब्देन[3] तूच्यन्ते पूर्णानन्दादयो गुणाः" इति च । "महत्तत्त्वगतो योऽसौ वासुदेवाभिधो हरिः । स चित्तजनकः प्रोक्तः प्राणिनां हि[4] पृथक्पृथक्" इति च ॥ * ॥

स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः ।
वृत्तिभिर्लक्षणं प्रोक्तं यथाऽपां प्रकृतिः परा[5] ॥ २३ ॥

चित्तस्य [6]स्वाच्छयादयः पृथग् गुणा [7]उच्यन्ते—स्वच्छत्वमित्यादि ।

"स्तिमितोदकचित्तादेरविकारोऽल्पविक्रिया[8]" इति तत्त्वविवेके । "वृत्तिः स्वभावो वृत्तं च स्थितिरित्यभिधीयते" इति तत्त्वनिर्णये[9] ।

वृत्तिभिर्लक्षणमिति[10] स्वाभाविकं लक्षणमित्यर्थः ॥ * ॥

महत्तत्त्वाद् विकुर्वाणाद् भगवद्वीर्यचोदितात्[11] ।
क्रियाशक्तिरहङ्कारस्त्रिविधः समपद्यत ॥ २४ ॥

"ज्ञानप्रधानस्तु महानहङ्कारः क्रियाधिकः । इतरापेक्षया सोऽपि ज्ञानाधिक उदाहृतः"[12] इति च ॥ * ॥

---

१ "सत्त्वगुणं पूर्णानन्दादिगुणवत्, स्वच्छं निर्दोषम्, शान्तं सौम्यं यद् भगवतः पदं रूपम्, यच्च वासुदेवाख्यमाहुः तत् तस्मात् तन्नियमनात् महत्तत्वात्मकं चित्तं जायते । महत्तत्वगताद् वासुदेवात् सर्वजीवानां चित्तं जायत इति भावः" इत्यनन्ततीर्थाः ।
२ "भगवद्रूपम्" इति प्र. पाठः ।
३ "-शब्देन चोच्यन्ते" इति च ।
४ "प्राणिनां च" इति च ।
५ "स्वच्छत्वं निर्मलत्वम्, अविकारित्वमनन्यथाभावित्वम्, शान्तत्वं प्रसन्नता यथाऽपां लक्षणं कथितमित्यर्थः" इत्यनन्ततीर्थीये ।
६ "स्वच्छत्वादयः" इति प्र. पाठः ।
७ "पृथग् गुणा उच्यन्ते" इतीयान् क्वचित् कोशे न पठ्यते ।
८ "-ल्पवत् क्रिया" इति क्वचित् ।
९ "शब्दनिर्णये" इति प्र. पाठः ।
१० "वृत्तिभिर्लक्षणं प्रोक्तमिति" इति पाठान्तरम् ।
११ "भगवद्वीर्यसम्भवात्" इत्यर्वाचीनः पाठः ।
१२ "ज्ञानाधिक इतीरितः" इति प्र. पाठः ।

[1]वैकारिकोऽधिदैवं तु बुद्धिः प्राणश्च तैजसः ।
[2]तामसस्त्वर्थमात्रं च गुणव्यतिकरस्त्रिवृत् ॥ २६ ॥

"देवताधिकृतं यत् तदधिदैवमिति स्मृतम्" इति च ।

वैकारिकोऽधिदैवमित्यादि पञ्चम्यर्थे ।

"सप्तसु प्रथमा तत्र[3] स्वातन्त्र्यं यद् विवक्षितम्" इति शब्दनिर्णये ॥ * ॥

सहस्रशिरसं साक्षाद् यमनन्तं प्रचक्षते ।
सङ्कर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयम्[4] ॥ २७ ॥

कर्तृत्वं करणत्वं च कार्यत्वं चेति लक्षणम् ।
शान्तघोरविमूढत्वमिति वा स्यादहङ्कृतेः[5] ॥ २८ ॥

"मनोरूपेण कर्तृत्वं देहरूपेण कार्यता । इन्द्रियात्मतया चैव [6]करणत्वमहङ्कृतेः । यतो मनस्यहम्भावस्तस्मात् कर्ता[7] मनः स्मृतम् । स्वभावकर्तुर्जीवस्य त्वासन्नोपाधि तद्

---

१ अयं श्लोकः प्रचलितपाठे न पठ्यते, न व्याख्यातश्च श्रीधरादिभिः । अत्रानन्ततीर्थीयम्—"वैकारिकोऽहङ्कारोऽधिदैवम्, दशेन्द्रियाभिमानिदेवानां जनकम् । देवसृष्टिमधिकृत्य वर्तत इत्यधिदैवम् । इन्द्रियाभिमानिदेवा वैकारिकाहङ्काराज्जाता इत्यर्थः । बुद्धिस्तदभिमानिन्युमा च आहङ्कारिकप्राणश्चेन्द्रियाणि च तैजसाहङ्काराज्जाताः । तामसोऽहङ्कारस्त्वर्थमात्रम् । अर्थानां शब्दादीनां मात्रं निर्मातृ । गुणानां सत्वादीनां व्यतिकरो मिश्रीभावो यस्मिन् स तथा । सोऽहङ्कार एवं त्रिवृत् । त्रित्वेन वृतस्त्रिविध इत्यर्थः" इति ।

२ "तामसं त्वर्थ-" इति क्वचित् कोशेषु पठ्यते ।

३ "यत्र" इति प्र. पाठः प्रामादिकः । यद् यत्र स्वातन्त्र्यं विवक्षितं तत्र सप्तस्वपि प्रथमा भवतीति ।

४ श्लोकोऽयं पुरैव भाष्यकृता प्रसङ्गाद् व्याख्यातः—"सङ्कर्षणाख्यस्तु हरिः सूक्ष्माहङ्कारयामकः" इत्यादिना । अनन्ततीर्थीये च– "यं पुरुषं सहस्रशिरसं साक्षात् सङ्कर्षणाख्यं प्रचक्षते तं भूतेन्द्रियमनोमयं पञ्चभूतानां दशेन्द्रियाणां मनसश्च कारणं तद्व्यापिनं च प्रचक्षते" इति ।

५ "वैकारिकाहङ्कारस्य मनोरूपेण मनोव्यापित्वेन जीवानां देहाद्याहंममतोत्पादकत्वेन कर्तृत्वं स्वभावलक्षणम् । तैजसाहङ्कारस्य करणानामिन्द्रियाणां कारणत्वात् साधनत्वेन विषयसम्बन्धकत्वं स्वभावलक्षणम् । तामसाहङ्कारस्य भूतकार्यदेहोत्पादकत्वात् कार्यदेहबन्धकत्वं स्वभावलक्षणम् । इन्द्रियाभिमानिदेवजनकस्य वैकारिकाहङ्कारस्य सत्वगुणांशप्राचुर्येणोत्पन्नत्वात् भगवन्निष्ठोपेतत्वाच्च शान्तत्वं लक्षणम् । करणापरपर्यायेन्द्रियाणां स्रष्टुस्तैजसाहङ्कारस्य रजोंशप्रचुरत्वात् घोरज्ञानकर्मेन्द्रियैः नानाविधघोरपदार्थज्ञापकत्वात् घोरकर्मकारयितृत्वाच्च घोरत्वं स्वरूपलक्षणम् । भूतजनकस्य तामसस्य वैकारिकतैजसवद् व्यञ्जकत्वाभावान्मूढत्वं स्वभावलक्षणमिति वाऽहङ्कृतेर्लक्षणत्रयं स्यात्" इत्यनन्ततीर्थाः ।

६ "कारण-" इति क्वचित् ।

७ "कर्तृ" इति प्र. पाठः ।

यतः । कर्मज्ञाने [1]करणता यतः [2]करणमिन्द्रियम् । कार्यं देहः समुद्दिष्ट उत्पाद्यत्वात् पुनःपुनः" इति तत्त्वविवेके । "शान्तरूपो देवपिता घोरः करणसृड् मतः । तावज्ज्ञानस्याप्रकाशान्मूढो भूतपिता स्मृतः । त्रिरूपोऽयमहङ्कारः शेष इत्येव तं विदुः" इति निर्णये[3] ॥ * ॥

वैकारिकाद् विकुर्वाणान्मनस्तत्त्वमजायत ।
यत्सङ्कल्पविकल्पाभ्यां वर्तते कामसम्भवः ॥ २९ ॥

यद् विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरम् ।
शारदेन्दीवरश्यामं संराध्यं योगिभिः शनैः[4] ॥ ३० ॥

तैजसात्तु विकुर्वाणाद् बुद्धितत्त्वमभूत् सति ।
द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहात्[5] ।
[[6]प्रद्युम्नसज्ज्ञं पुरुषं यमाहुस्तत्त्वबृंहितम्] ॥ ३१ ॥

संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च ।
स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तिभिः पृथक्[7] ॥ ३२ ॥

१–२ "कारण–" इति क्वचित् । ३ तत्त्वविवेके" इति प्र. पाठः प्रामादिकः ।

४ व्याख्यातं चैतच्छ्लोकद्वयं भगवता पूर्वमेव– "अनिरुद्धो मनस्तत्त्वनियन्ता भगवान् हरिः" इत्यादिना । "मनआख्यं तत्त्वं वैकारिकादजायत । यन्मनः सङ्कल्पविकल्पाभ्यां वृत्तिविशेषाभ्यां वर्तते, यन्मनः कामसम्भवः विविधकामानामुत्पत्तिस्थानम्, यन्मनः अनिरुद्धाख्यं कामपुत्रानिरुद्धाख्याभिमानिसहितम्, तदन्तर्यामिभगवद्रूपानिरुद्धप्रेरितं च विदुर्ज्ञानिनः, यद् भगवद्रूपं हृषीकाणां प्रेरकतयाऽधीश्वरम् । सनकादियोगिभिः शनैरव्यग्रमनसा संराध्यं ध्येयम्" इत्यनन्ततीर्थीये। "यतो मनसः कामस्य सम्भवः । अत एव मनोभव इति कामस्य संज्ञा" इति शुकदेवः । ५ "–नुग्रहः" इत्यर्वाचीनः पाठः ।

६ इदं श्लोकार्द्धं प्राचीनकोशेषु न पठ्यते। न प्रचलितभागवतपाठे दृश्यते। अनन्ततीर्थाभिरपि न व्याख्यातम् ।

७ "वृत्तितः पृथक्" इति पाठान्तरमनन्ततीर्थाभिमतम् । श्रीधराद्यभिमतश्च स पाठः । श्लोकाद्वयमिदं व्याख्यातमनन्ततीर्थीये— "विकुर्वाणात् सृष्ट्यभिमुखात् (तैजसात्) हे सति (बुद्धितत्त्वमभूत्) । कीदृशम् ? चक्षुरादीन्द्रियाणामनुग्रहात् सन्निकर्षात् द्रव्यस्फुरणे जाते सति इदं द्रव्यमित्थमेवेति निश्चयो विज्ञानम्, तज्जनयतीति तथा । इदमदो वेति संशयः, विपर्यासोऽन्यथाज्ञानम्, इदमेवेति स्थिररूपं ज्ञानं निश्चयः, स्वापोऽज्ञानम् । वृत्तितः स्वभाववर्तनाभेदैः । एतानि लक्षणानि मनसोऽपि सन्ति । तान्यस्थिराणि । बुद्धिगतान्येतानि स्थिराणीति भावः" इति । "इन्द्रियाणां काचकामलादिदोषाभावलक्षणानुग्रहात्" इति विजयध्वजीयम् ।

द्रव्यस्फुरणे यद् विशेषज्ञानम् ।

"सामान्यं मनसा ज्ञानं[1] विशेषाद् बुद्धिजं भवेत् । [2]अचलः संशयो बुद्धेश्चलो मानस उच्यते । चञ्चला तु स्मृतिर्बुद्धिश्चित्तजैव स्थिरा स्मृतिः" इति च । येन यज्ज्ञायते वस्तु तत् तल्लक्षणमुच्यते । तत्स्वरूपं[3] पृथक् चेति द्विविधं कवयो विदुः" इति कापिलेये ॥ * ॥

तैजसानीन्द्रियाण्येव क्रियाज्ञानविभागशः ।
प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता[4] ॥ ३३ ॥

"प्रधानवायुः सूत्रात्मा महता सह जायते । तैजसश्च[5] खजः स्पर्श इत्याद्यास्तत्सुताः स्मृताः । तदाविष्टा अन्यजीवास्तदाधाराश्च तद्बलाः" इति च ॥ * ॥

तामसाच्च विकुर्वाणाद् भगवद्वीर्यचोदितात् ।
शब्दमात्रमभूत् तस्मान्नभः श्रोत्रं तु शब्दगम्[6] ॥ ३४ ॥

अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च ।
तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः[7] ॥ ३५ ॥

---

१ "मनसा जातम्" इति प्र. पाठः ।

२ निश्चायकदर्शनेऽप्यनिवर्तमानः अचलः संशयः । स बुद्धिजः । एवं स्थिरा स्मृतिश्चित्तजा। चञ्चला स्मृतिर्बुद्धिजा ।

३ स्वरूपलक्षणं पृथग्लक्षणं चेति द्विविधे लक्षणे संशयादिकं बुद्धेः न स्वरूपलक्षणम् । किन्तु पृथग्लक्षणमिति ।

४ "इन्द्रियाणि तैजसाहङ्कारादुत्पन्नान्येव । क्रियाज्ञानविभागशः कर्मेन्द्रियाणि ज्ञानेन्द्रियाणीत्येव संज्ञाभेदेन । तदभिमानिविशेषं वक्ति— प्राणस्याऽहङ्कारिकस्य क्रियाशक्तिः कर्मेन्द्रियप्रेरकत्वशक्तिः। बुद्धेरुमायाः विज्ञानशक्तिता श्रोत्रादीन्द्रियाणामर्थैः सन्निकर्षेण विज्ञानजनकत्वं लक्षणम्" इत्यनन्ततीर्थीयम् ।

५ तैजस इत्याहङ्कारिकः प्राणः । खज इति 'आकाशाद् वायुः' इत्युक्तः प्रवह्वायुः । स्पर्श इति त्वगिन्द्रियाभिमानी वायुः । आदिपदेन प्राणापानादयस्तत्सुताः ।

६ "शब्दमात्रं शब्दाख्यो गुणः तस्मान्नभ उत्पन्नम् । नभसः श्रोत्रेन्द्रियम् । कीदृशम् ? शब्दं गमयति ज्ञापयतीति शब्दगं शब्दग्राहकम्" इत्यनन्ततीर्थाः । "तुशब्दः पूर्वमुत्पन्नमपि तन्नभसा पुनरुपचितं भवतीति विशेषसूचनार्थः" इति यादुपत्यम् ।

७ "अर्थाश्रयत्वमर्थवाचकत्वम् । द्रष्टुः सर्वज्ञस्य हरेः लिङ्गत्वं ज्ञापकत्वम् । इन्द्रियलिङ्गशब्देषु शब्द एव हरेर्ज्ञापकः । नभस आकाशस्य तन्मात्रत्वं विशेषगुणत्वम् । एतत् सर्वं शब्दस्य लक्षणं कवयो विदुः" इत्यनन्त-

32

अर्थाश्रयत्वं अर्थविषयत्वम्।

"शब्देनैव यतो ज्ञेयो हरिर्लिङ्गं तु तस्य तत्। स्पर्शाद्यभावात् तन्मात्रा नभसश्चेति कीर्त्यते। स्पर्शादयश्च तन्मात्रा इतरे पूर्वसंस्थितेः। [1]तिष्ठन्त्येको गुणो भूते प्रत्येकं पञ्चसु स्थितः। शब्दो वर्णात्मको नित्यो ध्वनिराकाशसम्भवः। [2]आकाश एव सूक्ष्मस्तु ध्वनिरित्येव शब्द्यते। स एव व्यज्यमानस्तु भवेत् कर्णैकगोचरः" इति च ॥ * ॥

नभसः शब्दतन्मात्रात् कालगत्या विकुर्वतः।
स्पर्शोऽभवत् ततो वायुस्त्वक् च स्पर्शस्य सङ्ग्रहः[3] ॥ ३७ ॥

नभसः शब्दतन्मात्रात् शब्दमात्रगुणात्[4]।

"स्पर्शादयोऽपि वाय्वादेः सूक्ष्मावस्थाः प्रकीर्तिताः" इति च। "सूक्ष्मेन्द्रियाणि सन्त्येव स्युः स्थूलान्यप्यहङ्कृतेः[5]। भूतेभ्यश्चोपचीयन्ते पुनर्ब्रह्मशरीरतः" इति च ॥ * ॥

चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः।
सर्वेन्द्रियाणामात्मत्वं वायोः कर्माभिलक्षणम्[6] ॥ ३९ ॥

तीर्थाः। "द्रष्टुः सर्वज्ञस्य परमात्मनः लिङ्गत्वं प्रमाणभूतत्वम्। भगवतः शास्त्रयोनित्वात्" इति वीरराघवोऽप्याह।

१ "तिष्ठत्येको गुणो–" इति प्र. पाठः नातीव स्वरसः। तथाचायमर्थः— स्पर्शादयश्च वाय्वादीनां तन्मात्राः। ननु शब्दादयोऽपि वाय्वादिष्वनुवर्तन्त इति कथं तन्मात्रत्वं तेषाम्? आह–इतरे। यद्यपि इतरे शब्दादयोऽपि वाय्वादिषु तिष्ठन्ति। तथाऽपि पूर्वसंस्थितेः पूर्वानुगमादेवात्र तिष्ठन्ति; न विशेषगुणत्वेन। एकैक एव गुणो विशेषगुणत्वेन प्रत्येकं पञ्चस्वपि भूतेषु तिष्ठति। यं तन्मात्रमाहुः।

२ एतेन "नभः श्रोत्रं तु शब्दगम्" इत्यादि व्याख्यातम्।

३ "कालगत्या ईश्वरप्रेरणया विकुर्वाणात् शब्दाख्यतन्मात्रायुक्तान्नभसः स्पर्शाख्यो गुणोऽभवत्। ततः स्पर्शतन्मात्रात् वायुरभवत्। स्पर्शतन्मात्रायाः सङ्ग्रहः ज्ञातृ त्वक् च त्वगिन्द्रियं च वायोरभवत्" इत्यनन्ततीर्थाः। "कालगत्या कालशरीरकभगवत्सङ्कल्पेन" इति वीरराघवः। ४ "शब्दतन्मात्रगुणात्" इति प्र. पाठः।

५ पूर्वमहङ्कारादिन्द्रियाणां सृष्टिरभिहिता। अत्र पुनर्भूतेभ्यः सृष्टिरुच्यते—आकाशात् श्रोत्रम्। वायोस्त्वगित्यादि। तत् कथं न विरोधः? उच्यते– सूक्ष्मेन्द्रियाणि सन्त्येव नित्यम्, तानि चाहङ्कारतत्वात् जायन्त इति स्थूलभावमापद्यन्त इत्यर्थः। पुनर्भूतेभ्यो जायन्त इत्युपचीयन्त इत्यर्थः। इतोऽप्युपचयेन पूर्णरूपत्वं ब्रह्मशरीरे भवतीति। अत्र मूलोक्तौ वायू आकाशजः त्वगिन्द्रियगश्च मुख्यवायोः सुताविति पूर्वमेव व्याख्यातम्—"खजः स्पर्श इत्याद्यास्तत्सुताः" इति कापिलेयवचनेनैव।

६ "चालनं चालनकर्तृत्वम्। व्यूहनं पृथक् स्थितानामेकीकरणम्। प्राप्तिः सर्ववस्तुषु व्याप्तिः। द्रव्यशब्दयोः दूरनेतृत्वम्। सर्वेन्द्रियाणामात्मत्वं स्वामित्वम्। कर्माभिलक्षणं कर्मणा जातं स्वभावलक्षणम्" इत्यनन्ततीर्थाः।

"प्राप्नोति वायुः सर्वं तु [1]स्वत एव हरेस्तथा । अतः प्राप्तिरिति प्राहुर्वायुं भूतपतिं प्रभुम् । प्रधानवायुरन्येषु नित्याविष्टो यतस्ततः । तद्गुणास्तेषु[2] चोच्यन्ते नीचता नास्य तत्कृता" इति ब्रह्मवैवर्ते । "स्वरूपमपि कर्मेति विषयत्वादुदीर्यते[3]" इति शब्दनिर्णये ॥ * ॥

द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च ।
तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः[4] ॥ ४१ ॥

व्यक्तिसंस्थात्वं व्यक्तत्वेन स्थितिः । गुणता प्रकाशत्वम्[5] ।

"तेजस्त्वमथ चोग्रत्वं क्रौर्यमित्यपि चोच्यते" इत्यभिधानम् ॥ * ॥

क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम् ।
तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः[6] ॥ ४५ ॥

"उन्दनं[7] बिन्दुभावः स्यात् स्यन्दनं स्रवणं स्मृतम्" इत्यभिधानम् ।

पृथिव्यग्न्यपेक्षया भूयस्त्वं देहे[8] ॥ * ॥

---

१ स्वतः स्वशक्त्या हरेरनुग्रहाच्च सर्वं वस्तु व्याप्नोति प्रधानवायुः । अत एव तं सर्वजीवपतिं प्रभुं प्राप्तिरित्याहुः । तदाविष्टत्वाच्च प्रवहवायुमपीत्यर्थः ।

२ " तद्गुणास्तस्य चोच्यन्ते" इति क्वचित् प्राचीनकोशे पाठान्तरम् । अर्थतस्तदपि सुन्दरम् । तथाहि मुख्यवायोः प्रवहादिष्वाविष्टत्वात् मुख्यवायुगुणाः प्रवहादिषूच्यन्ते न केवलम्, किन्तु तद्गुणाः प्रवहादिगुणाः आकाशजातत्वादयः क्वचित् तस्य मुख्यवायोरप्युच्यन्ते । अन्तर्यामनविवक्षयैवेदमुदितमिति न तावता तस्य नीचता शंक्या ।

३ तेनेदं वायोः स्वरूपलक्षणमेव भवति ।

४ "द्रव्याकृतित्वं वर्तुलदीर्घविशालत्वादिना द्रव्यवदाकारोपेतत्वम्, गुणता प्रकाशत्वम्, व्यक्तिसंस्थात्वं व्यक्तत्वेन स्थितिश्च । तेजस्त्वमुग्रत्वम् । तेजसः यद् रूपाख्यं तन्मात्रं तस्य वृत्तयः स्वरूपलक्षणानि" इत्यनन्ततीर्थाः । "गुणता द्रव्याश्रयत्वेनैव प्रतीयमानत्वम्" इति शुकदेवादयः । "गुणता सर्वदोपसर्जनतया प्रतीतिः । नैवं शब्दादिषु । स्वतन्त्रतयाऽपि प्रतीयमानत्वात्" इति वल्लभाचार्यः ।

५ इतः परं प्र. पाठे— "आलोको गुण इत्येव प्रकाशश्चेति कथ्यत इत्यभिधानम्" इत्यधिकम् । क्वचित् कोशे इदं वाक्यं— "तेजसः . . . . धानम्" इत्यतः परं पठ्यते ।

६ " क्लेदनमार्द्रीकरणम् । उन्दनं बिन्दुभावः । तापापनोदोऽग्न्यर्कादिसम्पर्काद्यदौष्ण्यं देहादेस्तद्धरणम् । अन्येभ्यो भूतेभ्यः कार्येष्वाधिक्यं भूयस्त्वम् । इत्येतान्यम्भसः स्वरूपलक्षणानि" इत्यनन्ततीर्थाः । "उदि बिन्दुभाव इति धातुः" इति विजयध्वजीयम् ।

७ "उदनम्" इति मुद्रितपाठः प्रमाद एव ।

८ तथाच वीरराघवोऽप्याह— "पाञ्चभौतिकेष्वपि जलांशस्य भूयस्त्वं वा । तथाच सूत्रकारः— 'त्र्यात्मकत्वात्तु भूयस्त्वात्' इति" इति । क्वचित् कोशे "पृथिव्यग्न्यपेक्षया" इतीयदेव पठ्यते । "भूयस्त्वं देहे" इत्ययं न

भावनं[1] ब्रह्मणः स्थानं धारणं सद्विशेषणम् ।
सर्वसत्त्वगुणोद्भेदः पृथिवीवृत्तिलक्षणम् ॥ ४८ ॥

भावनमुत्पादकत्वम् ।

"ब्रह्मस्थानं तु पृथिवी शरीरे ब्रह्मदर्शनात्" इति कापिलेये ।

सद्विशेषणं विशेषेण व्यक्तत्वम् ।

"असदव्यक्तनाम स्याद् व्यक्तं सदिति चोच्यते" इति ब्राह्मे ।

सर्वसत्त्वगुणोद्भेदः । शरीरे हि प्राणिनां सर्वगुणा[2] व्यज्यन्ते संसारावस्थायाम् ।

"शरीरं पार्थिवं ज्ञेयमिन्द्रियाण्यौदकानि तु । तैजसः कोष्ठगो वह्निश्छिद्रमाकाशसम्भवम् । प्राणा वायुमयाः सर्वे प्रत्येकं पञ्चधा पुनः" इति कापिलेये ॥ * ॥

ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनम् ।
उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट्[3] ॥ ५३ ॥

"अचेतनाद् यतस्त्वण्डाद् ब्रह्मा समजनि स्फुटम् । अतो ब्रह्माण्डमित्याहुर्विराड् ब्रह्मा प्रकाशनात्" इति च ॥ * ॥

हस्तौ तु[4] निरभिद्येतां बलं ताभ्यां ततः स्वराट् ।
पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः[5] ॥ ६० ॥

पठ्यते । लिपिकृत्प्रमादः । अत एव "कार्यदेहेषु पृथिव्यग्न्यपेक्षयाऽम्भसो भूयस्त्वम्" इत्यनन्ततीर्थीयम् । विजयध्वजीये तु "पृथिव्यग्न्यपेक्षया" इतीयानेव पाठ इति विवक्षित्वा "पृथिवीतेजःपरमाणुयोगादम्भस उन्दीभावः" इति पूर्वान्वयेन व्याख्यातम् । इदमप्यर्वाचीनैः टीकायां निक्षिप्तमिति भाति ।

१ "भावनं सकलसस्यादिवस्तूनामुत्पादनम्; ब्रह्मणः स्थानम्, परब्रह्माभिव्यक्तिस्थानत्वम् । शरीरे हि ब्रह्मदर्शनम्; शरीरं च भौमम् । धारणं सर्वपदार्थानामाधारत्वम् । सच्छब्दवाच्ययोरप्तेजसोश्चातिशयेन सत् स्थूलं पृथिवीभूतमिति सद्विशेषणम् । सर्वसत्त्वानां सर्वप्राणिनां निजगुणमुद्भेदयति अत्यन्तं विविच्य ज्ञापयतीति सर्वसत्त्वगुणोद्भेदः । पार्थिवशरीरे हि सर्वजीवानां गुणा ज्ञातुं शक्याः" इत्यनन्ततीर्थाः ।

२ "हि सर्वप्राणिनां गुणाः" इति प्र. पाठः । "सर्वगुणा ज्ञानभक्त्यादयः" इति यादुपत्यम् ।

३ "अनुविद्धेभ्यः सन्निहितेभ्यः, अत एव युक्तेभ्यः मिळितेभ्यः तत्वेभ्यः अचेतनं ब्रह्माण्डमुत्थितमुत्पन्नम् । तस्मादण्डादसौ विराट्पुरुषनामा ब्रह्मा उदतिष्ठदुत्पन्नः । तदन्तर्यामी विराट्पुरुषनामा हरिश्च" इत्यनन्ततीर्थाः । पूर्वार्द्धे "–विद्धेभ्यस्तत्वेभ्योऽण्डमचेतनम्" इति केचित् पठन्ति ।

४ "हस्तौ च" इति प्र. पाठः ।

५ "हस्ताख्ये गोळके उत्पन्ने । तयोर्हस्तयोः बलाख्यं हस्तेन्द्रियमुत्पन्नम् । ततो बलात् बाह्वभिमानी स्वराट् इन्द्र उत्पन्नः । पादौ पादाख्यगोळके । ताभ्यां गतिः पादाख्यमिन्द्रियम् जातम् । ततः पादेन्द्रियात् हरिर्जातः ।

"यज्ञनामा तु देवोऽन्यो विज्ञेयः पाददेवता । तमाविष्टो[१] हरिर्नित्यं तदाहुः[२] पाददैवतम् । तस्येन्द्रियाभिमानित्वं कुतः पूर्णमलात्मनः" इति च ॥ * ॥

अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम् ।
मनसश्चन्द्रमा जातो [३]बुद्धिर्बुद्धेर्गिराम्पतिः ।
अहङ्कारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत् ॥ ६२ ॥

"चैत्योऽपि भगवान् विष्णुरन्तर्यामी चतुर्मुखात् । स्वेच्छया व्यक्तिमगमत् ततोऽसौ ब्रह्मजः स्मृतः[४]" इति च ॥ * ॥

विष्णुर्गत्यैव चरणौ नोदतिष्ठत् तदा विराट् ।
नाडीर्नद्यो लोहितेन नोदतिष्ठत् तदा विराट् ॥ ६८ ॥

"यज्ञान्तस्थः स्वयं पादौ विशन्नोत्थापयद्धरिः[५] । शक्रोऽपि ब्रह्मवाय्वोस्तु बलज्ञप्त्यै जनार्दनः । तत्स्थ उत्थापयामास ब्रह्मदेहं विशन् प्रभुः" इति च ॥ * ॥

बुद्ध्या ब्रह्माऽपि हृदयं नोदतिष्ठत् तदा विराट् ।
रुद्रोऽभिमत्या हृदयं नोदतिष्ठत् तदा विराट् ॥ ७० ॥

ब्रह्मा बृहस्पतिः[६] । "यस्मिन् ब्रह्मा राजनि पूर्व एति" इति श्रुतेः[७] ।

"बृहस्पतिः पुरोगाश्च[८] ब्रह्मा च ब्रह्मणस्पतिः" इत्यभिधानम् ॥ * ॥

अत्रेदं तात्पर्यम् । पादेन्द्रियाद् यज्ञनामकस्तदभिमानी कश्चिद् देवो जातः । तदन्तर्यामी हरिश्च यज्ञनामा ब्राह्मणाङ्गुष्ठजलपायिनां फलदानार्थमाविर्भूत इति" इत्यनन्ततीर्थाः । "हरिस्तदावेशावतारो देवताविशेषः" इति जीवगोस्वामी, राधारमणदासो विश्वनाथश्च ।

१ "तदाविष्टो–" इति प्र. पाठः । २ तत् तस्मात् हरिं पाददैवतमाहुः । "तमाहुः" इति पाठान्तरम् ।

३ "तस्माद् हृदयादेव मनोभेदरूपा बुद्धिर्जाता । बुद्धेस्तदभिमानी गिराम्पतिर्बृहस्पतिर्जातः । तस्मात् हृदयादेव मनोवृत्तिरूपोऽहङ्कारो जातः । ततस्तदभिमानी रुद्रः । तत एव हृदयान्मनोवृत्तिरूपं चित्तं जातम् । ततश्चित्तात् चैत्यः चित्ताभिमानी विरिञ्चो जातः" इत्यनन्ततीर्थाः ।

४ चैत्यनामकब्रह्मान्तर्यामी विष्णुरपि चैत्यः । ब्रह्मज इति ब्रह्मचित्तजः । कथं जननं भगवतः ? यतः स्वेच्छया चतुर्मुखाद् व्यक्तिमगमत् । ५ अत्र उत्थापयदित्युदस्थापयत् । छान्दसोऽडभावः ।

६ एतेन "बुद्धेर्गिराम्पतिः" इति पूर्वोक्तो गिराम्पतिश्च बृहस्पतिरेवेति व्याख्यातप्रायम् ।

७ "इति श्रुतिः" इति प्र. पाठः । यस्मिन् देवानां राजनीन्द्रे निर्गच्छति पूर्वः पुरोगः सन् ब्रह्मा बृहस्पतिरेतीति श्रुत्यर्थः । ८ "पुरोधाश्च" इति पाठान्तरम् ।

चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद् यदा ।
विराट् तदैव पुरुषः सलिलादुदतिष्ठत[1] ॥ ७१ ॥

"अंशेन सुप्तो[2] ब्रह्मा तु अंशेन निरगात् तथा । स्वदेहाद् वायुसहितो विष्णुना च जगत्प्रभुः । तमुत्थापयितुं देवास्तानृते त्रीन् महाबलान् । [3]नाशक्नुवन्नेकसंस्थास्त-तस्ते त्वविंशस्त्रयः । उदतिष्ठद् ब्रह्मदेहस्तदा तेषां प्रभावतः । विशेषेण हरेरेव प्रभा-वेन श्रियःपतेः । चित्ताभिमानी ब्रह्मैव क्षेत्रज्ञस्तद्गतो हरिः । प्राणो वायुरिति प्रोक्त-स्तयोरीशो [4]हरिः स्वयम्" इति च ॥ * ॥ * ॥

इति तृतीयस्कन्धे सप्तविंशोऽध्यायः[5]

---

[6]प्रबुद्धः स्वप्नसुप्तिभ्यां संस्मरन्नात्मसंसृतेः ।
वैतथ्यं व्यभिचारं च नासौ ध्यायेद् यतो भयम् ॥ ५ ॥

"अज्ञानं सुप्तिशब्दोक्तं स्वप्नश्चैव विपर्ययः" इति भारते ॥ * ॥

---

१ विवृतं चैतदनन्ततीर्थीये प्रकरणतात्पर्यम्—"रुद्रान्तानां देवानां निर्गमात् प्रवेशाच्च विराट् न पपात नोदतिष्ठच्च । यदा चैत्यश्चित्ताभिमानी ब्रह्मा वायुश्च तत्प्रेरकः क्षेत्रज्ञाख्यो विष्णुश्चः ब्रह्मदेहं प्राविशन् तदैवोदतिष्ठत्" इति ।

२ देहे स्थितोऽपि सुप्त इव निर्व्यापारतया न स्थित इव । "सुप्तो ब्रह्माऽपि अंशेन" इति प्र. पाठः ।

३ "नाशक्नुवुस्त्वेकसंस्था–" इति प्र· पाठः प्रामादिकः । "नाशक्नुवन्नेकसंस्थान्" इति क्वचित् कोशे ।

४ "तुरीयोंऽशो हरिः स्वयम्" इत्येकस्मिन् प्रतनकोशे पठ्यते ।

५ प्र. पाठेऽत्र षड्विंशोऽध्यायः ।

६ अयं श्लोकः प्र. पाठे न दृश्यते । न व्याख्यातश्च श्रीधरादिभिः । अत्रानन्ततीर्थीयम्—"स्वप्नो मिथ्या-ज्ञानम्, सुप्तिरज्ञानम् । ताभ्यां प्रबुद्धः तद्रहितः असौ पुमान् आत्मसंसृतेः वैतथ्यं निष्फलतां व्यभिचारमनि-त्यतां च संस्मरन् यतः शब्दादिविषयसमूहात् संसाराख्यं भयं भवति तं न ध्यायेत् नानुस्मरेत्" इति । अत्र "प्रबुध्य स्वप्नसुप्तिभ्यां संस्मरन्नात्मवैशसम्" इति पूर्वार्द्धे पाठभेदः विजयध्वजतीर्थादिसम्मतः ।

निवृत्तबुद्ध्यवस्थानो[1] दूरीभूतान्यदर्शनः ।
उपलभ्याऽऽत्मनाऽऽत्मानं चक्षुषेवार्कमात्मदृक्[2] ॥ ११ ॥

बुद्धेरवाक्स्थानं[3] निद्रादि ॥ * ॥

मुक्तलिङ्गः[4] सदाभासमसति प्रतिपद्यते ।
सतो बन्धुं समं चक्षुः[5] सर्वानुस्यूतमद्वयम् ॥ १२ ॥

असति प्रळये[6] ॥ * ॥

एवं त्रिवृदहङ्कारो भूतेन्द्रियमनोगुणैः[7] ।
स्वाभासैर्लक्षितोऽनेन सदाभासेन सत्यदृक् ॥ १४ ॥

"शेषस्य प्रतिबिम्बास्तु[8] देवाः शेषश्च[9] ब्रह्मणः । स परब्रह्मणश्चैव ते स्वबिम्बप्रदर्शकाः । ततः स्वबिम्बद्वारेण परमात्म[10]प्रदर्शनम्" इति ब्रह्मतर्के ॥ * ॥

---

१ "-बुद्ध्यवाक्स्थानः" इत्यनन्ततीर्थाभिमतः पाठ इति भाति । तथाहि तद्वचनम्— "बुद्ध्यवाक्स्थानं बुद्धेर्वैपरीत्येनावस्थानं निद्रास्वप्नादिकम् । निवृत्तं बुद्ध्यवाक्स्थानं यस्मात् स तथा । दूरीभूतान्यदर्शनः दूरीभूतशब्दाद्याकांक्षः, आत्मना मनसा आत्मानं परमात्मानमुपलभ्य दृष्ट्वा चक्षुषाऽर्कमिवाऽऽत्मदृक् परमात्मस्वरूपं पश्यन्" इति ।

२ "-र्कमेकदृक्" इति विजयध्वजीयः पाठः । "एका मुख्या दृगेव ज्ञानमेव यस्य स तथा" इति तद्व्याख्यानात् ।

३ "बुद्धेरवस्थानम्" इति प्र. पाठः प्रामादिकः । एतेन अवस्थानमित्येतदवाक्स्थानमिति व्याख्यातम् । बुद्ध्यवाक्स्थानमित्येव भागवतपाठे तु यथास्थितं प्रतीकग्रहणम् ।

४ "मुक्तलिङ्गम्" इत्यर्वाचीनः पाठः ।

५ "बन्धुमसच्चक्षुः" इति च । "मुक्तलिङ्गः शरीराभिमानान्मुक्तः श्लथितलिङ्गशरीरश्च असति सदाभासं सन् मुख्यप्राणः आभासः प्रतिबिम्बो यस्य तादृशं परं ब्रह्म प्रतिपद्यते । गरुडद्वारेण विरिञ्चं प्रविश्य तेन सह परं ब्रह्म प्रपद्यत इति भावः । कीदृशं ब्रह्म? सतो मुख्यप्राणस्य पितृत्वादिना बन्धुरूपम् । सर्वरूपेषु समम् । चक्षुः सर्वज्ञम् । मुक्तामुक्तप्रपञ्चेषु मणिषु सूत्रमिवाऽधारत्वेनानुस्यूतम् । अद्वयं समाधिकरहितम्" इत्यनन्ततीर्थाः ।

६ "प्रलये" इति प्र. पाठः ।

७ "-मनोमयैः" इत्यर्वाचीनः पाठः । "त्रिवृत् वैकारिकतैजसतामसात्मा अहङ्कारः अहङ्काराभिमानी शेषः । स्वाभासैः स्वप्रतिबिम्बैः भूतेन्द्रियमनोगुणैः भूतेन्द्रियमनोगुणादिभिरिन्द्रादिदेवैः लक्षितो ज्ञातो भवति । अनेन शेषाख्यप्रतिबिम्बेन सन् ब्रह्मा लक्षितो भवतीति शेषः । तेन सदाभासेन सन् ब्रह्मैवाऽभासः सदाभासः तेन सदाभासेन चतुर्मुखाख्यप्रतिबिम्बेनेति यावत् । सत्यदृग् यथार्थज्ञानरूपो नारायणो लक्षितो भवति । तस्माद् भूतेन्द्रियमनोबुद्ध्याद्यभिमानिदेवाः स्व(प्रति?)बिम्बभूतमहङ्कारदेवं मुच्यमानानां प्रदर्शयन्ति । स चाहङ्कारदेवो मुख्यप्राणं द्वारीकृत्य सत्यदृशं परमात्मानं प्रदर्शयतीति" इत्यनन्ततीर्थाः ।

८ "प्रतिबिम्बाश्च" इति पाठान्तरम् ।

९ "शेषस्तु" इति प्र. पाठः ।

१० "-प्रदर्शिनः" इति पाठान्तरम् । "-प्रदर्शनः" इति क्वचित् ।

भूतसूक्ष्मेन्द्रियमनोबुद्ध्यादिष्विह निद्रया ।
लीनेष्वसति यस्तत्र विनिद्रो निरहङ्कृतिः[१] ॥ १५ ॥

यो विनिद्रः स सत्यदृक् ॥ * ॥

मन्यमानस्तदाऽऽत्मानमनष्टो नष्टवन्मृषा ।
नष्टेऽहङ्करणे द्रष्टा नष्टवित्त इवाऽतुरः[२] ॥ १६ ॥

योऽनष्टो नष्टवन्नाज्ञासिषमिति मन्यमानः स आतुरो द्रष्टा जीवः ॥ * ॥

एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते ।
साहङ्कारस्य द्रव्यस्य योऽवस्थानमनुग्रहः[३] ॥ १७ ॥

साहङ्कारद्रव्यं[४] जीवः । तस्यावस्थानमनुग्राहकश्च परमात्मा ।

"नित्यदृक् परमात्माऽसौ मृतवद् यो न किञ्चन । जानाति जीवः स ज्ञेयः परमात्मा तदाश्रयः" इति हरिवंशेषु ॥ * ॥ * ॥

इति तृतीयस्कन्धे अष्टाविंशोऽध्यायः[५]

योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे ।
मनो येनैव विधिना प्रसन्नं याति सत्पथम्[६] ॥ १ ॥

---

१ "निरहङ्क्रियः" इत्यर्वाचीनः पाठः । असति प्रळयकाले, भूतानि च सूक्ष्माणि शब्दादीनि च । भूतादीनामभिमानिदेवेषु निद्रया दुर्गया लीनेषु नष्टेष्वपि तत्र चेतनानां मध्ये यः स्वयं विनिद्रो निद्रारहितः जडदेहादिषु निरहङ्कृतिश्च स सत्यदृगित्यर्थः" इत्यनन्ततीर्थाः ।

२ "तदा प्रळयकाले अहङ्करणे अहङ्कारविषये देहे नष्टे स्वयमनष्टोऽपि आत्मानं नष्टवन्मृषा भ्रान्त्या मन्यमानो यः स आतुरो द्रष्टा क्लेशिजीवात्मैव" इति च ।

३ "असौ जीवात्मा परमात्मानमेवं जीवात्मभ्यः साक्षाद् भेदेन प्रत्यवमृश्य ज्ञात्वा अहङ्कारेण सहितं साहङ्कारं द्रव्यं जीवः तस्य यः परमात्मा अवस्थानमाधारः अनुग्रहश्च सत्तादिदानेन मोक्षादिदानेन चानुग्रहकर्ता तं परमात्मानं प्रतिपद्यते" इति च ।

४ "साहङ्कारं द्रव्यम्" इति प्र. पाठः ।

५ श्रीधरीयाद्यनुसारेणात्र सप्तविंशोऽध्यायः ।

६ "सबीजस्य वैष्णवस्य योगस्य ध्यानस्य । विधिना विध्युक्तप्रकारेणानुष्ठितेन येन योगेन प्रसन्नं मनः सत्पथं सतो विष्णोर्मार्गं याति" इति च ।

"सबीजो वैष्णवो योगो निर्बीजस्त्वन्यदैवतः । बीजं विष्णुर्हि जगतः शाखाद्या[1] अन्यदेवताः" इति कौर्मे ॥ * ॥

स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणम् ।
वैकुण्ठलीलाभिध्यानं समाधानं तथाऽऽत्मनः[2] ॥ ६ ॥

"समाधिरप्रयत्नेन मनसः संस्थितिर्भवेत्" इति च ॥ * ॥

तस्मिन् लब्धपदं चित्तं सर्वावयवसंस्थितम् ।
[3]विलोक्यैकत्र संयुञ्ज्यादङ्गे भगवतो मुनिः ॥ २० ॥

[4]सर्वस्मरणाशक्तावेकाङ्गे । "[5]यावन्न च्यवते मनः" इत्युक्तत्वात् ।

"सर्वं स्मर्तुमशक्तः सन्नेकाङ्गं चिन्तयेद् बुधः" इति च ॥ * ॥

कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन ।
मालां मधुव्रतवरूथगिरोपघुष्टां [6]चैत्त्यस्य तत्त्वममलं मणिमस्य कण्ठे ॥२७॥

"ब्रह्मा चित्ताभिमानेन चैत्त्यस्तन्नियमाद्धरिः । स च ब्रह्मा हरेः कण्ठे कौस्तुभत्वेन भासते" इति भागवततन्त्रे ॥ * ॥

---

१ "शाखाद्याश्चान्य-" इति प्र. पाठः ।

२ "स्वो विष्णुः । तस्य धिष्ण्यानां पादादिस्थानानामेकदेशे एकैकावयवे मनसा प्राणधारणम् । प्राणो मनोवृत्तिस्तस्या धारणम् । वैकुण्टस्य विष्णोः सृष्ट्यादिलीलास्मरणम् । समाधानमेकाग्रता" इति च । अष्टाङ्गेषु यमनियमावासनं प्राणायामः प्रत्याहारश्च पूर्वश्लोकेषु निरूपिताः । अस्मिन् श्लोके धारणा ध्यानं समाधिश्च लक्ष्यन्ते । पूर्वार्द्धेन खण्डस्मृतिरूपा धारणा । भगवति मनोधारणप्रयत्नः । "मनसा सह प्राणानामिन्द्रियाणां धारणम्" इति यादुपत्यम् । वैकुण्ठलीलाभिध्यानमिति ध्यानम् । अभितः सर्वकालं स्मरणं अखण्डस्मरणं ध्यानमिति यावत् । तथाऽत्मनः मनसः समाधानं अ प्रयत्नादखण्डा भगवति स्थितिः, इयमेवैकाग्रता नाम, समाधिरित्यर्थः ।

३ "विलक्ष्यैकत्र" इत्यर्वाचीनः पाठः । "तस्मिन् भगवति लब्धपदं लब्धास्पदं (चित्तं) सर्वावयवसंस्थितं कृत्वा समग्राङ्गं भगवन्तं विलोक्य, सर्वावयवस्मरणाशक्तौ भगवत एकत्राङ्गे पादमारभ्य एकैकाङ्गे मनो युञ्ज्यान्मुनिः" इत्यनन्ततीर्थाः ।

४ "सर्वसंस्मरणा-" इति क्वचित् । "सर्वं स्मर्तुमशक्ता-" इति क्वचिन्मुद्रितः पाठः ।

५ "ध्यायेद्देवं समग्राङ्गं यावन्न च्यवते मनः" इत्यष्टादशश्लोके उक्तत्वात् ।

६ "चैत्त्यस्य चित्ताभिमानिनो ब्रह्मणः तत्वं स्वरूपम् । कौस्तुभरत्नस्वरूपेण तस्य कण्ठे विधाता वर्तते । तदुक्तम्– 'तत्कण्ठगं कौस्तुभमास धाता' इति' इत्यनन्ततीर्थाः ।

यच्छ्रीनिकेतमळिभिः[1] परिसेव्यमानं[2] भूत्या स्वया कुटिलकुन्तळ[3]वृन्दजुष्टम् ।
[4]मीनद्वयश्रियमधिक्षिपदब्जनेत्रं [5]ध्यायेन्मनोमयमतन्द्रित उल्लसद्भ्रु ॥ २९ ॥

"साक्षाच्छ्रीस्तु हरे रूपमिन्दिरा तु तदाश्रयात्[6]" इति च ॥ * ॥

ध्यानायनं रहसि तद् बहळाधरोष्ठ-[7]
भासाऽरुणायिततनुद्विजकुन्दपङ्क्ति ।
ध्यायेत् [8]स्वहृत्कुहरकेऽवसितस्य विष्णो-
भक्त्याऽऽर्द्रयाऽर्पितमना न पृथग् दिदृक्षेत् ॥ ३२ ॥

न पृथग् दिदृक्षेत् तमेव दिदृक्षेदित्यर्थः ॥ * ॥

एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकप्रमोदः[9] ।
औत्कण्ठ्यबाष्पकळया[10] मुहुरर्द्यमानस्तच्चापि चित्तबळिशं[11] शनकैर्वियुङ्क्ते ॥
॥ ३३ ॥

---

१ "–निकेतमलिभिः" इति प्र. पाठः । २ "परिषेव्यमाणम्" इति केचित् पठन्ति ।
३ "–कुन्तल–" इति च । ४ "मीनद्वयाश्रय–" इति च ।

५ "अळिभिः परिसेव्यमानं स्वया भूत्या स्वसौरभ्येण निमित्तेन मुखसौरभ्यलोभेन भृङ्गैः परिसेव्यमानमित्यर्थः । आयामपृथुमध्यत्वतनूभयभागत्वेन मीनद्वयस्य या श्रीस्तां धिक्कुर्वदब्जदलनेत्रं मनोमयं ध्यातृमनःसङ्कल्पात्मकम्" इत्यनन्ततीर्थाः । "मनोमयं मनस्याविर्भवत्" इति श्रीधरस्वामी ।

६ "तदाश्रया" इति क्वचिन्मुद्रितः पाठः । ७ "ध्यानायनं प्रहसितं बहुलाधरोष्ठ–" इति प्र. पाठः ।

८ "स्वदेहकुहरेऽवसितस्य" इति च । "स्वदह्रकुहरे–" इति केचित् । "स्वहृत्कुहरके स्वहृदयगुहायां स्थितस्य विष्णोः तदुक्तलक्षणं वपुः रहसि उपविश्य ध्यायेत् । कीदृशम्? ध्यानस्यायनमास्पदम् । बहळाधरोष्ठारुणभासा अरुणायितास्तनवोऽल्पाः द्विजा दन्ता एव कुन्दपुष्पाणि तेषां पंक्तिर्यस्मिंस्तत् तथोक्तम् । आर्द्रया प्रवाहरूपया भक्त्या भगवत्यर्पितमनाः । भगवद्रूपं ध्यायन् पृथक् तस्माद् भगवतोऽन्यद् वस्तु न चिन्तयेत्" इत्यनन्ततीर्थाः ।

९ "उत्पुलकः प्रमोदात्" इति प्र पाठः । १० "–कलया" इति च ।

११ "–बडिशम्" इति च । "हरौ प्रतिलब्धभावः सुस्थिरमनाः, अत एव भक्त्या द्रवीभूतहृदयः, अत एवोद्भूतपुळकसूचितप्रमोदः । भगवद्दर्शनौत्कण्ठ्योद्भूतहर्षाश्रुधारया मुहुरर्द्यमानः परवशीक्रियमाणहृदयः । तच्चित्तबळिशं बाह्यमनआख्यमत्स्यवेधनं शनकैर्वियुंक्ते परित्यजति । बाह्यमनस्त्यक्त्वा स्वरूपान्तःकरणेनैव भगवत्स्वरूपं पश्यति । यथा जलमृगयुर्मीने स्वहस्तं प्राप्ते सति बळिशं त्यक्त्वा स्वहस्तेनैव मीनं उद्धरत्येवमिति" इत्यनन्ततीर्थाः । "वियुंक्ते चिरपरिचयात् स्ववशत्वेन योजयति । अप्रयत्नेन ध्यानानन्तरं समाधिं करोति" इति विजयध्वजीयम् । यादुपत्येऽपि तथा—"चित्ताख्यं बडिशं हरौ विशेषेण योजयति अप्रयत्नेन स्थापयतीत्यर्थः" इति ।

चित्तबळिश[1]वियोगो ध्यानानन्तरसमाधिः ॥ * ॥

मुक्ताश्रयं यर्हि निर्विषयं स्वचित्तं[2] निर्वाणमृच्छति मनः सहसा यथाऽर्चिः ।
आत्मानमत्र पुरुषोऽव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ॥ ३४ ॥

मुक्ताश्रयं विष्णुविषयम् । स्वचित्तं जीवचैतन्ये विततम्[3] । निर्वाणमृच्छति शरीराभिमानं जहाति । स्वचिदभिमानेन ॥ * ॥

सोऽप्येतया चरमया मनसो निवृत्त्या
तस्मिन् महिम्न्यवसितः सुखदुःखबाह्ये ।
हेतुत्वमप्यसति कर्तरि दुःखयोर्न[4]
स्वात्मन् विधत्त उपलब्धपरात्मकाष्ठः[5] ॥ ३५ ॥

"असत्कर्ता तु जीवः स्यात् सत्कर्ता परमेश्वरः" इति शब्दनिर्णये । "दुर्दुःखमिति विज्ञेयं खं सुखं च तयोर्यतः । प्रदाता परमो विष्णुस्तस्माद् [6]दुःखदनामवान्" इति हरिवंशेषु ॥ * ॥

---

१ "-बडिश-" इति प्र. पाठः । अत्रानन्ततीर्थरीत्या चित्तबळिशस्य वियोगस्त्याग एव । विजयध्वजीयादिरीत्या तु विशेषेण भगवति योजनं वियोगः ।

२ "विरक्तम्" इत्यर्वाचीनः पाठः । "अर्चिः दीपः तैलवर्त्यभावे यथा सहसा नश्यति तथा यर्हि यदा स्वचित्तं, स्वचित् जीवस्वरूपचैतन्यम्, तस्मिंस्ततमत्यन्तमिश्रम्, मनो बाह्यान्तःकरणं निर्विषयं इतरविषयेभ्यो निर्गतं, मुक्ताश्रयं नित्यमुक्तविष्णुविषयम्, निर्वाणमृच्छति शरीराभिमानं जहाति । अत्र शरीराभिमानत्यागे सति तदैव पुरुषोऽव्यवधानं जडान्तःकरणव्यवधानं विनैव स्वरूपान्तःकरणेन एकं सर्वोत्तमं परमात्मानमन्वीक्षते सर्ववेदार्थानुसारेण पश्यति प्रतिनिवृत्तसंसारधर्मः" इत्यनन्ततीर्थाः ।

३ "-चैतन्ये ततम्" इति प्र. पाठः । "-चैतन्यततम्" इति क्वचित् । "-चैतन्येऽपि ततम्" इति च क्वचित् ।

४ "दुःखयोर्यत्" इत्यर्वाचीनः पाठः ।

५ "सोऽपरोक्षज्ञानी चरमया संसारावसानरूपया एतया मनसो निवृत्त्या बाह्यान्तःकरणनाशेन, यः पुराऽज्ञानेनाऽवृतः पश्चाद् ब्रह्मज्ञानेन प्रकाशितः तस्मिन् सुखदुःखबाह्ये बाह्यान्तःकरणस्य निवृत्तत्वाद् विषयसुखदुःखाभ्यां रहिते महिम्नि स्वरूपज्ञानानन्दलक्षणे अवसितः निर्दोषज्ञानानन्दरूपो भगवदधीनोऽस्मीति निश्चयज्ञानवान्, उपलब्धपरात्मकाष्ठः परिज्ञातपरमात्मस्वरूपः असति कर्तरि अस्वतन्त्रकर्तरि स्वात्मन् स्वस्मिन् दुःखयोः दुर्नाम्नो दुःखस्य खनाम्नः सुखस्य च हेतुत्वं अहं सुखदुःखयोः कर्तास्मीत्यभिमानं न विधत्ते न मन्यते" इत्यनन्ततीर्थीयम् ।

६ "दुःखादिनामवान्" इति प्र. पाठः प्रामादिकः ।

सर्वभूतेषु चाऽत्मानं सर्वभूतानि चाऽत्मनि
ईक्षेतानन्यभावेन भूतेष्वपि[1] तदात्मताम् ॥ ४१ ॥

अनन्यभावेन[2] तद्रूपाणाममेदेन । तदात्मतां तस्याऽदानादिकर्तृत्वं च भूतविषये ॥ * ॥

तस्मादिमां स्वां प्रकृतिं[3] देवीं[4] सदसदात्मिकाम् ।
दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ॥ ५३ ॥

प्रकृतिं पराभाव्य तदुत्तमत्वेनैव सदाऽवतिष्ठते परः ।

"सर्वभूतस्थमीशेशं जेतारं प्रकृतेरपि । अविशेषं सदैवैकं चिन्तयन् विप्रमुच्यते"
इति च ॥ * ॥ * ॥

इति तृतीयस्कन्धे एकोनत्रिंशोऽध्यायः[5]

यथा साङ्ख्येषु कथितं यन्मूलं तत् प्रचक्षते[6] ।
भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो ॥ २ ॥

यथा साङ्ख्येषूक्तं तथा कथितम् । यत्साङ्ख्यमूलं तल्लक्षणं प्रचक्षते ॥ * ॥

---

१ "भूतेष्विव" इत्यर्वाचीनः पाठः । "सर्वभूतेषु आत्मानमन्तर्यामित्वेन स्थितं विष्णुं वीक्षेत ध्यायेत् । सर्वभूतानि आत्मनि तदाधारत्वेन वीक्षेत । अन्तर्यामिरूपाणि चानन्यभावेन भेदरहितत्वेन वीक्षेत । भूतेषु जीवेष्वपि तदात्मतां तस्याऽदानादिकर्तृतामीक्षेत" इत्यनन्ततीर्थाः । "सर्वेषु भूतेषु चेतनाचेतनेषु आत्मानं परमेश्वरम्; भूतानि चाऽत्मनि परमेश्वरे अनन्यभावेन भक्त्या ईक्षेत" इति शुकदेवः ।

२ "अनन्याभावेन" इति प्र. पाठः प्रामादिक एव । ३ "स्वप्रकृतिम्" इति केचित् पठन्ति ।

४ "दैवीम्" इति प्र. पाठः । "परमात्मा नारायणः यस्मादेवं सर्वजीवान्तर्यामितया स्थितस्तस्मात् स्वां स्वाधीनां सदसदात्मिकां कार्यकारणरूपां इमां जडप्रकृतिम्, तदभिमानिनीं देवीं चित्प्रकृतिं च ब्रह्मादिभिरपि दुर्विभाव्यां निरूपयितुमशक्यां निरस्तसाम्यातिशयेन स्वरूपेण पराभाव्य अतीत्य अवतिष्ठते अतीतवर्तमानभविष्यत्कालेष्ववस्थित इत्यर्थः" इत्यनन्ततीर्थाः । ५ प्र. पाठेऽत्र अष्टाविंशोऽध्यायः ।

६ "यत्सांख्यशास्त्राख्यमूलं तल्लक्षणं प्रचक्षते प्राज्ञाः, तल्लक्षणं सांख्येषु यथार्थज्ञानोत्पादकशास्त्रेषु यथा कथितं तथा ब्रूहीति सम्बन्धः" इत्यनन्ततीर्थीये गमनिकान्तरम् ।

विषयानभिसन्धाय यश ऐश्वर्यमेव वा ।
अर्चादावर्चयेद् यो मां पृथग्भावः स राजसः[१] ॥ ९ ॥

तद्रूपाणां पृथग्भावः ॥ * ॥

कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम् ।
यजेद् यष्टव्यमिति वाऽपृथग्भावः स सात्त्विकः[२] ॥ १० ॥

अपृथग्भावः स सात्त्विकः[३] ॥ * ॥

अर्चादावर्चयेत् तावदीश्वरं मां स्वकर्मकृत् ।
यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितम्[४] ॥ २५ ॥

"[५]अज्ञोऽर्चयेदेवार्चायामन्यथा दोषवान् भवेत् । ज्ञस्त्वर्चयन् [६]सुगुणवानन्यथा दोषवान् नतु" इति कापिलेये ॥ * ॥

आत्मनश्च परस्यापि यः करोत्यन्तरोदरम् ।
तस्य भिन्नदृशो मृत्युर्विधत्ते भयमुल्बणम्[७] ॥ २६ ॥

अन्तरोदरं भिन्नं ब्रह्म[८] । "उदरं ब्रह्म" इति श्रुतेः ॥ * ॥

---

१ "शब्दादिविषयान् दिक्षु व्याप्तं यशश्छत्रचामराद्यैश्वर्यं वा मनस्यभिसन्धाय यः अर्चादौ प्रतिमादौ मामर्चयेत् स पृथग्भावः तद्रूपाणामर्चादिस्थितानां भेददर्शी राजसो भक्तः" इत्यनन्ततीर्थाः ।

२ "यः कर्मनिर्हारं पापकर्मक्षयमुद्दिश्य मां यजेत्, परस्मिन् सर्वोत्तमे मयि तदर्पणम्, देवतान्तरमिष्ट्वा तस्मिन्नीश्वरेऽर्पणमिति वा यो यजेत्, विहितत्वात् यष्टव्यमिति ममेदं कर्तव्यमिति वा मां यो यजेत् अपृथग्भावः तद्रूपाणामभेददर्शी स सात्त्विको भक्तः" इति च ।

३ 'अपृथग्भावः सात्त्विकः" इति प्र॰ पाठः । वीरराघवोऽप्याह—"अत्र पृथग्भाव इति च्छित्वा भेददर्शित्वं त्रिष्वपि समानमिति केचिद् योजयन्ति । तत्र सात्त्विकत्वमसङ्गतम् । पृथग्भावस्य सत्त्वकार्यत्वाभावात् । अतोऽपृथग्भाव इत्येव च्छेदः" इति । शुकदेवोऽप्येवमेवाऽह ।

४ "स्वविहितकर्मकृत् अर्चादौ प्रतिमादौ तावदर्चयेत् । ईश्वरं मां सर्वभूतेष्ववस्थितं स्वहृदि स्थित इति यावन्न वेद । तावत्पर्यन्तं प्रतिमायां पूजयेत् । पश्चाद् हृद्येव पूजयेत्" इत्यनन्ततीर्थाः ।

५ "मूले ज्ञानिनां प्रतिमार्चनं निषिध्यत इति भ्रान्तिः स्यादिति तन्निवारणायेदं प्रमाणोदाहरणम् ।

६ सगुण–" इति प्र॰ पाठः प्रामादिकः ।

७ "मृत्युर्विदधे भयमुल्बणम्" इति प्र. पाठः । "यः उपासकः आत्मनः स्वस्य परस्य च हृदि स्थितं अन्तरेण भेदेन युक्तमुदरं ब्रह्म करोति, सर्वान्तर्यामिणि यो भेदं पश्यति अन्तर्यामिरूपाणां भेदद्रष्टुस्तस्य मृत्युः कालात्मको विष्णुः उल्बणमन्धन्तमःपातलक्षणं भयं विधत्ते" इत्यनन्ततीर्थाः ।

८ इतः परं प्र. पाठे—"आत्मस्थमन्यस्थं च ब्रह्म यो भेदेन पश्यति" इत्यधिकम् ।

जीवाः[1] श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ।
ततः सचित्ताः प्रवरास्ततश्चेन्द्रियवृत्तयः ॥ २८ ॥

प्राणभृतश्चलनयुक्ताः ॥ * ॥

ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः ।
ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥ ३१ ॥

अर्थज्ञात् संशयच्छेत्ता ततः श्रेयान् स्वधर्मकृत्[2] ।
मुक्तसङ्गस्ततो भूयान् न दोग्धा[3] धर्ममात्मनः ।
तस्मान्मय्यर्पिताशेषक्रियार्थात्मरतिर्नरः[4] ॥ ३२ ॥

मय्यर्पितात्मनः पुंसो मयि सन्न्यस्तकर्मणः ।
न पश्यामि परं भूतमकर्तुः समदर्शनात्[5] ॥ ३३ ॥

"पशुवृक्षादिभेदेन जीवा एव स्वतः स्थिताः । संसृतौ व्यत्ययस्तेषां मुक्तौ तत्तत्स्वरूपता । तत्र[6] स्थावरमुक्तेभ्यो वरा जङ्गममुक्तकाः । तेभ्यो मानुषमुक्ताश्च विप्रमुक्तास्ततोऽधिकाः । तत्रोपदेशमात्रेण मुक्तेभ्यो वेदवेदिनः । अर्थज्ञा ऋषयस्तेभ्योऽतो देवाः संशयच्छिदः । पूर्णधर्मा ततस्त्विन्द्रो निस्सङ्गो गरुडस्ततः । भक्तिपूर्णो हरेर्ब्रह्मा[7]

---

१ "अजीवाः चलनरहिताः स्थावरमुक्ताः, तेषां सकाशाज्जीवाः जङ्गममुक्ताः श्रेष्ठाः । हे शुभे, प्राणं प्रकृष्टचेष्टां बिभ्रतीति प्राणभृतः ततः जङ्गममुक्तेभ्यः श्रेष्ठाः । सचित्ता मनोव्यापारयुक्ताः उत्तमाः । तेभ्यश्चक्षुरादीन्द्रियपाटवयुत्ता उत्तमाः:" इत्यनन्ततीर्थाः । "अजीवाः मोक्षयोग्यविरुद्धजीवाः नित्यसंसारिणस्तमोयोग्याश्च । तेषां सकाशात् जीवाः स्थावरमुक्ताः श्रेष्ठाः । ततः प्राणभृतः जङ्गममुक्ताः श्रेष्ठाः" इति यादुपत्यम्।

२ "स्वकर्मकृत्" इति पाठान्तरम् । ३ "भूयानदोग्धा" इति च ।

४ "-क्रियार्थोऽत्मरतिर्नरः" इति च । "ततः द्विपाद्भ्यः चतुर्वर्णमुक्ता उत्तमाः । तेषां सकाशाद् ब्राह्मणवर्णमुक्ता उत्तमाः । उपदेशमात्रानुष्ठानेन जातापरोक्षज्ञानो मुक्तोऽवेदज्ञ उच्यते । (ततो वेदज्ञ उत्तमः) । ततो वेदज्ञात् वेदार्थज्ञ ऋषिमुक्त उत्तमः । तस्मात् संशयच्छेत्ता देवमुक्त उत्तमः । तस्मात् स्वकर्मकृत् पूर्णधर्मकर्ता इन्द्र उत्तमः । ततः मुक्तसङ्गो गरुड उत्तमः । कीदृशः? स्वधर्मं न दोग्धा, स्वधर्मदोहनं न कुर्वन्, निष्काम इत्यर्थः । मय्यर्पिताशेषक्रियार्थः मयि समर्पितसमस्तक्रियाफलः आत्मनि मनोरतिर्यस्यासावात्मरतिः भक्त्या न रीयते नक्षीयत इति नरः पूर्णभक्तिर्ब्रह्मा तस्माद्गरुडाच्छ्रेष्ठः" इत्यनन्ततीर्थीयम् ।

५ "मय्यर्पितात्मनः अकर्तुः सर्वस्येश्वरकर्तृताज्ञातुः समदर्शनात् परब्रह्मज्ञानिनो ब्रह्मणः सकाशात् परमन्य जीवं तत्समं न पश्यामि" इति च । "परमुत्तमम्" इति विजयध्वजीयम् ।

६ "अत्र" इति पाठान्तरम् । ७ "हरेर्ब्रह्म" इति ह्रस्वान्तः प्र. पाठः प्रामादिकः ।

तस्मान्नान्योऽधिकस्ततः । मुक्तौ वा संसृतौ वाऽपि सम्यगेषु हि ते गुणाः" इति हि कापिलेये[1] ॥ * ॥

मनसैतानि भूतानि प्रणमेद् बहुमानयन् ।
ईश्वरो जीवकलया[2] प्रविष्टो भगवानिति ॥ ३४ ॥

जीवकलया सह भूतानि बहुमानयंस्तदालयत्वेनेश्वरं प्रणमेत् ॥ * ॥

भक्तियोगश्च योगश्च मया मानव्युदीरितः ।
ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ॥ ३५ ॥

एकतरभावेऽन्यतरस्य नियतत्वादेकतरेणैव ॥ * ॥

यत्तद्[3] भगवतो रूपं ब्रह्मणः परमात्मनः ।
परं प्रधानपुरुषाद्[4] दैवं कर्मविचेष्टितम् ॥ ३६ ॥

रूपभेदास्पदं दिव्यं काल इत्यभिधीयते ।
भूतानां महदादीनां यतो भिन्नदृशां भयम्[5] ॥ ३७ ॥

सर्वकर्माणि यस्य विचेष्टानिमित्तानि तत् कर्मविचेष्टितम् ॥ * ॥

भिन्नदृशां ईश्वरापेक्षयाऽल्पदृशाम् ।

"भिन्नमल्पं विजानीयादभिन्नं पूर्णमिष्यते" इति शब्दनिर्णये ॥ * ॥

---

१ "इति कापिलेये" इति च ।

२ "ईश्वरो भगवान् हरिः जीवकलया जीवान्तर्यामित्वेन स्थितयाऽनिरुद्धाख्यया तन्वा एतेषु आब्रह्मस्तम्ब-पर्यन्तेषु भूतेषु प्रविष्ट इति मनसा ज्ञानेन बहु मानयन् ध्यायन् हरिं प्रणमेत्" इत्यनन्ततीर्थाः । जीवकलया जीवाख्यभिन्नांशेन सह एतानि भूतानि बहुमानयन् इत्युपस्कर्तव्यम् । एकत्र जीवकलेति भिन्नोंऽशः । अपरत्र स्वरूपांशः ।

३ "एतद्" इति प्र. पाठः ।

४ "प्रधानात् पुरुषात्" इति पाठान्तरम् । "प्रधानं पुरुषम्" इति प्र. पाठः ।

५ "ब्रह्मणः परिपूर्णस्य परमात्मनः सर्वान्तर्यामिणः भगवतः षड्गुणपूर्णस्य यद् रूपं प्रधानपुरुषात् प्रकृतेश्च पुरुषाच्च परमुत्तमम्, दैवं सर्वदेवोत्तमम्, यच्च सर्वकर्मविचेष्टितम् । सर्वकर्माणि यस्य चेष्टानिमित्तानि, यच्च ब्रह्माण्डादिरूपभेदानामास्पदम्, तद् रूपं काल इत्यभिधीयते । भिन्नदृशामल्पज्ञानां महदादिजीवानां यतो भयं भवति" इत्यनन्ततीर्थाः ।

नचास्य कश्चिद् दयितो न द्वेष्यो नच बान्धवः ।
आविशत्यप्रमत्तोऽसौ प्रमत्तं जनमन्तकृत् ॥ ३९ ॥

"यथायोग्यातिरेकेण न द्वेष्यश्च प्रियो हरेः" इति कापिलेये ॥ * ॥

इति तृतीयस्कन्धे त्रिंशोऽध्यायः[१]

तं च स्वभरणाकल्यं[२] तत्कळत्रादयस्तथा ।
नाऽद्रियन्ते यथापूर्वं कीनाश[३] इव गोजरम् ॥ १३ ॥

"कीनाशः कर्षको मतः" ॥ * ॥

वायुनोत्क्रमतोत्तार[४]कफसंरुद्धनासिकः[५] ।
कासश्वासकृतायासः कण्ठे[६] घुरुघुरायते[७] ॥ १६ ॥

"उत्तारमुद्गतं[८] विद्यात्" ॥ * ॥

योजनानां सहस्राणि नवतिं नव[९] चाध्वनः ।
त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाम्[१०] ॥ २४ ॥

---

१ प्र· पाठेऽत्र ऊनत्रिंशोऽध्यायः ।

२ "एवं स्वभरणाकल्पं तत्कलत्रा–" इति प्र. पाठः । अकल्योऽशक्तः ।

३ "कीनाशा इव" इति प्र. पाठः । "कीनाशः कर्षकः गोजरं उल्लेखनानर्हं जरढवृषभम्" इत्यनन्ततीर्थाः ।

४ "–तोत्तारः कफ–" इति प्र. पाठः । ५ "–नाडिकः" इति च ।

६ "कण्ठो–" इति क्वचित् पाठान्तरम् ।

७ "घुरघुरायते" इत्यर्वाचीनः पाठः । "उत्क्रमता उद्गच्छता वायुना उत्तारः उद्गतः कफः श्लेष्मा । तेनोद्गतेन श्लेष्मणा संरुद्धनासिकाद्वारः । कासेन च उत्पन्नबहुक्लेशः कण्ठे घुरुघुरायते । तस्मिन् कण्ठे तादृशशब्द उत्पद्यते" इत्यनन्ततीर्थाः ।

८ "उत्तारमुद्गतिम्" इति प्र. पाठः प्रामादिकः । ९ "नवतीर्नव" इति च पाठान्तरम् ।

१० "यातनाः" इत्यर्वाचीनः पाठः । "अध्वनो मार्गस्य योजनानां नवतिं सहस्राणि नव सहस्राणि च । त्रिभिर्मुहूर्तैः द्वाभ्यां मुहूर्ताभ्यां वा । वाशब्देन प्रमाणान्तरोक्ताः दश दिनानि, पक्षः, मासश्च गृह्यन्ते । यातनां दण्डनाम्" इत्यनन्ततीर्थाः । "यातनां नरकम्" इति विजयध्वजीयम् ।

"त्रिभिर्मुहूर्तैर्द्वाभ्यां वा दिनैर्दशभिरेव वा । पक्षान्मासेन वा याति यमलोकमितो मृतः[१]" इति नारदीये ॥ * ॥

[२]अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते ।
या यातना वै नारक्यस्ता इहाप्युपलक्षिताः ॥ २९ ॥

अत्रैवेत्येवशब्दः सामीप्यार्थे ।

"सामीप्ये च प्रधाने च एवशब्दोऽवधारणे" इति शब्दनिर्णये ।

अत्राप्यस्तीत्यर्थः ॥ * ॥

इति तृतीयस्कन्धे एकत्रिंशोऽध्यायः[३]

---

[४]कललं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् ।
दशाहेन तु कर्कन्धुः[५] पेश्यण्डं वा ततः परम् ॥ २ ॥

"नानाविधा गर्भवृद्धिः कर्मभेदाद् भविष्यति । अतो नानाविधं ग्रन्थे गर्भसंस्थानमुच्यते" इति षाड्गुण्ये ॥ * ॥

नाथमान ऋषिर्भीतः सप्तवध्रिः कृताञ्जलिः ।
स्तवीति तं विक्लबया[६] वाचा येनोदरेऽर्पितः ॥ १२ ॥

---

१ "-मितो गतः" इति प्र. पाठः ।

२ "अत्रैव अत्राप्यस्ति । नरकः स्वर्गश्च नारक्यः नरकलभ्या या यातनास्ता इहापि भूमावप्युपलक्षिताः दृष्टाः । तस्मादत्राप्यस्ति नरकः । तथा स्वर्गतुल्यविभवानामत्रापि लभ्यत्वात् स्वर्गश्चात्रास्ति" इत्यनन्ततीर्थाः । श्रीधरीयेऽप्युक्तम्—"नचैतदसम्भावितमत्रापि दृश्यमानत्वात्" इति ।

३ प्र· पाठेऽत्र त्रिंशोऽध्यायः ।

४ "कलिलम्" इति क्वचित् पाठः ।

५ "कर्कन्धूः" इति प्र. पाठः । "कललं रक्तधातुरसमिश्रं वटनिर्यासतुल्यं भवति । पञ्चरात्रेण जलबुद्बुदाकारं भवति । कर्कन्धुरीषत्काठिन्योपेतं निर्यासतुल्यं भवति । पेशी मांसखण्डो जरायुमान् भवति । मनुष्यादीनामयं विशेषः । पक्ष्यादीनामण्डं पिण्डाकारवद् भवति । नानाविधगर्भवृद्धिः कर्मभेदाद् भवति" इत्यनन्ततीर्थाः ।

६ "स्तुवीत तं विक्लवया" इत्यर्वाचीनः पाठः । "नाथमानो याचमानः । ऋषिः ज्ञानी । गर्भवासदुःखाद् भीतः । येनोदरे गर्भे प्रवेशितस्तं स्तवीति । सप्त वध्रय इन्द्रियाणि यस्य स तथा" इत्यनन्ततीर्थाः ।

34

"वध्रयस्त्विन्द्रियाण्याहुर्हृषीकाणीति चाच्युत[१]" इति शब्दनिर्णये ॥ * ॥

ज्ञानं [२]य एतददधात् कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः ।
तं जीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजेम ॥ १७ ॥

कतमः सुखतमः ॥ * ॥

पश्यत्ययं धिषणया ननु सप्तवध्रिः [३]शारीरभेदमशरीरवदस्य देहे ।
यद्दत्तया स तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्त्यमिव प्रतीतम्[४] ॥ २० ॥

अशरीरवत् परमात्मवत् । परमात्मन एव देहोऽपि, तद्वशत्वात् ।

"तत्त्वज्ञानं तु देवानां गर्भस्थानां भविष्यति । उत्तमानामृषीणां वाऽप्यन्येषां[५] बहुजन्मगम्[६]" इति स्कान्दे ॥ * ॥

तेष्वशान्तेषु मूढेषु खण्डितात्मावसायिषु[७] ।
सङ्गं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च[८] ॥ ३५ ॥

खण्डितात्मावसायिषु जीवमात्रज्ञानिषु ॥ * ॥

---

१ "चोच्यते" इति प्र. पाठः ।

२ "यदेतददधात्" इत्यर्वाचीनः पाठः । "स्थावरजङ्गमेषु अनुवर्तितांशः, अन्तर्यामित्वेन स्थितानन्तस्वरूपांशः, यः परमात्मा एतत् स्वविषयं अतीतजन्मादिषयं च ज्ञानं मेऽदधात् अनुजग्राह स देवः कतमः सुखपूर्णः । जीवानां कर्मोद्भूतसंसारपदवीमनुवर्तमानाः अनादितो वर्तमाना वयं भजेम, सोऽस्मान् पुनर्ज्ञानं दत्वा मोचयत्विति" इत्यनन्ततीर्थाः ।

३ "शारीरके दमशरीर्यपरः स्वदेहे । यत्सृष्टयाऽऽस तमहम्" इत्यादिः प्र. पाठः ।

४ "सप्तवध्रिः सप्तज्ञानेन्द्रियवान् अयं जीवोऽस्य हरेरधीने देहे स्थितः । येन परमात्मना दत्तया धिषणया ज्ञानेन शारीरभेदं शरीरस्थपरमात्मादिदेवताभेदं पश्यति अशरीरवत्, अशरीरः परमात्मा यथा शारीराणां जीवानां भेदं पश्यति तद्वत् । सोऽहं तं पुराणं पुरुषं चैत्त्यमिव चित्ताभिमानिनं ब्रह्माणमिव हृदि बहिश्च प्रतीतं विज्ञातं पश्ये" इति च ।

५ "वा अन्येषाम्" इति क्वचित् ।

६ अन्येषामतीतबहुजन्मगं ज्ञानमेव भवति । न तत्त्वज्ञानम् । अथवाऽन्येषां मनुष्योत्तमानां बहुजन्मभिः साधनपरिपाके सति तदन्ते तत्वज्ञानं च भवति ।

७ "खण्डितात्मस्वसाधुषु" इति प्र. पाठः ।

८ "अशान्तेषु हरिनिष्ठारहितेषु, मूढेषु कार्याकार्याज्ञेषु, खण्डितात्मावसायिषु, खण्डितात्मा जीवः, अवसायो ज्ञानम् । जीवत्वं यावज्ज्ञानेन सिद्ध्यति तावन्मात्रज्ञानवत्सु । नतु तत्वज्ञानवत्सु । योषित्क्रीडामृगेषु स्त्रीजितेषु" इत्यनन्ततीर्थाः । "खण्डितात्मा जीवः, स एवास्मिन् शरीरेऽस्ति नान्य इत्यवसायो येषां ते" इति विजयध्वजीयम् ।

तत्सृष्टिसृष्टसृष्टेषु[1] को न्वखण्डितधीः पुमान् ।
ऋषिं नारायणमृते योषिन्मय्येह मायया[2] ॥ ३८ ॥

बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम् ।
या करोति निजायत्तान्[3] भ्रूविजृम्भेण केवलम् ॥ ३९ ॥

योपयाति शनैर्माया योषिद् देवविनिर्मिता ।
[4]तामीक्षेताऽत्मनो मृत्युं तृणैः कूपमिवाऽवृतम् ॥ ४१ ॥

"मयः प्रधान उद्दिष्टो माया तद्वश उच्यते[5]" इति षाड्गुण्ये ॥ * ॥

"सत्पुंसु च तथा स्त्रीषु न सङ्गो दोषमावहेत् । यथायोग्ये[6] गुणायैव दोषकृद् दुष्टजन्तुषु" इति वाराहे ॥ * ॥

देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् ।
भुञ्जान एव कर्माणि करोत्यविरतं पुमान्[7] ॥ ४४ ॥

जीवभूतेन जीवकर्मभूतेन ॥ * ॥

यथाऽक्ष्णोर्द्रव्यावयवदर्शनायोग्यता यदा ।
तदैव चक्षुषो द्रष्टुर्द्रष्टृत्वं योग्यताऽनयोः[8] ॥ ४७ ॥

चक्षुस्सकाशाद् द्रष्टुर्द्रष्टृत्वमक्ष्णोर्योग्यता ॥ * ॥

---

१ "तत्सृष्टसृष्टसृष्टेषु" इति प्र. पाठः । "तस्य सकाशादुद्भूता सृष्टिस्तत्सृष्टिः । तत्सृष्टौ सृष्टा मरीच्यादयः । तत्सृष्टाः काश्यपादयः तेषु" इत्यनन्ततीर्थाः । २ "योषिन्मय्याऽऽत्ममायया" इति क्वचित् ।

३ "पदाक्रान्तान्" इत्यर्वाचीनः पाठः । "या केवलं भ्रूविजृम्भेण दिशां जयिनः दिग्जेतॄन् राजादीन् निजायत्तान् करोति" इत्यनन्ततीर्थाः ।

४ "या स्त्री अन्यायेन भार्यात्वेनोपयाति तामात्मनो मृत्युं नरकदुःखदामीक्षेत" इति च ।

५ तस्मात् सर्वप्रधानहर्यधीना मोहनी शक्तिर्मायेत्यर्थः । ६ "यथायोग्यम्" इति प्र. पाठः ।

७ "करोत्यविरतः पुमान्" इति पाठान्तरम् । "जीवभूतेन जीवस्य कर्मणा जातेन देहेन देहाद् देहान्तरमनुव्रजन् पुमान् कर्माणि भुञ्जान एव कर्माणि नानाजन्मनिमित्तानि अविरतं निरन्तरं करोति" इत्यनन्ततीर्थाः ।

८ "यथाऽक्ष्णोः चक्षुषोः यदा द्रव्यावयवदर्शनायोग्यता, द्रव्यावयवः शौक्ल्यादिरूपम्, तस्य दर्शनायोग्यता कामलादिदोषदुष्टतया दर्शनासामर्थ्यं भवति तदैव चक्षुषः सकाशात् द्रष्टुरात्मनो जीवस्य द्रष्टृत्वं नेति

आत्मनः केवलं ज्ञानमर्थो देहाद्यसज्जतः[1] ।
सुखदुःखादयो भावा न देहस्य नचाऽऽत्मनः ॥ ४९ ॥

केवलं ज्ञानं पुरुषार्थः । देहादिष्वसङ्गिनो जीवस्य तन्निमित्तसुखदुःखादयो न सन्ति । किमुत देहस्य? अचेतनत्वात् ॥ * ॥ * ॥

इति तृतीयस्कन्धे द्वात्रिंशोऽध्यायः[2]

---

[3]तच्छ्रद्धयाऽऽक्रान्तमतिः पितृदेवव्रतः पुमान् ।
गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ॥ ३ ॥

"ईषद्भक्तो भगवति सुकर्मा स्वर्गमेष्यति । अभक्तो निरयं याति सुकर्माऽपि न संशयः" इति वामने ॥ * ॥

भेददृष्ट्याऽभिमानेन निस्सङ्गेनापि कर्मणा ।
कर्तृत्वात् सगुणं ब्रह्म पुरुषं पुरुषर्षभम् ॥ १२ ॥

शेषः । यदाऽनयोश्चक्षुषोः द्रव्यावयवदर्शनयोग्यताऽस्ति तदा चक्षुषः सकाशाद् द्रष्टुर्द्रष्टृत्वं प्रतीयते । एवमेव देहस्य द्रव्यदर्शनायोग्यत्वेन मरणे सति जीवो मृत इति व्यवह्रियते । द्रव्यदर्शनयोग्यत्वेन देहे जाते सति जात इति व्यवह्रियते" इति च । अथवा एवं व्याख्येयम्—अक्ष्णोः चक्षुर्गोळकयोः यदा दर्शनायोग्यता तदैव चक्षुषः अयोग्यता, तद् द्वारा द्रष्टुश्चायोग्यता तद्वत् देहे मृते जीवस्यापि तद्व्यवहारः । यदाऽक्ष्णोर्योग्यता तदैव चक्षुषोऽपि योग्यता, चक्षुषो द्वारा द्रष्टुरपि द्रष्टृत्वं तद्वत् देहे जाते जीवेऽपि जातत्वव्यवहारः । गोळकगते एव योग्यताऽयोग्यते जीवगते व्यवह्रियेते । तद्वद्देहगते जनिमृती अपि जीवगते इति ।

१ "देहाद्यसङ्गिनः" इत्यपि पाठान्तरम् । प्र. पाठे त्वयं श्लोक एव न पठ्यते । "देहाद्यसज्जतः देहगेहादिषु सङ्गवर्जितस्य आत्मनः जीवस्य केवलं भगवज्ज्ञानमेवार्थः प्रयोजनम् । मोक्षसाधनत्वात् । जीवस्य स्वतः सुखरूपत्वात् शरीरसम्बन्धकृताः सुखदुःखादयो भावा धर्मा न सन्ति । जडत्वाद् देहस्यापि न सन्ति" इत्यनन्ततीर्थाः ।

२ अत्र प्र. पाठे एकत्रिंशोऽध्यायः ।

३ "तच्छ्रद्धया तेषां देवादीनां यजनकर्तव्यताबुद्ध्याऽऽक्रान्तमतिः, पितृणां देवानां च सन्तुष्टियोग्यव्रतवान्, सोमपाः यज्ञेषु सोमव्रतवान्, चन्द्रलोकं गत्वा पुण्यफलं भुक्त्वा तदवसाने पुनरेष्यति मनुष्यलोकम्" इति च ।

स सङ्कल्य[1] पुनः काले कालेनेश्वरमूर्तिना ।
जातेऽगुणव्यतिकरे यथापूर्वं प्रजायते[2] ॥ १३ ॥

अभिमानेन पूर्णज्ञानेन ॥ * ॥ सङ्कल्य लये परमेश्वरं प्रविश्य[3] । यथापूर्वं प्रजायते उच्चनीचादि-भावेन जायते । अगुणव्यतिकरे बहिः श्वेतद्वीपे निर्गच्छति[4] ॥ * ॥

ऐश्वर्यं पारमेष्ठ्यं यत्[5] तेऽपि धर्मविनिर्मितम् ।
निषेव्य पुनरायान्ति गुणव्यतिकरेऽसति[6] ॥ १४ ॥

गुणव्यतिकरे असति । लये प्राप्ते । पुनः परमेश्वरमायान्ति ।

"ब्रह्मा देवैः परिवृतः प्रळये[7] परमेश्वरम् । प्रविश्य सर्गे तु पुनः श्वेतद्वीपे प्रमोदते । ज्ञानधर्मफलांस्तत्र भोगान् भुक्त्वा लये पुनः । नारायणं समाविश्य ज्ञानव्यक्तं[8] निजं सुखम् । भुञ्जते त्वेवमेवैषां काले संसर्गनिर्गमौ । नित्यौ नित्यसुखं चैव सृष्टौ

---

१ "संसृत्य" इति प्र. पाठः ।

२ "भेददृष्ट्या जीवेश्वरादीनां भेदज्ञानेन, सम्पूर्णभगवदपरोक्षज्ञानेन च, ज्ञानोत्तरकालीननिस्सङ्गकर्मणा च जगत्सृष्ट्यादिकर्तृत्वात् ज्ञानैश्वर्याद्यनन्तगुणं पूर्णषड्गुणं क्षराक्षरपुरुषोत्तमं परं ब्रह्म काले प्रळयकाले सङ्कल्य प्रविश्य स ब्रह्मादिजीवसंघः ईश्वरमूर्तिना ईश्वरस्य प्रतिमास्थानीयेन कालेन सृष्टौ प्राप्तायां सत्यां, पुनः सृष्टिकाले प्राप्ते अगुणव्यतिकरे सत्वादिगुणमिश्रीभावरहिते श्वेतद्वीपे यथापूर्वं संसारदशायां यथा भेदेन स्थितस्तथा प्रजायते प्रकृष्टोऽभिव्यज्यते, साक्षान्मुक्तो भवति" इति च । "कालेन कालान्तर्यामिणा ईश्वरमूर्तिना हरिणा गुणव्यतिकरे सृष्टिलक्षणे काले जाते प्राप्ते, अगुणव्यतिकरे त्रिगुणव्यतिकररहिते बहिः श्वेतद्वीपे यथापूर्वमुच्चनीचादिभावेन प्रजायते प्रादुर्भूतानन्दो भवति" इति विजयध्वजीयम् । ३ "प्राप्य" इति पाठान्तरम् ।

४ अत्र बहवः पाठभेदाः— "प्रजायते उच्चनीचादिभावेन जायते गुणव्यतिकरे जाते । अगुणव्यतिकरे बहिः श्वेतद्वीपे निर्गच्छति" इति क्वचित् । "प्रजायते उच्चनीचादिभावेन जायते गुणव्यतिकरे । बहिः श्वेतद्वीपे निर्गच्छति" इति च क्वचित् । "प्रजायते उच्चनीचादिभावेन । जाते अगुणव्यतिकरे" इतीयदेव क्वचित् । ततः परं "बहिः श्वेतद्वीपे निर्गच्छति" इतीदमपि नास्ति । अत्र प्र. पाठे श्वेतद्वीपे निर्गच्छतीत्यतः परम्— "गुणव्यतिकराभावेऽप्युच्चनीचादि पूर्ववत् । विष्णोश्चैव विमुक्तानां न कदाचन गच्छतीति गारुडे" इत्यधिकम् । कोशेष्वपि क्वचित् तथा । ५ "पारमेष्ठ्यं च" इति प्र. पाठः ।

६ " ते मुक्ताः सृष्टिकाले हरेर्निर्गताः श्वेतद्वीपे यत् परमेष्ठिनो हरेः प्रसादाज्जातं पुण्यनिर्मितं ऐश्वर्यं निषेव्य पुनः गुणव्यतिकरे, प्राकृतजगत् गुणव्यतिकर इत्युच्यते, तस्मिन् जगति तेन भगवता असति संहृते सति स्वोच्चमप्रवेशपूर्वकं हरिमायान्ति । एवं मुक्तानां सृष्टिसंहारकाले संसर्गनिर्गमौ नियतौ । भगवन्मूर्तिप्रवेशे स्वरूपानन्द-भोगः, निर्गमे बहुविधविषयभोगोऽप्यस्तीति ज्ञेयम्" इत्यनन्ततीर्थाः ।

७ "प्रलये" इति प्र. पाठः । ८ "ज्ञानं व्यक्तम्" इति प्र. पाठः प्रामादिकः ।

मोमास्तथोत्तमाः । [1]गुणव्यतिकराभावेऽप्युच्चनीचादि पूर्ववत् । विष्णोश्चैव विमुक्तानां न कदाचन गच्छति" इति गारुडे । "यथापूर्वं हरेः सर्वगुणैर्नीचात्मता[2] तथा[3] । ब्रह्मणश्च तथाऽन्येषामन्येषां च यथापदम्" इति स्कान्दे ॥ * ॥

ये त्विहाऽसक्तमनसः कर्मसु श्रद्धयाऽन्विताः[4] ।
कुर्वन्त्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः ॥ १६ ॥

रजसा कुण्ठमनसः कामात्मानोऽजितेन्द्रियाः ।
पितॄन् यजन्त्यनुदिनं गृहेष्वभिरताशयाः ॥ १७ ॥

त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः ।
[5]कथायाः कथनीयोरुविक्रमस्य मधुद्विषः ॥ १८ ॥

नूनं दैवेन विहता ये चाच्युतकथासुधाम् ।
हित्वा शृण्वन्त्यसद्गाथाः[6] पुरीषमिव विड्भुजः ॥ १९ ॥

दक्षिणेन पथाऽर्यम्णः पितृलोकं व्रजन्ति ते ।
[7]प्रजयाऽनुप्रजायन्ते श्मशानान्तक्रियाकृतः ॥ २० ॥

ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति ।
पतन्ति विवशा दैवैः सद्यो विभ्रंशितोदयाः[8] ॥ २१ ॥

---

१ "गुणव्यतिकरा–" इत्याद्यारभ्य "इति गारुडे" इत्येतत्पर्यन्तं प्र. पाठे पूर्वमेव "श्वेतद्वीपे निर्गच्छति" इत्यतः परं पठितमिति नात्र पठ्यते । क्वचित् कोशेष्वपि तथा । एतत्पक्षे "ब्रह्मा देवैः–" इत्यादि समस्तं स्कान्दवचनम् ।

२ "नीचोच्चता" इति प्र. पाठः । हरेः सकाशात् ब्रह्मणः सर्वगुणैर्नीचात्मता । अन्येषामन्येषां तदनन्तराणां यथास्थानक्रमं क्रमेण नीचता ब्रह्मणः सकाशात् ।

३ "नीचात्मता सदा" इति क्वचित् पाठः ।

४ "स्वर्गादावेवाऽसक्तमनसः यज्ञादिकर्मस्वेव श्रद्धायुक्ताः" इत्यनन्ततीर्थाः ।

५ "कथायाम्" इति प्र. पाठः । "ते पुरुषास्त्रैवर्गिकाः । धर्मार्थकामयोग्या एव । नतु मोक्षयोग्याः । कुतः ? सर्वपापहरत्वाद्धरिः, ज्ञानरूपत्वान्मेधाः । तादृशस्य विष्णोः कथाया विमुखा यतोऽतः" इत्यनन्ततीर्थीयम् ।

६ "शृण्वन्त्यसद्गाथाम्" इति पाठान्तरम् । "विड्भुजः विड्वराहादयः पायसं त्यक्त्वा पुरीषमिव अच्युतकथासुधां हित्वा असद्गाथां वनितादिविषयां शृण्वन्ति, ते दैवेन हरिणा नाशिता एव" इति च ।

७ "प्रजामनु" इति प्र. पाठः । "प्रजायां तु" इति क्वचित् पाठान्तरम् ।

८ "ये त्विहाप्रतिषिद्धानि नित्यानि च कर्माणि कुर्वाणाः हरावत्यल्पभक्तास्ते कर्मिणो दक्षिणेन पथा दक्षिणायनमार्गेणार्यम्णो यमस्य पितृणामधिपस्य लोकं व्रजन्ति । तत्र स्वकृतश्राद्धादिफलं भुक्त्वा क्षीणसुकृताः दैवैः विभ्रं-

८

"अत्यल्पभक्ता विष्णौ च सदा श्राद्धादिकारिणः । पितृलोकं समाविश्य स्वसन्ताने पुनःपुनः । क्षिप्रमेव प्रजायन्ते ये तु तद्भक्तिवर्जिताः[1] । अन्यसामान्यवेत्तारस्तद-न्योत्तमवेदिनः[2] । तद्भक्तनिन्दकाश्चैव यान्त्येव निरयं ध्रुवम् । अपि धर्मैकबिलया[3] नात्र कार्या विचारणा" इति च । "मुक्तियोग्यास्तु देवाद्या मानुषा यज्ञभागिनः[4] । मनुष्यमेदाः श्राद्धादिकृतो विद्वेषिणोऽसुराः" इति च ॥ * ॥

ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् ।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणाम्[5] ॥ २८ ॥

यथा महानहङ्कारस्त्रिवृत्[6] पञ्चविधः स्वराट् ।
एकादशविधस्तस्य वपुरण्डं जगद् यतः ॥ २९ ॥

"मत्स्यकूर्मादिरूपं च विष्णोर्ज्ञानैकमात्रकम् । तन्मन्यन्ते भौतिकं तु ये गच्छन्त्यधरं तमः" इति ब्राह्मे ॥ * ॥

"एकादशेन्द्रियात्मा च पञ्चभूतात्मकस्तथा । सर्वाभिमानी भगवान् स्वराळिन्द्रः[7] पुरन्दरः । इदमण्डं जगत् सर्वं शक्रदेहं विदुर्बुधाः । तत्पतिस्त्रिगुणो रुद्रस्तस्य ब्रह्मा ततो हरिः" इति वामने ॥ * ॥

यथैतान् पश्यन्ति तद्वदेव[8] ज्ञानात्मकं मत्स्यादिरूपं गुणमयं पश्यन्त्यज्ञाः[9] ॥ * ॥

शितसम्पदः विवशा इमं मनुष्यलोकं प्रति पतिष्यन्ति । ते तत्र स्वसन्तानेषु प्रजया पुत्ररूपेण प्रजायन्ते । कीदृशाः ? गर्भाधानादिश्मशानान्तक्रियाकर्तारः । एवं संसारवर्तनमेव तेषां न कदाचिन्मोक्षः" इति च । अत्र "तत्र ते क्षीणसुकृताः पुण्यलोकमिमं प्रति" इत्यप्यनन्ततीर्थपाठः सम्भाव्यते ।

१ "ये तु भक्तिविवर्जिताः" इति प्र. पाठः । २ "–वादिनः" इति च पाठान्तरम् ।

३ "धर्मैकनियमा–" इति प्र. पाठः । ४ "यज्ञभोगिनः" इति प्र. पाठः प्रामादिकः ।

५ "धर्मिणा" इत्यर्वाचीनः पाठः । "एकं प्रधानं ज्ञानात्मकं निर्गुणं प्रकृतिगुणनिर्मितदेहरहितं परं ब्रह्म शब्द-स्पर्शादिविषयज्ञानाख्यधर्मवतां अज्ञानां पराचीनैः बहिर्विषयेषु प्रवृत्तैश्चक्षुरादीन्द्रियैः अर्थरूपेण भौतिकशरीरव-त्त्वेन भ्रान्त्या प्रतीयते" इत्यनन्ततीर्थाः ।

६ "महानहंरूपस्त्रिवृत्" इत्यर्वाचीनः पाठः । "महत्तत्वाभिमानी ब्रह्मा त्रिविधाहङ्काराभिमानी रुद्रः । पञ्च-विधः पञ्चभूताभिमानी स्वराट् इन्द्रः । एकादशेन्द्रियाभिमानी च स एव । तस्य शक्रस्य वपुरात्मकमण्डं ब्रह्माण्डं च, जगच्चतुर्दशजगन्ति यतः यत्राण्डे तिष्ठन्ति तादृशम् । महदाद्यभिमानिनो ब्रह्माद्या देवाः सर्वजगदाधार-भूतमिदमण्डं च यथा जडात्मकदेहवत्त्वेन च जडत्वेन च भान्ति, अवताररूपाण्यप्यज्ञानात् तथैव भान्ति" इति च ।

७ "स्वराडिन्द्रः" इति प्र. पाठः । ८ "यथैतान् पश्यति तदेव" (?) इति क्वचित् पठ्यते ।

९ "मत्स्यादिरूपं पश्यन्त्यज्ञाः" इत्यनन्ततीर्थाः पठन्ति ।

[1]ज्ञानं योगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः ।
द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ॥ ३२ ॥

"ज्ञानभक्ती विना नैव मुक्तिः कस्यापि विद्यते । तयोरेकतरेणैव विष्णुनेनोभयं विना[2]।
एवमप्येतयोरेकभावेऽन्यनियतेर्ध्रुवम् । [3]एकेनापि भवेन्मुक्तिस्तदर्थं त्वन्यसाधनम्"
इति हरिवंशेषु ॥ * ॥ * ॥

इति तृतीयस्कन्धे त्रयस्त्रिंशोऽध्यायः[4]

---

[5]अथाप्ययान्ते सलिले शयानं भूतेन्द्रियार्थात्ममयं वपुस्ते ।
गुणप्रवाहं सदशेषबीजं दद्ध्यौ स्वयं यज्जठराब्जजातः ॥ २ ॥

भूतेन्द्रियार्थात्ममयं तेभ्यः प्रधानम् ।
"त्वं प्रधानमयो देव प्रधानादधिको यतः" इति वाराहे ॥ * ॥

[6]त्वं देहतन्त्रः प्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये[7] ।
यथाऽवतारास्तव सूकरादयस्तथाऽयमप्यात्मपथोपलब्धये ॥ ५ ॥

---

१ "ज्ञानयोगश्च" इत्यर्वाचीनः पाठः । "मद्विषयं ज्ञानं ते प्रोक्तम् । नैर्गुण्यः सत्त्वरजस्तमोगुणरहितः भक्तिरूपो यो योगः स च तव कथितः । तयोर्द्वयोरपि ज्ञानयोगयोः भगवच्छब्दवाच्यः परमात्मैक एवार्थः विषयः" इति च ।

२ उभयं विना तयोरेकतरेणैव नैव मुक्तिः कस्यापि विद्यते । "तयोरेकतरेणापि" इत्यपि पाठान्तरम् ।

३ अथापि परस्परनैयत्यात् एकेनापि भवेन्मुक्तिरिति क्वचिदुच्यते । तद्यथा–'नान्यः पन्थाः' इति केवल ज्ञानेन । 'भक्त्या त्वनन्यया' इति केवलभक्त्या ।

४ प्र. पाठेऽत्र द्वात्रिंशोऽध्यायः ।

५ "अथाप्यजोऽन्तःसलिले" इत्यर्वाचीनः पाठः । "भगवंस्ते जठराब्जजातः ब्रह्मा तव यद् वपुः तद्दद्ध्यौ। कीदृशम्? अप्ययान्ते प्रळयावसाने प्रळयसलिले शयानम्, पञ्चभूतानि, इन्द्रियाणि, अर्थाः शब्दादयः, आत्मा मन इत्येतेभ्यो मयं प्रधानम् । 'मयं प्रधानमुद्दिष्टम्' इति वचनात् । सत्त्वादिगुणान् प्रवर्तयतीति गुणप्रवाहम्, सर्वोत्तमम् अशेषबीजं सर्वजगद्द्रव्यञ्जकम्" इति च । "ज्ञानादिगुणानां प्रवाहो यस्मिन् तत्तथा" इति विजयध्वजीयेऽर्थान्तरम् । "अत्र भूतादिशब्देन तदभिमानिनो देवा ग्राह्याः" इति यादुपत्यम् ।

६ " तद् देह–" इत्यपि पाठान्तरम् ।

७ "विभोऽज भूतये" इति प्राचीनकोशेषु पाठान्तरम् । "विभो देव त्वं देहतन्त्रः सच्चिदानन्दात्मकदेहेनैव प्रकाशवानवतीर्णोऽसि, नतु जीववत् प्राकृतभौतिकदेहत्वेन । पाप्मनां दुष्टदैत्यानां प्रशमाय, तव निदेशभाजां आज्ञाकारिणां ब्रह्मादीनां विभूतये च यथा सूकरादयस्तवावतारास्तथाऽयमप्यवतार आत्मपथोपलब्धये ज्ञानमार्ग-

[देहतन्त्रः[१]] देहप्रकाशः—

"ततिः प्रकाशो विस्तारस्तन्त्रश्चेत्युच्यते बुधैः[२]" इति तन्त्रमालायाम् ॥ * ॥

ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये ।
[३]निवृत्तजीवभावत्वाद् वीतक्लेशाऽऽप्तनिर्वृतिः ॥ २६ ॥

"जीवोपाधिप्रभृतय आमुक्तेः सर्वदेहिनाम् । नियमात् सन्त्यभावस्तु [४]निष्फलत्वादुदीर्यते" इति वाराहे ॥ * ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते
श्रीभागवततात्पर्यनिर्णये चतुस्त्रिंशोऽध्याय.[५]

इति तृतीयः स्कन्धः

प्रदर्शनाय कृतः" इत्यनन्ततीर्थाः । "देहतन्त्रः आविष्कृतदेहः" इति शुकदेवः । "पूर्वं विद्यमानस्य देहस्य तन्त्रः प्रकाशो व्यक्तिर्यस्य" इति यादुपत्यम् । "द्रष्टुः पाप्मनां पापानां प्रशमाय" इति विश्वनाथचक्रवर्ती ।

१ "देहतन्त्रः' इतीयत् क्वचिन्न पठ्यते । २ "तन्त्रं चेत्यभिधीयते" इति प्र. पाठः ।

३ "निवृत्तजीवापत्तित्वात् क्षीणक्लेशा–" इति प्र. पाठः । "निवृत्तजीवोपाधित्वात्" इति यादुपत्यादिसम्मतः पाठः । "सा देवहूती तदाऽऽत्मानं स्वशरीरं न सस्मार । कीदृशी ? आत्मासंश्रये स्वाधारे ब्रह्मण्येकाग्रत्वेन स्थितमतिः । निवृत्तजीवभावत्वात् निवृत्तलिङ्गशरीराभिमानत्वात् वीतक्लेशा शरीरनिमित्तक्लेशरहिता, आत्मनिर्वृतिः स्वस्वरूपसुखानुभववती" इत्यनन्ततीर्थाः । "आत्मनां जीवानां संश्रये" इति श्रीधरादयः।

४ लिङ्गशरीरस्य अभिमाननिवृत्त्या निवृत्तप्रायत्वात् निवृत्तत्वमुक्तमुपपन्नमित्यर्थः ।

५ श्रीधराद्यभिमतपाठानुसारेणायं त्रयस्त्रिंशोऽध्यायः ।

35

ॐ ॥ मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे ।
आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः ॥ १ ॥

"पुनःपुनः कथाः[1] प्राहुरभ्यासादुत्तमं फलम् । विज्ञापयितुकामास्तु विद्वांसस्तत्र-तत्र ह[2]" इत्याग्नेये[3] ॥ * ॥

शरणं तं प्रपद्येऽहं य एव जगदीश्वरः ।
प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन् ॥ २० ॥

तप्यमानं त्रिभुवनं प्राणायामोत्थिताग्निना[4] ।
निर्गतेन मुनेर्मूर्ध्नि[5] समीक्ष्य प्रभवस्त्रयः ॥ २१ ॥

अप्सरोमुनिगन्धर्वसिद्धविद्याधरोरगैः ।
वितायमानयशस[6]स्तदाश्रमपदं ययुः ॥ २२ ॥

"ब्रह्मस्थश्चैव रुद्रस्थः स्वयं चापि हरिः प्रभुः । प्रजां त्रिपूरुष[7]समां यच्छत्वित्यत्रिरैच्छत । तस्मात् स ब्रह्मरुद्राभ्यां सह विष्णुर्जगत्पतिः । आगत्य तु त्रिमूर्त्यंशान्[8]

---

१ "कथाम्" इति प्र. पाठः ।

२ "–तत्र तु" इति प्र. पाठः । अभ्यासादधिकं फलमिति तत्वविशेषं जिज्ञापयिषवः विद्वांसः तत्रतत्र पुनःपुनः कथाः प्राहुः । अत एव तृतीयस्कन्धे "स्वायम्भुवस्य च मनोर्वंशः परमसम्मतः" (३–२१–१) इत्यादिना सकृन्निरूपितो मनुवशंविस्तारः कथान्तरोपष्टम्भकतया पुनरत्र प्रस्तूयते । नात्र पुनरुक्तिः शङ्क्या । किन्तु अभ्यासादुत्तमं फलमिति महागुण एवायम् ।

३ "इत्याद्याग्नेये" इति क्वचित् ।

४ "–यामैधसाऽग्निना" इति प्र. पाठः । "–यामैधिताग्निना" इति क्वचित् ।

५ "मुनेर्मूर्ध्नः" इति प्र. पाठः ।

६ "-यशसो मुदा–" इति क्वचित् ।

७ "त्रिपुरुष–" इति पाठान्तरम् ।

८ "त्रिमूर्त्यंशात्" इति पाठान्तरम् ।

पुत्रान् प्रादाज्जनार्दनः । [1]भावित्वाच्चैव कार्यस्य लोकानां मोहनाय च" इति ब्रह्म-वैवर्ते ॥ * ॥

यथा कृतस्ते सङ्कल्पो भाव्यं तेनैव नान्यथा ।
[2]सत्सङ्कल्पस्य वै ब्रह्मन् यद् वै ध्यायसि[3] ते वयम् ॥ ३० ॥

[4]तत्स्थविष्ण्वपेक्षया 'ते वयम्' इति ॥ * ॥

सोमोऽभूद् ब्रह्मणोंऽशेन[5] दत्तो विष्णोस्तु योगवित् ।
दुर्वासाः शङ्करस्यांशो निबोधाङ्गिरसः प्रजाः ॥ ३३ ॥

"ब्रह्मणो नावतारोऽस्ति सन्निधानं तु केवलम् । [6]ऋते विष्णोरात्मनश्च तदंशोक्तिः प्रवेशतः" इति च । "सृष्टिभेदाद् विरूपं च तथा पञ्चोत्तरं शतम्[7] । वैरूप्यमन्यद् विज्ञेयं तात्पर्यान्मोहनाय वा[8]" इति स्कान्दे । "ऋते तु पाण्डवकथां कार्ष्णं[9]

---

१ अवश्यम्भावित्वात् दत्तदुर्वासःसोमानामवतारकार्यस्य । एक एव जगदीश्वरोऽत्रिणा शरणं प्रपन्नः । त्रयः पुनरामलाः प्रसन्नाः । तेन त्रयाणामप्यैकात्म्यं जगदीश्वरत्वं चेति दुष्टानां मोहनाय च ।

२ "तत्सङ्कल्पस्य" इति क्वचित् पाठः । "सत्सङ्कल्पस्य ते ब्रह्मन्" इति प्र. पाठः ।

३ "ध्यायति" इति प्र. पाठः । "ध्यायसि तद् वयम्" इति च कोशेषु पाठान्तरम् । सत्सङ्कल्पस्य ते सत्यसङ्कल्पेन त्वया यथा सङ्कल्पः कृतः तथैव तेन भाव्यम् । यद् वै परं ब्रह्म जगदीश्वरं ध्यायसि ते वयम् ! ब्रह्मस्थो रुद्रस्थः स्वयं च विष्णुरिति । उक्तं चान्यत्र—"सर्गस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम् । संज्ञां स याति भगवानेक एव जनार्दनः" इत्यादि । ४ "तस्माद् विष्ण्वपेक्षया" इति क्वचित् पाठः ।

५ विष्णोरंशो दत्तः, शङ्करस्यांशो दुर्वासाः, ब्रह्मणोंऽशेन सोम इति प्रयोगवैचित्र्येणेदं सूचयति—न ब्रह्मणः साक्षादंशः सोमः, किन्त्वावेश एव केवलमिति । अन्यथा ब्रह्मणोंऽशः सोम इत्येवावक्ष्यत् । तदेतद् भाष्ये प्रमाणवचनेन समर्थितम् ।

६ विष्णोरात्मनः स्वरूपभूतान्मत्स्याद्यवताराद्दते तदितरस्थलेषु नरबलभद्रादिषु तदंशत्वोक्तिश्च आवेशविवक्षयैव, नावतारविवक्षया ।

७ पञ्चोत्तरं कथाशतमित्यर्थः । "कथापञ्चोत्तरं शतम्" इत्यपि पाठान्तरम् । "कथाः पञ्चोत्तरं शतम्" इति क्वचित् पठ्यते । कल्पभेदेन सृष्टावेव वैविध्यात् तत्रतत्र पुराणेषु पञ्चोत्तरं कथाशतं विरूपं विविधरूपं विभिन्नरूपं च पठ्यते । पञ्चोत्तरात् कथाशतादन्यद् यत् कृष्णपाण्डवकथादिकं विविधतया परस्परविरुद्धतया वा पठ्यते तत्तु वैरूप्यं तामसजनमोहनायैव । यथा सतां ज्ञाने तथाऽसतां मोहेऽपि पुराणानां तात्पर्यात् । श्रुतिमुख्यतात्पर्यात् तान् वञ्चयित्वा मोहयितुमिति वा । ८ "मोहनाय च" इति च पाठान्तरम् ।

९ "कार्ष्णाम्" इति प्र. पाठः प्रामादिकः । कार्ष्णं कृष्णकथा ।

रामायणं तथा । विष्णोर्ब्रह्मादिनां चैव क्रमाद् व्यत्यस्तशक्तिताम् ।[1] "एतदापादकं चान्यद्दते कल्पादिभेदतः । कथाभेदस्तु विज्ञेयो मोहायैतेषु[2] विष्वता" इति वाराहे ॥ * ॥

मूर्तिः सर्वगुणोत्पत्ती नरनारायणावृषी ।
ययोर्जन्मन्यदो विश्वमभ्यनन्दत् सुनिर्वृतम् ॥ ५३ ॥

[3]यो मायया विरचितं निजयाऽऽत्मनीदं
खे रूपभेदमिव तत्प्रतिचक्षणाय ।
एतेन धर्मसदने ऋषिमूर्तिनाऽद्य
प्रादुश्चकार पुरुषाय नमः परस्मै ॥ ५६ ॥

ताविमौ वै भगवतो हरेरंशाविहाऽगतौ ।
भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥ ५९ ॥

"नरे विष्णुः समाविष्टः स्वयं नारायणो हरिः । अर्जुने च नरावेशः कृष्णो नारायणः स्वयम्" इति तत्त्वविवेके ॥ * ॥

खे रूपभेदो वाय्वादिकः[4]—

---

१ ब्रह्मादीनां शक्तिव्यत्यासेन तरतमभावस्य ततश्च विष्णोरमितशक्तित्वेन सर्वाधिकभावस्य च प्रतिपादकम् ।

२ एतेषु रामकृष्णपाण्डवकथासु भगवतः सर्वोत्तमत्वे देवतातारतम्ये च विषये यद् विरुद्धमिव वचनं तन्मोहाय । एतदन्यविषये कथाभेदस्तु कल्पादिभेदतोऽपि भवति । आदिपदेन रीत्यादिभेदतश्च । आमनन्ति हि पुराणेषु रीतीनां शतम्, व्यत्यासादींश्च सप्त भेदान् ।

३ निजया मायया प्रकृत्या, स्वेच्छया, स्वरूपभूतया ज्ञानशक्त्या वा विरचितमिदं विश्वम् । कीदृशम्? रूपभेदम् । रूपेण भिद्यत इति नानारूपम् । रूपमिति धर्मवचनम् । उक्तं हि—"भिन्नाश्च भिन्नधर्मांश्च" इति । नानाविधमिदं विश्वमात्मन्याधारे विष्ठितम् । कुत्र किमिव? रूपभेदं नानारूपं वाय्वादिकमिदं भूतचतुष्टयं खे गगन इव । आकाशाद्धि क्रमेणोत्पन्नं भूतचतुष्टयमन्ततः स्वकारण आकाशे विष्ठितं तद्वत् सर्वकारणे भगवति सर्वमपि विश्वं विष्ठितमिति । अथापि न लिप्यत आधेयदोषैः । आकाशवदेव, कारणत्वमात्रविवक्षया । अथवा, आकाशे पतन्ति नानारूपाणि विमानपतङ्गादीनि यथाऽऽकाशाश्रितानि तथा विश्वमिदमात्माश्रितम् । नन्वाधेयं दृश्यते, किमिति नाऽधारः? गगनवदेव । एवं बह्वर्थविवक्षया गगनदृष्टान्त उपात्तः । एवं च तयोः प्रतिचक्षणाय, आधेयस्य विश्वस्य, आधारस्य च भगवतः आधाराधेयतया यथावत् प्रतिबोधनाय यः धर्मस्य गृहे एतेन ऋषिमूर्तिना एतया ऋषिमूर्त्या ऋषिरूपेण प्रादुश्चकार तस्मै पुरुषाय नमः परस्मै ।

४ रूपभेदं नानारूपमित्यत्र यो रूपभेदो विवक्षितः, भिन्नानि वस्तुस्वरूपाणीति यावत्, स वाय्वादिकः पृथिव्यन्तः भूतग्रामः । अथचार्थान्तरम्—वाय्वभ्रपतत्रिविमानादिकः ।

"यथाऽऽकाशस्थितो नित्यम्[1]–" इत्यादि च । "यथाऽऽकाशे विमानादिरूपभेदः प्रती-
यते । तथा हरौ जगदिदं तत्सामर्थ्यात् प्रतीयते" इति ब्राह्मे ॥ * ॥

पितर्यप्रतिरूपे स्वे भवायानागसे रुषा ।
[2]अप्रोढेवाऽऽत्मनाऽऽत्मानमजहाद् योगसंयुता ॥ ६६ ॥

[3]अप्रोढेव अस्वीकृतेव ॥ * ॥

इति चतुर्थस्कन्धे प्रथमोऽध्यायः

य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि ।
द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्वतो विमुखो भवेत्[4] ॥ २१ ॥

गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया ।
कर्मतन्त्रं वितनुतां[5] वेदवादविपन्नधीः ॥ २२ ॥

बुद्ध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः ।
स्त्रीकामः सोऽस्त्वतितरां दक्षो बस्तमुखोऽचिरात् ।
विद्याबुद्धिरविद्यायां कर्ममय्यामसावजः[6] ॥ २३ ॥

---

१ "यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान्" इति भगवद्गीतासु वायोराकाशाश्रितत्वं स्फुटमुदितम् । आदिपदोदितमभ्रविमानादिकमपि तदाश्रितमित्युत्तरप्रमाणवचनेन स्फुटीभवति । अवकाशदानं ह्याधारत्वं नाम । अवकाशाभावे विमानादिगतेरेवानवकाशात् ।

२ भवाय स्वे पितरि अप्रतिरूपे प्रतिकूले सति, स्वप्रतिकूलस्य पुत्रीयमिति स्वयमपि भवेन आत्मना मनसा अप्रोढेव प्रकर्षेण ऊढा स्वीकृता नेत्यस्वीकृतेव शरीरमजहात् । "अप्रौढेव" इति प्र. पाठः ।

३ "अप्रौढेव" इति च पाठान्तरम् ।

४ मर्त्यं शरीरमुद्दिश्य अमर्त्ये भगवति द्रुह्यति । अत एवाज्ञः । आत्मनः पृथग्भूते मर्त्ये शरीरादौ इदमेव सारसर्वस्वमिति महत्त्वदृष्टिर्यस्य तादृशः । तत्वतो विमुखो भवेत् । तस्य तत्वज्ञानमेव मा भूत् । तात्कालिकं चेदं तत्ववैमुख्यमिति भाष्ये स्फुटम् । अन्ततस्तत्वज्ञानयोग्यस्य मोक्षानपायात् ।

५ तात्कालिकमेव शापान्तरमाह—गृहेषु । कूटधर्मेषु स्थिरकर्मसु दुर्निवारवैषयिककर्मस्विति यावत् । कूटा वञ्चनाबहुला धर्मा येषु तेषु वा गृहेषु । ग्राम्यजीवने सक्तः । वेदानां वादेनाऽपातप्रतीतार्थेन विमूढधीः वेदहृदयमविद्वान् विफलमल्पफलं वा कर्मकलापं विस्तारयतु । "वितनुते" इति प्र. पाठः । "वितनुताद्" इति क्वचित् ।

६ "कर्ममय्यामसौ जडः" इति प्र पाठः । भगवतोऽन्यदेव निरन्तरं ध्यायन्त्या बुद्ध्या विस्मृतपरमात्मज्ञानमार्गः । अत एव पशूपमः । नित्यं मैथुनरतेश्च पशुतुल्यः । न केवलं बुद्ध्या, देहतोऽपि पशुरेव भवत्वित्याह—

"ये ज्ञानविषयाः शापा [1]मुक्तिगाश्चाधिकारिणाम् । कादाचित्कास्ते भवन्ति नैव ते सार्वकालिकाः । तेषां ज्ञानस्य मुक्तेश्च तारतम्यस्य चैव ह[2] । भगवन्नियतत्वात्तु शापादिर्नात्र[3] कारणम्" इति वाराहे ॥ * ॥

संसरन्त्विह ये चेममनु शर्वावमानिनः[4] ।
[5]गिरेः सुतायाः पुष्पिण्या मधुगन्धेन भूरिणा ।
मथ्ना चोन्मथितात्मानः सम्मुह्यन्तु हरद्विषः ॥ २४ ॥

"गिरिः प्राणः[6] समुद्दिष्टस्तत्सुता वेदवाक् स्मृता । पुष्पं[7] स्वर्गादयः प्रोक्ताः फलं मोक्ष उदाहृतः[8]" इति वामने । "अनङ्गो मन्मथो मन्था [9]मोहोऽङ्गज उदाहृतः" इति इति शब्दनिर्णये ॥ * ॥

इति चतुर्थस्कन्धे द्वितीयोऽध्यायः

बस्तमुख इति । अजमुखः । अत उत्तरार्द्धे अज इत्येऽवाह । अपरविद्यायामेव परविद्याबुद्धिः । तदेतत् सर्वमपि तात्कालिकम् । नन्दिशापादपि भगवन्नियतेः प्रबलत्वादिति तात्पर्यमेषां श्लोकानां सङ्ग्राह भगवानाचार्यः ।

१ "मुक्तिगास्तेऽधि-" इति प्र. पाठः प्रामादिकः । मुक्तिगाः मुक्तिविषयाः । अत्र "तत्वतो विमुखो भवेत्" "वेदवादविपन्नधीः", "विस्मृतात्मगतिः", "विद्याबुद्धिरविद्यायाम्" इत्येते ज्ञानविषयाः शापाः । उत्तरश्लोके दक्षशापानुमोदिनामृषीणां विषये "संसरन्तु" इति यः शापः स मुक्तिगः । मुक्तियोग्यानामृषीणां चिरसंसारायोगात् ।

२ "चैव हि" पाठान्तरम् ।

३ अत्र सर्वथा तत्वज्ञानाभावे मोक्षाभावे च शापादिः कारणं न भवति ।

४ "ये चामुमनु शर्वावमानिनम्" इति प्र. पाठः ।

५ "गिरः श्रुतायाः" इत्यर्वाचीनाः पठन्ति । पुष्पिण्या इत्यन्ततो मोक्षफलपर्यन्ताया अप्यज्ञदृष्ट्याऽऽपाततः स्वर्गादिबोधिन्याः । अत एवाऽपातप्रतीतवृष्टिपशुपुत्राद्यैहिकविषयसुखस्वादेन भूरिणा मोहिताः । भूरिणा कामेन च विलोडितात्मानः ।

६ "कालकूटनिगिरणात् दैत्याख्यपापनिगिरणाच्च गिरिर्मुख्यप्राणः । तेन शिष्यप्रणीतत्वेन तत्सुता वेदवाक्" इति विजयध्वजीयम् ।

७ "पुष्पाः" (?) इति क्वचित् ।

८ "उदाहृतम्" इति प्र. पाठः ।

९ "मन्थाः कामोऽङ्गज-" इति पाठान्तरम् ।

सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः ।
सत्त्वं च यस्मिन्[1] भगवान् वासुदेवो ह्यधोक्षजो मे मनसा[2] विधीयते ॥२३॥

विशेषेण धीयते चिन्त्यते[3]—

"रुद्रेण धीयते विष्णुर्विष्णोर्ध्येयो[4] न कश्चन" इति ब्रह्मवैवर्ते ॥ * ॥

इति चतुर्थस्कन्धे तृतीयोऽध्यायः

यत्पादपद्मं महतां मनोऽलिभि[5]र्निषेवितं ब्रह्मरसासवार्थिभिः ।
लोकस्य यद् वर्षति चाऽऽशिषोऽर्थिनस्तस्मै भवान् द्रुह्यति विश्वबन्धवे[6] ॥१५॥

ब्रह्मरसासवार्थिभिः शिष्याणां मनोऽलिभिः[7] ।

---

१ "सत्त्वे च तस्मिन्" इति श्रीधराद्यभिमतः पाठः ।

२ "मे नमसा विधीयते" इति च । सत्त्वमित्यादेरयमर्थः—विशुद्धं सत्वमन्तःकरणं वसुदेवशब्दितम् । भगवानत्र वसति द्योतते चेति । तत्र विशुद्धेऽन्तःकरणे भगवानपगतावरणः प्रतीयते यतः अत एव स वासुदेवः । वसुदेवे प्रतीयत इति वसुदेवस्यायं वासुदेवः । अथच सत्त्वं विशुद्धं केवलः सत्वगुणः । तदपि वसुदेवः । "तत्र सत्त्वं निर्मलत्वात् प्रकाशकम्" इत्युक्तेः । तत्र तस्मिन् सत्वे प्रवृद्धे भगवान् प्रकाशते यदतो वासुदेवः । निमित्तान्तरम्—सत्त्वं च यस्मिन् । न केवलं सत्त्वे भगवान् । किन्तु सत्त्वं च भगवति । विशुद्धं हि चित्तं सदा भगवन्निष्ठम् । तदेव हि विशुद्धेर्लक्षणम् । सत्त्वगुणश्च जगत्पातरि नारायणे । अतश्च वासुदेवः । अथच विशुद्धं सत्त्वं सत्त्वप्रधानं ब्रह्मादिशरीरं भगवत्प्रतीकभूतम् । तस्मिन् वसुदेवे भगवानभिव्यज्यत इति, तच्च सत्त्वं ब्रह्मादिशरीरं तस्मिन्नाश्रितमिति च । स भगवान् वासुदेवः अधःकृतेषु निगृहीतेष्वक्षेषु चक्षुरादिषु केवलं विशुद्धेन मनसैव जायते ज्ञायते । अतश्च मे मया मनसा विधीयते विचिन्त्यते ।

३ "विशेषेण चिन्त्यते धीयते" इति क्वचिद् व्यत्यासेन पठ्यते । धीयत इति धारणमुच्यते । चिन्तनमेव ध्यानरूपं मनसा धारणं नाम । अस्मिन्नर्थे प्रयोगान्तरसमाख्याऽप्यस्तीत्याह—रुद्रेण धीयत इति ।

४ "विष्णुर्ध्येयो-" इति क्वचित् ।

५ "मनोऽलिभि-" इति प्र. पाठः ।

६ ब्रह्मज्ञानमधुलिप्सुभिश्चित्तचञ्चरीकैः । केषां ? ज्ञानेन महतामपि सनकादीनाम् । "ईश्वराद् ज्ञानमन्विच्छेत्" इति गुरुत्वेन यत्पादपद्मं निषेवितम् । यच्चार्थिनो लोकस्य अभिलषितानि यथायोगं वर्षति, तस्मै भवन् द्रुह्यति ।

७ "मनोऽलिभिः" इति प्र· पाठः । यद्यपि सनकादीनां मनोऽलिभिरिति वक्तव्यम् । अथापि शिवपादपद्मनिषेवणं सनकादीनामपि न भगवत्त्वेन किन्तु गुरुत्वेनेति व्यञ्जयितुं शिष्याणामित्युक्तम् । रुद्रस्य शिष्याः । इतरेषां तेऽपि महान्तो गुरवः । अतो मूले महतामित्युक्तम् ।

"सनकादयो रुद्रशिष्यास्तेषामन्ये तु योगिनः। ब्रह्मशिष्यस्तथा रुद्रो ब्रह्मा नारायणस्य च" इति ब्राह्मे ॥ * ॥

किं वा शिवाख्यमशिवं न विदुस्त्वदन्ये
ब्रह्मादयस्तमवकीर्य जटाः श्मशाने ।
तन्माल्यभस्मनृकपाल्यवसत्पिशाचै-
र्ये मूर्धभिर्दधति तच्चरणावसृष्टम्[1] ॥ १६ ॥

ब्रह्मादयो ब्रह्मपुत्राः[2] ।

"सुपर्णशेषप्राणेशब्रह्मविष्णून् श्रियं गिरम्। ऋते नमति[3] नो रुद्रं क एव पुरुषार्थभाक्" इति गारुडे ॥ * ॥

कर्म प्रवृत्तं च निवृत्तमप्युत[4] वेदे विविच्योभयलिङ्गमाश्रितम् ।
विरोधि तद्यौगपदेककर्तरि[5] द्वयं तथाऽऽब्रह्मणि कर्म नर्च्छति ॥ २० ॥

आब्रह्मणि सम्यग्ज्ञानिनि—

"आब्रह्मा[6] स्थितधीर्जीवन्मुक्तश्चेत्यभिधीयते। यस्तस्य न निवृत्तं च प्रवृत्तं कर्म

---

१ ब्रह्मा आदिर्जनको येषां ते त्वदन्ये ब्रह्मादयः ब्रह्मपुत्राः सनकादयः तं शिवाख्यमशिवं, नाममात्रेण शिवं वस्तुतश्चाशिवं न विदुः किम्? यः श्मशाने जटा अवकीर्य श्मशानमाल्यभस्मनृकपालधारी सह पिशाचैरवसत्। कीदृशा ब्रह्मादयः? ये तच्चरणावसृष्टं रजो मूर्धभिर्दधति।

२ शुकदेवोऽप्याह—"त्वदन्ये ये ब्रह्मपुत्रास्तस्य शिवस्य चरणादसृष्टं रजो मूर्धभिर्दधति" इति। "ब्रह्मादयः मरीच्यादिनवब्रह्मप्रभृतयः। यद्वा, अतद्गुणसंविज्ञानो बहुव्रीहिः। अन्यथा—'अजं लोकगुरुं नत्वा' इत्यादिपूर्वापरविरोधात्" इति वीरराघवः।

३ "–विष्णून् गिरं श्रियम्। ऋते नमन्ति" इत्यसङ्गतः प्र. पाठः प्रामादिक एव।

४ "–निवृत्तमप्यृतम्" इत्यर्वाचीनः पाठः।

५ "यौगपदैककर्तरि" इति च। फलोद्देशेन प्रवृत्तं ततो निवृत्तं चेत्युभयलक्षणमपि कर्म वेदे विविच्य आश्रितं स्थितं विहितमिति यावत्। अधिकारिभेदेन चोभयव्यवस्था। यौगपदिति युगपत्। आधिक्येऽधिकमिति स्मरणात्। अनूपममितिवत्। एकस्मिन् कर्तरि युगपदेव प्रवृत्तिश्च निवृत्तिश्चेति तद् द्वयं विरुद्धं हि भवति। इदं वाऽदो वेति व्यवस्थयैव भवति। एवमाब्रह्मणि अपरोक्षज्ञानिनि जीवन्मुक्ते द्वयमपि कर्म नर्च्छति न प्राप्नोति। विधिनिबन्धवैधुर्यात्। ब्रह्मशब्दः वेदे तज्जन्ये ज्ञाने तत्प्रतिपाद्ये भगवति च पठ्यते। तथा च आ सम्यग् ब्रह्म वेदोदितमगवत्तत्त्वज्ञानं यस्य स आब्रह्मा। सम्यगिति साक्षादपरोक्षतः। "ब्रह्मणि ब्रह्मज्ञाने" इति वीरराघवोऽप्याह।

६ "आब्रह्म" इति प्र. पाठः प्रामादिकः।

चेष्यते । [1]यत्तु देवाः प्रकुर्वन्ति स महानियमः स्मृतः । स्वर्गाद्यर्थं प्रवृत्तं स्यान्निवृत्तं मुक्तये तु यत् । स महानियमो नाम कर्म यत्त्वाधिकारिकम्[2] । महतो नियमाद् विष्णोः प्रीत्या मुक्तौ सुखोन्नतिः । केचिन्निवृत्तमित्याहुर्महानियममप्युत" इति भविष्यत्पुराणे ॥ * ॥

"[3]यदि देवाश्च ऋष्याद्या निन्दन्ते यत्रकुत्रचित् । न तावता गुणैर्हीनाः स्थितप्रज्ञा हि ते मताः । यथायोग्यं तु तात्पर्यं निन्दायामन्यदेव तु[4]" इति गारुडे[5] ॥ * ॥

[6]ततः स्वभर्तुश्चरणाम्बुजासवं जगद्गुरोश्चिन्तयती न चापरम् ।
ददर्श देहे हतकल्मषा[7] सती सद्यः प्रजज्वाल समाधिजाग्निना[8] ॥ २७ ॥

---

१ अपरोक्षज्ञानित्वाद् देवानां प्रवृत्तं निवृत्तं वा कर्म नेत्युक्तम् । कर्म च तेषां श्रूयते– यज्ञेन यज्ञमयजन्त देवा इत्यादि । पदस्थत्वादनिवार्यं च तेषां कर्म । अत उक्तम्— यत्तु देवाः प्रकुर्वन्ति । तथाच त्रिविधं कर्म– प्रवृत्तं निवृत्तं महानियमात्मकं चेति । महानियमस्य निवृत्तविशेषत्वेन तत्रैवान्तर्भावविवक्षया मूले द्वयमित्युक्तम् । मुमुक्षुभिः क्रियमाणं निवृत्तम् । नियतमोक्षैर्भगवदाज्ञेति क्रियमाणं महानियमशब्दितम् । तदपि फलकामनाविरहितमिति निवृत्तमिति च भवति ।

२ "कर्म त्वाधिक्यकारिकम्" (?) इति क्वचित् ।

३ अस्मिन् हि दक्षाध्वरे महतां देवानां परस्परं निन्दा श्रूयते । दक्षेण शिवनिन्दा, नन्दिना सत्या च दक्षनिन्दा । किमेवं परस्परं निन्दन्तस्ते द्वेषमत्सरग्रस्ता मनुष्या इव निर्गुणाः ? नेत्याह— यदि देवाश्च । इयं निन्दा तात्पर्यगर्भा भवति । उत्तमकृतमधमनिन्दनं शिक्षारूपमधमकृतमसुरावेशनिमित्तमिति यथायोग्यं तत्र तात्पर्यविशेषात् । ततश्च न द्वेषो मत्सरो वाऽत्र मूलमिति समग्राध्यायहृदयमनेन प्रमाणेनापावृतं भवति ।

४ "निन्दाया अन्यदेव तु" इति पाठान्तरम् ।

५ प्रचलितपाठानुसारेणात्र चतुर्थाध्यायभाष्यसमाप्तिः । उत्तरभाष्यं तु पञ्चमाध्यायव्याख्यानम् । विजयध्वजीयपक्षेऽपि तथा ।

६ इदं पद्यं प्रचलितभाष्यरीत्या पञ्चमाध्यायस्य श्लोकः । क्वचित् कोशेषु च तथा । एतत्पक्षे चतुर्थाध्यायस्य त्रयोविंशश्लोकादनन्तरं पञ्चमोऽध्यायः । ततश्चायं पञ्चमाध्यायस्य चतुर्थः श्लोकः । भागवतमूलकोशेषु त्विदं चतुर्थाध्याय एव पठ्यते । श्रीधरादयोऽपि तथैवाङ्गीकुर्वन्ति । भाष्यकोशेषु तु द्वेधाऽपि दृश्यत इति सर्वाविरोधाय चतुर्थाध्यायपक्ष एव स्वीकृतः । विजयध्वजीयं तु मूलपाठानुपलम्भादनिर्णायकम् ।

७ "देहो हतकल्मषः सती" इति, "देहो हतकल्मषा सती" इति च क्वचित् ।

८ "समाधिनाऽग्निना" इति श्रीधरीयः पाठः । जिज्ञासुलोकस्य गुरोः स्वभर्तुः शिवस्य चरणाम्बुजमाधुर्यं मनसाऽऽस्वादयन्ती तं च भर्तारं स्वदेहान्तर्ददर्श । चशब्दात् भारतीसरस्वत्यौ ब्रह्मवायू श्रियं नारायणं च । अपरं अन्यमवरं च न चिन्तयन्ती । तेन ध्यानेन हतकल्मषा सती समाधिजनितेनाग्निना स्वदेहं ज्वलयामास । सतीदेहत्यागानन्तरं स देहः स्वयं ज्वलितोऽभूत् इति वा ।

36

नचापरं तस्मादवरं[1] न चिन्तयती[2] । परं तु विष्णवादिकं चिन्तयती । चशब्दात् ।

"रुद्रं च ब्रह्मवायू च विष्णुं चैव श्रियं गिरम् । उमा चिन्तयती देहं तत्याजान्यं[3] मचास्मरत्" इति तत्त्वनिर्णये ॥ * ॥

इति चतुर्थस्कन्धे चतुर्थोऽध्यायः[4]

जुह्वतः स्रुवहस्तस्य श्मश्रूणि भगवान् भवः ।
भृगोर्लुलुञ्चे[5] सदसि योऽहसच्छ्मश्रु दर्शयन् ॥ १९ ॥

भगस्य नेत्रे भगवान् पतितस्य रुषा भुवि ।
उज्जहार सदस्थक्ष्णा[6] यः शपन्तमसूचयत्[7] ॥ २० ॥

पूष्णश्चापातयद् दन्तान् कालिङ्गस्य[8] यथा बलः ।
शप्यमाने गरिमणि योऽहसद् दर्शयन् दतः[9] ॥ २१ ॥

दृष्ट्वा संज्ञापनं[10] योगं पशूनां स पतिर्मखे ।
यजमानपशोस्तस्य[11] कायात् तेनाहरच्छिरः ॥ २४ ॥

---

१ "तस्मादपरम्" इति पाठान्तरम् ।

२ "न विन्दती" इति क्वचित् ।

३ "तत्याजान्यान्" इति च क्वचित् ।

४ प्र· पाठेऽत्र पञ्चमोऽध्यायः ।

५ "लुलुञ्जे" इत्यपि प्राचीनकोशेषु पठ्यते । 'लुजि हिंसायां बलादादाने च' ।

६ "सदःस्थोऽक्षणा" इत्यर्वाचीनः पाठः ।

७ "शपन्तमसूसुचत्" इति च । यज्ञसदसि यः शिवं शपन्तं दक्षमक्षिनिक्षेपणासूचयत् । अचोदयदित्यर्थः ।

८ "कलिङ्गस्य" इति पाठान्तरं क्वचित् । अयं कालिङ्गो राजा दन्तवक्र इति विजयध्वजीये । यद्यपि स करूशाधिपतिः प्रसिद्धः । कलिङ्गराजत्वं क्वचित् तस्य श्रूयते । यथा दशमस्कन्धे– "श्रुत्वा तूर्णं कलिङ्गेशो दन्तवक्रः सहानुजः" इति । अतो न विरोधः । कालिङ्गस्य दन्तान् यथा बलभद्रोऽपातयत् । इयं कथा भागवते स्फुटा— "कलिङ्गराजं तरसा गृहीत्वा दशमे पदे । दन्तानपातयत् क्रुद्धो योऽहसद् विवृतैर्द्विजैः" (१०. ७६. ४९) इति । रुग्मिपौत्र्या रोचनया सहानिरुद्धस्योद्वाहप्रसङ्गे प्रवृत्तेन रुग्मिबलरामयोर्द्यूतनिमित्तेन कलहेन प्रवृत्तेयं घटना— रुग्मिणो हननं कालिङ्गस्य दन्तपातनं च ।

९ गरिमणि गरिमवति गरीयसि गुरुतरे शिवे शप्यमाने । दतः दन्तान् ।

१० "संज्ञपनं योगम्" इति, "संज्ञपने योगम्" इति च पाठान्तरम् । यद्यपि 'मारणतोषणनिशामनेषु ज्ञा' इति मितां ह्रस्वत्वेन संज्ञपनमित्येव साधु । तथाऽपि संज्ञापनमित्यपि प्रयोगदर्शनात् मित्त्वं वैकल्पिकमिति भाति । संज्ञपनमित्येव पाठे न काऽपि क्षतिः ।

११ "–पशोः कस्य" इति प्र. पाठः । पशुपतिर्यज्ञे पशूनां संज्ञापनं कण्ठत्रोटनादिकं योगं मारणोपायं मत्वा नेनोपायेन यजमानपशोस्तस्य दक्षस्य कायाच्छिरोऽपाहरत् ।

जुहावैतच्छिरस्तस्मिन्[1] दक्षिणाग्नावमर्षितः ।
तद्देवयजनं दग्ध्वा प्रातिष्ठद् गुह्यकालयम् ॥ २६ ॥

"वीरभद्राख्यरूपेण स्वेन पूर्वं ययौ हरः[2] । मूलरूपेण पश्चात्तु गत्वा दक्षमथावधीत् । तत्रोपेन्द्रेण हरिणा जितो धर्मात्मजेन च । अन्यान् जिगाय प्रययौ कैलासं स्वनिवेशनम्[3]" इति ब्राह्मे ॥ * ॥

इति चतुर्थस्कन्धे पञ्चमोऽध्यायः[4]

उपलभ्य पुरैवैतद् भगवानब्जसम्भवः ।
नारायणश्च विश्वात्मा न [5]तस्याध्वरमीयतुः ॥ ३ ॥

त्रिमूर्तिगेन रूपेण[6] नारायणो नाऽययौ ॥ * ॥

---

१ "-च्छिरस्तस्य" इति क्वचित् । एतस्य दक्षस्य शिरः तस्मिन् दक्षाध्वरसम्बन्धिनि दक्षिणाग्नौ अमर्षितो जुहाव । एवं तस्य दक्षस्य देवयजनं, तद् देवयजनमिति भिन्ने वा पदे । दग्ध्वा विनाश्य गुह्यकालयं कैलासं स्वनिवेशनं प्रययौ ।

२ अत्र मूले दक्षयज्ञविध्वंसनाय जटासृष्टं स्वांशभूतं वीरभद्रं रुद्रो प्रेषयामासेति पूर्वमुक्तम् । उत्तरत्र तु भवस्त्र्यम्बको हरः पशुपतिरित्यादि रुद्रनामान्येव पठ्यन्ते । तत्किं वीरभद्रेण रूपेण सह मूलरूपी रुद्रश्चाऽगतः, उत वीरभद्रपरतयैवैतानि नामानि योजनीयानीति शङ्कायां मूले नातिस्फुटं कथाभागं भगवानाचार्यः पुराणान्तरसंवादेन स्फुटयति— वीरभद्राख्यरूपेणेत्यादि । तेन भृगुश्मश्रुलुञ्चनादिकं वीरभद्रकृतम् । दक्षवधस्तु रुद्रकृत इत्युक्तं भवति । अत्रानुक्तं च कथाभागं पुराणवचनेनैवाऽह—तत्रोपेन्द्रेण । उपेन्द्ररूपेण हरिणा, नरोनारायणो हरिः कृष्ण इति चतुर्ष्वेकेन हरिनामकेन रूपेण च ।

३ "स्वं निकेतनम्" इति प्र. पाठः । "स्वनिकेतनम्" इति क्वचित् । एतेन 'प्रातिष्ठद् गुह्यकालयम्' इति व्याख्यातम् ।

४ प्र. भाष्यपाठेऽत्र षष्ठोऽध्यायः ।

५ "न कस्याध्वरमीयतुः" इति प्र. पाठः । कस्य दक्षस्य ।

६ "त्रिमूर्तिगतरूपेण" इति पाठान्तरम् । उपेन्द्ररूपेण, हरिरूपेण च नारायण आगत एव । अथापि ब्रह्मा विष्णुर्महेश्वर इति यानि त्रीणि रूपाणि तद्गतेन विष्णुरूपेण नाऽययौ । ब्रह्मा च नाऽययौ । त्रिमूर्तिषु रुद्रस्यानाह्वानं पूर्वमेव ज्ञात्वा; भाविनं यज्ञविध्वंसं च । एतेन पुराणयोर्विरोधः परिहृतः । एतत्प्रमेयविशेषाविष्करणार्थमेव पूर्वाध्याये मूलानुक्तः कथाविशेषः पुराणान्तरादुद्धृतः ।

नाहं न यज्ञो नच यूयमन्ये ये देहभाजो मुनयश्च तत्त्वम् ।
विदुः प्रमाणं बलवीर्ययोर्वा तस्याऽत्मतन्त्रस्य क उद् विधित्सेत्[१] ॥ ७ ॥

यज्ञ इन्द्रः —

"यज्ञो यज्ञपतिस्त्विन्द्रः पुरुहूतः पुरुष्टुतः" इत्यभिधानम् ।

तस्याऽत्मतन्त्रस्य । तस्य विष्णोर्मनोवशगस्य[२] ।

"नाहं नेन्द्रो[३] नचैवान्ये यत् तत्त्वं न विदुः परम् । तस्य विष्णोर्वशे रुद्रो मम वायोरथापि वा । नान्यस्य कस्यचित् पुंसस्तस्येत्थं वः कुतः[४] कृतम्" इति ब्रह्मवैवर्ते ।
"[५]मुमुक्षवो ब्रह्मणश्च शिवादिन्द्रादिभिस्तथा । श्रुत्वा ज्ञानं परं गुह्यं मुच्यन्ते ब्रह्मणा सह" इति कौर्मे ॥ * ॥

स तूपलभ्याऽगतमात्मयोनिं सुरासुरेशैरभिवन्दिताङ्घ्रिम्[६] ।
उत्थाय चक्रे शिरसाऽभिवन्दनं महत्तमोऽर्कस्य यथैव विष्णोः[७] ॥ ४० ॥

---

१ "यस्याऽत्मतन्त्रस्य क उपायं विधित्सेत्" इत्यर्वाचीनाः पठन्ति । स तु प्रामादिक एव । न केनापि व्याख्यात्रा परिगृहीतः । "तस्याऽत्मनः क उपायं विधित्सेत्" इति श्रीधरादयः । "तस्याऽत्मन एव क उपायं विधित्सेत्" इति शुकदेवः पठति । ब्रह्मवचनमिदम् । तथाच नाहं न ब्रह्मा, वायोरप्युपलक्षणम् । न वायुश्च । एतेन सरस्वतीभारत्यौ व्याख्याते । रुद्रो वक्ष्यते । गरुडशेषौ तत्पत्न्यश्च तेनैव व्याख्याताः । न यज्ञः नेन्द्रश्च, न यूयमन्ये देवाः, न मुनयः, न देहभाजोऽन्ये जीवाश्च यस्य तत्वं स्वरूपं विदुः । बलवीर्यादिशुभगुणानां परिमाणेयत्तां वा विदुः । अनन्तत्वात् । तस्य विष्णोरात्मतन्त्रस्य मनोवशगस्य रुद्रस्य उत्क्रममतिक्रमं, अपराधमिति यावत्, को विधित्सेत्? यतो रुद्रकृतं विष्णुमनोगतमेव । तदुक्तम्– "विष्णोश्च हृदयं शिवः" इति । तेन रुद्रं विरोद्धा विष्णुमपि विरोद्धा भवति । अथचार्थान्तरम्— तस्य विष्णोरात्मनोरात्मीययोः ब्रह्मवाय्वोश्च तन्त्रस्याधीनस्येति । एतेन स्वस्यापीदं नेष्टमिति ब्रह्मा व्यञ्जयति । भाष्योदाहृतप्रमाणेनायमर्थः सूचितः । विजयध्वजीये तु अपराधमित्यध्याहृत्य क्रियान्वयः प्रदर्शितः—अपराधमुच्चैर्विधित्सेदिति । उद्विधित्सेत् नियमनं कुर्यादित्यन्ये ।

२ "–तन्त्रस्य विष्णोर्मनोवशस्य" इति पाठान्तरम् । "–तन्त्रस्य तस्य विष्णोर्मनोवशस्य" इति च ।

३ "नाहं चेन्द्रो–" इति प्र. पाठः प्रामादिकः । यद्यप्यत्र नञामाधिक्यम् । अहमिन्द्रोऽन्ये च यत् तत्वं न विदुरित्येव पर्याप्तम् । तथाऽपि प्रतिव्यक्ति नञ्संश्लेषेण निषेधमवधारयति । "द्वौ नञौ सातिशयं प्रकृतं गमयतः" इत्यस्यायमेव प्राचीनोऽर्थः । आचार्यैरपि बहुषु स्थलेषु एतादृशाः प्रयोगाः कृताः । पुराणेषु च । उपपादितं चैतत् पूर्वमेव महाभारततात्पर्यनिर्णयादौ ।

४ "पुंसस्तस्येत्थं च कुतः" इति क्वचित् ।

५ संसारनदीमुत्तर्तुकामैः शिवद्वेषो न कर्तव्य इत्याह—मुमुक्षव इत्यादि । क उत्क्रमं विधित्सेदित्यस्य व्याख्यानमिदम् ।

६ "–वन्दिताङ्घ्रिः" इत्यर्वाचीनः पाठः ।

७ "–वन्दनमर्हत्तमः कस्य यथैव विष्णुः" इत्यर्वाचीनः पाठः । आगतमात्मयोनिमुपलभ्य आसनादुत्थाय तस्य शिरसाऽभिवन्दनं चक्रे । यथा विष्णोः भक्तिश्रद्धाभ्यां भूयिष्ठां शिरआदिभिरष्टाङ्गैरभिवन्दनं करोति तथा । अस्यो-

महत्तमः तेजस्वितमः, [1]अर्कस्य सकाशादपि ।

"[2]तेजोऽर्थ उत्तमार्थे च पूज्यार्थे च प्रयुज्यते । महच्छब्दो महःशब्दो मान्यशब्दस्तथैव च" इति शब्दनिर्णये ॥ * ॥

जाने त्वामीश[3] विश्वस्य जगतो योनिबीजयोः ।
शक्तेः शिवस्य च परं यत्तद् ब्रह्म निरन्तरम् ॥ ४२ ॥

अन्तर्याम्यपेक्षया शक्तेः[4] शिवस्य च परमिति ।

"क्रियन्ते स्तुतयोऽन्यत्र तदन्तर्याम्यपेक्षया । न जीवेषु गुणाः पूर्णा यथायोग्या हि तद्गताः" इति ब्राह्मे ॥ * ॥

पमानस्येदं कृत्यम्—ब्रह्मरुद्रादीनां व्यवहारो विशेषतोऽतर्यामिदृष्ट्या भवति । रुद्रः ब्रह्मान्तर्यामिणं विष्णुमेव विशेषतो ननाम । ब्रह्मा च शिवान्तर्यामिणं विष्णुमेवोत्तरत्राभिष्टौतीति चैतेन ध्वनितम्। कीदृशो रुद्रः–महत्तमोऽर्कस्य । अर्कस्य सकाशादपि तेजस्वितमः । तेजस्विषु अर्कः प्रसिद्ध इति तस्य विशिष्य ग्रहणम् ।

१ "कस्य सकाशादपि" इत्येकस्मिन् प्रतनकोशे पठ्यते । तत्पक्षे कस्य दक्षस्य सकाशादपि ।

२ तेजोऽर्थ इति तेजस्वी इत्यर्थे । धर्मिवाचकं हीदं पदम् । अन्यथोत्तरत्रापि उत्तमत्वार्थे पूज्यत्वार्थे चेत्यवक्ष्यत् । तथाहि प्रयोगः–"नहि तेजस्विनां शापस्तेजस्सु प्रभवन्ति वै" (म. भा. अनु. ८५· १५) इति। महःशब्दः केवलं धर्मवाचकोऽपि भवतीति सूचनाय चैवं प्रयोगः । तथाच महानिति त्रयोऽर्थाः– तेजस्वी, उत्तमः, मान्यश्चेति । प्रकृते तावदन्त्यौ द्वावर्थौ न सङ्गतौ । इन्द्रादिभ्योऽप्युत्तमस्य केवलमर्कादुत्तमत्वकथने मान्यत्वकथने वा कारणाभावात् । तेजस्विषु तु अर्क एव विशिष्ट इति लोकानुभवः । ततश्च ततोऽप्ययं तेजस्वितम इत्यतिसुन्दरं भवति ।

३ "त्वामीशम्" इत्यर्वाचीनः पाठः । ब्रह्मकृता शिवस्तुतिरियं शिवान्तर्यामिणं विष्णुमेव विषयीकरोति। 'शिवस्य च परम्' इति मूलवचनादेवेदं स्फुटम् । तथाचायमर्थः—विश्वस्य इन्द्रादिजगतः योनिरिति माता । बीजमिति पिता । मातापित्रोः शक्तेरुमायाः शिवस्य च परं देशतः कालतो गुणतश्च निरन्तरं पूर्णं गुणक्रियादिभिः निर्भेदं च नारायणाख्यं ब्रह्म त्वामहं जाने । पार्वतीपरमेश्वरौ हीन्द्रादिजगतः पितरौ । ब्रह्मा पितामहः । नारायणः प्रपितामहः । तदुक्तमाचार्यैरेवान्यत्र—"ब्रह्मणः पितरं वन्दे शङ्करस्य पितामहम् । श्रियः पतिमजं नित्यमिन्द्रादिप्रपितामहम्" इति । "विश्वं विश्वाकरं वन्दे विश्वस्य प्रपितामहम्" इति च ।

४ शुकदेवोऽप्याह—"सर्वोपास्यं सर्वशक्तिं सर्वकारणकारणं परब्रह्मादिपदवाच्यं भगवन्तं शिवसान्त्वनार्थं तत्प्रेरकं तदन्तर्यामिणं श्रीवासुदेवं प्रत्याह वक्ष्यमाणैः श्लोकैः" इति । "रुद्रप्रशंसार्थं रुद्ररूपेणावस्थितस्य ब्रह्मण आह" इति वीरराघवः । "इदं च सामानाधिकरण्यं न तादात्म्यनिबन्धनम् । 'एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधसम्भवौ । मया दर्शितपन्थानौ सृष्टिसंहारकारकौ', 'नारायणाद् रुद्रो जायते' इत्यादिभिः कार्यत्वकर्मवश्यत्वाद्यभिधानेन रुद्रादेर्जीवत्वनिश्चयात् तादात्म्यासम्भवात् । अत एव 'भवांस्तु पुंसः परमस्य मायया दुरन्तयाऽस्पृष्टमतिः समस्तदृक्' (४९) इति व्यतिरेकेण निर्देक्ष्यति" इति च ।

त्वमेव भगवन्नेतच्छिवशक्त्योः स्वरूपयोः[१] ।
विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपदो यथा[२] ॥ ४३ ॥

"तद्वशत्वात् स्वरूपं तु विष्णोः सर्वमुदीर्यते । स्वरूपं स च सर्वस्य[३] बिम्बत्वादेव चोच्यते[४] । साक्षात् स्वरूपं मत्स्याद्या विष्णोर्नान्ये[५] कथञ्चन । तस्मादन्यगता दोषा न तस्मिन् पुरुषोत्तमे" इति तत्त्वनिर्णये ॥ * ॥

त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण विसर्जिताध्वरः[६] ।
त्वयैव लोकेऽवसिताश्च सेतवो यान् ब्राह्मणाः श्रद्दधते धृतव्रताः[७] ॥ ४४ ॥

अभिपत्तये प्रतीकाराय । सूत्रेण दोषसूचकेन ॥ * ॥

न वै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वपि[८] पश्यतां तव ।
भूतानि चाऽऽत्मन्यपृथग् दिदृक्षतां प्रायेण रोषोऽभिभवेद् यथा पशोः[९] ॥४६॥

---

१ "सरूपयोः" इति प्र. पाठः ।

२ "क्रीडन्नूर्णपटो यथा" इति च । "क्रीडयोर्णपदो यथा" इति क्वचित् । सर्वं च तदधीनमिति तस्य स्वमेव रूपम् । राजा राष्ट्रमितिवत् । स्वरूपयोः अधीनतया द्वारभूतयोः शिवशक्त्योः । तद्द्वारेति यावत् । त्वमेवैतद् विश्वं सृजसि पासि अत्सि । क्रीडामात्रं प्रभोः सृष्टिरित्याह-क्रीडन् । ऊर्णपद ऊर्णनाभिः । "यथोर्णनाभिः सृजते गृह्णते च" ।

३ "सर्वत्र" इति प्र. पाठः ।

४ "-देव तूच्यते" इति च ।

५ "विष्णोर्नान्यत् कथञ्चन" इति च ।

६ "सूत्रेण ससर्जिथाध्वरम्" इत्यर्वाचीनः पाठः ।

७ धर्ममर्थं च धर्मान्मोक्षमर्थात् कामं च दोग्धीति हे धर्मार्थदुघ भगवन्, त्वमेव, न शिवः, किन्तु शिवस्थस्त्वमेव अभिपत्तये दक्षकृतापराधप्रतीकाराय सूत्रेण वृथा दोषसूचकेन पिशुनेन दक्षेण निमित्तेन तं निमित्तीकृत्य विनाशितयज्ञोऽभवः । धर्मसेतवश्च लोके व्यवस्थापिताः । यान् ब्राह्मणा ब्रह्मविदः श्रद्दधते । अतस्तद्भङ्गाय प्रयतमानो दक्षः साधु शिक्षितः । "धर्मार्थौ दोग्धीति धर्मार्थधुक् । तेन धर्मार्थदुघा दक्षेण" इत्यपि व्याचक्षते ।

८ "सर्वेष्वभिपश्यताम्" इति च ।

९ "पशुम्" इत्यर्वाचीनाः पठन्ति । त्वच्चरणार्पितमनसां सर्वेषु भूतेष्वपि स्थितं त्वां पश्यताम्, सर्वाणि च भूतानि परमात्मनि त्वयि स्थितानि पश्यताम्, अत एवापृथग् दिदृक्षतां यथार्थज्ञानेच्छूनां सतां प्रायेण पशुतुल्यस्य तामसस्येव अभिजातो रोषो न भवेद्धि । रोषोऽभिमतो न भवेदिति वा । अनभिमतोऽपि कदाचिन्निमित्तान्तरात्स्यादिति प्रायेणेत्युक्तम् । दृश्यते हि सतामपि नैमित्तिकः कोपः । अभीक्ष्णं न भवेदिति वा । पराभवेदित्यर्थविवक्षायां तु सतामिति षष्ठी च तवेतिवद् द्वितीयार्थे । सतां सतः, पशोः पशुमिति । "यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति । सर्वभूतेषु चाऽऽत्मानम्-" इति हि श्रुतिः ।

तव त्वाम् । "चतुर्षु षष्ठी[1]" इति सूत्रात् ।

"विष्णवधीना जगत्सत्ता प्रतीतिश्चेष्टितं गतिः । इति यन्निश्चितं[2] ज्ञानमपृथग्दर्शनं मतम्[3] । मिथ्याज्ञानं पृथग्ज्ञानमिति वेदविदो विदुः । यथैवार्थस्तथा ज्ञानमपृथग्दृष्टिरुच्यते" इति गारुडे ॥ * ॥

येऽस्मिन्[4] यदा पुष्करनाभमायया दुर्लङ्घ्यया[5] स्पृष्टधियः पृथग्दृशः ।
कुर्वन्ति तत्र ह्यनुकम्पया कृपां न साधवो दैवबलात्कृताः कथम्[6] ॥ ४८ ॥

यदा यस्मात् ।

"हृदयस्य द्रवीभावस्त्वनुकम्पेति कथ्यते । उपकारं कर्तुमिच्छा कृपेत्याहुर्मनीषिणः" इति शब्दनिर्णये[7] ॥ * ॥

भवान् हि[8] पुंसः परमस्य मायया [9]दुर्लङ्घ्ययाऽस्पृष्टमतिः समस्तदृक् ।
तया हतात्मस्वनुकर्मचेतःस्वनुग्रहं कर्तुमिहार्हति प्रभो[10] ॥ ४९ ॥

---

१ द्वितीयातृतीयाचतुर्थीषष्ठ्यर्थेषु षष्ठी प्रयुज्यते। द्वितीयार्थे यथालैऽव । तृतीयार्थे यथा – तेन ज्ञातम्, तस्य ज्ञातम्, चतुर्थ्यर्थे यथा—तस्य ददाति, तस्मै ददाति ।

२ "यन्नियतम्" इति प्र. पाठः । ३ "स्मृतम्" इति च ।

४ "यस्मिन्" इत्यर्वाचीनः पाठः । ५ "दुरन्तया" इति च ।

६ "बलात्कृते क्रमम्" इति श्रीधरादयः । इदानीं रुद्रं प्रत्येव साक्षादाह ब्रह्मा—येऽस्मिन् पुष्करनाभस्य दुर्लङ्घ्यया मायया मोहितबुद्धयः यदा यस्मात् तस्मादेव पृथग्दृशः तत्वमजानन्तः मिथ्यादृशः येकेचनास्मिन् लोके दृश्यन्ते । अस्मिन् भगवति विषये पृथग्दृश इति वा । व्याख्यातं चैतद् भाष्यकारेण पूर्वमेव—"मिथ्याज्ञानं पृथग्ज्ञानमिति वेदविदो विदुः" इति । तत्र तेषु पृथग्दृक्षु, यस्मात् तेऽविदिततत्वास्तस्मादेव हेतोः भवादृशाः साधवः किमित्यनुकम्पया नोपचिकीर्षन्ति । तत्र स्वयमेव समाधानमाह—दैवबलात्कृताः । दैवेन हरिणा बलात्कृताः कोपमकार्यं जानन्तोऽपि क्वचित्प्रायः कुप्यन्ति । अन्यथा कोपं विहाय कथं कृपां न कुर्वन्ति ।

७ "इति च शब्दनिर्णये" इति क्वचित् ।

८ "भवांस्तु" इत्यर्वाचीनः पाठः । ९ "दुरन्तया" इति पाठान्तरम् ।

१० "–मिहार्हसि प्रभो" इत्यर्वाचीनाः । हि यस्माद् भवान् परमपुरुषस्य परमपुरुषाधीनया मायया बन्धकशक्त्या अस्पृष्टमतिरत एव समस्तदृक् । यतः समस्तदृगत एव च भगवन्मायया नष्टात्मसु केवलकर्मविभ्रान्तचित्तेष्विह दक्षादिष्वनुग्रहं कर्तुमर्हति ।

मायया विष्णवधीनया बन्धशक्त्या[1] ।

"विष्णुमाया हरेरिच्छा बन्धशक्तिर्ज्ञवर्जिता[2]" इति शब्दानर्णये ॥ * ॥

इति चतुर्थस्कन्धे षष्ठोऽध्यायः[3]

अप्यर्वाग्वृत्तयो यस्य महित्वे स्वभुवादयः[4] ।
यथामति गृणन्ति स्म कृतानुग्रहविग्रहम् ॥ २४ ॥

"उत्पत्तिर्हरिरूपाणां व्यक्तिरेव न संशयः । उत्पत्तिरेव जीवानां देहोत्पत्तिरुदीयते[5]" इति तत्त्वनिर्णये ॥ * ॥

शुद्धं स्वधाम्न्युपरताखिलबुद्ध्यवस्थं चिन्मात्रमेकमभयं प्रतिषिध्य मायाम् ।
तिष्ठंस्तयैव पुरुषत्वमुपेत्य तस्यामास्ते भवानपरिशुद्ध इवाऽमनन्ति[6] ॥ २६ ॥

---

१ "बन्धकशक्त्या" इति पाठान्तरम् ।

२ यदेच्छा मायाशब्देनोच्यते तदा सा ज्ञानज्ञांश्च विषयीकरोति । बन्धकशक्तिस्तु भगवदिच्छयैव ज्ञवर्जिता, केवलमज्ञेष्वेव प्रवर्तते ।

३ प्र. भाष्यपाठेऽत्र सप्तमोध्याऽयः ।

४ "महितात्मभुवादयः" इत्यर्वाचीनाः । "महिमानं भवादयः" इति वीरराघवः । यस्य महित्वे महिम्नि विषये ब्रह्मादयोऽपि अर्वाग्वृत्तयः कात्स्न्येन तदविषयीकारिमनोवृत्तयः । अर्वाक् नीचैरेव वृत्तिः स्थितिर्येषां त इति वा । "न ते महित्वमन्वश्नुवन्ति" इति हि श्रूयते । अथापि यथामति स्तुवन्ति स्म । कीदृशम् ? व्यक्तीकृतः अनुग्रहायानुग्रहेण वा विग्रहो येन । अनुग्रह इव विग्रहोऽपि व्यक्तीकृत एव न जात इति वा ।

५ "–त्पत्तिरितीर्यते" इति प्र. पाठः । देहोत्पत्तिरूपोत्पत्तिः जीवानामेवोदीर्यते । "कृतः प्रकटीकृतोऽनुग्रहार्थं विग्रहो येन" इति श्रीधरस्वामिवीरराघवौ । "कृत आविष्कृतः अनुग्रहेण विग्रहः येन" इति शुकदेवः ।

६ "–शुद्ध इवाऽत्मतन्त्रः" इत्यर्वाचीनः पाठः । "–शुद्धमिवाऽमनन्ति" इति च पाठान्तरम् । सदा पावनत्वात् शुद्धम् । अन्यत् सर्वमपि बन्धाख्यदोषेणाशुद्धम् । "शुद्धमपापविद्धम्" इति श्रुतिः । ननु श्रीतत्वमपि तर्हि शुद्धम् । नित्यमुक्तत्वात् । अत आह – स्वधाम्नि प्रतिष्ठितम् । "स्वे महिम्नि प्रतिष्ठितः" इति श्रुतिः । सा तु श्रीभगवन्महिमाश्रिता । एतेन समतीतक्षराक्षरं परतत्वस्वरूपं निरूपितम् । इदानीमवश्यं साधकेन पञ्चभेदज्ञानिना भाव्यमिति जीवाज्जडाच्च प्रत्येकं वैलक्षण्यमाह—उपरताखिलबुद्ध्यवस्थमिति चिन्मात्रमिति च । उपरताः जीवानां बुद्ध्यवस्था जाग्रदादयो यस्मिन् तादृशम् । "अजमनिद्रमस्वप्नमद्वैतं बुद्ध्यते तदा" इति श्रुतिः । एतेन जीववैलक्षण्यम् । ननु निद्रास्वप्नौ न स्यातां नाम भगवति । नित्यजागरिते नित्यमुक्ते च भगवति जाग्रत्तुरीयावस्थे कथं निषिध्येते? नित्यजागरितत्वादेव, नित्यमुक्तत्वादेव । निद्राप्रतियोगि हि जागरणं भवति । संसारप्रतियोगिनी च मुक्तिः । यो हि नित्यं निद्राति नक्तं तस्य कदाचिज्जागरणं नाम सम्भवति । संसारिणो हि संसारान्मुक्तिश्च ।

"[1]जडमाया न तस्यास्ति शरीरत्वेन कुत्रचित् । सृष्ट्वा तया[2] शरीराणि तत्स्थितेः पुरुषः[3] स्मृतः । [4]मायायामशरीरायामपि विष्णुः स्वयं स्थितः । तस्मात् प्राकृत इत्येव जीववत् तं वदन्ति हि । [5]अस्पृष्टत्वेऽपि तद्धर्मैस्तद्गत्वादेव कारणात्" इति तत्वविवेके ॥ * ॥

तत्त्वं न ते वयमनञ्जन रुद्रशापात् कर्मण्यवग्रहधियो भगवन् विदामः ।
धर्मोपलक्षणमिदं त्रिवृदध्वराख्यं ज्ञातं यदर्थमधिदैवमदस्त्वमास्थाः[6] ॥ २७ ॥

अधिदैवम्, उत्तमदैवम् । यद्यज्ञभागार्थं यज्ञभुग्देवताशरीर आस्थाः—
"भुङ्क्ते यज्ञभुजो देवानाविश्य पुरुषोत्तमः" इति च ॥ * ॥

निद्रास्वप्नमध्यपतितमेव जाग्रत्त्वमवस्थेत्युच्यते । संसारोत्तरभाविनी च मुक्तिः । नहि भगवतो जाग्रत्त्वमवस्थाभेदः । नित्यधर्मत्वात् । तेन भगवानखिलबुद्ध्यवस्थाविधुरः । बुद्धिपदोपादानेन चेदमेवाऽह । जीवस्य हि बुद्धिधर्मा इमे । न स्वरूपधर्माः । तत्कथं भगवति स्युः । अथचार्थान्तरम्–उपरता अखिला बुद्ध्यवस्था मनोवृत्तयो यस्मिन् । "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति श्रुतिः । चिन्मात्रमिति स्फुटं जडाद् वैलक्षण्यम् । उपरताखिलबुद्ध्यवस्थत्वं जडेऽपि गतम् । चिन्मात्रत्वं जीवेऽपि । उभयं सङ्गतमुभयविलक्षणमाह । एतादृशं सर्वोत्तमं वस्तु भगवानेक एवेत्याह–एकम् । "एकमेवाद्वितीयम्" इति श्रुतिः । अद्वितीयमिति द्वितीयपदमपि व्याख्याति–अभयम् । "द्वितीयाद्वै भयं भवति" इति श्रुतेः । जीवस्य संसारभयनिवारकत्वाच्चाभयम् । "अथ सोऽभयं गतो भवति" इति श्रुतेः । एतादृशं यत्तत्वं स भवान् । "शुक्रमकायमव्रणम् ····· कविर्मनीषी–" इत्यादिवत् पूर्वोत्तरार्थयोर्लिङ्गविपरिणामः स्तुतेः परमवैदिकत्वस्फोरणाय । बन्धनीं जडमायां दूरे परिहृत्य तिष्ठन् तयैव मायया पुरं जीवशरीरं सृष्ट्वा तत्र स्वयमपि नियामकतयाऽन्तः प्रविश्य पुरे शेत इति पुरुषत्वमुपेत्य । "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः । रामकृष्णादिरूपेण चाज्ञदृष्ट्याऽपरिशुद्ध इव दुःखीव बद्ध इव दर्शयन् स्वयं त्वबद्ध एव तस्यां मायायां लीलयाऽस्ते इति ज्ञानिन आमनन्ति ।

१ "उत्पत्तिर्हरिरूपाणाम्–" इत्यादिपूर्वभाष्यमत्राप्यनुवर्तते । अयमर्थः– पुरुषत्वमुपेत्येति न जीववद्देहोत्पत्तिरुच्यते । किन्त्वन्तर्यामितया देहे व्यक्तिरेवेति । तदेव तत्वविवेकवचनेन स्पष्टमाचष्ट– जडमायेत्यादि ।

२ "तथा" इति क्वचिन्मुद्रितः पाठः प्रामादिकः ।

३ "पुरुषोत्तमः" इति क्वचित् कोशेषु पठ्यते । अर्थस्तु न स्वरसः ।

४ "मायामयशरीराया –" इति प्र. पाठः प्रामादिकः ।

५ "अदृष्टत्वेऽपि तद्धर्मैस्तद्ग–" इत्यादि प्र. पाठश्च मुद्रणप्रमाद एव ।

६ "–मदो व्यवस्थाः" इत्यर्वाचीनः पाठः । अनञ्जन निरञ्जन, निर्दोष भगवन्, तव स्वरूपं वयं तत्वतो न जानीमः । कुतः ? यतः कर्मण्यवग्रहधियः । सर्वकर्मणां भगवत्पर्यन्तत्वमविज्ञाय क्षुद्रकर्मस्वेवाऽग्रहबुद्धयः । तदपि ज्ञानिनां भवतां कुतः ? रुद्रशापात् । रुद्रेऽस्माभिः कृतो यः शापोऽभिशापः वृथा दोषारोपस्तस्मात्, ततश्च रुद्रस्य शापादाक्रोशाच्च । रुद्रभृत्यनन्दीश्वरशापादित्यपि व्याचक्षते । इदनीं रुद्रप्रसादेन भवता च प्रसन्नेनाऽगतेन

37

तव वरद वराङ्घ्रावाशिषा चानभिध्ये[1]
ह्यपि मुनिभिरसक्तैरादरेणार्हणीये ।
यदि रचितधियं मां विद्धि लोकापविद्धं[2]
जगति न गणयेयं[3] त्वत्परानुग्रहेण ॥ २९ ॥

आशिषोऽपि तत एव भवन्तीत्यतश्चशब्दः ॥ * ॥

नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहः[4] पुरुषो यावदीक्षेत् ।
ज्ञानस्य चार्थस्य गुणस्य चाऽश्रया[5]न्मायामयाद् व्यतिरिक्तोऽसतस्त्वम्[6] ॥३१॥

किञ्चिदिव ज्ञातम् । किं ज्ञातम् ? इदमध्वराख्यं कर्म धर्मोपलक्षणमिति । धर्मेण भक्तिज्ञानादिरूपेण सहकृतं कृतं चेत् धर्मस्य पुण्यफलस्योपलक्षणं ज्ञापकं सम्पादकमिति । यतः प्रसन्नस्त्वमागाः । तेन कर्मणां भगवत्पर्यन्तताबोधः सम्प्रति जातः । त्रिभिर्वेदैर्वृतत्वाद् भगवान् त्रिवृदित्युच्यते । तत्पर्यन्तत्वात् तदर्थत्वाच्च कर्मापि त्रिवृत् । ननु यदि कर्माणि भगवत्पराणि कथमन्यदेवतोद्देशेन तर्हि द्रव्यत्यागः ? आह–यदर्थम् । इन्द्राद्युद्देशेन प्रहुतयज्ञभाग-स्वीकारार्थं त्वमेव ह्यधिकं दैवं तेषु तत्तद्रूपेण तत्तन्नाम्ना चास्थाः । अद इति सप्तम्यर्थे प्रथमा । अमुष्मिन्निन्द्रादि-शरीर आतिष्ठ इति ।

१ "–वाशिषेहाखिलार्थे" इति श्रीधरादयः । "–खिलार्च्ये" इति वीरराघवः ।

२ "माऽविद्यलोकोऽपविद्धम्" इति श्रीधरादयः । "मां विद्ध्यलोकापविद्धम्" इति प्राचीनकोशे पाठान्तरम् ।

३ "जपति न गणये तत्" इति च श्रीधरादयः । आशिषा फलापेक्षया अनभिध्येयेऽपि ध्यानमात्रेण सर्वाशिषां प्रदातरि, अत एव फलेष्वसक्तैर्मुनिभिरर्हणीये तव चरणकमले रचितधियं मां विद्धि जानासि यदि तदा लोकस्य प्राकृतजनस्य दक्षादेः अपविद्धम्, भावे क्तः, अपराधमपवादं दुरुक्तबाणैरपवेधं वा जगति विततमपि न गणयेयम् । यं स्वयं भवाननुजग्राह तत्रान्येषामपराधः किं करिष्यति ? प्रत्युतापराद्धुनेव प्रतिगच्छति ।

४ "–ग्रहैः" इति प्र· पाठः ।   ५ "चाऽश्रयो माया–" इति च ।

६ "व्यतिरिक्तो यतस्त्वम्" इति च पाठान्तरम् । पदार्थेषु ये भेदाः सूक्ष्मांशास्तान् सर्वानपि गृह्णातीति पदार्थ-भेदग्रहः पुरुषः । अशेषविशेषैः सह सकलपदार्थग्राही ब्रह्मादिरपि चेतनवर्गः यावद्यावदीक्षेत तदेतत् भवतः स्वरूपं न भवति । ब्रह्मादयः सर्वज्ञा अपि भगवत्स्वरूपं न जानन्तीत्येतावत् । तैरीक्ष्यं जगत् न भगवत्स्वरूपमिति भगवतो जगदात्मकत्वनिषेधश्च । तदेव वैलक्षण्यं स्फुटीक्रियते— ज्ञानस्य । ज्ञानजनकस्येन्द्रियवर्गस्य ज्ञानविषयस्य चार्थजातस्य । अथवा येन वस्तु ज्ञायते तन्नाम ज्ञानम् । तथाच ज्ञानस्य नामात्मकस्य, अर्थस्य रूपात्मकस्य चेति नामरूपोभयविधस्य, येनेदं नामरूपात्मना विस्तृतं तन्मूलस्य गुणत्रयस्य चाऽश्रयात्, एतत्समष्टिरूपादिति यावत् । मायामयात् प्रकृतिविकारात् असतः जगतस्त्वं विलक्षणः । निर्दोषतया स्थितिः सत्त्वम् । स च सच्चिदानन्द इति भगवतोऽसाधारणो धर्मः । ततश्च दोषग्रस्तत्वात् जगदसत् । तथाच विरुद्धधर्मनिदर्शनेन वैलक्षण्यं विवृतं भवति । अथच मायामयात्कार्यजगतः तत्कारणभूतादसतः मूलप्रकृतेश्च व्यतिरिक्तः । व्यक्तत्वात् कार्यं सत् । अव्यक्तत्वात् कारणमसत् । तथाच सदसद्विलक्षणो भगवान् प्रकृतिप्राकृतविलक्षण इति । सर्वोऽप्ययमर्थः ग्रन्थान्तरेषु भगवत्पादेन सूपपादितः । "यावद् वस्तु ईक्षेत जानाति तावति प्राकृते वस्तुनि एतत् श्रीविग्रहात्मकं ते स्वरूपं नैव । किन्त्व-

"अव्यक्तादिपदार्थानां विशेषज्ञानिनाऽपि तु । न देहो वैष्णवो ज्ञेय[1] आनन्दः प्राकृतो नहि" इति तन्त्रसारे ।

पदार्थभेदग्रहः पदार्थविशेषज्ञः—

"भेदोऽन्तरं विशेषश्च [2]सूक्ष्मेक्ष्यश्चाभिधीयते" इति तत्त्वनिर्णये ॥ * ॥

अनन्वितं तव[3] भगवन् विचेष्टितं यदात्मना चरसि हि कर्म नाज्यसे ।
विभूतयो[4] यत उपसेदुरीश्वरान्न मन्यते स्वयमनुवर्तिनीं भवान्[5] ॥ ३४ ॥

ईश्वरात्[6] ॥ * ॥

दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्दृष्ट्या[7] दृश्यते येन दृश्यम्[8] ।
माया ह्येषा भवदीया हि भूमन् [9]यत् त्वं षष्ठः पञ्चभिर्भासि भूतैः[10] ॥ ३७ ॥

प्राकृतम् । तदुक्तं ब्रह्मतर्के— 'देहदेहिभिदा चात्र नेश्वरे विद्यते क्वचित् । न विष्णोर्न च मुक्तानां क्वापि भिन्नो गुणो मतः' इति" इति राधारमणगोस्वामी ।

१ स हि वैष्णवो देह आनन्दरूपः । न प्राकृतः । तत्कथं प्राकृताशेषविशेषज्ञा अपि तं जानीयुः?

२ "सूक्ष्मेक्षा चाभि-" इति प्र. पाठः प्रामादिकः । सूक्ष्मेक्षयैव गम्यो यो विशेषांशः स भेद इत्युच्यते ।

३ "ते भगवन्" इत्यर्वाचीनाः । ४ "विभूतये यत उपसेदुरीश्वरीं न मन्यते" इति च ।

५ "-वर्तितीं भवान्" इति च । तव विचेष्टितमनन्वितं परस्परं विरुद्धमिव अघटमानं विस्मयनीयं च । यदात्मना स्वयमेव स्वातन्त्र्येण कर्म चरसि । अथापि न लिप्यसे च कर्मफलैः । स्वतन्त्रः कर्ता हि फलभाग्भवति । अत आत्मनेति । यथा हि युद्धे शत्रून् घ्नन् सैनिकः न हत्यादीषु भाजनम् । राजा हि युद्धफलभाग् भवति । अपरं चेदमनन्वितम्—विभूतयः । यतः सर्वेश्वराद् भवतः सर्वा विभूतयो ब्रह्मादिषु उपसेदुर्निषेदुर्न्यूषुरिति यावत् । भवान् स्वयमनुवर्तमानामपि विभूतिदेवतां न बहुमन्यते । पूर्णकामत्वात् । भवान्न्येषां विभूतीर्ददाति । स्वयं तु न बहु मन्यत इत्यनन्वितमिव ।

६ ईश्वरान्न मन्यत इत्यत्र द्वेधा च्छेदः सम्भवी । कस्तावदत्र विवक्षितः? आह—ईश्वरात् । अत्र महान् पाठसम्मोहः । तथाहि "ईश्वरान्" इति प्रचलितः पाठः । क्वचित् कोशेष्वपि तथा । तदनेन लिपिकृत्प्रमादेन यन्निर्णयार्थं भाष्यवचनं प्रवृत्तं स एव दुःशको जातः । अथापि संवादबाहुल्याद् "ईश्वरात्" इत्येव पाठः स्वीकृतः । बहुषु हि कोशेषु "ईश्वरात्" इति पाठो दृश्यते । द्वयोरेव "ईश्वरान्" इति । यद्यपि प्रचलिते विजयध्वजीये "यतो यस्याः श्रियः प्रसादात् विभूतयः ईश्वरान् ब्रह्मादीनुपसेदुः प्रापुः" इति व्याख्यातम् । तथाऽपि मूलविजयध्वजीयानुपलम्भात् प्रचलिते च पाठे प्रक्षेपप्राचुर्यस्य स्फुटत्वात् तदपि न निर्णायकम् । "अनन्वितं तव भगवन् विचेष्टितम्" इति पूर्वोक्तानन्वयस्य "ईश्वरान्" इति पाठे स्वारस्यालाभाच्च "ईश्वरात्" इत्येव पाठः साधुरिति सम्भाव्यते । ७ "प्रत्यग्द्रष्टा" इत्यर्वाचीनाः ।

८ "येन विश्वम्" इति पाठान्तरम् । ९ "यस्त्वं" इत्यर्वाचीनाः ।

१० येन दृष्टेन विज्ञातेन दृश्यमिदं विश्वमपि दृश्यते ज्ञायते । तद्विश्वज्ञानमपि प्रत्यग्दृष्ट्या अन्तर्दृष्ट्यैव । नहि बाह्येन नग्नचक्षुषा दृश्यमपि सर्वं दृश्यते । दृश्यस्यापीयं स्थितिः । का कथा पुनरदृश्यस्य भगवतः । अथापि-

माया ह्येषा भवदीया[1], भवत्सामर्थ्यमेव—

"भगवन्महिमैवासौ यद् दृश्यो भगवान् स्वयम्" इति च ॥ * ॥

प्रेयान् न तेऽन्योऽस्त्यमृतप्रिय प्रभो[2] विश्वात्मनीक्षेन्न पृथग् य आत्मनः ।
अथापि भृत्येश[3] तयोपधावतामनन्यवृत्त्याऽनुगृहाण वत्सल[4] ॥ ३८ ॥

न पृथग् य आत्मनः । अन्यथा यो न पश्यति ।

"पृथग्ज्ञानं तदित्याहुर्यत्किञ्चिद् [5]वीक्ष्यतेऽन्यथा। ज्ञानं[6] ज्ञेयाविरोधेन त्वपृथग् वस्तुतो[7] दृशिः । केचिद् भेदं विनिन्दन्ति ह्यासुरज्ञानवृत्तयः । निराकुर्वन्त्यथो मन्दा भेदस्य परमार्थताम् । ये तु तत्त्वविदो मुख्या भेदं ब्रह्मान्यवस्तुनोः । परमार्थमिति ज्ञात्वा नित्यं विष्णुमुपासते" इति गारुडे ।

हे भृत्येश । तयाऽनन्यवृत्त्योपधावतामस्माकमनुग्रहोऽस्त्येव । [8]अथापि पुनरनुगृहाण ।

"यथार्थज्ञानिनो नान्यः प्रियो विष्णोस्तु कश्चन । तथाऽप्यधिकसन्तुष्ट्यै प्रसीदेत्यर्थनं पुनः" इति च ॥ * ॥

भवान् असद्भिः बाह्यविषयग्राहिभिरस्माभिः दृग्भिरेव चर्मचक्षुर्भिरेव न दृष्टः किम् ? किमित्याश्चर्ये । तदेवाऽह— षष्ठः पञ्चभूतातिरिक्तः अपाञ्चभौतिकस्त्वं पञ्चभिर्भूतैः पाञ्चभौतिकैरिन्द्रियैरेव भासि प्रकटो भवसीति यत् माया ह्येषा भवदीया । नास्माकं स्वशक्तिः । "जीवेशैक्यभ्रमोऽपि त्वन्मायामूल एवेत्याहुः—पञ्चभिर्भूतैः पृथिव्यादिभिः सहितः तद्विशिष्टः षष्ठोऽचिद्विलक्षणो जीवः भासि जीवत्वेन प्रतीयसे । एषाऽपि प्रतीतिस्त्वन्मायैव" इति वीरराघवः ।

१ "भगवन्महिमैव" इति प्र. पाठः प्रामादिकः । "भवदीया माया त्वदीया शक्तिः" इति शुकदेवः । "भवदीया माया विचित्रा शक्तिः" इति वीरराघवः ।

२ "-स्त्यमुतस्त्वयि प्रभो" इत्यर्वाचीनः पाठः । ३ "भक्त्येशतयोपधावता-" इत्यपि केचित् ।

४ हे मुक्तप्रिय प्रभो, विश्वान्तरात्मनि पूर्णात्मनि त्वयि आत्मनो जीवान् यः पृथगन्यथा अयथावत्, अभिन्नत्वेन स्वतन्त्रत्वेन वा नेक्षेत, किन्तु नपृथक् यथावदेव, भिन्नत्वेन, भृत्यत्वेन, तदाश्रितत्वेन, तदधीनसत्ताकत्वेन च यः पश्येत् ततोऽन्यस्ते प्रेयान् प्रियतमो नास्ति । यः पृथक् नेक्षेत् तस्मादात्मनः जीवादन्यः इत्यपि व्याचक्षते। "अन्यथा सन्तमात्मनमन्यथा योऽनुपश्यति" इत्यादि च भारते । अपिच हे भृत्येश, भक्तवत्सल, तया "भक्त्या त्वनन्यया शक्यः" इत्यादिप्रथितया अनन्यवृत्त्या अव्यभिचारिण्या भक्त्या उपतिष्ठमानानामस्माकं सदाऽनुगृह्णन्नपि अथापि पुनरपि विशेषतः सम्प्रत्यनुगृहाण । भृत्येशतया स्वामिभृत्यभावेनेति वा ।

५ "वीक्षतेऽन्यथा" इति प्र. पाठः । क्वचित् कोशेषु च । ६ "ज्ञानज्ञेयाविरोधेन" इति च पाठान्तरम् ।

७ "वस्तुनो दृशिः" इति प्र. पाठः । वस्तुतो दृशिरिति यथावस्तु तथा दृशिः ।

८ "तथाऽपि" इति प्र. पाठः ।

जगदुद्भवस्थितिलयेषु लीलया[1] प्रविभज्यमानगुणयाऽऽत्ममायया।
रचितात्मभेदमतये स्वसंस्थया [2]ह्यतिवर्तितभ्रमगुणात्मने नमः ॥ ३९ ॥

"प्रकृत्या जडया मिथ्याज्ञानं जनयतीश्वरः। तस्य भ्रमश्च सत्त्वाद्या न सन्ति परमेशितुः" इति च ॥ * ॥

यत्तेजसाऽहं सुसमिद्धतेजा हव्यं वहाम्यध्वर[3] आज्यसिक्तम्।
तं यज्ञेशं[4] पञ्चविधं च पञ्चभिः स्विष्टं यजुर्भिः प्रणतोऽस्मि यज्ञम्[5] ॥ ४१ ॥

"यज्ञो यज्ञपुमांश्चैव यज्ञेशो यज्ञभावनः। यज्ञभुक् चेति पञ्चात्मा यज्ञेष्विज्यो हरिः स्वयम्। ओ[6] श्रावयास्तु श्रौषड् यजाथो ये यजामहे। वषट्कारान्तिकै[7]र्नित्यं यजुर्भिः पञ्चभिर्विभुः" इति तन्त्रसारे ॥ * ॥

त्वं क्रतुस्त्वं हविस्त्वं हुताशस्त्वं[8] यजुस्त्वं हि मन्त्राः[9] समिद्दर्भपात्राणि च।

---

१ "–लयेषु दैवतो बहुभिद्यमान–" इत्यर्वाचीनः पाठः।

२ "विनिवर्तित–" इति च। सृष्ट्याद्यर्थं प्रत्येकं विभज्यमानसत्त्वादिगुणया स्वाधीनया जडमायया रचितात्मभेदमतये। भेदेन, वस्तु यथा वर्तते ततोऽन्यथा, अयथावन्मतिः। ज्ञेयविरोधेन ज्ञानं पृथग्ज्ञानमिति यावत्। सेयं भेदमतिर्येनाऽऽत्मनां जीवानां रचिता। स्वयं तु स्वमहिम्नैव तं भ्रमं तान् सत्वादिगुणांश्चातिवर्तते।

३ "वहे स्वध्वर–" इत्यर्वाचीनः पाठः।

४ "तं यज्ञियम्" इति च।

५ यत्तेजसाऽहं सुसमिद्धतेजाः। "तस्य भासा सर्वमिदं विभाति" इति श्रुतेः। "यच्चन्द्रमसि यच्चाग्नौ तत् तेजो विद्धि मामकम्" इति स्मृतेश्च। हव्य देवान् प्रति वहामि। "अग्निर्वै देवानां मुखम्"। गार्हपत्य आहवनीयः दक्षिणाग्निः प्रणीताग्निराग्नीध्रश्चेति पञ्चाग्नयः। आद्यं त्रयं त्रेतेति समुच्चीयते। उत्तरद्वयस्थाने सभ्यमावसथ्यं चापरे पठन्ति। पञ्चस्वग्निषु पञ्चविधं स्थितम्। कानि पञ्चरूपाणि? द्वे नामतो निर्दिशति—यज्ञं यज्ञेशम्। यज्ञपुरुषः यज्ञभावनः यज्ञभुक् चेत्यपराणि त्रीणि रूपाणि। पञ्चभिर्याजुषमन्त्रैः स्विष्टम्। तथाहि श्रुतिः–"ओ श्रावयेति चतुरक्षरम्। अस्तु श्रौषडिति चतुरक्षरम्। यजेति द्व्यक्षरम्। ये यजामह इति पञ्चाक्षरम्। द्व्यक्षरो वषट्कारः" इति। एभिः पञ्चभिर्मन्त्रैः पञ्चमूर्तिर्भगवानिज्यते। एतेन "चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च। हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु" इति स्मृतिर्निगदव्याख्याता।

६ "आ श्रावयास्तु" इति प्र० पाठः प्रामादिकः। "ओँ श्रावयास्तु" इति क्वचित् कोशपाठश्च।

७ "—कारान्तकै–" इति प्र० पाठः। अन्तिकैरित्यन्तिमैः।

८ "हुताशः स्वयं त्वं हि" इत्यपि पाठान्तरम्। छन्दोनुकूलश्चायं पाठः। वैदिकच्छंदस्सु न्यौन्याधिक्ययोर्बहुलं दर्शनात्तदनिर्णायकम्।

९ "मन्त्रः" इति प्र० पाठः।

त्वं सदस्यर्त्विजो दम्पती देवता अग्निहोत्रं सुधा[1] सोम आज्यं पशुस्त्वम्[2] ॥४५॥

"सर्वशब्दाभिधेयत्वं सर्वान्तर्यामकत्वतः[3] । न तु सर्वस्वरूपत्वात् सर्वभिन्नो यतो हरिः" इति मात्स्ये ॥ * ॥

अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् ।
आत्मेश्वर उपद्रष्टा स्वयन्दृगविशेषणः[4] ॥ ५० ॥

"अन्तर्यामिस्वरूपेण ब्रह्मरुद्राद्यभिन्नता । न तु जीवस्वरूपेण जीवा भिन्ना यतो हरेः । विशेषाभेदवचनं सन्निधानविशेषतः । सन्निधानं तु तत् प्रोक्तं सामर्थ्यव्यञ्जनं हरेः" इति भविष्यत्पुराणे[5] ॥ * ॥

तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि ।
[6]देहात्मबुद्धिर्भूतानि भेदेनाज्ञोऽनुपश्यति ॥ ५२ ॥

---

१ "स्वधा" इति च पाठान्तरम् ।

२ "आज्यं पशुः" इतीयदेव छन्दोनुसारेणार्वाचीनैः पठ्यते । प्रातर्माध्यन्दिनं तृतीयमिति सवनत्रयात्मकः क्रतुः । अहीनेषु बह्वहसाध्येषु प्रत्यहमनुवृत्तेः क्रतोः प्राधान्यमिति ह्युक्तम्–"भूम्नः क्रतुवज्ज्यायस्त्वम्" इति । यूपसहितः क्रतुरित्यन्ये । यज्ञसामान्यं वा । यजुस्त्वम् । ऋङ्मन्त्राश्च त्वम् । सदस्याश्च त्वमृत्विजश्च त्वम् । यजमानदम्पती इज्यदेवता च त्वम् । सुधा देवपेयम् । क्षीरं च सुधा । यज्ञवेद्यां या इष्टकास्ताश्च सुधा । यज्ञियः क्षीरिवृक्षश्च सुधा । सर्वत्र तत्तन्नामा त्वमेव । "न ऋते त्वत् क्रियते किञ्चनाऽरे" इति श्रुतिः । "ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्" इति च स्मृतिः ।

३ "सर्वान्तर्यामिकत्वतः" इति प्र. पाठः । शुकदेवोऽप्याह–"अस्य सर्वस्य भगवच्छक्तिमयस्य भगवदधीनस्थित्यादिमत्त्वेन भगवदभिन्नत्वं बोध्यम् । स्वरूपेणाचेतनपदार्थस्य, बन्धमोक्षार्हस्य चेतनपदार्थस्य च बन्धमोक्षप्रदेन मुक्तप्राप्येन भगवता सहाभेदासम्भवात्" इत्यादि ।

४ अहमेव ब्रह्माणि स्थितो ब्रह्मा, शर्वे स्थितश्च शर्वः । मुख्यं जगतः सृष्टिस्थितिसंहारकारणम् । अहमेव च जगत आत्माऽन्तर्यामी । "एष त आत्माऽन्तर्याम्यमृतः" । नहि जगदात्मत्वं शंक्यम् । यतो जगत ईश्वरः । उपशब्द उत्कर्षे वर्तते । उपशम उपाध्याय उपनयनमिति यथा । सर्वेषामुपरि सर्वोत्तमत्वेनाऽत्मानं पश्यन् उपद्रष्टा । "सर्वेभ्य उपरो द्रष्टा यदुपद्रष्टृनामकः" इति हि गीतातात्पर्ये । स्वयन्दृग् ज्ञानरूपः । निरतिशयोऽविशेषणः । आत्मनां जीवानामीश्वर इति वाऽऽत्मेश्वरः । आत्मैवाऽत्मन ईश्वरः, नान्यस्तस्येश्वर इति वा । "पतिं विश्वस्याऽत्मेश्वरम्" इति श्रुतिः ।

५ "भविष्यत्पर्वणि" इति प्र. पाठः । अत्र वीरराघवोऽप्याह– "अहमेक एव मच्छरीरभूतब्रह्मरुद्राख्यजीवानुप्रवेशेन जगत्सृजामि संहरामि स्वावताररूपेण पालयामि" इति ।

६ "ब्रह्मरुद्रौ च भूतानि" इत्यर्वाचीनः पाठः । अद्वितीये असमाधिके । केवले नित्यनिरस्तदोषे । तस्मिन् मयि ब्रह्मादिजीवान् भेदेन, अन्यथा स्वतन्त्रतया अनुपश्यत्यज्ञः ।

"हरेर्वेशत्वदृष्टिस्तु भूतानामपृथग्दृशिः । प्रियत्वदृष्टिरथवा ब्रह्मादीनां विशेषतः" इति गारुडे ॥ * ॥

त्रयाणामेकभावानां यो न पश्यति वै भिदाम् ।
सर्वभूतात्मना[1] ब्रह्मन् स शान्तिमधिगच्छति ॥ ५४ ॥

सर्वभूतात्मना सर्वभूतान्तर्यामित्वेन[2] ॥ * ॥

एवं भगवताऽऽदिष्टः प्रजापतिपतिर्हरिम् ।
अर्चित्वा क्रतुना स्वेन देवानुभयतोऽयजत्[3] ॥ ५५ ॥

उभयतः सोमतो हविषश्च ॥ * ॥

तमेव दयितं भूय आवृणोत्[4] पतिमम्बिका ।
अनन्यभावैकगतिं[5] शक्तिः सुप्तेव पूरुषम् ॥ ५९ ॥

"शक्तित्वाद् विष्णुशक्तिस्तु[6] शक्तिशब्देन चोच्यते । शक्यत्वात् प्रकृतिश्चापि स्वापः सृष्टिं विना हरौ । रतिस्तस्यास्तु कथितो नह्यन्यः[7] स्वाप इष्यते[8]" इति तन्त्रसारे ॥ * ॥

---

१ "सर्वभूतात्मनाम्" इत्यर्वाचीनः पाठः । केवलं संख्यया त्रयाणां वस्तुतस्त्वेकरूपाणाम् । ब्रह्मरुद्रगतौ स्वयं विष्णुरेक इति त्रयाणामपि रूपाणां सर्वभूतान्तर्यामित्वेन अभिदां यः पश्यति स मुच्यते । "शान्तिर्मोक्षो निर्वाणम्" । "भेदादर्शनं च तयोर्विष्णुतः स्वातन्त्र्याभावादेव । विष्णोस्तु परमस्वातन्त्र्यमेव । यथोक्तं श्रीब्रह्मणैव– 'सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्' इति । सर्वथा साम्यदर्शि तु दोषोऽपि श्रूयते । यथा पाद्मे– 'यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः । समत्वेनैव वीक्षेत स पाषण्डी भवेद् ध्रुवम्' इति" इति राधारमणगोस्वामी । २ "सर्वान्तर्यामित्वेन" इति क्वचित् ।

३ "देवान् भागवतोऽयजत्" इति विजयध्वजीयः पाठस्तात्पर्यविरुद्ध इति स्फुटः प्रक्षेपः । प्रजापतिर्भगवान् ब्रह्मा वा पतिर्यस्य स दक्षः स्वकृतेन वैष्णवक्रतुना सोमहविर्भ्यां भगवन्तं हरिमर्चित्वा तदङ्गतया देवानपि सोमेन हविषा चायजत् । "स्वेन क्रतुना हरिं उभयतः भगवदङ्गभूतदेवादिद्वारा साक्षाच्च त्रिकपालपुरोडाशादिना अर्चयित्वा देवान् तदङ्गतया अयजत्" इति शुकदेवः ।

४ "आवृङ्क्ते" इति प्र. पाठः । "भूयस्त्ववाप" इति क्वचित् ।

५ "–गतिः" इति पाठान्तरम् । अनन्यभावाऽम्बिका एकगतिं तमेवाऽवृणोत् । स ह्येक एव गतिः शरणं तस्याः । अनन्यभावा शक्तिः एकगतिं पूरुषमिव । सुप्ता सृष्टिव्यापारविमुखा प्रकृतिमानिनी श्रीरत्र शक्यत्वाच्छक्तिः । सृष्टिकाले सृष्टावपि व्यापृता भवति । प्रळये तु केवलं विष्णावेव रतिरन्यव्यापाराभावात् । अतः सुप्तेति विशेषणम् । अत्र क्वचित् कोशे "सुप्तैव पूरुषम्" (?) इति पाठः पठ्यते ।

६ "विष्णुशक्तिश्च" इति पाठान्तरम् । ७ "नह्यन्यत्" इति क्वचित् । ८ "उच्यते" इति प्र. पाठः ।

'पीत्वाऽन्तरजरं वह्निश्चच्छर्द शरकानने ।
कुमारोऽभूत् ततस्तस्मै स्तनं षट् कृत्तिका ददुः ॥ ६४ ॥

स्वाहाद्वारेण शरकानने चच्छर्द[2] । भारतोक्तेः[3] ॥ * ॥

इति चतुर्थस्कन्धे सप्तमोऽध्यायः[4]

अथातः कीर्तये वंशं पुण्यकीर्तेः कुरूद्वह ।
स्वायम्भुवस्यापि मनोर्हरेरंशानुजन्मनः[5] ॥ ७ ॥

"आविष्टा हरिणा जीवा ब्रह्मा दक्षो मनुः पृथुः । शक्राद्या ऋषयश्चैव मत्स्यव्यासादयो हरिः" इति[6] ब्रह्मवैवर्ते ॥ * ॥

प्रियव्रतोत्तानपदौ[7] शतरूपाऽलभत्[8] सुतौ ।
वासुदेवस्य कलया रक्षाया[9] जगतः स्थितौ ॥ ८ ॥

---

१ प्र. पाठेऽस्मिन्नध्याये एकषष्टिः श्लोकाः । ततश्चायं श्लोकोऽर्वाचीनकोशेषु न पठ्यते । न व्याख्यातश्च श्रीधरस्वाम्यादिभिः । प्राचीनकोशे तु चत्वारः श्लोका अधिकाः । तत आहत्य ६५ श्लोकाः ।

२ "स्वाहाद्वारेण नदीतीरे शरकानने चच्छर्देति" इति प्र. पाठः ।

३ तथाहि भारते श्रूयते—"सप्तानामपि सा देवी सप्तर्षीणां महात्मनाम् । पत्नीसरूपतां कृत्वा कामयामास पावकम् । दिव्यरूपमरुन्धत्याः कर्तुं न शकितं तया । तस्यास्तपःप्रभावेण भर्तृशुश्रूषणेन च । षट्कृत्वस्तत्तु निक्षिप्तमग्ने रेतः कुरूत्तम । तस्मिन् कुण्डे प्रतिपदि कामिन्या स्वाहया तदा । तत् स्कन्नं तेजसा तत्र संवृतं जनयत् सुतम्" (वन. अ. २२५) इत्यादि ।

४ कोशान्तरानुसारेण प्रचलितभाष्यपाठानुसारेण चात्राष्टमोऽध्यायः ।

५ "–रंशांशजन्मनः" इत्यपि पाठान्तरम् । हरेरंशेन अनुगृहीतं जन्म यस्य ।

६ "इति च ब्रह्मवैवर्ते" इति क्वचित् । "इति ब्रह्मतर्के" इति च क्वचित् ।

७ "–व्रतोत्तानपादौ" इति पाठान्तरम् ।

८ "शतरूपापतेः सुतौ" इत्यर्वाचीनाः ।

९ "रक्षायाम्" इति च पाठः । रक्षाया इति पाठे रक्षायाः कृते रक्षायै स्थितौ । वासुदेवस्य कलया अंशावेशेन ।

"प्रियव्रतोत्तानपादप्रमुखेषु हरिः स्वयम् । आविष्टः सर्वभूपेषु[1] वृषभाद्याः[2] स्वयं हरिः" इति हरिवंशेषु ॥ * ॥

विकल्पे विद्यमानेऽपि नह्यसन्तोषहेतवः ।
पुंसो मोहमृते भिन्ना यल्लोके[3] निजकर्मभिः ॥ ३१ ॥

विविधकल्पने विद्यमानेऽपि ॥ * ॥

स्मयमानमभिध्यायेत् सानुरागावलोकनम् ।
नियतेनैकभूतेन मानसा वरदर्षभम् ॥ ५४ ॥

परिणततया एकस्मिन्नेव भूतेन[4] ॥ * ॥

परिचर्या भगवतो यावतीः[5] पूर्वसेविताः ।
ता मन्त्रहृदयेनैव प्रयुञ्ज्यान्मन्त्रमूर्तये ॥ ६१ ॥

मन्त्रहृदयेन[6] । मन्त्रेण [7]नमःशब्देन च ॥ * ॥

---

१ यद्यपि प्राचीनकोशेष्वपि "सर्वभूतेषु" इत्येव प्रचुरः पाठः । प्र. पाठोऽपि तथा । अथाप्यर्थस्वारस्यात् विरळतया पठितोऽपि "सर्वभूपेषु" इत्येव पाठः प्राचीन इति निश्चीयते । "राजराजाख्यया कलया सन्निहितौ" इति विजयध्वजीयं चात्र संवदते । नहि न राजराजाख्येन रूपेण सर्वभूतेषु सन्निहितः । किन्तु भूपेष्वेव ।

२ "ऋषभाद्याः" इति प्र. पाठः ।

३ "यल्लोका निजकर्मभिः" इति पाठान्तरम् । शत्रुमित्रादिविविधकल्पने विद्यमानेऽपि भ्रममृते असन्तोषहेतव इति न सन्त्येव । भ्रम एवायं न सन्तुष्यामीति । यन्निजकर्मानुसारेण असन्तोषहेतवोऽपि भिन्ना भवन्ति । नहि कश्चित् कस्यचिदसन्तोषहेतुः । किन्तु स्वकर्मणैव क्वचित् श्लिष्यति क्वचिच्च न श्लिष्यति ।

४ पूर्वोक्तरीत्या सततधारणया अभ्यासपरिणततया एकस्मिन्नेव भगवति एकाग्रतया भूतेन स्थितेन ।

५ "यावत्यः" इति प्रचलितः पाठः । प्राचीनपाठेऽपि यावतीरिति द्वितीया प्रथमार्थे । यावत्यः परिचर्याः पूर्वसेविताः, 'सलिलैः शुचिभिर्माल्यैर्वन्यमूलफलादिभिः' इत्यादिना पूर्वश्लोकेषु वर्णिताः, पूर्वैः पूर्वतरैरनुष्ठिताश्च ताः सर्वा मन्त्राक्षरप्रतिपाद्यमूर्तये मन्त्रध्येयमूर्तये वा मन्त्रेण हृदयेन च समन्त्रेण हृदयेन नमःशब्देन । ॐ नमो भगवते वासुदेवाय ॐ नम इति । न च पौनरुक्त्यम् । मन्त्रगतनमःशब्दस्य भगवद्वाचित्वात् । अत एवोक्तं मन्त्रमूर्तय इति ।

६ "मन्त्रहृदयेण" इति क्वचित् कोशपाठो लिपिकृत्प्रमादः ।

७ "मन्त्रेण च नमःशब्देन च" इति प्र. पाठः । अङ्गन्यासे हृदयस्थानत्वात् हृदयं नमःशब्द इति तन्त्रशास्त्रेषु प्रसिद्धम् ।

38

[1]सुदुष्करं कर्म कृत्वा लोकपालैरपि प्रभुः ।
एष्यत्यचिरतो राजन् यशो विपुलयंस्तव ॥ ७२ ॥

तस्यैव योग्यत्वात् लोकपालानां दुष्करम्—

"नाशक्यं देवतानां तु यदन्यैः शकितं[2] क्वचित् । शक्ता अपि न कुर्वन्ति यदन्यविहितं बुधाः" इति ब्राह्मे ॥ * ॥

तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीम् ।
समाहितः पर्यचरद् [3]दृष्ट्याऽऽदिष्टेन पूरुषम् ॥ ७४ ॥

दृष्ट्या निरूपणया । आदिष्टेन[4] उपदेशेन ॥ * ॥

[5]देवाश्चक्रुस्तपोविघ्नं त्रासयन्तः स्वमायया ।
सर्पेभसिंहकूश्माण्डैस्तान्नापश्यत् परं गतः ॥ ८० ॥

"यत्र देवैः कृते विघ्ने खण्डितो न पुमान् भवेत् । तत्र तद्यशसे विघ्नं कुर्युर्नतु विघातने । यत्र खण्डितता तत्र खण्डनायैव केवलम् । सत्यकामा यतो देवास्ते[6] चित्ताद्यभिमानिनः । अतो विमोहनायैव प्राप्नुयुस्ते पराजयम् । तेषामशक्ततोक्तिश्च[7] विमोहाय सुरद्विषाम्" इति ब्रह्माण्डे ॥ * ॥

सर्वतो मन आकृष्य हृदि भूतेन्द्रियाश्रयम्[8] ।
ध्यायन् भगवतो रूपं नाद्राक्षीत् किञ्चनापरम् ॥ ८१ ॥

---

१ "स कृत्वा दुष्करं कर्म" इति च पाठान्तरं दृश्यते । कर्तुमशक्यमिव कर्तुमयोग्यमपि दुष्करमित्युच्यते ।

२ बहुषु तु कोशेषु "शङ्कितम्" इति पठ्यते । एकस्मिन्नेव "शकितम्" इति । अर्थौचित्यात् स एवात्राऽऽदृतः । शङ्कितमिति पाठे अन्यैरशक्यमिति शङ्कितमपि देवतानां नाशक्यम् ।

३ "ऋष्यादेशेन" इति प्र॰ पाठः। "दृष्ट्याऽऽदेशेन" इति च पठन्ति । "दिष्टादेशेन" इति वीरराघवः । आदिष्टेन नारदोपदेशेन, भावे क्तः । लब्धा या दृष्टिः भगवत्स्वरूपनिरूपणशक्तिः, ध्याने समाहितता, तया पर्यचरदिति प्राचीनपाठार्थः । ४ "आदेशेन" इति प्र. पाठः ।

५ अयं श्लोकः अर्वाचीनैर्न पठ्यते । न व्याख्यातश्च श्रीधरादिभिः । अत्र कूश्माण्डाः पिशाचविशेषाः । कूष्माण्डा इत्यर्वाचीनाः । ६ "देवास्तच्चित्ताद्यभि–" इति पाठान्तरम् ।

७ "–मशक्तितोक्तिश्च" इति प्र. पाठः ।

८ "भूतेन्द्रियाशयम्" इत्यर्वाचीनः पाठः । भूतानां पञ्चमहाभूतानाम्, सकलप्राणिनां च, इन्द्रियाणां चाऽश्रयम् । विश्वनाथोऽप्याह–"भूतानां प्राणिनामिन्द्रियेषु न शेते न विषयीभवतीति तथाभूतं भगवद्रूपम्" इति ।

भूतेन्द्रियाश्रयं भगवद्रूपम् ॥ * ॥

[1]तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुद्ध्यासुमनन्यया धिया ।
लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिम् ॥ ८४ ॥

विश्वं भगवन्तम् । आत्मनो द्वारं सर्वजीवोत्पत्त्यादिद्वारम् । लोकानामेव निरुच्छ्वासः । लोकपालास्तदर्थमेव शरणं ययुः ।

"ध्याता ध्रुवस्य[2] कीर्त्यर्थे हरिणा सह देवताः । लोकोच्छ्वासं निरुद्ध्याथ श्वासार्थं च हरिं ययुः । अन्यप्रवृत्तयस्तेभ्यो न तेषामन्यतः क्वचित् । स्वोत्तमेभ्यस्तु[3] देवेभ्यस्तेषां स्युश्च[4] प्रवृत्तयः" इति तत्त्वनिर्णये ॥ * ॥

नैवं विदामो भगवन् प्राणरोधं[5] चराचरस्याखिलसत्त्वधाम्नः ।
विधेहि शं नो व्रजिनाद्[6] विमोक्षं प्राप्ता वयं त्वा[7] शरणं शरण्यम् ॥ ८५ ॥

अखिलसत्वसमूहस्य—

"तेजः शक्तिः समूहश्च गृहं धामेति[8] कथ्यते" इति शब्दनिर्णये[9] ॥ * ॥

इति चतुर्थस्कन्धेऽष्टमोऽध्यायः[10]

---

१ आत्मनः जीवजातस्य द्वारम्। एतद्द्वाराऽस्य जीवस्य सर्वं भवति। येनापावृतेन बद्धो भवति; विवृतेन च मुक्तः। तं विश्वं सर्वगं वायोरप्यन्तर्यामिणं अभिध्यायति सति। असुं कुम्भके निरुद्ध्य । निरुच्छ्वासनिपीडिता लोका लोकपालैः सह शरणं ययुर्हरिम् ।

२ हरिणा सह परिवारतया ध्रुवेण ध्याता देवता ध्रुवस्य कीर्त्यर्थम्। "ध्यातुर्ध्रुवस्य" इति प्र. पाठः।

३ "स्वोत्तमेभ्यश्च" इति क्वचित् । ४ स्युः स्वप्रवृत्तयः" इति प्र. पाठः।

५ "प्राणबोधम्" इति क्वचित् पाठान्तरम् । तदात्वे तु—एवं सति प्राणनं बोधनं च जगतश्चराचरस्य कथमिति न विदामः । चराचरमिति न चरमचरं च । अचरे जडे प्राणरोधस्याप्रसरात्। किन्तु जङ्गममेव चरतीति चराचरमुच्यते । "चरिचलि-" इत्यादिपाणिनिस्मरणात् । तदेव स्पष्टयति—अखिलसत्वधाम्नः । धामेति समूहः समष्टिः। अखिलप्राणिसमष्टिरूपस्य चराचरस्य । अचरमिति स्थावरं प्राणिजातं वा ।

६ "वृजिनाद्—" इति प्र. पाठः। व्रजिनाद् दुःखात् मोक्षं ततः शं सुखं च विधेहि।

७ "त्वाम्" इति प्र॰ पाठः। ८ धामशब्दः तेजः, शक्तिः, समूहः, गृहं चेति चतुर्ष्वर्थेषु प्रयुज्यते।

९ "तत्वनिर्णये" इति क्वचित् पाठः प्रामादिकः सम्भाव्यते।

१० प्रचलितभाष्यपाठानुसारेणात्र नवमोऽध्यायः। केषुचित् कोशेषु च तथा।

या निर्वृतिस्तनुभृतां तव पादपद्म-
ध्यानाद् भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्
[1]किम्वन्तकासिलुळितात् पततां विमानात् ॥ १० ॥

परब्रह्मणि स्थितस्यापि[2] ध्यानादिकं विना न भवति । सुप्तौ दृष्टत्वात् ॥ * ॥

ते न स्मरन्त्यतितरां प्रियमीशमाद्यं स्वान् सम्पदः सुतसुहृद्गृहवित्तदारान्[3] ।
ये त्वब्जनाभ भवदीयपदारविन्दसौगन्धलुब्धहृदयेषु कृतप्रसङ्गाः ॥ १२ ॥

ये स्वान् सम्पदः[4] स्मरन्ति ते त्वां न स्मरति । ये [5]भवद्भक्तसङ्गास्ते [6]स्वान् सम्पदो न स्मरन्ति ॥ * ॥

तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिर्विरचितं[7] सदसद्विशेषम् ।
रूपं स्थविष्ठमज ते महदाद्यनेकं[8] नातः परं परम वेद्मि न यत्र वाचः[9] ॥१३॥

"पश्यमानोऽपि तु हरिं नतु वेत्ति कथञ्चन । वेत्ति किञ्चित् प्रसादेन हरेरथ गुरोस्तथा" इति ब्रह्मतर्के ॥ * ॥

---

१ "किंत्वन्तकासिलुलितात्" इति प्र॰ पाठः । अन्तकासिना कालेन लुळितात् विमानात् स्वर्गात् पतिष्यमाणानां स्वर्गीयक्षणिकसुखभोगिनां तनुभृतां न निर्वृतिरिति किमु वक्तव्यम् ।

२ "स्थितस्य ध्यानादिकम्" इति प्र. पाठः । "ध्यानादिना" इति क्वचित् । तथाचायमर्थः—तव श्रवणमनन-ध्यानादिना या निर्वृतिः सा स्वमहमनि परस्मिन् ब्रह्मणि सङ्गतस्यापि जीवस्य सुप्तौ न भवति । सुप्तिकाले हि जीवो परं ब्रह्माप्येति । "स्वं ह्यपीतो भवति" इति श्रुतेः । स्वाप्यय एव हि स्वापो नाम । अथापि तदा तावानानन्दो न भवति । यथा ध्याने ।

३ "प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः" इति प्र॰ पाठः । ते न स्मरन्त्यतितरां दारवित्तादि-भ्योऽपि प्रियमीशमाद्यम् । के? ये तु स्मरन्ति स्वान् सम्पदः सुतसुहृद्गृहवित्तदारान् । स्वान् सुतादीनेव सम्पद इति स्मरन्ति सम्पत्त्वेन स्मरन्ति । तथा ते न स्मरन्ति स्वान् सम्पदः सुतसुहृद्गृहवित्तदारान् । के ? ये तु भवदीयपदा-रविन्दसौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः । भगवद्भक्तसङ्गो हि संसारविरक्तिहेतुः ।

४ "स्वाः सम्पदः" इति प्र. पाठः प्रामादिकः ।

५ "भगवद्भक्त–" इति पाठान्तरम् ।

६ "स्वाः सम्पदः" इति प्र. पाठोऽत्रापि पूर्ववत् प्रमादः ।

७ "-दिभिः परिचितम्" इति प्र. पाठः ।

८ "महदाद्यशेषम्" इति पाठान्तरम् ।

९ "न यत्र वादः" इति प्र॰ पाठः । तिर्यक्प्रभेदो द्विजोऽण्डजः । तत्प्रभेदः सरीसृपः । तथाच तिर्यञ्च इति पशवः । द्विजा इति पक्षिणः । आदिना यक्षरक्षआदयः । तिर्यगाद्यात्मना विरचितं व्यक्ताव्यक्तविशेषम् । तदेव

त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा
कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः ।
यद्बुद्ध्यवस्थितमखण्डितया[1] स्वदृष्ट्या
दृष्ट्वाऽऽस्थिता वधिमतो[2] व्यतिरिक्त आस्से ॥ १५ ॥

वधिं अवधिम् । अल्लोपेन । संसारस्यावधिभूतं त्वामास्थिताः । तैः सहैवाऽस्से[3] ॥ * ॥

यस्मिन् विरुद्धगतयोऽप्यनिशं[4] पतन्ति विद्यादयो विविधशक्तय आनुपूर्व्या[5] ।
तद् ब्रह्म विश्वभवमेकमनन्तमाद्य[6]मानन्दमात्रमविकारमहं प्रपद्ये ॥ १६ ॥

"आनुपूर्वी श्रुतिश्चैव त्रयी चाऽम्नाय उच्यते" इत्यभिधानम् ॥ * ॥

विक्रियन्ते महदादीति । सूक्ष्ममहदादिस्थूलशरीरान्तं विचित्रानेकरूपम् । उक्तं हि "बहुचित्रजगद्बहुधाकरणात्" इति । स्थूलं रूपं प्रतिमास्थानीयं विराड्रूपं ब्रह्माण्डं किञ्चिदिव जानामि । अतः परमुत्तमं च ते सूक्ष्मं स्वरूपं ज्ञानानन्दमयं पश्यन्नपि न वेद्मि तत्वतो न वेत्तुं प्रभवामि । यत् सामस्त्येन वर्णयितुं वेदवाचोऽपि विफला आसन् । किमुत मे वाचः? श्रूयते–"यतो वाचो निवर्तन्ते", "न तत्र चक्षुर्गच्छति न वाग् गच्छति" इत्यादि ।

१ "–स्थितिमखण्डितया" इति प्र॰ पाठः ।

२ "द्रष्टा स्थितावधिमखो–" इति च । त्वं जीवेभ्यो व्यतिरिक्तः । मुक्तावपि मुक्तैः सहैवाऽस्से । नत्वभेदेन । कुतः? यतस्त्वं नित्यमुक्तः । स तु संसारान्मुच्यते । त्वं परिशुद्धः । स तु गुणबन्धादिभिरशुद्धः । त्वं विबुद्धः । स त्वत्प्रसादात् बुध्यते । त्वं त्वात्माऽन्तर्नियामकः । स तु नियम्यः । त्वं कूटस्थः स देहादिभिर्विक्रियते । त्वमादिपुरुषः । स तु त्वयोत्पत्त्यादिमान् । त्वं भगवान् । स दुर्भगः । त्वं त्रयाणां लोकानामधीशः । स ईशितव्यः । ननु मुक्तावेते गुणा यथासम्भवं जीवेऽपि सम्भवन्ति । ततस्तदा व्यतिरेको न भवेत्? नेत्याह–यत् । मुक्तावपि व्यतिरिक्तः सहैवाऽस्से । "सह ब्रह्मणा विपश्चिता" इति श्रवणात् । यत् यस्मात् अखण्डितया स्वदृष्ट्या ध्यानफलभूतया स्वमनसि प्रकटीभूतं त्वां दृष्ट्वा ज्ञानिनो मुक्ताः सन्तः संसारस्य वधिमवधिं त्वामेवाऽश्रित्य स्थिताः प्राप्ता इति यावत् । अतो व्यतिरिक्त आस्से ।

३ " त्वामास्थिताः । सहैवाऽस्ते" इति प्र. पाठः ।

४ "–गतयो ह्यनिशम्" इति प्र. पाठः । "–मतयो ह्यनिशम्" इति केचित् ।

५ "आनुपूर्व्यात्" इति प्र. पाठः । क्वचित् कोशेष्वपि तथा ।

६ "–मेकमविश्वमाद्य–" इति पाठान्तरम् । व्यधिकरणा अपि शक्तयो यस्मिन्ननिशं पतन्ति । काः? विद्यादयः । विद्यापदेन ज्ञानदत्वमुच्यते । आदिपदेन चाज्ञानदत्वं स्रष्टृत्वं संहर्तृत्वं बन्धकत्वं मोचकत्वं महत्त्वमणुत्वमित्यादि । यः सृजति यश्च पाति न स संहरति । आभणन्ति हि—"विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्" इति । यदि कोऽपि स्वसृष्टमेव नाशयेत् स लोके दोषः । त्वयि तु गुणोऽयं यत् स्रष्टा च पाता च संहर्ता चेति । एवमन्यत्रापि । तत् कुतः? आनुपूर्व्या । श्रुतिवचनात्—"गुणाः श्रुताः सुविरुद्धाश्च देवे" इत्यादि । आनुपूर्व्यादिति पाठे आनुपूर्वीणां समूह आनुपूर्व्यम् । श्रुतिसमुदायादित्यर्थः । केचित् "आनुपूर्व्यात् क्रमशः"

सत्याशिषो हि भगवंस्तव पादमूल[1]-
माशिष्टयोऽनुभजतः पुरुषार्थमूर्त्तेः ।
अप्येवमार्य[2] भगवान् परिपाति दीनान्
वाश्रेव[3] वत्सकमनुग्रहकातरोऽस्मान् ॥ १७ ॥

तव पादमूलं भजतः आचार्यस्याऽशिष्टयः शिक्षाः सत्याशीःप्रदा एव । तथाऽपि अस्मान् शिष्यान् विशिष्टफलप्राप्तये पुनः[4] परिपाति भवान् ॥ * ॥

अहो बत ममानात्म्यं मन्दभाग्यस्य पश्यत ।
भवच्छिदः पादमूलं गत्वाऽयाचे यदन्तवत्[5] ॥ ३१ ॥

"[6]आधिपत्यमनित्यं तु ध्रुवलोकस्य यद् ध्रुवे । नतु तत्स्थानगन्तॄणां यतीनां गतिरुत्तमा[7] । तस्यापि मुक्तिर्नियता नियतं चापि तत्पदम् । तथाऽपि कामनानिन्दा ध्रुवेण सुकृता बत" इति भविष्यत्पर्वणि ॥ * ॥

इति व्याचक्षते । तत्पक्षे अनिशं पतन्तीति पूर्ववचनं व्यर्थं विसङ्गतं च । तादृशं विश्वस्य प्रभवं सर्वस्याऽद्यं स्वयमादिवर्जितं ब्रह्म ।

१ "पादपद्ममाशीस्तथाऽनुभजतः" इति प्र. पाठः । "पादपद्ममाशिष्टयोऽनुभजतः" इति च प्राचीनकोशेषु पाठान्तरम् । २ "अप्येवमर्य" इति प्र. पाठः ।

३ "वाम्रेव" इति च । पुरुषैरर्थनीयमूर्तेस्तव पादपद्ममूलमनुभजतः गुरोराशिष्टयः उपदेशाः सत्याशिषो हि । गुरुर्यदाशास्ते तच्छिष्यस्य भवति । भगवद्भक्तिः प्रथमं तावत् गुर्वनुग्रहसाध्या । प्रसन्ने गुरौ हरिरपि प्रसन्नः पुनरधिकं पुरुषार्थं प्रयच्छतीत्याह–अप्येवम् । यद्यपि गुरुरेव सत्याशीः । एवमपि भगवान् भवान् पुनरधिकं परिपाति । वाश्रा धेनुर्वत्सतरमिव । "वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति । यदेषां वृष्टिरसर्जि" (ऋ. १. ६८. ८.) इति श्रुतिः । ४ "पुनःपुनः परिपाति" इति क्वचित् ।

५ "तदन्तवत्" इति क्वचित् । यदन्तवत् अनित्यं तदयाचे याचितवान् । याचे इत्यपि च्छिन्दन्ति । अहो बत मम विवेकवैधुर्यम् ।

६ नन्वन्तवदिति पूर्वविरुद्धम् । "यतो नाऽवर्तते यतिः" (२५) इति पूर्वं भगवता ततोऽनावृत्तिकथनात् । आह–आधिपत्यम् । यद् ध्रुवे ध्रुवलोकस्याऽधिपत्यं तदनित्यमन्तवत् । साधनेन तल्लोकं प्राप्ता यतयस्तु पुनर्नाऽवर्तन्ते संसाराय । किन्तु मुक्तिमेवाधितिष्ठन्ति । ततश्च तत्स्थानगन्तॄणां यतीनामुत्तमा गतिर्नित्या, मुक्तेर्नियतत्वात् । तेन न पूर्ववचनविरोधः । नन्विदं ध्रुवेऽपि समानम् । तस्यापि मुक्तेर्नियतत्वात् । सत्यम् । नहि मुक्तेर्नित्यत्वमत्र निषिध्यते । किन्त्वाधिपत्यस्य नित्यत्वमेव । तर्हि साक्षात्कृतभगवद्रूपोऽनित्यं किमिति चकमे? नियतं चापि तत्पदम् । नियतकामना हि न दोषाय । तर्हि किमित्यात्मानं निनिन्द? तथाऽपि कामनानिन्दा ध्रुवेण सुकृता बत । भगवन्मार्गगामिनां सामान्यत इतरकामना निन्द्येति लोकशिक्षार्थम् । ७ "यतीनां स्थितिरुत्तमा" इति पाठान्तरम् ।

दैवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक्[1] ।
तप्ये द्वितीयेऽप्यसति भ्रातृभ्रातृव्यहृद्रुजा ॥ ३३ ॥

"द्वितीयस्य स्वतन्त्रस्य त्वभावाद् द्वयवर्जितः । [2]ईश्वरश्चेशितव्यस्य भावात् स परमेश्वरः" इति हरिवंशेषु ॥ * ॥

तादात्म्यं यच्छतो मौढ्यान्मनो मे भिक्षितं बत[3] ।
ईश्वरात् क्षीणपुण्येन पुलाकानिव चाधनः[4] ॥ ३५ ॥

"[5]हरौ नियतचित्तत्वाद् ग्रहवत्[6] तत्प्रवेशनात् । मोक्षं तादात्म्यमित्याहुर्न [7]तद्रूपत्वतः क्वचित्" इति भविष्यत्पर्वणि ।

तच्चित्तैव[8] च तादात्म्यम् । "[9]नैकात्मतां मे स्पृहयन्ति" इत्युक्तत्वात् ।

---

१ भिन्नदृक् अयथार्थदर्शी, नष्टज्ञानी वा । द्वितीये भगवतोऽन्यस्मिन् स्वतन्त्रतयाऽविद्यमानेऽपि भ्रातर्युत्तमे भ्रातृव्यबुद्ध्या शत्रुत्वभ्रान्त्या तप्ये । भगवानेव हि सर्वस्येष्टे । तत् कः कं द्विष्यात् ? द्वेषेऽप्यस्वातन्त्र्यात् । स्वप्ने यथा अनधीन एव स्निह्यति द्वेष्टि च । स्वप्नप्रदर्शयिता भगवान् यथा नियुंक्ते तथा पश्यति । जागरितेऽप्येवम् ।

२ द्वितीयेऽसतीति न सर्वथा द्वितीयाभावः । किन्तु स्वतन्त्रद्वितीयाभाव एव । अत एव "ईश्वरात् क्षीणपुण्येन" इत्युक्तरीशितव्यस्य द्वितीयस्य भावमभ्युपैतीति स्मारयति – ईश्वरश्च । ईश्वर एव द्वितीयो निषिध्यते । नेशितव्योऽपि । अत्र क्वचित् कोशेषु—"ईश्वरस्येशितव्यस्य" इति पठ्यते ।

३ "स्वाराज्यं यच्छतो मौढ्यान्मानो मे भिक्षितो बत" इति प्र० पाठः ।

४ "फलीकारानिवाधनः" इति च । तादात्म्यं मोक्षं यच्छत ईश्वरान्मे मनः क्षुद्रफलमभिक्षत बत । ईश्वराच्चक्रवर्तिनः अधनः पुरुषः क्षुद्रधान्यानीव क्षीणपुण्यतया । "पुलाकस्तुच्छधान्ये स्यात्" इति मेदिनी ।

५ हरौ आत्मा मनो यस्य तस्य भावस्तादात्म्यम् । हरौ नियतचित्तत्वं मोक्षः । एवं हरिं ग्रहवदाप्नोति प्रविशतीति तदात्मा । तस्य भावश्च तादात्म्यं मोक्षः । अथ ग्रहाविष्टस्य शरीरमेव ग्रहस्य भोगायतनं भवति । तथा भगवदङ्गैरेव मुक्ता भोगान् भुञ्जत इति च तदात्मता । तथाह्युक्तम्—"आदत्ते हरिहस्तेन हरिदृष्टयैव पश्यति । गच्छेच्च हरिपादेन मुक्तस्यैषा स्थितिर्भवेत्" इति ।

६ "गृहवत्" इति च पाठान्तरम् । ७ "नतु तद्रूपतः" इति क्वचित् ।

८ तादात्म्यशब्दस्यार्थान्तरमुच्यते – तच्चित्तैव । तस्य चित्तमिव चित्तं यस्य स तच्चित्तः । तच्चित्तैव नियत्या हरिचित्तानुकूलचित्तत्वम् । एतच्च तादात्म्यमित्युच्यते । क्वचित् "हरिचित्तता च तादात्म्यम्" इति पठ्यते ।

९ तादात्म्यमिति सायुज्यमोक्षपरमित्यत्र पूर्वप्रयोगं स्मारयति – नैकात्मताम् । इत्युक्तत्वात् तृतीयस्कन्धे षड्विंशेऽध्याये । "नैकात्म्यताम्" इति पाठान्तरम् ।

"[1]हरीच्छितेच्छुतैकात्मता[2] तु नैकस्वरूपता" इति च । "कामेन[3] मे काम आगात्" इति च श्रुतिः ॥ * ॥

[4]लाळयमानं जनैरेवं ध्रुवं सभ्रातरं नृपः ।
आरोप्य करिणीं[5] हृष्टः स्तूयमानोऽविशत् पुरम् ॥ ५३ ॥

"[6]कळभश्चैव कन्यानां करिणी बालमङ्गले[7]" इति राजनीतौ ॥ * ॥

इति चतुर्थस्कन्धे नवमोऽध्यायः[8]

---

[9]निमित्तमात्रं तत्राऽत्मा निर्गुणः पुरुषर्षभे[10] ।
व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥ ४७ ॥

---

१ ननु तत्राप्यैकात्म्यमित्यभेद एव किं नार्थः स्यात्? न स्यात् । भविष्यत्पर्वणि स्फुटमन्यथा व्याख्यानादित्याह – हरीच्छितेत्यादि ।

२ "–तैकात्म्यं न तेनैकस्वरूपता" इति प्र. पाठः । "–तैकात्मता तु नैव स्वरूपता" इति क्वचित् ।

३ "कामेन मे काम आगाद्धृदयाद्धृदयं मृत्योः । यदमीषामदः प्रियं तदैतूप मामभि" इति समग्रा श्रुतिः । "मृत्योः संहारकस्य भगवतः कामानुकूल्येन मे कामः विषयान् प्रत्यागच्छेत् । अमीषां भगवद्रूपाणां यत् प्रियं तत्प्रियत्वेन मामभ्युपैतु" इति नारायणपण्डिताचार्याः । "अमीषामिति बहुवचनं बहुमानार्थम् । यस्य मृत्योः सर्वसंहर्तुः परमेश्वरस्य कामेनाऽगान्मे कामो यस्यैव हृदयान्मे हृदयमागात् अमुष्य परमेश्वरस्य यददः प्रियं तन्मामभ्युपैतु इति संसारदशायां प्रार्थ्यमानत्वात् परमेश्वरेण मुक्तौ जीवस्य ऐकमत्यं सिद्धयति" इति पद्मनाभतीर्थाः ।

४ "लाल्यमानम्" इति प्र. पाठः ।

५ "करिणम्" इति पठन् वीरराघवो भ्रान्तः ।

६ "कलभश्चैव" इति प्र. पाठः ।

७ "राजमङ्गले" इति क्वचित् पाठः प्रामादिकः ।

८ प्रचलितभाष्यपाठानुसारेणात्र दशमोऽध्यायः । क्वचित् कोशेषु च तथा ।

९ श्रीधरीयादिरीत्या दशमेऽध्याये त्रिंशच्छ्लोकाः । ततः परमेकादशोऽध्यायः । तद्रीत्या चायमेकादशाध्यायस्य सप्तदशः श्लोकः । उपरितनश्च द्वाविंशः ।

१० "तत्राऽसीन्निर्गुणः पुरुषोत्तमः" इति प्र. पाठः । त्रिगुणातीतः परमात्मा तत्र सृष्ट्यादौ निमित्तमात्रम् । नतूपादानमपि । नाप्यधिष्ठानम् । यस्मिन् निमित्ते सतीदं स्वयं स्पन्दितुमप्यशक्यं विश्वं भ्रमति प्रवर्तते । यथाऽयस्कान्ते निमित्ते सति लोहः खर्बं प्रवर्तते । अयस्कान्तः स्वयमचलन् स्थित एव खर्बं चालयति । एवं भगवतोऽप्यनायासः सृष्टिकर्मणि ।

केचित् कर्म वदन्त्येनं स्वभावमपरे नृप ।
एके कालं परे दैवं पुंसः काममुतापरे[1] ॥ ५२ ॥

"हरिरक्लिष्टकारि[2]त्वादयस्कान्तवदुच्यते । कामकर्मस्वभावेषु काले चावस्थितो हरिः । सर्वकारणभूतः[3] संस्तत्तन्नाम्नाऽभिधीयते" इति सत्यसंहितायाम ॥ * ॥

इति चतुर्थस्कन्धे दशमोऽध्यायः[4]

अहं त्वमित्यपार्था धीरज्ञानात् पुरुषस्य हि ।
स्वाप्नीवा[5]ऽभात्यनुध्यानाद् यया बन्धविपर्ययः[6] ॥ ४ ॥

परमेश्वरं विनाऽहं त्वं कर्तेति भ्रान्तिः ।

"नाहं कर्ता न कर्ता त्वं कर्ता यस्तु सदा प्रभुः" इसि मोक्षधर्मे । विपर्ययो दुःखादिः सुखादिरूपस्य ॥ * ॥

---

१ केचित् कर्म कारणं वदन्ति । "कर्मैव देहं दैविकं मानुषं वाऽप्यन्वारभेन्नापरस्तत्र हेतुः" इति हि श्रुतिः । स्वभावत एव जायते न कारणान्तरात् इत्यपरे । "अकस्माद्धीदमाविरासीत्" इति श्रुतिः । एके कालं वदन्ति । "कालात् प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः" इति श्रवणात् । परे दैवम्, ब्रह्मादिकमवरदेवतामिति यावत् । "विरिञ्चो वा इदं सर्वं विरेचयति विदधाति ब्रह्मा वाव विरिञ्चः", "प्राणादिदमाविरासीत् प्राणो धत्ते प्राणे लयमभ्युपैति" इत्यादि श्रुतेः । पुरुषस्य काममपरे । "कामोऽकार्षित् कामः करोति कामः कर्ता कामः कारयिता" इत्यादिका श्रुतिः । दैवमिति ग्रहादिकं वा, अदृष्टं वा । यन्मौहूर्तिका वदन्ति । ज्ञानिनस्त्वेतैः शब्दैरेषु स्थितं नारायणमेव कारणं वदन्ति । अज्ञानिनस्तु कर्तृत्वं कर्मादिषु भ्रमन्ति ।

२ "–रक्लिष्टकर्तृत्वा–" इति, "–रक्लिष्टकर्मत्वा–" इति च क्वचित् ।

३ "–भूतस्थस्तत्त–" इति, क्वचित् । अस्वरसोऽर्थः ।

४ प्रचलितभाष्यपाठेऽत्र एकादशोऽध्यायः । क्वचित् कोशेषु च तथा ।

५ "स्वाप्नीव भात्यनु–" इति क्वचित् ।

६ "भात्यतद्ध्यानाद् यया बन्धविपर्ययौ" इत्यर्वाचीनः पाठः । चित्सुखोऽपि "अनुध्यानात्" इत्येव पाठमाह । अहं हननकर्ता त्वं च वध्य इत्यपार्था धीः भगवतः कर्तृत्वाज्ञानादेव भवति । यथा स्वप्ने जाग्रत्त्वधीः । "स्वाप्नीवापार्थाऽऽभातीत्यनेन दृष्टान्तेन धियो बाधितविषयत्वं विवक्षितम् । विषयस्यापि बाधो नाम तत्र वृत्तिप्रतिबन्ध एव । नत्वसत्यत्वम् । दृष्टान्तदार्ष्टान्तिकयोरुभयोरपि पारमार्थ्यात्" इति वीरराघवः । यया स्वस्मिन् कर्तृत्वबुद्ध्या अनुध्यानात् पुनःपुनरनुसन्धानात्, यस्या अनुध्यानादिति यावत् । देहबन्धः तेन च विपर्ययः सुखज्ञानादिरूपस्य दुःखाज्ञानदिर्भवति ।

भजस्व भजनीयाङ्घ्रिमभवाय भवच्छिदम् ।
युक्तं विरहितं शक्त्या गुणमय्याऽऽत्ममायया ॥ ३ ॥

[1]आत्मसामर्थ्याख्यया शक्त्या युक्तम् । गुणमय्या विरहितम् ॥ * ॥

वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौत्तानपदेऽविशङ्कितः ।
[2]वरं वरार्होऽम्बुजनाभपादयो[3]र्निरन्तरं त्वा वयमङ्ग शुश्रुम[4] ॥ ७ ॥

निरन्तरं भगवत्पादमनसम्[5] ॥ * ॥

अथायजत यज्ञेशं क्रतुभिर्भूरिदक्षिणैः ।
द्रव्यक्रियादेवतानां कर्माकर्मफलप्रदम्[6] ॥ १० ॥

[7]द्रव्यक्रियादेवतानां विषयम् । अकर्मफलप्रदं मोक्षदम्[8] ॥ * ॥

सर्वात्मन्यच्युते सर्वे तीव्रौघां भक्तिमुद्वहन् ।

---

१ आत्माधीनया मायाख्यया बन्धकशक्त्या तु विरहितम् । एवं त्रिगुणमय्या शक्त्या विरहितम् । ज्ञानानन्दादि-गुणमय्या युक्तमिति च सूचितम् । जीवगोस्वामी चाऽह–"शक्त्या स्वरूपभूतया मुख्यशक्त्या युक्तम् । त्रिगुणमय्या स्वात्माधीनमायया विरहितम् । स्वाश्रययाऽपि तया न स्पृष्टम्" इति ।

२ "वरार्हणोऽस्यम्बुज–" इति क्वचित् ।

३ "पादयोरनन्तरं त्वां वयमङ्ग" इति प्र· पाठः । हे औत्तानपदे–औत्तानपादे, निरन्तरं निरन्तरचित्तम् ।

४ यद्यपि प्राचीनकोशे "शुश्रुमः" इति पठ्यते । औचित्यं चिन्त्यम् ।

५ "भगवत्पादमानसम्" इति प्र.पाठः । "भगवत्पादमनसा" इति च । नैरन्तर्यमत्र न दैहिकं किन्तु मानस-मिति निरन्तरमित्यस्य निरन्तरमनसमित्यर्थः सम्पद्यते । तस्य चान्वयद्योतनाय भगवत्पादमनसमित्यभाणि भगव-त्पादेन ।

६ "कर्म कर्मफलप्रदम्" इत्यर्वाचीनः पाठः ।

७ आज्यादि द्रव्यं याङ्क्रामपि देवतामुद्दिश्य दद्यात् । अयमेव तस्य विषयः । अयमेवान्ततस्तत् स्वीकरोति सर्व-यज्ञभुक्त्वादित्यर्थः । "द्रव्यक्रियादेवतानां द्रव्याद्यात्मकस्य यज्ञस्य" इति जीवगोस्वामी । "कर्म साध्यं आराध्यम्" इति वीरराघवः ।

८ "मोक्षफलप्रदम्" इति प्र. पाठः । "मोक्षप्रदम्" इति च । अकर्मसाध्यत्वादकर्मफलं मोक्षः । "न कर्मणा न प्रजया" इत्यादिश्रुतेः । अथापि भगवदर्पणबुद्ध्या कृतेन कर्मणा प्रसन्नो भगवान् ज्ञानं प्रदायान्ततः अकर्मसाध्यं मोक्षमपि प्रददाति । तेन केवलकर्मणा न मोक्ष इत्यकर्मफलं मोक्षः । अकर्माख्यं मोक्षाख्यं फलमिति वा ।

दर्दशाऽत्मनि भूतेषु तमेवावस्थितं विभुम्[१] ॥ १४ ॥

"विश्वः पूर्णस्तथा सर्वः समस्तश्चाभिधीयते" इत्यभिधानम् ॥ * ॥

मन्यमान इदं विश्वं मायारचितमात्मनि[२] ।
अविद्यारचितस्वप्नगन्धर्वनगरोपमम् ॥ १५ ॥

"अन्यथात्वात् क्षिप्रनाशाज्जगत् स्वप्नादिवत् स्मृतम् । वर्तमानं नियत्यैव सदैव परमात्मनि" इति वाराहे[३] । "महामायेत्यविद्येति नियतिर्मोहनीति[४] च । प्रकृतिर्वासनेत्येवं[५] तवेच्छाऽनन्त कथ्यते" इति स्कान्दे ॥ *

[६]तस्यां विशुद्धकरणः शिववार्विगाह्य
[७]बद्धासनो जितमरुन्मनइन्द्रियार्थः ।
स्थूले दधार भगवत्प्रतिरूप एतद्
ध्यायंस्तदप्यवहितो[८] व्यसृजत् समाधौ[९] ॥ १७ ॥

---

१ सर्वान्तर्यामिणि, तथा सर्वे परिपूर्णे च । "सर्वः शर्वः शिवः स्थाणुः" इति भगवन्नामत्वात् सर्वनामत्वाभावः । तेन सर्वस्मिन्निति न भवति । आत्मनि देहे मनसि स्वस्मिंश्च बिम्बभूतम् । बहिश्च तमेव भूतेषु विभुम् । "सर्वेषामात्मनि अन्तः प्रविश्य प्रशासनेन धारके अत एव सर्वे सर्वशब्दवाच्ये" इति वीरराघवः । 'सर्वात्मनि अथचासर्वे सर्वव्यतिरिक्तस्वरूपे" इति विश्वनाथः । "सर्वं समाप्नोषि ततोऽसि सर्वः" इति च गीतासु ।

२ परमात्मन्याधारे स्थितं देहगेहादिकं विश्वं भगवदिच्छया निर्मितम् । अत एव भगवदिच्छानिर्मितस्वप्नवत् गन्धर्वनगरवच्च विपरिणामि नश्वरं च मन्यमानः ।

३ "इति च ।" इति क्वचित् पाठः प्रामादिकः ।

४ "नियतिर्मोहिनीति च" इति प्र. पाठः । "अ इत्युक्तो हरिस्तस्य विद्याऽविद्येति संज्ञिता । मायेत्युक्ता प्रकृष्टत्वात् प्रकृष्टं हि मयाभिधम्" इति च मायाविद्यापदनिर्वचनम् । प्रकृष्टत्वात् हरिर्मयः । तस्येयं माया वा ।

५ "वासनेत्येव" इति क्वचित् ।

६ "तस्या विरुद्ध-" इति पाठान्तरम् ।

७ "बद्ध्वाऽऽसनं जितमरुन्मनसाऽऽहृताक्षः" इति प्र. पाठः ।

८ "-दव्यवहितो-" इति च ।

९ "विसृजन् समाधौ" इति च पाठन्तरम् । तस्यां बदर्यां गाङ्गं मङ्गलजलं विगाह्य इति देहशुद्धिः । विशुद्धकरण इतीन्द्रियशुद्धिः । यमनियमाभ्यां विशुद्धकरणः । बद्धासन इति तृतीयं योगाङ्गम् । जितमरुदिति चतुर्थं प्राणायामाख्यम् । मनस इन्द्रियाणां चार्थो जितो येनेति विषयेभ्यः प्रत्याहाररूपं पञ्चमम् । स्थूले दधारेति धारणामाह । एतत् स्थूलमेव रूपं ध्यायन् निरन्तरं स्मरन्निति ध्यानम् । क्रमेण अवहितः सूक्ष्मे स्वबिम्बरूप एकाग्रतया निहितमनाः समाधौ स्थूलं रूपमपि व्यसृजत् । स्वबिम्बभूतं भगवद्रूपं विहायान्यत् किमपि न विजज्ञावित्यष्टाङ्गो योगोऽभिहितः ।

स्थूले पाताळादिके[१] शिलावत् प्रतिरूपे[२]।

"शिलावत् प्रतिमैषा हि विष्णोर्लोकचतुर्दशी" इति च ॥ * ॥

सुदुर्जयं विष्णुपदं जितं त्वया यत् सूरयोऽप्राप्य विचक्षते परम्[३] ।
आतिष्ठ तच्चन्द्रदिवाकरादयो ग्रहर्क्षताराः परियन्ति दक्षिणम् ॥ २५ ॥

अनास्थितं ते पितृभिरन्यैरप्यङ्ग कर्हिचित् ।
आतिष्ठ जगतां वन्द्यं तद् विष्णोः परमं पदम् ॥ २६ ॥

"शिंशुमारो[४] ध्रुवश्चैव संस्थितौ[५] यत्पुरे सदा । तत् पश्यन्ति न यान्त्यन्ये लोकं यान्ति सुरान् विना[६]" इति च ॥ * ॥

श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः[७] ।
नेच्छंस्तत्राऽऽत्मनाऽऽत्मानं सन्तुष्ट इति सिद्ध्यति ॥ ४२ ॥

मनसा परमात्मानं प्रति सन्तुष्टः ॥ * ॥

इति चतुर्थस्कन्धे एकादशोऽध्यायः[८]

---

१ "पाताळादिके" इति प्र. पाठः। २ "प्रतिमारुपे" इति पाठान्तरम् ।

३ यत् पदं सप्तर्षिप्रभृतयोऽपि सूरयः केवलं दूराद् विचक्षते पश्यन्ति, न प्राप्नुवन्ति । यच्च पदं चन्द्रादयो ग्रहाः, अश्विन्याद्यास्तारा अन्यानि च नक्षत्राणि प्रदक्षिणं परियन्ति तदातिष्ठ प्राप्नुहि ।

४ "शैंशुमारो-" इति क्वचिन्मुद्रितः पाठः। ५ "संस्थितो-" इति क्वचित् ।

६ तत्र तावद् द्वे स्थाने । ध्रुवलोकः ध्रुवपुरमिति । तत्र ध्रुवलोके यत्र शिंशुमारो भगवान् ध्रुवश्च वसतस्तद् ध्रुवपुरम् । तत् केवलमन्ये ऋषयो दूरतः पश्यन्ति । न यान्ति । ध्रुवलोकं तु अन्ये केचनर्षयोऽपि यान्ति । सोऽयं नियमः सुरान् विनैव । तेषां ध्रुवपुरगमनेऽपि न प्रतिबन्धः । तथा च "सूरयोऽप्राप्य विचक्षते" इति 'अन्यैरनास्थितम्' इति च देवेभ्योऽन्यविषयम् । ध्रुवपुरविषयं च । ध्रुवलोकं तु ज्ञानिनोऽपि केचन गच्छन्तीति भावः।

७ गङ्गाजनकपादस्तीर्थपादः । तत्पदाश्रयः ध्रुवस्य चरितं श्रद्दधानाय श्रावयेत् । तत्र श्रावणकर्मणि नेच्छन् प्रतिफलमनपेक्षमाणः । यतः सन्तुष्टिरेव महत् फलम् ।

८ प्र. पाठेऽत्र द्वादशोऽध्यायः । क्वचिन् कोशेषु च तथा ।

अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः ।
स्वरूपमवरुन्धानो नान्यदस्मात् तदैक्षत[1] ॥ ९ ॥

स्वरूपं जीवस्य बिम्बरूपं परमात्मानम् ।

"भिन्नस्वरूपमभिदं स्वरूपं तु द्विधा हरेः । भिन्नस्वरूपं ब्रह्माद्या[2] मत्स्याद्यभिदमुच्यते" इति गारुडे ॥ * ॥

मत्वा तं जडमुन्मत्तं कुलवृद्धाः समन्त्रिणः ।
वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतम्[3] ॥ ११ ॥

"कल्पः कल्पाभिमानी सञ्छिशुमारानुगः स्थितः । वत्सरो राज्यमकरोत् पित्रा दत्तं महाबलः" इति ब्राह्मे[5] । "चक्रे नारायणः साक्षात् किंस्तुघ्नः[6] कल्पमात्मजम्" इति पाद्मे ॥ * ॥

---

१ "नाऽत्मनोऽन्यं तदैक्षत" इति प्र. पाठः । अव्यवच्छिन्नो निरन्तरो यो भगवति मनोयोगः ज्ञानयोगो वा स एवाग्निः तेन दग्धमनिष्टकर्माख्यं मलं यस्य तादृगाशयोऽन्तःकरणं यस्य तथा । एवम्भूतो ध्रुवपुत्र उत्कलः स्वं स्वीयं रूपं बिम्बरूपं परमात्मानं अवरुन्धानः साक्षात्कुर्वन्, तदा तस्मिन् समाधिक्षणे उपरतबाह्यव्यापारतयाः ततोऽन्यत् किमपि नापश्यत् । तस्मादन्यत् स्वतन्त्रसत् किमपि नापश्यदिति वा । अत्र शुकदेवोऽप्याह–"अंशांशिनो ब्रह्मजीवयोः स्वरूपेण भिन्नत्वेऽपि अंशस्यांशिनिरपेक्षस्थित्याद्यभावात् तदभिन्नं ददर्शेत्यर्थः" इति ।

२ "ब्रह्मादि" इति क्वचित् । ब्रह्मादयो भगवत्स्वरूपभूता इति पुराणेषु पठ्यते । तदिदं भिन्नं स्वरूपम् । तद्भिन्नाः तत्प्रतिबिम्बभूताश्चेत्यर्थः । मत्स्याद्या अपि तथोच्यन्ते । तदिदमभिन्नं स्वरूपम् । मत्स्याद्या भगवद्रूपा एवेति । तथा च जीवेशयोर्यत्र स्वरूपत्वमुच्यते तत् बिम्बप्रतिबिभावरूपं भिन्नं स्वरूपम् । तथा प्रकृतेऽपि उत्कलख्यस्य जीवस्य स्वरूपं नाम भिन्नं बिम्बरूपमेवेत्यर्थः ।

३ "भ्रमेः सुतम्" इति प्र॰ पाठः । ज्येष्ठभार्या सुतः उत्कलः । स तु राज्यं नैच्छत् । ध्रुवस्य द्वितीया भार्या भ्रमिः । या प्रजापतेः भगवतः शिंशुमारस्य दुहिता । तस्यामपि द्वौ सुतौ कल्पो वत्सरश्चेति । तत्र कनीयांसं वत्सरं भूपतिं चक्रुः ।

४ ननु ज्यायसि कल्पे स्थिते कथं वत्सरं भूपतिं चक्रुः? आह– कल्पः । स तु राज्यान्निर्विण्णः स्वमातामहं भगवन्तं शिंशुमारमेवानुससार । तेन च कल्पाभिमानितामवापेत्यर्थः । ततश्चावशिष्टो यविष्ठो वत्सरो राज्यमकरोत् ।

५ "इति च ब्राह्मे" इति क्वचित् ।

६ अत्र कोशेषु महान् पाठभेदः । "किंस्तुब्धः" इति क्वचित् । "किंस्निग्धः" इत्यन्यत्र । "किंस्तुघ्नः" इति च क्वचित् । न क्वाप्यैकमत्यम् । मूलपाठनिर्णयस्तु दुःशकप्रायः । तेन सर्वानुमतः सर्वत्र प्रथितश्च "किंस्तुघ्नः" इति पाठ एव स्वीकृतः । प्रसिद्धो हि भगवान् शिंशुमारः किंस्तुघ्ननाम्ना । किंस्तुघ्नो भगवान् ध्रुवपुत्रं कल्पमात्मजत्वेन स्वीचक्रे, कल्पाभिमानितां च ददाविति प्रमाणवचनमथितार्थः ।

नरदेवेह [1]भवता नाघं किञ्चनाऽस्थितम् ।
अस्त्येकं प्राक्तनमघं[2] यदिहेदृक् त्वमप्रजः ॥ ३१ ॥

तथा साधय भद्रं त आत्मानं सप्रजं[3] नृप ।
इष्टस्ते पुत्रकामस्य[4] पुत्रं दास्यति यज्ञभुक् ॥ ३२ ॥

[5]तथा स्वभागधेयानि ग्रहीष्यन्ति दिवौकसः ।
यद् यज्ञपुरुषः साक्षदपत्याय हरिर्वृतः ॥ ३३ ॥

"अनपत्योऽपि सद्धर्मा [6]लोकजिन्नात्र संशयः । देवैस्तु पृथुजन्मार्थे हविरङ्गस्य नो हृतम् । अनपत्यत्वकर्माऽसौ बालहत्याकृतेः[7] पुरा । अतो दुष्टोऽभवत् पुत्र इष्टो विष्णुरतः[8] पृथुः" इति वामने ॥ * ॥

स बाल एव पुरुषो मातामहमनुव्रतः ।
अधर्मांशोद्भवं मृत्युं तेनाभवदधार्मिकः ॥ ३९ ॥

स शरासनमुद्यम्य मृगयुर्वनगोचरः ।
हन्त्यसाधून् मृगान् दीनान् वेनोऽसावित्यरौज्जनः ॥ ४० ॥

"मृत्युर्देवो यमभ्राता वेनमातामहोऽसुरः । पीडां वेनेति च प्राहुर्वेनोऽसौ पीडनादभूत्[10]" इति च ॥ * ॥

इति चतुर्थस्कन्धे द्वादशोऽध्यायः[11]

---

१ "भवतो नाघं तावन्मनाक् स्थितम्" इति प्र. पाठः ।

२ "प्राक्तनावद्यम्" इति चित्सुखादिसम्मतं प्राचीनं पाठान्तरम् । यदिह जन्मनि ईदृगपापोऽपि भवान् अप्रजस्तेन तन्निमित्तं किंचित् जन्मान्तरीयमवद्यमस्तीति निश्चीयेत । ३ "सुप्रजम्" इति प्र. पाठः ।

४ पुत्रकामस्य ते पुत्रकामेन त्वयेष्टः । "चतुर्थ्यु षष्ठी" इति पूर्वमुक्तम् ।

५ "यथा" इति पाठान्तरम् । भागधेयानि हविर्भागान् । अपत्यायापत्यवत्त्वाय ।

६ "सद्धर्मात्" इति क्वचित् ।

७ "बालहत्या कृता पुरा" इति प्र. पाठः । "बालहत्याकृते पुरा" इति क्वचित् । अनपत्यत्वहेतुभूतकर्मा चायमासीत् । पुरा जन्मनि बालहत्याकरणात् । अतो बालहत्याकरणादेव दुष्टः पुत्रोऽभवत् । यतो विष्णुरिष्टः अतः पृथुः सज्जीवोपि तद्देहगोऽभवत् । यमृषयोऽन्ते तद्देहादमथ्नन् । ८ "विष्णुं ततः पृथुः" इति क्वचित् ।

९ मृत्युरिति द्वे उच्येते । एको देवो यमभ्राता । अपरोऽसुरो वेनमातामहः । अत एव देवताव्यावृत्तये "अधर्मांशोद्भवम्" इति मूले विशेषणम् । १० वेनयति पीडयतीति वेनः ।

११ प्र. पाठेऽत्र त्रयोदशोऽध्यायः । क्वचित् कोशेषु च तथा ।

तं सर्वलोकामरयज्ञसङ्ग्रहं त्रयीमयं द्रव्यमयं तपोमयम् ।
यज्ञैर्विचित्रैर्यजतो भवाय ते राजन् स्वदेशाननुरोद्धुमर्हसि[1] ॥ ५१ ॥

लोकादीन्[2] सङ्गृह्णातीति तत्सङ्ग्रहः ।

"सर्वस्य ग्रहणाद् विष्णुः सर्वसङ्ग्रह उच्यते । वेदस्य तद्व्यक्तत्वात् प्राधान्यं तत् त्रयीमयः[3] । सर्वं तद्विषयत्वेन मुख्यं सर्वमयस्ततः" इति स्कान्दे ॥ * ॥

यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः ।
स्विष्टाः सुतुष्टाः प्रदिशन्ति वाञ्छितं तद्धेळनं नार्हसि वीर चेष्टितुम्[4] ॥२२॥

"विष्णोः सन्निहितत्वात्तु सर्वदेवा[5] हरेः कलाः" इति च ॥ * ॥

अवजानन्ति ये मूढा[6] नृपरूपिणमीश्वरम् ।
नानुविन्दन्ति ते भद्रमिह लोके परत्र च ॥ २४ ॥

तस्मान्मां कर्मभिर्विप्रा यजध्वं गतमत्सराः ।
बलिं च मह्यं हरत मत्तोऽन्यः कोऽग्रभुक् पुमान्[7] ॥ २२ ॥

"अहं ब्रह्मेति वेनस्तु ध्यायन्नापाधरं तमः । तद्राद्धान्तो महीं व्याप्तो मेर्या ख्यापयतोऽ-

१ सर्वान् लोकान् सर्वान् लोकपालान् देवान् सर्वांश्च तत्प्रापकान् यज्ञान् सङ्गृह्णाति तादृशः। अत्र सङ्ग्रहोनाम नियमनमेव । श्रीधरस्वाम्यादयोऽप्याहुः-"सङ्गृह्णाति नियच्छति" इति। त्रयीमयम् । उत्कृष्टं हि मयाभिधम् । भगवत्प्रतिपादकत्वमेव हि त्रय्या उत्कर्षः। स्वप्रतिपादकस्य वेदत्रयस्योत्कर्षापादकत्वात् स त्रयीमयः। एवं द्रव्ययज्ञस्यापि स्वविषयत्वेनोत्कर्षापादकत्वाद् द्रव्यमयः । द्रव्यं मयं उत्कृष्टं यस्मादिति । तथा स्वविषयतयैव तपोरूपं मानसयज्ञमप्युत्कर्षयतीति तपोमयः । ते भवाय समृद्धये यजतः स्वदेशान् जनाननुवर्तितुमर्हसि ।

२ "सर्वलोकान्" इति प्र. पाठो न स्वरसार्थः ।

३ "तद्व्यक्तकत्वात् प्राधान्यं तु त्रयीमयः" इति प्र. पाठः प्रामादिकः । वेदस्य तद्व्यक्तत्वात् भगवत्प्रदकत्वादित्यर्थः । तत एव च वेदस्य प्राधान्यम् । तत् तस्माद् वेदस्य प्राधान्यप्रदत्वाद् विष्णुस्त्रयीमयः । एवं ततः सर्वस्य मुख्यत्वापादकत्वाद् विष्णुर्द्रव्यतपआदिसर्वमय इत्यर्थः । "वेदस्य-" इत्यादिरेकाक्षरोनः पादः ।

४ युष्मद्विषये भवद्राष्ट्रे । वितायमानेन निरन्तरं क्रियमाणेन । हरेः कला विशेषसन्निधानपात्राणि तस्य सर्वमयस्य विष्णोः हेळनं, तेषां तत्प्रतीकानां देवानां वा हेळनमवज्ञानं नार्हसि वीर कर्तुम् । "तद्धेलनं नार्हसि" इत्यर्वाचीनः पाठः । "-नार्हति" इति केचित् पठन्ति ।

५ "सर्वे देवा-" इति प्र. पाठः ।

६ "अवजानन्त्यमी मूढा-" इत्यर्वाचीनाः ।

७ बलिं पूजां करादिकं वा । अग्रभुक् अग्रेपूज्यः ।

८ मूलेऽव्यक्तमनुक्तं च वेनसम्बद्धं प्रमेयजातं भाष्यकारः प्रमाणान्तरेण सङ्गृह्णाति—अहं ब्रह्मेति ।

निशम् । 'असुरा राक्षसाश्चैव पिशाचास्तत्पथि स्थिताः । भूमौ तत् पृथुना सर्वं[2] निरस्तं महितात्मना[3] । पुनः कलियुगे प्राप्त[4] अष्टाविंशतिमे मनोः । वैवस्वतस्य समये जाताः क्रोधवशा भुवि । ख्यापयन्ति दुरात्मानो मणिमांस्तत्पुरःसरः" इति भविष्यत्पुराणे ॥ * ॥

विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः ।
ममन्थुरूरू तरसा तत्राऽसीद् बाहुको नरः[5] ॥ ४३ ॥

तं तु तेऽवनतं दीनं[6] किं करोमीति वादिनम् ।
निषीदेत्यब्रुवंस्तात स निषादस्ततोऽभवत् ॥ ४४ ॥

तस्य वंश्यास्तु नैषादाः किराता वनगोचराः ।
योऽपाहरज्जायमनो वेनकल्मषमुद्धणम्[7] ॥ ४५ ॥

"त्र्यंशो वेन उद्दिष्टः[8] सत्त्वांशः पृथुतामगात् । रजोंऽशस्त्रिदिवं प्राप[9] निषादस्तामसोऽभवत् । स्वयं वेनश्चतुर्थस्तु महातमसि पातितः" इति कौर्मे[10] । "पापरूपी पृथग्जातो निषादो वेनदेहतः । यस्मात् तस्मात् पृथोः पुत्रात् रजो वेनो दिवं ययौ" इति गारुडे ॥ * ॥

---

१ "आसुरा-" इति प्र. पाठः । २ "तन्मतं पृथुना सर्वम्" इति क्वचित् ।

३ "निरस्तं हि महात्मना" इति च पाठान्तरम् ।

४ "भक्त्या त्वनन्यया शक्य अहमेवंविधः" इत्यादिवच्छान्दसः सन्धिः । प्र. पाठे तु "प्राप्ते अष्टाविंशतिमे" इति विसन्धितयैव पठ्यते । "प्राप्ते त्वष्टाविंशतिमे" इति च क्वचित् पाठान्तरम् ।

५ बाहुक इति वामनाकारो नरः । "अतिह्रस्वाङ्गः" इति हि वक्ष्यति ।

६ "तेऽवनतं दृष्ट्वा" इति क्वचित् । "तेऽवचनं दीनम्" इत्यपि कोशेषु पठ्यते ।

७ "नैषादा गिरिकाननगोचराः । येनाहरज्जायमानो वेनकल्मषमुल्बणम्" इति प्र. पाठः । अर्वाचीनानां मतेचात्र चतुर्दशाध्यायसमाप्तिः ।

८ "त्र्यंशो वेनः समुद्दिष्टः" इति प्र. पाठः । अष्टाक्षरत्वपूरणायार्वाचीनैः कल्पित इति स्फुटमवगम्यते । कुत्रापि कोशेष्वदर्शनात् । प्राचीनपाठे तु त्रियम्बक इतिवत् त्रियंश इति विश्लेषेणोच्चारणम् । भूवादयो धातव इतिवच्च श्लेषप्रसंयोगान् व्यूहेतेति वैदिकच्छान्दोनियमं विजानतां नात्र कश्चित् भ्रान्त्यवसरः ।

९ "प्राप्तो-" इति क्वचित् । "रजोंऽशस्तु दिवं यातो-" इति प्र. पाठः । "रजोंऽशश्च दिवं प्राप" इत्यपि क्वचित् । १० "इति महाकौर्मे" इति क्वचित् ।

'एष विष्णोर्भगवतः कला भुवनपालिनी[2] ।
इयं तु लक्ष्मीः सम्भूतिः पुरुषस्यानपायिनी ॥ ४९ ॥

"पृथुहैहयादयो जीवास्तेष्वाविष्टो हरिः स्वयम् । विशेषावेशतस्तेषु साक्षाद्धर्यंशताव्यचः । [3]किंस्तुघ्नव्यासकपिलवृषभा[4] मत्स्यपूर्वकाः । आकूतिजैतरेयौ च[5] धर्मजद्वयमेव च । धन्वन्तरिर्हयग्रीवो दत्तात्रेयश्च तापसः । स्वयं नारायणस्त्वेते नाणुमात्रविभेदिनः । बलतः स्वरूपतश्चैव गुणैरपि कथञ्चन" इति तत्त्वनिर्णये ॥ "तत्र सन्निहिता श्रीश्च यत्र सन्निहितो हरिः[6] । नास्य सन्निधिमात्रेषु[7] रमा पत्नीत्वमाव्रजेत् । साक्षादेव तु साक्षाच्च हरेः सन्निधितः क्वचित् । गोप्यादिरूपा भवति विपरीतं न तु क्वचित्[8]" इति च ॥ * ॥

इति चतुर्थस्कन्धे त्रयोदशोऽध्यायः[9]

ननु रजोंऽशस्यापि पापमिश्रत्वात् कथं त्रिदिवप्राप्तिः ? आह– पापरूपी । पापांशस्य निषाददेहे गतत्वात् पृथ्वाख्यसात्विकपुत्रपुण्यवशाच्च रजोंऽशो वेनो दिवं ययाविति ।

१ प्र. पाठेऽयं पञ्चदशाध्यायस्य तृतीयः श्लोकः ।

२ "भुवनपावनी" इति क्वचित् । कला सन्निधानभूमिः । लक्ष्मीरित्यपि लक्ष्मीसन्निधानभूमिः ।

३ अत्रापि कोशेषु "किंस्तुब्ध–" इति, "किंस्निग्ध–" इति, "किंस्तुग्ध–" इति बहुप्रकारः पाठभेदः ।

४ "–व्यासऋषभकपिला मत्स्यपूर्वकाः" इति प्र. पाठः । "–व्यासवृषभकपिला–" इति क्वचित् । –व्यासवृषभाः कपिलो मत्स्यपूर्वकाः" इति च क्वचित् ।

५ "आकूतिजैतरी चैव" इति च पाठान्तरम् । तत्पक्षे इतराया अयमैतरिः । ऐतरेय एव ।

६ यत्र यस्मिन् प्रसङ्गे हरिः सन्निहित इति विवक्षा तत्र प्रसङ्गे तत्पत्न्यादौ श्रीरपि सन्निहितैव वक्तव्या । न तु स्वरूपमेव ।

७ "सन्निधिमात्रेण" इति प्र. पाठः ।

८ अयमर्थः – यत्र साक्षादेव कृष्णादिरूपेण भगवानवतीर्णः । तत्र श्रीरपि साक्षाद् रुग्मिण्यादिरूपेण हरेः पत्नीत्वमाव्रजेत् । इयांस्तु विशेषः–यत्र हरिः साक्षादवतीर्णः तत्रैव श्रीरपि साक्षादवतरतीत्येव नियमः । न तु यत्र हरिः साक्षादवतीर्णः तत्र श्रीरपि साक्षादेवावतरतीति । साक्षादवतारमन्तरेण गोप्यादिषु सन्निधिमात्रदर्शनात् साक्षादवतीर्णेऽपि कृष्णे । आदिपदेन नीलाभद्रादिग्रहणम् । एवं तर्हि हरेः साक्षादवतारेऽपि लक्ष्म्याः क्वचित् सन्निधिमात्रवत् हरेः सन्निधिमात्रेऽपि लक्ष्म्याः क्वचित् साक्षादवतार इति विपरीतमपि क्वचित् स्यात्? नेत्याह– विपरीतं न तु क्वचित् । तथाच विष्णोर्यत्र सन्निधानं तत्र लक्ष्म्या अपि सन्निधानमेव । विष्णोर्यत्र च साक्षादवतारस्तत्र लक्ष्म्याः साक्षादवतारोऽपि स्यात्, सन्निधानं वा स्यादिति ।

९ प्रचलितभाष्यपाठानुसारेणात्र चतुर्दशोऽध्यायः । क्वचित् कोशेषु च तथा ।

40

एष साक्षाद्धरेरंशो जातो लोकरिरक्षया ।
[1]इयं च परमा हि श्रीरनुजज्ञेऽनपायिनी ॥ ८ ॥

ब्रह्मा जगद्गुरुर्देवः सहाऽगत्य [2]सुरेश्वरैः ।
वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः ॥ ९ ॥

पादयोररविन्दं च तस्मिन्[3] मेने हरेः कलाम् ।
यस्याप्रतिहतं चक्रमंशः स[4] परमेष्ठिनः ॥ १० ॥

तत्र सन्निहितः साक्षाद् भगवान् –

"ब्रह्मण्यनन्ते गरुडे रुद्रे कामे शचीपतौ । अनिरुद्धे मनौ चैव पृथौ च कृतवीर्यजे । नारदे चैवमाद्येषु विशेषात् सन्निधिर्हरेः । सुदर्शनादिष्वस्त्रेषु तथा[5] सन्निहितो हरिः । नरलक्ष्मणौ बलश्चैव शेषस्यांशाः प्रकीर्तिताः । तथा भरतशत्रुघ्नौ चक्रशङ्खाबुदाहृतौ । प्रद्युम्नश्च कुमारश्च स्कन्दः कामांशजाः स्मृताः" इति स्कान्दे । "वैन्ये पृथौ सन्निहितो राजरूपी जनार्दनः" इति ब्राह्मे ॥ * ॥

इति चतुर्थस्कन्धे चतुर्दशोऽध्यायः[6]

---

१ "इयं च तत्परा हि" इति प्र. पाठः । एष साक्षाद् हरेरंशः । एतस्मिन् साक्षाद् हरेरंशः । एष साक्षाद् विशेषतः हरेरंशः सन्निधानपात्रमिति वा । एवमस्यां च परमा हि श्रीरिति वा, इयं च परमं श्रीसन्निधानपात्रमिति वा योजना । "हरेरंशः आवेशावतारः" इति, "श्रीः लक्ष्मीरियं लक्ष्म्यंशजातेयर्थ." इतिच वीरराघवः । लोकस्य रिरक्षया रिरक्षिषया ।

२ "जगद्गुरुर्देवैः सहाऽसृत्य" इति प्र. पाठः । चिह्नम् चक्ररेखारूपम् ।

३ "तं वै मेने" इति प्र. पाठः । तस्मिन् हरेः कलां हरेः आवेशं मेने ।

४ "–मंशस्य परमेष्ठिनः" इति क्वचित् । अत्रापि परमेष्ठिनो नारायणस्यांशः सन्निधानपात्रम् । अप्रतिहतं रेखान्तरैरसम्भिन्नम् । एतादृशसर्वप्रयोगसङ्ग्रहाय "तत्र सन्निहितः साक्षाद् भगवान्" इति भाष्यवाक्यं प्रवृत्तम् ।

५ "सदा सन्निहितो–" इति क्वचित् । एतेन सुदर्शनादीनां भगवद्विशेषसन्निधानपात्रत्वात् तादृशविशिष्टरेखा अपि भगवदावेशपात्रेषु गात्रेष्वेव दृश्यन्त इत्यपि सूचितम् । तेन "वैन्यस्य दक्षिणे हस्ते" इत्यादि विवृताशयम् ।

६ यद्यपि बहुषु कोशेष्वत्राध्यायसमाप्तिर्न पठ्यते । तत्पक्षे इदं भाष्यवाक्यं उत्तराध्यायगतस्य "अयं तु साक्षाद् भगवांस्त्र्यधीशः" इति पद्यस्यैव व्याख्यानरूपम् । अध्यायभेदपक्षे पूर्वाध्यायगतानां बहुवाक्यानां उत्तराध्यायगतस्य च सकृदेव देहलीदीपन्यायेन व्याख्यानं भवतीति स्वारस्यम् । तेनैकस्मिन्नेव प्राचीनकोशावलम्बिनि पाठे समादृतोऽप्ययमध्यायभेदोऽत्र समादृतः ।

अयं तु साक्षाद् भगवांस्त्र्यधीशः कूटस्थ आत्मा कलयाऽवतीर्णः ।
यस्मिन्नविद्यारचितं निरर्थकं पश्यन्ति नानात्वमिव प्रतीतम्[1] ॥ २० ॥

यल्लोके निरर्थकं तद् भगवद्रूपेषु[2] प्रतीतनानात्वदृष्टान्तेन पश्यन्ति सन्तः ।

"मत्स्यरूपादिनानात्वदृष्टिवद् यन्निरर्थकम्" इतिपाद्मे[3] । "एवंधर्मान् पृथक् पश्यन्" इत्यदि च[4] ॥ * ॥

इति चतुर्थस्कन्धे पञ्चदशोऽध्यायः[5]

ब्राह्मणप्रमुखान् वर्णान् भृत्यामात्यपुरोधसः ।
पौरान् जानपदान् श्रेणीः प्रकृतीः समपूजयत् ॥ २ ॥

"राज्ञा[6] समानवयसः श्रेणयस्त्वङ्गरक्षकाः" इत्यभिधानम्[7] ॥ * ॥

यच्चान्यदपि कृष्णस्य भवान्[8] भगवतः प्रभोः ।
श्रवः सुश्रवसः पुण्यं पूर्वदेहकथाश्रयम् ॥ ६ ॥

पूर्वतनानां कथासम्बद्धं[9] हरेर्यशः ॥ * ॥

---

१ "नानात्वमपि प्रतीतम्" इति प्र. पाठः । अयमित्यस्मिन् साक्षाद् भगवान् कलयाऽवतीर्ण आविष्टः । "अवतीर्णोऽस्मिन् प्रविष्टः" इति जीवगोस्वामी चाऽह । कलया अंशेन । कलया स्वशक्त्या श्रिया सहेति वा । यल्लोके यत्किंचित् शास्त्रविरुद्धं प्रतीतं तद् यस्मिन् भगवति तद्रूपेषु तद्धर्मेषु चेति यावत् प्रतीतं नानात्वं भेदमिव निरर्थकं शास्त्रविरुद्धत्वादेवाविद्यारचितं च पश्यन्ति पण्डिताः ।

२ तद्धर्मेषु चेति योज्यम् । एवं धर्मानित्युत्तरत्र प्रमाणवचनात् ।

३ "–दृष्टवद्यन्निरर्थकमिति च पाद्मे" इति क्वचित् ।

४ "इति च" इति पाठान्तरम् ।

५ प्रचलितभाष्यपाठानुसारेण श्रीधरीयाद्यनुसारेण चात्र षोडशोऽध्यायः ।

६ "राज्ञः" इति क्वचित् । "श्रेणीस्तैलिकताम्बूलिकादीन्" इत्यन्ये ।

७ क्वचित् "इत्यभिधानम्" इति न पठ्यते ।

८ "ब्रह्मन्" इति क्वचित् । भवान् वक्तुमर्हतीत्युत्तरश्लोकेनान्वयः । श्रवो यशः । पूर्वदेहाः पूर्वं धृतदेहाः पुरातनाः सन्त इति यावत् । तेषां कथासम्बद्धम् ।

९ "कथासम्बन्धेन" इति प्र. पाठः ।

नमः परस्मै पुरुषाय मायया[1] विन्यस्तमायातनवे[2]ऽगुणात्मने ।
नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये ॥ २९ ॥

"ब्रह्मादिजीवदेहास्तु मायादेहाः प्रकीर्तिताः" इति वाराहे ॥ * ॥

नूनं तवेशस्य[3] समीहितं जनैस्त्वन्मायया[4] दुर्जययाऽकृतात्मभिः ।
न लक्ष्यते यस्त्वकरोदकारयद् यो नैक एकः[5] परतः स ईश्वरः[6] ॥ ३२ ॥

सः परत ईश्वर इत्याक्षेपः[7] ॥ * ॥

सर्गादि योऽस्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः ।
तस्मै समुन्नद्धविरुद्धशक्तये[8] नमः परस्मै पुरुषाय वेधसे ॥ ३३ ॥

---

१ "पुरुषाय भूयसे" इत्यपि पाठं जीवगोस्वामी उल्लिलेख ।

२ यद्यपि "विन्यस्तनानातनवे" इत्येव सर्वत्र पाठः । प्रचलिते विजयध्वजीये च तथैव व्याख्यातम् । तथाऽपि "–मायातनवे" इति चित्सुखादिसम्मतः प्राचीनपाठ इति अर्वाचीनव्याख्यातृभिरप्यङ्गीकारात् भगत्पादव्याख्यानस्वारस्याच्च स एव पाठोऽत्र स्वीकृतः । तथाचायमर्थः– पृथौ सन्निहितं भगवन्तं विज्ञाय धरा तमेवान्तर्यामिणं प्रसादयति नमः परस्मा इति । मायया स्वेच्छया विन्यस्ता रचिता ब्रह्मादितृणान्तजीवानां मायातनवः, मायेति जडप्रकृतिः, प्राकृतदेहाः येन तस्मै । एतेनाप्राकृतनित्यविग्रहो भगवानेक एवेत्युक्तं भवति । अत एवाप्राकृतत्वादगुणात्मने अथाप्यप्राकृतगुणात्मने । "गुणात्मने सर्वकारणत्वसर्वज्ञत्वसर्वैश्वरत्वादिगुणाश्रयाय" इति शुकदेवः । द्रव्यमिति जडप्रकृतिः । क्रियेत्यदृष्टापादकं कर्म । कारक इति कालः । एते हि संसारविभ्रमं जनयन्ति । परमपुरुषस्तु स्वरूपज्ञानेनैव नित्यनिरस्तद्रव्यक्रियाकारकनिमित्तविभ्रमपरम्परः । जडप्रकृतिवाचिद्रव्यपदं प्राकृतं देहेन्द्रियादिकमपि परामृशति । द्रव्यमिति देहः । क्रिया कर्मेन्द्रियम् । कारकं ज्ञानेन्द्रियमिति च व्याचक्षते । क्रिया इन्द्रियाणि, कारका अभिमानिदेवा इत्यन्ये ।

३ "व्रतेशस्य" इति प्र. पाठः ।

४ "जनैस्तन्मायया" इति च । "जनैः स्वमायया" इति क्वचित् ।

५ "योऽनेक एकः" इति प्र. पाठः ।

६ "परतः स्व ईश्वरः" इति चित्सुखः । "परतश्च ईश्वरः" इत्यर्वाचीनाः । अयमर्थः—दुर्जयया त्वन्माययाऽकृतात्मभिः विभ्रान्तचित्तैः जनैरीशस्य तव चेष्टितं न ज्ञायते । यस्त्वं सर्वमिदमकरोत् । ब्रह्मादिभिरकारयच्च । यस्त्वमेकः सन्नप्यनेकरूपः । "एको नैकः सवः कः किम्" इति सहस्रनामसु । किं स तादृशः ईश्वरः परतः? परत इति परः । किं पर एव कश्चित्? अथ परतो दूरतोऽन्वेष्टव्यः? न परतः । किन्तु पुरत एव दृश्यसे ।

७ यः पुरत एव दृश्यसे स परतः कथं स्या इत्याक्षेपः । "दूराद् दूरतरं यत्तु तदेवान्तिकमन्तिकात्" इत्येतमर्थं चानेन ध्वनयति ।

८ "–निरुद्धशक्तये" इत्यर्वाचीनाः । स्वशक्तिभिः योऽस्य जगतः सृष्ट्यादिकमनुरुणद्धि तत्तदनुसारेण करोति । काभिः शक्तिभिः? द्रव्यक्रियाकारकचेतनात्मभिः । द्रव्यं प्रधानमित्युक्तम् । क्रिया अदृष्टापादकं जीवकर्मेति च ।

"विरुद्धशक्तयो यस्य नित्या युगपदेव च । तस्मै नमो भगवते विष्णवे सर्वजिष्णवे" इति वाराहे[1] ॥ * ॥

इति चतुर्थस्कन्धे षोडशोऽध्यायः[2]

कृत्वा वत्सं सुरगणा इन्द्रं सोममदूदुहन् ।
हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः[3] ॥ १५ ॥

"गुणाः स्वरूपभूताश्च[4] बाह्याश्चेति द्विधा मताः । स्वरूपभूता व्यज्यन्ते हरेर्बाह्यान् दुहुः पयः[5]" इति ब्राह्मे ॥ * ॥

दैतेया दानवा वत्सं प्रह्लादमसुरर्षभम् ।
विधाय दुदुहुः क्षीरमयःपात्रे सुरासवम् ॥ १६ ॥

"[6]प्रतिमन्वन्तरं प्रायः प्रह्लादाद्या बभूविरे" इति च ॥ * ॥

ग्रामान् पुरः पट्टणानि[7] दुर्गाणि विविधानि च ।

करोति गुणक्षोभमिति कालः कारक इति च । चेतना स्वभावः । आत्मा जीवः । एतेन "द्रव्यं कर्म च कालश्च स्वभावो जीव एव च" इति पञ्चकं सृष्ट्यादिबीजं सङ्गृहीतम् । एतद्रूपाभिः स्वाधीनशक्तिभिः । एतद्यामाभिः स्वरूपशक्तिभिश्च । सृष्टिसंहारादिरूपा विरुद्धशक्तयो युगपदेव समुन्नद्धा यस्य तादृशाय ।

१ "इति च" इतीयानेव प्र. पाठः ।

२ प्रचलितभाष्यपाठेऽत्र सप्तदशोऽध्यायः । श्रीधरीयाद्यनुसारेणापि तथा ।

३ सुरगणाः इन्द्रं वत्सं कृत्वा तं पुरतः कृत्वेति यावत् । वीर्यौजोबलादिशुभगुणाख्यं सोमममृतमदूदुहन् । शुभधर्माश्रयं शरीरमेव हिरण्मयपात्रम् । अशुभाश्रयमयःपात्रमित्युत्तरत्र स्फुटम् । हिरण्मयं पात्रं सूर्यमण्डलम् । अयःपात्रं भूमिरिति वा । सौरशक्त्या हि देहे वीर्यादिवृद्धिः । अत्र वीर्यं मनसः, ओज इन्द्रियाणां बलं च दैहिकं दुग्धम् । स्वरूपभूतं च वीर्यादिकं भगवदनुग्रहादेव मोक्षे व्यज्यते न दुह्यत इति भाष्ये स्फुटम् ।

४ "स्वरूपभूतास्तु" इति क्वचित् ।

५ "दुहुः परे" इति प्र. पाठः । दुहुः दुदुहुः "लोपः समाने"

६ वैन्यः स्वायम्भुवमन्वन्तर आसीत् । प्रह्लादस्तु वैवस्वतमन्वन्तरे जनिष्यते । तत्कथं प्रह्लादं वत्सं विधायेत्युच्यते? आह-प्रतिमन्वन्तरम् । तेन स्वायम्भुवमन्वन्तरेऽपि प्रह्लादजनिरासीदित्यवगम्यते ।

७ "पत्तनानि" इति प्र. पाठः । "ग्रामो बहुजनाकीर्णो राजराजाश्रयं पुरम् । जलस्थलायतिस्फीतं पट्टणं परिकीर्तितम्" इत्युक्तं पुरस्तात् ।

घोषान् व्रजान्[१] सशिबिरान् नगरान् खेटखर्पटान्[२] ॥ ३१ ॥

"[३]गोष्ठं घोष इति प्रोक्तो व्रजस्तत्पालसंस्थितिः" इत्यभिधानम् ॥ * ॥

इति चतुर्थस्कन्धे सप्तदशोऽध्यायः[४]

एवं वैन्यसुतः प्रोक्तस्त्वरमाणं विहायसा ।
अन्वद्रवदभिक्रुद्धो रावणं गृध्रराडिव[५] ॥ १६ ॥

सोऽश्वं रूपं च तद् हित्वा [६]तस्मावन्तर्हितः स्वराट् ।
[७]वीरस्तं पशुमादाय पितृयज्ञमुपेयिवान् ॥ १७ ॥

"देवाः शक्ताश्च मोहाय दर्शयेयुरशक्तवत् । ऋषीणां चैव राज्ञां च नहि ते देवतासमाः । आज्ञया वा हरेः क्वापि कार्यतो वा क्वचित्क्वचित्" इति गारुडे । "प्रणिपातादिकं देवैर्ऋष्यादिषु जनार्दने । क्रियतेऽतो न तेषां हि तेजोभङ्गः कथञ्चन । अत्युत्तमानामवरे तेजोभङ्गो न विद्यते । यथा नराणां तिर्यक्षु प्रायः साम्ये हि स स्मृतः" इति स्कान्दे ॥ * ॥

धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु ।
[८]प्रायेणाऽसज्जते भ्रान्त्या पेशलेषु च वाग्मिषु ॥ २५ ॥

---

१ "व्रजांश्च शिबिरान्" इति च पाठान्तरम् ।

२ "सशिबिरानाकरान् खेटखर्वटान्" इति प्र. पाठः । नगरान् नगराणि । "मृगयाजीवनं खेटः" इति चोक्तम् । "वैश्यानामाश्रयो नगरम्" इति विजयध्वजीये । "आदित्यादिवारमुद्दिश्य यत्र वणिजां योगस्तत् खर्वटाख्यं स्थानम्" इति च । "कृषीवलग्रामाः खेटाः । गिरिग्रामाः खर्वटाः" इत्यन्ये ।

३ साम्प्रतं तु व्यत्यासेन व्यवहारो दृश्यते– व्रजो गोष्ठं तत्पालसंस्थितिर्घोष इति ।

४ प्रचलितभाष्यपाठेऽष्टादशोऽध्यायः । श्रीधरीयाद्यनुसारेणापि तथा ।

५ "वारणं मृगराडिव" इति वीरराघवः पठति ।

६ "तस्मा अन्त–" इति प्र. पाठः ।

७ "वीरः स्वपशुमादाय पितुर्यज्ञ–" इति च ।

८ "प्रायेण सज्जते" इति प्र. पाठः । पेशलेषु आपातरमणीयेषु । वाग्मिषु कुतर्कपरिबृंहितशास्त्रजालमुखरेषु ।

"धर्मोपमस्त्वधर्मो य 'उपधर्मः स उच्यते" इति हरिवंशेषु ॥ * ॥

इति चतुर्थस्कन्धेऽष्टादशोऽध्यायः[2]

[3]एकः शुद्धः स्वयञ्ज्योतिर्निर्गुणोऽसौ गुणाश्रयः ।
सर्वगोऽनावृतः साक्षी निरात्माऽऽत्माऽऽत्मनः परः ॥ ७ ॥

[4]देहाद्यपार्थास्तद्धर्मा न स्युस्तद्द्रष्टुरात्मनः ।
कैवल्यं तस्य वै धर्मः सुषुप्तं तन्निदर्शनम् ॥ ८ ॥

"अन्येषामावृतो विष्णुः स्वस्यानावृत एव च । आत्मा सर्वस्य [5]जगतस्तस्याऽत्माऽन्यो न विद्यते । सुषुप्तवच्च निर्दुःखो जाग्रद्वच्च प्रवृत्तिमान् । अनन्यसदृशत्वाच्च केवलोऽसौ हरिः स्मृतः" इति तन्त्रसारे । "आत्मनैवावगम्यत्वाद्धरिरेष सुषुप्तवत्[6] ।

---

१ "-धर्मोऽयमुपधर्मः" इति प्र. पाठः प्रामादिकः ।

२ प्रचलितभाष्यपाठेऽत्र ऊनविंशोऽध्यायः । श्रीधरीयाद्यनुसारेणापि तथा ।

३ "एकमेवाद्वितीयम्", "एको देवः सर्वभूतेषु गूढः", "एको बहूनाम्", "शुद्धमपापविद्धम्", "निर्विशेषोऽक्षरः शुद्धः", "अत्रायं पुरुषः स्वयञ्ज्योतिः", "परं ज्योतिरुपसम्पद्य", "सुवर्णज्योतिः", "केवलो निर्गुणश्च", "निर्गुण गुणभोक्तृ च", "सत्यं ज्ञानमनन्तं ब्रह्म", "विज्ञानमानन्दं ब्रह्म", "गुणाः श्रुताः सुविरुद्धाश्च देवे" "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः", "साक्षी चेता" इत्यादिप्रमाणसिद्धगुणानुवादोऽयम् । अनेन सर्वमावृतं स्वयं त्वनावृतः । "नैनेनानावृतं किंचन" इति श्रुतिः । तात्पर्यविशेषं चाऽचार्यः स्वयमेवाऽह । अयं सर्वस्याऽत्मा अन्तर्यामी । तस्यान्योऽन्तर्यामी नेति स निरात्मा । "एष त आत्माऽन्तर्याम्यमृतः" । अतः स एव मुख्यत आत्मा । "तमेवैकं जानथ आत्मानम्", आत्मा वा अरे द्रष्टव्यः", "अयमात्मा ब्रह्म", "सर्वव्यापी सर्वभूतान्तरात्मा" इत्यादेः । अत एव स जीवात्मनः परः । "चेतनश्चेतनानाम्" इत्यादेः । "निरात्माऽनात्मनः परः" इति च क्वचित् पाठान्तरम् ।

४ अयं श्लोकः श्रीधरादिभिर्न पठ्यते । वीरराघवेण तु "देहाद्युपात्तास्तद्धर्माः" इति किंचिद्व्यत्यासेन पठितः । बन्धकं देहादिकं वा अपार्था देहधर्मा वा तस्य परमात्मनो न स्युः । अथवा देहादीत्यविभक्तिको निर्देशः । देहादयस्तद्धर्मा जीवधर्मास्तस्य न स्युः । अयमेव केवलमेतादृशो नान्य इत्यनन्यसदृशत्वं सर्वविलक्षणत्वं च हि कैवल्यं नाम तस्य धर्मः । सुखकैवल्याच्च केवलः । निर्दुःखानन्दरूपः । सुषुप्तमेव च तद्गमकम्- यं परिष्वक्तो जीवोऽपि सुप्तो केवलानन्दभुक् किमु तदा परमात्मा । एवं सौप्तेनानुभवेन परमात्मनः सुखकैवल्यं सुज्ञेयम् ।

५ "जगतः स्वस्याऽत्माऽन्यो-" इति प्र. पाठः ।

६ "-रेषः सुषुप्तवत्" इति प्र. पाठः प्रामादिकः । "-रेष सुषुप्तिवत्" इति क्वचित् ।

"[1]केवलत्वेन विज्ञेयो [2]मुक्तिस्तद्वददुःखता" इत्यध्यात्मे[3] ॥ * ॥

उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनाम् ।
कूटस्थमिममात्मानं यो वेदाऽप्नोति शोभनम्[4] ॥ १२ ॥

"हरिरक्लिष्टकारित्वादुदासीनवदीरितः[5]" इति च ॥ * ॥

भिन्नस्य लिङ्गस्य गुणप्रवाहं[6] द्रव्यक्रियाकारकचेतनात्मनः ।
[7]दृष्ट्वाऽऽसु सम्पत्सु विपत्सु सूरयो न विक्रियन्ते मयि बद्धसौहृदाः ॥
॥ १३ ॥

"[8]जीवाद् भिन्नस्य मनसो गुणाः सत्त्वादयो मताः । तज्ज्ञात्वा न [illegible]र्नीत स्वस्वरूपं मनस्तथा" इति षाड्गुण्ये ॥ * ॥

स्पृशन्तं पादयोः प्रेम्णा व्रीळितं[9] स्वेन कर्मणा ।
शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह ॥ १९ ॥

"आयासदुःखव्रीळादीन्[10] प्रायशः सुखिनोऽपितु । नियमाद्दृषिभूतेषु मोहायादर्शयन् सुराः" इति ब्रह्मतर्के ॥ * ॥

---

१ "केवलत्वेन स ज्ञेयः" इति क्वचित् ।

२ अदुःखतारूपा मुक्तिश्च तद्वत् केवलानन्दरूपतया केवलत्वेन विज्ञेया । कैवल्यमिति हि मुक्तिनाम ।

३ "इत्याध्याने" इति प्राचीनकोशे पाठान्तरम् ।

४ "सोऽभवम्" इति केचित् पठन्ति । "सोऽभयम्" चित्सुखाभिमतः पाठः । पृथिव्यादिद्रव्यज्ञानेन्द्रिय-कर्मेन्द्रियरूपाणां पदार्थानामध्यक्षमथापि निरीहत्वादक्लिष्टकारित्वाच्चोदासीनमिव स्थितं निर्विकारं परमात्मानं यो वेद स शोभनमाप्नोति । भगवदपरोक्षं तेन च मोक्षम् ।

५ "–दुदासीन इतीर्यते" इति क्वचित् ।

६ "गुणप्रवाहः" इति पाठान्तरम् ।

७ "दृष्टासु" इति च । द्रव्ये देहे क्रियाकारकेषु कर्मेन्द्रियेषु चेतनासु ज्ञानेन्द्रियेषु च व्याततस्य स्वरूपाद्भिन्नस्य लीनमर्थं गमयतीति लिङ्गस्य मनसः सम्बन्धिनं सत्वादिगुणप्रवाहं दृष्ट्वा सूरय आसु लौकिकीषु सम्पत्सु विपत्सु च न विक्रियन्ते ।

८ अत्र "जीवाभिन्नस्य" यत् क्वचित् कोशेषु पठ्यते स लिपिकृत्प्रमाद एव ।

९ "व्रीडितम्" इति प्र. पाठः । पृथुस्थितभगवति प्रेमातिशयेन पृथुपादौ स्पृशन्तम् । स्वकृतेनाश्वापहारादि-कर्मणा व्रीळितमिव चाऽत्मानं दर्शयन्तमिन्द्रं पृथुः प्रेम्णा परिष्वज्य विद्वेषं विससर्ज ह ।

१० "–व्रीडादीन्" इति प्र. पाठः ।

भगवानथ विश्वात्मा पृथुनोपहृतार्हणः ।
[1]समुज्जिहानया भक्त्या गृहीतचरणाम्बुजः ॥ २० ॥

"अपक्वभक्तियुक्ता ये न तेषां [2]विष्णुदर्शनम् । प्रायो भवति दुःखस्य त्वभावः प्रायशो भवेत्" इति प्रकाशसंहितायाम् । "जगत् समस्तं विश्वं च निखिलं पूर्ण-मुच्यते[3]" इत्यभिधानम् ॥ * ॥

[4]जन्तोर्जगत्यां जगदीश वैशसं स्यादेव यत् कर्मणि नः समीहितम् ।
करोषि फल्ग्वप्युरु दीनवत्सलः स्व एव धिष्ण्येऽभिरतस्य किं तया ॥ २९ ॥

"धिष्ण्यं तेजश्च सामर्थ्यं महिमा धाम चोच्यते" इति च[5] ।

अल्पपुण्यत्वान्न[6] मद्भक्तियोग्यस्त्वमिति न वक्तव्यम्[7] । यतः फल्ग्वप्युरु करोषि वात्सल्यात् । विना वात्सल्यं श्रियाऽपि किं तव[8] ? ॥ * ॥

भणन्त्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयम् ।
भवत्पदानुस्मरणादृते सतां निमित्तमन्यद् भगवन् न विद्महे ॥ ३० ॥

अथ अन्यच्च[9] । अतः वात्सल्यादेव ॥ * ॥

यज्ञेश्वरधिया राज्ञा वाग्वित्ताञ्जलिभक्तितः ।
सभाजिता ययुः सर्वे वैकुण्ठानुगतास्ततः ॥ ३७ ॥

---

१ समुज्जिहानया समुद्रिक्तया सम्यक् पक्वयेति यावत् ।

२ "तेषां ब्रह्मदर्शनम्" इति क्वचित् पाठान्तरम् ।

३ एतेन विश्वात्मा पूर्णात्मेति व्याख्यातम् ।

४ "जगज्जनन्याम्" इत्यर्वाचीनाः । "जगज्जगत्याम्" इत्यपरे । "जगत् समस्तम्–" इत्यभिधानवाक्यम-त्राप्यन्वेति । तेन जगदीश परिपूर्णस्वामिन्, जगत्यां त्रिगुणमय्यां प्रकृतावाश्रितस्य जन्तोः परस्परस्पृधा वैशसं कलहादिरूपा हिंसा स्यादेव । किंतु यद् भवत्सपर्याकर्मणि समीहितमिच्छा प्रवृत्तिर्वा तत् फल्ग्वप्युरु करोषि, यतो दीनवत्सलः । अन्यथा स्वे महिम्नि प्रतिष्ठितस्य तव तया पूर्वश्लोकप्रकृतया श्रियाऽपि किं प्रयोजनम्?

५ "इत्यभिधानम्" इति प्र. पाठः । अवक्तव्यमेतत् । पूर्वश्लोक एवाभिधानस्य प्रस्तुतत्वादत्र चकारेणैव चारितार्थ्यात् ।

६ "–त्वान्न भक्ति–"इति क्वचित् ।

७ "–योग्य इति न मन्तव्यम्" इति प्र. पाठः ।

८ "किं तया" इति च ।

९ अथेति पक्षान्तरे । भगवतो भक्तवत्सलत्वे अन्यच्च प्रमाणान्तरमुच्यत इति यावत् ।

41

"भूतेषु हरिरित्येव हर्यर्पणधिया तथा। सर्वभूतेषु च हरेः पूजा कार्याऽऽत्मवेदिभिः" इति पाद्मे ॥ * ॥

इति चतुर्थस्कन्धे एकोनविंशोऽध्यायः[1]

को न्वस्य कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूमिपाः[2] ।
लोकाः सपाला उपजीवन्ति काममद्यापि तन्मे वद कर्म शुद्धम् ॥ १० ॥

"देवेभ्य ऋषयो भूपाश्चोच्यन्ते शक्तिमत्तया। क्वचित्क्वचित् तन्मोहार्थं[3] कादाचित्काच्च हेतुतः" इति नारदीये ॥ * ॥

अस्ति यज्ञपतिर्नाम केषाञ्चिदिह सत्तमाः[4] ।
इहामुत्र च दृश्यन्ते[5] ज्योत्स्नावत्यः क्वचिद् भुवः ॥ २६ ॥

"प्रकाशवद्भुवो देवा मानुषाश्चापि केचन" इति वाराहे ॥ * ॥

राज्यस्वर्गापवर्गाणां प्रायेणैकात्महेतुता ।
दौहित्रादीनृते मृत्योः शोच्यान् धर्मविमोहितान्[6] ॥ २९ ॥

---

१ श्रीधरीयादिरीत्या प्रचलितभाष्यपाठरीत्या चात्र विंशोऽध्यायः।

२ "–मशेषभूपाः" इत्यर्वाचीनाः । यद्विक्रमोच्छिष्टमिति पृथुना विक्रमेण कृतमेवान्ये एकदेशेन कुर्वन्ति। व्यासोच्छिष्टं जगत्सर्वमितिवत् ।

३ "क्वचित्क्वचिन्मोहनार्थम्" इति प्र. पाठः । "क्वचित्क्वचित्तन्मोहाय" इति क्वचित् । कादाचित्को हेतुर्भगवत्सन्निधानविशेषादिरूपः ।

४ "केषाञ्चिदर्हसत्तमाः" इत्यर्वाचीनाः।

५ "लक्ष्यन्ते" इति च । ज्योत्स्नावत्यः ज्ञानप्रकाशविशेषयुक्ताः भुवो देवा मनुष्याश्च इहामुत्र च दृश्यन्ते। तेषां केषांचित् ज्ञानिनां मते यज्ञपतिर्नारायणोऽस्ति हि । किंच "यद्यद् विभूतिमत्–" इत्यादिवचनात् ज्ञानज्योत्स्नाविभूतिमतां देवानां नराणां चास्तित्वमेव नारायणस्यास्तित्वं गमयति।

६ अत्रार्वाचीनाः पूर्वार्धोत्तरार्धे व्यत्यस्य पठन्ति। "वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना" इति च पूर्वार्धं किंचिद् व्यत्यासेन पठन्ति। "प्रायेणैकार्थहेतुना" इति चित्सुखः। राज्यादीनां भगवद्धेतुकत्वं प्रायेण, तन्निमित्तत्वमन्तराऽनुपपत्तेरर्थतोऽवधृतं भवति। मृत्योर्दौहित्र इत्येकदेशान्वयः। मृत्योर्दुहितुः पुत्रो वेनस्तं तदादींश्च धर्मविमोहितानृते तदन्येषां सर्वेषां मते कृत्यमस्ति गदाभृता।

"एकात्मा हरिरुद्दिष्टः प्रधानत्वात् समस्ततः" इति च ।

[1]प्राय इत्यवधारणाक्षेपः—

"प्रायःपदं स्यात् प्राचुर्ये चाऽऽक्षेपात्मावधारणे। अर्थतोऽवधृतिः क्षेपो मुखात्[2] क्षेपोऽवधारणम्" इति च ॥ * ॥

असाविहानेकगुणाध्वरैः पृथक्[3]पृथग्विधद्रव्यगुणक्रियोक्तिभिः ।
सम्पद्यतेऽर्थाशयलिङ्गनामभिर्विशुद्धविज्ञानघनस्वरूपतः[4] ॥ ३३ ॥

सम्पद्यते प्राप्यते ॥ * ॥

प्रधानकालाशयकर्मसङ्ग्रहः[5] शरीरशेषं प्रतिपद्य चेतनः ।
क्रियाफलत्वेन विभुर्विभाव्यते यथाऽनलो दारुषु तद्गुणात्मकः[6] ॥ ३४ ॥

प्रधानादीन् गृहीत्वा जीवं प्राप्य पुण्यकर्मभिर्ज्ञायते । यथा गुणवदिन्धनेऽग्निर्मथनादिना ॥ * ॥

---

१ अर्थानुवादोऽयम् । प्रायेणेत्यर्थः । कोशानुगुण्याय तथा प्रयोगः । अवधारणाक्षेपे प्रयोगो यथा–दिवा न भुङ्क्ते देवदत्तः। अथापि पीवा । तेन प्रायेण रात्रौ भुङ्क्ते ।

२ "मुखाक्षेपो–" इति प्र. पाठः ।

३ "–गुणोऽगुणोऽध्वरः पृथग्विध–" इत्यर्वाचीनाः ।

४ "–घनः स्वरूपतः" इति च पाठान्तरम् । नानाविधं यज्ञद्रव्यं पुरोडाशादि । "श्वेतमालभेत," "अरुणयैकहायन्या" इति श्वेतत्वारुणत्वैकहायनत्वादिर्गुणः । विशिष्टमातापितृजातत्वादिर्वा यज्ञफलनिष्पादकत्वाद् यज्ञसम्बन्धी गुणः । आहुतिक्षेपादिः क्रिया । अग्नये स्वाहेत्यादयो मन्त्राः उक्तयः । पृथग्विधा द्रव्यादयो यत्र तादृशैरध्वरैः असौ भगवानेव सम्पद्यते प्राप्यते । कर्मणा ज्ञानमातनोतीति श्रुतेः । पुनः कीदृशैरध्वरैः? अर्थः पुरुषार्थः-यागसाध्यः स्वर्गादिः । दातृत्वेन तदाश्रया देवा अर्थाशया इत्युच्यन्ते । आशय इत्याश्रये वर्तते । जलाशय इति यथा । यजमनस्यार्थितदाने आशयो मनो येषां त इति वा । तेषां लिङ्गानि हरिहयत्वसप्ताश्वत्वादीनि । नामानि चेन्द्रादीनि येषु तैरध्वरैः । यद्वा अध्वरैः सर्वदेवतानामभिस्तल्लिङ्गैश्च तदन्तर्यामी हरिरेव यज्ञपुरुषः इज्यते प्राप्यते च । उक्तं हि–"यज्ञो वै विष्णुः । तदेवाग्निस्तद्वायुस्तत् सूर्यस्तदु चन्द्रमाः" इत्यादि । कथं सम्पद्यते? विशुद्धविज्ञानघनस्वरूपेण । स्वयमपि ज्ञानानन्दस्वरूपो भूत्वा ज्ञानानन्दमयं भगवन्तं प्राप्नोतीत्येतत् । एतेन "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इत्येतद् विवृतं भवति ।

५ "–शयधर्मसङ्ग्रहे शरीर एष प्रतिपद्य चेतनाम्" इत्यर्वाचीनाः ।

६ प्रधानं प्रकृतिः । आशय इत्यन्तःकरणं स्वभावो वा । एतेन "द्रव्यं कर्म च कालश्च स्वभावः" इति चतुष्टयं सङ्गृहीतम् । "जीव एव च" इत्येतदाह–शरीरशेषम् । प्रधानादीनि सङ्गृह्य शरीरशेषं जीवं प्रतिपद्य चेतनो ज्ञानरूपो भगवान् क्रियाफलप्रदत्वेन विभाव्यते विज्ञायते । यथाऽनलो दारुषु मथनादिना दारुगुणानुगुणमभि-

ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवन्दनात् ।
अवाप लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः ॥ ३७ ॥

हरिरिन्द्रः यच्चरणाभिवन्दनादनपायिनीं लक्ष्मीमवाप सोऽपि विष्णुः ब्राह्मणप्रियः—

"यत्प्रसादेन देवेन्द्रो वेदोदितयशा अभूत् । सोऽपि विष्णुरमेयात्मा सदा ब्राह्मण-वत्सलः" इति हरिवंशेषु ॥ * ॥

पुमान् [1]लभेतानतिवेलमात्मनः [2]प्रसादतोऽत्यन्तशमं स्वतः स्वयम् ।
[3]यन्नित्यसम्बद्धनिषेवया ततः परं किमत्रास्ति सुखं[4] हविर्भुजाम् ॥ ३९ ॥

तस्मात् मोक्षसुखात् परं[5] हविर्भुजां देवानामप्यत्र संसारेऽस्ति किम्? ॥ * ॥

अश्नात्यनन्तः खलु तत्त्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः ।
न वै तथा चेतनया बहिष्कृते हुताशने पारमहंस्यवर्यगुः[6] ॥ ४० ॥

पारमहंस्यवर्या गावो यस्य ॥ * ॥

पुत्रेग जयते लोकानिति सत्यवती श्रुतिः ।
ब्रह्मदण्डहतः पापो यद् वेनोऽत्यतरत् तमः ॥ ४५ ॥

व्यज्यते तथा श्रवणादिलक्षणमथनेन तत्तत्प्रतीकेषु प्रतीकानुगुणगुणवत्तया भगवानभिव्यज्यत इति। शरीरं यस्य शेषभूतं यश्च शरीरे एक एवावशिष्यते स जीवः शरीरशेषः । "घृतमिव पयसि निगूढं भूतेभूते च वसति विज्ञानम् । सततं मन्थयितव्यं मनसा मन्थानभूतेन" इति हि श्रूयते ।

१ "लभेताप्यतिवेल–" इति च पाठान्तरम् । २ "प्रसीदतो—" इत्यर्वाचीनाः ।

३ "यन्नित्यसम्बन्ध–" इति च ।

४ "किमत्रास्ति सुखम्" इति च। यस्मिन् विष्णौ नित्यं सम्बद्धाः, तद्भक्ता इति यावत्, तेषां निषेवया जातात् परमात्मनः प्रसादात्, स्वतः स्वयम्, केवलं स्वरूपभूतमित्यर्थः, अत्यन्तशमं केवलसुखं मोक्षरूपम्, अनतिवेलं विलम्बमन्तरेण पुमान् लभेत । ततस्तादृशान्मोक्षसुखात्परमधिकं सुखं देवानामपि किमत्र संसारेऽस्ति ?

५ "परमं हविर्भुजां देवानामत्र" इति क्वचित् ।

६ "पारमहंस्यवर्यगुः" इत्यर्वाचीनाः । पारमहंस्यं परमहंसकुलम् । तैर्वरणीया गावो वेदवाचो यस्य । ब्राह्मणैस्तत्रापि विशेषतः संन्यासिभिर्वेदवचनैः स्तुत्य इत्यर्थः । इज्यस्य हरेरिज्यानामिन्द्रादीनां वा नामभिः ब्राह्मणमुखे, तत्रापि विशेषतः सन्यासिमुखे श्रद्धाहुतं यथा भगवानश्नाति न तथाऽचेतनेऽग्नौ हुतमिति।

अहो वयं ह्यद्य पवित्रकीर्ते त्वयैव नाथेन मुकुन्दनाथाः।
य उत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथां व्यनंक्षि[1] ॥ ४८ ॥

"[2]अहो वयम्–" इत्यादि तत्स्थपरमेश्वरापेक्षया[3]। "यो ब्रह्म क्षत्रमाविश्य" इति वचनात्[4] ॥ * ॥

"वेनस्थो राजसो जीवः पृथुना[5] स्वर्गतिं गतः। स्वयं तु तम एवाऽप[6] सात्त्विकः पृथुतामगात्" इति ब्रह्माण्डे[7] ॥ * ॥

इति चतुर्थस्कन्धे विंशोऽध्यायः[8]

नैव लक्षयते लोको लोकान् पर्यटतोऽपि तान्[9]।
यथा सर्वदृशं सर्व आत्मानं येऽस्य हेतवः ॥ ९ ॥

"सर्वज्ञाश्च विरिञ्चाद्या न जानीयुर्हरिं परम्। हेतवो जगतोऽप्यस्य यथाऽसौ वेद केशवः" इति तन्त्रसारे ॥ * ॥

---

१ "व्यनक्ति" इत्यर्वाचीनाः। त्वयैव नाथेन वयमन्ततो मुकुन्दनाथा एव जाताः। यत् त्वयि साक्षान्मुकुन्द एव सन्निहितः। यश्च त्वं मुकुन्दकथां व्यञ्जयन् परमभागवतः।

२ प्रचलितपाठे क्वचित् "वेनस्थ–" इत्यादि प्रमाणवचनं पठित्वा ततःपरं "अहो वयम् इत्यादि–" इत्यारभ्य "इति वचनात्" इत्यन्तं भाष्यवाक्यं पठ्यते। यद्यपि मूलश्लोकक्रमेण तदेव स्वरसम्। तथाऽपि पृथोः न साक्षान्मुकुन्दरूपत्वम्, किन्तु तत्र विशेषावेशमात्रम्, तस्य जीवत्वात्। अतः "सात्त्विकः पृथुतामगात्" इति ब्रह्माण्डवचनं सङ्गच्छत इत्यहोवयमितिश्लोकव्याख्यानयुक्तिसमर्पकत्वेनाप्यस्य प्रमाणवचनस्योपयोग इति दर्शयितुं क्रमव्यत्यास इति ज्ञायते।

३ "–परमेश्वररूपापेक्षया" इति प्र. पाठः।

४ "नमो विवृद्धसत्त्वाय पुरुषाय महीयसे। यो ब्रह्म क्षत्रमाविश्य बिभर्तीदं स्वतेजसा" इत्युत्तरश्लोके आवेशस्य स्फुटं वचनात्।

५ "जीवपृथुना" इति प्र. पाठः प्रमाद एव।

६ "एवापि" इति क्वचित्। "स्वयं तत्तम एवाऽप" इति क्वचित्।

७ "पृथुतामगादिति च" इति प्र. पाठः।

८ श्रीधरीयादिरीत्या प्र. भाष्यपाठरीत्या चात्रैकोनविंशोऽध्यायः।

९ "यान्" इत्यर्वाचीनाः। लोकान् पर्यटतोऽपि सर्वजनसमक्षम्, तान् प्रसिद्धानपि भवतः सामस्त्येन लोको न वेद। यथाऽस्य जगतो हेतुभूता अपि सर्वज्ञा अपि ब्रह्मादयः सर्वे देववराः सर्वदृशं परमात्मानं सामस्त्येन न लक्षयन्ते। सनकादीनामतिमहत्तमयोगवैभवप्रकटनार्थमधिकोपमानम्। "ज्ञानी त्वात्मैव मे" इत्युक्तं हि।

व्यक्तमात्मवतामात्मा भगवानात्मभावनः ।
स्वानामनुग्रहायेमां सिद्धरूपी चरत्यजः[१] ॥ १६ ॥

"हरेस्तु प्रतिमाः प्राज्ञास्तत्रस्थः केशवः स्वयम् । ददाति ज्ञानमीशेशः परमात्मा स्वयं प्रभुः[२]" इति च ॥ * ॥

अस्त्येव राजन् भवतो मधुद्विषः पादारविन्देऽस्य गुणानुवादतः[३] ।
[४]रतिः सदा या विधुनोति नैष्ठिकी कामं कषायं मलमन्तरात्मनः ॥ २० ॥

कषणेन[५] गच्छतीति कषायः पापम् । तदुभयमेव मलम् ॥ * ॥

शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सध्र्यग्विमृशेषु[६] हेतुः ।
असङ्ग आत्मव्यतिरिक्त आत्मन्[७] दृढा रतिर्ब्रह्मणि निर्गुणे च या ॥ २१ ॥

हरेर्मुहुस्तत्परकर्णपूरया[८] गुणाभिधानेन विजृम्भमाणया ।
भक्त्या ह्यसङ्गः सदसत्परात्मनि[९] स्यान्निर्गुणे ब्रह्मणि चाञ्जसा रतिः ॥
॥ २५ ॥

---

१ सिद्धाः ज्ञानसिद्धाः रूपं प्रतीकमस्येति सिद्धरूपी । अत एवाऽऽत्मवतां ज्ञानिनामात्मा अतिप्रियः । उक्तं हि "ज्ञानी त्वात्मैव मे मतम्" इति, "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" इति च । "आत्मा परमेश्वरः जिज्ञास्यतया विद्यते येषां तेषामात्माऽऽश्रयः । स्वानामनुग्रहायाऽऽत्मानं भावयति प्रकटयतीत्यात्मभावनः" इति शुकदेवः । २ 'स्वयं विभुः' इति प्र. पाठः ।

३ "पादारविन्दस्य गुणानुवादने" इत्यर्वाचीनाः । "पादारविन्देऽस्य गुणानुवादिनी" इति विजयध्वजीयः पाठ इति भाति ।

४ "रतिर्दुरापा" इत्यर्वाचीनाः । अस्य हरेः गुणानुवादेन जनिता पादारविन्दे रतिः सदा भवतोऽस्त्येव । या नैष्ठिकी सती मनसः कामरूपं कषायरूपं च मलं विधुनोति । कषेण कषणेन अयते अपगच्छतीति कषायः पापम् । यथा निकषपाषाणकषणेन सुवर्णं विशुद्धं भवत्येवं नानाविधसंसारयातनासु कषितपापकिट्टो जीवः परिशुद्धो भवतीत्यर्थः । ५ "कषेण" इति पाठान्तरम् ।

६ "सम्यग्विमृशेषु" इति, "साक्षाद्विमृशेषु" इति च पाठान्तरम् ।

७ "आत्मनि" इत्यर्वाचीनाः । "आत्मव्यतिरिक्तवस्तुनि" इति विजयध्वजीयम् । सम्यग् विचारितेषु शास्त्रेष्वियानेव क्षेमस्य हेतुः सुनिश्चितः–यः परमात्मव्यतिरिक्ते ब्रह्मादितृणान्ते जगत्यसारानित्यतामत्याऽसङ्गोऽरतिः, या च हेयगुणरहिते गुणभरिते च परमात्मनि रतिर्भक्तिरिति । ८ "–कर्णपूरगुणाभिधानेन" इत्यर्वाचीनाः ।

९ "सदसत्यनात्मनि" इति च । हरेर्गुणाभिधानेन पुनःपुनस्तच्छ्रवणेन च विजृम्भमाणया भक्त्या । इयं श्रवणभक्तिरिति स्फुटयति–तत्परकर्णपूरया । हरिपराणां भक्तानां कर्णभूषणभूतया । असङ्गः अन्यत्रेति शेषः । तथा

"रतिः परात्मनि हरावन्यत्रारतिरेव च । पुमर्थसाधनं ज्ञेयं नातोऽन्यन्मुख्यमिष्यते" इति[1] च ॥ * ॥

यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा ।
दहत्यबीजं[2] हृदयं जीवकोशं पञ्चात्मकं योनिमिवोत्थितोऽग्निः ॥ २६ ॥

अबीजं हृदयं[3] बीजहृदयं विना ।

"जीवोपाधिर्द्विधा प्रोक्तः स्वरूपं बाह्यमेव च । बाह्योपाधिर्लयं याति मुक्तावन्यस्य तु स्थितिः । सर्वोपाधिविनाशे हि प्रतिबिम्बः कथं भवेत् । कथं चाऽत्मविनाशाय प्रयत्नः सेत्स्यति क्वचित् । अपुमर्थता च मुक्तेः स्यादभावात् पुंस एव तु । ज्ञानज्ञेयाद्यभावाच्च सर्वथा नोपपद्यते । तस्मादेतन्मतं येषां तमोनिष्ठा हि ते मताः" इति स्कान्दे ॥ * ॥

[4]दग्धाशयो मुक्तसमस्ततद्गुणो नैवाऽत्मनो बहिरन्तर्विचष्टे ।
परात्मनोर्यद् व्यवधानं पुरस्तात् स्वप्ने यथाऽपुरुषस्तद्विनाशे ॥ २७ ॥

दग्धाशयः । बीजाशयनाशे तद्गुणानां ज्ञानादीनामभावान्न किञ्चिद् विचक्षीत । [5]परात्मनोः

सदसदात्मकात् कार्यकारणरूपात् जगतः परस्मिन् परमात्मनि निरतिशया रतिश्च भक्त्या भवति । निर्गुणे ब्रह्मणीति पूर्वं व्याख्यातम् ।

१ प्र. पाठेऽत्र चकारो न पठ्यते ।

२ "दहत्यवीर्यं" इत्यर्वाचीनाः । यदा पुरुष आचार्यवान् भवति । "आचार्यवान् पुरुषो वेद" इति श्रुतेः । गुरुप्रसादजनितज्ञानवैराग्ययोर्वेगेन ब्रह्मणि नैष्ठिकी च रतिर्भवति । तदा अबीजं हृदयं दहति । बीजमिति जीवस्वरूपभूतं मन उच्यते । स्वरूपोपाध्यपगमे स्वस्यैवापगमप्रसङ्गाज्जीवसत्ताबीजं हि तत् । तद्भिन्नं बाह्यं हृदयमन्तःकरणं प्रविलापयति । हृदयमिति लिङ्गशरीरं वा । कीदृशम्? जीवस्य कोशवदावरणभूतं पंचभूतात्मकं च । ननु कथमाश्रयमेव दहति? आह-योनिमिवोत्थितोऽग्निः । योनिमरणिम् ।

३ "अबीजहृदयम्" इति क्वचित् । "निर्बीजहृदयम्" इति च ।

४ दग्धाशयः नष्टस्वरूपोपाधिरेव मुक्त्यवस्थायां जीवो भवतीति यद्यङ्गीक्रियते तदा स्वरूपोपाधिनिमित्तान ज्ञानादीनां समस्तगुणानामपि नाशात् न किंचित्तदा पश्यति काष्ठकुड्यतुल्य इत्यप्यङ्गीकर्तव्यं स्यात् । नच तद्युक्तम् । यतः स्वरूपोपाधिनाशे ज्ञानादितद्गुणनाशे च अपुरुष एव भवेत् । जीवस्वरूपमेव नश्येत् । आत्मनाशरूपमोक्षाय को यतेत मतिमान्? अथापि दुःखाज्ञानबहुलात् संसारात् सुखदुःखोभयानुसन्धानविधुरो मोक्ष एव वरम् । नेत्याह – परात्मनोः । परमात्मजीवयोः यत्पुरस्ताद् व्यवधानमासीत् संसारावस्थायां तदाऽपि स्वप्न इवास्पष्टं किंचिज्ज्ञानमस्ति । नतु सर्वथा ज्ञानाभावः । अतः काष्ठकुड्यतुल्यान्मोक्षादियमेव वरीयसी ।

५ "परमात्मनोः–" इति क्वचित् ।

यदा व्यवधानं संसारावस्थायां तदा स्वप्न इवेत्येतावत् । बीजद्वयनाशे त्वपुरुष एव । आत्मनाश एवेत्यर्थः । अतः संसारावस्थैवोत्तमा स्यात् ।

"भिदा यदि न दृश्येत जीवात्मपरमात्मनोः । मुक्तौ तदा विमोक्षाय को यत्नं कर्तुमर्हति" इति ब्रह्माण्डे । "मग्नस्य हि परेऽज्ञाने किं न[1] दुःखतरं[2] भवेत् । प्रवृत्तिधर्ममेवाहं मन्ये भरतसत्तम" इति मोक्षधर्मे[3] ॥ * ॥

इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतो मनः ।
चेतनां हरते बुद्धेः [4]स्तुम्बस्तोयमिव ह्रदात् ॥ ३० ॥

एवंविधाज्ञानकारणमाह—इन्द्रियैर्विषयाकृष्टैरित्यादि ।

"बहुस्मरणशक्तिस्तु चेतनेत्युच्यते बुधैः" इति शब्दनिर्णये ॥ * ॥

भ्रश्यत्यनु स्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये ।
तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः[5] ॥ ३१ ॥

नातः परतरो लोके पुंसः स्वार्थव्यतिक्रमः ।
[6]यद्यस्त्यन्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ॥ ३२ ॥

[7]अर्थेन्द्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणाम् ।

---

१ "किं नु" इति च । २ "दुःखकरम्" इति प्र. पाठः । ३ "मोक्षधर्मेषु" इति पाठान्तरम् ।

४ "स्तम्बस्तोय-" इत्यर्वाचीनाः । विषयानेव ध्यायतो नरस्य विषयाकृष्टैरिन्द्रियैराक्षिप्तं मनः बुद्धेः चेतनां नानाशास्त्रेषूक्तबहुविधार्थस्मरणशक्तिं हरति तद् यथा स्तुम्बः ह्रदात् तोयं हरति । स्तुम्ब इति जलनिर्गममार्गः 'तूबु' इति भाषायाम् । 'तूम्बु' इति तौळवाः ।

५ चित्तमनु बहुस्मरणशक्तिनाशमनु स्मृतिः विधिनिषेधादिस्मृतिर्नश्यति । तन्नाशे च अस्ति परलोकोऽस्ति भगवानिति भगवत्प्रवणतारूपं भगवत्पक्षपातापरपर्यायमास्तिक्यज्ञानं नश्यति । तं च ज्ञाननाशं आत्मन एव स्वत एव आत्मापह्नवम्, स्वकरत एव स्वनाशमिति यावत्, कवयः प्राहुः । नहि ज्ञानरोधतुल्याऽऽत्महत्या काचिदस्ति । भाष्योदाहृतप्रमाणावगतोऽयमर्थः ।

६ "यदध्यन्यस्य" इत्यर्वाचीनाः । अयमर्थः– स्वव्यतिक्रमात् । ल्यबर्थे पञ्चमी । स्वहितं ज्ञानमार्गमतिक्रम्य आत्मनः परमात्मनः सकाशादन्यस्य देदगेहादेरेव यदि प्रियत्वमभ्युपेयते नातः परतरः स्वार्थनाशः पुरुषस्य विद्यते ।

७ "अथेन्द्रियार्था-" इति विजयध्वजीये । चित्सुखसम्मतश्चायं पाठः ।

[1]स्रंसितो ज्ञानविज्ञानाद् येनाऽविशति मुग्धताम्[2] ॥ ३३ ॥

न कुर्यात् कर्हिचित् सङ्गं तमस्तीव्रं तितीर्षुः[3] ।
धर्मार्थकाममोक्षाणां यदत्यन्तविघातकः[4] ॥ ३४ ॥

"स्वपक्षपातस्त्वभ्यासाद् [5]भोगार्थे व्यापृतस्य तु । भवेत् ततोऽनेकशास्त्रयथार्थस्मरणेशिता । नश्यत्यतः स्मृतेर्नाशाद् भगवत्पक्षपातिता । विनश्येत् तेन चैवास्य[6] भवेज्ज्ञानविपर्ययः । नच ज्ञानविपर्यासादन्यन्नाशकरं क्वचित् । सर्वस्यैतस्य मूलं हि दुष्टसंसर्ग एव तु[7] । दुष्टसङ्गो विरक्तस्याप्यन्यथाज्ञानकारणम् । दुष्टसङ्गाद्धि विष्णोश्च स्वात्मत्वं मन्यते[ऽ]बुधः । अभावं स्वात्मनोऽन्यस्य मुक्तिं चापि निरात्मताम्[8]" इति स्कान्दे[9] ॥ * ॥

[10]"मनोमात्रमिदं विश्वं यथा स्वप्ने मनःक्रियाः[11] ।
क्रिया च वासनामात्रं साऽनीहायां प्रलीयते ॥ ३७ ॥

आत्मा त्वनीहया साक्षात् स्वयञ्ज्योतिः प्रसिद्ध्यति ।
एवं व्युदस्याऽत्ममायां [12]भिदामुपरमेन्मुनिः[13] ॥ ३८ ॥

---

१ "भ्रंशितो-" इत्यर्वाचीनाः

२ "मुख्यताम्" इति च । अर्थो वित्तम् । इन्द्रियार्थं इन्द्रियविषयः शब्दादिर्वित्तनिष्पाद्यः । तदभिध्यानमेव सर्वपुरुषार्थनाशमूलम् । यतो विषयमभिध्यायन् ज्ञानेन विज्ञानेन च हीनः स्वयं मुग्धतां विवेकवैधुर्यं पशुवदाविशति ।

३ "तितीरिषुः" इत्यर्वाचीनाः । वस्तुतस्तु तितीर्षुरित्येव पाठः । छन्दःसौकर्याय संयुक्ताक्षरयोर्विश्लेषेण "तितीर्षुः" इति पठनीयमिति तु वैदिकसंप्रदायः । उक्तं पिङ्गलनागेनापि- "क्षैप्रसंयोगान् व्यूहेत" इति ।

४ "-विघातकम्" इत्यर्वाचीनाः । "विघातनम्" इत्येके । यद् यस्मात् दुर्जनसङ्गोऽत्यन्तविघातकस्तस्मान्न कुर्यात् कर्हिचित् सङ्गम् । तीव्रं तमः संसाराख्यम् । ५ "भोगार्थव्यापृतस्य" इति पाठान्तरम् ।

६ "तेन चैव स्याद्भवेज्ज्ञान-" इति प्र. पाठः प्रामादिकः ।

७ "एव हि" इति प्र. पाठः । ८ "निरात्मकम्" इति प्र. पाठः प्रामादिकः ।

९ "इत्यादि स्कान्दे" इति पाठान्तरम् ।

१० इदं श्लोकद्वयमवार्चीनैर्न पठ्यते । न व्याख्यातं च श्रीधरस्वाम्यादिभिः ।

११ "मनःक्रिया" इत्यपि पाठान्तरम् । १२ "जानन्नुपरमेन्मुनिः" इति क्वचित् पाठो न स्वरसः ।

१३ श्लोकद्वयस्यायमर्थः—इदं विश्वं मनोमात्रम् । मनसा भगवदिच्छया निर्मितम् । "इच्छामात्रं प्रभोः सृष्टिः" इति श्रवणात् । तत्र दृष्टान्तः-यथा स्वप्ने मनःक्रियाः गजतुरगादयः । इयदेव हि जगतः स्वप्नसाम्यम् ।

42

"मनोमात्रं हरेर्यस्मान्मनसा मीयते जगत् । व्याप्ते मनसि विष्णोश्च स्थितत्वाद् वासनामयम् । वस आच्छादनेत्यस्माद् धातोर्वा वासनामयम् । अतो विष्णोरनीहायां लीयते सकलं जगत् । अनीहावस्थ एवासौ मुमुक्षुभिरवाप्यते । एवं विद्वान् बन्धशक्तिं व्युदस्य हरिमाप्नुते । प्रकृतिर्भिदा च माया च भ्रमश्चेत्यभिधीयते । बन्धशक्तिर्यया लोको बम्भ्रमीत्यनिशं भुवि" इति तन्त्रसारे ॥ * ॥

[1]न यत्र निद्रा मूर्च्छा वा नार्थदृङ् न[2] मनोरथः ।
नानुवृत्तिर्न प्रळयस्तद् ब्रह्म विजितात्मनः ॥ ३९ ॥

"अनुवृत्तिरिति प्राज्ञैर्जीवन्मुक्तिरुदीर्यते" इति शब्दनिर्णये ॥ * ॥

[3]तत्वं नरेन्द्र जगतामथ तस्थुषां च ।
देहेन्द्रियासुधिषणात्मभिरावृतानाम् ।
यः क्षेत्रवित् त्वमनयोर्हृदि विश्वगाधिः[4]
प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि[5] ॥ ४० ॥

नचैतावता स्वाप्नी क्रिया जीवमनसः स्वतन्त्रसृष्टिरिति मन्तव्यम् । क्रिया च स्वाप्नी वासनामात्रम् । सर्वत्र वसति सर्वं वासयत्याच्छादयतीति वासना भगवदिच्छा तन्मात्रम् । सृष्टिक्रिया वा वासनामात्रम् । "स्वाभाविकी ज्ञानबलक्रिया च" इति श्रवणात् । केवलं भगवदिच्छयैव सर्वं सम्पद्यत इतीयत् । प्राचुर्यार्थे च मात्रच् । तेन वासनामयं वासनामात्रमित्येकार्थम् । अरण्यमयी भूमिः, जनमय उत्सव इतिवत् । भगवदिच्छायां निलीनत्वाच्च वासनामात्रम् । निलयनं नाम नान्ततो नाशः । किंतु भगवति प्रविश्य तदाधारतया स्थितिः । तेन भगवता सृष्टत्वं तस्मिन्नेव स्थितिर्लयश्चेति त्रयमपि मात्रमित्युक्तम् । अनीहायां सृष्टीच्छातिरोधाने च सृष्टिः प्रलीयते । एवमनीहयोपलक्षितः अप्रवृत्तजगद्व्यापारः प्रळयोदकशायी स्वयंप्रकाशः परमात्मा प्रसिद्ध्यति मुमुक्षुगम्यो भवति । एवं मुनिर्मननेनावधार्य नानाविधभेदभिन्नजगदात्मना परिणतामत एव भिदापदवाच्यां परमात्ममायां बन्धकशक्तिं व्युदस्य संसारादुपरमेत्, भगवत्येव चोत्कृष्टानन्दमनुभवेत् ।

१ इदमपि पद्यमर्वाचीनैर्न पठ्यते ।

२ "नार्थदृक् च मनोरथः" इति क्वचित् । बाह्यानर्थान् पश्यतीत्यर्थदृग् जाग्रदवस्था । मनोरथ इति मनोमयः स्वप्नः । एवं निद्राद्यवस्थाचतुष्टयं संसारावस्था, सा भगवति नास्ति । नापि प्रळयावस्थाऽपि तत्रास्ति । अनुवृत्तिरिति जीवन्मुक्तिरपि भगवति न संभवति । तदेवमेते जीवधर्माः यत्र न सन्ति तद् जीवाद् विलक्षणं, ब्रह्म विजितात्मनो मुमुक्षोर्जीवस्य प्रसिद्ध्यति ।

३ अर्वाचीनपाठे प्राक्तनं श्लोकत्रयं न पठ्यत इतीदमेव सप्तत्रिंशं पद्यम् ।

४ "यः क्षेत्रवित्तपतया हृदि विष्वगाविः" इत्यर्वाचीनाः ।

५ "–मवेहि सोऽस्मि" इति च । अयमत्र यथाश्रुतोऽर्थः – देहेन, एकादशेन्द्रियैः, दशप्राणैः, बुद्ध्याऽहङ्कारेण चाऽवृतानां स्थावराणां जङ्गमानां च जीवानां सत्ताप्रदत्वात्, तत्र बहिरन्तर्विततत्वाच्च तत्वमित्युक्तो योऽनयो

"सर्वसत्ताप्रदत्वात्तु सर्वतत्वं[1] हरिः स्मृतः। सर्वत्र विततत्वाद् वा सोऽहं त्वमिति चोच्यते। सर्वान्तर्यामकत्वात्तु न जीवात्मत्वतो हरिः" इति तत्वनिर्णये।

त्वं अनयोः स्थावरजङ्गमयोर्मध्ये एको जीवः। विष्वगाधिः नानादुःखः सन्। हृदि तमवैहि[2]। अहं च स जीवोऽस्मि। ज्ञानान्महान् भवामि। यः क्षेत्रवित् सर्वस्य प्रत्यक् चकास्ति स भगवानिति च।

"व्यवधानेनान्वयोऽपि योग्यतापेक्षया भवेत्" इति शब्दनिर्णये[3]।

स्थावरजङ्गमयोः, स्थावरक्षेत्रे जङ्गमक्षेत्रे चेति यावत्, अत एवोभयेषां क्षेत्रत्वेन समुदयनाद् बहुवचनेन प्रस्तुतानामप्येकवचनेन परामर्शः, क्षेत्रवित् क्षेत्रज्ञः। एतदेवोक्तम्–"क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत" इति। न केवलं क्षेत्रेष्वेव, किन्तु विष्वक् सर्वत्राऽधिरावासो यस्य स विष्वगाधिः, सर्वगत इत्यर्थः। विष्वक् सर्वगतत्वेनाऽधीयते चिन्त्यते ज्ञानिभिरिति वा विष्वगाधिः। सर्वगतोऽपि हृदि प्रत्यक् चकास्ति उपासकस्य अन्तर्मनसि प्रकाशते। स किलैवं सर्वेश्वरत्वादेव भगवानित्युच्यते। तमवैहि। कथम्? सोऽस्मीति। सर्वगतः सर्वान्तर्यामी भगवान् ममाप्यन्तर्यामी सन् अहमस्मीत्यादिवैदिकरहस्यनामभिरुपास्यत इत्यवगच्छेत्यर्थः। ग्रन्थान्तरेषु स्फुटमुदित इति नायमर्थो भाष्यकृताऽत्र निरूपितः। ननु तर्हि स्फुटमर्थं विहाय किमिति दूरान्वयेनार्थान्तरकरणप्रयासः? रहस्यविशेषाविष्करणार्थमिति ब्रूमः। ज्ञानवदज्ञानस्यापि भगवत्कार्यत्वात् ज्ञानिनां तत्वाविष्करणमिवाज्ञानिनां मोहनमपि पुराणोद्देशः। अत एव "रीतीनां शतमेव च" इत्युक्तरीत्या दूरान्वयादिरीतिविशेषमूरीकृत्य निगूढमर्थविशेषमपि पुराणानि बोधयन्ति। तल्लेशतो दर्शयितुं प्रसिद्धं स्फुटप्रतीतं चार्थमपहाय दूरान्वयलब्धमर्थविशेषमाविश्चकार भाष्यकारः। 'एतेन दशार्थाः सर्वभारते' इतिवद् भागवतेऽपि योजनाविशेषेणानेकेऽर्थाः प्रतिभासन्त इत्यपि सूचयति। तथाच भाष्यानुसारेणायमर्थः–यः देहादिभिरावृतानां स्थिरजङ्गमानां सत्ताप्रदः तेषु व्याप्तश्च, यः क्षेत्रज्ञः, यश्च प्रत्यक् चकास्ति जीवाद् विलक्षणो जीवस्याप्यन्तरात्मा चकास्ति स भगवानिति तमवैहि। इदानीं जीवस्वरूपमाह–यस्त्वं अनयोः स्थावरजङ्गमयोर्मध्ये विष्वगाधिर्नानादुःखानुभवी सन्नेको जीवः। अनेन भगवान् सर्वसत्ताप्रदः, स्वीयदुःखापोहेऽपि त्वमसमर्थ इति भेदो दर्शितः। जीवेष्वेकस्त्वमिति जीवनानात्वम्। तं च जीवं हृदि स्थितमवैहि। "हृदि ह्येष आत्मा" इति श्रवणात्। त्वं हृद्येवाणुः, भगवांस्तु सर्ववितत इति वैलक्षण्यमवधारयेत्यर्थः। अहं त्वज्ञो दुःखी जीवो भगवद्विलक्षणो भवेयम्। त्वं त्वपरोक्षीकृतब्रह्मा ब्रह्मरूप एव किं न स्या इति राज्ञः शङ्कां सम्भावितां परिहरति सनत्कुमारः-सोऽस्मि। अहमपि स पूर्वप्रकृतो जीव एवास्मीति तं मामवैहि जीवेष्वेकम्। अथापि त्वत्तो विलक्षणः। यतः सोऽस्मि। अन्तर्यामिविवक्षया स भगवानहमस्मि। एतेन "योऽसावसौ पुरुषः सोऽहमस्मि" इत्यौपनिषदमन्तर्यामिसाक्षात्काररूपं ज्ञानविशेषमात्मन्याह। उक्तं हि–"यद्यद् विभूतिमत् सत्त्वम्" इति। उभयोरपि जीवत्वेऽपि ज्ञानकृतं वैलक्षण्यमाह। एतेन जीवतारतम्यमुक्तम्। तदुक्तं भाष्ये– "ज्ञानेन महान् भवामि" इति। एवं बहुप्रमेयगर्भितत्वादस्य दूरान्वितस्यार्थविशेषस्याविष्करणमिति।

१ "सर्वसत्त्वम्" इति क्वचित् पाठः। तत्पक्षे "सत्त्वं नरेन्द्र जगतामथ तस्थुषां च" इति मूलपाठः। क्वचित् कोशेषु तथा पाठश्च दृश्यते।

२ "सन्। तमवैहि" इति क्वचित्।

३ "इति च शब्दनिर्णये" इति क्वचित्।

"अभिमानस्त्वहङ्कार 'आमा चेत्यभिधीयते" इति च ॥ * ॥

यस्मिन्निदं सदसदात्मतया विभाति
मायाविवेकविधुतिः[2] स्रजि वाऽहिबुद्धिः ।
तं नित्यमुक्तपरिशुद्धविबुद्धतत्त्व-[3]
प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ॥ ४१ ॥

"यत्स्वरूपतया भातमज्ञानां गगनादिकम् । विवेकज्ञानिनां [4]रज्जौ सर्पमावद् विधूयते । तं नित्यमुक्तभावेन निरस्तप्रकृतिं भजेत्" इति ज्ञानविवेके । "न भ्रान्तिर्जगतो दृष्टिर्न भ्रान्तिहरिदर्शनम् । अन्योन्यात्मतया दृष्टिभ्रान्तिरित्यवधार्यताम्" इति च । "मायेति ज्ञाननाम स्यान्मायेति प्रकृतिस्तथा ज्ञानं स्वरूपं विष्णोस्तु प्रकृतिर्न हरेस्तनुः । एवं विवेकिनो विश्वं ब्रह्मरूपेण नेयते[5] ।" इति वाराहे ।

ज्ञानप्रकृत्याख्यमायाद्वयस्य विवेकज्ञानात् सदसतोर्विष्णवात्मतया प्रतीतिः स्रज्यहिबुद्धिरिव विधूयत इत्यर्थः[6] ।

"पञ्चभूतात्मकं देहं विष्णोः पश्यन्त्ययोगिनः । तथा न योगिराद्धान्तो ज्ञानं देहो यतो हरेः" इति षाड्गुण्ये ॥ * ॥

यत्पादपङ्कजपराग[7]विलासभक्त्या [8]कर्माशयं ग्रथितमुद्ग्रथयन्ति सन्तः ।
तत्वं न तद् द्विमतयोऽपि विरुद्धमार्ग[9]स्रोतोगुणास्तमरणं भज वासुदेवम् ॥
॥ ४२ ॥

---

१ "आत्मा देह्यभिधीयते" इति प्र. पाठः प्रामादिकः । एतेन कोशवचनेन "विश्वणात्मभिरावृतानाम्" इति मूलस्थ आत्मशब्दो व्याख्यातः ।

२ "-विधुति स्रजि" इत्यर्वाचीनाः ।

३ "-तत्त्वं प्रत्यूढ-" इति च ।

४ "-ज्ञानिना रज्जौ" इति क्वचित् प्र. पाठः ।

५ "नेष्यते" इति प्र. पाठः ।

६ तथाचायं मूलार्थः—यस्मिन् भगवति इदं सदसत् व्यक्ताव्यक्तात्मकं जगत् आत्मतया स्वरूपतया भाति इति यत् सा प्रतीतिः स्रजि अहिबुद्धिरिव भ्रान्तिः । अत एव मायाविवेकेन विधूयते । ज्ञानस्वरूपत्वाद् भगवान् मायामय इत्युच्यते । प्रकृतिकार्यत्वाज्जगदपि मायामयम् । तदेवं द्विविधमायाविवेके कृते ब्रह्मजगतोर्वैलक्षण्यावगमादियं भ्रान्तिप्रतीतिर्बाधिता भवति । ततश्च तमेतादृशं जगतो विलक्षणं नित्यमुक्तेन परिशुद्धेन विबुद्धेन च तत्वेन स्वरूपेण प्रत्यूढा निरस्ता कर्मकलिला प्रकृतिर्येन तं भगवन्तं प्रपद्ये ।

७ "-पलाशविलास-" इत्यर्वाचीनाः ।

८ "कर्माशयग्रथित-" इति पाठान्तरम् ।

९ "तद्वन्न रिक्तमतयो यतयोऽपि रुद्धस्रोतोगणा-" इत्यर्वाचीनाः ।

द्विमतयः जगति भगवति च प्रतीतियुक्ता अपि भक्तिविशेषात् तत्वं[1] नोद्ग्रथयन्ति । [2]संसारगुणास्तेषां विरुद्धा एव प्रतीयन्ते यतः[3] ॥ * ॥

मातरिश्वेव सर्वात्मा बलेन महतौजसा[4] ।
अविषँह्यतया देवो भगवान् भूतराडिव ॥ ६२ ॥

"नैजः सर्वगुणोत्कर्षः[5] सर्वेभ्यो मह उच्यते[6]" इति शब्दनिर्णये[7] ॥ * ॥

कन्दर्प इव सौन्दर्ये मनस्वी मृगराडिव ।
वात्सल्ये मनुवन्नृणां प्रभुत्वे भगवानजः ।
बृहस्पतिर्ब्रह्मवादे आत्मतत्वे[8] स्वयं हरिः ॥ ६३ ॥

---

१ "तत्वान्नोद्ग्रथयन्ति" इत्यपि कोशेषु पाठान्तरम् । तत्पक्षे मूलेऽपि "तत्वान्न तद् द्विमतयोऽपि–" इति पाठः पठनीयः । २ "प्रतिसंसारं गुणास्तेषां" इति प्र. पाठः ।

३ ततश्चायं श्लोकार्थः–द्विमतयोऽपि जगति भगवति च कृतमतयोऽपि एकान्ततो भगवन्निष्ठाविधुरा अपि सात्विकाः, यद्यपि जगति कृतमतयो भवेयुः, अथापि अन्ततः भगवत्पारम्यं जानन्तीति हेतोः वासुदेवपादपङ्कजविलासभक्तिबलात् ग्रथितं स्वस्मिन् सम्बद्धं कर्माशयं कर्मवासनासन्तानरूपं संसारमुद्ग्रथयन्ति नाशयन्ति । किमुत एकान्तभक्ताः? तत्वं च भगवत्स्वरूपं नोद्ग्रथयन्ति न नाशयन्ति । तत्वच्युता न भवन्तीत्यर्थः । ननु कथं जगत्यपि कृतमतीनां जगतो विमुक्तिः? आह–विरुद्धमार्गस्रोतोगुणाः । मार्ग इति संसारमार्गः । तस्य स्रोतः प्रवाहः । तत्र ये राजसास्तामसाश्च गुणाः संसारसम्बद्धाः प्रतीयन्ते ते तावत् तेषां सहजस्वभावविरुद्धा एव प्रतीयन्ते । तथाच तेषां जगन्निष्ठाया आहितत्वात् भगवन्निष्ठायाश्च सहजगुणत्वात् द्विमतयोऽपि सहजया भक्त्या सहजमेव ते मुच्यन्त इति तं वासुदेवं शरणं भज ।

४ "महतौजसा" इति पाठान्तरम् । "सहसौजसा" इत्यर्वाचीनाः । मातरिश्वेव सर्वात्मा सर्वगः । बलेन शारीरेण महसा गुणोत्कर्षेण ओजसाऽऽत्मबलेन च अविषह्यतया भगवान् भूतराट् पशुपतिरिव ।

५ "–गुणोद्रेकः" इति पाठान्तरम् ।

६ "महदुच्यते" इति प्र. पाठः । यद्यपि भागवतप्राचीनकोशेषु च "महतौजसा" इत्येव पठ्यते । ततश्च तदनुसारेण "महदुच्यते" इति भाष्यपाठ एव साधीयानिति भाति । अथापि प्राचीनकोशेषु सर्वत्रापि निरपवादं "मह उच्यते" इत्येव पाठात् "महसौजसा" इत्येव मूलपाठस्य वीरराघवेण स्वीकृतत्वाच्च स एवाऽचार्यसम्मतः साधुः पाठ इति निश्चीयेत । विजयध्वजीयं तु "महतौजसा" इत्येव पाठं पठदपि प्रक्षिप्तासङ्गतप्रमेयप्रचुरमनिर्णायकमिति प्रागेवाऽवेदितम् । इदं भाष्यवाक्यं "यत्पाद–" इत्यादिपूर्वश्लोकस्यैव व्याख्यानमिति वदन्तश्चिन्त्याः ।

७ "इति न शब्दनिर्णये" इति क्वचित् ।

८ "आत्मवत्त्वे" इत्यर्वाचीनाः । मृगराट् सिंह इव मनस्वी स्वैरगतिः । प्रभुत्वे अजो ब्रह्मा । ब्रह्मवादे वेदवादे । आत्मतत्वे परमात्मतत्वज्ञाने हरिरिव । उपमानौचित्यं तु भाष्योदाहृतप्रमाणे स्फुटम् ।

"अनाद्यन्तं परं ब्रह्म न देवा ऋषयो[1] विदुः । एकस्तद् वेद भगवान् प्रभुर्नारायणो विराट्" इति मोक्षधर्मेषु[2] ॥ * ॥

भक्त्या गोगुरुविप्रेषु विष्वक्सेनानुवर्तिषु ।
ह्रिया प्रश्रयशीलाभ्यामात्मतुल्यः परोद्यमे ॥ ६४ ॥

कीर्त्योर्ध्वगीतया पुम्भिस्त्रैलोक्ये तत्रतत्र ह ।
प्रविष्टः कर्णरन्ध्रेषु स्त्रीणां रामः सतामिव[3] ॥ ६५ ॥

"गुरुविप्रेषु भक्त्या च परेषां हितकृत्तया[4] । प्रश्रयेण च कीर्त्या च पृथू राममनुव्रतः" इति ब्रह्माण्डे । "न गुरुर्नैव धर्मोऽस्ति रामदेवस्य कुत्रचित् । तथाऽपि धर्मरक्षार्थं गुरुभक्तिमदर्शयत्" इति वाराहे ॥ * ॥

इति चतुर्थस्कन्ध एकविंशोध्याय[5]

तस्यानया भगवतः परिकर्मशुद्ध[6]सत्त्वात्मनस्तदनुसंस्मरणानुपूर्व्या[7] ।
ज्ञानं विरक्तिमदभून्निशितेन येन छिच्छेद संशयपदं निजजीवकोशम् ॥ ११ ॥

"आविर्भावतिरोभावौ ज्ञानस्य ज्ञानिनोऽपि तु । अपेक्ष्याज्ञस्तथा ज्ञानमुत्पन्नमिति चोच्यते[8]" इति तन्त्रसारे ॥ * ॥

---

१ "ब्रह्म देवा न ऋषयो–" इति क्वचित् ।

२ "–यणः स्वराडिति मोक्षधर्मेषु" इति प्र. पाठः । "मोक्षधर्मे" इति क्वचित् ।

३ भगवदनुवर्तिषु गोगुरुविप्रेषु भक्त्या, अधर्माचरणे ह्रिया, परोद्यमे च, पुम्भिरुच्चैः गीतया कीर्त्या, स्त्रीणां सतीनां सतां च पुरुषाणां कर्णरन्ध्रेषु प्रविष्टो राम इवाऽत्मोपमः ।

४ "हितकृत्यया" इति प्र. पाठः ।

५ प्र. भाष्यपाठानुसारेण श्रीधरीयाद्यनुसारेण चात्र द्वाविंशोऽध्यायः ।

६ "परिशुद्धकर्मसत्वा–" इति पाठान्तरम् ।

७ "–पूर्त्या" इत्यर्वाचीनाः । भगवतः परिकर्मणा परिचर्यया शुद्धसत्त्व आत्मा मनो यस्य तस्यास्य पृथो अनया भक्त्या विरक्तिमत ज्ञानमभूत् आविरभूत् । भक्त्या कीदृशया? भगवदनुसंस्मरणस्य आनुपूर्वी नैरन्त यत्र तया । भगवत्स्मरणेन, आनुपूर्व्या वेदाध्ययनेन च प्रवृद्धयेति वा । कीदृशं ज्ञानम्? येन निशितेन ज्ञाने संशयविपर्ययास्पदं संसारकारणं जीवकोशमन्तःकरणं लिङ्गशरीरं वा चिच्छेद ।

८ स्वरूपतः ज्ञानिनोऽपि ज्ञानस्याऽविर्भावतिरोभावावपेक्ष्य 'अयमज्ञ आसीत्, अस्य ज्ञानमुत्पन्नम्' इति चोच्यते इत्यर्थः ।

छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत् तत्यजेऽच्छिनदिदं वयुनेन येन ।
तावत्तु योगगतिभिर्यतिरप्रपन्नो[1] यावद् गदाग्रजकथासु रतिं न कुर्यात् ॥१२॥

"अपरोक्षतया वृत्तिज्ञानमेदनिरीक्षणम् । स्वरूपज्ञानसंस्थित्या ज्ञानत्याग उदीर्यते । स्वरूपज्ञानतः सम्यग् रतिर्विष्णुकथासु च" इति ब्रह्मतर्के ॥ * ॥

एवं स वीरप्रवरः संयोज्याऽत्मानमात्मनि ।
ब्रह्मभूतो दृढं काले तत्याज स्वकळेबरम्[2] ॥ १३ ॥

ब्रह्मणि भूतः ॥ * ॥

क्षितिमम्भसि तत् तेजस्यदो वायौ नभस्यमुम् ।
इन्द्रियाणि समस्तानि तन्मात्राणि यथोद्भवम्[3] ॥ १६ ॥

[4]भूतादिस्थान् समुत्क्षिप्य महत्यात्मनि सन्दधे ।
तं सर्वगुणविन्यासं जीवे मायामये न्यधात्[5] ॥ १७ ॥

---

१ "तावन्न योगगतिभिर्यतिरप्रमत्तो-" इत्यर्वाचीनाः । "तावन्न योगगतिभिर्यतिरप्रयत्नो-" इति क्वचित् । येन वयुनेन ज्ञानेनेदं निजजीवकोशमच्छिनत् तदपि वृत्तिरूपं ज्ञानं तत्यजे। त्यागफलस्याऽत्मगामित्वं व्यञ्जयताऽऽत्मनेभाषप्रयोगेण चेदमाह—ज्ञानं न सर्वात्मना तत्यजे । किन्तु स्वरूपज्ञान एव स्थितः तत् वृत्तिरूपं ज्ञानं स्वतो भिन्नं बाह्यं नश्वरमपश्यदिति । यथा देहगेहादिषु ममतारहितस्तत्त्यागीत्युच्यते । कीदृशः सन् तत्यजे? छिन्नान्यधीः । अन्यधीरयथार्थज्ञानम् । अन्यस्मिन् देहगेहादौ भगवति च स्वस्मादनन्यताभ्रमः । अन्यथाधीरिति यावत् । सा च्छिन्ना येन सः । तदपि कुतः? यतोऽधिगता जीवात्मपरमात्मनोर्गतिर्याथात्म्यं येन तादृशः । अत एव निरीहः सांसारिकविषयेषु । विधिनियतप्रवृत्तिविधुरो वा ! ननु कर्मयोगेनैवैतत् सम्पाद्येत, किं भगवद्भक्त्या? नेत्याह—तावत्तु । यावद् गदाग्रजकथासु रतिं न कुर्यात् तावत् यतिर्निर्जितेन्द्रियग्रामोऽपि केवलकर्मयोगफलैः प्रपन्नो न भवति । भगवद्भक्तस्यैव कर्मापि फलप्रदमित्यर्थः । उक्तं हि—"ज्ञाने परिसमाप्यते" इति ।

२ "स्वं कलेवरम्" इत्यर्वाचीनः पाठः ।

३ "इन्द्रियेबु मनस्तानि तन्मात्रेषु यथोद्भवम्" इत्यर्वाचीनः पाठः । क्षित्यादीनम्भआदिष्वचिन्तयत् । क्षित्यादिकारणत्वेनाम्भआदीनचिन्तयदित्येतत् । इन्द्रियाणि समस्तानि तन्मात्राणि च यथोद्भवं स्वस्वकारणेष्वचिन्तयत् । इन्द्रियाणि तैजसाहङ्कारे, तन्मात्राणि च तामसाहङ्कारे ।

४ "भूतादिनामून्युत्कृष्य महत्या-" इत्यर्वाचीनाः । "भूतादिस्तान् समुत्क्षिप्य" इति क्वचित् । भूतादिस्तामसाहङ्कारः । अहङ्कारसामान्योपलक्षणम् । अहंङ्कारस्थितान् इन्द्रियादीन् समुत्क्षिप्यैकीकृत्य भूतादिमहङ्कारं महत्तत्वेऽचिन्तयत् । अहंङ्कारमानिनं च शिवं महदात्मनि चतुर्मुखे । सत्वादिगुणैः प्रपंचस्य विन्यासं स्रष्टारं तं च चतुर्मुखं मायामये जीवे चेतनप्रकृतौ श्रीतत्वेऽचिन्तयत् । ज्ञानवैराग्यवीर्येण स्वरूपस्थः ब्रह्मणि स्थितः असावनुशायी पृथुजीवः तं चानुशयं श्रीतत्वं परमात्मस्थमचिन्तयदिति ।

५ प्राचीनकोशेषु "न्यसेत्" इति पठ्यते । अर्थस्तु न स्वरसः । न्यास्यदित्यर्थे छान्दसो लकारव्यत्यय इति व वक्तव्यम् ।

तं चानुशयमात्मस्थमसावनुशयी पुमान् ।
ज्ञानवैराग्यवीर्येण स्वरूपस्थो[1] व्यधात् प्रभुः ॥ १८ ॥

"अस्येदं कारणमिति ज्ञानमेव विलापनम् । समाधिकाले विज्ञेयं देहादेर्दर्शनात् पुनः" इति च ॥ * ॥

"मायेति प्रकृतिश्चेति मा या जीवश्च कथ्यते[2] । शेतेऽनु केशवं यस्मात् तस्मादनुशयोऽपिच । एतैस्तु नामभिर्वाच्या श्रीर्विष्णोरनपायिनी । तथैवानुशयी[3] जीवस्तया बद्धो यतः सदा । पुरुषः शयनात् पूर्षु तथाऽहानादहं स्मृतः । अप्राकृततनुत्वात्तु[4] स्वरूपं हरिरुच्यते । नित्यचिद्दर्शनान्नित्यं ब्रह्म पूर्णत्वतः सदा" इत्यादि भागवततन्त्रे[5] ॥ * ॥

अहो इयं वधूर्धन्या या चैवं भूभुजां पतिम् ।
सर्वात्मना पतिं भेजे यज्ञेशं श्रीर्वधूरिव ॥ २५ ॥

"अनपेक्षो गुणः पूर्णो धन्य इत्युच्यते बुधैः" इति शब्दनिर्णये ॥ * ॥

इति चतुर्थस्कन्धे द्वाविंशोध्यायः[6]

सासुद्रीं देवदेवोक्तामुपयेमे शतद्रुतीम्[7] ।
यां वीक्ष्य चारुसर्वाङ्गीं किशोरीं सुष्ठ्वलङ्कृताम् ।
परिक्रमन्तीमुद्वाहे चकमेऽग्निः शुकीमिव ॥ ११ ॥

---

१ "स्वरूपस्थोऽजहात् प्रभुः" इत्यर्वाचीनाः । "स्वरूपस्थं व्यधात् प्रभुः" इति क्वचित् कोशेषु पठ्यते । अर्थस्तु न स्फुटः ।

२ या मा रमा सा मायेति प्रकृतिरिति जीवधारकत्वात् जीव इति च कथ्यते । प्रळये केशवमनु सृष्टिव्यापारोपरमाख्यशयनाच्चानुशय इति । मा या इति द्वे भिन्ने नामनी वा ।

३ "तयैवानुशयी" इति प्र. पाठः प्रामादिकः ।

४ "–तनुत्वाच्च" इति प्र. पाठः ।

५ "इति भागवततन्त्रे" इति प्र. पाठः ।

६ श्रीधरीयाद्यनुसारेण प्र. भाष्यपाठानुसारेण चात्र त्रयोविंशोऽध्यायः ।

७ "शतद्रुतिम्" इति प्र. पाठः । पृथोः पुत्रः विजिताश्वोऽन्तर्धानापरनामा । तत्पुत्रः हविर्धानः । तत्पुत्रो बर्हिषदपरनामा प्राचीनबर्हिः । सोऽयं पृथोः प्रपौत्रः देवदेवेन ब्रह्मणोक्तां समुद्रतनयां शतद्रुतीं नामोपयेमे । यामुद्वाहकाले शुकीमिव राजपुत्रीमग्निश्चकमे ।

"राजपुत्रीं शुकीमग्निरावर्तन्तीं प्रदक्षिणम् । आदायान्तरधाद् दानसमये मन्मथातुरः[1]" इति ब्राह्मे ॥ * ॥

स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेति ततः परं हि माम् ।
अव्याकृतं भागवतोऽथ वैष्णवं पदं यथार्हं विबुधैः कलात्यये[2] ॥ २९ ॥

मां श्रियम्[3] ।

"ऋजवो नाम ये देवा योग्या ब्रह्मपदस्य तु । त एव शतजन्मानि विशेषोपासका हरेः । प्राप्य ब्रह्मपदं पश्चाच्छ्रियं प्राप्यानुमोदिताः । तया ततो हरिं यान्ति वसन्ति हरिसन्निधौ । अनादिकालभक्ताश्च ज्ञानिनस्ते न संशयः । विशिष्टा ज्ञानभक्त्यादौ सर्वजीवनिकायतः । सर्वदाऽपि विशेषेण शतजन्मप्रयत्नतः । स्वपदप्राप्तिरुद्दिष्टा ततो मुक्तिरवाप्यते । तथैव चत्वारिंशद्भिः पदं शैवं च[4] जन्मभिः । विंशद्भिरैन्द्रं दशभिरन्येषामप्युदीरितम्" इति षाड्गुण्ये ॥ * ॥

---

१ एतेन शुकरूपधारिणीं स्वाहामिव सप्तर्षिपत्नीभ्रान्त्येति वदन्तः सर्वेऽपि व्याख्यातारः परास्ताः । सप्तर्षिपत्नीरूपधारिणी स्वाहैवाग्निना कामिता न शुकीरूपधारिणीत्यस्वारस्यात् । अत एवासन्तुष्ट्या श्रीधरस्वाम्यादयः सर्वे "स्तुकीमिव" इति पाठान्तरं पठित्वा किञ्चिदिव तुष्यन्ति । स्तोकघृतधारामिव इति च व्याचक्षते ।

२ "यथाऽहं विबुधाः कलात्यये" इत्यर्वाचीनाः । "यथाऽहं विबुधैः कलात्यये" इति "विविधैः कलात्यये" इति च क्वचित् । ऋजुधर्मनिष्ठः ऋजुपदयोग्यः पुमान् शतजन्मभिर्विरिञ्चतामेति । विरिञ्चपदभोगानन्तरं मां श्रियमेति । अथ तद्द्वारा अव्याकृतं अवाङ्मनसगोचरं वैष्णवं पदमेति । कलात्यये लिङ्गभङ्गे सति विबुधैश्च सह यथार्हम् । विबुधा देवादयो योगिनोऽपि ब्रह्ममुक्तिकाल एव लिङ्गभङ्गमाप्य भगवन्तं प्राप्य यथायोग्यं स्वस्वरूपानन्दाविर्भावमाप्नुवन्तीत्यर्थः । तदुक्तमनुव्याख्याने–"भगवन्तमनुप्राप्ता अपि तु ब्रह्मणा सह । परमं मोक्षमायान्ति लिङ्गभङ्गेन योगिनः" इति, "प्राप्ता अपि परं देवं सहैव ब्रह्मणा पुनः । आनन्दव्यक्तिमायान्ति पूर्णां लिङ्गस्य भङ्गतः" इति च । अत्र एकोनशतजन्मभिः भगवन्तमुपास्य शततमे जन्मनि विरिञ्चतामेतीति विवेकः । रुद्रादिविबुधानां तु नैतावज्जन्मसूपासना । यथार्हमिति तेषामुपासनायास्तत्फलस्याऽनन्दस्य च योग्यताभेदेन तारतम्यकथनात् । तच्च भाष्ये विवृतम् ।

३ "मायेति प्रकृतिश्चेति मा या जीवश्च कथ्यते" इति पूर्वोक्तं प्रमाणवचनमत्रापि स्मारयति–मां श्रियमिति ।

४ यद्यप्यनुव्याख्याने "ब्रह्मणां शतकालात्तु पूर्वमारब्धसंक्षयः । ब्रह्मणस्त्वेव तावत्त्वं पञ्चाशद् ब्रह्मणस्तथा । रुद्रस्य विंशदेव स्यादिन्द्रस्यार्कादिके दश । अन्येषां ब्रह्ममात्रस्य त्वन्त आरब्धसंक्षयः" इत्युक्तम् । तेन विरोध इव भाति । अत्रव केचित् समादधते–उत्तरत्र श्रूयमाण दशभिरिति पदमत्राप्यनुवर्तनीयम् । तेन चत्वारिंशद्भिर्दशभिश्च ब्रह्मकालैः इत्यविरोध इति । वस्तुतस्तु रुद्रस्य शेषपदप्राप्त्यनन्तरमेव मुक्तिः । न साक्षात् । तत्रापि न सामस्त्येन पंचाशद्ब्रह्मकालः । तदुक्तं पद्मनाभतीर्थभट्टारकैः–"आदौ कियतः कालस्य ब्रह्मापरोक्षज्ञानसाधनार्थं गतत्वाद् रुद्रपदयोग्यस्य जीवस्य किंचिन्न्यूनं पंचाशद्ब्रह्मकालमनुवर्तते प्रारब्धकर्म" इति । ततश्च शेषसंख्या विहाय

अथ भागवता यूयं प्रियाः स्थ भगवान् यथा ।
[1]न मे भागवतानां च प्रेयानन्योऽस्ति कर्हिचित्[2] ॥ ३० ॥

[3]अथ एवमनादिभक्तोऽहं यतः अतः प्रिया यूयम् ॥ * ॥

[4]जितं व आत्मविद्धुर्याः स्वस्तये स्वस्तिरस्तु वः ।
[5]भवतां राधसे राध्यं सर्वस्मा आत्मने नमः ॥ ३३ ॥

नम ऊर्जे इषे त्रय्याः पतये यज्ञरेतसे ।
तृप्तिदाय च जीवानां नमः सर्वरसात्मने[6] ॥ ३८ ॥

सर्वसत्त्वात्मदेहाय विशेषाय स्थवीयसे ।
नमस्त्रैलोक्यपालाय सहओजोबलाय च[7] ॥ ३९ ॥

चत्वारिंशद्भिरिति पूर्णसंख्यैवालोदितेति स्यात् । यद्वा एकोनचत्वारिंशद्ब्रह्मकालं शिवपदप्राप्त्यर्थं साधनम् । नवब्रह्मकालं शेषत्वाय । एकोनपञ्चाशे शिवपदप्राप्तिः । पञ्चाशे शेषपदप्राप्तिः । ततो मुक्तिरिति सर्वाविरोधः । अत्र महान्तः प्रमाणम् ।

१ "न मद् भागवतानां च" इत्यर्वाचीनाः ।

२ यथार्हं विबुधा इति पूर्वं विबुधपदेन स्वस्यापि प्रकृतत्वात् पूर्वश्लोकसूचितं स्वस्य भगवद्भक्तिं हेतुत्वेन परामृशन्नाह–अथेति । यत एवमहमप्यनादिभक्तो भगवतः अथ तस्मात् भगवानिव भागवता यूयमपि मे प्रियाः । भागवतानां सकाशादन्यः प्रेयान् मे नास्ति । भागवतानां च मम सकाशादन्यः प्रेयान् नास्ति । परमवैष्णवत्वात् । मम भागवतानां च सर्वेषां भगवद्भक्तादन्यः प्रेयान् नास्तीति च ।

३ "अथ अत एव–" इत्यादि प्र. पाठः प्रामादिकः ।

४ "जितं त आत्मविद्धुर्य स्वस्तये स्वस्तिरस्तु मे" इत्यर्वाचीनाः । "आत्मविद्वर्यस्वस्तये" इति केचित् ।

५ "भवता राधसा राद्धम्" इत्यर्वाचीनाः । हे आत्मविद्धुर्याः प्रचेतसः, स्वस्तये भगवदाराधनाख्यमङ्गलकर्मार्थं वो जितम् । भगवद्भक्त्या सर्वोत्कर्षः प्राप्तः । अत एव च सर्वं जितम् । तेन चाऽराधनेन वः स्वस्ति सन्तन्तसौख्यमस्तु । भवतां राधसे सिद्धये ब्रह्मतत्वं सर्वान्तरात्मने नम इत्येवं राध्यमाराध्यम् । सर्वस्मै सर्वान्तर्यामित्वेन सर्व इति पदवाच्याय च ।

६ ऊर्जं पितृणामन्नम् । तत्प्रदाय । इषे देवानामन्नप्रदाय । यज्ञरेतसे यज्ञरताय । रसात्मनेऽप्सु रसप्रदाय । "रसोऽहमप्सु कौन्तेय" इति गीतायाम् । ऊर्जादिसर्वान्तर्यामित्वात् तदादिसर्वपदवाच्याय ।

७ सर्वप्राणिनामात्मदा ईहा चेष्टा यस्य । सर्वसत्वानामात्माऽन्तःकरणं देहश्चेति वा । तदन्तर्यामकतया तत्पदवाच्याय । विशेषः पृथिवी । तद्गताय तत्पदवाच्याय । सह इति मनः शक्तिः । ओज इन्द्रियपाटवम् । बलं दैहिकम् । देहेन्द्रियमनसां तत्तच्छक्तिदानेन तत्पदवाच्याय ।

[1]अर्थलिङ्गाय नभसे नमोऽन्तर्बहिरात्मने ।
नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे ॥ ४० ॥

प्रवृत्ताय निवृत्ताय पितृदेवाय कर्मणे ।
नमो[ऽ]धर्मविपाकाय मृत्यवे दुःखदायिने[2] ॥ ४१ ॥

नमस्त आशिषामीश मनवे कारणात्मने ।
नमो धर्माय बृहते कृष्णायाकुण्ठमेधसे[3] ॥ ४२ ॥

पुरुषाय पुराणाय साङ्ख्ययोगेश्वराय च ।
शक्तित्रयसमेताय [4]मीळ्हुषेऽहङ्कृतात्मने ।
चेतआकूतिरूपाय नमो वाचोविभूतये[5] ॥ ४३ ॥

"सर्वान्तर्यामकत्वात्तु[6] सर्वनामा[7] जनार्दनः । नतु सर्वस्वरूपत्वात् सर्वेशोऽसौ हरिर्मतः" इति ब्रह्मतर्के ॥ * ॥

---

१ "शब्दलिङ्गाय" इति केचित् । शब्दद्वारा अर्थानां ज्ञापकाय नभसे । तत्र स्थित्वा तच्छक्तिदानेन तत्पदवाच्याय । पुण्यायामुष्मै स्वर्गलोकाय । तत्प्रदाय ।

२ "दुःखदाय च" इति पाठान्तरम् । प्रवृत्तिनिवृत्तिकर्मनियामकाय । पितृदेवगताय । धर्मविपाकाय पुण्यफलदाय । अधर्मविपाकाय अधर्मफलदाय च । मृत्यौ स्थिताय मृत्युप्रदाय । दुःखदायिने सुखदुःखप्रदाय च । "दुर्दुःखमिति संप्रोक्तं सुखं खमिति चोच्यते" ।

३ मनवे वायुगताय । स्वायम्भुवादिषु स्थित्वा मन्वन्तरप्रवर्तकाय । वेदमन्त्रवाच्यत्वेन मनुपदवाच्याय । धर्माय धर्मसंस्थापकाय धारकाय च ।

४ 'मीढुषे' इति वक्तव्ये वैदिकरीत्याऽयं प्रयोगः । अर्वाचीनपुस्तकेषु च "मीढुषे" इत्येव पठ्यते ।

५ शक्तित्रयमिति सृष्ट्यादित्रयम् । ज्ञानमिच्छा क्रियेति वा शक्तित्रयम् । मीढुषेऽभिलषितसेचकाय । अहङ्कृतात्मने । अहङ्काराभिमानिनि रुद्रे स्थिताय तत्पदवाच्याय । चेतोरूपाय ज्ञानप्रवर्तकाय । आकूतिः क्रिया । तत्प्रवर्तकाय । चेतस आकूतिराकृतिरिति वा । "चेतआकृतिरूपाय" इति क्वचित् कोशपाठः । तत्पक्षे चेतआकृतिः मानसवासनाजन्यं दर्शनं स्वप्नादि । तन्निरूपकाय । वाचोविभूतये । "वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः" इति ह्युक्तम् ।

६ "सर्वान्तर्यामिकत्वात्तु" इति प्र. पाठः ।

७ सर्वमिति पदं यस्य नाम स सर्वनामा तेन सर्वस्मा आत्मने नम इति व्याख्यातम् । सर्वाणि च नामानि यस्य सोऽपि सर्वनामा । तेन 'ऊर्जे इषे' इत्यादि सर्वं व्याख्यातम् । शुकदेवोऽप्याह—"सर्वस्य वस्तुजातस्य श्रीवासुदेवस्वरूपाद् भिन्नत्वेऽपि पृथक्स्थितिप्रवृत्त्याद्यभावादभिन्नत्वम् । अतो न वासुदेवस्वरूपे धर्माधर्माल्पज्ञत्वजडत्वादियोगः" इति ।

भवान् भक्तिमतां[1] लभ्यो दुर्लभः सर्वदेहिनाम् ।
स्वाराज्यस्याप्यभिमता [2]एकान्तेनाऽत्मविद्गतिः ॥ ५४ ॥

[3]स्वाराज्यस्य इन्द्रादेः ॥ * ॥

क्षणार्धेनापि तुलये[4] न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताऽशिषः ॥ ५७ ॥

"सङ्गो भागवतैर्भूयानपुनर्भवमात्रतः । यतो विशिष्टमानन्दं मुक्तौ जनयति स्फुटम्"
इति च ॥ * ॥

अथानघाङ्घ्र्योस्तव[5] कीर्तितीर्थयोरन्तर्बहिःस्नानविधूतपाप्मनाम् ।
भूतेष्वनुक्रोशसुतत्त्वशीलिनां स्यात् सङ्गमोऽनुग्रह एव नस्तव ॥ ५८ ॥

अङ्घ्र्योर्जातयोः कीर्तितीर्थयोः ॥ * ॥

यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति[6] यत् ।
तत्त्वं ब्रह्म परं ज्योतिराकाश इव विस्तृतम्[7] ॥ ६० ॥

---

१ "भक्तिमता" इत्यर्वाचीनाः ।

२ "-प्यभिमत एकान्तेना-" इति च । सर्वदेहिनां दुर्लभो यद्यपि भवान् । अथापि भक्त्या त्वनन्यया शक्यो भक्तिमताम् । ननु स्वर्गेण वयं फलवन्तः । किं भक्त्या? किं वा मोक्षेण? आह— स्वाराज्यस्य । स्वर्गराज्यस्य इन्द्रादेर्देवगणस्यापि इयं परमात्मविदां भक्तिगम्या मुक्तिरूपा गतिर्ह्यन्ततोऽभिमता । यतः स्वर्गिण एव स्वर्गान्मुक्तिं कामयन्ते किं तर्हि स्वर्गकामनया वृथा ? स्वः स्वर्गो राज्यं यस्य स स्वाराज्यः ।

३ "स्वराज्यस्य" इति क्वचित् कोशपाठः भ्रान्तः । अस्य वाक्यस्य "इन्द्रादेरित्यध्याध्याहारपूर्वकमिन्द्रादेर्यत् स्वाराज्यं तस्य" इति व्यधिकरणतया व्याख्यानं तु भ्रान्तिमूलम् ।

४ "-र्धेनापि तुल्येत" इति क्वचित् पाठान्तरम् । "तुलयाम लवेनापि न स्वर्गं" इति च । भागवतसङ्गस्य स्वर्गं मोक्षं वा तुल्यं न मन्ये । किमुत मरणशीलानामैहिकसम्पदः पशुपत्नीपुत्राद्याः ?

५ "-नघाङ्घ्रेस्तव" इत्यर्वाचीनाः । हे अनघ । तव चरणकमलयोः जाता या कीर्तिः यशोगाथारूपं भागवतादिशास्त्रम् । तीर्थं च गङ्गादि । तयोरन्तर्बहिःस्नानेन विधूतः स्वस्य जगतश्च पाप्मा यैः । भूतेष्वनुक्रोशवतां सुतत्वपरिशीलिनां च नः सङ्गमोऽस्तु । स एव तव महाननुग्रहः ।

६ "विश्वस्मिन् नच भाति" इति पाठान्तरम् ।

७ "-राकाशमिव विस्तृतम्" इत्यर्वाचीनाः । यस्मिन्नाधारे इदं विश्वं व्यज्यते । यत्र कारणे चेदमुत्पद्यते । यच्च विश्वस्मिन्नवभाति प्रकाशते व्याप्नोति । तद् ब्रह्म परं तत्वम् । ज्योतीरूपं च । तत् परं ब्रह्म त्वमिति च

[1]विश्वमस्मिन् स्थितमपि न भात्यज्ञानाम् ॥ * ॥

यो माययेदं पुरुरूपयाऽसृजद् बिभर्ति भूयः क्षपयत्यविक्रियः ।
यद्भेदबुद्धिः सदिवाऽऽत्मसंस्थया [2]तयाऽऽत्मतन्त्रं भगवन् प्रतीमहि ॥ ६१ ॥

यस्य जीवादिभ्यो भेदबुद्धिः सदिवा[3] । सम्यग्ज्ञानिविषये सत्येवेत्यर्थः ।

"रात्रिरज्ञानमुद्दिष्टं सम्यग्ज्ञानं दिवा स्मृतम्" इति शब्दनिर्णये । "जीवेभ्यो जगतश्चैव भेदज्ञानं हरेः सदा । वास्तवं ज्ञानमुद्दिष्टं तेन मुक्तिरवाप्यते" इति षाड्गुण्ये ॥ ॥ * ॥

क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजन्ति सिद्धये ।
भूतेन्द्रियान्तःकरणोपलक्षणं[4] वेदे च तन्त्रे च त एव कोविदाः ॥ ६२ ॥

भूतेन्द्रियान्तःकरणैरुपलक्ष्यते ॥ * ॥

त्वमेक आद्यः पुरुषः सुप्तशक्तिस्तया रजःसत्वतमो विभिद्यते ।

व्याचक्षते । ननु यदि विश्वस्मिन्नवभाति तत्कथं न दृश्यतेऽस्माभिः? आह-आकाश इव । सर्वगतमपि आकाशवदेव न भात्यज्ञानाम् । अथवा आकाशे विस्तृतं ज्योतिरिव न भाति । यथाऽऽकाशे विततं चक्षुर्ज्योतिरज्ञानां न प्रतीयते तथा । तदुक्तम्—"तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम्" इति । 'दिवि आततं चक्षुरिव' इति, 'आकाशे विस्तृतं ज्योतिरिव' इति चैकोऽर्थः ।

१ "विश्वस्मिन् स्थितमपि" इति पाठान्तरम् । तत्पक्षे "विश्वस्मिन्नच भाति यत्" इत्येव मूलपाठः । स्थितमपीत्यध्याहारेण द्वितीयपादयोजनमिदम् ।

२ "सदिवाऽत्मदुःस्थया तमात्मतन्त्रम्" इत्यर्वाचीनाः । "अजामेकां लोहितशुक्लकृष्णाम्" इत्युक्तदिशा लोहितादिबहुरूपया, "बह्वीः प्रजाः सृजमानाम्" इति बहुविधजगदात्मतया परिणतया वा, मायया प्रकृत्योपादनभूतया यः स्वयमविकार एव सन् इदं विश्वं सृजति बिभर्ति भूयः क्षपयति च । यस्य च जीवजडात्मकात् जगतो भेदबुद्धिः सदिवा । दिवेति सम्यग्ज्ञानमुच्यते । तेन सम्यग्ज्ञानिनः सदिवाः । तत्सम्बन्धित्वात् सदिवा भेदबुद्धिः । सदिवानामियं सदिवा । सम्यग्ज्ञानिनां विषये भेदबुद्धिः सती यथार्थैवेत्यर्थः । स्वनिष्ठया तया भेदबुद्ध्या हे भगवंस्त्वामात्मतन्त्रमसदादिकं च विश्वं परमात्मतन्त्रं प्रतीमहि ।

३ "सदिवा सम्यग्ज्ञानम् । सम्यग्ज्ञानिविषया सत्यैवेत्यर्थः" इति प्र. पाठः । अर्थस्तु न स्फुटः । "सम्यग्ज्ञानविषये सत्येवेत्यर्थः" इति क्वचित् कोशेषु ।

४ "-लक्षितम्" इत्यर्वाचीनाः । क्रियाकलापैरिदमेव विष्ण्वाख्यं ब्रह्म यजन्ति । नेन्द्राग्न्यादीन् । कीदृशं ब्रह्म? भूतेन्द्रियान्तःकरणैरस्वतन्त्रैः यदुपलक्ष्यते ज्ञाप्यते स्वतन्त्रं नियन्तृ । त एव वेदे च वेदानुसारिपञ्चरात्रादितन्त्रे च कोविदाः । अग्न्यादिसूक्तैः अग्न्यादय एवोच्यन्त इति वदन्तस्तानेव यजन्तश्चावैदिका इत्येतत् ।

महानहं खं मरुदग्निवार्धराः सुरर्षयो भूतगणा इदं यतः[१] ॥ ६३ ॥

सुप्तशक्तिः स्वात्मन्येवाऽऽसशक्तिः—

"प्रकृतेः स्वाप उद्दिष्टो हर्यन्यस्य त्वदर्शनम्। विशेषेण हरौ चापि रतिर्ज्ञानात्मिका यतः" इति सत्यसंहितायाम् ॥ * ॥

सृष्टं स्वशक्त्येदमनुप्रविष्ट[२]श्चतुर्विधं पुरमात्मांशकेन।
अथो विदुस्त्वां पुरुषं सन्तमत्र[३] भुङ्क्ते हृषीकैर्मधु सारघं यतः[४] ॥ ६४ ॥

"अवधारणे घशब्दः स्यात् सारमात्रं तु सारघम्" इति शब्दनिर्णये ॥ * ॥

कस्त्वत्पदाब्जं विजहाति पण्डितो यत् ते पुमानव्ययमब्जकेतनः[५]।
विशङ्कयाऽस्मद्गुरुरर्चति स्म यद् विनोपपत्तिं मनवश्चतुर्दश[६] ॥ ६७ ॥

अस्मादेतद् भवतीत्युपपत्त्यपेक्षां विनाऽपि। स्वभावत एव[७] ॥ * ॥

---

१ सृष्टेः पूर्वं त्वमेक एवाऽऽसीः। "वासुदेवो वा इदमग्र आसीत्" इत्यादिश्रुत्या ब्रह्मादीनां तदाऽभावकथनात्। ननु प्रकृतिदेवता श्रीरपि किं नाऽसीत्? आसीत्। किन्तु सुप्ता। 'स्वं ह्यपीतो भवती'ति श्रुतेः सुप्तिरिति स्वाप्तिः। तेन सुप्ता स्वस्मिन् परमात्मन्येव आप्ता निरता प्रकृतिशक्तिर्यस्यासौ। तथाच साऽपि जगद्व्यापारशून्यत्वात् सुप्तेवेति हरिरेक एव जागर्ति। ततः सृष्टिकाले त्वदनुगृहीतया तया रजःसत्वतमांसि वैषम्यमापद्यन्ते। तेन महत्तत्वं ब्रह्मा च अहङ्कारतत्त्वं रुद्रश्च ततः खादीनि पञ्चभूतानि, देवा ऋषयः मनुष्यपशुपक्ष्यादयश्च भूतगणाः तत्समष्टिरूपमिदं विश्वं च यया त्वदनुगृहीतया विमिद्यते स भवानाद्यः पुरुषः।

२ "–मनुप्रविश्य चतुर्विधम्" इति क्वचित्।

३ "विदुस्तं पुरुषं सन्तमन्तर्भुङ्क्ते" इत्यर्वाचीनाः।

४ "सारघं यः" इति च। जरायुजाण्डजस्वेदजोद्भिज्जरूपेण देवमनुष्यतिर्यक्स्थावररूपेण वा चतुर्विधमिदं पुरं शरीरं स्वीयया प्रकृत्याख्यया शक्त्या सृष्टमात्मांशकेनान्तर्यामिरूपेणानुप्रविष्टः। अथ तस्मादेव त्वामत्र पुरे सन्तं पुरि शेत इति पुरुषं विदुः। उक्तं हि–"शकारस्य षकारोऽयं व्यत्ययेन प्रकीर्तितः" इति। यतश्चात्र स्थितः सन् हृषीकैर्जीवेन्द्रियैः सारमात्रं मधु सुखमादत्ते भवान् हे हृषीकेश। उक्तं हि "श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च। अधिष्ठाय मनश्चायं विषयानुपसेवते" इति। "शुभं पिबत्यसौ नित्यम्" इति च।

५ "यस्तेऽवमानव्ययमानकेतनः" इत्यर्वाचीनाः।

६ पण्डितश्चेत् कस्त्वत्पदाब्जं विजहाति। यदि जहाति न पण्डितः। यदस्मद्गुरुः अब्जकेतनः नाभिकमलनिलयः पुमांश्चतुर्मुखोऽपि ते पदाब्जं निःशङ्कमर्चति। तस्मिन् पुरुषरूपेण स्थितो हरिर्जगत् सृजतीति पुमानित्युक्तम्। तथा चतुर्दशमनुप्रभृतयः सर्वेऽपि उपपत्तिं फलाभिसन्धिं विनाऽर्चन्ति।

७ "उपपत्तिं युक्तिं विना स्वभावत एव विश्वासदार्ढ्येन" इति जीवगोस्वामिविश्वनाथचक्रवर्तिनौ च।

यत्स्पृष्टोऽहरहर्मुक्तक्लेशः शेतेऽमृताम्बुधौ ।
तावद् वेदाथ तत् तेऽङ्घ्रिं जनोऽनुस्मरते च तत्[1] ॥ ६८ ॥

अहरहः क्लेशमोक्षः सुप्तौ । तावद् वेदेत्याक्षेपो दौर्लभ्यज्ञापनार्थम् ॥ * ॥

इति चतुर्थस्कन्धे त्रयोविंशोऽध्यायः[2]

प्राचीनबर्हिषं क्षत्तः कर्मस्वासक्तचेतसम्[3] ।
नारदोऽध्यात्मतत्वज्ञः कृपालुः प्रत्यबोधयत् ॥ ३ ॥

श्रेयस्त्वं कतमद् राजन् कर्मणाऽऽत्मन ईहसे ।
दुःखहानिः सुखावाप्तिः श्रेयसामिह नेष्यते[4] ॥ ४ ॥

भोभो प्रजापते राजन् पशून् पश्य त्वयाऽध्वरे ।
सञ्ज्ञापितान् जीवसङ्घान् निर्घृणेन सहस्रशः ॥ ७ ॥

एते त्वां सम्प्रतीक्षन्ते स्मरन्तो वैशसं तव ।
सम्परेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः[5] ॥ ८ ॥

---

१ इदं पद्यमर्वाचीनैर्न पठ्यते, न व्याख्यातं च श्रीधरस्वाम्यादिभिः । येन त्वत्पदाम्बुजेन स्पृष्टः। प्राज्ञपरिष्वक्त इति यावत् । जीवोऽहरहः प्रत्यहं सुप्तौ मुक्तक्लेशः सुखामृताम्बुधौ मग्नः शेते । तत् तस्मादेव तत् तवांघ्रिस्पर्शजं सुखं शयनादुत्थितोऽपि "सुखमहमस्वाप्सम्" इत्यनुस्मरते । अथापि तवांघ्रिं तावदपि वेद किं? सुखं स्मरन्नपि तत्कारणभूतं भगवन्तं न जानाति न स्मरति च । एवं प्रत्यहं स्पर्शेऽपि बुद्धावनरोहादतिदुर्लभं भगवज्ज्ञानम् ।

२ श्रीधरस्वाम्यादिरीत्या प्रचलितभागवतपाठे प्र. भाष्यपाठे चात्र चतुर्विंशोऽध्यायः ।

३ केवलं कर्मस्वेवासक्तचित्तमित्यर्थः ।

४ "श्रेयस्तन्नेह चेष्यते" इत्यर्वाचीनाः । "श्रेयस्तन्नेहयेष्यते" इति चित्सुखीयम् । विजयध्वजीयेऽप्येतत्पाठच्छाया दृश्यते । कर्मणा कतमत् श्रेयः साध्यं फलमीहस इच्छसि । श्रेयसां फलनां मध्ये तावत् दुःखहानिः सुखावाप्तिरिति द्वयं प्रधानम् । अन्येषामत्रैवान्तर्भावसम्भवात् । तदुभयमपि इह कर्मणि नेष्यते । आत्यन्तिकदुःखहानेः सुखावाप्तेश्च मोक्ष एव लभ्यत्वात् । तस्य च "नास्त्यकृतः कृतेन" इत्यादिश्रुत्या केवलकर्मणा दुःसम्पादत्वादिति ।

५ एते तव वैशसं त्वत्कृतां हिंसां स्मरन्तः त्वां सम्परेतं मृतं सम्प्रतीक्षन्ते । कदाऽयं मरिष्यतीति प्रतीक्षमाणा वर्तन्ते । मृते च त्वयि अयोमयैरिपुभिस्त्वां छिन्दन्त्युत्थितमन्यवः ।

"यथावत्कर्म कर्तुस्तु ज्ञानसाहाय्यकारकम्[1]। अन्यथा कुर्वतः कर्म निरयाय भविष्यति। तथाऽपि कर्म निन्दन्ति न यतः कर्तुमञ्जसा। शक्यं ज्ञानफलस्यापि बहुत्वान्मोहनाय वा[2]" इति ब्रह्माण्डे ॥ * ॥

[3]आसीत् पुरञ्जनो नाम राजा राजन् बृहच्छ्रवाः।
तस्याविज्ञातनामाऽऽसीत् सखाऽविज्ञातचेष्टितः॥ १० ॥

स एकदा हिमवतो दक्षिणेष्वथ सानुषु[4]।
ददर्श नवभिर्द्वारैः पुरीं[5] लक्षणलक्षिताम् ॥ १३ ॥

"देवजीवाभिमानी तु ब्रह्मैव तु[6] चतुर्मुखः। मानुषाणां तु जीवानामभिमानी पुरञ्जनः। स तु राजा हरेः पुत्रस्त्वासुराणां कलिः स्वयम्। जीवसंसृतिवत् तस्मात् पुरञ्जनकथाऽपि तु। तस्माज्जीवसृतिज्ञप्त्यै पुरञ्जनकथां मुनिः। नारदोऽश्रावयद् विद्वान् नृपं प्राचीनबर्हिषम्। प्रायस्तु तत्कथा जीवे स्थिता प्रत्येकशोऽपि तु। प्रत्येकं यत्तु युज्येत तदुन्नेयं यथातथा। उक्तं भागवतेऽप्येतत् पुराणे यावदिष्यते। प्रत्येकशस्तु जीवानां तदन्यत् तस्य केवलम्" इति तन्त्रभागवते ॥ * ॥

यदृच्छयाऽऽगतां तत्र ददर्श प्रमदोत्तमाम्।
भृत्यैर्दशभिरायान्तीमेकैकशतनायकैः[7] ॥ २० ॥

इति तौ दम्पती तत्र समुद्य[8] समयं मिथः।
तां प्रविश्य पुरीं राजन् मुमुदाते शतं समाः ॥ ४४ ॥

---

१ "-कारणम्" इति च प्र. पाठः।

२ "मोहनाय च" इति प्र. पाठः। अञ्जसा कर्तुं न शक्यमिति क्लेशहेतुत्वात् कर्म निन्दन्ति। ज्ञानफलस्य बहुत्वात् तदपेक्षया कर्मणोऽल्पास्थिरफलत्वाच्च निन्दन्ति। क्वचिन्मोहनाय वा निन्दन्ति।

३ अत्र कथायां पुरंजनो नाम राजा जीवः, पुरं शरीरं कर्मणा जनयतीति। तस्य पुरं शरीरम्। अविज्ञातनामा सखा भगवान्। "अविज्ञाता सहस्रांशुः" इति च सहस्रनामसु। "द्वा सुपर्णा सयुजा सखाया" इति श्रूयते हि। भार्या बुद्धिः। विज्ञातचेष्टित इति वा च्छेदः। विज्ञातं चेष्टितं नियमनाख्यं येन। स्वस्यास्वातन्त्र्यात्।

४ हिमवतो दक्षिणेषु सानुष्विति कर्मभूमौ भारतवर्षे।

५ "नवभिर्द्वार्भिः पुरम्" इत्यर्वाचीनाः। "नवभिर्द्वार्भिः पुरीम्" इति पाठान्तरम्।

६ "ब्रह्मैव च" इति पाठान्तरम्।

७ ईश्वरेच्छया न स्वेच्छयोपगतां प्रमदोत्तमामिव मोहनीं बुद्धिं ददर्श। दशभिरिन्द्रियाख्यैः भृत्यैः सह। कीदृशैः? प्रत्येकं शतमित्यनन्ता वृत्तयस्तासां नायकैः।

८ "समुह्य" इत्यपि क्वचित्। समयं मिथःसङ्केतं समुद्य समुदीर्य।

"ये पुरञ्जनभृत्याद्या भार्याद्याः सर्वे एव च[1] । तेऽपि मानुषबुद्ध्यादेर्विज्ञेया अभिमानिनः । गायत्र्याद्यास्तु देवानां तेऽपि चैतेषु संस्थिताः । अलक्ष्मीद्वापराद्यास्तु आसुरास्तेऽपि[2] मानुषाः" इति च ॥ * ॥

पितृभूर्नृप[3] पुर्या द्वा दक्षिणेन पुरञ्जनः ।
राष्ट्रं दक्षिणपाञ्चालं[4] याति श्रुतधरान्वितः ॥ ५१ ॥

देवभूर्नाम[5] पुर्या द्वा उत्तरेण पुरञ्जनः ।
राष्ट्रमुत्तरपाञ्चालं[6] याति श्रुतधरान्वितः ॥ ५२ ॥

"दक्षिणश्रोत्रमार्गेण देवलोकं व्रजत्यसौ । वामश्रोत्रेण [7]पितॄणामिति वेदविदो विदुः" इति प्रवृत्तितन्त्रे ॥ * ॥

इति चतुर्थस्कन्धे चतुर्विंशोऽध्यायः[8]

---

१ "एव तु" इति क्वचित् ।

२ "असुरास्तेऽपि" इति क्वचित् । पुरञ्जनभृत्याद्या भार्याद्याश्च मानुषबुद्ध्यादेरभिमानिनः । गायत्र्याद्या देवानां बुद्ध्यादेरभिमानिनः । न केवलं देवानाम् । किन्तु एतेषु मानुषबुद्ध्यादिषु च संस्थिता अभिमानित्वेन । अलक्ष्म्याद्या असुरबुद्ध्यादेः अभिमानिनः । न केवलं तावत्, किन्तु मानुषाश्च मनुष्यबुद्ध्यादीनामभिमानिनश्च भवन्ति । तथाच देवानां केवलं गायत्र्याद्या अभिमानिनः । असुराणां केवलमलक्ष्म्याद्याः । मानुषाणां त्रयोऽप्यभिमानिनः । सत्वांशे गायत्र्याद्याः । रजोंऽशे पुरञ्जनभार्यादयः । तमोंऽशेऽलक्ष्म्यादय इति । किन्तु पुरञ्जन्यादीनां केवलं मनुष्याधिकारत्वात् तेषां विशिष्य मनुष्यबुद्ध्याद्यभिमानित्वव्यपदेश इति ।

३ "पितृहूर्नामपुर्या द्वार्दक्षिणेन" इति प्र. पाठः । 'द्वा दक्षिणेन' इति, 'द्वा उत्तरेण' इति चोत्तरश्लोके आर्षः प्रयोगः । ४ "दक्षिणपञ्चालम्" इति च । ५ "देवहूर्नाम" इति च ।

६ "–मुत्तरपञ्चालम्" इति च । श्लोकद्वयस्यायमर्थः—पुर्याः दक्षिणेन दक्षिणस्यां दिशि देहस्य वामभाग इत्यर्थः । न दक्षभागे । भाष्योदाहृतप्रमाणविरोधात् । देहस्यावस्थानभेदेन दिशां सापेक्षत्वात् । पश्चिमाभिमुखस्य दक्षिणस्यामेव दिशि वामभागो भवति । यद्वा दक्षिणेन प्रवृत्तिमार्गदक्षेण वामभागावच्छेदेन । दक्षिणमार्गः प्रवृत्तिमार्गः, उत्तरो निवृत्तिमार्ग इति हि प्रसिद्धिः । पितृभूर्नाम द्वार्द्वारमस्ति । वामकर्णद्वारमिति यावत् । पितॄणां लोकं भावयति प्रापयतीति पितृभूः । अत एव तेन द्वारेण निर्गतः दक्षिणपाञ्चालं पितृलोकं याति । श्रुतं धारयतीति श्रुतधरेण श्रोत्रेन्द्रियेण सहितः । कर्ममार्गे दक्षिणैः समर्थैः पञ्चभिः कर्मेन्द्रियैः प्राप्तुमलमिति दक्षिणपञ्चालः पितृलोकः । पञ्चाल एव पाञ्चालः । एवं देवान् प्रापयतीति देवभूर्नाम उत्तरस्यां दिशि दक्षिणभागे द्वाः । दक्षिणकर्ण इत्यर्थः । यद्वा उत्तरेणेति उत्तमभागे । दक्षिणभागो हि वामादुत्तरः । तेन द्वारेण दक्षिणश्रोत्रेन्द्रियान्वितः उत्तरपाञ्चालं देवलोकं याति । उत्तरैः ज्ञानमार्गानुसारित्वादुत्तमैः पञ्चभिः ज्ञानेन्द्रियैः प्राप्तुमलमिति उत्तरपाञ्चालो देवलोकः । ७ "पितृणामिति" इति क्वचित् ।

८ श्रीधरस्वाम्यादिरीत्या प्रचलितभागवतपाठानुसारेण प्रचलितभाष्यपाठानुसारेण चात्र पञ्चविंशोऽध्यायः ।

44

तीर्थेषु श्रुतिदृष्टेषु[1] राजा मेध्यान् पशून् वने[2] ।
यावदर्थमलं लुब्धो हन्यादिति नियम्यते[3] ॥ ६ ॥

य एवं कर्म नियतं विद्वान् कुर्वीत मानवः[4] ।
कर्मणा तेन राजेन्द्र ज्ञानेन स न लिप्यते[5] ॥ ७ ॥

अलुब्धो लोकोपकारार्थं घ्नन्नात्मार्थादधिकमपि हन्यात्—

"उपकारः सतां येन तत् कृत्वा नैव दुष्यति । अतीव निन्दितमपि [6]बहुहिंसायुगेव वा । अथवा ज्ञानिनः कर्म न दुष्टमपि लिप्यते" इत्यध्यात्मे[7] ॥ * ॥

इति चतुर्थस्कन्धे पञ्चविंशोऽध्यायः[8]

द्वाविमावनुशोचन्ति बालावसदवग्रहौ ।
[9]यो लोकशास्त्रोपनतं न राति न तदिच्छति ॥ २५ ॥

---

१ "तीर्थेषु प्रतिदृष्टेषु" इत्यर्वाचीनाः । २ "मेध्यपशून् वने" इति पाठान्तरम् ।

३ तथाचायमर्थः-न हन्यादिति परमार्थः । यद्यलं लुब्धो हन्यात् तदा श्रुतिविहितेष्वेव तीर्थेषु यज्ञादिकर्मसु मृगयायोग्यस्थानेषु वा राजैव मेध्यान् पशूनेव वन एव यावत्प्रयोजनमेव हन्यादिति नियम्यते । अत्र लुब्ध इति विशेषणेन अलुब्धश्चेत् अश्रुतिदृष्टेष्वपि अमेध्यानपि यावत्प्रयोजनं ततोऽधिकमपि लोकोपकारार्थं चेत् हन्यादिति ध्वनितम् । यथा भीमसेनेन कुरुक्षेत्रे । अध्यात्मं चायमर्थः—श्रुतिविहितेषु पुण्यकर्मसु निष्ठितः वने संसारे पवित्रानेव भोगान् यावदनिवार्यं तावदुपसेवेतेति ।

४ "कुर्वीत वा नवा" इति पाठान्तरम् ।

५ "ज्ञानेन न स लिप्यते" इत्यर्वाचीनाः । विद्वान् ज्ञानी तु नियतं कर्म दुष्टमपि कुर्वाणः कर्मणा न लिप्यते ज्ञानेनैव हेतुना । यथा भीष्मद्रोणादिहननम् । "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा" इति ह्युक्तं भगवता ।

६ "अतिहिंसायुगेव वा" इति क्वचित् । ७ "इति पाद्मे" इति क्वचित् ।

८ श्रीधरस्वाम्यादिरीत्या प्रचलितभागवतपाठानुसारेण प्र. भाष्यपाठानुसारेण चात्र षड्विंशोऽध्यायः ।

९ "यल्लोकशास्त्रो–"इत्यर्वाचीनाः । यो लोकतः शास्त्रतश्चानुमतं देयं न ददाति यश्च आदेयं नाऽदातुमिच्छति द्वाविमावसदाग्रहौ बालावपण्डितौ दानादानज्ञाः पण्डिता अनुशोचन्ति । केवलं शास्त्रविहितमपि न त्याज्यं किमुत लोकशास्त्रोभयसम्मतमिति स्फोरणायोभयग्रहणम् ।

"[1]अलौकिकं च शास्त्रीयं कर्तव्यं लौकिकं कुतः । लोकार्थं शास्त्रहा याति निरयं त्वितरः सुरान्" इति पाद्मे ॥ * ॥

इति चतुर्थस्कन्धे षड्विंशोऽध्यायः[2]

स व्यापकतयाऽऽत्मानं व्यतिरिक्ततयाऽऽत्मनि ।
विद्वान् स्वप्न इवाऽमृश्य साक्षिणं[3] विरराम ह ॥ ४० ॥

"स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभि चाकशीति" इति श्रुतिप्रसिद्धं[4] "स्वप्न इव" इति दृष्टान्तत्वेनोच्यते । स्वप्ने हि जीवस्यास्वातन्त्र्यं प्रसिद्धम् । अतस्तत्र परमेश्वराधीनत्वं सिद्धमेव[5] । अतो जीवव्यतिरिक्त ईश्वरः सिद्धः[6]—

"स्वप्नो यतो न [7]स्वतन्त्रस्ततस्तद्दर्शकः परः । जीवादन्यस्तु विज्ञेयः स विष्णुरिति धार्यताम्[8]" इति वाराहे ॥ * ॥

पञ्चेन्द्रियार्था आरामा द्वारो घ्राणादयः प्रभो[9] ।
तेजोऽबन्नानि कोष्ठानि कुलमिन्द्रियसङ्ग्रहः[10] ॥ ५७ ॥

---

१ लोकतोऽप्राप्तमपि शास्त्रीयं कर्तव्यम् । यदि शास्त्रीयं लौकिकं च लोकतोऽपि प्राप्तम्, तदा किमु वक्तव्यम् । किन्तु शास्त्राननुमतं लोकतः प्राप्तमपि न कर्तव्यम् ।

२ प्र. पाठानुसारेणात्र सप्तविंशोऽध्यायः ।

३ "इवाऽमर्शसाक्षिणम्" इत्यर्वाचीनाः । साक्षिणं स्वात्मानं स्वप्न इव स्वप्नदर्शने यथा जीवो न स्वतन्त्रस्तथा सर्वदाऽपि इति विमृश्य आत्मनो भगवदधीनतां निश्चित्य अणावात्मनि व्यापकतयाऽत एव व्यतिरिक्ततया जीवविलक्षणत्वेन परमात्मानं विद्वान् देहगेहादिभ्यो विरराम । परमात्मन्येव विशेषतो रेमे ।

४ "श्रुतिप्रसिद्धः" इति प्र. पाठः ।

५ "–धीनत्वं प्रसिद्धमेव" इति च ।

६ "ईश्वरः प्रसिद्धः" इति क्वचित् ।

७ "स्वतन्त्रस्तत्र तद्दर्शकः" इति प्र. पाठः । "स्वतन्त्रस्तथा तद्दर्शकः" इति क्वचित् । अत्र पर इत्युत्तमः । न भिन्नः । जीवादन्य इति पुनरुक्तेः ।

८ "विष्णुरवधार्यताम्" इति प्र. पाठः ।

९ "द्वारः प्राणा नव प्रभो" इत्यर्वाचीनाः ।

१० अत्र "गोलकेन्द्रियसङ्ग्रहः" इति विजयध्वजीये पठ्यते । असङ्गतत्वात् तत् प्रक्षिप्तम् । तदनुसारेण तमेव पाठमङ्गीकृत्य व्याचक्षाणा अन्ये भ्रान्ताः । तथाचायमर्थः–पञ्चेन्द्रियार्थाः शब्दादय एवास्मिन् पुरे पञ्चाऽऽरामा उच्यन्ते । घ्राणादयो नव द्वाराणि । नासापुटद्वयम्, चक्षुर्द्वयम्, श्रोत्रद्वयम्, मुखम्, शिश्नगुदौ चेति नव । तेजोऽबन्नानि त्रीणि कोष्ठानि त्रिकोष्ठकमिति पूर्वश्लोकोक्तानि । इन्द्रियसङ्ग्रह इन्द्रियगोलका । समुदायैकवचनम् । षड्गोलकाः षट्कुलानि ।

इन्द्रियाणि यत्र सङ्गृह्यन्ते सा गोळकेन्द्रियसङ्ग्रहः[1] ॥ * ॥

अहं भवान् नचान्यस्त्वं त्वमेवाहं विचक्ष्व भोः ।
न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि[2] ॥ ६२ ॥

"जीवसत्ताप्रदत्वाच्च सदृशत्वाच्च केशवः । कथ्यते तदभेदेन नतु जीवस्वरूपतः" इति च ॥ * ॥

इति चतुर्थस्कन्धे सप्तविंशोऽध्यायः[3]

---

[4]आकूतिर्विक्रमो बाह्यो मृगतृष्णां प्रधावति ।
एकादशेन्द्रियचमूः पञ्चसूनाविनोदकृत् ॥ २० ॥

"सुखवद् दूरतो दृश्यं तत्काले दुःखमेव यत् । मृगतृष्णेत्यतः प्राहुर्भोगं वैषयिकं बुधाः[5]" इति शब्दनिर्णये ॥ * ॥

---

१ सा गोळका इन्द्रियसङ्ग्रहः इति च्छेदः । अत एव "स गोलकेन्द्रियसङ्ग्रहः" इति प्र. पाठः प्रामादिकः ।

२ अहं भवान् भवति स्थितः । त्वं चाहं मय्याश्रितः । अतोऽनन्यस्त्वम् । आवयोरीषदप्यन्तरं परमात्माऽन्यः जीवोऽपि परमात्मनिरपेक्षः स्वतन्त्रोऽन्य इतीदृशं पृथक्त्वं कवयः कदाचिदपि न पश्यन्ति । तथाहि श्रुतिः— "योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद" इति ।

३ प्र. पाठेऽष्टाविंशोऽध्यायः ।

४ पञ्चविक्रमः पुरञ्जनो मृगयां चचारेति पञ्चविंशेऽध्याये प्रस्तुतम् । तत्र के पञ्च विक्रमाः का च मृगयेत्युच्यते— आकूतिः । आकूतिरिति पञ्चकर्मेन्द्रियगण इति वदन्ति । एकादशेन्द्रियचमूरिति गतमेतत् । वस्तुतस्तु आकूतिरित्यभिलाषः । बाह्यशब्दस्पर्शरूपरसगन्धविषयोऽभिलाष एव पञ्चविक्रमाः । बाह्यस्पर्शेषु सक्तिरिति यावत् । उक्तं हि-"बाह्यस्पर्शेष्वसक्तात्मा" इति । आत्मविषयाभिलाषस्यापेक्षितत्वाद् बाह्य इति विशेषणम् । एवं मृगतृष्णैव मृगया । मृगतृष्णाऽपि का? विषयभोग इत्येतत् । विषयाभिलाषविक्रान्तो विषयभोगमनुधावतीत्यर्थः । एकादशचमूनाथ इत्युक्तम् । कास्ता एकादश चम्वः? एकादशेन्द्रियचमूः । पञ्चविधसूनामिव पञ्चेन्द्रियैरहितविषयसेवां भ्रान्त्या विनोदबुद्ध्या करोति । मृगयायां पञ्चविधपञ्चनखहिंसामिव जीवनार्थं पञ्चविधहिंसाकृदिति वा । तदुक्तम्— "पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः । कण्डनी चोदकुम्भश्च" इति । उपस्कर इति सम्मार्जनी ।

५ "मृगतृष्णावत् निःसारां मृगयाम्" इति शुकदेवः ।

'दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु ।
जीवस्य न व्यवच्छेदः स्याच्चेत् तत् तत्प्रतिक्रिया ॥ ३२ ॥

तत्प्रतिक्रियाऽपि तद् दुःखम्[2] ॥ * ॥

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ।
मनसा लिङ्गभूतेन[3] स्वप्ने विचरतो यथा ॥ ३५ ॥

"संसृतेः स्वप्नसाम्यं तु यथार्थज्ञानवर्जनम्" इति च । "जाग्रत्यविद्यमानं तु देहात्मत्वं तु केवलम्[4] । अविद्यमानं स्वप्ने तु जाग्रत्त्वज्ञानमेव च" इति षाड्गुण्ये ॥ * ॥

प्रजापतिपतिः साक्षाद् भगवान् गिरिशो मनुः ।
दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः ॥ ४२ ॥

मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
भृगुर्वसिष्ठ इत्येते मदन्ता ब्रह्मवादिनः ॥ ४३ ॥

"[5]प्रजापतिपतिर्ब्रह्मा विरिञ्चश्चेति कथ्यते" इति शब्दनिर्णये ॥ * ॥

---

१ "दुःखेऽल्पे कतरेणापि" इति क्वचित् प्राचीनकोशे । अर्थस्तु न स्फुटः । आधिदैविकेषु आधिभौतिकेषु आध्यात्मिकेषु च दुःखेषु अन्यतरेण विच्छेदेऽप्यन्यतरेणाविच्छेद एवेति नान्ततो जीवस्य दुःखच्छेदः । ननु प्रतिक्रियया व्यवच्छिद्येत । नेत्याह–स्याच्चेत् । तस्य दुःखस्य प्रतिक्रिया स्याच्चेदपि साऽपि प्रतिक्रिया तद् दुःखमेव । प्रतीकारोऽपि दुःखरूप एवेति किं तेन साध्यते? तदिदमेकदुःखहानाय दुःखान्तरस्य स्वागत दीयते । अत्र 'तत्तत्प्रतिक्रिया' इति समस्तं पदमित्यभ्युपेत्य यद् विजयध्वजीयं व्याख्यानं तद्भाष्यवचनविरोधादसङ्गतं प्रक्षिप्तमिति स्फुटम् ।

२ "तत्प्रतिक्रियाऽपि दुःखम्" इति प्र. पाठः प्रामादिकः । व्याख्येयस्य तदितिपदस्य प्रतीकग्रहणपूर्वकं व्याख्यानस्यौचित्यात् ।

३ "लिङ्गरूपेण" इति पाठान्तरम् । देहात्मत्वादिरूपेऽर्थेऽविद्यमानेऽपि तादृशभ्रान्तिरूपा न निवर्तते संसृतिर्यावदपरोक्षम् । स्वप्ने विचरतो जीवस्य जाग्रत्त्वरूपेऽर्थेऽविद्यमानेऽपि सा भ्रान्तिर्न निवर्तते । जागरित एव जानाति स्वप्नस्य स्वप्नत्वम् । एवं तत्वज्ञानजागरणे सति संसारस्य यथास्थितिर्ज्ञायेत । केन कारणेन? मनसा हेतुभूतेन ।

४ "देहात्मत्वादि केवलम्" इति प्र. पाठः ।

५ दक्षाद्याः प्रजापतयः । तत्पतिर्ब्रह्मा । मूले मदन्ता इति नारदान्ताः । नारदवचनं हीदम् ।

शब्दब्रह्मणि दुष्पारे चरन्त उरुविस्तरे ।
मन्त्रलिङ्गैर्व्यवच्छिन्नं भजन्तो न विदुः परम्[१] ॥ ४५ ॥

मन्त्रलिङ्गैर्व्यवच्छिन्नं वेदशब्दोक्तमात्रम्[२] ।

"वेदो वदन्नपि हरिं न सम्यग् वक्ति कुत्रचित् । नाऽरोहयत्यनुभवमप्रसिद्धस्वरूपतः । [३]तथाऽप्यनुभवारोहः प्रसन्ने केशवे भवेत् । किञ्चिदेव सुलम्यक् च स्वयं त्वनुभवत्यमुम्" इति वाराहे[४] ॥ * ॥

[५]यदा यस्यानुगृह्णाति भगवानात्मभावितः ।
स जहाति मतिं लोके वेदे च परिनिष्ठिताम्[६] ॥ ४८ ॥

"यदा त्वनुभवी भूयाच्छब्दमात्रानुरोधनम् । त्यक्त्वाऽथ तं विदुः प्राज्ञास्त्यक्तवेद इति स्म ह । यदैवं त्यक्तवेदः स्यादथास्मान्मुच्यते भयात् । प्रायस्तु वैदिका एव रुद्राद्या अपि वै पुरा । वैदिकस्त्यक्तवेदश्च ब्रह्मैवैकः प्रजापतिः । ततस्तु केशवं भक्त्या सम्पूज्य बहुजन्मसु । त्यक्तवेदत्वमापन्नाः[८] प्रसादात् परमेष्ठिनः" इति महासंहितायाम् । "केवलं वेदशब्देन जानन् वैदिक उच्यते । वेदं विनाऽप्यनुभवाज्ञानंस्तु त्यक्तवैदिकः[९]" इत्यध्यात्मे । "तत्वं वेदानुसारेण चिन्तयन् वैदिको भवेत् । वेद ऊहामनुसरेद् यस्य स त्यक्तवैदिकः" इति षाड्गुण्ये ॥ * ॥

---

१ शब्दरूपे ब्रह्मणि वेदे, अर्थतो दुष्पारे, शब्दतोऽप्युरुविस्तरे, चरन्तः उपर्युपरि प्लवमानाः इन्द्रादिमन्त्रवर्णैः वज्रधरत्वादिलिङ्गैः व्यवच्छिन्नमापाततः प्रतीतमर्थमेव भजन्तः वेदपरमार्थं परमात्मानं न विदुरिति । लीनार्थगमकैर्मन्त्रैरिति वा ।

२ "-शब्दोक्तमात्रकम्" इति प्र. पाठः प्रामादिकः ।

३ "अथाप्यनुभवा–" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

४ "इति च वाराहे" इति क्वचित् ।

५ "यदा यमनुगृह्णाति" इति प्र. पाठः । इतः पूर्वतनं च श्लोकद्वयमर्वाचीनैर्न पठ्यत इति श्रीधरस्वाम्यादिरीत्याऽयं षट्चत्वारिंशः श्लोकः ।

६ आत्मनि मनसि आत्मत्वेन स्वामित्वेन भावितो भगवान् यदा यस्य यं तथा भावयितारमनुगृह्णाति तदा स पुरुषः भगवदेकनिष्ठः लोकनिष्ठां मतिं जहाति । भगवद्भावितचेतस्त्वात् तेन भगवदनुभवबलेन इन्द्रादिमात्रपरोऽयं स्वर्गादिमात्रफलोऽयमिति वेदनिष्ठां मतिं च जहाति । स्वानुभवानुकूलतया समस्तवेदस्य भगवत्परतां निर्णयते । उक्तं हि—"शास्त्रार्थयुक्तानुभवः प्रमाणं तूत्तमं मतम्" इति ।

७ "यदैव" इति प्र. पाठः ।

८ त्यक्तवेदत्वमापन्ना रुद्राद्याः ।

९ त्यक्तवेद एव त्यक्तवैदिकः । वेदानां समूहो वा वैदिकम् ।

स त्वं विचक्ष्व[1] मृगचेष्टितमात्मनोऽन्त-
श्चित्तं नियच्छ हृदि कर्णधुनिं च चित्तिम्[2] ।
[3]जह्यङ्गनाश्रममसत्तमयूथगाथं
प्रीणीहि हंसशरणं विरम क्रमेण[4] ॥ ५७ ॥

"चित्तिर्बुद्धिरिति ज्ञेया चित्तं तु स्मृतिकारणम्" इति शब्दनिर्णये ॥ * ॥

[5]एकं पञ्चविधं लिङ्गं त्रिवृत् षोडशविस्तरम्[6] ।
एष चेतनया युक्तो जीव इत्यभिधीयते[7] ॥ ७६ ॥

"प्राणेन्द्रियान्तःकरणभेदेन त्रिविधं मतम् । पञ्चपञ्चैव ते सर्वे प्राणा[8] बुद्धीन्द्रियाणि च । कर्मेन्द्रियाणि च तथा तस्मात् पञ्चविधं स्मृतम् । लिङ्गं षोडशकं प्राहुर्मनसा[9] सह तत् पुनः" इति ब्राह्मे ॥ * ॥

[10]भक्तिः कृष्णे दया जीवेष्वकुण्ठज्ञानमात्मनि ।
[11]यर्हि स्यादात्मनो भूयादपवर्गस्तु संसृतेः ॥ ८२ ॥

---

१ "विचक्ष्य" इत्यर्वाचीनाः ।

२ "कर्णधुर्नीं च चित्ते" इति च । "-धुर्नीं च चित्तिम्" इति क्वचित् ।

३ "जह्यङ्गनाश्रम-" इत्यर्वाचीनाः ।

४ स त्वं लुब्धकगृहीतमृगवद्दयनीयमात्मनश्चेष्टितं विचक्ष्व । चित्तं हृद्यन्तःस्थे हरौ नियच्छ । तमेव स्मर । यतश्चित्तं स्मरणकारणम् । संसारजलधौ कर्णधुनिं कर्णधारमिव स्थितां चित्तिं व्यवसायात्मिकां बुद्धिं च हरौ नियच्छ । असत्तमानां यूथस्य गाथा लोकवार्ता यत्र तादृशमङ्गनाश्रमं जहि । अलं लम्पटतया । परमहंसाश्रयं भगवन्तं प्रीणीहि । क्रमेण संसाराद् विरम ।

५ "एवम्" इत्यर्वाचीनाः ।   ६ "-विस्तृतम्" इति च ।

७ एकमेव लिङ्गशरीरं त्रयाणां समष्टिरिति त्रिवृदित्युच्यते । कानि त्रीणि? प्राणाः ज्ञानकर्मेन्द्रियाणि अन्तः-करणं चेति । प्राणाः पञ्च । ज्ञानेन्द्रियाणि पञ्च । कर्मेन्द्रियाणि च पञ्चेति प्रत्येकं पञ्चपञ्चविधत्वात् एकमेव लिङ्गं त्रिवृत् पञ्चविधमित्युच्यते । एवं पञ्चकत्रिकं अन्तःकरणेन सहितमिति लिङ्गं षोडशविस्तरम् । यद्यप्यन्तःकरणं च पञ्चविधम् । अत्र त्वेकत्वेनैव गणना । तदेवमेव षोडशविधलिङ्गावृतः चिच्छक्त्या च युक्तो देही जीव इत्यभि-धीयते ।

८ "प्राणबुद्धीन्द्रियाणि च" इति प्र. पाठः प्रामादिकः ।   ९ "प्राह मनसा" इति क्वचित् कोशे ।

१० अयं श्लोकोऽर्वाचीनैर्न पठ्यते । न व्याख्यातश्च श्रीधरस्वाम्यादिभिः ।

११"यदि स्यादात्मनो-" इति विजयध्वजीये पठ्यते । आत्मनि स्वस्वरूपेऽकुण्ठज्ञानम् । आदावात्मसाक्षा-त्कारः ज्ञानानन्दरूपोऽहं भगवत्प्रतिबिम्बभूत इति । (तदनु चावान्तरबिम्बभूतानां ब्रह्मान्तानां स्वोत्तमानां भागव-

"देहादिव्यतिरेकेण चिद्रूपोऽहमिति स्फुटम् । सदैवानुभवो भक्तिर्विष्णौ तद्दर्शनादनु । यस्यासौ मुच्यते क्षिप्रं संसारान्नात्र संशयः" इति हरिवंशेषु ॥ * ॥

[5]अदृष्टं दृष्टवन्नङ्क्षेद् भूतस्वप्नवदन्यथा ।
भूतं भवद् भविष्यच्च सुप्तं सर्वरहो रहः ॥ ८३ ॥

"संसारस्थमिदं सर्वमनित्यत्वाद् वृथा यतः । अतः प्राहुः स्वप्नसमं प्राज्ञा जगदिदं मृषा" इति विष्णुसंहितायाम् । "सुषुप्तिस्वप्नयोश्चैव स्वर्गव्योम्नोस्तथैव च । अन्योन्यनामता ज्ञेया मनोबुद्ध्योस्तथैव च" इति शब्दनिर्णये ।

अतो भूतं भव्यं भविष्यच्च[6] स्वप्न इत्यर्थः ।

"रहो ब्रह्म तथा यक्षं[7] स्वः सत्यमिति गीयते"[8] इति च ॥ * ॥

इति चतुर्थस्कन्धेऽष्टाविंशोऽध्यायः[9]

तानां विषये यथायोग्यं भक्तिरिति प्रमेयं मध्येऽनुसन्धेयम् । तदुक्तम्- "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ इति" ।) तदनु स्वबिम्बभूते भगवति परमा भक्तिः । ज्ञानमार्गे विभ्रमत्सु साधुजीवेषु दया च यर्हि स्यात् तर्हि संसृतेरपवर्गः करगतः । तुशब्दः मोक्षेऽपि योग्यताभेदेन ज्ञानादिषु तारतम्यविशेषमाह । एतेन आदावात्मसाक्षात्कारः तदनु परमात्मसाक्षात्कार इति प्रमेयं स्पष्टमुदितम् । तदुक्तम्—"प्राप्तानां षोडशीं कलाम् । तुरीयं दृश्यते" इति । षोडशी कला जीवस्वरूपम् । पञ्चदशकलाभ्यो भिन्नतया तदपरोक्षदर्शनमेव तत्प्राप्तिः ।

५ अयमपि श्लोकोऽर्वाचीनैर्न पठ्यते । "भूतं स्वप्नवदन्यथा" इति विजयध्वजीये । दृष्टं गजतुरगादि यथा तथाऽदृष्टं स्वर्गादि च नश्वरमेव । न किमपि नित्यम् । यथा भूतपूर्वः स्वप्नः स्वप्नादुत्थितस्याकार्यकारित्वाद् वृथैव भवति तथा जाग्रदादिकमपि कालान्तरेऽकार्यकारि भवति । ननु कदाचिन्नित्यो भोगो भविष्यति? नेत्याह—भूतं भवद् भविष्यच्च । त्रैकालिकमपि भूतदृष्टान्तेन सुप्तं स्वप्नसमं निश्चीयते । सुप्तस्वप्नशब्दयोः पर्यायत्वं भाष्योदाहृतप्रमाणे स्फुटम् । तर्हि नित्यं किम्, यत् जीवस्यान्ततः शरणम्? आह—सर्वरहो रहः । वेदेषु रहस्यतमं यद् रहो ब्रह्म प्रतिपाद्यते तदेवैकं नित्यं परमसत्यं च ।

६ "भूतं भविष्यच्च" इति प्र. पाठः प्रामादिकः ।

७ एतेन "किमेतद् यक्षमिति" इति श्रुतिवचनं व्याख्यातम् । "यक्षः" इति क्वचित् पठ्यते । "यज्ञः" इति प्र. पाठः । क्वचित् कोशेषु च तथा ।

८ "सत्यमिति धीयते" इति क्वचित् । एतेन जगदसत्यमिति क्वचिच्छास्त्रव्यवहारो व्याख्यातः । "सत्यस्य सत्यम्" इति च दशमस्कन्धे ।

९ प्र. पाठेऽत्र एकोनत्रिंशोऽध्यायः ।

प्रचेतसोऽन्तरुदधौ पितुरादेशकारिणः ।
जपयज्ञेन तपसा पुरञ्जनमतोषयन्[1] ॥ ३ ॥

"पुरेषु त्वञ्जनाज्जीवः पुरञ्जन इतीरितः । पुराणां जननाद् विष्णुर्व्यञ्जकत्वं द्वयोरपि[2]" इति तन्त्रभागवते ॥ * ॥

दिव्यवर्षसहस्राणां सहस्रममितौजसः[3] ।
भौमान् भोक्ष्यथ भोगान् वै दिव्यांश्चानुग्रहान्मम ॥ १७ ॥

दिव्यवर्षसहस्राणामिति सहस्रशब्दो बहुलवाची[4]—

"मानुषाणां वत्सराणां लक्षद्वादशकं पुरा । प्रचेतोभिरियं पृथ्वी पालिताऽव्याहतेन्द्रियैः[5]" इति ब्रह्माण्डे ॥ * ॥

न व्यवह्रियते यज्ञो[6] ब्रह्मैतद् ब्रह्मवादिभिः ।
न मुह्यन्ति न शोचन्ति न हृष्यन्ति यतो गताः ॥ २० ॥

---

१ "निरञ्जनमतोषयन्" इति वीरराघवः । रुद्रोक्तस्तोत्ररूपजपयज्ञेन तपसा च प्रचेतसः पुरञ्जनमतोषयन् । पुरेषु अंक्ते सक्तो भवतीति पुराञ्जन एव पुरञ्जनो जीवः । तं पुरञ्जनं स्वात्मानमतोषयन् संसारेऽलम्बुद्धियुक्तमकुर्वन् । "सन्तोषोऽलम्बुद्धिः" इति भाष्यकृदेवान्यत्राऽह । तेन च पुरं शरीरं विश्वं वा जनयतीति पुरञ्जनं हरिमतोषयन् अप्रीणयन्निति । यद्वा पुरे शरीरे अञ्यते अभिव्यज्यते इत्येकयैव निरुक्त्या पुरञ्जनो जीवः परमात्मा च ।

२ "तयोरपि" इति प्र. पाठः प्रामादिकः । यदि पुरेष्वात्मानं व्यञ्जयति इति व्यञ्जकत्वं, व्यक्तत्वमिति यावत्, अञ्जनशब्दार्थः, नतु सक्तत्वम्, तदा इयं निरुक्तिः द्वयोरपि जीवेश्वरयोः समाना ।

३ "–महतौजसः" इति पाठान्तरम् । दिव्यवर्षसहस्राणां सहस्रमिति बहूनि दिव्यवर्षाणीत्यर्थः । तथा च समासचतुष्टयानि ३३३३ दिव्यवर्षाणि प्रचेतसां भोगकालः । भाष्योदाहृतब्रह्माण्डवचनसंवादात् । अत एव विश्वनाथचक्रवर्ती व्याचख्यौ–"दिव्यानां वर्षसहस्राणां संबन्धिनं कालमभिव्याप्य सहस्रमनन्तान् भोगान् भोक्ष्यथ । सहस्राणामिति कपिञ्जलानालभेतेतिवत् त्रयाणामित्यर्थः" इति ।

४ "बहुत्ववाची" इति प्र. पाठः ।

५ एतेन अमितौजस इति व्याख्यातम्, अपरिमितं अव्याहतं ओज इन्द्रियबलं येषामिति । अहतौजस इति पाठे तु स्फुटं व्याख्यानम् ।

६ "नव्यवद् हृदये यज् ज्ञो–" इत्यर्वाचीनाः । "न व्यवच्छिद्यते यज्ञो–" इति केचित् । यतो यद् ब्रह्म गताः प्राप्ताः, साक्षात्कृतब्रह्माण इत्येतत्, कदाऽपि न मुह्यन्ति, अत एव विपदि न शोचन्ति, सम्पदि न हृष्यन्ति, तैर्ब्रह्मवादिभिरपि यज्ञाख्यं ब्रह्म यथाऽनुभवं न व्यवह्रियते अवाङ्मनसगोचरत्वादिति । "यतो वाचो निवर्तन्ते" इति ह्युक्तम् ।

45

यज्ञो ब्रह्म विष्ण्वाख्यं ब्रह्म यथानुभवं न व्यवह्रियते—

"सूक्ष्मेण मनसा विज्ञो वाचा वक्तुं न शक्नुमः" इति भारते ॥ * ॥

शुद्धाय शान्ताय नमः स्वनिष्ठ[1]मनस्यपार्थे विलसद्द्वयाय ।
नमो जगत्स्थानलयोदयेषु गृहीतमायागुणविग्रहाय ॥ २३ ॥

अनिष्ठमनसि[2]—

"सम्यगस्थितबुद्धीनां[3] द्वितीयं दृश्यते हरेः । सम्यक्[4] सुस्थितबुद्धीनामिदं सर्वं हरेर्वशे" इति च । "नित्यं गृहीताः सत्वाद्या विग्रहाश्च त्रयः सदा । ज्ञानानन्दात्मकास्ते तु विग्रहा निर्गुणास्तथा । द्वौ तत्र ब्रह्मरुद्रस्थावेको वैकुण्ठधामगः" इति प्रवृत्तिसंहितायाम्[5] ॥ * ॥

नमो विशुद्धसत्त्वाय हरये हरिमेधसे ।
वासुदेवाय कृष्णाय प्रभवे सर्वसात्वताम्[6] ॥ २४ ॥

"हरणाज्ज्ञानरूपत्वाद्धरिमेधा हरिः[7] स्मृतः" इति च । "हरिः सर्वगुणात्मत्वात् सत्व इत्यभिधीयते" इति षाड्गुण्ये । * ॥

इति चतुर्थस्कन्ध एकोनत्रिंशोऽध्यायः[8]

---

१ "स्वनिष्ठया मनस्यपार्थम्" इत्यर्वाचीनाः । "स्वनिष्ठया मनस्यपार्थे विलसद्द्वयात्मने" इति वीरराघवः । भगवानेक एवाद्वितीयः स्वतन्त्रपुरुष इति यथार्थप्रतीतिः । तदभावो द्वयभ्रमः । नाहं भगवदधीनः किंतु स्वतन्त्र एवेत्यादिरूपः । यथा हिरण्यकशिपोः । सम्यक् भगवन्निष्ठारहितेऽपार्थे मनसि विलसद् द्वयं येन तस्मै नमः । जगत्स्थित्याद्यर्थं गृहीताः प्रकृतिगुणाः सत्वादयो येन । गृहीता ज्ञानानन्दमयविग्रहाश्च येन ।

२ "सु अनिष्ठमनसि" इति प्र. पाठः । क्वचित् कोशेषु च ।

३ "अनवस्थितबुद्धीनाम्" इति प्र. पाठः । क्वचित् कोशेषु च ।

४ "सम्यक् स्वस्थितबुद्धीनाम्" इति मुद्रितः पाठः । न क्वापि कोशेषु ।

५ "प्रवृत्तसंहितायाम्" इति प्र. पाठः ।

६ विशुद्धसत्त्वाय विशुद्धगुणरूपाय, हरिमेधसे संसारहराय ज्ञानरूपाय च । यस्य मेधा प्रज्ञा ज्ञानिनां संसारहारिणीति वा । अत एव सात्वतां गुणवतां भागवतानां प्रभवे । यद्यपि सर्वेषां प्रभुः न केवलं सात्वतानाम् । अथापि सात्वतास्तं प्रभुं जानन्ति, नान्ये ।

७ "-मेधा विभुः स्मृतः" इति पाठान्तरम् ।

८ प. पाठेऽत्र त्रिंशोध्यायः ।

[1]दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा ।
प्रतीच्यां दिशि वेलायां सिद्धोऽभूद् यत्र जाजलिः ॥ २ ॥

"पारिव्राज्यं[2] ब्रह्मसत्रं[3] न्यास इत्यभिधीयते" इत्यभिधानम् ।

सर्वभूतात्मनि हरौ मेधा यत्र तद् ब्रह्मसत्रं[3] सर्वभूतात्ममेधः ।

"हरिमेधस्तु[4] सन्न्यासो हरौ मेधाऽत्र यद् भवेत्" इति षाड्गुण्ये ॥ * ॥

श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थितः[5] ।
सर्वेषामपि भूतानां हरिरात्माऽऽत्मदः प्रियः ॥ १३ ॥

तावत्पर्यन्तमेव फलमित्यवधिः ॥ * ॥

एतत् परं तज्जगदात्मनः पदं[6] सकृद् विभातं सवितुर्यथा प्रभा ।
यदाऽसवो जाग्रति सुप्तवृत्तयो द्रव्यक्रियाकारकविभ्रमात्ययः[7] ॥ १६ ॥

"आत्मभावः शरीरे तु द्रव्यभ्रम उदाहृतः । [8]क्रियाभ्रमस्त्वहं कर्ता मदीयानीन्द्रियाणि तु । कारकभ्रम इत्युक्तस्त एते विभ्रमा यदा । श्वासादिवृत्तिलोपेन प्राणा

---

१ सर्वभूतानामात्मनि अन्तर्यामिणि मेधा प्रज्ञा यत्र तेन ब्रह्मसत्रेण सन्न्यासेन दीक्षिताः स्वीकृतसन्न्यासाश्रमा प्रचेतसः । प्रतीच्यां दिशि समुद्रवेलायाम् । यत्र पूर्वं जाजलिनामा मुनिः सिद्धोऽभूत् ।

२ "पारिव्रज्यम्" इति क्वचित् । ३ "ब्रह्मसूत्रम्" इति क्वचित् । ४ हरिमेधास्तु" इति क्वचित् ।

५ "–रर्थतः" इत्यर्वाचीनाः । श्रेयसामर्थितोऽभिलषितोऽवधिः सर्वश्रेयसां परा काष्ठा परमात्मा हि । तावत्पर्यन्तमेव ह्यर्थनीयं नाम । नहि ततोऽप्यधिकं फलं किंचित् जीवेन प्राप्यमर्थ्यं वा । यतोऽन्ये प्रसादिता यत्किंचिद् दद्युः । अयं तु स्वात्मानमेव ददाति । अतोऽयं सर्वेषामात्माऽन्तर्यामी हरिः परमप्रियः । तथाह्युक्तम्–"स्वात्मप्रदानमधिकं पवनात्मजस्य कुर्वन् समाश्लिषदमुं परमाभितुष्टः" इति ।

६ "एतत् पदं तज्जगदात्मनः परम्" इति च पाठः ।

७ "यथाऽसवो जाग्रति सुप्तशक्तयो द्रव्यक्रियाज्ञानभिदाभ्रमात्ययः" इत्यर्वाचीनाः । "–द्रव्यक्रियाकारकविभ्रमात्यये" इति क्वचित् । केचिदिदं पद्यमेव न पठन्ति । अयमर्थः । यदा योगबलेन प्राणायामादिना श्वासादिवृत्तिनिरोधेन सुप्तवृत्तयोऽसवः प्राणाः जाग्रति भगवति उद्युञ्जते । स्थूलोऽहमित्यादिः प्रतीतिर्देहात्मनोरविवेकनिबन्धनैवेति द्रव्यभ्रमो भवति । अहं कर्ता नान्यो मत्तः कश्चनेश्वरो नाम कारयितेति क्रियाभ्रमः । ममेमानीन्द्रियाणि मदधीनानीति कारकभ्रमः । यदा च त्रयाणामेषां विभ्रमानामत्ययः, तदा तदेतत् जगदात्मनो जगन्नाथस्य परमं पदं सवितुः प्रभेव चक्षुः क्षिपत् सकृत् विभातम्, सकृच्च मेघच्छन्नेऽह्नीव न विभातं स्यात । क्वचिद् भाति, क्वचिन्न भातीत्येतत् । उक्तं हि "प्राप्तानां षोडशीं कलाम् । तुरीयं दृश्यते क्वापि" इति ।

८ अहं कर्ता इति क्रियाभ्रमः । मदीयानीन्द्रियाणि इति तु कारकभ्रम उक्तः ।

उद्योगिनस्तदा[1]। विलीयन्ते प्राणभक्त्या नित्यास्वापवतां[2] स्फुटम् । उद्योग एव जाग्रत् स्याद् योगिनां मुक्तिसिद्धये" इत्यध्यात्मे ॥ * ॥

[3]तेनैवमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशम् ।
स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा ॥ १८ ॥

"[4]पूर्णो विष्णुः स एवैक इति भावो य ईरितः। आत्मैकभाव इति तं विदुर्ब्रह्मात्मदर्शिनः[5]" इति सत्यसंहितायाम् ॥ * ॥

निरस्तसङ्कल्पविकल्पमद्वयं द्वयापवादोपरमोपलम्भनम् ।
अनादिमध्यान्तमजस्रनिर्वृतिं संज्ञप्तिमात्रं भजतामुया दृशा[6] ॥ १९ ॥

---

१ यदा श्वासादिवृत्तिलोपेन प्राणा उद्योगिनः तदा एते विभ्रमा विलीयन्ते। नन्वयं प्राणविजयः कथं साध्यते प्राणभक्त्या। अत एव ये प्राणभक्त्या जितप्राणाः। ते नित्यं भगवदुद्युक्ता इति जाग्रदेव तेषां सदाऽपि । न स्वापः कदाऽपि। नित्यमस्वापवतां च तेषां योगिनां सा भगवदुद्योगरूपा जाग्रदवस्था मुक्तिं साधयितुमलम् । "उद्योगिनस्तथा" इति क्वचित् पठ्यते। ततः परं च "विलीयन्ते-" इत्यादि "इत्यध्यात्मे" इत्यन्तं न पठ्यते ।

२ "नित्यं स्वापवतां" इति प्र. पाठः। "नित्यस्वापवताम्" इति क्वचित् ।

३ "तेनैकमात्मान-" इति पाठान्तरम्। यतो हरिरेव सर्वोत्तमः सर्वकर्ता सर्वपुरुषार्थोत्तमत्वेन सर्वैरभ्यर्थनीयः तेन एवंगुणविशिष्टं तं परमात्मानं आत्मैकभावेनाद्धा भजध्वम्। आत्मा परिपूर्णः एक एवेति भाव आत्मैकभावः। आत्मनः मनसः आत्मनि वा परमात्मनि एकभावेन अनन्यभावेनेति वा। उक्तं हि—"अनन्याश्चिन्तयन्तो माम्" इति, "एकभक्तिर्विशिष्यते" इति च। कीदृशम्? अशेषदेहिनामात्मानमन्तर्यामिणं बिम्बभूतम् । प्रधानमिति द्रव्यं कर्म च। पुरुष इति जीवः स्वभावश्च । तेन द्रव्यकर्मकालस्वभावजीवानां विनियामकम्- कालान्तर्यामिणं जगत्संहारकत्वात् कालनामकं च। प्रधानान्तर्यामिणं सर्वप्रधानं जगत्सृष्टिकारणं च। सर्वप्राणिपुरेषु शरीरेषु स्थित्वा पुरुषनामानं स्थितिहेतुं च। स्वमहिम्ना निरस्तत्रैगुण्यं भक्तानां च।

४ "आत्मैकभावेन सर्वेषामात्मनामेकोऽन्तरात्मेति बुद्ध्या" इति वीरराघवः। "आत्मनो यो भावान्तरामिश्रो भावो दास्यादीनामेकतरस्तेन" इति क्रमसन्दर्भे जीवगोस्वामी। "आत्मनो मनसः ऐकाग्र्येण" इति सारार्थदर्शिन्यां विश्वनाथचक्रवर्ती।

५ "विदुर्ब्रह्मात्मदर्शनम्" इति क्वचित्।

६ इदं पद्यमर्वाचीनैर्न पठ्यते। न व्याख्यातं च श्रीधरस्वाम्यादिभिः। वीरराघवेन तु व्याख्यातम् । सङ्कल्पविकल्परूपः मनोव्यापारः जीवानां निरस्तो दत्तो येन। सङ्कल्पविकल्पात्मकं हि मनः । "यदेतद् गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णं सङ्कल्पः" इति हि श्रुतिः। अनिरुद्धरूपेण मनसि स्थित्वा सर्वान् मनोव्यापारानयमेव नियमयतीत्यर्थः। वितरणमपि निरासपदार्थः। तथाहि प्रयोगः—"त्वं पुण्डरीकमुख बन्धुतया निरस्तमेको निवापसलिलं पिबसीत्ययुक्तम्" इति मालतीमाधवे (९-४०)। बन्धुतया बन्धुसमूहेन निरस्तं दत्तमिति हि तदर्थः।

"सङ्कल्पश्च विकल्पश्च ऋते विष्णुप्रसादतः । नैव संभवतो विष्णौ[१] समाभवात्तु सोऽद्वयः" इति तन्त्रभागवते ॥ * ॥

[२]न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः ।
श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिंचनेषु सत्सु[३] ॥ २२ ॥

अधनाश्च त एवाऽत्मधनाश्च[४] ॥ * ॥

श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन् विबुधांश्च यः स्वपूर्णः[५] ।
न भजति निजभृत्यवर्गतन्त्रः कथममुमुद्विसृजेत् पुमान् कृतज्ञः[६] ॥ २३ ॥

"श्रियं देवांश्च भृत्यत्वान्मनुते बहु केशवः । नाऽत्मार्थाय यतस्ते तु भक्त्या सर्वोत्तमोत्तमाः" इति च ॥ * ॥

स्वयं तु परिपूर्णतया सङ्कल्पविकल्परहितम् । अर्थद्वयमपि भाष्योक्तम् । अद्वयमद्वितीयम् । असदृशमित्येतत् । द्वयं सुखदुःखमानामानादिद्वन्द्वम् । तदेव मोक्षमार्गस्यापवादः बाधकम् । तस्योपरमे सति उपलम्भनं यस्य । द्वन्द्वातीतैः प्राप्यमित्यर्थः । "द्वयस्य पञ्चविधस्य भेदस्यापवादो निरासस्तस्मादुपरतेषु उपलम्भनं यस्य" इत्यपि व्याचक्षते । आदिमध्यान्तरहितम् । अजस्रनिर्वृतिं निरन्तरानन्दम् । नित्यानन्दप्रदं च । संज्ञप्तिमात्रं ज्ञानस्वरूपम् । विशेषणद्वयेन ज्ञानानन्दमयत्वं भगवत उक्तम् । एतादृशा दृशा भजत ।

१ "विष्णोः" इति क्वचित् । प्र. पाठोऽपि तथा । विष्णुप्रसादादृते सङ्कल्पविकल्पौ जीवे नैव सम्भवतः । विष्णौ तु सर्वात्मना तौ न सम्भवतः ।

२ प्र. पाठेऽयमेकविंशः श्लोकः ।

३ "–मचिन्तनेषु सत्सु" इति क्वचित् । स हरिः मिथ्याज्ञानिनां पूजां न स्वीकरोति । ये विद्याधनादिमदैः न किंचन येषां विद्यते भगवन्तं विना तेषु सत्सु पापं तिरस्कारादिरूपं विदधति । यतः स भगवान् लोकदृष्ट्याऽधनानां वस्तुतस्तु परमात्मधनानां प्रियः । तेषां भक्तिरसज्ञश्च ।

४ इतःपरं "अधनात्मधनाः" इति क्वचित् पठ्यते । प्र. पाठोऽपि तथा ।

५ "यत् स्वपूर्णः" इति प्र· पाठः । "सुपूर्णः" इति क्वचित् ।

६ "रसज्ञः" इति पाठान्तरम् । प्र. पाठेऽयं द्वाविंशः श्लोकः । अयमर्थः—अनुवर्तमानां श्रियम्, तत्कटाक्षलेशार्थिनश्च नरपतीन्, ब्रह्मादिदेवांश्चानुवर्तमानानपि यो भगवान् न स्वप्रयोजनाय भजति । कुतः? यतः स्वयम्पूर्णः । नहि तस्य भक्तप्रियतया किञ्चित् प्रयोजनमाप्तव्यम् । तर्हि किमर्थं भजति? निजभृत्यवर्गतन्त्रत्वात् । स्वभावोऽयं भगवतो भक्तप्रियत्वम्, न नैमित्तिकमित्येतावत् । तदेवमनिमित्तबन्धुममुं कृतज्ञः पुमान् कथमुद्विसृजेत् । यतः सनिमित्तमप्युपकारं सज्जनः स्मरति । किम्पुनरनिमित्तम् ?

[1]पञ्चवर्षो मदादेशैः संराध्य पुरुषोत्तमम् ।
[2]तत्परं सर्वधिष्ण्येभ्यो मायाधिष्ठितमारुहत् ।
मुनयोऽद्याप्युदीक्षन्ते परं नाऽपुरवाङ् नृपाः ॥ २५ ॥

"सर्वोत्तमत्वाद् विष्णुर्हि माय[3] इत्येव शब्दित[4]" इति व्योमसंहितायाम् । "देवानप्युत्तममुनीन् विना के शैंशुमारकम् । हरेर्गृहं प्रविष्टास्तु[5] ध्रुवो देवाश्च तद्गताः" इति मात्स्ये ॥ * ॥ *

इति चतुर्थस्कन्धे त्रिंशोऽध्यायः[6]

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीभागवततात्पर्यनिर्णये
चतुर्थः स्कन्धः समाप्तः

---

१ अयं श्लोकोऽर्वाचीनैर्न पठ्यते । न व्याख्यातश्च श्रीधरस्वाम्यादिभिः । पञ्चवर्षो ध्रुवः । मम नारदस्याऽदेशैः । मयः प्रधानः । अतिशयेन प्रधानः सर्वोत्तमो मायः । तेन विष्णुनाऽधिष्ठितं लोकम् । माया हि तत्पत्नी । अवाङ् मुनयः उत्तममुनिभ्योऽन्येऽवाग्गता मुनयस्तत्पदलिप्सयाऽद्याप्युदीक्षन्त एव । परं तु नाऽपुः, हे नृपाः प्रचेतसः । "नाऽपुरवाङ्मुखाः" इति पाठः प्रामादिकः ।

२ "तत्पदम्" इति पाठान्तरम् ।

३ "मय इत्येव" इति क्वचित् प्र. पाठः प्रामादिकः ।

४ "शब्द्यते" इति प्र॰ पाठः ।

५ देवान् तत्कक्ष्यामध्यगतान् उत्तमान् मुनींश्च विना अन्ये के हरेर्गृहं शैंशुमारचक्रं प्रविष्टाः स्युः? न केऽपि । एतेन मूलस्थं 'मुनीन्' इति पदं व्याख्यातम् ।

६ प्र. पाठेऽत्रैकत्रिंशोऽध्यायः ।

पञ्चमः स्कन्धः

[प्रथमोऽध्यायः]

ॐ ॥ त्वं त्वब्जनाभाङ्घ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः ।
भुङ्क्ष्वेह भोगान् पुरुषातिसृष्टान्[1] विमुक्तसङ्गः प्रकृतिं भजस्व[2] ॥ १९ ॥

"यो यस्य विहितो धर्मो[3] विष्णुना प्रभविष्णुना । तेन मुक्तिर्भवेत् तस्य तं गुरुर्वेद सर्ववित्" इति प्रवृत्तिसंहितायाम्[4] ॥ * ॥

या वा इह[5] तद्रथचरणनेमिकृतपरिखास्ताः[6] सप्त सिन्धव आसन् यत
एव कृताः सप्त भुवो द्वीपाः[7] ॥ ३१ ॥

---

१ "–तिदिष्टान्" इति प्र. पाठः ।

२ अंघ्रिकमलकोशाख्यं दुर्गमाश्रितः । भगवत्प्रदिष्टान् राज्यभोगान् विमुक्तसङ्गतया भुंक्ष्व । तेनैव च मोक्षलक्षणां प्रकृतिं सहजस्थितिं भजस्व । नहि गृहं प्रव्रज्या वाऽन्ततो मोक्षहेतुः । किन्त्वसङ्गत्वमेव । तव तु गृहस्थस्यैव तद् विहितम् । केषाञ्चित् गार्हस्थ्येनैव मोक्षः केषाञ्चित् प्रव्रज्येति मोक्षधर्माणां प्रतिव्यक्ति नियतत्वात् ।

३ "विहितो यस्य यो धर्मो–" इति पाठान्तरम् । वस्तुतस्तु इदं भाष्यं मूले "निबोध तातेदम्–" (५–११) इत्यादेः "त्वं त्वब्जनाभांघ्रि–" इत्यन्तस्य समग्रस्य पद्यनवकस्य व्याख्यानरूपम् । साम्राज्ये विरक्तं सन्न्यासेन दीक्षिष्यमाणं प्रियव्रतं ततो निविवारयिषोर्भगवतो ब्रह्मणो हीमानि वचनानि । तेन ह्यत्र "न ते प्रव्रज्या विहिता, राज्यभोगेनैव मोक्षं साधय" इति प्रियवतो बोध्यते । न केवलं तावत् । "भयं प्रमत्तस्य–" (४–१७) इत्यादिना ब्रह्मा सन्न्यासं विनिन्द्य गार्हस्थ्यं प्रशंसतीव । सन्न्यासस्य परममुख्यधर्मत्वं श्रुतिस्मृतिसिद्धम् । तत् किमेवं ब्रह्मणा विपरीतमुच्यते? तामेतां शङ्कामपनेतुं भगवत्पादः सर्वं ब्रह्मवचनभावमनेन प्रमाणोपन्यासेन स्फुटयति --यो यस्य विहितो धर्मः । तथाच नहि सर्वात्मना सन्न्यासोऽत्र निन्द्यते । किन्तु प्रियव्रतस्य सन्न्यास एव । नापि सर्वात्मना गार्हस्थ्यमेव प्रशस्यते । किन्तु प्रियव्रतस्य गार्हस्थ्यमेव । यतस्तस्य गृहे संसरत एव मोक्षो विहितः । अतस्तद्व्यतिक्रमेण सन्न्यासकामनाऽपि भगवन्नियतिलङ्घनरूपत्वादधर्म एव । अत एव धर्मराजस्यापि परिविव्रजिषा व्यासादिभिर्निन्दिता भारते ।

४ "प्रवृत्तसंहितायाम्" इति प्र. पाठः ।

५ "ये वा उ ह" इति प्र. पाठः ।

६ "परिखातास्ते" इति च । "परिघास्ताः" इति च प्राचीनकोशे ।

७ येभ्यः समुद्रेभ्य एव भूमेः सप्त द्वीपाः कृताः ।

"पूर्वसृष्टान्[1] रथावृत्त्या स्थूलांश्चक्रे प्रियव्रतः । समुद्रांस्ते नतत्कर्तेत्याहुरेनं प्रियव्रतम्" इति गारुडे ॥ * ॥

इति पञ्चमस्कन्धे प्रथमोऽध्यायः

[द्वितीयोऽध्यायः]

का त्वं चिकीर्षसि च किं मुनिवर्य शैले[2]
मायाऽसि काऽपि भगवन् परदेवतायाः[3] ।
विज्ये बिभर्षि धनुषी सुहृदात्मनोऽथ
किं वा मृगान् मृगयसे विपिने प्रमत्तान्[4] ॥ ७ ॥

"परिहासप्रलापादि[5]ष्वनर्था वाक् क्वचिद् भवेत्" इति शब्दनिर्णये ॥ * ॥

इति पञ्चमस्कन्धे द्वितीयोऽध्यायः

[तृतीयोऽध्यायः]

किञ्चायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि [6]भगवन्तमुपधावति प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणं को[7] वा ईहते अपराजितापराजितया मायया

---

१ "पूर्वसिद्धान्" इति क्वचित् ।

२ "मुनिवर्यशीले" इत्यपि केचित् पठन्ति ।

३ "भगवत्परदेवतायाः" इत्यपि पाठान्तरम् ।

४ हे भगवन् मुनिवर्य, कामपरवशतया जडस्याऽग्नीध्रस्य प्रलापोऽयं विवेकवैधुर्यनिमित्त इति दर्शयितुं मूलेऽपि लिङ्गविवेकवैधुर्यम् । त्वं का? किं चात्र शैले चिकीर्षसि? किं परदेवतायाः काऽपि जीवजातसम्मोहनी माया? किं चिकीर्षसीति द्वितीयप्रश्नस्यापि स्वयमेवोत्तरं शङ्कते—विज्ये । अयि सुहृत्, विगतज्याबन्धने भ्रूलक्षणे धनुषी किमात्मार्थे धारयसि? किं वा मादृशान् मृगान् मृगयितुम्? किं केवलमात्मरक्षा प्रयोजनमुत मृगयाऽपि? सर्वमिदं व्यर्थं प्रलापवचनम् । परिहासो वा ।

५ "–ष्वनर्थवचनं भवेत्" इति प्र. पाठः । "-ष्वनर्था वाग् भवेत् क्वचित्" इति च पाठान्तरम् ।

६ "भवन्तमुप–" इति प्र. पाठः ।

७ "को वा इह तेऽपराजितोऽपराजितया" इति च ।

ऽनवसितपदध्यानव्या[१]वृत्तमतिर्विषमविषयविषरयावृतप्रकृतिरनुपा-
सितमहच्चरणः[२] ॥ ८ ॥

"नास्ति विष्णोः सम इति जानन्तोऽप्यृषयः सदा। तज्ज्ञापनाय लोकानामन्ये च [३]प्रार्थयन् समम्" इति ब्रह्माण्डे[४] ॥ * ॥

इति पञ्चमस्कन्धे तृतीयोऽध्यायः

[चतुर्थोऽध्यायः]

[५]यस्य हीन्द्रः स्पर्धमानो भगवान् वर्षे न ववर्ष ॥ ३ ॥

"दुष्टानां मोहनार्थाय यज्ञ इन्द्रपदे स्थितः। पस्पर्ध वृषभेणैव[६] स्वरूपेण हरिः स्वयम्" इति वाराहे[७] ॥ * ॥

इति पञ्चमस्कन्धे चतुर्थोऽध्यायः

---

१ "-पदव्याऽनावृतमतिर्विषमविषरयानावृत-" इति च । "-पदध्यानव्यावृत्तमतिर्विषमविषरवव्यापृत-" इति क्वचित्।

२ सर्वाशिषां स्वर्गापवर्गयोरपीश्वरं भगवन्तमुपधावति केवलं भगवत्सदृशं पुत्रमाशासानो राजर्षिरयं नाभिः। कुत एतत्? प्रजायामेव पुरुषार्थप्रत्ययः। को वा निर्धनः पुरुषः अभिलषितधनराशिप्रदं पुरुषमुपेत्य केवलं तुच्छधान्यकणमीहते। तत्तुल्यमिदमस्य प्रार्थनम्। हे अपराजित, यदि कोऽपि भगवन्माययाऽनधिगतभगवत्स्वरूपतया भगवद्गुणध्यानात् परावृत्तमतिः विषमविषयाख्यविषस्य वेगेनोन्मूलितस्वभावः अकृतगुरुचरणपरिचर्यश्च स एव दुर्भगो नूनमेवमीहेत। भगवत्सदृशत्वांशमविवक्षित्वा पुत्रकामनैव केवलं निन्द्यते।

३ "लोकानामन्येषां प्रार्थयन्" इति प्र. पाठः प्रामादिकः। विष्णुरसमान इति जानन्तोऽप्यृषयः नाभ्यर्थे विष्णुसदृशं पुत्रं प्रार्थयन्त। एवमन्येऽपि अत्रिकश्यपप्रभृतयः दत्तवामनादीन् विष्णुसदृशानेव पुत्रान् प्रार्थयन्त। किं कारणम्? तज्ज्ञापनाय लोकानाम्। विष्णोः समोऽन्यो नास्तीति लोकानामपि ज्ञापयितुम्। कथमेवं प्रार्थनया लोका ज्ञाप्येरन्? यतो भगवत्सदृशपुत्रप्रार्थनेऽपि भगवानेव स्वयं पुत्रत्वेनाजायत तेन ज्ञायते नान्यो तत्सदृश इति। आह च भगवानेव स्वयमृषीन् प्रति-"भवद्भिरवितथगीर्भिर्वरमसुलभमुपयाचितो यदमुष्मा आत्मजो मया सदृशो भूयादिति ममाहमेवाभिरूपः कैवल्यात्"(३.१०) इति। तेन भगवदुत्तरवचनेनापि लोका ज्ञास्यन्ति भगवत्सदृशो भगवानेव केवलमिति।

४ "ब्राह्मे" इति क्वचित्।

५ "तस्य" इति प्र. पाठः।

६ "ऋषभेणैव" इति च। "ऋषभेणैव देहेनैव हरिः" इति क्वचित्। स्वायम्भुवमन्वन्तरे यज्ञनामा विष्णुरेवेन्द्रः। स एव चात्र वृषभः। भगवतोऽन्येनापि स्पर्धं न युज्यते। किमुत स्वरूपेण । तेन दुष्टमोहनमेवेदं यद् भूमिगतरूपस्य स्वर्गगतरूपेण स्पर्धेति।

७ "इति च वाराहे" इति क्वचित्।

46

[पञ्चमोऽध्यायः]

पराभवस्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वम् ।
[१]तावत् क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबन्धः ॥ ५ ॥

क्रियाफलं तावदेव । कर्मात्मकं कर्मवशम्[२] ॥ * ॥

एवं मनः कर्मवशं प्रयुङ्क्ते अविद्ययाऽऽत्मन् व्यवधीयमाने[३] ।
प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ॥ ६ ॥

अविद्यया प्रयुङ्क्ते[४] ॥ * ॥

पुंसः स्त्रिया मिथुनीभाव एष[५] तयोर्मिथो हृदयग्रन्थिमाहुः ।
[६]यतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहम्ममेति ॥ ८ ॥

---

१ "यावत्" इति प्र. पाठः । अज्ञानमूलो हि दुःखादिरूपः पराभवः । स च परमात्मज्ञाने जाते नैव संभवति । दुःखादिना बन्धनहेतवः क्रिया अपि तावदेव फलदाः । ज्ञानोत्तरकर्मणोऽश्लेषात् । पूर्वस्य च विनाशात् । न केवलं तावत् । किन्तु ज्ञानी पापकर्मणि न प्रवर्तते चेत्याह–तावदेव मनः कर्मात्मकं कर्मवशमिति । येन विवशः पापकं कर्म कुर्यात् । येन कर्मणा कर्मात्मकेन मनसा शरीरबन्धो भवति ।

२ एतेन "एवं मनः कर्मवशम्" इत्युत्तरपद्यं स्मारयति । कर्मात्मकं कर्मप्रवणं कर्मस्वभावं कर्मवशमित्यनर्थान्तरम् । कर्मणाऽऽप्तं हि तत् ।

३ "-त्मन्युपधीयमाने" इति प्र. पाठः । "–त्मन्यवधीयमाने" इति च क्वचित्पाठः । एवं परमात्मनि व्यवधीयमाने कर्मवशान्मनसः व्यवहिते तदगोचरे सति तन्निमित्तयाऽविद्यया अयथार्थज्ञानेन, कर्मफलेष्वेव परमार्थबुद्ध्या जीवः कर्मवशं स्वमनः पुनरपि कर्मस्वेव प्रयुङ्क्ते । यावद् भगवति न भक्तिस्तावदस्मादविद्यानिमित्ताद् देहबन्धसन्तानान्न मुक्तिः ।

४ अविद्ययाऽऽच्छादिकया परमात्मनि पिधीयमाने सतीति स्वरसप्रतीतोऽन्वयः । अथ देहलीदीपवत् पूर्वत्राप्यविद्यापदमन्वेतुं शक्यमित्याह–अविद्यया । यद्वा सर्वगतस्याऽत्मनो व्यवधानं नाम ज्ञानाविषयत्वमेव । ततश्चाऽत्मन् व्यवधीयमान इति परमात्मन्यज्ञायमाने सतीत्यर्थः । ततश्चाविद्ययेति नात्रातीव सङ्गतम् । तदर्थमन्व यान्तरमाह–अविद्यया । आत्मन् व्यवधीयमाने याऽविद्या, भगवदनवबोधनिमित्तं यदन्यथाज्ञानं, कर्मपारम्यबुद्धिः, तया पुनः कर्मस्वेव मनः प्रेरयति जीव इति ।

५ "-भावमेतं तयो-" इति प्र. पाठः ।

६ "अतो-" इति च । यः स्त्रीपुंसयोर्मिथुनीभावस्तं तयोर्हृदयग्रन्थिबन्धमाहुः । स्वयं तावदादावेव बद्धौ । इदं चापरं बन्धनादुपरि द्वितीयं बन्धनम्–पुरुषस्य स्त्रिया, स्त्रियाश्च पुरुषेण परस्परमिति । यथैकया रज्ज्वा बद्धौ वत्सतरौ गोचरेषु विचरतः । यथा चैकया धुरा बद्धौ वृषभौ शकटं वहतः । अहं गृहीत्यादिरहम्मोहः । ममेदं गृहमित्यादिर्ममकारः । सोऽयं मोहो गृहस्थस्य विशेषतो भवति । यस्त्यक्ष्यन्नपि भार्यानुमतिपराधीनो भवति । अत एव मिथो ग्रन्थिरित्युक्तम् ।

"[1]ब्रह्माद्या याज्ञवल्क्याद्या मुच्यन्ते स्त्रीसहायिनः । बध्यन्ते [2]केचनैतेषां विशेषं च विदो विदुः" इति सत्यसंहितायाम् ॥ * ॥

[3]हरौ गुरौ मयि भक्त्याऽनुवृत्त्या वितृष्णया द्वन्द्वतितिक्षया च ।
सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ॥ १० ॥

"आत्मनो विहितं कर्म वर्जयित्वाऽन्यकर्मणः । कामस्य वा[4] परित्यागो निरीहेत्याहुरुत्तमाः" इति च ॥ * ॥

सर्वत्र मद्भावनिरीक्षणेन[5] ज्ञानेन विज्ञानविराजितेन ।
योगेन धृत्युद्भवसत्त्वयुक्तो[6] लिङ्गं व्यपोहेत् कुशलोऽहमाख्यम् ॥ १३ ॥

"सर्वस्मादुत्तमो विष्णुरिति ज्ञानमुदाहृतम् । प्रतिजीवं येन मुक्तिस्तद्[7] विज्ञानं विदां मतम्" इति च । "[8]ज्ञानं विष्णोरुत्तमत्वे तदेव प्रतिपूरुषम् । विशेषेण तु विज्ञानं

---

१ पूर्वश्लोके गार्हस्थ्यनिन्दा कृता मोक्षपथपरिपन्थितया । ततः पूर्वतरे च श्लोके "–गतस्मृतिर्विन्दति तत्र तापानासाद्य मैथुन्यमगारमज्ञः" इति तन्निन्दितम् । प्रथमाध्याये च प्रव्रजन्तं प्रियव्रतं प्रतिषिध्य ब्रह्मणा गृहस्थतयैव मोक्षसाधनं बोधितम् । तामेतां व्याहतिप्रतीतिं परिहरति–ब्रह्माद्याः । तथा च गार्हस्थ्यं बन्धनहेतुरिति सामान्यनियमः । ब्रह्माद्या देवाः याज्ञवल्क्याद्या ऋषयः प्रियव्रताद्याश्च तदपवादभूताः । नह्यपवादोऽस्तीति न नियमः क्रियते ।

२ "केचनैकेषाम्" इति क्वचित् ।

३ "हंसे गुरौ" इति प्र. पाठः । ब्रह्मादिसर्वजगद्गुरौ हरौ मयि भक्त्या परिचर्यया । सर्वत्र जन्मसु व्यसनावगत्या । वेदान्तविचारेण, ईहानिवृत्त्या निषिद्धकर्मनिवृत्त्या, काम्यकर्मनिवृत्त्या कामनानिवृत्त्या च लिङ्गं व्यपोहेदित्युत्तरेणान्वयः ।

४ "कामस्य च परित्यागो–" इति प्र. पाठः । काम इति कर्मणां फलकामना विषयकामना च ।

५ "मद्भावविचक्षणेन" इति पाठान्तरम् ।

६ "धृत्युद्यमसत्वयुक्तो–" इति च । भगवतः सर्वगतत्वावधारणेन, स्वहृदयगतबिम्बरूपापरोक्षसमेधितेन विष्णुसर्वोत्तमत्वज्ञानेन, निरन्तरं भगवति मनोयोगेन च कुशलः लिङ्गं तदुपलक्षितं संसारं व्यपोहेत् । कीदृशः? धृत्युद्भवसत्त्वयुक्तः । धृतिरिन्द्रियजयः । तत्वमार्गादचलनं च । ताभ्यामुद्भूतेन सत्वगुणेन, विवेकेनोत्साहेन वा युक्तः ।

७ तत् स्वबिम्बापरोक्षज्ञानमिति यावत् ।

८ विष्णोरुत्तमत्वे यत् सर्वानुगतं ज्ञानं तदेव ज्ञानम् । तथा तदेव विष्णोरुत्तमत्वविषयमेव प्रातिस्विकमनुभवतो विशेषेणावगतं विज्ञानम् । यच्छास्त्रतः सर्वेषां समानमवगम्यते तज्ज्ञानम् । यत्तु प्रतिव्यक्ति साधनबलाद् विशेषतोऽवगम्यते तद् विज्ञानमिति यावत् । ननु मम कीदृशं विशेषज्ञानं तदर्थं च कीदृशं साधनं करणीयमिति कथं ज्ञायेत? तच्च जानाति सर्वविद् गुरुः । प्रथमाध्यायेऽपि प्रतिव्यक्ति मोक्षधर्मा इत्युक्त्वा "तं गुरुर्वेद सर्ववित्" इत्युक्तम् । अत्राप्यष्टमश्लोकभाष्ये केषांचिद् गृहे साधनं केषांचित् परिव्रज्येति तमेतं "विशेषं च विदो विदुः"

तच्च जानाति सर्ववित् । द्वात्रिंशल्लक्षणैर्युक्तस्तीक्ष्णदंष्ट्रश्च सौम्यरुक्[1] । घोररुक्त्वेऽपि पुरुषः स सर्वज्ञ उदाहृतः" इत्यध्यात्मे । "षण्णवत्यङ्गुलो यस्तु न्यग्रोधपरिमण्डलः । सप्तपादश्चतुर्हस्तः स देवैरपि पूज्यते" इति वायुप्रोक्ते । "[2]न्यग्रोधमण्डलो व्यामो बाहू न्यग्रोध उच्यते" इति च ॥ * ॥

तस्माद् भवन्तो हृदयेन जाताः सर्वे महीयांसमिमं सुनाभम्[3] ।
अक्लिष्टबुद्ध्या भरतं भजध्वं शुश्रूषणं तद् भरणं प्रजानाम् ॥ २० ॥

"नाभिरित्यथ नाम स्याद्धरेः सर्वाश्रयो यतः" इति कौर्मे ।
[4]तत् तस्य मम शुश्रूषणम् ॥ * ॥

देवासुरेभ्यो मघवान् प्रधानो[5] दक्षादयो ब्रह्मसुताश्च तेषाम्[6] ।

इत्युक्तम् । सोऽयं विशेषज्ञापको गुरुः कुतोऽन्वेष्टव्यः, यं विना साधननिर्णयो दुःशकः? लक्षणतोऽन्वेष्टव्यः । कानि तल्लक्षणानि—द्वात्रिंशल्लक्षणैर्युक्तः । तीक्ष्णदंष्ट्रः सूक्ष्मदन्त इति द्वात्रिंशल्लक्षणेष्वेकं नामतो निर्दिशति ।

१ "सौम्यदृक्" इति पाठान्तरम् । सौम्यरुक् सौम्यकान्तिः । अस्यापवादमाह—घोररुक्त्वेऽपि । यदि स गुरुः पुरुषः तदा घोररुक्त्वेऽपि न लक्षणहानिः । यथा स्वयं भीमरूपे घोररुक्, मध्वरूपे सौम्यरुक् । यदि तु स्त्री तदा सौम्यरुगेव । अत्र "घोररुक् चापि" इति प्र. पाठः ।

२ न्यग्रोधपरिमण्डल इत्येतत् स्वयमेव प्रमाणेन व्याख्याति—न्यग्रोधमण्डलः । व्यामः व्यामपरिमितोत्सेधः न्यग्रोधपरिमण्डल इत्युच्यते । तिर्यक् ततयोर्बाह्वोरन्तरं व्यामः । 'मारु' इति कन्नडभाषायाम् । Fathom इति चाऽङ्ग्लभाषायाम् । तथाच यस्य तिर्यग् बाह्वन्तरं देहस्य दैर्घ्यं च समानं व्याममितं स परितस्तिर्यगूर्ध्वं च षण्णवत्यङ्गुल इति व्यामपरिमण्डल उच्यते । व्यामपरिमण्डल उच्यताम् । कथं न्यग्रोधपरिमण्डलः? बाहू न्यग्रोध उच्यते । नहि न्यग्रोधोऽत्र वटः । किन्तु बाहू । देहाख्ये वृक्षे नीचै रोहतीति बाहुद्वयमेव न्यग्रोधः । तेन न्यग्रोधपरिमण्डल इति षण्णवत्यङ्गुलपरिमण्डल इत्येवार्थः । तदुक्तं मत्स्यपुराणे—"न्यग्रोधौ तु स्मृतौ बाहू व्यामो न्यग्रोध उच्यते । समोच्छ्रयपरीणाहो न्यग्रोधपरिमण्डलः" इति । स्त्रीविषये त्वर्थान्तरमपि—"स्तनौ सुकठिनौ यस्या नितम्बे च विशालता । मध्ये क्षीणा भवेद् या सा न्यग्रोधपरिमण्डला" इति ।

३ "—सममुं सनाभम्" इत्यर्वाचीनः पाठः । "—सममुं सुनाभम्" इति क्वचित् । तस्मान्मत् हृदयेन जाताः औरसपुत्रा भवन्तः सर्वे भरतं भ्रातरं भजध्वं सुखेन । कीदृशम्? शोभनो नाभिः सर्वाश्रयो हरिरेवाऽश्रयो यस्य तम् । अत एव महीयांसम् । हरेः सन्निधानविशेषपात्रत्वाच्च । अतस्तत् भवद्भिः क्रियमाणं तद्भजनं ममैव शुश्रूषणं स्यात् । तद्भजनेनैव प्रजानामपि भरणं कृतं स्यात् ।

४ तत् इत्यनूद्य तस्येति व्याख्यातम् । शुश्रूषणमिति वर्तते । तथाच तत् तस्य शुश्रूषणं ममैव शुश्रूषणमित्यर्थः

५ "मघवत्प्रधाना—" इति प्र. पाठः ।

६ "—सुतास्तु तेषां" इति च । देवासुरेभ्यः, तथा दक्षादयः सनकादयश्च ये ब्रह्मसुतास्तेषां च सकाशात् मघवान् प्रधानः । तस्मादपि भवः परः । सोऽपि विरिञ्चिपुत्र इति विरिञ्चस्ततः परः । स च विरिञ्चोऽहमेव परो यस्य तादृशः । एतादृशोऽहमत एव द्विजश्रेष्ठानां विप्राणां प्रियतमं दैवतम् ।

भवः परः सोऽथ विरिञ्चवीर्यः स मत्परोऽहं द्विजदेवदेवः ॥ २२ ॥

द्विजदेवानां देवः[1] ॥ * ॥

सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ध्रुवाणि ।
सम्भावितव्यानि पदेपदे वो [2]विविक्तदृष्टिस्तदुतार्हणं मे ॥ २६ ॥

विविक्तदृष्टिः जीवानां धिष्ण्यतया परमेश्वरस्य भेददृष्टिः[3] ।

"उपपादयेत् परात्मानं जीवेभ्यो यः पदेपदे । भेदेनैव [4]नवै तस्मात् प्रियो विष्णोस्तु कश्चन" इति पाद्मे । "यो हरेश्चैव जीवानां भेदवक्ता हरेः प्रियः" इति च ॥ * ॥

इति पञ्चमस्कन्धे पञ्चमोऽध्यायः

[षष्ठोऽध्यायः]

राजा । न नूनं [5]भगवन्नात्मारामाणां योगसमीरितज्ञानावभर्जितकर्म-
बीजानामैश्वर्याणि पुनः क्लेशदानि भवितुमर्हन्ति यदृच्छयोपगतानि[6] ? ॥ १ ॥

ऋषिः । सत्यमुक्तं किन्त्विह वा एके न मनसो [7]विस्रम्भमनवस्थानस्य
घटकिराट इव सङ्गच्छन्ति[8] ॥ २ ॥

---

१ "द्विजानां देवानां देवः" इति क्वचित् ।

२ "विविक्तदृग्भिस्तदु हार्हणम्" इति प्र. पाठः । चराणि ध्रुवाणि स्थिराणि चेति सर्वाणि भूतानि मदावासस्थानभूतानीति हे सुताः, भवद्भिः सदा सम्माननमर्हन्ति । उक्तं हि–"ईशावास्यमिदं सर्वम्" इति । तथा च पदेपदे प्रतिक्षणं युष्माकं या विविक्तदृष्टिः अधिष्ठानभूतानां भूतानां सकाशात् अधिष्ठितस्येश्वरस्य भेददर्शनं तदेव मम महदर्हणम् । जीवेभ्यो विविक्तस्य ईश्वरस्य दृष्टिर्वा । जीवेश्वरयोर्विविक्ततया दृष्टिर्वा ।

३ जीवानां परमेश्वरस्य धिष्ण्यतयाऽधिष्ठानतया जीवानां सकाशात् परमेश्वरस्य भेददृष्टिरिति योजना ।

४ "नचैतस्मात्" इति प्र. पाठः । क्वचित् कोशेषु च तथा ।

५ "भगव आत्मारामाणाम्" इति प्र. पाठः ।

६ अतः कुतो यदृच्छयोपगतानि योगैश्वर्याणि नाभ्यनन्ददिति पूर्वाध्यायोक्तार्थाक्षेपः । कथं च योगेश्वरस्य वृषभस्य यदृच्छयोपगतानि योगैश्वर्याणि इति च प्रश्नान्तरम् । तदेतत् भाष्ये स्फुटं परिहरिष्यते ।

७ "मनसोऽद्धा विश्रम्भ-" इति प्र. पाठः ।

८ "–स्थानस्य शठकिरात इव सङ्गच्छन्ते" इति च । योगिनामैश्वर्याणि न क्लेशदानीति सत्यमुक्तम् । तथाऽपि एके ज्ञानिमुख्या चञ्चलस्य मनसो विषये न कदाऽपि विश्वसनीयतां मन्यन्ते । एवं जागरूकैर्भाव्यमिति दर्शयितु-

तथाचोक्तम्—

न कुर्यात् कर्हिचित् सङ्गं[1] मनसि ह्यनवस्थिते ।
यद्विस्रम्भाच्चिरं[2] चीर्णं च स्कन्देत् तप ऐश्वरम् ॥ ३ ॥

नित्यं ददाति कामस्य च्छिद्रं तदनु येऽरयः[3] ।
योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ॥ ४ ॥

कामो मन्युर्मदो लोभः शोकमोहभयादयः ।
कर्मबन्धश्च यन्मूलः स्वीकुर्यात् को नु तद् बुधः[4] ॥ ५ ॥

"महैश्वर्यस्वरूपोऽपि भगवानृषभो[5] विराट् । नैश्वर्याणि स्वकीयानि ख्यापयामास सर्ववित्[6] । उत्तमानां ज्ञापनार्थं धर्मतत्वस्य केशवः । तेषामैश्वर्यभोगे हि मनः सक्ति व्रजेद् यदि । आनन्दो मुक्तिगो ह्रासं विकर्मकरणाद् व्रजेत्[7] । धर्माधर्मविहीनोऽपि भगवानृषभस्ततः[8] । तेषां धर्मज्ञापनार्थं[9] नाऽविश्चक्रे परां स्थितिम् । देवानां नाशुभाद्ध्रासः शुभात् काचित् सुखोन्नतिः । आधिकारिकजीवानामेवमन्येषु तु[10] द्वयम् । अल्पाधिकारिणां तत्र ह्रासोऽपि भवति ध्रुवम् । अशुभाभावजोन्नाहो महाधीकारिणामपि । अशुभे कृते न भवति तारतम्याच्च स स्मृतः । प्रजापाश्च

मेव समर्थोऽपि भगवान् वृषभस्तानि योगैश्वर्याणि नाभ्यनन्दत् उत्तमज्ञानिशिक्षार्थमिति । मनसोऽनवस्थानत्वे दृष्टान्तः—घटकिराट इव । किरन् जलं स्रवन् घटो घटकिराटः । आमघट इति यावत् । सच्छिद्रो वा । तस्मिन् यथा जलानयनाय न विस्रम्भमुपगच्छन्ति तथेति सम्प्रदायज्ञाः ।

१ "सख्यम्" इति प्र. पाठः । २ "यद्विश्रम्भाच्चिराचीर्णं चस्कन्द तप–" इति च ।

३ तदनु कामानुगा येऽरयः क्रोधादयः तेषामपि छिद्रमवकाशं ददाति । "कामात् क्रोधोऽभिजायते" इति हि गीता । कृतमैत्रस्य मनसि कृतविस्रम्भस्य ।

४ यन्मूलः मनोमूलः । तन्मनः को बुधः स्वीयं कुर्यात् । विश्वसेदिति यावत् ।

५ "भगवान् वृषभो–" इति क्वचित् । विराट् सम्राट् ।

६ "तत्ववित्" इति केचित् पठित्वा धर्मस्य तत्त्वविदिति व्याचक्षते ।

७ इति उत्तमानां धर्मतत्वस्य ज्ञापनार्थम् । ८ "भगवान् वृषभस्ततः" इति च कोशेषु पाठान्तरम् ।

९ "धर्मस्थापनार्थम्" इति च । एतेन यदृच्छया स्वेच्छया सदोपगतानि उत्कृष्टतया स्थितानि योगैश्वर्याणि आविष्काराय नाभ्यनन्ददिति मूलाशयो विवृतो भवति । इयं च धर्मशिक्षा आधिकारिकदेवानृत इति प्रसङ्गादाह—देवानां नाशुभात् ह्रासः ।

१० "–मन्येषु तद्द्वयम्" इति प्र. पाठः । अशुभात् ह्रासः शुभात् सुखोन्नतिश्चेति द्वयम् ।

तथा देवा महाधीकारिणः स्मृताः । ऋष्यशीतिस्तथा सप्त पितरोऽप्सरसां शतम् । गन्धर्वाणां तथा राज्ञां[1] विंशदन्यासु जातिषु । अल्पाधिकारिणः प्रोक्ता अनधीकारिणः परे" इति ब्रह्माण्डे ॥ * ॥

अथैवमखिललोकपालललामो विलक्षणो जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावो[3] योगिनां विविध[4]साम्परायविधिमनुशिक्षयत्[5] स्वकळेबरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थान्तरभावेनान्वीक्षमाण[6] उपरतानुवृत्तिरुपरराम ॥ ६ ॥

"विष्णोः कळेबरत्यागो[7] भूत्यागोऽन्यो न विद्यते । [7]कळेबरत्यागोऽन्येषां पञ्चत्वं समुदीरितम्" इति कौर्मे ।

अनर्थान्तरभावेन अर्थान्तरं नास्मीति[8] मनसा ॥ * ॥

तस्य हवा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावसानो देह[9] इमां जगतीमभिमानाभासेन [10]चङ्क्रममाण एकदा तु काङ्कटकर्णाटकाद् दक्षिणकर्णाटकान् देशान् यदृच्छयोपगतः कुटचाचलोप-

---

१ गन्धर्वाणां तथा राज्ञां च शतम् ।

२ "-ललामोऽपि विलक्षणैर्जड-" इति प्र. पाठः । सकललोकविलक्षणः ।

३ "-भगवत्स्वभावो-" इति पाठान्तरम् ।

४ "योगिनां साम्पराय-" इति प्र. पाठः ।

५ "-शिक्षयन् स्वकलेवरम्" इति च ।

६ आत्मानं स्वरूपमात्मनि परमात्मनि मूलरूपेऽसंव्यवहितमत्यन्तमनर्थान्तरभावेनाभेदेनान्वीक्षमाणः । असंव्यवहितमज्ञानादिभिरतिरोहितमिति वा । उपरतलोकलीलानुकरण उपरराम । स्वकळेबरस्थानीयां पृथिवीं जिहासुः । "यस्य पृथिवी शरीरम्" इति श्रुतेः ।

७ "कलेवरत्यागो-" इति प्र. पाठः । "स्वकलेवरं स्वाधिष्ठानं प्रपञ्चम्" इति जीवगोस्वामी । "स्वकलेवरप्राकट्यं त्यक्तुमिच्छुः स्वावतारलीलातो विरराम" इति विश्वनाथः ।

८ "नास्तीति" इति प्र. पाठः प्रामादिकः । "आत्मनि परमात्मनि स्वस्मिन् आत्मानं ऋषभदेवाख्यशरीरमनर्थान्तरभावेनाभेदेन अन्वीक्षमाणः" इति सारार्थदर्शिनी । मनसेति भावशब्दार्थः । अभेदबुद्ध्या ।

९ "-मायावसानया देह-" इति प्र. पाठः ।

१० "संक्रममाणः कोङ्कवेङ्कटकुटकान् दक्षिणकर्णाटकान्" इति च ।

वम[1] आस्यकृताश्मकबळ[2] उन्माद इव मुक्तमूर्धजोऽसंवीत एव विचचार[3] ॥ ७ ॥

अथ समीरवेगविधुतवेणुनिकषजातो[4] दवानलस्तद् वनमालेलिहानः समन्तात् सह तेन ददाह ॥ ८ ॥

यस्य [5]किलानुरचितमुपाकर्ण्य काङ्कटकर्णाटकानां[6] दक्षिणकर्णाटकानां राजाऽर्हतनामोपशिक्ष्य कलावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथं[7] पाषण्डमसमञ्जसं निजमनीषया मन्दः सम्प्रवर्तयिष्यते ॥ ९ ॥

येन ह वा कलौ मनुजापशदा[8] देवमायाविमोहिताः स्वविधिनियोगशौचचारित्रविहीना देवहेडनाद्यपव्रतानि निजेच्छया गृह्णाना[9]

---

१ "कुटकाचलोपवन-" इति च। २ "-कवल-" इति च।

३ ऋषभस्य देह इमां जगतीं विचचार। देहदेहिनोरभेदबोधनायैवं प्रयोगः। कीदृशस्य? मुक्तलिङ्गस्य अप्रकटितभगवल्लक्षणस्य। त्यक्तराजचिह्नस्य वा। कीदृशो देहः? योगमायावसानः योगसामर्थ्यप्राकट्यमुपसंहरन्नित्यर्थः। वस्तुतस्तु सामर्थ्यस्य अवसानं परा काष्ठा यस्मिंस्तादृशः। अभिमानाभासेन चङ्क्रममाणः। पद्भ्यां गच्छामीत्यभिमानोऽपि तस्य नास्तीति प्रातीतिकोऽर्थः। वस्तुतस्तु ज्ञानस्वरूपत्वाद् देहस्याभितो ज्ञानप्रकाशेनेति हृदयम्। "मानं ज्ञानं लयश्चैव" इत्यभिधानम्। भीमरथीप्रान्तभूमिः काङ्कटकर्णाटक इति प्राचीनाः। यदृच्छया स्वेच्छया। आस्यनिहितशिलाकबळः। उन्मादे यथा। स्वस्य जडोन्मत्तसाम्यं प्रदर्शयितुमिदम्। यथा शिशुरुन्मत्तो वा हस्तप्राप्तं सर्वं मुखे निक्षिपति। असंवीतो नग्नः।

४ "-विधूतवेणुविकर्षणजातोग्रदावानल-" इति प्र. पाठः। तेन वृषभरूपेण भगवता सहितस्तदाविष्ट इति यावत् दवानलः वनं समन्तात् जगद् ददाह। भाष्यवचनादयमर्थोऽवसीयते। क्रमसन्दर्भे जीवगोस्वामी चैवमाह- "तेन सहेति कर्तृसाहाय्ये तृतीया" इति। "तेन सह श्रीवृषभदेवसहित एव दावानलस्तद् वनं ददाह" इति सारार्थदर्शिन्यां विश्वनाथचक्रवर्ती चाऽह।

५ "किलानुचरित-" इति प्र. पाठः।

६ "कोङ्कवेङ्कटकुटकानां राजाऽर्हन्नामोप-" इति प्र. पाठः। 'अर्हनामा' इति च पठन्ति। अर्हन्, अर्हः, अर्हत इति चैकस्यैव नामानि। यमेतं 'अर्हन्त' इति कर्णाटकभाषायां व्यपदिशन्ति।

७ "-कुपथपाखण्ड-" इति प्र. पाठः।

८ "ह वाव कलौ मनुजापसदा देवमायामोहिताः" इति च।

९ "-हेलनान्यपत्रतानि निजनिजेच्छया" इति च। "-हेलनादीन्यपव्रतानि" इति क्वचित्। हेळनं हेडनमित्येकोऽर्थः। भगवता जीवस्याभेदकथनमद्वैतमते देवहेळनम्। भगवत एवानङ्गीकारो जैनमते।

अस्नानानाचमनाशौचकेशोल्लुञ्चनादीनि[1] कलिनाऽधर्मबहुलेनोपहत-
धियो [2]ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यन्ति ॥ १० ॥

[3]तैरपि ह्यर्वाक्तनया निजलोकयात्रयाऽन्धपरम्परया[4]ऽत एवानाश्वस्ता-
स्तमस्यन्धे स्वयमेव प्रपतिष्यन्ति ॥ ११ ॥

अभिमानाभासेन अभितो ज्ञानप्रकाशेन--

"ज्ञानानन्दात्मको देह ऋषभस्य[5] महात्मनः । तादृशेनैव मनसा क्रमंस्तु कुटचाचले । [6]दवाग्निमनुविश्याथ [7]तत्रस्थः प्रादहज्जगत् । एवमग्नेरभिव्यक्तस्तत्स्थो[8] विष्णुः सनातनः । ऋषभत्वेन सङ्गोप्य धर्मानद्यापि तत्रगः[9] । आस्ते स वासुदेवात्मा वासुदेवोऽहमित्यजः । सदा स्थितः स्थितिं तां तु शुश्रावार्हो दुरात्मवान् । पूर्वं तु पौण्ड्रको नाम वासुदेवः सुदुर्मतिः[10] । जातिस्मरो द्विधा शास्त्रं पाषण्डं निर्ममे नृपः । एकं तु वासुदेवाख्यं वासुदेवोऽहमित्यपि । कुत्सितं वासुदेवत्वप्रतिपादकमात्मनः । लोकार्थे[11] चापरमिति चकाराऽर्हतनामकम् । तत्प्रशिष्यः [12]क्रमुर्नाम न जानंस्तन्मतं परम् । वासुदेवात्मतां सर्वजीवानामवदत् कुधीः । [13]क्रम्वाख्यं शास्त्रमकरोदभेदप्र-तिपादकम् । कुशास्त्रं सर्ववेदानां विरुद्धं तामसालयम् । तद्दृष्ट्याऽद्यापि वर्तन्ते वर्तिष्यन्ति तथा कलौ[14] । अशौचा अव्रताचारा वासुदेवोऽहमित्यपि" इति ब्राह्मे ॥ * ॥

---

१ "-केशोल्लुञ्चनादीनि" इति प्राचीनकोशे पठ्यते ।

२ ब्रह्म वेदः । यज्ञपुरुषो नारायणः । मिथ्यात्वादिप्रतिपादनेन लोकस्यापि निन्दकाः ।

३ "ते च ह्यर्वा-" इति प्र. पाठः ।

४ "परम्परयाऽऽश्वस्ता-" इति च । तैश्चार्हतशिष्यैः प्रवृत्तयाऽर्वाचीनया अन्धपरम्परया वर्तमानास्तत्राप्य-न्तत आश्वासरहिताः केवलं जीवनयात्रार्थमादृतस्वसमया लोकवञ्चकास्तमस्यन्धे प्रपतिष्यन्ति ।

५ "देहो ऋषभस्य" इति प्र. पाठः प्रामादिकः ।

६ "दावाग्नि-" इति पाठान्तरम् ।

७ "तत्रस्थम्" इति क्वचित् । तत्रस्थोऽग्निस्थः ।

८ "-व्यक्तस्तस्थो" इति प्र. पाठः ।

९ एवमग्निस्थः अग्नेः सकाशादग्निरूपेणैवाभिव्यक्तः ऋषभरूपी विष्णुः तेन ऋषभरूपेण धर्मान् सङ्गोप्य अद्यापि कुटचाचलगः अग्निगो वाऽऽस्ते । वासुदेवोऽहमित्यात्मानमन्वीक्षमाणः । तामेतां भगवद्गतिमर्हापरनामा अर्हतः शुश्राव । वासुदेवोऽहमिति स्वस्य वासुदेवत्वप्रतिपादकं शास्त्रं च चकार स्वस्य पूर्वजन्मनि पौण्ड्रकवासुदेवत्वं स्मरन् । अपरं चाऽर्हतमतं लोकार्थमिति चकार । परन्तु तन्मतमजानन्, मामेव वासुदेवं सर्वे लोका उपासतामिति इति तस्य दुरभिमतमजानन् तस्य प्रशिष्यः क्रमुः सर्वजीवानां वासुदेवात्मतामवदत् । तदेवमभेदवादोदयः ।

१० "स दुर्मतिः" इति क्वचित् ।

११ "लोकार्थं चापरमपि" इति प्र. पाठः ।

१२ "क्रमुर्नाम" इति च ।

१३ "क्रम्याख्यम्" इति च ।

१४ "वर्तिष्यन्ति कलौ तथा" इति च ।

47

अहो भुवः सप्तसमुद्रवत्या [1]द्वीपेषु वर्षेष्वधिपुण्यमेतत् ।
गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवन्ति ॥ १३ ॥

"विशेषाद् भारते पुण्यं चरेयुः पापमप्यथ । तथैव भगवद्भक्तिं पृथिव्यां नान्यवर्षगाः"
इति ब्रह्माण्डे ॥ * ॥

को न्वस्य काष्ठामपरोऽनुगच्छेन्मनोरथेनाप्यभवस्य[2] योगी ।
यद् योगमायां स्पृहयन्त्युदस्तां महत्तमा येन[3] कृतप्रयत्नाः ॥ १५ ॥

योगमायां योगमायाफलम् [बाह्यम्[4]] ।

"नित्योदस्ता योगशक्तिरनपेक्ष्यं फलं यतः[5] । नित्यस्वरूपभूताऽपि बहिःफलविवर्जनात् । अकर्मैत्युच्यते यद्वन्मोक्षः फलविवर्जनात्" इति पाद्मे ॥ * ॥

यस्यामेव कवय[6] आत्मानमविरतविविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयन्तस्तयैव परया निर्वृत्या [7]ह्यापवर्गिकमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो[8] एवाऽद्रियन्ते भागवतत्वेनैव[9] परिसमाप्तसर्वार्थाः ॥ १७ ॥

---

१ द्वीपेषु वर्षेषु चाधिकं पुण्यप्रदं च भारतम् । अस्यैव कर्मभूमित्वादन्येषां भोगभूमित्वात् । अवतारवन्ति कर्माणि । अवतारान् कर्माणि चेत्यर्थः ।

२ "-प्यभवाय योगी" इति च पाठान्तरम् ।

३ "यो योगमायाः स्पृहयत्युदस्ता ह्यसत्तया येन" इति प्र. पाठः । येन वृषभेण उदस्तां बाह्यफलानपेक्षतया निरस्तप्रायां योगशक्तिं महत्तमा अपि योगिनः महता प्रयत्नेन स्पृहयन्ति । तस्यानादेर्भगवतो योगशक्तेः पारं को न्वपरो मनोरथेनापि गच्छेत्? किमुत कर्मणा ।

४ "बाह्यम्" इतीयत् प्राचीनकोशेषु क्वचिन्न पठ्यते ।

५ यथा संसरन्नपि पुरुषो भोगानिच्छुस्त्यक्तसंसार उच्यते । यथा वा फलापेक्षकर्मासाध्यत्वादकर्मा मोक्ष उच्यते ।

६ "आत्मानमविरतं विविधवृजिन-" इति प्र. पाठः ।

७ "ह्यपवर्गमात्यन्तिकम्" इति च ।

८ "नैवाऽद्रियन्ते" इति पाठान्तरम् ।

९ "भगवदीयत्वेनैव" इति प्र. पाठः । यस्यां भक्तिसुधासिन्धावात्मानमनुसवनं सदा स्नापयन्तः । कीदृशमात्मानम्? अविरतानि सन्तानवाहीनि विविधानि वृजिनानि पापाचरणानि दुःखानि च यत्र तस्मिन् संसारे क्लेशैरुपतप्यमानम् । परमानन्दरूपया भक्त्यैव पुरुषार्थकाष्ठाभूतमपवर्गाख्यं पुरुषार्थमपि प्रसन्नेन भगवता स्वत एव

"ब्रह्मणोऽन्यस्य नो पूर्णां भक्तिं दद्याज्जनार्दनः[1]। मुक्तिं ददाति सर्वेषामुच्चानां[2] को ह्यधीशिता" इति ब्रह्मतर्के। "नाऽद्रियन्ते तु ये मोक्षं पूर्वं तेषां परं सुखम्। स्वयोग्यं व्यज्यते मुक्तौ तच्चोक्तं तारतम्ययुक्" इति व्योमसंहितायाम्[3] ॥ * ॥

इति पञ्चमस्कन्धे षष्ठोऽध्यायः

[सप्तमोऽध्यायः]

परोरजाः सवितर्जातवेदो वेदस्य गर्भो मनसेदं जजान[4]।
स्वरेतसाऽदः पुनराविश्य च स्वं हंसं गृध्राणामृषभं सङ्गृणीमः[5] ॥ १३ ॥

"परोरजाऽरजस्कत्वात्[6] त्रयीज्यत्वात् त्रयीसुतः। गुणात्ययात् तुरीयश्च[7] जात-

---

दीयमानमपि न बहु मन्यन्ते। सकामभक्तितोऽप्येकान्तभक्तेरधिकफलत्वात्। उक्तं हि—"एकान्तानां न कस्यचिदर्थे नारायणो देवः" इति। तदेवाऽह—भगवद्भक्तत्वेनैव परिपूर्णसर्वार्थाः। इयमेकान्तभक्तिर्मुख्यतो चतुर्मुखविषया। अन्येषां तु यथायोगम्। भाष्योदाहृतप्रमाणे स्फुटमेतत्।

१ "पूर्णां दद्याद् भक्तिं जनार्दनः" इति च पाठान्तरम्। पूर्णां भक्तिं फलनिरपेक्षामेकान्तभक्तिमित्यर्थः।

२ "सर्वेषां मुक्तानाम्" इति प्र. पाठः प्रामादिकः। सर्वेषामुच्चानामुत्तमजीवानां मुक्तिं ददाति। पूर्णां भक्तिं ब्रह्मण एव। न सर्वेषाम्। तत् कुतः? उच्चानां मोक्षयोग्यानां जीवानां को ब्रह्मा ह्यधीशिता। एतेन प्रमाणेन "अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिं स्म न भक्तियोगम्" (६-१८) इत्युत्तरपद्यमप्युक्ताभिप्रायम्। न पूर्णं भक्तियोगमधमाधिकारिणां ददातीति।

३ प्र. पाठे तु इदं व्योमसंहितावचनमादौ पठ्यते। तदनन्तरं ब्रह्मतर्कवचनम्।

४ "परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान" इति प्र. पाठः।

५ "सुरेतसादः पुनराविश्य चष्टे हंसं गृध्राणं नृषद्रिङ्गिरामिमः" इति च। जातवेदः, जातज्ञातं सर्वं वेत्तीति तादृश, हे जगत्प्रसवितः, सूर्याग्न्यादिसर्वान्तर्यामिन्, रजसः परोऽप्राकृतः, वेदार्थत्वाद् वेदस्य गर्भे निहितो वेदपुत्रो भवान् इच्छामात्रेणेदं सर्वं जनयामास विजज्ञौ च। एतेन सवितर्जातवेद इति व्याख्यातम्। अन्तर्यामकत्वं चाऽह—स्वरेतसा। स्वसामर्थ्येनैव कारणेष्वन्तः प्रविश्य कार्यं जजान। पुनः कार्यप्रपञ्चमप्याविश्यान्तः स्थितः। तादृशं स्वं स्वतन्त्रं दुःखादिकं हन्तीति हंसं स्वयं दोषरहितं भक्तानामपि संसारदोषत्याजकम्, अत एव गृध्राणामृषभम्। गृधु अभिकाङ्क्षायाम्। संसारान्मोक्षमभिकाङ्क्षताम् जीवानां धर्मदेष्टारं स्वामिनं स्तुम इति।

६ परोरजाः अरजस्कत्वात् इति च्छेदः।

७ त्रिगुणात्ययात् तुरीयश्चतुर्थः। आनुषङ्गिकमिदं कालपदनिर्वचनं च। "गुणात्ययात्तु तुर्यश्च" इति क्वचित् पाठान्तरम्।

वेदाश्च सर्ववित् । हंसो दुःखादिहानेन जीवेशत्वाच्च गृध्रराट् । कालः सर्वनियन्तृत्वात् परमात्मा प्रकीर्तितः'' इति तन्त्रनिरुक्ते ॥ * ॥

इति पञ्चमस्कन्धे सप्तमोऽध्यायः

[दशमोऽध्यायः]

एवं बह्वबद्धमभिभाष्यमाणो नरदेवाभिमानिनं[1] रजसा तमसाऽनुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनिकेतं [2]पण्डिताभिमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा योगेश्वरचर्यायां नातिव्युत्पन्नमतिं स्मयमान इव विगतस्मय इदमाह ॥ ८ ॥

अशेषभगवत्प्रियाणां निकेतः स एव भरतो मानुषापेक्षया—

''तत्कालस्थितभक्तेषु मानुषेष्वृषभात्मजः[3] । वरोऽपि[4] धिक्कृतो राज्ञा सुहृदा वैष्णवेष्वपि'' इति गारुडे ॥ * ॥

त्वयोदितं व्यक्तमविप्रलब्धं भर्तुः स मे स्याद् यदि वीर भारः ।
गन्तुर्यदि स्यादधिगम्यमध्वा पीवेति चासौ[5] न विदां प्रवादः ॥ ९ ॥

''भरणादिकृद्धरिरिति[6] चिन्तयन् नृपमब्रवीत्'' इति च ॥ * ॥

---

१ ''बह्वबद्धमपि भाषमाणं नरदेवाभिमानम्'' इति प्र. पाठः ।

२ ''पण्डितमानिनम्'' इति च । नरदेवोऽहमिति गर्वितमत एव मदेन तमोऽनुविद्धेन रजसा क्रोधेन च भगवत्प्रियाणां तत्कालगताशेषमनुष्याणां निकेतः भरतः तिरस्कृतो येन तादृशम्, विगतगर्वो भरत इदमाह । कीदृशः? ब्रह्मणि भूतः । ब्रह्म अनुभूतं येन स इति वा । तदेव स्फुटमाह–सर्वेति । सर्वभूतसुहृदि हरौ आत्मा मनो यस्य । उक्तं हि–''सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति'' इति । अन्यथा ''सर्वभूतसुहृत्'' इत्येवावक्ष्यत् ।

३ पूर्वजन्मनि य ऋषभात्मजः । ४ ''परोऽपि'' इति पाठान्तरम् ।

५ ''पीवेति राशौ न'' इति प्र. पाठः । 'अहो कष्टं भ्रातर्व्यक्तमुरु परिश्रान्तो दीर्घमध्वानमेक ऊहिवान् सुचिरं नातिपीवा नातिसंहननाङ्गो जरसा चोपद्रुतो भवान्' (१०·६) इत्यादि त्वयोदितं व्यक्तमवितथमेव भवेत् । यद्यहं तव शिबिकाभर्ता स्याम् । तदा भर्तुर्मे स भारः स्यात् । यदि चाहं गन्ता स्यां तदा मेऽधिगम्यमध्वा च स्याताम् । नाहं भर्ता नापि गन्ता । ''भर्ता सन् भ्रियमाणो बिभर्ति'' इति सर्वधारको भगवानेव । न त्वं प्रजाभर्ता । नाप्यहं तव शिबिकाभर्ता । यच्च पीवानं मामाह भवान् सोऽपि न ज्ञानिनां प्रवादः । किन्त्वज्ञानिनामेव । यतो नाहं पीवा । किंतु देहः । ६ ''हरणादिकृद्धरिरिति'' इति क्वचित् । अर्थस्तु न स्वरसः ।

स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत् तृड् भयं कलिरिच्छा जरा च ।
निद्राऽरतिर्मन्युरहम्मदश्च[1] देहेन जातस्य हि मे न सन्ति ॥ १० ॥

[2]देहेन जातस्य देहाभिमानिनः—

"देहमानी देहजातो विदेहो मानवर्जितः[3]" इति च ॥ * ॥

जीवन्मृतत्वं नियमेन राजन् आद्यन्तवद् यद् विकृतस्य दृष्टम् ।
स्वस्वामिभावो ध्रुव एष यत्र[4] तर्ह्यच्युतेऽसावितिकृत्ययोगः[5] ॥ ११ ॥

विशेषबुद्धेर्विवरं मनाक् च [6]पश्यामि यन्न व्यवहारतोऽन्यत् ।
क ईश्वरस्तत्र किमीशितव्य[7]मथापि राजन् करवाम किं ते ॥ १२ ॥

"प्राणयुक्तेरयुक्त्या[8] च जडं जीवन्मृतं[9] स्मृतम्" इति च । "स्वामित्वं तु हरेरेव

---

१ "-रहम्मदः शुचो देहेन" इति प्र. पाठः । कलिः कलहः । अरतिस्तन्द्रा । रतिर्विषयासक्तिरिति वा । अहम्मदोऽहङ्कारः । देहेन जातस्य देहाभिमानिनो ह्येते भवन्ति। अतोऽनभिमानस्य मे न संभवन्ति।

२ "देहेन सह तदभिमानेन जातस्य" इति श्रीधरस्वामी । "देहेन सह यो जातस्तदभिमानी" इति विश्वनाथचक्रवर्ती । "देहेन सह जातस्य देहात्माभिमानवतः" इति शुकदेवः ।

३ "देहजातोऽदेहो मानविवर्जितः" इति क्वचित् । मानवर्जितोऽभिमानवर्जितः ।

४ "स्वस्वाम्यभावो ध्रुव ईडय यत्र" इति प्र. पाठः ।

५ "तर्ह्युच्यतेऽसौ विधिकृत्ययोगः" इति च । "त्वं जीवन्मृतो मां कदर्थीकृत्य भर्तृशासनमतिचरसि"(१०·७) इति यदुक्तं तत्रेदमुत्तरम्–जीवन्मृतत्वम् । आत्मनस्तावत् जीवन्मृतत्वं नास्त्येव। देहस्य चेत् न केवलं मम । तवापि समानमेतत् । यत उत्पत्तिनाशवतः विकृतस्य जडशरीरस्य जीवन्मृतत्वं नियमेन दृष्टम् । जीवसंयोगेन जीवत् । तद्वियोगेन मृतं च तत् । यत्र यदि स्वस्य स्वामित्व निश्चितमित्युच्यते तदपि न त्वयि, किन्त्वच्युते हरौ । यस्य स्वामित्वं कदाऽपि न च्यवते । तत्र तु कियत् स्वामित्वं? सम्प्रति त्वं स्वामी, अहं भृत्यः । श्वस्त्वं भृत्यो भवेः । अहं च स्वामी भवेयम् । तदा मयाऽपि त्वमेवमुपालब्धुं शक्यः । अतः स्वामिताभ्रमं त्यज। यतः मम स्वामी हरिर्नित्यमितीयानेव जीवस्येतिकृत्ययोगः । परमं कर्तव्यमित्येतत् ।

६ "पश्याम" इति प्र. पाठः ।

७ "-तव्यं तथाऽपि" इति केचित् । एकः स्वामी अपरो भृत्यः इत्यादिविशेषबुद्धेः विवरमवकाशं मनागपि न पश्यामि अज्ञव्यवहारादृते । ज्ञानिव्यवहारे तु हरिरेव स्वामीत्युक्तम् । तत्रैवं सति क ईश्वरः को भृत्यः । अथापि तुष्यतु भवान् । राजन् करवाम किं ते?

८ आद्यन्तवदिति मूलस्य विवरणमिदम् । प्राणयोगेन शरीरमपि जीवदित्युच्यते । वियोगे च मृतमिति । तस्मात् प्राणयोगवियोगाभ्यां सर्वशरीराणां जीवन्मृतत्वं स्वतः सिद्धम् । स्वरसोऽयं पाठः । "प्राणयुक्तेररत्या च" इति प्रचुरः पाठः ।

९ "जीवमृतम्" इति क्वचित् ।

मुख्यमन्यत्र भृत्यता । देवेषु तन्नियत्या च[1] त्वदादेर्व्यावहारिकम् । मानुषेषु[2] विशेषः को व्यवहारमृते वद । व्यत्यासान्नहि देवेषु व्यत्यासः स्वामितागतः[3]" इति च ॥ * ॥

न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि ।
महद्विमानात् स्वकृताद्धि मादृग् [4]धक्ष्यत्यदूरादपि शूलपाणिः ॥ २५ ॥

[5]"स्वतो महदवज्ञानाद् रुद्रोऽप्यात्मानमादहेत्" इति च[6] ॥ * ॥

इति पञ्चमस्कन्धे दशमोऽध्यायः

[एकादशोऽध्यायः]

तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृम्भितेषु ।
न वेदवादेषु हि तत्ववादः प्रायेण शुद्धो नु चकास्ति साधु[7] ॥ २ ॥

---

१ देवेषु हरिनियत्या स्वामित्वं च । तथा च हरौ केवलं स्वामित्वम् । देवेषु भृत्यत्वसमानाधिकरणं स्वामित्वम् । मनुष्येषु भृत्यत्वमेव । मनुष्येष्वपि रहूगणादिषु सिन्धुपतिरित्यादिस्वामित्वव्यवहारोऽस्तीत्यत आह—त्वदादेः । मनुष्येषु स्वामित्वं व्यवहारमात्रम् । ननु देवेष्वपि तर्हि व्यवहारमात्रम् । तेषामपि मुख्यस्वामित्वाभावात् । ननु भगवन्नियतं स्वावरस्वामित्वं तेषामस्ति । तर्हि भगवद्दत्तं सिन्धुदेशस्वामित्वं रहूगणस्याप्यस्ति । ततो मनुष्येषु को विशेषः? आह—व्यत्यासात् । मनुष्येषु स्वामिभृत्यभावः व्यत्यस्यते । इदानीं स्वामी श्वो भृत्यो भवेत् । भृत्यश्च स्वामी भवेत् । न तथा देवेषु तेषां पदाधिकारनैयत्यात् । तस्मात् क्षणभङ्गुरं मनुष्यस्वामित्वं व्यवहारमात्रमित्युच्यत इति ।

२ "मनुष्येषु" इति च पाठान्तरम् ।

३ "स्वामितां गतः" इति प्र. पाठः । क्वचित् कोशेष्वपि तथा ।

४ "मादृङ् नंक्ष्यत्यदूरादपि" इति प्र. पाठः । विश्वसुहृत् नारायणः सखा यस्य । उक्तं हि—'सर्वभूतसुहृदात्मना" इति । मानापमानयोः तुल्यतादर्शनेन विगतदेहाभिमानस्य तव यद्यपि मदवज्ञाकृतः कोपादिविकारो नास्ति । अपि तथापि स्वकृतान्महदवज्ञानात् मादृक् पापकर्ताऽऽत्मानं दहेदेव । स्वयं शूलपाणिरपि महदवज्ञानान्न मुच्यते । किमुत मादृशः?

५ इतः पूर्वं क्वचित् प्र. पाठे—"ब्रह्महत्यासहस्रस्य पापं शाम्येत् कथञ्चन । न पुनः सदवज्ञाने कल्पकोटिशतैरपि" इत्येकं पद्यमधिकं पठ्यते । "सदवज्ञाने" इत्यत्र "स्वदवज्ञाने" इति क्वचित् ।

६ क्वचित् कोशेऽत्र 'च'कारो न पठ्यते ।

७ "साधुः" इति प्र. पाठः । वेदस्य वादाः मुखतः प्रतीता अर्थाः । "वादो विषयकृत्त्वं च मुखतो वचनं स्मृतम्" इत्यभिधानात् । वेदरहस्यमविदुषां मन्दबुद्धीनां स्वर्गादिफलं कर्मादिकमेव वेदेषु प्रतीयत इत्येतत् ।

न तस्य तत्वग्रहणाय साक्षाद् वरीयसीरपि वाचः समासन् ।
स्वप्ने निरुक्त्या गृहमेधसौख्यं[1] न यस्य हेयानुमितं स्वयं स्यात् ॥ ३ ॥

"न वेदेष्वल्पबुद्धीनां ब्रह्मतत्वं समीक्ष्यते । महाबुद्धिस्तु[2] वेदेषु पश्येद् ब्रह्मैव केवलम्[3]" ॥ * ॥

स वासनात्मा विषयोपरक्तो गुणप्रवाहो विकृतः षोडशात्मा ।
[4]चित्रं पृथङ्नामभी रूपभेदमन्तर्बहिष्ट्वैः स्वपुरैस्तनोति ॥ ५ ॥

दुःखं सुखं व्यतिमिश्रं च[5] तीव्रं कालोपपन्नं फलमाव्यनक्ति ।
आलिङ्ग्य मायारचितान्तरात्मा स्वदेहिनं संसृतिचक्रकूटम्[6] ॥ ६ ॥

तदुक्तम्–"वेदवादरताः पार्थ नान्यदस्तीति वादिनः" इति । अत्रापि–"वेदवादरतो न स्यान्न पाषण्डी न हैतुकी" इति । तदेव स्फुटमुच्यते–उरुगार्हमेधेत्यादि । गृहमेधो गृहस्थः तस्य ये विताना यज्ञास्तत्परायामेव विद्यायामुरु विजृम्भितेषु दर्शितभरेषु वेदवादेषु निमग्नानां शुद्धस्तत्ववादः तत्वविचारः साधु न चकास्ति । बाहुल्यादल्पवेदिनां प्रचुरा लोकस्थितिरियमेवेति प्रायेणेत्याह ।

१ "गृहमेधिसौख्यम्" इति प्र० पाठः । तस्मात् तस्य मन्दबुद्धेर्जनस्य साक्षात् परमात्मप्रतिपादकतया वरीयस्योऽपि वेदवाचस्तत्वं ग्राहयितुं न समर्था आसन् । तस्य कस्य ? स्वप्ने निरुक्त्या । निरुक्तिर्निर्वर्णनम् । निदर्शनमिति यावत् । स्वप्ननिदर्शनेन तद्वत् जाग्रत्कालीनमपि गृहमेधसौख्यमल्पास्थिरतया हेयमिति यस्यानुमितं न स्यात् । संसारस्यासारत्वं विदुष एव वेदः स्वान्तरं विवृणोति ।

२ "महाबुद्धिषु देवेषु" इति केचित् पठित्वा ज्ञानिषु देवेषु मध्ये चतुर्मुख एव केवलमतिशयेन ब्रह्मतत्वं वेदेषु पश्येदिति व्याचक्षते ।

३ इतः परं प्र. पाठे "इति च" इति पठ्यते ।

४ "बिभ्रत् पृथङ्नामभि रूपभेदमन्तर्बहिष्ट्वं च पुरैस्तनोति" इति प्र. पाठः ।

५ "व्यतिरिक्तं च" इति च ।

६ "-चक्रकूटः" इति च । श्लोकद्वयस्यायमर्थः । स इति पूर्वप्रसक्तं मन एव । पुंस्त्वं तु उत्तरश्लोके मायारचितान्तरात्मेति मनसोऽन्तरात्मशब्देन निर्देशात् । तथा च सः मायारचितः प्रकृतिनिर्मितः अन्तरात्मा । मन इति यावत् । स्वरूपमनो व्यावर्तयति–मायारचितेति । सुरनरपशुपक्ष्यादिनानानामोपेतैः स्वपुरैः स्वाधिष्ठितैर्जीवशरीरैः विचित्रमाकृतिभेदं तनोति । पीवाऽयं सुरूपोऽयं नरोऽयं सुरोऽयमित्यादि । तथा संसृतिचक्रे कूटं प्रच्छन्नम्, कूट प्रच्छादने, संसृतिचक्रगूढमिति यावत्, स्वदेहिनं जीवमावृत्य तीव्रं केवलं दुःखं सुखं वा क्वचित्, क्वचिच्चोभयं मिश्रं कालप्राप्तं कर्मफलं व्यञ्जयति । नानादेहप्राप्तौ तत्र सुखदुःखादिभोगे च मन एव कारणमिति । उक्तं हि–"मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इति । कीदृशं मनः? सोऽन्तरात्मा वासनामयः । यथासंस्कारं प्रवर्तते–कुशलाकुशलेषु । विषयेषु शब्दादिषूपरक्तः सहजप्रवृत्तिमान् । गुणाधीनश्च प्रवहति प्रवर्तते । पूर्वश्लोक एवोक्तम्–

सः मायारचितः अन्तरात्मा । मनः[१] ।

तावानयं व्यवहारः सदा वै[२] क्षेत्रज्ञसाक्ष्योर्भवति स्थूलसूक्ष्मः ।
तस्मान्मनो लिङ्गमदो वदन्ति [३]गुणागुणस्यास्य परावरस्य ॥ ७ ॥

"क्षेत्रवित्तु हरिः प्राणः साक्षी ताभ्यां पुमान् सरेत्[४]" ॥ * ॥

गुणानुरक्तं व्यसनाय जन्तोः क्षेमाय नैर्गुण्यमथो मनः स्यात् ।
यथा प्रदीपो घृतवर्तिमास्थितः[५] स्थितिं सधूमां भजति ह्यन्यदा स्वम् ।
पदं तथा गुणकर्मानुबद्धं [६]बहिर्मनः श्रयतेऽन्यत्र तत्त्वम् ॥ ८ ॥

पदं विषयम् ॥ * ॥

"यावन्मनो रजसा पूरुषस्य सत्वेन वा तमसा वाऽनुविद्धम्" इति । षोडशात्मतया विकृतः । दशेन्द्रियाणि पञ्च प्राणाः स्वयं मनश्चेति षोडश । एतेषु व्याप्तं मन एव हि शब्दादीन् गृह्णाति । मनसोऽनवधाने न श्रोत्रेण शब्दो गृह्यते । न चक्षुषा रूपम् । तस्मान्मन एव तत्र सर्वत्राऽततमिति षोडशात्मकम् । तदेव स्फुटमुच्यते–अन्तर्बहिष्ठः । अन्तः वासनारूपेण बहिश्च चक्षुषादिद्वारा स एव स्थित्वा बाह्यान्तरान् विषयान् ग्राहयतीति । इदमेव पूर्वमुक्तं वासनात्मा विषयोपरक्त इति ।

१ क्वचित् आदौ "सः" इति नास्ति । केवलं "मायारचितः अन्तरात्मा मनः" इतीयदेव । तत्पक्षे द्वितीयपद्यस्यैव व्याख्यानम् ।

२ "सदाऽविः क्षेत्रज्ञसाक्ष्यो भवति" इति प्र. पाठः ।

३ "गुणागुणत्वस्य" इति च । यावन्मनः विषयोपरक्तं तावानयं सांसारिको व्यवहारः सदा वर्तत एव । स्थूलसूक्ष्मः जाग्रत्स्वप्नरूपः । ननु जडं मनः । तत्कथं जीवं संसारयति? आह–क्षेत्रज्ञसाक्ष्योः । क्षेत्रज्ञसाक्षिणोः हरिप्राणयोः प्रेरकयोः सतोः । तन्नियत्यैव मनो बन्धकं न स्वतः । कथं साक्ष्योः? छन्दस्सु एतादृशाः प्रयोगा भवन्ति । तद्यथा "अथ हतयोर्गलिकेश्योः" इति, यथावा "नृकेसरिम्" इति । मनसः बन्धहेतुत्वमेवं विवृतम् । अथ तदेव मोक्षहेतुश्चेत्युपसंहरति–तस्मात् । गुणस्य त्रिगुणवतः संसारस्य गुणातीतस्य मोक्षस्य च मन एव लिङ्गं कारणं वदन्ति । "गुणवचनेभ्यो मतुबो लुगिष्टः" । परावरस्य तारतम्योपेतस्य । संसारमोक्षयोरुभयोरपि समानम् । परो मोक्षः अवरः संसार इति यथायोगमन्वयो वा ।

४ "पुमांश्चरेदिति च" इति प्र. पाठः । सरेत् संसरेदित्यर्थः ।

५ "घृतवर्तिमश्नन् शिखाः सधूमा भजति" इति प्र. पाठः ।

६ "वृत्तीर्मनः" इति च पाठः । अयमर्थः । गुणागुणस्येत्युक्तं स्फुटमुच्यते —गुणबद्धं मनः सांसारिकव्यसनाय । तदेव नैर्गुण्यं क्षेमाय मोक्षाय स्यात् । निर्गुणमेव नैर्गुण्यम् । उक्तं हि–"निस्त्रैगुण्यो भवार्जुन" इति । निर्गुणो भगवान् तद्विषयं वा नैर्गुण्यम् । यथा घृतवर्तिमास्थितो दीपः मषीमलेन स्वयमपि मलीमसो भवन् सधूमां स्थितिं

एकादशाऽसन् मनसोऽस्य वृत्ती[1]राकूतयः पञ्च धियोऽभिमानाः ।
मात्राणि कर्माणि पुरं च तासां वदन्ति हैकादश वीर भूमिम्[2] ॥ ९ ॥

गन्धाकृतिस्पर्शरसश्रवांसि [3]विसर्गगत्यत्त्यभिजल्पशिल्पाः ।
एकादशं स्वीकरणं ममेति मायामहं द्वादशमेकमाहुः[4] ॥ १० ॥

"एकादशेन्द्रियद्वारा स्युरेकादश वृत्तयः । शब्दाद्यास्तदभीमानास्तदिच्छाश्चैव पञ्चशः । स्पर्शान्तर्भावतः कर्मखानां नैव पृथग्गतिः[5] । एकादशैव चेष्टाः स्युरिन्द्रियाणां पृथक्पृथक् । [6]गोळकास्तदधिष्ठानं चैकादश निगद्यते । एष संसृतिसम्भारो

भजति । अन्यदा तप्तायःकाञ्चनपिण्डादिषु भास्वरं स्वरूपमेव भजति । एवं वर्तिस्थानीयेन गुणेन घृतस्थानीयेन कर्मणा चानुबद्धं मनः बाह्यं पदं शब्दादिविषयजातं श्रयते । तदभावे तु ब्रह्मतत्वमिति ।

१ "मनसो हि वृत्तय आकूतयः" इति प्र. पाठः ।

२ "भूमीः" इति प्र. पाठः ।

३ "विसर्गरत्यर्त्यभिजल्प–" इति च ।

४ "शय्यामहं द्वादशमेक आहुः" इति च । अयं श्लोकद्वयार्थः—दशेन्द्रियद्वारा स्वयं मनसा च विषयसम्बन्धरूपा एकादश मनसो वृत्तयो भवन्ति । चक्षुरादिभिर्मन एव हि प्रवर्तते । तत्र तावद् धियः ज्ञानेन्द्रियवृत्तेराकूतयोऽभिमानाश्च पञ्चपञ्च भवन्ति । आकूतिरिच्छा । अभिमानश्चित्तसमुन्नतिः । आदौ शृणुयां पश्येयमित्यादिरिच्छा । ततश्च श्रवणं दर्शनमित्यादि । ततोऽश्रृणवमपश्यमित्यादिरभिमानः । यद्यपि कर्मेन्द्रियवृत्तीनामपि विसृजेयम्, गच्छेयम्, सुखमद्याम्, जल्पेयम्, कुर्यामिति पञ्चाऽकूतयः; व्यसृजम्, अगच्छम्, सुखमादम्, अजल्पम्, अकरवमिति पञ्चाभिमानाश्च सम्भवन्ति । तथाऽपि कर्मेन्द्रियाणां स्पर्शेन्द्रियस्य च त्वग्रूपैकाधिष्ठानत्वेन तद्ग्रहणेनैव तद्ग्रहणमिति ज्ञानेन्द्रियेष्वेवान्तर्भावविवक्षया पञ्चैवाऽकूतयोऽभिमानाश्चेति सूक्तम् । तथाच स्पर्शेच्छा स्पर्शाभिमान इति सर्वेषां ग्रहणम् । इदानीमेकादशचेष्टा आह-मात्राणि । शब्दाद्याः पञ्च तन्मात्राणि ज्ञानेन्द्रियाणां विसर्गादीनि पञ्च कर्माणि कर्मेन्द्रियाणां पुरं शरीरं मनस इत्येकादश चेष्टाभूमिं वदन्ति । ततश्चाऽसु भूमिषु विषयेष्विति यावत्, मनस एकादश चेष्टाः । चेष्टा प्रवृत्तिः । आदाविच्छा । ततः प्रवृत्तिः । ततो ग्रहणम् । ततोऽभिमान इति क्रमः । तथा इन्द्रियाणां भूमिं अधिष्ठानं च गोलकाख्यमेकादशैव वदन्ति । तदेवमेकादशकं गणं संसारभूमिं वदन्ति । अथच द्वादशकं पक्षान्तरमाह-गन्धेत्यादि । आकृती रूपम् । श्रवः शब्दः । अत्तिः सुखादनमुपस्थविषयः । तदेवं दशेन्द्रियविषयाः । मम गृहमित्यादिर्ममकार एकादशः । अहंमाया अहं कर्ता स्वतन्त्र इति भ्रमश्चैको द्वादशः । तदेवं द्वादशकं गणं संसृतिभूमिमाहुः । "इन्द्रियेभ्यः परा ह्यर्थाः" इत्यर्थग्रहणेनैव तदर्थानामिन्द्रियाणां गतार्थत्वात् न पृथग्ग्रहणम् । ममताविरहे विषया अप्यकिञ्चित्करा इति पुनः पक्षान्तरमाह—एकादशं ममेति, द्वादशमहमिति तदेतद्द्वयमेव एकं केवलं संसृतिभूमिमाहुः । अथचाहङ्काराख्यं द्वादशमेकमेव केचित् संसृतिभूमिमाहुः । ममकारस्याहङ्कारानतिरेकात् । मायां संसारमाहुरिति केचित् ।

५ कर्मखानां कर्मेन्द्रियाणां इच्छाभिमानयोर्नैव पृथग्गणना ।

६ "गोलका–" इति प्र. पाठः ।

48

द्वादशैवाथवा भवेत्। दशकं विषयाणां च ममाहमिति च द्वयम्। द्वयमेव ममाहं वा संसृतिस्त्वहमेव वा[१]।"

अत्तिरुपस्थविषयः[२] ॥ * ॥

द्रव्यस्वभावाशयकर्मकालैरेकादशामी मनसो विकाराः।
सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः[३] ॥ ११ ॥

द्रव्यं देहादिः[४]। स्वभावो योग्यता। जीवस्य क्षेत्रज्ञतः स्युः। मिथः स्वतश्च न स्युः[५]॥ * ॥

क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात् स्वयञ्ज्योतिरजः परेशः।
नारायणो भगवान् वासुदेवः स्वमाययाऽऽत्मन् व्यवधीयमानः[६] ॥ १२ ॥

---

१ इतः परं प्र. पाठे "इति च" इति पठ्यते।

२ "अत्तिरुपस्थविषयम्" इति क्वचित्। "अर्तिरूपस्थविषयः" इति प्र. पाठः प्रामादिक एव। तथाह्यानन्दमालावचनम्—"विसर्गगत्यत्त्यभिजल्पशिल्पा इत्यादौ पुत्रोत्पादनरूपवीर्यविसर्गस्यापि भोगमात्रत्वादत्तिशब्दवाच्यत्वं दृष्टम्" इति।

३ द्रव्यं शरीरमिन्द्रियाणि च। स्वभावो योग्यता। आशयः संस्कारः। कर्म च पुण्यपापाख्यमदृष्टम्। एतानि प्रतिव्यक्ति भिन्नानि असंख्यानि। कालश्चानन्तः। ततश्च विकारहेतूनामानन्त्यात् ततो भवन्तः एकादशत्वेन राशीकृताः मनसो विकारा अपि सहस्रशः शतशः कोटिशश्च। असंख्या एवेत्यर्थः। प्रतिव्यक्ति च बाल्ययौवनादिकालभेदेन कर्मभेदेन संस्कारभेदेन च सहस्रशः शतशः कोटिशश्चेत्यनियततया बहुविधा भवन्ति। एते च विकाराः क्षेत्रज्ञतः द्रव्यादिषु नियामकतया स्थितात् परमात्मनः स्युः। न मिथः स्युः। नापि स्वतः स्युः। जडत्वादस्वातन्त्र्याच्च। द्रव्यादीनि साधनान्येव। कारणं तु भगवानेव।

४ "देहादि" इति प्र. पाठः।

५ "मिथः स्वतश्च न स्युः" इतीदं वाक्यमेकस्मिन् प्राचीनकोशे न पठ्यते।

६ "स्वमाययाऽऽत्मन्यवधीयमानः" इति प्र. पाठः। नारायणो भगवान् वासुदेवः क्षेत्रज्ञ उच्यते। एतेन पूर्वश्लोकप्रसक्तस्य क्षेत्रज्ञस्य जीवत्वभ्रान्तिं वारयति। "क्षेत्रज्ञं चापि मां विद्धि" इति ह्युक्तम्। आत्मा देशतः कालतो गुणतोऽनन्तोऽन्तर्यामी च। "यच्चाऽप्नोति–" इत्यादेः। पुरि ब्रह्माण्डाख्ये शयनात् पुरुसरणात् पूर्णषड्गुणत्वाच्च पुरु स इति पुरुषः। पुरुषविधश्च। "तस्य पुरुषविधताम्। अन्वयं पुरुषविधः" इत्युक्तेः। अत एव पुरमणतीति पुराणोऽपि स एव। जगत्कारणत्वाच्च पुराणः। पुराणपुरुष इत्येकं वा विशेषणम्। "जगृहे पौरुषं रूपम्" इति पूर्वोक्तदिशा स्वीकृतप्रथमपुरुषावतारः। स्वयञ्ज्योतिः स्वप्रकाशः। तदपि साक्षात्। न जीववदन्याधीनतया। अजः। केनापि न जायते। "अजो नित्यः शाश्वतोऽयं पुराणः" इति श्रुतिं स्मारयति आद्यन्तग्रहणेन। परेषां ब्रह्मादीनामपीष्टे। पर ईश इति वा। अन्येषामीशत्वमवरम्। सर्वत्र वसन् दीव्यति क्रीडति व्यवहरति द्योतते मोदते चेति वासुदेवः। अथापि न दृश्यते–स्वेच्छया स्वस्मिन्नेव तिरोधीयमानः।

यथाऽनिलः स्थावरजङ्गमानामात्मस्वरूपेण निविष्ट ईशे[1]।
एवं परो भगवान् वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः ॥ १४ ॥

स्वमायया॒ऽऽत्मन् व्यवधीयमानः। स्वेच्छया स्वस्मिन्नेव तिरोहितत्वेन स्थितः[2]—

"स्वात्माधारः स्वेच्छयैव जीवदृष्टेस्तिरोहितः[3]। क्षेत्रज्ञेत्युच्यते विष्णुर्जीवस्थः पुरुषोत्तमः"[4] ॥ * ॥

न यावदेतां तनुभृन्नरेन्द्र विधूय मायां वयुनोदयेन।
विमुक्तसङ्गो जितषट्सपत्नो [5]वेदार्थतत्त्वं भ्रमतीह तावत् ॥ १५ ॥

[6]न तावदेतन्मन आत्मलिङ्गं संसारतापावपनं जनस्य।
यच्छोकमोहामयरागलोभ[7]वैरानुबन्धं ममतां विधत्ते ॥ १६ ॥

भ्रातृव्यमेनं[8] त्वमदभ्रवीर्य[9]मुपेक्षयाऽध्येधितमप्रमत्तः।
गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यळीकं[10] स्वयमात्ममोहम्[11] ॥ १७ ॥

---

१ "ईशेत्" इति प्र. पाठः। तिरोहितत्वमेव विव्रियते—यथाऽनिलः। यथा वायुः प्राणस्वरूपेण स्थावरजङ्गमेषु निविष्टः स्थावरजङ्गमानामीष्टे। तथा भगवानव्यक्ततयेदं जीवजातं प्रविष्टः क्षेत्रज्ञ इति व्यपदिश्यते। उक्तं हि—"वायुर्यथैको भुवनं प्रविष्टः-" इत्यादि। "तं दुर्दर्शं गूढमनुप्रविष्टम्" इति च।

२ "स्वस्मिन्नेव तिरोहितः" इतीयदेव क्वचित् पठ्यते।

३ एतेन प्रथमपद्यं व्याख्यातम्। जीवदृष्टेस्तिरोहित इति द्वितीयपद्यपूर्वार्धस्य च व्याख्यानम्। जीवस्थ इत्युत्तरार्धस्य।

४ इतः परं प्र. पाठे "इति च" इति पठ्यते।

५ "वेदाऽत्मतत्त्वम्" इति प्र. पाठः।

६ "न यावदेतन्मन—" इति च।

७ "मोहामयसङ्गलोभ—" इति क्वचित्।

८ "—मेनं तददभ्र-" इति प्र. पाठः।

९ "—मुपेक्षयाऽध्येधित—" इति च।

१० "व्यलीकं स्वयमात्ममोषम्" इति च।

११ अयं श्लोकत्रयार्थः-मुक्तविषयसङ्गः फलासक्तिरहितो वा, जितषडिन्द्रियाख्यशत्रुः सन् शरीरी एतामहंममेतिमायां वयुनोदयेन, वयुनं ज्ञानम्, यथार्थज्ञानोदयेन विधूय परमार्थतत्वं यावन्न जानाति तावदिह संसारे भ्रमति। अहंममेत्यभिमानादेव संसार इत्येतत्। तदेव स्फुटमाह-न तावत्। एतन्मनः आत्मनः बन्धमोक्षयोरुभयोरपि लिङ्गम्। अथापि यावन्न मायाविधूननं तावत् संसारतापानामावपनं निर्वापणं, निमूलनहेतुरिति यावत्, न भवति। यतः शोकमोहादिभिर्जीवमनुबध्नातीति तादृशं मनः ममतामेव पुनःपुनर्विधत्ते। मोहोऽज्ञानं प्रमादो वा। तस्मात् त्वमेनमभिमानाख्यं भ्रातृव्यं शत्रुं जहि। नचानवहितेन भाव्यम्। यतोऽयमदभ्रवीर्यः। प्रयत्नेन निग्रहीतव्यः। अतोऽप्रमत्तः जहि। ननूपेक्षितः स्वयमेवापगच्छति, किं हननप्रयासेन? नेत्याह—उपेक्षयाऽध्येधितम्।

अभिमानादेव संसारोऽन्यथा नेति परिहारः[1] ॥ * ॥

इति पञ्चमस्कन्ध एकादशोऽध्यायः

[द्वादशोऽध्यायः]

अयं जनो नाम चलन् पृथिव्यां यः पार्थिवः पार्थिव कस्य हेतोः ।
तस्यापि चाङ्घ्र्योरधि गुल्फजङ्घा[2]जानूरुमध्योर[3]शिरोधरांसाः ॥ ५ ॥

अंसे च[4] दार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आस्ते ।
यस्मिन् भवान् रूढनिजाभिमानो राजाऽस्मि सिन्धुष्विति दुर्मदान्धः ॥ ६ ॥

यस्मान्मूलकारणभूतो विष्णुरेव, अतो मुख्यं[5]सर्वकारणत्वं तस्यैव । मूलाश्रयविवक्षा यदि न स्यात्, कुतः पृथिव्यां चलतीति[6] व्यवहारः? यतोऽवान्तराश्रया बहवः सन्त्यङ्घ्र्याद्याः[7] ॥ * ॥

उपेक्षितोऽपि वर्धते आमय इव । अतो निग्रहणमेवोचितम् । केनास्त्रेण? गुरोर्हरेश्च चरणोपासनमेवास्त्रम् । शत्रु-दौर्जन्यं स्मारयति–व्यळीकमप्रियकारिणमपराद्धारं प्रतारकं वा । कोऽपराधः? आत्मानं मोहयति । किमतः परमपराधो नाम ।

१ समग्रस्य जडभरतोपदेशस्य, विशेषतश्चाध्यायान्तगतश्लोकत्रयस्य तात्पर्यकथनमेतत् । अभिमानग्रहणेन भ्रातृव्यमेनमिति मूले पुल्लिङ्गप्रयोग उपपादितः ।

२ "–जङ्घ–" इति पाठान्तरम् । ३ "–मध्योरःशिरोधरांसाः" इति च ।

४ "अंसेऽधि दार्वी" इति प्र. पाठः । अयं श्लोकद्वयार्थः—हे पार्थिव, पृथिवीविकारभूतोऽयं जनः देही । रहूगणस्य देहात्माविवेकमनुकरणेनोपहसति । चलन् पृथिव्यां चलतीति कस्य हेतोरुच्यते । ननु चलनाधारत्वात् पृथिव्यामित्युच्यते । नेत्याह—तस्यापि । तस्य चलतोऽन्येऽप्यवान्तराधाराः सन्ति अङ्घ्री, अङ्घ्र्योरुपरि गुल्फौ जङ्घे जानुनी ऊरू मध्यमुरः शिरोधरांऽसौ चेति । तत् किं पादयोश्चलति जङ्घयोश्चलतीत्यादिर्व्यवहारो न भवति । ननु मूलाश्रयविवक्षया पृथिव्यां चलतीत्युच्यते; अन्ततः अङ्घ्र्यादीनामपि तदाश्रितत्वात् । एवं तर्हि पृथिव्या अपि मूलाश्रयः सर्वस्य च मूलकारणं भगवान् स एव सर्वत्र कारणत्वेनाऽधारत्वेन च विदुषा द्रष्टव्य इति । अत्रोरःशब्दे सलोपः । उरग इति यथा । अंसे दारुमयी शिबिका । तस्यां राजपदभाक् शरीरम् । तत्र शरीरे भवान् रहूगणः । यस्त्वमस्मिन् पार्थिवपिण्डे निरूढनिजत्वाभिमानोऽत एव राजाऽस्मीति भ्रान्तः । एतच्छरीर-ग्रहणात् पूर्वं त्वं न राजाऽसीः । परस्ताच्च न भविष्यसि । ततश्चाविनाभावेन पिण्डस्यैव राजत्वव्यपदेशः । तच्च शरीरं येन तुभ्यं दत्तम् , यः शरीरेऽन्तस्त्वयि च नियामकः स एव वस्तुतः स्वामी प्रभुश्च त्वदादेः सर्वस्य । तेन न त्वं स्वामी । नाहं ते वाहकः । यतः सर्वनिर्वाहकोऽपि भगवानेव ।

५ "मुख्यं मूलसर्वकारणत्वम्" इति क्वचित् । ६ "चरतीति" इति च ।

७ "–सन्त्यङ्घ्र्यादयः" इति क्वचित् ।

शोच्यानिमांस्तानधि कः समाधि[1]र्विष्ट्या निगृह्णन् निरनुग्रहोऽसि ।
जनस्य गोप्तेति[2] विकत्थमानो न शोभसे वृद्धसभासु दुष्टः ॥ ७ ॥

एवं मूलगोप्तृत्वं च विष्णोरेव ॥ * ॥

एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानं[3] परमाणवो ये ।
अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो विशेषः ॥ ९ ॥

आश्रयत्वात् क्षितिरिति निर्वचने क्षितिशब्दोऽपि तस्मिन्नेव[4] । परमाणुमात्रायाः पृथिव्या अयुक्तत्वात् । [5]परमाणवोऽविद्ययैवाऽधारत्वेन कल्पिताः ॥ * ॥

एवं [6]कृशंस्थूलमणुर्बृहद् यदसच्च सज्जीवमजीवमन्यत् ।
द्रव्यस्वभावाशयकालकर्मनाम्न्याऽजयाऽवेहि[7] कृतं द्वितीयम् ॥ १० ॥

---

१ "–नधिकस्तवाऽधिः" इति पाठान्तरम् । "–निमांस्त्वमधिकष्टदीनान्" इति प्र. पाठः । तव सेवार्थे त्यक्तजीवितानिमान् शोचनीयान् भृत्यानधिकृत्य तव कः समाधिः? किमेवमाश्रितानुपतापयसीति पृष्टे किं समाधानं वदेः ? एषूपतापितेषु तव वा मनसि किं समाधानम् ? का चित्तशांतिः ? किमात्मसमर्थनम् ? ननु न ते शोच्याः । वेतनदानेन पोषयामि तान् । नेत्याह—विष्ट्या वेतनदानेन स्वेच्छं निगृह्णन् कथं निर्दयो नासि ? नहि सर्वत्र भगवन्तं पश्यन्नेवमुपतापयत्युपतप्यते वा । यतो भवानपि भृत्येष्वेको भगवतः । तस्माद् दुष्टमेव ते दर्शनम् ।

२ "गोप्ताऽस्मि विकत्थ–" इति प्र. पाठः । ततश्च तव मम च सर्वेषां भर्ता गोप्ता च भगवानेव । अथापि यदात्मानं गोप्तारं विकत्थसे इमांश्च भृत्यान् मन्यसे तेन दोषेण ज्ञानिनामपहास्योऽसि ।

३ "–धानात् परमाणवो–" इति पाठान्तरम् । एवं क्षितिशब्दस्य वृत्तं वर्तनं सर्वत्र निवसति सर्वं च निवसत्यस्मिन्निति भगवत्येव निरुक्तम् । नन्वाश्रयत्वात् पृथिव्येव क्षितिः किं न स्यात्? न स्यात् । परमाणूनां समाहारो हि क्षितिर्नाम । अन्ततः परमाणूनामेवाऽश्रयत्वमुक्तं भवति । तथाच य इमे परमाणव आश्रयत्वेनोक्तास्तेषां तत्रासन्निधानमसामर्थ्यमेव । तत् कथं व्यवहारः? येषां परमाणूनां समूहेन कृतोऽयं विशेषः इयं पृथिवी, "पृथिवीं विशेष इत्याहुः" इति तृतीयतात्पर्ये ह्युक्तम् । तेऽविद्ययाऽज्ञानेनैव, मनसा स्वेच्छया, नतु शास्त्रानुसारेण, आधारत्वेन कल्पिताः । न वस्तुतः । यतो भगवानेव मुख्याधारः । अथच अविद्यया ईश्वरेच्छया अमुख्याधारत्वेन क्लृप्ताः । "महामायेत्यविद्येति–"इत्यादि श्रूयते हि ।

४ एतेनाष्टमपद्यमप्युक्ताभिप्रायं भवति । "तन्नामतोऽन्यद् व्यवहारमालं निरूप्यताम्" इति पूर्वपद्ये क्षितिनामतः पृथिव्या अन्यदेव निरूप्यतां व्यवहारहेतुरित्युक्तम् । तच्चान्यत् भगवत्तत्वमेवेति निर्वचनेन स्फुटमत्र दर्शयामास ।

५ "परमाणवोऽप्यस्याविद्ययैव" इति प्र. पाठः । "परमाणवोऽप्यस्य विद्ययैव" इति यादुपत्यादिसम्मतः पाठः । अकारवाच्यस्य हरेर्विद्या अविद्या ।

६ "कृशं स्थूल-" इति पाठान्तरम् ।

७ "–नाम्नाऽजयाऽवेहि" इति प्र. पाठः ।

ज्ञानं विशुद्धं परमार्थमेकमनन्तरं नबहिर्ब्रह्म[1] सत्यम् ।
प्रत्यक् प्रशान्तं भगवच्छब्दवाच्यं[2] यद् वासुदेवं कवयो वदन्ति ॥ ११ ॥

एवं सर्वं तथा[3] प्रकृत्यैव कल्पितं विष्णोरन्यत् । एवं प्रकृत्याधारः स्वयमनन्याधारो विष्णुरेव । अतः सर्वशब्दाश्च तस्मिन्नेव—

"राजा गोप्ताऽऽश्रयो भूमिः[4] कारणं चेति लौकिकः । व्यवहारो न तत् सत्यं[5] तयो-
र्ब्रह्माऽऽश्रयो विभुः । गोप्ता च[6] तस्य प्रकृतिस्तस्या विष्णुः स्वयम्प्रभुः । [7]तव गोप्त्री
तु पृथिवी न त्वं गोप्ता क्षितेः स्मृतः । अतः सर्वाश्रयश्चैव गोप्ता च हरिरीश्वरः ।

---

१ "–मनन्तरं त्वबहिर्ब्रह्म" इति प्र· पाठः ।

२ "भगवच्छब्दसञ्ज्ञम्" इति च । अयं श्लोकद्वयार्थः–असत् कारणम् । सत् कार्यम् । असदमूर्तम् । सन्मूर्त-मिति वा । जीवमिति जीवत् । चैतन्योपेतम् । अजीवं जडम् । एवं कृशस्थूलत्वादिनानाविशेषोपेतं विष्णोरन्यत् सर्वं जगत् "अजामेकाम्" इत्यादिश्रुतिगृहीतया चिदचित्प्रकृत्या कृतमवैहि । कथं कृतम् ? द्वितीयं कृतम् । द्वितीयतया कृतम् । अद्वितीयभगवदधीनमप्रधानं च कृतमित्यर्थः । कीदृशयाऽजया? द्रव्यादिनाम्न्या । द्रव्यं पञ्चभूतानि । आश-योऽन्तःकरणं संस्कारो वा । तत्तदभिमानित्वेन तन्नाम्न्या चित्प्रकृत्या । तदात्मकतया तन्नाम्न्या जडप्रकृत्या । एवं सर्वं प्रकृत्यधीनम् । सा च प्रकृतिर्भगवदधीनेति ज्ञापयन् भगवन्महिमानमाह–ज्ञानम् । विशुद्धं सद्रूपम् । सत्वं निर्दो-षत्वमिति पण्डिताचार्योक्तेः । परमपुरुषार्थरूपमित्यानन्दरूपम् । तथाच विशेषणत्रयेण सच्चिदानन्दरूपतोक्ता । बहुरूपैः सर्वगतमप्येकम् । गुणक्रियादिभिरवताररूपैश्च भेदरहितम् । परमार्थमिति सर्वोत्तममिति चार्थः । न विद्यते अन्तरो यस्य सर्वान्तरम् । न विद्यते बहिश्च यस्मात् । बहिश्च सर्वत्र स्थितम् । उक्तं हि–"अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः" इति । "अनन्तरमबाह्यम्" इति च बृहदारण्यके । सत्यं साधुगुणपूर्णं ब्रह्म । "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतिं स्मारयति । प्रत्यक् अन्तरात्मानम् । "अन्तर्यामी प्रत्यगात्मा" इति च कोशं वक्ष्यति दशमे । "कश्चिद् धीरः प्रत्यगात्मानमैक्षत्" इति श्रुतिः । प्रशान्तं परमसुखकाष्ठाभूतम् । सर्वदेवो-त्तमं वा । "सुखान्तं प्राप्नुयुर्यस्माद् देवाः शान्ता उदाहृताः" इति प्रकाशिकावचनं दशमे । शान्तेभ्योऽपि प्रकृष्टः प्रशान्तः । अशनायापिपासादिरहितं निर्विकारं च । भगवच्छब्दवाच्यम् । उक्तं हि–"ब्रह्मेति परमात्मेति भगवा-निति शब्द्यते" इति । यच्च "वासुदेवात्मकं ब्रह्म" इति कवयो वदन्ति ।

३ "तथा प्रकृत्यैव" इति प्र. पाठः प्रामादिकः ।

४ "भूमिः शरणम्" इति प्र. पाठः । राजा गोप्ताऽऽश्रय इति पृथिवी चाऽश्रयभूता अवस्थितिकारणं चेति यल्लौकिकैर्व्यवह्रियते न तदन्ततः सत्यम् । यतस्तयो राज्ञः पृथिव्याश्च गोप्ताऽश्रयोऽवस्थितिकारणं च चतुर्मुखो ब्रह्मा । तस्यापि प्रकृतिः । तस्या विष्णुरिति । तत्र च परम्पराविश्रान्तिः । एवं गोप्तृत्वादिव्यवहारोऽन्ततः तत्रैव सत्यो भवेत् ।

५ "सत्यं यतो ब्रह्माऽऽश्रयो-" इति क्वचित् । ६ "गोप्त्री च" इति क्वचित् पाठः प्रामादिकः ।

७ अवान्तरामुख्यगोप्तृत्वविवक्षयाऽपि पृथिवीपतिरहं गोप्ता पृथिव्या इति तु भ्रान्तिरेव । वैपरीत्यस्यैव दर्शना-दित्याह—तव गोप्त्रीति ।

सर्वशब्दाभिधेयश्च शब्दवृत्तेर्हि कारणम्[1]। सर्वान्तरः सर्वबहिरेक एव जनार्दनः[2]। [3]शिरआधारता यद्वद् ग्रीवायास्तद्वदेव तु। आश्रयत्वं च गोप्तृत्वमन्येषामुपचारतः'' इति[4] ॥ * ॥

इति पञ्चमस्कन्धे द्वादशोऽध्यायः

[चतुर्दशोऽध्यायः]

[5]आर्षभस्येह राजर्षेर्मनसाऽपि महात्मनः।
नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः[6] ॥ ४२ ॥

''[7]ऋते हैहयवैन्यादीनार्षभस्येह कः समः। यस्योपदेशात् सिन्ध्वीशो ददर्श कपिलं विभुम्[8]'' इति च ॥ * ॥

[9]यज्ञाय धर्मपतये विधिनैपुणाय योगाय साङ्ख्यशिरसे प्रकृतीश्वराय।
नारायणाय हरये नम इत्युदारं [10]गायन् मृगत्वमपि यः समुदाजहार ॥ ४५ ॥

---

१ ''अन्यत्र शब्दप्रवृत्तेरपि यः कारणं स कथं तस्य मुख्यार्थो न स्यादित्यर्थः।

२ एतेन ''अनन्तरं नबहिः'' इति मूलं व्याख्यातम्।

३ ''अयं जनो नाम चलन्'' इत्यादिसमस्ताध्यायप्रमेयमुपसंहरन्नाह—शिरइत्यादि।

४ प्र. पाठे ''इति च'' इति चकारोऽधिकः। क्वचित् कोशेषु च।

५ यद्यप्ययं श्लोकः विजयध्वजीययादुपत्यादिसीत्या त्रयोदशाध्याये षड्विंशः पठ्यते। प्रचलितभाष्यपाठेऽपि तथा। परन्तु सर्वत्र प्राचीनकोशेषु एतच्छ्लोकभाष्यं चतुर्दशेऽध्याये पठ्यते। श्रीधरस्वाम्यादिरीत्या चायं श्लोकश्चतुर्दशाध्यायगतः। प्राचीनकोशगतभाष्यपाठसंवादात् श्रीधरीयाद्यभिमतः पाठ एव भगत्पादसम्मतोऽपीति निश्चीयते। ततश्चास्य त्रयोदशाध्यायगतत्वसम्प्रदायस्य मूलं मृग्यम्।

६ राजर्षेर्भरतस्य शास्त्रानुकूलं कर्म अन्यो मनसाऽपि नानुष्ठातुमर्हति। किमुताऽऽचरणेन? वर्त्म अनु अनुगन्तुमिति वा।

७ तथाच हैहयादीन् विनाऽन्य इति मूलेऽर्थसङ्कोचः।

८ ''प्रभुम्'' इति क्वचित् पाठः।

९ इदमपि पद्यं विजयध्वजीयादिरीत्या त्रयोदशाध्यायस्यैकोनत्रिंशम्।

१० ''हास्यन्'' इति पाठान्तरम्। इज्यत्वाद् यज्ञपतित्वाद् यज्ञभोक्तृत्वाच्च यज्ञाय। ''यज्ञो यज्ञपतिर्यज्वा'' इति सहस्रनामसु। ''यज्ञो वै विष्णुः'' इति च श्रुतिः। धर्मस्य पतये फलदात्रे। धर्मपालकाय च। उक्तं हि—''यदा-यदा हि धर्मस्य'' इत्यादि। तथा धर्मविधिषु नैपुणप्रदाय। विधेर्ब्रह्मणोऽपि सृष्टिनैपुणं यस्मादिति वा। युज्यते स्वविषयैः सम्बध्यते मनआदिकमनेनेति योगः। इन्द्रियप्रेरकाय। युज्यते उपाययुक्तो भवति साधकोऽनेनेति च।

युज्यते अनेनेति योगो हरिः । साङ्ख्यशिरसे[1] उत्तमज्ञानस्वरूपाय ॥ * ॥

इति पञ्चमस्कन्धे चतुर्दशोऽध्यायः[2]

[पञ्चदशोऽध्यायः]

गयं नृपं[3] कः प्रतियाति कर्मभिर्यज्वाऽभिमानी बहुविद् धर्मगोप्ता ।
[4]सदागतश्रीः सदसस्पतिः सतां सत्सेवकोऽन्यो भगवत्कलामृते ॥ ४ ॥

"[5]प्रियव्रतो गयश्चैव कर्मदेवसमो[6] गुणैः" इति षाड्गुण्ये[7] ॥ * ॥

इति पञ्चमस्कन्धे पञ्चदशोऽध्यायः

ज्ञानोपायप्रदर्शकाय । अनेनैवास्मिन् मनो युज्यत इति भक्तानां मनसि भासमानाय भक्तवश्याय । सांख्यं ज्ञानं तदेव शिर उत्तमं चेत्युत्तमज्ञानस्वरूपाय । हरये सर्वपापहराय मनोहराय च । नारायणाय नम इत्युदारं गायन् मृगत्वमपि यः समुदाजहार । आजहार उज्जहार संजहार च । गायन्नेव आजहार स्वीचक्रे । गायन्नुज्जहार । येन गानेन मृगजन्मैवोद्धृतम् । अन्ते च गायन्नेव मृगतनुं संजहारेति ।

१ शिरः उत्तमं सांख्यं सांख्यशिरः । विशेषणस्य परनिपातः । यदि वा सांख्यं उत्तमं पूर्णं ज्ञानम् । शिर इति सर्वावयवोपलक्षणम् । सांख्यं शिरः स्वरूपम् यस्य तस्मै ।

२ प्र. पाठेऽत्र त्रयोदशोऽध्यायः ।

३ "नृपः कः" इति प्र. पाठः ।

४ "समागतश्रीः" इति प्र. पाठः । गयं नृपं कः प्रतियाति कर्मभिरनुकरोति । यः स्वयं यज्वादिः स्याच्चेदपि । अभिमानी मनस्वी, अभितः सम्मानितो वा । सदा अगतश्रीः । सद्भ्यः आगतश्रीः । सत्सु प्रापितश्रीश्च । सतां सदसः सभायाः पतिः । एतादृशोऽपि न तमनुकर्तुमलमन्यः कोऽपि । भगवत्कलां भगवदवतारामृते । न तर्हि ब्रह्माद्या अपि तं प्रतियायासुः ? अतिशयोक्तिरियम् । गयस्य महाभक्तत्वं ख्यापयितुमेवमुच्यते । इदन्त्वान्तरम्— भगवत्कलां भगवत्सन्निधानविशेषपात्रं ब्रह्मादिकर्मदेवान्तं देवतागणं विहाय अन्यः कोऽपि मानुषादिस्तं न प्रतियायादिति ।

५ क्वचित् प्राचीनकोशेषु इदं पञ्चदशाध्यायभाष्यं न पठ्यते ।

६ "–समौ" इति क्वचित् ।

७ "सद्गुणे" इति क्वचित् ।

[षोडशोऽध्यायः]

"यथा भागवते तूक्तं भौवनं कोशलक्षणम्। तस्याविरोधतो योज्यं सर्वग्रन्थान्तर-स्थितम्[1]। मण्डोदे पूरणं चैव व्यत्यासं क्षीरसागरे। राहुसोमरवीणां च मण्मलत-द्विगुणोक्तिताम्। विनैव सर्वमुन्नेयं योजनाभेदतोऽत्र तु" इति ब्रह्माण्डे[2] ॥ * ॥

इति पञ्चमस्कन्धे षोडशोऽध्यायः

---

१ "सर्वं ग्रन्थान्तरस्थितम्" इति पाठान्तरम्। "अन्यग्रन्थान्तरे स्थितम्" इति क्वचित् पाठः। "अन्यग्रन्थान्त-रस्थितम्" इति च।

२ भूगोलखगोलवर्णनात्मकस्य समग्रस्य भागवतभागस्य तात्पर्यकथनमिदम्। तथा हि प्रथमाध्याये किञ्चिद् भूगोलवर्णनं प्रस्तुतम्। तदप्यनेन कटाक्षयति। षोडशे चाध्याये विशेषतो भूगोलवर्णनमारब्धम्। अतोऽत्रैव भाष्यं निवेशयामास। विंशेऽध्याये पुनरस्य विवरणं भवति। त्रयोविंशे च खगोलम्। तदेतत् सर्वं देहलीदीपन्या-येन अनेन षोडशतात्पर्यवचनेन व्याचख्यौ। तथाचायमर्थः–भुवमसम्बन्धि ब्रह्माण्डसम्बन्धीति यावत्। यद् गोल-लक्षणम् तद् अन्यान्यग्रन्थेषु अन्यान्यविधयोच्यते। तत्र यथा भागवते तदेव निष्कृष्टमिति सिद्धान्तः। यत्र विरोधस्तत्र भागवतानुसारेणैवान्ये ग्रन्था योजनीयाः। एवं सामान्यनियममुक्त्वाऽथ तस्यापवादमाह–मण्डोदे। सप्तसु सागरेषु दधिमण्डोदः पञ्चमः। क्षीरोदः षष्ठः। तथाहि श्रूयते —"जम्बूप्लक्षाह्वयौ द्वीपौ शाल्मलश्चापरो द्विज। कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः। एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः। लवणेक्षुसुरास-र्पिर्दधिदुग्धजलैः समम्" इति। अत्र तु क्षीरोदः पञ्चमः दधिमण्डोदः षष्ठ इति व्यत्यासेन पठ्यते। तथाहि श्रूयते—"क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्तजलधयः" (५-१-३३) इति प्रथमाध्याये। सोऽयं मण्डोदे क्षीरसागरे च व्यत्यासः। तदेतदन्यग्रन्थानुसारेण भागवतमेव व्यत्यस्य योजनीयम्। दधिपदेन क्षीरग्रहणं क्षीरपदेन दधिग्रहणं चेति। उपपत्तिं तु स्वयमाचार्य उपरिष्टाद् वक्ष्यति। मण्डोदे पूरणमित्यपरोंऽशः नातिस्फुटार्थः। एवं व्याचक्षते—क्रौञ्चद्वीपः १६,०००,०० योजनानि। ततः दधिमण्डोदः सागरोऽपि तावान्। तदनु शाकद्वीपस्तद्द्विगुणः (३२,०००,००)। ततः क्षीरोदस्तावानिति स्थितिः। अत्र तु व्यत्यासेन पाठात् मण्डोदस्य ३२,०००,०० योजनपरिमितत्वमुच्यते। तथाहि—"एवं परस्तात् क्षीरोदात् परित उपवेशितः शाक-द्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन दधिमण्डोदेन परित उपक्लृप्तः" (५-२०-२४) इति विंशाध्याये। तदेवं द्विगुणत्वेन संख्यापूरणं पूरणपदेनोच्यत इति। वस्तुतस्तु व्यत्यासं क्षीरसागरे इत्यनेनैवेदमप्युक्तप्रायमिति न पुन-र्वक्तव्यमिति भाति। अन्यथा क्षीरसागरेऽपूरणमित्यपि वक्तव्यं भवेत्। अन्ये त्वेवं व्याचक्षते—"पञ्चमे मण्डोदे षष्ठत्वपूरणम्, षष्ठे च क्षीरसागरे पञ्चमत्वेन व्यत्यासः" इति। अत्रापि नातिभिन्नार्थता। अत्र महान्तः प्रमा-णम्। एवं खगोलेऽप्येकमपवादमाह–राहुसोमरवीणाम्। इदमपि नातिस्फुटार्थं श्लोकार्द्धम्। एवं व्याचक्षते—राहुसोमरवीणां मण्डलेषु पूर्वपूर्वं द्विगुणमानत्वं प्रमितम्। रविमण्डलं दशसहस्रयोजनम्। सोममण्डलं ततो द्विगुणं विंशतिसहस्रयोजनम्। राहुमण्डलं ततोऽपि द्विगुणं चत्वारिंशत्सहस्रयोजनमिति। एवं स्थितेऽपि प्रमेये

49

[सप्तदशोऽध्यायः]

[1]यत्र भगवतः साक्षाद् यज्ञलिङ्गस्य विष्णोर्विक्रमतो वामपादाङ्गुष्ठनखनिर्भिण्णो[2]र्ध्वाण्डकटाहविवरेणान्तःप्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजावनेजनारुणकिञ्जल्कोपरञ्जिताखिलजगदघमलापहोपस्पर्शनाऽमला साक्षाद् भगवत्पदीत्यनुपलक्षितवचोभि[3]रभिधीयमानाऽतिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्धन्यवततार[4] ॥ १ ॥

"वाराहे वामपादं तु तदन्येषु च[5] दक्षिणम्। पादं[6] कल्पेषु भगवानुज्जगाह[7] त्रिविक्रमः" इति च[8] ॥ * ॥

[9]भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महापुरु-

---

अत्र मण्डलेषु अद्विगुणोक्तिता, उक्तिरेव उक्तिता, बन्धुतेत्यादिवत्। द्विगुणत्वेनानुक्तिरिति यावत्। तथाहि त्रयोविंशेऽध्याये—"यददस्तरणेर्मण्डलं प्रतपति तद् विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोः" (५–२३–२८) इति। एतत् त्रयं विना अन्यत् सर्वं यथाभागवतवचनं ग्राह्यम्। ननु तर्हि अत्र त्रिषु विषयेषु भागवतमप्रमाणम्? नेत्याह—उन्नेयं योजनाभेदतः। अस्ति कश्चिद् योजनाविशेषः। तेन नाप्रामाण्यम्। तथाहि—अयुतयोजनं रविमण्डलमिति तावत् यथाश्रुतम्। सोमस्य द्वादशसहस्रमिति द्विदशसहस्रमित्यर्थः। तेन विंशतिसहस्रमित्येवाऽयातम्। एवं राहुमण्डलं त्रयोदशसहस्रमिति त्रयं दशसहस्राणां पुनरेकं च दशसहस्रमिति चत्वारिंशत्सहस्रमित्येवार्थः। ततः सर्वग्रन्थाविरोध इति। मण्डलाद् विगुणोक्तितामिति च च्छेदः सम्भवी। मण्डलपरिमाणस्य वैगुण्येनोक्तिरिति यावत्। ज्यौतिषाद्यविरोधेन पुराणोक्तखगोलादिमानसङ्गमने तु परावरदृशो महान्तः प्रमाणम्।

१ "तत्र" इति प्र. पाठः।

२ "–निर्भिन्नोर्ध्वाण्ड– इति च।

३ "–वचोऽभिधीयमाना" इति च।

४ यज्ञलिङ्गस्य यज्ञमूर्तेः। यः पूर्वं यज्ञवराहः स एव वामन इति द्योतयितुमिदम्। बलेर्यज्ञे गृहीतं वामनरूपं येनेति च व्याचक्षते। विक्रमतः स्वीकृतत्रिविक्रमरूपस्य। तच्चरणपङ्कजस्यावनेजनेन प्रक्षाळनेन पादलग्नैररुणकिञ्जल्कैः अरुणपांसुभिरुपरञ्जिता स्वयमप्यरुणीकृता। पादस्य पङ्कजत्वेन रूपणात् पांसवः किञ्जल्कपदेन गृहीताः। भगवत्पादलग्नाः भूरादयो लोका एव पांसवः। तदुक्तम्–"समूळ्ढमस्य पांसुरे" इति। "पांसवो लोकाः" इति हि यास्कः। ऋग्भाष्येऽप्युक्तम्–"समूढं तत्र विश्वं हि पांसुवज्जगतःपतेः" इति। अघाख्यमलापहमुपस्पर्शनमाचमनं यस्याः। किमुतावगाहनम्।

५ "तदन्येषु तु" इति पाठान्तरम्।

६ "पदम्" इति च।

७ "भगवानुज्जहार" इति च। उज्जगाह ऊर्ध्वं जगाहे विलोळयामास।

८ क्वचिदत्र 'च'कारो न पठ्यते।

९ भवानीस्वामिनीकैरित्यर्थः।

षस्य तुरीयां तामसीं[1] मूर्तिं प्रकृतिमात्मनः सङ्कर्षणसञ्ज्ञामात्मसमाधिरूपेण[2] सन्निधाप्यैतदभिगृणन् भव उपधावति ॥ १५ ॥

भवः । ॐ नमो भगवते महापुरुषाय [3]सर्वगुणसङ्ख्यातायानन्तायाव्यक्ताय नम इति ॥ १६ ॥

"अनन्तान्तःस्थितो विष्णुरनन्तश्च सहामुना । पूज्यते गिरिशेनेश [4]इळावृतगतेन तु" इति[5] । "[6]जीवव्यपेक्षया चैव तथाऽन्तर्याम्यपेक्षया । मिश्रास्तु स्तुतयो ज्ञेया विष्णोरन्यत्र केवलम्" इति[7] ॥ * ॥

इति पञ्चमस्कन्धे सप्तदशोऽध्यायः

---

१ संहारस्य कृते तमोगुणप्रवर्तिनीम् । आत्मनः प्रकृतिं बिम्बरूपम् । कारणं वा । शेषपक्षेऽपि स हि रुद्रस्य प्रकृतिः । शेषत्वमाप्यैव हि तस्य मोक्षः ।

२ आत्मनः मनसः आत्मनि परमात्मनि समाधिरैकाग्र्यं तद्रूपेणोपायेन सन्निधाप्य ।

३ सर्वगुणपूर्णत्वेन वेदेषु सम्यक् ख्याताय । शेषे यथायोगं सर्वगुणाः । अनन्तः शेषः, तदधिष्ठितो नारायणश्च ।

४ "इलावृत-" इति प्र. पाठः ।

५ "इति च" इति प्र. पाठः । क्वचित् कोशेषु च । अनेन प्रमाणवचनेन मूले सङ्कर्षणपदेन शेषः सङ्कर्षणरूपी नारायणश्च गृह्येते इत्युक्तं भवति । तथा "भजे भजन्यारुणपादपङ्कजं भगस्य कृत्स्नस्य परं परायणम्" (५-१७-१८) इत्यादि "तस्मै नमस्तद्विलयोदयात्मने" (५-१७-२४) इत्यन्तं पद्यसप्तकं विष्णुपरतया शेषपरतया च योजनीयमिति चोक्तं भवति । ननु रुद्रः शेषसमानः । तत् कथं रुद्रेण शेषः स्तूयते ? पदकृताधिक्यात् । तदुक्तं द्वादशस्तोत्रे– "तत्पादपङ्कजमहासनतामवाप शर्वादिवन्द्यचरणः" इति ।

६ ननु तर्हि "भगस्य कृत्स्नस्य परं परायणम्" (१८), "भवापहं त्वां भवभावमीश्वरम्" (१८), "यमाहुरस्य स्थितिजन्मसंयमम्"(२१), "यस्याऽद्य आसीद् गुणविग्रहो महान् विज्ञानधिष्ण्यो भगवानजः किल" (२२) "सृजाम सर्वं यदनुग्रहादिदम्" (२३) इत्यादिना गुणपूर्णत्वसृष्ट्यादिकर्तृत्वचतुर्मुखजनकत्वादयः भगवदसाधरणधर्माः कथं शेषे योजनीयाः? तथा "न नागवध्वोऽर्हरणमीशिरे ह्रिया" (२०) इत्यादिकं शेषधर्मतया प्रतीयमानं कथं विष्णौ योजनीयम् ? आह—जीवव्यपेक्षया । यत्र मिश्राः स्तुतयः तत्र शेषादिजीवेऽसम्भावितानि विशेषणानि अन्तर्याम्यपेक्षयैव योजनीयानि । जीवेऽप्युपपन्नानि जीवपरतया तदन्तर्यामिपरतया च । अन्यत्र यत्र जीवस्य न स्तुतिस्तत्र केवलं विष्णोरेव ।

७ "इति च" इति प्र. पाठः । क्वचित् कोशेषु च ।

[अष्टादशोऽध्यायः]

विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरङ्गीकृतमप्यपावृतम्[1] ।
युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मके व्यतिरिक्ते च वस्तुनि[2] ॥ ५ ॥

"अप्रयासेन कर्तृत्वमकर्तृत्वमिहोच्यते । महाशक्तित्वतस्तच्च[3] युज्यते परमस्य तु"
इति तन्त्रसारे ॥ * ॥

[4]तद् भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताऽहःसु च तद्भर्तृभिरुपास्त इदं चोदाहरति ॥ १७ ॥

[5]ॐ नमो भगवते हृषीकेशाय सर्वविशेषवित्क्षेत्रात्मने[6] आकूतीनां चित्तानां[7] चेतसां विशेषाणां चाधिपतये षोडशकलाय च्छन्दोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कान्ताय कामाय नमस्ते उभयत्र भूयात्[8] ॥ १८ ॥

---

१ "–मप्यपावृतः" इति प्र. पाठः ।

२ "सर्वात्मनि व्यतिरिक्ते च वस्तुतः" इति च । अकर्तुरपि ते विश्वोद्भवादिकर्म श्रुतिभिरङ्गीकृतम् । तदेतदपावृतं न तिरोहितम् । श्रुतितात्पर्यविदां स्फुटम् । यतः अकर्तेति प्रयासेन कर्तृत्वमेव निषिध्यते । न सर्वथा कर्तृत्वम् । सर्वकार्यकारणभूते त्वयि नैतच्चित्रं । उपपन्नं चैतत् । "बहुचित्रजगद्बहुधाकरणात्" इत्युक्तं हि । सर्वान्तर्यामिणि, अथापि सर्वव्यतिरिक्ते । वस्तुनि सर्वजगत्प्रवेशेऽपि तद्गतदोषैरप्रतिहते । उक्तं हि—"वसनाद् वासनाद् वस्तु नित्याप्रतिहतं यतः" इति ।

३ "–त्वतस्तस्य" इति क्वचित् कोशे ।

४ प्रजापतेः संवत्सराभिमानिनः दुहितृभिः रात्र्यभिमानिनीभिः सह रात्रिषु, अहस्सु तद्भर्तृभिश्चाहरभिमानिभिर्देवैरुपेता रमा भगवतो मायामयं ज्ञानमयमिच्छामयं वा कामान्तर्गतं प्रद्युम्नाख्यं रूपमुपास्ते, रतिस्था रमा । रतिश्च कामदेवम् ।

५ "ॐ ह्राँ ह्रीं ह्रूँ ॐ नमो–" इत्यादि प्र. पाठः ।

६ "सर्वगुणविशेषैर्विलक्षितात्मने" इति प्र. पाठः ।

७ "चित्तीनाम्" इति च ।

८ सर्वविशेषविदो ब्रह्मादयोऽपि यस्य क्षेत्रं शरीरमिवाधिष्ठानं तथाविधस्वरूपाय । आकूतीनामिच्छानाम्, चित्तानां स्मरणकारणचित्तरूपेन्द्रियवृत्तीनां मधुरस्मृतीनाम् । "चित्तं स्मरणकारणम्" । चेतसां मनोवृत्तीनाम्, "सहस्रशः शतशः कोटिशश्च" इति पूर्वोक्तरीत्या वृत्तिविशेषाणां चाधिपतये । षोडशकलाय । षोडशी कला जीवः । तत्प्रवर्तकाय । वेदमुख्यवाच्याय । मुख्यात्त्रे, मुक्तनियामकाय, सर्वोत्तमाय । सह आत्मबलम् । ओज इन्द्रिय-

"[1]कामदेवस्थितं विष्णुमुपास्ते श्री रतिस्थिता । कामदेवं रतिश्चापि विष्णोस्तु प्राकृतां तनुम्" इति ब्रह्माण्डे ॥ * ॥

यं लोकपालाः किल मत्सरज्वरा हित्वा यतन्तोऽपि पृथक् समेत्य च ।
पातुं न शेकुर्द्विपदश्चतुष्पदः [2]सरीसृपस्थास्नु यदत्र दृश्यते ॥ २७ ॥

"[3]स्पर्धन्त इव देवास्तु हरिणा यत्रकुत्रचित् । हरेरेवाऽऽज्ञया क्वापि दैत्यावेशादथापि वा" इति च ॥ * ॥

यद्रूपमेतन्निजमाययाऽर्पितमर्थस्वरूपं बहुरूपरूपितम् ।
सङ्ख्या न यस्यास्त्ययथोपलम्भनात् तस्मै नमस्तेऽव्यपदेशरूपिणे[4] ॥ ३१ ॥

उपलम्भनादयथा यथा दृष्टं तथा न तिष्ठतीति, अन्यथाऽन्यथा भवतीत्यर्थः[5] ॥ * ॥

जरायुजं स्वेदजमण्डजोद्भिजं[6] चराचरं देवर्षिभूतभेदम्[7] ।
द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः[8] ॥ ३२ ॥

बलम् । बलं दैहिकम् । तन्नियन्त्रे । कामान्तर्गताय काम्याय ते नमः । त इदं नमनं उभयत्र अन्तर्बहिश्च रक्षा भूयात् ।

१ एतेन "केतुमाले भगवान् कामदेवस्वरूपेणाऽऽस्ते" (१५) इति पूर्ववचनं च व्याख्यातम्, कामान्तर्गतेन प्रद्युम्नाख्येन रूपेणेति ।

२ "सरीसृपं स्थाणु यदत्र" इति प्र. पाठः । लोकपालाः मत्सरेण यं हित्वैव द्विपदादीन् लोकाम् रक्षितुं यतन्तोऽपि पृथक् समेत्य च न शेकुः ।

३ नन्वपरोक्षिणां देवानां कथं मत्सरः स्पर्धा वा संभवति? आह–स्पर्धन्त इव । मत्सरग्रस्ता इव प्रदर्शयन्ति । न तत्वतस्तथा । तदपि कुतः? हर्याज्ञयैव दैत्यमोहनार्थम् । क्वचिच्च दैत्यावेशात् तथा । सर्वथा न स्वतः ।

४ निजमायया स्वेच्छयाऽर्पितं स्वस्मिन्नाधारे स्थापितम्, स्वाधीनया प्रकृत्या विरचय्य समर्पितं इदमर्थस्वरूपं वस्तुस्वरूपं विश्वम्, नत्ववस्तुभूतमित्येतत्, यद्रूपं यस्य हरेः प्रतिमा । "रूपंरूपं प्रतिरूपो बभूव" इति ह्युक्तम् । कीदृशं विश्वम्? सुरनरतिर्यगादिभिः एकैकस्मिन्नपि बहुरूपैर्निरूपितम् । परिचितं व्यवहृतं च । यस्य च विश्वस्य संख्या नास्ति । अनन्ता हि सृष्टिरनन्तशक्तेः । यच्च उपलम्भनादयथा उपलब्धादाकारात् प्रतिक्षणमन्यथाऽन्यथा विक्रियते । तदेवमनन्तविकाराऽनन्तसृष्टिर्यस्य महिमा तस्मै नमस्ते मनोवचोभिरव्यपदेश्यरूपिणे ।

५ "न तिष्ठति, अन्यथाभवतीत्यर्थः" इति प्र. पाठः । क्वचित् कोशेषु च ।

६ "–जोद्भिदम्" इति पाठान्तरम् । उद्भिद्य जायत इत्युद्भिजम् । नैरुक्त एकजकारलोपः । "लोपः समाने"

७ "देवर्षिपितृभूतमैन्द्रियम्" इति प्र. पाठः ।

८ इत्याद्यनन्तवस्तुवाचकं यदनन्तपदजातं तस्य मुख्याभिधेयो भगवानेक एव । अन्येषां तत्प्रतिमात्वात् तस्यैव सर्वान्तर्यामितया सर्वनियामकत्वात् स एव हि सर्वनामा वेदेषूक्तः । शब्दप्रवृत्तिनिमित्तानां तस्मिन्नेव मुख्यतः

"सर्वान्तर्यामकत्वात् तु[1] सर्वनामा हरिः स्वयम्। नतु सर्वस्वरूपत्वाद् रूपत्वमुपचारतः[2]" इति च ॥ * ॥

यस्मिन्नसङ्ख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयम् ।
सङ्ख्या यया तत्त्वदृशा विनीयते[3] तस्मै नमः साङ्ख्यनिदर्शनाय इति[4] ॥ ३३ ॥

दशावतारा[5] इत्यादिसङ्ख्या। [विनीयते विशेषेण नीयते[6]।] तज्ज्ञानं तद्रूपमेव हि[7] ॥ * ॥

यस्य स्वरूपं कवयो विपश्चितो गुणेषु योनिष्विव[8] जातवेदसम् ।
मथ्नन्ति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ॥ ३६ ॥

क्रियार्थैर्यज्ञाद्यर्थैः इन्द्रादिनामभिरीरितात्मने ॥ * ॥

द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने ।

सम्भवात्। ननु जरायुणा जातं जरायुजं मुख्यतः । एवं स्वेदेन जातमेव यूकादि स्वेदजं भवति। कथं भगवान् स्वयमजातो मुख्यतो जरायुजादिः? जरायुणा जननमपि जरायुजस्य भगवदधीनं हि। न स्वतः। तेन भगवत्येव मुख्यं भवति। तद्यथा सैनिकेषु विजयमानेषु तेषां राजाधीनत्वात् राजैव मुख्यतो जयी ।

१ "सर्वान्तर्यामिकत्वात्तु" इति प्र. पाठः ।

२ एतेन "यद्रूपमेतत्-" इति पूर्वपद्यमपि व्याख्यातम्। रूपमिव रूपम्, प्रतिमास्थानीयमिति ।

३ "-दृशाऽपनीयते" इत्यर्वाचीनाः।

४ "-निदर्शनाय ते इति" इति प्र. पाठः। "निदर्शनाय हि" इति क्वचित्। पद्यार्थस्तु-असंख्येया विशेषधर्माः व्यावर्तकधर्माः, नामानि रूपाणि चासङ्ख्यानि, रूपमिति देहकान्तिः, आकृतयश्चासंख्या यस्य तस्मिन् हरौ। असङ्ख्येयानि विशेषनामरूपाणि यस्यास्तादृशी आकृतिः स्वरूपमस्येति वा। अत्र रूपाणीत्यवताररूपाणि । पूर्णषड्गुण इत्यादिधर्मेषु संख्या, अष्टोत्तरं शतं सहस्रमित्यादिनामसंख्या, ("तस्य हैतस्य परमस्य नारायणस्य चत्वारि रूपाणि शुक्लं रक्तं रौग्मं कृष्णमिति" इत्यादि रूपेषु संख्या,) दशावतारा इत्याद्यवतारेषु च संख्या कविभिर्वेदज्ञैः कल्पिता कृता । भगवता चानुमोदितेत्याह-यया। सा च संख्या यया तत्वदृशा येन यथार्थज्ञानेन भगवदीयेन विशेषेण नीयते समर्थ्यते अनुमोद्यत इति यावत्। तस्मै तथाविधज्ञानस्वरूपाय नमः। कीदृशाय? अवतारादिसंख्याविषयं तत्वज्ञानं सांख्यं तज्जीवस्य निदर्शयतीति प्रकटयतीति तादृशाय। जीवस्यापि ज्ञानं स्वरूपमेवेति निदर्शयतीत्याह, न ददातीति।

५ "दशावतार इत्यादि-" इति प्र. पाठः।

६ क्वचिदिदं वाक्यं न पठ्यते ।

७ अत्र "हि" इति क्वचिन्न पठ्यते ।

८ "दारुष्विव" इति प्र. पाठः। योनिषु काष्ठेषु जातवेदसमिव गुणकार्यभूतेषु भूतेषु गूढं यस्य स्वरूपं कवयो मथ्नन्ति। उक्तं हि-"घृतमिव पयसि निषक्तं भूतेभूते च वसति विज्ञानम्। सततं मन्थयितव्यं मनसा मन्थानभूतेन" इति। एवं कविभिराम्रेडिताय, यज्ञक्रियार्थमुपयुक्तैरिन्द्राग्न्यादिनामभिरपि मुख्यत ईरितात्मने नमः।

[1]तथैव तत्रातिशयात्मबुद्धिभिर्निरस्तमायाकृतये नमोनमः ॥ ३७ ॥

मायागुणैः तदिच्छानुसारिभिः ।

"द्रव्येशः शङ्करः प्रोक्तः क्रियेशो गरुडः स्मृतः । कारणेश[2]स्तथा ब्रह्मा वायुराधारपः स्मृतः" इति ब्रह्मतर्के ॥ * ॥

इति पञ्चमस्कन्धेऽष्टादशोऽध्यायः

[एकोनविंशोऽध्यायः]

[3]अथैहिकामुष्मिककामलम्पटः सुतेषु दारेषु धनेषु चिन्तयन् ।
शङ्केत विद्वान् [4]कुकळेबरात्ययाद् [5]यस्तस्य यत्नः श्रम एव केवलम् ॥ १४ ॥

"यस्य सम्यग् भगवति[6] ज्ञानं भक्तिस्तथैवच । निश्चितस्तस्य मोक्षः स्यात् सर्वपापकृतोऽपितु[7] । यो ममत्वादिना दोषः स त्वन्यविषयः स्मृतः" इति च ॥ * ॥

---

१ "अन्वीक्षयाऽज्ञातिशयात्म-" इति प्र. पाठः । द्रव्यक्रियाहेत्वयनानामीशास्त एव जगत्कर्तारस्तैः । द्रव्येशेन शङ्करेण क्रियेशेन गरुडेन, हेतुः कारणम्, तदीशेन ब्रह्मणा, अयनमाधारः, तदीशेन वायुना । शङ्कर एव शेष इति न स पृथगुक्तः । एतैर्ब्रह्मादिभिः जगत्कर्तृभिः वस्तुतः याथातथ्येनावधृतस्वरूपाय । तेऽपि न स्वतन्त्राः । मायागुणैः । भगवदिच्छाधीनैः । भगवानेव स्वेच्छया तेषामितराधिक्येनाऽऽत्मयाथात्म्यं प्रकटयतीत्यर्थः । अत एव तत्र भगवति अतिशयात्मा इतरेभ्योऽत्यधिका व्यवसायात्मिका बुद्धिर्येषां तैः । एवं ज्ञानिभिर्ब्रह्मादिभिः साक्षात्कृतत्वात् निरस्तमाया आकृतिर्यस्य तस्मै अप्राकृततनवे नमः । "अप्राकृतस्वरूपत्वान्निर्मायश्चेति कथ्यते" इति तन्त्रनिर्णयवचनं षष्ठे वक्ष्यते ।

२ "करणेश-" इति प्र. पाठः ।

३ "यथैहिका-" इति पाठान्तरम् ।

४ "कुकलेवरा-" इति च ।

५ सुतादिष्वेव पुरुषार्थपूर्तिम् चिन्तयन्, सुतादिविषय एव निरन्तरं चिन्तां कुर्वन् स्वीयकुत्सितकळेबरस्य नाशेन सुतादीनामपि नाशं चिन्तयन् मयि मृते कथमिमे भवेयुरिति यः शङ्केत, अत एव यो मृत्योः शङ्केत बिभीयात्, यद्यपि स विद्वान् भवेत् अथापि तस्य श्रवणमननादिषु यत्नो व्यर्थ एव ।

६ "सम्यक् च भवति" इति प्र. पाठः ।

७ उक्तं हि–"अपि चेत् सुदुराचारो भजते मामनन्यभाक्" इत्यादि । तथा च मूले वैयर्थ्यकथनं तात्कालिकं तज्जन्ममात्रविषयम् । मुक्त्ययोग्यविषयं चेत्यर्थः । तदेवाऽऽह-यो ममत्वादिना दोषः स तु मुक्तियोग्यादन्यविषय इति ।

[1]यद्यस्ति नः स्वर्गसुखावशेषितं स्विष्टस्य [2]दत्तस्य कृतस्य शोभनम् ।
[3]तेनाब्जनाभस्मृति जन्म नः स्याद् वर्षे हरिर्यद् भजतां शं तनोति[4] ॥ २८ ॥

"अनधीकारिणो देवाः स्वर्गस्था भारतोद्भवम् । वाञ्छन्त्यात्मविमोक्षार्थमुद्रेकार्थेऽधिकारिणः" इति कौर्मे ॥ * ॥

इति पञ्चमस्कन्ध एकोनविंशोऽध्यायः

[विंशोऽध्यायः]

"[5]सूर्यसोमाग्निवारीरविधातृषु यथाक्रमम् । प्लक्षादिद्वीपसंस्थास्तु स्थितं हरिमुपासते" इति च[6] ॥ * ॥

एवं [7]परस्तात् क्षीरोदात् परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन[8] दधिमण्डोदेन परित[9] उपक्लृप्तो यस्मिन् शाको

१ "यद्यत्र नः" इति पाठान्तरम् ।

२ "स्विष्टस्य सूक्तस्य" इति प्र. पाठः ।

३ "तेनाजनाभे स्मृतिमज्जन्म नः" इति च ।

४ स्विष्टं यजनम् । यागदानादिना यत् शोभनं पुण्यं लब्धं तत्र स्वर्गसुखभोगानन्तरमपि किंचित् पुण्यमवशिष्टं यद्यस्ति तर्हि तेन पुण्येन भारते वर्षे जन्म नः स्यात् । कीदृशम्? अब्जनाभस्य स्मृतिर्यत्र तादृशम् । यतः अस्मिन्नेव वर्षे भजतां हरिर्मोक्षसुखं वितरति ।

५ अयमर्थः-प्लक्षादिद्वीपवासिनां भगवदुपासनाप्रकारोऽस्मिन्नध्याये निरूपितः । तत्र प्लक्षद्वीपवासिनः "स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते" (२०-४) इति सूर्योपासका इत्युक्तम् । ततश्च "प्रत्नस्य विष्णो रूपं यत्-" (२०-५) इत्यादिना तस्य विष्णुरूपत्वमुच्यते । ततः शाल्मलद्वीपे "भगवन्तं वेदमयं सोममात्मानं वेदेन यजन्ते" (२०-११) । कुशद्वीपे "भगवन्तं जातवेदःस्वरूपिणं कर्मकौशलेन यजन्ते" (२०-१६) । चतुर्थे क्रौञ्चद्वीपे-"अम्मयं देवमपां पूर्णेनाञ्जलिना यजन्ते" (२०-२२) । शाकद्वीपे "भगवन्तं वाय्वात्मकं प्राणायामविधुतरजस्तमसः परमसमाधिना यजन्ते" (२०-२७) । पुष्करद्वीपे "तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणमकर्मकेण कर्मणा चाऽऽराधयन्ति" (२०-३२) । तदेवं सूर्यसोमाग्निवरुणवायुब्रह्मणामेव साक्षादुपास्यत्वमिति वा तेषां विष्णुरूपत्वेनोपास्यत्वमिति वा भ्रान्तिं वारयन् समग्राध्यायस्य भावमनेन प्रमाणवचनेनाऽऽह । तथा च सूर्यादिपदेन सूर्याद्यन्तर्यामी सूर्यादिनामा हरिरेवोच्यते तदर्थमेव मूले "सूर्यमात्मानम्" इत्याद्यात्मशब्दः प्रायुज्यत । "एष त आत्माऽन्तर्याम्यमृतः", "यः सूर्ये तिष्ठन्" इत्यादि हि श्रूयते ।

६ क्वचिदत्र 'च'कारो न पठ्यते ।

७ "पुरस्तात्" इति प्र. पाठः ।

८ "समानेन च दधि-" इति च ।

९ "परीतो यस्मिन्" इति च ।

नाम महीरुहः स्वक्षेत्रव्यपदेशकरो[1] यस्य ह महासुरभिगन्धस्तं द्वीपमनुवासयति[2] ॥ २४ ॥

"अनाम्लं तु दधि क्षीरं[3] क्षीरं सान्द्रं तथा दधि" इति शब्दनिर्णये[4] ॥ * ॥

स लोकत्रयान्ते परित ईश्वरेण विहितो यस्मात् सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनास्त्रिलोकान्[5] वितन्वाना न कदाचित् पराचीना भवितुमुत्सहन्ते तावदुन्नहनायामः[6] ॥ ३७ ॥

"ज्ञानानन्दात्मके विष्णौ[7] शिंशुमारवपुष्यथ । ऊर्ध्वलोकेषु संव्याप्त आदित्याद्याः

---

१ "–देशको यस्य" इति प्र. पाठः ।

२ अत्र क्षीरोदात् परस्तात् शाकद्वीपः ततः परं दधिमण्डोदः सागर इत्युच्यते। स च ग्रन्थान्तरविरुद्ध इति पूर्वमेवोक्तं "व्यत्यासं क्षीरसागरे" इति। दधिमण्डोदात् परस्तात् शाकद्वीपः, ततश्च क्षीरोद इति तु वक्तव्यम् । ततश्चैवं मूलयोजना—क्षीरोदादित्यत्र क्षीरशब्देन दध्येवोच्यते। अनाम्लस्य दध्नोऽपि क्षीरपदवाच्यत्वात् । "अनाम्लं तु दधि क्षीरम्" इति ह्यभिधानम् । तथाच क्षीरोदादिति मधुरदधिमण्डोदादित्यर्थः। एवमुत्तरत्र दधिमण्डोदेनेति दधिपदेन क्षीरमुच्यते । दधिवत् सान्द्रस्य क्षीरस्यापि दधिशब्दवाच्यत्वात् । "क्षीरं सान्द्रं तथा दधि" इति ह्यभिधानम् । तथा च दधिमण्डोदेनेत्यस्य सान्द्रक्षीरोदेनेत्येवार्थः। एवं च सर्वाविरोधः। मण्ड इति सान्द्रो रसः।

३ "अनाम्लं दधि तु क्षीरम्" इति पाठान्तरम् ।

४ अत्र प्र. पाठे विंशाध्यायपूर्तिः। उत्तरभाष्यं तु द्वाविंशाध्यायव्याख्यानरूपम् । परन्तु नैकस्मिन्नपि प्राचीनकोशेऽत्राध्यायपूर्तिः ।

५ "–योऽर्वाचीनांस्त्रीन् लोकानावितन्वाना–" इति प्र. पाठः ।

६ स लोकालोकाचलः लोकत्रयस्यान्ते मर्यादात्वेन परितो विहितः। यस्मात् प्रतिहताः सूर्यादीनां गभस्तय अर्वाचीनाः अर्वाक्प्रसृताः त्रीन् लोकानेव वितन्वानाः प्रकाशयन्तः कदाचिदपि ततः परतो गन्तुं नोत्सहन्ते न प्रभवन्ति। तावदुच्चो विस्तृतश्चायमचलः। कीदृशां सूर्यादीनाम्? ध्रुवापवर्गाणाम् । अत्र ध्रुवपदेन ध्रुवमण्डलगतो भगवान् शिंशुमार उच्यते । भगणेषु सर्वोपरि स्थिते ध्रुवमण्डले व्याप्य स्थितं शिंशुमारवपुषं भगवन्तमाश्रित्य स्थितानाम् ।

७ "ज्ञानानन्दात्मको विष्णुः" इति क्वचित् पाठः प्रामादिकः । "ज्ञानानन्दात्मके विष्णोः" इति क्वचित्। एतेनैव प्रमाणवचनेन द्वाविंशेऽध्याये पठिष्यमाणानि ध्रुवमण्डलसङ्गतानि वाक्यान्यपि व्याख्यातानीति न तानि पृथग्व्याचख्यौ। तथाहि द्वाविंशे श्रूयते—"स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा कालेन भगवता बम्भ्रम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः शश्वदवभासते" (२२–१९) इत्यादि। "केचनैतज्ज्योतिरनीकं शिंशुमारसंस्थानस्य भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति" (२२–२१) इत्यादि च। एतेनात्र केचनेति नारुचिसूचनम् । किंतु ब्रह्माद्या ज्ञानिन एव केचनेत्युच्यन्त इत्युक्तं भवति ।

50

समाश्रिताः[१]" इति ब्रह्माण्डे ॥ * ॥

इति पञ्चमस्कन्धे विंशोऽध्यायः[२]

[त्रयोविंशोऽध्यायः]

[३]इळावृतस्थस्तुतिवत् पाताळमूलस्थस्तुतिर्योजनीयाऽनन्तविषया ॥ * ॥

इति पञ्चमस्कन्धे त्रयोविंशोऽध्यायः[४]

इति श्रीमदानन्दतीर्थभगवत्पाद॰
श्रीभागवततात्पर्यनिर्णये
पञ्चमः स्कन्धः समाप्तः

---

१ "आदित्याद्यास्तदाश्रिताः" इति प्र. पाठः प्रामादिकः ।

२ प्र. पाठेऽत्र द्वाविंशोऽध्यायः । प्राचीनकोशेषु च क्वचिदत्रैव स्कन्धसमाप्तिः । "इळावृतस्थ–" इत्याद्युत्तर-भाष्यं न पठ्यते ।

३ "इलावृत–" इति, "पाताल–" इति च प्र. पाठः । अयमर्थः । त्रयोविंशेऽध्याये हि पाताळप्रस्तावे— "तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तर आस्ते या वै कळा भगवतस्तामसी समाख्याताऽनन्त इति" (२३–३२) इत्यनन्ताधिष्ठितत्वमुच्यते । ततश्च पाताळमूलस्थस्य अनन्तस्य स्तुतिर्नारदेन कृता पठ्यते–"उत्पत्तिस्थितिलयहेतवोऽस्य कल्याः" (२३–४०) इत्यादिना "यो लीलया क्ष्मां स्थितये बिभर्ति" (२३–४४) इत्यन्तेन पद्यपञ्चकेन । तदियं नारदकृता पाताळमूलगतशेषस्तुतिः जीवव्यपेक्षयाऽन्तर्यामिव्यपेक्षया च योजनीया पूर्वोक्तन्यायेनेति ।

४ श्रीधरीयादिरीत्या चायं पञ्चविंशोऽध्यायः ।

षष्ठः स्कन्धः

[प्रथमोऽध्यायः]

वेदप्रणिहितो[1] धर्मो ह्यधर्मस्तद्विपर्ययः ।
[2]वेदा नारायणः साक्षात् स्वयम्भूरिति शुश्रम[3] ॥ ४० ॥

ॐ ॥ "वेदानां प्रथमो वक्ता हरिरेव यतो विभुः । अतो विष्ण्वात्मका वेदा इत्याहुर्वेदवादिनः[4]" इति शब्दनिर्णये ॥ * ॥

इति षष्ठस्कन्धे प्रथमोऽध्यायः[5]

[द्वितीयोऽध्यायः]

साङ्केत्यं पारिहास्यं वा स्तोभं हेळनमेव वा[6] ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥ १४ ॥

नारायणोऽयमित्यन्य[हेळन[7]]विषयत्वेनोक्तमघहरम्—

---

१ वेदैर्वेदेषु वा प्रणिहितो विहित इति धर्मस्य लक्ष णं चोक्तम् ।

२ "वेदो—" इति पाठान्तरम् ।

३ प्राचीनकोशे "शुश्रुमः" इति पठ्यते। चिन्त्यमौचित्यम् ।

४ अत एवेदानीमपि वेदप्रवक्तारं वेदमूर्तिरिति लोको व्यवहरति । "वेदो नारायणादुद्भूतः स एव साक्षादित्युपचारः" इति श्रीधरस्वामी । "कारणवाचिनो नारायणशब्दस्य कार्यभूते वेदे वृत्तिः । नारायणाद् वेदस्याऽविर्भावो लक्ष्यते" इति वीरराघवः। "निःश्वासभूतस्य स्वरूपतो भिन्नस्यापि वेदस्य निःश्वासवतः सकाशादाभिन्नत्वमाहुः" इति शुकदेवः ।

५ प्राचीनकोशेष्वत्राध्यायसमाप्तिर्न पठ्यते ।

६ "हेलनमेव वा" इति प्र. पाठः ।

७ "–हेलन–" इति मुद्रितः पाठः । एकस्मिन् प्रतनतमे कोशे 'हेळन'पदं न पठ्यते । स तु स्वरसः पाठः । नारायणोऽयमित्यन्यविषयत्वेनोक्तं साङ्केत्यं पारिहास्यं वा स्तोभं हेळनमेव वाऽशेषाघहरमित्येकान्वयः । साङ्केत्यमित्यस्यार्थमाह– नारायणोऽयमित्यन्यविषयत्वेनोक्तम् । भगवदितरत्र नारायणोऽयं कृष्णोऽयमित्यादि व्यवहारार्थं सङ्केतितं नाम । अथ पारिहास्यमित्यस्यार्थमाह—नारायणोऽयमित्यन्यविषयत्वेनोक्तम् । तद्यथा कश्चिदात्मस-

"[1]सर्वथाऽघहरं विष्णोर्नाम तद्भक्तिपूर्वकम् । अभक्त्योदाहृतं नैव फलदातृ भविष्यति । नामस्वामितया तस्य स्मरणं जायते यतः[2] । भक्तस्यातो नामकीर्तिः सङ्केतादावपीडिता[3] । अजामिळोऽपि[4] स्मरणाद् भक्त्या मृत्योरमुच्यत[5]" इति नारदीये ॥
॥ * ॥

[इति षष्ठस्कन्धे द्वितीयोऽध्यायः[6]]

[तृतीयोऽध्यायः]

परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद् यत्र विश्वम् ।
यदंशतोऽस्य स्थितिजन्मनाशा नस्योतवद् यस्य वशे च लोकः[7] ॥ १२ ॥

म्भावितः पुरुषः परिहस्येत–अचतुर्भुजोऽपि साक्षान्नारायणोऽयमिति । स्तोभमित्यस्यार्थमाह–नारायणोऽयमित्यन्यविषयत्वेनोक्तम् । यथा कश्चिद् भृत्यः स्वामिनमुल्लाघयितुं व्यर्थमेवाऽह–साक्षान्नारायणोऽयमस्मद्राजेति । कोपजननाय नर्मवचनं स्तोभ इत्यपि वदन्ति । तत्पक्षे 'गुणगन्धविधुरोऽपि सकलदोषाकरोऽपि नारायणः किलायम्' इत्यादिनर्मवचनमुदाहरणम् । हेळनमित्यस्याप्यनेनैव वाक्येनार्थमाह–नारायणोऽयमित्यन्यविषयत्वेनोक्तम् । यथा-कश्चिन्नारायणनामा पुरुषः स्वतोऽयोग्यत्वादन्यैरवज्ञायते–'अहो नारायणः खल्वयं किमस्य महिमा वर्ण्यते' इति । हेळनादिकं सर्वमन्यविषयं न नारायणविषयमिति यावत् । नारायणे महत्त्वबुद्ध्यैव पुत्रादिषु तन्नाम सङ्केत्यते । महत्त्वबुद्ध्यैवान्येऽपहस्यन्ते स्तोभं स्तूयन्तेऽवज्ञायन्ते वा । तेनात्र सर्वत्र सङ्केतादिव्यवहारेषु भगवन्माहात्म्यबुद्धिर्मूलमिति भवत्येव तस्य नामग्रहणमघहरमिति । एतेन किं विष्णुनेति विष्णावज्ञया तन्नामग्रहणेऽपि अशेषपापमोक्ष इति वदन्तः परास्ताः । तथात्वेऽसुरादीनां नरकाद्यसम्भवात् । महता प्रयत्नेन भक्तिसाधनविधानवैयर्थ्यप्रसङ्गात् । उदाहरिष्यमाणनारदीयवचनेन स्फुटविरोधाच्च ।

१ सर्वथा सङ्केतादित्वेऽपि इत्यर्थः ।
२ "ततः" इति क्वचित् ।
३ "-वपीरिता" इति प्र. पाठः प्रामादिकः । ईडिता स्तुता प्रशस्तेत्यर्थः ।
४ "अजामिलोऽपि" इति प्र. पाठः ।
५ उपक्रमे तावदेवं श्रूयते—"केचित् केवलया भक्त्या वासुदेवपरायणाः । अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्कर." (१-१५) इति, "प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखैः । न निष्पुनन्ति राजेन्द्र सुराकुम्भमिवाऽपगाः" (१-१८) इति च शुकेन प्रतिज्ञाय एतदुपपादनार्थम्—"अत्र चोदाहरन्तीममितिहासं पुरातनम्" (१-२०) इत्यजामिळोपाख्यानं प्रस्तुतम् । तेन ज्ञायते आचारभ्रष्टोऽप्यजामिळो नारायणपर एवाऽसीदिति । न चेदुपक्रमः कुप्येत् । अतः साधूक्तम्–अजामिळोऽपि भक्त्या स्मरणान्मृत्योरमुच्यतेति ।
६ प्राचीनकोशेष्वत्राध्यायपूर्तिर्न पठ्यते ।
७ दूतान् प्रति यमवचनमिदम् । 'त्वमेको भूतानामधीश्वरः' इति यद् भवद्भिरुक्तम्, तन्न युक्तम् । यतः मदन्योऽस्त्यधीश्वरः । यो मत्तः परोऽधिकः । न केवलं मत्तः । किंतु? जगतस्तस्थुषश्च परोऽन्यश्च । ब्रह्मादिस्था-

[1]ओतं प्रोतं पटवत्—

"यथा कन्थापटाः सूत्र ओताः प्रोताश्च संस्थिताः। एवं विष्णाविदं विश्वमोतं प्रोतं च संस्थितम्" इति स्कान्दे ॥ * ॥

[इति षष्ठस्कन्धे तृतीयोऽध्यायः[2]]

[चतुर्थोऽध्यायः]

न यस्य सख्यं पुरुषो वेत्ति[3] सख्युः सखा वसन् संवसतः पुरेऽस्मिन् ।
गुणो यथा गुणिनो[ऽ]व्यक्तदृष्टि[4]स्तस्मै महेशाय नमस्करोमि[5] ॥ २४ ॥

गुणो यथा गुणिनः। कश्चित् पुरस्थो[6] गुणभूतः प्रधानभूतस्य राज्ञः। ममासौ सखेति राज्ञा चिन्तितमपि न जानाति—

"यथा राज्ञः प्रियत्वं तु भृत्यो वेद नचाऽऽत्मनः। तथा जीवो न यत्सख्यं वेत्ति तस्मै नमोऽस्तु ते" इति स्कान्दे ॥ * ॥

वरान्तसकलजगद्विलक्षणः सकलस्वामी च। यस्मिन्निदं स्थावरजङ्गमात्मकं विश्वं ओतं प्रोतं च सर्वात्मना यदाधारतया स्थितमिति यावत्। कथमिव? पटवत्। जीर्णपटखण्डा इव। तद्यथा जीर्णाः पटखण्डाः तन्तुभिः सेविताः सेवकेषु तन्तुषु ओताः प्रोताः ऊर्ध्वं तिर्यक् च स्यूता दृढमेकीभूय तिष्ठन्ति तद्वत्। यस्य स्वरूपांशैः मत्स्यादिभिः भिन्नांशैर्ब्रह्मादिभिश्च जगतो जन्मादि भवति। नसि नासिकायां बद्धरज्जुः पशुरिव यस्य वशे च लोकः।

१ पटस्तन्तुष्विव जगदपि स्वोपादाने भगवत्याश्रितमिति भ्रान्तिं निराकरोति–ओतमिति। उपादानत्वार्थस्य परो मदन्य इत्यादिस्ववचनविरोधादग्राह्यत्वमेव। जीर्णाः पटखण्डाः कन्थापटा इत्युच्यन्ते।

२ प्राचीनकोशेष्वत्राध्यायपूर्तिर्न पठ्यते।

३ "पुरुषोऽवैति" इति प्र. पाठः। ४ "–दृष्टेस्तस्मै" इति च।

५ पुरुषो जीवः यस्य सख्युः, "द्वा सुपर्णा सयुजा सखाया" इति श्रवणात्। अस्मिन्नेव पुरे शरीरे संवसतः परमेश्वरस्य सख्यं हितैककारित्वं न वेद। पुरे वसन्नपि, सखा सन्नपि। यतो व्यक्तदृष्टिः। व्यक्त एव दृष्टिर्यस्य। स्थूलदृश्वेति यावत्। अव्यक्तदृष्टिरिति वा। अस्फुटदर्शनः। तद् यथा—स्थूलदृश्वा गुणः गुणभूतो भृत्यः पुरे वसन्नपि, सखा सन्नपि गुणिनः प्रधानभूतस्य राज्ञः सख्यं न वेद। अव्यक्तदृष्टेरिति पाठे व्यक्तं सख्यमदर्शयतो भगवतो विशेषणम्, राज्ञश्च। अत एव भाष्ये 'राज्ञा चिन्तितम्' इत्युक्तम्।

६ "पुरस्थितो–" इति प्र. पाठः।

देहोऽसवोऽक्षा मनवो भूतमात्रा नाऽत्मानमन्यं च विदुः परं यत्[१] ।
सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे[२] ॥ २५ ॥

"देहमानी वैश्रवणो मरुतः प्राणमानिनः । इन्द्राद्या इन्द्रियात्मानो रुद्रोऽन्तःकरणात्मकः । नैते विदन्ति स्वात्मानं परमं चापि मोहिताः[३] । जीवाभिमानी ब्रह्मा तु सर्वं वेद प्रजापतिः । सोऽपि वेद हरिं नैव सम्यक् सैव हि[४] सर्ववित्" इति च ॥ * ॥

यदोपरामो मनसो नामरूपरूपस्य [५]दृष्टिस्मृतिसम्प्रमोषात् ।
य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिषद्मने नमः[६] ॥ २६ ॥

केवलया स्वसंस्थया[७] । [८]स्वप्नसुप्त्यादौ [९]मनउपरमाज्जीवस्यास्वातन्त्र्यदर्शनेऽपि स्वप्नप्रबोधादिदर्शनादन्य ईश्वरस्तन्नियामकोऽस्तीति ज्ञायते । जीवेच्छाभावात्[१०] केवलत्वम्—

---

१ "प्राचीनकोशे "विदुः परा यत्" इति पठ्यते । तदा 'परा' इत्यव्ययम् ।

२ देह इति तदभिमानी कुबेरः । असव इति तदभिमानिनः प्राणापानादयः । अक्षा अक्षाणि । अन्त्याक्षरलोपेन । "जीवाद् भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चला" इतिवत् । अक्षाणीतीन्द्रियाणि, तदभिमानिनः इन्द्रादयः । तथाचोक्तम्—"सोमवित्तपसूर्याप्या अश्व्यग्नीन्द्रेन्द्रसूनवः । यमो दक्षश्चेन्द्रियेशाः" इति । मनव इति मनोवृत्तयः । तदभिमानी रुद्रः । गरुडशेषौ च । भूतमात्राः शब्दादयः, तदभिमानिन्यः सुपर्णीवारुणीपार्वत्यः । शब्दस्पर्शयोः सुपर्णी । रूपरसयोर्वारुणी । गन्धस्य पार्वती । एता देवताः स्वात्मानं न विदुः । अन्योन्यं च न विदुः । परमं चाऽत्मानं न विदुः । किन्तु पुमान् जीवाभिमानी ब्रह्मा स्वात्मानमितरांश्चाऽत्मनस्तद्गुणकर्माणि चेत्येतत् सर्वं वेद । तदेतत् सर्वं जानन्नपि यं परमात्मानं न वेद तं सर्वज्ञमनन्तमीडे ।

३ "परं वाऽपि विमोहिताः" इति प्र. पाठः । "परं चाऽपि-" इति पाठान्तरम् ।

४ सैव हि स एव हि । "सोऽचि लोपे चेत् पादपूरणम्" इति हि पाणिनिः ।

५ "दृष्टस्मृति-" इति प्र. पाठः ।

६ "शुचिसद्मने नमः" इति च । यदा मनस उपरामः स्वप्नाद्यवस्थायाम् । ननु कथं स्वप्ने मनस उपरामः? मनसैव हि स्वाप्नानपि पश्यति । आह—नामरूपरूपस्य । नामरूपात्मकबाह्यप्रपञ्चनिरूपकस्य मनस एवात्रोपराम उच्यते । न सर्वात्मना । यदा बाह्यप्रपञ्चान्मनस उपराम इत्युक्तं भवति । तदपि कुतः? नामरूपरूपस्य दृष्टिस्मृतिसम्प्रमोषात् । नामरूपात्मकस्य जगतः या दृष्टिः, प्रत्यक्षानुभवः या च स्मृतिः तयोः सम्प्रमोषात् । अत्रापीयं व्यवस्था । स्वप्नावस्थायां केवलं दृष्टेः सम्प्रमोषः । न स्मृतेः । स्मृतिमूला हि स्वाप्नी सृष्टिर्भवति । सुषुप्तिप्रळययोः मूर्च्छायां च उभयोरपि सम्प्रमोष इति । तथाच दृष्टेः दृष्टिस्मृत्योर्वा सम्प्रमोषाद् यदा मनस उपरामस्तदा केवलया भगवत्संस्थित्यैव जीवस्य स्वापप्रबोधौ भवतः । अन्यथा क एनं स्वापयेत्? कश्च प्रबोधयेत्? नहि जीवः स्वयं तयोः प्रभुरिति स्फुटम् । एवं जीवस्वापादिनियामकत्वेन यस्य सत्ता स्फुटमीयते ज्ञायते तस्मै हंसाय नमः । कीदृशाय? शुचिषद्मने । शुचौ प्राणवायौ स्थित्वा श्वासरूपहंसमन्त्रवेद्याय । शुद्धे सतां मनसि कृतसद्मने च । "हंसः शुचिषत्" इति हि मन्त्रवर्णः ।

७ क्वचित् "स्वसंस्थया" इति न पठ्यते ।

८ "स्वप्नसुषुप्त्यादौ" इति प्र. पाठः । क्वचित् कोशेषु च ।

९ "मनस उप-" इति क्वचित् ।

१० "जीवेच्छाभावः" इति क्वचित् ।

"यदोपरामो मनसः स्वप्नसुप्तिलयादिषु। तदाऽवस्थाप्रबोधादिकारणत्वेन केशवः। अस्वातन्त्र्यात्तु जीवस्य विद्यतेऽन्यो नियामकः। [1]जीवप्रवृत्त्यनाकुल्याज्ज्ञायतेऽसौ तदा [2]प्रभुः" इति हरिवंशेषु ॥ * ॥

मनीषिणोऽन्तर्हृदि सन्निवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः।
वह्निं यथा दारुणि पाञ्चदश्यं मनीषया निष्कषन्तीह गूढम्[3] ॥ २७ ॥

इच्छादिरूपेण त्रिवृद्भिः—

"इच्छादित्वेन त्रिविधा विमलाद्यास्तु शक्तयः। विष्णोः स्वरूपभूता यास्ताभ्यस्तन्नामिकाः पराः। जायन्ते तत्प्रसादेन ताश्च पीठेऽभिपूजयेत्[4]। तद्भिन्नजीवास्तस्यैव प्रसादात् तत्समीपगाः" इति तन्त्रनिर्णये। "दशेन्द्रियाणि च मनोबुद्धिप्राणप्रधानकाः[5]। चतुर्दशैषां परमः पाञ्चदश्यो हरिः स्मृतः। बुद्धेर्भेदेन वैतेषु[6] पाञ्चदश्योऽथ संस्थितेः" इति च ॥ * ॥

स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः।
स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः[7] ॥ २८ ॥

---

१ "जीवप्रवृत्त्यानुकूल्या-" इति प्र.पाठः प्रमाद एव। आकुल्यमाकुलीभावः। तदभावोऽनाकुल्यम्। नियमबद्धत्वमिति यावत्। न जीवकृतोऽयं नियम इति तन्नियन्ताऽन्य ईश्वरो ज्ञायते।

२ "विभुः" इति प्र. पाठः। जीवो न प्रभुरित्यसौ प्रभुर्ज्ञायते।

३ "निष्कर्षन्ति गूढम्" इति प्र. पाठः। "निष्कृषन्तीह गूढम्" इति च पाठान्तरम्। विमला, उत्कर्षिणी, ज्ञाना, क्रिया, योगा, प्रह्वी, सत्या, ईशाना, अनुग्रहा, चेति नव भगवतः स्वरूपभूताः शक्तयः। ताः प्रत्येकं त्रिवृतः। इच्छाज्ञानक्रियाभेदेन त्रिविधाः। इच्छाविमला, ज्ञानविमला क्रियाविमला इत्यादि। एवं सप्तविंशत्या स्वरूपशक्तिभिः सहान्तर्हृदि सन्निवेशितम्। तथा ध्यानविषयीकृतमिति यावत्। एवमेतत्सनामभिः स्वाधीनाभिभिन्नशक्तिभिश्च सप्तविंशत्या सहितम्। दारुणि गूढं वह्निं मथनेनेव हृदि गूढं तमेतं मनीषया निष्कषन्ति शोधयन्ति। शोधनेन च क्षराक्षरविलक्षणमवगच्छन्ति। तदाह–पाञ्चदश्यम्। दशेन्द्रियाणि, मनो बुद्धिर्महदव्यक्तमिति चतुर्दशतत्वानि साभिमानीनि। तेभ्यः परोऽयं पञ्चदशः। पञ्चदश एव पाञ्चदश्यः। अथवा दशेन्द्रियाणि बाह्यानि मनो बुद्धिरहङ्कारश्चित्तं चेति पञ्चविधमन्तःकरणं चेति पञ्चदश। तेषु नियामकतया स्थितः पाञ्चदश्यः।

४ "पीठे प्रपूजयेत्" इति प्र. पाठः।

५ प्राण इति महत्तत्वम्। प्रधानक इत्यव्यक्तम्। तदेतदुक्तं काठके–"इन्द्रियेभ्यः परं मनो मनसः सत्वमुत्तमम्। सत्वादधि महानात्मा महतोऽव्यक्तमुत्तमम्। अव्यक्तात्तु परः पुरुषः" इति।

६ "चैतेषु" इति प्र. पाठः।

७ स वै मम प्रसीदताम्। कीदृशः? अशेषेत्यादि। अयमस्माद्विशिष्यत इत्यादिरियत्तापरिच्छेदो विशेषः।

यद्यन्निरुक्तं वचसा निरूपितं धियाऽक्षभिर्वा मनसा वोत यस्य ।
मा भूत् स्वरूपं गुणरूपबृंहितं[1] स वै गुणापायनिसर्गलक्षणः[2] ॥ २९ ॥

"इयत्ता तु विशेषः स्यादानन्दादौ तदुज्झितेः । सर्वैर्विशेषै रहित उच्यते हरिरव्ययः । अप्राकृतस्वरूपत्वान्निर्मायश्चेति कथ्यते" इति च । "तद्रूपसदृशं रूपं यतः सर्वस्य सर्वदा । सर्वरूपो यतः शब्दमुख्यार्थः सर्वनामकः" इति च ॥ * ॥

"अलौकिकत्वान्नो विष्णुर्निरुक्तो नो निरूपितः[3]।तथाऽपि वेदेषूक्तत्वादुक्तो [4]रूपित एव च" इति व्योमसंहितायाम् ॥ * ॥

यस्मिन् यतो येन च यस्य यस्मै यं यो [5]यदा कुरुते कार्यते वा[6] ।
परावरेषां परमं प्राक् प्रसिद्धं तद् ब्रह्म तद्धेतुरन्यदेकम् ॥ ३० ॥

माया जडप्रकृतिः । अशेषं निःशेषं विशेषमाययोर्निषेधो विरहो यत्र तादृशी निर्वाणसुखानुभूतिर्यस्य तादृशः । तत्सुखं न कोऽप्यतिशेत इति तदविशेषम्, निरवधिकमिति यावत् । न प्राकृतमित्यमायम् । अत एव निर्वाणं च । बाणं शरीरम् । शरीरानुपस्कृतं निर्वाणम् । ततश्च निर्वाणसुखमिति स्वरूपानन्द उच्यते । सर्वाणि च पदानि यस्य नामानि स सर्वनामा । विश्वं यस्य रूपमिव स विश्वरूपः । विश्वं यत्सरूपं स इति यावत् । "इदं हि विश्वं भगवानिवेतरः" । साकल्येन वेदैरप्यनिरुक्तात्मशक्तिः ।

१ "गुणरूपं हि तत्तत् स वै" इति प्र. पाठः । "गुणवर्द्धितं हि तत्" इत्येके पठन्ति ।

२ "-विसर्गलक्षणः" इति प्र. पाठः । यद्यत् साकल्येन वचसा निरुक्तं धियाऽक्षैर्मनसा वा निरूपितं तत् भगवद्रूपं मा भूत्, न भवति हि । यतस्तत् सत्वादिगुणैः प्राकृतरूपैश्च बृंहितम् । "न तत्र चक्षुर्गच्छति न वाग् गच्छति नो मनः" इत्यादि हि श्रूयते । गुणापायस्त्रिगुणात्ययो यस्य सहजलक्षणं स वै भगवान् ।

३ "विष्णुर्निरुक्तोऽतो निरूपितः" इति प्र. पाठः प्रामादिकः ।

४ "रूपी स एव च" इति प्र. पाठश्च प्रमाद एव ।

५ "यद् यो यथा" इति प्र. पाठः । "यं यो यथा" इत्येव च प्राचीनकोशेषु पाठः । अथापि "सप्तविभक्त्यर्थस्य कालस्य" इति भाष्यानुगुण्याय "यदा" इति पाठः स्वीकृतः । अत एव वीरराघवाद्या दाक्षिणात्या व्याख्यातार एवमेव पठन्ति । "यदेत्यनेन कालः" इति हि भागवतभावचन्द्रिकायाम् । "यथा" इति पाठे कुरुते कार्यत इत्यादिना लकारेण वर्तमानादिकालः यथेत्यनेन प्रकार इति वाख्येयम् ।

६ "कार्यते च" इति प्र. पाठः । तथाचायं श्लोकार्थः—यस्मिन् इदं सर्वं तत् मुख्यमधिकरणं ब्रह्म । यत इदमुद्गतं तदपादानमपि ब्रह्म । येनेदं तत्करणमपि ब्रह्म । यस्मा इदं कल्पते तत् सम्प्रदानमपि ब्रह्मैव । यस्याधीनमिदं तदपि ब्रह्म । यमिदं प्रैत्यभिसंविशति तत् कर्म च मुख्यं ब्रह्मैव । यश्च कर्ता तद् ब्रह्म । एवं सप्तविभक्तीनां मुख्यार्थो ब्रह्मैवेति स्थितम् । ननु कथमेतत्? भवतु नाम ब्रह्माप्यधिकरणादि । कथं ब्रह्मैव? अन्यान्यपि हि भूतलादीनि सम्भवन्त्यधिकरणान्यपादानादीनि वा । नेत्याह— तद्धेतुः । तेषां सर्वेषां ब्रह्मैव हेतुः सत्तादिप्रदं चेति तदेव मुख्यतो विभक्त्यर्थः, नान्ये । एवं यदातदेत्यादिपदबोधितो यः कालः, कुरुते कार्यत इत्यादिक्रियापदबो-

सप्तविभक्त्यर्थस्य कालस्य प्रकारस्य च हेतुर्ब्रह्मैव—

"विभक्त्यर्थस्य कालस्य प्रकाराणां च कारणम्। एक एव परो विष्णुः सर्वसत्ताप्रदत्वतः" इति[1] भविष्यत्पर्वणि। "अनन्यः सदृशाभावादेको रूपाद्यभेदतः" इति च॥ ॥ * ॥

अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः।
अपेक्षितं किञ्चन साङ्ख्ययोगयोः[2] समं परं ह्यनुकूलं बृहत् तत्॥ ३२॥

"मदन्यो नास्ति सर्वेश इति विद्ध्यासुरं मतम्। अस्तीति दैवमुभयोर्हरिरेव[3] ह्यपेक्षितः। निषेधविध्योर्विषयः फलदाता च केशवः। तादृग्बुद्धेः कारणं च स्थानयोश्चोच्चनीचयोः" इति च॥ * ॥

योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननन्तः।
नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदताम्[4]॥ ३३॥

धिता ये कर्तृत्वकार्यत्वादयः प्रकाराः तदपि ब्रह्मैव। कालस्य प्रकाराणां च भगवदधीनत्वादेव। ननु सृष्ट्यादिहेतुषु विरिञ्चादिष्वपि विभक्त्यर्थाः सम्भवेयुः। नेत्याह–परावरेषाम्। परेषामवरेषां च हेतूनां परमं मुख्यहेतुः। परा इन्द्रादयोऽप्यवरा येभ्यस्तेषां ब्रह्मादीनामपि परममिति वा। अत एव ब्रह्मादिसृष्टेरपि प्राक् प्रळयार्णवशायितया प्रसिद्धम्। नन्वेतादृशं किंचिदन्यदपि वस्तु भवेत्? नेत्याह–अनन्यत्। तदेकमेव सर्वपदमुख्यार्थः। नान्यत् किमपि। न केवलमेतावत्, तस्य सर्वाण्यपि रूपाणि सर्वपदवाच्यानि। तदेतदप्याह–एकम्। अनेकरूपमप्येकरूपं सर्वरूपेष्वभिन्नमिति हि तदर्थः। एतेन "स सर्वनामा स च विश्वरूपः" इति पूर्वोक्तं विवृतम्।

१ "इति च भविष्यत्पर्वणि" इति क्वचित्।

२ "अवेक्षितं किञ्चन योगसाङ्ख्ययोः" इति प्र. पाठः। मदन्यः परमेश्वरोऽस्तीति भावरूपे, नास्तीति चाभावरूपे वस्तुनि निष्ठा ययोः। सर्वेश्वरोऽस्ति नास्तीति विवदमानयोरित्यर्थः। भिन्नविषयत्वे न विवादः स्यादिति स्फुटमाह—एकस्थयोः। एकविषययोः। अत एव भिन्नविरुद्धधर्मप्रतिपादकयोरुभयोरपि वादिनोरपेक्षितम्। नास्तिकोऽपि कथमीश्वरं निषेधेयमिति निरन्तरमन्तरन्ततस्तमेव हि चिन्तयति। अस्तिनास्तीति द्वैविध्यमुक्तम्। इदानीमास्तिकेष्वपि पुनर्द्वैविध्यमाह—सांख्ययोगयोः। ज्ञानकर्ममार्गयोरुभयोरपि समं समानं विषयम्। न केवलं ज्ञानिनः, किंतु कर्मिणोऽप्येतमेवेन्द्राग्न्यादिनामभिर्यजन्तीति न सांख्ययोगौ भिन्नविषयौ। "कृष्णो यज्ञैरिज्यते सोमपूतैः" इत्यादि ह्युक्तम्। "एकं सांख्यं च योगं च यः पश्यति स पश्यति" इति च। अनुकूलं च तद् ब्रह्म, न कस्यापि प्रतिकूलम्। कथं तर्हि कस्यचित्सुखं कस्यचिद् दुःखं ददाति–अनुकूलम्। तत्तद्योग्यतानुकूलमेव हि तत्तद्बुद्धिं ददाति तदनुगुणमेव चोच्चं नीचं वा फलं ददाति। स्वयं तु सर्वत्र समम्।

३ "–रेवं ह्यपेक्षितः" इति क्वचित्।

४ "प्रसीदतु" इति प्र. पाठः। अनामरूप इत्यव्यक्तनामरूपः। लोकविलक्षणनामरूपः। अथाप्यनन्तः। अनन्तनामरूपः। जन्मभिरवतारैः तल्लीलाभिश्च रामकृष्णादिनामानि तत्तद्रूपाणि च प्रकटयति। "प्राकृतनामरूप-

51

"तत्कर्मणामदृष्टत्वादनामा चाप्यदर्शनात् । अरूपस्त्ववतारेण रूपकर्माणि दर्शयेत्[१] । नित्यरूपो नित्यकर्माऽप्यव्यक्तत्वमपेक्ष्य तु । अरूपकर्मेत्युदितो रूपकर्मोज्झितेर्ननु[२]" इति प्रकाशसंहितायाम् । "अनामा सोऽधिकार्थत्वादव्यक्तत्वादरूपकः[३] । कंसारित्वादिसाम्याख्यो[४] व्यक्तरूपोऽवतारगः" इति च । "लोकदृष्टाधिकार्थानि[५] मूलनामानि केशवे । अथ दामोदरादीनि [६]लोकदृष्टसमानि तु । आनन्दोऽव्यक्तरूपस्तु मूलरूपमुदाहृतम् । स एव व्यक्तिमापन्नः प्रादुर्भाव उदीरितः[७]" इति च ॥ * ॥

यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति ।
यथाऽनिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान्मनोरथम्[८] ॥
॥ ३४ ॥

"स्वदेहस्थं हरिं प्राहुरधमा जीवमेव तु । मध्यमाश्चाप्यनिर्णीतं जीवाद् भिन्नं जनार्दनम् । पूर्णानन्दादिगुणकं सर्वजीवविलक्षणम् । उत्तमास्तु हरिं प्राहुस्तारतम्येन तेषु च[९] । बुद्धिशुद्ध्यनुसारेण यथा प्राणं शरीरगम् । श्वासमात्रं जनाः प्राहुरनिर्णीतं च मध्यमाः । देवदेवेश्वरं सूत्रमानन्दं[१०] प्राणवेदिनः" इति च ॥ * ॥

रहितोऽपि" इति श्रीधरस्वामी । "कर्मकृतनामरहितोऽपि" इति वीरराघवः । "पादमूलं भजतामित्यनेन तान् प्रति रूपप्राकट्यात् पूर्वमपि रूपमस्त्येवेति व्यञ्जितम्" इति जीवगोस्वामी ।

१ अवतारात् पूर्वं कृष्णादिरूपाणां कंसहननादिकर्मणां च लोकैरदर्शनाल्लोकदृष्ट्या सोऽनामरूप इव । तान्येव रूपाणि कर्माणि चावतारैर्व्यज्यन्ते । ततश्च लोकदृष्ट्यां च कृष्णरामादिनामानि रूपाणि च भवन्ति ।

२ "–कर्मोज्झितो ननु" इति क्वचित् ।

३ तथा च न विद्यते लोकवदल्पार्थं नाम यस्य सोऽनामा । न विद्यते व्यक्तं रूपं यस्य सोऽरूपः ।

४ "–साम्यार्थो–" इति प्र. पाठः प्रामादिकः । कंसारित्वादिलोकदृष्टार्थसाम्येन आख्या यस्य सः । तथाच लोकविलक्षणनामाऽनामा लोकव्यवहारसमाननामा सनामेत्युक्तं भवति ।

५ "–दृष्ट्याऽधिकार्थानि" इति प्र. पाठः । मूलनामानि नारायणादीनि ।

६ "लोकदृष्ट्या समानि तु" इति प्र. पाठः ।

७ "इतीरितः" इति क्वचित् ।

८ प्रकृतिमोहितैः, अप्राकृतवस्तुतत्वग्रहणेऽपटुभिः, ज्ञानमार्गैः व्याकुलानां जनानां यथाशयं स्वस्वबुद्ध्यनुसारेण देहगतो भगवान् विविधं भाति । तद्यथाऽधमानां जनानां जीव एव भगवानिति । मध्यमानां जीवो वा तदन्यो वा इत्यनिर्णयेन । उत्तमानां पुनः प्राकृतैर्ज्ञानमार्गैरनुपहतया शुद्धया बुद्ध्या जीवाद् भिन्नः पूर्णगुणो भगवान् भाति । तत्रापि यथायोग्यमुत्तमानामुत्तमानामधिकाधिकमधिकगुणो भाति । तत्र दृष्टान्तः–यथाऽनिलः । यथा पृथिवीमयं जीवस्योपकरणतया गुणभूतं शरीरं गतो वायुरधमानां श्वासमात्रम् । अन्येषामनिर्णीतः । उत्तमानां पुनर्देवोत्तमो मुख्यप्राणः ।

९ "तेषु तु" इति क्वचित् ।

१० "सूत्रनामानम्" इति क्वचित् ।

ब्रह्मा भवो भवन्तश्च मनवो विबुधेश्वराः ।
विभूतयो मम ह्येता भूतानां भूतिहेतवः ॥ ४५ ॥

"विशेषव्यक्तिपात्रत्वाद् ब्रह्माद्यास्तु विभूतयः । तदन्तर्यामिणश्चैव मत्स्याद्या विभवा इति[1]" इति तन्त्रनिर्णये ॥ * ॥

तपो मे हृदयं साक्षात्[2] तनुर्विद्या क्रियाऽऽकृतिः[3] ।
[4]अङ्गानि क्रतवो जाता धर्म आत्माऽसवः सुराः ॥ ४६ ॥

"तपोभिमानी रुद्रस्तु विष्णोर्हृदयमाश्रितः । विद्यारूपा तथैवोमा विष्णोस्तनुवमाश्रिता[5] । शृङ्गाराद्याकृतिगतः क्रियात्मा[6] पाकशासनः । अङ्गेषु क्रतवः[7] सर्वे मध्यदेहे च[8] धर्मराट् । [9]प्राणे वायुश्चित्तगतो ब्रह्माऽन्याः खेषु देवताः" इति च । "यदाश्रयं[10] यद् भवति तत् तन्नामकमीरितम्[11]" इति च शब्दनिर्णये[12] ॥ * ॥

---

१ "विभवाः स्मृताः" इति प्र. पाठः । "विभवः स्मृताः" इति क्वचित् ।

२ "हृदयं ब्रह्मन्" इति प्र. पाठः । "हृदयं ब्रह्म" इति च पाठान्तरम् । हृदयमिति मनः ।

३ तनुरन्या, आकृतिश्चान्या । एकयैव तन्वा प्रसन्नाकृतिरपि भवति, उग्राकृतिरपि भवति । यथा नृसिंहतन्वा प्रह्लादं प्रति प्रसन्नाकृतिः, हिरण्यकशिपुं प्रति चोग्राकृतिः । यथा च कृष्णावतारे गोपीनां प्रति शृङ्गाराकृतिः, कंसस्य भयदाकृतिः । एवमन्यान्या आकृतयः ।

४ अङ्गेभ्यः क्रतवो जाताः, अङ्गेषु च जाताः स्थिताः । इदं सर्वत्राप्यन्वेति । तपो मे हृदयात् जातम्, तनोर्विद्या जाता इत्यादि । "अङ्गानि क्रतवो यज्ञाः" इत्यपि पठन्ति वीरराघवादयः ।

५ "–स्तनुमुपाश्रिता" इति प्र. पाठः । "–स्तनुसमाश्रिता" इति केचित् ।

६ क्रियात्मा क्रियाभिमानी । हस्तदेवता हि सः ।

७ सर्वे क्रतवः क्रत्वभिमानिनो देवाः । श्लोकोक्तशेषाः सोमाधिकारिणः शतदेवाः । अङ्गेष्विति हस्तपादादिषु कर्मेन्द्रियेषु । ज्ञानेन्द्रियाणां चक्षुरादीनामसवः सुरा इति मूले पृथगुक्तेः । अत्रापि "अन्याः खेषु देवताः"इति ।

८ एतेन धर्म आत्मेति व्याख्यातम् । धर्मराजः आत्मानं मध्यदेहमाश्रित इति ।

९ अत्र "प्राणो वायुश्चित्तगतो ब्रह्माद्याः खेषु देवताः" इति प्र. पाठस्तदनुसारीणि सर्वाणि व्याख्यानानि च प्रामादिकान्येव । नहि वायुश्चित्तगतः । किंतु वायुः भगवतः प्राणे श्रितः । ब्रह्मा तु भगवच्चित्तगतः । अन्ये सूर्याद्याः सुराः चक्षुरादीन्द्रियेषु गता इति । एतेन "ब्रह्माद्याः सुराश्च हरेरसुशब्दवाच्येभ्यः श्रोत्रादीन्द्रियेभ्य उत्पन्नाः" इति विजयध्वजीयं भाष्यविरुद्धं मूलपाठापरिज्ञानमूलं निर्मूलं चेति स्फुटं प्रक्षिप्तम् ।

१० "यदाश्रितम्" इति प्र. पाठः ।

११ तथाच रुद्रः हृदयं हृदयनामकः हृदयाश्रयत्वादित्यादि । मञ्चाः क्रोशन्तीत्यादिवदयं व्यवहारः ।

१२ "इति शब्दनिर्णये" इति च पाठान्तरम् ।

अहमेवेदमासाग्रे[१] नान्यत् किञ्चान्तरा[२] बहिः ।
[३]सज्ज्ञानमात्नमव्यक्तं प्रसुप्तमिव सर्वतः[४] ॥ ४७ ॥

[५]सज्ज्ञानमात्नं यदिदं[६] त्वया तपसा दृष्टं मम रूपं तदेवाग्र आसीत् ।

"[७]नानावर्णो हरिस्त्वेको बहुशीर्षभुजोरुपात् । आसील्लये तदन्यत्तु सूक्ष्मरूपं श्रियं विना । असुप्तः सुप्त इव च मीलिताक्षोऽभवद्धरिः । [८]अन्यत्रानादराच्छ्रीश्च विष्णोर्लीनेव कथ्यते । सूक्ष्मत्वेन हरौ स्थानाल्लीनमन्यदपीष्यते" इति माहात्म्ये[९] ॥ * ॥

मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे[१०] ।
यदासीत् तत एवाऽद्यः स्वयम्भूः समभूदजः[११] ॥ ४८ ॥

गुणतः अनन्ते—

"प्रत्येकशो गुणानां तु निस्सीमत्वमुदीर्यते । अनन्तत्वं तु[१२] गुणतस्ते चानन्ता हि सङ्ख्यया । अतोऽनन्तगुणो विष्णुर्गुणतोऽनन्त एव च" इति तन्त्रभागवते ॥ * ॥

इति षष्ठस्कन्धे चतुर्थोऽध्यायः

---

१ "–वेदमेवाग्रे" इति प्राचीनकोशेषु पठ्यते । "अहमेवाऽसमेवाग्रे" इति प्र. पाठः ।

२ "किञ्चाऽन्तरम्" इति प्र. पाठः । ३ "सञ्ज्ञानमात्र–" इति च ।

४ "–मिव विश्वतः" इति प्र. पाठः । यत् सज्ज्ञानमात्नं ज्ञानानन्दमयं रूपं त्वया दक्षेण तपसाऽपरोक्षितं तदेवाहेयं मम रूपं इदमस्य जगतोऽग्रे प्रळयेऽप्यासीत् । रूपरूपिणोरभेदबोधनाय चाहम्पदं प्रायोजि । तदेकमेवाऽसीत् । नान्यत् किञ्चन । यदन्तरा चेतनजातम् । यच्च बहिर्जडजातम् । किन्तु अन्तरा बहिश्च सर्वत्र सज्ज्ञानमात्नं तद् रूपमेवाऽसीत् । सर्वस्याऽपि तत्रैव लयात् । तदव्यक्तं सृष्टिव्यापारोपरमात् प्रसुप्तमिव च सर्वतः ।

५ "सञ्ज्ञानमात्रम्" इति प्र. पाठः । ६ क्वचित् कोशेषु "यदिदम्" इति न पठ्यते ।

७ ननु दक्षेणापरोक्षितं रूपं घनश्यामं करचरणाद्युपेतं च । "पीतवासा घनश्यामः प्रसन्नवदनेक्षणः" (३७) इत्याद्युक्तेः । तत् कथं प्रळये तादृशं रूपं स्यात्? आह—नानावर्णः ।

८ "अन्यत्रानादराद्विष्णौ श्रीश्च लीनेव" इति प्र. पाठः ।

९ "मात्स्ये" इति प्र. पाठः । "महाकौर्मे" इति क्वचित् ।

१० "गुणतो गुणविग्रहः" इत्यर्वाचीनः पाठः ।

११ असंख्यगुणे, एकैकस्मिन्नपि गुणे अनन्ते इयत्तापरिच्छेदरहिते, प्रत्येकं निरवधिकानन्तगुणे अनन्तरूपे च मयि, मम नाभाविति यावत् यद् भुवनकोशाख्यं पद्ममासीत् ततः स्वयम्भूः समभूदयोनिजः । "तस्माद् विराडजायत विराजो अधि पुरुषः" इति श्रुतेः । १२ "तदानन्त्यं तु" इति प्र. पाठः ।

[अष्टमोऽध्यायः]

सनत्कुमारोऽवतु कामदेवाद्धयशीर्षः पथि देवहेडनात्[1] ।
देवर्षिवर्यः पुरुषान्तरार्चनात्[2] कूर्मो हरिर्मां निरयादशेषात् ॥ १७ ॥

सनत्कुमारोऽवतु कामदेवात्—

"सनत्कुमारनामा तु ब्रह्मचर्यवपुर्हरिः । सनत्कुमारमपरं ब्रह्मपुत्रं विवेश यः । स मां[3] योग्येतरात् कामात् पातु विश्वेश्वरः प्रभुः" इति च[4] ।

देवर्षिवर्यः पुरुषान्तरार्चनात्—

"विष्णोरपरिवारत्वदृष्ट्या देवान्तरार्चनात् । महिदासो देवऋषिः[5] पातु मां विष्णुरव्ययः । तदनर्पितकर्मभ्यस्तदस्मरणतस्तथा" इति च ॥ * ॥

यथा हि भगवानेव वस्तुतः सदसच्च यत् ।
[6]सत्येन तेन नः सर्वे यान्तु नाशमुपद्रवाः ॥ ३१ ॥

यथैकात्म्यानुभावेन[7] विकल्परहितः स्वयम् ।
भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया ॥ ३२ ॥

तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः ।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥

---

१ "-शीर्षा मां पथि देवहेलनात्" इति प्र. पाठः । यात्रामध्ये देवायतनमासाद्य तत्र देवमनाराध्यानादरेण गमनं पथि देवहेळनम् । कामदेव इति निषिद्धकामनारतिः ।

२ "पुरुषार्चनान्तरात्" इत्यर्वाचीनः पाठः ।

३ "स मः योग्येतरात्" इति क्वचित् ।

४ "क्वचिदत्र चकारो न पठ्यते ।

५ "देवर्षिः" इति क्वचित् । छन्दःसौकर्याय विश्लिष्य पठनमिति तदाशयः ।

६ "सत्येनानेन" इति प्र. पाठः । सदसत् मूर्तामूर्तम् । कार्यकारणात्मकं वा । तन्नियामक इति यावत् ।

७ "–नुभावानाम्" इति च । एकस्यैव सर्वान्तर्यामित्वमैकात्म्यम् । तथाविधेन नियमनसामर्थ्येन, एक एव सन् सर्वत्र सर्वं नियमयन्, अत एव सर्वेष्वपि रूपेषु विकल्परहितः निर्भेदः । स्वरूपभूतया शक्त्या स्वयमेव भूषणादिषु स्थित्वा तत्तच्छक्तिप्रदानेन भूषणादिसंज्ञाः शक्तीर्धत्ते । लिङ्गं ध्वजादिचिह्नम् । शक्तय इति शक्तिरूपा आविर्भावविशेषाः । भक्तानुकम्पया स्वयमेव भूष्यो भूषणं च भूत्वाऽऽत्मानमाविष्करोतीति । तदेतत् यथा सत्यं तेन सत्यप्रमाणेन भगवान् पातु । न केवलमायुधादिषु, किन्तु सर्वत्रगतैः सर्वपदवाच्यैः सर्वैरपि रूपैः सदा सर्वत्र पातु ।

यथा हि भगवानेव—

"सदसन्नियामकतया सदसद्रूप उच्यते । सत्येनानेन मां देवः पातु विष्णुश्चतुर्भुजः[१] ॥ * ॥ एक एव परो विष्णुर्भूषाहेतिध्वजेष्वजः । तत्तच्छक्तिस्वरूपेण[२] स्वयमेव व्यवस्थितः । सत्येनानेन मां देवः पातु सर्वेश्वरो हरिः" इति च ॥ * ॥

एतद् धारयमाणस्तु यँय्यं पश्यति चक्षुषा ।
पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते ॥ ३६ ॥

न कुतश्चिद् भयं तस्य विद्यां धारयतो भवेत् ।
राजदस्युग्रहादिभ्यो [३]व्याध्यादिभ्यश्च कर्हिचित् ॥ ३७ ॥

"[४]गुरुशिष्ययोरयोग्यत्वाद् गुरुवृत्तेरपूर्तितः । अप्रसादाद् गुरोर्विद्या न यथोक्तफलप्रदा[५]" इति च । "विद्याः कर्माणि च सदा गुरोः प्राप्ताः फलप्रदाः । अन्यथा नैव फलदाः प्रसन्नोक्ताः फलप्रदाः[६]" इति तन्त्रसारे[७] ॥ * ॥

इति षष्ठस्कन्धेऽष्टमोऽध्यायः

[नवमोऽध्यायः]

वाय्वम्बराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजन्तः ।
हराम यस्मै बलिमन्तकोऽसौ बिभेति यस्मादरणं ततो नः[८] ॥ २९ ॥

---

१ इतः परं प्र. पाठे "इति च" इति पठ्यते ।

२ "तत्तच्छक्तिप्रदत्वेन" इति प्र. पाठः ।

३ "व्याघ्रादिभ्यश्च" इति प्र. पाठः ।

४ ननु विद्याधारणेऽपि क्वचित् फलं न भवति । तत्कुतः? आह—गुरुशिष्ययोः । गुरोरयोग्यत्वात् । योग्यगुरूपलम्भेऽपि शिष्येऽयोग्ये विद्या न फलदा । उभयोरपि योग्यत्वेऽपि अप्रसन्नेन गुरुणा अशुश्रूषवे शिष्याय वा दत्ता न सम्यक् फलदा ।

५ "–प्रदाः" इति क्वचित् ।

६ गुरोः प्राप्ता एव फलदा इत्येका प्रतिज्ञा । गुरुणाऽपि प्रसन्नेनैवोक्ताः फलप्रदा इत्यपरा । यद्वा पूर्वार्धे प्रसन्नादित्युपस्कर्तव्यम् । प्रसन्नाद् गुरोः प्राप्ताः फलप्रदाः । तदेतदन्वयव्यतिरेकाभ्यां समर्थयते—अन्यथा अगुरुप्राप्ता अप्रसन्नगुरुप्राप्ता वा न फलदा एव । प्रसन्नगुरुप्राप्तास्तु फलदा एवेति ।

७ "इति च तन्त्रसारे" इति क्वचित् प्र. पाठः ।

८ पञ्चभूताभिमानिनः, तन्निर्मितलोकत्रयाभिमानिनश्च ब्रह्मादयो वयमुद्विजन्तो यस्मै अन्तकाय, मृत्युदेवतायै दुर्गायै बलिं हराम साऽन्तकपदवाच्या दुर्गाऽपि भीतेव यस्य वशगा स एव नः शरणम् ।

"कालोऽन्तकः प्रधानं च मृत्युरव्यक्तमित्यपि । उच्यते प्रकृतिः सूक्ष्मा श्रीर्भूर्दुर्गेतिनामभिः[1] । सैव ब्रह्मादिभयदा विष्णोस्तु [2]वशवर्तिनी । अभयाऽपि बिभेतीव तद्वशत्वादुदीर्यते" इति माहात्म्ये[3] ॥ * ॥

पुरा स्वयम्भूरपि संयमाम्भस्युदीर्णवातोर्मिरवैः कराळे[4] ।
एकोऽरविन्दात् पतितस्ततार तस्माद् भयाद् येन स नोऽस्तु पारः ॥ २४ ॥

"यत्र वायूदपद्मादिरूपेण प्रकृतिः स्थिता । एकस्तत्राबिभेद् ब्रह्मा विचार्य भयमत्यगात् । अन्तर्गतो हरिस्तस्य ध्यातो भयमपानुदत्" इति च । "जनिष्यतां जनानां च[5] स्वभावानां प्रसिद्धये । ज्ञानादिगुणपूर्णस्य ब्रह्मणोऽपि क्षणार्द्धगाः । भयादिका[6] भवन्तीव कथं तस्मिन् स्थिरालयाः[7]" इति च । "भगवत्प्रीतये नित्यं ब्रह्मणो ये भयादयः । न वृथा तस्य भावः स्यात् कश्चित् तेऽपि क्षणार्द्धगाः । अज्ञानं तु[8] चतुर्वारं द्विवारं भयमेव च । शोकोऽपि [9]तावन्नान्यत्र कदाचिद् ब्रह्मणो भवेत् । तत्रापि भगवत्प्रीत्या उन्नत्यै चास्य[10] वै भवेत्" इति ब्रह्मतर्के ॥ * ॥

य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वम् ।
वयं न यस्यापि पुरः समेताः[11] पश्याम लिङ्गं पृथगीशमानिनः ॥ २५ ॥

---

१ "श्रीभूदुर्गेतिनामभिः" इति क्वचित् । २ "विष्णोश्च वश–" इति प्र. पाठः ।

३ "इति मात्स्ये" इति प्र. पाठः ।

४ "कराले" इति प्र. पाठः । अत्र प्रळयजलं वातः नाभिपद्मं च चिन्मयानि दुर्गारूपाणीति भाष्ये स्थितम् । नाभिपद्मादुत्पतित उद्गत एकाकित्वादबिभेत् । ततश्च येन हरिणा ध्यातेन स भयादुत्तीर्णः स हरिर्नोऽप्यस्तु पारस्तारकः ।

५ "जनानां तु" इति प्र. पाठः । क्वचित् कोशेषु च तथा ।

६ भयाज्ञानशोकाः भवन्तीव । न वस्तुतो भवन्ति । भीतवदज्ञवद् दुःखिवच्च स्थितिरेव केवलं भगवत्प्रीत्यै ।

७ "कथमस्मिन् स्थिराचलाः" इति क्वचित् कोशपाठः । ८ "अज्ञानं च" इति प्र. पाठः ।

९ "तावान् नान्यत्र" इति प्र. पाठः । तावत् द्विवारम् ।

१० "उन्नत्यै वाऽस्य तद् भवेत्" इति प्र. पाठः । भगवत्प्रीत्यै उन्नत्यै च इति पदच्छेदः । "भगवत्प्रीत्या जायमानया कारणेन उत्कर्षायैव भवेत्" इत्यादि तृतीयान्ततया व्याख्यानं तु भ्रान्तिमूलमेव ।

११ "समीहतः पश्याम" इति प्र. पाठः । निजमायया स्वेच्छया । स्वरूपज्ञानेन वा । "माया वयुनम्" इति श्रवणात् । योऽस्मान् ससर्ज, ततःपरं येनानुगृहीता एव वयं पुनः सृजाम विश्वम्, यस्य एकस्य पुरतः वयं समेताः सर्वेऽपि न प्रभवः तस्येदृशं प्रभावरूपं लिङ्गमेव वयमपि पश्यामः । न ज्ञानानन्दज्योतिर्मयं स्वरूपम् । वयमेव सृष्टेरीश्महे इति पृथक्पृथगीशमानित्वात् ।

लिङ्गमेव पश्यामः[1]।

"कदाचिदभिमानस्तु देवानामपि सन्निव[2]। प्रायः कालेषु[3] नास्त्येव तारतम्येन सोऽपितु" इति च ॥ * ॥

आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ ।
पर्युपासितमुन्निद्र[4]शारदाम्बुरुहेक्षणम् ॥ २९ ॥

"श्रीवत्सः प्रकृतिर्ज्ञेया ब्रह्माख्यः कौस्तुभः पुमान् । तदतीतैः षोडशभिः स्वरूपैरुपचार्यते[5]" इति च ॥ * ॥

श्रीवत्सकौस्तुभौ विना आत्मतुल्यैः । प्रकृतिपुरुषातीतत्वात् सप्तदशरूपाण्यपि तुल्यानीत्यर्थः। आत्मभूतैश्च तुल्यैश्च आत्मतुल्यैः ।

"अपुम्प्रकृत्यधीनत्वाद् वासुदेवादिका हरेः । तुल्यास्तु[6] केशवाद्याश्च नच भिन्नाः कथञ्चन" इति तन्त्रसारे । "श्रीवत्सकौस्तुभाभ्यां तु विनाभावं प्रदर्शयन् । पुम्प्रकृत्यात्मकाभ्यां तु [7]धत्ते नित्यं जनार्दनः । यदस्याऽभ्यामतीतत्वं यद् वशो[8] नानयोर्हरिः । श्रीवत्सकौस्तुभाभ्यां तु विनाभावः स एवच[9]" इति च । "[10]आत्मैव

---

१ "पश्याम" इति च पाठान्तरम् ।

२ कादाचित्कोऽप्यभिमानः देवानां न स्वतः सम्भवति । जातापरोक्षत्वात् । तेनासुरावेशनिमित्तः स इतीवशब्देनाऽह । एवमावेशजोऽप्यभिमानः प्रायः कालेषु दीर्घकालं न भवत्येव ।

३ "कालेन नास्येव" इति क्वचित् ।

४ "शरदम्बुरुहेक्षणम्" इति प्र. पाठः । श्रीवत्सकौस्तुभाविति तदभिमानिनौ श्रीर्ब्रह्मा चोच्येते । तौ विना । तदीश्वरत्वात् तदतीतैः । "प्रधानपुरुषेश्वरः" इति हि तन्नाम । अत एव आत्मतुल्यैः । भगवत्स्वरूपभूतैः परस्परं तुल्याकृतिभिश्च । नहि प्रकृतिपुरुषात्ययो भगवतोऽन्येषां सम्भवति । वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धसहितैः केशवादिदामोदरान्तैः षोडशभिः स्वरूपैः परितो मण्डलाकारेण स्थितैः क्रीडयोपासितमिव मध्ये स्थितम् ।

५ "स्वरूपैरप्युपास्यते" इति प्र. पाठः । "स्वरूपैरप्युपासते" इति, "स्वरूपैर्य उपास्यते" इति, "स्वरूपैरुपचर्यते" इति च तत्रतत्र पाठभेदाः ।

६ "तुल्याश्च" इति प्र. पाठः । वासुदेवादिकाः केशवाद्याश्च हरेर्मूलरूपात् परस्परं च तुल्यास्तु तुल्या एव । नेदं सादृश्यं भेदगर्भमित्याह-न च भिन्नाः । अभिन्नाश्च । "नैव भिन्नाः" इति क्वचित् ।

७ "-काभ्यां स धत्ते" इति प्र. पाठः । पुम्प्रकृत्यात्मकाभ्यां श्रीवत्सकौस्तुभाभ्यां विनाभावं प्रदर्शयन्नेव रूपाणि धत्ते नित्यं जनार्दनः । ननु कोऽयं विनाभावः? आह-यदस्य ।

८ "तद्वशो-" इति क्वचित् पाठः प्रामादिकः ।

९ "स एव तु" इति प्र. पाठः । कोशेषु च क्वचित् ।

१० ननु किमित्यात्मनाऽऽत्मानं पर्युपास्ते ? आह-आत्मैव । क्रीडैव केवलमियं यत् पर्युपासनं नाम ।

सप्तदशधा स्वयं भूत्वा जनार्दनः । मध्यस्थावृतिरूपेण क्रीडते पुरुषोत्तमः" इति च ॥ * ॥

नमस्ते यज्ञवीर्याय वयसे उत ते नमः ।
नमस्ते अस्तु चक्राय नमोऽस्तु पुरुहूतये[१] ॥ ३१ ॥

"वयः सर्वस्य वयनाद्[२] भगवान् पुरुषोत्तमः" इति च । "मा तन्तुश्छेदि वयतो धियं मे[३]" इति श्रुतिः ॥ * ॥

यत् ते गतीनां तिसृणामीशतुः परमं पदम् ।
नार्वाचीनो विसर्गस्य धातुर्वेदितुमर्हति[४] ॥ ३२ ॥

"देवलोकात् पितृलोकान्निरयाच्चापि यत् परम् । तिसृभ्यः परमं स्थानं वैष्णवं विदुषां गतिः" इति माहात्म्ये ॥ * ॥

अथ तत्र भगवान्[५] किं देवदत्तवदिह गुणविसर्गापतितः[६] पारतन्त्र्येण स्वकृतकुशलाकुशल[७]फलमुपाददाति; आहोस्विदात्माराम उपशमशीलः समञ्जसदर्शन उदास्त इति ह वाव न विदामः ॥ ३४ ॥

---

१ "नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये" इति प्र. पाठः । "नमस्ते ह्यात्तचक्राय नमोऽस्तु पुरुहूतये" इति वीरराघवः । एवं पूर्वार्धेऽपि "उत ते नमः" इत्यत्र "ऊतये नमः" इति स पठति । यज्ञस्य वीर्यं यस्मात् । यदर्पित एव यज्ञः फलदानसमर्थ इति यावत्, तस्मै । वयसे बन्धकाय । वय बन्धने । वयसे सर्वोत्तमाय च ! वय श्रेष्ठत्वे । शत्रुनाशाय धृतचक्ररूपाय । उक्तं हि "भूषणायुधलिङ्गाख्या धत्ते" इति । यद्वा जगच्चङ्क्रमणाच्चक्रम् । तदुक्तम्–"चक्रं चङ्क्रमणादेष वर्जनाद् वज्र उच्यते । खण्डनात् खड्ग एवैष हेतिनामा स्वयं हरिः" इति ब्रह्मवैवर्तवचनं भाष्ये । अत एव पुरुनाम्ने नमोऽस्तु । पुरु महार्थं च नाम तस्य ।

२ वयनात् बन्धनात् ।

३ भगवति धियं वयतो बध्नतो मम ज्ञानतन्तुर्मा च्छेदि । निरन्तरमनुवर्तताम् । अखण्डस्मृतिरूपं ध्यानं सिद्ध्यतु । तन्तुः सन्ततिर्वा । मम कुले ज्ञानिन एव जायन्ताम् ।

४ "धातर्वेदितुमर्हति" इति प्र. पाठः । तिसृणां नरकपितृदेवलोकानां सकाशात् परमं ते पदं ब्रह्मणो विसर्गस्य सृष्टेरर्वाचीनः कोऽपि प्राकृतो नरो न वेदितुं ज्ञातुं लब्धुं वाऽर्हति ।

५ 'तत्रभवान्" इति प्र. पाठः । ६ "–विसर्गपतितः" इति च ।

७ "–कुशलाकुशलं फल–" इति च । भगवानपि भवान् देवदत्तादिवत् गुणमय्यां सृष्टौ समागतः परवशः सन् स्वकृतस्य कर्मणः फलं सुखं दुःखं चोपादत्ते किम्? रामकृष्णादिरूपेषु दुःखादिप्रदर्शनाच्छङ्कावकाशः

[1]अथ तत्र भगवान् किं देवदत्तवदित्याक्षेपः। [2]अचिन्त्यशक्तेरनन्तगुणस्य कुतः पारतन्त्र्यादिकमित्यभिप्रायः ॥ * ॥

नहि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरण[3]दुरवग्रहवादिनां विवादानवसरे[4] । उपरतसमस्तमायामये [5]केवलस्वात्ममायामन्तर्धाय को नु[6] दुर्घट इव भवति[7] ॥ ३५ ॥

स्वरूपद्वयाभावात् समविषममतीनां मतमनुसरसि यथा रज्जुखण्डः सर्पादिधियाम्[8] ॥ ३६ ॥

किमिति न प्रश्नः। किन्त्वाक्षेपः। नोपादत्त एवेति यावत्। स्वेच्छया शुभमेव फलमुपादत्त इत्यर्थः। आहोस्विदिति चाक्षेपगर्भ एव। अथ आत्मन्येव रममाणः उत्कृष्टानन्दरूपः सत्यज्ञानः समाधिमग्न इव तूष्णीमास्ते किम्? न तदपि। यतः सर्वदा सर्वकर्ता। अतस्तदुभयमपि भवति वयं न विदामो न जानीमः। यद्वा सर्वं कुर्वन्नपि असङ्गतया उदासीनवदास्त इति वयं न विदामः किम्? अयमप्याक्षेपः। विद्म एवेत्यर्थः।

१ वीरराघवोऽप्याह- "प्रश्नस्वरूपपरमपि वाक्यद्वयमाक्षेपगर्भम्" इति। "किन्त्विदं निर्णेतुं न शक्नुम इति बहिर्मुखानाक्षेप्तुं सोल्लुण्ठमाहुः" इति जीवगोस्वामी च।

२ वक्ष्यमाणवाक्योदितगुणगणैरेव तेषां निर्णयज्ञानमवगम्यत इत्याह—अचिन्त्यशक्तेः। अनवगाह्यमाहात्म्य इत्यस्यानुवादोऽयम्। अनन्तगुणस्येति चापरिगणितगुणगण इत्यस्य।

३ "–करणाश्रयदुरवग्रह–" इति प्र. पाठः।

४ ननु शुभफलं पिबन्नपि आत्मन्येव रमते, न कर्मभिर्बध्यत इति विरुद्धमेतत्। शुभं पिबन्नपि नाशुभं पिबतीति च विरुद्धम्। लोके स्याद् विरोधः। नहि भगवति विरोधः शङ्कनीयः। शुभं पिबति, न कर्मभिर्बध्यते, करोति न सज्जते- इत्याद्युभयमपि युज्यते भगवति। तत्र हेतूनाह—अपरिमितगुणगण इत्यादि। ननु किमचिन्त्यशक्त्याश्रयणेन। शुद्धरूपेण किमपि न करोति। शबलरूपेण सृष्ट्यादिकर्ता। जीवरूपेण कर्मभिर्बध्यत इति व्यवस्था किं न स्यात्? कुतर्कवादिनां भ्रान्तिविलसितमेवेदमित्याह—अर्वाचीनेत्यादि। एतादृशदुर्वादिनामगोचर एवायम्।

५ "केवल एवाऽत्म–" इति प्र. पाठः। "केवलं स्वात्म–" इति च क्वचित्।

६ "को न्वर्थो दुर्घट–" इति च।

७ ननु स्वतः पुष्करपलाशवन्निर्लिप्त उदासीन एव परमपुरुषः। प्रकृतिसम्बन्धादेव तस्य कर्तृत्वमित्यङ्गीक्रियताम्। किमचिन्त्यशक्त्या? नेत्याह— उपरतेत्यादि। केवलं स्वात्ममायां स्वरूपसामर्थ्यमन्तर्निधाय, आश्रित्येति यावत्, उपरतसमस्तप्राकृतस्वभावे भगवति स्वरूपसामर्थ्यशक्त्यैव न कोऽप्यर्थो दुर्घटः। तस्य स्वाभाविकी अघटितघटनाशक्तिः। अतः कर्तृत्वं च निजमेव, न प्रकृतिसम्बन्धात्।

८ ननु ब्रह्मणि तावद् द्वयी प्रतीतिः। जीवो ब्रह्मैव नापर इति केषाञ्चन। गुणगणार्णवं विलक्षणमित्यपरेषाम्।

स एव हि पुनः सर्ववस्तुषु[1] वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणभूतः सर्वप्रत्यगात्मत्वात् सर्वगुणाभासोपलक्षित एक एव पर्यवस्थितः[2] ॥

॥ ३७ ॥

उपरतसमस्तमायामये प्राकृतस्वभाववर्जिते । [3]केवलस्वात्ममायां निजसामर्थ्यम् । [4]स्वरूपद्वयाभावादित्यादि समाधानम्।

"स्वतन्त्रः परतन्त्रो वा ज्ञोऽज्ञो दुःखी सुखी नु किम् । इत्यादिसंशयः क्व स्याज्ज्ञानिनां पुरुषोत्तमे। तस्यानन्तगुणत्वाच्च पूर्णशक्तित्वतो हरेः । स्वातन्त्र्यादिकमेवास्य विदो जानन्ति निश्चयात् । घटकत्वाद् दुर्घटस्य दुर्ज्ञेयत्वाच्च सर्वशः । तच्छक्तेरविदो जीवं परतन्त्रं वदन्त्यमुम् । एवं दुर्घटया शक्त्या ज्ञाज्ञानां[5] परमेश्वरः । यथा रज्जुः सर्पधिया रज्जुबुद्ध्या च गम्यते[6] । तथा यथार्थबुद्ध्या च मिथ्या-

---

तेन रूपद्वयमवगम्यते मायोपहितं शुद्धं चेति। एवं मूलरूपं शुद्धं रामकृष्णादिकमवताररूपं दुःखबन्धादिदर्शनान्मायोपहितमिति स्फुटं प्रतीयते। अतो रूपद्वयाङ्गीकारेणैव विरुद्धधर्मयोरविरोध इति दुराग्रहिणं प्रति "दुरवग्रहवादिनां विवादानवसरे" इति सूत्रितमेव समाधानं मुखत आह—स्वरूपद्वयाभावात् । नहि शुद्धमशुद्धं चेति भगवतो रूपद्वयं सम्भवति । अवताराणामपि मूलरूपादनतिरेकात् । कथं तर्हि द्वयी प्रतीतिः? अवतारेषु च दुःखादिप्रतीतिः? भ्रान्तिरेवेत्याह—समविषममतीनाम् । मतमनुसरसि यथामतं प्रतीयसे। सुमतीनां स्वतन्त्रत्वेन पूर्णगुणत्वेन । विषममतीनां परतन्त्रत्वेन जीवत्वेन च। तद्यथा लोके रज्जौ सर्पधियां अयथार्थमतीनामिति यावत्। सर्पत्वेनैव रज्जुखण्डः प्रतीयते। यथार्थमतीनां तु रज्जुखण्डत्वेनैव । नैतावता रज्जुखण्डस्य स्वाभाविकं मायिकं चेति स्वरूपद्वयम्। विवादानवसरे कथं विवाद इत्यस्य चेदं समाधानम्— भ्रान्त्यैव विवाद इति।

१ "सर्ववस्तुनि" इति प्र॰ पाठः।

२ "पर्यवशेषितः" इति च। विषममतयो निरस्ताः। इदानीं सममतीनां प्रतीतं भगवद्रूपमुच्यते– स एव हि । सर्ववस्तुषु तत्तद्वस्त्वाकारेण स्वयमप्यन्तः स्थितः। तत्तद्वस्तुनाशेऽपि स्वयं वस्तुस्वरूपः नित्याप्रतिहतस्वरूपः। "वस्तु नित्याप्रतिहतं यतः" इति हि प्रथमस्कन्धतात्पर्ये। सर्वप्रत्यगात्मत्वात् सर्वान्तर्यामित्वात् सर्वैरपि गुणैरप्रधानैराभासैः प्रतिबिम्बभूतैश्च जीवैः स्वबिम्बतयोपलक्षितः । "आभास एव च" इति हि सूत्रम्। ज्ञानानन्दादिगुणमयेन प्रकाशेनोपलक्षितो वा । गुणानामिन्द्रियाणामवभासेनोपलक्षितो वा । हृषीकेश इति यावत्। सत्त्वादिगुणाभासेषु सर्वजीवेषु प्रेरकत्वेन वोपलक्षितः। एक एव सर्ववेदसमन्वयपर्यवसितः। परितो ज्ञानिभिरवगतश्च ।

३ "केवलं स्वात्ममायाम्" इति प्र. पाठः। "केवलस्वात्ममाया" इति क्वचित्।

४ अथ तत्र भगवानित्यादि दुर्घट इव भवतीत्यन्तं विमतानामाक्षेपः। स्वरूपद्वयाभावादित्यादि एक एव पर्यवसित इत्यन्तं स्वरीत्या समाधानम्।

५ "ज्ञोऽज्ञानाम्" इति प्र. पाठः प्रामादिकः। ज्ञाज्ञानां ज्ञानिनामज्ञानिनां च। समविषममतीनामित्यस्येदं व्याख्यानम् ।

६ "–बुद्ध्याऽवगम्यते" इति प्र. पाठः प्रामादिकः।

बुद्ध्या च गम्यते[1] । स्वेच्छयैव[2] महाविष्णुः फलदश्चानुसारतः" इति तन्त्रभागवते[3] ॥ * ॥

त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतयोऽभूवन् दिविजमनुजादयश्चापि[4] तेषामनुपक्रमसमयोऽयमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधं दण्डं दधर्थ[5] ॥ ३९ ॥

त्रिनयनो नृसिंहादिरूपी ।

"विष्णोर्नृसिंहनामानि[6] त्रिनेत्रोग्रादिकानि तु" इति शब्दनिर्णये । "विविधं[7]भावपात्रत्वात् सर्वे विष्णोर्विभूतयः" इति च ॥ * ॥

हंसाय [8]दभ्रनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय ।

---

१ अत्रापि "बुद्ध्याऽवगम्यते" इति प्र. पाठः प्रामादिकः ।

२ नन्वास्तां जडस्य रज्जुखण्डस्य कथा । सर्वेश्वरो भगवान् दुर्वादिनो यथार्थज्ञानदानेन किमिति नोद्दिधीर्षति? किमिति स्वयमवश इव तेषां मतमनुसरति? आह—स्वेच्छयैव । तत्तद्बुद्धिदानेन शुभाशुभफलदः । मूले चेदं सूचितम्—सकलजगत्कारणभूत इति । सकलजगतः सृष्ट्याद्यष्टकस्य कारणभूतः । ज्ञानमिवाज्ञानं मोक्ष इव बन्धस्तमो वा तस्मादेव भवति । अत्र शुकदेवोऽप्याह- "सर्वप्रेरकोऽपि तान् सन्मार्गे न नियोजयति, प्रत्युत तदनुरूपं तानधोगतौ पातयितुं तन्मतमनुसरसीत्याहुः" इत्यादि सिद्धान्तप्रदीपे । श्रुतिश्चात्र भवति- "यमेभ्यो लोकेभ्य उन्निनीषति तं साधु कर्म कारयति यमेभ्यो लोकेभ्योऽधो निनीषति तमसाधु कर्म कारयति" इत्यादिका ।

३ "इति च तन्त्रभागवते" इति क्वचित् ।

४ "विभूतयो दितिजदनुजादयश्चापि" इति प्र. पाठः ।

५ त्रिभुवनमेवाऽऽत्मभवनं यस्य । त्रिस्थानेषु श्वेतद्वीपादिषु स्वभवनं यस्येति वा । त्रिभुवनस्याऽऽत्माऽन्तर्यामी भवनमाश्रयश्च इत्यपि व्याचक्षते । त्रीनपि लोकान् नयति त्रिनयनः । नृसिंहावतारे सोमसूर्याग्निलोचनश्च । यद्यपि दिविजमनुजादयोऽपि तवैव विभूतयः सन्निधानस्थानानि अथापि दैत्यान् हन्तुमसामर्थ्यात् तेषामनुपक्रमसमयोऽयमिति मत्वा स्वयमेवावतीर्णस्तान् हन्तुमुपक्रमसे । कीदृशैरवतारैः । स्वात्ममायया स्वेच्छया गृहीतैः सुराद्यवतारैः । सुराकृतिरिति वामनः । नराकृती रामकृष्णादिः । मृगाकृतिर्वराहादिः । नरसिंहादिर्नरमृगमिश्रिताकृतिः । मत्स्यादिर्जलचराकृतिः ।

६ नृसिंहावतारसम्बन्धीनि नामानि ।

७ विविधं यथा भवति तथा विष्णोर्भावः सन्निधानम् । तत्पात्रत्वात् । "विविधाभावपात्रत्वात्" इति क्वचित् ।"विविधभावपात्रत्वात्" इति च ।

८ "दहनिलयाय" इति प्र. पाठः ।

सत्सङ्ग्रहाय भवपान्थनिजाश्रयाय[1] शश्वद् वरिष्ठगतये हरये नमस्ते ॥ ४४ ॥

"निरुपक्रमो हरिर्नित्यमप्रयत्नो ह्युपक्रमेत्" इति च ॥ * ॥

न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक् ।
तस्य तानिच्छतो यच्छे[2] यदि सोऽपि तथाविधः ॥ ४८ ॥
स्वयं निःश्रेयसं विद्वान् न वक्त्यज्ञाय कर्मभिः[3] ।
न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषग्[4] यथा ॥ ४९ ॥

यदि सोऽपि तथाविधः । अत्युत्तमो न भवति चेत् । युष्मत्कामो मत्प्रिय एव । अन्यथा न दद्यामिति भावः ।

"विष्णोः प्रियं कामयन्ति देवा नैवाप्रियं क्वचित् । यद्यप्रियं कामयन्ति न रातीशो हितो यतः[5]" इति तन्त्रभागवते ॥ * ॥

मघवन् यात भद्रं वो दध्यञ्चमृषिसम्मतम्[6] ।
विद्याव्रततपःसारं गात्रं याचत माचिरम् ॥ ५० ॥

"समर्था अपि याचन्ति[7] देवा मुन्यादिकान् क्वचित् । आज्ञयैव हरेस्तेषां यशोऽर्थमपि नान्यथा" इति च ॥ * ॥

इति षष्ठस्कन्धे नवमोऽध्यायः

---

१ "–निजाश्रमाप्तावन्ते परीष्टगतये" इति प्र. पाठः । शुद्धाय हृदयकुहरनिलयाय सर्वसाक्षिणे सदानन्दाय पावनकीर्तये नियतं जगदुपक्रमाय सज्जनान् स्वीयत्वेन सङ्गृह्णानाय, सद्भिर्वा सङ्गृहीताय संसारपथिकानां सहजाश्रयाय सदा सर्वेषां सर्वोत्कृष्टाश्रयाय आपत्परिहर्त्रे नम इति श्लोकार्थः ।

२ "यच्छेत्" इति प्र. पाठः ।

३ "कर्म हि" इति च ।

४ "–तो हि भिषक्तमः" इति प्र. पाठः । अयं श्लोकद्वयस्यार्थः—गुणेषु इन्द्रियार्थेष्वेव परमार्थदृष्टिः कृपणः आत्मनः श्रेयो न वेद । तस्य तादृशस्य श्रेयांसि हित्वा प्रेयांस्येवाभिलषतस्तानेव क्षुद्रान् कामान् प्रयच्छामि । यदि स मद्भक्तः सन्नपि तथाविधः क्षुद्रफलस्यैव योग्यः । यदि स उत्तमाधिकारी महाफलयोग्यः तर्हि महदेव फलं दद्यामित्याह—स्वयम् । स्वयं विद्वान् अज्ञाय कर्मभिर्निःश्रेयसं न वक्ति । निःश्रेयसेच्छया कर्म कुर्वाणायापि । किन्तु वस्तुतः निःश्रेयससाधनं ज्ञानमेवोपदिशति । तद्यथाऽपथ्यं वांछतोऽपि रोगिणो भिषगपथ्यं न ददाति । रोगिणः प्रीतिरप्रीतिर्वा न निर्णायिका । तथा भक्तस्यापि । भगवानेव हि जानाति भक्तस्य पथ्यम् । प्रकृते च त्वाष्ट्रवधो न केवलं भवतां प्रियः । किन्तु हित इति ममापि प्रियः । नो चेन्न दद्याम् ।

५ "हितो हि सः" इति प्र. पाठः ।

६ "–मृषिसत्तमम्" इति च । ऋषिसम्मतमृषीणां मध्ये बहुमतम् ।

७ "याचन्ते" इति प्र. पाठः ।

[दशमोऽध्यायः]

[1]नूनं स्वार्थपरो लोको न वेद परसङ्कटम् ।
यदि वेद न याचेत नेति नाऽह यदीश्वरः ॥ ६ ॥

"आज्ञयैव महाविष्णोः कार्यार्थमपि च क्वचित् । नीचानपि [2]तु याचन्ते स्वात्मतो[3] गुणवत्तराः । नीचवाक्यं वदेयुश्च सुरा नैतावता क्वचित् । तेजःक्षति[4]र्भवेदेषां जनकस्य यथाऽर्भके[5]" इति तन्त्रमालायाम् ॥ * ॥

इति षष्ठस्कन्धे दशमोऽध्यायः

[द्वादशोऽध्यायः]

पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेन्द्रियाशयाः ।
शक्नुवन्त्यस्य सर्गादौ न विना यदनुग्रहम्[6] ।
अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरम् ॥ ११ ॥

मन्यतेऽनीशमीश्वरम्—

"अनीशजीवरूपेण[7] परमात्मानमीश्वरम् । ये मन्यन्ते तान् समीक्ष्य स्नेहान्निरयभाग् भवेत्" इति च[8] । "हिरण्यगर्भः पुरुष आत्मा वायुरुदाहृतः । शेषो व्यक्तस्तथैवेन्द्र आशयः समुदाहृतः" इति च ॥ * ॥

---

१ "ननु स्वार्थ–" इति प्र. पाठः । याचको दातुः, दाता च याचकस्य सङ्कटं न वेद । याचको यदि वेद न याचेत । दातुमीश्वरो दाता यदि वेद नेति नाऽह न ब्रूयात् ।

२ "–नपि च याचन्ते" इति प्र. पाठः ।

३ "स्वात्मनो–" इति प्र. पाठः । "स्वात्मना" इति क्वचित् ।

४ "तेजःक्षिति–" इति प्र. पाठः प्रामादिकः ।

५ "यथाऽर्भकात्" इति प्र. पाठः । अर्भके विषये ।

६ "यदनुग्रहात्" इति प्र. पाठः । प्रकृतिः श्रीतत्वम्, पुरुषो महत्तत्वमानी चतुर्मुखः, आत्मा मुख्यप्राणः, व्यक्ततत्वं शेषः, भूतमानिनः, इन्द्रियमानिनः, आशयोऽन्तःकरणमानी इन्द्रश्च यदनुग्रहं विना न सृष्टिक्षमास्तमेवङ्गुणं परमात्मानं सर्वेश्वरमपि अनीशजीवरूपमविद्वान् मन्यते । अनीशमात्मानं जीवात्मानं मन्यत इति वा ।

७ "अनीशं जीवरूपेण" इति प्र. पाठः ।

८ अत्र क्वचित् "इति च" इति न पठ्यते ।

वज्रस्तु तत्कन्धरमाशुवेगः कृन्तन् समन्तात् परिवर्तमानः ।
न्यपातयत् तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये[1] ॥ ३२ ॥

"[2]सन्धितः समयेनेन्द्रो वृत्रेणाथो करग्रहः। समुद्रतीरे विचरन् फेनेन वधमस्य तु। नर्मणा जहि फेनेति[3] वाचयित्वा[4] सुरेश्वरः। पादस्पर्शविवादं[5] च कृत्वा युद्धाय दंसितः[6] । फेने वज्रं समावेश्य विष्णुयुक्तं व्यसर्जयत् । अपानुदच्छिरस्तस्य ध्यायतो वत्सरेण सः" इत्याग्नेये ॥ * ॥

इति षष्ठस्कन्धे द्वादशोऽध्यायः

[त्रयोदशोऽध्यायः]

एवं सञ्चोदितो विप्रैर्मरुत्वान् न्यहनद्[7] रिपुम् ।
ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥ १० ॥

---

१ शत्रून् वर्जयति नाशयतीति वज्रनामा वज्रायुधगतो भगवान् तत्कन्धरां कृन्तन् न्यपातयत् । भगवत्पर्यन्तत्वज्ञापनायैव वज्र इति पुंल्लिङ्गप्रयोगः। अत एव भाष्योदाहृतप्रमाणे "विष्णुयुक्तं व्यसर्जयत्" इत्युक्तम् । भागवतेऽपि पूर्वमेवेदमुक्तम्—"नन्वेष वज्रस्तव शक्र तेजसा हरेर्दधीचस्तपसा च तेजितः"(११-२०) इति । "वर्जनाद् वज्र उच्यते" इति च भाष्ये । कदा ? वार्त्रहत्ये । वृत्रहत्यानिमित्ते सम्प्रहारे सम्प्रवृत्ते। कियन्तं कालम् ? सूर्यादिज्योतिषां दक्षिणोत्तरायणे यो यावानहर्गणः षष्ठ्युत्तरशतत्रयमितः तावदहर्गणेन । वर्षपर्यन्तं प्रवृत्ते युद्धे इति यावत् ।

२ मूलेऽस्पष्टं कथांशं स्पष्टयन् समग्रमध्यायार्थं सङ्गृह्णाति—सन्धितः। समयेन स्नेहशपथपूर्वकं वृत्रेणेन्द्रः सन्धितः कृतसन्धान आसीत्। एतेनाऽदौ युद्धं ततः पुनः सन्धानं पुनर्द्वितीये युद्धे वृत्रहननमिति विशेषः सूचितः। स्नेहदाढर्यमाह—करग्रहः। करेण करं गृहीत्वा सन्धितः। ततः समुद्रतीरे फेनेन वृत्रस्य वधं विचरन् चिकीर्षन् इन्द्रः, हे फेन, नर्मणा शत्रुं जहि इति फेनगं भगवन्तं वाचयित्वा प्रार्थ्य फेने विष्णुयुक्तं वज्रं समावेश्य व्यसर्जयत्। एतेन फेनेन वृत्रवध इति ग्रन्थान्तरोक्तिविरोधः परिहृतः। ननु कृतस्नेहेन कथं युद्धम्? आह—पादस्पर्शविवादम्। पदा वृत्रं स्पृष्ट्वा तेन विवादं जनयित्वा युद्धाय सन्नद्धः। विष्णुं ध्यायतो वृत्रस्य शिरोऽपानुदत्। एतेनैतदध्यायादौ वृत्रेण कृता विष्णुस्तुतिर्गदिताभिप्राया। आदौ युद्धं, ततः सन्धानम्, ततः कदाचित् समुद्रतीरेऽतिसन्धानं युद्धं वधश्चेति एतावानितिहासः वत्सरेण संवृत्तः। एतेन "तावदहर्गणेन" इति मूलं व्याख्यातम्। कन्धरां प्रविष्टस्य वज्रस्य तन्निकृन्तनाय वर्षपरिमितः काल आसीदिति यथाप्रतीतं किं न स्यात्? न स्यात्। आशुवेग इति विशेषणात् ।

३ "फेनेन" इति प्र. पाठः। तत्पक्षे मां फेनेन जहीति वृत्रवचनम् । "फेनेनेति" इति च क्वचित् ।

४ "याचयित्वा" इति क्वचित् ।

५ "-विवादं तु" इति क्वचित् ।

६ "दंशितः" इति प्र. पाठः ।

७ "-त्वानहनद्-" इति प्र. पाठः ।

"प्रारब्धकर्मणैवैषां कृतदुःखस्य सूचकम् । [1]तदानीन्तनकर्म स्याद् व्रणहेतुर्यथा रणः। देवादीनां स्थितप्रज्ञभावान्नैवान्यथा भवेत् । प्रारब्धमपि तु क्वापि किञ्चिद् विघटितं भवेत्" इति च ॥ * ॥

इति षष्ठस्कन्धे त्रयोदशोऽध्यायः

[चतुर्दशोऽध्यायः]

अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे ।
[2]परे तु जीवत्यपरस्य या मृतिर्विपर्ययश्चेत् त्वमपि ध्रुवं परः[3] ॥ ५४ ॥

नहि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदाऽऽत्मकर्मभिः ।
यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि[4] ॥ ५५ ॥

त्वं तात नार्हसि स[5] मां कृपणामनाथां
त्यक्तुं विचक्ष्व पितरं तव शोकतप्तम् ।
अञ्जस्तरेम भवताऽप्रजदुस्तरं यद्
ध्वान्तं न याह्यकरुणेन यमेन दूरम्[6] ॥ ६६ ॥

---

१ "इदानीन्तन-" इति प्र. पाठः । २ "परेऽनुजीवत्य-" इति प्र. पाठः ।

३ "त्वमसि ध्रुवः परः" इति प्र. पाठः । "त्वमसि ध्रुवं परः" इति पाठान्तरम् । आत्मसृष्टेरप्रतिरूपमननुगुणं चेष्टसे अतस्त्वं बालिश एवेति पुत्रशोकार्दिता राज्ञी विधातारं निन्दति । किमप्रतिरूपम्? आह–परे तु । परे वृद्धे जीवति अपरस्य बालस्य मृतिरित्येतत् । पूर्वजातस्य पूर्वमृतिः पाश्चात्यस्य पश्चादिति हि सृष्ट्यनुगुणः क्रमः । यदि संहारे सृष्टिक्रमाद् विपर्ययो विपरीतक्रम एव चेदसि तर्हि अपि त्वं ध्रुवं परः? अपिः संशये । अक्रमस्य तव श्रैष्ठ्यमेव सन्देहपदमित्यर्थः ।

४ जन्मनीव मृतौ क्रमो नास्ति चेत्, अस्तु तर्हि स्वस्वकर्मानुसारेण पूर्वं जातस्यापि पश्चान्मृतिः, पाश्चात्यस्यापि बालस्य पूर्वं मृतिः । किन्तु सृष्टिवृद्ध्यर्थं स्वयमेव यस्त्वया कृतः स्नेहपाशः ममायं पुत्र इत्यादिरूपः तमिमं विवृश्चसि स्नेहपात्रस्य पुत्रादेरपहारेण भग्नविषयं करोषि । तदेतत् तव बालिश्यमेव ।

५ "नार्हसि च माम्" इति प्र. पाठः।

६ विधातारं विगर्ह्येदानीं मृतं प्रत्याह–त्वं तात । त्वां विनाऽनाथां त्यक्तुं नार्हसि । पितरं च चित्रकेतुं शोकतप्तं किं न पश्यसि? अपुत्राणां दुस्तरं यद् ध्वान्तं दुःखं नरकं वा तद् भवता तरेम । तेनाकरुणेन यमेन नीतोऽपि तेन सह न याहि मां विहाय दूरम् ।

उत्तिष्ठ तात त इमे शिशवो वयस्या-
स्त्वामाह्वयन्ति नृपनन्दन संविहर्तुम् ।
सुप्तश्चिरं ह्यशनया च भवान् परीतो
भुङ्क्ष्व स्तनं पिब शुचो हर नः स्वकानाम्[१] ॥ ५७ ॥

नाहं तनूज ददृशे हतमङ्गला ते
मुग्धस्मितं मुदितवीक्षणमाननाब्जम् ।
किं वा गतोऽस्यपुनरन्वयमन्यलोकं
नीतोऽघृणेन न शृणोमि कळा गिरस्ते[२] ॥ ५८ ॥

"[३]सन्तापक्रोधरागादिष्वनर्थं ज्ञवचः[४] क्वचित्" इति शब्दनिर्णये ॥ * ॥

इति षष्ठस्कन्धे चतुर्दशोऽध्यायः

[पञ्चदशोऽध्यायः]

[५]चरन्ति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः ।
मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिङ्गिनः ॥ १५ ॥

कुमारो नारद ऋभुरङ्गिरा देवलोऽसितः ।
अपान्तरतमो व्यासो मार्कण्डेयोऽथ गौतमः ॥ १६ ॥

---

१ अशनया अशनेच्छया भवान् परीतः । अतो भुंक्ष्व, पिब च स्तनम् । तेन नः शुचः शोकानपहर ।

२ "कला गिरस्ते" इति प्र. पाठः । मुग्धस्मितमाननाब्जं न पश्यामि । मधुरा गिरश्च न शृणोमि । किन्तर्हि सत्यमेवाशक्यपुनरागमनं लोकान्तरमेव गतोऽसि निर्घृणेन यमेन नीतः सन्?

३ नन्वभिज्ञा राजपत्नी कृतद्युतिरज्ञेव किमिति ब्रह्मणो बालिश्यं मृतेन सह सम्भाषणमित्याद्यनर्थकं वचो व्याजहार? नात्रोक्तार्थे तात्पर्यम् । दुःखक्रोधाद्यतिरेकादनर्थकमप्येवं व्याहरन्तीति लोकेऽपि दृष्टमित्याह—सन्तापेत्यादि । प्र. पाठे तु "नवकोट्यस्तु देवानामृषयः शतकोटयः । नारायणायनाः सर्वे ये केचित् तत्परायणा इति च । नारायणायना देवा ऋष्याद्यास्तत्परायणाः। ब्रह्माद्याः केचनैव स्युः सिद्धो योग्यं सुखं लभन्निति च तन्त्रभागवते" इत्यन्तं पठित्वा ततः परं "सन्ताप–" इत्यादि शब्दनिर्णयवाक्यं पठ्यते ।

४ "–ष्वनर्थकवचः" इति प्र. पाठः । ज्ञस्य जानतोऽपि वचः । "–ष्वनर्थंज्ञवचः" इति क्वचित् ।

५ प्र. पाठे इतः पूर्वं श्लोकचतुष्टयं न पठ्यत इति अयं श्लोक एकादशः । एवमुत्तरत्रापि श्लोकसंख्या ।

53

वसिष्ठो भगवान् रामः कपिलो बादरायणिः ।
दुर्वासा याज्ञवल्क्यश्च [1]जातुकर्ण्यस्तथाऽऽरुणिः ॥ १७ ॥

रोमशश्च्यवनो दत्त आसुरिः सपतञ्जलिः ।
ऋषिर्वेदशिरा बोध्यो[2] मुनिः पञ्चशिखस्तथा[3] ॥ १८ ॥

हिरण्यनाभः कौसल्यः श्रुतदेव ऋतध्वजः ।
एतेऽपरे च सिद्धेशाश्चरन्ति ज्ञानहेतवः ॥ १९ ॥

"[4]नारायणायना देवा ऋष्याद्यास्तत्परायणाः[5] । ब्रह्माद्याः केचनैव स्युः सिद्धो योग्यसुखं[6] लभन्" इति तन्त्रभागवते[7] । "नवकोट्यस्तु देवानामृषयः शतकोटयः ।

---

१ "जातूकर्ण्य–" इति प्र· पाठः ।

२ "बौध्यो-" इति पाठः स्यादिति भाति । "कपिबोधादाङ्गिरसे" इति पाणिनिस्मरणाद् बौध्य आङ्गिरसः । वीरराघवोऽप्येवं पठति ।

३ "पञ्चशिरास्तथा" इति प्र. पाठः । यद्यप्यत्रार्वाचीना अप्यृषयः पठ्यन्ते । तथाऽपि प्रतिकल्पं तेषां जननाद्युज्यते नामग्रहणमिति भाति ।

४ अत्र पठिता ऋषयः सर्वेऽपि समानं भगवत्प्रियाः सिद्धेशा इति च प्रतीयते । अतस्तत्र व्यवस्थामाह—नारायणायना देवा इन्द्राद्याः । ऋष्याद्याश्च नारदादयो नारायणायना एव । नारायणायना इत्यनेन भगवत्प्रिया इति व्याख्यातम् । नारायणः अयनः येषाम्, नारायणस्यायनाश्च । उक्तं हि–"अयनशब्दस्त्रिलिङ्गो ज्ञायते" इति । एवं भगवान् प्रियः येषाम्, भगवतः प्रियाश्च । "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" इति स्मरणात् । ब्रह्मवाय्वाद्याः केचनैव तत्परायणाः; भगवत्परमप्रिया इति यावत् । सिद्धेशा इति मूलपदं व्याचष्टे–सिद्धो योग्यसुखं लभन् । मुक्त इत्यर्थः । तेन सिद्धेशा इति मुक्ताधिपतयः । अयमर्थः—मूले तावदृषिगणनावसरे भगवदवतारभूता व्यासपरशुरामादयश्च परिगणिताः । मुख्यतस्तदपेक्षयेदं विशेषणं प्रवृत्तं सिद्धेशा इति । तदन्ये तु नारायणायना इति व्यवस्था । भगवत्पक्षे तु भगवत्प्रिया इति भगवन्तः प्रियाश्चेति व्याख्येयम् । एवमितरेऽप्यृषयो निश्चितमुक्तित्वादुपचारतः सिद्धेशा इत्युच्यन्ते । एतेनैव प्रमाणवाक्येन सिंहावलोकनन्यायेन पूर्वाध्यायगतः "मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने"(१४-५) इति श्लोको व्याख्यातः । एतदेवोत्तरप्रमाणवाक्येन स्फुटीक्रियते । देवानां नवकोटिषु ऋषीणां शतकोटिष्वपि नारायणपरायणः सुदुर्लभः । यतस्ते नारायणायना एव । नारायणपरायणस्तु ब्रह्मा मुख्यतः । भारत्याद्यास्तदनन्तरमिति । उक्तं चैतद् विजयध्वजीये—"नारायणायना देवा इत्यादिवाक्यं 'मुक्तानामपि सिद्धानां नारायणपरायणः' इत्यत्र च प्रमाणार्थमस्मिन्नध्याय उदाहृतम्" इति । अत एवार्वाचीना मूलपाठानभिज्ञा व्याख्यातार इदं तात्पर्यवाक्यं पूर्वाध्याय एव पठन्तीति ।

५ "ऋष्याद्यास्ते परायणाः" इति क्वचित् ।

६ "योग्यं सुखम्" इति क्वचित् । "योग्यफलम्" इति च ।

७ "तन्त्रसारे" इति क्वचित् ।

नारायणायनाः सर्वे ये[1] केचित् तत्परायणाः" इति च[2] ॥ * ॥

अधुना पुत्रिणां तापो भवतैवानुभूयते ।
एवं दारा गृहा रायो विविधैश्वर्यसम्पदः ॥ २५ ॥

दृश्यमाना विनाऽर्थेन न दृश्यन्ते मनोभवाः ।
[3]कर्माभिध्यायतो नाना कर्माणि मनसाऽभवन्[4] ॥ २८ ॥

"मनसो द्वेषरागाभ्यां पुण्यपापसमुद्भवः । पुत्रादि पुण्यपापाभ्यां तस्मात् सर्वं मनोभवम्" इति नारदीये ॥ * ॥

अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः ।
देहिनो विविधक्लेशसन्तापकृदुदाहृतः[5] ॥ २९ ॥

"द्रव्यात्मकः स्थूलदेहः क्रिया कर्मेन्द्रियाणि च । ज्ञानेन्द्रियाणि च मनो ज्ञानात्मकमुदाहृतम्" इति ब्रह्मवैवर्ते । "कार्यकारणयोरेकशब्दव्यवहृतिर्भवेत्" इति शब्दनिर्णये ॥ * ॥

तस्मात् स्वच्छेन[6] मनसा विमृश्य गतिमात्मनः ।
द्वैते ध्रुवार्थविस्रम्भं[7] त्यजोपशममाविश ॥ ३० ॥

---

१ ये तत्परायणास्ते केचिदेव ब्रह्माद्याः । अत्र "एकेचित् तत्परायणाः" इति पाठः सम्भाव्यते । एकेचित् अल्पा एवेत्यर्थः ।

२ इति च भागवततन्त्रे । क्वचित् चकारो न पठ्यते । ३ "कर्मभिर्ध्यायतो–" इति प्र. पाठः ।

४ "मनसोऽभवन्" इति च । अर्थेन विना क्वचिद् दृश्यमानाः । अर्थे सति क्वचिन्न दृश्यन्ते । यदा दर्शनमनपेक्षितं तदा दृश्यन्ते, यदाऽभिलषितं तदा न दृश्यन्त इत्यर्थः । यद्वा परमपुरुषार्थेन विना क्षुद्रप्रयोजनाय दृश्यमानाः कालान्तरे पुनर्न दृश्यन्ते क्षणिकत्वात् । अतस्तदिदं सर्वं केवलं मानसी सृष्टिः । कथं बाह्यार्थस्य स्वप्नवन्मनोभवत्वम्? परम्परयेत्याह—कर्मेति । मनसा शुभमशुभं वा कर्मैव निरन्तरमभिध्यायतः पुरुषस्य मनो रागद्वेषकलुषं भवति । रागद्वेषाभ्यां च नानाविधानि शुभाशुभानि कर्माणि भवन्ति । तन्मूले च पुण्यपापे । ततश्च दारापत्यवित्तादिसंसारः । एवं दारा गृहा रायो विविधैश्वर्यसम्पदश्चान्ततो मनसैवाभवन्निति मनोभवा इत्युच्यन्ते । स्मर्यते च—"मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इति ।

५ पञ्चभूतज्ञानेन्द्रियकर्मेन्द्रियात्मकोऽयं देहः, देहिनः देहे स्थितस्य देहाद् भिन्नस्य, अथापि देहिनः देहाभिमानमूढस्याभिमानादेव विविधक्लेशसन्तापकृत् । ६ "स्वस्थेन" इति प्र. पाठः ।

७ "–विश्रम्भम्" इति च । निर्मलेन मनसा अद्वितीयस्य परमात्मनो गतिं स्वरूपं विमृश्य द्वैते सद्वितीये द्वितीयेनोपहते पुत्रकळत्रदेहगेहादिसंसृतिद्वन्द्वे ध्रुवार्थोऽयमिति विश्वासं त्यज । भगवत्येव निष्ठामाविश ।

"[1]अनन्यापेक्षतस्त्वेको हरिरन्यद् द्वयं स्मृतम् । अन्यापेक्षत्वतस्तेन प्राप्तत्वाद् द्वैत-मुच्यते" इति च ॥ * ॥

[2]यत्पादमूलमुपसृत्य नरेन्द्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य ।
सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं नचिरादुपैति[3] ॥ ३६ ॥

"रुद्राद्याः शेषदेहस्थं विष्णुं सङ्कर्षणाभिधम् । शेषान्तर्यामिणं ज्ञात्वा स्वपदं प्रापुर-ञ्जसा" इति तन्त्रभागवते । "द्वैतेन बन्धसन्त्यागाद् द्वैतत्यागी भवत्युत[4]" इति शब्दनिर्णये ।

[5]देहाद्यहम्ममाभिमानो भ्रमः ।

"तेषान्तेषां पदान्येव वैष्णवानि पदानि तु । तेषां महित्वं च [6]तथा हरेस्तद् वशगं यतः[7] । अतुल्यानधिकं चैव तस्यतस्यैव मुक्तिगम् । स्वस्यैव पूर्वमाहात्म्य-मपेक्ष्य न हरेः क्वचित् । माहात्म्यमन्यप्राप्यं स्यान्न ते विष्णविति[8] श्रुतेः" इति तन्त्रभागवते । "ब्रह्मेशानादिभिर्देवैर्यत् प्राप्तुं नैव शक्यते । तद् यत्स्वभावः कैवल्यं स भवान् केवलो हरे[9]" इति च स्कान्दे[10] ।

---

१ "अनन्यापेक्षत इति भावप्रधानो निर्देशः । अनन्यापेक्षत्वतः स्वतन्त्रत्वादित्यर्थः । हरेरन्यत् द्वयमित्युच्यते । ईश्वराद्दृष्टाद्यन्यापेक्षत्वात् । अस्वातन्त्र्यादित्येतत् । तथा द्वयेन, अयमपि भावप्रधानः, द्वयत्वेन अन्यापेक्षत्वेन इतं प्राप्तम्, उपेतमिति यावत्, द्वयेतम् । द्वयेतमेव द्वैतमित्युच्यते निरुक्तिकुशलैः ।

२ प्राचीनपाठे "तस्मात् स्वच्छेन–" इत्यतः परं श्लोकचतुष्टयमधिकं पठ्यते । प्र. पाठे तु "यत्पाद–" इत्या-द्यष्टाविंशं पद्यम् ।

३ यस्य "सप्तरात्राद् द्रष्टा सङ्कर्षणं प्रभुम्" इति पूर्वश्लोकप्रकृतस्य शेषान्तर्यामिणः सङ्कर्षणाभिधस्य हरेः पाद-मूलमुपसृत्य, अत एव अहम्ममेति भ्रमविषयं द्वितयं द्वितीयं हरेरन्यत् संसृतिचक्रं विसृज्य, तदीयं तत्तद्योग्यम्, तदीयं विष्णवधीनं च महित्वमापुः । कीदृशम्? अतुलानधिकम् । संसारदशायां स्वैरनुभूतं महित्वं यस्य तुल्यमधिकं वा न भवति । यद्यप्यतुलम्, अथापि न विष्णुमहिमतुल्यम्; यद्यप्यनधिकम् , अथापि न विष्णुमहिमाधिकमिति चार्थः । एवं भवानप्यचिरात् सङ्कर्षणमुपैष्यति ।

४ द्वैतेन परतन्त्रेण देहादिना योऽभिमानबन्धस्तत्त्यागो द्वैतत्याग इत्यर्थः । नतु भेदबुद्धित्यागः ।

५ "देहाद्येऽहम्ममा–" इति प्र. पाठः । "देहादावहम्ममा–" इति क्वचित् ।

६ "तदा" इति क्वचित् ।

७ तेषां महित्वं च तथा हरेरेव महित्वम् । यतस्तन्महित्वं हरेर्वशगम् ।

८ "विष्णाविति" इति प्र. पाठः प्रामादिकः । "न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप" इति हि श्रुतिः ।

९ "केवलो हरिः" इति प्र. पाठः ।

१० "इति स्कान्दे" इति च पाठः ।

तत्प्रसादादेव लभ्यत्वात्[1] तदीयमपि तेनातुल्यमनधिकं[2] चान्यमाहात्म्यम् ॥ *

इति षष्ठस्कन्धे पञ्चदशोऽध्यायः

[षोडशोऽध्यायः]

कस्मिन् जन्मन्यमी ब्रह्मन्[3] पितरो मातरोऽभवन् ।
कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु ॥ ४ ॥

नित्यस्यार्थस्य सम्बन्धो ह्यनित्यो दृश्यते नृषु ।
यावद् यस्य हि सम्बन्धो ममत्वं तावदेव हि ॥ ७ ॥

एष नित्योऽव्ययः सूक्ष्म एकः[4] सर्वाश्रयः स्वदृक् ।
आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः[5] ॥ ९ ॥

एष नित्योऽव्ययः—

"अनित्यसम्बन्धयुताः पित्राद्या नित्ययुग्घरिः" इति च ।

आत्मानं चावताररूपेण सृजते ॥ * ॥

---

१ "तत्प्रसादलभ्यत्वात्" इति प्र. पाठः । २ "तेनातुलमनधिकम्" इति च ।

३ "–न्यमी मह्यं पितरो–" इति प्र. पाठः । कस्मिन्कस्मिन् जन्मन्यमी मे पितरो मातरोऽभवन् । केवलमस्मिन्नेव जन्मनि । न पूर्वमभवन्; नापि भविष्यति भविष्यन्ति ।

४ "एष सर्वाश्रयः" इति प्र. पाठः ।

५ "सृजति प्रभुः" इति च । "सृजते परः" इति च पाठान्तरम् । एवं जीवेन जीवस्य पितृत्वादिरूपः सम्बन्धोऽनित्यः । न सर्वदा; न सर्वेषाम् । एष भगवानेव नित्यः पिता माता वा । सर्वेषां सर्वदा बन्धुः । यस्य सम्बन्धः कदाऽपि न व्ययते । अथापि न ज्ञायते स्थूलदृशां सूक्ष्मत्वात् । अत एवैको मुख्यो बन्धुः, एक एव च सर्वेषां बन्धुः । जीवास्तु केचन केषाञ्चन । एक एव च सर्वप्रकारेण बन्धुः । उक्तं हि—"त्वमेव माता च पिता त्वमेव" इत्यादि । अतः स एक एव सर्वाश्रयः प्रभुः । आत्माधीनाया मायायाः प्रकृतेर्गुणैः, आत्ममायया स्वेच्छया त्रिगुणैश्चेति वा । विश्वं सृजते । सृष्टविश्वनियमनाद्यर्थं आत्मानं च सृजते । स्वयमपि बहुधाऽवतरति । "तदात्मानं स्वयमकुरुत", "तत् सृष्ट्वा तदेवानुप्राविशत्" इत्यादिश्रवणात् ।

नाऽदत्त आत्मा हि गुणं न दोषं न क्रियाफलम् ।
उदासीन इवाऽऽसीनः[1] परावरदृगीश्वरः ॥ ११ ॥

"भोक्ता [2]स गुणभोक्तृत्वान्न भोक्ता तदवृद्धितः । अचिन्त्यशक्तितस्तच्च युज्यते परमेशितुः" इति च ॥ * ॥

वचस्युपरते प्राप्यो[3] य एको मनसा सह ।
अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः ॥ २१ ॥

बाह्यमनस्युपरते चिन्मात्रमनसा सह प्राप्यः[4] ॥ * ॥

यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते ।
[5]मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः[6] ॥ २२ ॥

मृन्मयेष्विव मृज्जातिः—

"पृथिवी पर्वताश्चैव मृन्मयाः समुदीरिताः । तेषु मृज्जातयः सर्वे जायन्ते स्थावरादयः" इति च ॥ * ॥

---

१ "उदासीनवदासीनः" इति प्र· पाठः । परमात्मा कर्मफलं नाऽदत्ते । नहि फलोद्देशवती भगवतः क्रिया भवति । "न प्रयोजनवत्त्वात्" इत्युक्तं हि । दोषं च सर्वात्मना नाऽदत्ते । गुणमाददानोऽपि तन्निमित्तवृद्ध्यभावान्नाऽदत्त इव । अत एव "ऋतं पिबन्तौ" इति चोच्यते । "अनश्नन्नन्यो अभिचाकशीति" इति चोच्यते । सर्वं कुर्वन्नपि न क्वापि सज्जत इति उदासीन इव । परावरं कार्यकारणरूपं विश्वं पश्यतीति परावरदृक् । सर्वतः परं स्वरूपमवरं रमाब्रह्मादिकं च पश्यतीति वा ।

२ "सद्गुण–" इति प्र. पाठः ।

३ "–रतेऽप्राप्य य एको–" इति प्र. पाठः । बाह्यमनसा सह वागादिसर्वेन्द्रियेषूपरतेषु स्वरूपभूतमनसा सह, तत्सहकारेणेति यावत्, यः प्राप्यः । "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति वदन्ती श्रुतिः "मनसैवेदमाप्तव्यम्" इत्येव ह्याह । "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इति च । स्वरूपभूतैरिन्द्रियैर्मनसा च सह ध्यानयोगे स्थितमिति हि तदर्थः । अनामरूपः । "कर्मनिर्मितनामरूपरहितः" इति वीरराघवः । "प्राकृते नामरूपे न विद्येते यस्य सः" इति शुकदेवः । सदसत्परः क्षराक्षरविलक्षणः । अत्र केचित् "मनस्युपरते प्राप्यो य एको मनसा सह" इति पूर्वार्धं पठन्ति । सोऽपि भाष्यच्छायानुसारी पाठः सम्भाव्यते ।

४ "प्राप्तः" इति क्वचित् । ५ "मृण्मयेष्विव" इति प्र. पाठः ।

६ यस्मिन्निदं विश्वं तिष्ठति । यस्मिन्नेव चाप्येति । यतश्चेदं जायते । तद्यथा मृन्मयेषु भूभूधरादिषु मृज्जातिः मृदा जातो वृक्षादिस्तिष्ठत्यप्येति, तेभ्यश्च जायते ।

ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः ।
जगाम देवदेवस्य शेषस्य चरणान्तिकम्[1] ॥ २९ ॥

"[2]अन्यान्तर्यामिणं विष्णुमुपास्यान्यसमीपगः । भवेद् योग्यतया तस्य पदं वा प्राप्नुयान्नरः" इति नारदीये ॥ * ॥

तद्दर्शनध्वस्तसमस्तकिल्बिषः [3]स्वस्थामलान्तःकरणोऽभ्ययान्मुहुः[4] ।
प्रवृद्धभक्त्या प्रणयाश्रुलोचनः प्रहृष्टरोमा तमनादिपूरुषम्[5] ॥ ३१ ॥

[6]अनेन प्रकारेण मुहुस्तत्सकाशमभ्ययात् ।

"शेषान्तर्यामिणं विष्णुं चित्रकेतुरुपास्य तु । शेषाविष्टहरेश्चापि वरान् प्राप्याऽप तद्गतिम्[7]" इति तन्त्रमालायाम् ॥ * ॥

अहं वै सर्वभूतानि भूतात्मा भूतभावनः ।
शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू[8] ॥ ५१ ॥

---

१ कतिपयैर्दिनैः विद्यासमेधितमनसा यथेष्टगती राजा चित्रकेतुः शेषान्तर्यामिणं सङ्कर्षणमुपास्य शेषस्यान्तिकं जगाम ।

२ यदन्तर्यामितया विष्णुरुपास्यते उपासकस्तत्समीपं प्राप्नोति । योग्यश्चेत् तत्पदं वा प्राप्नोति । यथा शेषान्तर्यामिणं विष्णुमुपास्य चित्रकेतुः शेषसमीपमाप । रुद्रस्तु तथोपास्य शेषपदवीमेवाऽप ।

३ "स्वच्छामला–" इति प्र. पाठः । ४ "–करणोऽभ्ययान्मुनिः" इति च ।

५ "–रोमाऽनमदादिपूरुषम्" इति च । शेषलोकगमनेन ध्वस्तकिल्बिषो विमलान्तःकरणः नारदोक्तेन प्रकारेण तमुपास्य मुहुः पुनः अनादिपुरुषस्य हरेरेव सकाशमभ्ययात् ।

६ यथोपास्य शेषलोकं प्राप्तस्तेनैव प्रकारेण । ध्वस्तकिल्बिषत्वादिप्रकारेणेति । यथा शेषलोक आसीदनेनैव प्रकारेण, अमुक्त एव सन्नित्यर्थः, नारायणसकाशमभ्ययात् ।

७ "सद्गतिम्" इति प्र. पाठः प्रामादिकः । तद्गतिं हरिलोकमाप ।

८ अहं सर्वभूतानीत्युच्ये । किं भूतैरभेदात् ? नेत्याह—भूतात्मा । सर्वभूतान्तरात्मत्वात् । "एष त आत्माऽन्तर्याम्यमृतः" इति श्रुतेः । "शास्त्रदृष्ट्या तूपदेशः" इति च सूत्रम् । भूतानि भावयत्युत्पादयतीति सर्वकारणत्वाच्च सर्वमित्युच्ये । भूतं जडवर्गं भावं चेतनवर्गं च नयतीति वा । उक्तं हि— "भूतभावोद्भवकरः" इति । शब्दब्रह्म वेदराशिः । भगवद्गुणान् विस्तारयतीति साऽपि तनुः । भगवत्प्रतीकत्वाच्च मन्त्रराशिस्तत्तनुः । उभे अपि तनू शाश्वती शाश्वत्यौ । "यावद् ब्रह्म विष्ठितं तावती वाक्" इति हि श्रुतिः ।

"हरिस्तु सर्वभूतानि तदन्तर्याम्यपेक्षया[1]। तिङ्पदानि तु[2] सर्वाणि सुप्पदानि तथैव च। तस्मिन्नेव प्रवर्तन्ते मुख्यवृत्त्या विशेषतः" इति च ॥ * ॥

लोके विततमात्मानं लोकं चाऽऽत्मनि सन्ततम्।
उभयं च मया व्याप्तं मयि चैवोभय कृतम्[3] ॥ ५२ ॥

लोकं चाऽऽत्मनि सन्ततं वासनारूपेण ॥ * ॥

एवं जागरणादीनि जीवस्थानानि चाऽऽत्मनः।
मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत्[4] ॥ ५४ ॥

मायामात्राणि[5] प्रकृतिनिर्मितानि ॥ * ॥

उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः।
अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत् परम्[6] ॥ ५६ ॥

प्रतिबोधेऽन्वेति स्वयमपि प्रतिबुद्धः। सुप्तावस्वपन् व्यतिरिच्येत ॥ * ॥

---

१ तदन्तर्याम्यपेक्षया सर्वभूतान्तर्यामित्वापेक्षया।

२ "तिङ्पदान्यपि" इति प्र. पाठः। सर्वाण्यपि पदानि तस्मिन्नेव मुख्यतः प्रवर्तन्त इत्यत एव च शब्दब्रह्म हरेस्तनुरित्युच्यते।

३ आत्मानं जीवं लोके जडे भोग्यप्रपञ्चे विततं विद्धि भोक्तृत्वेन। लोकं च भोग्यं च जीवे मनोवासनारूपेण विततं विद्धि। उभयं च चेतनाचेतनं मया व्याप्तम्, मय्येव च परमाश्रये समाश्रितं च विद्धि।

४ एवं स्वप्नदृष्टान्तेन जागरणादीनि सर्वाण्यपि जीवस्यावस्थानानि, अवस्था इति यावत्, आत्मनः मायामात्राणि, परमात्माधीनया त्रिगुणमय्या प्रकृत्या निर्मितानि। परमात्मनः मायया इच्छया निर्मितानि वा। तत् तस्मात् सर्वकारणं, द्रष्टारं सर्वसाक्षिणं मामेव परं स्मरेत्।

५ प्रकृतिरिति जडप्रकृतिरीश्वरेच्छा च। "प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यते" इति स्मरणात्। "आत्मनो मायामात्राणि परमात्मसम्बन्धिप्रकृत्युपाधिकनि" इति वीरराघवः। "आत्मनः परमेश्वरस्य मायाशक्तिकार्यत्वान्मायामात्राणि" इति विश्वनाथचक्रवर्ती। "मायामात्राणि वयुनात्मकसङ्कल्पकृतानि" इति शुकदेवः। "भगवदिच्छालक्षणप्रकृतिनिर्मितानि" इति विजयध्वजीयम्।

६ प्रस्वापप्रतिबोधयोरुभयमपि स्मरतोऽनुभवतः जीवस्य एकस्मिन् अन्वेति, एकस्मिन् व्यतिरिच्यते परं ब्रह्म। कस्मिन्नन्वेति? प्रतिबोधेऽन्वेति। स्वयमपि प्रतिबुद्धः सन्ननुगच्छतीव। प्रतिबोधाख्यधर्मेण समानधर्मा भवति। कस्मिन् व्यतिरिच्यते? प्रस्वापे जीवस्य व्यतिरिच्यते स्वयमस्वपन्। तदेवं नित्यप्रतिबोधरूपं ब्रह्म जीवात् परं विलक्षणं सर्वोत्तमं च।

यद्येष विस्मृतः पुंसो मद्भावो भिन्न आत्मनः[१]।
ततः संसार एतस्य[२] देहाद् देहो मृतेर्मृतिः ॥ ५७ ॥

"सर्वभिन्नं परात्मानं विस्मरन्[३] संसरेदिह । अभिन्नं संस्मरन् याति तमो नास्त्यत्र संशयः" इति च ॥ * ॥

इति षष्ठस्कन्धे षोडशोऽध्यायः

[सप्तदशोऽध्यायः]

एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मङ्गलमङ्गलं स्वयम् ।
यः क्षत्रबन्धुः परिभूय सूरीन् प्रशास्ति धृष्टस्तदयं हि दण्ड्यः[४] ॥ १३ ॥

एषां पक्षे [५]तदवराणामनुध्येयपदाब्जयुग्मम् ।

"विष्णुब्रह्मप्राणवीन्द्रां[६]स्तद्दारानप्यृते हरः । ध्येयो हरेः पार्षदो[७] ध्यायन् हरिचतुर्मुखौ । प्राणमेषां तथा दारान् न स्वतन्त्रतया क्वचित्" इति तन्त्रमालायाम् ॥ * ॥

---

१ "यदेतद् विस्मृतं पुंसो मद्भावं भिन्नमात्मनः" इति प्र. पाठः ।

२ "एकस्य" इति विजयध्वजीयाद्यभिमतः पाठः । आत्मनः स्वस्माद्विलक्षणः नित्यप्रतिबोधरूपो मम भावः यदि पुंसा विस्मृतः, ततो विस्मरणादेतस्य पुंसः संसारो भवति । जनेर्जनिर्मृतेर्मृतिरिति संसारे परिवर्तते ।

३ "परात्मानं चास्मरन्" इति क्वचित् ।

४ एषां पूर्वश्लोकोक्तानां ब्रह्मादीनां मतेऽपि इन्द्रादिभिरनुध्येयपदाब्जयुग्मं हरम् । ब्रह्मादिभिरपि इन्द्रादिवन्द्यत्वेनाभिमतमिति यावत् । यतः स इन्द्रादिजगद्गुरुः । सूरीन् रुद्रसंसदि स्थितानृषीनप्यवज्ञायायं क्षत्रबन्धुश्चित्रकेतुर्जगद्गुरुं हरं प्रशास्ति धर्मान् शिक्षयितुमीहते तदयं हि दण्ड्यः ।

५ "तदवताराणामनु–" इति प्र. पाठः प्रमाद एव । एषां ब्रह्मादीनां पक्षे रुद्रादवराणामिन्द्रादीनाम् । शुकदेवोऽप्याह–"एषामित्यनेन ब्रह्मणो व्यतिरिक्तानां भृग्वादीनां ग्रहणम् । अस्मिन्नेव पुराणे शिवस्य पितृत्वेन ब्रह्मणो वर्णितत्वात्" इति ।

६ वीन्द्र इति फणीन्द्रोऽपि । तथाच विष्णुं लक्ष्मीं ब्रह्मवायू सरस्वतीभारत्यौ गरुडशेषौ वारुणीसुपर्ण्यौ चेति दश देवता विहाय तदन्यैरेकादशो हरो ध्येयः । किं तदन्यैः स्वतन्त्रतया ध्येयः? न स्वतन्त्रतया क्वचित् । तर्हि कथं ध्येयः? पार्षदत्वेन । स च स्वयं विष्णुं लक्ष्मीं ब्रह्मवायू सरस्वतीभारत्यौ च ध्यायन्नास्त इत्येव ध्येयः ।

७ "पार्षदाद्यैर्ध्यायन्" इति प्र. पाठः प्रामादिकः । "पार्षदेभ्यः" इति, पार्षदोऽयम्" इति च क्वचित् । प्राचीनपाठे "पार्षदः" इति क्षैप्रसंयोगविश्लेषेण पठने छन्दःपूर्तिरिति वैदिकसम्प्रदायविदां न तिरोहितम् ।

54

न तस्य कश्चिद् दयितो न प्रतीपो[1] न ज्ञातिबन्धुर्न परो नच स्वः ।
समस्य सर्वत्र निरञ्जनस्य [2]कुतो नु रागः कुत एव रोषः ॥ २२ ॥

"सेवायोग्यातिरेकेण स्वानामपि न दास्यति । अपराधातिरेकेण नान्यस्यातः समो -रिः" इति माहात्म्ये[3] ॥ * ॥

देहिनां देहसंयोगाद् द्वन्द्वानीश्वरमायया[4] ।
सुखं दुःखं मृतिर्जन्म शापोऽनुग्रह एवच ॥ २९ ॥

अविवेककृतः पुंसो ह्यर्थभेद इवाऽत्मनि[5] ।
गुणदोषविकल्पश्च भिदेव स्वप्नकल्पिता[6] ॥ ३० ॥

"यत्तद् भगवता क्लृप्तं तदेव नियतं भवेत्[7]" । अतोऽन्येषां [8]'वरः शापो गुणदोषप्रक-

---

१ "दयितः प्रतीपो" इति प्र. पाठः ।

२ "सुखे न रागः" इति च । न ज्ञातिर्नापि बन्धुः । सपिण्डो ज्ञातिः । विवाहादिना सम्बन्धी बन्धुः । निरञ्जनोऽसङ्गः । तत्तत्कर्मानुगुणं फलदानात् स्वयं वैषम्यनैर्घृण्यहीनः समः ।

३ "मात्स्ये" इति क्वचित् । ४ "-श्वरलीलया" इति प्र. पाठः ।

५ "-भेद इहाऽत्मनि" इति विजयध्वजीयम् ।

६ "भिदेव स्वजिवत् कृतः" इति प्र. पाठः। अयं श्लोकद्वयार्थः–देहिनां देहसंयोगान्निमित्ताद् यानि सुखदुःखादिद्वन्द्वानि भवन्ति तत्र देहसंयोग एव न कारणम् । तस्यापीश्वराधीनत्वादित्याह–ईश्वरमायया । देहसंयोगोऽपीश्वरेच्छया भवति। ततो द्वन्द्वानि चेश्वरेच्छया भवन्ति। कानि द्वन्द्वानि? सुखं दुःखमित्यादि। ननु जीव एवाप्रियं शपति, प्रियमनुगृह्णाति; ततश्च सुखदुःखे भवतः । किमीश्वरेण? आह—अविवेककृतः । वरशापादिरर्थभेदः यथा तथा गुणदोषविकल्पश्च, गुण इति सुखम्, दुःखं दोषः, तयोर्विकल्पनम्, क्लृपू सामर्थ्ये, कर्तृत्वमिति यावत्, आत्मनि जीवे यद् व्यवह्रियते सोऽविवेकमूलः। ईश्वरमायाऽपरिज्ञानमूलैव सा प्रतीतिः। स्वप्नकल्पिता भिदेव ईश्वरसृष्टे स्वप्ने कल्पिता कृता भेदबुद्धिरिव अनीश्वरकृतत्वबुद्धिरिव, अहमेव स्वाप्नानर्थान् सृजामि पश्यामि चेति। आत्मनोऽवशत्वाद्यथा स्वप्नक्लृप्तिर्भगवन्नियता तद्दृष्टान्तेन जाग्रदादिकं सर्वं सर्वेषां भगवतैव क्लृप्तमिति। स्वप्ने कल्पिता या भिदा जाग्रत्त्वं स्वाप्नानामर्थानां बाह्यत्वं च तद्वदविवेककृत इति वा। वस्तुयाथात्म्यादन्यथात्वं हि भिदा।

७ एतेन द्वन्द्वानीश्वरमाययैव क्लृप्तानीति मूलं सावधारणं व्याख्यातं भवति।

८ अन्येषां वरः शापः सुखदुःखकर्तृत्वं वा अतः भगवता क्लृप्तत्वादेव युज्यते। अत एव हेतोरन्येषां वरः शापो गुणदोषप्रकर्तृता इत्येतत् सर्वमन्ततो भगवतैव क्लृप्तम् । अतश्च अन्येषां स्वातन्त्र्येण वरः शापो गुणदोषप्रकर्तृता वा यथा वासनामयस्य स्वाप्नार्थस्य बाह्यत्वादिभेदकृतिस्तथा भ्रान्तिरेव। ननु भिदेव स्वप्नकल्पितेति

र्तृता । स्वतः प्राप्ताद्[१] भेदकृतिर्वासनारूपिणो यथा । विद्यमानस्य मनसि पुनः स्वप्नेषु दर्शनम् । भगवद्वशता यस्मात् सर्वेषां ज्ञेयमेव तत्" इति प्रकाशसंहितायाम् ॥ * ॥

इति भागवतो देव्याः प्रतिशप्तुमलन्तमः ।
मूर्ध्ना सञ्जगृहे शापमेतावत् साधुलक्षणम् ॥ ३७ ॥

[२]प्रतिशप्तुमलन्तमः—

"देवा एव तदन्येभ्यः शक्ता नास्त्यत्र संशयः । अशक्ता अपि शक्तानां शक्ताः शापादिषु स्फुटम्[३] । तथाऽप्यशक्तैर्विहिताः शापाद्याः शक्तिमत्सु तु[४] । अत्यल्पाश्चाल्पकालाश्च[५] न सम्यक् प्रभवन्ति च । यत्नेनापोहितुं शक्या उत्तमैस्तु न संशयः । उत्तमेषु कृताः शापाः कर्तॄणां ज्ञानपुण्ययोः । निःशेषेण निहन्तारस्तदनुग्रहमन्तरा[६] । सदारयोर्ब्रह्मविष्णवो[७]र्वरशापादयोऽखिलाः । तदन्येन कृताः सर्वे निष्फला एव निश्च-

---

मूले न प्रतियोगी प्रतीयते कस्माद्भिदेति? प्रतीयते सूक्ष्मदृशाम् । स्वप्नशब्देनैव सूचनादित्याह— स्वतः प्राप्तात् । स्वतः स्वतन्त्राद्भगवतः सकाशादाप्नोत्येनं जीव इति हि स्वप्न उच्यते । ततश्च स्वतन्त्रभगवत्सृष्टं स्वप्नं भगवत्कृतात् भेदेनानीश्वरकृतत्वेन पश्यन् भेददर्शी भवति । भेदेनावगतिरेव भेदकृतिः । ननु स्वप्नेऽपि भगवद्वशतानिश्चयः कथम्, येन स दृष्टान्तः स्यात्? जीव एव स्वप्नस्रष्टा द्रष्टा च किं न स्यात्? नेत्याह—विद्यमानस्य । यस्मात् स्वप्नस्य भगवद्वशता तस्मादेव संस्काररूपेण मनसि सदा विद्यमानानामर्थानां पुनः स्वप्नेषु कदाचित् केषाञ्चिदेव दर्शनं युज्यते । अन्यथा सदा सर्वं दृश्येत । नहि जीवस्तन्नियच्छतीति तु सर्वानुभवसिद्धम् । तस्मात् तद्वत् सर्वेषां सर्वदा भगवद्वशत्वमेव ज्ञेयम् । "य एष सुप्तेषु जागर्ति कामंकामं पुरुषो निर्ममाणः" इति हि श्रुतिः ।

१ "स्वतः प्राप्ता" इति प्र. पाठः ।

२ मूले भगवद्भक्तश्चित्रकेतुः पार्वत्याः प्रतिशापदानेऽप्यलन्तमः समर्थतम इत्युच्यते । तेन चित्रकेतोः पार्वतीतोऽप्यधिकसामर्थ्यं प्रतीयते । अर्थवादोऽयं भगवद्भक्तिप्रशंसार्थम् । अत एव भागवतपदमुपादत्त । किञ्चाशक्तैर्निसृष्टोऽपि शापः शक्तेष्वपि किञ्चिदिवांशतः फलति । ततश्च मूलवाक्यमुपपन्नमिति स्फुटयितुं विवादपदं वाक्यांशमुल्लिख्य प्रमाणतो व्याख्याति—प्रतिशप्तुमित्यादि ।

३ अशक्ता अपि शापादिषु शक्ता भवन्ति । स्फुटमिति तमब् व्याख्यातः । अलन्तमः स्फुटं शक्त इति । तस्मादशक्तोऽपि चित्रकेतुः शक्ताया देव्याः प्रतिशप्तुमलन्तमः ।

४ "-मत्सु वै" इति प्र. पाठः ।   ५ "अत्यल्पा अल्पकालाश्च" इति क्वचित् ।

६ उत्तमानामनुग्रहे सति तु तेषु शापे कृतेऽपि न ज्ञानपुण्ययोर्नितरां नाशः ।

७ सदारयोर्ब्रह्मविष्ण्वोरर्थात् सदारस्य मुख्यप्राणस्य च तेभ्योऽन्येन रुद्रादिना दत्ता वरशापादयो निष्फला एव अखिलाः समस्तावान्तरविशेषोपेताः । तेनाखिलाः सर्वे इति न पौनरुक्त्यम् । "सर्वं कर्माखिलं पार्थ" इतिवत् । तदेव स्फुटमुच्यत उत्तरश्लोकेन—नचाप्यवान्तराः । सामस्त्येन न फलतीति न केवलम् । अवान्तरांशभूताः शापैकदेशा अपि न फलन्ति । अंशतोऽपि न फलन्तीति यावत् । 'अत्यल्पाश्चाल्पकालाश्च' इति पूर्वोक्तस्यापवादोऽयम् ।

यात् । नवाप्यवान्तराः शापा भवन्त्येषां तु कुत्रचित् । वरा विष्णोः श्रियश्च स्युर्ब्रह्मणश्च यथाक्रमम् । उत्तमैरधमानां तु वराः शापा यथोदिताः[१] । सम्पूर्णफलदा एव नात्र कार्या विचारणा" इति स्कान्दे[२] ॥ * ॥

[[३]इति षष्ठस्कन्धे सप्तदशोऽध्यायः]

[एकोनविंशोऽध्यायः]

[४]तस्या अधीश्वरः साक्षाद् त्वमेव पुरुषः परः ।
त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग् भवान् ॥ १२ ॥

[५]इज्या क्रिया ।

"अन्तर्यामी तु यज्ञादेर्विष्णुरिज्यादिनां[६] रमा । तच्छब्दैस्तु ततो वाच्यौ[७] नतु सर्वस्वरूपतः । अन्तर्यामी श्रियश्चापि[८] विष्णुरेव न संशयः । नान्तर्यामी कश्चिदस्ति विष्णोः क्वापि कुतश्चन" इति ब्रह्मतर्के ॥ * ॥

इति षष्ठस्कन्ध एकोनविंशोऽधयः

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते
श्रीभागवततात्पर्यनिर्णये
षष्ठः स्कन्धः समाप्तः

---

१ "यथोदितम्" इति प्र. पाठः । "वरशापा यथोदिताः" इति क्वचित् ।

२ "इति च स्कान्दे" इति क्वचित् ।

३ अत्र प्राचीनकोशेष्वध्यायपूर्तिर्न पठ्यते ।

४ "इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया" इति पूर्ववाक्यम् । इयं लक्ष्मीः परा प्रकृतिः । तस्या अधीश्वरस्त्वं परः पुरुषः । इयमिज्या यज्ञक्रियान्तर्गता । त्वं तु सर्वयज्ञान्तर्गतः । इयं क्रिया फलभोगानुकूलक्रियानिवामिका । त्वं फलभुक् भोक्तुरन्तर्यामी । एवमुत्तरत्रापि ।

५ ननु यज्ञ इज्येत्यनर्थान्तरम् । तत्कथं त्वं सर्वयज्ञ इज्येयमित्युच्यते? आह—इज्या क्रिया । यज्ञाङ्गभूता क्रियाऽत्र इज्याशब्देनोच्यत इत्यर्थः । क्रियानिष्पन्नो यज्ञः । यथा यज्ञपदसाहचर्यादिज्यापदस्यैवमर्थः पर्यवस्यत एवं मूले क्रियापदेन फलभुक्पदसाहचर्यात् फलभोगानुकूलो व्यापार उच्यत इति स्फुटम् । तथाच इज्यापदेन इज्या क्रियोच्यते । यज्ञसम्बन्धिनीति यावत् । क्रियापदेन तदितरा ।

६ "–रिज्यादिना" इति क्वचित् । इज्यादिनां इज्यादीनाम् ।

७ "वाच्यो–" इति कोशेषु बहुलं पठ्यते ।

८ "श्रियश्चैव" इति क्वचित् ।

सप्तमः स्कन्धः

ॐ ॥ निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ।
स्वमायागुणमाविश्य बाध्यबाधकतां गतः[1] ॥ ६ ॥

"बाध्यादिस्थो हरिर्नित्यं बाध्यतादि गतेत्यपि[2] । गीयते नतु बाध्यत्वादिदोषयुतत्वतः[3]" इति भविष्यत्पर्वणि ॥ * ॥

ज्योतिरादिरिवाऽभाति सङ्घातान्न विविच्यते ।
विदन्त्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः[4] ॥ ९ ॥

दधिस्थघृतवत् काष्ठवह्निवच्च[5] जनार्दनः । देहेन्द्रियासुजीवेभ्यो विविच्य ज्ञायते नतु" इति च ॥ * ॥

---

१ चिदचित्प्रकृतेः परः हेयगुणविहीनोऽपि भगवान् स्वाधीनमायागुणपरिणामं देवासुरादिदेहमाविश्य, असुरेषु स्थितो बाध्यत्वं जितत्वम्, देवेषु स्थित्वा बाधकत्वं जेतृत्वं च स्वयमेव गतः । असुरेषु स्थित्वा तेषां बाध्यत्वप्रदोऽयमेव मुख्यतो बाध्यः । नतु बाध्यत्वात् । देवेषु स्थित्वा तेषां चासुरबाधनशक्तिप्रदोऽयमेव मुख्यतो बाधकश्च । नतु स्वतो बाधकत्वात् । "देवासुराणां परस्परं या बाध्यबाधकता तां गतस्तत्र हेतुर्जातः" इति श्रीधरस्वामी । "बाध्यबाधकदेवासुरवर्गयोरन्तरात्मतयाऽवस्थितः" इति वीरराघवः । "देवासुरादीनां परस्परं या कर्मयोगाद् बाध्यबाधकता तां हेतुतया गतो भवति । तत्तत्कर्मानुसारेण बाध्यतां बाधकतां च ददाति; स्वयं तु सम एव" इति शुकदेवः । "देवादिदेहमाविश्य बहिस्थनृसिंहादिप्रादुर्भावरूपेणासुरादिबाधकताम्, असुरादिबाध्यवस्तुषु नियामकत्वेन स्थित्वा बाध्यतां च गतो भवति" इति विजयध्वजीयम् । "ब्रह्म ह देवेभ्यो विजिग्ये" इति श्रुतिः ।

२ गत इत्यपि इति च्छेदः । बाध्यं गतो बाध्यतां गत उच्यते । बाधकं गतश्च बाधकतां गत इति ।

३ "बाध्यत्वाद्यददोषयुतत्वतः" इति प्र. पाठः प्रामादिकः । प्राचीनपाठ एकाक्षरन्यूनः पादः । क्वचित्तु "बाध्यत्वान्नित्यादोषयुतत्वतः" इति पठ्यते ।

४ ज्योतिरित्यग्निः । अरणिकाष्ठेऽग्निरिव, आदिपदात् दध्नि घृतमिव शरीरेन्द्रियादिषु निगूढो भगवान् आभाति स्वाधारदोषैरलिप्तः प्रकाशते । अथाप्यज्ञानां भगवदधिष्ठानभूतात् देहेन्द्रियप्राणजीवानां सङ्घाताद् विविच्य न ज्ञायते । ज्ञानिनः पुनः अरणिं मथित्वा गूढमग्निमिव जिज्ञासाख्यमथनेनाऽऽत्मस्थं परमात्मानमन्ततोऽवगच्छन्त्युपगच्छन्ति च । तदुक्तम्— "घृतमिव पयसि निषक्तं भूतेभूते च वसति विज्ञानम् । सततं मन्थयितव्यं मनसा मन्थानभूतेन" इति ।

५ "काष्ठे वह्निवच्च" इति पाठान्तरम् । प्र. पठोऽपि तथा ।

कालं च सन्तं[1] सृजतीश आश्रयः[2] प्रधानपुम्भ्यां नरदेव सत्यकृत् ।
स तत्रतत्रोभयसिद्धिमाप्नुयाल्लिङ्गात्मनो लिङ्गगुणाश्च सन्ति[3] ॥ ११ ॥

प्रधानपुम्भ्यां सह ॥ * ॥

य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यजः[4] ।
तत्प्रत्यनीकानसुरान् सुरप्रियो रजस्तमस्कान् प्रमिणोत्युरुश्रवाः ॥ १२ ॥

[5]काले कालविषयेऽपीशिता । देहादिकारणत्वात्[6] सुरानीकमिव स्थितं सत्त्वम् ।

"स्वभावतः प्रियत्वात्तु सदा देवप्रियो हरिः[7] । अप्रियश्चासुराणां स स्वभावात्तूभयं

---

१ "चरन्तम्" इति पाठान्तरम् । २ "आश्रयम्" इति प्र. पाठः ।

३ इदमुत्तरार्धं प्र. पाठे न क्वापि पठ्यते । अयमर्थः—प्रकृतिपुरुषाभ्यां सह सन्तं वर्तमानं कालं सर्वाधारः परमेश्वर एव सृजति । प्रकृतिपुरुषकालान् सृजतीत्येतावत् । सुप्तां प्रकृतिं सृष्ट्युन्मुखां करोति । पुरुषं च नाभितः सृष्ट्वा सृष्टिकार्ये नियोजयति । कालं च क्षणलवाद्यात्मना । पुरुष इति जीवसमुदायो वा । तथाहि भाष्ये पाद्मवचनम्—"पुरुषः प्रकृतिः कालो महानित्यादिषु क्रमात् । विकार एव जननं पुरुषे तद्विशेषणम्" इति । "जडप्रकृतेर्विकारः परिणामः । कालस्योत्पत्तिरेव । 'अहानि पूर्वीरुषसा जरन्त', 'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि' इति हि श्रुतिः । पुरुषे सर्वचेतनेषु विकारो विशेषणम् । विकारविशिष्टत्वं विकारिवस्त्वभिमानेन" इति पण्डिताचार्यवचनम् । यद्वा प्रधानपुरुषकालाः श्रीभूदुर्गाः । चित्प्रकृतिसृष्टिमनेनाऽह । एतदप्युक्तं भाष्ये—"प्रकृतिः पुरुषः कालस्त्रय एते विभागतः" इति । पण्डिताचार्योऽप्याह—"प्रकृतिः पुरुषः काल इति श्रीभूदुर्गाः" इति । तस्या जननं च—"परतन्त्रविशेषो हि विकार इति कीर्तितः" इत्युक्तम् । "चित्प्रकृत्यादेः सिसृक्षुत्वादिः पराधीनो विशेषः" इति च तत्वदीपिका । एवं क्रमशः सृष्टेषु तेषुतेषु स्थित्वा अवान्तरकारणद्वाराऽवान्तरकार्याणि च सृजन् कार्यकारणात्मकोभयविधविश्वसृष्टिमपि साधयेत् । कारणेषु जनकत्वशक्तिं कार्येषु जन्यत्वं चाऽप्नुयात् प्रापयेत् । चराचरं चेतनाचेतनं वोभयम् । देवासुरयोर्बाध्यबाधकतासिद्धिर्वोभयसिद्धिः । "द्विविधो भूतसर्गोऽत्र दैव आसुर एवच" इति स्मरणात् । एवं लिङ्गात्मनो जीवस्य लिङ्गगुणाः शरीरमूलाः सांसारिकधर्माश्च तत एव भवन्तीति न बन्धो मिथ्या । लिङ्गं शरीरम् । लिङ्गमाप्नोतीति लिङ्गात्मा जीवः । अलिङ्गो भगवान् । "व्यापकोऽलिङ्ग एव च" इति श्रुतेः ।

४ "-वैधयत्यतः" इति प्र. पाठः । य एष कालेऽपि कालविषयेऽपीशिता । प्रधानपुम्भ्यां सहेति वर्तते । प्रधानपुरुषकालानामपीश्वरः । सुरानीकमिव सुरसमुदायरूपेण स्थितं सत्वगुणं जयेन वर्धयति । यतः सुरप्रियः । रजस्तमःस्वभावान् सुरप्रत्यनीकानसुरांस्तु पराजयेन प्रमिणोति हिनस्ति । तथाह्ययं "एधमानद्विळुभयस्य राजा" इत्यादिश्रुतिप्रथितपुरुकीर्तिः । उभयस्य राजेति चोभयसिद्धिमाप्नुयादिति स्फुटमुक्तम् ।

५ प्रधानपुम्भ्यां सहेत्यत्राप्यनुवर्तते । तेन प्रधानपुरुषकालानामपीशितेति लभ्यते ।

६ "-करणत्वात्" इति क्वचित् । सत्वप्रचुरशरीरत्वाद् देवानां देवगण एव सत्वमित्युपचारत उच्यते ।

७ स्वभाव एष देवानां यत्ते भगवति स्निह्यन्ति सोऽपि तेषु स्निह्यति । देवाः प्रिया यस्य स देवप्रियः । असुराः स्वभावतस्तं द्विषन्तीति तत्तत्स्वभावानुगुणं स प्रवर्तत इति सर्वत्र सम एव सः ।

नृणाम् । देशकालौ गुणांश्चैव भक्त्यादीनप्यपेक्ष्य तु । योग्यतां च तथा कर्म सम इत्यभिधीयते । स्वतः प्रियोऽपि देवानामुत्पाद्यैव गुणानिमान् । इतरेषां तथा दोषान् सुखदुःखे ददात्यजः । उभयं तु मनुष्याणामतः स सम ईरितः[१] । अनादिनियताश्चैव गुणदोषाः[२] सुरादिषु । यथाक्रमं पुनश्चैव नियमाद् वर्धिताः सदा[३] । विष्णुनैव ततोऽन्येषां[४] विषमश्च जनार्दनः" इति ब्रह्मतर्के । "न विष्णोर्विषमत्वं तु योग्यतापेक्षया क्वचित् । योग्यतायास्तन्नियत्या विषमत्वं भवेत वा[५]" इति स्कान्दे । "विषमत्वं तु दोषाय शुभाशुभविपर्यये[६] । अतस्तादृशवैषम्यं ब्रह्मसूत्रे निराकृतम् । शुभाशुभनियन्तृत्वं न दोषो गुण एव सः । अतस्तदिष्टं कृष्णस्य ब्रह्मसूत्रकृतो विभोः" इति तन्त्रनिर्णये ॥ * ॥

शपतोरसकृद् विष्णुं यद् ब्रह्म परमव्ययम् ।
श्वित्रो न जातो जिह्वायां नान्धं वाऽप्यविशत् तमः[७] ॥ १९ ॥

"नियमाद् भुज्यते पुम्भिर्धर्माधर्मफलं मृतौ । कैश्चिदत्रापि भुज्येत[८] तस्मान्नाधर्ममाचरेत्" इति भारते ॥ * ॥

[९]यन्निबन्धोऽभिमानोऽयं तद्वधात् प्राणिनां वधः ।
तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः ।
[१०]परस्येदमकर्तुर्हि हिंसा केनास्य कल्प्यते ॥ २५ ॥

---

१ "-मतः सम इतीरितः" इति प्र. पाठः । २ "गुणा दोषाः" इति क्वचित् ।

३ "वर्धितास्तथा" इति प्र. पाठः ।

४ "ततो नित्यं विषमश्च" इति पाठान्तरम् । प्र. पाठश्च तथा । ततः समोऽपि भगवान् अन्येषां प्राकृतान दृष्ट्या विषमश्च प्रतीयते ।

५ "भवेत् तव" इति क्वचित् प्र. पाठः प्रमाद एव । "भवेदिति" इति क्वचित् । "भवेन्नवा" इत्येके पठन्ति ।

६ शुभकर्मणोऽशुभफलदानमशुभकर्मणश्च शुभफलदानमिति विपर्यये ।

७ "नान्धं विविशतुस्तमः" इति प्र. पाठः । शपतोः शिशुपालदन्तवक्रयोः । श्वित्रः श्वेतकुष्ठम् । नाप्यत्र राजसूये कृष्णेन हतस्तयोरन्यतरः शिशुपालस्तमोऽविशत्; किन्तु कृष्णमेव विवेश । इति तद् दृष्ट्वा विस्मितस्य धर्मराजस्य प्रश्नः । अत्युत्कटत्वादिहैव फलं सम्भावितम् । तन्न दृष्टम् । अथ मरणानन्तरं तु निश्चितमिति शास्त्रेषूच्यते । सोऽपि नियमः कथं शिशुपाले भग्न इति प्रश्नाशयः ।

८ कैश्चिदत्रापि भुज्येत अत्युत्कटे सति पुण्ये पापे वा । ९ "यन्निबद्धो–" इति प्र. पाठः ।

१० "परस्य दमकर्तुर्हि" इति च । यन्निबन्धनोऽहम्ममेत्यभिमानस्तस्य देहस्य वधात् देही हत इत्युच्यते । यस्य च परमात्मनो न तादृशोऽभिमानस्तस्य हिंसा तन्मूलं द्वेषादिकं वा केन कारणेन कल्प्यते । कुतो नाभिमानस्तस्य?

कैवल्यात् देहाद्यभावादेव । अकर्तुः, तस्यान्यः कर्ता न विद्यते[1] । इदं एषा[2] । "व्यत्ययोऽतिशयकुत्सनाभेदेषु[3]" इति सूत्रात् ॥ * ॥

तस्माद् वैरानुबन्धेन निर्वैरेण भयेन वा ।
स्नेहात् कामेन वा युञ्ज्यात् कथञ्चिन्नेक्षते पृथक्[4] ॥ २६ ॥

कथञ्चिन्नेक्षते पृथक् । तत्रैव मनसो निवेशेन[5] तदन्यन्नेक्षते[6] । वैरादीनामेकतमेनापि यो युञ्ज्यात्[7] स नेक्षत इति स्वभावकथनम्, न विधिः ।

"कर्मणा मनसा वाचा यो द्विष्याद् विष्णुमव्ययम् । मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः ।", "तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु । आसुरीं योनिमापन्ना मूढा जन्मनिजन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ।", "अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम् । मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं चैव प्रकृतिं मोहनीं[8] श्रिताः ।", "यदनिन्दत् पिता मे त्वामविद्वांस्तेज ऐश्वरम्। तस्मात् पिता मे पूयेत दुरन्ताद् दुस्तरादघात् ।", "हिरण्यकशिपुश्चापि भगवन्निन्दया तमः । विविक्षुरत्यगात् सूनोः प्रह्लादस्यानुभावतः ।", "वरतोऽपि न मुच्यन्ते द्वेषिणः शापतोऽपितु । भक्ता नैव निपात्यन्ते धर्माधर्मैस्तथेतरैः । अन्यावेशकृतं यत्तु तद् वराद्यैरपोह्यते । तद्विरुद्धस्वभावानामन्यथा न कथञ्चन" इत्यादेः[9] ॥ *॥

कैवल्यात् । स एव केवलम्, न ततोऽतिरिक्तो देहादिस्तस्य विद्यते । अत एव न देहगेहादिना खण्डितात्मा । किन्त्वखिलात्मा पूर्णात्मा । न विद्यते कर्ता यस्य सोऽकर्ता । उक्तं हि– "सर्वकर्ता न क्रियते" इति । इदं हिंसेति लिङ्गव्यत्ययः कुत्सायाम् ।

१ क्वचित् "विद्यते" इति न पठ्यते । २ "इदं हिंसा" इति क्वचित् प्र· पाठः ।

३ "–कुत्सनभेदेषु" इति प्र पाठः । तथाचात्र इदं हिंसेति कुत्सनायां लिङ्गव्यत्यय इत्यर्थः । भगवद्विषये हिंसाशङ्काऽपि कुत्सितेति ।

४ निर्वैरेण बन्धुबुद्ध्या । भक्त्येव वैरादिनाऽपि यो भगवति मनो युञ्ज्यात् सोऽपि भक्त इव तत्रैवाभिनिविष्टमनाः पृथक् भगवतोऽन्यत् किमपि नेक्षते ।

५ "मनसोऽभिनिवेशेन" इति प्र. पाठः । क्वचित् कोशेषु च ।

६ "तदन्यं नेक्षते" इति मुद्रितः पाठः । ७ "युञ्ज्यात्" इति क्वचित् ।

८ "मोहिनीं" इति प्र. पाठः ।

९ इतः परस्तात् तात्पर्यस्य प्र. पाठे प्राचीनपाठात् भिन्नैवाऽनुपूर्वी दृश्यते । तदयं प्र· पाठे समग्रः पाठक्रमः—

यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात्।
न तथा भक्तियोगेन इति मे निश्चिता मतिः ॥ २७ ॥

तन्मयतां मनसस्तत्राभिनिवेशम्[1]।

"मागधाद्या यथा नित्यं द्वेषादाग्रहिणो हरौ। न तथाऽऽग्रहिणो भक्ता ऋते ब्रह्माणमव्ययम्" इति हरिवंशेषु ॥ * ॥

कीटः पेशस्कृता रुद्धः कुडये यान्तमनुस्मरन्[2]।
संरम्भभययोगेन विन्दते तत्सरूपताम्[3] ॥ २८ ॥

योगः स्नेहः। संरम्भभययुक्तस्नेहेन ॥ *

[4]यस्मादेवं कोऽप्युपद्रवो नास्ति भगवतः, तस्मादेवं द्वेषादिना मनो योक्तुं शक्यते। तदेव चिन्तयति च। अन्यथाऽऽत्मनो दुःखकारणं द्वेषादिकं कथं सर्वनियामको हरिरुत्पादयेत्? ॥ * ॥

"यस्मादेव कोऽप्युपद्रवो नास्ति भगवतस्तस्मादेव द्वेषादिनाऽपि मनो योक्तुं शक्यते तत्प्रेरणया। तादृशानां तदेव चिन्तयति च। अन्यथा आत्मनो दुःखकारणं द्वेषादिकं कथं सर्वनियामको हरिरुत्पादयेत्? ॥ * ॥
तत्रैव हेतुः- यथा वैरानुबन्धेनेति। यथा वैराभिनिवेशिनः तथा भक्त्याऽभिनिवेशिनो न सन्ति। तत् कथमन्यथा भक्तानेव बहून् हरिः कुर्यादिति भावः ॥ * ॥
कीटः पेशस्कृतेत्यादि चैद्यादीनां भक्तियुतत्वप्रतिपादनम्। स्नेहाद्यायतननाशादिनाऽप्युपद्रवोऽस्य नास्तीति निर्वैरेणेत्याद्युक्तम्। ततः कनीयसा एव देवा ज्यायसा असुरा इति श्रुतिः। तन्मयतां मनसस्तत्राभिनिवेशनम्। मागधाद्या यथा नित्यं द्वेषादाग्रहिणो हरौ। न तथाऽऽग्रहिणो भक्ता ऋते ब्रह्माणमव्ययमिति हरिवंशेषु। योगः स्नेहः। संरम्भभययुक्तस्नेहेन। प्रीतिः स्नेहस्तथा योगः प्रेमबन्ध इतीर्यत इति शब्दनिर्णये" इति।

१ "-निवेशनम्" इति पाठान्तरम्। २ "कुड्यायां तमनुस्मरन्" इति प्र॰ पाठः।

३ "तत्स्वरूपताम्" इति केचित्। अयं श्लोकार्थः—नन्वास्तां वैरानुबन्धेनापि भगवति मनोयोगः शक्यं कर्तुमिति। वैरानुबन्ध एव चाधिकोऽभिनिवेश इति च। न तावता तस्य भगवत्प्राप्तिहेतुत्वम्। तथाच चैद्यो द्विषन्नपि कथं कृष्णं विवेशेत्यस्य किमुत्तरम्? इदमुत्तरमित्याह—कीटः। पेशस्कृता भृङ्गविशेषण कुड्ये रुद्धः कीटः, अनेनाहं रुद्ध इति संरम्भेण क्रोधेन, प्रतिकर्तुमशक्त्या भयेन, आहारदानेन मां पुष्णातीति योगेन स्नेहेन च, तमेव पेशस्कृतं कुड्यकुहरं प्रति यान्तमनुस्मरन्, कदाऽयमायातीति तदागमनमेव ध्यायन् तेन स्नेहयोगेन तत्समानरूपतां लभते। तद्यथा क्रोधभयसाङ्कर्येऽपि स्नेहप्राचुर्यादेव कीटः पेशस्कृत्सरूपतामाप तथाऽऽवेशनिमित्तद्वेषादिसहभावेऽपि सहजभक्तिबलाच्चैद्योऽपि भगवत्सारूप्यमापेति। तदेतदुत्तरपद्ये स्फुटम्।

४ तस्माद् वैरानुबन्धेनेत्यादि श्लोकत्रयं स्फुटत्वायार्थविशेषलाभाय च भङ्ग्यन्तरेण व्याख्याति—यस्मादेवम्। यतः शत्रुभिर्हिंसाद्युपद्रवः नास्माकमिव भगवतः कैवल्यात् पूर्णत्वाच्चेति पूर्वश्लोक उदितं तस्मादेव हेतोर्वैरानुबन्धेन निर्वैरेण भयादिना वा भगवति मनो युञ्ज्यात्, नात्रापि विधौ लिङ्, किन्तु शक्यत्वार्थे, मनो योक्तुं प्रभवेत्। अयमर्थः- मनोयोगेऽपि न जीवः स्वतन्त्रः। भगवान् यादृशं मनोयोगं ददाति तथाऽयं प्रवर्तते। ददाति चासुराणां वैरानुबन्धम्। तेन चासुरास्तथा मनो युञ्जन्ति। यदीदं स्वस्य हिंसाकरं स्यात् तदा न प्रेरयेदेव

55

तत्रैव हेतुः—[1]'यथा वैरानुबन्धेनेति। यथा वैराभिनिवेशिनस्तथा भक्त्यभिनिवेशिनो न सन्ति। तत् कथम्? अन्यथा भक्तानेव बहून् हरिः कुर्यादिति भावः॥ * ॥
कीटः पेशस्कृतेत्यादि चैद्यादीनां [3]भक्तियुतत्वप्रतिपादनम्। [4]स्नेहाद्यायतननाशाद्युपद्रवोऽस्य नास्तीति निर्वैरेणेत्याद्युक्तम्।

द्वेषादिकम्। को हि प्रेक्षावानात्मनोऽहितं चिकीर्षति? ननु मा भूत् भगवतः कोऽप्युपद्रवः। किन्तु द्विषन् स्वयमेवोपद्रुतो भवति नरकाद्यनर्थं भजन्। तत् किं कृपालुर्भगवान् मा मामयं द्विषन्नुपद्रावि किन्तु भक्तिमेव करोत्विति नेच्छति? द्विषतामुपद्रवे कस्तस्याऽनन्दः? अत आह—तदेव चिन्तयति च। न हि भगवतः पक्षपातः। तथाऽपि यस्य या योग्यता तस्य तदेव चिन्तयति। एतेन कथञ्चिन्नेक्षते पृथगिति मूलं व्याख्यातम्—यो वैरानुबन्धेन मनो युनक्ति तद्विषये भगवानपि पृथक् अन्यथा, अयं वैरमपहाय भक्तो भवत्विति नेक्षते यदि भगवद्द्वेष एव तस्य स्वरूपयोग्यता। यतः पृथक् तत्तत्स्वरूपयोग्यताव्यतिरेकेण भगवान् कदाचिदपि नेक्षते न चिन्तयतीति।

१ यथा वैरानुबन्धेनेति द्वितीयं पद्यं भक्तेः सकाशादपि वैरेण मनोऽभिनिवेशो गाढतर इत्यर्थकतया व्याख्यातम्। इदानीमर्थान्तरमाह—तत्रैव हेतुः। तत्तद्योग्यतानुसारेण तदेव चिन्तयतीत्यत्रैव हेतुरुत्तरश्लोक उच्यते। तथाहि योजना। वैरानुबन्धेन तन्मयः, वैराभिनिवेशीति यावत्, यथा संख्याबाहुल्येन भवति न तथा भक्तियोगी प्रचुरोऽस्ति। "ज्यायसा असुराः" इति श्रुतेः। तत्कथं सम्भवेत् यदि भगवान् तथा न चिन्तयेत्। अन्यथा, तद्योग्यतामतिक्रम्य कृपया सर्वानुद्दिधीर्षति चेत् भक्तानेव हरिः सर्वान् कुर्यात्। अथच तत्कथमन्यथेत्यादि समस्तमेकं वाक्यम्। अन्यथा अभक्तानिति च्छेदः। अन्यथा तेषान्तेषां तत्तदेव न चिन्तयति चेत् किमिति बहूनभक्तान् हरिः कुर्यात्। प्रत्युत सर्वानपि भक्तानेवाकरिष्यत्।

२ तर्हि द्वेषिणां तम इति स्वनियममपहाय किमिति चैद्यादीनां सारूप्यं ददौ? तामेतां शङ्कामपाकर्तुं कीटः पेशस्कृतेत्यादि तृतीयं पद्यमवतारयति—कीटः पेशस्कृतेत्यादीति। तथाच द्वेषेण चैद्यगतासुरचेतनस्य तम एव। भक्त्या सच्चेतनस्य सारूप्यमिति न नियमभङ्ग इति हृदयम्। इत्यादीत्यविभक्तिको निर्देशः। इत्यादिना श्लोकेन भक्तियुतत्वप्रतिपादनं कृतमिति। इत्यादि पद्यं भक्तियुतत्वस्य प्रतिपादनं प्रतिपादकमिति वा।

३ "भक्तियुक्तत्व–" इति क्वचित्।

४ नन्वस्ति लोके द्वेषाद्धिंसाद्युपद्रवप्रसक्तिः। अतस्तन्निषेधो भगवति युज्यते—तस्माद् वैरानुबन्धेन युञ्ज्यादिति। निर्वैरभयादेस्तु तत्र का प्रसक्तिः? नहि निर्वैरेण भयेन स्नेहेन कामेन वा लोकेऽप्युपद्रवप्रसङ्गः, येन तद् भगवति निवार्येत। आह—स्नेहादिति। लोकव्यवहारस्य हि सामान्यतस्त्रयी गतिः— द्वेष्टि, बिभेति, स्निह्यति चेति। स्नेहोऽपि त्रिमुखः—बन्धुतामूलो मैत्रीमूलः काममूलश्च स्त्रीपुंसयोरिति। तदेवं पञ्चतय्यामपि गतावन्ततो दुःखभयाद्युपद्रवो दुर्निवारः। अभिमानमूलत्वादेव। तत्र द्वेषे तावत् स्फुटमुक्तम्। निर्वैरे यथा—निर्वैरमिति वैरप्रतिकूलं बन्धुत्वम्। "सम्बन्धाद् वृष्णयः" इति वक्ष्यमाणत्वात्। यो हि बन्धुबुद्ध्या स्निह्यति तस्य नाशाद्यापदि स्नेहविषयोऽपि दुःखादिनोपद्रूयते। एवं स्निह्यति नष्टे स्नेहपात्रे दूयते। कमितरि नष्टे कामिनी दूयते। एवमेव भयेऽपि। भयं हि नैकान्ततो भवति। किन्तु द्विनिष्ठम्। यो हि यस्माद् बिभेति सोऽपि तस्माद् बिभेति। इभ्यस्तस्कराद् बिभेति, तस्करोऽपीभ्याद् बिभेति। बलवतो हि दुर्बलो बिभीयात्। बलवानपि दुर्बलाद् बिभीयादेव-'यदयं मत्तो बिभाय, संभीत्यैव च किमप्यनिष्टं कुर्यादतो मया जागरूकेण भाव्यम्' इति। तदेतत्सर्वं सर्वात्मना

"ततः कानीयसा एव देवा ज्यायसा असुराः[1]" इति श्रुतिः । "प्रीतिःस्नेहस्तथा योगः प्रेमा बन्ध[2] इतीर्यते" इति शब्दनिर्णये ॥ * ॥

एवं कृष्णे भगवति मायामनुज ईश्वरे ।
[3]वैरेण धूतपाप्मानस्तमापुरनुचिन्तया ॥ २९ ॥

वैरयुक्तयाऽप्यनुचिन्तया तमापुः—

"अनुचिन्तेति तामाहुर्भक्तिपूर्वं तु या[4] स्मृतिः" इति च । "स्नेहादन्नं ददातीति स्वाकर्षणभयेऽपिच । विद्यमानेऽप्यल्पकोपे सङ्गतिस्नेहतस्तथा । पेशस्कृद्रूपतां कीटो यथा याति तथैव तु । चैद्यादयोऽसुरावेशाद्धरौ द्वेषयुता अपि । निजस्वभावया भक्त्या नीता हरिसरूपताम् । तथा हि करुणो विष्णुरन्यावेशाद् यदि द्विषन् । हीयते किं ममानेन नित्यानन्दस्वरूपिणः । देहबन्धयुतानां हि द्वेषिणापकृतं भवेत् । मम को ह्यपराध्येत निर्दोषशुभरूपिणः[5] । अतो मय्यपराधस्तु स्वस्मिन्नेव न मे भवेत् । अतो यद्यसुरावेशात् कृतमेनेन[6] दुष्कृतम् । अनादिभक्तो यस्मान्मे मोचयिष्ये ततस्त्वहम् । इति मत्वा मोचयति चैद्यादीनपि केशवः" इति ब्रह्माण्डे ॥ * ॥

[7]कामात् स्नेहाद् भयाद् द्वेषाद् यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥ ३० ॥

कामादिभिरपि यथावद् भक्त्या सह[8] मन आवेश्य तदघं[9] द्वेषादिकृतमघं

भगवति न सम्भवतीति यथाकथाच मनोयोगे न तस्य काऽपि क्षतिः । तदेतदुक्तम्—स्नेहाद्यायतननाशाद्युपद्रवोऽस्य नास्तीति ।

१ "ज्यायांसो असुराः" इति क्वचित् । २ "प्रेमबन्ध-" इति प्र. पाठः प्रामादिकः ।

३ "वैरेण पूतपाप्मान-" इति प्र. पाठः । वैरेणेत्युपलक्षणे तृतीया । वैरेणोपलक्षितयाऽप्यनुचिन्तया भक्तिपूर्वकं निरन्तरस्मरणेन धूतपाप्मानः । अपिचान्योऽप्यत्रार्थो ध्वन्यते—वैरेण यः पाप्मा यत् पापं तद् विधूयासुरचेतने निक्षिप्य स्वयमनुचिन्तया तमापुरिति । तदेतद् भाष्ये "वैरयुक्तयाऽप्यनुचिन्तया" इत्यपिशब्देन सूचितम् । वैरयुक्तयाऽपि तमापुः, वैरदोषस्यान्यसङ्क्रान्तत्वेन भगवत्प्राप्तिप्रतिबन्धकत्वाभावादिति ।

४ "—पूर्वा तु या" इति प्र. पाठः । "-पूर्वतया" इति क्वचित् प्रतनकोशे ।

५ "निर्दोषसुखरूपिणः" इति प्र. पाठः । ६ "यच्चासुरावेशात् कृतमेतेन" इति च ।

७ "कामाद् द्वेषाद् भयात् स्नेहाद् यथा" इति प्र. पाठः । आदौ कामेन स्नेहेन भयेन द्वेषेण बन्धुबुद्ध्या वा भक्त्या सहैव यथायोग्यमीश्वरे मन आवेश्य पश्चात् यथा यथाभूतया यथार्थया द्वेषाद्यकलुषितया केवलयेति यावत्- भक्त्या तद् द्वेषादिकृतमघं हित्वा बहवस्तद्गतिं गताः । स एव गतिस्तद्गतिः ।

८ "सहैव मन-" इति प्र. पाठः ।

९ "तदघं यत्तु द्वेषादि-" इति च । कामादीति वक्तव्ये द्वेषकृताघस्य प्राचुर्यात् प्राधान्यविवक्षया पाठक्रमा

[1]यथा यथाभूतया भक्त्या हित्वा ॥ * ॥

[2]गोप्यः कामाद् भयात् कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो ॥ ३१ ॥

"गोप्यः कामयुता भक्ताः कंसाविष्टः स्वयं भृगुः । ज्ञेयो भययुतो भक्तश्चैद्यादिस्था जयादयः । विद्वेषसंयुता भक्ता वृष्णयो बन्धुतायुताः[3] । बहुमानस्नेहसाम्याद्[4] देवा भक्ताः प्रकीर्तिताः । स्नेहोपसर्जनादेव [5]बहुमानान्मुनीश्वराः । बहुमानोऽपि देवानामृषिभ्योऽभ्यधिको[6] मतः । ब्रह्मवीन्द्रेन्द्रकामादेरितरेषां[7]

मपहाय द्वेषादीत्याह । ननु कामस्नेहाभ्यां किमघम् ? ममैवायं पतिरिति जगत्पतिं कामेन मन्यन्ते । ममायं बन्धुः सुहृदिति च सुहृदं सर्वभूतानां मन्यन्ते स्नेहेन बन्धुतया च । तेन माहात्म्यज्ञाने किंचित् ह्रास इव जायते । यथा गोपी पुत्रबुद्ध्या कृष्णमुलूखले बबन्ध । शकटादिपाते रक्षां चकार । यथा युधिष्ठिरः स्नेहात् कृष्णबोधितोऽपि जरासन्धवधे समशेत । तदघम् । तथाहि गीतायामर्जुनवचनम्—"सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति । अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वाऽपि" इत्यादि ।

१ "—मघं यथाभूतया" इति प्र. पाठः । क्वचित् कोशेषु च ।

२ अत्रापि भक्त्या सह । आदौ गोपीत्वदशायां भक्त्या सह कामान्मन आवेश्य । पश्चादप्सरस्त्वदशायां पक्वया भक्त्या तदघं हित्वा । कंस इति लोकदृष्ट्या । यः कृष्णाद् बिभ्यत् कृष्णं विवेशेति स्थूलदृशां प्रतीयते स न वस्तुतः कंसः । किंतु कंसाविष्टो भृगुः । शरीरैक्यादविवेकः । अतोऽत्र कंस इति कंसाविष्टो भृगुः । स पूर्वं कंसावेशदशायां भक्त्या सह भयान्मन आवेश्य । पश्चात् केवलया भक्त्या । चैद्यादय इति च तद्देहगता जयादय उच्यन्ते । तेऽपि असुरावेशदशायां भक्त्या सह द्वेषान्मन आवेश्य, पश्चात् केवलया भक्त्या तदघं हित्वा तद्गतिं गता इत्यादि योजनीयम् । एवमुत्तरत्रापि । यूयं युधिष्ठिरादयः, देवता इति यावत् । वयमिति नारदादय ऋषयः । युधिष्ठिरं प्रति नारदस्य हीदं वचनम् । भक्तेर्हि दलद्वयम्–माहात्म्यबुद्धिः प्रीतिश्चेति । तयोः साम्याधिक्याद् भक्तिस्त्रेधा भवति–क्वचिन्माहात्म्यबुद्धेः प्रीतिरधिका । यथेन्द्रादीनामर्जुनादित्वे । क्वचित्प्रीतेरपि माहात्म्यबुद्धिरधिका । यथा नारदादीनामृषीणाम् । क्वचिन्माहात्म्यबुद्धिरप्यधिका, प्रीतिरप्यधिका । यथा देवानाम् । तथाच स्नेहाद् यूयमित्यत्र यद्यवतारविवक्षा तदा स्नेहप्रधानया भक्त्येत्यर्थः । भक्तिरिति माहात्म्यज्ञानम् । स्नेहस्य पृथग् ग्रहणात् । यदा देवा एव विवक्ष्यन्ते तदा भक्त्या समप्रधानात् स्नेहात् । ऋषीणां तु स्नेहादप्यधिकया भक्त्या माहात्म्यज्ञानेनेति ।

३ "बन्धुसंयुताः" इति प्र. पाठः प्रामादिकः ।

४ बहुमानस्य माहात्म्यबुद्धेः स्नेहेन साम्यात् । बहुमानसमानात् स्नेहात् ।

५ स्नेहः उपसर्जनोऽङ्गभूतो यस्य तस्माद् बहुमानात् ।

६ "–मृषिभ्योऽप्यधिको–" इति प्र. पाठः । "–मृषिभ्यो ह्यधिको–" इति क्वचित् । "–मृषिभ्योऽभ्यधिको यतः" इत्येकस्मिन् प्राचीनकोशे ।

७ ब्रह्मादेरितरेषां च देवानां यथाधिकारं स्वस्वावरदेवेभ्यश्चाधिको मतः ।

यथापदम्[१]" इति ब्रह्मतर्के ॥ * ॥

कतमोऽपि न वेनस्य[२] पञ्चानां पुरुषं प्रति ।
तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत् ॥ ३२ ॥

कतमोऽपि भक्तियोगो न वेनस्य। तस्मात् केनापि प्रकारेण, उपायेन[३] मनो निवेशयेत्[४], नानुपायेन ।

"उपायो भक्तिरुद्दिष्टो द्वेषाद्या अनुपायकाः" इति शब्दनिर्णये ॥ * ॥

[५]मातृष्वसेयो वश्चैद्यो दन्तवक्त्रश्च पार्थिव[६] ।
पार्षदप्रवरौ विष्णोर्विप्रशापात् पदच्युतौ[७] ॥ ३३ ॥

स्वतो भक्ताश्चैद्यादयोऽपि परावेशाद् द्वेषिण इत्यत्र हेतुः-[८]मातृष्वसेय इत्यादि ॥ * ॥

दिग्वाससः शिशून् मत्वा द्वाःस्थौ तान् प्रत्यषेधताम् ।
अशपन् कुपिता एवं युवां वासं नचार्हथः ॥ ३७ ॥

रजस्तमोभ्यां रहिते पादमूले मधुद्विषः ।
पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः[९] ॥ ३८ ॥

[१०]द्वाःस्थावित्यनेनाधिकारस्थत्वमुक्तम्—

"अधिकारस्थिताश्चैव विमुक्ताश्च द्विधा जनाः । विष्णुलोकस्थितास्तेषां वरशापादियोगिनः । अधिकारस्थिता मुक्तिं नियतं प्राप्नुवन्ति च । विमुक्त्यनन्तरं तेषां वरशापादयो नतु । देहेन्द्रियासुयुक्ताश्च पूर्वं पश्चान्न [११]तैर्युताः । अप्यभीमानिभिस्तेषां देवैः स्वात्मोत्तमैर्युताः[१२]" इति तन्त्रसारे ॥ * ॥

---

१ "यथाक्रमम्" इति प्र. पाठः । २ "न वेनः स्यात्" इत्यर्वाचीनाः ।

३ "उपायेनैव" इति प्र. पाठः । क्वचित् कोशेष्वपि तथा ।

४ एकस्मिन् प्राचीनकोशे "मनोऽनुविनिवेशयेत्" इति पठ्यते । तत्पक्षे "तस्मात् केनाप्युपायेन मनोऽनुविनिवेशयेत्" इत्येव भागवतमूलपाठोऽपि स्यादिति भाति ।

५ "मातृष्वस्रेयो-" इति केचित् पठन्ति ।

६ "दन्तवक्त्रश्च पाण्डव" इति प्र. पाठः ।

७ "पदाच्च्युतौ" इति च । ८ "मातृष्वस्रेय-" इति प्र. पाठः ।

९ अतो हेतोरतो भगवत्पादमूलाद् भ्रष्टा आसुरीं योनिमाशु यातम् ।

१० "द्वारस्था-" इति क्वचित् । ११ "पश्चान्न ते जिताः" इति क्वचित् ।

१२ "स्वात्मोत्तरैर्युताः" इति च क्वचित् ।

तं सर्वभूतात्मभूतं[1] प्रशान्तं समदर्शनम् ।
भगवत्तेजसा स्पृष्टं नाशक्नोद्धन्तुमुद्यमैः ॥ ४३ ॥

सर्वभूतात्मनि भूतम् ॥ * ॥

ततस्तौ राक्षसौ जातौ केशिन्यां[2] विश्रवःसुतौ ।
रावणः कुम्भकर्णश्च सर्वलोकोपतापनौ ॥ ४४ ॥

[3]तावद्य क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव ।
अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ॥ ४६ ॥

वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्म्यताम्[4] ।
नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ४७ ॥

"हिरण्यकशिपुर्भूतमपश्यत[5] मृतौ हरिम् । अतो भयानको जातस्तत्र राजानमेव च । मत्वा राजैव सञ्जातः कृष्णं चक्रादिलक्षणैः । मृतिकाले हरिं[6]चैव मत्वा भक्त्यैव केवलम् । द्वास्थतां[7] हरिमाविश्य प्रापैव मनुजोऽपितु" इति गारुडे[8] ।

वैरानुबन्धः वैरयुक्ता भक्तिः—

"अनुबन्धस्तु भक्तिः स्याद् बन्धः स्नेह उदाहृतः" इति प्रकाशिकायाम्[9] ॥ * ॥

इति सप्तमस्कन्धे प्रथमोऽध्यायः

---

१ "सर्वभूतात्मभूतं तम्" इति प्र. पाठः । सर्वभूतान्तरात्मनि हरौ भूतं निहितमनसं तं प्रह्लादम् ।

२ "जातौ कैकस्याम्" इति वीरराघवः पठति। रावणमातुः कैकस्याः केशिनीति च नामान्तरमिति भाति ।

३ "तावेव क्षत्रियौ" इति प्र. पाठः ।

४ "–सात्मताम्" इति प्र. पाठः । "–साम्यताम्" इति केचित् पठन्ति । समान आत्मैव सात्म्यम् । तस्य भावः सात्म्यता एकशरीरत्वम् ।

५ "–मपन्यत" इति पाठान्तरम् । अतो रावणजन्मनि भयानको राक्षसो जातः । तत्र च रामं क्षत्रियं राजानममन्यत मृतौ । अतः शिशुपालजन्मनि क्षत्रियो बभूव ।

६ "हरिं चैकम्" इति क्वचित् । "हरिं त्वेकम्" इति च । "हरिं चैवम्" इत्यपि क्वचित् ।

७ "द्वास्थं तं हरि–" (?) इति क्वचित् पठ्यते। "द्वास्थत्वम्" इति प्र॰ पाठः ।

८ इतः परं प्र. पाठे–"विष्णुभक्तेश्च तज्ज्ञानादन्यतो मुक्तिवाचकाः। विष्णोर्गुणह्रासवाचः श्रीब्रह्मादेस्तथा क्रमात् । विष्ण्वादिद्वेषतश्चैव सुखवाचस्तथाऽखिलाः। मोहनार्थाः समुद्दिष्टा यथाऽर्थद्योतकास्तथेति प्रकाशसंहितायाम्" इत्यधिकं पठ्यते । प्राचीनपाठे त्विदं द्वितीयाध्याये पठ्यते। विजयध्वजीयेऽपि तथा ।

८ "प्रकाशसंहितायाम्" इति प्र पाठः ।

तस्य त्यक्तस्वभावस्याघृणे[1]र्मायावनौकसः ।
भजन्तं भजमानस्य बालस्येवास्थिरात्मनः ॥ ७ ॥
मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै ।
[2]युधि प्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः ॥ ८ ॥
[3]विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् ।
देवर्षिपितृभूतानां धर्मस्य च परायणम् ॥ ११ ॥
नित्य आत्माऽव्ययः शुद्धः सर्ववित् सर्वगः परः[4] ।
धत्तेऽसावात्मनो लिङ्गं मायया विसृजन् गुणान् ॥ २२ ॥

---

१ "-स्वभावस्य घृणे-" इति प्र· पाठः ।

२ "रुधिरप्रियम्" इति च । हरिः वैषम्यनैर्घृण्यहीन इति प्रथितं स्वभावं परित्यज्यास्मासु विषमस्य हरेः । अत एवाघृणेर्निर्दयस्य, मायया धृतवनवराहरूपस्य, यो भजति तमकार्येणाप्यनुवर्तमानस्य, शिशोरिव चपलबुद्धेस्तस्य युधि शूलेन ग्रीवां भित्त्वा तद्रुधिरेण भ्रातरं हिरण्याक्षं तर्पयिष्ये । तेन च गतव्यथो भविष्यामि । अत्र भगवत्परमर्थान्तरं च स्फुटम्– शापादिना त्यक्तनिजसात्विकभावस्य हिरण्याक्षादेर्विषये निर्दयस्य, तस्य निर्दयहननमपि शापमोक्षार्थत्वेन कृपाविशेष एवेत्यर्थः । त्यक्तो दत्तः स्वभावो येनेति हरेरेव विशेषणं वा । हिरण्याक्षस्य तामसस्वभावोऽपि तेनैव मुनिशापव्याजेन दत्त इति भावः । आघृणेः तत्संहारार्थमात्तेन क्रोधेन ज्वलितस्य । तथाह्यृग्वेदे प्रयोगः—"आघृणीवसो मा यातुर्यातुमावताम्" (८–६०–२०) इति । घृणिः कोपवाची च । तेनाघृणेः कोपरहितस्य वा । कृपयैव वधो न कोपेनेति । मायया स्वेच्छया धृतसूकररूपस्य । मुग्धशिशुवत् भक्तजनपराधीनस्य । "अर्भको न कुमारकः" इति श्रुतिः । अस्थिरात्मनः । स्थिरात्मा कठिनहृदयः । भक्तजनविषये शिशुवदेव मृदुहृदयस्य । भक्तानुकम्पिनः । मच्छूलाय मम दुःखायैव भिन्नग्रीवस्य नराकारदेहाद्विभिन्नसिंहग्रीवस्य हरेः नृहरेः समर्पितेन मम भूरिणा रुधिरेण प्रियं भ्रातरं तर्पयिष्ये । स यथा शापलब्धदेहहानेन गतव्यथो जातस्तथाऽहमपि भविष्यामीति ।

३ द्विजानां यज्ञादिक्रियाः मूलं यस्य तादृशो विष्णुः । अतो यज्ञादिध्वंसे मूलनाशात् समूलो विष्णुरपि नश्यतीत्यासुरं मतम् । पुण्यक्रियाः मूलं ज्ञानसाधनं यस्य तादृश इति परमार्थः । कर्मणा ज्ञानमातनोतीति श्रवणात् । यज्ञस्वरूपो धर्मस्वरूपश्च । अतस्तन्नाशे नश्यतीत्यासुरं मतम् । इज्यत्वाद् यज्ञः धर्मेषु धारकेषु मयः प्रधान इति परमार्थः । देवर्षिपित्रादीनां यो धर्माचारस्तस्य रक्षिताऽपि स एव । अतो धर्माचारभङ्गे तस्य रक्षितृत्वभङ्ग इत्यासुरं मतम् । देवर्षिपितृमनुष्याणां तद्धर्माणां चेति सर्वस्याऽश्रयो भगवानेवेति परमार्थः । अतो यत्रयत्र द्विजा गावो वेदादयश्च तन्तं पुण्यदेशं यात, यात्वा चाऽत्मज्ञानं सन्दीपयत, वृश्चत चाज्ञानमित्युत्तरश्लोकान्वयः । विष्णुविरोध्यर्थः स्फुट एव । एवमन्यत्रापि मोहनवचनेषु तात्विकमर्थान्तरं ग्राह्यम् ।

४ "शुद्धः सर्वगः सर्ववित् परः" इति प्र· पाठः । अन्ततो विष्णुभक्तत्वादिदानीं स्फुटमेव विष्णुं स्तौति — नित्य आत्मा । "नित्यो नित्यानां चेतनश्चेतनानाम्" इति श्रुतिः । सृष्टिकाले गुणान् गुणमयीं प्रकृतिं विविधं सृजन्,

यथाऽम्भसा प्रचलता तरवोऽपि चला इव ।
चक्षुषा भ्राम्यमाणेन दृश्यते[1] भ्रमतीव भूः ॥ २३ ॥

एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान् ।
याति तत्साम्यतां भद्रे ह्यलिङ्गो लिङ्गवानिव ॥ २४ ॥

"[2]विष्णुभक्तेश्च तज्ज्ञानादन्यतो मुक्तिवाचिकाः[3] । विष्णोर्गुणह्रासवाचः श्रीब्रह्मादेस्तथा क्रमात् । विष्ण्वादिद्वेषतश्चैव सुखवाचस्तथाऽखिलाः । मोहनार्थाः समुद्दिष्टास्तथाऽर्थद्योतकाः सदा[4]" इति प्रकाशसंहितायाम्[5] ॥ * ॥

मायया स्वेच्छयैव सृष्टेषु शरीरेषु आत्मनो भोगार्थं शब्दादीन् गुणान् विसृजन् जीवस्य लिङ्गं शरीरं स्वयमेव धत्ते । ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं प्राणादिपञ्चकं मनश्चेति एतत्षोडशकं लिङ्गमिति पुरस्तादेवोक्तम् । जीवस्तु शरीरे बद्धः । शरीरस्वामी तु हरिरेवेत्यर्थः । "पुरमेकादशद्वारमजस्य" इति श्रुतेः ।

१ "दृश्यते चलतीव" इति प्र· पाठः । अयं श्लोकद्वयार्थः—अम्भसा चलता तत्र प्रतिबिम्बितास्तरवोऽपि चलन्ति । तेन तद्बिम्बभूतास्तीरतरवोऽपि चलन्तीति प्रतीतिर्यथा भ्रान्तिः, यथा वा चक्षुषा भ्रमता भूमिरेव भ्रमतीति प्रतीतिश्च भ्रान्तिरेव, एवमेव सत्त्वादिगुणैः शब्दादिगुणैश्च विचाल्यमाने सति मनसि तेन मनोदोषेण भगवत्प्रतिबिम्बभूतः जीवोऽपि विचलितो भवति । किन्तु लिङ्गवानिव शरीरवान् जीव इव परमपुरुषोऽपि तत्साम्यतां मनःसमतां मनोदोषेण दुष्टत्वमिति यावत्, यातीति तु भ्रान्तेरियं परा काष्ठा । कुतः? अलिङ्गत्वात् प्राकृतदेहेन्द्रियादिशून्यत्वात्, अविकलत्वात् पूर्णत्वाच्चेश्वरस्येति । सम एव साम्यं तस्य भावः साम्यता ।

२ "विष्णुभक्तेश्च" इत्यादि समग्रं प्रकाशसंहितावचनं प्र. पाठे पूर्वाध्याये पठितमिति नात्र पठ्यते । "विष्णुभक्तैश्च" इत्येकस्मिन् प्राचीनकोशे । अर्थस्तु न स्फुटः । विष्णुभक्तैर्नारदाद्यैरुदिता वाच इति वा व्याख्येयम् ।

३ "–वाचकाः" इति पाठान्तरम् । ४ "–द्योतकास्तथा" इति च ।

५ "प्रकाशिकायाम्" इति च पाठान्तरम् । विष्णुद्वेषाच्चैद्यादयो मोक्षसुखमापुरिति पूर्वाध्याये प्रतीयते । अत्र च हिरण्यकशिपुः हरिं निहत्य गतव्यथो भवामीति हरिद्वेषेण सुखमाशंसते । द्विजानां यज्ञादिक्रियैव तत्प्राप्तिमूलमिति भक्तिज्ञानाभ्यामन्यतः कर्मादिनैव मोक्षं चाऽह । त्यक्तस्वभावस्येति तस्य गुणह्रासं चाऽह । तथा कदाचित् श्रीब्रह्मादेः क्रमाद् गुणह्रासोऽपि क्वचित् श्रूयते । तदेवमध्यायद्वयगतं प्रमेयजातं निर्दिधारयिषुरत्राध्यायस्याऽदित इदं प्रमाणवचनमुपनिबबन्ध । देहलीदीपन्यायेनोभयत्रापि प्रमाणं भवतीति । इदमुक्तं भवति—अन्ततोऽन्यार्थयुक्तमपि यन्नारदवचनं मुखतो द्वेषादिना मोक्षादिकं वदतीव तन्मोहनार्थम् । एवं हिरण्यकशिपोरासुरभावमूलं विष्णुनिन्दावचनमपि आसुरप्रकृतयस्तथैव जानन्त्विति मोहनार्थमेव निबबन्ध । अथापि नैकान्तत एषां वचनानां निन्दापरत्वं मन्तव्यम् । यतस्तेऽर्थद्योतकाश्च वास्तवार्थस्य भगवन्महिमातिशयस्य द्योतकाश्च भवन्ति । गुणगर्भाण्येव निन्दावचनानीति । तत्प्रकारस्तु पुरस्तादेवेषत्प्रदर्शितः । "यथार्थद्योतकाः सदा" इति प्र. पाठे स्फुटोऽर्थः ।

[1]धत्तेऽसावात्मनो लिङ्गम् । [2]जीवमनआदीनामाधारं ब्रह्म ॥ * ॥

लिङ्गवानिव जीव इव—

"असमं समतामेति भ्रान्तिदृष्ट्यैव केवलम् । जीवेन ब्रह्म न समं तत्वदृष्ट्या कथञ्चन"
इति षाड्गुण्ये ॥ * ॥

"विप्रयज्ञादि मूलं तु [3]हरेरित्यासुरं मतम् । हरिरेव हि सर्वस्य मूलं सम्यङ्मतेर्नृप[4]"
इति ब्राह्मे ॥ * ॥

[5]यथोदचालनाद्[6] वृक्षप्रतिबिम्बप्रचालनात् । तटस्थवृक्षचलनं कल्पयेदबुधो नरः । तथा मनसिजैर्दोषैराभासे दूषिते नरे[7] । आभासिनो ब्रह्मणश्च दोषमज्ञः प्रकल्पयेत् । आत्मनश्चक्षुषो भ्रान्त्या यथा पश्येद् भ्रमं भुवः । तथैव स्वात्मनो दोषाद् दोषवद् ब्रह्म पश्यति" इति ब्रह्मतर्के ॥ * ॥

---

१ प्र. पाठे तु अत्राऽदौ "विप्रयज्ञादिमूलं तु हरिरित्यासुरं मतम् । हरिरेव हि सर्वस्य मूलं सम्यङ् मतो नृपेति ब्राह्मे" इति पठित्वा ततः परं "धत्तेऽसावात्मनो लिङ्गम्–" इत्यादिवाक्यं पठ्यते । प्राचीनपाठे तूपरिष्टाद् ब्राह्म-वचनं भविष्यति । विजयध्वजीयेऽपि तथा । यद्यपि "विप्रयज्ञादि–" इत्येकादशश्लोकव्याख्यानम् ! "धत्तेऽसौ–" इत्यादि द्वाविंशस्य । ततश्च प्र. पाठ एव मूलक्रमानुसारी । अथापि क्रमं व्यत्यस्य व्याख्याने बीजमुपरिष्टा-द्वक्ष्यामः ।

२ आत्मन इत्यस्य विवरणं जीवेति । लिङ्गमित्यस्य मनआदीनामिति । जीवस्य यन्मनआदिसमुदायरूपं लिङ्गं तद् धत्ते ब्रह्म । न केवलं जीवस्य लिङ्गमेव किन्तु जीवमपि धत्त इत्यर्थविशेषं ध्वनयितुं जीवमनआदीनामिति समस्तं प्रायुङ्क्त । जीवानां मनआदीनां च धारकमिति । एतेन मूले आत्मन इति न षष्ठ्येव । किन्तु द्वितीया-बहुवचनमपि । आत्मनो जीवांश्च धत्ते । आत्मनो जीवस्य लिङ्गं शरीरं च धत्त इत्युक्तं भवति ।

३ "हरिरित्यासुरं मतम्" इति प्र. पाठः प्रामादिक एव । अयमर्थः । "नित्य आत्मा–" इत्यादिकं श्लोकत्रयं केवलं विष्णुस्तुतिपरमिति तावद् व्याख्यातम् । तर्हि "विष्णुर्द्विजक्रियामूलः" इत्यादिपूर्वश्लोकोऽपि किमिति विष्णुस्तुतिपरो न व्याख्यायते, किं मोहनार्थत्वकल्पनेन? एवं द्विधा योजने किं बीजम्? आह—विप्रयज्ञादि । विप्रयज्ञादिकं हरेरेव मूलमित्यासुरं मतम् । विप्रयज्ञादेः सर्वस्य हरिरेव मूलमिति तु सम्यग्ज्ञानिनो मतमिति प्रमाणवचनात् 'विष्णुर्द्विजक्रियामूलः' इत्यादिकमसुरावेशवशादुक्तम् । मोहनार्थत्वादर्थान्तरगर्भं चेति ज्ञायत इति । एवं पूर्वश्लोकव्याख्यानरूपस्यास्य प्रमाणवचनस्योत्तरश्लोकव्याख्यासमनन्तरसञ्जातशङ्कापनोदनार्थत्वात् पाश्चात्यत्वमिति ।

४ "सम्यङ् मतो नृप" इति प्र. पाठः । "सम्यङ् मते नृप" इति क्वचित् ।

५ इदानीं "यथाऽम्भसा–" इत्यादि समग्रं श्लोकद्वयं स्वाभिप्रायदार्ढ्याय स्फुटेन प्रमाणवचनेन व्याख्याति—यथोदेत्यादि । तेन न पूर्वश्लोकवदस्याऽसुरमतप्रतिपादकत्वम् । किंतु तात्विकार्थपरत्वमेवेति सुस्थितम् ।

६ "—चलनात्" इति प्र. पाठः ।

७ "नरः" इति प्र. पाठः प्रामादिकः ।

56

सम्भवश्च विनाशश्च शोकश्च विविधः स्मृतः ।
अविवेकश्च चिन्ता च विवेकस्मृतिरेव च[1] ॥ २६ ॥

विवेकस्मृतिः । अविवेकिन[2] एव विवेकित्वभ्रान्तिः[3] ।

"अन्तर्हिरण्यकादीनां भक्तिरस्त्येव केशवे । [4]असुरावेशतस्त्वन्यान् हरिस्तोतॄन् द्विषन्ति च" इति पाद्मे ॥ * ॥

अहो अमीषां वयसाऽधिकानां विपश्यतां लोकविधिं विमोहम्[5] ।
यत्रोद्भवस्तत्र गतं मनुष्यं स्वयं सधर्मा अनुशोचन्त्यपार्थम् ॥ ३७ ॥

यत्रोद्भवस्तत्र[6] गतम्—

"अदर्शनादिहाऽयातः पुनश्चादर्शनं गतः" इति भारते[7] ॥ * ॥

भूतानि तैस्तैर्निजयोनिकर्मभिर्भवन्ति काले न भवन्ति सर्वशः ।
न तत्र हाऽत्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो निबध्यते[8] ॥ ४१ ॥

अन्यतम आत्मा परमात्मा—

---

१ "विवेकास्मृतिरेव च" इति प्र. पाठः । २ "अविवेके" इति क्वचित् प्र. पाठः ।

३ "विवेकभ्रान्तिः" इति पाठान्तरम् । "विवेकत्वभ्रान्तिः" इति क्वचित् प्र. पाठः प्रामादिकः ।

४ नन्वेवं हिरण्यकशिपुना परमार्थत एव विष्णुपारम्यादिकमाविष्कृतम् । नचैतद् युक्तम् । तस्याऽसुरभावेन विष्णुद्वेषित्वात् । अत एव "विष्णुर्द्विजक्रियामूलः" इत्यादिवचनमासुरमततया व्याख्यातम् । नो चेत् तदपि विष्णुपरतया व्याख्यातुं शक्यम् । तस्माद्धिरण्यकशिपुना विष्णुस्तुतिरित्यसङ्गतमेवेत्यत आह—अन्तर्हिरण्यकादीनाम् । यदि भक्तिरस्त्येव तर्हि विष्णुं स्तुवन्तं प्रह्लादं किमिति विरुरोध? आह—असुरावेशतः ।

५ "विमोहः" इति प्र. पाठः । अहो इति धिगर्थे । नश्वरां लोकस्थितिं पश्यतामप्येषां मोहं धिक् । "अहो धिगर्थे शोके च करुणार्थविषादयोः । सम्बोधने प्रशंसायां विस्मये पादपूरणे । असूयायां वितर्के च प्रायशोऽहो प्रयुज्यते" इति हि वदन्ति । यत्र यतोऽव्यक्ताल्लोकादुद्भवः जननमासीत् तमेवाव्यक्तं स्वर्गादिकं मृत्वा गतं व्यर्थं शोचन्ति जननमरणाभ्यां तेन सधर्मा अपि । यत्र उद्भव उद्भूतः जात इति वा ।

६ "यत्रोद्भवं तत्र" इत्येकस्मिन् प्राचीनकोशे । क्वचिद् व्याख्यानेऽपि तथा यत्र यतोऽदर्शनादुद्भवः यस्य तं तदेव गतमिति व्याचक्षते । ७ "इति च भारते" इति क्वचित् ।

८ भवन्ति न भवन्ति जायन्ते म्रियन्ते च । तत्र जीवस्य जननमरणदशायां प्रकृतिकार्ये शरीरे जीवेन सह स्थितोऽपि जीवादन्यतमः परमात्मा जीव इव प्रकृतिगुणैर्न निबध्यते । हेति सकलशास्त्रप्रसिद्धमाह ।

"सुविरुद्धस्वभावत्वाज्जीवादन्यतमो हरिः" इति वामने ।

भगवन्माहात्म्यकथनेन सर्वस्य तद्वशत्वात् स एव भजनीयो न शोकेन प्रयोजनमिति फलितार्थः[1] ॥ * ॥

यथाऽनलो दारुषु भिन्न ईयते यथाऽनिलो देहगतः पृथक् स्थितः ।
यथा नभः सर्वगतं न सज्जते तथा गुणैः[2] सर्वगुणाश्रयः परः ॥ ४३ ॥

"देहदारुगतौ प्राणवह्नी सर्वगतं नभः । देहादिभ्यो यथा भिन्ना[3] न लिप्यन्ते च तद्गुणैः । तथा जीवगतो विष्णुर्जीवाद् भिन्नो न तद्गुणी[4]" इति च ॥ * ॥

सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ ।
यः श्रोता योऽनुवक्तेह स न दृश्येत कर्हिचित्[5] ॥ ४४ ॥

न श्रोता नानुवक्ता वा[6] मुख्योऽप्यत्र महानसुः ।
यस्त्विहेन्द्रियवानात्मा स चान्यः प्राणदेहयोः[7] ॥ ४५ ॥

---

१ "फलितोऽर्थः" इति क्वचित् ।

२ "तथा पुमान् सर्व-" इति प्र. पाठः । काष्ठगतो वह्निः काष्ठाद् भिन्नः । न सज्जते काष्ठगतैश्च दोषैः । देहगतः प्राणः देहाद्भिन्नः, देहगतैश्च दोषैर्न सज्जते । सर्वगतं नभः सर्वतो भिन्नमसक्तं च । तथा सर्वगुणाश्रयः, सर्वे गुणभूता ये जीवास्त एवाऽश्रयोऽधिष्ठानं यस्य सः, जीवगतोऽपि परमात्मा जीवगुणैर्न लिप्यते । तत् कुतः? यतः सर्वगुणाश्रयः परः । सर्वशुभगुणपूर्णः सर्वविलक्षणश्च ।

३ भिन्ना भिन्नानि । "सर्वा भूतानि" इतिवत् । "जीवाद् भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चला" इतिवच्च ।

४ "तद्गुणैः" इति प्र. पाठः प्रामादिकः ।

५ मूढा मृतबन्धवः, कमिह सुयज्ञं मन्यध्वे यं मृतं शोचथ? ननु देहम् । तर्हि न शोचितव्यम् । यतः सुयज्ञो नन्वयं शेते । तदेवं देहे पतिते तदविवेकेन सुयज्ञमेव मृतं मत्वा शोचतो बन्धूनाक्षिपति । ननु न देहं सुयज्ञं वदामः, येनैवमाक्षिप्यामहे, किन्तु योऽस्मिन् देहे पुराऽस्मद्भणितानि शृणोति स्म, तदनुकूलं प्रतिवक्ति च स्म तमद्यात्रापश्यन्तः शोचामः । आह—यः श्रोता । नायमपि सुयज्ञः, यः पूर्वमत्र देहे श्रोता वक्ताऽसीत् । भगवानेव हि मुख्यतः श्रोता वक्ता च । "नान्योऽतोऽस्ति श्रोता", "येन वागभ्युद्यते" इत्यादेः । स कदाचिदपि न दृश्यते, अव्यक्तत्वात् । अतस्तददर्शननिमित्तः शोकोऽपि मौढ्यमेव ।

६ "नानुवक्ता च" इति प्र. पाठः ।

७ ननु सति श्वासे शृण्वन् वदन्नासीत्; सम्प्रति गतश्वासो न शृणोति न वक्ति च । तेन श्वासमानी प्राण एव श्रोता वक्ता चेति निश्चिनुयाम । अतो गतप्राणमिमं शोचामः । तदपि न सम्यगित्याह– न श्रोता । मुखे श्वासानुमेयः मुख्यप्राणोऽपि मुख्यतो न श्रोता न वक्ता । भगवदायत्तमेव तस्यापि श्रोतृत्वादिकम् । उक्तं हि "ब्रह्मणा त्यक्तदेहस्तु मृत इत्युच्यते बुधैः" इति । तर्हि किमु वक्तव्यं जीवो न श्रोता वक्ता वेति । किं तर्हि पूर्वं जीवो

भूतेन्द्रियमनोलिङ्गान् देहानुच्चावचान् विभुः ।
भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा[1] ॥ ४६ ॥

यावल्लिङ्गान्वितो ह्यात्मा तावत् कर्मनिबन्धनः[2] ।
ततो विपर्ययः क्लेशो मायायोगोऽनुवर्तते ॥ ४७ ॥

वितथाभिनिवेशोऽयं यद् गुणेष्वर्थदृग् वचः ।
यथा मनोरथः स्वप्नः सर्वमैन्द्रियकं मृषा[3] ॥ ४८ ॥

इन्द्रियवान् जीवः । भजत्युत्सृजत्यन्यः[4] परमात्मा । स एव श्रोताऽनुवक्ता च । "नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता", "स योऽतोऽश्रुतः" इत्यादेः प्राणोऽपि[5] स्वतो न श्रोता किमु जीव इति । अयं ननु सुयज्ञ इत्याक्षेपः । यश्च सुयज्ञः सोऽपि स्वतः श्रोतुं[6] वक्तुं च न शक्तः[7] । अतस्तस्यानुशोकेन किमित्यर्थः ।

"अन्यो जीवोऽचितो देहात् तद्वशो देह उच्यते । पश्यामीत्यभिमानोऽस्य चक्षुराद्यभिमानवान् । न तद्वशाश्चक्षुराद्या न दृष्ट्यादौ स ईश्वरः । चक्षुराद्या मनो जीवो

नाऽसीदेव? आसीत् । कस्तावत् सः? आह– यस्तु । देहात्, प्राणात्, मुख्यतो वक्तुः श्रोतुरीश्वराच्च योऽन्यः इन्द्रियवान् अहं शृणोमि वदामीति श्रोत्राद्यभिमानवान्, ईश्वरप्रेरणामन्तरेण स्वयमशक्तोऽपि भ्रान्त्या स्वतः श्रोतृत्वादिकं स्वस्याभिमन्यते यः स आत्मा जीवः ।

१ उक्तो जीवः । इदानीमीश्वरव्यापारमाह—भूतेत्यादि । विभुर्व्याप्तः, सर्वनियामकश्च, अत एव जीवादन्यः परमेश्वरः जनिकाले जीवेन सह देहान् स्वयं प्रविशति, मृतिकाले चोत्सृजति । उक्तं हि—"या प्राणेन संविशत्यदितिर्देवतामयी" इति । कीदृशान् देहान्? पञ्चभूतदशेन्द्रियमनोरूपान् सुरनरतिर्यगादिभेदेनोच्चावचान् । ननु जीवः कर्मभोगाय भोगायतनं विशति; किमितीश्वरः? आह—तच्चापि । तच्चापि प्रवेशादिकं न जीववत् कर्मपरवशतया । किन्तु स्वमहिम्नैव । जीवान् भोजयितुं भगवतो लीलेयम् ।

२ "कर्म निबन्धनम्" इति प्र. पाठः । अयमर्थः—यावत् परमात्मा लिङ्गमन्वेति नवन्नवं देहं जीवेन सह प्रविशन्ननुवर्तते तावत् कर्मनिर्बद्धोऽयं जीवस्तत एवेश्वरात् विपर्येतीति विपर्ययो विपरीतः ज्ञानानन्दादिस्वरूपविपरीतो दुःखादिमान् संसारी भवति । संसारे च पुनःपुनः क्लेशः मायायोगः अविद्यायोगः शरीरयोगो वाऽनुवर्तते । यदा परमात्मा सर्वात्मना लिङ्गमुत्सृजति तदैव जीवोऽविपर्ययः सन् मुच्यत इति ।

३ गुणेषु त्रिगुणकार्येषु क्षुद्रतयाऽप्रधानेषु सांसारिकसुखेषु अर्थदृग् परमपुरुषार्थत्वदृष्टिः, वचस्तथा व्यवहारश्चेत्येतत् सर्वं वितथाभिनिवेशः व्यर्थमभिमानमात्रम् । यतः सर्वमैन्द्रियकं भोगजातमल्पास्थिरफलत्वान्मृषा वृथैव । तद् यथा मनोरथमयः स्वप्नः । स्वप्ने वित्तं विन्दन् अनेन वित्तेन प्रासादमासादयामीति स्वप्नमनोरथो यथा ।

४ "भजत्युत्सृजति ह्यन्यः" इति प्र. पाठः ।
५ "मुख्यप्राणोऽपि" इति च ।
६ "सोऽपि श्रोतुम्" इति क्वचित् ।
७ "वक्तुं नच शक्तः" इति प्र. पाठः ।

दृष्ट्यादिश्चापि यद्वशे[1] । स प्राण इति विज्ञेयो ज्ञाता मन्ता च स प्रभुः । तस्यापि ज्ञातृमन्तृत्वं न स्वतः शक्यते क्वचित् । यस्तस्य ज्ञातृमन्तृत्वदाता स भगवान् हरिः । स्वतो ज्ञाता च मन्ता च द्रष्टा श्रोता च केशवः । [2]ज्ञात्यादिदो न तस्यान्यः सर्वस्य ज्ञातिदो हरिः । स देहान् भजते विष्णुः स्वेच्छयैवोत्सृजत्यपि । यावद्देहस्थितो विष्णुस्तावज्जीवो विपर्ययः । तावत् क्लेशादयश्चास्य वृथा चेन्द्रियवृत्तयः । यदोत्सृजति देहं स हरिः सर्वात्मना विभुः । तदा तदभिमानी तु जीवो मुच्येत संसृतेः । अतिभिन्नस्वरूपौ तौ जीवेशावेकदेहगौ । देहाभिमानी[3] त्वेकोऽत्र न मानी मानदः परः" इति गारुडे । "इन्द्रियाद्यभिमानेन तद्वान् जीव उदीर्यते । अतन्मानाद्धरिः प्रोक्तस्त्वदेहोऽनिन्द्रियस्तथा । जीवानभिमते देहे न विष्णुर्जीवति[4] स्थितः । अतश्चादेह उद्दिष्टः परमात्मा सनातनः" इति प्रकाशिकायाम्[5] ।

स चान्यः श्रोतुर्वक्तुश्चेति चशब्दः । भूतेन्द्रियमनोरूपान्—

"लिङ्गं स्वरूपमुद्दिष्टं लिङ्गं ज्ञापकमेव च" इति शब्दनिर्णये ।

आत्मा परमात्मा । कर्मनिबन्धनो[6] जीवः । ततः परमात्मनो विपरीतः । मृषा वृथा । स्वप्नदृष्टवित्तादिवत् ।

"लेपाभिमानी[7] जीवस्तु स्वरूपानुभवी नच । मुक्तेः प्राक् तेन मान्युक्तो न मानी विष्णुरुच्यते । सर्वं ममेति पश्यन्नप्यलेपाभिमतिर्यतः । सम्यक् स्वरूपानुभवात् स्वतन्त्रत्वाददोषतः" इति ब्रह्मतर्के ॥ * ॥

बाल एवं प्रवदति सर्वे विस्मितचेतसः ।
ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितम्[8] ॥ ५८ ॥

---

१ "तद्वशे" इति क्वचित् ।

२ "ज्ञानादिदो न तस्यान्यः सर्वस्य ज्ञानदो हरिः" इति प्र. पाठः । ज्ञातिः ज्ञातृत्वम् ।

३ "जीवाभिमानी" (?) इति क्वचित् ।

४ जीवानभिमते अथापि जीवति देहे न स्थितः । स्थितो न जीवति; स्वजीवनार्थं न कञ्चन देहमधितिष्ठतीति वा ।

५ "प्रकाशसंहितायाम्" इति प्र. पाठः ।

६ "कर्मबन्धनो—" इति प्र. पाठः प्रामादिकः ।

७ लेपेन गुणसङ्गेनाभिमानवान् ।

८ देहगेहादिकं सर्वमनित्यम्; तत्राहन्ताममतादिकं सर्वमयथोत्थितं मिथ्यैव प्रतीतमित्यर्थः । अयथोत्थितमयथावत् प्रतीतं अनात्मभूतमनात्मीयं च देहगेहादिकमात्मत्वेनाऽऽत्मीयत्वेन च प्रतीतमिति वा । देहगेहादिकं सर्वमप्यपुरुषार्थभूतं पुरुषार्थत्वेन प्रतीतमिति वा । "अयथोत्थितम् । येन प्रकारेणोत्थितं तथा न तिष्ठति । अतोऽनित्यम्" इति विश्वनाथचक्रवर्ती । "अयथैवोत्थितमात्मतयोपस्थितं सर्वं देहेन्द्रियादिकमनित्यं मेनिरे" इति शुकदेवः ।

"अहम्ममाभिमानादि त्वयथोत्थमनित्यकम् । महदादि यथोत्थं च नित्या चापि यथोत्थिता । अस्वतन्त्रैव प्रकृतिः स्वतन्त्रो नित्य एव च । यथार्थभूतश्च पर एक एव जनार्दनः" इति च ॥ * ॥

ततः शोचत मा यूयं परं चाऽऽत्मानमेव वा[1] ।
क आत्मा कः परो वाऽत्र स्वीयः पारक्य एव वा ।
स्वपराभिनिवेशेन विनाऽज्ञानेन देहिनः[2] ॥ ६० ॥

क आत्मा कः पर इति देहाद्यपेक्षया ।

"नहि देहादिरात्मा स्यान्नच[3] शत्रुरुदीरितः । अतो दैहिकवृद्धौ वा क्षये वा किं प्रयोजनम् । यस्तु देहगतो जीवः स हि नाशं न गच्छति । अतः[4] शत्रुविवृद्धौ च स्वनाशे शोचनं कुतः । देहादिव्यतिरिक्तौ तु जीवेशौ प्रविजानताम्[5] । अत आत्मविवृद्धिस्तु वासुदेवे रतिः स्थिरा । शत्रुनाशस्तथाऽज्ञाननाशो नान्यः कथञ्चन" इति ब्रह्मवैवर्ते ॥ * ॥

इति सप्तमस्कन्धे द्वितीयोऽध्यायः

सृष्ट्वा चराचरमिदं तपोयोगसमाधिना[6] ।
अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनम् ॥ ९ ॥

---

१ "—मेव च" इति प्र. पाठः ।

२ "देहिनाम्" इति च । तस्मादहम्ममाभिमानस्य भ्रान्तिविलसितत्वात् परं हिरण्याक्षादिकं मृतत्वेन, आत्मानं च मृतबन्धुत्वेन मा शोचत । परं शत्रुमात्मानमात्मीयं च मा शोचत वा । तत्राहन्ताभ्रमं तावदाह—क आत्मा । स्वदेहे म्रियमाणे म्रियेऽहमिति शोचति । परदेहे च हा मृतोऽयमिति । तत्र क आत्मा कः परः ? नहि स्वदेहः स्वात्मा । नापि परदेहः परात्मा । किन्तु देहेऽहन्ताभ्रम एवायम् । एवं ममायं परकीयोऽयमित्यादिरपि व्यवहारो ममताभ्रान्तिमूलः । देहविषयत्वात् । उक्तं च-"यथा काष्ठं च काष्ठं च समेयातां महार्णवे । एवं भार्याश्च पुत्राश्च ज्ञातयश्च वसूनि च" इत्यादि रामायणे । ननु लोके दृष्टमिदं कथं वाङ्मात्रेण निषिध्यते? आह—स्वपरेति । स्वपरस्वीयपरकीयदुराग्रहग्राहजनन्या भगवत्याऽविद्यया विना देहिनः क आत्मा कः परः । अस्ति व्यवहारः । किन्तु योऽस्ति स न सन्निति । अज्ञानमूलत्वादसद्व्यवहारोऽयम् ।

३ "स्यान्नहि" इति क्वचित् । ४ "ततः" इति प्र. पाठः ।

५ "प्रतिजानताम्" इति च । ज्ञानिनां मते हरिरेवाऽऽत्मीयः, अज्ञानमेव शत्रुः, इतीयदेव सत्यम् । अन्यत् सर्वं भ्रम एव ।

६ तपश्चित्तैकाग्र्यमेव योग उपायस्तत्र समाधिना निष्ठया सर्वस्थानेभ्यः परं परमेष्ठी निजासनमध्यास्ते । तपः प्राणजयादिः । योगो वेदाध्ययनम् । समाधिर्ध्याननिष्ठेति वा ।

तदहं वर्धमानेन तपोयोगसमाधिना ।
कालात्मनोश्च नित्यत्वात् साधयिष्ये तथाऽऽत्मनः[१] ॥ १० ॥

"[२]जानतामपि कर्तव्यं कर्माऽत्मसदृशं सदा । तत्राऽत्मसदृशाज्ञानाद् रागाच्चैव[३] विमोहिताः। जानन्तोऽपि ह्यसदृशं कर्म कुर्युर्ऋते विभुम्। चतुरास्यं स नायोग्यं कर्म कुर्यात् कथञ्चन" इति नारदीये । "तपसा विद्यया[४] वाऽपि ज्ञानध्यानादिनाऽथवा । व्यस्तैः समस्तैरपि वा कुर्वतां यत्नमुत्तमम् । [५]सम्भारविक्षेपशतैर्बहुकोटिभिरेव वा । न शक्यन्ते समारोढुं [६]स्वात्मायोग्यपदानि तु । तथाऽप्याचरतां कुर्युर्दैत्यानां सुरनायकाः। विघ्नं तु तपआदीनां वैयर्थ्यस्यापनुत्तये[७]" इति प्रकाशिकायाम्[८] ॥ * ॥

अन्यथेदं विधास्येऽहमयथापूर्वमोजसा ।
किमन्यैः कालनिर्धूतैः कल्पान्तैर्वैष्णवादिभिः[९] ॥ ११ ॥

---

१ तत्पदमहमात्मनः ममैव यथा स्यात् तथा साधयिष्ये। यद्येकस्मिन् जन्मनि न शक्नुयाम्, बहुभिरपि जन्मभिः। कालो हि निरवधिरात्मा चानन्तः।

२ ननु परमेष्ठी जातापरोक्षः। तस्य किं तपआदिना ? आह—जानतामपि कर्तव्यम्।

३ "रागाद्यैर्वा" इति पाठान्तरम्। प्र. पाठोऽपि तथा। आत्मसदृशाज्ञानात्, इदमात्मसदृशमिदं नेति विविच्याजानन्तः केचिदसदृशं कर्म कुर्युः। यथा शम्बूको रुद्रपदमिच्छन् तपस्तेपे। केचिदिदमात्मासदृशमिति जानन्तोऽपि रागाद् द्वेषाच्च विमोहिताः कुर्युः। यथा हिरण्यकशिपुः।

४ विद्यया श्रवणमननाभ्याम्। ज्ञानध्यानमिति निदिध्यासनम्। एतेन तपोयोगसमाधिनेति मूलं व्याख्यातम्।

५ "संहार—" इति प्र. पाठः। योगशब्दः ज्ञानयोगपरतया पूर्वं व्याख्यातः। इदानीं कर्मयोगपरतयाऽपि व्याचष्टे–सम्भारेत्यादि। यज्ञसम्भाराणामग्नौ प्रक्षेपः सम्भारविक्षेपः। सम्भारस्य सम्पदो विक्षेपो वितरणमिति दानं च। उक्तं हि–"यज्ञदानतपः कर्म" इति। "सम्भारः सर्वपूर्णत्वम्" इति पुरुषोत्तमः।

६ "स्वात्मायोग्यापदानि" इति प्र. पाठः प्रामादिकः।

७ सम्पूर्णेऽपि तपसि हिरण्यकादयस्तत्पदं नाऽरोहन्त्येव। अयोग्यत्वात्। अथच फलस्यालाभात् तपसो वैयर्थ्यं भवति। तच्च न युक्तमिति तपसः सफलात्वायैवायोग्यकृतं तपो मध्ये विघ्नन्ति। नतु हिरण्यकादीनां ब्रह्मपदं स्यादिति भिया।

८ "प्रकाशसंहितायाम्" इति पाठान्तरम्। प्र. पाठोऽपि तथा।

९ "कल्पान्ते वैष्णवादिभिः" इति प्र. पाठः। पूर्वं देवाः स्वर्गनायका आसन्। देवद्वेषिणश्च तमोऽलभन्त। मयि तपःसामर्थ्येन पारमेष्ठ्यमध्यासीने सर्वमिदन्यथा विधास्ये। दैत्या एव स्वर्गपतयः, देवद्वेषिणामेव स्वर्ग इत्यादिदं तदर्थं पारमेष्ठ्यमेव प्रेप्सामि। किमन्यैः परमेष्ठिनिर्मितैस्तन्नियन्त्रितैः, ये चिरं भवन्ति कल्पपर्यन्तं भवेयुः। वैष्णवः ब्रह्मा आदिः कारणं येषां तानि स्थानानि वैष्णवादीनि। यो ब्रह्मत्वमेवेच्छति तस्य तन्निर्मितेषु लोकेषु का लिप्सेति द्योतयितुमिदं विशेषणम्।

वैष्णवादिभिः ब्रह्मनिर्मितैः—

"ब्रह्मा स्वयम्भूर्द्रुहिणो वैष्णवः शतक्रतु[1] तथा" इति शब्दनिर्णये ॥ * ॥

[2]तवाऽऽसनं हि जगतां पारमेष्ठ्यं जगत्पते ।
भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च ॥ १२ ॥

भवाय श्रेयसे । न कश्चित् तदपेक्षते[3]—

"मधुकैटभयोश्चैव हिरण्यादेस्तथैव च । नान्यो ब्रह्मपदं वाञ्छत्यृजून् योग्यान् विना क्वचित् । ततः श्रेयांसि वाञ्छन्ति नतु तत्पादमाप्तये[4]" इति ब्रह्माण्डे । "भवो वृद्धिः समुद्दिष्टा श्रेयो मोक्ष उदाहृतः । [5]वृद्धस्य पुनरह्रासो भूतिरित्येव शब्द्यते[6]" इति शब्दनिर्णये ॥ * ॥

"[7]सकामं तु तपः क्रूरं लोकानां क्षोभकृद्[8] भवेत् । इतरच्छान्तये सर्वलोकानां भवति

---

१ "शतधृत् तथा" इति पाठान्तरम् ।

२ "तवाऽऽसनं द्विजगवां पारमेष्ठ्यम्" इति प्र. पाठः । जगतामिह भवाय समृद्ध्यै, भूत्यै समृद्धस्य पुनरनपगमाय, अत एव क्षेमाय प्राप्तपालनाय, विजयायोत्कर्षाय कामादिशत्रुजयाय च, अन्ते पुनः श्रेयसे मोक्षाय च तवाऽऽसनं भवति ।

३ प्र. पाठे तु "भवाय श्रेयसे चैव न कश्चिन् तदपेक्षते" इतीदं ब्रह्माण्डवचनत्वेन पठ्यते । अन्वयस्तु न स्वरसः । प्राचीनपाठे चायमर्थः । 'भवाय श्रेयसे' इति प्रतीकं गृह्णन् श्लोकध्वनितमर्थमाह—न कश्चित् तदपेक्षते । यतः तव पारमेष्ठ्यं जगतामिह भवाय परत्र श्रेयसे स्यात्, ततस्त्वत्तो भवं श्रेयश्चाऽऽकाङ्क्षन् न कश्चित् तदपेक्षते । यद्यन्यस्तदाक्रमितुमपेक्षेत, जगतां भवश्रेयसोर्विप्लवः स्यात् । तदर्थं हिरण्यकशिपुर्निग्रहीतव्य इति । न हि ब्रह्मणः पारमेष्ठ्यभङ्गभिया देवानामिदं प्रार्थनम्, किन्तु जगतां भवश्रेयसोर्भङ्गभियेति हृदयम् ।

४ "तत्पदमाप्नुयुः" इति प्र. पाठः प्रामादिकः । "तत्पदमाप्तये" इति पाठान्तरं च मूलपाठापरिज्ञानमूलम् । अयमर्थः- श्रेयांसीति बहुवचनमाद्यर्थे । ततो हेतोस्ततो ब्रह्मणः सकाशात् श्रेयोभूत्यादिकमेव वाञ्छन्ति । नतु तत्पदमाप्तवे आप्तुं वाञ्छन्ति । हन्तव इतिवदाप्तव इति छान्दसं रूपम् । ननु कथं तर्हि हिरण्यकादिस्तत्पदमाप्तवे ववाञ्छ? आह—ततः श्रेयांसि । ततो हेतोः य आत्मनः श्रेयांसि स्युरिति वाञ्छन्ति न ते तत्पदमाप्तवे वाञ्छेयुरिति ततश्च तेषां मोहादात्मश्रेयोविघातनी प्रवृत्तिरियम् ।

५ "वृद्धस्य न पुनर्ह्रासो-" इति प्र. पाठः ।

६ "कथ्यते" इति च

७ न केवलमियं प्रवृत्तिरात्मविघातनी । लोकतापनी चेत्याह—सकामं तु । किञ्च ननु तपसा लोकशान्तिरिष्यते । कथं लोकतापः? आह- सकामं तु । असदृशकामनया कृतमत एव लोकतापकम् । एतेन प्रमाणवचनेन सिंहावलोकननयेनाध्यायारम्भ उक्तानि लोकक्षोभवचनानि चोक्तार्थानि । तथाहि-"तस्य मूर्ध्नः समुद्भूतः सधूमोऽग्निस्तपोमयः । तिर्यगूर्ध्वमधोलोकानतपद् विश्वगीरितः । चुक्षुभुर्नद्युदन्वन्तः सद्वीपाद्रिश्चचाल भूः । निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश । तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः । धात्रे विज्ञापयामासुर्देवदेव जगत्पते । दैत्येन्द्रतपसा तप्ते दिवि स्थातुं न शक्नुमः । तस्य चोपशमं भूमन् विधेहि यदि मन्यसे" (४-७) इति ।

८ "लोकानां भयकृद्-" इति प्र. पाठः ।

भुवम्" इति प्रकाशिकायाम् । "[1]ब्रह्माणमभजद् ब्रह्मपदार्थं स हिरण्यकः" इति स्कान्दे ॥ * ॥

व्यवसायेन तेऽनेन दुष्करेणामनस्विभिः[2] ।
तपोनिष्ठेन भवता जितोऽहं दितिनन्दन ॥ २० ॥

जितः वशीकृतः—

"पराभूतं वशस्थं च जितमित्युच्यते बुधैः" इति शब्दनिर्णये ॥ * ॥

कल्पान्ते कालसृष्टेन योऽन्धेन तमसाऽऽवृतम् ।
अभिव्यनग् जगदिदं स्वयञ्ज्योतिः स्वरोचिषा[3] ॥ २६ ॥

आत्मना त्रिवृता चेदं सृजत्यवति लुम्पति ।
रजःसत्त्वतमोधाम्ने पराय महते नमः[4] ॥ २७ ॥

"प्रायस्तु स्तुतिशब्देषु मिश्रा वाचो[5] हरिं विना । केचिज्जीवगुणास्तत्र तन्नियन्तुर्हरेः परे । एकस्थानैककार्यत्वाद् विष्णोः प्राधान्यतस्तथा । जीवस्य तदधीनत्वान्न भिन्नाधिकृतं वचः" इति ब्रह्मतर्के ॥ * ॥

त्रिवृता प्रकृत्या ॥ * ॥

---

१ ननु ब्रह्मपदप्राप्त्यर्थमेव हिरण्यकशिपुस्तपश्चक्र इति कथं देवा व्यज्ञापयन् । यदि तदर्थं तपोऽकरिष्यत् तदा तथैव वरमवरीष्यत । अत आह—ब्रह्माणम् । ब्रह्मपदार्थं ब्रह्मपदप्राप्त्यर्थम् । एतेन "सृष्ट्वा चराचरमिदम्–" इत्यादि श्लोकद्वयं (९-१०) प्रमाणान्तरसंवादेन व्याख्यातं भवति ।

२ "दुष्करेण मनस्विनाम्" इति प्र. पाठः । तपोनिष्ठेन भवता ते तवानेन व्यवसायेन च जितोऽहम् ।

३ प्रळयकालप्रवर्तकत्वात्, संहर्तृत्वात्, गुणपूर्णत्वाच्च कालनामकेन भगवता सृष्टेन, काल इति तमोभिमानिनी दुर्गा च तया निसृष्टेन प्रकृतिगुणरूपेण तमसाऽऽवृतम् । अभिव्यानक् स्वरोचिषा व्यक्तमकरोत् । तस्मै पराय महते नम इत्युत्तरत्रान्वयः ।

४ यच्च सृष्ट्यादौ आत्मना स्वयमेव स्वेच्छया त्रिगुणवृता प्रकृत्या रजसा सृजति । सत्वेनावति । तमसा लुम्पति । तस्मै रजःसत्वतमसामाश्रयाय नम इति ब्रह्मान्तर्यामिणं विष्णुं स्तौति । भाष्योदाहृतब्रह्मतर्कमानात् । चतुर्मुखपक्षे आत्मना परमात्मना तदनुग्रहेणेति यावत् । महते महत्तत्वाभिमानिने ।

५ ब्रह्मादिजीवं तदन्तर्यामिणं हरिं च मिश्रीकृत्योभयपरतया स्तुतिवाचः क्वचित् प्रवर्तन्ते । तस्यापवादमाह—हरिं विना । यत्र हरिरेव स्तूयते तत्र नेतरपरता । यत्रेतरे स्तूयन्ते तेऽपि तन्नियामकस्य हरेरेव मुख्या भवन्ति । परेऽन्ये हरेरेव भवन्ति । मिश्रत्वं विवृणोति– एकेत्यादि । ब्रह्मणा सह विष्णुरपि तद्देहे स्थित इत्येकस्थानत्वम् ।

57

त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानाम् ।
चित्तस्य[1] चित्तिर्मनइन्द्रियाणां[2]पतिर्महाभूतगुणाशयेशः ॥ २९ ॥

प्राणेन सह ॥ * ॥

त्वं सप्ततन्तून् वितनोषि तन्वा[3]त्रय्या चतुर्होत्रकविद्यया च ।
त्वमेक आत्माऽऽत्मवतामनादिरनन्तपारः कविरव्ययात्मा[4] ॥ ३० ॥

सप्ततन्तून् सप्तक्रतून्[5] ॥ * ॥

ब्रह्मणि स्थितः स्वयं वरं ददाविर्त्येककार्यत्वम् । तत्रापि प्रेरकतया विष्णोरेव प्राधान्यमिति स एव मुख्यार्थः। तदधीनतया जीवोऽप्यर्थः। तस्माद्यत्रान्तर्यामिविवक्षया मिश्रा स्तुतिस्तत्र न भिन्नाधिकृतं वचः। भिन्नमिन्नतय । केवलमीश्वरं जीवं वाऽधिकृत्य न स्तुतिवचनं प्रवर्तते । किंतु हरिस्तद्द्वाराऽपेक्षितो जीवश्च स्तूयते। अन्तर्यामिणि प्रसन्ने तद्द्वारा जीवश्च प्रसीदतीति ।

१ "चित्तेर्मन—" इति प्र. पाठः ।

२ "पतिर्महान् भूत—" इति च। मुख्यप्राणेन सहितः त्वमेव स्थावरजङ्गमयोरिशिषे । चित्तस्य चित्तिः स्मरणशक्तिप्रदस्त्वमेव। महाभूतानामाकाशादीनां गुणानां शब्दादीनामाशयस्याहङ्कारस्य च त्वमेवेशः। त्वदधीनं प्राणेऽपीशितृत्वमिति। प्राणेन सहितयोः स्थावरजङ्गमयोस्त्वमेवेशिष इति वा। अत्र प्राणस्यापीशितव्यकोटौ प्रवेशः। प्राधान्यात् पृथङ् निर्देशः । अर्थद्वयमपि भाष्यसूचितम्। चतुर्मुखपक्षे तु मुख्यप्राणेन सहितस्त्वमित्येव ।

३ "त्रय्या चातुर्होत्रक–" इति प्र. पाठः। "त्रय्या चतुर्होतृक–" इत्यपि पठन्ति ।

४ "कविरन्तरात्मा" इति प्र.पाठः। तन्वाश्रितया प्रतिमावच्छरीरस्थानीयया वा त्रय्या, त्रिभिर्वेदैः, त्वं सप्तधा तन्तून् यज्ञान् विस्तारयसि। कीदृश्या त्रय्या? चतुर्होत्रकविद्यया। होताऽध्वर्युरुद्गाता ब्रह्मेति चतुर्भिः होतृभिः ऋत्विग्भिः निष्पाद्यं कर्म चतुर्होत्रकम्। तद्विद्यया । यद्यपि सर्वोऽपि वेदः मुख्यतो ब्रह्मविद्यैव। न केवलं तावत् । अमुख्यतः कर्मविद्यारूपयाऽपि तया भगवत्सृष्टयज्ञादिविधिद्वारा भगवन्महिमैव वितन्यत इति। एतदेवोक्तम्— "मां विधत्तेऽभिधत्ते माम्" इति। आत्मवतां प्राणिनामात्माऽन्तर्यामी। आत्मवतां ज्ञानिनामात्मा प्रिय इति वा। "ज्ञानी त्वात्मैव मे" इति हि गीतासु। अनन्तः कालदेशाभ्यामपारश्च गुणतः। यद्वा स्वयमनन्तमहिमा, अन्येषां महिम्नां पारभूतश्च। उक्तं हि "न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप" इति । अव्ययानां मुक्तनामात्मा स्वामी। अप्राकृतस्वरूपो वा। चतुर्मुखपक्षे अनन्तो विष्णुरेव पारं यस्य। अव्यये विष्णावात्मा मनो यस्य। एवमु[illegible]त्रापि ।

५ अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्याम इति सप्त सोमक्रतवः। अतः सप्तधा तन्यत इति सप्ततन्तुर्यज्ञः। तन्तुरित्यपि यज्ञनाम भवति। "सप्ततन्तून् सप्तविधान् तन्तून् । तन्यन्ते विस्तार्यन्त इति तन्तवो वैदिकाः क्रियाः" इति वीरराघवः। "तन्यन्ते विस्तार्यन्त इति तन्तवस्तान् अग्निष्टोमादियज्ञान्" इति शुकदेवः। एतेन "सप्ततन्तून् क्रतूनित्येव तात्पर्यम्। सप्तक्रतूनित्यपपाठः" इति वदन्तश्चिन्त्याः।

त्वमेव कालोऽनिमिषो जनाना[1]मायुः कलाद्यावयवैः क्षिणोषि ।
कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा[2] ॥ ३१ ॥

जीवानां प्राणधारकः[3] ॥ * ॥

त्वत्तः परं नापरमप्यनेजदेजच्च किञ्चिद् व्यतिरिक्तमस्ति ।
[4]विद्याकलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत् त्रिपृष्ठः[5] ॥ ३२ ॥

"परापरेषु[6] यस्मात् त्वं व्याप्तो विष्णो सनातन[7] । तस्मान्न [8]व्यतिरिक्तं त्वदित्याहुर्वेदवादिनः[9]" इति पाद्मे ।

विद्याः[10] कलाश्च विद्याकलाः ।

"महाविद्याः कलाश्चैव त्वत्तनावाश्रिता यतः । विद्यातनुरिति प्राहुरतस्त्वां तत्ववेदिनः" इति च ।

त्रिपृष्ठः तुरीयः ।

---

१ "—मायुर्लवाद्या—" इति प्र. पाठः ।

२ कालः कालनियामकः संहारकृच्च । "निमिषोऽनिमिषः स्रग्वी" इति सहस्रनामसु । तेनात्रापि द्वेधा च्छेदः सम्भवी । कलाद्यैः कालावयवैर्जनानामायुः क्षिणोषि । कूटस्थो निर्विकारः । परमे व्योम्नि स्वे महिम्नि वा प्रतिष्ठितः । "महानज आत्मा" इति श्रुतिः । जीवराशेर्जीवो जीवनप्रदः । आत्माऽऽदानादिकर्ताऽन्तर्यामी ।

३ एकस्मिन् प्राचीनकोशे "प्राणधारक" इति सम्बुद्ध्यन्तं पठ्यते । तदात्वे तु पाद्मवचनशेषोऽयम् । "जीव प्राणधारणे" इति धातुः । "जीवलोकस्य जीवो जीवनहेतुः । यतस्तस्याऽऽत्मा नियन्ता" इति श्रीधरस्वामी । "कृत्स्नस्य जीवलोकस्य जीवो जीवयिता" इति वीरराघवः ।

४ "विद्याः कलास्ते" इत्यर्वाचीनाः ।

५ अनेजदचेतनम् । एजच्चेतनं च । परं भूतम् । अपरं भविष्यच्च वर्तमानं च । एतत् सर्वं त्वत्तो व्यतिरिक्तं नास्ति । "न तदस्ति विना यत् स्यान्मया भूतं चराचरम्" इति, "सर्वं समाप्नोषि ततोऽसि सर्वः" इति च गीतासु । "पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम्" इति श्रुतिः । वेदविद्याः कला अवान्तरविद्याश्च ते तनुमाश्रिताः । "तनुर्विद्या क्रियाऽऽकृतिः" इति पूर्वमुक्तम् । हिरण्मयं ब्रह्माण्डं गर्भे यस्य । बृहत् ब्रह्मासि । त्रिपृष्ठः अवस्थात्रयातितः । उक्तं हि "यदसुप्तिगतो वरिनः सुखवान्" इत्यादि ।

६ "परावरेषु" इति पाठान्तरम् ।

७ "विष्णुः सनातनः" इति प्र. पाठः ।

८ "व्यतिरिक्तत्वमित्या–" इति क्वचित् ।

९ "—त्याहुर्वेदवेदिनः" इति च ।

१० "विद्याश्च कलाश्च" इति पाठान्तरम् ।

"ब्रह्मणोऽप्यधिकं विष्णुं जानन्नपि हिरण्यकः । ब्रह्माणं तद्गुणैः स्तौति तद्गविष्णुविवक्षया" इति च ॥ * ॥

इति सप्तमस्कन्धे तृतीयोऽध्यायः

एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः[१] ।
भगवत्यकरोद् द्वेषं भ्रातुर्वधमनुस्मरन् ॥ ४ ॥

"स्वतो भक्ता हिरण्याद्याः परावेशाद्धरौ द्विषः[२]" इति च ॥ * ॥

तस्मिन् महेन्द्रभवने महासुरो[३] महाबलो निर्जित एकराट् ।
रेमेऽभिवन्द्याङ्घ्रियुगः सुरादिभिः प्रतापितैरूर्जितचण्डशासनः[४] ॥ १२ ॥

तमङ्ग मत्तं मधुनोरुगन्धिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः ।
उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदम्[५] ॥ १३ ॥

"आदित्या वसवो रुद्रास्त्रिविधा हि सुरा यतः । मरुतश्चैव विश्वे च साध्याद्याश्चैव तद्गताः[६] । अतस्त्रय इति प्रोक्ताश्चत्वारो [७]मानुषाः स्मृताः" इति स्कान्दे । "[८]उपायनं

---

१ "-मयं विभुः" (?) इति क्वचित् कोशे । २ स्वभावतः पुरा तुष्टाव । असुरावेशात् परस्तात् दिद्वेष ।

३ "-भवने महाबलो महामना निर्जित—" इति प्र. पाठः ।

४ ऊर्जितं सर्वैरपि भयादेवानुष्ठितं प्रचण्डं शासनं यस्य । अत एव प्रतापितैः सुरादिभिरभिवन्द्यः । अत्र सुरा इति यज्ञभागभुजः शतस्थान् देवान् तत्समकक्ष्यांश्च विहायान्य एवाप्रधानदेवा विवक्षिताः । तात्पर्योदाहृतप्रमाणसंवादात् ।

५ अङ्ग धर्मराज, अशेषधिष्ण्यपाः सर्वेऽपि स्थानाधिकृताः उपायनोपेतपाणिभिरुपासत । तपसः योगशक्तेरिन्द्रियबलस्य चाऽश्रयम् । अशेषपदस्यापवादमाह—त्रिभिर्विना । आदित्यवसुरुद्रभेदेन त्रिविधैर्यज्ञभागहरैः शतस्थैर्देवैर्विना अन्येऽशेषधिष्ण्यपाः क्षत्रिया अवान्तरदेवाश्च ।

६ "साध्याश्चैव च तद्गताः" इति प्र. पाठः । मरुदाद्यास्तद्गता आदित्यगणान्तर्गताः । अतस्त्रय एव वसुरुद्रादित्यास्त्रिकालं यज्ञेषु हूयन्ते ।

७ चतुर्वर्णतया चातुर्विध्यात् चत्वारो मानुषाः स्मृताः ।

८ ननु किमेवं व्याख्यायते । त्रिभिर्ब्रह्मविष्णुरुद्रैर्विनेत्येव किं नार्थः स्यात्? न स्यात् । प्रमाणान्तरविरोधादित्याह—उपायनम् ।

ददुः सर्वे विना देवान् हिरण्यके" इति च[१]। "अयज्ञभागेष्वपि तु सुरशब्दः प्रदिश्यते[२]। यज्ञभागभुजस्त्वेव त्रय इत्यभिशब्दिताः" इति च ॥ * ॥

निर्वैराय प्रशान्ताय स्वसुताय महात्मने ।
प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम् ॥ २९ ॥

"[३]यत्र क्वच यशःस्थानमन्येषामिति केशवः। सर्वत्रापितु देवानामित्यन्यान् पूजयेत् क्वचित्" इति च ॥ * ॥

यस्मिन् महद्गुणा[४] राजन् गृह्यन्ते कविभिर्मुहुः ।
[५]न तेऽधुनाऽपि गीयन्ते यथा भगवतीश्वरे ॥ ३५ ॥

"[६]अन्येषां हरिसाम्यं तु किञ्चित् साम्यमुदीरितम्। सम्यक् साम्यं तु मत्स्यादेरिति शास्त्रस्य निर्णयः" इति च ॥ * ॥

इति सप्तमस्कन्धे चतुर्थोऽध्यायः

---

१ ननु तर्हि स्ववचनेनैव विरोधः। सुरादिभिरित्युक्तत्वात्। तदिदमेकसन्धानेऽपरच्युतिर्नाम। नेत्याह– अयज्ञभागेषु। न विद्यते यज्ञभागो येषां तेष्वमुख्यदेवेषु।

२ "प्रदृश्यते" इति प्र. पाठः।

३ ननु देवेभ्यो द्रुह्यन्नपि नाहन्यत। प्रह्लादाय तु द्रुह्यन् घानिष्यते। तत् कोऽयं पक्षपातः प्रह्लादे? आह— यत्र क्वच। देवेभ्योऽन्येषां यत्रकुत्रापि क्वचिदेव यशोवकाश इति, देवानां तु सदाऽपि यशोभाक्त्वमिति च विचिन्त्य केशवः कचित् देवेभ्योऽवमानपि प्रह्लादादीन् प्रशस्य तेषां यशो विस्तारयति। यथा बालान् प्रोत्साहयन्तौ पितरावधिकं प्रशंसतः।

४ "महागुणा–" इति पाठान्तरम्।

५ "न तेऽधुनाऽपिधीयन्ते" इति च। "न तेऽधुनाऽभिधीयन्ते" इत्येके। महतामेव योग्या महान्तो ये गुणास्ते प्रह्लादे कविभिर्गृह्यन्ते। अधुनाऽपि तद्गुणगानं श्रूयत इत्याह—किं न तेऽधुनाऽपि गीयन्ते? गीयन्त एव हि। यथा भगवति महागुणाः कविभिर्गृह्यन्ते गीयन्ते च।

६ ननु विषमोऽयमुपन्यासः। भगवता प्रह्लादस्य किं साम्यम्, पर्वतेन परमाणोरिव? आह—अन्येषाम्। तर्हि किमर्थमेतादृशमुपमानमुपादत्तेति शङ्कायाः "यत्र क्वचेति" पूर्ववचनमेवोत्तरम्।

स यदाऽनुगतः[1] पुंसां पशुबुद्धिर्विभिद्यते ।
अन्य एष तथाऽन्योऽहमिति देहगताऽसती[2] ॥ १२ ॥

"स्वातन्त्र्येणान्यसद्भावनिषेधाय श्रुतिस्त्वियम् । अन्योऽसावन्योऽहमिति पश्यन्नज्ञ इति स्म ह । आत्मानमन्तर्यमयेदिति भेदं स्वरूपतः । आह तद् ब्रह्मणोऽधीना भिन्ना जीवाः सदैव तु । स्वरूपसत्ताकर्तृत्वं भोगो मोक्षस्तथैव च । मुक्तस्यावस्थितिश्चैव सर्वं विष्णोर्वशे सदा" इति ब्रह्मतर्के ॥ * ॥

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ २३ ॥

आत्मस्थत्वेन वेदनमात्मनिवेदनम् —

"मुक्तस्यापि ममान्तस्थो नियन्तैव हरिः सदा । इति ज्ञानं समुद्दिष्टं सम्यगात्मनिवेदनम्" इति च ॥ * ॥

[3]न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेन्द्रशत्रो ।
नैसर्गिकीयं मतिरस्य राजन् नियच्छ मन्युं क्व तदाऽऽत्ममानः[4] ॥ २८ ॥

---

१ "-नुव्रतः" इति प्र. पाठः ।

२ "-मिति भेदगताऽसती" इति च । यदा स भगवान् तत्तद्योग्यतानुकूलतया तत्तद्भावप्रेरको भवति तदा पुंसां पशुबुद्धितुल्या बुद्धिर्विविधाकारा प्रवर्तते । का पशुबुद्धिः? अन्य एष तथाऽन्योऽहमिति । अयमप्यन्यः स्वतन्त्रः, अहमप्यन्यः स्वतन्त्र इति । तथाहि श्रुतिः—"योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः" इति । स्वस्य स्वातन्त्र्यभ्रम एव पशुबुद्धिरित्येतत् । सेयं बुद्धिर्देहगताऽसती । देहात्मवेदिनामेव भवति । देहातिरिक्तमात्मानं परमात्मानं च विजानतां न भवति । अत एव यदा स भगवान् पुंसामनुगतः उद्दिधीर्षयाऽनुकूलो भवति तदेयं देहात्माविवेकजा पशुबुद्धिर्विभिद्यते विनश्यतीत्येतत् । उक्तं हि—"भिद्यते हृदयग्रन्थिः" इत्यादि ।

३ "मम प्रणीतं न परप्रणीतम्" इति प्राचीनकोशे पठ्यते । तदा नञ आवृत्त्यान्वयः । न मया पाठितं नवा परेण प्रेरितं तव सुतो वदति ।

४ "मन्युं कददाः स्म मा नः" इत्यर्वाचीनाः । यत इयं हरिविषया मतिस्तव सुतस्य नैसर्गिकी तस्मादस्मासु मन्युं नियच्छ । तदा एवं सति "असारं ग्राहितो बालो मामनादृत्य" (२६) इति यत् त्वया शङ्कितं तथाविधस्त्वदनादरणरूप आत्माभिमानो मम क्व? न मया त्वामनादृत्य तथा पठितः । किंतु ते पुत्रस्य मतिरीदृशी ।

क्व तदाऽऽत्ममानो मम ॥ * ॥

इति सप्तमस्कन्धे पञ्चमोऽध्यायः

---

[1]प्रत्यगात्मस्वरूपेण [2]कालरूपेण च स्वयम् ।
व्याप्यव्यापकनिर्देशो[3] ह्यनिर्देश्यो विकल्पितः[4] ॥ २८ ॥

"[5]अन्तर्यामी प्रत्यगात्मा व्याप्तः कालो हरिः स्मृतः" इति च ॥ * ॥

केवलानुभवानन्दस्वरूपः परमेश्वरः ।
माययाऽन्तर्हितैश्वर्य ईयते गुणसर्गया[6] ॥ २९ ॥

[7]प्रकृत्या तमसाऽऽवृतत्वात् हरेरैश्वर्यं न ज्ञायते ॥ * ॥

तस्मात् सर्वेषु भूतेषु दयां कुरुत सौहृदम् ।
भावमासुरमुन्मुच्य तया तुष्यत्यधोक्षजः[8] ॥ ३० ॥

"विष्णोर्गृहत्वाद्[9] भूतेषु दया कार्या विजानता" इति च ॥ * ॥

---

१ प्र. पाठेऽयं द्वाविंशः श्लोकः । २ "—स्वरूपेण दृश्यरूपेण" इति प्र. पाठः ।

३ "—निर्देश्यो" इति पाठान्तरम् ।

४ प्रत्यगात्मरूपेण अन्तर्यामिरूपेण व्याप्योऽणोरणीयान् इति, कालरूपेण सर्वगतरूपेण व्यापको महतो महीयानिति निर्दिश्यते वेदेषु। साकल्येनानिर्देश्योऽप्येवं विविधतया क्लृप्तो ज्ञानिभिः । "अनिर्देश्यवपुर्विष्णुः" इति सहस्रनामसु ।

५ अन्तर्यामी प्रत्यगात्मेत्युच्यते । बहिर्व्याप्तः काल इत्युच्यते ।

६ गुणैः सृजन्त्या मायया प्रकृत्या जीवावरकतमोगुणेनेति यावत्, जीवानामन्तर्हितमज्ञायमानमैश्वर्यं यस्य तादृशः प्रतीयते ।

७ माययेत्येतत् प्रकृत्येति व्याख्यातम् । तत्रापि विशेषमाह—तमसा । नहि प्रकृतिः सर्वात्मना जीवात् परममाच्छादयति; किंतु तमोंऽशेनैव । तेन तमसा आवृतो जीवः परमेश्वरं न जानाति । उक्तं हि—"तमसोऽज्ञानमेव च" इति ।

८ "आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः" इति प्र. पाठः । तस्मात् प्रत्यगात्मस्वरूपेण भगवतः सर्वभूतहृदयगतत्वेन सर्वेषामपि भूतानां भगवन्मन्दिरत्वात् सर्वेषु भूतेषु दयां कुरुत सौहृदं च । तया दयया तेन सौहृदेन च तुष्यत्यधोक्षजः ।

९ जीवगोस्वामी चाऽह—"तस्माद् भगवदधिष्ठानत्वात्" इति । "ईशावास्यमिदं सर्वम्" इति च श्रुतिः ।

तुष्टे च यत्र किमलभ्यमनन्त आद्ये किं तैर्गुणव्यतिकरैरिह येऽनुसिद्धाः[१] ।
[२]धर्मादिभिः किमगुणेन च काङ्क्षितेन सारञ्जुषां चरणयोरुपगायतां नः[३] ॥३१॥

"काङ्क्षतो मोक्षगमपि सुखं नाकाङ्क्षतो यथा[४]" इति च ॥ * ॥

इति सप्तमस्कन्धे षष्ठोऽध्यायः

जन्माद्याः षडिमे भावा दृष्टा देहस्य नाऽत्मनः ।
फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना[५] ॥ १८ ॥

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ।
अविक्रियः स्वदृग्[६] हेतुर्व्यापकोऽसङ्ग्यनावृतः ॥ १९ ॥

---

१ "–व्यतिकरादिह ये स्वसिद्धाः" इति प्र. पाठः ।

२ "धर्मादयः किमगुणेन" इति च ।

३ भगवच्चरणकमलयोः सारं सौन्दर्यमकरन्दं प्रीत्या सेवमानानां नः त्रिगुणकार्यैः धर्मादिभिः काङ्क्षितैः किम् ? येऽनुषङ्गेणैव सिद्धाः विनाऽप्याकाङ्क्षाम् । ये चान्ततो न काङ्क्षणीयाश्च । अथच त्रिगुणातीतेन मोक्षेण च काङ्क्षितेन किम् ? उक्तं हि –"न स्वर्गं नापुनर्भवम्" इति । तुष्टो भगवान् यत् स्वतो ददाति तत्र किं पुनराकाङ्क्षया कार्यं केवलं स्वरूपसुखह्रासकारणया?

४ मोक्षसुखमकाङ्क्षतः यथाऽधिकं सुखं तथा मोक्षगं सुखं काङ्क्षतो न । सकामादप्यकामस्यैकान्तभक्तस्याधिकं मोक्षसुखमिति ।

५ जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते विनश्यतीतीमे षट् भावविकाराः देहस्यैव । न जीवस्यापि । किमुत परमात्मनः ? ईश्वरी विकरणसमर्था मूर्तिर्यस्य तेन कालेन भगवता हि देहस्येमे भवन्ति । तत् कथं तस्य स्युः? नहि स्वयमेव कश्चिदात्मानं विकारयेत् । यथा फलानि वसन्तादिना कालेन विक्रियन्ते न फलाधारो वृक्षः । तद्वत् सर्वाधारो भगवानपि न विक्रियते । आधारतामात्रे दृष्टान्तः । न सर्वात्मनाऽविकारित्वे । यद्यपि जीवपरतयाऽप्ययं श्लोकः शक्यं व्याख्यातुम् । तथाऽप्यत्रोक्तमात्मानं परामृश्योत्तरश्लोके भगवदसाधारणधर्माणां प्रतिपादनादत्रापि परमात्मैवोच्यत इति व्याख्यातं भाष्यकारेण । जीवपरत्वेऽपि न नश्छिन्नं किञ्चित् ।

६ "स्वदृग् वश्यो व्यापको–" इति प्राचीनकोशेषु यद्यपि पठ्यते । तथाऽपि "हेतुत्वात् विष्ण्वधीनत्वं तस्य" इति भाष्यस्वारस्यात् श्रीधरस्वाम्याद्यभिमतोऽयमेव पाठोऽत्र स्वीकृतः । तथाचायमर्थः । आत्मा नित्यः । "नित्यो नित्यानाम्" इति तस्यैव नित्यत्वं मुख्यम् । चतुर्विधनाशविधुरत्वात् । उत्पत्तिविधुरत्वाच्च । "न जायते म्रियते

एतैर्द्वादशभिर्विद्वानात्मानं[1] लक्षणैः परैः ।
अहम्ममेत्यतद्भावं[2] देहादौ मोहजं त्यजेत् ॥ २० ॥

"षड्विकाराः शरीरस्य न विष्णोस्तद्गतस्य तु । तदधीनं शरीरं च ज्ञात्वा तन्ममतां त्यजेत्" इति च ।

हेतुत्वाद् विष्णवधीनत्वं शरीरस्य[3] ॥ * ॥

अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः ।
विकाराः षोडशाऽचार्यैः पुमानेकः समन्वयात्[4] ॥ २२ ॥

देहस्तु सर्वसङ्घातो जगत् तस्थुडिति[5] द्विधा ।
अत्रैव मृग्यः पुरुषो नेतिनेतीत्यतत् त्यजन् ॥ २३ ॥

वा" इति, "अजो नित्यः" इति चोक्तम् । अव्ययः । न वर्द्धते नापक्षीयते । "अशब्दमस्पर्शमरूपमव्ययम्", "न कर्मणा वर्धते नो कनीयान्" इति तदपि तस्यैव । शुद्धः अस्पृष्टदोषगन्धः । "शुद्धमपापविद्धम्" इति ह्युक्तम् । एष एव करोतीत्येकः, स्वातन्त्र्येण सर्वकर्ता । समाभ्यधिकरहितश्च । "एकमेवाद्वितीयम्" इति, "एको बहूनां विदधाति" इति च श्रुतिः । "क्षेत्रज्ञं चापि मां विद्धि" इति गीतासु । "तस्मिन् लोकाः श्रिताः सर्वे" इत्याश्रयः । "अविकारोऽक्षरः शुद्धः" इत्यविक्रियः । "आत्मज्योतिः", "तदात्मानमेवावेत्" इत्यादेः स्वदृक् । स्वयमेव साक्षात् पश्यतीति साक्षी च । सर्वस्य हेतुः । "स कारणं कारणाधिपाधिपः" इति श्रुतेः । "नान्यो हेतुर्विद्यत ईशनाय" इत्यन्यनिषेधाच्च । वश्य इति पाठे स्ववश्यः स्वतन्त्रः । "सर्वस्य वशी सर्वस्येशानः" इति श्रुतिः । व्यापकः । "व्यापकोऽलिङ्ग एव च" इति काठकेषु । अव्याकृताकाशादिकमप्यनेनैव व्याप्तमिति मुख्यतो भगवानेव व्यापकः । "असङ्गो ह्ययं पुरुषः" इत्यसङ्गी । तमसाऽनावृतः । "आदित्यवर्णं तमसः परस्तात्" इति श्रुतेः ।

१ "—नात्मनो लक्षणैः" इति प्र. पाठः ।

२ "-त्यसद्भावम्" इति च । एवं द्वादशलक्षणैर्विलक्षणैः परमात्मानं विद्वान् तस्यैव सर्वहेतुत्वेन देहादेरपि तदधीनतां च विद्वान् अतत्वभूतमज्ञानजं देहादवहंममेति भावं त्यजेत् ।

३ द्वादशस्वेकं हि लक्षणं सर्वहेतुत्वम् । तस्मात् तस्यैव सर्वहेतुत्वात् तदधीनत्वं शरीरस्य । "स्वदृग् वश्यः" इति पाठे "कालेनेश्वरमूर्तिना" इति वचनलब्धात् हेतुत्वात् ।

४ मूलप्रकृतिः, महदहङ्कारौ, पञ्च तन्मात्राश्चेत्यष्टौ प्रकृतयः । मनसा सहैकादशेन्द्रियाणि पञ्च महाभूतानि चेति षोडश विकाराः । ननु सत्वादयः कुत्र गताः ? सत्वादयस्त्रयः प्रकृतेर्गुणा एव हि । तथाच गुणिनि गणिते गणिता भवन्ति गुणा अपि । एवं चतुर्विंशतितत्वेषु समन्वयात् सम्यग् व्याप्तेः, सकलश्रुतिसमन्वयाच्च एकः परमपुरुषः साङ्ख्याचार्यैः पञ्चविंशः प्रोक्तः । उक्तं हि तृतीयस्कन्धे "यः कालः पञ्चविंशकः" (३-२७-१६) इति, "अन्तः पुरुषरूपेण कालरूपेण यो बहिः । समन्वेत्येष सत्वानां भगवनात्ममायया"(३-२७-१९) इति च ।

५ "तस्थुरिति" इति प्र. पाठः । एवं चतुर्विंशतिगणसङ्घातो देहः क्षेत्रमित्युच्यते । तदुक्तं गीतासु—"महा-

58

"अभिमान्यपेक्षया विष्णुः पञ्चविंश इति स्मृतः । [1]जडव्यपेक्षया जीवः सम्यग् ज्ञेयो हरिः स्मृतः" इति च ॥ * ॥

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ।
[2]ता येनैवानुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥ २५ ॥

एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः ।
सरूपमात्मनो धत्ते गन्धैर्वायुरिवान्वयात्[3] ॥ २६ ॥

[4]एतद्द्वारो हि संसारो गुणकर्मनिबन्धनः ।
अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवाऽप्यते[5] ॥ २७ ॥

भूतान्यहङ्कारो बुद्धिरव्यक्तमेव च। इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः । एतत् क्षेत्रं समासेन" इति । अत्रैव देहे मृग्योऽन्तर्यामी पुरुषः । अतत् तद्भिन्नं चतुर्विंशतिगणं नेदं भगवान् नेदं भगवानिति त्यजन् त्यजता साधकेन । "नेति नेत्यात्मा गृह्यः" इति श्रुतेरिति । त्यजन्निति प्रथमा तृतीयार्थे । सप्तसु प्रथमाश्रवणात् । यद्वा तद्भिन्ने स्थितोऽपि अलेपात्तत् त्यजन् स्थितः पुरुषो मृग्यः । यथा विरक्तस्त्यक्तसंसार उच्यते ।

१ "जडाद्यपेक्षया" इति क्वचित् पाठः प्रामादिकः । यदा चतुर्विंशतितत्वैः सह तत्तदभिमानिजीवा अपि विवक्ष्यन्ते तदा विष्णुः पञ्चविंशः । तथाचात्र साभिमानीनि प्रकृतिमहदहङ्कारादीनि विवक्षितानीति न जीवतत्त्वस्य पृथग् गणना कृता । यत्र तु जडानामेव विवक्षा तत्र तदभिमानी जीवगणः पञ्चविंशः । विष्णुस्तु षड्विंशः । तदेवं सर्वोत्तमतत्वतया हरिः सम्यक् समन्वयात् ज्ञेयः । नेतिनेत्यतद्विश्लेषेण च सम्यग् विमृग्य ज्ञेय इति ।

२ ताः जीवस्य त्रयो वृत्तयो येनैवानुभावकेन जीवैरनुभूयन्ते स प्रेरकोऽनुभावकः परमपुरुषः । परश्च विलक्षणश्च जीवात् । अनुभवन् जीवश्च ततोऽनुभावकात् परो विभिन्नः ।

३ "स्वरूपमात्मनो बुद्ध्येद् गन्धैर्वायुरिवान्वयात्" इति प्र. पाठः । त्रिवर्णैः शुक्लं रक्तं कृष्णमिति त्रिवर्णोपलक्षितैस्त्रिगुणैः । कीदृशैः? जीवस्य परितः क्षितैः । बुद्धिं जीवं परमात्मनो भेदयन्ति व्यावर्तयन्ति, परस्परं जीवान् तरतमभावेन भेदयन्तीति च बुद्धिभेदैः । क्रियोद्भवैः सात्विकादिकर्मकारणभूतैः । तदेभिस्त्रिभिर्गुणैर्जीवस्य जागरणस्वप्नसुषुप्तीः प्रवर्तयन् विश्वादिरूपो भगवान् आत्मनो जीवस्य समानं रूपं धत्ते । तेन भगवानेव संसारीत्यज्ञानां प्रतीयते । कुतः? अन्वयात् सहभावात् । यथा वायोः पुष्पादिगन्धैरन्वयाद् वायुरेव गन्धवानिति प्रतीयते ।

४ तदेवमात्मपरमात्माविवेकनिबन्धनोऽयं संसार इत्याह—एतद्द्वारो हि संसारः । नन्वविवेकस्यापि किं कारणम्? गुणकर्मनिबन्धनः । सात्विकादिस्वभावैस्तदनुगुणैः कर्मभिश्चेयमविवेकभ्रान्तिरनुवर्तते । अपार्थः अपुरुषार्थभूतः । नन्वेवमपुरुषार्थमपि संसारं किमिति पुरुषा अर्थयन्ते? स्वप्न इवेष्यते । यथा स्वशिरश्छेदादिरूपः स्वप्नो दुःखहेतुरप्यवशतयाऽऽप्यते एवं जागरणेऽप्यवशः सुखदुःखे अनुभवति । अभिलाषेऽनभिलाषे च न स्वतन्त्रो जीवः स्वप्नवत् । एतेन पारवश्यमेव स्वप्नसाम्यं जागरणस्येत्युक्तं भवति ।

५ "इवेष्यते" इति प्र. पाठः । "इवार्प्यते" इति क्वचित् ।

बुद्धेर्जीवस्य—

"सत्त्वबुद्ध्यादिशब्दैस्तु जीवोऽपि क्वचिदीर्यते। [1]जाग्रदाद्याः कर्म चैव सुखदुःखे च तस्य हि। [2]जाग्रदादेः परो द्रष्टा सुखनित्यो[3] हरिः स्मृतः। स जीवेन सह स्थानात् तत्स्वरूपः[4] प्रदृश्यते। अज्ञदृष्ट्या न ज्ञदृष्ट्या यथा गन्धयुतोऽनिलः। अदृष्टेर्जीवपरयोर्भेदस्याऽप्नोति संसृतिम्। [5]अभेदनिश्चयाद् याति तमो नास्त्यत्र संशयः" इति च।

बुद्धिभेदैः जीवानां तारतम्यज्ञापकैः।

"दुःखरूपोऽपि संसारोऽबुद्धिपूर्वमवाप्यते। यथा स्वप्ने शिरश्छेदं स्वयं कृत्वाऽऽत्मनोऽवशः। ततो दुःखमवाप्येत[6] तथा जागरितेऽपि तु। जानन्नप्यात्मनो दुःखमवशस्तु प्रवर्तते" इति च ॥ * ॥

तस्माद् भवद्भिः कर्तव्यः[7] कर्मणां त्रिगुणात्मनाम्।
बीजनिर्हरणं योगः प्रवाहोपरमो धियः ॥ २८ ॥

धियः प्रवाहस्य उप[8] परमेश्वरे रमणम् ॥ * ॥

---

१ "जाग्रदाद्याः" इति मुद्रितः पाठः प्रामादिकः। जाग्रदादिषु क्रियमाणं कर्म तन्निमित्ते सुखदुःखे च तस्य जीवस्यैव।

२ अत्रापि "जाग्रदादेः" इति पाठः प्रमाद एव। "सोऽध्यक्षः पुरुषः" इत्यस्य व्याख्यानम्—परो द्रष्टेति। "अध्यक्षोऽधिपतिः प्रोक्तो यदक्षाण्यस्य चोपरि" इति शब्दनिर्णये। "उपद्रष्टाऽनुमन्ता च" इति गीतायाम्। उपरो हि द्रष्टा उपद्रष्टा।

३ "सुखनिष्ठो–" इति प्र. पाठः। सुखनित्यः नियतसुखः। तस्मान्न तस्य द्रष्टुरपि सुखदुःखे। दुःखं मा भूत्। सुखं तु तज्जन्यं स्यात्। नेत्याह—सुखनित्यः। नित्यसुखः।

४ "तत्सरूपः" इति क्वचित्।

५ एतेन अज्ञानमूलः जीव एवेश्वर इति विपरीतज्ञानमूलः अपार्थः तमोरूपोऽनर्थ इत्यर्थान्तरं च सूचितम्।

६ अवाप्येतेति अवाप्यादित्यर्थे छान्दसं रूपम्। अन्यथाऽवशो जीवो दुःखमवाप्येतेत्यसङ्गतं स्यात्। क्वचित् "दुःखमवाप्नोति" इति पाठः स्वरसः। बहुकोशसंवादादेव 'अवाप्येत' इति पाठोऽत्र समादृतः।

७ "कर्तव्यम्" इति प्र. पाठः। तस्मात् गुणकर्मनिबन्धनत्वात्संसारस्य त्रिगुणमूलानां कर्मणां बीजस्य लिङ्गदेहस्याज्ञानस्य वा निर्हरणहेतुः योगः भवद्भिः कर्तव्यः। कोऽसौ योगो नाम? धियः प्रवाहस्य उप उत्कृष्टे सर्वोत्तमे भगवति रमणं रतिः। भक्तियोग इति यावत्।

८ "उपरमः परमेश्वरे रमणम्" इति प्र. पाठः। उप इति पदमनूद्य परमेश्वरे इति व्याख्यातम्। उत्कर्षवाची ह्युपशब्दः। तद्यथा—उपाध्याय इति, उपव्याख्यानमिति। उत्कृष्टो ह्यध्यापक उपाध्यायः। उत्कृष्ट

निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि ।
यदाऽतिहर्षोत्पुळकाश्रुगद्गदः[1] प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥ ३४ ॥

यदा ग्रहग्रस्त इव क्वचिद् रुदन् हसत्यथाऽक्रन्दयते जनान् मुहुः[2] ।
[3]मुहुर्मुहुर्वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः ॥ ३५ ॥

तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः[4] ।
निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥ ३६ ॥

तद्भावभावः तद्यथास्वरूपे[5] भक्तिः ।

"केचिद् भक्ता विनृत्यन्ति गायन्ति च यथेप्सितम् । केचित् तूष्णीं भजन्त्येव[6] केचिच्चोभयकारिणः" इति च ॥ * ॥

अधोक्षजालापमिहासुखात्मनः[7] शरीरिणः संसृतिचक्रशातनम् ।
तद् ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ॥ ३७ ॥

ब्रह्मनिर्वाण[8]सुखं ब्रह्मनिमित्तनिर्वाण[8]सुखम् ॥ * ॥

व्याख्यानमुपव्याख्यानम् । "उत्कृष्टानन्दरूपत्वादुपशब्दः श्रुतौ श्रुतः" इति च माण्डूकभाष्यम् । "प्रवाहस्य तु परमेश्वरे रमणम्" इति क्वचित् पाठः ।

१ "–हर्षोत्पुलकाश्रुगद्गदम्" इति प्र. पाठः । हर्षेणोद्गतपुलकोऽश्रुगद्गदश्च । प्रोत्कण्ठो मुक्तकण्ठः ।

२ "क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम्" इति च । स्वस्य भक्त्युन्मादेन अन्यानपि जनानाक्रन्दयते ।

३ "मुहुः श्वसन् वक्ति" इति च ।

४ तस्य भगवतः भावे यथावत् स्वरूपे यो भावः भक्तिः, तदनुकूलतया कृते आशयाकृती अभिप्रायस्तद्व्यञ्जक आकारश्च यस्य । एतदेव पूर्वमुक्तम्—उद्गायति रौति नृत्यतीत्यादि । तदिदमभिप्रायाविष्करणं न सर्वेषां समानम् । कश्चिद् गायेत् । कश्चिद् रुवीयात् । कश्चिन्नृत्येत् । कश्चित् तूष्णीमेवाऽसीत । तदेतत् तात्पर्ये स्फुटम् । तदेवं भक्तियोगेन निर्दग्धौ बीजानुशयौ येन । बीजं लिङ्गदेहोऽज्ञानं वा । अनुशयः कर्मवासनाऽन्तःकरणं वा ।

५ "–स्वरूपं भक्तिः" इति प्र. पाठः ।   ६ "तूष्णीं जपन्त्येव" इति च ।

७ "अधोक्षजालम्भमिहाशुभात्मनः" इति प्र. पाठः । अधोक्षजकथालापं दुःखितस्य संसारिणः संसारचक्रशातनं विदुर्बुधाः । तदिति विधेयलिङ्गता । स हरिकथालाप एव ब्रह्मणः सकाशाद् यन्निर्वाणसुखमशरीरसुखम्, मोक्ष इति यावत्, तदपि । तत् तस्मादेव निर्वाणसुखमिति वा । तस्मात् तं हृदयेश्वरं हृदयवल्लभं हृदये भजध्वम् ।

८ "–निर्बाण–" इरी क्वचित् ।

कोऽतिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत् सतः ।
[1]अस्याऽत्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥ ३८ ॥

अशेषदेहिनां सामान्यतो[2]हृदिस्थत्वेन[2] ॥ * ॥

तस्मादर्थाश्च कामाश्च धर्माश्च[3] यदपाश्रयात्[4] ।
भजतानीहयाऽऽत्मानमनीहं हरिमीश्वरम् ॥ ४८ ॥

"अप्रयत्नेन[5] करणमनीहा प्रोच्यते बुधैः" इति च ॥ * ॥

सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः ।
भूतैर्महद्भिः स्वकृतैर्भूतानां[6] बीजसञ्ज्ञितः[7] ॥ ४९ ॥

"व्यञ्जनाज्जगतो विष्णुर्बीजं न परिणामतः" इति च ॥ * ॥

दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः ।
खगा मृगाः पापजीवाः सन्ति ह्यच्युततां गताः ॥ ५४ ॥

अच्युततां च्युतिवर्जनम् ॥ * ॥

इति सप्तमस्कन्धे सप्तमोऽध्यायः

---

१ "स्वस्याऽत्मनः" इति प्र. पाठः । "सत्यात्मनः" इत्यन्यत्र। स्वे हृदि छिद्रवत् अकाशवत् सतः । "योऽयमन्तर्हृदय आकाशः" इत्यादिश्रुतिः । छिद्रवत् गुहायामिव पिहितस्य सत इति वा। "गुहाहितं गह्वरेष्ठं पुराणम्" इति श्रुतेः । अशेषदेहिनां सामान्यतः सख्युः । हृदिस्थत्वेन समानधर्मेण समानतया सख्युः । "द्वा सुपर्णा सयुजा सखाया" इति श्रुतेः । अस्य परमात्मनः । किं वृथा विषयार्जनप्रयासैः? सत्यान्वेषणार्थं बहुदेशपर्यटनैर्वा किम् ?

२ "हृदिस्थितत्वेन" इति पाठान्तरम् । अत्र सख्युरिति वाक्यशेषः ।

३ "तस्मादर्थाच्च कामाच्च धर्माच्च" इति प्राचीनकोशे पठ्यते । अर्थस्तु न स्वरसः ।

४ "यदपाश्रयाः" इति पाठान्तरम् । धर्माद्याः यदपाश्रयात् अन्ततो यद्विषयकतयैव धर्माद्या भवन्ति । सफला वा । तं हरिमीश्वरमनीहया अकामतया, अप्रयासेन सहजप्रवृत्त्या वा भजत । उक्तं हि—"कोऽतिप्रयासः" इति । कीदृशम्? अनीहम् । आप्तकामत्वात् । अप्रयासेनैव सकलजगत्कर्तारं च ।

५ "अप्रयासेन" इति प्र. पाठः ।

६ "स्वकृतैः कृतानाम्" इति पाठान्तरम्।

७ "जीवसञ्ज्ञितः" इति प्र. पाठः । सर्वेषामपि भूतानां हरिरात्माऽन्तर्यामी । स्वकृतैः पञ्चभिर्महाभूतैः देहादिना व्यञ्जकत्वात् भूतानां प्राणिनां बीजसञ्ज्ञितश्च ।

त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषाऽत्मगतं समस्तम्[१] ।
तद् विप्रलुप्तममुनाऽद्य शरण्यपाल रक्षागृहीतवपुषा पुनरप्यमंस्थाः[२] ॥ ४९ ॥

तद् विप्रलुप्तमिति[३] सादृश्यामेदवचनम्[४] । आलोचनमेव तपः । "यस्य ज्ञानमयं तपः" इति श्रुतेः ॥ * ॥

वयं विभो ते नटनाट्यगायका[५] येनाऽत्मसाद् वीर्यबलौजसा कृताः ।
स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते ॥ ५० ॥

"नटनं तु कथाबद्धं[६] नाट्यकं भावदर्शनम्" इति गान्धर्वे ॥ * ॥

इति सप्तमस्कन्धेऽष्टमोऽध्यायः

साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतम् ।
अदृष्टाश्रुतपूर्वत्वात् सा नोपेयाय शङ्किता ॥ २ ॥

---

१ "ससर्ज" इति प्र. पाठः ।

२ "पुनरन्वमंस्थाः" इति पाठान्तरम् । आदिपुरुष, तव परमं तपः सृष्टिकारणमालोचनात्मकं ज्ञानं नः आत्थ उवक्थ उपदिदेशिथ । यत् आत्मतेजः स्वयम्प्रकाशरूपम् । "स तपोऽतप्यत । स तपस्तप्त्वा । इदꣳ सर्वमसृजत" इति श्रुतिः । येन तपसा ज्ञानेन इदं समस्तं जगत् तवाऽत्मगतम् । सर्वज्ञत्वात् । अथच येन ज्ञानेन प्रळयकाले विश्वं सम्यगस्तं सदात्मोदरगतम् । अथ च येन ज्ञानेन आत्मगतं विश्वं पुनः सृष्टिकाले समस्तं बहिर्निरस्तम् । तत् तादृशभगवज्ज्ञानविषयकमस्मज्ज्ञानं लुप्तप्रायमिवाऽसीत् । ज्ञानिनां ज्ञानस्य च रक्षायै गृहीतेन नरसिंहवपुषा तदेतत् पुनरमंस्थाः । स्वातन्त्र्यादन्तर्णीतणिच् । अमानयः । व्यज्ञापय इति यावत् । अन्वमंस्थाः अनुमतवानिति वा ।

३ "विलुप्तमिति" इति क्वचित् पाठः ।

४ पूर्वार्धे सृष्टिकारणं भगवद्रूपं ज्ञानमयं तपः प्रस्तुतम् । उत्तरार्धे तद्विप्रलुप्तमिति तस्य लोप उच्यते । तदेतदसङ्गतमिव भाति । अत आह --सादृश्याभेदवचनम् । नहि तदिति भगवज्ज्ञानमुच्यते । किन्तु भगवदुपदेशलब्धं ऋषीणामेव ज्ञानम् । सादृश्यादभेदोपचारः । तस्य च युज्यते विप्रलोप इति ।

५ नाटकेषु नटाः । नाट्येषु नाट्याः । नाट्यमेषामस्तीति नाट्याः । नाट्यप्रदर्शका इति यावत् । गानकथासु गायकाः । यद्वा नटो नटनम् । नटने नाट्ये च प्रवृत्ते वयं गायकाः ।

६ "कथाबन्धो–" इति प्र॰ पाठः । कथाबद्धं कथोपेतं सम्भाषणोपेतं यन्नाटकादिकमभिनीयते तन्नटनमुच्यते । यत्र गीतानुगुणं भावप्रदर्शनमेव, न कथा, नापि सम्भाषणम्, तन्नाट्यम् ।

प्रह्लादं प्रेषयामास ब्रह्माऽवस्थितमन्तिके ।
तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुम् ॥ ३ ॥

"अदृष्टाश्रुतपूर्वत्वादन्यैः साधारणैर्जनैः । नृसिंहं शङ्कितेव श्रीर्लोकमोहाय नो ययौ । प्रह्लादे चैव वात्सल्यदर्शनाय[1] हरेरपि । ज्ञात्वा मनस्तथा ब्रह्मा प्रह्लादं प्रेषयत्[2] तदा । एकत्रैकस्य वात्सल्यं विशेषाद् दर्शयेद्धरिः । अवरस्यापि[3] मोहाय क्रमेणैवापि वत्सलः" इति ब्रह्माण्डे ॥ * ॥

विप्राद् द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम् ।
मन्ये तदर्पितमनोवचनात्मगेहप्राणः पुनाति सकलं नतु भूरिमानः[4] ॥ १० ॥

द्विषड्गुणयुतात्—

"ज्ञानं च सत्यं च दमः शमश्च अमात्सर्यं[5] ह्रीस्तितिक्षाऽनसूया । दानं च यज्ञश्च तपः श्रुतं च महाव्रता[6] द्वादश ब्राह्मणस्य" इति भारते ॥ * ॥

यस्मिन् यतो यर्हि च येन यस्य[7] यस्मै यथा यमुत[8] यस्त्वपरः परो वा ।
[9]भावं करोति विकरोति पृथक्स्वभावः सञ्चोदितस्तदखिलं भवतः स्वरूपम् ॥
॥ २० ॥

"कर्तृकर्मक्रियादीनां सत्ता वृत्तिस्तथैव च । विष्णवधीनं यतः सर्वं सर्वरूपस्तदुच्यते" इति ब्रह्मतर्के ॥ * ॥

---

१ न केवलं मोहाय । किन्तु प्रह्लादे हरेर्वात्सल्यातिशयप्रदर्शनायापि ।

२ "प्रेरयत्" इति क्वचित् । प्रेत्रयत् । अडभावेन । अप्रेषयत् । प्रेषृ गतौ । श्रियः हरेरपि तथाविधं मनः अभिप्रायं ज्ञात्वा ब्रह्मा प्रह्लादं प्रेषयामास ।

३ "अपरस्यापि" इति क्वचित् ।

४ "–वचनेहितार्थप्राणं पुनाति स कुलं नतु भूरिमानः" इति प्र. पाठः । भगवद्विमुखाद् विप्रात् श्वपचं वरिष्ठं मन्ये । यतः भगवदर्पितमनोवचनादिः श्वपचोऽपि सकलं पुनाति । नतु भूरिगर्वो विप्रः । आत्मा देहः । गे दारापत्यादयः । प्राणा इन्द्रियाणि ।

५ "शमश्च ह्यमात्सर्यम्" इति मुद्रितः पाठः ।

६ व्रतशब्दो धर्मशब्दवदस्त्रियां पठ्यते । तेन व्रताः व्रतानीत्युभयमपि साधु ।

७ "यतो यर्हि येन च यस्य यस्माद् यस्मै" इति प्र. पाठः । ८ "यदुत" इति च ।

९ "भावः करोति" इति च । यस्मिन् भूतलादाविति धातूपात्तक्रियाश्रयकर्तृकर्माश्रयत्वं नामाधिकरणत्वम् । यतो मृदादेरिति उपादानत्वम् । धातूपात्तव्यापारनिमित्तविभागाश्रयत्वं नामापादानत्वं च । यर्हि यस्मिन् काले ।

माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणाऽनुमतेन पुंसः ।
छन्दोमयं यदजयाऽर्पितषोडशारं संसारचक्रमज कोऽतितरेत् त्वदन्यः[1] ॥२१॥

दशेन्द्रियप्राणमनोऽरम् । मूलमन एव संसारचक्रम्[2] ॥ * ॥

क्वाहं रजःप्रभव ईश तमोऽधिकेऽस्मिन्
जातः सुरेतरकुले क्व तवानुकम्पा ।

येन दण्डादिनेति धातूपात्तव्यापारजन्यफलाव्यवहितपूर्वव्यापाराश्रयत्वं नाम करणत्वम् । हेतुत्वसामान्यं च । यस्येति सम्बन्धमात्रम् । यस्मायिति जलाहरणाद्यर्थमिति निमित्तत्वम् । दानकर्मणा सम्बध्यमानत्वं नाम सम्प्रदानत्वं च । यथेति प्रकारः । यं घटादिकमिति धातूपात्तव्यापारनिष्पन्नत्वादिरूपं कर्मत्वम् । यस्त्वपरोऽर्वाचीनः कुलालादिरिति धातूपात्तव्यापाराश्रयत्वं नाम कर्तृत्वम् । एवं परः प्राचीनः कर्ता चतुर्मुखादिरपि पदार्थजातं सृजति विविधतया विस्तारयति च । कथम्? त्वया सञ्चोदित एव । न स्वतः । कीदृशः? पृथक्स्वभावः विविधस्वभावः । तत्तत्स्वभावानुगुणं त्वया सञ्चोदितस्तत्तदेव किञ्चित् कार्यं करोति । न स्वतन्त्रतया, नापि सामस्त्येन । पृथक्स्वभाव इति निकृष्टस्वभावो वा, पृथग्जन इतिवत् । त्वदन्यस्य स्वतन्त्रं कर्तृत्वं न स्वाभाविकमित्येतत् । तदेवं सप्तविभक्त्यर्थाः कालः प्रकारश्चेत्येतदखिलं भवदधीनतयैव तत्तद्भावमाप्नोतीति भवतः स्वरूपमित्युच्यते । स्वीयं स्वाधीनं रूपमिति तु वास्तवम् । स्वेन रूपितं वा ।

१ माया गुणमयी प्रकृतिः पुंसः मनः सृजति । कीदृशी माया? अनुमतेन सहमतेन सहकारिणा सृष्ट्युन्मुखेन कालेन क्षोभितसत्त्वादिगुणा । कीदृशं मनः? कर्मप्रचुरम् । कर्मस्वेव व्यतिषक्तम्, नैष्कर्म्यपरिपन्थि । बलीयः, यद् बलादेव जीवं करपुत्तलीकरोति, कुपथेषु च सञ्जयति । अपिच संसारचक्रमपीदं मूलतः यत् मन एव । मनोमूलं संसारचक्रमित्येतत् । उक्तं हि- "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इति । कीदृशं संसारचक्रम् ? छन्दोमयम् । मनोरथमयम्, यत् स्वच्छन्दं चरति । ननु स्वच्छन्दचरणे चक्रं स्वत एव भज्येत । न भज्यते, परिदृढत्वादित्याह—अजया । प्रकृत्या अर्पिताः षोडश अरा यस्य तादृशं हीदं चक्रम् । दशेन्द्रियाणि पञ्चप्राणा मनश्चेति षोडशाराः । यद्यपि षोडशारम् । तथाऽपि प्राधान्यान्मन एव संसारचक्रमित्युच्यते । उपसर्जनत्वादन्येषाम् । तदिदं संसारमूलं मनः, मनोमूलं वा संसारचक्रं को नामातितरेत्, अतिक्रामेत्, विजयेत, यस्त्वदन्यः । त्वन्निरपेक्षः । "योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः" इति श्रुतेः । "त्वदन्यः त्वत्तः पृथक् स्थितः । त्वामभजन्नित्यर्थः" इति श्रीधरस्वामी । "त्वदन्यः त्वत्समाश्रयणविमुखः" इति वीरराघवः । "त्वत्कृपामप्राप्तः" इति जीवगोस्वामी । "त्वदनुग्रहरहितः" इति विजयध्वजीयम् । "त्वदन्यः कः अतितरेत् अतितारयेत्" इत्यपि व्याचक्षते ।

२ अत्र "दशेन्द्रियप्राणमनोऽरं मूलं मन एव संसारचक्रस्य" इति क्वचित्, "दशेन्द्रियप्राणमनोमूलं मन एव च संसारचक्रम्" इति च क्वचित् :प्र. पाठः । उभयमपि भ्रान्तिमूलम् । षोडशारमित्येतत् 'दशेन्द्रियप्राणमनोऽरम्' इति व्याख्यातम् । षोडशस्वप्यरेषु अन्ततः मूलमन एव मूलभूतं मन एव संसारचक्रमित्युच्यते प्राधान्यात् । क्वचित् कोशेषु "मूलं मनः" इति विश्लिष्य पठ्यते ।

न ब्रह्मणो नच भवस्य[1] न वै रमाया
यन्मेऽर्पितः शिरसि पद्मकरप्रसादः[2] ॥ २६ ॥

रमादीनामिदानीं नार्पितः[3] ॥ * ॥

नैषा परावरमतिर्भवतो ननु स्याज्जन्तोर्यथाऽऽत्मसुहृदो जगतस्तथाऽपि ।
संसेवया सुरतरोरिव ते प्रसादः सेवानुरूप उदयो न परावरत्वात्[4] ॥ २७ ॥

रमादीनामधिकोदयोऽपि सेवाधिकत्वादेव ।

"श्रीब्रह्मब्राह्मीवीन्द्रादित्रिकतत्स्त्रीपुरुष्टुताः । तदन्ये च क्रमादेव सदा मुक्तौ सृतावपि । हरिभक्तौ च तज्ज्ञाने सुखे च नियमेन तु । परतः स्वतः कर्मतो वा न कथञ्चित् तदन्यथा" इति ब्रह्मतर्के ॥ * ॥

त्वं वा इदं सदसदीश भवांस्ततोऽन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था ।
यद् यस्य जन्म निधनं स्थितिरीक्षणं च तद् वै तदेव वसुकालवदुष्टितर्वोः[5] ॥ ३१ ॥

---

१ "नतु भवस्य" इति प्र. पाठः ।

२ "पद्मकरः प्रसादः" इति पाठान्तरम् । पद्मकरनिधानलक्षणः प्रसादः प्रसादरूपः पद्मकरो वा मम शिरस्येवेदानीमर्पितः । न रमादीनां शिरसि । अहो ते असुरकुलजातेऽपि बालभक्तेऽनुकम्पिता ।

३ जीवगोस्वामी चाऽह—"न ब्रह्मण इत्यादि तदानीन्तनवृत्तापेक्षया" इति ।

४ "सेवानुरूपमुदयो न परावरत्वम्" इति प्र. पाठः । प्राकृतस्य जन्तोरिव तव न भक्तेषु परावरमतिरस्ति। यतस्त्वं सर्वजगतः साधारणतया सुहृदात्माऽन्तर्यामी च । अथापि सेवया प्रसीदसीति न वैषम्यकारणम् । यतः सेवानुरूपस्तस्य फलोदयः न परत्वमवरत्वं वाऽपेक्ष्य ।

५ "वसुकालवदष्टितर्वोः" इति प्र. पाठः । "खलु कालवदुष्टितर्वोः" इति पाठान्तरम् । यद्यपि 'खलु कालवत्–' इत्यादिरेव प्राचीनकोशगतः पाठः । विजयध्वजीयादिषु च स एव पाठः समादृतः । अथापि 'दैवकालाधीनत्वात्' इत्यादिभाष्यस्वारस्यात् 'वसुकालवत्' इत्येव भगवत्पादसम्मतः पाठ इति निश्चीयेत । वीरराघवादिभिश्च दाक्षिणात्यैरयमेव पाठः स्वीकृतः । तथाहि वसुशब्दस्तावद् देवतासामान्यवाची । विशेषविवक्षायां देवतागणेष्वेकस्य वसुगणस्य वाची । तत्राप्यन्ततो विशिष्य वसुष्वेकस्याग्नेर्वाची । तथाहि शब्दनिर्णये—"आदित्या वसवो रुद्रा विश्वे ऋभव इत्यपि । सर्वदेवसमाख्या च द्वादशाष्टादिकेष्वपि" इति । "वैश्वानरोऽग्निर्वसुः" इति च हलायुधः । प्रकृते तु देवतासामान्यवाची वसुशब्द इत्यभिप्रेत्य दैवमिति प्रतिपदमाह भगवत्पादः । यद्यत्र देवतावाचकं वसुपदं नाभविष्यत् तदा कालाधीनत्वात् इत्येवावक्ष्यत्, नतु दैवकालाधीनत्वादिति । अधिकपदोपादानस्य कृत्याभावात् । तेन ज्ञायते वसुपदस्येदं व्याख्यानमिति । तथाचायं श्लोकार्थः— इदं सदसत् कार्यकारणरूपं चिदचिदात्मकं वा सर्वं जगत् त्वं भगवानेव इत्युच्यते शास्त्रेषु "सर्वं खल्विदं ब्रह्म" इत्यादिषु । तत् सर्वस्य त्वद-

यथा वृक्षश्च वृक्षदाहश्च दैवकालाधीनत्वाद् दैवं कालश्चेत्युच्यते, एवं त्वदधीनत्वात् सर्वस्य सर्वमित्युच्यसे[1] स्वतस्तद्भिन्नोऽपि। अहं चान्यश्च परमेश्वर एवेत्यपार्था भ्रान्तिः। तदधीनत्वादेव स इत्युच्यते न स्वरूपत्वादित्यर्थः ॥ * ॥

न्यस्येदमात्मनि जगद् विलयाम्बुमध्ये [2]शेषासनो निजसुखानुभवो निरीहः।
योगेन मीलितदृगात्मनि[3] वीतनिद्रस्तुर्यस्थितो ननु[4] तमो न गुणांश्च युङ्क्षे[5] ॥ ३२ ॥

धीनत्वादेव। यतः स्वतो भवान् ततः सदसतोऽन्य एव। ननु केचित् जीवमेवेश्वरं वदन्ति। आह-माया। अनर्थहेतुरियं भ्रान्तिः यदात्मनि परमात्मबुद्धिः। नन्वहं परमात्मा माभूवम्। अन्यः कश्चनैकजीवः स्यात् नेत्याह—आत्मपरबुद्धिः। आत्मवत् परस्मिन्नपि जीवे परमात्मबुद्धिः अपार्था मायैव। यद्यहं न परमेश्वरः, परः कश्चन जीवोऽपि न। अविशेषादिति। यदि जीवैक्यमेव भ्रान्तिः किमुत जडैक्यम्? एतदप्युक्तम्-आत्मनि चेतने, परस्मिन्नचेतने च परमात्मबुद्धिरिति। तर्हि कथं "तत् त्वमसि" इत्यादि? तदधीनत्वादिति पूर्वं सूचितमिदानीं मुखत आह—यस्य यत् यस्मात् जन्मादिकं ईक्षणं च, सृष्ट्याद्यष्टकस्योपलक्षणम्, तद्वस्तु तदधीनत्वात् तदेवेत्युच्यते हि। वा इति प्रसिद्धमेतदित्याह। तामेव लोकप्रसिद्धिं दृष्टान्तमुखेन ग्राहयति—वसुकालवदुष्टितर्वोः। वसुरिति दैवमित्युक्तम्। उष्टिरिति दाहः। उष दाहे, अर्थात् तरोः। तथाच वृक्षदाहस्य वृक्षस्य च दैवं कालश्च यथा सत्तादिकारणं तथा जगतो भगवानपीति अधीनत्वादेव तद्वदभेदेनोपदिश्यते। इदमुक्तं भवति-वने फलिते वनदेवता फलिनीत्युच्यते। वृक्षे च पुष्पिते पुष्पितोऽयं वसन्त इत्युच्यते। यतः वृक्षस्य फलपुष्पसम्पत्तिः दैवकालाधीना। एवं वृक्षदाहेऽपि। तद्यथा—दाह इत्युपलक्षणम्, दाहच्छेदादिना वृक्षे नष्टे दैवान्नष्टः कालतो वा नष्ट इत्युच्यते। यतो दाहच्छेदादिरपि दैवकालाधीनः। एवं सर्वं भगवदधीनमिति सर्वं भगवानित्युच्यते। भगवान् वा सर्वमित्युच्यते। उभयथाऽपि दर्शनात्। "वासुदेवः सर्वम्" इति भगवान् सर्वमेत्युच्यते। "इदं हि विश्वं भगवान्" इति सर्वं भगवानित्युच्यते। तथाच यदधीना यस्य सत्ता तच्च तच्च परस्परमभेदेन भण्यत इति सिद्धान्तितं भवति। अत्र "खलु कालवदुष्टितर्वोः" इत्येव पाठ इति यद्यागृह्यते तदा कालपदस्यैव दैवमदृष्टं कालश्चेति द्वेधा व्याख्यानमिति वक्तव्यम्। कालपदस्यापि क्वचिददृष्टवाचित्वदर्शनात्।

१ "सर्वं त्वमित्युच्यते" इति प्र. पाठः। यद्यपि दृष्टान्तानुगुण्याय दैवकालाधीनत्वात् दैवं कालश्चेत्युच्यत इतिवत् सर्वस्य त्वदधीनत्वात् सर्वं त्वमित्युच्यते इत्येव वक्तव्यम्। तथाऽप्युभयथाऽपि प्रयोगसामञ्जस्याय सर्वमित्युच्यस इत्युक्तम्। त्वं सर्वमिति यदुच्यसे, सर्वं च त्वमिति यदुच्यते तदुभयमपि सर्वस्य त्वदधीनत्वादेव एतेन मूले सदसद्वा त्वं, त्वं वा सदसदित्युभयथाऽप्यन्वयोऽभिप्रेत इति दर्शितं भवति। अत एवोत्तरत्र पुनः "तदधीनत्वादेव स इत्युच्यते न स्वरूपत्वात्" इत्याह।

२ "शेषे त्मना निज—" इति प्र. पाठः। "शेषात्मना—" इति क्वचित्।

३ "—दृगात्मनिपीत—" इति च। ४ "तुर्ये स्थितो ननु" इति च।

५ "तमोऽनु गुणांश्च" इति मन्दनन्दिन्यादिषु। इदं जगदात्मनि स्वोदरे न्यस्य। तदुक्तम्—"अखिलं जठरे निधाय" इति। स्वतो लयरहितेऽप्राकृते प्रळयार्णवजले तुर्यः सन् स्थित इत्यन्वयः। कीदृशः? शेष

तुर्यः स्थितः[1] ॥ * ॥

तस्यैव ते वपुरिदं निजकालशक्त्या सञ्चोदितं प्रकृतिधर्मिण[2] आत्मगूढम् ।
अम्भस्यनन्तशयनाद् विरमत्समाधेर्नाभेरभूत् स्वकणिकाद् वटवन्महाब्जम्[3] ॥
॥ ३३ ॥

तत्सम्भवः कविरतोऽन्यदपश्यमानस्त्वां बीजमात्मनि ततं स बहिर्विचिन्त्य[4] ।
नाविन्ददब्दशत[5]मप्सु निमज्जमानो जातेऽङ्कुरे कथमिहोपलभेत[6] बीजम् ॥
॥ ३४ ॥

सर्वस्मिन्नष्टे यदवशिष्टं वेदाभिमानिप्रकृतिरूपं वटपत्रं तदेवाऽऽसनं यस्य । "छन्दांसि यस्य पर्णानि" इति हि गीतासु । निजसुखानुभवः । तदुक्तम्—"लक्ष्मीभुजान्तरगतः स्वरतोऽपि चाग्रे" इति । निरीहः अप्रकटितसृष्टिक्रीडेच्छः । अत एव योगेन स्वसामर्थ्येन स्वेच्छयैव आत्मनि मीलितदृक् संशान्तसंविदित्यर्थः । आत्मनि स्थित इति वा । स्वे महिम्नि स्थित इत्यर्थः । मीलितदृगपि वीतनिद्रः । यतस्तुर्यः । अवस्थात्रयातीतः । सृष्ट्यनन्तरभाविनोऽवस्थात्रयस्याभावेन विश्वादिरूपाण्यन्तर्गमयित्वा केवलं तुर्यः सन्नेव च स्थितः । अत एव तमो निद्रां स्वप्नजागरणयोर्गुणान् विषयांश्च न युङ्क्षे ननु । अथ च तमः प्रकृतिं तद्गुणांश्च न सृष्ट्यर्थं युङ्क्षे । तदेतत् सर्वं मनसि निधाय "तुर्यः स्थितः" इति भाष्यं प्रवृत्तम् ।

१ यद्यपि कोशेषु "तुर्यस्थितः" इति समस्तमिव पठ्यते । "तुरीयस्थितः" इति च क्वचित् । अवश्यं लिपिकृतः प्रामाद्यन्निति वक्तव्यम् । विसर्गलोपस्य स्वाभाविकत्वात् स्वरससम्भावितश्च प्रमादः । अतो विसर्गान्ततयाऽत्र पाठः पठितः । नो चेन्मूलादनतिरेकाद् व्यर्थं प्रतीकमात्रग्रहणम् । "तुर्ये स्थितः" इति केचित् पठन्ति । तत्र मूलं मृग्यम् । तथाप्ययमर्थः । तुर्यस्थित इति मूलं तावत् त्रेधा शक्यव्याख्यानम् । तुर्येति सम्बोधनं स्थित इति भिन्नं पदमित्येकम् । तुर्ये स्थित इत्यपरम् । "खर्परे शरि वा विसर्गलोपो वक्तव्यः" इति विसर्गलोपे तुर्यः स्थितः इति भिन्ने पदे इति तृतीयम् । तत्र तृतीयः पक्ष एव विवक्ष्यत इत्याह भगवत्पादः—"तुर्यः स्थितः" इति।

२ "सञ्चोदितप्रकृतिधर्मेण—" इति प्र. पाठः ।

३"सकणिकावटवन्महाब्जम्" इति प्राचीनकोशे पाठः । अर्थस्तु न स्फुटः । "स्वकणिकावटवन्महाब्जम्" इति पाठान्तरम् । तत्रापि स्वकणिकायाः सकाशाद् वटवदित्येवार्थः । कणिकः कणिकेति रूपद्वयमपि साधु । अनन्ताद्वेदाभिमानिप्रकृतिरूपात् शयनात् उत्थाय । "अनन्ता वै वेदाः" इति वचनात् । विरमत्समाधेरुपसंहृतयोगनिद्रस्य, सिसृक्षोरिति यावत् । प्रकृत्या धर्मेण धर्मिणः, प्रकृत्याश्रयस्य । तस्य तवाधीनत्वात् त्वया प्रविष्टत्वाच्च वपुः प्रतिमास्थानीयं जगदिदं प्रळयकाले आत्मनि स्वोदरे गूढं ततः निजया कालशक्त्या कालस्य सृष्ट्युन्मुखीकरणशक्त्या प्रचोदितं सत् महाब्जरूपेण ते नाभेरभूत् । कथम्? स्वकणिकाद् वटवत् बीजाभिमानिन्या देवतया प्रचोदितः बटः यथाऽङ्कुररूपेणोत्पद्यते।

४ " ततं स्वबहिर्विचिन्त्य" इति प्र. पाठः । ५ "–दब्जशत–"(?) इति प्राचीनकोशे पठ्यते ।

६ "कथमु होपलभेत बीजम्" इति प्र. पाठः । तत्कमलसम्भवः कविर्ब्रह्मा आत्मनि स्वशरीरभूते जगदङ्कुरे कमले ततं बहिर्विचिन्वन्निव नालभत । अङ्कुरे जाते बीजं तत्कारणं भगवानपि तदन्तरेव विततोऽभूदिति कथं बहिरुपलभेत? बहिरव्यक्तः । बीज एव शक्तिरूपेण व्यज्यत इति ।

जगदात्मकमब्जमपि भगवद्वशत्वात् तद्वपुः ।

"स्थावराणां तु सर्वेषां देवता याऽभिमानिनी । विशेषाद् वटबीजे च साऽश्वत्थे च व्यवस्थिता[१] । अदृश्या कणिका नाम सा वृक्षान् व्यञ्जयत्यपि । अतो बीजमिति प्रोक्ता सा जाते त्वङ्कुरे[२] स्थिता । एवं हरिः कारणेषु स्थितः कार्यजनेरनु । कार्याण्यनुप्रविष्टः सन् प्रथमं तत्र दृश्यते[३]" इति च[४] ॥ * ॥

स त्वात्मयोनिरतिविस्मित आश्रितोऽब्जं[५]
कालेन तीव्रतपसा परिशुद्धभावः ।
त्वामात्मनीश भुवि गन्धमिवातिसूक्ष्मं ।
भूतेन्द्रियाशयमये विततं ददर्श ॥ ३५ ॥

एवं सहस्रवदनाङ्घ्रिशिरःकरोरु-
नानास्यकर्णनयनाभरणायुधाढ्यम् ।
मायामयं सदुपलक्षणसन्निवेशं[६]
दृष्ट्वा महापुरुषमाप मुदं विरिञ्चः ॥ ३६ ॥

मायामयः ज्ञानस्वरूपः[७] । सदुपलक्षणसन्निवेशम् । आनन्दादिलक्षणसमुदायरूपम् ।

"गन्धाख्या देवता यद्वत् पृथिवीं व्याप्य तिष्ठति । एवं व्याप्तं जगद्[८] विष्णुं ब्रह्माऽऽत्मस्थं ददर्श ह" इति च ॥ * ॥

---

१ अत एव जगद्वटत्वेनाश्वत्थत्वेन च रूप्यते शास्त्रेषु "एषोऽश्वत्थः सनातनः" इत्यादिषु । अत एव चात्र वटस्यैवोपमानत्वम् ।

२ "जातेऽप्यङ्कुरे" इति प्र. पाठः । अङ्कुरे जाते तु अङ्कुरे स्थिता रोहणशक्तिव्यञ्जकत्वेन । एतेन "जातेऽङ्कुरे—" इत्यादिमूलमुक्ताशयम् ।

३ "प्रथमं नात्र दृश्यते" इति प्र. पाठः ।

४ तथाच कथं बहिरुपलभेतेत्यस्य बहिर्नास्तीति नार्थः । किन्तु कार्यस्यान्तः प्रथमं व्यक्तशक्तितया दृश्यत इतीति भावः ।

५ "आस्थितोऽब्जम्" इति प्र. पाठः । भूतेन्द्रियाशयमये आत्मनि विराट्शरीरे जगदात्मके पद्मे विततं ददर्श । आत्मनि स्वस्मिन्नन्तश्च ददर्श । कथं—गन्धदेवता यथा भुवि सूक्ष्मतया वितता । अभिमानिव्यपदेशो हि शास्त्रसम्प्रदायसिद्धः ।

६ "सदुपलक्षितसन्निवेशम्" इति प्र. पाठः ।

७ "मायामयं ज्ञानस्वरूपम्" इति पाठान्तरम् ।

८ जगद् व्याप्य स्थितं विष्णुमित्यर्थः ।

प्रायेण देवमुनयः स्वविमुक्तिकामा
मौनं चरन्ति विजने न परार्थनिष्ठाः ।
नैतान् विहाय कृपणान् विमुमुक्ष एको
नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये[1] ॥ ४४ ॥

प्रायेण देवमुनयः ।

"आश्रितेषु कृपा कार्या विशेषात् तात्त्विकैः सुरैः । [2]मुनिभिश्च तथा कैश्चित् कैश्चित् कार्याऽखिलेष्वपि[3] । तथाऽपि [4]तात्त्विकसुरैः कृपाविषयतां गताः । ये[5] त एव विमुच्यन्ते तदन्ये न कथञ्चन" इति च ॥ * ॥

रूपे इमे सदसती तव वेददृष्टे[6] बीजाङ्कुराविव नचान्यदरूपकस्य ।
युक्ताः समक्षमुभयत्र विचक्षते[7] त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात्[8] ॥४७॥

कार्यकारणे रूपे[9] तद्वशत्वापेक्षया । साक्षात् स्वरूपापेक्षया स्वरूपादन्यद् रूपं न ॥ * ॥

इति सप्तमस्कन्धे नवमोऽध्यायः

---

१ उत्तमान् तात्त्विकदेवान् महर्षीश्च विहायान्ये गणप्रविष्टा देवा मुनयश्च प्रायेण स्वविमुक्तिकामा एव मौनादिकं चरन्ति; न तेषां परमोक्षणे विशेषनिष्ठा । अहं तु नैतान्मदाश्रितान् विहायैक एव मोक्षमिच्छामि । अस्य संसारे भ्रमतो जनस्य त्वदन्यं रक्षितारं च न पश्यामि । तत्वदेवादिव्यावृत्त्यर्थमेव प्रायेणेति पदम् । यदा तात्त्विकदेवादयोऽपि गृह्यन्ते तदा त्वेवं योजना—तत्वाभिमानिनो देवाः नारदाद्या महर्षयश्च स्वस्य स्वकीयस्याऽश्रितस्य विमुक्तिकामा एव मौनादिरूपं तपश्चरन्ति । अथाऽपि न परार्थनिष्ठाः । ये परकीया भगवद्विमुखास्तेषु न कृपां कुर्वते । सात्विकानेव दयन्ते मोक्षमार्गे नयन्ते च । अहं तु त्वद्विमुखानप्येतान् कृपणान् त्वत्कृपयोन्निनीषामीति । अन्यथा कः शरणमेषां देवैरपि तिरस्कृतानाम्? अर्थद्वयमप्येतत् तात्पर्योदाहृतप्रमाणवचनलब्धम् ।

२ "ऋषिभिश्च" इति क्वचित् । ३ कैश्चिन्मुनिभिः अखिलेष्वपि प्राणिषु दया कार्या ।

४ "तात्त्विकसुरकृपाविषयताम्" इति पाठान्तरम् । ५ "एत एव विमुच्यते" इति प्र. पाठो भ्रान्तिमूलः ।

६ "वेदसृष्टे" इति प्र. पाठः । ७ "विचिन्वते" इति च ।

८ बीजाङ्कुराविव सदसती कार्यकारणरूपे इमे स्थूलसूक्ष्मे मूर्तामूर्ते वा तव सन्निधिपात्रत्वाद् रूपे इव, प्रतिमास्थानीये "द्वे वाव ब्रह्मणो रूपे" इत्यादिवेददृष्टे । अप्राकृतरूपरहितस्य अन्यत् प्राकृतमिदं जगत् नच स्वरूपं भवितुमर्हतीति प्रतिमास्थानीयमित्येव वेदतात्पर्यमवसीयते । भिन्नशरीररहितस्य भिन्नमिदं जगद् वस्तुतो न शरीरम्; किंतु प्रतिमास्थानीयमिति वा । ज्ञानिप्रत्यक्षं चात्र प्रमाणमाह– युक्ताः । युक्तास्त्वदनुग्रहयुक्ताः भक्तियोगेन उभयत्र कार्यकारणयोर्नियन्तृतया स्थितं त्वां प्रत्यक्षं विचक्षते । मथनादिनोपायेन दारुषु वह्निमिव । किन्तु भक्तियोगादन्यत उपायान्नेदृशं दर्शनं सम्भवेत् । तदप्यन्यतः साधनस्य साधकस्य वा स्वतः सामर्थ्येन न स्यात् । किन्तु प्रसन्नाद् भवत एवेति । ९ "कार्यकारणरूपे" इति प्र. पाठः ।

[1]त्रिसप्तभिः पिता पूतः पितृभिः सह तेऽनघ ।
यत् साधोऽस्य कुले जातो भवान् वै कुलपावनः ॥ १९ ॥

[2]जन्मान्तरपितृभिस्त्रिसप्तभिः ॥ * ॥

भवन्ति पुरुषा लोके मद्भक्ता मामनुव्रताः[3] ।
भवान् मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥ २२ ॥

"[4]ऋते तु तात्विकान् देवान् नारदादींस्तथैव च । प्रह्लादादुत्तमः को नु विष्णुभक्तो[5] जगत्त्रये" इति स्कान्दे ॥ * ॥

कुरु ते प्रेतकार्याणि पितुः पुत्रैश्च सर्वशः[6] ।
मदङ्गस्पर्शनेनाङ्ग लोकान् पश्यति सुप्रजः[7] ॥ २३ ॥

"[8]मधुकैटभौ भक्त्यभावादूरौ भगवतो मृतौ । तम एव क्रमादाप्तौ भक्त्या चैद्यो[9] हरिं ययौ" इति च[10] ॥ * ॥

[11]मैवं वरोऽसुराणां ते प्रदेयः पद्मसम्भव ।
वरः क्रूरनिसर्गाणामहीनाममृतं यथा ॥ ३१ ॥

---

१ "त्रिःसप्तभिः" इति पाठान्तरम् ।

२ प्रायः प्रतिमन्वन्तरं प्रह्लादस्य जननश्रवणादिदमुक्तम् ।

३ "मद्भक्तास्त्वामनुव्रताः" इति पाठान्तरम् । यद्यपि बहवः सन्ति मद्भक्ताः । भवांस्तु तेषां सर्वेषां प्रतिरूपधृक् दृष्टान्तभूतो भागवतश्रेष्ठ इति ।

४ मूले सर्वेषामिति नासङ्कुचितसर्ववचनम् । किंतु "प्रायेण देवमुनयः" इति पूर्वाध्यायगतश्लोकवत् तात्विकदेवान् महर्षींश्च विहायान्येषां सर्वेषामिति व्याख्येयमिति प्रमाणेनैवाऽह— ऋते तु ।

५ "विष्णुभक्तौ" इति प्र. पाठः ।

६ "कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः" इति प्र. पाठः । ते पितुः प्रेतकार्याणि सर्वैस्तत्पुत्रैः त्वत्सोदरैः सह कुरु ।

७ "लोकान् यास्यति सुप्रजाः" इति प्र. पाठः । "लोकान् पश्यति सुप्रजाः" इति पाठान्तरम् ।

८ मदङ्गस्पर्शनेन पुण्यलोकान् पश्यतीत्ययुक्तम् । यथा हिरण्यको भगवदूरौ मृतस्तथा मधुकैटभावपि । तत् कुतस्तयोर्न मोक्षः? आह—मधुकैटभौ । तदेतन्मूलेऽपि सूचितम्—सुप्रज इति विशेषणेन । प्रकृष्टो जायतेऽनयेति प्रजा भक्तिः । सती प्रजाऽस्येति सुप्रजः ।

९ चैद्य इति हिरण्यकशिपावपि समानम् । १० प्र. पाठेऽत्र "इति च" इति न पठ्यते ।

११ "नैवम्" इति केचित् पठन्ति । असुराणां नैवंविधो वरः प्रदेयः । यतः क्रूरस्वभावानां वरो नामाहीनां क्षीरमिव लोकविघातायैव भवति । "क्षीराज्यसोमान्नसुधासु चामृतम्" इति दण्डनाथः ।

"[1]यथा हिरण्यकस्यादादन्तस्थितहरीरितः । तथा नादात् तदन्यस्य ब्रह्मा दैत्यस्य कस्यचित्" इति च ॥ * ॥

[2]ताविहापि पुनर्जातौ शिशुपालकरूशकौ[3] ।
[4]हतौ वैरानुबन्धेन पश्यतस्ते समीयतुः ॥ ३९ ॥

एनः पूर्वकृतं यत् तद् राजानः कृष्णवैरिणः ।
[5]जहुस्तेऽन्ते तदात्मानः कीटाः पेशस्कृतो यथा[6] ॥ ४० ॥

"पौण्ड्रके नरके चैव साल्वे कंसे च रुग्मिणि । आविष्टास्तु हरेर्भक्तास्तद्भक्त्या हरिमीयिरे[7] । असुरास्तु स्वयं ते तु महातमसि पातिताः" इति च ।

[8]तदात्मानस्तत्राऽविष्टास्तद्भक्ताः । [9]वैरोपसर्जनेनानुबन्धेनेत्यन्वयः ॥ * ॥

---

१ "तथा" इति कोशेषु पठ्यते । अर्थस्तु न स्वरसः । अनेनेदमुक्तं भवति । हिरण्यकस्यापि न दातव्या आसीत् । गतं गतम् । इतःपरं तु सर्वथा न देहीति न भगवद्वचनस्यार्थः । किन्तु मद्भावानुसारेण हिरण्यकस्य यथैतादृशोऽपूर्वो वरो दत्तः, तथा मदाशयमनुसृत्यैवान्येषां नैवं वरः प्रदेय इति । सर्वथा पालिता च भगवदाज्ञा ब्रह्मणा । यतस्तथा नादात् तदन्यस्य ब्रह्मा दैत्यस्य कस्यचित् ।

२ "ताविहाथ" इति प्र. पाठः ।

३ "-करूषजौ" इति च । तालव्यान्त एव प्राचीनप्रयोगः । करूशानां राजा करूशो दन्तवक्रः ।

४ "हरौ वैरानु-" इति प्र. पाठः । पुनरपि हरिणा हतौ वैरसहितेनानुबन्धेन भक्त्या हरिसमीपमीयतुः पश्यतस्तव ।

५ "जहुस्त्वन्ते" इति प्र. पाठः ।

६ "कीटः पेशस्कृतो यथा" इति च । पेशस्कृतो वैरानुबन्धेन यथा कीटास्तत्सदृशात्मानो भवन्ति तथा पौण्ड्रकादयः कृष्णवैरिणो राजानोऽपि वैरेण यत् पूर्वकृतमेनः तदनुबन्धेनान्ते तदात्मानो जहुः । अत्रेयं व्यवस्था- नेदं केवलद्वेषिणामसुराणां सद्गतिविषयम् । किन्तु असुरैः सहैकदेहवासेन ये कृष्णवैरिण इवाऽसन्, वस्तुतस्तु तस्मिन् कृष्णे आत्मा मनो येषामिति तदात्मानस्तद्भक्तास्त एव पापं स्वैराविष्टेष्वसुरेष्वेव विहाय स्वयं भगवत्सायुज्यं नाम तदात्मतामीयुरिति ।

७ "हरिमापिरे" इति पाठान्तरम् ।

८ उत्तरार्धे तदात्मान इति न कृष्णवैरिणः पौण्ड्रकादयो राजान उच्यन्ते, किन्तु तत्राऽविष्टाः कृष्णभक्ता एवेत्याह—तदात्मानः । एतेन पूर्वोत्तरार्धयोर्भिन्नविषयत्वेन गमनिकान्तरं च सूचितम् । तथाहि- यत् पूर्वकृतमेनः तद् ये राजानः कृष्णवैरिणस्तैः कृतम् । अतस्तत्राऽविष्टा भक्तास्तत् तेष्वेव जहुः । स्वयं च तदात्मानस्तत्सायुज्यभाजोऽभूवन्निति । आपातदृशामेव कीटदृष्टान्तः । नहि दृष्टान्ते सर्वसाम्यं क्वापि ।

९ असुरसहवासनिमित्तेन वैरेण सहजेन चानुबन्धेनेत्यर्थः ।

एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः ।
अवतारकथा पुण्या वधो यत्राऽदिदैत्ययोः ॥ ४३ ॥

प्रह्लादस्यानुचरितं महाभागवतस्य च ।
[1]भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥ ४४ ॥

सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनम् ।
परावरेषां स्थानानां कालेनाप्यत्ययो[2] महान् ॥ ४५ ॥

धर्मो भागवतानां च भगवान् येन गम्यते ।
[3]प्रख्यानेऽस्मिन् समाख्यातमाध्यात्मिकमशेषतः ॥ ४६ ॥

भगवान् येन गम्यत इत्यनेन भागवतधर्मेणैव भगवान् गम्यते न द्वेषादिनेत्युपसंह्रियते । वृत्तानुकथनं तदर्थत्वेनैव । ज्ञानस्य विशेषा याथात्म्यादयः ।

> "भक्तिर्ज्ञानं विरक्तिश्च नवकः श्रवणादिकः । धर्मो भागवतः प्रोक्तस्तद्भक्तेषु तथा नव[4]"
> इति तत्त्वसारे ॥ * ॥

स वा अयं ब्रह्म महद्भिमृग्यं[5] कैवल्यनिर्वाणसुखानुभूति[6] ।
प्रियः सुहृद् वः खलु मातुलेय आत्माऽर्हणीयो विधिकृद् गुरुश्च ॥ ५० ॥

निर्वाणसुखं अशरीरसुखम् । "एतद् बाणमवष्टभ्य" इति श्रुतेः[7] ॥ * ॥

---

१ भक्तिरिति माहात्म्यज्ञानम् । विरक्तिरन्यत्रासारताबुद्धिः । याथात्म्यमात्मानात्मविवेकः, नित्यानित्यविवेकः, जीवपरमात्मविवेकश्च । तदेवं ज्ञानमिति सामान्यकथनम् । भक्तिर्विरक्तिर्याथात्म्यमिति विशेषनिर्देशः ।

२ "कालेन व्यत्ययो-" इति प्र. पाठः । "कालेनाव्यत्ययो-" इति च पाठान्तरम् । पराणामवराणाम् । तथा परावराणामत्युत्तमानामपि स्थानानां कालेनात्ययः प्रख्यानेऽस्मिन् समाख्यातः । उक्तं हि—"आब्रह्मस्तम्बपर्यन्तमसारं चाप्यनित्यकम्" इति ।

३ "आख्यानेऽस्मिन् समाम्नात-" इति प्र. पाठः । "आख्यानेऽस्मिन् समाख्यात-" इति क्वचित् ।

४ श्रवणादिको नवको धर्मः तद्भक्तेष्वपि कार्यः । भगवत इव भागवतानामपि श्रवणादिकं कर्तव्यमिति । अत एव मूलम्—"प्रह्लादस्यानुचरितं महाभागवतस्य च" इति । अत एव च तात्पर्यम्—"वृत्तानुकथनं च तदर्थत्वेनैव" इति ।

५ "महद्भिमृग्यकल्याण निर्वाण-" इति प्र. पाठः ।

६ "-सुखानुभूतिः" इति च । केवलमेव कैवल्यम् । अनितरसाधारणं स्वरूपसुखमनुभवतीत्यनुभूति । महद्भिरपि विमृग्यं ब्रह्म किलायं कृष्णः । स वः पाण्डवानां मातुलेयो विधिकृदाज्ञाकारी भृत्य इवेत्यहो भाग्यं वः ।

७ प्र. पाठेऽत्र दशमाध्यायपूर्तिः । न क्वापि प्राचीनकोशेषु ।

'स एष भगवान् राजन्नहनच्चापि संशयम्[2] ।
पुरा रुद्रस्य देवस्य मयेनानन्तमायिना[3] ॥ ५२ ॥

तदधीनं वा सर्वं नवेति संशयं रुद्रस्याप्यहनत्[4] । अल्पकेनैव मयेन रुद्रस्य प्रतीकारं कृत्वा ॥ * ॥

कस्मिन् कर्मणि देवस्य मयो हि जगदीशितुः[5] ।
यथा चोपचिता कीर्तिः कृष्णेन मम कथ्यताम्[6] ॥ ५३ ॥

कस्मिन् कर्मणि मयो विपरीतं चकार ?

"सापेक्षं नतु दोषाय यत्र सिद्धमपेक्षितम्" इति शब्दनिर्णये ॥ * ॥

देवोऽसुरो नरोऽन्यो वा नेश्वरोऽस्तीह कश्चन ।
आत्मनोऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः[7] ॥ ६५ ॥

---

१ विजयध्वजीयादिव्याख्यानरीत्या चायमेकादशाध्यायस्याऽऽदिमः श्लोकः । श्रीधरस्वाम्यादिरीत्या तु दशमाध्याय एव । अयमेव भगवत्पादपक्षः । प्राचीनकोशेष्वैकमत्यात् । अध्यायभेदस्त्वर्वाचीन इति भाति । विजयध्वजीयं त्वर्वाचीनैर्बहुधा प्रक्षिप्य पुनर्लिखितम्, मूलं तु लुप्तप्रायमिति पूर्वमेवाऽऽवेदितम् ।

२ "स एष भगवान् राजन् व्यातनोद् विहतं यशः" इति श्रीधरस्वाम्याद्यभिमत औत्तरेयः पाठः । यद्यपि दाक्षिणात्यकोशेषु "स एष भगवान् राजन्नकरोद् विततं यशः" इत्येव पाठः पठ्यते । विजयध्वजीयादिष्वपि स एव पाठः । नोभयमप्याचार्यसम्मतमिति भाति । तात्पर्याननुगुणत्वात् । तथाच तात्पर्यमनुसृत्यात्रान्य एव पाठः समादृतः । मूलं त्वन्वेष्टव्यम् । यतः सामस्त्येन तात्पर्यकृत्सम्मतः पाठो नैतावतोपलब्धः ।

३ अयमर्थः—एष भगवान् नारायणः तदधीनं सर्वं नवेति रुद्रस्य संशयं मयेनाहनत् । अल्पकं मयं निमित्तीकृत्याहन् । त्रिपुरसंहारे मयेन रुद्रं पराभाव्य "भगवदनुग्रहमन्तरेणायमल्पतमो मयोऽपि न मया जेतुं शक्यः" इति ज्ञापयामास । तेन सर्वस्य भगवदधीनतां रुद्रो विजज्ञाविति ।

४ "रुद्रस्याहनत्" इति प्र. पाठः ।

५ "मयोऽहन् जगदीशितुः" इति श्रीधरीयाद्यभिमतः पाठः । "देवस्य यशोऽभूज्जगदीशितुः" इति विजयध्वजीयाद्यभिमतः पाठः । भाष्यपदानुगुण्येनात्रान्यादृशः पाठः स्वीकृतः ।

६ "कृष्णेनानेन कथ्यताम्" इति प्र. पाठः । जगदीशितुर्देवस्य रुद्रस्य मयः कस्मिन् कर्मणि? विपरीतं चकारेति सिद्धम् । पूर्वश्लोके तावन्मयः प्रतीकारं चकारेति ज्ञातम् । ततः कस्मिन् कर्मणीत्येव प्रश्नः पर्याप्नोति । सशयच्छेदेन यथा तस्य कीर्तिर्वर्धिता कृष्णेन तदपि कथ्यताम् ।

७ द्वयोरात्मनोऽन्यस्य च यद्यद् दैवेन विष्णुना दिष्टं तदात्मनोऽन्यस्य वा व्यपोहितुं देवादिषु न कोऽपि समर्थः ।

60

विष्णुना दिष्टं व्यपोहितुं देवोऽसुरोऽन्यो[1] वा न समर्थः ॥ * ॥

इति सप्तमस्कन्धे दशमोऽध्यायः[2]

श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः ।
सेवेज्याऽवनतिः[3] सख्यं दास्यमात्मसमर्पणम् ॥ ११ ॥

"[4]अनाद्यनन्तकालेषु मुक्तौ संसार एव च । मयिस्थश्चोदयत्येको विष्णुर्मां सर्वदैव तु[5] । इति सम्प्रीतिकं[6] ज्ञानं विद्यादात्मसमर्पणम् । [7]बहिस्थेश्वरदासत्वं दास्यमित्युच्यते बुधैः" इति तन्त्रमालायाम् ॥ * ॥

या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा ।
[8]हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥ २९ ॥

"हरिरस्मिन् स्थित इति स्त्रीणां भर्तरि भावना । शिष्याणां च गुरौ नित्यं शूद्राणां ब्राह्मणादिषु । भृत्यानां स्वामिनि तथा हरिभाव उदीरितः[9]" इति च ॥ * ॥

इति सप्तमस्कन्ध एकादशोऽध्यायः[10]

---

१ "देवोऽसुरो वाऽन्यो वा" इति क्वचित् ।
२ प्र. भाष्यपाठेऽत्र एकादशोऽध्यायः ।
३ "—नतिर्दास्यं सख्यमात्म—" इति प्र. पाठः ।
४ पूर्वमात्मनि भगवतो वेदनमात्मनिवेदनमिति व्याख्यातम् । ननु तदयुक्तम् । अत्राऽत्मसमर्पणमित्युक्तेः । तदनुसारेण तत्राप्यात्मनो निवेदनमित्येव व्याख्यातुमुचितम् । न, उभयथाऽपि शक्यं व्याख्यातुम् । अन्ततोऽर्थैक्यादित्याह — अनादीत्यादि ।
५ "मयि स्थितश्चोदयति ह्येको विष्णुः सदैव तु" इति क्वचिन्मुद्रितः पाठः ।
६ "सप्रीतिकम्" इति क्वचित् ।
७ "बहिष्ठेश्वर—" इति च ।
८ हर्यात्मना हरेर्विशेषसन्निधानवता पत्या सह ।
९ "इतीरितः" इति क्वचित् ।
१० प्र. भाष्यपाठे द्वादशोऽध्यायः ।

[1]कल्पयेदात्मनो यावदाभासमिदमीश्वरः ।
द्वैतं तावन्न विरमेत् ततो ह्यस्य विपर्ययः ॥ १० ॥

"बहुत्वेनैव वस्तूनां यथार्थज्ञानमुच्यते । अद्वैतज्ञानमित्येव[2] द्वैतज्ञानं तदन्यथा । यथा ज्ञानं तथा वस्तु यथा वस्तु तथा मतिः । नैवं[3] ज्ञानार्थयोर्भेदस्तत एकत्ववेदनम्" इति च ॥ * ॥

[4]दत्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः ।
गृहं वनं वा प्रविशेत् प्रव्रजेत् तत्र वा वसेत् ॥ १४ ॥

"[5]गुरोराज्ञानुरोधेन दूरस्थो वा गृही भवेत्" इति च ॥ * ॥

[6]अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजम् ।
भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥ १५ ॥

"अप्रविष्टः सर्वगतः प्रविष्टस्त्वनुरूपवान् । एवं द्विरूपो भगवान् हरिरेको जनार्दनः" इति च ॥ * ॥

आत्मन्यग्नीन् समारोप्य सन्न्यस्याहम्ममात्मताम् ।
[7]कारणेषु न्यसेत् सम्यक् सङ्घातं तु यथार्हतः ॥ २४ ॥

"कार्यस्य कारणलयज्ञानमात्रं विलापनम्" इति च ॥ * ॥

---

१ "कल्पयित्वाऽऽत्मना" इति प्र. पाठः । "कल्पयत्यात्मनो–" इति केचित् । ईश्वरः जीवस्य आभासं देहेन्द्रियादिकम्, तेन हि जीवस्य विषयाभासः, यावत् कल्पयेत् सम्पादयेत् तावत् द्वैतमन्यथाज्ञानं न विरमेत् । ततश्चास्य विपर्ययो दुःखादिः सुखादिरूपस्य ।

२ "ज्ञानमित्येतद्–" इति प्र. पाठः । ३ "नैव" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

४ यदि शक्तः तदा गुरोः कामितं वरं दक्षिणादिकं दत्वा । दूरस्थः गृहं वा प्रविशेत् । नैष्ठिकस्तत्रैव वा वसेत्

५ गृही भूत्वा स्वगृहं वा प्रविशेत्, तत्र वा वसेदित्यर्थभ्रान्तिं वारयन्नाह—गुरोराज्ञानुरोधेन । एतेन मूले वाशब्दो व्यवस्थितविकल्प इत्युक्तं भवति । गुरुणा अनुज्ञातः अनुज्ञानुसारेण गृही वनी वा स्यादित्यादि । यद्वा अनुज्ञात इति पञ्चमी ल्यबर्थे । गुरोरनुज्ञामनुसृत्य । गृही भवेति गुरुणोक्तो गृहं प्रविशेत् । प्रव्रजेत्युक्तः प्रव्रजेदित्यादि । "गुरोराज्ञानुसारेण" इति क्वचित् पाठान्तरम् ।

६ अधोक्षजमग्नौ गुरावात्मनि सर्वभूतेषु च प्रविष्टवत् अप्रविष्टं च पश्येत् । अन्तःप्रविष्टमन्तर्यामिरूपमिव अप्रविष्टं सर्वगतं च रूपमनुसन्दध्यादिति । योऽयं मयि गतः स एव सर्वगत इति । कथं पश्येत्? भूतैः । भगवदावासभूतैः जीवैः सह पश्येत् । जीवान् प्रतिबिम्बान् विज्ञाय ततो विवेकेन बिम्बं भगवन्तं पश्येत् । भूतैः प्रभूतैः स्वसामर्थ्यैरुपलक्षितमिति वा ।

७ सङ्घातं कार्यजातं यथार्हतः यथायोग्यं कारणेषु न्यसेत्, येन क्रमेण लीयते तं लयक्रममनुसन्दधीत । इदमस्मिन् लीयत इति ।

मनो मनोरथश्चन्द्रे बुद्धिं बोध्यैः कवौ परे ।
कर्माण्यध्यात्मना रुद्रे यदहंसम्मताः क्रियाः[1] ।
[2]सत्त्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ॥ २९ ॥

परः कविर्बृहस्पतिः ।

"चित्तं हिरण्यगर्भे तु विलाप्य परमात्मनि । क्षेत्रज्ञाख्ये लापयेच्च ततो नान्यत् स्मरेद् बुधः" इति च ॥ * ॥

[3]इत्यक्षरतयाऽऽत्मानं चिन्मात्रमवशेषितम् ।
ज्ञात्वाऽद्वयोऽथ विरमेद् दग्धयोनिरिवानलः ॥ ३१ ॥

आत्मानं परमात्मानम् । अद्वयः ततोऽन्यस्मृतिवर्जितः । दग्धयोनिर्यथाऽनल इति कृत्याभावमात्रम् ।

"न हरिं स्मरतः[4] कृत्यं दग्धेन्धनहुताशवत्" इति च ॥ * ॥

इति सप्तमस्कन्धे द्वादशोऽध्यायः[5]

---

१ "यदहम्ममताक्रिया" इति प्र. पाठः । मनोरथैः सह मनो मनोभिमानिनि चन्द्रे न्यसेत् । बुद्धिविषयैः सह बुद्धिं तदभिमानिनि परे कवौ बृहस्पतौ । अहङ्कारकार्याणि कर्माणि अध्यात्मनाऽहङ्कारेण सह तदभिमानिनि रुद्रे । कथमहङ्कारकार्याणि कर्माणि? यदहंसम्मताः क्रियाः । इदमकरवम्, इदमहं करोमि, इदंच करिष्य इत्यहङ्कारपूर्वमेव हि सर्वाः क्रियाः प्रवर्तन्ते ।

२ सत्त्वं पूर्वानुभूतविषयप्रकाशः । "तत्र सत्त्वं निर्मलत्वात् प्रकाशकम्" इत्युक्तेः । "चित्तं स्मरणकारणम्" इति च । तेन स्वकार्येण सह चित्तं क्षेत्रज्ञे चतुर्मुखे । तं च गुणैः सात्विकादिस्वभावैः सह वैकारिकं सर्वजीवाभिमानिनं चतुर्मुखं परे क्षेत्रज्ञे मुख्यक्षेत्रज्ञे परमात्मनि न्यसेत् ।

३ अक्षरस्य प्रकृतितत्वस्यापि नियामकतया मुख्याक्षरतया स्थितमात्मानं परमात्मानम् । "ओमित्येतदक्षरं ब्रह्म" इति हि श्रूयते । सकलसृष्टेस्तस्मिन् विलयचिन्तनात् स्वयं चिन्मात्रमवशेषितं ज्ञात्वा अद्वयो बाह्यव्यापाराद् विरमेत् । न विद्यते स्मर्तव्यद्वयं यस्य सोऽद्वयः । अनन्यः । परमात्मानमेव स्मरन् । "अनन्याश्चिन्तयन्तो माम्" इति ह्युक्तम् । तस्य हरेरन्यत् स्मर्तव्यं नास्ति; स्मरणादन्यत् कर्तव्यं नास्तीति अद्वयो विरमेदित्युक्तम् । यथा दग्धेन्धनोऽनलः बाह्यदाह्याभावाद् दाहकृत्याद् विरमति ।

४ "न बर्हिः स्मरतः" इति क्वचित् । ५ प्रचलितभाष्यपाठेऽत्र त्रयोदशोऽध्यायः ।

पश्येदात्मन्यदो विश्वं परे सदसतोऽद्वये[1] ।
आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ॥ ४ ॥

आत्मनि परमात्मनि ॥ * ॥

नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकाम् ।
[2]अतिवादांस्त्यजेत् तर्कान् पक्षं कञ्चिन्न संश्रयेत्[3] ॥ ७ ॥

[4]न शिष्याननुबध्नीत ग्रन्थान् नैवाभ्यसेद् बहून्[5] ।
[6]न व्याख्यामुपयुञ्जीत नाऽरम्भानारभेत् क्वचित् ॥ ८ ॥

[7]अप्रयोजकं पक्षं न संश्रयेत् ।

"नाप्रयोजनपक्षी स्यान्न वृथा शिष्यबन्धकृत् । नचोदासीनशास्त्राणि न विरुद्धानि चाभ्यसेत् । न व्याख्ययोपजीवेत[8] न निषिद्धान् समारभेत्[9] । एवम्भूतो यतिर्याति तदेकशरणो हरिम्" इति समयाचारे[10] ॥ * ॥

विकल्पं जुहुयाच्चित्ते[11] तन्मनस्यर्थविभ्रमे ।
मनो वैकारिके हुत्वा मायायां वै जुहोत्यमुम्[12] ॥ ४३ ॥

---

१ "सदसतोऽव्यये" इति प्र. पाठः । सदसतः कार्यकारणरूपात् क्षराक्षरात् परे आत्मनि परमात्मनि इदमाश्रितं पश्येत् । तं च सर्वत्र व्याप्तम् । "सर्वभूतस्थमात्मानं सर्वभूतानि चाऽत्मनि" इति गीतासु । "यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति" इति च ।

२ "वादवादांस्त्यजेत्" इति प्र. पाठः ।

३ "कं च न संश्रयेत्" इति च । जीविकां नोपजीवेत । तर्कातीतेषु निहितवदनान् शुष्कतर्कान् त्यजेत् । कञ्चिदयुक्तं व्यर्थं वा पक्षमाग्रहेण निर्बन्धादिना वा न संश्रयेत् ।

४ ज्ञानोद्देशादृते स्वलाभाय प्रलोभादिना शिष्यान् न निर्बध्नीयात् ।

५ बहून् बहुमुखान् परस्परं विप्रतीपांश्च । चित्तविक्षोभ एव येन भवेत् ।

६ व्याख्यां जीविकार्थं नोपयुञ्जीत । नाप्यारम्भान् जीविकाद्यर्थमारभेत । "सर्वारम्भपरित्यागी" इति, "यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः" इतिच गीतासु । "आरम्भान् मठादिव्यापारान्" इति श्रीधरस्वाम्यादयः ।

७ "अप्रयोजनपक्षम्" इति प्र. पाठः । येन प्रयोजनं नास्ति, येन च साधकस्य स्वप्रयोजनं हीयते तदुभयमप्यप्रयोजकम् ।

८ "न व्याख्यायोपजीवेत" इति क्वचित् ।

९ "समाचरेत्" इति प्र. पाठः ।

१० "समाचारे" इति च ।

११ "जुहुयाच्चित्तौ तां मनस्यर्थ-" इति च ।

१२ "हुत्वा तन्मायायां जुहोत्यमुम्" इति च । विविधतया क्लृप्तं जगत् तदभिमानितया क्लृप्तान् अग्न्यवमान् देवांश्च चित्ताख्येऽग्नौ जुहुयात् । तदधीनांश्चिन्तयेत् । तत्र तल्लयं च चिन्तयेत् । अर्थेषु भ्रमयतीति तादृशे मनसि

चित्ते मनोवृत्त्यभिमानिनि[१] । अर्थविभ्रमे अर्थेषु भ्रममाणे ।

"चित्ताख्याग्नेरधीनं हि जगदेतद् विचिन्तयेत् । मनोनामेन्द्रवशगमग्निं च प्रविचि-न्तयेत्" इत्यादि च ॥ * ॥

स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितम् ।
व्यपेतं लोकशास्त्राभ्यां भवान् हि भगवत्प्रियः[२] ॥ ४५ ॥

"[३]अशास्त्रियत्वान्मुखतः शास्त्रापेतमिदं विदुः । शास्त्रनिर्णयगम्यत्वाच्छास्त्रीयम-भिधीयते" इति च ॥ * ॥

इति सप्तमस्कन्धे त्रयोदशोऽध्यायः[४]

कृमिविड्भस्मनिष्ठान्तं क्वेदं तु स्वकलेवरम्[५] ।
क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदः[६] ॥ १४ ॥

[७]नभश्छदः नभो व्याप्य स्थितः परमात्मा ॥ * ॥

तदभिमानिनीन्द्रे तच्चित्तमग्निं जुहुयात् । तन्मनः इन्द्रं वैकारिके जीवाभिमानिनि ब्रह्मणि । गरुडशेषद्वारा । यतोऽत्रेन्द्रपदेन वीन्द्राहीन्द्रावपि विवक्षितौ । तममुं ब्रह्माणं मायायां श्रीतत्वे । तद्द्वारा स्वानुभूतिरूपे परमात्म नीत्युत्तरत्रान्वयः । "स्वानुभवं ब्रह्म" इति प्रथमतात्पर्ये स्थितम् ।

१ "मनोऽभिमानिनि" इति क्वचित् । न स्वरसोऽर्थः । २ "भगवत्परः" इति प्र. पाठः ।

३ "अशास्त्रीयत्वान्मुखतः" इति च । शास्त्रेषु मुखतोऽवचनादशास्त्रीयम् । "मन्दद्दष्टया लोकशास्त्राभ्यां व्यपेतम्" इति हि श्रीधरस्वाम्यादयोऽपि व्याचक्षते ।

४ प्र. भाष्यपाठे चतुर्दशोऽध्यायः । ५ "क्वेदं तुच्छं कलेवरम्" इति प्र. पाठः ।

६ "नभश्छदिः" इति पाठान्तरम् । तदीया तादृशदेहनिमित्ता रतिर्यस्यां सा भार्या क्व? नभोऽपि छादयतीति सर्वगतोऽपि निर्लिप्तः परमात्मा क्व?

७ "नभश्छदिः" इति प्र. पाठः । कोशेषु चोभयथाऽपि पठ्यते । प्रतनतमे तु कोशे "नभश्छदः" इति पठ्यते । वीरराघवोऽप्येतमेव पाठमङ्गीचकार । "नभश्छदः आकाशस्यापि छादयिताऽऽकाशतुल्यो निर्लेपः" इति तद्व्याख्यानम् । यद्यपि कोशेषु "नभच्छदः" इतीव पठ्यते । लिपिकृत्प्रमादः स्यात् ।

[1]तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके ।
चतसृष्वप्यष्टकासु हेमन्ते शिशिरे तथा ॥ २२ ॥

"[2]सप्तम्यादित्रयं चैव तथाचैव[3] त्रयोदशी । चतस्रस्त्वष्टकाः प्रोक्ताः सर्वपक्षाद् विशेषतः" इति [4]व्यासस्मृतौ । "हेमन्ते शिशिरे चैव नित्यश्राद्धं[5] गुणोत्तरम्" इति च ॥ * ॥

[6]पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः ।
शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥ ३८ ॥

---

१ वैशाखे शुक्लपक्षे तृतीयायामक्षयतृतीयायाम् । कार्त्तिके शुक्लपक्षे नवम्याम् । कृतयुगादित्वात् त्रेतायुगादित्वाच्च तयोः श्राद्धं प्रशस्तम् । "वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम् । कार्त्तिके शुक्लपक्षे तु त्रेताऽथ नवमेऽहनि" इति ब्राह्मे । "वैशाखमासस्य सिता तृतीया नवम्यथो कार्त्तिकशुक्लपक्षे" इति च विष्णुपुराणे श्राद्धप्रकरणे । हेमन्ते शिशिरे मार्गशीर्षादिफाल्गुनान्तमासचतुष्टये तत्रापि विशेषतः कृष्णपक्षे सप्तम्यादित्रयं त्रयोदशी च चतस्रोऽष्टकाः । एवं दिनचतुष्टयात्मकत्वात् मासचतुष्टये चतुर्वारमावृत्तत्वाच्चोभयथाऽपि चतस्रः । तत्रापि पुष्यादिफाल्गुनान्तमासत्रये पुनर्विशेषत आमनन्ति धर्मशास्त्रकाराः । तथाहि गोभिलः—"अष्टका ऊर्ध्वमाग्रहायण्याः" इति । अत एव "त्रिष्वष्टकासु" इति विष्णुपुराणम् । पुष्यादिषु त्रिषु मासेषु या अष्टकास्तास्विति किल तदर्थः । अन्यथा "तिसृष्वष्टकासु" इत्यवक्ष्यत् । अश्नन्ति पितरोऽस्यामित्यष्टका । अत एषु दिनेषु श्राद्धं कुर्यादिति पूर्वान्वयः ।

२ यद्यपि लोके तिस्रोऽष्टका इति प्रसिद्धिः । तदुक्तम्—"अष्टका तु समाख्याता सप्तम्यादिदिनत्रयम्" इति । तदनुसारेण मूलस्यायमर्थः—हेमन्ते शिशिरे च मासचतुष्टयस्य कृष्णपक्षेषु चतुर्वारमावृत्तासु तिसृष्वष्टकासु सप्तम्यादिदिनत्रयेषु श्राद्धं कुर्यादिति । अष्टम्येकैवाष्टकेत्यपरः पक्षः । तथाचोक्तमाश्वलायनेन—"हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः" इति । तथाच मूलयोजना—हेमन्ते शिशिरे च चतसृष्वष्टकासु कृष्णपक्षीयाष्टमीष्विति । तदेवं प्रसिद्धमर्थद्वयं विहाय कञ्चनापूर्वमर्थविशेषमाविश्चकार भाष्यकारः—"सप्तम्यादित्रयं चैव तथाचैव त्रयोदशी । चतस्रस्त्वष्टकाः प्रोक्ताः" इति । मुख्यतश्चतस्र एवाष्टकाः । तिस्रोऽष्टकाः एकैव वेत्याद्यशक्तविषयममुख्यम् । तिस्रोऽष्टका इत्यनध्यायविषयं च । नहि त्रयोदश्यामनध्यायः ।

३ "तथा चैत्रत्रयोदशी" इति प्र. पाठः प्रामादिकः । यथा सप्तम्यादित्रयं पितृतुष्टिदमित्यष्टकेत्युच्यते तथाचैव तथैव त्रयोदशी चाष्टकोच्यते । ततश्चतस्र एवाष्टका मुख्यतः प्रोक्ता इत्यर्थः । अत एव सर्वस्मात् पक्षात्, पक्षगतसर्वदिनेभ्यः विशिष्योच्यन्ते ।

४ "इति च व्यासस्मृतौ" इति प्र. पाठः ।

५ "नित्यं श्राद्धम्" इति क्वचित् ।

६ नृतिर्यगादिरूपाणि पुराणि शरीराण्यनेन भगवतैव सृष्टानि । यक्षरक्षःप्रभृतीनां तिर्यक्पदेनैव ग्रहणम् । तिर्यग्गतयो हि ते । तेषु स्वसृष्टेषु पुरेषु शेत इत्यतो हि पुरुषोऽसावुच्यते वेदेषु । कथं शेते? जीवाख्येन बिम्बरूपेण सह । तथाच देहमध्ये आत्मनामकः, जीवहृदयमध्ये चान्तरात्मनामकः जीवस्य बिम्बभूतः जीवयतीति

[1]जीवरूपेण सह ॥ * ॥

[2]तेष्वीशो भगवान् राजंस्तारतम्येन वर्तते ।
तस्मात् पात्रं हि पुरुषो यावानात्मा यथेयते ॥ ३९ ॥

"ब्रह्मादिस्थावरान्तेषु न विशेषो हरेः क्वचित् । व्यक्तिमात्रविशेषेण तारतम्यं वदन्ति च" इति च[3] ॥ * ॥

पुरुषेष्वपि राजेन्द्र [4]सत्पात्रं ब्राह्मणं विदुः ।
तपसा विद्यया तुष्ट्या धत्ते चेदं हरेस्तनुम्[5] ॥ ४२ ॥

[6]तन्वोऽस्य ब्राह्मणा राजन् कृष्णस्य जगदात्मनः ।
पुनन्तः पादरजसा त्रिलोकं दैवतं महत्[7] ॥ ४३ ॥

"शिलावत् प्रतिमाः सन्तो विप्राद्याश्च हरेः स्मृताः" इति च ॥ * ॥

इति सप्तमस्कन्धे चतुर्दशोऽध्यायः[8]

जीवनामकश्च शेत इति रूपद्वयं भगवत उक्तं भवति । "रूपंरूपं प्रतिरूपो बभूव" इति श्रुतिः । "रूपेण प्रतिबिम्बभूतेन जीवेन सह" इत्यपि व्याचक्षते ।

१ जीवाख्येन जीवस्य विम्बरूपेण सहेत्यर्थः। "जीवेन रूपेण" इति प्र. पाठः । "जीवेन जीवयित्रा जीवान्तर्यामिरूपेण" इति जीवगोस्वामी । "जीवेन पालनीयेन सह रूपेण अन्तर्यामिरूपेण शेते जीवपालनार्थम्" इति शुकदेवः ।

२ "तेष्वेषु भगवान्" इति प्र. पाठः । तेषु च देवादिशरीरेषु तत्तज्जीवस्वभावतारतम्यानुसारेण स्वयमपि भगवान् सन्निधितारतम्येन वर्तते तस्मादात्मा परमात्मा यत्र यावान् यथा चेयते ज्ञायते स पुरुषस्तावत् तथा च पुरुषत्वपात्रं पूजापात्रं च भवति। प्राणिभ्योऽधिकं नरेषु सन्निधानमिति ते पुरुषा उच्यन्ते। ततोऽप्यधिकपुरुषा देवाः । यतः पुरुषसन्निधानेनैव एषु पुरुषत्वमुत्कृष्यतेऽपकृष्यते वा ।

३ प्र. पाठेऽत्र 'च'कारो न पठ्यते ।

४ "सुपात्रम्" इति प्र. पाठः ।

५ "धत्ते वेदं हरेस्तनुम्" इति पाठान्तरम् । हरेस्तनुं प्रतिमास्थानीयमिदं शरीरं धत्ते ।

६ "नन्वस्य" इति प्र. पाठः । कृष्णस्य तन्वः प्रतिमाः । अत एव पादरजसा भुवं पुनन्तः । त्रिलोकेऽपि महद् दैवतमिति पूज्याः ।

७ "त्रिलोकीं दैवतं महत्" इति प्र. पाठः ।

८ प्र. भाष्यपाठेऽत्र पञ्चदशोऽध्यायः ।

इन्द्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति ।
इन्द्रियाणि मनस्येवं[१] वाचि वैकारिकं मनः ॥ ५० ॥

[२]वाचं वर्णसमाम्नाये तमोङ्कारे स्वरे न्यसेत् ।
[३]ओङ्कारं बिन्दुनादे तु तं तु प्राणे महत्यमुम् ॥ ५१ ॥

"यज्ञाभिमानिनो देवान् स्मरन्तीन्द्रियमानिनाम् । वशगांस्तान् मनोमानिसुरेन्द्रस्य वशे स्थितान् । वेदात्मिकायाः पार्वत्यास्तं तां रुद्रवशे स्थिताम्[४] । वर्णत्रयात्मकं रुद्रं शेषे तु प्रणवात्मके । बिन्दुरूपसरस्वत्यां तं तां तस्यां पुनर्न्यसेत् । [५]मूलस्था नादरूपा या तां वायौ तं जनार्दने । प्रकृतावथवा प्राणं तामेव पुरुषोत्तमे" इति ब्रह्मतर्के ॥ * ॥

अग्निः सूर्यो दिवा वायुः[६] शुक्लो राकोत्तरं स्वराट् ।
[७]विश्वोऽथ तैजसः प्राज्ञस्तुर्य आत्मा समन्वयः[८] ॥ ५२ ॥

---

१ "मनस्यूर्मौ वाचि" इति प्र. पाठः । २ "तां तु वर्ण—" इति च ।

३ "ओङ्कारं बिन्दौ नादे तं तं तु" इति च । अयं श्लोकद्वयार्थः । क्रियाप्रधानान् यज्ञान् । यज्ञेष्वपि ज्ञानमस्ति । इन्द्रियेष्वपि क्रियाऽस्ति । अतो व्यवस्थामाह–क्रियाप्रधानान् यज्ञाभिमानिनः शतस्थान् ज्ञानप्रधानेषु इन्द्रियाभिमानिषु दशसु जुह्वति । तेषु होमस्तद्वशत्वेन स्मरणम् । इन्द्रियाणि मनसीन्द्रे । सङ्कल्पविकल्पविकारयुक्तं मनः वेदवाचि उमायाम् । "स तस्मिन्नेवाऽऽकाशे स्त्रियमाजगाम बहुशोभमानामुमाम्" इति हि श्रूयते । तां प्रत्येकं ओङ्कारगतवर्णत्रयात्मके रुद्रे । तं वर्णसमुदायात्मकस्वराभिमानिनि शेषे । तं बिन्दुनादे बिन्दुरूपायां नादरूपायां च सरस्वत्याम् । शेषं बिन्दुरूपायां तां तस्यामेव मूलाधारस्थनादरूपायामिति विशेषस्तात्पर्यादवसेयः । तां मुख्यप्राणे, तं च प्रकृतिद्वारा महति परमपुरुष इति ।

४ "पार्वत्यास्तां रुद्रस्य वशे स्थिताम्" इति प्र. पाठः प्रामादिकः ।

५ "मूलस्था नादरूपायाम्" इति प्र. पाठश्च भ्रम एव । केचित् "मूलस्थनादरूपायाम्" इति पठन्ति । मूलस्था मूलाधारस्थिता ।

६ "दिवा प्राह्णः" इति प्र. पाठः । ७ "विश्वश्च तैजसः" इति च ।

८ देवयाने गम्या देवा उच्यन्ते । अविवक्षितः क्रमः । अग्निस्ततो वायुरातिवाहिकः । ततो दिवा दिवसाभिमानी । ततः शुक्लो राका । इयमेकैव देवतेति भाति । शुक्लपक्षाभिमानिनी पूर्णिमाभिमानिनी च । तत उत्तरायणम् । ततः संवत्सरदेवता तटिद्वरुणप्रजापतयश्च उपस्कर्तव्याः । ततः सूर्यः । ततः सोमवैश्वानरद्वारा स्वराट् इन्द्रः । ततः भारतीपुत्रा विश्वतैजसप्राज्ञनामानस्त्रयो देवाः । इन्द्रादनन्तरं निर्देशात् भारतीतनयत्वाच्च एते रुद्ररूपाः स्युः । अथवा "या मारुताद् गर्भमधत्त पूर्वं .... चतुर्मुखाभांश्चतुरः कुमारान्" इत्युक्ता गरुडशेषरुद्रा इन्द्रवर्जं विश्वादयः स्युः । परावरदृशः प्रमाणम् । ततश्च भारतीप्राणद्वारा विश्वादिरूपो भगवान् । अन्ते तुर्यो वासुदेवः परमात्मा समन्वीयते । सा काष्ठा सा परा गतिरित्येतत् । "समन्वयात्" इति प्र. पाठः ।

[1]स्वराळिन्द्रः '।

[2]"विश्वाद्या अनिरुद्धाद्यास्ते द्विधा सम्प्रकीर्तिताः। विष्णुरूपास्तदन्ये च तान् सर्वान् याति मोक्षगः। तदन्ये[3] तु दिवस्पुत्राः सर्वे च द्युसमीपगाः। ते दिवं प्रापयन्त्येनं [4]सवायुं स हरिः पृथक्। विश्वादिरूपस्तुर्यश्च[5] वासुदेवश्च नापरः" इति च ॥ * ॥

देवयानमिदं प्राहुर्भूत्वाभूत्वाऽनुपूर्वशः[6] ।
आत्मयाज्युपशान्तात्मा ह्यात्मस्थो न निवर्तते ॥ ५३ ॥

अधिको भूत्वाभूत्वा सुखादिभिः[7] ॥ * ॥

य एते पितृदेवानामयने देवनिर्मिते[8] ।
शास्त्रेण चक्षुषा वेद न जनस्थोऽपि मुह्यति[9] ॥ ५४ ॥

"भक्तिमान् मार्गविन्नैव नीचां गतिमवाप्नुयात्" इति च ॥ * ॥

[10]"आदावन्ते जनानाञ्च बहिरन्तः परावरम्।
ज्ञानं ज्ञेयं वचो वाच्यं तमो ज्योतिश्च यत् स्वयम्[11]" ॥ ५५ ॥

ग्लापकत्वात् तमः ॥ * ॥

---

१ "स्वराडिन्द्रः" इति च।

२ विश्वतैजसप्राज्ञाः अनिरुद्धप्रद्युम्नसङ्कर्षणाश्च नाम विष्णोरन्ये द्युपुत्रा देवताविशेषाः विष्णुरूपाश्चेति द्वेधा।

३ "तदन्ये च" इति प्र. पाठः।

४ "सा वायुं स हरिं पृथक्" इति प्र. पाठः। कोशेषु च क्वचित्। ते दिवस्पुत्राः एनं मुक्तजीवं सवायुं दिवं प्रापयन्ति। तौ च भारतीप्राणौ हरिमित्युपस्कर्तव्यम्। स च हरिः पुनः पृथग् विश्वादिरूपः। तत्र तुर्यश्च वासुदेवश्च हरिरेव। नापरः कश्चित् तन्नामा दिवस्पुत्रो नामास्ति।

५ "विश्वादिरूपं तुर्यश्च" इति क्वचित्। तत्र स विश्वादिरूपं हरिमित्यन्वयः। "विश्वादिरूपं तुर्यं च" इति प्र. पाठः प्रामादिकः।

६ अस्मिन् देवयाने अनुपूर्वशः क्रमेण उपर्युपरि सुखाधिको भूत्वाभूत्वा न निवर्तते। आत्मयाजी परमात्मपूजकः, उपशान्तात्मा पूर्णसुखस्वरूपः तृप्तश्च।

७ "अधिको भूत्वा सुखादिभिः" इति प्र. पाठः। ८ "वेदनिर्मिते" इति प्र. पाठः।

९ "वेद जनस्थोऽपि न मुह्यति" इति च। य एते याने शास्त्रदृष्ट्या वेद स भगवति भक्तिमांश्चेत् मूढजनमध्यस्थोऽपि न मुह्यति। "जनस्थो देहस्थः" इत्यपि व्याचक्षते।

१० "आदावन्ते जनानां सद् बहिरन्तः" इति प्र. पाठः।

११ "ज्योतिस्त्वयं स्वयम्" इति च। सृष्टेरादावन्ते च विद्यमानम्। जना जनकं नाशं नाशकमिति व्याचक्षते। जने जनने सृष्टौ सत्यां अनेन प्राणेन सह सृष्टं जगदश्नोति व्याप्नोतीति वा। "या प्राणेन सम्भवति" इति

[1]अबाधितोऽपि ह्याभासो यथाऽवस्तुतया स्मृतः[2] ।
दुर्घटत्वादैन्द्रियकं तद्वदर्थविकल्पितम् ॥ ५६ ॥

दुर्घटत्वादर्थत्वेन परमेश्वरेणैव कल्पितम्[3] ॥ * ॥

क्षित्यादीनामिहार्थानां छाया न कतमाऽपि हि ।
न सङ्घातो विकारो वा न पृथङ् नान्वितोऽपि वा[4] ॥ ५७ ॥

"छाया रीतिः प्रकारश्च भावश्चेत्यभिधीयते" इति शब्दनिर्णये ।

क्षित्यादीनां पदार्थानां कतमोऽपि प्रकारो न घटते । परमेश्वरकल्पितत्वात् कार्यमित्येव वक्तुं युक्तम् । [5]नहि बह्वपां सङ्घातमात्रं पृथिवी । नच विकारमात्रम् । नहि कालुष्यादिविकारमात्रेण पृथिवी भवति । नचाद्भ्यः पृथक् स्थितिः । नच वस्तुद्वयवत् सहावस्थानमात्रम् ॥ * ॥

धातवोऽवयवित्वाच्च तन्मात्रावयवैर्विना ।
न स्युर्ह्यसत्यवयविन्यासन् नावयवा इव[7] ॥ ५८ ॥

एवमवयवावयविनोरपि ॥ * ॥

श्रुतेः । जनो जननरूपः संसारः अनाशो मोक्षश्च येनेति वा । बहिरन्तर्व्याप्तम् । अत एव परावरम् । "सर्वं समाप्नोषि ततोऽसि सर्वः" इत्युक्तेः । परा अप्यवरा यस्मादिति वा । ज्ञानं ज्ञेयं वचो वाच्यमिति नामरूपात्मकं सर्वं तदधीनत्वात् तत् । ज्ञानरूपम् । सकलवेदज्ञेयम् । वचसां च वाच्यमुत्तममिति वा । तमयति दुःखयति तमोयोग्यानिति तमः । ज्योतिः प्रकाशरूपम् । तदेतत् सर्वं स्वयं भगवानेव ।

१ "आबाधितोऽपि" इति प्र. पाठः ।

२ "यथा वस्तु तथा स्मृतः" इत्येके पठन्ति । आभासः प्रतिबिम्बः अबाधितत्वेन सत्योऽपि अवस्तुतया स्मृतः । अनित्यत्वात्, प्रतिहतत्वाच्च । "वेद्यं वास्तवमत्र वस्तु" इत्युक्तं हि । सर्वथा बिम्बाधीनत्वादस्वतन्त्रवस्तुतया स्मृत इति यावत् । नतु मिथ्यात्वात् । यतोऽबाधितः । तद्वदैन्द्रियकस्यास्य जगतोऽपि स्वातन्त्र्येण सत्ताप्रतीत्यादेर्दुर्घटत्वात् स्वतन्त्रेणेश्वरेणैवार्थत्वेन तद् विविधतया कल्पितमित्यस्वातन्त्र्यादेवावस्त्वित्युच्यते नत्वसत्यत्वादिति । यथा वस्तुतयेति वा च्छेदः । यथा प्रतिबिम्बोऽपि अबाधितत्वात् वस्तुतया सत्यत्वेन स्मृतः तथेश्वरसृष्टत्वादिदमप्यबाधितं सत्यमिति । ३ विना परमेश्वरेण कल्पितं सृष्टमित्यप्यर्थं वर्णयन्ति ।

४ "विकारोऽपि न पृथङ् नान्वितो मृषा" इति प्र. पाठः । "नान्यतोऽपि वा" इति क्वचित् प्राचीनकोशे । तदा अन्यतः अन्यत्वेन सहावस्थानमात्रमित्यर्थः ।

५ "नह्यपां सङ्घातमात्रम्" इति प्र. पाठः । "नहि सङ्घातमात्रा पृथ्वी" इति क्वचित् ।

६ "कालुष्यादिमात्रेण" इति क्वचित् ।

७ "-विन्यसन्नवयवोऽन्ततः" इति प्र. पाठः । धातवः पृथिव्यादयोऽवयविद्रव्याणीति अवयवैः पृथक्त्वेन न

स्यात् सादृश्यभ्रमस्तावत् विकल्पे सति वस्तुनः ।
[1]जाग्रत्स्वप्नौ यथा स्वप्ने तथा विधिनिषेधता ॥ ५९ ॥

नच सादृश्यमात्रम् । वस्तुभेदे हि तद् युज्यते । तस्मात् स्वप्न एव जाग्रत्स्वप्नौ यथा विशेषतो दृश्येते तथा पृथिव्यबादिविशेषो दुर्घटोऽपीश्वरकल्पनयैव[2] दृश्यते ।

"कार्यकारणवस्तूनां विशेषो न निरूपितः । तथापीशेच्छयैवासौ दृश्यते नियतोऽपिच" इति च ॥ * ॥

अहं पुराऽभवं कश्चिद् गन्धर्व उपबर्हणः ।
[3]नाम्नाऽतीते महाकल्पे गन्धर्वाणां सुसम्मतः ॥ ६७ ॥

स्युः । अवयवैर्विना न स्युः । उक्तं हि-"तन्तुभ्योऽन्यः पटः साक्षात् कस्य दृष्टिपथं गतः" इति । तर्ह्यवयविनाऽवयवानामत्यन्ताभेद एवास्तु । तदपि न सम्भवतीत्याह—असत्यवयविन्यासन् । पुरा धातुसृष्टेः धातावसत्यपि तन्मात्रा अवयवा आसन् किल । यो यदभावेऽप्यस्ति स कथं तत् स्यात् । तर्हि भेद एवोच्यताम् । तदपि न चारु । यतोऽवयवैर्विनाभूतोऽवयवी न दृष्टिपथं गत इत्युक्तम् । नन्ववयविनोऽभावेऽवयवाः कथमासन्? यतोऽवयवत्वं नामावयविसापेक्षो धर्मः । आह—नावयवा इव । किन्त्वनवयवा एवाऽसन् । स्वोपादानस्यावयविभूताः । कथं तेषामवयवत्वम्? कथं च तैरवयवी जातः? अयमर्थः- न तावदवयवसङ्घातमात्रमवयवी । नहि तन्तुसङ्घातमात्रं पटः । पटात् पूर्वमपि सत्त्वात् । नच विकारमात्रम् । नहि केनचित् तन्तुविकारमात्रेण पटो भवति । तस्यापि पूर्वमेव भावात् । नचावयवेभ्यः पृथक्स्थितिः । अवयवैर्विना पृथगदृष्टेः । नापि वस्तुद्वयवत् सहावस्थानमात्रम् । पृथगदृष्टेरेव । तस्मात् स्वतो दुर्घटत्वात् तन्तुवायेन संस्थानविशेषमापन्नास्तन्तवो यथा पटभावमापद्यन्ते एवं दुर्घटया शक्त्या भगवता जगत् कार्यकारणात्मना क्लृप्तमिति सर्वं समञ्जसम् ।

१ "जाग्रत्स्वापौ" इति प्र. पाठः । नन्ववयवेभ्योऽन्योऽवयवी न दृश्यत इत्युक्तम् । सेयमभेददृष्टिः अवयवावयविनोः सादृश्यमूलो भ्रमः स्यात् । न स्यादित्याह—स्यात् सादृश्यभ्रमस्तावत् । अयं पक्षस्तावत् तदा स्याद् यदाऽवयवस्यावयविनश्च वस्तुनः परस्परं भेदः स्यात् । भेदमूलं हि सादृश्यम् । नन्वभेददर्शनं भ्रम इत्युक्तम् । दुरुक्तं तत् । यतो यत्रक्वापि विकल्पेऽनुभूते सति तद्बाधादभेददर्शनं भ्रमः स्यात् । न कस्याप्यवयवतो भेदो दृष्टिपथं गत इति न भ्रमपक्षो युज्यते । तस्मादचिन्त्येश्वरशक्त्यैव सर्वमिति दृष्टान्तेन ग्राहयति—यथा स्वप्न एव कश्चित् स्वप्नं पश्यति; स्वप्न एवोद्बुध्यते । तदिदं विस्मयावहं स्वप्नदर्शनं यथा दुर्घटयेश्वरशक्त्या न स्वशक्त्या, तथा पृथिव्यां पृथिवीत्वविधेः जलत्वादिनिषेधस्य च विधित्वं निषेधत्वं चेश्वरशक्त्यैव । तथाच येन पृथिवी पृथिवी भवति, जलं च जलम्, स भगवानचिन्त्यमहिमा । तथा हि श्रुतिः—"यस्य पृथिवी शरीरं . . . यः पृथिव्या अन्तरो यमयति" इत्यादि । अथच न हिंस्यादिति निषेधस्य निषेधत्वम्, अथापि यागीयहिंसाविधेर्विधित्वं चेश्वरक्लृप्तेरेवेति सूचितम् ।

२ "-कल्पनयैवासौ दृश्यते" इति प्र. पाठः ।

३ नाम्ना उपबर्हणः ।

[[1]अतीतमहाकल्पे] अतीतब्रह्मकाले[2] ।

"ब्राह्मः कालः[3] परश्चेति महाकल्पश्च कीर्त्यते[4]" इति च ॥ * ॥

इति सप्तमस्कन्धे पञ्चदशोऽध्यायः[5]

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते
श्रीभागवततात्पर्यनिर्णये
सप्तमः स्कन्धः समाप्तः

१ [ ] एतच्चिह्नान्तर्गतं क्वचित् कोशेषु न पठ्यते ।

२ "ब्रह्मकल्पे" इति प्र. पाठः । चतुर्युगसहस्रपरिमितं ब्रह्मणो दिनं कल्प इत्युच्यते । शतवत्सरपरिमितो ब्रह्मकालो महाकल्पः ।

३ "ब्रह्मकालः" इति प्र. पाठः ।

४ "कीर्तितः" इति च ।

५ प्र· भाष्यपाठेऽत्र षोडशोऽध्यायः ।

[तृतीयोऽध्यायः]

ॐ ॥ यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ।
योऽस्मात् [1]पराच्च परमस्तं प्रपद्ये स्वयम्भुवम् ॥ ३ ॥

[2]यत इति स्रष्टृत्वम् । [3]येनेति प्रवर्तकत्वम् । य इति सत्ताप्रदत्वम् । "न सन्ति यदुपेक्षया" इत्युक्तत्वात् ।

"उत्पन्नस्यापि यत् सत्ता हरेस्तत् स इतीर्यते । हरेर्विश्वं भिन्नमपि [4]परमोऽसौ यतो विभुः" इति ब्रह्मतर्के ॥ * ॥

इत्यष्टमस्कन्धे तृतीयोऽध्यायः

[पञ्चमोऽध्यायः]

न यस्य वध्यो नच रक्षणीयो नोपेक्षणीयादरणीयपक्षः ।
[5]तथाऽपि सर्गस्थितिसंयमार्थं धत्ते रजःसत्त्वतमांसि काले ॥ २२ ॥

"अनुग्राह्यतया पक्षा देवा नाऽत्मार्थतो हरेः" इति च ॥ * ॥

[6]विपश्चितं प्राणमनोधियात्मनामर्थेन्द्रियाभासमनिद्रमव्रणम् ।
छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे ॥ २७ ॥

---

१ "परस्माच्च परस्तम्" इति पाठान्तरम् । २ "यतो वा इमानि भूतानि जायन्ते" इति श्रुतेः ।

३ "येन जातानि जीवन्ति" इति श्रुतेः ।

४ परमोऽसौ यत इति योऽस्मात् पराच्च परम इति व्याख्यातम् । "परात्परं पुरुषमुपैति दिव्यम्" इति श्रुतिः । विभुरिति स्वयम्भूपदव्याख्यानम् । स्वयमेव विविधतया मत्स्यादिरूपैर्भवतीति ।

५ "अथापि" इति प्र. पाठः ।

६ मनोधियात्मनां मनोबुद्ध्यहङ्काराणां विपश्चितम् । साक्षात्कर्तारम् । आत्मा देहो वा । आत्मानो जीवा वा । अत एव हि क्षेत्रज्ञं तं वदन्ति । अर्थानिन्द्रियाणि च प्रकाशयति । अर्थानिन्द्रियैश्च प्रकाशयति । अनिद्रं

"छाया त्वविद्या सम्प्रोक्ता जन्यविद्याऽऽतपः स्मृतः[1]। जीवगृध्रस्य तौ[2] पक्षावधऊर्ध्वैपथोः पृथक्। तौ[2] विष्णोस्तु न विद्येते नित्यविद्यास्वरूपिणः" इति च ॥ * ॥

अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पञ्चदशारमाशु।
त्रिनाभि विद्युद्बलमष्टनेमि[3] यदक्षमाहुस्तमृतं प्रपद्ये ॥ २८ ॥

गुणत्रयनाभि। विद्युद् ब्रह्म—

"विद्युद् ब्रह्मेत्युपासीत" इति श्रुतेः। "जगच्चक्रस्याक्षभूतो बलरूपश्च केशवः" इति च ॥ * ॥

न यस्य कश्चातिपिपर्ति[4] मायां यया जनो मुह्यति वेद नार्थम्।
तं निर्जितात्मात्मगुणं परेशं[5] नमामि भूतेषु समं चरन्तम् ॥ ३० ॥

आत्मा च आत्मगुणाश्च निर्जिता येन ॥ * ॥

निद्राद्यवस्थात्रयातीतं तुरीयम्। अव्रणम्। नश्वरभौतिकदेहवर्जितम्। अविद्या अनित्यविद्या च छायातपौ। नित्यज्ञाने तस्मिन् न सम्भवतः। खं सुखरूपम्। त्रियुगेष्वेवावतारवन्तं शरणं व्रजामहे।

१ "स्मृतम्" इति प्र· पाठः प्रामादिकः। २ "ते" इति क्वचित् पाठश्च प्रमाद एव।

३ "त्रिणाभि विद्युच्चलमष्टनेमि" इत्यर्वाचीनः पाठः। अयमर्थः—इदं संसारचक्रं यस्याजस्य वासस्थानम्। "पुरमेकादशद्वारमजस्य" इति, "ईशावास्यमिदं सर्वम्" इति च श्रुतिः। "चक्रं न वृत्तं व्यतीरवीविपत्" इति च। योऽजः परमात्मैवाक्षमाश्रयश्च यस्य चक्रस्य तमृतं प्रपद्ये। "ऋतं सत्यं परं ब्रह्म" इति श्रुतिः। अजस्य जीवस्य चक्रं वा। "अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः"। कीदृशं चक्रम्? अजया प्रकृत्या प्रेर्यमाणम्। मनोमयं मनःप्रचुरम्। "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इति हि स्मरन्ति। पञ्च भूतानि दशेन्द्रियाणि च पञ्चदश अरा यस्य तत्। शब्दाद्याः पञ्च वा। प्राणाद्या वा। भूतानि पञ्च, शब्दाद्याः पञ्च, ज्ञानेन्द्रियाणि पञ्चेति वा। आशु वेगेन धावत्। अत एवाश्वत्थमाहुः। गुणत्रयनाभि। विद्युत् ब्रह्मैव बलप्रदं यस्य। चक्रेऽधिष्ठितः, चक्रस्याऽश्रयश्च यः स एवास्य बलदाता। बलमिति परिवर्तनशक्तिः। विद्योतत इति विद्युत् प्रकाशरूपं ब्रह्म। "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा" इत्यष्टौ नेमय आवरणानि यस्य। यद्वा देवा असुरा मनुष्या गन्धर्वा राक्षसाः पिशाचास्तिर्यञ्चः स्थावराणि चेत्यष्टौ भूतानि नेमयः। अत्र वबयोरभेदेन विद्युद्वत् वलति चलतीति विद्युच्चपलमिति च भौतिकोऽर्थः।

४ "कश्चातितितर्ति" इति प्र. पाठः।

५ "नमाम" इति प्र· पाठः। यस्य मायां कोऽपि नातिपिपर्ति यदनुग्रहादृते नातिक्रमितुं पारयति। "मम माया दुरत्यया" इति स्मरणात्। यया मुह्यन् परमार्थं न वेद। स्वयं तु निर्जिता आत्मा मायाशक्तिः तद्गुणाश्च सत्त्वादयो येन तादृशः। पुरुषशब्दवदात्मशब्दोऽपि प्रकृतिवाची। "प्रकृतिः पुरुषः कालः", "क्षरात्मानौ" इत्यादिदर्शनात्।

अम्भस्तु यद्रेत उदारवीर्यं[1] सिद्ध्यन्ति जीवन्त्युत वर्धमानाः ।
लोकास्त्रयोऽथाखिललोकपालाः प्रसीदतां ब्रह्म महाविभूतिः ॥ ३३ ॥

सोमं मनो यस्य समामनन्ति दिवौकसां वै बलमन्ध आयुः ।
ईशो नगानां प्रजनः प्रजानां प्रसीदतां ब्रह्म महाविभूतिः[2] ॥ ३४ ॥

"सूर्यसोमयमेन्द्रादीं[3]नृतेऽन्ये लोकपा अपि । अद्भिर्जीवन्ति सोमाच्च [4]महेन्द्रादीनृतेऽखिलाः । अपां सोमस्य चेन्द्राद्याः सर्वे वै जीवनप्रदाः" इति च ॥ * ॥

अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकाण्डनिमित्तजन्मा ।
अन्तः समुद्रे पचतः स्वधातून्[5] प्रसीदतां नः स महाविभूतिः[6] ॥ ३५ ॥

---

१ "उदारवर्यम्" इति क्वचित् प्राचीनकोशे। अम्भस्तु यद्रेतः तत् ब्रह्म प्रसीदताम् । "आपो वै नरसूनवः"। कीदृशम्? उदारवीर्यं यत् त्रयो लोका जीवन्ति उपजीवन्ति। अत एवाम्भो जीवनमित्युच्यते। अम्भसैव वर्धमानाः स्वकार्येषु सिध्यन्ति। अपि चाम्भ इति तदभिमानी वरुणः। आदित्येष्वेक आषाढदेवता च। स एव चाध्यात्मं रसनाभिमानी। रसनया हि रसितमन्नमश्यते। अतः स सर्वलोकस्थमनुष्याणां जीवनहेतुः। न केवलं मनुष्याः। किन्त्वखिललोकपाला अपि तमुपजीवन्ति। अत्राखिलेति प्रायोवचनम् । इन्द्रकामौ, प्राणमनिरुद्धं मनुगुरुदक्षान्, प्रवहं, सूर्यसोमयमांश्च विहाय इतरेषां सर्वेषामपि देवानां स किलोपजीव्यः ।

२ "प्रसीदतां नः स महाविभूतिः" इति प्र. पाठः। सोमं यस्य मनः समामनन्त्याम्नायाः "चन्द्रमा मनसो जातः" इत्याद्याः। स किल सोमो लोकानां लोकपालानां च बलप्रदः, अन्नद आयुःप्रदश्च। सोमो हि राजा ओषधिवनस्पतीनां यज्ञियानाम् । तद्द्वारा देवानां नराणां च बलमन्ध आयुः। "बलमन्नमायुः" इति च क्वचित् पाठान्तरम् । अपिच चन्द्रः सोमाभिमानी देवता ये वरुणमुपजीवन्ति तेषां दिवौकसां वरुणस्य चोपजीव्यः। नगानां वृक्षाणामीशः। अङ्कुरजननात् । प्रजानां प्रजनः। कामजननात् । "सोमं राजानमवसे" "सोमेनाऽदित्या बलिनः सोमेन पृथिवी मही", "यत् त्वा देव प्रपिबन्ति तत आप्यायसे पुनः", "प्र चन्द्रमास्तिरते दीर्घमायुः", "सोम राजन् प्र ण आयूंषि तारीः" इत्याद्याः श्रुतयः।

३ आदिपदेन कामादिप्रवहान्तानृते। अद्भिरिति वरुणेन च।

४ इन्द्रादिप्रवहान्तस्वोत्तमकक्ष्यागतान् सर्वान् स्वकक्ष्यागतौ सूर्ययमौ चर्ते अखिलाः सोमाज्जीवन्ति। इन्द्राद्याः सोमवरुणयोरपि जीवनप्रदाः।

५ "समुद्रेऽनुपचन् स्वधातून्" इति प्र. पाठः।

६ जातवेदा अग्निर्यस्य मुखं मुखात् जातः। "मुखादिन्द्रश्चाग्निश्च" इति श्रुतेः। कुतो जातः? क्रियाकाण्डनिमित्तं मथनादिना जन्म यस्य। समुद्रे उदरेऽन्तर्वैश्वानररूपेण स्थित्वा स्वाधीनानन्नादिधातून् पचतो यस्याग्निर्मुखं स नः प्रसीदताम्। अत एवोक्तम्—"अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्" इति।

समुद्रे उदरे[1] ॥ * ॥

यच्चक्षुरासीत् तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यम् ।
द्वारं च मुक्तेरमृतस्य मृत्योः[2] प्रसीदतां नः स महाविभूतिः ॥ ३६ ॥

अमृतस्येति मुक्तेरित्यस्य विशेषणम्[3] ॥ * ॥

इत्यष्टमस्कन्धे पञ्चमोऽध्यायः

[षष्ठोऽध्यायः]

अवरोप्य गिरिं स्कन्धात् सुपर्णः पततां वरः ।
ययौ जलान्त उत्सृज्य हरिणा स विसर्जितः ॥ ३९ ॥

"[4]अनन्तोढो मन्दरस्तु यदा वैवस्वतान्तरम् । अमृतार्थं सुपर्णोढो रैवतस्यान्तरे मनोः" इति ब्राह्मे ॥ * ॥

इत्यष्टमस्कन्धे षष्ठोऽध्यायः[5]

---

१ निरुक्तिसाम्यात् । तथाहि समन्तादुद्रमुदकमत्रेति समुद्रः । उदं रातीति चोदरम् । ननु किमुदकमेव राति ? उक्तोत्तरमेतत् । "तापापनोदो भूयस्त्वमम्भसो वृत्तयः" इत्युक्तं हि । "भूयस्त्वाच्चापाम्" इति च भाष्यं "त्र्यात्मकत्वात्तु भूयस्त्वात्" इति सूत्रे । प्राचुर्येण व्यपदेशा भवन्ति । अपिच उनत्तीति निरुक्त्या उद्रमुदरमिति च समानार्थम् । तेन चोदरं समुद्र इति भवति ।

२ "मुक्तेरमृतं च मृत्युः" इत्यर्वाचीनाः । तरणिः सूर्यः यस्य चक्षुष आसीत् । "चक्षोः सूर्यो अजायत" । देवयानमर्चिरादिमार्गदेवता । त्रयीसारः । वेदमातुर्गायत्र्यास्तदधिष्ठितभगवत्प्रतिपादकत्वात् । अत एव ब्रह्मणो नारायणस्य धिष्ण्यमधिष्ठानम् । "यश्चासावादित्ये", "य आदित्ये तिष्ठन्", "य एषोऽन्तरादित्ये" इत्यादेः । अत एव साक्षात्काराय सूर्यमण्डलापावरणं प्रार्थ्यते "तत् त्वं पूषन्नपावृणु" इति । वाजसनेयप्रवर्तकत्वाच्च त्रयीमयः । अमृतस्य जातापरोक्षस्य मृत्योः संसारान्मुक्तेः द्वारम् । देवयानत्वादेव । अथ वा अमृतस्य अमरणरूपाया मुक्तेर्द्वारम् । मृत्योश्च द्वारमुदयास्तमयाभ्यामायुःक्षयहेतुत्वात् । एतादृशसूर्याश्रयचक्षुष्ट्वादिमहाविभूतिः प्रसीदताम् ।

३ "मुक्तेर्विशेषणम्" इति क्वचित् ।

४ वैवस्वतमन्वन्तरे अनन्ताख्येन गरुडेन ऊढः । रैवतमन्वन्तरे तु सुपर्णाख्येन । तथाहि महाभारततात्पर्यनिर्णये—"योऽनन्तनामा गरुडस्तदंसके । उत्पाट्य चैकेन करेण मन्दरो निधापितः" इति ।

५ प्राचीनकोशेष्वत्राध्यायसमाप्तिर्न पठ्यते । षष्ठाध्यायान्ते पठ्यमानोऽयं श्लोकः प्राचीनतमपाठरीत्या सप्तमाध्यायारम्भ एव पठितोऽपि स्यादिति सम्भाव्यते ।

[सप्तमोऽध्यायः]

तदुग्रवेगं दिशिदिश्युपर्यधो विसर्पदुत्सर्पदसह्यवीर्यम्[1]।
भीताः प्रजा दुद्रुवुरङ्ग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवम् ॥१९॥

"रुद्रस्य यशसोऽर्थाय स्वयं विष्णुर्विषं प्रभुः[2]। न सञ्जह्रे समर्थोऽपि वायुं चोचे प्रशान्तये" इति च ॥ * ॥

[3]त्वमेव सर्वजगतामीश्वरो बन्धमोक्षयोः।
तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं गुरुम् ॥ २२ ॥

"तत्रतत्र स्तुतिपदैर्हरिरेव तु तद्गतः। स्तूयतेऽतो युक्तमेव गुणाधिक्यवचोऽपितु" इति च ॥ * ॥

इत्यष्टमस्कन्धे सप्तमोऽध्यायः

---

१ "—दसह्यमप्रति" इति प्र॰ पाठः। दिशिदिशि अधश्च विसर्पत्, उपर्युत्सर्पत्। "अरक्ष्यमाणाः। श्रीशिवमहिमदर्शनार्थं भगवता उदासीनीभावात्" इति जीवगोस्वामी। "तदानीं भगवता तदुपेक्षणं स्वभक्तश्रेष्ठाय चन्द्रार्धमौलये तादृशकीर्तिप्रदानार्थमिति ज्ञेयम्" इति विश्वनाथचक्रवर्ती।

२ "विभुः" इति प्र. पाठः। रुद्रस्यापि प्रभुः रुद्रस्य यशसोऽर्थायैव स्वयं विषं न सञ्जह्रे। रुद्रस्य यशसोऽर्थायैव वायुं चोचे प्रशान्तये। प्रशमय्य रुद्राय देहीति।

३ "त्वमेकः सर्वजगत ईश्वरो—" इति प्र. पाठः। इतः परं "एतत् परं प्रवक्ष्यामः—" (३५) इत्यन्तानि पद्यानि शिवस्तुतिपराणि मूले पठ्यन्ते। तत्र तु मुख्यतो विष्णुगुणा एवोच्यन्ते, यथाऽस्मिन् श्लोके बन्धमोक्षप्रदत्वम्। तेन ज्ञायते शिवान्तर्यामी विष्णुरत्र स्तूयते। भाष्योदाहृतप्रमाणेन चैतत् स्फुटम्। नियामके स्तुते नियम्यः प्रीयत इति शास्त्रसम्प्रदायः। शिव एव च उत्तरत्र स्फुटमेवं वक्ष्यति–"प्रीते हरौ भगवति प्रीयेऽहं सचराचरः" इति। तथाचैतानि पद्यानि विष्णौ सामस्त्येन शिवे च यथायोगं व्याख्यातव्यानि। अत्र स्तोत्रमध्ये सम्प्रति पद्यमेकं पठ्यते–"न ते गिरित्राखिललोकपालविरिञ्चवैकुण्ठसुरेन्द्रगम्यम्। ज्योतिः परं यत्र रजस्तमश्च सत्वं न यद् ब्रह्म निरस्तभेदम्" (३१) इति। अत्र रुद्रमहिमा ब्रह्मविष्णुभ्यामप्यगम्य इति पठ्यते। व्याख्यातारस्तु यथाकथाच व्याचक्षते। परन्तु मूलकोशे प्राचीने पद्यमेवेदं न पठ्यते। तेन प्रक्षिप्तमित्येव सुवचमिति भाति। यतोऽन्तर्यामिपरतयाऽपि नेदं स्वरसम्। "एते वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः", "तीर्थेन मूर्ध्नि विधृतेन शिवः शिवोऽभूत्", "नाहं परायु ऋषयो न मरीचमुख्याः" इत्यादिस्ववचनविरुद्धं च।

[अष्टमोऽध्यायः]

नूनं तपो यत्र न मन्युनिग्रहो[1]
ज्ञानं क्वचित् तच्च न सङ्गवर्जितम् ।
कश्चिन्महांस्तस्य न कामनिर्जयः
स ईश्वरः किं परतोव्यपाश्रयः ॥ २० ॥

धर्मः क्वचित् तस्य[2] न भूतसौहृदं
त्यागः क्वचित् तस्य[3] न मुक्तिकारणम् ।
वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं
नहि द्वितीयो गुणसङ्गवर्जितः ॥ २१ ॥

क्वचिच्चिरायुर्नहि शीलमङ्गलं
क्वचित् तदप्यस्ति न वेद्यमायुषः ।
यत्रोभयं कुत्रच सोऽप्यमङ्गलः
सुमङ्गलः कश्चन काङ्क्षते हि माम्[4] ॥ २२ ॥

---

१ "नूनं तपो यस्य न मन्युनिर्जयो ज्ञानम्" इति पाठान्तरम् । यत्र रुद्रादौ तपस्तत्र न मन्युनिग्रहः । "दशकल्पं तपश्चीर्णं रुद्रेण" इति स्मरणात् । चण्डकोपास्तपस्विनश्चात्र गृह्यन्ते । ज्ञानं क्वचित् वायौ । "ज्ञाने विरागे" इत्यादिस्मरणात् । तदपि न त्रिगुणसङ्गवर्जितम् । आधिकारिकत्वाद् वायोः । ज्ञानिनो मुनयश्चात्र गृह्यन्ते । कश्चिन्महानिति महत्तत्वमानिनं ब्रह्माणं कटाक्षयति । तस्य न कामनिर्जयः । "स्वां दुहितरमभ्यध्यायत्" इति श्रवणादिति परिहसति । यः परतोव्यपाश्रयः परैर्भ्रष्टैश्वर्यः वारंवारम्, पुनस्तल्लब्धौ च परापेक्ष इन्द्रादिः स ईश्वरः किम्?

२ "तत्र न" इति प्र. पाठः । क्वचिद् यमादौ धर्मोऽस्ति । धर्मदेवता हि सः । किन्तु न तस्य भूतसौहृदम् । मृत्युदेवतात्वात् ।

३ "तत्र न" इति प्र. पाठः । "क्वचिद् यस्तु न" इति पाठान्तरम् । क्वचिद् भूताभिमानिषु वरुणादिषु त्यागः । स्वाभिमतानि भूतानि प्रजाभ्यो विसृजन्ति हि ते । किन्तु स त्यागस्तस्य न मुक्तिकारणम् । मुक्तिकारणापरोक्षोत्तरकालीनप्रारब्धभोगात्मकत्वात् । सोऽपि प्रारब्धनिर्बद्ध एवेति यावत् । येऽपि फलापेक्षया त्यजन्ति तेऽप्यत्र सङ्गृह्यन्ते । क्षत्रियोत्तमादेः पुंसः वीर्यमस्ति । तदप्यजवेगेन निष्कृतं परिहृतं न भवति । कियताचित् कालेन विनश्यति । अतो नहि मुकुन्दाद् द्वितीयो गुणसङ्गवर्जितः ।

४ क्वचिदसुरादौ चिरमायुः स्यात् । किंतु न तत्र मङ्गलं शीलम् । दुर्वृत्तत्वात् । क्वचिच्च सात्विके शीलमङ्गलं स्यात् । अपितु तस्याऽयुषो विषये न किञ्चिन्निश्चयेन वेदितुं शक्यम् । यत्रोभयं शीलमायुश्च मार्कण्डेयादिषु सोऽप्यमङ्गलः । बद्धत्वात् । अतो नित्यमुक्तो भगवानेव सुमङ्गलः कश्चन । स कांक्षते च माम् । नित्यावियोगिनीत्वात् । अथ न कांक्षते च माम् । आप्तकामत्वात् ।

एवं विमृश्याव्यभिचारिसद्गुणं पदं निजैकाश्रयिसद्गुणाश्रयम्[१] ।
वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम् ॥ २३ ॥

"अनाद्यनन्तकालेऽपि विष्णुमेवाऽश्रिता रमा । अन्येषां ज्ञापनार्थाय दोषानुक्त्वेतरान् जहौ" इति च ॥ * ॥

स वै भगवतः साक्षाद् विष्णोरंशांशसम्भवः ।
धन्वन्तरिरिति ख्यात आयुर्वेददृगिज्यभाक्[२] ॥ ३४ ॥

तमालोक्यासुराः सर्वे कलशं चामृताहृतम्[३] ।
[४]लिप्सन्तः सर्ववस्तूनि कलशं तरसाऽहरन् ॥ ३५ ॥

"[५]तेषां सत्याच्चालनार्थं हरिर्धन्वन्तरिर्विभुः । समर्थोऽप्यसुराणां तु स्वहस्तादमुचत् सुधाम्" इति च ॥ * ॥

इत्यष्टमस्कन्धेऽष्टमोऽध्यायः

[[६]नवमोऽध्यायः]

दृष्ट्वा मृधे गरुडवाहमिभारिवाह
आविध्य शूलमहिनोदथ कालनेमिः ।
तल्लीलया गरुडमूर्ध्नि पतद् गृहीत्वा
तेनाहनन्नृप सवाहमरिं त्र्यधीशः[७] ॥ ५६ ॥

---

१ "—चारिसद्गुणैर्वरं निजैकाश्रयतयाऽगुणाश्रयम्" इति प्र. पाठः । एवं विमृश्य विमर्शपूर्वकं सुरेषु दोषानुक्त्वा तान् विहाय स्वस्य पदं नित्याश्रयं मुकुन्दमेव वरं वव्रे । कीदृशम्? अनन्यसाधारणसद्गुणम् । निजा आत्मीयाः । एकाश्रयिणः अनन्यभक्ताः । अथवा निजः स्वयमेव केवलमाश्रय एषामिति तादृशा ये सात्विकास्तेषामाश्रयः । एतेन स्वस्यापि स एवैकाश्रय इति सूचयति । २ इज्यभाग् यज्ञभोक्ता ।

३ "चामृताभृतम्" इति प्र. पाठः । अमृतरूपमाहृतमाहारो यस्मिन् तं कलशम् । अमृतमाहृतं सङ्गृहीतं यत्रेति वा ।

४ कलशगतं सर्वमपि वस्तु सामस्त्येन लिप्सन्तः । मथनादुत्पन्नानि पारिजातादिसर्ववस्तूनि वा । पूर्णामृतपानेन लोके समस्तवस्तूनि स्वभोगायैव लिप्सन्तो वा । तरसा बलेन वेगेन च ।

५ ननु किमिति दैत्यबलमनिगृह्य बलात्कृत इव कलशं तेभ्यो ददौ? आह—तेषां सत्याच्चालनार्थम् । असुराणां विषये तान् निग्रहीतुं समर्थोऽपि । ६ अर्वाचीनपाठरीत्याऽयं दशमोऽध्यायः ।

७ इभारिवाहः सिंहवाहनः कालनेमिः । त्र्यधीशो भगवान् तत्प्रहितेनैव शूलेन तमरिं ससिंहमहन् ।

माली सुमाल्यतिबलौ युधि देववर्य[1]चक्रेण कृत्तशिरसावथ माल्यवांस्तम् ।
आगत्य तिग्मगदयाऽहनदण्डजेन्द्रं तावच्छिरोऽच्छिनदरेर्नदतोऽरिणाऽद्यः ॥
॥ ५७ ॥

"[2]कालनेम्यादयः सर्वे हरिणा निहता अपि । शुक्रेणोज्जीविताः सन्तः पुनस्तेनैव पातिताः" इति च ॥ * ॥

इत्यष्टमस्कन्धे नवमोऽध्यायः

[एकोनविंशोऽध्यायः]

[3]यद्यप्यसावधर्मेण मां बध्नीयादनागसम् ।
तथाऽप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुम् ॥ १० ॥

"[4]बलिरप्यसुरावेशात् स्तुवन्नपि जनार्दनम् । आक्षिपत्यन्तरा क्वापि

---

१ "युधि पेततुर्यच्चक्रेण" इति प्र. पाठः । अतिबलौ माली सुमाली च यदा चक्रेण कृत्तशिरसावथ माल्यवान् गरुडं गदयाऽहन् । सा यावद् गरुडे निपतति ततः पूर्वमेव तस्यारेः शिरः अरिणा चक्रेणाच्छिनत् ।

२ ननु दशमाध्याये श्रूयते—"तत्राविनष्टावयवान् भिद्यमानशिरोधरान् । उशना जीवयामास सञ्जीवन्या स्वविद्यया" (४७) इति । तेन भगवत्कृतं तेषां हननं व्यर्थमेव जातम्? आह—कालनेम्यादयः सर्वे । न व्यर्थम् । भगवदिच्छानुगुणमेवोशना जीवयामास । यतः पुनर्वैवस्वतेऽन्तरे समुद्रमथने ते पुनर्युद्धायाऽगच्छेयुः । तत्र च पुनस्तान् हन्याम् । अपेक्षितं चैतत् तेषां पापवृद्ध्यर्थमिति भगवदिच्छा । अपिच स कालनेमिः पुनर्द्वापरे कंसो जातः । पातितश्च पुनस्तेनैव कृष्णरूपेण ।

३ "यदप्यसावधर्मेण" इति प्र. पाठः ।

४ ननु बलिर्विष्णुभक्तः । स कथं तस्मिन् भीतिं वैरं च पश्यति—"भीतं ब्रह्मतनुं रिपुम्" इति? आह-बलिरप्यसुरावेशात् । यद्यपीदं तात्पर्यवचनं नैतच्छ्लोकमात्रव्याख्यानाय प्रवृत्तम् । किन्तु आदशमाध्यायादेकविंशपर्यन्तमध्यायनिकायगतप्रमेयविवरणम् । अत एवैतदन्ते प्राचीनकोशेष्वध्यायपूर्तिर्न पठ्यते । तथाहि—बलिर्देवैः सह युद्धं चकारेति दशमे चतुर्दशे चाध्याये श्रूयते । तत्कथं विष्णुभक्तो विष्णुभक्तैः सह युद्धं चकार? आह—बलिरप्यसुरावेशात् । तेनाध्यायद्वयं व्याख्यातम् । दशम एव चाध्याये बल्यादीन् दैत्यान् वञ्चयित्वा विष्णुर्देवानमृतं पाययामासेत्युच्यते । "येन सम्मोहिता दैत्याः पायिताश्चामृतं सुराः" इत्येकादशे रुद्रवचनं च । तत् कथं विष्णुः स्वभक्ताय नामृतं ददौ? आह—बलिरप्यसुरावेशात् । तदेवमध्यायद्वयं व्याख्यातम् । द्वादशे चाध्याये बलेर्बन्धः श्रूयते—"योऽसौ भगवता बद्धः सुतळे पुनः" (१४) इति । यदि प्रीतः कथं बबन्ध? नहि बन्धः प्रीतिलिङ्गम् । अत एव चतर्दशे—"बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत । भूतेश्वरः कृपणवल्लब्धार्थोऽपि बबन्ध

प्रह्लादो नित्यभक्तिमान्'' इति ब्रह्माण्डे ॥ * ॥

[इत्यष्टमस्कन्ध एकोनविंशोऽध्यायः[1]]

[द्वाविंशोऽध्यायः]

तमाह [2]साऽतिकरुणं महाकारुणिकं नृपम् ।
यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल ।
कथं विसृजसे राजन् भीतामस्मिन् सरिज्जले ॥ १४ ॥

"अनन्तशक्तिर्भगवान् मत्स्यरूपी जनार्दनः । क्रीडार्थं याचयामास[3] स्वयं सत्यव्रतं नृपम्'' इति मात्स्ये ॥ * ॥

इत्यष्टमस्कन्धे द्वाविंशोऽध्यायः[4]

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते
श्रीभागवततात्पर्यनिर्णये
अष्टमः स्कन्धः समाप्तः

तम्'' इति परीक्षिदप्याक्षिपतीव । नह्यनागसो बन्धनं युक्तमिति । आह—बलिरप्यसुरावेशात् । एतेनासुरावेशफलं बन्धनमित्यध्यायद्वयं विवृतम् । एतेनैव "बबन्ध वारुणैः पाशैर्बलिं सूत्येऽहनि क्रतोः'' (२०–२६) इति गरुडकृतं बलिबन्धनं च व्याख्यातम् । तथा चतुर्दशेऽध्याये "प्रह्लादमामन्त्र्य नमश्चकार'' (१४–७) इति प्रह्लादानुमत एव बलिर्देवान् जिगायेति श्रूयते । किं प्रह्लादोऽप्यसुरावेशात् स्वपौत्रस्य देवविजयमन्वमन्यत । नेत्याह—प्रह्लादो नित्यभक्तिमान् । नहि नित्यभक्तस्य प्रह्लादस्य देवविजयोऽभिमतः । किन्तु बलेरसुरावेशं भाविनं च भगवत्संकल्पं विज्ञाय तूष्णीम्भाव एवानुमतिर्नाम । तथा विंशेऽध्याये—"तथाऽहमप्यात्मरिपोस्तवान्तिकं दैवेन नीतः प्रसभं त्याजितश्रीः'' (४५) इति प्रह्लादवदहमपि रिपोरपि तव पादपद्मं प्रपद्य इति बलिराह । किं तर्हि प्रह्लादोऽपि नरसिंहं रिपुमेव मन्यमानो भयादेव शरणमियाय? नेत्याह —प्रह्लादो नित्यभक्तिमान् । किं तर्हि विष्णुमहिमानं जानन्नपि बलिस्तं रिपुत्वेन गणयति? आह—बलिरप्यसुरावेशात् स्तुवन्नपि जनार्दनम् । आक्षिपत्यन्तरा क्वापि । तथाहि भगवतैव स्फुटमुक्तं विंशाध्यायान्ते—"तत्र दानवदैत्यानां सङ्गात् ते भाव आसुरः । दृष्ट्वा मदनुभावं वै सद्यः कुण्ठो विनंक्ष्यति'' (७१) इति । तदेतदपि ब्रह्माण्डवचनेन समाख्यातं भगवत्पादेन । तदेवं बलिसम्बद्धं कथाजातमेकेनैव श्लोकेन व्याचख्यावित्यपूर्वं कौशलं गुरुतमाग्रण्यो भगवतो भाष्यकारस्य ।

१ प्राचीनकोशेषु त्वत्राध्यायपूर्तिर्न पठ्यते । क्वचिन्मुद्रितकोशे "द्वाविंशोऽध्यायः'' इति पठ्यते । स प्रमाद एव । मत्स्यावतारकथा हि द्वाविंशेऽध्याये । २ सा शफरी । मत्स्यरूपी भगवान् ।

३ याचयाभास ययाचे । परतन्त्रस्यैव हि याचनं युक्तम् । न भगवत इति द्योतयितुमिव णिच्प्रयोगः ।

४ श्रीधरीयादिरीत्याऽत्र चतुर्विंशोऽध्यायः ।

[षष्ठोऽध्यायः]

[1]एवंविधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे ।
क्रियाकलापैः समुवाह भक्तिं यया विरिञ्चादिमधश्चकार[2] ॥ ८४ ॥

"[3]ब्रह्मादिभक्तिकोटयंशादंशो नैवाम्बरीषके । नैवान्यस्य च कस्यापि तथाऽपि हरि-

---

१ श्रीधरीयादिरीत्याऽयं पञ्चमाध्यायस्य पञ्चविंशः श्लोकः ।

२ "ययाऽऽविरिञ्च्यान् निरयांश्चकार" इत्यर्वाचीनः पाठः । स राजाऽम्बरीषः वासुदेवे भक्तिं समुवाह । यया भक्त्या विरिञ्चादीनप्यधश्चकार । अर्थवादोऽयम् । ब्रह्मादिभ्योऽप्यधिकभक्तिमानम्बरीष इति यथाऽऽपाततः प्रतीतिः स्यात् तथाविधमनुग्रहविशेषं भगवांस्तस्मिंश्चकारेति हृदयम् । ब्रह्मादयोऽपि हि तदनुगुणमेवाधःकृता इव वर्तयामासुः । अथच, विरिञ्चादिरित्यतद्गुणसंविज्ञानः । विरिञ्च आदिः कारणं यस्येति वा विरिञ्चादिं रुद्रावतारं दुर्वाससमधश्चकार । दुर्वासा अपि भगवदिच्छयाऽनुग्रहविशेषाय चाधःकृतमिवाऽत्मानं दर्शयामास । अथच, विरिञ्चमूलं मनुष्यवर्गं भक्त्याऽधश्चकार । मानुषेषूत्तमत्वादिति ।

३ एतत्पद्यव्याजेन समग्राध्यायतात्पर्यं गारुडवचनेनाऽह—ब्रह्मादीत्यादि । अम्बरीषके मनुष्यमात्रेऽम्बरीष इति कुत्सयामास । नैवान्यस्य च कस्यापि मनुष्यस्य । तथाऽपि तेषामम्बरीषव्याजेन पूर्वप्रस्तुतानां मनुष्यभक्तानां यशसः तात्कालिकोपचेयत्वात् तत्काले विशिष्योपचययोग्यत्वात् आदिराट् हरिरीश्वरः तदभिप्रायज्ञा ब्रह्मादयश्च नित्योपचितयशसः तेषामम्बरीषादीनां कीर्तिमुत्तमां व्यञ्जयामासुः स्वतस्तेभ्य उत्तमाः । सप्रयोजनं चैतद् देवकार्यमित्याह— मोहनाय च । अम्बरीषनिसृष्टाच्चक्राद् दुर्वाससं मोचयितुं ब्रह्मादयोऽपि न प्राभवन्, स्वयं विष्णुरपि नाशक्नोदिति विभ्रमं जनयित्वा दैत्यानां मोहनाय तत्कीर्तिं प्रकटयामासुः । न केवलं दैत्यमोहनम्, सतां ज्ञापनं च प्रयोजनमस्तीत्याह–ब्रह्मादेर्निन्दनाय च । विष्णुमहिम्नः पुरत इमे ब्रह्मादयोऽपि कियन्त इति ब्रह्मादेर्निन्द्यत्वज्ञापनाय च, अवरत्वज्ञापनायेति यावत् । उक्तं हि—"आब्रह्मस्तम्बपर्यन्तमसारं चाप्यनित्यकम्" इत्यादि । ननु स्वकीर्तिमविगणय्यापि परकीर्तिव्यञ्जने तेषां को भरः? आह–अन्यार्थं च । स्वयं विष्णुस्तावदन्यार्थमेव प्रवर्तते भक्तवात्सल्यात् । न स्वार्थमाप्तकामत्वात् । एवं तदभिमतकारिणो ब्रह्माद्याश्चाम्बरीषाद्यर्थमेव प्रावर्तन्त । न स्वप्रयोजनापेक्षया । तदेवाऽह–निराशिषो मानुषेष्विति । मानुषेषु विषये निराशिषः । नहि मनुष्यमात्रैरम्बरीषादिभिर्ब्रह्मादीनां देवोत्तमानां किमप्याशासनीयमस्ति । तेषां ब्रह्मादीनां भक्त्यादिभिर्गुणैरुत्तमत्वादिति । तथाच तेषामम्बरीषादिषु वात्सल्यादेव तत्कीर्तिव्यञ्जनम् । तद्यथा शिष्यवत्सलो गुरुः स्वशिष्यकीर्तिमुल्लाघयति । न तेन गुरोः कीर्तिभङ्गः । ननु सर्वेष्वपि मानुषेषु किमिति न वात्सल्यं वर्षन्ति? किमित्यम्बरीषादिष्वेव कतिषुचित्? तत्रापीदमेवोत्तरम्—

रीश्वरः । तात्कालिकोपचेयत्वात् तेषां यशस आदिराट्[1] । ब्रह्मादयश्च तत्कीर्तिं व्यञ्जयामासुरुत्तमाः[2] । मोहनाय च दैत्यानां ब्रह्मादेर्निन्दनाय च । अन्यार्थं च स्वयं विष्णुर्ब्रह्माद्याश्च निराशिषः । मानुषेषूत्तमत्वाच्च तेषां भक्त्यादिभिर्गुणैः । ब्रह्मादेर्विष्ण्वधीनत्वज्ञापनाय च केवलम् । दुर्वासाश्च स्वयं रुद्रस्तथाऽप्यन्याय्यमुक्तवान् । तस्याप्यनुग्रहार्थाय दर्पनाशार्थमेव च" इति गारुडे ॥ * ॥

इति नवमस्कन्धे षष्ठोऽध्यायः[3]

[नवमोऽध्यायः]

[4]स्त्रीपुम्प्रसङ्ग एतादृक् सर्वत्रैव भयावहः[5] ।
अपीश्वराणां किमुत ग्राम्यस्य गृहचेतसः[6] ॥ १६ ॥

मानुषेषूत्तमत्वाच्च तेषामम्बरीषादीनां भक्त्यादिभिर्गुणैरिति । सर्वप्रयोजनं निगमयन्नाह—ब्रह्मादेः । अम्बरीषद्वारैव दुर्वासोमोचनं हि विष्ण्वभिमतम् । नहि तद्विरोधे ब्रह्मादयोऽपि क्षमा इति ब्रह्मादेर्विष्ण्वधीनत्वज्ञापनायैव केवलमियं कथा प्रवृत्ता, न त्वम्बरीषस्य ब्रह्माद्युत्तमत्वज्ञापनायेति भ्रमितव्यमिति । ननु कथं तर्हि दुर्वासा अम्बरीषेण पराभूतः, सोऽपि स्वतो रुद्रावतारतयाऽम्बरीषादुत्तमो हि? आह—दुर्वासाश्च । सत्यं दुर्वासाः स्वयं रुद्र इति । तथाऽपि स किलान्याय्यमेव विष्णुभक्तमम्बरीषमभक्तमुक्तवानसुरावेशात्—"अहो अस्य नृशंसस्य श्रिया मत्तस्य पश्यत । धर्मव्यतिक्रमं विष्णोरभक्तस्येष्टमानिनः" (९-६—३२) इत्यादि । अतस्तस्याप्यनुग्रहार्थमेव तमम्बरीषेण पराभाव्य तत्कीर्तिं व्यञ्जयामास भगवान् । अनुग्रहोऽयं दुर्वाससो यत्पराभवो नाम । भगवदभिमतेऽम्बरीषकीर्तिव्यञ्जनकर्मणि मुख्यतोऽयं निरूढपात्र इति विशेषतोऽनुग्रहपात्रत्वाद् दुर्वाससः । असुरावेशनिमित्तो योऽहङ्कारः येन विष्णुभक्तमनादृत्य तद्धननाय कृत्यामुत्पादयामास तद्दोषनाशार्थं च तमम्बरीषेण पराभाव्याम्बरीषकीर्तिं व्यञ्जयामास भगवानिति । तेन गलितदर्पो दुर्वासाः प्रीयमाणश्चेत्थं राजानं व्याजहार हि—"प्रीतोऽस्म्यनुगृहीतोऽस्मि तव भागवतस्य वै । दर्शनस्पर्शनालापैरातिथ्येनाऽत्ममेधसा" (९-६-७९) इति । तवाऽतिथ्यादिना प्रीतोऽस्मि । यतो भगवताऽनुगृहीतोऽस्मि दर्पनाशेनेति ।

१ "आदिशत्" इति क्वचित् ।

२ "-मासुरुत्तमाम्" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

३ प्राचीनकोशेष्वध्यायपूर्तिर्न पठ्यते । श्रीधरीयादिरीत्या चात्र पञ्चमाध्यायः ।

४ श्रीधरस्वाम्यादिरीत्या चायमेकादशाध्यायस्य सप्तदशः श्लोकः । उपरितनोऽष्टादशः । ततः परश्चोनविंशः ।

५ "सर्वत्र त्रासमावहः" इति प्र. पाठः । "सर्वत्र च भयावहः" इति, "सर्वत्रापि भयावहः" इति च केचित् पठन्ति ।

६ स्त्रीपुंसयोः प्रसङ्गः ईश्वराणामपि भयावहो दुःखावहश्च किमुत ग्रामीणस्य स्त्रैणस्येति लोकान् शिक्षयितुं दुःखिवदात्मानं दर्शयामास । अत एव ह्युक्तं पूर्वाध्याये-"स्त्रीसङ्गिनामिति गतिं प्रथयंश्चचार" (८-९१) इति ।

तत ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत् प्रभुः ।
[1]त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितम् ॥ १७ ॥

स्मरतां हृदि विन्यस्य बुद्धं पद्ममिवांशुकैः[2] ।
स्वपादपल्लवं राम आत्मज्योतिरगात् ततः ॥ १८ ॥

"[3]नित्यपूर्णसुखज्ञप्तिस्वरूपोऽसौ यतो विभुः । अतोऽस्य राम इत्याख्या तस्य दुःखं कुतोऽण्वपि । तथाऽपि लोकशिक्षार्थमदुःखो दुःखवर्तिवत्[4] । अन्तर्हितां लोकदृष्ट्या सीतामासीत् स्मरन्निव । ज्ञापनार्थं पुनर्नित्यं सम्बन्धं[5] स्वात्मनः श्रिया । अयोध्याया विनिर्गच्छन् सर्वलोकस्य चेश्वरः । प्रत्यक्षं तु श्रिया सार्धं जगामानादिरव्ययः[6] । [7]नाक्षत्रमासगणितं त्रयोदशसहस्रकम् । ब्रह्मलोकसमं चक्रे समस्तं क्षितिमण्डलम् ।

---

१ "त्रयोदशाथ साहस्रं" इति पाठान्तरम् । सीतात्यागं यावद् गृहमेधेन, तत ऊर्ध्वं ब्रह्मचर्येण, एवमाहत्य राज्याभिषेकाद् भूत्यागपर्यन्तं त्रयोदशाब्दसाहस्रमग्निहोत्रमजुहोत् ।

२ "विद्धं दण्डककण्टकैः" इति प्र. पाठः । रवेरंशुभिः प्रबुद्धं पद्ममिव मनोहरं स्वपादपल्लवं स्मरतां हृदि विन्यस्य । अविस्मरणीयानुभावो रामः आत्मारामः आत्मप्रकाशश्च भुवं त्यक्त्वाऽगात् ।

३ राम इत्यत्र मध्यगत आकारो देहलीदीप इव पूर्वं परस्ताच्चान्वेति । आ सम्यक् पूर्णं रं रमणं सुखं मं ज्ञानं च यस्यासौ रामः नित्यपूर्णसुखज्ञानरूपः । अर्थान्तरं चाऽह–विभुः । अमपदार्थोऽयम् । न विद्यते मा मानं मितिर्यस्य सोऽमः, अमितः, रश्चासावमश्च । आनन्दरूपः सर्वगतश्च । उक्तं चैतत्—"आनन्दरूपो निष्परीमाण एषः" इत्यादि ।

४ दुःखेन वर्तते जीवतीव ।

५ "पुनर्नित्यसम्बन्धम्" इति पाठान्तरम् ।

६ क्वचित् प्र. पाठे इतः परम्—"इति नवमतात्पर्येऽष्टमोऽध्यायः" इति पठ्यते । केचिद् व्याचक्षते चेमानि वचनान्यष्टमाध्यायव्याख्यानतया । न स्वरसमेतत् ।

७ "नक्षत्रमास-" इति प्र. पाठः । अयमर्थः—ननु रामायणे एकादशवर्षसहस्राणि रामो राज्यमुपास्तेति श्रूयते—"दशवर्षसहस्राणि दशवर्षशतानि च । भ्रातृभिः सहितः श्रीमान् रामो राज्यमकारयत्" इति । विष्णुपुराणे च—"सिंहासनग एकादशाब्दसहस्रं राज्यमकरोत्" इति । तत् कथमत्र त्रयोदशाब्दसाहस्रमित्युच्यते ? आह—नाक्षत्रमासगणितम् । यथा पक्षद्वयात्मकश्चान्द्रो मासस्तथा सप्तविंशतिदिनात्मको नाक्षत्रो मासः शास्त्रेषु पठ्यते । तत्र नाक्षत्रमासरीत्या त्रयोदशवर्षसहस्राणि रामो राज्यमपालयत्, चान्द्रमासरीत्या तु एकादश वर्षसहस्राणीति परमार्थः । नन्वथापि न विरोधपरिहारः । नाक्षत्रमानेन त्रयोदशवर्षसहस्राणि नाम चान्द्रमानेन सप्तशताधिकान्येकादशवर्षसहस्राणि भवन्ति । तथाहि—नाक्षत्रमानेन (२७ × १२ =) ३२४ दिनान्येकं वर्षम् ।

63

'रामोरामोरामइति सर्वेषामभवत् तदा । सर्वो राममयो लोको यदा रामस्त्वपालयत्'' इति स्कान्दे ॥ * ॥

इति नवमस्कन्धे नवमोऽध्यायः[२]

[चतुर्दशोऽध्यायः]

वरेण च्छन्दयामास प्रीतः सत्यवतीसुतः[३] ।
वव्रे हतानां रामोऽपि जीवितं चास्मृतिं वधे ॥ ७ ॥

ततश्चावभृथस्नानविधूताशेषकल्मषः[४] ।
सरस्वत्यां ब्रह्मनद्यां रेजे व्यभ्र इवांशुमान् ॥ २३ ॥

त्रयोदशसहस्रवर्षेषु ४२,१२,००० दिनानि भवन्ति । चान्द्रमानेन च ३६०दिनान्येकं वर्षम् । तथाचेयं गणना—

१३,०००×३२४	३६०) ४२,१२,००० (११,७००
४२,१२,०००	३६०
	६१२
	३६०
	२५२०
	२५२०

ततश्चैकादशवर्षसहस्राणीति चान्द्रमानेनाप्यनुपपन्नमिति चेत्, नैतदेवम् । बहुग्रन्थदृशां सर्वमुपपन्नम् । तथाहि—११,७०० चान्द्रवर्षाण्येव रामराज्यकालः । तत्रैकादश सहस्राणि सीतया सह साम्राज्यपालनकालः । सीतान्तर्धानानन्तरं सप्तशतवर्षाणीति विवेकः । तथाहि महाभारततात्पर्यनिर्णये भगवत्पाद एवाऽह—"रामस्य दृश्या त्वन्येषामदृश्या जनकात्मजा । भूमिप्रवेशादूर्ध्वं सा रेमे सप्तशतं समाः '' इति । नाक्षत्रमानेन तु भूमिप्रवेशादूर्ध्वं ७७७ ७/९ वर्षाणि । तथाच सीताविरहितं कालमपहायैकादशवर्षसहस्राणि रामराज्यकाल इति रामायणे पुराणान्तरेषु चोक्तमिति सर्वाविरोधः ।

१ एतेन न केवलं निर्गमनकाले स्वपादपल्लवं स्मरतां हृदि विन्यस्य निरगात्, किन्तु पालनकालेऽपि हृदि विन्यस्त एवाऽसीदिति मूलभावं स्फुटमाह ।

२ प्राचीनकोशेष्वत्राध्यायपूर्तिर्न पठ्यते । श्रीधरीयादिरीत्या चायमेकादशोऽध्यायः ।

३ सत्यवतीसुतो जमदग्निर्वरेण च्छन्दयामास वरं वृण्विति चोदयामास । स च "मया हता माता भ्रातरश्च पुनर्जीवन्तु, मत्कृतं च हननं मा स्मार्षुः" इति वरं वव्रे ।

४ "–किल्बिषः" इति प्र. पाठः । अवभृथस्नानेन विधूताशेषकल्मष इवाज्ञलोकं मोहयन् दर्शयामास । यथा पूर्वं तामसजनमोहायैव पितुर्वरं वव्रे । प्रायश्चित्ताचरणेन पितुश्छन्दोऽनुवर्तनेन च जनस्य श्रेयो भवतीति लोकशिक्षार्थं च ।

जामदग्न्यो वरं वव्रेऽनन्तशक्तिरपि स्वयम् । [1]पितुर्मान्यत्वसिद्ध्यर्थं लोकलोकेश्वरः प्रभुः । अपापमपि देवेशं पितरः सन्न्यवारयन्[2] । अजानन्तोऽस्य माहात्म्यं मोहितास्तस्य मायया । मोहयन् मायया लोकं चक्रे चापचितिं वधे । पुण्यपापादिनिर्मातुः कुतः पापादिसङ्गतिः" इति च[3] ॥ * ॥

इति नवमस्कन्धे चतुर्दशोऽध्यायः[4]

[सप्तदशोऽध्यायः]

मूढे भर द्वाजमिमं भरद्वाजं बृहस्पतेः[5] ।
[6]त्राता तु दुःखात् पितरौ भरद्वाजस्ततस्त्वयम् ॥ ३८ ॥

चोद्यमाना सुरैरेवं मत्वा तं देवमात्मजम्[7] ।
व्यसृजन्मरुतोऽबिभ्रद्[8] दत्तोऽयं वितथेऽन्वये ॥ ३९ ॥

द्वाजमिमं भर । उचथ्यस्य क्षेत्रजो बृहस्पतेर्जात इति द्वयोर्जातत्वाद् द्वाजः । बृहस्पतेर्वाजः [9]प्रजासन्ततिर्येन भृता[10] स बृहस्पतेर्भरद्वाजः ।

---

१ "मातुर्मान्यत्व-" इति क्वचित् । २ "सन्न्यवर्तयन्" इति प्र. पाठः ।

३ अत्रैकस्मिन् प्रतनकोशे "इति च" इति न पठ्यते ।

४ प्राचीनकोशेष्वत्राध्यायपूर्तिर्न पठ्यते । श्रीधरीयादिरीत्या चात्र षोडशोऽध्यायः ।

५ "बृहस्पने" इति प्र. पाठः ।

६ "यातौ यदुक्त्वा पितरौ" इति च । बृहस्पतिभ्रातुरुचथ्यस्य पत्नीं ममतां देवा आहुः—मूढे, उचथ्यक्षेत्रजत्वादुचथ्यस्याप्ययं सुत इति द्वाभ्यामुचथ्यबृहस्पतिभ्यां । अपतिपत्नीभ्यां द्वाभ्यां ममताबृहस्पतिभ्यामिति वा । जातमिमं बालकं भर । एवं देवैरुक्तत्वाद् भरद्वाज इति निरुक्तः । निरुक्त्यन्तरं चाऽहुः—बृहस्पतेः वाजं प्रजातन्तुं भरतीति भरद्वाजः । तत्पुत्रत्वात् । निरुक्तत्वात् पदविपर्ययः । पितरौ उचथ्यबृहस्पती ममताबृहस्पती वा । ७ "मत्वा वितथमात्मजम्" इति प्र. पाठः ।

८ "व्यसृजन्मरुतोऽबिभ्रन्" इति पाठान्तरम् । सुरैश्चोद्यमानाऽपि ममता तं देवं बृहस्पतिं देवरमिति यावत्, आत्मना जातं मत्वा व्यसृजत् । त्यक्तं च शिशुं मरुतः अबिभ्रत् अबिभरुः । भरतस्य चान्वये प्रजाविच्छेदेन वितथे जाते दत्तश्च भरताय मरुद्भिः । वितथेऽन्वये दत्तत्वाद् वितथनामा चाभवत् ।

९ तथाहि श्रुतिः—"प्रजा वै वाजः । तस्या एष यद् बिभर्ति तस्माद् भरद्वाजः" इति ।

१० "भृता बृहस्पते-" इति प्र. पाठः ।

"भरद्वाजो मरुद्भिश्च भृतो जातो द्वयोर्यतः[1]" इति पाद्मे ॥ * ॥

इति नवमस्कन्धे सप्तदशोऽध्यायः[2]

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते
श्रीभागवततात्पर्यनिर्णये
नवमः स्कन्धः समाप्तः

---

१ एतेन मरुद्भिः भृतः द्वयोर्जातश्चेति भरद्वाज इति निर्वचनान्तरं च सूचितम् । मूले चैतदुक्तम्—"मरुतोऽबिभ्रत्" इति ।

२ एकस्मिन् कोशे "एकविंशोऽध्यायः" इति पठ्यते । श्रीधरीयादिरीत्या चायं विंशोऽध्यायः ।

दशमः स्कन्धः

[द्वितीयोऽध्यायः[1]]

ॐ ॥ स्वप्ने यथा पश्यति देहमीदृशं मनोरथेनाभिनिविष्टचेतनः ।
दृष्टश्रुताभ्यां मनसाऽनुचिन्तयन् प्रपद्यते तत् किमपि ह्यपस्मृतिः[2] ॥ १५ ॥

स्वप्ने यथा । दृष्टश्रुतस्मृत्यनुसारि देहं [3]प्राप्नोति । अपस्मृतिः मृतः । पूर्वदेहस्मरणाभावादभिमानतः[4] ॥ * ॥

[5]यतोयतो धावति दैवचोदितं मनो विकारात्मकमात्मपञ्चसु[6] ।
गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते ॥ १६ ॥

---

१ यद्यपि श्रीधरीयाद्यभिमतप्रचलितपाठरीत्याऽयं प्रथमोऽध्यायः । विजयध्वजीयेऽपि तथा । प्राचीनभागवतकोशरीत्याऽपि तथा । तथाच "स्वप्ने यथा-" इत्यादि प्रथमाध्यायस्यैकचत्वारिंशं पद्यम् । तथाऽपि तात्पर्यस्य प्राचीनकोशेषु सर्वत्राप्ययं द्वितीयोऽध्याय इत्यैककण्ठ्यम् । एकस्मिन् प्रतनतमे तु कोशे "प्रथमोऽध्यायः" इति विलिख्य पश्चाद् विशोध्य "द्वितीयोऽध्यायः" इति लिखितम् । तेनेदं द्वितीयाध्यायतात्पर्यमिति पक्ष एव साधीयानिति निश्चीयते । तथाचैवमाचार्यसम्मताऽध्यायव्यवस्था सम्भाव्यते— आदितः २६ श्लोकाः प्रथमोऽध्यायः । "इत्यादिश्यामरगणान् प्रजापतिपतिः प्रभुः । आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ" (१०-१-२६) इति प्रथमाध्यायस्य चरमः श्लोकः । तदनन्तरम्—"शूरसेनो यदुपतिर्मधुरामावसन् पुरीम् । माधुराञ्छूरसेनांश्च विषयान् बुभुजे स्वराट्" इत्यारभ्य श्रीधरीयादिरीत्या यावत्प्रथमाध्यायसमाप्ति, विजयध्वजीयादिरीत्या यावद्द्वितीयाध्यायसमाप्ति ४३ श्लोका द्वितीयोऽध्याय इति ।

२ दृष्टात् श्रुताच्च विषयात् तन्निमित्तं यो मनोरथस्तेन ग्रस्तबुद्धिस्तदेव दृष्टं श्रुतं वा मनसाऽनुचिन्तयन् स्वप्नेऽपीदृशं दृष्टश्रुतानुगुणमेव देहं संस्कारबलात् पश्यति । तथाऽपस्मृतिर्मृतोऽपि मृतिकाले दृष्टं श्रुतं वा यत् स्मृतं तदनुगुणमेव किमपि देहं प्राप्नोति । देहशब्द उभयलिङ्गः । तेन तत् किमपीति परामर्शो युक्तः ।

३ स्वप्ने पश्यति मृतः प्रपद्यत इत्युभयमप्येकेनैव पदेन व्याचष्टे—प्राप्नोति । स्वप्नेऽपि नाविद्यमानं केवलं पश्यति । किंतु प्राप्यैव पश्यतीति । "यंयं वाऽपि स्मरन् भावं त्यजत्यन्ते कळेबरम् । तन्तमेवैति कौन्तेय" इति हि गीतासु ।

४ "—दनभिमानतः" इति पाठान्तरम् । कथमपस्मृतिरिति मृत उच्यते? पूर्वदेहस्मरणाभावात् । तदपि कुतः? उत्तरदेहेऽभिमानतः । तथाहि विजयध्वजीयम्—"अपस्मृतिरिति उत्तरदेहेऽभिमानितया पूर्वदेहस्मरणाभावेन मृत इत्यर्थः" इति । "ममायं देह इति स्वीयत्वाभिमानेन पूर्वदेहस्मरणाभावात्" इत्यपि केचिद् व्याचक्षते । अनभिमानत इति पाठे पूर्वदेहेऽभिमाननाशात् स्मरणनाश इति ।

५ प्र. पाठरीत्या चायं प्रथमाध्यायस्य द्विचत्वारिंशः श्लोकः ।

६ "—कमाप पञ्चसु" इत्यर्वाचीनाः । आत्मपञ्चसु पञ्चविधेष्वात्मसु । दैवः गान्धर्वः पित्र्यः मानुष आसुर-

[यतोयतः[1] ।] यत्रयत्र मनो धावत्यात्मपञ्चानां मध्ये, तत्रतत्र तदधीनेन देहेन सहानुजायते[2] गुणानुबद्धः सन्—

"दैवगान्धर्वपित्र्येषु मानुषेष्वासुरेषु च । यत्रयत्र मनो याति तत्रतत्रोपजायते । [3]स्वगुणस्यानुसारेण सत्त्वादिविनिबन्धनः" इति गारुडे । "[4]देवादित्वं योग्यतया तत्सकाशस्त्वनुस्मृतेः । श्वेतद्वीपादि तत्रापि योग्यतामप्यपेक्ष्य तु[5] । विष्णोः स्थानं विनाऽन्यत्र वायुशक्रादिनामपि । त्रैलोक्ये देशभेदेषु[6] योग्यता नत्वपेक्षिता" इति नारदीये ॥ * ॥

[7]ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते ।
एवं स्वमायारचितेष्वसौ पुमान् गुणेषु रागानुगतो विमुह्यति[8] ॥ १७ ॥

श्वेति पञ्चसु जीवजातिषु मध्ये यतोयतः यत्र यत्र सङ्कल्पविकल्पकात्मकत्वाद् विकारात्मकं मनो दैवेन भगवता चोदितं सद् धावति तत्रतत्र जीवजातौ तेन तादृशेन मनोऽधीनेन देहेन सहासौ देही जायते । मायारचितेषु सत्त्वादिगुणेषु प्रपद्यमानोऽनुबद्ध्यमानः सन् । स्वयोग्यगुणानुबद्धः सन्निति यावत् ।

१ प्रतनतमे कोशे "यतोयतः" इति न पठ्यते ।

२ "तत्रतत्र तेन दैवेन सह जायते" इति पाठान्तरम् । प्र. पाठोऽपि तथा । मनोधावनमनुजायते । अत एव तदधीनेन मनोधीनेनेति पूर्वमुक्तम् ।

३ यदि सात्त्विकस्तदा तदनुसारेण सत्त्वनिबन्धनो देवादिषु जायते । यदि राजसस्तदा तदनुसारेण रजोनिबन्धनो मानुषेषु जायते । तामसस्तदनुसारेण तमोनिबद्धः सन्नसुरेषु जायते । एतेन न केवलं मनोधावनं देहहेतुः, योग्यता चापेक्षितेत्युक्तं भवति । सत्यां योग्यतायां यत्र मनो धावति तत्र जायते ।

४ अनुस्मृतेः देवादित्वं योग्यतया भवति । न चेद् योग्यता तत्सकाशो भवति । तेषां देवादीनां सकाशः सामीप्यं भवति । देवान् स्मरन् मृतः तैः सह तल्लोके विहरतीति । लोकप्राप्तेरप्यपवादमाह—श्वेतद्वीपादि । तत्र अनुस्मृतिप्राप्यलोकेष्वपि श्वेतद्वीपादिस्थानं योग्यतामपेक्ष्यैव भवति । नतु स्मरणमात्रेण । तर्हि विना योग्यतापेक्षां स्मरणमात्रेण प्राप्यानि स्थानानि कानि? विष्णोः स्थानं विना । विष्णोः वायुशक्रादीनां चोत्तमदेवानां स्थानानि विनाऽन्यत्र त्रिलोकगतेषु स्थानभेदेषु तत्प्राप्त्यर्थं योग्यता न त्वपेक्षिता । स्मरणमात्रेण शक्यं तानि प्राप्तुम् । त्रैलोक्य इत्यनेन महरादिलोकप्राप्तावपि योग्यताऽपेक्षितेति ज्ञायते ।

५ "—मप्यपेक्षते" इति क्वचिन्मुद्रितः पाठः । ६ "त्रैलोक्यदेशभेदेषु" इति प्र. पाठः ।

७ प्र. पाठे प्रथमाध्याये त्रिचत्वारिंशः श्लोकः ।

८ उदकपार्थिवेषु उदकपूर्णेषु मृन्मयशरावादिषु प्रतिबिम्बितं अदः सूर्यादिज्योतिः समीरवेगानुगतं सत् समीरवेगेनोदके चलिते चलदिव छिन्नमिव भिन्नमिव विविधं भाव्यते । एवं स्वस्य स्वतन्त्रस्य विष्णोर्मायया इच्छया रचितेषु जातेषु सत्त्वादिगुणेषु शरावस्थानीयेषु, तत्रापि जलस्थानीयेऽज्ञाने प्रतिबिम्बितोऽसौ पुमान् जीवः वायुस्थानीयेन विषयरागेण चलितः विविधं मुह्यति छिन्नोऽहं भिन्नोऽहं मृतोऽहं जातोऽहमित्यादि ।

तस्मान्न कस्यचिद् द्रोहमाचरेत् स यथाविधः[1] ।
आत्मनः क्षेममन्विच्छन् द्रोग्धुर्वै परतो भयम् ॥ १८ ॥

विभाव्यते विविधं भाव्यते । स्वमायारचितेषु विष्णुमायारचितेषु । रागानुगतः पुमान् जीवो विविधं मुह्यति ।

"यथैवोदशरावेषु सूर्यादिः प्रतिबिम्बितः । वायुना चलितो[2] भाति च्छिन्नभिन्नादिरूपवान् । एवं विष्णिवच्छया जातगुणेषु प्रतिबिम्बितः । छिन्नो भिन्नो मृतोऽस्मीति बहुधा प्रतिपद्यते । [3]तदेव च दृढीभूत उदके निःशरावके । छेदभेदादि नाऽप्नोति निश्चलं प्रतिबिम्बितः[4] । एवं गुणैर्विमुक्तस्तु जीवो नाऽप्नोति दुःखिताम् । शरावत् गुणाः प्रोक्ता अज्ञानं तु [5]द्रवत्ववत् । [6]दृढीभूतोदवज्जीवस्तज्ज्ञानं [7]प्रतिबिम्बवत् । नित्यान्तःकरणं चैव प्रतिबिम्बश्च तद्गतः । द्वयमेव विमुक्तस्य न किञ्चिज्जड-

---

१ "स तथाविधः" इति पाठान्तरम् । यस्मादेव न स्वतो जनिमृती जीवस्य तस्मान्न हननादिना कस्यचिद् द्रोहमाचरेत् । स यथाविधः यादृशोऽपि स्यात् । स द्रोहमाचरेदप्यजानन् । अथापि जानन् न तस्य द्रोहमाचरेत् । यतो द्रोहेण न क्षेममन्विष्यिष्यते । किंतु भयमेव परतः । यः परस्मै द्रुह्यति स परेणाभिद्रुह्यते । परलोकाच्च तस्य भयम् । परस्मिन् जन्मनि च । पराच्च भगवतः । प्र. पाठे चायं प्रथमाध्यायस्य चतुश्चत्वारिंशः श्लोकः ।

२ "वायुनोच्चलितो—" इति क्वचित् प्र. पाठः ।

३ तदेवेति सामान्ये नपुंसकम् । स एव सूर्यादिः निःशरावके शरावान्निष्क्रान्ते, शरावसम्बन्धरहिते गभीरह्रदादिगते दृढीभूते वायुनाऽप्यचलिते उदके प्रतिबिम्बितश्छेदभेदादि नाऽप्नोति, निश्चलमेव भासते॥ तद्वदेव शरावसदृशैर्गुणैर्विमुक्तः जले च यद् द्रवत्वं वायुयोगे सति चलत्वं नाम दोषस्तत्सदृशेनाज्ञानेन च विमुक्तो जीवश्छेदभेदादिदुःखं नाऽप्नोति ।

४ "निश्चलं प्रतिबिम्बितम्" इति च पाठः । "निश्चलः प्रतिबिम्बितः" इति पाठान्तरम् ।

५ "द्रवज्जलम्" इति क्वचित् ।

६ ननु शरावोदके सूर्यस्येव त्रिगुणेषु जीवस्य प्रतिबिम्बितत्वं स्यान्नाम संसारदशायाम् । विमुक्तस्य तु कथम्? उपाधिनाशे प्रतिबिम्बस्यापि नाशावश्यम्भावात् । आह—दृढीभूतेत्यादि । जीवस्वरूपमेवोपाधिः । भगवत्प्रतिबिम्बोऽहमिति स्वरूपज्ञानमेव प्रतिफलनं नाम । अथच पक्षान्तरम्—जीवस्वरूपभूतं नित्यमन्तःकरणमुपाधिः । जीव एव तद्गतः प्रतिबिम्बः । तथा गुणोपाधिविमुक्तस्यापि मुक्तस्य उपाधिः प्रतिबिम्बश्चेति द्वयमस्त्येव । ननु उपाध्यनाशे कथं मोक्षो नाम? आह—सूर्यकान्तादिवत् न किञ्चिज्जडमिष्यते । स्फटिकजपाकुसुमादिवत् भिन्नं जडं चोपाधिप्रतिबिम्बादिकं किमपि नेष्यते । तस्य स्वरूपभूतं द्वयमपि उपाधिः प्रतिबिम्बश्चेत्युभयमपीष्यत एव मोक्षेऽपि । अन्तःकरणं ज्ञानं च स्वरूपमेवेति न दोषः । उतेत्यवधारणे । तद्यथा—"धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत" इति । "उतात्यर्थविकल्पयोः" इति मेदिनी ।

७ "-स्तद्बिम्बं प्रतिबिम्बवत्" (?) इति क्वचित् ।

मिष्यते। सूर्यकान्तादिवत् तस्य स्वरूपद्वयमप्युत[1]। [2]तस्मान्न हन्तुं शक्योऽसौ केनचिज्जीव आत्मवान्। तस्मात् स्वजीवनार्थाय न परद्रोहमाचरेत्। [3]हन्यते चाज्ञभावेन परेषां द्रोहमाचरन्" इति तन्त्रभागवते। "[4]परः स्वो हरिरुद्दाम[5] इति नामचतुष्टयम्। विष्णोर्गुह्यं तु यो वेद सर्वपापैः प्रमुच्यते" इति प्रकाशिकायाम्[6]। "स्वतन्त्रत्वाद् सुखत्वाच्च[7] स्वनामा विष्णुरुच्यते" इति पाद्मे ॥ * ॥

[8]अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोऽन्यन्न निमित्तमस्ति।
एवं हि जन्तोरपि दुर्विभाव्यं [9]शरीरसंयोगवियोगहेतुः ॥ २५ ॥

कुण्डादिस्थाग्नेर्दारुयोगादौ स्वतः प्रवृत्त्यभावात्—

"यथा कुण्डस्थितस्याग्नेर्दैवाद् दारूपसन्नमेत्[10]। देहयोगो वियोगश्च तथा दैवान्नचान्यथा" इति वामने[11]॥ * ॥

इति दशमस्कन्धे द्वितीयोऽध्यायः[12]

[तृतीयोऽध्यायः[13]]

[14]भगवानथ विश्वात्मा भक्तानामभयङ्करः।
आविवेशांशभागेन मन आनकदुन्दुभेः ॥ १६ ॥

---

१ "स्वरूपं द्वयमप्युत" इति प्र. पाठः। स्वरसोऽर्थः।

२ "तस्मान्न कस्यचिद् द्रोहमाचरेत्" इत्यादिमूलमपि समाख्यावचनेनैव व्याख्याति—तस्मात्। आत्मवान् मनस्वी, आत्मज्ञानी।

३ "हन्यते वाऽज्ञभावेन" इति क्वचित्। परेषां द्रोहमाचरन् परैर्हन्यते। तदेतदुक्तम्—द्रोग्धुर्वै परतो भयम्।

४ स्वमायारचितेष्वित्यत्र कथं स्व इति विष्णुः? किञ्च निर्वचनम्? आह—परः।

५ "हरिरुद्दामा इति" प्र. पाठः प्रामादिकः।

६ "प्रकाशसंहितायाम्" इति क्वचित्।

७ वरमुत्कृष्टं सु सुखं यस्य स सुवः। स एव स्वः। उक्तं हि—"पूर्णो भूतिवरोऽनन्तसुखो यद् व्याहृतीरितः" इति।

८ प्र. पाठानुसारेण चेदं प्रथमाध्यायस्यैकपञ्चाशं पद्यम्।

९ "दुर्विभाव्य." इति प्र. पाठः। एवं दुर्विभाव्यमदृष्टमेव शरीरसंयोगवियोगहेतुः।

१० "—सङ्गमेत्" (?) इति क्वचित्।

११ "इति च वामने" इति क्वचित्।

१२ प्र. तात्पर्यपाठरीत्या श्रीधरीयादिरीत्या चात्र प्रथमोऽध्यायः। एकस्मिन् कोशे च।

१३ श्रीधरीयादिरीत्या चायं द्वितीयोऽध्यायः।

१४ "भगवानपि" इति प्र. पाठः। विश्वस्मिन् व्याप्तः विश्वात्मा। अथापि कृष्णकेशांशभागेनाऽनकदुन्दुभेर्मन आविवेश।

ततो जगन्मङ्गलमच्युतांशं समाहितं शूरसुतेन देवी ।
दधार सर्वात्मकमात्मभूतं काष्ठा यथाऽऽनन्दकरं नभस्तः[१] ॥ १८ ॥

"[२]आविश्य पितरं विष्णुः स्वरूपेणैव मातरम् । विडम्बनार्थं लोकस्य निर्जनिश्चाप्यथा-विशत् । आनन्दमात्रदेहेन जातवत् सम्प्रदृश्यते" इति च ॥ * ॥

सत्यव्रतं सत्यपरं त्रिसत्यं [३]सत्यस्य योनिं निहितं च सत्ये ।
सत्यस्य सत्यमुत सत्यनेत्रं[४] सत्यात्मकं त्वां शरणं प्रपन्नाः ॥ २६ ॥

"[५]सच्छब्द उत्तमं ब्रूयादानन्दं तीति वै वदेत्[६] । येति ज्ञानं समुद्दिष्टं पूर्णानन्ददृशि-स्ततः । [७]सत्यशब्दोदितं तादृग् रूपं नित्यं यतो हरेः । सत्यव्रतस्ततो विष्णुः सद् भूतत्रयमुच्यते । त्यं तदन्यत् समुद्दिष्टं तत्परत्वात्तु तत्परः[८] । वेदमुख्यार्थरूपत्वात् त्रिसत्यो भगवान् हरिः[९] । सत्यस्य चोत्तमानन्दज्ञानदातृत्वतः सदा । सत्यस्य सत्यो भगवान्[१०] सत्यस्थो जगति स्थितेः[११] । जगन्नेतृत्वतः सत्यनेता विष्णुः प्रकीर्तितः ।

---

१ "-करं मनस्तः" इति प्र. पाठः । सर्वान्तर्यामिणं स्वस्यापि प्रत्यगात्मभूतं देवकी नभस्तः हृदयाकाशे जठरावकाशे वा पुनर्दधार । यथा काष्ठा प्राची दिक् आनन्दकरकिरणमिन्दुं नभसि धत्ते । "आत्मभूतं आत्मनि प्रादुर्भूतं पुत्रतया दधार" इति जीवगोस्वामी ।

२ पितरं तस्य पितृत्वव्यवहारसिद्ध्यर्थं स्वरूपेणैवाऽविश्य, नतु रेतोरूपेण । अथ लोकानुकरणार्थं, नत्वन्यथा जननासम्भवात्, पितृद्वारा मातृदेहमप्यविशत् । अथापि निर्जनिरेवायम् । तर्हि कथं देवक्यां जात उच्यते? जातवत् सम्प्रदृश्यत इति । तदपि न भौतिकदेहेन । किन्त्वानन्दमात्रदेहेन । "वसुदेवापत्यत्वसिद्धये प्रथमं वसुदेव-हृद्गतः पश्चाद् देवकीजठरं विवेश" इति सुदर्शनसूरिः, वीरराघवश्च ।

३ सत्यस्य जगतः कारणम् । सत्ये जगत्यन्तर्निहितं च । "तत् सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः ।

४ "सत्यमृतसत्यनेत्रम्" इति प्र. पाठः ।

५ सत्यव्रतः सत्यसङ्कल्प इति, शिष्टदुष्टरक्षाशिक्षादिरूपं व्रतं वा सत्यं यस्येति च मुखतः प्रतीतमर्थमपहाया-पूर्वमर्थान्तरं प्रमाणेनाह—सच्छब्दः । तथाच सत्तियमेव सत्यं पूर्णानन्दज्ञानात्मकं व्रतं वर्तनम्, स्वरूपस्थिति-रिति यावत्, यस्य तम् । ६ "दिति वै भवेत्" इति क्वचिन्मुद्रितः पाठः प्रामादिकः ।

७ "सत्यशब्दोदिता" इति पाठान्तरम् । तदा पूर्णानन्ददृशिः सत्यशब्दोदिता इति पूर्वान्वयः ।

८ तत्परत्वात् मूर्तामूर्तपरत्वात् तत्परः सत्यपरः ।

९ त्रयाणां वेदानां य एक एव सत्यः परमार्थः । त्रिषु वेदेषु वा य एव सत्योऽन्वेष्टव्यः । अन्ये त्वमुख्यार्थ-त्वादसत्या इव ।

१० सत्यस्य सज्जनवर्गस्य सती उत्तमे तिये ज्ञानमानन्दश्च यस्मात् स सत्यः ।

११ "जगति स्थितः" इति पाठान्तरम् । प्र. पाठश्च तथा । सत्ये जगति अन्तर्बहिश्च स्थितेः । एतेन निहितं च सत्य इति व्याख्यातम् । न तूष्णीं स्थितः । किंतु नियमयन् स्थित इति सत्यस्य नेतृत्वात् सत्यनेत्रम् । तद्यथा पातृ-त्वात् पात्रम् । शास्तृत्वाच्छास्त्रम् ।

64

[1]अत्तृत्वाच्च तदादानात् सत्यात्मा चोच्यते विभुः" इति तन्त्रभागवते ॥ * ॥

एकायनोऽसौ द्विफलस्त्रिमूलश्चतूरसः पञ्चशिफः षडात्मा[2] ।
सप्तत्वगष्टविटपो नवाक्षो [3]दशच्छदो द्विखगो ह्यादिवृक्षः ॥ २७ ॥

त्वमेक एवास्य सतः प्रसूतिः स्थानं निधानं तदनुग्रहश्च[4] ।
त्वन्मायया संवृतचेतसस्त्वां पश्यन्ति नाना न विपश्चितो ये[5] ॥ २८ ॥

"[6]जगद्वृक्षाश्रया ह्येषा प्रकृतिस्तु गुणत्रयम् । मूलं मात्राः शिफास्तस्य [7]उत्पित्सुत्वादिकास्तथा । षट् प्रकारास्तु विटपा देवगन्धर्वदानवाः । राक्षसाश्च पिशाचाश्च

---

१ सत्यस्य योनिमिति सृष्टिरुक्ता । निहितं च सत्य इति स्थितिः । सत्यनेत्रमिति नियमनम् । सत्यात्मकमिति संहर्तृत्वमुच्यते । तदाह—अत्तृत्वाच्च । सत्यं जगदत्तीति सत्यात्मा । आत्मैवाऽत्मकः । सत्ये जगति विषयानत्तीति वा । "अधिष्ठाय मनश्चायं विषयानुपसेवते" इति ह्युक्तम् । प्रळयकाले संहृतं च जगत् आदत्ते जठरान्तरिति च सत्यात्मा । उक्तं हि—"यत् प्रयन्त्यभिसंविशन्ति" इति । सत्यं मुक्तवर्गमादत्त इति वा । "यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह" इति हि स्मर्यते । इदमुपलक्षणम्—सत्यं जगद् व्याप्नोतीति च सत्यात्मा ।

२ "पञ्चविधः षडात्मा" इति प्र. पाठः । एका प्रकृतिरयनमाश्रयो यस्य । द्वे प्रवृत्तनिवृत्ते फले । गुणत्रयं मूलम् । पुरुषार्थचतुष्टयं रसः । शब्दादयः पञ्च तन्मात्राः शिफा जटा यस्य । अस्ति जायते वर्धते विपरिणमतेऽपक्षीयते विनश्यतीति षड् भावविकारा आत्मा स्वभावो यस्य । षड् विकारानाप्नोतीति वा । त्वक्चर्ममांसरुधिरमज्जामेदोऽस्थीनि सप्त धातवोऽस्य त्वक् । देवा गन्धर्वा मनुष्या दानवाः राक्षसाः पिशाचास्तिर्यञ्चः स्थावराणि चेत्यष्टावस्य विटपाः । नवद्वारकोटरः । दशेन्द्रियपलाशः । "पत्रं पलाशं छदनं छदः" इत्यभिधानम् । "जटा शिफा" इति च । प्रवृत्तनिवृत्ताख्यद्विविधखगः । आदिः प्रवाहतोऽनादिरयं जगद्वृक्षः ।

३ "दशच्छदी" इति पाठान्तरम् ।

४ "प्रसूतिस्त्वं सन्निधानं त्वमनुग्रहश्च" इति प्र. पाठः । अनुग्रह इत्यनुग्राहकः । "यदनुग्रहतः सन्ति" इति श्रवणात् ।

५ ये न विपश्चितः ते त्वां नाना अन्यथाऽन्यथा पश्यन्ति । ये तु विपश्चितः ते नाना न पश्यन्तीति च ।

६ यद्यप्येको भगवानेवायनमाश्रय इति शक्यं व्याख्यातुम् । व्याचक्षते च केचित् तथा । प्रकृतासङ्गतं तु तत् । "सत्यस्य योनिं निहितं च सत्ये" इत्यादि पूर्वश्लोके, "त्वमेक एवास्य सतः प्रसूतिः" इत्याद्युत्तरश्लोके चास्य समग्रस्य जगद्वृक्षस्य भगवदाश्रितत्वकथनाद् जगदङ्गत्वेन भगवतोऽत्र घटकत्वासम्भवात् । तदेतन्मनसि निधाय प्रमाणेनैवान्यथा व्याख्याति—जगद्वृक्षाश्रया ।

७ उत्पित्सुत्वमित्युत्पत्तीच्छा । उत्पत्त्युन्मुखत्वमिति यावत् । उत्पत्तिपूर्वकालीना स्थितिः । तदेतदस्तीति प्रथमो विकारः । ततो जायते वर्धत इत्यादि ।

तिर्यङ्मानुषतस्थुषः[१] । इन्द्रियाण्यस्य पत्राणि द्वारो द्वारो नव स्मृताः[२] । प्रवृत्तं च निवृत्तं च फलद्वयमुदीरितम् । धर्मादयस्तत्र[३] रसा मोक्ष एकः फलस्य तु[४] । प्रवृत्ताश्च निवृत्ताश्च पक्षिणो द्विविधा मताः[५] । [६]कारणस्य सदा सत्त्वात् प्रवाहेण च सन्नसौ । न कदाचिन्न भूतोऽसौ नचैव न भविष्यति । स्वतो वा परतो वाऽपि सन्नतोऽसौ जगत्तरुः । [७]अस्य सर्गादिकृद् विष्णुः सदानन्दैकरूपकः" इति च ॥ * ॥

बिभर्षि रूपाण्यवबोध आत्मन्[८] क्षेमाय लोकस्य चराचरस्य ।
सत्त्वोपपन्नानि सुखावहानि सतामभद्राणि मुहुः खलानाम् ॥ २९ ॥

---

१ तस्थुष इति द्वितीया प्रथमार्थे । तस्थिवांसः । स्थावरजातय इति यावत् । तस्थुडिति वा पदम् ।

२ श्रोत्रद्वयं चक्षुर्द्वयं नासापुटद्वयं मुखं पायूपस्थौ चेति नव द्वार एवास्य वृक्षस्यापि द्वारः कोटराः नवाक्ष इति मूलेऽक्षपदोक्ताः ।

३ "धर्मादयस्त्वत्र" इति प्र. पाठः ।

४ "मोक्ष एकफलस्य तु" इति पाठान्तरम् । धर्मादयस्त्रयः मोक्ष एकश्चेति चत्वारः फलस्य रसाः । प्रवृत्तिफलस्य धर्मार्थकामाः । निवृत्तिफलस्य मोक्ष इति रसविभागप्रकाशनार्थं पृथगुक्तिः । अन्यथा सर्वेऽपि सर्वस्य रसा इति भ्रान्तिः सम्भाव्यते । मोक्षस्तु एकः मुख्यो रसश्च ।

५ यद्यप्यत्रापि जीवेश्वरौ द्वौ खगाविति शक्यं व्याख्यातुम् । "द्वा सुपर्णा सयुजा सखाया" इत्यादिश्रुतिसंवादश्चैवं भवति । व्याचक्षते च केचित् तथा । प्रकृतासङ्गतं तु तत् । सखगस्य जगद्वृक्षस्य भगवता सृष्टिस्थितिसंहारकथनात् -"त्वमेक एवास्य सतः प्रसूतिः स्थानं निधानम्" इति । यो वृक्षो यदाश्रितौ पक्षिणौ च स्वयं भगवता प्रसूयन्ते तत्रैकः पक्षी कथं भगवानेव स्वयं स्यात्? अतः साधूक्तम्—प्रवृत्ताश्च निवृत्ताश्च पक्षिणो द्विविधा मता इति ।

६ नन्वयमादिकालेऽप्यासीदित्यादिवृक्ष उच्यते । सदा सत्त्वमेव तेनोक्तं भवति । वक्ष्यति चोत्तरश्लोके—"त्वमेक एवास्य सतः प्रसूतिः" इति मुखतः सत्त्वम् । कथमेतत्? य इदानीमस्ति, ह्यो नाऽसीत्, श्वश्च न भविष्यति स कथं सदा सन्? सदा न सन्निन्त्येव वृक्ष उच्यते । व्रश्चनाद्धि वृक्षः । न श्वस्तिष्ठतीत्येवैनं वृक्षमश्वत्थमाहुः । तत् कथमुच्यते सन्निति आदिवृक्ष इति? आह—कारणस्य सदा सत्त्वात् । कारणस्य मूलप्रकृतेः । तथाच कारणात्मना सदा सन् । कार्यात्मनाऽपि प्रवाहतः सदा सन्नेवेति युक्तम् ।

७ अस्य सर्गादिकृत् विष्णुरिति "त्वमेक एवास्य सतः प्रसूतिः—" इत्याद्यर्धं व्याख्यातम् । "त्वन्मायया-" इत्याद्युत्तरार्धं च विवृणोति—सदानन्दैकरूपकः । एतेन सदानन्दैकरूपं त्वामनानन्दजीवादिरूपेण नाना पश्यन्त्यविपश्चित इति मूलं विवृतम् ।

८ "आत्मा क्षेमाय" इति प्र. पाठः । अवबोधरूपे आत्मनि स्वे महिम्न्येव स्थितः स्वयमेव रूपाणि बिभर्षि । नतु शुक्रशोणितद्वारा मातुरुदरं प्रविश्य । कीदृशानि रूपाणि? सत्त्वोपपन्नानि । सर्वगुणपूर्णानि । सर्वगुणसमाहारः सत्त्वम् । "पूर्णमदः पूर्णमिदम्" इति हि श्रुतिः । सतां सुखावहानि । खलानामसुखावहानि । दुर्जनानुत्साद्य चराचरस्य क्षेमं वितनोषि ।

त्वय्यम्बुजाक्षाखिलसत्त्वधाम्नि समाधिनाऽऽवेशितचेतसैके[1] ।
त्वत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धिम् ॥ ३० ॥

"सदा सर्वगुणाढ्यत्वात् सत्त्ववान् हरिरुच्यते । नतु सत्त्वगुणात्मत्वाद् यतस्त्रिगुणवर्जितः" इति नारदीये ॥ * ॥

स्वयं समुत्तीर्य सुदुस्तरं द्युमन् भवार्णवं भीममदभ्रसौहृदाः ।
भवत्पदाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान्[2] ॥ ३१ ॥

"भगवत्पादपोतोऽसौ नान्यपोतसमो बत[3] । सन्निधायापि शिष्येषु[4] तमेव[5] प्राप्नुयुर्यतः" इति वामने । "भगवत्पद[6]नौका या नेयं नौकोपमा भवेत् । तया तीर्त्वा तु तामेव प्राप्य तिष्ठन्ति तत्र यत्" इति ब्राह्मे ।

अतस्तामेव याताः ॥ * ॥

सत्त्वं विशुद्धं श्रयते भवान् स्थितौ शरीरिणां श्रेयउपायनं वपुः ।
वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते[7] ॥ ३४ ॥

---

१ "—चेतसो ये" इति पाठान्तरम् । अखिलानां सत्त्वानां सद्गुणानां धाम्नि निलये, सत्त्वानां प्राणिनामाश्रये वा त्वयि आवेशितचेतसा समाधिना उपासनेन हेतुना एके मुख्यभक्ताः । समाधिनाऽऽवेशितचेतस एके भक्ता इति सन्धिरार्षो वा । त्वत्पादनावा भवाब्धिं गोवत्सपदायितं कुर्वन्ति । कीदृशेन पोतेन? महत्कृतेन । अब्धेरपि महत्कृतेन । तेन युक्तं भवाब्धेः गोष्पदोपमत्वमिति । नात्रामहत् महत् क्रियते । किंतु महदेव महत्त्वेन ज्ञातं महत्कृतं भवति । "महदिति मनसि कृतेन बहुमतेन" इति श्रीधरस्वामी । "महद्भिरुपदिष्टेन" इति सुदर्शसूरिप्रभृतयः । "महद्भिर्भवाब्धेः पोततुल्यीकृतेन" इति विश्वनाथचक्रवर्ती ।

२ अदभ्रसौहृदा अनल्पभक्ताः भवत्पदाम्भोरुहनावैव भवार्णवं समुत्तीर्य, तामेव नावमत्र भवार्णवे शिष्येष्वपि सन्निधाय पुनस्तामेव याता इत्यपूर्वेयं नौः । अन्यत्र तु नावाऽपरपारं गच्छन्ति, न नावमेव । यया च तरन्ति साऽपरपारे तिष्ठति नार्णवमध्येऽपि । एवं सतोऽनुगृह्णाति भवान् ।

३ "—समो भवेत्" इति प्र. पाठः । ४ "सन्निधायैव शिष्येषु" इति च ।

५ "तदेव" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

६ "भगवत्पाद–" इति पाठान्तरम् । या भगवत्पादनौका सेयमितरनौकोपमा न भवेत् । इयं लौकिकी नौका भगवत्पादनौकायाः नोपमा भवेदिति वा ।

७ स्थितौ ज्ञानदानेन लोकधारणार्थं सात्विकानां ब्रह्मादीनां शुद्धसत्वमयं वपुर्भवान् श्रयते । सात्विकेषु गुरुषु प्रविष्टो भवानेव लोके ज्ञानमुपदिशति । "सत्वात् सञ्जायते ज्ञानम्" इत्यतः सात्विकदेहाश्रयणम् । तच्च वपुरत एव सात्विकजीवानां जिज्ञासूनां श्रेय उपाययतीति श्रेयःसाधनं भवति । येन सत्त्वमयशरीरेषु गुरुषु प्रविष्टेन

"[1]विशुद्धसत्त्वब्रह्मादेः शरीरे संस्थितो हरिः। [2]तेषामादेशमार्गेण[3] वेदाद्यैरर्चयन्ति तम्" इति भागवततन्त्रे ॥ * ॥

[4]सत्त्वं न चेद् धातरिदं निजं भवेद् विज्ञानमज्ञानभिदापमार्जनम्।
गुणप्रकाशैरनुमीयते भवान् प्रकाशते यस्य च येन वाऽगुणः ॥ ३५ ॥

"[5]सत्त्वं ब्रह्मादिदेहाख्यं ज्ञानरूपं तमोनुदम्। यदि न स्यात् तदा सत्त्वप्रकाशानुमितो विभुः। यदि न स्यात् परो विष्णुः कथं विद्वज्जना अमुम्। अर्चयन्तीति तत्त्वस्य

भवता, भवत्प्रेरितानां तेषामादेशमार्गेणेति यावत्, जनस्तव पूजां करोति। कैः? वेदाध्ययनेन, क्रियायोगेन यज्ञादिकर्मणा, तपसा भगवच्चिन्तनरूपेण ज्ञानयोगेन, निरन्तरं भगवति चित्तैकाग्र्यरूपेण समाधिना च। "वेदाध्ययनं वर्णिनाम्, क्रियायोगो गृहिणाम्, तपो वनिनाम्, समाधिः सन्न्यासिनामिति चतुराश्रमधर्मैः" इत्यपि व्याचक्षते।

१ "विशुद्धसत्त्वं ब्रह्मादेः" इति क्वचित्। रजस्तमोभ्यामनुपहतस्वभावा ब्रह्मादयो गुरवः विशुद्धसत्त्वा उच्यन्ते। ब्रह्मैव मुख्यतः। अन्येषामप्युपदेशकाले सत्वोन्मेषादुपचारः। ततश्च तेषां शरीरं विशुद्धसत्वमुच्यते। विशुद्धसत्वेषु स्थित इति हरिश्च क्वचिद् विशुद्धसत्वमुच्यते।

२ पूर्वं ब्रह्मादेरिति समुदायवचनमित्याह—तेषाम्। ब्रह्मादीनाम्। ३ "—मार्गेण" इति क्वचित्।

४ सत्त्वमयशरीरेषु भगवतः सन्निधानेन सात्विकानां स्वयं भगवद्विज्ञानम्, अन्येषामनुमानद्वारेत्याह—सत्त्वम्। अयि जगद्धातः, सत्त्वं अज्ञानस्य, भिदाया द्वन्द्वमोहस्य मिथ्याज्ञानस्य चापमार्जनम्, स्वयं विज्ञानजनकम्। येषां सत्त्वप्रधानं शरीरम, ये च स्वतः सात्विकाः ते भवन्तं स्वयमेव विजानत इति स्थितम्। "सत्त्वात् सञ्जायते-ज्ञानम्" इति स्मरणात्। अथच केषाञ्चिन्मनुष्यादीनां इदमीदृशं सत्त्वं निजं सहजं न भवेच्चेत् तदा गुणप्रकाशैरनुमीयते भवान्। यदि भगवान् न स्यात् कथममुं सात्विका विद्वांसोऽर्चयेयुः। अर्चयन्ति च। तेन ज्ञायतेऽस्ति भगवानिति। तदेवं सात्विकानां सत्वगुणप्रकाशोऽन्येषां जिज्ञासूनां भगवदनुमापको भवति। तदेतदुक्तम्—"तत्र सत्त्वं निर्मलत्वात् प्रकाशकम्" इति। न केवलं स्वयं प्रकाशरूपम्। अन्येषां प्रकाशकं च। तदेवं सात्विकानां प्रकाशकानामभावे प्रकाशते कस्य च केन वाऽगुणः? स्वयमगुणो भगवान् गुणबद्धस्य यस्य कस्यचित् पुरुषस्य केन हेतुना केन वा प्रकारेण प्रकाशेत?

५ ब्रह्मादीनां ज्ञानिनां देहः सत्त्वमित्युक्तम्। तेषां स्वयमेव भगवद्विज्ञानं युक्तम्। तद्देहस्य सत्त्वप्रचुरत्वात्। तस्य चाज्ञाननिरासद्वारा बिज्ञानजनकत्वात्। यदीदृशं शरीरं न स्यात्, ये पुनर्न तत्वज्ञानिनः किंतु तत्वस्य जिज्ञासव एवेति यावत्, तदा सत्त्वप्रकाशानुमितो विभुः। सत्त्वगुणोन्मेषवतां महतामाचरणेन तादृशैर्भगवाननुमीयते। अनुमितिप्रकारमेवाऽऽह—यदि न स्यात् परो विष्णुः। यदि विष्णुर्न स्यात् यदि च परो न स्यात् तदा जातसत्त्वप्रकाशा विद्वज्जनाः कथममुमर्चयन्तीत्येवमनुमितः। यदि न स्यान्नार्चयेयुरेव। अर्चयन्ति च। तस्मादस्तीत्यनुमित इत्यर्थः। तत्वज्ञानिनं भगवदूरीकर्तारं दृष्ट्वा तत्वस्य जिज्ञासवोऽपि भगवति श्रद्धां कुर्वत इति। यतो भगवानयमधोऽक्षजः। अधःकृतमक्षजं येन। प्रत्यक्षेण तदनुगामिना लौकिकानुमानेन वाऽगम्यः। "नेन्द्रियाणि नानुमानम्" इत्यादि श्रवणात्। तदेवं पादत्रयं व्याख्यातम्। इदानीं

जिज्ञासुभिरधोक्षजः । 'कथं ज्ञायेत कस्यापि निर्गुणत्वात्[१] परो विभुः" इति तन्त्र-भागवते ॥ * ॥

न नामरूपे गुणकर्मजन्मभि[३]र्निरूपितव्ये तव तस्य साक्षिणः ।
मनोवचोभ्यामनुमेयवर्त्मनो [४]देवक्रियायाः प्रतियन्त्यथापि हि ॥ ३६ ॥

"लोकसिद्धार्थनाम्नः[५] स राहित्यान्नामवर्जितः । अरूपोऽप्राकृतत्वाच्च सत्त्वाभावात् तथाऽगुणः । अकर्माऽक्लिष्टकारित्वान्नित्यत्वादज एव च । अलौकिकार्थसन्नाम्नामनन्तत्वाज्जनार्दनः । अनन्तनामा परमः[६] सुसुखज्ञानरूपवान् । तानि चास्य सुदिव्यानि सुगन्धीनि सुभान्ति च । शुभलक्षणपूर्णानि सुवर्णानि महान्ति च । यदतोऽनन्तरूपोऽसौ पूर्णानन्दादिभोजनात् । बलैश्वर्यसुवीर्यादिपूर्णासङ्ख्यगुणत्वतः । अनन्तगुण एवासौ ते चाभिन्ना गुणा हरेः । परस्परमभिन्नाश्च सर्वे धर्माश्च तद्गताः । अभिन्नानि च रूपाणि सर्वाणि जगदीशितुः । प्राकृतस्य तु नामादेरीक्षिता पुरुषोत्तमः ।

भगवदधिष्ठानभूतानां ज्ञानिनामनुग्रहमन्तरा भगवतो दुर्ज्ञेयत्वं प्रतिपादयच्चतुर्थचरणं व्याख्याति—कथं ज्ञायेत । अन्यथा कस्यापि पुरुषस्य भगवान् कथं ज्ञायेत? यतो निर्गुणोऽसौ गुणमयानां वाङ्मनसागोचर एव । एतदेवाधोक्षज इति विवृतम् । "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इत्यादिका च श्रुतिः । अस्य तात्पर्यवचनस्य तदनुसारेण मूलस्य चान्यथाऽन्यथा व्याख्यानं तात्पर्यभावानवगममूलमिति परित्याज्यम् ।

१ "तथा ज्ञायेत" इति कोशेषु बहुलं पठ्यते । तदा तु तथाऽनुमितत्वेनैव कस्यापि पुरुषस्य ज्ञायेतेत्यर्थः ।

२ "विगुणत्वात्" इति क्वचित् प्र. पाठः । ३ "गुणजन्मकर्मभि—" इति प्र. पाठः ।

४ "देव क्रियायाम्" इति च । तव भगवतः प्राकृते नामरूपे प्राकृतैः गुणकर्मजन्मभिः सह न निरूपितव्ये । किन्त्वप्राकृते नामरूपे, अप्राकृतान्येव च गुणकर्मजन्मानि निरूपितव्यानि । "जन्म कर्म च मे दिव्यम्" इत्यादिश्रवणात् । यतस्तस्य प्राकृतस्य नामरूपादिप्रपञ्चस्य हि साक्षी भवान् । केवलं साक्षित्वेन द्रष्टा न तैर्लिप्तः । "साक्षी चेता केवलो निर्गुणश्च" इत्यादिश्रवणात् । कथमिदं ज्ञायते, प्राकृतैर्गुणैरगुणः, अप्राकृतैः सगुण इति? सर्वथा निर्गुण एव किं न स्यात्? न स्यादित्याह — मनोवचोभ्यामनुमेयवर्त्मने । ज्ञानिनो हि मननेन भगवन्तं मन्यन्ते मत्वा च वदन्ति तं गुणपूर्णं निर्गुणं च । अनामानमनन्तनामानं च । अरूपमनन्तरूपं च । तेनास्य भगवतो वर्त्मा रीतिः वस्तुस्थितिरिति यावत्, अनुमीयेत, ज्ञानिनामुभयथा व्यवहारान्यथानुपपत्त्या अनामादिश्चायमनन्तनामादिश्चायम् । प्राकृतैर्नामादिभिरनामादिः, अप्राकृतैश्चानन्तनामादिरिति । शक्यं तर्हि भगवाननन्तगुणत्वेन सर्वैरप्यनुमातुम् । तत् किमिति केचिन्निर्गुणमेव मन्यन्ते? आह—देवक्रियायाः । अथापि एवमनुमातुं शक्यत्वेऽपि न सर्वेऽप्येवमनुमिमीरन् । देवक्रियायाः भगवत्प्रेरणादेव केचिद् भक्ता एवं प्रतियन्ति जानन्ति । भगवदनुग्रहादेव भगवतो याथात्म्यं ज्ञातुं शक्यम्, न स्वात्मबलादिति । "यमेवैष वृणुते तेन लभ्यः" इति हि श्रूयते । "भक्त्या त्वनन्यया शक्यः" इति च स्मरन्ति ।

५ लोकमात्रसिद्धार्थनाम्न इत्यर्थः । लोकसिद्धोऽप्यर्थः क्वचिद् युज्यते । यथा देवकीनन्दनत्वादिः । तथाचोक्तं पुरस्तात्—"अथ दामोदरादीनि लोकदृष्टसमानि तु" इति षष्ठे ।

६ "परमः सुखज्ञानस्वरूपवान्" इति क्वचित् ।

[1]अनामादिवचोभिस्तु स एषोऽर्थोऽनुमीयते। [2]अनामत्वादि चान्यच्च ज्ञानिनां मनसेङ्ग्यते। तेनैव चोह्य एषोऽर्थस्तस्माज्ज्ञेय इति प्रभुः'' इति ब्रह्मतर्के।

देवक्रियायाः प्रतियन्ति। भगवत्प्रेरणादेव[3] जानन्ति।

''नामरूपादि विष्णोस्तु न शक्यं ज्ञातुमञ्जसा। तथाऽपि तत्प्रसादेन जानन्ति परमर्षयः'' इति पाद्मे ॥ * ॥

[4]शृण्वन् गृणन् गृणयन् चिन्तयंस्ते नामानि रूपाणि च मङ्गलानि।
क्रियासु यस्त्वच्चरणारविन्द आविष्टचित्तो न भवाय कल्प्यते ॥ ३७ ॥

यस्मान्नामरूपादयः सन्ति तस्मात् शृण्वन् गृणन्। क्रियासु क्रियमाणासु प्रेरकत्वेन पूज्यत्वेन च।

''सर्वक्रियासु कर्तृत्वपूज्यत्वेन जनार्दनम्। यो वेत्ति नैति संसारं तत्प्रसादान्न संशयः'' इति क्रियायोगे[5] ॥ * ॥

[6]दिष्ट्या हरेऽस्या भवतः पदो भुवो भारोऽपनीतस्तव जन्मनेशितुः।
दिष्ट्याऽङ्कितां त्वत्पदकैः सुशोभनैर्द्रक्ष्याम गां द्यां च तवानुकम्पिताम् ॥ ३८ ॥

---

१ ज्ञानिनामनामादिवचोभिः।

२ प्राकृतनामादिरहितत्वम्, अन्यच्च अप्राकृतानन्तनामादित्वं च ज्ञानिनां मनसेङ्ग्यते ज्ञायते। अथापि तेनैव भगवता, तदनुग्रहेणैव, एषोऽर्थः शक्योहो भवति। न तर्कमात्रेण। तस्मादनन्तगुणादिरित्येव प्रभुर्ज्ञेयः। ''मनसेङ्गते'' इति क्वचित् पाठः प्रामादिकः।

३ प्रेरणैव हि भगवतः क्रिया मुख्यतः। नह्यस्माकमिव गमनागमनादिः। ''इच्छामात्रं प्रभो सृष्टिः'' इत्यादिश्रवणात्।

४ ''शृण्वन् गृणन् संस्मरयंश्च चिन्तयन् नामानि रूपाणि च मङ्गलानि ते। क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचेता न भवाय कल्पते'' इति प्र. पाठः। स्वयं शृण्वन् गृणन् चिन्तयन् स्मरन्, अन्यैश्च गृणयन्। गॄ शब्दे। श्रवणादिक्रियासु, शयनासनभोजनादिसर्वक्रियासु च क्रियमाणासु त्वमेवासां कारयिता तवैव चेमाः पूजारूपा इति त्वत्पदारविन्दे आविष्टचित्तो न पुनः संसाराय कल्प्यते। तदुक्तम्—''सर्वं त्वदाराधनमेव भूयात्'' इति। ''मयि स्थितो मदङ्गेषु स्वतन्त्रो व्याप्तवान् हरिः। सर्वशः स्वात्मतन्त्रो मां स्वेच्छया वर्तयत्यजः। स्वात्मनस्तस्य पूजाः स्युर्मनोवाक्कायवृत्तयः। ममैता इति कर्तारमुद्देश्यं च हरिं स्मरेत्'' इत्यादि च। ''नर्ते त्वत् क्रियते'' इत्याद्या च श्रुतिः।

५ ''इति च क्रियायोगे'' इति क्वचित्।

६ तव जन्मना, ''पद्भ्यां भूमिः'' इति भवतः पादजन्यत्वेन पादाश्रितत्वेन च पादव्यपदेशाया भुवो भारोऽपहृतः। एष्यन्निश्चितमित्यतीतत्वव्यपदेशः। जन्मनैवापनीतप्रायत्वात्। बालरूपस्य तव कोमलैरल्पतरैश्च पादैरङ्कितां गां भूमिं द्रक्ष्याम। त्वया कृपाविषयीकृतां द्यां च द्रक्ष्याम। दिवौकस्सु कृपयैव त्वं भूमाववातर इति।

"खं नाभिश्चरणौ क्षितिः" इति भवतः[१] पदो भुवः ।

"पदाद्याश्रयणाद्[२] विष्णोः पृथिव्यादि पदादिकम् । तज्जत्वाद् वाऽथ सादृश्याद् यथा नुर्भूमिगं पदम्[३]" इति ब्रह्मतर्के ॥ * ॥

न तेऽभवस्येश भवस्य कारणं विना विनोदं बत तर्कयामहे ।
भवो निरोधः स्थितिरप्यविद्यया कृता यतस्त्वय्यभवाश्रयात्मनि[४] ॥ ३९ ॥

"अज्ञानादेव मन्यन्ते विष्णोर्जनिमृती नराः । स्थितिरूपस्य चान्यस्मात् स्थितिं मोक्षाश्रयस्य हि । स्वेच्छया हि जनिं भङ्गं स्थितिं चासौ करोत्यजः । सर्वस्य जगतो यस्मात् तज्जन्यादिः[५] कुतो भवेत्" इति च ॥ * ॥

इति दशमस्कन्धे तृतीयोऽध्याय.[६]

[चतुर्थोऽध्यायः]

[७]स एव स्वप्रकृत्येदं सृष्ट्वाऽग्रे त्रिगुणात्मकम् ।
तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे ॥ १४ ॥

---

१ "भगवतः" इति क्वचित् प्राचीनकोशे पाठः । २ "पादाद्याश्रयणाद्" इति क्वचित् ।

३ नुः नरस्य भूमिगतं पदचिह्नं यथा सादृश्यात् पदमित्येवोच्यते तथा भूमेः विराड्रूपभगवच्चरणप्रतीकत्वेन सादृश्याद् वा चरणत्वव्यपदेशः ।

४ "—स्त्वय्यभयाश्रयात्मनि" इति प्र. पाठः । अभवस्य अजन्मनोऽसंसारिणो वा तव भवस्य जन्मनः कारणं विनोदं विना नान्यत् तर्कयामहे । बतेति तामेतां भगवतो जन्मादिलीलामास्वादयन्ति । यतो यस्माद् भवतः सर्वस्य सृष्टिस्थितिलयाः अविद्यया स्वेच्छयैव कृतास्तस्मिन् त्वयि पराधीना भवस्थितिनिरोधा अविद्यया कृताः । केवलमज्ञानेनैव कल्पिताः । कीदृशे त्वयि? अभवाश्रयात्मनि । अभवानां मुक्तानामप्याश्रयस्वरूपे । न केवलं भवस्य किन्त्वभवस्यापि यो हेतुः स कथमन्यस्माद् भवादिमान् स्यात्? अथापि ये तथा मन्यन्ते अहो तेषामज्ञानविलसितम् ।

५ "तज्जन्मादिः" इति प्र. पाठः । "तज्जन्यादि" इति क्वचित् ।

६ श्रीधरस्वाम्यादिरीत्या चात्र द्वितीयोऽध्यायः ।

७ स्वाधीनया प्रकृत्या जगदिदं सृष्ट्वा सर्वगतत्वादप्रविष्टोऽन्तरपि व्याप्तेः प्रविष्ट इव भाव्यसे । सर्वगतोऽपि घटाद्यन्तर्गतजलवदन्तः पूर्णरूपस्तिष्ठसीति प्रविष्ट इव । प्रवेशोऽप्यलेपाच्च ।

"बहिश्च विद्यमानत्वादप्रविष्टो जगद्धरिः । प्रविष्टवच्च तत्रैव पूर्णरूपत्वतो विभुः । अप्रवेशः प्रवेशश्च प्रविष्टोपमता तथा । बहिरन्तर्गतस्य[1] स्यादित्याहुः शब्दवेदिनः" इति च ॥ * ॥

[2]य एतेऽविकृता भावाः सप्त ते विकृतैः सह ।
नानावीर्याः पृथग्भूता विराजं शयनं तव[3] ॥ १५ ॥

सन्निपत्य समुत्पाद्य दृश्यन्तेऽनुगता इव ।
प्रागेव विद्यमानत्वान्न तेषामिह सम्भवः[4] ॥ १६ ॥

"महदादिस्त्वविकृत ईषद् विकृतरूपतः" इति च ॥ * ॥

अनुगता इव प्रविष्टा इव । पूर्वोक्तवद् बहिरपि विद्यमानत्वादन्तश्च[5] । देवतानामविभक्तशक्तित्वात्[6] पूर्वोत्पन्नत्वात् तत्वानामण्डे[7] प्रवेशमात्रं व्यक्तिविशेषादुत्पत्तिरित्युपचर्यते—अण्डजो ब्रह्मेत्यादि[8] ।

---

१ बहिर्गत इत्यप्रविष्ट उच्यते । अन्तर्गत इति प्रविष्टः । बहिरन्तर्गत इति प्रविष्टोपमः । नहि प्रविष्ट एव । बहिरपि विद्यमानत्वात् । नाप्यप्रविष्ट एव । अन्तरपि विद्यमानत्वात् । अतोऽप्रविष्टः प्रविष्ट इव ।

२ "यथेमेऽविकृता भावास्तथा ते" इति प्र. पाठः । ३ "विराजं जनयन्ति हि" इति च ।

४ अयं श्लोकद्वयार्थः—महदहङ्कारौ पञ्च तन्मात्राणि च सप्त भावाः पदार्था अविकृता इत्युच्यन्ते । ईषद् विकृतत्वेऽपि स्थूलविकारस्य पृथिव्यादेः प्रकृतिरूपत्वात् । तदुक्तम्—"महदाद्याः प्रकृतिविकृतयः सप्त" । तथाचात्राल्पार्थे नञ् । 'अनुदरा कन्या' इत्यादिवत् । एते विकृतैः स्थूलविकारापन्नैः पृथिव्यादिभिः सह सन्निपत्य तव शयनं विहारस्थानं विराजं ब्रह्माण्डमुत्पाद्य तत्रानुगता इव प्रविष्टा इव दृश्यन्ते । नहि प्रविष्टा एव बहिरपि विद्यमानत्वात् । अतः प्रविष्टा इव । किमिति सन्निपत्य? यतः पृथग्भूताः नानावीर्याः । विभिन्नशक्तयः । नानाशक्तीनां समवायेनैव हि विराडुत्पत्तिर्युज्यते । किमिति ब्रह्माण्डेऽनुगता इव? ब्रह्माण्डान्तस्तेषां जननमेव किं न स्यात्? न स्यात् । प्रागेव विद्यमानत्वात् । पृथक् तत्वानां तदभिमानिनां च ब्रह्माण्डात् पूर्वमेवोत्पन्नत्वात् । अतो न तेषामिह सम्भवः । किंतु प्रवेशमात्रम् । तदेवचोत्पत्तिरित्युपचर्यत इति ।

५ केचित् "बहिरपि विद्यमानत्वात् ।" इति वाक्यं विच्छिद्य "अन्तश्च देवतानामविभक्तशक्तित्वात्—" इत्याद्युत्तरवाक्यत्वेन पठन्ति ।

६ "देवतानामपि विभक्तशक्तित्वात्" इत्येकस्मिन् कोशे पाठान्तरम् । सत्यधर्मीयेऽप्येवम् । "विभक्तशक्तित्वात् तारतम्येन शक्तिमत्वात्" इति तद्व्याख्यानात् । "अवकाशदानादिशक्तीनां नानाविधत्वात् विभक्तशक्तित्वात् तदभिमानिदेवानाम्" इति विजयध्वजीयं चैतत्पाठमनुसरति । बहुकोशे तु "अविभक्तशक्तित्वात्" इत्येव पठ्यते । प्रतनतमे च कोशे तथैव पाठः । ७ "तत्वानमण्डप्रवेशमात्रम्" इति प्र. पाठः ।

८ "ब्रह्मेत्यादिना" इति क्वचित् । तत्वानामण्डे प्रवेशमात्रम् । नोत्पत्तिः । अथापि प्रवेशमात्रमुत्पत्तिरित्युपचर्यते । तद्यथा "अण्डजो ब्रह्मा" इत्यादि । नह्यत्र महत्तत्वाभिमानिनः ब्रह्मणस्तदभिमतस्य वा महतोऽण्डे जन-

65

"महद्रूपादिना ब्रह्म देवाश्चैव प्रजज्ञिरे । अण्डे त्वेषामभिव्यक्तिर्जनिरित्यभिधीयते" इति च ॥ * ॥

एवं भवान् बुद्ध्यनुमेयलक्षणो ग्राह्यैर्गुणैः सन्नपि तद्गुणग्रहः[1] ।
अनावृतत्वाद् बहिरन्तरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः[2] ॥ १७ ॥

ग्राह्यगुणविषयबुद्ध्यनुमेयलक्षणः । ग्राह्यगुणेष्वस्वातन्त्र्यात् तज्ज्ञापकोऽन्योऽस्तीति ज्ञायते ।

नमर्थः । किन्तु प्रवेशमात्रम् । ननूपचारे किं निमित्तम्? व्यक्तिविशेषात् । यथा पूर्वमविद्यमानो घट उत्पत्त्या व्यज्यते एवं तत्वानि तदभिमानिनश्चात्र प्रवेशाद् व्यज्यन्त इत्यभिव्यक्तिसाधर्म्येणोपचर्यते । ननु किमुपचाराश्रयेण? जननमेव किं न स्यात्? यतः प्रागेव विद्यमानत्वान्न तेषामिह सम्भवः । तदेव विवृणोति—पूर्वोत्पन्नत्वात् तत्वानाम् । नन्वस्तु तत्वानामुत्पत्तिरित्युपचारात् । दृष्टान्तस्तु विषमः । तदात्वे तु "अण्डजं महत्तत्वम्" इत्युदाहर्तव्यम् । तत् कथमण्डजो ब्रह्मेत्युदाहारि? आह—देवतानामविभक्तशक्तित्वात् । तत्वैरविभक्तशक्तित्वात् । नहि तत्वानां विभक्ता शक्तिर्युज्यते । जडत्वात् । देवतासन्निधानादेव हि तानि शक्तिमन्ति । तेन ब्रह्मेति तदभिमतं महत्तत्वमप्युच्यते । तदेव प्रमाणवचनेन स्फुटमाह–महद्रूपादिना ब्रह्मा । एतेनैतदपि सूचितम् । मूलेऽविकृता भावा इति न केवलं महदादयः पदार्था उच्यन्ते । किन्तु तदभिमानिनो जीवा अपि । "भावा जीवाः समुद्दिष्टाः" इति चान्यत्र । ननु विकृतत्वं जडस्यैव युक्तम् । तत्कथमभिमानिदेवा गृह्येरन्? आह— देवतानामविभक्तशक्तित्वात् । तथाच तेषां विकारेऽपि तदभिमानिदेवताधीन इति तेऽपि मुख्यतो विकृतादय उच्यन्त इति ।

१ "—लक्षणैर्ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः" इति प्र. पाठः ।

२ यथा ब्रह्माण्डे एवं पिण्डाण्डेऽपि भवान् भाव्यते ज्ञायत इति । यथा ब्रह्माण्डमुत्पाद्य तत्राप्रविष्टः प्रविष्टश्च भाव्यते एवं शरीरमुत्पाद्यापि तत्राप्रविष्टः प्रविष्टश्च भवान् ज्ञायते । सत्यं ज्ञायते । किन्तु न प्रत्यक्षत इत्याह— बुद्ध्यनुमेयलक्षणः । ये ते गुणा इन्द्रियाणि तैः, ये च त इन्द्रियग्राह्या गुणाः शब्दाद्यास्तान् गृह्णातीति तद्गुणग्रहः स्वयमेव सन्नपि भवान्, जीवनिष्ठा विषयग्रहणशक्तिर्न स्वतस्तस्य, किन्तु भवत एवेत्यर्थः । "श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च । अधिष्ठाय मनश्चायं विषयानुपसेवते" इति हि गीतासु । "शब्दाद्या इन्द्रियाद्याश्च सत्वाद्याश्च शुभानि च । अप्रधानानि च गुणाः" इति चाभिधानम् । इन्द्रियग्राह्यैः शब्दादिगुणैर्जायमाना शब्दादिगुणविषया या मतिः तयाऽनुमेयं नियमनस्वातन्त्र्यादिलक्षणं यस्य तादृशः । जीवेन श्रवणादिभिः शब्दादयो गृह्यन्ते । नचासौ तद्ग्रहणे स्वतन्त्रः । तेनान्यः स्वतन्त्रो ग्राहयिताऽनुमीयत इति । इदमेवोक्तं तलवकारैः— "केनेषितां वाचमिमां वदन्ति चक्षुःश्रोत्रं क उ देवो युनक्ति" इत्यादि । ननु कथं भगवानेव तद्गुणग्रहः? जीवस्यान्तरङ्गविषयं सुखादिकं कथं भगवान् गृह्णीयात्, परबुद्धेरप्रत्यक्षत्वनियमादित्यत आह—अनावृतत्वात् । अव्यवधानेन सर्ववस्तूनामपि साक्षाद् द्रष्टृत्वात् तव ज्ञाने बाह्यमान्तरमिति परोक्षं प्रत्यक्षमिति विभागो न युज्यते । सर्वमपि प्रत्यक्षमेव ते । तदपि कुतः? अनावृतत्वात् सर्वगतत्वादेव । सर्वस्यान्तर्बहिश्च व्याप्तस्य ते न बहिरन्तर्भेदो नामास्ति । अतः सर्वगतत्वात् सर्वं साक्षात् पश्यसि । कीदृशस्य ते? सर्वस्य गुणपूर्णस्य । सर्वमत्तीति सर्वात्मनः सर्वसंहारकस्य । सर्वविषयभोक्तुश्च । "यश्चात्ति विषयानिह" इति हि स्मर्यते । आत्मन्येव वसतीत्यात्मवस्तु । स्वे महिम्नि प्रतिष्ठितस्येति यावत् ।

"ज्ञाताऽपि सर्वस्य भवान्[1] ज्ञायते ज्ञानलिङ्गतः[2] । जिघृक्षोर्ग्रहणाभावादस्वातन्त्र्यप्रतीतितः । [3]सर्वत्राव्यवधानेन द्रष्टृत्वात् सर्ववस्तुनः । आन्तरं बाह्यमित्येवं विशेषो नास्ति[4] कश्चन" इति तन्त्रभागवते ।

[5]जीवस्थग्रहणशक्तिरपि तस्येत्यपिशब्दः । एवं शरीरमुत्पाद्य ज्ञायसे[6] । सर्वस्य पूर्णस्य[7]—

"[8]सर्वः सम्पूर्णसामर्थ्यात् सर्वात्मा सर्वभक्षणात् । अनन्याश्रयतश्चाऽऽत्मवस्तुत्वमभिधीयते[9]" इति च ।

आत्मन्येव वासादात्मवस्तु ॥ * ॥

"[10]यदात्मनो दृश्यगुणेषु सन्निधेर्व्यवस्यसेऽस्वव्यतिरेकतोऽबुधैः ।
विनाऽनुवादं नच तन्मनीषितं सम्यग् वचो व्यक्तमुपाददत् पुमान्[11]" ॥
॥ १८ ॥

---

१ "सर्वस्य भगवान्" इति प्र. पाठः प्रामादिकः । "सर्वभावानाम्" इति विजयध्वजीयसम्मतः पाठः । तद्गुणग्रह इत्यस्य विवरणमिदम् । गुणग्रहणमुपलक्षणमिति सर्वस्य ज्ञाताऽपीत्युक्तम् ।

२ ज्ञायते ज्ञानलिङ्गत इति बुद्ध्यनुमेयलक्षण इति विवृतम् । अनुमानप्रकारमेवाऽऽह— जिघृक्षोः । ग्रहीतुमिच्छोः । जीवः क्वचिद् दिदृक्षति, न पश्यति । क्वचिच्छुश्रूषति, न शृणोति । एवं गुणग्रहणेऽस्वातन्त्र्यस्य स्फुटं प्रतीयमानत्वात् केनचिदन्येन स्वतन्त्रेण नियुक्त एव जीवो जानातीत्यनुमीयते ।

३ अनावृतत्वादित्यादितृतीयपादस्य व्याख्यानम्—सर्वत्रेत्यादि ।

४ "-मित्येव न विशेषोऽस्ति" इति क्वचित् । "-मित्येव विशेषो नास्ति" इति प्र. पाठः ।

५ "जीवस्य ग्रहण-" इति प्र. पाठः । तद्गुणग्रहोऽपि भवानित्युक्ते, जीवो न स्वतस्तद्गुणग्रहः किन्तु तन्निष्ठा ग्रहणशक्तिरपि भगवदधीनेति ज्ञायते ।

६ यथा जगदुत्पाद्य तत्र त्वं प्रविष्ट इव भाव्यसे यथा वा महदाद्यभिमानिनो देवा विराजं समुत्पाद्य तत्रानुगता इव एवं तद्दृष्टान्तेन भवान् शरीरमुत्पाद्य तत्र बुद्ध्यनुमेयलक्षणो ज्ञायते ।

७ "सर्वस्य सम्पूर्णस्य" इति प्र. पाठः ।

८ इदानीं चतुर्थचरणगतपदान्यपि तन्त्रभागवतवचनेनैव स्वोक्तिदार्ढ्याय व्याख्याति—सर्वः सम्पूर्णसामर्थ्यात् ।

९ "-वस्तु त्वमभिधीयसे" इति क्वचित् ।

१० "य आत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधः" इति प्र पाठः ।

११ "सम्यग् यतस्त्यक्तमुपाददत् पुमान्" इति च । यत्र गुणा इन्द्रियाणि दृश्यन्ते, यैश्च गुणा विषया दृश्यन्ते विषयीक्रियन्ते ते दृश्यगुणाः । शरीराणि । तेषु जीवेन सह परमात्मनस्तवापि सन्निधानात् विवेक्तुमजानद्भिरबुधैस्त्वं स्वस्मादव्यतिरेकेणैव व्यवस्यसे ज्ञायसे । हंसेतरैः पक्षिभिरिव क्षीरनीरौ । तदेतन्मनीषितं न सम्यक् । न मनीषिमतमपितु कुमनीषितम् । कुत एतत्? विनाऽनुवादम् । हेतुगर्भम् । अनुकूलं स्वविषये संवादि वादं वेदवचनं विना प्रवृत्तं हि तत् । तस्माद् वेदवादविरोधित्वात् कुमनीषितमिति । यथा वस्तु तदनुगुणमेव वदतीति अनु-

परमात्मनोऽपि शरीरे [1]सन्निधानादबुधैरस्वव्यतिरेकतो ज्ञायसे[2]। यथानुकूलवादं [3]वेदवचनं विना प्रवर्तनान्न[4] तन्मनीषितं सम्यक्।

"[5]अभीदमेकमेको अस्मि निष्षाळभी द्वा किमु त्रयः करन्ति। खले न पर्षान् प्रतिहन्मि भूरि किं मा निन्दन्ति शत्रवोऽनिन्द्राः" इति जीवेशभेदे[6] व्यक्तं हि वचः परः पुमानुपाददे। "प्रविष्टत्वाच्छरीरेषु जीव एवेति दुर्धियः। मन्यन्ते परमात्मानं न तन्मतमनुव्रजेत्। वेदवादविरोधित्वादनुयाता तमो विशेत्। ततः[7] पर्यङ्कशयन आह विष्णुः सनातनः। इदं जगत् सर्वमथेदृशानि भूरीणि वा मामभियान्ति[8] सङ्ख्ये[9]। धान्यानि यद्वत् खलगानि मर्त्यः[10] सञ्चूर्णयिष्याम्यहमेक एव" इत्यादि ब्रह्माण्डे[11]।

[12]चेति फलतोऽपि तमो यान्तीति।

"ऐकात्म्यज्ञानतो यान्ति तमो भेदात्[13] परं पदम्। स्वातन्त्र्यपारतन्त्र्यादिज्ञानं भेददृशिर्भवेत्" इति ब्रह्मवैवर्ते॥ *॥

वाद इत्येव वा वेदनाम। तं विना तमपहाय तद्विरोधेन प्रवृत्तत्वात् कुमनीषितमिति। "वेदवादविरोधित्वात्" इति तात्पर्योदाहृतप्रमाणसमाख्यानात्। यतो भेदविषये व्यक्तं वचः "अभीदम्—" इत्यादि श्रुतिवचनं स्वयं परः पुमान् नारायण एव उपाददत्, उपाददात् उपदिष्टवानिति यावत्।

१ "सन्निधानादेवाबुधै-" इति प्र. पाठः। २ "ज्ञायते" इति क्वचित्।

३ "-वादवेदवचनम्" इति च क्वचित्। ४ "प्रवर्तमानं न तन्मनीषितम्" इति प्र. पाठः।

५ दशममण्डले पठितस्याम्य मन्त्रस्य (१०–४८–७) इन्द्रनामा वैकुण्ठो भगवानृषिः। इन्द्रनामा स्वयमेव देवता। अयमर्थः—इदं सर्वं जगदेकमेकीभूतं सन्मामभियाति चेत्, अहमेक एव निष्षाट् नितरां सहमानः अभियोद्धाऽस्मि। द्वौ त्रयो वा एतादृशं विश्वद्वयं त्रयं बहूनि वा विश्वानि मामभिपतेयुः, अनन्तकोटिब्रह्माण्डपतिं मां किं ते कुर्युः। न केवलं तेषां प्रयत्नवैफल्यम्। अनर्थश्च महानित्याह—खले। उलूखले पर्षान् धान्यानीव तमसि परुषांस्तान् पातयित्वा प्रतिहन्मि भूरीनपि। स्वयमनिन्द्रा असमर्थाः इन्द्राख्यस्य स्वस्य निराकरणदनाथाश्च ते यथार्थद्वेषिणः किमिति वृथाऽऽत्मनाशाय मां निन्दन्ति निर्दोषमिति।

६ "जीवेशयोर्भेदे व्यक्तं वचः" इति प्र. पाठः।

७ "यतः पर्यङ्क-" इति प्र. पाठः। पर्यङ्कशयनो विष्णुरित्यनेनास्य मन्त्रस्य वैकुण्ठ इन्द्र ऋषिरित्येतद् व्याख्यातम्। शेषपर्यङ्कशायी विष्णुः। ८ "—यान्तु" इति क्वचित्।

९ "सङ्ख्ये" इति प्र. पाठः। सङ्ख्यमित्येव युद्धवचनम्।

१० "मर्त्याः" इति प्र. पाठः। ११ "इति ब्रह्माण्डे" इति च।

१२ "वेति" इति पाठं पठित्वा केचित् "भूरीणि वा" इति ब्रह्माण्डवचनस्थवाकारार्थविवरणमेतदिति व्याचक्षते। चिन्त्यं तत्। नच तन्मनीषितमिति भागवतस्थचकारव्याख्यानमेतत्। न केवलं न मनीषिसम्मतमित्येव। किन्त्वेतादृशमिथ्योपास्तिफलत्वेन तमःप्रदं च। न केवलं वेदविरोधात्। किन्तु फलतोऽपि अनर्थफलत्वाच्च। तमो यान्तीति हेतोरिति वा। १३ भेदात् ज्ञायमानात्। भेदज्ञानादिति यावत्।

त्वत्तोऽस्य जन्मस्थितिसंयमान् विभो वदन्त्यनीहादगुणादविक्रियात् ।
त्वयीश्वरे ब्रह्मणि नो विरुध्यते तदाश्रयत्वादुपचर्यसे गुणैः[1] ॥ १९ ॥

"अनीहोऽक्लिष्टकारित्वात् तथाऽविकृत एव सन् । सर्वं कृणोषि[2] तद् युक्तमैश्वर्यात् पूर्णशक्तितः" इति ब्राह्मे[3] ।

अगुणश्चेत् कथं[4] गुणैः सृष्ट्यादिकृदिति? तदाश्रयत्वादिति[5] ।

"अगुणोऽगुणदेहत्वात् सगुणो गुणधारणात् । ऐश्वर्यादिगुणत्वाद्वा[6] वासुदेव उदीर्यते[7]" इत्याग्नेये ॥ * ॥

स त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः ।
सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तमसा जनात्यये[8] ॥ २० ॥

"जगतां वर्धयन् सत्त्वं यदा रक्षति केशवः । हयग्रीवादिरूपेण शुक्लवर्णस्तदा विभुः । वर्धयंस्तु रजो येन जगदुत्पादयेद्धरिः । तद् रक्तं जामदग्न्यादिरूपं येन विनाश-

---

१ "त्वदाश्रयत्वादुपचर्यते गुणैः" इति प्र. पाठः । संयमः संहारो नियमनं च । कुलालादिरीहते । मृदादिर्विक्रियते । सर्वमपि गुणबद्धम् । भवांस्तु नेहते, न विक्रियते, निर्गुणश्च । लोकेऽदृष्टमेतत् त्वयि तु न विरुद्धयते यतस्त्वमीश्वरः । ब्रह्म पूर्णशक्तिश्च । "तद् युक्तमैश्वर्यात् पूर्णशक्तितः" इति हि तात्पर्यवचनम् । अगुणोऽपि गुणाधारत्वात् सृष्ट्यर्थमुपात्तैर्गुणैर्गुणीत्युपचर्यसे । स्वरूपभूतैश्च गुणैर्गुणीत्युपचर्यसे व्यवह्रियसे । व्यवहारमात्रेऽप्युपचारशब्दः प्रयुज्यते । "रामभद्र इत्येव मां प्रत्युपचारः शोभते" इति भवभूतिप्रयोगात् । आदरपूर्वको व्यवहार उपचारः । गौणश्च व्यवहार उपचारः । उत्कृष्टे चाप्रधाने चोपशब्दप्रवृत्तेः ।

२ "सर्वं करोति" इति प्र. पाठः । "सर्वं करोषि" इति पाठान्तरम् ।

३ "ब्राह्मे" इति क्वचिन्न पठ्यते ।

४ "कथं सृष्ट्यादिकृदिति" इति क्वचित् ।

५ "तदाश्रयत्वात्" इत्यतः परं 'इति' पदं क्वचित् प्र. पाठे न पठ्यते ।

६ "–गुणित्वाद्वा" इति क्वचित् ।

७ "वासुदेव इतीर्यते" इति प्र. पाठः ।

८ योऽगुणोऽपि गुणैरुपचर्यसे स त्वम्, सत्त्वमित्येकं वा पदम् । सत्वं सत्वगुणाश्रयं लोके सत्ववर्धकमिति यावत् । स्थित्यर्थं स्वमायया स्वेच्छया आत्मनः शुक्लं वर्णं बिभर्षि । शुक्लवर्णं हयग्रीवादिरूपं बिभर्षि । आत्मन इत्यनेन नैते "अजामेकां लोहितशुक्लकृष्णाम्" इति श्रुतिगदिताः प्राकृतवर्णाः । किन्त्वप्राकृता भगवतः स्वरूपभूता एवेत्याह । अत एव रूपरूपिणोरभेदबोधनाय "शुक्लं वर्णम्" इत्येवाऽऽह । "तस्य हैतस्य परमस्य नारायणस्य चत्वारि रूपाणि शुक्लं रक्तं रौग्मं कृष्णमिति" इति हि श्रुतिः । रजसोपबृंहितं रजोगुणाश्रयं लोके रजःप्रवर्तकं रक्तरूपं जामदग्न्यादि सृष्टये । तथा जनात्यये, निमित्तसप्तमी, संहाराय । 'जनात्तये' इति विजयध्वजीये पाठान्तरम् । तमसोपबृंहितं कृष्णं कृष्णादिरूपं बिभर्षीति ।

येत् । वर्धयंस्तु तमो लोके तत्[1] कृष्णं बादवादिकम् । सर्वत्र सर्वं कुरुते विशेष-
स्तत्र कीर्तितः[2] । ज्ञानदानादिना[3] रक्षा महतां[4] सम्प्रकीर्तिता । रागदानेन महतां
सृष्टिः सृष्टिरुदीर्यते । असतां तु तमोवृद्धिं कुर्वन् पातयते यदा । सतां विवर्धना-
र्थाय कृष्णरूपी तदा हरिः । ज्ञानाद्युत्पत्तिकृच्चापि रूपं रक्तं विभोः स्मृतम् । तमो-
विनाशकमपि कृष्णं विष्णोरुदाहृतम् । आचार्यादिषु रागार्थे शुद्धसत्त्वात्मकं रजः ।
यतो व्यपेक्षितं नाशे तमसोऽपि तमः परम्[5] । तमोद्वेषात्मकं [6]शुद्धसत्वात्मक-
मुदीर्यते । एवं सृतिगतानां तु रागाद्या न गुणोद्भवाः । शुद्धज्ञानात्मकाः सर्वे
मुक्तानां नात्र संशयः । सर्वत्र सर्वकृच्चापि हयग्रीवादिरूपकः । ज्ञानादिरक्षको
विष्णुर्जामदग्न्यादिरूपवान् । ज्ञानाद्युत्पादको नित्यं कृष्णादिर्दोषनाशकः । एकरू-
पोऽपि भगवान् बहुरूप इवेयते । अचिन्त्यैश्वर्यरूपत्वात् पूर्णानन्दैकरूपकः[7]" इति

---

१ "लोके यत् कृष्णम्" इति क्वचित् ।

२ सर्वत्र सर्वं कुर्वन्नपि अवतारविशेषे कार्यविशेषं विशिष्य प्रकटयति । तेन प्राकट्यविशेषेणायं व्यपदेशो भवति ।

३ ज्ञानादिसृष्टिः, सतां रक्षा, असतां नाशस्तमआदिनाशश्चात्र सृष्टिस्थितिसंहारा उच्यन्त इत्याह—ज्ञानदानादिना । महतां रक्षा स्थितिरित्युच्यते । ज्ञानविषयेऽनुरागोत्पादनेन महतां ज्ञानसृष्टिरेव सृष्टिः । महतां सतां विवर्धनायासत्सु तमोवर्धनेन तेषां नाश एव नाश इति । कृष्णरूपी कृष्णवर्णरूपवान् । तथाच न केवलं जगदुत्पत्तिकृद् ब्रह्माद्यन्तर्गतमेव रूपं रक्तम्; ज्ञानाद्युत्पत्तिकृदपि जामदग्न्यादिरूपं रक्तं विभोः स्मृतम् । न केवलं जगद्विनाशकं रुद्राद्यन्तर्गतमेव रूपं कृष्णम्, तमोविनाशकमपि सतां ज्ञानदानेन कृष्णादिरूपं कृष्णं विष्णोरुदाहृतम् । अथच ज्ञानदानेन रक्षाकृत् यच्छुक्लं हयग्रीवादिरूपं तज्ज्ञानाद्युत्पत्तिकृच्चापीति उत्पत्तिरूपक्रियाविवक्षया रक्तं च स्मृतम् । तदेव ज्ञानदानेन तमो विनाशयतीति विनाशरूपक्रियापेक्षया कृष्णं च स्मृतम् । अथच केवलमसतां न नाशाय तमोवृद्धिकृद् रूपं कृष्णम्; किन्तु तमोविनाशकमपि रूपं कृष्णम् । वस्तुतस्तु ज्ञानदानादिना रक्षा, ज्ञानादिसृष्टिः, तमसस्तामसानां च नाश इत्येतत् त्रितयमपि सत्त्वकार्यमेव । तथाच निमित्तभेदेन सत्त्वमेव रजस्तमोपदव्यपदेश्यं भवतीत्याह —आचार्यादिषु । ज्ञानदानाय गुरोः शिष्ये शिष्यस्य च गुरौ अनुरागजननं नाम सृष्टिः शुद्धसत्त्वकार्यमेव । ततश्च सत्त्वमेव रागजननेन साधर्म्येण रज इत्युच्यते । एवं ज्ञानवृद्धये तमोनाशोऽपि शुद्धसत्त्वस्यैव कार्यम् । तथाऽपि तमसो नाशे हेतुरिति नाशकत्वेन साधर्म्येण तमसो विलक्षणं सत्त्वमेव तम इत्युच्यते । तमो द्वेष्टीति द्वेषकत्वेन च साधर्म्येण । सत्त्वस्य तमोद्वेषात्मकत्वात् । सृतिगतानां तु एवमेतादृशा रागाद्याः सत्सु भागवतेषु रागः, असत्सु तामसेषु द्वेषः इत्याद्या न रजस्तमोगुणोद्भवाः किन्तु शुद्धसत्त्वात्मका एव । अनेवंविधाश्चेत् सत्सु द्वेषः असत्सु राग इत्याद्याश्चेत् रजःस्तमःप्रभवा एव । सृतिगतानामियं व्यवस्था मुक्तानां पुनर्भगवति भागवतेषु च राग इत्याद्याः सर्वेऽपि भावाः न गुणोद्भवाः । किन्तु शुद्धज्ञानात्मकाः सर्वे । गुणातीतत्वात् ।

४ "महती सम्प्रकीर्तिता" इति क्वचित् ।

५ "ततः परम्" इति प्र. पाठः ।

६ "शुद्धं सत्त्वात्मक —" इति च ।

७ "— रूपतः" इति क्वचित् कोशेषु ।

ब्रह्मतर्के[१] । "स्वेच्छया[२] तु गुणान् विष्णुर्नानारूपान्[३] करोत्यजः । गुणानामाश्रयत्वात्तु भवेत् स गुणबृंहितः[४]" इति तन्त्रभागवते ॥ * ॥

त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेऽवतीर्णोऽसि ममाखिलेश्वर ।
[५]राजन्यसञ्ज्ञासुरकोटियूथपैर्निर्व्यूह्यमानां निहनिष्यसे चमूम्[६] ॥ २१ ॥

"सतां सुखविवृद्ध्यर्थमसतां पीडनं हरेः । यावच्चासुरदुःखं स्यात् तावद् देवसुखं भवेत् । तत्रापि तारतम्येन ब्रह्मणोऽभ्यधिकं सुखम् । यावत् क्षीणं तमस्तावत् प्रकाशस्य तु वर्धनम् । सर्वस्माच्च कलेः पीडा[७] ब्रह्मणोऽभ्यधिकं सुखम् । तस्मात् सतां रक्षणाय सर्वकर्म हरेः स्मृतम्" इति ब्रह्मतर्के ॥ * ॥

रूपं यत् तत् प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारम् ।
सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद् विष्णुरध्यात्मदीपः[८] ॥ २४ ॥

---

१ प्राचीनकोशेषु क्वचित् "इति च" इतीयदेव पठ्यते । "ब्रह्मतर्के" इति न पठ्यते ।

२ स्वेच्छयेति स्वमाययेति मूलपदं विवृतम् । गुणान् नानारूपान् करोति । क्वचित् सत्त्वम्, क्वचिद् रजः क्वचित् तमः, क्वचित् सत्वस्यैव विवक्षाभेदेन रजस्त्वं तमस्त्वं चेति । अथच शुक्लं रक्तं कृष्णमिति नानारूपान् ।

३ "विष्णुर्नामरूपान्" इति प्र. पाठः प्रमाद एव ।

४ "-बृंहकः" इति क्वचित् । गुणबृंहित इत्येव युक्तम् । "रजसोपबृंहितम्" इति मूलविवरणपरं हीदम् ।

५ "राजन्यसैन्यासुर—" इति पाठान्तरम् ।

६ "-माना निहनिष्यसे चमूः" इति च । यद्यपि संहाराय कृष्णवर्णः । अथापि त्वमस्य लोकस्य इमं सज्जनलोकं रिरक्षिषुः मम गृहे भार्यायामवतीर्णोऽसि । तथाच असतां नाशनं नाम सतां रक्षणमेवेति "सर्वत्र सर्वकृच्चापि" इति पूर्वोक्तं स्फुटं विवृतम् । सतां सुखदानेन रक्षार्थमेवासुरचमूं निहनिष्यसे ।

७ कलेः पीडा सर्वस्माच्चाभ्यधिका ।

८ "—दीपम्" इति विजयध्वजीयपाठः । यत् तत् इत्यत्र यदित्यविभक्तिको निर्देशः षष्ठीलोपेन । "परमे व्योमन्" इत्यादिवत् । प्रथमान्तं वा षष्ठ्यर्थे । "सप्तसु प्रथमा" इति सूत्रात् । तथाच यत् यस्य ब्रह्मणः तत् श्रुत्यादिप्रसिद्धमव्यक्तत्वादिगुणं स्वरूपं स त्वं साक्षादनुपचारतो विष्णुरिति । उपासकानां मनस्यन्तः प्रकाशत इति देहेन्द्रियादीनि प्रकाशयतीति चाध्यात्मदीपः । कीदृशम् रूपम्? स्वप्रसादादृतेऽव्यक्तम् । इन्द्रियागोचरं च । "यमेवैष वृणुते तेन लभ्यः" इत्यादेः । ब्रह्म पूर्णगुणम् । अथापि निर्गुणम् । गुणत्रयातीतम् । सत्तेति निर्दिष्टमस्तित्वमुच्यते । तेनास्पृष्टदोषगन्धं कल्याणगुणमयं सत् सत्तामात्रम् । विशिष्यते विशिष्टो भवतीति विशेषः । यस्माद् विशिष्टमधिकं नास्ति तन्निर्विशेषं सर्वोत्तमम् । अवताररूपेषु निर्भेदं च । न फलकामनयेहते चेष्टत इति निरीहम् । अथच निःशेषेणेहते सर्वं करोतीति च निरीहम् ।

"सर्वाशुभविनिर्मुक्तगुणमात्रो यतो हरिः । सत्तामात्रमतः प्राहुर्निर्विशेषोऽखिलोत्तमः ।
[1]अनादरान्निरीहश्च सेहः सर्वकृतिर्यतः[2]" इति तन्त्रभागवते ।

[3]यस्य तद् रूपं स त्वम् । "सततसु प्रथमा" इति सूत्रात् ॥ * ॥

नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादिभूतं गतेषु ।
व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यतेऽशेषसञ्ज्ञः[4] ॥ २५ ॥

अशेषसञ्ज्ञः सर्वनामा[5] ॥ * ॥

योऽयं कालस्तस्य तेऽव्यक्तबन्धो[6]श्चेष्टामाहुश्चेष्टते येन विश्वम् ।
निमेषादिर्वत्सरान्तो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये ॥ २६ ॥

[7]चेष्टतेऽनेनेति चेष्टा ॥ * ॥

इति दशमस्कन्धे चतुर्थोऽध्यायः

---

१ फलादराभावात् । पूर्णकामत्वेन फलार्थमप्रवृत्तेः ।

२ "सर्वकृती यतः" इति पाठान्तरम् । प्र. पाठोऽपि तथा । यतः सर्वकृतिः सर्वकर्ताऽतः सेहः । ईहया चेष्टया सहित इति ।

३ यद्यपि यत् तत् रूपं अव्यक्तत्वादिगुणकं स त्वं साक्षादिति सामानाधिकरण्येन व्याख्यातुं शक्यम् । तथाऽपि रूपशब्दवैयर्थ्यं तु भवति । यत् तत् अव्यक्तं ब्रह्म स त्वमित्येतावता पूर्तेः । तेन रूपशब्दावैयर्थ्याय यस्येति षष्ठ्यन्ततया विपरिणमय्य व्याख्यातम् । अर्थ वेशेषद्योतनायैवेदम् । प्रथमान्तत्वेऽपि न नश्छिन्नम् ।

४ द्विपरार्धावसाने ब्रह्मलये सर्वलोकेषु नष्टेषु । महाभूतेषु भूतादिमहङ्कारं गतेषु, अहङ्कारे चाऽदौ भूतं महत्तत्वं गते । व्यक्ते च महति अव्यक्तं प्रधानं गते भवानेकः शिष्यते । यद्यपि शिष्यते, अथाप्यशेषसञ्ज्ञ इति सालङ्कारं वचः ।

५ "अशेषाः सर्वाः सञ्ज्ञा यस्य । सर्वशब्दवाच्यो भगवानेक एव शिष्यते" इति वल्लभाचार्योऽप्याह ।

६ "–बन्धो चेष्टा–" इति प्र. पाठः । "व्यक्तेऽव्यक्तं कालवेगेन याते" इति योऽयं संहारहेतुत्वेन प्रकृतः कालस्तं तव चेष्टामाहुः । क्रीडासाधनमाहुः । त्वमेवान्यान्यकालेषु सृष्ट्यादि कुर्वन् विहरसि । कीदृशस्य तव ? अव्यक्तबन्धोः । महदन्तं सृष्टिजातमन्ततो यस्मिन्नव्यक्ते लीयते तस्याप्यव्यक्तस्य बन्धोः । प्रकृतीश्वरस्य । येन कालेन कालनियामकेन भवता वा विश्वं चेष्टते । क्षेमङ्करं तं त्वां प्रपद्ये ।

७ तात्पर्यार्थकथनमिदम् । न विग्रहप्रदर्शनम् । अनेन कालेन भगवांश्चेष्टत इति हेतोरुपचारेण कालो भगवतश्चेष्टेत्युच्यत इति ।

८ श्रीधरस्वाम्यादिरीत्याऽयं तृतीयोऽध्यायः ।

[पञ्चमोऽध्यायः]

[1]मा शोचेथां महाभागावात्मजान् स्वकृतम्भुजः ।
जन्तवो न सदैकत्र दैवाधीनाः सहाऽसते[2] ॥ १८ ॥

"[3]पूतनाकंसनरकशिशुपालादिषु द्विधा । जीवाः सन्तस्त्वसन्तश्च तत्र बन्ध्वादिरूपिणः । विष्णोः सन्त इति ज्ञेया असन्तः शत्रुरूपिणः । शुभजीवप्रकाशेन कदाचिच्छुभबुद्धयः । विपर्ययेऽन्यथा च स्युः शुभास्तत्र हरिं ययुः । [4]अशुभाश्च तमो घोरं यदि तत्रैव मध्यमाः । मध्यमां गतिमेवाऽपुरेकदेहगता अपि" इति गारुडे ॥ * ॥

भुवि भौमानि भूतानि यथाऽऽयान्त्यपयान्ति च ।
नायमात्मा तथैतेषु विपर्येति यथैव भूः[5] ॥ १९ ॥

[6]अथानेकविधोऽभेदो यत आत्मविपर्ययः ।
देहयोगवियोगश्च[7] संसृतिर्न निवर्तते[8] ॥ २० ॥

तस्माद्[9] भद्रे स्वतनयान् मया व्यापादितानपि ।
माऽनुशोच यतः सर्वः स्वकृतं विन्दतेऽवशः ॥ २१ ॥

---

१ "मा शोचतम्" इति प्र. पाठः । २ "-धीनास्तदासते" इति च ।

३ ननु तामसः कंसः कथं तत्वज्ञानीव "मा शोचेथाम्—" इत्यादि भाषते? आह—पूतनाकंसेत्यादि ।

४ "असुराश्च" इति पाठान्तरम् ।

५ 'जन्तव एकत्र न सहाऽसते' इति पूर्वोक्तं दृष्टान्तेनावगमयति—भुवि । भौमानि द्रव्याणि घटपटादीनि स्थानात् स्थानान्तरमायान्त्यपयान्ति च, उत्पद्यन्ते नश्यन्ति च, तथा जन्तवः पुत्रादिजीवा अपि आयान्त्यपयान्ति चेति न सदैकत्र सहाऽसत इति पूर्वेणान्वयः । एवं सदा विपरिणममानेषु एतेषु जन्तुषु तदाश्रयभूतोऽयं परमात्मा केवलं न विपर्येति । यथा भौमेषु विपरिणममानेष्वपि तदाश्रयभूता भूर्न विपर्येति ।

६ "यथाऽनेवंविदो भेदो—" इति प्र. पाठः । "यतोऽनेकविधो भेदो—" इति पाठान्तरम् ।

७ "—वियोगौ च" इति प्र. पाठः ।

८ "संसृतिर्नतु वास्तवी" इति च पठन्ति । यतः परमात्मनः सकाशादात्मनो जीवस्य, आत्मनि परमात्मविषये वा विपर्ययो विपरीतज्ञानम् । ज्ञानमिवाज्ञानमपि भगवानेव हि ददाति । विपरीतज्ञानेन च यत एव परमात्मनः अनेकविधोऽभेदः देहोऽहम्, देवोऽहम्, ब्रह्माहमित्यादि बहुविधमैक्यं प्रतीयते । यतश्च परमात्मनः तादृशविपरीतज्ञानेन, तादृशविपरीतज्ञानिनामिति यावत्, देहयोगवियोगलक्षणा संसृतिर्न निवर्तते सोऽयमात्मा न विपर्येति । पुत्रादयो जन्तवस्तु पितृत्वादिना नित्यं विपरियन्ति ।

९ तस्मात् सर्वस्य दैवाधीनत्वात्, तस्यैव चाविपरीतत्वेन सर्वहेतुत्वात्, अन्यस्य सर्वस्य चाऽगमापयित्वात् तस्मिन्नेव स्थितिं कृत्वा माऽनुशोच ।

66

[1]अयमात्मा परमात्मा ॥ * ॥

यतः [2]परमात्मनोऽनेकविधमैक्यं विपरीतज्ञानेन, यतश्च संसृतिर्न निवर्तते स एव न विपर्येति। पुत्रादिकं तु विपर्येति ॥ * ॥

तस्मात् तस्मिन्नेव स्थितिं कृत्वा माऽनुशोच।

"अहं ब्रह्मास्मि देवोऽस्मि नास्मि केवलमानुषः। जातोऽस्मि वर्द्धे धनवान् म्रिय इत्यादिकः सदा[3]। देहादिषु च देवेषु परब्रह्मणि चाभिदा। मोहाद् यन्मायया नित्यं दृश्यतेऽधममध्यमे। स ईशो न विपर्येति सर्वेशत्वात् कदाचन। पुत्रादिकं विपर्येति पित्रादिश्च यतो भवेत्" इति ब्राह्मे। "तल्लक्षणैर्विहीनाश्च[4] ब्रह्म देवोऽस्मि चेति तु। असुराः प्रतिपद्यन्ते [5]जन्यादिं मानुषा जनाः" इति च। "परब्रह्मण एकस्य ब्रह्मास्मीति विचिन्तनम्। [6]परं ब्रह्मेति रामादीन्[7] लक्षणैरवधारयेत्। देवोऽस्मीति च देवानां तच्च ज्ञेयं स्वलक्षणैः[8]। मर्त्यानां मानुषोऽस्मीति प्रतिपत्तिर्विधीयते। अन्यथा प्रतिपत्त्या तु तमो यान्ति विनिश्चयात्। अन्यथा प्रतिपद्यन्त आसुरा नियतं जनाः। घोरं तमश्च ते यान्ति[9] यथा ज्ञानात् परं सुराः" इति च ॥ * ॥

एवमेतन्महाराज[10] यथा वदसि देहिनाम्।
अज्ञानप्रभवा हन्ति[11] स्वपरेति भिदा यतः ॥ २६ ॥

---

१ अयमात्मेति न जीवः। तस्याऽगमापायिभौमभूतस्थानीयत्वेन जन्तव इति पृथग् ग्रहणात्। तेन भूस्थानीयः जीवाश्रयः परमात्मैवात्माऽत्मेत्याह—अयमात्मा।

२ "परमात्मनो नैकविध—" इति प्र. पाठः। कोशेषु च क्वचित्।

३ "इत्यादिका सदा" इति पाठान्तरम्। इत्यादिको भावः अभिदेत्युच्यते। यस्य भगवतो मायया बन्धकशक्त्या सेयमभिदाप्रतीतिरधमे मध्यमे च दृश्यते।

४ "तल्लक्षणैर्विहीनः सन् ब्रह्म" इति पाठान्तरम्। प्र. पाठोऽपि तथा। तदा तु कारणान्तरेण ब्रह्मलक्षणैर्देवलक्षणैर्वा विहीनः सन्नप्यहं ब्रह्म वा देवो वाऽस्मीत्यसुराः प्रतिपद्यन्त इत्यर्थः।

५ "जन्मादिम्" इति प्र. पाठः। जाये म्रिय इति देहाभेदेन स्वस्यैव जन्यादिं मानुषाः प्रतिपद्यन्ते।

६ "परब्रह्मेति" इति पाठान्तरम्।

७ "रामादिर्लक्षणै—" इति च कोशेषु पाठान्तरम्। "रामादि लक्षणै —" इति प्र. पाठः।

८ "सलक्षणैः" इति प्र. पाठः।

९ "यान्ति तथा" इति प्र. पाठः। यथा ज्ञानात् सुराः परं ब्रह्म यान्ति तथा अन्यथाज्ञानात् आसुरा घोरं तमो यान्ति। अथच आसुरा घोरं तमो यान्ति। सुराः पुनः यथाज्ञानात् यथावस्तु तथा ज्ञानात् परं यान्तीति।

१० "एवमेतन्महाभाग" इति प्र. पाठः।

११ "–प्रभवाऽहन्धीः स्वपरेति" इति च। स्वश्चान्यः परमात्मा चान्य इति स्वपरेतिभिदा।

देहिनामज्ञानप्रभवा यातनाः स्वपरेति भिदा हन्ति—

"देवोऽहं मानुषो वेति विशेषं तत्र चापि तु। तथैव परमात्मानं विशेषं ब्रह्मजीवयोः। सम्यग् भेदेन यः पश्येत् स हन्त्यज्ञानसम्भवाः। यातनाः परमात्मानं तत्प्रसादाच्च गच्छति" इति ब्रह्माण्डे ॥ * ॥

शोकहर्षभयद्वेषलोभमोहमदान्विताः ।
मिथो घ्नन्तो न पश्यन्ति भावैर्भावान् पृथग्दृशः[1] ॥ २७ ॥

"भगवद्दर्शनाद् यस्य विरोधाद् दर्शनं पृथक्[2]। पृथग्दृष्टिः स विज्ञेयो नतु सद्भेददर्शनः" इति भविष्यत्पुराणे[3]। "स्वरूपभेदो हि परजीवयोर्जीवगो मिथः। परस्परेण वस्तूनां विशेषः[4] शास्त्रदर्शितः। सद्भेदोऽयं समुद्दिष्टस्त्वसद्भेदं च मे शृणु। स्वरूपाणां गुणानां च विष्णोर्भेदः परस्परात्। [5]सर्वस्याविष्णुतन्त्रत्वं शत्रुमित्रादिभेदिता। यच्चान्यच्छास्त्रविद्विष्टमसद्भेदः स ईरितः। सद्भेददर्शनान्मोक्षस्त्वसद्भेदात् तमो व्रजेत्। [6]सद्भेदादर्शनाच्चैव तमो मोक्षस्तथेतरात्" इति च ॥ * ॥

इति दशमस्कन्धे पञ्चमोऽध्यायः[7]

---

१ "मिथो घ्नन्तं न पश्यन्ति भावैर्भावं पृथग्दृशः इति प्र. पाठः। शोकादिभिरन्विताः पृथग्दृशः मन्ददृष्टयः। पृथग्जना इतिवत्। कथं मन्ददृष्टयः पृथग्दृश उच्यन्ते? यथार्थदर्शनात् पृथगन्यथा तद्विरोधेन पश्यन्तीति। ते द्वेषादिना निमित्तेन जीवैरेव जीवानेव मिथो हिंसन्तस्तत्त्वं न पश्यन्ति। अथच भावान् जीवान् भावैः "नायं हन्ति न हन्यते" इत्यादिभिस्तद्धर्मैर्न पश्यन्ति। किन्तु हन्ति हत इत्यादिदेहधर्मैः।

२ भगवद्दर्शनाद् यस्य दर्शनं पृथक्, अन्यादृशम्। कुतः? विरोधात्। तथाच अयथावद्दर्शनं पृथग्दृशिः। तद्दर्शिनो विपरीतज्ञाः पृथग्दृशः। नहि सन्तं भेदं यथावत् पश्यन् पृथग्दृष्टिर्भवति।

३ "इति च भविष्यत्पुराणे" इति च क्वचित्। प्र· पाठोऽपि तथा। "इति भविष्यत्पर्वणि" इति क्वचित्।

४ परजीवयोः परमात्मजीवात्मनोः स्वरूपतो भेदः। जीवानां च मिथः स्वरूपभेदः। जडवस्तूनां च परस्परं विशेषः विकारात्मको भेदः। मूलतः सर्वस्यापि प्रकृत्यात्मकत्वात् न जीवपरयोरिव मूलस्वरूपभेद इत्याह।

५ यद्यपि मुद्रितपुस्तकेषु प्राचीनकोशेषु च सर्वत्र "सर्वस्य विष्णुतन्त्रत्वम्" इत्येव पठ्यते। स्फुटं लिपिकृत्प्रमादः। "सर्वस्य विष्णवतन्त्रत्वम्" इति सत्यसन्धीयाभिमतः पाठः। तथाच यत्र क्वचिच्छास्त्रेषु जगत् परमात्मनोऽन्यन्नेत्युच्यते तत्र तदतन्त्रं नेत्येवार्थः। "अथ योऽन्यां देवतामुपास्ते" इत्यादिश्रुतिप्रसिद्धोऽयमसद्भेदः।

६ "सद्भेदादर्शनाच्चैव" इति प्र. पाठः प्रामादिकः। "सम्भेदादर्शनाचैव" इति क्वचित्।

७ श्रीधरस्वाम्यादिरीत्याऽयं चतुर्थोऽध्यायः।

[एकादशोऽध्यायः]

[1]कृष्ण कृष्ण महयोगिंस्त्वमाद्यः पुरुषः परः ।
व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः ॥ ३० ॥

"[2]रूप्यत्वात्तु जगद् रूपं विष्णोः साक्षात् सुखात्मकम् । नित्यपूर्णं[3] समुद्दिष्टं स्वरूपं परमात्मनः" इति वामने[4] ॥ * ॥

त्वमेकः सर्वभूतानां देह आत्मेन्द्रियाश्रयः[5] ।
त्वमेव कालो भगवान् विष्णुरव्यय ईश्वरः ॥ ३१ ॥

देहे ।

"विष्णुः सर्वगुणोद्रेकात् काल इत्यभिधीयते" इति च ॥ * ॥

त्वं महाप्रकृतिः[6] सूक्ष्मा रजःसत्त्वतमोमयी ।
त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ॥ ३२ ॥

"प्रकृत्यादेस्तद्वशत्वात् प्रकृत्यादिरुदीर्यते[7] । यथा राजा भृत्यकृतात् स्वयं कर्तेत्युदीर्यते । '[8]यथा देहं स्वतन्त्रत्वात् स्वयमित्याहुरञ्जसा" इति पाद्मे ॥ * ॥

[9]गृह्यमाणस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः ।

---

१ श्रीधरीयाद्यनुसारेण चायं दशमाध्याय एकोनत्रिंशः श्लोकः ।

२ यथा मुखं पद्मत्वेन रूप्यते तथा भगवानपि विश्वमिति रूप्यते । "इदं हि विश्वं भगवानिवेतरः" इत्युक्तं हि । अथच रूप्यत्वात् प्रतिमात्वेन निरूप्यत्वात् विश्वं विष्णो रूपमित्युच्यते । अथच रूप्यत्वादुत्पाद्यत्वाद् विश्वस्य विश्वं विष्णुरित्युच्यते । यथा "ब्राह्मणोऽस्य मुखमासीत्", "मूर्धैव सुतेजाः", "चरणं क्षितिः" इत्यादि । एतदप्युक्तम्—"यतो जगत्स्थाननिरोधसम्भवः" इति । "यस्य पृथिवी शरीरम्" इत्यादि च ।

३ "नित्यं पूर्णम्" इति क्वचित् ।

४ "इति च वामने" इति क्वचित् ।

५ "देहास्वात्मेन्द्रियाश्रयः" इत्यर्वाचीनाः । आत्मनोऽहङ्कारस्य मनसो वा, जीवस्य वा, सर्वेन्द्रियाणां चाऽश्रयः सन् सर्वभूतानां देहे तिष्ठसि । सर्वान् गुणानात्मनि कलयतीति कालनामकः संस्त्वमेव कालचोदकोऽपि । उक्तं हि—"योऽयं कालस्तस्य तेऽव्यक्तबन्धोश्चेष्टामाहुः" इति । आत्माऽन्तर्यामी इन्द्रियाश्रय इति भिन्ने वा पदे ।

६ "महान् प्रकृतिः" इति पाठान्तरम् ।

७ एतेन कालस्य त्वद्वशत्वात् त्वमेव काल इति पूर्वश्लोकस्य गमनिकान्तरं चोक्तं भवति ।

८ "तथा देहम्" इति प्र. पाठः प्रामादिकः । "यथा देहः" इति क्वचित् । देहस्य स्वतन्त्रत्वात् स्वाधीनत्वात् यथा देहं स्वयमित्याहुः ।

९ "गृह्यमाणैस्त्वमग्राह्यो–" इति प्र. पाठः ।

को न्विहार्हति विज्ञातुं प्राक् सिद्धं गुणसंस्थितेः[1] ॥ ३३ ॥

स्वात्मना गृह्यमाणः ॥ * ॥

तस्मै तुभ्यं भगवते वासुदेवाय वेधसे ।
[2]आत्मद्योतगुणैश्छन्नमहिम्ने ब्रह्मणे नमः ॥ ३४ ॥

यस्यावतारा ज्ञायन्ते शरीरेष्वशरीरिणः ।
तैस्तैरतुल्यातिशयैस्तैर्यग्योनिष्वसङ्गतैः[3] ॥ ३५ ॥

"छन्नोऽन्येषां नतु स्वस्य भगवान् पुरुषोत्तमः । तस्यावतारा देहस्था अदेहस्था इति द्विधा । अन्तर्याम्यादिरूपाणि देहस्थानि विदो विदुः । मत्स्यकूर्मादिरूपाणि न देहस्थानि हृत्पतेः । अन्यातुल्यैरतिशयैर्मनसो नियमादिभिः । ज्ञायन्ते तानि रूपाणि नित्यपूर्णानि सर्वशः" इति महाकौर्मे ॥ * ॥

इति दशमस्कन्ध एकादशोऽध्यायः[4]

---

१ "गुणसंवृतः" इति च । स्वयमेव स्वात्मना गृह्यमाणोऽपि गुणमयप्राकृतविकारोपहितैर्जीवैरग्राह्यः । त्रिगुणसंस्थानरूपाद् ब्रह्माण्डात् प्रागेव सिद्धं ब्रह्माण्डपतितो गुणबद्धः को विज्ञातुमर्हति?

२ आत्मनैव द्योतन्त इति स्वयम्प्रकाशैर्गुणैः स्वरूपभूतैरानन्दादिभिः । अथचाऽऽत्मनः प्रकाशमानैरात्मना गृह्यमाणैः स्वगुणैरन्येषां जीवानां दुर्ग्राह्यमहिम्ने । तदपि कुतः? आत्मना द्योतन्ते प्रकाशन्त इति तादृशैस्त्रिगुणैः स्वाच्छादिकया गुणमय्या प्रकृत्येति यावत् । जीवैरग्राह्यमहिम्ने । तदनेन "गृह्यमाणस्त्वमग्राह्यः" इति पूर्वोक्तं विवृतम् ।

३ "-शयैर्वीर्यैर्देहिष्वसङ्गतैः" इति प्र. पाठः । "-शयैस्तिर्यग्योनिष्वसङ्गतैः" इति पाठान्तरम् । यस्यावतारा अन्तर्यामिरूपाणि शरीरेषु दृश्यन्ते । तथा मत्स्यादयोऽशरीरिणोऽप्यवतारा दृश्यन्ते । नियमनार्थं देहस्थाः शरीरिणः । बहिरवतीर्णा अदेहस्था अशरीरिणो मत्स्यादयः । कथमिमे अवतारा इति ज्ञायन्ते? तैस्तैरतुल्यैर्महिमातिशयैः । इतराशक्यैर्मनसो नियमनादिभिर्देहस्था अवतारा ज्ञायन्ते । वेदमन्दरभूसमुद्धरणादिभिः तिर्यग्योनिजातेष्वसङ्गतैरसम्भावितैर्महिमातिशयैर्मत्स्यकूर्मवराहादयोऽदेहस्था अवतारा ज्ञायन्ते ।

४ श्रीधरीयादिरीत्या चात्र दशमोऽध्यायः ।

[[1]पञ्चदशोऽध्यायः]

अनुग्रहोऽयं भवता कृतो हि[2] नो दण्डोऽसतां ते खलु कल्मषापहः ।
यद् दन्दशूकत्वममुष्य देहिनः क्रोधोऽपि तेऽनुग्रह एव सम्मतः ॥ ३४ ॥

"दण्डोऽपि भगवच्चीर्णो ममैषोऽनुग्रहः कृतः[3] । इति भक्त्या चिन्तयतां शुभकारी भवत्यलम् । तत्रापि कुर्वतां द्वेषं तमःप्राप्त्यै तथा भवेत्" इति च ॥ * ॥

न नाकपृष्ठं नच सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा वाञ्छन्ति यत्पादरजःप्रपन्नाः[4] ॥ ३७ ॥

"अपुनर्भवमात्रात्तु हरिसामीप्यमुत्तमम् । तत्रापि स्पर्शयोग्यत्वं यथा वेदविदो विदुः" इति पाद्मे ॥ * ॥

नमस्तुभ्यं भगवते पुरुषाय महात्मने ।
भूतावासाय भूताय पराय परमात्मने ॥ ३९ ॥

भूताय सर्वदा विद्यमानाय ॥ * ॥

[5]ज्ञानविज्ञाननिधये ब्रह्मणेऽनन्तशक्तये ।
अगुणायाविकाराय नमस्तेऽप्राकृताय च ॥ ४० ॥

अप्राकृताय ॥ * ॥

---

१ इतः पूर्वं वत्साहरणकथावर्णनपरमध्यायत्रयमधिकं केचित् पठन्ति । पूर्वाचार्यैरपरिगृहीतत्वात् तत्प्रक्षिप्तमिति स्फुटम् । सुदर्शनसूरी चाऽह–"पूर्वैः प्रक्षिप्तमध्यायत्रयमन्वर्थमुच्यते" इति । वीरराघवोऽपि–"अध्यायत्रयं प्रक्षिप्तमिति व्यासार्यैरुपेक्षितम्" इत्याह । वल्लभाचार्योऽप्यत्र संवदते- "योजयित्वा त्वाधुनिका अध्यायत्रितयं जगुः । शब्दार्थसङ्गतीनां हि स्पष्टा तत्र विरुद्धता" इत्यादि । तथाच श्रीधरीयादिरीत्या चायं षोडशोऽध्यायः । यद्यपि विजयध्वजीयादिरीत्या प्र. भाष्यपाठानुसारेण चायं चतुर्दशोऽध्यायः। प्राचीनकोशेषु तु सर्वत्रापि पञ्चदशाध्यायत्वेनैव पठ्यते । तेन द्वादशे त्रयोदशे वाऽध्याये मध्ये पुनरध्यायच्छेद आचार्यसम्मत इति ज्ञायते । ततश्चेदानीं चतुर्दशत्वेन पठ्यमानोऽध्यायः पञ्चदशो भवति ।

२ "कृतो हि दण्डो—" इति पाठान्तरम् । भवता कृतोऽयं दण्डोऽनुग्रह एव न दण्डः । यतः पापवशादसाधुभावानां त्वया क्रियमाणो दण्डः पापापहत्वेनोद्धारकृत् । यद् यस्मात् कल्मषादेवामुष्य कालियस्य दन्दशूकत्वं तस्मादस्मिन् क्रोधोऽपि तेऽनुग्रह एव सम्मतः ।

३ "–ग्रहः स्मृतः" इति प्र. पाठः ।

४ तव पादरजःप्रपन्ना नाकपृष्ठादिकमपि तुच्छमिति न वाञ्छन्ति । रसाधिपत्यं भूमेरधस्तनलोकाधिपत्यमिति वदन्ति । हरिसामीप्यस्पर्शनादिरहितमपुनर्भवमात्रं च नेच्छन्ति ।

५ "ज्ञानमनिष्टपरिहारोपयुक्तम् । विज्ञानमिष्टप्रापणोपयुक्तम्" इति भागवतचन्द्रचन्द्रिका । "ज्ञानं शास्त्रीयम् । विज्ञानमनुभवः" इति सुबोधिनी । "सामान्यतः सर्वपदार्थविषयकं ज्ञानम् । अतीतानागतवर्तमानसर्वपदार्थविवे-

[1]कालाय कालनाभाय कालावयवसाक्षिणे ।
विश्वाय तदुपद्रष्टे तत्कर्त्रे विश्वहेतवे ॥ ४१ ॥

कालनाभाय कालाश्रयाय ।

"विश्वस्य तदधीनत्वात् विश्वं विष्णुरुदीर्यते । मूलहेतुत्वतो हेतुः कर्ता प्रातिस्विकं कृतेः" इत्याग्नेये ॥ * ॥

नमो गुणप्रदीपाय गुणात्मस्थोदयाय च[2] ।
[3]गुणप्रत्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ॥ ४६ ॥

गुणप्रदीपाय गुणज्ञापकाय । गुणात्मस्थोदयाय । गुणात्मिका प्रकृतिः, तस्यां स्थित उदयस्वरूपो हरिः ॥ * ॥

परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः ।
अविश्वाय च विश्वाय तद्द्रष्ट्रे तस्य हेतवे[4] ॥ ४८ ॥

अविश्वाय जीवेभ्योऽन्यस्मै ।

"शरीरेषु प्रविष्टत्वाद् विश्वो जीव उदीर्यते । जीवस्य तदधीनत्वाद् विश्वो विष्णुरिति स्मृतः । तस्योत्पत्त्यादिहेतुत्वाद् विश्वहेतुश्च कीर्त्यते[5]" इति माहात्म्ये[6] ॥ * ॥

कलक्षणं विविधं ज्ञानं विज्ञानम्" इति सिद्धान्तप्रदीपः । "ज्ञानविज्ञानशब्दौ धर्मधर्मिविषयौ" इति शुकपक्षीयम् ।

१ कालाय पूर्णगुणाय । कालस्य नाभिराश्रयः । नाभिरेव नाभः । तस्मै । तृतीयोऽतिशये । कालावयवानां सृष्ट्यादिक्षणानां साक्षिणे । स्वाधीनविश्वाय । विश्वस्य उपद्रष्ट्रेऽध्यक्षाय । "सर्वेषामुपरो द्रष्टा यदुपद्रष्टृनामकः" इत्यन्यत्र । विश्वस्य हेतवे मूलकारणाय, तस्य प्रातिस्विकं कर्त्रे च ।

२ "गुणात्मच्छादनाय च" इत्यर्वाचीनाः ।

३ "गुणवृत्त्युपलक्ष्याय" इति च । गुणान् भक्त्यादीन् प्रकाशयति तेन चाऽत्मनो ज्ञानानन्दादीन् गुणान् प्रदीपयति ज्ञापयतीति गुणप्रदीपः । त्रिगुणात्मनि प्रकृतौ तिष्ठन् प्राकृतेषु च पदार्थेषु सृष्टेषु तदन्तर्नियामकतया तत्तदाकारेण उदयते आविर्भवतीति तादृशः । गुणैः इन्द्रियैः तद्ग्राह्यैः शब्दादिभिर्वा तन्नियामकतयाऽनुमेयाय हृषीकेशाय । किन्तर्हीन्द्रियभोगबद्धः? न, केवलं तद्द्रष्ट्रे साक्षिणे । भक्तानां भक्त्यादिगुणद्रष्ट्रे । स्वगुणानां स्वयमेव द्रष्ट्रे । अत एव स्वयम्प्रकाशाय ।

४ "तद्द्रष्ट्रेऽस्य न हेतवे" इति प्र. पाठः । परावरगतिज्ञाय उत्तमानामधमानां च स्वस्वयोग्यगतिविदे । सात्विकानां मोचकाय, राजसानां संसारप्रदाय, तामसानां तमःप्रदाय च । अत एव सर्वफलाध्यक्षाय सर्वस्वामिने । विशति शरीरमिति विश्वो जीवः । तद्भिन्नाय अविश्वाय । अथच जीवनियमनाय स्वयमपि तदन्तर्विशतीति विश्वः जीवनियामकः । तद्द्रष्ट्रे जीवसाक्षिणे । जीवस्य शरीरोत्पत्त्यादिहेतवे च ।

५ "कीर्तितः" इति पाठान्तरम् । ६ "इति मात्स्ये" इति प्र. पाठः ।

त्वं ह्यस्य जन्मस्थितिसंयमान् विभो[1] गुणैरनीहोऽकृत कालशक्तिधृक् ।
तस्मात् स्वभावात् प्रतिबोधयस्व नः[2] समीक्षयाऽमोघविहार ईयसे[3] ॥ ४९ ॥

[4] "हरेः स्वरूपशक्तिर्या[5] कालशक्तिरुदीर्यते । सदा सर्वगुणात्मत्वाद् दुर्गा वाऽप्यवरा[6] ततः । सर्वसंहारकारित्वाद् वायुः सर्वस्य जीवनात् । कालाभिमानिनौ त्वेतौ[7] दुर्गा वायुश्च कीर्तितौ" इति प्रकाशिकायाम्[8] ॥ * ॥

तस्यैव तेऽमूस्तनवस्त्रिलोक्यां शान्ता अशान्ता उत मूढयोनयः ।
शान्ताः प्रियास्ते ह्यधुनाऽवितुः सतां[9] स्थातुश्च ते कर्मपरीप्सयेहतः[10] ॥ ५० ॥

---

१ "प्रभो" इति प्र. पाठः ।

२ "तत्तत्स्वभावान् प्रतिबोधयन् सतः समीक्षया" इति प्र. पाठः ।

३ "ईहसे" इति श्रीधरीयादिसर्वव्याख्यातृसम्मतो विजयध्वजीयाद्यभिमतश्च पाठः । अयं पद्यार्थः—अनीहोऽकर्मापि जन्मस्थितिसंयमान् त्वमकृत अकृथा इति विरोधमाभासयति । अक्लिष्टकारित्वादनीहः । अथापि सर्वकर्ता । वल्लभाचार्योऽप्याह—"अनेन 'अकलितश्रम एव सृजत्यसौ' इति वचनार्थोऽभिप्रेतः" इति । "विदितोऽसि भवान्" इतिवत् त्वमकृतेति च महतां प्रयोगो भवति । कीदृशस्त्वम्? कालशक्तिधृक् । गुणपूर्णत्वात् कालशब्दितां स्वरूपशक्तिं धत्त इति । अथच कालाभिमानिनीं संहारकत्वाच्च कालशक्तिपदगदितां दुर्गां संहारार्थं धत्ते । तद्द्वारा संहारकृदिति यावत् । पुनश्च कालाभिमानिनं जीवनं कलयतीति च कालशक्तिनामानं वायुं पालनार्थं धत्ते । तद्द्वारा जीवनप्रदः । यस्मादनीहः सर्वं करोषि तस्मादस्मान् दन्दशूकजन्मनि निमग्नान् अस्मात् तिर्यक्स्वभावात् प्रतिबोधयस्व । समुद्धरेति यावत् । ननु मया प्रतिबोधिता अपि न चेत् प्रतिबुध्यध्वे वृथा मम प्रयास एव स्यात् । न स्यादेवेत्याहुः—समीक्षया । शास्त्रपर्यालोचनया त्वममोघविहारो हि ज्ञायसे । नह्येतादृशस्य तवास्मदुद्धरणेच्छा मोघा भवितुमर्हति ।

४ इतः पूर्वम् "अकृतकालशक्तिधृक्, अकृतं वराद्यनिर्मितं स्वरूपमिति यावत्" इत्येकं वाक्यमधिकं प्रबोधिन्यां सत्यसन्धीये च । सर्वथा प्रक्षिप्तमेतत् । प्राचीनकोशेषु क्वाप्यदर्शनात् । अकृतमिति नपुंसकपदस्योत्तरत्रान्वयाभावात् । द्वितीयान्तमित्यपि नातिस्वरसम् । यच्च प्रबोधिन्यां मूले कृतकालशक्तिधृगिति पदच्छेदभ्रान्तिवारणायेदं तात्पर्यवाक्यं प्रवृत्तमित्यवतारितं सैव महती भ्रान्तिः । नहि "गुणैरनीहोऽकृतकालशक्तिधृक्" इति मूले 'कृतकालशक्तिधृक्' इति च्छेदः शक्यसम्भावनः ।

५ "—शक्तिस्तु" इति क्वचित् ।

६ "दुर्गा चाप्यवरा" इति क्वचित् । "दुर्गा वाऽप्यपरा" इति च । मुख्या कालशक्तिर्हरेः स्वरूपशक्तिरेव । ततोऽवराऽमुख्या कालशक्तिर्दुर्गा वायुश्च ।

७ "—मानिनावेतौ" इति प्र. पाठः । अभिमानिनी च अभिमानी चाभिमानिनौ ।

८ "प्रकाशसंहितायाम्" इति प्र. पाठः ।

९ "—वितुं सताम्" इति प्र. पाठः ।

१० "धर्मपरीप्सयेहतः" इति च । शान्ताः सात्विका देवाः, अशान्ता राजसा मानुषाः, मूढयोनयस्तामसा असुरा इत्येते त्रिविधास्तव तनवः प्रतिमास्थानीयाः । सन्निधानस्थानानीति यावत् । तत्रापि शान्ता देवा एव ते विशेषतः प्रियाः । लोकक्षयार्थं प्रवृत्तस्य लोकक्षयसहकारित्वादसुरा अपि किञ्चिदिवान्ततः प्रिया भवन्ति ।

"अन्तःप्रियं बहिश्चेति[1] द्विधा प्रियमुदाहृतम् । अन्तःप्रिया हरेः सन्तः सर्वे चापि बहिःप्रियम्[2] । असन्तश्चापि संहार ईषदन्तःप्रिया इव । तदपेक्षया तथा सन्तो विशेषान्तःप्रियाः स्थितौ[3]" इति षाड्गुण्ये । "[4]सुखान्तं प्राप्नुयुर्यस्माद् देवाः शान्ता उदीरिताः[5] । अशान्ता मानुषाः प्रोक्ता विमूढा [6]असुरा मताः" इति प्रकाशिकायाम्[7] ।

कर्मपरीप्सया कर्मप्रवर्तनार्थं सर्वशरीरेषु स्थातुः । ईहतः[8] प्राणस्य सकाशात् । प्राणसकाशाद्धि कर्मप्रवर्तनमिच्छति भगवान् ।

"वायोः सकाशाज्जगतः प्रवृत्तिं कामयत्यजः[9] । प्राणप्राणमतः प्राहुर्विष्णुं वायोरपि प्रभुम्" इति च ॥ * ॥

त्वया सृष्टमिदं विश्वं धातुर्गुणविसर्जनम्[10] ।
नानास्वभाववीर्योजो[11]योनिबीजाशयाकृति[12] ॥ ५७ ॥

धातुर्गुणविसर्जनम् । हिरण्यगर्भसकाशाद् गुणभूता सृष्टिरस्य जगतः । प्राधान्येन विष्णोरेव ।

अत आहुः—अधुनेति । अधुना तु न लोकरक्षार्थं प्रवृत्तो भवान् । किन्तु सतामवितुः सतां रक्षणार्थं प्रवृत्तस्य शान्ता देवा एव प्रिया इति । न केवलं बहिः कृष्णरूपेणावितुः, किन्तु शरीरान्तःस्थितप्राणद्वारा सत्कर्मप्रेरणया चेत्याहुः—स्थातुश्च । ते तव त्वदीयस्य, कर्मपरीप्सया कर्मप्रवर्तनेच्छया, कर्मप्रवर्तनार्थमिति यावत्, सर्वशरीरेषु स्थातुः, स्थित्वा च सत्कर्माणि ईहतः प्रवर्तयतः प्राणस्य सकाशात्, तद्द्वारा च सतामवितुः । ईहधातोरनधातोश्च चेष्टारूपैकार्थत्वेन ईहमानः प्राण उच्यते । ईहतः प्राणस्य सकाशात् कर्मप्रवर्तनार्थं तेन सह सर्वशरीरेषु स्थातुः ते तवेति वा ।

१ बहिश्चेति बहिःप्रियं चेति हरेः द्विधा प्रियमुदाहृतम् ।
२ "सर्वं चापि हरेः प्रियम्" इति प्र. पाठः प्रामादिकः ।
३ "स्थिताः" इति प्र. पाठः ।
४ "सुखस्यान्तं परां काष्ठाम् । सापेक्षमेतत् । मनुष्याद्यपेक्षयाऽतिशयसुखमिति यावत् ।
५ "उदाहृताः" इति प्र. पाठः, "इतीरिताः" इति क्वचित् ।
६ "आसुरा–" इति प्र. पाठः ।
७ "प्रकाशसंहितायाम्" इति च ।
८ "स्थातुमीहतः"(?) इति क्वचित् ।
९ "कारयत्यजः" इति प्र. पाठः ।
१० "धातर्गुणविसर्जनम्" इति प्र. पाठः ।
११ "—वीर्यौजो—" इति च ।
१२ धातुश्चतुर्मुखाद् गुणभूतं सर्जनमस्य जगतः । मुख्यतस्तु त्वया सृष्टमिदं विश्वम् । कीदृशम्? स्वभावः प्रकृतिधर्मः, वीर्यं बलम्, ओजः प्रवृत्तिसामर्थ्यं प्रतिरोधशक्तिर्वा, योनिरुत्पत्तिक्षेत्रम्, बीजं कारणम्, आशयः संस्कारः, आकृतिः संस्थानमित्येतत् सर्वं नानाविधं यस्य तादृशम् ।

67

"विष्णुः प्रधानतः[1] स्रष्टा गुणस्रष्टा चतुर्मुखः" इति नारदीये ॥ * ॥

इति दशमस्कन्धे पञ्चदशोऽध्यायः[2]

[षोडशोऽध्यायः]

मीनान् सुदुःखितान् दृष्ट्वा दीनान् मीनपतौ हते[3] ।
कृपया सौभरिः प्राह तत्र तत्क्षेममाचरन्[4] ॥ १० ॥

अत्र प्रविश्य गरुडो यदि मत्स्यान् स खादति ।
सद्यः प्राणैर्वियुज्येत सत्यमेतद् ब्रवीम्यहम्[5] ॥ ११ ॥

"[6]विष्णुना विष्णुभक्तैश्च ब्रह्मशापोऽनुवर्त्यते । ब्राह्मणानामपीडार्थे बलिभिः क्षत्रियादिभिः । विष्णोश्च विष्णुभक्तानां शापाद् व्यैति तपोऽखिलम्[7] । अथापि[8] चासुरावेशाच्छप्येयुर्हरिमप्यहो । अतस्तु सौभरेः शापं नात्यवर्तत् खगेश्वरः । अन्यथा तूत्तमानां हि नाधमैः शाप इष्यते । वरोऽपि दत्तस्त्वधिकैर्नाधमाधिक्यकारणम् । विष्णोरपि वरस्तस्मान्नाऽधिक्यं सम्प्रयच्छति । क्रमशः श्रीविरिञ्चादेः कथञ्चित् केन-

---

१ "प्राधान्यतः" इति क्वचित् ।

२ श्रीधरस्वाम्यादिरीत्या चायं षोडशोऽध्यायः । विजयध्वजीयादिरीत्या प्र. भाष्यपाठरीत्या च चतुर्दशः ।

३ "हृते" इति पाठान्तरं क्वचित् ।

४ "तत्रत्यक्षेममाचरन्" इति प्र. पाठः । तत्र ह्रदे स्थितानां तेषां हतावशिष्टानां क्षेममाचरन् ।

५ मत्स्यखादनं जले प्रवेशश्चेत्युभयमपि शापतो वारितम् । तेन कालियखादनार्थमपि न जले प्रवेशसम्भव इत्यर्थः । मत्स्यानिति जलचरसामान्योपलक्षणं वा ।

६ नन्ववरस्य शापं किमिति गरुडोऽन्वर्तत? समर्थोऽपि किमिति नोल्लङ्घे ? आह—विष्णुना विष्णुभक्तैश्च । वीरराघवोऽप्याह—"ब्राह्मणवाक्यस्य माननीयत्वात् परमपुरुषेणेव गरुत्मता तत्प्रतिघातशक्तिमताऽपि तस्यानुरोध उपपद्यते" इति ।

७ "शापाद् यान्ति तमोऽखिलम्—" इति प्र. पाठः प्रामादिकः । जीवगोस्वामी चाऽह वैष्णवतोषिण्याम्—"एतेनैव किल श्रीवैष्णवापराधेन तस्य तपोभङ्गादिपरमानर्थः फलितः" इत्यादि ।

८ "तथाऽपि" इति प्र. पाठः ।

चित् क्वचित्। नच दद्याद्धरिस्तादृग् 'दत्तं वा बाह्यमेव तु" इति ब्रह्माण्डे ॥ * ॥

इति दशमस्कन्धे षोडशोऽध्यायः[2]

[सप्तदशोऽध्यायः]

उवाह कृष्णो भगवान् श्रीदामानं पराजितः ।
वृषभं भद्रसेनस्तु प्रलम्बो रोहिणीसुतम् ॥ २४ ॥

श्रीदामा कृष्णमुवाह । हरिवंशादिवचनात्[3] ।

"बहुमानविरोधे तु व्यत्यासः शब्दतोऽर्थतः । कार्योऽनिरुक्तदेवानां गुणसिद्ध्यै नचान्यथा । विष्णुर्ब्रह्मा तथा वायुरनिरुक्ताः प्रकीर्तिताः । तत्पत्न्यश्चेतरगुणा [4]व्यत्यस्यास्तेष्वसंशयः" इति ब्रह्मतर्के ॥ * ॥

[इति दशमस्कन्धे सप्तदशोऽध्यायः[5]]

[एकोनविंशोऽध्यायः]

गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधारसनाग्र्यगेयम्[6] ।
भुङ्क्ते स्वयं यदवशिष्टरसौघमार्गैर्[7]हृष्यत्त्वचोऽश्रु मुमुचुस्तरवः सदर्भाः[8] ॥ १० ॥

---

१ तादृगाधिक्यादिरूपं किञ्चिदभीष्टं न दद्यादेव । यत्रक्वचिद् दत्तं दृश्यते तदपि बाह्यमावेशादिनिमित्तं न स्वरूपभूतमिति । "तादृग् दद्याद्वा" इति प्र. पाठः ।

२ श्रीधरीयादिरीत्याऽत्र सप्तदशोऽध्यायः । विजयध्वजीयादिरीत्या प्र. भाष्यपाठरीत्या च पञ्चदशोऽध्यायः ।

३ आदिपदेन विष्णुपुराणादि । तथाहि विष्णुपुराणे श्रूयते—"श्रीदामानं ततः कृष्णः प्रलम्बं रोहिणीसुतः । जितवान् कृष्णपक्षीयैर्गोपैरन्ये पराजिताः" (५-९-१४) इति ।

४ "व्यत्यास्या—" इति क्वचित् । इतरत्र श्रीदामादिषु प्रतीता गुणास्तेषु कृष्णादिषु व्यत्यस्य निरूपणीयाः ।

५ श्रीधरीयादिरीत्या चायमष्टादशोऽध्यायः । विजयध्वजीयादिरीत्या प्र. भाष्यपाठरीत्या च षोडशः । प्राचीनकोशेषु त्वत्राध्यायसमाप्तिर्न पठ्यते ।

६ "—सुधामपि गोपिकानाम्" इति प्र. पाठः । "—सुधासरसाग्र्यगेयम्" इति च पाठान्तरं विजयध्वजीयादिसम्मतम् ।

७ "मार्गे हृष्टत्वचो—" इति च विजयध्वजीयाद्यभिमतं पाठान्तरम् ।

८ "यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथाऽऽर्याः" इति प्र. पाठः । वेणुरयं किं कतमत् पुण्यमाचरत्? येन दामोदराधरस्य सुधामधुरेण रसनेन, रसनं रसः स्वाद इति यावत्, स्वादेन अग्र्यं पुनरा-

"[1]श्रीर्देवी विष्णुमाश्रित्य[2] रेमे कृष्णमुखाम्बुजे । पपौ च तद्गतं गीतं सुरा इतरभाण्डगाः[3]" इति तन्त्रभागवते ॥ * ॥

[इति दशमस्कन्ध एकोनविंशोऽध्यायः[4]]

[द्वाविंशोऽध्यायः]

कर्मणा जायते जन्तुः कर्मणैव प्रमीयते[5] ।
सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते ॥ १३ ॥

अस्ति चेदीश्वरः कश्चित् फलरूपः स कर्मणः[6] ।
कर्तारं भजते सोऽपि नह्यकर्तुः प्रभुर्हि सः ॥ १४ ॥

फलरूपः स कर्मण इत्याद्यवान्तरेश्वरविषयम्[7] ॥ * ॥

ह्रितमाधुर्यातिशयं गेयं गीतं स्वयमेव भुङ्क्ते आस्वादयति । येन वेणुना भुक्तावशिष्टो रसः यत्र तादृशैरोघमार्गैः । ओघशब्दः सङ्गीतशास्त्रे द्रुतगीते वर्तते । उपलक्षणमेतत् । अङ्गुलीसञ्चारेण विरच्यमानैः द्रुतविलम्बादिमार्गभेदै गीतिरीतिभेदैः । उक्तं हि—"चारुणा वेणुना गीयमानं मार्गसञ्चारलोलाङ्गुलीकम्" इति । तादृशगीतिश्रवणजनितहर्षभरेणेति यावत्, स्थावरास्तरवोऽपि सदर्भाः उद्गतदर्भाङ्कुराख्यरोममिषेण हृष्यत्त्वचः, मकरन्दमोकमिषेणाश्रूणि च मुमुचुः । किमुत जङ्गमाः?

१ "श्रीदेवी" इति पाठान्तरम् । प्र. पाठोऽपि तथा । ननु वेणुना गीतमितरैरास्वाद्यते । तत्र तु किमिदमसङ्गतमुच्यते गीतरसं वेणुरेव भुङ्क्ते, तदवशिष्टमन्ये भुञ्जत इति? आह—श्रीर्देवी । श्रीरेव वेणुरूपेण कृष्णहस्ते विहरति, तद्गीतं च स्वयमेव स्वदत इति सर्वमुपपन्नम् । तथाच न केवलमियमालङ्कारिकी वचोभङ्गी । आध्यात्मिकश्चार्थविशेषो विवक्षित इति ।

२ "वेणुमाश्रित्य" इति क्वचित् ।

३ इतरेषु भाण्डेषु कौस्तुभादिभूषणेषु ब्रह्मादिसुराः स्थिताः । "भाण्डं भूषाश्वभूषयोः" इत्यभिधानम् । भाण्डमिति पात्रं वा । स्वसन्निधानपात्रेषु तरुषु स्थित्वा देवास्तद्गीतरसमास्वाद्य हृष्यत्त्वचोऽश्रु मुमुचुरिति वा ।

४ प्राचीनकोशेषु चात्राध्यायपूर्तिर्न पठ्यते । श्रीधरीयादिरीत्या चायमेकत्रिंशोऽध्यायः । प्राचीनपाठरीत्या चायं कतमोऽध्याय इति न स्फुटम् । इदं सम्भाव्यते—विजयध्वजीये यः सप्तदशो यश्चाष्टादशोऽध्यायस्तौ द्वावाहृत्य प्राचीनपाठरीत्यैकोऽध्यायोऽष्टादशः । ततश्चायमेकोनविंश इति । नो चेदयं विंशोऽध्यायः ।

५ "विलीयते" इति प्र. पाठः ।

६ "फलरूप्यन्यकर्मणाम्" इत्यर्वाचीनाः । अस्ति चेदीश्वरः कश्चिदिन्द्रादिः सोऽपि कर्मणः मुख्यतः कर्मनियामकस्य भगवतः फलरूपः । भगवदधीनतया स्थितः । भगवदाज्ञयैव फलदानादिसमर्थः । अतः स कर्तारं भजते । कर्मनियन्ता भगवान् कर्म कारयति चेत् तदा फलदानाय प्रवर्तेत । अन्यथा का शक्तिस्तस्य । यतः कर्मनियन्ता भगवतैव जायते प्रमीयते च जन्तुः । सर्वं च तत्कृतमेव । नान्यस्य प्रभुत्वं नाम किञ्चिदस्ति ।

७ "इत्यवान्तरेश्वरविषयम्" इति क्वचित् ।

[1]किमिन्द्रेणेह भूतानां स्वस्वकर्मानुवर्तिनाम् ।
अनीशेनान्यथाकर्तुं स्वभावविहितं नृणाम् ॥ १५ ॥

[2]स्वभावतन्त्रो हि जनः स्वभावमनुवर्तते ।
स्वभावस्थमिदं सर्वं सदेवासुरमानुषम् ॥ १६ ॥

देहानुच्चावचान् जन्तुः प्राप्योत्सृजति कर्मणा ।
शत्रुर्मित्रमुदासीनः कर्मैव गुरुरीश्वरः[3] ॥ १७ ॥

[4]तस्मात् सम्पूजयेत् कर्म स्वभावस्थः स्वकर्मकृत् ।
अञ्जसा येन वर्तेत तदेवास्य हि दैवतम् ॥ १८ ॥

[5]सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः ।
रजसोत्पद्यते विश्वमन्योन्यं विविधं जगत् ॥ २१ ॥

[6]रजसा चोदिता मेघा वर्षन्त्यम्बूनि सर्वतः ।
प्रजास्तैरेव सिद्ध्यन्ति किं महेन्द्रः करिष्यति[7] ॥ २२ ॥

[8]तस्माद् गवां ब्राह्मणानामद्रेश्चाऽरभ्यतां मखः ।
य इन्द्रयागसम्भारस्तैरयं साध्यतां मखः ॥ २५ ॥

---

१ एतदेवोत्तरश्लोकेन स्फुटमाह—किमिन्द्रेण अवान्तरेश्वरेण । यतः स्वस्वकर्मनियन्तारं सर्वे भगवन्तमेवानुवर्तन्ते । स्वभावविहितं नृणामिति च नियन्तृवचनम् । तत्तत्स्वभावनियन्ता भगवान् यद् विधत्ते तज्जीवः करोति । नहि तदन्यथयितुमिन्द्रोऽपीष्टे ।

२ अतः सर्वं स्वभावनियामकत्वात् स्वभावनाम्नो भगवतोऽधीनम् । तदाश्रयेण स्थितं सत् तत्प्रेरणानुकूलं प्रवर्तते ।

३ तस्मात् कर्मनियन्ता कर्मस्थो भगवानेवेश्वरः । नेन्द्रादिः । अशुभकर्मकर्तुस्तामसस्य स एव शत्रुरिव । शुभकर्मकर्तुः सात्त्विकस्य स एव मित्रमिव । उभयमिश्रस्य राजसस्य मानुषस्य स एवोदासीन इव । तत्तत्कर्मस्वभावानुगुणमेव स शत्र्वादिरिव भवति । न स्वत इति यावत् ।

४ तस्मात् स्वभावनियामके भगवति स्थितिं कुर्वन् स्वस्वभावमनुवर्तमानः स्वोचितमेव कर्म कुर्वन् कर्मप्रवर्तको भगवानिति तमेव पूजयेत् ।

५ सत्त्वं रजस्तम इति भगवत एव त्रीणि रूपाणि स्थित्युत्पत्त्यन्तहेतवः । सत्त्वस्थः सत्त्वनामा । रजस्थो रजोनामा । तमस्थस्तमोनामेति ।

६ अतस्तेनैव स्थितिहेतुना रजोनामकेन भगवता मेघा वर्षन्ति । नेन्द्रेण । ततः सत्त्वादिमूर्त्या भगवतैव सर्वसिद्धौ किमिन्द्रेणान्येनावान्तरेश्वरेण वा कृत्यम्?

७ "महेन्द्रः किं करिष्यति" इति पाठान्तरम् ।

८ तस्माद् गोब्राह्मणगिर्यादिषु स्थितः गोब्राह्मणगिर्यादिनामा भगवानेवेज्यताम् ।

एतन्मम मतं तात क्रियतां यदि रोचते ।
[1]अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः ॥ ३० ॥

"स्वभावे कर्मणि च यः सत्वादिषु गुणेषु च । स्थितो विष्णुः सर्वकर्ता पृथक्संस्थश्च सर्वगः[2] । गुणकर्मस्वभावादिशब्दवाच्यश्च केशवः । [3]तेन जातं फलं यस्मात् कर्मणः फलमीर्यते । [4]तेनासौ कर्मफलवान्[5] नास्य किञ्चिन्न शक्यते । [6]तदन्यावान्तरेशानां तद्वशत्वं यतः सदा । कर्मणः फलरूपत्वमतस्तेषामुदीर्यते । नान्यकर्मवशत्वं तु तेषां विष्णुं विना क्वचित् । स च [7]ब्राह्मणगिर्यादिनामा विष्णुरजः परः । एतस्मात् कारणात् कृष्णः शक्रस्य विमदाय तु । गिर्यादिस्थितमात्मानं पूजयामास वल्लवैः[8] । [9]अत्यल्पस्त्वसुरावेशो देवानां च भविष्यति । प्राणमेकं विनाऽसौ हि [10]"स्वाखणा-

---

१ गोब्राह्मणाद्रीणां मखो मह्यं दयितः । यतस्तेषु स्थित्वा तन्नामाऽहमेव तेन मखेन पूज्ये । अतस्तेषामपि दयितः । यतो मयि पूजिते सर्वेऽपि पूजिताः स्युः । मयि प्रसन्ने च प्रसन्नाः ।

२ इतः परम् "इति" इति प्रतीकसमाप्तिः क्वचित् प्राचीनकोशे पठ्यते ।

३ यस्मात् कर्मणः फलं तेन जातं तेन कर्मफलजमकत्वेन हेतुनाऽसौ कर्मफलमित्यप्युच्यते । तेनैव चाऽसौ कर्मफलवांश्चोच्यते क्वचिच्छास्त्रेषु कर्मफलस्वामित्वात् । न कर्मफलबद्धत्वात् ।

४ "नचासौ कर्मफलवान्" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

५ "कर्मफलभाक्" इति क्वचित् ।

६ यद्यपि कर्मफलस्वामित्वाद् भगवान् कर्मणः फलमित्युच्यते । अथापि प्रकृते "फलरूपः स कर्मणः" इति न भगवद्वचनम् । किन्त्ववान्तरेश्वरवचनमिति स्वोक्तमर्थं प्रमाणतोऽप्यवगमयति—तदन्यावान्तरेशानाम् । यथा कर्मफलं कर्माधीनं तथा कर्मप्रवर्तकभगवदधीनत्वाद्देवा अपि कर्मफलरूपा उच्यन्ते । तदिदं नेतरकर्माधीनत्वात् । किन्तु कर्माख्यभगवदधीनत्वादेव ।

७ यथा गुणकर्मस्वभावादिशब्दवाच्यस्तथा ब्राह्मणेषु गिर्यादिषु च स्थित्वा ब्राह्मणगिर्यादिनामा ।

८ "बल्लवैः" इति प्र. पाठः ।

९ ननु तर्हि जातापरोक्ष इन्द्रः कथं कृष्णाभिप्रायमतत्वाभिज्ञ इव विरुरोध? आह—अत्यल्पस्त्वसुरावेशः । एतेन "इन्द्रस्तदाऽऽत्मनः पूजां विज्ञाय विहतां नृप । गोपेभ्यः कृष्णनाथेभ्यो नन्दादिभ्यश्चुकोप ह" (१०-२६-१) इत्युत्तराध्यायवचनं च विवृताभिप्रायम् । वस्तुतस्तु प्राचीनपाठरीत्याऽयमपि श्लोको द्वाविंशाध्यायगत एवेति भाति । ततश्च विजयध्वजीयादिरीत्या यस्त्रयोदशोऽध्यायस्तदन्तं यावद्, द्वाविंशश्चेत्यध्यायद्वयमाहत्य प्राचीनपाठे द्वाविंशोऽध्याय इति सम्भाव्यते । अत एवोत्तरत्र पञ्चविंशोऽध्यायः प्राचीनकोशेषु चतुर्विंशाध्यायत्वेन पठ्यते ।

१० "स्वाखणाश्मसमः" इति प्र. पाठः । तथाहि तलवकारब्राह्मणम्—"स यथाऽश्मानमृत्वा विध्वंसेतैवमेवासुरा व्यध्वंसत । स एषोऽश्माऽऽखणो यत्प्राणः" इति । "स एषोऽश्माखणः" इति छान्दोग्ये । न खन्यते न भिद्यत इत्यखणः । अखण एवाऽखणः । अभेद्यः ।

श्मलमः स्मृतः। तस्मिन्नप्यसुरावेशो गते प्रकृतिरेव तु" इति भागवततन्त्रे[1] ॥ * ॥

इति दशमस्कन्धे द्वाविंशोऽध्यायः[2]

[चतुर्विंशोऽध्यायः]

[3]विशुद्धसत्त्वं तव धाम शान्तं तपोमयं ध्वस्तरजस्तमस्कम् ।
मायामयोऽयं गुणसम्प्रवाहो न विद्यते तेऽग्रहणानुबन्धः ॥ ४ ॥

विशुद्धसत्त्वं विगतशुद्धसत्त्वम् । यस्मात् त्रिगुणसम्बन्धस्त्वयि न विद्यते । यत्राग्रहणमनुबद्धम्[4] । तपोमयं ज्ञानात्मकम्[5] ॥ * ॥

कुतो नु तद्धेतव ईश मन्यु[6]लोभादयो येऽबुधलिङ्गभावाः ।
[7]अथापि दण्डं भगवान् बिभर्ति धर्मस्य गुप्त्यै खलनिग्रहाय ॥ ५ ॥

पुनर्गुणसम्प्रवाहस्य कारणत्वात् तद्धेतवः ॥ * ॥

---

१ प्र. पाठे तु "इति च" इतीयदेव पठ्यते । "भागवततन्त्रे" इति न पठ्यते ।

२ श्रीधरीयादिरीत्या चायं चतुर्विंशोऽध्यायः ।

३ शुद्धं रजस्तमोभ्यामस्पृष्टं केवलं सत्त्वमपि यत्र नास्ति तद् विशुद्धसत्त्वं तव स्वरूपम् । वल्लभाचार्योऽप्याह —"विशेषेण सत्त्वेनाप्यसम्पृक्तम्" इति । "विशुद्धसत्त्वमप्राकृतं चिदानन्दमयम्" इति विश्वनाथचक्रवर्ती । "सत्त्वादयो न सन्तीशे" इति विष्णुपुराणे । शान्तं सुखपूर्णम् । तपोमयं ज्ञानपूर्णम् । ज्ञानानन्दमयमित्येतत् । स्वभक्तस्यापि रजस्तमसी ध्वस्ते येन तादृशम् । स्वरूपे रजस्तमोविरहस्य विशुद्धसत्त्वमिति गदितप्रायत्वात् । यतोऽयं मायारचितो गुणबन्धः त्रिगुणपरम्पराप्रवाहरूपस्तव न विद्यते । मायेश्वरे त्वयि न युज्यते । यतोऽयं बन्धः अग्रहणमज्ञानमनुबध्नातीति तादृशः । त्वयि तपोमये कथमज्ञानम्?

४ "-मनुबन्धः" इति प्र. पाठः । ५ "यस्य ज्ञानमयं तपः" इति श्रुतेः ।

६ "ईश तत्कृता लोभादयो—" इति प्र. पाठः । अबुधलिङ्गभावाः अज्ञानिनां लिङ्गानि भवन्तीति लिङ्गभावाः । लिङ्गभूता इति यावत् । क्रोधलोभादयस्तव कुतः? कीदृशाः? तद्धेतवः । तस्य गुणसम्प्रवाहस्य हेतवः । गुणबन्धेन क्रोधलोभादिकम् । पुनश्च क्रोधादिना दोषेण गुणबन्धरूपः संसार इति तद्धेतुत्वं तस्य । अथापि क्रोधाद्यभावेऽपि भवान् दण्डं बिभर्ति । कुतः? धर्मस्य गुप्त्यै । खलनिग्रहोऽपि धर्मस्य गुप्त्यै ।

७ "तथाऽपि" इति प्र. पाठः ।

[1]ये मद्विधाः स्युर्जगदीशमानिनस्त्वां वीक्ष्य कालेऽभयमाशु तं मदम्[2] ।
हित्वाऽऽर्यमार्गं प्रभजन्त्यपस्मया ईहा खलानामपि तेऽनुशासनम्[3] ॥७॥

"[4]असतां च सतां चैव हरिरेवानुशासकः । सतां तु श्रेयसे सैव ह्यनुशास्तिर्भविष्यति । असतां विपरीताय लङ्घयित्वाऽनुशासनम्" इत्याग्नेये ॥ * ॥

स्वच्छन्दोपात्तदेहाय विशुद्धज्ञानमूर्तये ।
[5]सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः॥ ११ ॥

"[6]आवेशो वसुदेवादौ देहादानं हरेः स्मृतम् । देहादानं तदन्येषां जन्मेति कवयो विदुः । तथाऽप्यसुरमोहाय ग्रन्थेषु बहुधेव तु[7]" इति पाद्मे ॥ * ॥

इति दशमस्कन्धे चतुर्विंशोऽध्यायः[8]

[षड्विंशोऽध्यायः]

तमेव परमात्मानं जारबुद्ध्याऽपि सङ्गताः ।
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥ ११ ॥

राजा ॥ कृष्णं विदुः परं कान्तं नतु ब्रह्मतया मुने ।
गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥ १२ ॥

---

१ "ये मद्विधाज्ञा जगदीश—" इति च । २ "तन्मदम्" इति च ।

३ ये मद्विधा वयमेव जगतामीश्महे इति दुरभिमानिनः । जगदीशेति सम्बोधनं वा । उद्धारकाले प्राप्ते त्वामभयमीक्ष्य तं मदं हित्वा अपगतगर्वा आर्यभावं भजन्ति । तवेयं लीला खलानप्यनुशास्ति । उद्दिधीर्षतीत्येतत् ।

४ अथापि भगवन्निग्रहः न खलानां सर्वेषामुद्धाराय । ये स्वतः सन्तः कारणान्तरेणाऽवेशादिना खलभावं प्राप्तास्त एव श्रेयः प्राप्नुवन्ति । अन्ये स्वतः खला निगृहीता अप्यकृतानुशया विपरीतमेवाऽचरन्तस्तम एव यान्तीति मूलभावविशेषं प्रमाणत आह—असतां च सतां चैव ।

५ सर्वस्मै गुणपूर्णाय सर्वगताय च । सर्वभूतात्मने सर्वजीवान्तर्यामिणे सर्वसंहर्त्रे च ।

६ ननु स्वच्छन्दोपात्तदेहायेति देहोपादानं श्रूयते । नित्यदेहः कथं देहमुपादत्ते? आह—आवेशः । यत्रक्वचिदन्यथान्यथा बहुविधमुच्यते तदसुरमोहाय ।

७ "बहुधैव तु" इति प्र. पाठः । "बहुधेयते" इति क्वचित् ।

८ श्रीधरीयादिरीत्या चायं सप्तविंशोऽध्यायः । विजयध्वजीयादिरीत्या प्र. भाष्यपाठरीत्या च पञ्चविंशः ।

श्रीशुकः ॥ उक्तं पुरस्तादेतत् ते चैद्यः सिद्धिं यथा गतः ।
द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥ १३ ॥

नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप ।
[1]अव्यक्तस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥ १४ ॥

कामं क्रोधं भयं स्नेहं मैत्रीं सौहृदमेव वा[2] ।
नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥ १५ ॥

"कृष्णकामास्तदा गोप्यस्त्यक्त्वा देहं दिवं गताः । सम्यक् कृष्णं परं [3]ब्रह्म ज्ञात्वा कालात् परं ययुः । पूर्वं च ज्ञानयुक्तास्तास्तत्रापि[4] प्रायशस्तथा । [5]अतस्तासां परं ब्रह्म गतिरासीन्न कामतः । नतु ज्ञानमृते मोक्षो नान्यः पन्थेति हि श्रुतिः । कामयुक्ता [6]सदा भक्तिर्ज्ञानं चातो विमुक्तिगाः । अतो मोक्षेऽपि चैतासां [7]कामो भक्त्याऽनुवर्तते । [8]अतोदकत्वेन सदा द्वेषिणामधरं तमः । मुक्तिशब्दोदितं [9]चैद्यप्रभृतौ द्वेषभागिनः । भक्तिभागी पृथङ्मुक्तिमगाद् विष्णुप्रसादतः । कामस्त्वशुभकृच्चापि[10] भक्त्या विष्णोः प्रसादकृत् । [11]"द्वेषिजीवयुतं चापि भक्तं विष्णुर्विमोचयेत् । अहोऽतिकरुणा विष्णोः शिशुपालस्य मोक्षणात्" इति स्कान्दे ॥ * ॥

---

१ "अव्ययस्याप्रमेयस्य" इति प्र. पाठः ।

२ "स्नेहमैक्यं सौहृदमेव च" इति च । स्नेहो बन्धुस्नेहः । सौहृदं भक्तिः ।

३ "परब्रह्म" इति प्र. पाठः ।

४ "ज्ञानसंयुक्तास्तत्रापि" इति च । पूर्वं च गोपीभावात् पूर्वमपि ज्ञानयुक्ता एव । अप्सरस्त्वात् । वक्ष्यति हि "कामभक्त्याऽप्सरःस्त्रीणाम्" इति । तत्रापि गोपीभावेऽपि प्रायशः बाहुल्येन तथा ज्ञानयुक्ताः ।

५ "अतस्तेषाम्" इति क्वचित् ।

६ "तदा" इति प्र. पाठः । "कामयुक्ताः सदा" इति क्वचित् । कामयुक्ता अपि विमुक्तिगाः । यतस्तासां भक्तिर्ज्ञानं च सदाऽऽसीदित्यर्थः ।

७ "मोक्षेऽपि तासां च" इति प्र. पाठः ।

८ अतोदकत्वेन सदाऽनुवर्तत इति पूर्वान्वयः । यद्यपि कामस्तोदकः दुःखजनकः । तुद व्यथने । अथापि गोपीनां भक्त्या सहितत्वादतोदकत्वेनैव सदा मोक्षेऽप्यनुवर्तते । अथच तोदक इति प्रेरक उच्यते । अतोदकत्वेन अप्रेरकत्वेन, न भगवानन्यः प्रेरकोऽस्तीति तं सदा द्विषतामधरं तमो नियतम् ।

९ चैद्यादिषु हि जीवद्वयसमावेशः । तत्र यो द्वेषभागी तामसजीवः तस्य तम एव मुक्तिशब्दोदितम् । तत्र यो भक्तिभागी सज्जीवः स तु ज्ञानानन्दमयां पृथङ्मुक्तिमगात् । तथाच यत्र क्वचित् चैद्यादयो मुक्तिं गता इति संश्लेषेणोच्यते तत्र सर्वत्राप्ययमेव न्यायः । तद्गतोऽसुरस्तमआख्यमुक्तिं गतः । सज्जीवः सहजां मुक्तिमिति ।

१० "—स्त्वशुभकश्चापि" इति क्वचित् ।

११ "द्वेषजीव—" इति क्वचित् ।

68

[1]जगत्प्रपितामहे जारबुद्धिर्न युक्ता तथाऽपि ॥ * ॥

[2]ब्रह्मतया न सम्यक्। "प्रेष्ठो भवांस्तनुभृतां सुहृदन्तरात्मा", "रमाया दत्तक्षणम्" इत्यादिवचनात्[3] ॥ * ॥

कामिनः कामित्वं क्रोधिनः क्रोधित्वमेव सर्वदा भवतीत्यादि[4] तन्मयता ॥ * ॥

"विमुक्तावपि कामिन्यो[5] विष्णुकामा व्रजस्त्रियः। द्वेषिणश्च हरौ [6]नित्यद्वेषिणस्तमसि स्थिताः" इति च। "भक्त्या हि नित्यकामित्वं[7] नतु भक्तिं[8] विना भवेत्। अतः कामितया वाऽपि मुक्तिर्भक्तिमतां हरौ। स्नेहभक्ताः सदा देवाः कामित्वेनाप्सरःस्त्रियः। काश्चित् काश्चिन्न कामेन भक्त्या केवलयैव तु। मोक्षमायान्ति नान्येन भक्तिं योग्यां विना क्वचित्" इति पाद्मे। "भक्त्या वा कामभक्त्या वा मोक्षो नान्येन केनचित्। कामभक्त्याऽप्सरःस्त्रीणामन्येषां नैव कामतः। उपास्यः श्वशुरत्वेन देवस्त्रीणां जनार्दनः। जारत्वेनाप्सरःस्त्रीणां कासाञ्चिदिति योग्यता। [9]योग्योपासां विना नैव मोक्षः कस्यापि सेत्स्यति। अयोग्योपासनाकर्तुरनर्थश्च[10] भविष्यति। तस्मात्तु योग्यतां ज्ञात्वा हरेः कार्यमुपासनम्" इति भद्रिकायाम्। "पतित्वेन श्रियोपास्यो ब्रह्मणा[11] मे पितेति च। पितामहतयाऽन्येषां त्रिदशानां

---

१ "जारबुद्ध्याऽपि सङ्गताः" इति मूलेऽपिशब्दो गर्हार्थ इत्याह—जगत्प्रपितामहे।

२ कृष्णं कान्तमेव विदुः नतु ब्रह्मतया विदुरिति गोपीनां केवलकामित्वं प्रतीयते। नतु ज्ञानं भक्तिर्वा। अतस्तद्भावं "सम्यक् कृष्णं परं ब्रह्म ज्ञात्वा" इत्युदाहृतप्रमाणानुगुणमाह–ब्रह्मतया न सम्यग् विदुरिति। ता ज्ञानयुक्ता इत्यत्र तासां वचनमेव गमकमाह- प्रेष्ठो भवानित्यादि। तथाहि कृष्णनिवारितानां गोपीनां वचनम्– "यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम्। अस्त्येवमेतदपि देववरे त्वयीशे प्रेष्ठो भवांस्तनुभृतां सुहृदन्तरात्मा" (१०–२६–३२) इति। "सन्त्यज्य सर्वविषयांस्तव पादमूलं भक्त्या भजेम दुरवग्रह मा त्यजास्मान्" (३१) इति च। "यर्ह्यम्बुजाक्ष तव पादतळं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य। अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्ग स्थातुं त्वया विरहिता बत पारयामः" (३६) इति। "श्रीर्यत्पदाम्बुजरजश्चकमे तुळस्या लब्ध्वाऽपि वक्षसि पदं किल भृत्यजुष्टम्" (३७) इति च।

३ "इति वचनात्" इति प्र. पाठः। ४ "भवतीति तन्मयता" इति च।

५ "मुक्तावपि हि कामिन्यो—" इति क्वचित् पाठान्तरम्।

६ "नित्यं द्वेषेण तमसि" इति प्र. पाठः। "नित्यं द्वेषिणस्तमसि" इति क्वचित्। द्वेषिणश्च हरौ नित्यद्वेषिण- एव सन्तस्तमसि तिष्ठन्ति। ७ "–कामत्वम्" इति क्वचित्।

८ "मुक्तिं विना" इति प्र. पाठः। क्वचित् कोशेषु च। अप्सरआदीनां भक्त्या सहैव नित्यकामित्वम्। नतु भक्तिं विना केवलकामित्वम्। भक्तिमतामिति हेतुगर्भम्। अप्सरआदिजीवानां भक्तिमत्त्वादेव कामितयाऽपि मुक्तिर्युज्यते। तथाच भक्त्यैव मुच्यत इत्ययोगव्यवच्छेद एव; नान्ययोगव्यवच्छेदः।

९ "मोक्षोपासाम्" इति कोशेषु पठ्यते। तदा मोक्षयोग्या उपासा मोक्षोपासा इति व्याख्येयम्।

१० "—कर्तुर्निरयश्च" इति क्वचित्। ११ "ब्रह्मणे" इति च।

जनार्दनः । प्रपितामहो मे भगवानिति सर्वजनस्य तु[1] । गुरुः श्रीब्रह्मणोर्विष्णुः[2] सुराणां च गुरोर्गुरुः[3] । मूलभूतगुरुः[4] सर्वजनानां पुरुषोत्तमः । गुरुर्ब्रह्माऽस्य जगतो दैवं विष्णुः सनातनः । इत्येवोपासनं कार्यं नान्यथा तु कथञ्चन'' इति वाराहे ॥ * ॥

इति दशमस्कन्धे षड्विंशोऽध्यायः[5]

[त्रयस्त्रिंशोऽध्यायः]

मदविघूर्णितलोचन ईषन्मानयन् स्वसुहृदो[6] वनमाली ।
बदरपाण्डुवदनो मृदुगण्डं मण्डयन् कनककुण्डललक्ष्म्या[7] ॥ २४ ॥

''मानवो बदरः सिन्धुः शशिनस्तु त्रिनामकम् । यो वेद मुच्यते रोगैर्विष्णुनाम्नेव संस्तुतेः'' इति स्कान्दे ॥ * ॥

इति दशमस्कन्धे त्रयस्त्रिंशोऽध्यायः[8]

---

१ उक्तं चाऽचार्यैरेवान्यत्र—''ब्रह्मणः पितरं वन्दे शङ्करस्य पितामहम् । श्रियः पतिमजं नित्यमिन्द्रादिप्रपितामहम्'' इति ।
२ ''गुरुः श्रीर्ब्रह्मणो विष्णुः'' इति क्वचित् ।
३ ''गुरुर्गुरुः''(?) इति क्वचित् ।
४ ''मूलभूतो गुरुः'' इति प्र. पाठः ।
५ श्रीधरीयादिरीत्या चायमेकोनत्रिंशोऽध्यायः । विजयध्वजीयादिरीत्या प्र. भाष्यपाठरीत्या च सप्तविं : ।
६ ''ईषन्मानदः स्वसुहृदाम्'' इति प्र. पाठः ।
७ ईषन्मदेन नैसर्गिकेण युवतीजनवैवश्यापादकेन हर्षेण विघूर्णिते विलासविशेषेण उत्फुल्लिते लोचने यस्य सः । स्वसुहृदो युवतीस्तदभिलषितपूरणेन मानयन् । बदरवच्चन्द्रवत् पाण्डु स्वच्छकान्ति वदनं यस्य सः ।
८ बदरशब्दश्चन्द्रवाचीत्यपूर्वोऽयमर्थः भगवत्पादैरेव प्रथममाविष्कृतः । अत एवाद्यापि 'अरब्बी' भाषायां चन्द्रवाचकः बदरशब्दः प्रवर्तते । तदिदमद्भुतं सर्वभाषाविद्वरेण्यानामाचार्यपादानां भाषाकौशलम् । तदिदमजानन्तः बदरफलसदृशं कृष्णवदनं वर्णयन्तो व्याख्यातारः शोच्या एव ।
९ श्रीधरीयादिरीत्या चायं पञ्चत्रिंशोऽध्यायः । एकस्मिन् कोशे ''त्रिंशोऽध्याय'' इति पठ्यते ।

[पञ्चत्रिंशोऽध्यायः]

त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनम् ।
[1]क्रीडार्थमाद्यन्त मनुष्यविग्रहं नतोऽस्मि धुर्यं यदुवृष्णिसात्वताम् ॥ २४ ॥

"आदिनो राक्षसाः प्रोक्तास्तदन्तत्वाज्जनार्दनः । आद्यन्त इति विज्ञेयः परेशो[2] ब्रह्मणीशनात्" इति ब्राह्मे ॥ * ॥

इति दशमस्कन्धे पञ्चत्रिंशोऽध्यायः[3]

[षट्त्रिंशोऽध्यायः]

य ईक्षिताऽहंरहितोऽप्यसत्सतोः स्वतेजसाऽपास्ततमोभिदाभ्रमः ।
स्वमाययाऽऽत्मन् रचितेषु तत् सन् प्राणादिभिर्जन्तुषु भाति चित्रधा[4] ॥ ११ ॥

तत् सन् तथैव सन् ॥ * ॥

यस्याखिला वै वहुभिः[5] सुमङ्गलै-
र्वाचो विचित्रा[6] गुणकर्मजन्मभिः ।
प्राणन्ति शुम्भन्ति पुनन्ति वै जगद्
यास्तद्विरक्ताः स्वुरशोभना मताः[7] ॥ १२ ॥

---

१ "क्रीडार्थमद्याऽत्त–" इत्यर्वाचीनाः । हे आद्यन्त, मांसमदन्तीति आदिनो राक्षसास्तेषामन्तक, ईश्वरं वराणां ब्रह्मादीनामपीशम्, स्वाश्रयं स्वे महिम्नि प्रतिष्ठितमनन्याधारम् आत्ममायया स्वेच्छया स्वाधीनया प्रकृत्या च विनिर्मिताशेषमहदादिविशेषक्लृप्तिम्, क्रीडार्थं मनुष्यवत्कृतविग्रहं त्वां नतोऽस्मि ।

२ "परेशौ" इति प्र. पाठः प्रामादिकः । ब्रह्मण्यपि विषय ईशितृत्वात् परेश इत्युच्यते । एतेनेश्वरपदनिर्वचनं सूचितं भवति ।

३ श्रीधरीयादिरीत्या चायं सप्तत्रिंशोऽध्यायः ।

४ "रचितैस्तदीक्षया प्राणाक्षधीभिः सदनेष्वभीयते" इत्यर्वाचीनाः पठन्ति । अहंरहितोऽभिमानरहितः । असत्सतोः शुभाशुभकर्मणोरीक्षिता साक्षी । सदसतोः कार्यकारणयोर्वा । चिदचितोर्वा । स्वतेजसा स्वसामर्थ्येन, न केवलं स्वयमेव, स्वं भजतां सज्जीवानामपि निरस्ताः तमोभिदाभ्रमा येन । तमोऽज्ञानम् । भिदाऽन्यथाज्ञानम् । तदुभयमूलो भ्रमः संसारः । आत्मनि आधारे, आत्माधारतया रचितेषु जन्तुषु तत् सन् तत्तदाकारः स्थितः, अथापि तथैवाविकृतः सन् प्राणादिभिः सह बहुधा भाति ।

५ "यस्याखिलामीवहभिः" इति पाठान्तरम् ।

६ "विमिश्रा गुण—" इति च ।

७ "—रक्ताः शवशोभना मताः" इति प्र. पाठः । यस्य विष्णोर्बहुभिः सुमङ्गलैः गुणकर्मजन्मभिर्विचित्राः, गुणकर्मादिप्रतिपादकत्वेन श्रोतॄणां विस्मयावहाः अखिला अपि वाचः जगत् प्राणन्ति जीवयन्त्याह्लादयन्ति ।

शुम्भन्ति शोभयन्ति—

"[1]शुम्भनं शोभनं शूनं[2] शुभं पर्यायवाचकाः[3]" इत्यभिधानम् ॥ * ॥

प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती ।
अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ[4] ॥ ३० ॥

"वैन्यपार्थबलेशादावाविष्टं पुरुषोत्तमम् । अपेक्ष्य तद्गुणाः सर्वे तज्जीवानामभाविनः ।
अप्युच्यन्ते पुराणेषु विशेषात् सन्निधिर्यतः" इति माहात्म्ये ॥ * ॥

इति दशमस्कन्धे षट्त्रिंशोऽध्यायः[5]

[अष्टत्रिंशोऽध्यायः]

भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इन्द्रियाणि ।
सर्वेन्द्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोऽङ्गभूताः ॥ ३ ॥

तवाङ्गेभ्यो भूताः ॥ * ॥

नैते स्वरूपं विदुरात्मनस्ते [7]अजादयोऽन्यात्मतया गृहीताः ।
अजोऽनुबद्धः स गुणैरजाया गुणात् परं वेद न ते स्वरूपम् ॥ ४ ॥

शुम्भन्ति शोभयन्ति पुनन्ति च । "प्रथमं तावत् सम्बन्धमात्रेण सफलजीवनं कुर्वन्ति । ततश्च भक्त्यादिगुणप्रकाशेन शोभयन्ति । ततश्च विविधदुर्वासनाध्वंसनेन पुनन्ति शोधयन्ति" इति जीवगोस्वामी । या वाचस्तद्विरक्ताः तद्गुणकर्मादिविरहिताः स्युस्ता अशोभना इति सतां मताः ।

१ "शुभनम्" इति क्वचित् । २ "शोभनं शुम्भम्" इति प्र. पाठः ।

३ "शुभपर्यायवाचकाः" इति क्वचित्पाठः ।

४ प्रधानपुरुषौ पुरुषश्रेष्ठौ । "कृष्णस्य सर्वापेक्षया प्रधानत्वम् । रामस्यान्यापेक्षया" इति जीवगोस्वामी । जगत्यर्थे भूमेर्भारापनोदायावतीर्णौ । ५ श्रीधरीयादिरीत्या चाष्टत्रिंशोऽध्यायः ।

६ भूरादीनि पञ्चभूतानि, तदादिरहङ्कारः, ततो महान्, सर्वादिरजा प्रकृतिश्च, दशेन्द्रियाणि च मनश्च, शब्दादयोऽर्थाश्च इत्येतदभिमानिनः सर्वेऽपि विबुधा ये जगतो हेतवस्ते तव अङ्गभूताः । अङ्गेभ्यो जाताः ।

७ "ह्यजादयोऽनात्मतया" इत्यर्वाचीनाः । जगतो हेतवोऽप्येतेऽजादयः प्रकृत्यादयः परमात्मनस्तव स्वरूपं न साकल्येन विदुः । भगवता स्वतोऽन्ये जीवात्मान इति गृहीताः । देवप्रधानोऽजोऽपि प्रकृतिगुणैरनुबद्धः गुणातीतं त्वां न वेद । किमुतान्ये जीवाः ?

अन्यात्मतया गृहीताः । 'मत्तोऽन्ये जीवात्मान एत इति भगवता[2] गृहीताः ।

"अहं परो हि मद्भिन्ना जीवात्मानोऽल्पशक्तयः[3] । मद्वशाः सर्व एवेति ब्रह्मादीन् मन्यते हरिः" इति स्कान्दे । "यथा हरिः स्वमात्मानं वेद तद्वद् रमाऽपि न । ब्रह्मा च कुत एवान्ये विदन्त्येव[4] तथाऽपि तु" इति माहात्म्ये ॥ * ॥

त्वां योगिनो यजन्त्यद्धा महापुरुषमीश्वरम् ।
साध्यात्मं साधिभूतं च साधिदैवं च साधवः[5] ॥ ५ ॥

"स्थितो ब्रह्मादिदेवेषु [6]खादिभूतेषु चेश्वरः । आत्मशब्दोदितनरेष्वपि यस्माज्जनार्दनः । साध्यात्मः साधिभूतश्च साधिदैवेति चोच्यते" इत्यध्यात्मे ॥ * ॥

त्रय्या च विद्यया केचित् त्वां वै वैतानिका द्विजाः ।
यजन्ते विततैर्यज्ञैर्नानारूपामराख्यया[7] ॥ ६ ॥

"सर्वदेवेष्वपि हरिः सर्वदेवनियामकः । नामवान् सर्वदेवानां सर्वपूजां तथाऽस्त्यसौ" इति च ॥ * ॥

तुभ्यं नमस्तेऽस्त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे ।
गुणप्रवाहोऽयमविद्यया ततः[8] प्रवर्तते देवनृतिर्यगात्मसु ॥ १३ ॥

अविद्यया भगवदिच्छया ॥ * ॥

---

१ "मत्तोऽन्यो जीव इति" इति क्वचित् । २ "भागवता—" इति प्र. पाठः प्रामादिकः ।
३ "—ल्पबुद्धयः" इति प्र. पाठः । ४ "विदन्ति हि तथाऽपि तु" इति क्वचित् ।

५ आत्मसु जीवेषु शरीरे वा यद् रूपं तदध्यात्मम् । तेन जीवस्थस्वरूपेण सहितम् । तथा पञ्चभूतस्थरूपेण, ब्रह्मादिदेवस्थरूपेण च सहितं त्वां यजन्ति । ६ "साविभूतेषु" इति प्र. पाठः प्रामादिकः ।

७ वैतानिकाः यज्ञविदः अग्नीन्द्राद्यमराख्यया त्वामेव यजन्ति । "ऐन्द्रवारुणादिसूक्तैरिन्द्रादयः सर्वैश्वर्येण प्रकाश्यन्ते । न च ते सर्वेश्वराः । अतो नामभेदेन त्वामेव यजन्ते" इति श्रीधरस्वामी । "नानाविधानि रूपाणि येषाममराणामिन्द्रादीनां तेषामाख्यया भगवानेवेज्यते । यथा राज्ञः शिरस्येव परिचर्यां करोति; एवं कर्णादिष्वपि, तथाऽपि राजसेवक एवोच्यते नत्वङ्गसेवक इति । तथा प्रकृतेऽपि इन्द्रादीनामङ्गत्वश्रुतेः भगवानेवेज्यते" इति वल्लभाचार्यः ।

८ "कृतः" इति प्र. पाठः । तुभ्यं नमोऽस्तु । तच्च ते तव प्रसादादेव, त्वदर्थमेव च । "न ऋते त्वत् क्रियते किञ्चनारे" इत्यादिश्रुतेः । न यत्किञ्चित्क्षुद्रफलाद्यर्थं त्वन्नमनम् । किन्तु त्वदनुग्रहार्थमेव । कीदृशाय तुभ्यम् ? अविषक्तदृष्टये गुणेभ्योऽलिप्तज्ञानमूर्तये । सर्वान्तरात्मने । सर्वबुद्धिसाक्षिणे । "यस्माद् ब्रह्मेन्द्ररुद्रादिदेवतानां श्रियोऽपि च ।

त्वय्यव्ययात्मन् पुरुषे प्रकल्पिता लोकाः सपाला बहुजीवसङ्घाः[१] ।
यथा जले सञ्जिहते जलौकसोऽप्युदुम्बरे वा मशका मनोमये ॥ १६ ॥

त्वयैव प्रकल्पिताः[२]—

"[३]विष्णोरङ्गसमुद्भूतेर्विष्णोरङ्गानि देवताः । उच्यन्ते सर्ववेदेषु स्वरूपे मेदिनोऽपि तु[४]" इति च ॥ * ॥

यानियानीह रूपाणि क्रीडनार्थं बिभर्षि हि ।
[५]तैरामृष्टशुचो लोका मुदा गायन्ति ते यशः ॥ १७ ॥

"भृतामेव बिभर्तीशो ह्यवतारतनुं सदा । बिभर्तीत्युच्यतेऽथापि मोहाय व्यक्त्यपेक्षया[६]" इति तत्वनिर्णये ॥ * ॥

नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय सात्त्वताम्पतये नमः[७] ॥ २२ ॥

ज्ञानस्फूर्तिः" इत्याचार्यवचनात् । मनोवृत्तिप्रेरकाय । अन्यत् सर्वं त्वदधीनमेवेत्याह—गुणप्रवाहः । ततस्तस्मात् तव सर्वान्तरात्मत्वादन्यस्य सर्वस्य च त्वदधीनत्वादेव देवनरतिर्यगादिरूपभिन्नेषु जीववर्गेषु त्रिगुणप्रवाहरूपोऽयं संसारः । अविद्यया त्वदिच्छयैव प्रवर्तते । "महामायेत्यविद्येति नियतिर्मोहनीति च । प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यते" इति श्रवणात् ।

१ "बहुजीवसङ्कुलाः" इति पाठान्तरम् । प्र. पाठोऽपि तथा । हे अव्ययात्मन्, अव्ययात्मनि वा त्वयि सर्वे लोकाः सपालाः प्रतिष्ठिताः, त्वयैव प्रकल्पिता रचिताश्च । यथा जले जलौकसो मत्स्यादयः सञ्जिहते संहतास्तिष्ठन्ति उदुम्बरे फले वा क्षुद्रकीटास्तथा मनोमये ज्ञानस्वरूपे त्वयि सञ्जिहते ।

२ "त्वयैव कल्पिताः" इति क्वचित् । ३ "विष्णोरङ्गसमुद्भूता विष्णो—" इति प्र. पाठः ।

४ "स्वरूपाभेदिनोऽपि तु" इति प्र. पाठः प्रामादिकः ।

५ तै रूपैराराधितैरामृष्टशुचः परिमार्जितशोका लोकाः ।

६ अथाप्यसुरमोहाय तनुं बिभर्तीत्युच्यते शास्त्रेषु । अभिव्यक्त्यपेक्षया वा बिभर्तीत्युच्यते ।

७ बलरामे प्रद्युम्नेऽनिरुद्धे चाऽविश्य स्वयं वसुदेवसुतत्वेनावतीर्य सात्वतवंशपालकाय ते नमः । ननु किमर्थमेवं व्याख्यायते? स्वरूपभूतानामेव वासुदेवादिचतूरूपाणां सम्भवात् तत्परतयैव व्याख्यातुमुचितम् । एवं सति क्वचित् स्वरूपं क्वचिदावेश इति द्वैविध्यकल्पना च नापेक्षिता । सत्यं शक्यमेवं व्याख्यातुम् । किन्तु नोचितम् । रूपचतुष्टयेऽपि सात्वताम्पतय इति विशेषणस्य समानत्वात् । तेन सात्वतकुलेऽवतीर्णानि रूपाण्येवात्र गृह्यन्ते । तत्र तु वासुदेवः स्वयं वासुदेवः । बलदेवे तु सङ्कर्षणस्याऽवेशः । प्रद्युम्ने कृष्णपुत्रे प्रद्युम्नस्य । तत्पुत्रेऽनिरुद्धे चानिरुद्धस्येति युक्तमुक्तम् । ननु युज्यतां वासुदेवबलरामयोर्नतिः । अनुत्पन्नयोः प्रद्युम्नानिरुद्धयोस्तु

"प्रद्युम्ने चानिरुद्धे च बलदेवे च केशवः। सन्निधानं विशेषेण करोति जगतां पतिः। तत्र कृष्णः स्वयं विष्णुः परमानन्दलक्षणः। पाराशर्यश्च भगवान् स्वयमेव जनार्दनः" इति च। "तत्तद्गतस्यैव हरेस्तत्तन्नामानि चाञ्जसा। औपचारिकनामानि तदन्येषामिति स्थितिः" इति शब्दनिर्णये।

इति दशमस्कन्धेऽष्टत्रिंशोऽध्यायः[1]

[द्विपञ्चाशोऽध्यायः]

[2]दृष्ट्वा परमसन्तुष्टौ रामकृष्णौ जगत्पती।
प्रणामं चक्रतुर्वीरौ यथान्यायमतन्द्रितौ ॥

"[3]सर्वावताराभिन्नोऽपि [4]समशक्तिरपि स्वयम्। पूज्यपूजकनीचोच्चं[5] मोहनाय दुरात्मनाम्। अखण्डैकरसो विष्णुर्दर्शयेत् तत्रतत्र हि" षाड्गुण्ये[6] ॥*॥

कथमक्रूरेण नतिः स्तुतिर्वा कृतेति युज्यते? युज्यते। जले निमग्नस्याक्रूरस्य हीदं दिव्यं दर्शनम्। न मांसदृष्ट्या। नहि दिव्यस्य दर्शनस्य भूतं भविष्यदिति विभागो भवति। तद्यथाऽर्जुनः कुरुक्षेत्रे भ्रानिष्यमानानपि राज्ञो दिव्यचक्षुषा मृत्युमुखं प्रविष्टान् ददर्श। यथैवाऽत्राक्रूरो भाविनं बुद्धादिभगवदवतारं ददर्श तथा भगवत्पुत्रत्वेन पौत्रत्वेन चावतरिष्यन्तौ प्रद्युम्नानिरुद्धौ तयोर्भगवदावेशविशेषं च ज्ञानदृष्ट्या साक्षात्कुर्वन्नक्रूरस्तुष्टावेति सर्वं सूपपन्नम्। जीवगोस्वामी चाऽह—"क्रमप्राप्तस्तावदत्र श्रीबलराम इति सङ्कर्षणशब्देन स एवोच्यते। तापन्यादावेषां नित्यत्वश्रवणात् तदानीमनाविर्भूतयोरपि प्रद्युम्नानिरुद्धयोर्नमस्कारः" इति।

१ श्रीधरस्वाम्यादिरीत्या चात्र चत्वारिंशोऽध्यायः। इतः परं प्र. तात्पर्यपाठे—"सर्वोत्तमोऽपि भगवान् गुणभावं जनार्दनः। दर्शयेद् वसुदेवादेरात्मनो जीवतामपि। अज्ञाशक्त्यादिभावस्तु कुतस्तस्याखिलेशितुः। कुतो दोषाः सर्वगुणपूर्णस्याऽनन्दवारिधेरिति वामने" इत्यधिकं पठ्यते। ततः परं त्रिचत्वारिंशाध्यायसमाप्तिः पूर्वार्धसमाप्तिश्चेति। सर्वमेतत् प्रमादायातम्। इदं वामनवचनं दशमस्कन्धान्ते सर्वप्राचीनकोशेषु पठ्यते। विजयध्वजीयेऽपि तथेति नात्र पठनीयम्। दशमस्कन्धस्य पूर्वार्धमुत्तरार्धं चेति विभागश्चायमर्वाचीनः। न क्वापि प्राचीनकोशेषु।

२ समग्रोऽयमध्यायः प्र. पाठे न पठ्यते। न व्याख्यातश्च श्रीधरस्वाम्यादिभिः। विजयध्वजीयरीत्या चायं द्विपञ्चाशस्याध्यायस्य विंशः श्लोकः।

३ ननु कथं जामदग्न्यं दृष्ट्वा कृष्णः प्रणनाम? अन्यो ह्यवरः अन्यमुच्चं प्रणमति। नह्यत्रान्यत्वम्। नाप्युच्चनीचत्वम्। अभिन्नावतारत्वात्। आह—सर्वावताराभिन्नोऽपि।

४ "सर्वशक्तिरपि" इति प्र. पाठः।

५ दुरात्मनां मोहनाय स्वात्मानमेव पूज्यं पूजकं च नीचमुच्चं च प्रदर्शयेत्।

६ प्र. तात्पर्यपाठेऽत्र द्विपञ्चाशाध्यायसमाप्तिः। विजयध्वजीयेऽपि तथा।

[1]एतस्मिन्नेव काले तु क्षीरोदे सागरोत्तमे ।
निवासे देवदेवस्य शङ्खचक्रगदाभृतः ॥

उपासीनो महाबाहुः श्रीमान् वैरोचनो बली[2] ।
जहार देवदेवस्य किरीटं रत्नचित्रितम् ॥

"बहूनि स्थानजातानि कृष्णस्य क्षीरसागरे । कानिचिन्मुक्तगम्यानि नामुक्तैस्त्रिदशैरपि । गन्तुं शक्यान्यथान्यानि गम्यान्यन्यैरपि क्वचित् । तत्र देवाश्च योगीन्द्रा भक्ताश्चान्ये जनार्दने[3] । गत्वाऽर्चयन्ति देवेशं बलिस्तत्रागमत् क्वचित् । [4]तस्य तत्रासुरावेशात् पापा[5] बुद्धिरजायत । तद्व्यक्त्यर्थं जगन्नाथः शिश्ये सुप्त इवाव्ययः[6] । तदा स पापया बुद्ध्या किरीटमहरत् प्रभोः । तं जित्वा गरुडस्तत्तु हृत्वा गोमन्तमाव्रजत् । तत्र कृष्णस्य शिरसि किरीटममुचत् प्रभोः" इति माहात्म्ये ॥ * ॥

[7]हिरण्यगर्भत्वमुपेत्य मूले सृजस्यशेषं भुवनं स एव ।
नारायणात्मन् परिपासि भूयो जहार चान्ते भगवन् शिवात्मन्[8] ॥

"ब्रह्मस्थो ब्रह्मनामाऽसौ रुद्रस्थो रुद्रनामकः । तयोरपि नियन्तैकः स्वयमेव जनार्दनः" इति स्कान्दे ॥ * ॥

इति दशमस्कन्धे द्विपञ्चाशोऽध्यायः[9]

---

१ प्र. पाठे तावन्नेदं श्लोकद्वयं पठ्यते । विजयध्वजीयरीत्या तु त्रिपञ्चाशस्याध्यायस्य सप्तमोऽष्टमश्च श्लोकावेतौ । प्राचीनपाठरीत्या द्विपञ्चाश एवाध्यायः ।

२ "बलिः" इति पाठान्तरम् । बली बलवान् वैरोचनो बलिः ।

३ "जनार्दनम्" इति प्र. पाठः । "मुक्ताश्चान्ये जनार्दनम्" इति क्वचित् ।

४ "तत्र तस्यासुरा—" इति क्वचित् ।

५ "पापबुद्धिरजायत" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

६ "सुप्तवदव्ययः" इति प्र. पाठः । "सुप्तवदच्युतः" इति क्वचित् ।

७ विजयध्वजीयरीत्या चेदं त्रिपञ्चाशस्याध्यायस्य पञ्चदशं पद्यम् ।

८ मूले सृष्टिकाले हिरण्यगर्भान्तर्यामी सन् हिरण्गर्भत्वमुपेत्याशेषं सृजसि । नारायणात्मन् स्वयमेव परिपासि शिवान्तर्यामिन् हे भगवन्, स एव च भवानन्ते भुवनं सञ्जहार ।

९ प्र. पाठेऽत्र त्रिपञ्चाशोऽध्यायः । विजयध्वजीयेऽपि तथा ।

[सप्ततितमोऽध्यायः]

[1]यो मे सनाभिवधतप्तहृदा ततेन लिप्ताभिशापमपमार्ष्टुमुपाजहार ।
जित्वर्क्षराजमथ रत्नमदात् स तेन[2] नीतच्छिदादिशत मां प्रभवेऽपि दत्ताम्[3]
॥ ९ ॥

नीतच्छित् भगवता प्राप्तभेदः ॥ * ॥

इति दशमस्कन्धे सप्ततितमोऽध्यायः[4]

[एकसप्ततितमोऽध्यायः]

नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ ११ ॥

नाग्निर्न सूर्यो नतु चन्द्रतारकं[5] न भूर्जलं खं श्वसनोऽथवा मनः[6] ।
उपासिता भेदकृतो हरन्त्यघं विपश्चितो घ्नन्ति मुहूर्तसेवया ॥ १२ ॥

---

१ श्रीधरस्वाम्यादिरीत्या चेदं त्र्यशीतितमाध्यायस्य नवमं पद्यम्। विजयध्वजीयरीत्या चैकसप्ततितमाध्यायस्य ।

२ "तेन भीतः पिताऽऽदिशत" इत्यर्वाचीनाः ।

३ सत्यभामावचनमिदम् । सनाभेः सोदरस्य प्रसेनस्य जाम्बवत्कृतेन वधेन विषण्णमनसा मे ततेन तातेन सत्राजिता लिप्तमारोपितमभिशापमपवादमपमार्ष्टुं जाम्बवन्तमृक्षराजं जित्वा स्यमन्तकं रत्नमुपाजहार । अथ च पित्रेऽदात् । स च मे पिता तेनैव निमित्तेन, भगवति मृषादोषारोपेणेति यावत्, तेन भगवता नीतच्छित् प्राप्तमनोभेदः सन्, तदपराधपरिमार्जनाय दत्तामपि अन्यस्मै प्रतिश्रुतामपि मां प्रभवे कृष्णायाऽदिशत ददाविति । तेन रत्नेन सह मां प्रभव आदिशतेति वा ।

४ श्रीधरस्वाम्यादिरीत्या चात्र त्र्यशीतितमोऽध्यायः । विजयध्वजीयरीत्या प्र. तात्पर्यपाठरीत्या चैकसप्ततितमोऽध्यायः ।

५ "नच चन्द्रतारकाः" इति प्र. पाठः ।

६ "श्वसनोऽथ वाङ्मनः" इति च । पञ्चभूतस्थदेवाः, चन्द्रसूर्यादयो ग्रहाभिमानिनो देवाः, अश्विन्यादयस्तारकादेवता वा, अथचाध्यात्मं मनआद्यभिमानिनो वा देवा उपासिता अप्यघं न हरन्ति । कस्य? भेदकृतः भेददर्शिनः, वस्तु यथा वर्तते ततो भेदेन पश्यतोऽयथार्थज्ञानिन इति यावत् । विपश्चितस्तु मुहूर्तसेवया अघं घ्नन्ति । यतस्तेषां दर्शनमात्रेणान्यथाज्ञानापगमः । ज्ञानोदयश्च । ज्ञानोदये च सति देवताप्रसादः पृष्ठगामी ।

यस्याऽत्मबुद्धिः कुणपे त्रिधातुके स्वधीः कळत्रादिषु भौम इज्यधीः ।
यत् तीर्थबुद्धिश्च[1] जले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः ॥ १३ ॥

अम्मयाद्यभिमानिनोऽपि देवा[2] उरुकालेनैव पुनन्ति, गुरूपदेशं प्रापयित्वा ॥ * ॥

भेदकृतः अन्यथाज्ञानिनः । विपश्चितस्तु प्रत्यक्षदर्शनादन्यथाज्ञानमेवापगमयन्ति[3]—

"प्राकृतैर्दृश्यमानं तु न द्रवं[4] तीर्थमुच्यते । देवाश्च न शिलामात्राः किन्तु तत्रान्तरा-स्थिताः[5] । गुरूपदेशं तु विना न ते दृश्याः कथञ्चन । न ज्ञायते च तद्रूपमन्यथाज्ञा-निनां च ते । कोपाच्छापं प्रयच्छन्ति तस्माद् गुरुमुपव्रजेत्[6] । तस्मात् तीर्थानि देवाश्च नित्यं विद्वत्सु संस्थिताः" इति गारुडे[7] ॥ * ॥

"भिन्नस्याभेदतो दृष्टिरपि भेददृशिर्मता । वस्तुयाथात्म्यतस्तस्य भिन्नत्वादिति सूरिभिः । अन्यथाज्ञानमेवातो भेदज्ञानं विनिन्दितम् । न विद्यमानभेदस्य दर्शनं निन्दितं क्वचित् । शिला देव इति ज्ञानं देवोऽस्मीति च[8] या दृशिः[9] । उत्तमस्या-धमत्वेन नीचस्योच्चतया दृशिः । असमस्य समत्वेन समस्यासमदर्शनम् । द्रवं तीर्थमिति ज्ञानं देहोऽहमिति या मतिः[10] । असद्भार्यादिषु स्वीयदर्शनं चैवमादिकम् । भेदज्ञानमिति प्रोक्तं या चान्याऽप्ययथामतिः[11] । तस्मात् तदपहानाय[12] संसेव्या गुरवो वराः । तत्रस्था देवताः सर्वाः प्रीयन्ते गुरुपूजया । नैवान्यथैषां प्रीतिः स्याद्

---

१ "तीर्थबुद्धिः सलिले" इति प्र. पाठः । कुणपप्राये जडे शरीरे चैतन्यबुद्धिः । कीदृशे? त्रिधातुके । प्राधान्येन पृथिव्यप्तेजोमये । वातपित्तश्लेष्ममये च । कळत्रपुत्रादिषु स्वीया इम इति बुद्धिः, तथा भौमे मृन्मयप्रतिमादि-ष्वेव देवताबुद्धिः, जडे जल एव च तीर्थबुद्धिर्यस्य, न ज्ञानिषु जनेषु कर्हिचित् पूज्यताबुद्धिः स नूनं बलीवर्दो वा खरो वा भारवाही भवेन्न मनुष्यः नृपशुरित्येतत् । वदन्ति हि—"अज्ञातभगवद्धर्ममन्त्रविज्ञानसंविदः । नरास्ते गोखरा ज्ञेयाः" इति । "गवि पृथिव्यां गर्दभः" इति, "गवि दिव्यपि देवलोकगतोऽपि गर्दभनिभः" इति च व्याचक्षते । "गवां चक्षुषां खर इव भाति" इत्येके । "गावः इन्द्रियाणि खराणि दारुणानि यस्य स दुष्टेन्द्रियः" इत्यन्ये ।

२ "-मानिनो देवा-" इति प्र. पाठः ।

३ "-वापनयन्ति" इति च ।

४ "न जलं तीर्थ-" इति क्वचित् ।

५ "तत्रान्तरस्थिताः" इति प्र. पाठः । कोशेषु च क्वचित् ।

६ "-मुपाव्रजेत्" इति प्र. पाठः ।

७ "इति च गारुडे" इति क्वचित् ।

८ "देवोऽस्मीति तु या" इति प्र. पाठः ।

९ "या मतिः" इति क्वचित् ।

१० "या दृशिः" इति क्वचित् ।

११ "-प्यन्यथामतिः" इति प्र. पाठः ।

१२ "तस्माद् भेदप्रहाणाय" इति क्वचित् ।

गुरूक्तिमपहाय तु । तस्मात् पूजा विशेषेण सतां कार्या नृणां सदा । भक्तिस्तु तारतम्येन विशिष्टेष्वधिका[1] भवेत्" इति स्कान्दे । "उत्तमा अपि देवेशा अवरान् विदुषो नृणाम् । पूजार्थं सम्प्रयच्छन्ति परोक्षत्वप्रिया यतः । तेषु स्थित्वा स्वयं पूजां गृह्णन्त्यनुपमां सदा । ज्ञानानि च प्रयच्छन्ति तस्मादेवंविदा सदा । पूजिताः स्युः सुरवराः सब्रह्माणः सकेशवाः" इति वामने ॥ * ॥

ब्रह्म ते हृदयं शुक्लं तपःस्वाध्यायसंयमैः ।
[2]तत्रोपलब्धं सुव्यक्तमव्यक्तं च ततः परम् ॥ १९ ॥

हृदयं प्रियम् । हृद्ययनात् ॥ * ॥

इति दशमस्कन्ध एकसप्ततितमोऽध्यायः[3]

[[4]षट्सप्ततितमोऽध्यायः]

श्रुत्वाऽजितं जरासन्धं नृपतेर्ध्यायतो हरिः ।
[5]आहोपायं तमेवाऽद्य उद्धवो यदुवाच ह[6] ॥ १२ ॥

---

१ "विशिष्टे त्वधिका" इति प्र. पाठः ।

२ "यत्रोपलब्धं सद् व्यक्त–" इति प्र. पाठः । "यत्रोपलब्धं सुव्यक्त–" इति च । तपःस्वाध्यायसंयमैः शुक्लं शुद्धं ब्राह्मणकुलं तव हृदयङ्गमम् । प्रियमिति यावत् । ततस्तस्मादेव अव्यक्तादपि परं परमाव्यक्तमपि परम्ब्रह्म तत्र ब्रह्मकुले सुव्यक्तमुपलब्धम् ।

३ श्रीधरस्वाम्यादिरीत्या चात्र चतुरशीतितमोऽध्यायः । विजयध्वजीयादिरीत्या प्रचलिततात्पर्यपाठरीत्या च द्विसप्ततितमः ।

४ श्रीधरीयादिरीत्या चायं द्विसप्ततितमोऽध्यायः । विजयध्वजीयरीत्या चाशीतितमः । सत्यधर्मीयरीत्या च द्व्यशीतितमः ।

५ "आहोपायान्तमेवाद्य–" इति प्राचीनकोशे पठ्यते । न स्फुटोऽर्थः ।

६ "यमुवाच ह" इति पाठान्तरम् । केनाप्यजितं जरासन्धं भगवतः सकाशादेव श्रुत्वा कथमेतादृशं वयं जयेमेति चिन्ताकुलस्य नृपतेराद्यो हरिस्तमेवोपायमुवाच यदुद्धवः पूर्वमुवाच—"सर्वैर्दुर्विषहो राजा नागायुतसमो बले । जयिनामपि चान्येषां भीमं समबलं विना" इत्यादि पूर्वाध्याये ।

[1]अजितं जरासन्धं भगवत एव श्रुत्वा । तथा हि सभापर्वणि । पश्चाद् दिग्विजयोक्तेः ।

"पूर्वाः कथाः परं ब्रूयुः पराः पूर्वं तथैव च । मोहनार्थाय दुष्टानां सर्वव्यत्यास इष्यते ।
विस्तारे तु[2] यदुक्तं स्यात् तद् ग्राह्यमविरोधतः[3] । सङ्क्षेपोक्तं विरोधे तु[4] गुणोक्तिश्च
सतां [5]यथा" इति शब्दनिर्णये । "[6]जरासन्धं निहत्यैव पाण्डवैस्तु दिशो जिताः ।
प्रसादाद् वासुदेवस्य राजसूयः क्रतुः कृतः" इति मात्स्ये ॥ * ॥

इति दशमस्कन्धे षट्सप्ततितमोऽध्यायः[7]

[अशीतितमोऽध्यायः[8]]

[9]ततो मुहूर्तात्[10] प्रकृतावुपस्थितस्तत्रानुतिष्ठन्[11] स्वजनानुसङ्गतः ।
महानुभावस्तदबुध्यताऽसुरीं[12] मायां स [13]साल्वप्रकृतां मयोदिताम् ॥ ३८ ॥

---

१ प्र. पाठे तु इतः पूर्वं "भवानेव भवतः सदृशः,.." (पृ. ५५१) इत्यादिकमध्यायद्वयतात्पर्यं पठित्वा ततः परमेतदध्यायतात्पर्यम्–"अजितं जरासन्धम्–" इत्यादि पठ्यते। न क्वापि प्राचीनकोशे तथा। नन्वस्मिन्नध्याये आदौ– "निशम्य भगवद्गीतं प्रीत्युत्फुल्लमुखाम्बुजः । भ्रातॄन् दिग्विजयेऽयुङ्क्त विष्णुतेजोपबृंहितान्" इत्यादिना भीमादीनां दिग्विजयप्रस्थानमुक्त्वा, "ते विजित्य नृपान् वीरानाजह्रुर्दिव्यमञ्जसा । अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते" इति दिग्विजयकथां चोक्त्वा ततः "श्रुत्वाऽजितम्–" इति प्रस्तावः श्रूयते। तेन कृतदिग्विजयैरपि स्वभ्रातृभिरजितं जरासन्धं श्रुत्वा नृपतिश्चिन्ताकुलो बभूवेति प्रतीयते। अत आह–अजितम् । दिग्विजयात् पूर्वमेव भगवतः श्रुत्वा । कुत एवं व्याख्यायते । दिग्विजयेऽप्यजितमित्येव किं नार्थः स्यात्? न स्यात् । दिग्विजयस्य पाश्चात्यत्वादित्याह–तथाहि सभापर्वणीत्यादि । २ "विस्तरे तु" इति क्वचित् ।

३ विस्तारे यदुक्तं तदेव ग्राह्यम् । सङ्क्षेपोक्तस्य तद्विरोधे तु तदविरोधत एव सङ्क्षेपोक्तं ग्राह्यम् । तथाच विस्तृतभारतकथानुगुण्याय संक्षेपरूपा भागवतकथैव व्यत्यस्य व्याख्येयेति । समाधानान्तरं चाह— गुणोक्तिश्च । यथा व्याख्याने सतां गुणाः कीर्तिता भवेयुः तथा व्याख्येयम् । कृतदिग्जयैरपि भीमादिभिरजितो जरासन्ध इति व्याख्याने तु भीमसेनस्य गुणो हीयेत ।

४ "संक्षेपोक्तविरोधे तु" इति प्र. पाठः । ५ "तथा" इति क्वचित् ।

६ कथाव्यत्यासे सामान्यप्रमाणमुक्त्वा प्रकृतकथाविषय एव विशेषप्रमाणं चाऽह— जरासन्धम् ।

७ प्रचलिततात्पर्यपाठरीत्या चात्राशीतितमोऽध्यायः । विजयध्वजीयादिरीत्या च तथेत्युक्तम् ।

८ श्रीधरस्वाम्यादिरीत्या चायं सप्तसप्ततितमोऽध्यायः । विजयध्वजीयादिरीत्या च षडशीतितमः । सत्यधर्मीयरीत्या चाष्टाशीतितमः । ९ श्रीधरीये (७७–२८) । विजय. (८६–३८) ।

१० "मुहूर्तं प्रकृतावुपप्लुतः स्वबोध आस्ते स्वजनानुषङ्गतः" इति प्र. पाठः ।

११ "—तिष्ठत्" इति पाठान्तरम् । १२ "—बुध्यदासुरीम्" इति प्र. पाठः ।

१३ "–शाल्वप्रसूताम्" इति च । प्रकृतौ ज्ञानानन्दमयस्वरूपे उत्कृष्टतया स्थितोऽपि, प्रकृतावुपस्थितः प्रकृतिबद्ध इव, स्वजनैरनुगतः, मयोपदिष्टां साल्वप्रयुक्तां च वसुदेवशिरोहरणादिमायां क्षणमनुतिष्ठन् अजानन्निवानु-

"जानन् साल्वकृतां मायामजानन्निव केशवः । अन्ववर्तत किञ्चित्तु ततस्तामहरद् विभुः । एवमेव तु सर्वत्र परमात्मा सनातनः । विद्धश्च[१] रुधिरस्रावी कथञ्चिदजयत् परम्[२] । इत्यादि दर्शयेद् विष्णुर्मोहयन् मायया जगत् । चिदानन्दघनस्यास्य कुतो वेधादि सद्गतेः[३]" इति ब्रह्माण्डे । "यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु । मायेत् सा ते यानि युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से[४]" इत्याद्या च श्रुतिः ॥ * ॥

इति दशमस्कन्धेऽशीतितमोऽध्यायः[५]

[द्व्यशीतितमोऽध्यायः[६]]

[७]नन्वेतदेवमरविन्दविलोचनाऽह
यद् वै भवान् न भवतः सदृशो विभूम्नः[८] ।
क्व स्वे महिम्न्यभिरतो भगवांस्त्र्यधीशः
क्वाहं गुणप्रकृतिरन्यगृहीतपादा[९] ॥ ३८ ॥

वर्तमानः, ततः क्षणादेव तामासुरीं मायामबुध्यतेव । "अबुध्यत प्रबुद्धवानभूत् । नित्यसर्वज्ञत्वात्" इति सुदर्शनसूरिः । "यतः प्रकृतौ स्वभावे सर्वज्ञत्वे स्थितः" इति जीवगोस्वामी । "अज्ञत्वादिलीला सर्वावतारेष्विति न काऽप्यनुपपत्तिः" इति वल्लभाचार्यः ।

१ "विद्धत्वगृरुधिर–" इति प्र. पाठः । २ "परान्" इति पाठान्तरम् । "परः" इति क्वचित् ।

३ सतां गतेः । "मुक्तानां परमा गतिः" इति वचनान्मुक्तप्राप्यस्य । सतां स्वजनानां च गतेराश्रयस्य ।

४ इयमृग् दशममण्डले पठ्यते (१०–५४–२) । अयमर्थः—हे परमेश्वर तन्वा वावृधानः सर्वगतोऽर्जुनादेर्विश्वरूपप्रदर्शकश्च त्वं बलानि आत्मनः सामर्थ्यविशेषान् सज्जनेषु "मत्तः परतरं नान्यत् किञ्चिदस्ति" इति स्वयमेव प्रब्रुवाणो यद् युद्धभूमावचरः तत् तस्य ते यानि युद्धानि श्रूयन्ते सा तव मायेत् लीलैव ननु । यतोऽद्य शत्रुं न विन्दसि । नापि पुराऽविन्दः । नवा विवित्से पुरा । भविष्यति च न वेत्तासि । कालत्रयेऽपि न ते शत्रवः । अतः शत्रुभिः सह युद्धमिति तवासुरमोहनी लीलैव ।

५ प्रचलिततात्पर्यपाठे चायं षडशीतितमोऽध्यायः ।

६ श्रीधरस्वाम्यादिरीत्याऽयं षष्ठितमोऽध्यायः । विजयध्वजीयरीत्या पञ्चसप्ततितमः ।

७ "नन्वेवमेतदरविन्द–" इति प्र. पाठः । श्रीधरीयादिरीत्या चायं चतुस्त्रिंशः श्लोकः । एवमुत्तरत्रापि ।

८ "भवान् भगवतोऽसदृशी विभूम्नः" इत्यर्वाचीनाः ।

९ "–रज्ञगृहीतपादा" इति च । "देववृषोपमान् शिशुपालादीन् हित्वा कस्मादस्मान् प्राप्ता" इत्यादिभगवद्वचनं श्रुत्वा रुग्मिण्युत्तरमाह–नन्वेतदेवम् । यद् वै भवानाह एतदेवं युक्तं ननु । यद् यस्मात् भवान् वै भवानेव भवतः सदृशः । न भवतः सदृशोऽन्यो विभूम्नः पूर्णस्य । स्वे महिम्नि प्रतिष्ठितः, स्वरतश्च । त्र्यधीशः

[1]भवानेव भवतः सदृशः ॥ * ॥

सत्यं भयादिव गुणेभ्य उरुक्रमान्तः
शेते समुद्र उपलम्भनमात्र आत्मा ।
[2]योऽनित्यकेन्द्रियगणैः कृतविग्रहस्त्वं
[3]त्वत्सेवया नृपपदं विधुतं तमोऽन्धम् ॥ ३९ ॥

नृपपदं नृपशब्दवाच्यमात्रम् । न तु मुख्यतो नृपालकम्[4] । अन्धं तमः प्रति विधुतम् ॥ * ॥

त्वत्पादपद्ममकरन्दजुषां मुनीनां
[5]वर्त्म स्फुटं नृपशुभिर्ननु दुर्विभाव्यम् ।
यस्मादलौकिकमिवेहितमीश्वरस्य
भूमंस्तवेहितमथो अनु मे भवन्ति[6] ॥ ४० ॥

तवेहितमनु मे ईहितानि भवन्ति ॥ * ॥

वेदत्रयस्य कालत्रयस्य लोकत्रयस्य श्रीभूदुर्गाख्यरूपत्रयस्य चाधीशो भगवान् क्व ? गुणप्रकृतिः त्रिगुणमयप्रकृतिमानिनी, अन्यैर्ब्रह्मादिभिर्गृहीतपादा । अथच अन्यैः प्राकृतैरेव गृहीतपादा स्वातन्त्र्येणोपासिता । जानन्तस्तु त्वदुपसर्जनतयैव मामुपासते, न स्वातन्त्र्येण क्वचित् । तादृश्यहं क्व ?

१ एतदध्यायतात्पर्यं समग्रं प्र. पाठे पूर्वमेव पठितमिति नात्र पठ्यते ।

२ "नित्यं कदिन्द्रियगणैः" इति प्र. पाठः ।

३ त्वत्सेवकैर्नृपपदम्" इति च । "राजभ्यो बिभ्यतः सुभ्रु समुद्रं शरणं गतान्" (१६) इत्यादेरुत्तरमाह—सत्यम् । राजन्त इति राजानः शब्दादयः सत्वादयो वा गुणाः । तेभ्यो भयादिवेत्युत्प्रेक्षते । भवानन्तः समुद्रे शेते । हृदयाकाशे निगूढ इत्येतत् । समुद्रशब्दस्य वैदिकनिघण्टावाकाशनामसु पाठात् । उपलम्भनमात्रः चिन्मयस्वरूपः । "बलवद्भिः कृतद्वेषान्" (१६) इत्यस्योत्तरमाह—यः । यस्त्वं अनित्यकैरिन्द्रियगणैः कृतविग्रहः । तैरग्राह्य इति यावत् । किन्तु नित्यैः स्वरूपेन्द्रियैरेव ग्राह्यः । इन्द्रियैः कृतद्वेषत्वादेव बलवद्भिः कृतद्वेष उच्यते । "बलवानिन्द्रियग्रामः" इति श्रवणात् । "प्रायस्त्यक्तनृपासनान्" (१६) इत्यस्योत्तरमाह—त्वत्सेवया निमित्तभूतया । त्वत्सेवार्थमिति यावत् मया नृपशब्दवाच्यं राजवृन्दमन्धं तमः प्रति विधुतं निरस्तम् । तत्त्यागेन मुख्यतो नृपालको भवानेव वृत इति ।

४ "नृपालकत्वे" इति प्र. पाठः प्रामादिकः ।

५ "वर्त्मास्फुटम्" इति प्र. पाठः ।

६ "अनु ये भवन्तम्" इति च । "अस्पृष्टवर्त्मनाम्" (१७) इत्यस्योत्तरमाह—त्वत्पादेत्यादि । त्वत्पादसेविनां मुनीनामपि वर्त्म नृपशुभिर्दुर्विभाव्यम् । किमु तव ? "अलोकपथमीयुषाम्" (१७) इत्यादेरुत्तरमाह—यस्मात् । सत्यं तवेहितं चेष्टितमलौकिकमिव । अथापि न मे विषादे निमित्तमस्ति । यतस्तवेहितमनु ममेहितानि भवन्ति ।

निष्किञ्चनो ननु भवान् न यतोऽस्ति किञ्चिद्
यस्मै बलिं बलिभुजोऽपि हरन्त्यजाद्याः ।
न त्वा विदन्त्यसुतृपोऽन्तिकमाढ्यतान्धाः[1]
प्रेष्ठः सतां बलिभुजामपि योऽन्तरास्से[2] ॥ ४१ ॥

यतः किञ्चिन्मात्रं नास्ति । किन्तु सर्वमेवास्ति ॥ * ॥

त्वं वै समस्तपुरुषार्थमयः फलात्मा
यद्वाञ्छया सुमतयो विसृजन्ति कृत्स्नम् ।
तेषां विभो समुदितो[3] भवतः प्रसाद-
स्त्रय्यां च यश्च रतयोः सुखदुःखिनोर्न ॥ ४२ ॥

फलात्मा सुखात्मा । अत एव पुरुषैरर्थ्यस्वरूपः[4] । तेषां भवतश्च समुदितः समो गुणो नास्ति । यश्च कोऽपि । त्रय्यां रतयोः[5] । वेदोक्तकर्तृत्वेन सुमतीनां त्रयीरतत्वम् । प्रतिपाद्यत्वेन भवतः । सुखदुःखिनोः । [6]केवलपरिपूर्णसुखो भवान् । [7]भवज्ज्ञानपर्यन्तं दुःखिनस्ते ।

---

१ "-तृपोऽन्तकमाढ्यतान्धाः" इति प्र. पाठः ।

२ "प्रेष्ठो भवान् बलिभुजामपि तेऽपि तुभ्यम्" इति च । "निष्किञ्चना वयं शश्वन्निष्किञ्चनजनप्रियाः । तस्मात् प्रायेण नो ह्याढ्या न भजन्ति सुमध्यमे"(१८) इत्यस्योत्तरमाह—निष्किञ्चनः । न विद्यते किञ्चनाल्पं यस्य स खलु भवान् निष्किञ्चनः । यतः किञ्चित् तव नास्ति । किन्तु सर्वमस्ति । यतोऽन्येषां बलिभुजोऽपि ब्रह्माद्यास्तव बलिं हरन्ति । येऽसूनेव तर्पयन्ति इन्द्रियभोगलोलास्ते धनमदान्धा अन्तिकादप्यन्तिकमपि त्वां न विदन्ति । बलिभुजां ब्रह्मादीनामपि योऽन्तरास्से । तस्मादाढ्या न नो भजन्तीति च युक्तमुक्तं भवता ।

३ "समुचितो भवतः समाजः पुंसः स्त्रियाश्च रतयोः" इत्यर्वाचीनाः । "ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः । तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित्" (१९) इत्यस्य भवानेव समः पतिरित्युत्तरमाह—त्वं वै । समस्तनरैरर्थ्यमानस्वरूपः । यतः फलात्मा सुखरूपः । सुखं हि सर्वेप्सितं फलम् । यस्य तव वाञ्छया सर्वमन्यत् त्यजन्ति ज्ञानिनः । तर्हि त्यक्तसमस्तेषणाः सुमतयः समा भवेयुः? नेत्याऽह—तेषाम् । ज्ञानिनां गणस्य भवतश्चेत्युभयोः समुदितः समानः प्रसीदत्यनेनेति प्रसादो गुणः यश्च कोऽपि नास्ति । कीदृशयोरुभयोः? त्रय्यां च रतयोः । वेदेषु, चशब्दात् पौरुषेयागमेषु च रतयोः । यद्यपि त्रयीरतत्वेनोभौ समानौ दृश्येते । तथाऽप्येकस्य ज्ञानिवर्गस्य त्रयीप्रतिपादितकर्मकृत्त्वेन त्रयीरतत्वम् । भवतश्च त्रयीप्रतिपाद्यत्वेन त्रयीरतत्वमिति महदन्तरम् । अथच महदिदमन्तरमित्याह—सुखदुःखिनोः । सुखरूपो भवान् । भवत्प्राप्तिपर्यन्तं दुःखी ज्ञानिवर्गः । अतो भवानेवानुरूपः पतिरिति ।

४ "—रर्थ्यमानस्वरूपः" इति क्वचित् ।

५ "त्रय्यां च रतयोः" इति प्र. पाठः ।

६ "केवलं परिपूर्ण— इति च ।

७ "भगवज्ज्ञान—" इति प्र. पाठः प्रामादिकः ।

"[1]अल्पसम्पूर्णशक्तित्वादल्पपूर्णसुखत्वतः । अल्पसम्पूर्णदर्शित्वान्न साम्यं जीव-कृष्णयोः" इति ब्रह्माण्डे ।

'अन्यां च' इति चशब्दः स्मृतिष्वपीति ॥ * ॥

त्वं न्यस्तदण्डमुनिभिर्गदितानुभाव
आत्माऽऽत्मदश्च जगतामिति मे वृतोऽसि ।
हित्वा [2]भवद्भ्रुवदुदीरितकालवेग[3]-
ध्वस्ताशिषोऽब्जभवनाकपतीन् कुतोऽन्यान्[4] ॥ ४३ ॥

अब्जो ब्रह्मा—

"सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्च्छयत्[5]" इति श्रुतेः[6] । "[7]अद्भ्यः सम्भूतो हिरण्य-गर्भ इत्यष्टौ" इति च ॥ * ॥

[8]का स्त्री वृणीत तव पादसरोजगन्ध-
माघ्राय सन्मुखरितं जनतापवर्गम् ।
लक्ष्म्यालयं त्वविगणय्य गुणालयाऽढ्यं[9]
मर्त्याशिषोरुभयमर्थविविक्तदृष्टिः ॥ ४६ ॥

---

१ ननु तर्हि ज्ञानानन्तरमुभयोः साम्यमापन्नम् । नेत्याह—अल्पसम्पूर्णशक्तित्वात् ।

२ "भवद्भ्रुव उदीरित—" इति प्र. पाठः । ३ "–कालगन्ध–" इति पाठान्तरम् ।

४ "कुतोऽन्ये" इति च । न्यस्तकायवाङ्मनोदण्डैर्मुनिभिर्निगदितानुभावः । जगतामात्मा अन्तर्यामी स्वामी । भक्तेभ्यः स्वात्मानमेव ददातीति च मे वृतोऽसि । "वैदर्भ्येतदविज्ञाय त्वयाऽदीर्घसमीक्षया । वृता वयं गुणैर्हीना भिक्षुभिः श्लाघिता मुधा" (२०) इत्यस्येदमुत्तरम् । भवन् निरन्तरं प्रवर्तमानः, भवदुदीरितः यः कालवेगः तेन ध्वस्ताशिषः ब्रह्मरुद्रेन्द्रादीन् हित्वा त्वं वृतोऽसि । किमुतान्यान् चैद्यादीन् हित्वा ।

५ अप्प्रधानेभ्यः भूतेभ्यः पुरुषशरीरं मूर्तमकरोत् । ६ "श्रुतिः" इति प्र. पाठः ।

७ ननु "आपः पुरुषवचसो भवन्ति" इतिवत् सामान्यवचनमिदम् । कथमत्र विशिष्य ब्रह्मोच्यते? तर्हि विशिष्य ब्रह्मसृष्टिप्रतिपादकं वचनमेव श्रूयतामित्याह—अद्भ्यः सम्भूतः । महोपनिषदियम् । अयमर्थः— 'अद्भ्यः सम्भूतः' इत्याद्याः तैत्तिरीयारण्यके पुरुषसूक्तान्ते पठ्यमानाः षड् उत्तरनारायणमन्त्राः, तथा "हिरण्य-गर्भः समवर्तताग्रे" इत्याद्या अष्टौ मन्त्राः तैत्तिरीयसंहितायां पठ्यमानाः (४-१-८) प्रजापत्यपरनामकहिरण्यगर्भ-परत्वेन प्रसिद्धा अपि नारायणपरा एव मुख्यत इति । एवं हिरण्यगर्भसूक्तस्य विष्णौ समन्वयव्याजेन 'हिरण्य-गर्भोऽद्भ्यः सम्भूतः' इतीममप्यर्थमियं हि श्रुतिराह । ८ "काऽन्यं श्रयेत तव" इति प्र. पाठः ।

९ "गुणालयस्य मर्त्या सदोरु–" इति च । हे गुणालय, सद्भिः मुखरितं मुखरं प्रधानं कृतम्, प्रधान-त्वेन ज्ञातं ज्ञापितं च । सद्भिः स्तुतं च । साधुजनताया अपवर्गदम् । तव पादसरोजगन्धमाघ्रातवती का स्त्री लक्ष्म्या-

70

तं त्वाऽनुरूपमभजं जगतामधीश-
मात्मानमत्र च परत्र च कामपूरम्[1] ।
स्यान्मे तवाङ्घ्रिशरणं श्रुतिभिर्भ्रमत्त्या
ये वै भजन्त उपयान्त्यनृतापवर्गम्[2] ॥ ४७ ॥

सन्मुखरितं सद्भिः प्रधानीकृतम् । मर्त्याशिषा उरुभयं जनं प्रति अर्थोऽयमिति विविक्तदृष्टिः[3] का कामपूरं त्वामविगणय्य ॥ * ॥

"[4]भ्रमन्तः ति अन्नं यस्याः सा भ्रमत्ती[5] तस्याः भ्रमत्त्याः । विपरीतज्ञानिनां भक्षकाया इत्यर्थः । श्रुतिभिः श्रुतिप्रमाणेन[6] ।

"अभ्रमा भ्रमतामत्त्री या वेदैरधिगम्यते[7] । तस्यै नमोऽस्तु ते देव्यै विष्णुवक्षःस्थला-श्रये" इति नारदीये ॥ * ॥

'कस्याः स्युरच्युत नृपा भवतोपदिष्टाः
स्त्रीणां गृहेषु खरगोश्वबिलाळभृत्याः' ।

लयमत एवाऽद्वयं त्वामविगणय्य मर्त्यया क्षणभङ्गुरयाऽऽशिषोरुभयग्रस्तं जनं वृणीत ? कीदृशी स्त्री ? मर्त्या-शिषा उरुभयं ब्रह्मादिजीवगणं प्रति अयं पुरुषार्थभूतः इति विविक्तदृष्टिः इतरविवेकेन विशिष्टं पश्यन्ती ।

१ "कामरूपम्" इति केचित् पठन्ति ।

२ "तवाङ्घ्रिररणं स्तुतिभिर्भ्रमन्त्या यो वै भजन्तमुपयात्यनृतापवर्गः" इति प्र. पाठः । "भजन्ति उत यान्त्य-नृतापवर्गम्" इति विजयध्वजीयपाठः । अतस्तं त्वामनुरूपमभजम् । "अथाऽत्मनोऽनुरूपं वै भजस्व क्षत्रियर्ष-भम् । येन त्वमाशिषः सत्या इहामुत्र च लप्स्यसे" (२१) इत्यस्येदमुत्तरम् । ये त्वां भजन्तस्त एवानृतात् संसा-रादपवर्गमुपयान्ति । तस्मात् तवाङ्घ्रिरूपं शरणमेव मेऽस्तु । कीदृश्या मे ? श्रुतिभिः प्रमाणैरवधृताया भ्रमत्त्याः भ्रमतां विपरीतज्ञानिनां संहर्त्र्याः । भ्रमन्तः ति अन्नं यस्यास्तस्या भ्रमत्त्याः । "सदिति प्राणः । तीत्यन्नम्" इति श्रुतेः ।

३ "–दृष्टिः कामरूपम्" इति प्र. पाठः । "–दृष्टिः कामपूरम्" इति क्वचित् ।

४ "भ्रमः तिरन्नं यस्याः सा भ्रमतिः । तस्याः भ्रमत्याः" इति प्र. पाठः प्रामादिकः । तदनुसारीणि व्याख्या-नानि च भ्रान्तिमूलानि ।

५ "भ्रमत्तिः" इति क्वचित् ।

६ "श्रुतिभिः प्रमाणेन" इति प्र. पाठः ।

७ "या देवैरपि पूज्यते" इति प्र. पाठः प्रामादिकः । मूले श्रुतिभिरिति पदस्य हि व्याख्यानम्–"या वेदै-रधिगम्यते" इति । अत एव "श्रुतिप्रमाणेन" इति तात्पर्यम् ।

८ "तस्याः" इति प्र. पाठः ।

९ "–गोऽश्वबिडालभृत्याः" इति च ।

यत्कर्णमूलमरिकर्शन[1] नोपयायाद्
युष्मत्कथा मृडविरिञ्चसभासु गीता[2] ॥ ४८ ॥

खरगोश्वबिलाळवत्[3] स्त्रीणां भृत्याः ॥ * ॥

त्वक्श्मश्रुरोमनखकेशपिनद्धमन्त-
मांसास्थिरक्तकृमिविड्भरितान्त्रवीतम्[4] ।
जीवच्छवं भजति काममतिर्विमूढा[5]
या ते पदाब्जमकरन्दमजिघ्रती स्त्री ॥ ४९ ॥

"आनन्दश्मश्रुरानन्दकेश आपादनखात् सर्व एवाऽऽनन्दः । [6]स एष विष्णुरजोऽमृतोऽचलो ब्रह्म य [7]एनमेवं वेदाऽऽनन्द एव स भवत्यानन्दस्य सार्ष्टितां सलोकतां सायुज्यमाप्नोति" इति माध्यन्दिनश्रुतिः[8] ॥ * ॥

---

१ "-कर्षण" इति च ।

२ "चैद्यसाल्वजरासन्धदन्तवक्रादयो नृपाः । मां द्विषन्ति वरारोहे रुग्मी चापि तवाग्रजः" (२२), "राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिः । महानुभावैः श्रीमद्भी रूपौदार्यबलोर्जितैः" (१४ इत्यादेरुत्तरमाह–कस्याः । भवतोपदिष्टाश्चैद्यादयो नृपाः कस्याः प्रियाः स्युः ? न कस्या अपि । किमु मम । तत् कुतः ? आह-स्त्रीणाम् । गृहेषु स्त्रीणां ये खरबलीवर्दश्वबिलाळतुल्याः भृत्याः पादसेवका गृहदासा इव जीवन्ति । गृहे स्थितास्ताः गर्दभवदपेक्षितवस्तुवहनेनोपचरन्ति । प्रस्थितासु च बलीवर्दवत् स्वयमेव वहन्ति । शयानासु न तासु सारमेयवद् विनिद्राः पालयन्ति । एवं दिवानिशं कृतपरिचर्या अपि कबळार्थं बिलाळवत् तासां पादं लिहन्तः कथञ्चित् तन्निसृष्टमुच्छिष्टममृतवत् स्वादंस्वादं भुञ्जते । तदेतदुक्तं तात्पर्ये— "खरगोश्वबिलाळवत् स्त्रीणां भृत्याः" इति । अपिच येषां चैद्यादीनां कर्णमूलं युष्मत्कथा नोपयाता, ये भवत्कथारसं न जानन्ति, अत एव स्त्रीणां भृत्याः । एतादृशेभ्यः पुरुषेभ्यो न काऽपि स्त्री स्पृहयति । अथवा यस्याः कर्णमूलं भवत्कथा नोपयायात् तस्याः कस्याश्चित् कुत्सितायाः एव ते नृपाः स्युरिष्टाः ।

३ "-बिडालवत्" इति प्र. पाठः ।   ४ "-विट्कफपित्तवातम्" इति प्र. पाठः ।

५ "कान्तमतिर्विमूढा" इति च । बहिस्त्वगादिपिनद्धमन्तर्मांसादिभरितम् । या ते ज्ञानानन्दमयदेहस्य पदाब्जमकरन्दमजिघ्रती सैवेदृशं जीवच्छवं कामबुद्ध्या भजति ।

६ "स एव विष्णु-" इति क्वचित् ।   ७ "य एवमेवम्" इति प्र. पाठः प्रामादिकः ।

८ "वेदाऽऽनन्द एव भवत्या-" इति क्वचित् । आनन्दस्वरूप एव स भवति अथच आनन्दे भगवति प्रतिष्ठितो भवति । "अभयं प्रतिष्ठां विन्दते" इति श्रवणात् । तदेव विव्रियते—आनन्दस्य । सार्ष्टितां सामीप्यं सारूप्यं वा ।

९ "माध्यन्दिनायनश्रुतिः" इति प्र. पाठः । "मध्यश्रुतिः" ईत क्वचित् ।

[1]अस्त्यम्बुजाक्ष मम ते चरणानुराग
आत्मन् रतस्य मयि चानतिरिक्तदृष्टेः ।
यर्ह्यस्य वृद्धय उपात्तरजोऽतिमात्रो
मामीक्षसे तदु ह नः परमाऽनुकम्पा ॥ ५० ॥

अनतिरिक्तदृष्टेः भक्त्यनुसार्यनुग्रहस्य ।

"य[2] एष देवः परोऽजरोऽमरस्तं वा एनमाहुर्भाक्त इति भक्त्या हि सोऽनुगृह्णाति भक्त्येदं[3] वृणुते श्रियं विरिञ्चं रुद्रमिन्द्रमापिपीलिकं नाभक्तं वृणुते नाभक्तमनुगृह्णाति यावद्भाव[4] स भक्तस्तावद्ध्येष वृणुते तावद्ध्येषोऽनुगृह्णाति नाधिकं वृणुते नाधिकमनुगृह्णाति नावरं वृणुते नावरमनुगृह्णाति । अथातो भक्तिमीमांसा भवति । युवा स्यात् साधुयुवाऽध्यायकः । आशिष्ठो दृढिष्ठो[5] बलिष्ठः । [6]यस्येयं पृथिवी वित्तेन पूर्णा स्यात् । स एको मानुषभक्तो[7] भवति । ते ये शतं मानुषभक्ता[8] एतावान् मानुषो गन्धर्वः । ते ये शतं मानुषा गन्धर्वा एतावान् देवगन्धर्वः । ते ये शतं देवगन्धर्वा एतावांश्चिरलोकः पैतृकः । ते ये शतं चिरलोकाः पैतृका एतावांश्चिरलोको दैविकः[9] । ते ये शतं चिरलोका दैविका एतावत्यतात्विकी देवता[10] । ता[11]

---

१ "अस्त्वम्बुजाक्ष" इति प्र. पाठः । "उदासीना वयं नूनं न स्त्र्यपत्यार्थकामुकाः । आत्मलब्ध्याऽऽस्महे पूर्णा नेहात्मसदृशाः क्रियाः" (२४) इत्यादेरुत्तरम्— अस्त्यम्बुजाक्ष । सत्यं भवानात्मन्येव रतः । मय्यपि भक्तेरनधिकाऽनुग्रहदृष्टिर्यस्य तादृशः । अतश्च मम ते चरणानुरागः । उदासीनोऽपि सृष्ट्याद्यर्थं मयि गुणानुद्रेचयसि सैव परमा कृपेत्याह—यर्हि । यदा सृष्ट्या जगद्वृद्धये उपात्ता रजसोऽतिमात्रा औत्कट्यं येन, मयि रजोगुणमुद्रेचयसीति यावत् । एवं सत्त्वतमसी अपि पालननाशयोः ।

२ "स एष देवः" इति क्वचित् ।

३ "भक्त्यैवेदम्" इति प्र. पाठः ।

४ "यावान् वाव" इति प्र. पाठः ।

५ "द्रढिष्ठो–" इति च । युवा नित्ययौवनः । मुक्तौ जराद्यभावात् । साधुगुणैर्युतत्वात्, साधुगुणेन भगवता युतत्वाच्च साधुयुवा । प्राप्ताध्ययनफलोऽध्यायकः । आशिष्ठोऽतिशयसुखरूपः । देहाद्यन्यथाभावाभावाद् दृढिष्ठः । प्राप्तापरोक्षत्वाद् बलिष्ठः । ज्ञानबलं हि बलम् ।

६ "तस्येयं पृथिवी सर्वा वित्तेन" इति पाठान्तरम् । प्र. पाठोऽपि तथा । वित्तेन पूर्णा सर्वा पृथिवी यस्य स्यात् स चक्रवर्ती एको मानुषभक्तः । तस्य यावती भक्तिः सा एका भक्तिः । ततः शतगुणितमुत्तरोत्तरं भक्तितारतम्यं भवति ।

७ "मानुषो भक्तो—" इति प्र. पाठः

८ "मानुषा भक्ता—" इति च ।

९ चिरलोक आजानदेवतागणः । अनाख्याता देवकुले जाताश्चिरलोका देवा आजानदेवाश्चोच्यन्ते ।

१० "वत्यतात्विकदेवता" इति प्र. पाठः । अतात्विका देवाः कर्मदेवाः ।

११ "ते ये शतमतात्विक्यो—" इति प्र. पाठः प्रामादिकः ।

याः शतमतात्त्विक्यो देवता एतावती तात्त्विकी देवता[१]। ता याः शतं तात्त्विक्यो[२] देवता एतावान् वाव पुरुहूतः[३]। ते ये शतं पुरुहूता एतावान् वाव रुद्रः। [४]ते ये शतं रुद्रा एतावान् वाव विरिञ्चः। ते ये [५]शतं विरिञ्चा एतावती श्रीर्भक्त्या भवति। तद् यावती वाव भक्तिस्तावदेव ज्ञानं[६] भवति। यावद् वाव तज्ज्ञानं तावदानन्दो मौक्तिकोऽथैष एव परम[७] आनन्दो योऽसौ हरिर्विश्वो विनोदोऽपनोदः [८]सङ्कारको विकारकोऽधिकारकः। एतस्यैवाऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति पौत्रायणश्रुतिः। "मिळितौ वा एतौ भवतो[९] यदनुग्रहश्च भक्तिश्च यो वावानुग्रही[१०] स भक्तो यो भक्तः सोऽनुग्रही। यो वावानुगृहीतो[११] ब्रह्मणा स भक्तो यो भक्तस्तं वै[१२] ब्रह्मानुगृह्णाति यावान् वै ब्रह्मणोऽनुग्रहस्तावती भक्तिर्यावती भक्तिस्तावान् वै ब्रह्मणोऽनुग्रहः। प्रकृतौ वै ब्रह्मणोऽनुग्रहः परमः। तदवरो वाव महति[१३]। तदवरोऽथ रुद्रे। तदवरः पुरुहूतेऽथ देवेष्वृषिषु पितृषु[१४] मनुष्येषु" इति धर्मश्रुतिः।

तस्यामेव [१५]रजस उद्रेचनमुपात्तरजोऽतिमात्रत्वम्—

"अथ त्रिगुणा ह्येव प्रकृतिरगुणो वाव विष्णुः स यदा [१६]ह्यरजा रजोऽस्या उद्धर्धयत्येषा वाव सृष्टिः स यदा ह्यसत्वः सत्वमस्या उद्धर्धयत्येषा[१७] वाव स्थितिः स यदा ह्यतमास्तमोऽस्या उद्धर्धयत्येष वाव लयः। नैनमेते गुणा अभ्युपस्पृशन्ति नैष एतान् गुणानभ्युपस्पृशत्यगुणो ह्येष भवति। अत्रैष श्लोको भवति। निर्गुणस्य गुणादानं प्रकृतेर्गुणवर्धनम्। न कदाचिद् गुणैरेष स्पृश्यते परमो हि सः" इति चाक्रायणश्रुतिः॥ * ॥

---

१ "तात्विकदेवता" इति प्र. पाठः।

२ "ते ये शतं तात्त्विक्यो—" इति प्र. पाठश्च प्रामादिकः।

३ "एतावान् पुरुहूतः" इति प्र. पाठः।

४ "ये ते शतम्" इति प्र. पाठः प्रामादिकः

५ शतमिति बहुत्वमात्रार्थम्। कोटिगुणमित्यन्यत्र स्फुटवचनात्।

६ "भक्तिस्तावज्ज्ञानम्" इति प्र. पाठः।

७ "परमानन्दो—" इति च।

८ "संस्कारको—" इति प्र. पाठः। "स कारको—" इति क्वचित्। विश्वः पूर्णः। विविधं नुदति प्रेरयतीति विनोदः। स्वयमपगतनोदकः। सर्वं सम्यक् कारयतीति सङ्कारकः। विविधं च कारयति। स्वयमविकारको वा। कारयितृष्वधिकोऽधिकारकः।

९ "मिलितौ वा एतौ भगवतो—" इति प्र. पाठः प्रामादिकः।

१० "यो वाऽनुग्रही" इति प्र. पाठः।

११ "यो वाऽनुगृहीतो—" इति च।

१२ "भक्तस्तं वा ब्रह्मानु—" इति च।

१३ महत्तत्त्वमानिनि चतुर्मुखे।

१४ "देवर्षिपितृषु" इति प्र. पाठः।

१५ "रजउद्रेचनमुपात्त—" इति क्वचित्। "रजस उद्रेचनादुपात्त—" इति प्र. पाठः।

१६ "यदा अरजा—" इति प्र. पाठः प्रामादिकः।

१७ "सत्वमुद्धर्धयत्येषा" इति प्र. पाठः।

[1]नैवाळीकं भरत्येव वचस्ते मधुसूदन ।
अम्बाया इव हि प्रायः कन्यावादरतिः क्वचित्[2] ॥ ५१ ॥

[3]मातुः कन्याप्रदानवाद रतिर्यथा नाळीकं भरति[4] प्रायः, तथा ते वचः क्वापि[5] नाळीक भरत्येव ॥ * ॥

[6]मुग्धायाश्चापि पुंश्चल्या मनोऽभ्येति नवन्नवम् ।
बुधोऽसतीं न बिभृयात् तां बिभ्रदुभयच्युतः ॥ ५२ ॥

यामसतीं बुधो न बिभृयात्, यां च तां बिभ्रद् दृष्टादृष्टच्युता भवति तस्या अपि पुंश्चल्यास्त्वयि मनो नवन्नवमभ्येति ॥ * ॥

[7]"अमुग्धैव तु मुग्धेव त्वदुःखा दुःखितेव च । श्रीर्दर्शयेद्धरिश्चैव नैवैतौ मोहदुःखितौ ।

---

१ "नैवालीकमहं मन्ये वचस्ते" इति प्र. पाठः । "नैवाळीकं भवत्येव" इति पाठान्तरम् ।

२ "कन्यायाः स्याद् रतिः क्वचित्" इति प्र. पाठः । अम्बायाः कन्यावादे स्वपुत्रीविवाहविषयायां कथायां रतिः प्रीतिर्यथा सहजाऽत एव प्रायो नाळीकं भरति नाप्यप्रामाणिकतां धत्ते तथा तव वचः क्वचिदपि नाप्रामाणिकता धत्ते । सदाऽपि सत्यवचनो भवान् । न विनोदार्थमपि व्यर्थवचनः ।

३ "मातुः" इत्येतत् प्र. पाठे न पठ्यते । असङ्गतं तत् ।

४ "नालीकं भवति" इति प्र. पाठः । कोशेषु च क्वचित् । अळीकमित्यप्रामाणिकताम्, विनोदाद्यर्थतया व्यर्थवचनतां च । मृषोद्यमिति यावत् । न मिथ्या भणसि । नापि वृथा भणसि । त्वत्सृष्टे जगति कथं त्वमेवाळीकं कुर्याः? त्वमेव हि जगत्पितृमातृगतिः । जगत् तव सन्ततिः । नहि मातृहृदयं स्वसन्तानेऽळीकं सहते ।

५ "क्वचिदपि नालीकं भवत्येव" इति प्र. पाठः ।

६ "व्यूढायाश्चापि" इति प्र. पाठः । मुग्धायाः मोहग्रस्तायाः, अत एव पुंश्चल्याः प्रतिदिनं नवन्नवं पुरुषान्तरमभिसरन्त्या अपि मनः त्वयि दृष्टे सति त्वय्येव नवन्नवं सदभ्येति । नान्यत्र प्रसरति । किमु त्वदेकनिष्ठाया मम । कीदृश्याः पुंश्चल्याः? यामसतीं बुधो विवेकी न बिभर्ति, यां च तां बिभ्रच्च इह चामुत्र च सुखाद्विच्युतो भवति ।

७ नन्वत्राध्याये "अथाऽऽत्मनोऽनुरूपं वै भजस्व क्षत्रियर्षभम्" (२१) इत्यादि रुग्मिणीं प्रति भगवद्वचनम्, तच्छ्रवणेन च "आश्रुत्य भीता हृदि जातवेपथुश्चिन्तां दुरन्तां महतीमवाप" (२६) इति रुग्मिण्याः शोकावेगस्ततस्तदनुगुणमुत्तरदानमित्यादि कथं युज्यते? नहि सर्वज्ञयोस्तयोः मिथ्यावचनं मृषावचनं वा सम्भवतीत्युक्तम् । नच "तद्दर्पघ्न उपारमत्" (२५) इत्युक्ते रुग्मिणीदर्पनिरसनार्थत्वान्न मृषेदमिति वाच्यम् । नहि जगन्मातुर्भगवति दर्पो युज्यते । अतः समग्रस्याध्यायस्य भावमाह—अमुग्धैव तु मुग्धेव । नचेदं वृथा । अयोग्यनरमोहनार्थत्वात् । तथाहि शास्त्रेषु बहुधा दृश्यते ।

मिथोऽपि तादृग् वचनमाकारं चैव लीलया । दर्शयन्तौ नृणां मोहं कुर्यातां[1] स्वात्म-दर्शनात्" इति कापिलेये[2] ॥ * ॥

इति दशमस्कन्धे द्व्यशीतितमोऽध्यायः[3]

[[4]चतुर्नवतितमोऽध्यायः]

तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः ।
अपि चक्रुः प्रवचनमेकं शुश्रूषवोऽपरे[5] ॥ ११ ॥

"[6]सनकाद्याः समाः सर्वे तत्र श्रेष्ठः कुमारकः । मरुतश्च समाः सर्वे सप्त तेषु प्रधानकाः"

---

१ "कुर्यास्ताम्" (?) इति प्र. पाठः । २ "कापिलेययोगे" इति क्वचित् ।

३ प्र. तात्पर्यपाठरीत्या चायं पञ्चसप्ततितमोऽध्यायः । विजयध्वजीयादिरीत्या च तथेत्युक्तम् । इतः परं प्र. पाठे एवमानुपूर्वी पठ्यते—

"गात्रान्तराण्यपिदधुः । पिधातव्येभ्योऽन्यान्यपि । येषां पिधानेन क्लेशो भवत्यात्मनः । निजभर्तुरप्यपिदधुः । निर्लज्जा इत्यकामो भवत्यसाविति भयात्" ॥ * ॥

"न स्नेहभङ्गो देव्यास्तु न भयं केशवस्य तु । स्नेहभीत इवाथापि नोचे रुग्मिवधे हरिरिति ब्रह्माण्डे" ॥ * ॥

इति दशमतात्पर्ये षट्सप्ततितमोऽध्यायः ॥ * ॥

प्राचीनकोशेषु त्वयं तात्पर्यभागः स्कन्धान्ते पठ्यते ।

ततश्च प्र. पाठे "अजितं जरासन्धम्–" इत्यादि तात्पर्यं अशीतितमाध्यायत्वेन पठ्यते । ततश्च "जानन् साल्वकृताम्–" इत्यादि षडशीतितमाध्यायत्वेन । तदेतदध्यायद्वयं प्राचीनपाठे पूर्वमेव (७६-८०) पठितमिति नात्र पठनीयम् ।

४ श्रीधरीयादिरीत्या चायं सप्ताशीतितमोऽध्यायः ।

५ सनकाद्यास्तुल्या अपि ब्रह्मविचारश्रवणकौतुकिनः स्वेषु एकं सनन्दनं प्रवचनं प्रवक्तारं चक्रुः । अपरे शुश्रुवुः ।

६ मूले सनकाद्याश्चत्वारोऽपि समाना इति प्रतीयते । तत्र विशेषमाह—सनकाद्याः । तुल्या इति सामान्य-वचनम् । सनत्कुमारस्तु तत्रापवादः । यथा मरुतः समाना इत्युक्तेऽपि सप्त प्रधाना इत्येतन्न विरुध्यते । तथाहि सनकः सनन्दनः सनातन इति त्रयः सोमाधिकारिशतदेवेभ्योऽवमा एकोनविंशकक्ष्याप्रविष्टाः कश्यपादि-समानाः । सनत्कुमारस्तु कामावतारत्वादिन्द्रेण तुल्योऽष्टमकक्ष्याप्रविष्टः । एवमेकोनपञ्चाशन्मरुत्सु प्राणापाना-दीन् पञ्च, अहम्प्राणं प्रवहं चेति सप्त विहायान्ये द्विचत्वारिंशन्मरुतः शतस्थशेषा अष्टादशकक्ष्याप्रविष्टाः । यद्यपि

इत्यृक्संहितायाम्[1] ॥ * ॥

स्वसृष्टमिदमापीय शयानं सह शक्तिभिः ।
तदन्ते बोधयाञ्चक्रुस्तल्लिङ्गैः श्रुतयः परम्[2] ॥ १२ ॥

"श्रीर्भूमिरिति रूपाभ्यां[3] प्रकृतिर्विष्णुना सह । शेते श्रुतिस्वरूपेण स्तौति ब्रह्मलये हरिम् । एकाऽप्यनन्तरूपा सा वाक्यभेदात् सरस्वती[4] । अनादिनिधना नित्या स्तौति नारायणं प्रभुम्" इति ज्योतिःसंहितायाम्[5] ॥ * ॥

"[6]सर्वदा जयतो विष्णोर्जयस्तस्य प्रकाशनम् । श्रवणं दृष्टिरित्यादि [7]प्रार्थ्यं तज्ज्ञापनं स्मृतम् । शृणोति पश्यति ह्येष जयतीत्यादिकं स्वतः । जय पश्य शृणुष्वेति तत्तज्ज्ञापनमेव तु" इति विमलसंहितायाम् ॥ * ॥

"श्रीर्भूर्दुर्गेति या भिन्ना प्रकृतिः शक्तिरुच्यते । [8]विष्णुस्वरूपशक्तेः सा शक्यत्वा-

---

प्राणादयः पञ्चापि उक्तशेषाः शतस्था इति तस्यामेव कक्ष्यायां पठ्यन्ते । तथाऽपि इतरेभ्यस्ते किञ्चिदिवाधिकाः । यथा समकक्ष्योऽपीन्द्रः कामात् किञ्चिदिवाधिकः । प्रवाहवायुस्तु भूतमानी सूर्यसोमधर्मेभ्योऽप्यधिक एकादशकक्ष्याप्रविष्टः । अहम्प्राणस्तु ततोऽप्यधिकः इन्द्रादनन्तरः नवमकक्ष्यापठित इति तारतम्यक्रमः । एतेन यदत्र विजयध्वजीयम्—"योऽत्र प्रवक्ता स श्रेष्ठ इत्यत्र तात्पर्यं ज्ञातव्यम्" इति तत् प्रक्षिप्तमिति स्फुटम् । योऽत्र प्रवक्ता न स श्रेष्ठः । यः श्रेष्ठः न स प्रवक्ता । सनन्दनो ह्यत्र वक्ता न सनत्कुमारः । एतेनैव तात्पर्यवचनेन "मानसानां मुनीनामूर्ध्वरेतसाम्" (९) इति मूले प्रकृता मुनयः सनकाद्याश्चत्वार इति च सूचितं भवति ।

१ "इति रुग्मसंहितायाम्" इति क्वचित् ।

२ प्रळये जगदिदं स्वोदरे निवेश्य शक्तिभिः प्रकृतिरूपैः श्रीभूदुर्गाख्यैः सह शयानमिव स्थितं भगवन्तं तदन्ते प्रळयावसाने श्रुतयः श्रुत्यभिमानिनी बहुरूपा श्रीरेव तल्लिङ्गैः भगवदसाधारणगुणप्रतिपादकैर्वचनैः स्तुवन्ती बोधयामासेव ।

३ दुर्गारूपस्याप्युपलक्षणमिदम् । "श्रीर्भूर्दुर्गेति या भिन्ना....ताभिः शयानम्" इत्युत्तरत्र स्फुटवचनात् ।

४ सरस्वती वेदमानिनी प्रकृतिः ।

५ "ज्योतिसंहितायाम्" इति क्वचित् ।

६ ननु कथं नित्यविजिताखिलः जयजयेति बोध्यते? आह— सर्वदा । तथाच जयेति जयं प्राप्नुहीति नार्थः । किन्तु तव नित्यविजयस्वरूपमस्मासु प्रकाशयेति । एवं श्रवणादिकमपि यदा प्रार्थ्यते 'मम प्रार्थनां शृणु' 'करुणार्द्रदृशा पश्य' इत्यादि तत्रापि श्रवणादिज्ञापनमेव प्रार्थ्यम् । अस्मद्वाक्यश्रवणं कृपावलोकनं चानुग्रहदानेन प्रकाशयेति । तदियं जय पश्य शृणुष्वेत्यादिप्रयोगे गमनिका । यत्र तु जयति शृणोतीत्यादिः प्रयोगः तदा स्वतो नित्यसिद्धस्य जयश्रवणादेरनुस्मरणमिति ।

७ "प्रार्थनं ज्ञापनम्" इति क्वचित् ।

८ "विष्णोः स्वरूपशक्तेः" इति प्र. पाठः । "विष्णुः स्वरूपशक्तिः" इति क्वचित् । शक्तिस्वरूपाद् विष्णोर्भिन्ना शक्तिः प्रकृतिः । सा श्रीर्भूर्दुर्गेति भिन्ना ।

च्छक्तिरेव तु[१]। नित्याव्यवहितत्वात्तु विशेषाच्छक्तिनामिका[२]। यथैव पङ्कजं ब्रह्मा रुद्र इत्यादिकं पदम्। ताभिः शयानं पुरुषं सैव तु श्रुतिरूपिणी। अस्तौत् [३]प्रकाशयाऽत्मानं प्रकृतिं जीवबन्धनाम्[४]। जहि दोषैर्यया सर्वे गुणा जीवस्य संवृताः'' इति तन्त्रभागवते ॥ * ॥

[५]''श्रीः परा प्रकृतिः प्रोक्ता ब्रह्माणी त्ववरा ततः। उमाशचीमुखास्तस्या अवराः सम्प्रकीर्तिताः। अथान्ये प्रकृती दुष्टे[६] नृषु प्रातिस्विकं स्थिते। स्वगुणाच्छादिका त्वेका परमाच्छादिकाऽपरा। स्वगुणाच्छादिकां हत्वा परमाच्छादिकां परः। [७]व्याधुय मोक्षपदवीं ददाति पुरुषोत्तमः। अजे[८] द्वे अपि ते प्रोक्ते अनन्ताऽऽच्छादिनी हरेः[९]।

---

१ ''शक्यत्वाच्छक्तिरुच्यते'' इति क्वचित्। स्वरूपशक्तिस्तु शकनं शक्तिः। सा भिन्ना प्रकृत्याख्या शक्तिस्तु शक्यते नियोक्तुमिति शक्यत्वाच्छक्तिः। ननु तर्हि सर्वमपि भगवच्छक्तिः। सर्वस्यापि शक्यत्वात्। नैवम्। यतो विशेषतो व्यपदेशा भवन्तीत्याह—नित्याव्यवहितत्वात्। यथा स्वरूपशक्तिः। तत्रेमे दृष्टान्ता भवन्ति। यथा पङ्कजम्। नहि पङ्के जनिमात्रेण भेकादिकं पङ्कजं भवति। यथा च ब्रह्मेतिपदं जीवसामान्यवाच्यपि जीवविशेषे कमलासने विशिष्य भवति। यथा वा रुद्र इति। रोदितीति हि रुद्रः। नहि योयो रोदिति सस रुद्रो भवति। किन्तु गिरिश एव।

२ ''-नामका'' इति क्वचित्।

३ कथमस्तौत्? प्रकाशयाऽत्मानम्। जीवाच्छादिकां प्रकृतिं जहि, परमाच्छादिकां च जहि। तेनाऽत्मानं प्रकाशय। यया प्रकृत्या दोषैः जीवस्य गुणाः गृहीताः संवृताः। एतेन ''जयजय जह्यजामजित दोषगृहीतगुणाम्'' इति श्रुतिगीतावाक्यभागो व्याख्यातः।

४ ''-बन्धनम्'' इति प्र. पाठः।

५ ननु अजा प्रकृतिरिति वेदाभिमानिनी मूलप्रकृतिरुक्ता। तत् कथं तां जहीति प्रार्थना? नैवम्। इयमन्यैव प्रकृतिरजेत्याह—श्रीः परा।

६ ''प्रकृती दृष्टे'' इति क्वचित्।

७ स्वगुणाच्छादिका तामसी प्रकृतिः। अतस्तां हत्वा तमो गमयति। तद्विमुक्तं च सात्विकजीवं मोक्षं गमयति। परमाच्छादिका तु राजसी प्रकृतिः। अतो न तस्या हननं तमसि पातनं वा। किन्तु लिङ्गदेहानिरुद्धदेहयोर्मध्ये स्थितायास्तस्या जीवदेहादपसारणमेव। नित्यसंसारित्वात् तस्याः। अतः स्वगुणाच्छादिकां हत्वा तमो गमयित्वा परमाच्छादिकां तु केवलं व्याधुय अपसार्य जीवस्य मोक्षपदवीं ददाति पुरुषोत्तम इत्याह। तथाहि विष्णुरहस्यवचनमामनन्ति—''मोक्षाधिकारिणामेव ज्ञानैश्वर्यादयो गुणाः। तान् समाच्छादयत्येका तमोगा सा प्रकीर्तिता। जीवं प्रति महाविष्णुं या त्वाच्छादयति प्रभो। साऽपरा प्रकृतिर्ज्ञेया परमाच्छादिका स्मृता। तत्र विष्णो महाभाग स्वगुणाच्छादिकां हन। परमाच्छादिकां दुष्टां व्याधुय च महाप्रभो। मोक्षं देहि महाभाग त्वद्भक्तानां सदात्मनाम्'' इत्यादि। ''एतेन द्विविधामपि प्रकृतिं व्याधुय हत्वा च'' इति व्याख्यान्तश्चिन्त्याः।

८ ''जडे द्वे अपि ते प्रोक्ते''(?) इति प्राचीनकोशेषु। चिन्त्यमौचित्यम्।

९ द्वे अपि अजे न जायेते। अनादी। अपितु न द्वे अपि अनन्ते। किन्तु हरेराच्छादिनी परमाच्छादिन्येवानन्ता। अपरा तु म्रियते। मृत्वा तमो गच्छति चेत्युक्तम्। उभयोरपि हननवादिनो व्याख्यातारः स्फुटमेतद्वचनविरोधादुपेक्ष्या एव। यत्तु 'अनन्ताच्छादिनी' इत्येकं पदमिति कृत्वा व्याख्यानं सा तु महती भ्रान्तिः पूर्वापरासङ्गतेरनन्वयाच्च।

71

[1]न विष्णुं छादयत्येषा तज्ज्ञानं छादयेत् परम् । जीवस्यैव [2]न तत्रापि ब्रह्मादेरस्ति सा क्वचित् । सर्वावरे ते प्रकृती सततं दुःखितेऽपिच[3] । पिशाचवत् समुद्दिष्टे पुरुषस्याऽधिकारणे[4] । प्रेरकास्तु तयोर्देव्य इन्दिराद्याः सुखात्मिकाः" इति महातत्त्वविवेके ॥ * ॥

> यथा शयानं सम्राजं वन्दिनस्तत्पराक्रमैः ।
> प्रत्यूषेऽभ्येत्य सुश्लोकैर्बोधयन्त्यनुजीविनः ॥ १३ ॥

"राजवज्जयशब्दाद्या नित्यबुद्धस्य बोधनम् । विडम्बमात्रं[5] क्वैवास्य निद्रा विद्यापतेर्हरेः" इति कालविवेके[6] ॥ * ॥

> [7]जयजय जह्यजामजित दोषगृहीतगुणां
> त्वमसि यदात्मना समवरुद्धसमस्तभगः ।
> अज जगदोकसामखिलशक्त्यवबोधक ते
> क्वचिदजयाऽऽत्मनाऽनुचरतोऽनुचरेन्निगमः ॥ १४ ॥ १ ॥

---

१ ननु स्वगुणाच्छादिका जीवं प्रत्येव जीवगुणानाच्छादयति । किं तथा परमाच्छादिका परस्यैव तद्गुणज्ञानं प्रतिबध्नाति ? नेत्याह—न विष्णुं छादयत्येषा । किन्तु जीवस्य विष्णुज्ञानमेव च्छादयेत् ।

२ जीवेष्वपि न ब्रह्मादिदेवानां साऽस्ति । किन्तु मनुष्यादीनामेवेत्याह— न तत्रापि ब्रह्मादेर्देवतागणस्य साऽस्ति । तेषां जातापरोक्षत्वात् । नित्यपरोक्षज्ञत्वाच्च । इदमुपलक्षणम् । स्वगुणाच्छादिकाऽपि तेषां नातीव सम्भवति ।

३ तमोयोग्यत्वात् स्वगुणाच्छादिका सततं दुःखिता । परमाच्छादिका तु नित्यसंसारित्वात् सुखदुःखेता । "दुर्दुःखमिति सम्प्रोक्तं सुखं खमिति चोच्यते" इति वचनाद् दुःखपदमेव सुखं दुःखं चाऽह । अत एव सुखदुःखफलादपि "रजसस्तु फलं दुःखम्" इति गीतायामुक्तम् । एतमर्थविशेषं सूचयितुमेवाप्रगृह्य प्रायुङ्क्त ।

४ "पुरुषस्याधिकारिणः" इति प्र. पाठः । पुरुषस्याऽधेर्दुःखस्य कारणभूते । चिदानन्दरूपो हि जीवस्ताभ्यां दुःखमनुभवति ।

५ नित्यबुद्धस्य राजवद् बोधनं विडम्बमात्रम् । ६ "इति कापिलेये" इति प्र. पाठः ।

७ इतः परं पठ्यमानानि समग्राणि श्रुतिगीतावचनानि भगवत्पादैः तात्पर्ये पठित्वा व्याख्यातानि । तात्पर्यमूलकोशेषु सर्वत्रापि एतानि पद्यानि पठ्यन्ते । अत एव "इदानीं सर्वं श्लोकमनुवदति" इति प्रबोधिनीकृदप्याह । मूलश्लोकानुवादविरहितः प्रचलितस्तात्पर्यपाठः प्रामादिक एव । समग्रमूलप्रतीकग्रहणे चेदं बीजम्–यत् श्रीधरस्वाम्यादिभिः परिगृहीतः प्रचलितः श्रुतिगीतापाठः सर्वात्मना भिन्नः । तथाच यथावदर्थप्रकाशनाय यथावत्पाठप्रदर्शनमावश्यकमित्याचार्यैः समग्रः श्रुतिगीतापाठः समुद्धृत्य प्रकाशितो दयालुतमैरिति ।

दोषैः दुःखाद्यैः आनन्दाद्या जीवगुणा गृहीता[1] यया सा दोषगृहीतगुणा। त्वमसि यदात्मना समवरुद्धसमस्तभगः। यस्मात् त्वं स्वत एवानपगतपूर्णैश्वर्यादिगुणोऽसि। अतस्त्वदाभासस्य जीवस्य प्रकृतिगृहीतत्वादेव नैश्वर्याद्या गुणा अवभासन्ते। [2]जगदोकसां श्रीब्रह्मादीनामप्यखिलशक्त्यवबोधक[3]। क्वचित् सृष्टिकाले आत्मना जीवेन प्रकृत्या च प्रवर्ततस्ते अनुचरेद् वेदो विधिनिषेधरूपेण। अन्यदा स्तुतिमात्रो नतु जीवानां प्रयोजकः। तस्मात् सृष्टिं कृत्वा वेदैर्जीवान् बोधयित्वा तत्स्थामजां जहि।

॥ * ॥ [4]"जयजय हनहन प्रकृतिं द्रावयद्रावय भिन्धिभिन्धि[5] दुःखं तमोरतिमजित परम परमेशान[6] वासुदेव वैकुण्ठ नारायण हृषीकेशानया हि जीवगुणा विसंवृता अधिसंवृताः[7]। एष[8] ह्यानन्दोऽजरोऽमरोऽधिशक्तिमांस्त्वदाभासस्त्वया तथाऽधिसंविभाव्यो[9] यतः परः परमेश्वरः[10] परज्ञानः परानन्दः परशक्तिः परश्रीः परयशाः परप्रवृत्तिर्नित्यमेव[11] स्वतोऽसि त्वं[12] रमा-

---

१ "दुःखाद्यैर्जीवगुणा आनन्दाद्या गृहीताः" इति प्र. पाठः। गृहीताः संवृता इत्यर्थः।

२ जगदोकसां जगतामाश्रयभूतानाम्। ३ "श्रीब्रह्मादीनामप्यवबोधक" इति क्वचित्।

४ एतच्छ्रुतिगीतामूलभूतां श्रुतिमाह—जयजय। स्वजीवाच्छादिकां हनहन। परमाच्छादिकां द्रावयद्रावय।

५ "भिन्दभिन्द दुःखम्" इति क्वचित्। दुःखं तमोगुणे रतिं च भिन्धि। तमः अज्ञानं अरतिं तन्द्रीं भगवत्यरतिं वा भिन्धीति वा।

६ "-मजित परम रमेशान" इति प्र. पाठः। "-मजित पर परमेशान" इति क्वचित्। "-मजित परमेशान" इतीयदेव क्वचित्।

७ "विसंवृताधिसंवृताः" इति क्वचित्। विसंवृता विविधतया विशेषेण च संवृताः। तमेव विशेषमाह—अधिसंवृताः। अधि अधीनतया स्ववशे गृहीत्वा संवृता जीवगुणा अनया प्रकृत्येति। अत एव 'गृहीतगुणाम्' इत्युक्तं मूले। "अधिरध्ययनैश्वर्यवशित्वस्मरणाधिके" इति ह्यभिदधति।

८ आवृतत्वादेवास्य सहजगुणा न भासन्त इत्याह— एष हि। जीवो हि स्वभावत आनन्दमयः जरामरणवर्जितः मोक्षे ब्रह्मणा सह सायुज्याद्यधिकशक्तिमांश्च। यतस्तव ज्ञानानन्दमयस्य जीव आभासः प्रतिबिम्बः। किन्त्वजां हत्वा तस्य तथाविधां पिहितामधिशक्तिं पुनर्दत्वा त्वयैव स सम्भावनीयः त्वमेव हि परो विलक्षणः श्रेष्ठश्च पूर्णज्ञानादिः नित्यं स्वत एवासि। जीवस्तु त्वदधीनः त्वद्दत्तज्ञानादिः।

९ "तथाऽभिसंविभाव्यो-" इति प्र. पाठः।

१० "परमः परमेश्वरः" इति क्वचित्। "परः परेश्वरः" इत्यपि क्वचित्।

११ "नित्ययेव त्वं स्वतोऽसि" इति च।

१२ त्वं रमायाः, त्वं विरिञ्चस्य, द्विरुक्तिरवधारणार्था, त्वमेव च रुद्रादेः शक्तिदोऽसि। शक्तिदानमेव विवृणोति-प्रवर्तकोऽसि। क्वचित् कांश्चित् प्रवर्तयसि। क्वचित् कांश्चिन्निवर्तयसि। तदेवं त्वमनोऽसि। अन चेष्टायाम्। सर्वेषां सर्वात्मना सर्वावस्थाप्रेरकोऽसि। "आप्तेरादिमत्त्वात्" इत्यादिना अकार आदिवचनोऽप्यवगम्यते। तेन अनः अनादिरसि। अन्ये सर्वेऽपि त्वयाऽऽदिमन्तः। त्वमेक एव चानन्तोऽसि। सर्वात्मना नाशरहितः। देशतो गुणतश्चानन्तः।

यास्त्वं विरिञ्चस्य रुद्रेन्द्रसोमसूर्यमुखानामदभ्रशक्तिदोऽसि प्रवर्तकोऽसि निवर्तकोऽस्यनोऽस्यनन्तोऽसि[1] सृजतो हि ते[2] श्रुतयोऽनुवर्तन्ते नैवासृजतः कं विदधते[3] कं वा निषेधन्ति स्तुतिमात्रा एव ते स्युः प्रभो विभो समास्व व्यास्वोत्तिष्ठ प्रचर विचर सन्धिनुसन्धिनु मा ते क्षणोऽत्यगान्मा ते क्षणोऽत्यगात्" इति शाण्डिल्यश्रुतिः ॥ * ॥

"[4]लयस्य त्वष्टमो भागः सृष्टिकाल उदाहृतः । तत्रैव वेदसञ्चारो ह्यन्यदा स्तुतिमात्रकाः" इति नारदीये ।

[5]सृष्टिकाल एव गुणवृत्तयः सर्वदा निर्गुणे[6] परमेश्वर एव वर्तन्ते श्रुतय इति "कथं चरन्ति श्रुतयः" इत्यस्य परिहारः । [7]यत्प्राप्त्यर्थं यन्नियमाद् विधिनिषेधा वर्तन्ते स त्वमित्यादि विधिनिषेधानां स्तुतिपरत्वम् ।

---

१ "निवर्तकोऽस्यजोऽस्यनन्तोऽसि" इति प्र. पाठः । "निवर्तकोऽस्यनन्तोऽसि" इति क्वचित् ।

२ सृष्टिं विना विधिनिषेधयोर्जीवेषु प्रवृत्त्यभावात् वेदैर्जीवान् बोधयितुं सृष्टिं कुर्वित्याह —सृजतो हि । त्वयि सृष्टिकार्यं कुर्वति श्रुतयोऽपि विधिनिषेधरूपेण लोकेष्वनुवर्तन्ते । त्वयि सृष्टिमकुर्वति, प्रळयकाले विधेयस्यैवाभावात् कं वा विदधीरन् ? न तावता वैय्यर्थ्यं श्रुतीनाम् । यतस्तव स्तुतिमात्रा एव मुख्यतस्ताः । अतः प्रभो जीवबोधनाय सृष्ट्युन्मुखो भव । आदौ वासुदेवादिरूपेण समस्तो भव । ततश्च मत्स्यादिनारायणादिविश्वादिरूपेण विस्तृतो भव । तदर्थं योगनिद्रातः समुत्तिष्ठ । प्रकृष्टं विविधं च सृष्टिकार्यं चर । नेनाऽश्रितान् सन्धिनुप्रीणय । "भूत्यै निजाश्रितजनस्य" इति ह्युक्तम् । मा च स्मात्र कर्मणि विलम्बो भवदित्याह—मा ते ।

३ "कं वा विदधते" इति प्र. पाठः ।

४ प्रळयकाले स्तुतिमात्रा एव श्रुतयः स्युरित्युक्तम् । तस्यापवादमाह— लयस्य । लयकालस्य पुनश्चरमोऽष्टमो भागः सृष्टिकाल उदाहृतः । द्विपरार्धात्मको हि लयकालः । ब्रह्मणः शतवर्षरूपः । तत्र सार्धानि सप्ताशीतिवर्षाणि केवलं प्रळय एव । अवशिष्टेऽष्टमभागे सार्धद्वादशवर्षात्मके सृष्ट्यारम्भः । तस्मिन्नेवावसरे ब्रह्मादिदेवानां सृष्टेः । तत्र तु वेदानां विधिनिषेधात्मनाऽपि सञ्चारो वर्तते कथञ्चिद् । अन्यदा अवशिष्टप्रळयकाले तु केवलं स्तुतिमात्रकाः । तदेतद् विष्णुरहस्ये स्फुटम् —"अतीते प्रळये ब्रह्मन्नवशिष्टाष्टभागतः । योगनिद्रां तदा मुक्त्वा दृष्ट्वा तामन्तिकेऽभ्रिणीम् । चतुर्धा ह्यभवत् पूर्वं तथैवाभूत् ततो रमा" इति । "प्रळयः परसंख्याकः सार्धं द्वादशवर्षकम् । अष्टमांशो भवेत् सार्धे सप्ताशीत्यब्दके गते । योगनिद्रां विमुञ्चामि ततः क्रीडामि पूर्ववत्" इति च ।

५ श्रुतयस्तावत् सत्वादिगुणवृत्तयः विधिनिषेधपराः । "त्रैगुण्यविषया वेदाः" इति गीता च । अतो गुणातीते भगवति ताः कथं प्रवर्तेरन्निति परीक्षिता पूर्वपक्षितम्—"ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः । कथं चरन्ति श्रुतयः साक्षात् सदसतः परे" (९४-१) इति । प्रश्नोऽयमनया श्रुतिगीतया दत्तोत्तर इत्याह—सृष्टिकाल एव । 'अनिर्देश्यं कथं निर्दिशन्ति' इति प्रश्नशेषस्तूत्तरत्र परिहरिष्यते ।

६ "निर्गुणपरमेश्वर एव" इति क्वचित् ।

७ ननु 'ज्योतिषा यजेत' 'मा हिंस्यात्' इत्यादीनां विधिनिषेधवचनानां कथं स्तुतिमात्रत्वम् ? आह—

"[1]विध्यादीनां नियन्ता यः पूज्यः प्राप्यश्च तद्वताम् । इत्यादिस्तुतिरूपेण विध्यादिश्रुतयोऽपि तु । हरिं वदन्ति सर्वेषां तन्नामत्वादथापि वा" इति श्रुतिनिर्णये ।

पृथक्श्रुतित्वान्न पूर्वापरसम्बन्धः । उपलक्षणत्वादनन्तत्वाच्छ्रुतीनां सर्वश्रुत्यर्थोपबृंहितत्वाच्चैतेषां[2] श्लोकानां[3] न सर्वश्रुतीनां पृथगुक्तिः ।

"सर्वश्रुत्यर्थसम्पन्नान् श्लोकान् सत्यवतीसुतः । एकैकशाखास्तुत्यर्थान् जगौ सर्वोपलक्षणान् । बबन्ध तान् भागवते प्रतिश्लोकं पृथक्श्रुतीन्[4]" इति तन्त्रभागवते ॥ ॥ * ॥

[5]बृहदुपलब्धमेतदवशेषतया
यत उदगास्तमस्यविकृतेऽविकृतः ।
अत ऋषयो दधुस्त्वयि मनोवचनाचरितं
कथमयथा भवन्ति भुवि दत्तपदानि नृणाम् ॥ १५ ॥ २ ॥

[6]अविकृततमोविषये त्वमुदगाः । मूलप्रकृतेरपि त्वमधिको यतः । अतो बृहत्त्वेन ते स्वरूपमुपलब्धम् । इदमधिकमितोऽपीदमधिकमिति सर्वाधिकत्वेन ततोऽधिकाभावेनावशेषितत्वेन[7] ।

यत्प्राप्यर्थम् । यत्प्राप्त्यर्थम् यत्पूजात्वेन च यन्नियतत्वाच्च ज्योतिषा यजेत मा वा हिंस्यात् स त्वमित्यादिवाक्यसमन्वयः ।

१ पदसमन्वये सदा स्तुतिमात्रा एव । न कदाऽपि विधिनिषेधपराः । अत्र श्रुतिनिर्णयसंवादमाह—विध्यादीनाम् । "नियन्ताऽयम्" इति क्वचित् पाठः । सर्वेषां तन्नामत्वं तु "ज्योतिः षः प्राणरूपतः । आयज्ञेतश्चाऽयजेतः" इत्यादिनाऽऽचार्यैरेवान्यत्र दर्शितम् ।

२ "–तत्वाच्च तेषाम्" इति "तत्वाच्चैव तेषाम्" इति च क्वचित् ।

३ श्लोकशब्दः छन्दःसामान्यवाची विशिष्याष्टाक्षरपादस्यानुष्टुभो वाची च । तद्यथा वसुशब्दो देवतासामान्यवाची विशिष्याष्टवसुवाची च । तत्रोऽत्र गाथासु श्लोकशब्दप्रयोगो युक्तः । अत एव भागवततन्त्रेऽपि "श्लोकान् सत्यवतीसुतः" इत्युक्तम् । युक्तश्च भगवद्यशोगानरूपे गाथाबन्धे श्लोकशब्दः ।

४ "पृथक् श्रुतिः" इति प्र. पाठः । "पृथक् श्रुतीः" इति क्वचित् ।

५ "जयजय" इत्यादिपूर्वपद्यस्य नर्कुटकाख्यं नाम छन्दः । "तन्नर्कुटकमाख्यातं नजभैर्जजलगैर्युतम्" इति तल्लक्षणात् । नर्दटकमिति च वदन्ति । अस्मिन् पद्य उत्तरार्धे नर्कुटकमेव । पूर्वार्धे तु तृतीयजगणलोपेन त्र्यक्षरोनम् । गाथास्वेवमनिर्दिष्टा गणव्यवस्था भवन्ति । एतदप्युक्तं मन्दारमरन्दे—"अन्यान्यसमवृत्तानि गाथामाहुर्मनीषिणः" इति ।

६ अविकृते तमसीति विषयसप्तमी । तम इति तदभिमानिनी दुर्गा गृह्यत इत्याशयेनाऽह—अविकृतेत्यादि ।

७ तथाचायं पूर्वार्धार्थः—ब्रह्मादिकं सर्वं जगद् विकृतम् । क्षरमित्येतत् । भवांस्तु ततोऽधिकः । अविकृतत्वात् । अक्षरत्वात् । यद्यपि मूलप्रकृतिरप्यविकृतत्वेनाक्षरा । अथापि न तया साम्यम् । यतस्त्वं तस्या अप्य-

"द्वितीयार्थे तृतीयार्थे पञ्चम्यर्थे च सप्तमी। चतुर्थ्यर्थे च सम्प्रोक्ता[1] विषयेति च तां विदुः[2]" इति महाव्याकरणे।

तमसोऽधिकोऽभव इत्यर्थः[3]। अतस्त्वं सर्वोत्तम[4] इत्येतत्पराण्येव मनोवचनाचरितानि दधतां नायथा तानि भवन्ति। यथा भूमौ पदं निक्षिपामीति प्रवर्ततो भूमेर्नान्यत्र भवति[5]। [6]उदकवृक्षादेर्भूम्यन्तर्भावात्।

धिकः। समतीतक्षराक्षरः। अतः अवशेषतया क्षराक्षरान्तगत्वेनाऽधिक्यतारतम्यावधितया एतत् तव स्वरूपं बृहत् सर्वाधिकं पूर्णमिति वेदेषूपलब्धमिति।

१ "तृतीयार्थे चतुर्थ्यर्थे च सप्तमी। पञ्चम्यर्थे च सम्प्रोक्ता" इति प्र. पाठः।

२ विषये इति च तां विदुरिति च्छेदः। या विषयसप्तमी तां कचिद् द्वितीयार्थे तृतीयार्थे पञ्चम्यर्थे च विदुः। क्वचित्तु चतुर्थ्यर्थे च। वैरल्याच्चतुर्थ्याः पृथगुक्तिः। द्वितीयार्थे यथा—शास्त्रेष्वधीती। यः शास्त्राण्यधीते स स शास्त्रेष्वधीतीत्युच्यते। यथा वा भार्यायां विषये शङ्कते। भार्यां तच्छीलं शङ्कत इत्यर्थः। तृतीयार्थे यथा–धने विषये तृप्तः। धनेन तृप्तः। यथा वा ज्ञाने विषये सम्पूर्णः। ज्ञानेन सम्पूर्ण इत्यर्थः। पञ्चम्यर्थे यथा संसारे विषये विरक्तः। संसाराद् विरक्तः। यथा वा सत्ये विषये न प्रमदितव्यम्। सत्यान्न प्रमदितव्यम्। चतुर्थ्यर्थे यथा—कामिन्यां विषये प्राणांस्त्यजति। कामिन्यै प्राणांस्त्यजति। अतस्तमस्युदगा इत्यस्य तमसोऽप्यधिकोऽभव इत्यर्थः सुदृढ इत्यर्थः।

३ "–धिको भवानित्यर्थः" इति प्र. पाठः प्रामादिकः।

४ "सर्वोत्तम इत्येव त्वयि मनो–" इति प्र. पाठः। "सर्वोत्तम इति मनो–" इति क्वचित्। "सर्वोत्तम इत्येवं मनो-" इत्यपि क्वचित्।

५ "भवन्ति" इति प्र. पाठः। तथाचायमुत्तरार्धार्थः—अतः, यस्माद् वेदेषु सर्वाधिकत्वेन तव स्वरूपमुपलब्धं तस्मात्, अतः अनेनैव प्रकारेण, येन प्रकारेण वेदेषूपलब्धम्, सर्वोत्तमत्वेनेति यावत्। ऋषयस्त्वयि, मनोवचनाचरितमिति समासान्त एकवद्भावः। मनोवचनाभ्यां सहितमाचरितं वा। मनोवचनाचरितानि दधुः। मनसा त्वां सर्वोत्तमत्वेन स्मरन्तः, सदा त्वां सर्वोत्तमं वदन्तः, तदनुगुणान्येव च भवदाराधनादीनि कर्माण्याचरन्तः। ननु सर्वोत्तमत्वज्ञानमात्रेण कथं ते भगवज्ज्ञानिनः। नह्येकस्मिन् गुणे ज्ञातेऽनन्तगुणो गुणी शक्यं ज्ञातुम्? शक्यमिति लोकदृष्टान्तेन दर्शयितुमर्थान्तरन्यासेनाऽऽह—कथमयथा। भुवि सञ्चारार्थं भुवि दत्तानि निक्षिप्तानि नृणां पदानि अयथा कथं भवन्ति भूमेरन्यत्र निहितानि कथं भवन्ति? न भवन्ति। भूमिगतान्येव तानि भवन्ति। तथा भगवति निहितानि मनोवचनाचरितानि कथमयथा अभगवद्विषयाणि भवन्ति? न भवन्ति। भगवद्विषयाण्येव भवन्तीति फलितम्। इदमुक्तं भवति—महता पादप्रक्षेपेणापि सर्वां भूमिं सञ्चरितुं कोऽपि न प्रभवेत्। अथापि भूमावेकदेशेन सञ्चरन्नपि भूसञ्चारी भवति। एवं मनोवचनादिकं यद्यपि सर्वात्मना भगवति प्रणिधातुमशक्यम्। अथाप्येकदेशेन सर्वोत्तमत्वादिना निहितमपि भगवद्विषयमेव भवतीति।

६ ननु भूमौ देशाद् देशं सञ्चरन् क्वचिज्जले याति। क्वचिद्वृक्षादिमयनावादिना याति। क्वचिच्चाऽऽकाशे वायुयानादिना यायात्। तत् कथं भुव्येव दत्तपदः? आह—उदकवृक्षादेर्भूम्यन्तर्भावात्। आदिपदेन वाय्वादिकम्। तथाच जले दारुणि वायौ वा सञ्चरन् भूसञ्चार्येव भवतीति लोकव्यवहारसिद्धमेतत्।

"[1]आधारशक्तियुक्तत्वाद् भूरुदं च प्रकीर्तितम् । साऽपि वाय्वन्तरङ्गैव स ह्याधारोऽखिलस्य च" इति महासंहितायाम् ।

अत इति हेत्वर्थे [2]तथेत्यर्थे च । [3]तस्मात् बृहत्त्वेन दधुरिति[4] ।

"अतःशब्दस्तु हेत्वर्थे तथेत्यर्थे च वर्तते । उभयार्थे च भवति [5]यथा शब्दविदो विदुः" इति शब्दनिर्णये ।

उपलब्धं वेदेषु ।

॥ * ॥ "[6]बृहद्धि दृष्टमवशेषितं यत् स्वरूपमीशस्य तमोऽधिकस्य । सर्वाधिकत्वेन तमो हि दुर्गा ततस्तथैनं विबुधा यथाऽगुः" इत्यौद्दालकायनश्रुतिः ॥ * ॥

[7]अनिर्देश्यमप्येकदेशनिर्देशेन निर्दिष्टं भवतीत्युक्तम्—"कथमयथा भवन्ति" इत्यनेन । यथा सर्वां भूमिमसञ्चरन्नप्येकदेशसञ्चारेण भूसञ्चारी भवति तथेति ।

"निरपेक्षबृहत्त्वस्य ज्ञाताज्ज्ञातं भवेत् परम् । बृहत्त्वमेव तु गुणैः सर्वैरुद्दिश्यते यतः" इति मान्यसंहितायाम्[8] ॥ * ॥

---

१ प्रमाणसिद्धमुपपन्नं चैतदित्याह—आधारेत्यादि । सर्वमत्र स्थितं भवतीति भूराधारस्थानमुच्यते । निरुक्तिसामान्यादुदकं च भूरित्युच्यते । साऽपि भूः वाय्वन्तरङ्गा । वायुरन्तरङ्गः मूलं यस्याः सा । वायुर्हि मूलधारकः । तथाच जलाद्यावृता मही तां परितः प्रवहन्ती वायुकक्ष्या चेत्येतत् सर्वं भूरित्युच्यत इति सर्वं सूपपन्नम् ।

२ प्रकारार्थ इत्यर्थः । अतः अनेन सर्वोत्तमत्वेन प्रकारेणेति व्याख्यातं हि पुरस्तात् ।

३ अर्थद्वयमेव स्फुटमाह—तस्मात् । तस्माद्धेतोरिति हेत्वर्थे । बृहत्त्वेन प्रकारेणेति तथेत्यर्थे । यत् केषाञ्चिद् व्याख्यानम् 'बृहत्त्वेनेत्यध्याहारः' इति, तदसङ्गततमम् ।

४ "बृहत्त्वेनादधुरिति" इति प्र. पाठः ।

५ "तथा" इति क्वचित् । अतःशब्दः क्वचिद्धेत्वर्थ एव । क्वचित्तथेत्यर्थ एव । क्वचिदुभयार्थेऽपि भवति । हेत्वर्थे प्रकारार्थे च । यथा प्रकृते । यत् केचिद् व्याचक्षते—"उभयमित्यर्थे" इति, अद्भुतमहो तेषां व्याकरणपाटवम् ।

६ अस्याः श्रुतिगीताया मूलभूतां श्रुतिमाह– बृहद्धि । या तमोऽभिमानिनी दुर्गा ततस्तमसोऽप्यधिकस्य यदीशस्य स्वरूपं तत् सर्वाधिकत्वेनावशेषितं बृहद्धि दृष्टं वेदेषु । ततस्तेनैव प्रकारेण सर्वाधिकत्वेनैनमीशं विबुधा अगुर्व्यजानन्निति । तच्च ज्ञानं यथा यथावदेव । नायथा । वेदानुसारि भगवद्विषयं ज्ञानं कथमयथा भवतीति । तथाच यथेति श्रुतिपदं भागवते कथमयथा भवतीत्यन्यप्रकारनिषेधेनावधारितं भवति ।

७ "ब्रह्मन् ब्रह्मण्यनिर्देश्ये" (९४–१) इत्याद्यश्लोके परीक्षित्कृतः, 'अनिर्देश्यं ब्रह्म श्रुतयः कथं निर्दिशन्ति' इति प्रश्नशेषोऽप्यनेन दत्तोत्तरः । सामस्त्येनानिर्देश्यस्याप्येकदेशेन निर्देशसम्भवादित्याह—अनिर्देश्यमपि । "अनिर्देश्यमप्येकदेशेन निर्दिष्टम्" इति प्र. पाठः ।

८ "मानसंहितायाम्" इति क्वचित् ।

[1]इति सूरयस्त्र्यधिपतेऽखिललोकमल-
क्षपणं कथामृताब्धिमवगाह्य तपांसि जहुः ।
किमुत पुनः स्वधामविधुताशयकालगुणाः
परम भजन्ति ये पदमजस्रसुखानुभवम् ॥ १६ ॥ ३ ॥

अनन्याश्रयत्वात् स्वधामा परमः । तेन विधुताः दुःखाद्याशयगुणा उत्पत्त्यादिकालगुणाश्च यैस्ते[2] मुक्तास्तापान् जहुरिति[3] किम्पुनः? कथामृताब्धिमवगाह्यापि जहुरिति यदिति हेत्वर्थ इतिशब्दः ।

॥ * ॥ "[4]त्यजन्ति तापं य उ ते भवत्कथा इति स्म मुक्ताः किमु ते स्वरूपगाः । परावरेशेश पदं भजन्तः परं परानन्दमनारतं ते" इतीन्द्रद्युम्नश्रुतिः ॥ * ॥

[5]द्रतय इवोच्छ्वसन्त्यसुहृदो यदि ते
महदहमादयोऽण्डमसृजन् यदनुग्रहतः ।
पुरुषविधान्वयोऽत्र चरमोत्तममध्यमादिषु य-
स्तव सदसतः परं प्रथयेदविशेषमृतम् ॥ १७ ॥ ४ ॥

---

१ अत्र प्रथमपादे प्रथमनगणान्त्याक्षरस्य द्वितीयजगणाद्यक्षरस्य च लोपेन द्व्यक्षरोनं नर्कुटकमन्ते सगणाधिकां प्रमिताक्षरामनुकरोति । सगणजगणौ ततः सगणद्वयं हि प्रमिताक्षरा । "सजससौ प्रमिताक्षरा" इति हि वदन्ति । अत्र पुनरन्ते सगणत्रयम् । एवं द्वितीयपादादावपि नगणं विहाय पूर्वपादानुवृत्तं सगणलयमेवानुवर्तमानः सगणमेव प्रायुङ्क्त । अन्यत् समानम् । उत्तरार्धे तु स्फुटं नर्कुटकम् ।

२ "दुःखाद्या आशयगुणा उत्पत्त्याद्याः कालधर्माश्च येषां ते" इति प्र. पाठः । आशयगुणा इत्यन्तःकरणधर्माः ।

३ "मुक्तास्तपांसि जहुरिति" इति क्वचित् । "मुक्तास्तापं जहुरिति" इति च क्वचित् ।

४ मूलश्रुतिमाह—त्यजन्ति तापम् । ये भवन्तं गुणार्णवं कथयन्ति ते भवत्कथाः । भवत्कथानिरता इति यावत् । इति यत् तदा मुक्तास्तापं त्यजन्तीति किमु ? येऽन्तःकरणादिहानेनाऽनन्दमयं निजस्वरूपं गताः परमानन्दं परमात्मानं सदा पश्यन्तो भजन्ति । परा मुक्तियोग्या अवरास्तदयोग्याः । तेषामीशो ब्रह्मा । तस्यापीशः ।

५ अत्र प्रथमपादेऽन्त्यजगणलोपेन त्र्यक्षरोनं नर्कुटकम् । प्रभद्रकच्छायानुकारि च । "प्रभद्रकं नजौ भजराः" इति तल्लक्षणम् । तथाचान्त्यरगण आद्याक्षरलोपेनेदमेकाक्षरोनं प्रभद्रकं च भवति । द्वितीयपादे तु स्फुटं नर्कुटकम् । तृतीयपादे पञ्चमजगणानन्तरं द्व्यक्षराधिक्यम् । तथाचान्त्यलगयोः स्थाने भगणो गुरुश्च । चतुर्थचरणे तु द्वितीयतृतीययोर्जभयोः स्थाने व्यत्यासेन सजयोर्निवेशः । अन्यत् समानम् । छन्दोव्यत्यासस्तु छन्दस्तुल्यरवद्योतनाय । यथा ह्यत्र प्रथमपादे त्र्यक्षरोनतया "अनिशमनुश्वसन्त्यसुखोद्धरिताः" इति स्वमूलश्रुतिं न केवलमर्थतः किन्तु

चरमोत्तममध्यमादिषु पुरुषेषु यस्तव स्वरूपं प्रथयेत् स पुरुषविधं त्वामन्वेति ।

"ब्रह्मैव मुक्तिगेष्वादिः सुरास्तदवरोत्तमाः । मध्यमा ऋषिगन्धर्वाश्चरमा मानुषोत्तमाः" इति प्रभावल्याम्[१] । "असक्तो [२]देहपुर्येष जीववद् देहगोऽपि यत् । अथवा पुंविधातृत्वात् पुंविधः पुरुषोत्तमः[३]" इति पुरुषोत्तमतन्त्रे ।

॥ * ॥ "[४]अनिशमनुश्वसन्त्यसुखोद्धरितास्तव रिपवो दृतिवत् तमसि प्रविष्टाः । तव गुणप्रथनः परिहाय तमः परियाति ते पदमजस्रमनन्तसुखम्" इति पैङ्गिश्रुतिः ॥ * ॥

[५]उदरमुपासते यर्हि वर्त्मनि सूक्ष्मदृशः
परिसरपद्धतिं हृदयमारुणयो दहरम् ।
तत उदगाच्च नन्दनपथाऽथ शिरः परमं
पुनरिह यत् समेत्य न पतन्ति कृतान्तमुखे ॥ १८ ॥ ५ ॥

छन्दसाऽपि बहुलमनुकरोति । यथा वा पूर्वपद्ये प्रथमचरणे सजससस्सैरपूर्वं छन्दो निबध्नता "परियाति ते पदमजस्रमनन्तसुखम्" इति श्रौतं छन्दः समग्रमन्वकारि । तदलमक्षरगणनया । अयं चाक्षरार्थः—यस्य तवानुग्रहतः महदाद्यभिमानिनो ब्रह्मादयोऽण्डमसृजन् तादृशस्य सर्वनियन्तुरपि ते यदि केचिदसुहृदः द्वेषिणो भवन्ति ते नूनं तमसि भस्त्रा इव दुःखमुच्छ्वसन्ति । यदीति न सम्भावनायाम् । किन्त्वेतादृशमपि यदि द्विषन्तीति विस्मये । यदेत्यर्थे वा । यदा द्विषन्ति तदा तमस्युच्छ्वसन्तीति । तदुक्तम्—"असुराणां तमःप्राप्तिस्तदा नियमतो भवेत् । यदा तु ज्ञानिसद्भावे नैव गृह्णन्ति तत् परम्" इति । एवमत्र संसारे ये मुक्तियोग्येषु चरमा मनुष्योत्तमाः, ये चोत्तमा देवाः, ये मध्यमा ऋष्यादयः, यश्चैषां सञ्जीवानामादिभूतो ब्रह्मा, एतेषु योयस्तव स्वरूपमुपदेशेन लोके प्रथयेत् सस पुरुषविधे त्वयि सायुज्यादिनाऽन्वितो भवति । प्रथयेदित्युपलक्षणम् । स्वयोग्योपासनं सम्पूरयेदिति यावत् । तदुक्तम्—"तदा मुक्तिश्च देवानां यदा प्रत्यक्षगो हरिः । स्वयोग्ययोपासनया तन्वा तद्योग्यया तथा" इति । कीदृशं स्वरूपम् ? सदसतः परम् । सत् कार्यं क्षरं जगत् । असत् कारणमक्षरा प्रकृतिः । समतीतक्षराक्षरम् । स्वयं त्वविशेषम् । ततोऽपि विशिष्टमुत्तममन्यन्नास्तीति । एतादृशं च तव रूपमृतम् । शश्वदेकप्रकारम् । आगमापायवर्जितमिति ।

१ "प्राभावल्याम्" इति प्र. पाठः प्रामादिकः । २ "देहपुर्येव" इति क्वचित् ।

३ "अन्वयं पुरुषविधः" इति हि श्रुतिः ।

४ एतत्पद्यमूलश्रुतिमाह—अनिशम् । "अनिशमुच्छ्वसन्त्यसुखो–" इति प्र. पाठः ।

५ अत्र पद्ये 'यर्हि' इति क्षैप्रव्यूहेन 'यरहि' इति त्र्यक्षरं भवतीति वैदिकसम्प्रदायसिद्धम् । तेन स्फुटं नर्कुटकम् छन्दः । अयमक्षरार्थः—ब्रह्मविचारमार्गे सूक्ष्मदर्शिनः शार्कराक्ष्या नाम ऋषयः । तथाहि निरुक्तिः—शर्करेति वालुकाकण उच्यते । तद्वत् सूक्ष्ममक्षि तेषामिति ते शार्कराक्ष्या उच्यन्ते । ते यर्हि यस्माद् भगवन्तमुदरगतमुदरनामानमु-

72

यर्हि यस्मात् ब्रह्मवर्त्मनि सूक्ष्मदृक्त्वात् शार्कराक्ष्यनामानः प्राणं प्रति "उरु गृणीहि" इति वचनादुदरनामकं[1] ब्रह्मोपासते। यस्माच्चाऽरुणयो हृद्ययनात् हृदयनामकम्। तस्मादेव तत् समुपेत्य न पतन्ति कृतान्तमुखे[2]। इतरेऽपि। परिसरः प्राणः पद्धतिर्मार्गो यस्य स परिसरपद्धतिः।

"कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत" इति श्रुतेः[3]। "प्राण एवैनमनु प्रविशति प्राणमितरा देवता न प्राणादपरः परमनु प्रविशति प्राण एवैनमनु भुङ्क्ते प्राणमितरा देवता न प्राणादपरः परमनु भुङ्क्ते प्राण एवैनमन्वानन्दी भवति प्राणमितरा देवता न प्राणादपरः परमन्वानन्दी[4] भवति तस्मादाहुः प्राण पद्धतिरिति[5]" इति हिरण्यनाभश्रुतिः[6]।

अतः परिसरस्य पद्धतिरिति वा। ततः हृदः। नन्दनपथा ब्रह्मनाडीद्वारा[7] शिर उदगात् यत् परमं ब्रह्म तत् समुपेत्य। पुनरिहैव हृदादिषु स्थितं यत्।

॥ * ॥ "तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं यत् प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं तस्मात् प्रपदे तस्मात् प्रपदे इत्याचक्षते शफाः खुरा इत्यन्येषां पशूनाम्। तदूर्ध्वमुदसर्पत् तावूरू अभवतामुरु गृणीहीत्यब्रवीत् तदुदरमभवदुर्वेव मे कुर्वित्यब्रवीत् तदु-

---

पासते, यस्माच्चाऽरुणयो नामधेयः हृदयदहराकाशस्थितं हृदयनामानमुपासते, तस्मादेव मुक्तौ तत् परं ब्रह्म समेत्य कृतान्तमुखे न पतन्ति। एवमितरेऽपि य उपासते तेऽपि न पतन्ति। कीदृशं भगवन्तम्? परिसरपद्धतिम्। परितः सरतीति परिसरः प्राणः पद्धतेः मार्गो यस्य तम्। वायुना सह गमनात्। "वरदो वायुवाहनः" इति सहस्रनामसु। प्राणः सदा भगवन्तमनुगच्छतीति परिसरस्य वायोः पद्धतिरिति वा। पुनः कीदृशम्? ततः। तदिति पूर्वप्रक्रान्तहृदयपरामर्शः। ततो हृदयात् नन्दनपथा सुषुम्नामार्गेण यः शिर उदगच्छत्। पुनः शिरोगमनानन्तरमपि यत् परमं ब्रह्म इह हृदयादिप्रपदान्तेषु च स्थितम्।

१ उदरे स्थित्वा 'उरु गरणं कुरु' इति यस्मात् प्राणं प्रत्याह, यस्माच्च उर्वेव गरणं चक्रे वायुस्तस्मादुरुगरणादुदरनामा भगवान्।

२ "तत् समुपेत्य कृतान्तमुखे न पतन्ति" इति प्र. पाठः। ३ "श्रुतिः" इति च।

४ "परमानन्दी" इति प्र. पाठः प्रामादिकः। ५ "प्राणः पद्धतिरिति" इति क्वचित्।

६ "हिरण्यगर्भश्रुतिः" इति च क्वचित्।

७ नन्दयति जीवं देहादुद्गमय्य मोक्षसुखं प्रापयतीति नन्दनं ब्रह्मनाडी सुषुम्ना। "तयोर्ध्वमायन्नमृतत्वमेति" इति श्रुतेः।

८ मन्त्रार्थस्तु ऐतरेयभाष्ये स्फुटः—"तमिमं प्रथमज्ञानिपुरुषं चतुराननम्। वासुदेवाभिधं ब्रह्म प्राप प्रपदयोः पुरा। यस्मात् प्रपेदे भगवान् प्रपदा चतुराननम्। तस्मात् प्रपदनादेव प्रपदं नाम कीर्तितम्। चतुर्मुखाकारवतां नृणां पादतळोपरि। प्रपदाख्या वर्ततेऽतो नतु पश्वादिनां क्वचित्। अथादूर्ध्वं ततो विष्णुः प्रपदादूरुमत्र च। स्थित ऊरू च तावास्तामूरूर्ध्वगमनाद्धरेः। किंचिदूर्ध्वं ततो गत्वा वायुना सह केशवः। वायुमाहोरुगरणं

रोऽभवदुदरं ब्रह्मेति शार्कराक्ष्या उपासते हृदयं ब्रह्मेत्यारुणयो ब्रह्मा हैव ताइ[1]। ऊर्ध्वं त्वेवोदसर्पत् तच्छिरोऽश्रयत यच्छिरोऽश्रयत तच्छिरोऽभवत् तच्छिरसः शिरस्त्वं ता वा एताः शीर्षन् श्रियः श्रिताश्चक्षुः श्रोत्रं मनो वाक् प्राणः श्रयन्तेऽस्मिन् श्रियो य एवमेतच्छिरसः शिरस्त्वं वेद" इत्याद्या श्रुतिः ॥ * ॥

[2]स्वकृतविचित्रयोनिषु विशन्निव हेतुतया
भरतमतश्चकास्स्यनलवत् स्वकृतानुकृतिः ।
अपि वितथास्वमूष्ववितथोरुविधं मनसि
निकटधियो नयन्त्यभिविपत्य तव ॥ १९ ॥ ६ ॥

विचित्रयोनिषु विशन् जीवः । तद्वदज्ञानां चकास्सि[3] । अनलो यथा स्वकृतं दार्वादि तदपनयने गच्छन् तत्स्थापने तिष्ठन्ननुवर्तते, एवमेव स्वकृतं[4] शरीराद्यनुवर्तसे तद्गतः सन् । भरतमतः ।

कुर्वत्र स्थित इत्यपि । उर्वैव गरणं चक्रे वायुर्यत्र स्थितः सदा । तत् स्थानमुदरं नाम पुनराह जनार्दनः । उरुस्थानं निवासं मे कुरु विस्तारसंयुतम् । तथाऽकरोत् स वायुश्च तदुरोऽभूदुरुत्वतः । उरोमध्ये च हृदयं तत्र वासो हरेः सदा । सूक्ष्मदृष्टियुता ये तु मुनयः शार्कराक्ष्यकाः । उदरे ते परं ब्रह्म वासुदेवमुपासते । हृत्स्थमेव परं विष्णुं ध्यायन्त्यारुणयः सदा । उदरस्थं च हृद्गं च ते उभे ब्रह्म तत् परम् । एकमेव यतस्तस्मादुभये ह्यपि तद्विदः । तत ऊर्ध्वं गतो विष्णुर्वायुना सह दैवतैः । स्थितो मूर्धनि देवेशः श्रितोऽसाविति तच्छिरः । तत्र प्राणात्मना वायुर्मनोरूपेण शङ्करः । शेषः सुपर्ण इन्द्रश्च मनांस्येव पृथक्पृथक् । अहम्भावमनो रुद्रः शेषोऽसौ पाञ्चरात्रिकः । वैदिकं गरुडश्चेन्द्रो यज्ञादिविषयं मनः । श्रोत्रं चन्द्रो रविश्चक्षुर्वागग्निः परिकीर्तितः । एते देवास्तदन्ये च सर्वप्राणिषु संश्रिताः । उपासते सदा विष्णुं परमात्मानमच्युतम्" इत्यादि ।

१ ताइ ते । विश्लिष्य प्रयोगः सर्वाधिकत्वद्योतनाय । ते उभे अपि रूपे ब्रह्मा परं ब्रह्म हैव । अत्रापि दीर्घ आधिक्यार्थः । "आधिक्येऽधिकम्" इति सूत्रात् । "ताई" इति प्र. पाठः प्रामादिकः ।

२ इदमपि चरमचरणेऽन्त्यजगणलोपेन त्र्यक्षरोनं नर्कुटकम् । हेतुतया सकलजगत्कारणतया भरतेन वायुना ज्ञातः । तदनुग्रहेणान्यैरपि ज्ञानिभिः । अथाप्यज्ञानिनां स्वकर्मनिर्मितविचित्रयोनिषु कर्मभोगार्थं विशन् यो जीवस्तद्वत् चकास्सि । जीवाभेदेन प्रतीयसे । तथा प्रतीतौ किं बीजम् ? अनलवत् स्वकृतानुकृतिः । यथाऽनलः त्र्यात्मकत्वात्, पञ्चभूतेषूत्तरोत्तरं प्रति पूर्वस्य हेतुत्वाच्च स्वकृतं दार्वादि अनुकरोति, अपनयनेऽपगच्छन् स्थितौ तिष्ठन्; एवं भवानपि स्वकृतदेहादिषु गतस्तद् देहादिकमनुकरोति । देहस्थरूपेण तद्गमनानुसारिगमनादिमान् । तेन देहबद्धस्त्वमित्यज्ञानां भ्रान्तिर्भवतीति । वस्तुतस्तु त्वं न तथेत्याह—अपि वितथासु । अमूषु योनिषु विक्रियमाणास्वपि अविक्रिय एव तत्र बहुविधो भाति भवान् । एतादृशं त्वां निकटधियो मनसि नयन्ति । भगवद्विषये निकटा धीर्येषाम् । यथा समीपस्थं वस्तु स्फुटतरं ज्ञायते तथा भगवद्विषये स्फुटतरज्ञानाः, न स्थूलदृश्वानः । ते महान्तः त्वां मनसि नयन्ति ध्यायन्ति साक्षात्कुर्वन्ति च । कथं तेषां निकटगमनं समभवत् ? अभिविपत्य तव । मननशीलेन मनसा तव समीपमभिगम्य, तव स्वरूपं वा परोक्षतो निश्चित्य ।

३ सर्वत्र कोशेषु "चकासि" इति पठ्यते । न ज्ञायते किमस्तेरिव सलोप आचार्यसम्मत आहो लिपिकृत्प्रमाद इति ।

४ "स्वकृतशरीरा—" इति प्र. पाठः ।

वायुज्ञातः । अन्यथाभवन्तीष्वपि योनिषु अनन्यथाभूत्वैव बहुविधं तिष्ठन्तं भवन्तं त्वत्समीपस्थबुद्धयो महान्तस्त्वामिपत्य[1] मनसाऽभिगम्य[2] मनसि त्वां नयन्ति ।

"रतत्वाद् भात्मके[3] विष्णावथवाऽपि जगद्भृतेः । भरतो वायुरुद्दिष्टो भारती तत् सरस्वती" इति नामसंहितायाम्[4] । "[5]योनिवेश्याह्वयो जीवस्त्वज्ञानां तद्वदेव तु । प्रकाशते परो देवस्तेन यान्त्यधरं तमः । सर्वहेतुतयैवेशं प्राणो जानाति तत्वतः । तेनासौ[6] च परो देवस्तत्परं याति केशवम् । इन्धनानयने त्वग्निर्यथैवाऽनीयते सह । एवं देहगतो विष्णुः सह गच्छेन्निजेच्छया । अशाश्वतेषु देहेषु शाश्वतं बहुधा स्थितम् । निचाय्य मनसा सन्तो जानन्ति निकटेच्छवः[7]" इति तन्त्रभागवते ।

॥ * ॥ "[8]यो जीववद् योनिषु भात्यनन्तो [9]मूढैस्तमोगैर्भरताधिगम्यः । निचाय्य तं[10] शाश्वतमात्मसंस्थं[11] तदिच्छवो त्मन्[12] न्यदधुर्महान्तः[13]" इति कमठश्रुतिः ॥ ॥ * ॥

[14]प्रक्रमवत् स्वसत्कृतम्
पुरुषेषु धीषु तु बहिरन्तरसञ्चरणे ।
तव पुरुष वदन्त्यखिलशक्तिधृतः स्वकृतम् ॥ २० ॥ ७ ॥

---

१ "—भिविपत्य" इति प्र. पाठः । प्राचीनपाठे वीत्युपसर्गस्योत्तरत्राव्याख्यानात् तद्विहायैव प्रतीकग्रहणम् ।

२ एतेन मूले मनसीति सप्तमी तृतीयार्थे च भवति, अभिविपत्येत्यनेनान्वेति चेत्युक्तं भवति ।

३ भात्मके ज्ञानानन्दमये प्रकाशात्मके वा । 'भा दीप्तौ', 'भा ज्ञाने', 'भ आनन्दे' इति धातुपाठः ।

४ "सामसंहितायाम्" इति क्वचित् ।

५ योनिप्रवेशमर्हन् जीवः योनिवेश्य उच्यते । स एव चात्र योनिषु विशन्नित्युक्तः ।

६ "तेन चासौ परो—" इति प्र. पाठः । तेन सर्वहेतुत्वज्ञानेनासौ परो देवः मुख्यप्राणस्तस्मादपि परमुत्तमं केशवं प्रति याति ।

७ एतेन निकटधिय इति मूले त्वत्समीपस्थबुद्धय इति तात्पर्ये च धीबुद्धिपदाभ्यामिच्छाऽपि गृह्यते । बुद्धया त्वां समीपतः स्पृशन्तः, त्वन्निकटभावं त्वत्सामीप्यं सदाऽभिलषन्तश्च । एतदर्थविशेषद्योतनायैव मूले वायुर्भरतशब्देनोदितः । "भ निकटभावे" इति धातुः । "निकटत्वे च कथ्यते" इति नरहरितीर्थाः । अन्तरङ्गत्वात् सदा निकटे भगवति, भगवतो नैकट्ये च सदा रतत्वाच्च भरतः ।

८ एतच्छ्लोकमूलश्रुतिमाह—यो जीववत् ।

९ "दूरैस्तमोगै-" इति क्वचित् ।

१० "निचाय्य यं शाश्वत-" इति च क्वचित् ।

११ आत्मसंस्थमत एव निकटम् ।

१२ त्मन् आत्मनि न्यदधुः निधिमिव नितरामदधुरिति । त्मनि अदधुरिति वा च्छेदः ।

१३ "–दधुर्महान्तम्" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

१४ यश्चात्र विजयध्वजीयानुसारीति मुद्रितः पाठः पठ्यते–"प्रक्रमवत् स्वसत्कृतं सर्वेषु पुरुषेषु सर्वासु धीषु स्थित्वा त्वां तु बहिरन्तरसञ्चरणेऽपि" इति स भ्रान्तिमूल एव । छन्दःशास्त्रविरुद्धः, मूलकोशविरुद्धः सर्वव्याख्यानविरुद्ध-

सर्वपुरुषेषु सर्वधीषु च स्थित्वा श्रीब्रह्मादिषु प्रकर्षेण क्रमेण स्वात्मनैव सत्कृतम् । अण्डाद्यन्तर्बहिश्च । असच्चरणे पापाचारे च स्थित्वा[1] पापाचारमपि स्वात्मनः पूजात्वेनैव कारयन्तं त्वां वदन्ति तस्याधोगत्यर्थम्[2] । तस्मात् सर्वं तव स्वकृतमेव वदन्ति ।

॥ * ॥ "[3]नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् । न ऋते त्वत् क्रियते किं चनाऽरे महामर्कं मघवन् चित्रमर्च" इत्याद्या श्रुतिः[4] ॥ * ॥

"श्रीब्रह्मरुद्रपूर्वेषु क्रमात् स्थित्वा जनार्दनः । [5]स्वात्मानमर्चयत्यद्धा बहिरन्तरसत्सु च । असतामधमाचारो हरिदृष्ट्याऽऽत्मपूजनम्[6] । तस्याधोगमनायेति श्रुतिराहाखिलक्रियम्" इति तन्त्रभागवते ॥

श्चायम् । अयमत्र छन्दःक्रमः । त्रिपदा गीतिरियम् । तृतीयचरणस्तावन्नर्कुटकमेव । तत्र द्वितीयभगणस्थाने नगणः । अन्यत् समानम् । द्वितीयचरणोऽपि नर्कुटकच्छायः । पादादौ लघुद्वयं न्यूनम् । भगणोत्तरमेकं लघ्वक्षरमधिकम् । अपिच 'पुरुषेषु' इत्यस्य प्रथमचरणान्तर्भावे द्वितीयचरणस्तोटकमनुकरोति । "सैश्चतुर्भिस्तोटकं स्यात्" इति तल्लक्षणात् । प्रथमचरणोऽपि किञ्चिद्गुरुलघुव्यत्यासेन प्रियंवदादिच्छन्दोऽनुकरोति । "नभजा रः प्रियंवदा" इति तल्लक्षणम् । पद्यस्यास्य गाथात्वाद् सर्वमुपपन्नम् । उक्तं हि—"असमवृत्तानि गाथाः" इति । अत्र प्राचीनतमस्य कोशस्य गलितत्वात् मूलपाठनिर्धारो दुःशकः । किन्तु छन्दःसौष्ठवादर्थसौष्ठवाच्चैवं श्लोकपाठः सम्भाव्येत—"प्रक्रमवत् स्वसत्कृतं सकलेष्वपि पुरुषेषु धीषु बहिरन्तरसच्चरणे । तव सकलं वदन्त्यखिलशक्तिधृतः स्वकृतम्" इति । अयमक्षरार्थः—पुरुषेषु श्रीब्रह्मादिचेतनेषु धीषु तेषामिन्द्रियवृत्तिषु च सन्निधाय, तु इति योग्यताविशेषेण सन्निधानविशेषमाह । अत एव प्रकर्षेण तारतम्यक्रमयुक्तं यथा भवति तथा तैः स्वेनैव कारितेन कर्मणा स्वयमेव सत्कृतम् । उक्तं हि—"मयि स्थितो मदङ्गेषु स्वतन्त्रो व्याप्तवान् हरिः । सर्वशः स्वात्मतन्त्रो मां स्वेच्छया वर्तयत्यजः । स्वात्मनस्तस्य पूजाः स्युर्मनोवाक्कायवृत्तयः । ममैता इति कर्तारमुद्देश्यं च हरिं स्मरेत्" इति । एवं जगन्नियमनेन स्वसत्कारो नाण्डान्तरेव, बहिरपि । न ब्रह्मादिसच्चेतनेष्वेव । असच्चरणे पापाचारेऽपि पुरुषे । "किञ्चनाऽरे" इति एतन्मूलश्रुतिगतस्य 'आरे' इति पदस्येदं व्याख्यानद्वयम् । "आरे दूरे समीपे च" इति हि तत्वदीपिकाकृत् । दूरे समीपे च अण्डस्य बहिरन्तश्चेत्येकोऽर्थः । यो भगवतः सकाशाद् दूरे वर्तते दुर्जनः, यश्च भगवत्समीपस्थबुद्धिरित्यन्योऽर्थः । तस्मात् सर्वं तव स्वकृतम् ।

१ "पापाचारे स्थित्वा" इति प्र. पाठः ।

२ यथा सर्वेऽपि शब्दा भगवन्नामानि तथा सर्वा अपि क्रिया भगवत्पूजारूपाः । पापाचारस्य पूजाफलं तु न भवति । यतः पूजाबुद्ध्या न करोति सः । तेन पुण्यफलेन च्युतो भवति ।

३ एतत्पद्यमूलश्रुतिमाह — नि षु सीद । हे जीवगणानां पते जीवस्येन्द्रियगणेषु निषुसीद नियामकतया सुखेन निषीद । न विधिरयम् । किन्तु तवेन्द्रियज्ञापकत्वरूपं महिमानं कृपया ममापि बोधयेति प्रार्थनम् । त्वां कवीनां ज्ञानिनां मध्ये विशेषेण प्रकृष्टतममाहुः । त्वदृते आरे दूरे समीपे वा न किञ्चन क्रियते । अतः हे मघवन् यज्ञस्वामिन्, महान्तमर्चनीयं सर्वाश्चर्यमयं त्वां त्वमेवार्च ।

४ "इत्यादिश्रुतिः" इति क्वचित् । ५ "आत्मान—" इति पाठान्तरम् ।

६ हरिदृष्ट्या सर्वाऽपि क्रियाऽऽत्मपूजैवेति पापानां पापाचारोऽपि तत्पूजैव ।

स्वकृतमित्यनन्यापेक्षयेति[1] ॥ * ॥

[2]इति विमृशन्ति कवयो निगमावपनं
भजन्त उपासते भवमध्यविनिश्वसिताः ।
दुरवगमात्मतत्व निगमायतवाङ्मनस-
श्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः ॥ २१ ॥ ८ ॥

भवमध्यविनिश्वसिता इति यतोऽतो विमृशन्ति कवयो निगमावपनं त्वाम् । चरितमहामृताब्धिपरिवर्तपरिश्रमणा इति यदतो भवमध्याद् विनिःश्वसिताः[3] मुक्ताः । [4]निगमावपनं स्थानं त्वां विमृश्य यज्ञादिभिर्भजन्त उपासते । निगमविषये आयतवाङ्मनसः । निगमानां ततो व्यक्तेस्तत एव फलप्रदत्वात् तद्विषयत्वाच्च निगमावपनम् । परिवर्तो मथनम् ।

॥ * ॥ "[5]विमथ्य वेदाब्धिमतिश्रमेण ज्ञात्वा परेशं मुनयो विमुक्ताः[6] । मृशन्ति यज्ञैश्च [7]यजन्ति नित्यमुपासते वेदफलप्रदं तम्" इति कुशिकश्रुतिः[8] ॥ * ॥

---

१ "स्वकृतमित्यनन्यापेक्षया" इतीयानेवान्ते 'इति'शब्दरहितः प्र. पाठः । जीवेन कृतमपि भगवदधीनतया कृतमिति न तस्य वस्तुतः किमपि स्वकृतम् । किन्तु अनन्याधीनकर्तृत्वाद् भगवत एवेत्यर्थः ।

२ अत्र प्रथमपादे तृतीयस्य भगणस्याद्याक्षरद्वयलोपेन द्व्यक्षरोनं नर्कुटकम् । द्वितीयपादे आदौ नगणस्थाने जगणः । तृतीयस्य भगणस्यान्त्याक्षरलोपश्च । उत्तरार्धं तु स्फुटम् । अयमक्षरार्थः-अयि दुरधिगमनिजस्वरूपयाथात्म्य भगवन्, तव चरितमहामृतस्याब्धिरिव निधिर्वेदराशिस्तस्य परिवर्ते मथने कृतपरिश्रमाः। वेदार्थमथनेन निश्चिततत्वा इति यावत् । तदेव रूपान्तरेणोच्यते-निगमायतवाङ्मनसः । निगमे वेदविषय एवाऽयते विस्तारिते नियते च वाङ्मनसी येषां ते । वेदार्थमेव मनसा गाढं चिन्तयन्तः, वाचा च सदा व्याहरन्तः इति यतोऽत एव भवमध्यात् विनिश्वसिता विनिर्गत्य मुक्ताः, भवमध्यविनिश्वसिता मुक्ता इति यतोऽतस्ते कवयः निगमावपनं त्वां मुक्तावपि पुनःपुनर्विमृशन्ति । विमृश्य भजन्ति। भजन्त उपासते । यथा बीजान्यावपनस्थाने क्षेत्रादावुप्तानि व्यज्यन्ते, तत्रैव च फलदानि भवन्ति तथा निगमा अपि भगवतैव व्यज्यन्ते तत एव च फलदा इति भगवान्निगमावपनमुच्यते । अथच वेदानां बीजानामिवाऽवपनं स्थानम् । अधिष्ठानमिति यावत् । सकलवेदविषयत्वात् । भगवत्येव हि वेदानां निष्ठा ।

३ "भवमध्यविनिश्वसिताः" इति प्र. पाठः ।

४ "निगमानामावपनम्" इति प्र. पाठः । "निगमानामावपनस्थानम्" इति क्वचित् ।

५ एतत्पद्यमूलश्रुतिमाह—विमथ्य ।

६ "विरक्ताः" इति क्वचित् ।

७ "जयन्ति" इति प्र. पाठः प्रामादिकः । "भजन्ति" इति क्वचित् ।

८ "कुशश्रुतिः" इति क्वचित् ।

[१]न परिलषन्ति केचिदपवर्गमपीश्वर ते
चरणसरोजहंसकुलसङ्गविसृष्टगृहाः ।
त्वदनुपथं कुलायमिदमात्मसुहृत् प्रियव-
च्चरन्ति तथोन्मुखास्त्वयि हि ते प्रिय आत्मनि च ॥ २२ ॥ ९ ॥

त्वत्प्राप्त्यनुसारित्वाच्छरीरं प्रियवत् पश्यन्ति । सर्वप्रियतमे सर्वादानादिकर्तरि च त्वयि तथा हि तेऽभिमुखाः ।

॥ * ॥ "[२]न किञ्चिदभिवाञ्छन्ति यतयः सुसदाश्रयाः । प्रेष्ठस्य परमस्याऽऽप्त्यै प्रियवद् देहदृष्टयः" इति विमदश्रुतिः ॥ * ॥

[३]न च रमन्त्यहो असदुपासनयाऽऽत्महनो
यदनुशया भ्रमन्त्यभवाः कुशरीरभृतः ।
निभृतमोक्षहृदययोगयुजो हृदयं
मुनय उपासते तदरयोऽपि ययुः ॥ २३ ॥ १० ॥

अन्यथोपासनयाऽऽत्महनोऽसुर्यान्[४] नाम लोकान् नित्यनिरतिशयदुःखान् निरस्तसमस्तसुखान् प्राप्नुवन्ति । तदेतन्नच रमन्त्यनुभवन्ति च नित्यदुःखमिति चशब्देनोक्तम्[५] । असुर्यशब्देन च श्रुतौ । सुष्ठु अरमणरूपत्वादसुरप्राप्यत्वाच्च । [६]यत्रानुशयनं कुर्वन्तस्तमस्येव भ्रमन्ति ।

---

१ अस्मिन्नर्कुटके गाथान्वये चतुर्थचरणे प्रथमस्य नगणस्य स्थाने जगण इतीयानेव विशेषः । अन्यत् सर्वं समानम् । अयमक्षरार्थः—केचिदुत्तमभक्तास्त्वद्भक्तिफलमपवर्गमपि नाभिलषन्ति । फलेऽपि निस्पृहाः । त्वत्सेवारसेनैव निर्वृताः । ये ते उपासकास्तव चरणसरोजे हंसायितानां परमहंसानां कुलस्य सङ्गेन विसृष्टगृहाः । दारापत्यादिषु निवृत्तरुचयः । ते पुनरिदं शरीरमपि आत्मसुहृत् त्वत्सेवासाधनत्वेन सुहृद्भूतमिति त्वदनुपथं त्वत्प्राप्तिपथानुगामीति च हेतोः प्रियवच्चरन्ति पश्यन्ति । सर्वप्रिये सर्वान्तरात्मनि त्वयि तथाऽनितरसाधारणतया हि ते उन्मुखाः ।

२ एतत्पद्यमूलश्रुतिमाह—न किञ्चित् ।

३ अत्र प्रथमचरणे प्रथमनगणे एकाक्षरं न्यूनम् । द्वितीयचरणे चतुर्थजगण आद्यमेकाक्षरं न्यूनम् । इति द्वौ पादौ न्यूनैकाक्षरौ । तृतीयस्तु द्व्यक्षरोनः, द्वितीयजगणे तृतीयभगणे च आद्यमक्षरं विलुप्य । तदेवं चतुर्षु गणेष्वेकैकाक्षरलोपेन त्रयः पादाः संयोजिताः । चतुर्थचरणे तु पञ्चमस्य जगणस्य समग्रं लोप इति त्र्यक्षरोनश्चतुर्थचरणः । तदिदमपूर्वं छन्दःसंयोजनम् । अक्षरार्थस्तु तात्पर्ये स्फुटः ।

४ "—हनोऽसूर्यान्" इति मुद्रितः प्र. पाठः प्रामादिकः ।

५ "चशब्दोक्तम्" इति क्वचित् ।

६ यत्रारमणरूपे तमस्यनुशयाना एव भ्रमन्ति । न ततः समुद्गच्छन्तीत्यर्थः । यत्र असदुपासनायामेवानुशयनं कुर्वन्तस्तमसि भ्रमन्तीति वा ।

अथवा जन्मवर्जिताः । आत्महन इत्येष शब्दो भगवद्भक्तद्वेषिणामपि सम इति दर्शयति— निभृतमोक्षहृदययोगयुज इत्यादिना । ये मुनयो हृदयनं भगवन्तं [1]निभृतमोक्षहृदयेन वायुना योगेन युक्ता नियमिताः सन्त उपासते तेषामरयोऽपि तदेव तमो ययुः । [2]परिपूर्णं मोक्षार्थं ज्ञानं[3] यस्य स निभृतमोक्षहृदयः ।

॥ * ॥ "[4]असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चाऽत्महनो जनाः" इति श्रुतिः[5] ॥ * ॥

"नित्यदुःखसुसम्पूर्णं निरस्तानन्दमव्ययम् । तमो यान्त्यन्यथाज्ञानाद् द्वेषाद् वा हरिसंश्रये" इति प्रमाणसंहितायाम्[6] । "निभृतो मोक्षवित् प्राणस्तद्योगात् तत्प्रसादतः । [7]जानन्ति परमं देवं नान्यथा तु कथञ्चन" इति भागवतसंहितायाम् ॥ * ॥

[8]स्मरणात् स्वनुराग तद्भवान्
उरगेन्द्रभोगदण्डविषक्तधियो
वयमपि ते [9]समासमदृशोऽङ्घ्रिसरोजसुधाम् ।
क इह नु वेद[10] वक्तुमपेतजन्मलयो
यत उदगादृषिरनु देवगणा उभये ॥ २४ ॥ ११ ॥

हे स्मरणादेव स्वनुरक्त[11], तत् ते स्वरूपं भवानेव वेद[12] । [13]उरगेन्द्रभोगदण्डे विषक्तबुद्धे-

---

१ नितरां भृतं पूर्णं निभृतम् । परिपूर्णमिति यावत् । मोक्षसाधनं हृदयं ज्ञानं मोक्षहृदयं यस्य तेन वायुना योगेन अनुग्रहयोगेन युक्ता नियमिता इत्यर्थः ।

२ "परिपूर्णमोक्षार्थम्" इति प्र. पाठः ।

३ "मोक्षार्थज्ञानम्" इति क्वचित् ।

४ एतत्पद्यमूलश्रुतिमाह—असुर्या नाम ।

५ "इति च श्रुतिः" इति क्वचित् ।

६ "प्राणसंहितायाम्" इति प्र. पाठः ।

७ "जानन्ति परमं दैवम्" इति प्र. पाठः । "जानाति परमं देवम्" इति पाठान्तरम् ।

८ तदिदं पञ्चपादं भगवन्तं प्रतिपादयत् पञ्चपादं पद्यम् । प्रथमः पादस्तावद् वियोगिनीबद्धः । "ओजे वियोगिनी सौ ज्गौ" इति तल्लक्षणात् । द्वितीयस्तु चतुरक्षरोनं नर्कुटकमेव । प्रथमनगणे द्व्यक्षरलोपः । तृतीये भगणेऽन्त्यस्याक्षरद्वयस्य लोप इति । तृतीयचरणे न कोऽपि व्यत्यासः । चतुर्थचरणो द्व्यक्षरोनः, द्वितीयस्य भगणस्य तदुत्तरस्य जगणस्य चान्त्याक्षरलोपेन । पञ्चमचरणे पुनर्भगणस्याऽद्याक्षरलोपेनैकाक्षरोनं नटर्कुकम् । तदिदं छन्दस्सु स्वाच्छन्द्यं नाम । अक्षरार्थस्तात्पर्ये स्फुटः ।

९ "समासदृशो—" इति क्वचित् ।

१० "इह वेद नु वक्तु—" इति च ।

११ सुष्ठु अनुरागो यस्य स स्वनुरागः स्वनुरक्तः । भक्तिरूपात्स्मरणात् स्वनुरक्त ।

१२ भवानिति सावधारणम् । उत्तरार्धगतं वेदेति पदमत्राप्यावर्तते ।

१३ उरगेन्द्रस्य भोगो देह एव दण्डस्तत्र विषक्तधियः आसक्तमनसः । न केवलं देहं तदुपरि सज्जयति, किंतु

स्तेऽङ्घ्रिसरोजसुधां वयमपि समासमदृशः[1] । सर्वमाहात्म्यस्य वेदैरपि वक्तुमशक्यत्वादसमदृशः[2] । वेदागम्यमाहात्म्यस्यापि वेदैरेव गम्यत्वात् समदृशः[3] । अतः कोऽन्यो वक्तुं वेद? को ह्यस्मांस्त्वां चर्ते अपेतजन्मलयः? यत उदगादुत्पत्तिमानेव ऋषिर्ब्रह्मा । प्राप्तपदाः प्राप्यपदाश्च[4] देवगणाः ।

॥ * ॥ "[5]त्वं वेत्थ नापरस्ते स्वरूपं न नित्यवाङ् नागभोगप्रियस्य । कुतो ब्रह्मा प्राप्तलोकाश्च देवास्तथाऽप्राप्ता[6] जनिमन्तो यतोऽस्मात्" इति साङ्कृतिश्रुतिः[7] ॥ * ॥

"महिम्नः सर्वशोऽनुक्तेर्वेदाश्चासमदर्शनाः[8] । तस्यापि वेदगम्यत्वात् तथैव समदर्शनाः[8]" इति तन्त्रभागवते ॥ * ॥

[9]तर्हि न सन्नचासदुभयं नच कालजवः
किमपि न तत्र शास्त्रमपकृष्य शयीत यदा ।
जनिमसतः सतो मृतिमजाऽत्मनि ये च भिदां
विपणमृते स्मरन्त्युपविश ध्वनिमारुवतः ॥ २५ ॥ १२ ॥

मनसाऽपि सक्त इति शेषे भगवत्प्रीतिविषयत्वं नामानुग्रहविशेषमाह । भगवतो देहश्च धीश्च न भिन्ने वस्तुनी इति देहसङ्गो नाम धीसङ्ग एवेति च द्योतयति ।

१ "समासदृशः" इति क्वचित् । अङ्घ्रिसरोजसुधां प्रति तद्विषये वा समासमदृशः ।

२ "-दसदृशः" इति च ।

३ वयं वेदाः समासमदृशः । वेदाभिमानिन्याः किलेदं वचनम् । भवन्माहात्म्यं सामस्त्येन न पश्याम इत्यस्माकमपि दर्शनमसममननुरूपमिव । पूर्णतयाऽग्रहणात् । अतोऽसमदृशः । अथापि यावद् दर्शनं शक्यं तावदपि वेदैरेव शक्यमिति वयमेव समदृशोऽनुरूपदर्शनाश्च ।

४ प्राप्तपदाः प्राप्यपदाश्चेत्युभये देवगणाः । "प्राप्तपदा अप्राप्तपदाश्च" इति प्र. पाठः ।

५ एतत्पद्यमूलश्रुतिमाह—त्वं वेत्थ ।

६ अप्राप्ता इत्यप्राप्तलोकाः ।

७ "सङ्कृतिश्रुतिः" इति प्र. पाठः । "साङ्कृतश्रुतिः" इति क्वचित् ।

८ "-दर्शिनः" इति प्र. पाठः ।

९ अत्र प्रथमपादे 'तर्हि' इति श्लेषप्रविश्लेषेण स्फुटं नर्कुटकम । अयमक्षरार्थः- शास्त्रं वेदराशिमात्मनि अपकृष्य अपिधाय । प्रळयकाले हि शास्त्राणामप्रवृत्तिरिति पूर्वमुक्तम् । यदा भवान् शयीत प्रळयकाले तर्हि तदा सत् सूक्ष्मं महदादिकं न भवति । अत एवासत् स्थूलं ब्रह्माण्डादिकं च न भवति । ननु भानुतेजसा जगद् दह्यते, प्रळये सर्वमेकार्णवमयं भवतीति च प्रळयकालेऽप्यबग्न्योः सद्भावः श्रूयते? नेत्याह- उभयम् । उभयमित्यग्निरापश्च । तदुभयमपि तदा न भवति । सदसदुभयात्मकत्वादग्निरापश्चोभयमित्युच्यन्ते । तथाहि पञ्चसु भूतेषु वायुराकाशं चाव्यक्तरूपत्वादसदित्युच्यते । पृथिव्यादित्रयं सदिति । तत्रापि जलस्य पृथिवीं प्रति तेजसश्च जलं प्रति च हेतुत्वात् कारणात्मनाऽसत्त्वमप्यस्ति । पृथिवी तु स्थूलतमा सदित्येवोच्यते । जलतेजसी सती

शास्त्रमपकृष्य । प्रळये[1] शास्त्रस्य प्रवृत्त्यभावात् । असतः सूक्ष्मरूपात् सतः स्थूलरूपस्य परमेश्वरपर्यन्तं यथाक्रमं जनिं मृतिं च[2], सर्वस्मात् परमात्मनि भेदं च विपणं फलापेक्षामृते ये स्मरन्ति तेषां ध्वनिमुपविश । आरुवतो वायोः प्रसादात् तथा स्मरन्ति ।

॥ * ॥ "[3]नासदासीन्नो सदासीत् तदानीं नासीद् रजो नो व्योमा परो यत् । किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद् गहनं गभीरम्" इत्याद्या श्रुतिः ॥ * ॥

"सूक्ष्माणि महदादीनि स्थूलान्यण्डादिकानि च । उभयं त्वग्निरापश्च न किञ्चित् प्रळयेऽभवत्[4]" इति प्रकाशिकायाम्[5] । सर्ववेदादिरूपेण[6] वायोरारुवतः[7] सदा । प्रसादाद् ये विजानन्ति[8] सूक्ष्मात् स्थूलजनिं क्रमात् । मृतिं च सर्वजीवादेरीशस्य व्यतिरिक्तताम् । जानन्ति ये निराकाङ्क्षास्तेषां वाचि जनार्दनः" इति तन्त्रभागवते ॥ * ॥

[9]त्रिगुणमयः पुमानिति यदबोधकृता
त्वयि नतु भवेत् तदवबोधरसे ।
सदिव मनस्त्रिवृत् त्वयि भवत्यसतां मनुजा-
दयो विमृशन्त्यशेषमिदमार्ततयाऽऽत्मविदः ॥ २६ ॥ १३ ॥

असती चेत्युभयं भवतः । नापि जराद्यापादकः कालजवः । किं बहुना? किमपि न तत्राऽसीत् । ततः सृष्टिकाले हे अज, असतः सूक्ष्मतमाद् भवतः सतः स्थूलस्य जगतः, तत्राप्यसतः सूक्ष्मान्महदादेः सतः स्थूलस्याहङ्कारादेर्यथाक्रमं जनिं मृतिं च, तथाऽऽत्मनि सर्वान्तर्यामिणि त्वयि । अजात्मनीत्येकं वा पदम् । अजस्यापि स्वामिनि त्वयि सर्वतो भिदां वैलक्षण्यं च ये आरुवतः सदा वेदवचोभिस्त्वां स्तुवतः प्राणस्य प्रसादात् स्मरन्ति, तेषां ध्वनिमुपविश । तेषां वाचि सन्निहितो भव । वाचि स्थितः स्तुतिरूपां वाचं प्रेरय स्वीकुरु च । कथं स्मरन्ति? विपणमृते । व्यवहारमृते । भगवति स्मृते पुण्यफलं सुखं ददातीति पण्यबुद्ध्या न स्मर्तव्यमित्येतत् । किन्तु निष्कामैः स्मर्तव्यः । तच्च वायोरनुग्रहादेव भवतीति ।

१ "प्रलये" इति प्र. पाठः । २ "जन्म मृतिं च" इति प्र. पाठः ।

३ एतत्पद्यमूलश्रुतिमाह— नासदासीद् । तदानीं प्रळये असदव्यक्तं कारणं नाऽसीत् । सद् व्यक्तं कार्यं च नो आसीत् । एतदेव विव्रियते—नाऽसीद् रजः । "रजांसि लोकाः" इति यास्कः । रजो भूलोकः नाऽसीत् । व्योमान्तरिक्षं च नाऽसीत् । पर इत्यव्ययं परस्तादित्यर्थे । ततः परस्तात् यत् स्वरादिसत्यान्तं लोकजातं तदपि नाऽसीत् । किं विशिष्य निर्देशेन? कुह कुत्र वा देशे कस्य वा चेतनस्य शर्मणि सुखार्थं भोगार्थमिति यावत्, किं वा वस्तु तदानीमावरीवर्ति? न किमपि । गहनं गभीरं प्रळयाम्भः किमासीत्? किमित्याक्षेपे । तदपि नाऽसीदेव ।

४ "प्रळये भवेत्" इति पाठान्तरम् ।

५ "प्रकाशसंहितायाम्" इति च । ६ वेदादिरूपेण शब्देन ।

७ "–रूपेण प्राणस्य रुवतः" इति क्वचित् पाठान्तरम् । ८ "प्रसादाद् यो विजानाति" इति च क्वचित् ।

९ प्रथमपादे चतुर्थजगणे द्व्यक्षरलोपः । तेन द्व्यक्षरोनः प्रथमपादः । द्वितीयपादे प्रथमजगणस्य द्वितीया-

अबोधकृता त्रिगुणबद्धता यस्माज्जीवस्यापि 'तस्मादवबोधरसे त्वयि सा न विद्यते । त्रिगुणात्मकं मनस्तवापि विद्यत इत्यसतां पक्षः । मनुजानामादयो देवाः 'त्रिगुणातीतत्वाद् भवतो भवानेव परमानन्दः, त्वदन्यत् 'सर्वजीवजातमार्तम्' इत्येव विमृशन्ति ।

॥ * ॥ "[३]सत्वादिजं देहमथो मनश्च सत्वादिबद्धं च वदन्त्यसन्तः । परं पुमांसं न सुरास्तु तैर्हि जीवाः सुदृष्टाः परमार्तरूपाः" इति सुरायणश्रुतिः[४] ॥ * ॥

"त्रैगुण्यदेहेन्द्रियकमासुरा जानते हरिम् । त्रिगुणातीतमीशेशमतः[५] पूर्णसुखं सुराः । जानन्ति गुणबद्धत्वाज्जीवानार्तांश्च कृत्स्नशः । अनार्तस्य प्रसादेन तेषामार्तिविनाशनम्" इति चैतन्यविवेके ॥ * ॥

[६]नहि विकृतं त्यजन्ति कनकस्य तदात्मतया
स्वकृतमनुप्रविष्ट इदमात्मतया रसितम् ।
तव ये परिचरन्त्यखिलतत्त्वनिकेततया
ननु ते पदाऽऽक्रमन्त्यविगणय्य शिरो निर्ऋतेः ॥ २७ ॥ ॥ १४ ॥

क्षरलोपः । तदुत्तरस्य च समग्रस्य जगणस्य लोपः । तेन चतुरक्षरोनो द्वितीयपादः । तृतीयपादे न कोऽपि व्यत्यासः । चतुर्थपादे त्वादौ नगणस्थाने पुनर्जगण एवेति विशेषः । अन्यत् समानम् । द्वितीयाक्षरस्य योकारस्य सामगीतिष्विव ह्रस्वोच्चार इति वा गणसिद्धिः । अथवा "....भवत्यसताम्" इत्यत्रैव तृतीयचरणपूर्तिः । तथाच चरमजगणलोपेन त्र्यक्षरोनस्तृतीयपादः । चतुर्थचरणे तु आदौ नगणस्थाने सगणजगणाविति त्र्यक्षराधिक्यमिति । अयमक्षरार्थः । पुमान् जीवस्त्रिगुणबद्ध इति या जीवस्य गुणबद्धतोच्यते साऽप्यबोधकृता, न सहजा । प्रमादात्मकत्वाद् बन्धस्य । इति यत् तत् तस्मात् साऽवबोधरसे ज्ञानस्वरूपे त्वयि तु न भवेदेव । ननु रामकृष्णाद्यवताररूपेषु त्रिगुणमयं शरीरेन्द्रियादिकं वदन्ति ? सत्यं वदन्ति । किन्तु ये वदन्ति न ते सन्त इत्याह—सदिव । मन इति सर्वाङ्गोपलक्षणम् । सर्वमप्यवबोधरूपमिति द्योतयितुं मनःपदेनैव सर्वमुपसञ्जग्राह । त्वयि तवापि त्रिगुणात्मकं शरीरेन्द्रियादिकं सदिव इत्यसतामेव मतं भवति । इवेत्यनेनोभयविधतां निराह । त्रिगुणातीतोऽपि क्वचित्क्वचित् त्रिगुणात्मकञ्च शरीरं धत्त इत्युभयविधत्वमप्यसतामेव मतमिति । "इवोभये च सादृश्ये" इति ह्यभिदधति । कस्तर्हि सतां पक्षः ? आह— मनुजादयः । मनुष्याणामादिभूता देवाः आत्मविदः अन्तर्यामिणस्तव सर्वात्मना त्रिगुणातीतत्वमत एवावबोधानन्दमयत्वं च जानन्तः त्वत्तोऽन्यदिदमशेषं जीवजातमार्ततया विमृशन्तीति । अत इदमेव सतां मतं भवति !

१ "तस्मात्तदवबोध-" इति प्र. पाठः प्रामादिकः ।

२ सर्वं जीवजात-" इति प्र. पाठः ।

३ एतत्पद्यमूलश्रुतिमाह— सत्वादिजम् ।

४ "सूकरायणश्रुतिः" इति प्र. पाठः । "सौकरायणश्रुतिः" इति क्वचित् ।

५ अतः गुणातीतत्वात् पूर्णसुखम्, तथा गुणबद्धत्वाज्जीवान् दुःखिनश्च जानन्ति ।

६ प्रथमद्वितीयपादयोर्न कोऽपि गणव्यत्यासः । तृतीये तु पञ्चमस्य गुर्वक्षरस्य तृतीयाक्षरस्थाने, तृतीयस्य च लघोः पञ्चमस्थाने विनिमयः । तेन नगणजगणयोः स्थाने सगणनगणौ । छन्दोभङ्गाद् भीता अर्वाचीनास्तु "तव

यथा कनकस्य विविधकृतं कुण्डलादि[1] कनकं विना परित्यक्तुं न शक्यते तथा स्वकृतं जगदनुप्रविष्टो भगवान् मूलरूपं विना त्यक्तुं न शक्यः। आत्मतया एकस्वरूपत्वात्[2]। रसितम्, आत्मना प्रकाशितं जगत् प्रविष्टः, तस्मात् सर्वगतो विष्णुरिति ज्ञातव्य इत्यर्थः[3]। इत्थं ये ज्ञात्वा परिचरन्ति तव स्वरूपं ते [4]ऋतात्मकब्रह्मप्राप्तिविरुद्धत्वान्निर्ऋत्याख्यसंसारस्य शिरः पदाऽऽक्रमन्ति[5]।

॥ * ॥ "[6]सर्वगं ये प्रपश्यन्ति ब्रह्माऽनन्दमजाक्षरम्। एकमेवाद्वयं नित्यं निर्ऋतेस्ते शिरोगताः" इति सौकरायणश्रुतिः ॥ * ॥

"यथैव कुण्डलं त्यक्त्वा नाऽदातुं कनकं शकम्[7]। तस्यैव [8]'तदवस्थत्वात् केवलाभेदतः स्फुटम्। एवं सुरासुरनरेष्वास्थितो भगवान् हरिः। नैव भेदेन

परि ये चरन्ति–" इत्येव पठन्ति। तदा तु न कोऽपि गणव्यत्यासः। तदेवं तृतीयपादस्याऽऽदौ सगणश्रवणात् तल्लयानुवृत्त्यै चतुर्थचरणेऽप्यादौ सगणं प्रयुयोज। सामगीतिष्विव ते इत्येकारस्य ह्रस्वोच्चारे तत्रापि नगण एव वा। एवं "निर्ऋतेः" इत्यत्र नीति लध्वक्षरम्। अतः "निर्ऋतेः" इतिवच्छिथिलमुच्चारणम्। तथाहि राजराजेश्वरयतेः प्रयोगः—"नासत्यौ निर्ऋतिर्मरुद्गणयुताः" इति। अयमक्षरार्थः—कनकस्य तदात्मतया विकृतकुण्डलाद्यात्मतया विकृतं कुण्डलादिकमेव केवलं नहि त्यजन्ति, त्यक्तुं शक्यते। यदि कस्यचित् कनकेनैव कृत्यं न कुण्डलेन तेनापि कुण्डलं त्यक्त्वा न कनकमात्रं स्वीकर्तुं शक्यम्। कनककुण्डलयोरभेदादित्यर्थः। तथाच कनकेनार्थिनोऽपि कनकविकृतं नहि त्यजन्ति। कुतः? कनकस्य विकृतात्मकत्वादिति मूलान्वयः। एवं लोकसिद्धमनुभाव्य भगवदुपासनेऽप्येवमित्याह–स्वकृतम्। स्वकृतं स्वनिर्मितं स्वेनैव रसितं विविधाकारतया प्रकाशितं च इदं जगत्, तस्य विविधाकारमनु विविधरूपैः प्रविष्टः। न तावता रूपाणां भेदः शङ्क्य इत्याह–आत्मतया। मूलरूपप्रविष्टरूपयोरभेदेन। इदमुक्तं भवति–यथा कुण्डलं विहाय कनकमात्रग्रहणं न शक्यं तथा नियमनार्थं प्रविष्टानि अवताररूपाणि विहाय केवलं मूलरूपं न स्वीकर्तुं शक्यम्। अवतारनिराकरणेन केवलं मूलरूपमुपासितुं साक्षात्कर्तुं वा न शक्यमित्येतत्, कुतः? तयोरभेदात्। अतोऽवतारान् निराकुर्वन्नन्ततो मूलरूपमपि निराकरोति। यथा कुण्डलं त्यजन्निच्छन्नपि कनकमपि त्यजति। तस्मात् सर्वत्र गत इत्येव भगवानुपासितव्यः। ये त्वेवं त्वामखिलपदार्थेषु निविष्टतया परिचरन्ति पर्युपासते तथैव साक्षात्कुर्वते च ननु ते संसारमविगणय्य निर्ऋतेः संसारस्य शिरः पदाऽऽक्रम्य, तदधः कृत्वा ऊर्ध्वं गच्छन्ति। मुक्ता भवन्ति।

१ "कुण्डलादिकं कनकम्" इति प्र. पाठः। २ "एकरूपत्वात्" इति प्र. पाठः।

३ "ज्ञातव्यमित्यर्थः" इति च। विष्णुरिति पदोपादानेनेदमाह–यस्मात् सर्वगत इति ज्ञातव्यस्तस्मादेव तं विष्णुरित्याचक्षते। विष्लृ व्याप्ताविति धातोरिति।

४ ऋतस्य सत्यस्वरूपस्य ब्रह्मणः इतिः प्राप्तिः ऋतिः। 'इण् गतौ' इति धातोः। "ऋतं सत्यं परं ब्रह्म" इति च श्रुतिः। ऋतेतिरिव ऋतिः। निरुक्तत्वान्मध्याक्षरलोपः। तद्विरुद्धत्वात् संसारो निर्ऋतिरिति। ऋतस्य इः प्राप्तिरिति वा। शान्तिरितिवत्।

५ "शिरः स्फुटं पदाऽऽक्रमन्ति" इति प्र. पाठः। ६ एतत्पद्यमूलश्रुतिमाह—सर्वगम्।

७ "कनकांशकम्" इति प्र. पाठः प्रमाद एव। कनकमादातुं न शकं न शक्यमित्यर्थः।

८ "तत्स्वरूपत्वात्" इति क्वचित्।

मन्तव्यो जीवभेदे तु[1] सत्यपि। ये तथाऽभिन्नमीशेशं पश्यन्ति परमर्षयः। ऋतप्राप्तिविरुद्धत्वात् संसारनिर्ऋतेः[2] शिरः। अगणय्य पदाऽऽक्रम्य वैष्णवं निलयं ययुः" इति गारुडे ॥ * ॥

[3]परिवयसे पशूनिव गिरा विबुधानपि तां-
स्त्वयि दृढसौहृदा ननु पुनन्ति न ते विमुखाः।
त्वमेकः स्वराडखिलकारकशक्तिधर-
स्तव बलिमुद्वहन्ति समदन्ति च येऽनिमिषाः ॥ २८ ॥ १५ ॥

॥ * ॥ "[4]वयति गा इव सुरादिकांस्तन्मनसो जगदपुनञ्छुचयो न परे। स एक ईशः परिपूर्णशक्तिर्बलिं हरा इतरे स्युः सुराः सुखिनः" इत्यारुणिश्रुतिः[5] ॥ * ॥

"विष्णुना देवता बद्धा विष्णवे च बलिप्रदाः। विष्णुरासां पतिर्नित्यं न विष्णोर्बन्धकः कश्चित्" इति वामने ॥ * ॥

[6]वर्षभुजोऽखिलक्षितिपतेरिव विश्वसृजो
विदधति यत्र ये त्वधिकृता भवतश्चकिताः।
स्थिरचरजातयः स्युरज ये त्वनिमित्तयुजो
विरह उदीक्षयेद् यदि परस्य विमुक्तमतः ॥ २९ ॥ ॥ १६ ॥

---

१ "भेदेऽपि सत्यपि" इति च। २ "संसारं निऋतेः शिरः" इति प्र. पाठः प्रामादिकः।

३ अत्र प्रथमद्वितीयचतुर्थचरणेषु न कोऽपि गणव्यत्यासः। तृतीयचरणे त्वादौ नगणस्थाने यगणः। भगणे चाद्याक्षरद्वयलोप इति द्व्यक्षरोनः पादः। अयमक्षरार्थः—ये त्वयि दृढसौहृदास्तानपि विबुधान् पशूनिव गिरा वेदवाचा तन्त्येव परिवयसे बध्नासि। 'वय बन्धने'। वेदमार्गे तान् प्रवर्तयसि। "तस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितम्" इति श्रुतेः। यतस्त्वयि दृढं भक्ता यतश्च वेदपथस्थिता अत एव ननु ते पुनन्ति सर्वं जगत्। ये तव विमुखा न ते पुनन्ति। ये स्वयमशुचयस्ते कथमन्यान् पुनीयुः। प्रत्युत तैर्जगदप्यशुचि भवति। त्वमेक एवाखिलकारकशक्तिधरः स्वराट् स्वतन्त्रः सर्वस्वामी। अतोऽन्ये देवास्तव बलिमुद्वहन्ति। त्वदर्पितेन बलिना स्वयमपि समदन्ति सुखमनुभवन्ति। मानुषैरपि स्वान्तर्यामिणे विष्णवेऽर्पित एव बलिर्देवानां प्रीतिकरो न साक्षादर्पित इति यावत्।

४ श्रुत्युदाहरणेनैव श्लोकः कथिताभिप्रायो भवतीति मूलश्रुतिमेवाह—वयति।

५ "इत्यारुणश्रुतिः" इति पाठान्तरम्।

६ अत्र प्रथमचरणे 'वरुष' इति श्लैप्रव्यूहेन त्र्यक्षरत्वम्। अन्यत् सर्वं स्फुटम्। अयमक्षरार्थः—विश्वसृजो ब्रह्माद्या देवाः येये यत्र स्थाने कर्मणि वाऽधिकृतास्ते भवतश्चकिताः भीतास्तत्तत् कर्म विदधति। कथम्? वर्षभुजः

स्थिरचरजातयो ये ते अनिमित्तयुजः स्युः। भगवन्नियमादेव संसारयुजः स्युः। विरहे मुक्तौ। यदि परस्य सकाशान्मुक्तिरेवेत्युदीक्षयेत् स परः[1]। विमुक्ताः सन्तो येन परेण तस्य विमुक्त-सतः। "नान्यः पन्था अयनाय विद्यते" इति [2]श्रुतेर्मुक्तिस्तस्मादेवेत्यङ्गीकर्तव्यम्। अतो बन्धोऽपि तत एवेत्यर्थः।

"सतां विमुक्तिदाद् विष्णोर्मुक्तिर्यद्यभ्युपेयते। बन्धोऽपि तत एव स्याद् यस्मा-देकस्तयोः पतिः" इति स्कान्दे। "आत्मानं मुक्तिदं विष्णुर्यदि पुंस उदीक्षयेत्। सुप्रसन्नस्तदा बन्धस्तत एवेति सेत्स्यति" इति ब्राह्मे।

॥ * ॥ "[3]खण्डाधीशाः सार्वभौमस्य यद्वद् ब्रह्मेशाद्याः कुर्वते तेऽनुशास्तिम्। त्वं मुक्तिदो बन्धदोऽतो मतो नस्त्वं ज्ञानदोऽज्ञानदश्चासि विष्णो" इत्युदरशा-ण्डिल्यश्रुतिः[4] ॥ * ॥

[5]नहि परमस्य कश्चिदपरोऽनपरस्य भवेद्
व्ययत इवात्र यस्य च शून्यतुल सन्दधतः।
अपरिमिता ध्रुवास्तनुभृतो यदि सर्व ततो
न हि न शाश्वतेति नियमो ब्रुवते च तथा ॥ ३० ॥ १७ ॥

खण्डाधिपा अखिलक्षितिपतेः सार्वभौमस्येव। "भयादस्याग्निस्तपति भयात् तपति सूर्यः", "भीषाऽस्माद् वातः पवते" इत्यादेः। तदेवं संसारो मोक्षश्च त्वन्नियत इत्याह—स्थिरचरजातयः। विमुक्ताः सन्तो येन स विमुक्तसन् परमात्मा। सात्विकानेव मोचयति न राजसतामसानिति यावत्। संसारविरहे मोक्षे विषये। यदि स भवान् परमात्मा परमस्य स्वस्य सकाशादेव इत्युदीक्षयेत्, ग्राहयेत् विष्णुरेव मुक्तिद इत्येतमर्थं ज्ञापयेदित्यर्थः। तदा हे अज, य इमे स्थावरजङ्गमाः प्राणिनः ते अनिमित्तयुजः। अकारवाच्यभवन्निमित्तमेव संसारयुजः स्युः। मोक्षद-त्वाद् बन्धदोऽपि भगवानेवेति ज्ञायेतेति।

१ एतत्तात्पर्यानुसारेण "यदि परः स विमुक्तसतः" इत्यपि मूलपाठः स्यादिति सम्भाव्यते।

२ "श्रुतिः। मुक्तिस्तस्मा—" इति प्र. पाठः। "मुक्तिरस्मा—" इति क्वचित्।

३ एतत्पद्यमूलश्रुतिमाह—खण्डाधीशाः।

४ "इत्युदारशाण्डिल्यश्रुतिः" इति प्र. पाठः। "इति शाण्डिल्यश्रुतिः" इति क्वचित्।

५ अत्र द्वितीयचरणे भगणोत्तरं जगणस्थाने पुनर्भगण एवेति विशेषः। चतुर्थचरणे पुनराद्यस्य नगणस्यैकाक्ष-रलोप इत्येकाक्षरोनः पादः। अयमक्षरार्थः, अयि शून्यतुल समानवर्जित, सन्दधतः विविधाकारेण विश्वं संयोज-यतः सर्वधारकस्य च, अनपरस्य अनात् प्राणादप्युत्तमस्य, यस्य परमस्य तव कश्चिदपरः अन्यः अपरः स्वतन्त्रो नहि। न विद्यते परः उत्तमः यस्मादित्यपरः स्वतन्त्रः। तत्र दृष्टान्तः—अत्र व्ययतः। अत्र जीवेषु मध्ये व्ययतः विशेषज्ञानिनः सर्वज्ञस्य वायोर्यथा कश्चिदपर उत्तमो नास्ति। यथा वायुर्जीवोत्तमस्तथा त्वं सर्वोत्तमः। अत

यस्य परमस्य ते कश्चिदपरः स्वतन्त्रो नास्ति। अनपरस्य प्राणोत्तमस्य। अत्र जीवसमुदाये। व्ययतः विशेषेणायतः सर्वज्ञस्य। यथा प्राणस्य नापरः स्वतन्त्रः तद्वत् प्राणः श्रीरन्यो वा त्वां विना स्वतन्त्रो नास्ति। हे शून्यतुल[1] समानवर्जित। सर्वं सन्दधतस्ते। यदि ततः प्राणात् तनुभृतो[2] ध्रुवा जीवास्तर्ह्यपरिमिताः सन्ति हे सर्व पूर्ण। "एकमेवाद्वितीयम्", "एकं परं ज्योतिरनन्यमद्वयम्" इत्यादिनियमो जीवानां शास्यता नेत्यत्र[3] नहि। किन्तु स्वगतभेदस्य, ईश्वरान्तरस्य [4]अतत्तन्त्रस्य च निषेधे। "अतोऽन्यदार्तम्", "नेह नानाऽस्ति किञ्चन", "न तत्समश्चाभ्यधिकश्च दृश्यते" इत्यादि तथा ब्रुवते च।

॥ * ॥ "[5]तव स्वतन्त्रो नापरो यद्वदत्र प्राणान्नान्यस्तुल्यशून्यास्य[6] सन्धिन्। प्राणाधीना अमिता जीवसङ्घाः प्राणो वशे ते प्रकृतिश्च भूमन्" इति महाशालीनश्रुतिः[7] ॥ * ॥

"स्वतन्त्रो नापरः कश्चिद् विष्णोः प्राणपतेः प्रभोः[8]। यथा प्राणात् परो नास्ति स्वतन्त्रो जगति क्वचित्। तथा प्राणो रमा चैव न विष्णोः पृथगीश्वरौ। यद्युच्यन्ते प्राणतन्त्रा बहवः पुरुषा इति। सत्यमेव ह्यसङ्ख्याता न नियम्यनिषेधिकाः[9]। एकाद्वितीयश्रुतयः किन्त्वीशान्तरवारकाः[10]। तथा स्वगतभेदस्य तदतन्त्रनिषेधकाः[11]" इति ब्रह्माण्डे। "स्वरूपमस्मरत् कृष्ण एकं स्वस्मिन्नभेदतः। अतत्तन्त्रस्य राहित्यादनन्यं तादृशोज्झितेः[12]। अद्वयं नित्यनिर्वृत्या भावनिर्वृतिमीश्वरः[13]" इति तन्त्रभाग-

---

एवानपरस्येति विशेषणमुक्तम्। यदि ततः सर्वजीवोत्तमात् प्राणात्, तत्प्रसादात्, तत्तन्त्रा इति यावत्, ध्रुवा अनुच्छित्तिधर्माणस्तनुभृतो जीवाः। ततः प्राणात् तदनुग्रहात् तनुभृतः शरीरधारिणो ध्रुवा जीवा वा यदि पृच्छ्यन्ते तर्हि त अपरिमिताः सन्ति। अनात् परस्त्वेक एव। अवरा अनन्ता इत्यर्थः। ततस्तस्मादेव हेतोः, हे सर्व परिपूर्ण, नियमः 'एकमेवाद्वितीयम्' इत्यादिश्रुत्या एकत्वादिविधानं द्वितीयस्य जीवस्याभावात् तस्य न शास्यतेत्यर्थे नहि। यतोऽन्याः श्रुतयः "ततोऽन्यदार्तम्" इत्याद्याः तदन्यस्य शास्यस्य सद्भावं तथा सर्वोत्तमत्वादिना अद्वितीयत्वादिकं च ब्रुवते।

१ "नास्ति। शून्यतुल" इति क्वचित्।
२ "तनुभृतो जीवा ध्रुवास्तर्ह्य–" इति प्र. पाठः।
३ "शास्यभावो नेत्यत्र" इति क्वचित्।
४ "अस्वतन्त्रस्य निषेधे" इति प्र. पाठः प्रामादिकः।
५ एतत्पद्यमूलश्रुतिमाह—तव स्वतन्त्रः।
६ "–शून्यस्य" इति प्र. पाठः प्रामादिकः।
७ "महाशायि(?)श्रुतिः" इति क्वचित्।
८ "प्राणमृते क्वचित्" इति प्र. पाठः प्रामादिकः।
९ "—निषेधकाः" इति प्र. पाठः।
१० "—वाचकाः" (?) इति कोशेषु पठ्यते। स्फुटं लिपिकृत्प्रमादः
११ यद्यप्यत्रापि "—निषेधिकाः" इत्येव पठितुमुचितम्। किंतु कोशेषु 'निषेधकाः' इत्येव पठ्यते। तदतन्त्रस्य निषेधिकाः। स्वगतभेदस्य च तथा निषेधिकाः।
१२ "–नन्यं सदृशोज्झितेः" इति प्र. पाठः।
१३ "–मीश्वरम्" इति प्र. पाठः। भावनिर्वृतिरिति स्वभावत एव निर्वृतिरानन्दस्वभाव इति यावत्।

वते । "अधिकस्य समस्यापि स्वतन्त्रस्य च वर्जनात् । एक एवाद्वितीयोऽसौ न शास्यजनवर्जनात्" इति कौर्मे ॥ * ॥

[1]अजन परिमुच्यतेऽत्र भवात् सततात्
सममनुजानता ततमनन्तमदुष्टतया ।
न घटत उद्भवः प्रकृतिपूरुषयोरजयो-
रुभययुजोर्भवन्त्यसुभृतो जलबुद्बुदवत् ॥ ३१ ॥ १८ ॥

अनन्तमदुष्टतया[2] जानताऽऽचार्येण सन्तताद् भवात् परिमुच्यते । अबद्धश्च प्रकृतिपरेशौ विनाऽन्यो न विद्यते । यतस्तयोरेवोद्भवो[3] न घटते[4] । तयोरजयोरसुभृत उद्भवन्ति । देशतः कालतश्च यत्र परमस्तत्र प्रकृतिर्यत्र प्रकृतिस्तत्र परम इत्युभययुजोः[5] ।

॥ * ॥ "[11]मुच्यते तत्त्वसम्बद्धादाचार्यात् पुरुषो[7] भवात् । एतावेव स्वतोऽबद्धौ परमः प्रकृतिस्तथा" इति कलापश्रुतिः[8] । "देशतः कालतश्चैव समव्याप्तावुभावजौ । ताभ्यामुभययोगाभ्यां जायन्ते पुरुषाः परे" इति कौण्ठरव्यश्रुतिः ॥ * ॥

"सम्यग्ज्ञानवदाचार्यान्मुच्यते पुरुषो भवात् । द्वावेव नित्यमुक्तौ तु परमः प्रकृति-स्तथा[9]" इति वामने ॥ * ॥

---

१ अत्र प्रथमपादे द्वितीयजगणस्यान्त्यमक्षरद्वयं तदुत्तरस्य भगणस्याऽऽद्यमक्षरं च लोपयित्वा छन्दोग्रथनात् त्र्यक्षरोनः पादः । अन्यत् समानम् । अयमक्षरार्थः—हे अजनन, समं सर्वेषु भूतेषु, सर्वत्र विततमनन्तगुणं भवन्तं वेदानुसारेण दोषवर्जितत्वेन जानता आचार्येण, तदुपदेशेनेति यावत्, अत्र जीवलोके यः कोऽपि सन्तताद् भवात् परिमुच्यते । उभयतः देशतः कालतश्च सहयुजोः प्रकृतिपुरुषयोः विष्णोः श्रियश्च उद्भवाभावाद् बन्धाभावः । अन्ये सर्वेऽपि जीवास्ततो जायन्ते । अतस्ताभ्यामेव बध्यन्ते मुच्यन्ते च । कथं जायन्ते? जलबुद्बुदवत् । नश्वरशरीरयोगेन जायन्ते म्रियन्ते च ।

२ "-मदुष्टतयाऽनुजानता" इति प्र. पाठः । "-मदृष्टतया जानता" (?) इति क्वचित् ।

३ "-योरुद्भवो" इति च ।

४ "घटते । ततस्तयो-" इति प्र. पाठः । "घटते । अतस्तयो- " इति क्वचित् ।

५ "इत्युभयश्रुतेः"(?) इति क्वचित् ।

६ सम्बन्धश्च ज्ञातृत्वरूपः । तेन तत्त्वसम्बद्धस्तत्वज्ञानी । "तत्त्वसम्बुद्धादाचार्यात्" इति प्र. पाठः । "तत्त्व-सम्बन्धादाचार्यात्" इत्यन्यत्र ।

७ "मुच्यन्ते तत्त्वसम्बुद्धादाचार्यात् पुरुषा भवात्" इति क्वचित् । यत्तु "पुरुषाद् भवात्" इति, "पुरुषोद्भवात्" इति च क्वचित् स प्रमाद इति स्फुटम् ।

८ इतः परं वामनवचनमन्ते कौण्ठरव्यश्रुतिवचनमिति व्यत्यासेन प्र. पाठे पठ्यते । क्वचित् कोशेष्वपि ।

९ "—मुक्तौ तु प्रकृतिः परमस्तथा" इति प्र. पाठः ।

११ एतत्पद्यमूलश्रुती उदाहरति—मुच्यत इत्यादि ।

[1]त्वयि त इमे ततो विबुधनामगुणाः परमे
अमृत इवार्णवे मधुनि लिल्युरशेषरसाः ।
नृषु तव मायया स्वगतया कुशलं
त्वयि सुधियोऽङ्ग भेदमनुधातुमनु[2] प्रभवः ।
कथमनुवर्तिनां भवभयं तव भ्रुकुटी[3] सृजति मुहुर्नृणाम् ॥ ३२ ॥ १९ ॥

हे तत ओ[4], इमे विबुधनामार्थभूता गुणास्त्वयि निलिल्युः परमे । अमृतार्णवे मधुनि अशेषरसा इव । अतः पूर्णगुणत्वाद् भवतः[5], नृणां मध्ये सुधियः, तव मायया त्वदिच्छयैव, त्वयि कुशलं विधातुं प्रभवः । [6]तच्च कुशलं भेद एव । सर्वस्मादन्यो विशिष्टगुणः परम इति[7] दर्शनम् । स्वगतया सुष्ठ्वन्यैरनवगतया । तथा त्वत्प्रसादादनुवर्तिनां[8] कथं मुहुर्भवभयं तव भ्रुकुटी[9] सृजति ?

---

१ इदमथ पञ्चपादं पद्यम् । 'कथमनुवर्तिनां भवभयम्' इत्यन्त एकः पादः, तदुत्तरश्चान्यः पाद इति षट्पादं वा । तथाहि–प्रथमद्वितीयचरणयोः स्फुटो हि पादान्तविसन्धिकरणेन गणनियमः । तृतीये चान्त्यजगणहीनस्त्र्यक्षरोनः पादः । चतुर्थे च स्फुटः । पञ्चमे तावत् चतुर्थजगणस्यान्त्याक्षरलोपेन एकाक्षरोनः पादः "–तव भ्रुकुटी" इत्यत्र परिसमाप्तः । पुनश्च नर्कुटकच्छन्दोबद्धानामेव प्रथमसप्ताक्षराणामनुवर्तनेन पादः प्रलम्बितः । तदेवं षडक्षराधिकः पञ्चमः पाद इत्येका रीतिः । अथच 'कथमनुवर्तिनां भवभयम्' इतीयान् पञ्चमः पादः । वनमालिनी छन्द एकाक्षरोनम् । "वनमालिनीति सोक्ता नजभययुक्ता" इति तल्लक्षणात् । षष्ठः पादः पुनर्मालिनीच्छायः । "नजौ जरौ मालिनी स्यात्" इति हि तल्लक्षणम् । अत्र 'तव भ्रुकुटी' इतिवत् शिथिलतयोच्चारेण प्रथमो नगणो भवति । अष्टमाक्षरस्य गुरोः स्थाने लघ्वक्षरप्रयोग इतीयानेव भेदः । जगणस्थाने नगण इति यावत् । क्वचित्तु 'तव भृकुटी' इत्येव पाठः । तदा स्फुटं नगणत्वम् । भ्रकुटिः, भ्रुकुटिः, भ्रूकुटिः, भृकुटिरिति च रूपाणि भवन्ति । तत ईदन्तताऽपि । आह हि महेश्वरः—"पृषोदरादित्वादृकारे भृकुटीत्यपि" इति । अयमक्षरार्थः—तत ओ इत्यनयोः सन्धौ ततो इति भवति । "तद्गुणोतताम्" इतिवत् । हे तत तात जगत्पितः, जगति सन्तत, हे ओ आनन्दरूपत्वादकारवाच्य, उत्कृष्टत्वादुकारवाच्य, विबुधनाम्नामिन्द्राग्न्यादीनां य इमेऽर्थभूता गुणा ऐश्वर्यादयस्ते परमे त्वयि निलीनाः । तद् यथा मधुमयेऽमृतार्णवेऽशेषरसा लीयन्ते । तस्मात् सर्वनाम्नां त्वमेव मुख्यार्थः । नृषु मध्ये ये सुधियस्ते सुष्ठु अन्यैः कदाऽप्यगतया अनवगतया तव मायया इच्छयैव, त्वदनुग्रहेणैवेति यावत्, त्वयि सकलजगद्भेदरूपं कुशलं शुभधर्मं अनुसन्धातुं वेदाद्यनुसारेण प्रभवो भवन्ति । तदेवं त्वदनुवर्तिनां नृणां तव भ्रुकुटी कथं मुहुर्भवभयं सृजति ? न सृजति । यतस्तेषां भवदनुग्रहपात्राणामपुनर्भव एव फलम् ।

२ "भेदमनुविधातुमनु" इति क्वचित् । तदा एकाक्षराधिकः पादः । ३ "भृकुटी" इति च ।
४ "तत ओ त इमे" इति प्र. पाठः । क्वचित् कोशेषु च । "तत इमे" इति क्वचित् ।
५ "भगवतः" इति क्वचित् । ६ "तत्र कुशलम्" इति प्र. पाठः ।
७ "पर इति" प्र. पाठः । क्वचित् कोशेषु च ।
८ "त्वत्प्रसादानुवर्तिनाम्" इति क्वचित् । ९ "भृकुटी" इति च ।

॥ * ॥ "[1]यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा । यो देवानां नामधा एक एव तं सम्प्रश्नं भुवना यन्त्यन्या । त आऽयजन्त द्रविणं समस्मा ऋषयः पूर्वे जरितारो न भूना । असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि" इत्यादिश्रुतिः[2] ॥ * ॥

"ब्रह्मेशेन्द्रादिसन्नाम्नां येऽर्थभूता गुणा मताः । पूर्तीशितृत्वद्रष्टृत्वप्रमुखास्ते हरेः सदा । अतस्तु सर्वनामाऽसौ सर्वकर्ता च केशवः[3]" इति पाद्मे । "आनन्दत्वाद्-नामाऽसावुत्कृष्टत्वादुनामकः । एतन्नामद्वयं विष्णोर्ज्ञात्वा पापैः प्रमुच्यते" इति स्कान्दे । "अन्याविज्ञातया विष्णोः शक्त्यैव कुशलं जनाः । कुर्वन्ति कुशले-षूच्चं[4] भेददर्शनमेव तु । पूर्णानन्दादिसम्पत्तिं विष्णोर्ज्ञात्वेतरेषु च । तदपेक्ष्य विप्लु-ष्मात्रत्वज्ञानं तद्भेददर्शनम् । अनाद्यनन्तो भेदोऽयं[5] स्वभावः[6] परजीवयोः । स्वतो वा परतो वाऽपि न कदाचित् प्रणश्यति । एवं ज्ञानवतां विष्णुर्बहुजन्म न दास्यति[7] । अनुवृत्तिर्यद्यनल्पा स हि सर्वेश्वरः प्रभुः" इति प्रमाणसंहितायाम्[8] । "यः पाता जनिता[9] चैव कल्पको नित्यपोषकः । प्रापकः सर्वदेवानां पदानां पुरुषोत्तमः । सर्वदेवाभिधावाच्यो भूतभव्यभवत्प्रभुः । विचार्य सर्वदेवेशैस्तं[10] ब्रह्माद्या यजन्ति च । त्रिगुणात्मकस्य स्रष्टारस्तथाऽपि न यजन्ति तम् । यतः पूर्णेशशक्त्यैव तेषां यजनमिष्यते । अतः सर्वेश्वरो विष्णुरेक एव महागुणः" इति प्रधानसंहितायाम्[11] ॥ ॥ * ॥

---

१ एतद्गाथामूलश्रुतिमुदाहरति—यो नः पिता । पातृत्वात् पिता । स्रष्टृत्वाज्जनिता । विधाता धारकः, ज्ञान-मोक्षप्रदानेन पोषकश्च । यश्च सर्वभुवनानि देवानां धामभूतानि वेद विवेद अन्तर्णीतणिच् । लम्भयामास । यश्च सर्वदेवनाम्नामेक एव धारकः । तं सर्वेषामपि प्रश्नभूतमन्यानि भुवनानि यन्त्याश्रयवत्त्वाय । सर्वेऽपि तं जिज्ञा-सन्ते पृच्छन्ति । न कोऽपि स्फुटं जानाति । तथा यन्ति प्रळये मोक्षे च । सुष्ठु ऋतं यथार्थज्ञानं यस्मात् तत् सूर्तं सत्त्वम् । "सत्त्वात् सञ्जायते ज्ञानम्" इति स्मरणात् । अज्ञानहेतुत्वादसूर्तं तमः । तदेवं गुणत्रये निषत्ते निषण्णे सृष्ट्यर्थमुपस्थिते सति ये पूर्वे ऋषयः ज्ञानिनः ब्रह्माद्याः इमानि भूतानि समकृण्वन्नसृजन् ते देवा अस्मै सम्प्रष्टव्याय विश्वकर्मणे, तत्प्रीत्यर्थमिति यावत्, मानसयज्ञे द्रविणमा अयजन्त । "वसन्तोऽस्याऽसीदाज्यम्" इत्याद्युक्तदिशा वसन्तादिरूपं हविर्द्रव्यं जुहुवुः । जरितारस्तं स्तुवन्तः । अथापि वस्तुतः नाऽयजन्त । यतः भूना भूम्ना, भूमगुणस्य भगवतः शक्त्यैव त आयजन्त । अतो यजन्तोऽप्ययजन्त उच्यन्ते ।

२ "इत्याद्या श्रुतिः" इति क्वचित् ।

३ "–कर्ता तु केशवः" इति च ।

४ "कुशले तूच्चम्" इति प्र. पाठः । "कुशलेषूच्चभेददर्शनमेव तु" इति क्वचित् ।

५ "–द्यनन्तभेदोऽयम्" इति प्र. पाठः ।

६ "स्वरूपः"(?) इति क्वचित् ।

७ "–जन्मनि दास्यति" इति प्र. पाठः प्रामादिकः । यद्यनल्पा अनुवृत्तिः भगवदनुवर्तनं तदा तस्य बहुजन्म न दास्यति । न तस्य भ्रुकुटी तादृशभक्तस्य भवभयं सृजतीत्येतत् ।

८ "प्राणसंहितायाम्" इति क्वचित् ।

९ "यः पिता जनिता" इति प्र. पाठः ।

१० "सर्ववेदैश्च ब्रह्माद्याश्च यजन्ति च" इति प्र. पाठः ।

११ "इति महासंहितायाम्" इति प्र. पाठः ।

[1]इह भवच्चरणेषु सुजातभुवो
जितहृषीकवायुभिरुदात्तमहत्तुरगैः ।
य इह [2]यतन्त्यमतिलोलमुपायविदो
व्यसनशताब्धितारमपहाय गुरोश्चरणम् ॥ ३३ ॥ २० ॥

वणिज इवोच्छ्वसन्त्यकृतकर्णधरा जलधौ
स्वजनसुतात्मदारधनधामधराः ।
[3]सुखशान्तिमत्त्वयि हि सन्ति न तानि नृणां
विभव उद्यति श्रयत आत्मनि सर्वरसे[4] ॥ ३४ ॥ २१ ॥

---

१ अत्र प्रथमचरणे चतुर्थगणस्याऽद्याक्षरलोपः, तदुत्तरस्य जगणस्य च समग्रं लोप इति चतुरक्षरोनः पादः। अत्र पुनः पूर्वश्लोकशेषस्य "सृजति मुहुर्नृणाम्" इत्यंशस्य संयोजनेन पठने—"सृजति मुहुर्नृणामिह भवच्चरणेषु सुजातभुवः" इति अन्त्यमक्षरत्रयं वर्जयित्वाऽवशिष्टं समग्रं नर्कुटकमेव भवति । तदियमत्र गाथासु छन्दोविच्छित्तिवैखरी । अथ द्वितीयचरणे द्वितीयस्य जगणस्याऽद्याक्षरलोप इत्येकाक्षरोनः पादः । तृतीयो द्व्यक्षरोनः तृतीये भगणे प्रथमद्वितीयाक्षरलोपेन । चतुर्थः पूर्णाक्षरः पादः । एवं द्वितीयपद्येऽपि प्रथमः पूर्णाक्षरः पादः । द्वितीयस्तु पञ्चमगणलोपेन त्र्यक्षरोनः । तृतीयः प्रथमनगणे द्व्यक्षरलोपेन द्व्यक्षरोनः । तथा चतुर्थः पाद एकाक्षरोनो द्वितीयस्य जगणस्य प्रथमाक्षरलोपेनेति ।

२ "यजन्त्यमति-" इति, "पतन्त्यमति-" इति च कोशेषु पाठभेदः । "यतन्त्यनति-" इति प्र॰ पाठः प्रामादिकः ।

३ "सुखशान्तिमति त्वयि" इति क्वचित् पाठः ।

४ अयं श्लोकद्वयार्थः— अयि भगवन्, इह एषु भवच्चरणेष्विति वेदाभिमानिनी श्रीः भगवच्चरणकमलं समक्षमास्वाद्य ब्रवीतीति द्योतयति । "अनन्तपादं तमनन्तबाहुम्" इत्यादिश्रुतेश्चरणेष्विति बहुवचनम् । तव चरणारविन्दयोर्येषां भूर्भवनमवस्थानं सम्यग् जातं ते सुजातभुवः । स्वरूपयोग्यतयैव भवच्चरणाश्रिता उत्तमाधिकारिणो देवादय इत्यर्थः । भवदुपासनोपायज्ञा य ईदृशा योग्याधिकारिणोऽपि व्यसनशताब्धिं संसारं तारयतीति तादृशं गुरोश्चरणमपहाय गुरुपरिचरणमकृत्वा इह संसारे, साधनमार्गे च जितानि निगृहीतानि हृषीकाणीन्द्रियाणि जितः प्रसादितो वायुश्च तैः साधनमार्गे प्रयातुं महातुरगसारथिभूतैः । यथायोग्यं सम्बन्धः । अमतिलोलं मतिलौल्यं विना स्थिरया बुद्ध्येति यावत्, यतन्ति मोक्षार्थं ते कर्णधाररहिता जलधौ यात्रिका वणिज इव पारं गन्तुमपारयन्तः जलधावेव उच्छ्वसन्ति क्लिश्यन्ति । गुरुचरणमसेवित्वा भगवच्चरणसेवयाऽपि न पुरुषार्थः । कीदृशा वणिजः साधका वा? आह—स्वजनेत्यादि । स्वजनो बन्धुवर्गः । आत्मा देहः । धाम गृहम् । स्वजनादिभिः सहिताः । अकृतकर्णधारेषु पोतवणिक्षु केन परिकरेण किं फलम्? एवं परिकरैः बहुविधं यतन्तोऽपि साधका गुरुचरणमपहाय न कृतार्था भवेयुरिति । यतः गुरुपरिचरणादृते कृतानि नृणां तानि साधनानि, सुखशं सुखसुखम्, दुःखाद्यसम्भिन्नं सुखम्, तस्यान्तिः पूर्तिः । तद्वति पूर्णसुखे त्वयि न सन्ति हि, प्रापकगुर्वभावात् त्वां न

भवच्चरणेषु सुष्ठु जातस्थानाः[१] । उत्तमयोग्यतायुक्ताः । हृषीकाण्येव महत्तुरगाः[२] । वायुरुदात्तः[३] ।

"रथोपरि स्वीकरणादुदात्तः सारथिर्मतः[४]" इति व्यासनिरुक्ते । "जयो विष्णोश्च वायोश्च भक्त्या तत्प्रीतिसाधनम् । जगदीशयोः कुतो ह्येनोः[५] सर्वशक्त्योर्बलाजयः" इति पवनविजये ।

तेषां तानि साधनानि सुखस्यापि[६] सुखान्तवति पूर्णसुखे त्वयि न सन्ति । गुर्वभावात् । विभवे जीवन्मुक्ते गुरावुद्यति उपदिशति[७] सति, सर्वरसे परमात्मनि श्रयत एव ।

॥ * ॥ "[८]"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति श्वेताश्वतरश्रुतिः ॥ * ॥

"देवा अपि सुयोगाढ्या यतन्तः सर्वसाधनैः । पुत्रदारादिभिः सार्धं नाऽश्वसन्तीह संसृतेः[९] । गुरोरनुग्रहमृते साधनं न हरेः प्रियम् । गुरूपदेशात्तु हरिं[१०] प्राप्नोत्येव न संशयः । षण्णवत्यङ्गुलो यस्तु ताळास्यो दशताळकः[११] । दशप्रादेशकः सप्तपादो हस्तचतुष्टयः । [१२]कळमत्रयाङ्गुलश्चैव वाग्मी सन्देहवर्जितः । वासुदेवैकशरणो गुरुरित्युच्यते बुधैः । गुरुलक्षणसम्पूर्णः साक्षादेव चतुर्मुखः । ततः शेषेन्द्रवह्नयाद्याः[१३] क्रमेणैव प्रकीर्तिताः" इत्यादि गुरुविवेके[१४] । "देवा योग्यतया जाता विष्णुपादाम्बुजाश्रयाः । तथाऽपि साधनैस्तेषां तत्प्राप्तिर्गुर्वनुग्रहात्" इति तत्त्वोद्योगे ॥ * ॥

प्राप्नुवन्त्येव हि, विभवे विजितसंसारबन्धेऽपरोक्षज्ञानिनि स्वयोग्यगुरौ उद्यति ज्ञानप्रकाशेनोदिते सति, उपदिशति सति तु साधकः तादृशगुर्वनुग्रहबलेन सर्वप्रधाने परमात्मनि श्रितो भवतीति ।

१ "सुजातस्थानाः" इति प्र. पाठः । २ "महातुरगाः" इति क्वचित् ।

३ "वायुरेवोदात्तः" इति प्र. पाठः । ४ उत् ऊर्ध्वमुपरि रथस्य आत्तः स्वीकृत इत्युदात्तः ।

५ "ह्येतोः" इति प्र. पाठः । एनोरित्येनयोः ।

६ "सुखस्यापि शान्तिमति पूर्णसुखे" इति प्र. पाठः प्रामादिकः ।

७ "उपदिशति सर्वरसे" इति प्र. पाठः । ८ एतत्पद्यमूलश्रुतिमाह—यस्य देवे ।

९ "संसृतौ" इति प्र. पाठः । "नोच्छ्वसन्तीह संसृतौ" इति विजयध्वजीये पठ्यते । इह संसारे सर्वसाधनैर्यतन्तोऽपि गुरोरनुग्रहमृते न संसारादाश्वसन्ति विमुच्यन्ते । यतः गुरोरनुग्रहमृते साधनं न हरेः प्रियम् ।

१० "-देशात्तु परम्" इति प्र. पाठः ।

११ "तालास्यो दशतालकः" इति प्र. पाठः । हस्ततळस्य दैर्घ्यमानमेव ताळमित्युच्यते । विततयोरङ्गुष्ठतर्जन्योरन्तरं प्रादेशः ।

१२ "कलम-" इति प्र. पाठः । १३ "शेषेन्द्रवीन्द्राद्याः" इति प्र. पाठः प्रामादिकः ।

१४ "इति गुरुविवेके" इति प्र. पाठः ।

[1]इति सदजानतां मिथुनतो रतये चरतां
सुखयति को न्विहाऽद्य विजने स्वनिरस्तभगे।
भुवि पुण्यतीर्थसदना ह्यृषयो
[2]निविशन्त्यतस्तु भवतः पदाम्बुजं हृदाऽघभिदम्।
दधति सकृन्मनस्त्वयि चिदात्मनि नित्यसुखे
न पुनरुपासते पुरुषसार हरावसथम्॥ ३५॥ २२॥

इति लोके दृश्यमानप्रकारेण चरतां विजने मोक्षविषये कः सुखयति? सुष्ठु अनिरस्तभगे। अतस्त्वामेव सन्तं ज्ञात्वा भवतः पदाम्बुजं हृदा निविशन्ति। हरावसथमहङ्कारं न कुर्वन्ति।

॥ * ॥ "[3]ब्रह्माज्ञात्वेति लोकप्रवृत्तिं प्रवर्ततां को नु मोक्षं ददाति। अतो ब्रह्मोपासते साधु धीरा नाहम्भावस्तेषु रुद्राधिवासः" इति महारवश्रुतिः॥ * ॥

"महाभाग्यं तु कैवल्यमज्ञानां कः प्रदास्यति। अतः सन्तो विजानन्ति हरिं ते त्वनहङ्कृताः" इति स्कान्दे॥ * ॥

---

१ इदं षट्पादं पद्यम्। प्रथमद्वितीयौ पूर्णाक्षरौ पादौ। तृतीयपादः प्रमिताक्षरानिबद्धः। "सजससैः प्रमिताक्षरा" इति ह्युक्तम्। चतुर्थपादस्तु प्रमिताक्षरालयानुगामिना उद्गताचतुर्थपादेन गर्भितं नर्कुटकमेव। तथाह्युद्गतालक्षणम्—"तुर्ये सजसजगैः सहितोद्गता" इति। तथाच 'निविशन्त्यतस्तु भवतः पदाम्बुजम्' इतीयानुद्गताभागः। ततश्चान्ते नर्कुटकान्त्यगतस्य जगणस्य लगयोश्च निवेशः। आहत्य पुनरिदं एकाक्षराधिकं नर्कुटकमेव भवति। इयांस्तु विशेषः—भगणोत्तरयोर्जगणयोर्मध्ये रगणोऽधिकः। आदिमे च नगणेऽक्षरद्वयं न्यूनमिति। अन्तिमं च चरणद्वयं पूर्णाक्षरं नर्कुटकमेव। अयमक्षरार्थः—सद् ब्रह्म अजानतां इति लोकदृष्टप्रकारेण रतये मिथुनतश्चरतां जनानां विगतजनने मोक्षविषये कः सुखयति? मोक्षसुखं को ददाति हे आद्य। उक्तं हि पुराणेषु "पुत्रस्योत्पादने दक्षा अदक्षा मोक्षसाधने" इति। कीदृशे मोक्षे सुष्ठु अनिरस्तभगे पूर्णैश्वर्ये। अत ऋषयो ज्ञानिनः भुवि पुण्यकरेषु तीर्थेषु वेदादिशास्त्रेषु शरणमासादयन्ति। अत एव चाघभिदं भवतः पदाम्बुजं हृदा निविशन्ति। त्वामेव सद्गुणपूर्णं निरवद्यं ज्ञात्वा त्वत्पदाम्बुज एव मनो निवेशयन्ति। हे पुरुषसार पुरुषोत्तम, नित्यसुखे चिदात्मनि त्वयि सकृन्मनः दधति चेत्, ततः परं हरस्य अभिमन्यमानत्वादावसथमहङ्कारं न पुनरुपासते। संसाराद् भगवति सकृन्मनः परिवर्तनमेव दुःशकम्। यदि सकृत् परिवृत्तं ततो न निवर्तते। विगताहम्ममादिभावं तत्रैव विरमति च।

२ अत्र बहवः पाठभेदाः— "निविशन्त्यतस्त्वामु भवतः" इति प्र. पाठः। "निविशन्त्यतस्त्वा नु भवतः" इति पाठान्तरम्। "निविशन्त्यतस्तदु भवतः" इत्येके। "निविशन्त्यतस्त उभयतः"(?) इति क्वचित्। "निविशन्त्यतस्त्वभयतः"(?) इत्यन्यत्र।

३ एतत्पद्यमूलश्रुतिमाह—ब्रह्माज्ञात्वा।

'इदमप्यथो वदन्ति चे-
न्ननु तर्का व्यभिचरन्ति क्वचित् क्वचिन्मृषा च ।

---

१ अत्र प्रथमपादो वियोगिनीच्छायः। "ओजे वियोगिनी सौ जुगौ" इति श्रवणात् । द्वितीयगणे मध्यमाक्षर-लोपोऽत्र । तस्या एव वियोगिन्या लयेनोत्तरपादारम्भः । "अनोजे सभरा लगौ" इति श्रवणात् । व्यभिच-रन्ति —इत्यादिना पुनर्नर्कुटकं वियोगिनीलये विलाययति । किन्तु चतुर्थनवमे अक्षरे लघुनी गुरूकृते । तथाच "व्यभिचरन्ति क्वचित् क्वचिन्मृषा च" इति नर्कुटकस्य चत्वारो गणा अत्र निवेशिताः । अवशिष्टानि पञ्चाक्ष-राणि जगणं लगौ चोत्तरपादादौ संयोजितानि—"ततोभयदृक्–" इति । अपूर्वोऽयं छन्दोबन्धः । अथच मात्रा-परिगणनेनान्योऽप्यत्र छन्दःप्रकारः सम्भवति । तथाहि—"इदमप्यथो वदन्ति चेन्ननु तर्काः" इतीयान् प्रथमः पादः । तदुत्तरो द्वितीयः । ततश्च प्रथमपाद एकमात्राधिकोऽष्टादशमात्रापादो गीतिभेदोऽयं भवति । तृतीयपादे च पञ्चाक्षराणि पूर्वपादाद् विश्लिष्यात्र संश्लेषितानीत्युक्तम् । अवशिष्टः पादभागस्तु— "–व्यवहितये विकल्प उषितोऽन्वहम्परम्परया" इत्यन्ते पुनर्जगणयोर्मध्ये गुर्वक्षराधिकमिति एकाक्षराधिकं नर्कुटकम् । चतुर्थोऽपि पादो द्वितीयतृतीयगणयोर्व्यत्यासेन नर्कुटकच्छाय एव । तथाहि द्वितीयो मध्यगुरुर्जगणो लघुमध्यां रगणतामाप । तथा आदिगुरुस्तृतीयो भगणो गुर्वन्तां सगणतामापेति । द्वितीयश्लोके तु केवलं द्वितीयपादे नगणमध्ये एकगुर्वक्षरा-धिक इत्येकाक्षराधिकः पादः । इतरे त्रयः पूर्णाक्षराः पादाः । अयमक्षरार्थः—इदं जगत् न पायते केनापीत्यपि पालकवर्जितम् । पा रक्षणे । तर्कैर्वदन्ति चेत् । ननु तर्का व्यभिचरन्ति क्वचित् । क्वचिच्च मृषा भवन्ति । यतस्तर्कै-रेव तर्काः पराहन्तुं शक्यन्तेऽप्रतिष्ठानात् । तस्माददृष्टविषये न स्वतन्त्रस्तर्कप्रसरो युक्तः । नन्वथापि किमिति तर्कै-र्वाचालयन्ति ? आह–अथो । अथो अतो भगवतः प्रेरणादेव तेऽपि तथा कुर्वन्ति । भगवति प्रसादोन्मुखे तस्मिन् विश्वसन्ति । विमुखे च तस्मिन् तमेव कुतर्कैर्निराचिकीर्षन्ति । तदुक्तम्–"भूमौ स्खलितपादानां भूमिरेवावलम्बनम् । त्वयि विप्रतिपन्नानां त्वमेव शरणं हरे" इति । ततस्तादृशास्तर्काः भयदृशां अभयं भगवन्तमज्ञात्वा भयात्मके संसार एव सक्तमनसां भयग्रस्तबुद्धीनां बुद्धिव्यवहितये व्यामोहायैव स्युः । तथाऽप्येतादृशो विकल्पः शास्त्रविरुद्धा विविधकल्पनाऽन्धानां परम्परयाऽन्वहमुषितः प्रवर्तितः । लोके विततः । ननु वेदादिना तेषां यथार्थावगमः किं न भवति ? आह–भ्रमति । उरवोऽनन्ता या भगवद्वृत्तयो धर्मास्ताभिः । तत्प्रतिपिपादयिषयेति यावत् । अल्पेनैव वचनेन अनल्पान् गुणान् वक्तुमूढजवा स्वीकृतवेगा वेदवागपि बहुविधं वदति । तेन मुह्यन्ति ह्यनधिकारिणः । उरुषु गुणकर्मसु प्रवृत्ताभिर्महायोगादिशब्दवृत्तिभिरिति वा । इदं जीवस्येश्वरत्वमग्रे जननात् पूर्वं गर्भस्थस्य नाऽ-सीत् । निधनात् परं नरकयातना अनुभवतोऽपि न भविष्यति । अथापि जननमरणयोरन्तरा जीवे ईश्वरत्वं विभाति । किं कारणम् ? अनिमित्तकम् । अकारवाच्यो भवानेव तत्र निमित्तं वक्तव्यः । यतो नान्यन्निमित्तं युज्यते ततस्त्वदिच्छयैव तदिति भावः । कीदृशे जीवे ? मृषा एकरसे त्वयि । न जीव एकरसः सर्वोत्तमः । अत एव न जीवस्त्वम् । अथापि मृषैव भ्रान्त्या जीव एकरसः प्रतीयते । मृषैव त्वमिति च प्रतीयते । अतो जीवः मृषैव एकरसः । मृषैव त्वम् । यस्य त्वदभेदो मृषा स मृषात्वम् । तस्मिन् मृषात्वयि जीवे । अतो मृषैव द्रविण-वानभिजनवानित्यादिविरुद्धकल्पनापथैरुपस्तूयते जीवः । वस्तुतस्तु सर्वस्वामी त्वमेव हि द्रविणादिमानपि । उक्तं हि "तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्" इत्यादि । इति हेतोः बुधाः 'आढ्योऽभिजनवानस्मि' इत्यादिरूपमिदं भ्रमजातं वितथं मनोविलसितमवगच्छन्तीति । वितथो मनसो विलासो यत्र तदिति वा ।

ततो भयदृग्व्यवहितये विकल्प उषितोऽन्वहम्परम्परया[१]
भ्रमति भारती च तवोरुवृत्तिभिरूढजवा ॥ ३६ ॥ २३ ॥

न यदिदमग्र आस न भविष्यदतो निधना-
दनिमित्तकमन्तरा त्वयि विभाति मृषैकरसे ।
अत उपगीयते द्रविणजातिविकल्पपथै-
र्वितथमनोविलासमिदमित्यवयन्ति बुधाः ॥ ३७ ॥ २४ ॥

इदं अपि अपालकमीश्वरवर्जितम् । न मत्तोऽन्य ईश्वरश्चेतनत्वादित्यादितर्कैर्वदन्ति चेत् । अथो इत्यनेन तदपि वचनं भगवत्प्रेरणयैवेत्युक्तम् ।

"तस्मादथो[२] अथेत्येतद्धेत्वर्थे[३] समुदीरितम्" इति शब्दनिर्णये । "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्" इति च ।

वेदोक्तो जीवव्यतिरिक्तेश्वरो न तर्कैरपनेतुं शक्यः । यतस्तर्का व्यभिचारिणः । मृषैव च क्वचित्[४] तर्कः । इष्टसाधनादितर्कस्तु व्यभिचारी । शरीरसम्मित आत्मेत्यादिदर्शनपरिकल्पितस्तु मृषैव[५] । अतो भयबुद्धीनां बुद्धिव्यवहितय एव भवन्ति[६] । नतु धीराणाम् । विकल्पः वेदविरुद्धकल्पनाऽन्धपरम्परया[७]ऽन्वहमुषितः । यस्माद् भारत्यपि भ्रमति बहुधा वदति ।

"बहूक्तिरन्यथाज्ञप्तिः परिवृत्तिश्च कथ्यते । भ्रम इत्येव विद्वद्भिस्तथा च क्रमणं[८] क्वचित्" इति शब्दनिर्णये ।

उरुवृत्तिभिरूढजवा अनन्तगुणकर्मत्वाद् भवतः[९] बहुगुणकर्माणि वक्तुं वेगवती वेदवाक् । अतो वेदेऽपि बहुधा वचनात् तदर्थनिर्णयाभावाद् विरुद्धकल्पना युक्ताऽसुराणाम् । यस्माद् गर्भस्थस्य जीवस्येश्वरत्वं नास्ति, अतो निधनानन्तरं च नरकादिगमनान्न विद्यते । अनिमित्तकं भगवन्निमित्तमेव [१०]तस्यान्तरा भाति मृषा त्वयि जीवे । नतु वस्तुतस्त्वं जीवः । एकरसे प्रधान-

---

१ "उषितोऽन्वहमन्धपरम्परया" इति पाठान्तरम् । तदा त्वन्त एकजगणाधिकः त्र्यक्षराधिकः पादः ।

२ "तस्मादतो–" इति प्र. पाठः प्रामादिकः ।

३ "त्येतद्धेत्वर्थं समु–" इति प्र. पाठः ।

४ "मृषैव क्वचित्" इति प्र. पाठः ।

५ स्वतन्त्रस्तर्कः क्वचिद् व्यभिचरति । यदि स्वतन्त्रतया तर्कः प्रमाणं तर्हि सुखसाधनत्वात् स्वदारभोगवत् परदारभोगोऽपि कर्तव्यः स्यादित्यादि । शरीरसम्मित आत्मेति जैनानां, व्याप्त आत्मेति नैयायिकानां च तर्कः शास्त्रविरुद्धत्वाद् विफल एव ।

६ "ततो भयबुद्धीनां बुद्धिव्यवहितये भवन्ति" इति प्र. पाठः ।

७ "–परम्परयैवान्वह–" इति च ।

८ "चङ्क्रमणम्" इति च ।

९ "अनन्तगुणाकरत्वाद् भगवतः" इति च ।

१० तस्य जननस्य मरणस्य चान्तरा ।

सारे। न च जीवो वस्तुतः सर्वोत्तमसारः। मृषैव तथा मन्यन्ते। अतो [१]भ्रान्त्या द्रविणवानभिजन्मवानित्यादिविरुद्धकल्पनापथैरुपगीयते। यतो भवानेव द्रविणवान्, यतश्च तपोदमाद्या अभिजन्मकारणभूता गुणाश्च भवत एव। अतो मिथ्यामनोविलासं जीवेश्वरत्वं बुधा अवयन्ति।

"गुणा एवाभिजात्याख्यास्तद्वानेव हि जातिमान्। अतोऽभिजात्यवान् विष्णुस्तदन्ये तूपचारतः" इति शब्दनिर्णये।

॥ * ॥ "[२]यं जीवमीशं प्रवदन्ति तर्कैस्तद्येश्वरो वचनं सन्दधाति। नासीदादौ मरणे नो भविष्यन्मृषा ततो हीशितृत्वं स्वपेषु[३]" इति विपीतश्रुतिः[४] ॥ * ॥

"ये जगत् प्रवदन्त्यज्ञा जीवादन्येशवर्जितम्। तेषामपि तु तां वाचमीश एव ददात्यजः। नच तर्कैर्भवेदीशो जीवो वेदविरोधतः। व्यभिचारिणो यतस्तर्का इष्टसाधनगा अपि। क्वचित् क्वचिन्मृषा तर्काः कणादादिप्रदर्शिताः। तत्वनिर्णयभीरूणां व्यवधानकरास्ततः। नैव तु स्थिरबुद्धीनां कुर्युस्ते बुद्धिचालनम्। पारम्पर्येण चाज्ञानामुक्त्या लोकेषु विस्तृतम। पठ्यते चाप्यहरहर्नतु विद्वन्मुखोद्गतम्। अनन्तगुणकर्मत्वादीशस्योक्तौ सुवेगिता[५]। वक्तयभेदमिवाज्ञानां नाभेदं कुत्रचिच्छ्रुतिः। एक आत्माऽद्वयेत्यादिपदानामर्थनिर्णये। न वर्तते श्रुतिर्यस्माद् गुणान्तरकुतूहलात्[६]। अथवा मोहनार्थाय सुरारीणामनर्हतः। कुत्रचिन्निर्णयवचः सुराणामर्थसिद्धये। नहीशितृत्वं गर्भस्थे नाप्यसौ निरयोपगे। मृषा[७] तदीश्वराभेदः सर्वोत्कर्षश्च जीवगः। धनवत्त्वं च कर्तृत्वं बलवत्त्वं च विष्णवि। अतो जीवेश्वराभेदं मिथ्येति कवयो विदुः" इति तन्त्रभागवते। "जीवस्य जगतश्चैव यदीशाभेदतो वचः। अतात्त्विकं जगच्चेति विष्णवधीनत्ववाचकम्। अभेदस्तु कुतस्तस्य परमस्यावरेण तु। मिथ्यात्वं च कुतस्तस्य जगतो नित्यवर्तनात्" इति वाराहे ॥ * ॥

[८]उदगात् पुमाननुगीतगुणांश्च जुषन्
भजति सरूपतां तदनु त्वमुत जहासि जिहासि ताम्।

---

१ "भ्रान्त्या धनवानभि—" इति क्वचित्।

२ अनयोः पद्ययोर्मूलभूतां श्रुतिमाह–यं जीवमीशम। "यज्जीवमीशम्" इति पाठान्तरम्। "ये जीवमीशम्" इति प्र. पाठः।

३ यः स्वपन् न किञ्चिज्जानाति स कथं सर्वज्ञ ईश्वरः स्यादित्यनेन ध्वनयति।

४ "विपरीतश्रुतिः" इति प्र. पाठ एव विपरीतः।

५ सुवेगिता सुवेगयुता।

६ गुणान्तरकथनकुतूहलात् पूर्वोक्तानामेकत्वादिविशेषणानामर्थनिर्णयार्थं न प्रवर्तते। सम्मुग्धार्थस्य तद्वाक्यस्यार्थनिर्णयभारं सत्सु साधकेषु निधाय स्वयमुत्तरोत्तरं गुणानुवाद एव प्रवर्तत इत्यर्थः। "गुणान्तरकुतूहला" इति क्वचित् पाठः। "नृणां तत्र कुतूहलात्"(?) इति क्वचित्।

७ "मृषैव ईश्वराभेदः" इति प्र. पाठः प्रामादिकः। "मृषाऽथ ईश्वराभेदः" इति क्वचित्।

८ प्रथमपादे प्रथमनगणस्य द्व्यक्षरलोपेन तृतीयभगणस्य चान्त्याक्षरलोपेन त्र्यक्षरोनः पादः। द्वितीयपादे

अहिरिव त्वचं परमात्तभगां
महसि महीयसेऽष्टगुणोऽपरिमेयभगः ॥ ३८ ॥ २५ ॥

श्रुतिषु तवानुगीतान् गुणान् जुषन् पुमानुदगादस्मात् संसारात्, तव सरूपतां च भजति। तदनु गुणस्मरणमनु। गुणांश्च जुषन्निति चशब्दः कर्माणि[1] चेत्यस्मिन्नर्थे। यश्चायं पुमानात्तभगां त्वयाऽपहृतभगां प्रातिस्विकां[2] पूर्वोक्तां द्विविधां कष्टां प्रकृतिं जहाति [[3]जिहाति] हन्ति च, तदपि त्वमेव जहासि जिहासि च। उतेति त्यागवधयोः समुच्चयार्थे।

"जिहाति रावणं सङ्ख्ये[4] राघवः परमास्त्रवित्" इति स्कान्दे। "स्वातन्त्र्यात् प्रकृतित्यागकर्ता नारायणः परः। यद्यप्येषा जीवसंस्था हन्ता च भगवान् प्रभुः" इति गारुडे।

महसि महीयसे पूजयसि पूज्यसे चाऽऽत्मनैव।

॥ * ॥ "[5]स्मरन् ब्रह्मगुणान् नित्यं मुक्तो ब्रह्मसरूपताम्। दुर्भगां प्रकृतिं त्यक्त्वा हत्वा चान्यां दुरन्वयाम्। याति [6]तच्च परेशानात् स हि पूज्योऽथ पूजकः। तस्यैकस्य स्वतन्त्रत्वात् स चानन्तगुणो विभुः" इति कापिलश्रुतिः[7] ॥ * ॥

[8]यदि न समुच्चरन्ति[9] यतयो हृदि कामजडा[10]
दुरधिगमोऽसतां हृदि गतोऽस्मृतकण्ठमणिः।

भगणोत्तरं पुनर्भगणेन लघुना च योगेन जगणोत्तरलघुलोपेन च त्र्यक्षराधिकः पादः। तृतीयपादे नगणोत्तरं जगणविरहेण तदुत्तरभगणस्यान्त्याक्षरलोपेन जगणस्याऽऽद्याक्षरलोपेन च पञ्चाक्षरोनः पादः। चतुर्थचरणे च भगणेऽन्त्याक्षरलोप इत्येकाक्षरोनः पादः। अयमक्षरार्थः- तव श्रुतिषु अनुगीतान् गुणान् कर्माणि च जुषन् यः पुमान् संसारादुदगात् स तदनु गुणस्मरणानुरूपं तव सरूपतां भजति। "तं यथायथोपासते तदेव भवति" इति श्रुतेः। तदा तस्य परमाच्छादिकां मायां त्वमेव जहासि। उत तथा स्वरूपाच्छादिकां तां जिहासि हन्सि। कीदृशीं मायाम्? आत्तभगाम्। अपहृतसामर्थ्याम्। कथम्? अहिस्त्वचमिव। यद्यप्यहिस्त्वचं जहात्येव न हन्ति। तथाऽपि प्रहाणे भग्नमेव हि भवति। तदेवं त्वां त्वमेव महसि पूजयसि। तेन महीयसे च। अणिमाद्यष्टगुणः। व्याप्तगुणो वा। अशू व्याप्तौ। अपरिमितैश्वर्यादिगुणः।

१ "कर्मणि" इति प्र. पाठः प्रामादिकः। २ "प्रातिस्विकीम्" इति प्र. पाठः।
३ "जिहाति" इति पदं प्राचीनकोशेषु न पठ्यते। ४ "सङ्ख्ये" इति प्र. पाठः।
५ एतत्पद्यमूलश्रुतिमाह—स्मरन्। ६ "तद्वत्" इति क्वचित्।
७ "कौशिकश्रुतिः" इति प्र. पाठः। "कायिकश्रुतिः" इति क्वचित्।
८ "अत्र प्रथमद्वितीयचतुर्थाः पूर्णाक्षरा नर्कुटकपादाः। नाक्षरन्यूनाधिक्यम्। तृतीयपादस्तु चतुरक्षरोनः। आदौ नगणे द्व्यक्षरलोपः। तृतीये भगणे च अन्त्याक्षरद्वयलोपः। ९ "समुत्सरन्ति" इति केचित्।
१० "कामजडात्" इति केचित्। विजयध्वजीयेऽपि तथा।

75

अनुतृप्तयोगिनामभयो भगवन्
अनवगतान्तकादनधिरूढपदाद् भवतः[1] ॥ ३९ ॥ २६ ॥

अज्ञानामनवगतान्तकादनधिरूढब्रह्मपदात् ।

॥ * ॥ "[2]स यथाकामो भवति तत्क्रतुर्भवति[3] यत्क्रतुर्भवति तत् कर्म कुरुते यत् कर्म कुरुते तदभिसम्पद्यते इति नु कामयमानो[4]ऽथाकामयमानो योऽकामो[5] निष्काम आप्तकाम[6] आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति" इति श्रुतिः ॥ * ॥

"निषिद्धकामयुक्तानामसतां तु विशेषतः । दुर्ज्ञेयो भगवान् विष्णुर्हृदिस्थोऽस्मृतहारवत् । [7]पूर्णानन्दादि तेऽश्नन्ति पूर्णानन्दादिकाः स्वतः । ब्रह्मणो ब्रह्मसम्पत्तिमत आह

१ अयं श्लोकार्थः—यतयो यतमाना अपि यदि हृदि कामेन अयोग्यकामनया जडीकृताः कामहता इति यावत्, अत एव क्षुद्रान् कामान् पुरीषमिव न समुच्चरन्ति, कामेभ्यो नोद्गच्छन्ति वा, किन्तु तत्रैव निमग्नाः, तदा तेषामसत्कामानां हृदि गतोऽपि भवान् दुर्विज्ञेयः । विस्मृतकण्ठमणिर्यथा कण्ठ एव गतोऽप्यन्यत्रान्विष्यत एतादृशी तेषां गतिः । ये पुनरनुतृप्ताः निवृत्तकामा योगिनस्तेषां तु अन्तकादभयप्रदो हि भगवन् भवान् । कीदृशादन्तकात्? अनवगतान्तकात् । अज्ञानिनामनवगतादन्तकात् । कदा मृत्युरागत्य नयतीति को नाम जानाति विना विशेषज्ञान् ? तथाऽनधिरूढपदात् । अनधिरूढं अप्राप्तं विष्णुपदं येन तस्मात् । नहि भगवल्लोकेष्वन्तकः प्रभवति पादं प्रसारयितुम् । अत एव त्वद्योगिनामन्तकादभयम् । कुतस्तल्लोकं नाधिरोहति ? आह— भवतः । षष्ठीयम् । न पञ्चमी । यतोऽयमन्तकस्तव । त्वदधीन इत्यर्थः । अतो युक्तं भवदधीनादन्तकादभयस्त्वमिति ।

२ एतन्मूलश्रुतिमाह—स यथाकामः । यादृशकामो भवति तादृशज्ञानो भवति । यादृशं ज्ञानं तादृशं कर्म कुरुते । तदनुगुणमेव च फलमभिलभते । इयं कामिनां गतिः । अथाकामयमानः ब्रह्मैव सन् पूर्णानन्दादिरूपः सन् परिपूर्णानन्दादिरूपं ब्रह्माप्येति । कीदृशोऽकामयमानः? योऽकामः अं परमात्मानं कामयते । नतु सर्वात्मनाऽप्यकामः । किन्तु निष्कामः निषिद्धकामेभ्यो निष्क्रान्तः । भगवत्सम्पत्त्या समाप्तकामः । अतः केवलं परमात्मप्रसादकामः । जडकामनाशेन चिन्मयकाम इति वा । यथा संसारिणां कामयमानानां मृतौ प्राणाः इन्द्रियमानिनो देवाः स्थूलशरीरनाशेन तदभिमानाभावेन तत उत्क्रामन्ति, उत्क्रम्य च स्वमूलरूपेष्वेकतां यान्ति, सूक्ष्मशरीरावच्छेदेन च तमनुव्रजन्ति न तथाऽकामयमानस्य मुक्तस्य प्राणा मूलरूपं प्रत्युत्क्रामन्ति । किन्तु तेनैव सह मुक्तिं यान्ति ।

३ "तत्क्रतुर्भवति तत् कर्म कुरुते तदभिसम्पद्यते" इति क्वचित् पाठः ।

४ "इत्यनुकामयमानो–" इति क्वचित् ।

५ "इति तु कामयमानो योऽकामो–" इति प्र. पाठः । "इति नु कामयमानोऽथाकामो" इति क्वचित् ।

६ "आप्तकामो न तस्य प्राण उत्क्रामति" इत्यन्यत्र ।

७ पूर्णानन्दादिरूपं परं ब्रह्म तेऽश्नन्ति स्वतः पूर्णानन्दादिरूपाः ।

श्रुतिः स्फुटम् । न[1] परब्रह्मतावाप्तिर्न ते विष्णविति[2] श्रुतेः[3] । [4]परमब्रह्मता चैषां ब्रह्मलोकात् परा गतिः । न परब्रह्मरूपत्वमेतमेवेति[5] च श्रुतेः । अन्येषां[6] म्रियमाणानां प्राणा भागत एव तु । देवतास्वेकतां यान्ति भागतोऽनुव्रजन्ति तम् । ज्ञानिनां मुच्यमानानां नैव यान्ति स्वदेवताः । तेनैव सह संयान्ति [7]ततोऽनुत्क्रमणश्रुतिः'' इति ब्रह्मतर्के । ''[8]देवाश्च ऋषयश्चैव सुभक्त्या कामिनोऽपि तु । मुच्यन्ते नियमादेव पश्यन्ति च हरिं तथा[9]'' इति स्कान्दे ॥ * ॥

[10]''तदवगमार्थसितासितयो-
र्गुणविगुणयोर्नहि देहभृतां सगिरः
अनुययुरत्र हंसकुलगीतपरम्परया ।

---

१ ''न परब्रह्मताप्राप्तिर्न'' इति पाठान्तरम् । ब्रह्माप्येतीति श्रुतेर्मुक्तजीवः परब्रह्मत्वमेवाऽप्नोतीति नार्थः । ''न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप'' इति श्रुतिविरोधात् ।

२ ''विष्णाविति'' इति प्र. पाठः प्रामादिकः । ३ ''श्रुतिः'' इति क्वचित् ।

४ ननु ''ब्रह्माणि जीवाः सर्वेऽपि परब्रह्माणि मुक्तिगाः'' इति मुक्तानां परब्रह्मत्वमुच्यते । तत् कथं न परब्रह्मतावाप्तिः ? आह—परमब्रह्मता चैषां ब्रह्मणश्चतुर्मुखस्य लोकात् परा गतिरिति ।

५ ''एतमेव ब्रह्मेत्याचक्षते'' इत्यवधारणेनान्येषां ब्रह्मत्वनिषेधात् । ''–मेकमेवेति'' इति क्वचित् ।

६ अन्येषाममुच्यमानां कामहतानाम् । ७ ''ततोऽनुक्रमण–'' इति क्वचित् ।

८ ननु कामयमानानां न भगवदधिगमो नापि मुक्तिरित्युक्तम् । तर्हि स्वस्वपदकामा देवाः कथं तमधिगच्छन्ति ? कथन्तमां च मुच्यन्ते ? नियतापरोक्षत्वान्न तेषामिदं लगतीत्याह—देवाश्च ऋषयश्चैव ।

९ ''हरिं न न'' इति प्र. पाठः ।

१० षट्पादं पद्यम् । प्रथमपादे द्वितीयतृतीययोर्जभगणयोर्लोपेन, नगणेन जगणद्वयेन लगाभ्यां च षडक्षरोनः पादः । द्वितीयः पादो द्व्यक्षरोनः, द्वितीयस्य जगणस्य मध्याक्षरलोपेन, तदुत्तरस्य भगणस्यान्त्याक्षरलोपेन च । तृतीयपादः सम्पूर्णाक्षरः । चतुर्थपञ्चमौ च षडक्षरोनौ पादौ । चतुर्थे नगणान्त्यलोपेन, तदुत्तरजगणलोपेनान्त्ययोर्लगयोश्च लोपेन । आद्ययोर्नगणजगणयोर्लोपेन पञ्चमे । षष्ठे चान्त्यलगयोर्लोपेन केवलं नजभजजैः पञ्चभिर्गणैः पञ्चदशाक्षरो द्व्यक्षरोनः पाद इति । अपिचात्र चतुर्थपञ्चमौ पादौ पञ्चदशमात्रौ गीतिभेदमप्यनुकुरुतः । अथच रीत्यन्तरेण ''न तुषावरणा इव रजांसि वान्ति'' इतीयान् चतुर्थः पादः । ''वयसा सह यच्छ्रुतयः'' इति पञ्चमः । ततश्च प्रथमोऽष्टादशमात्रो द्वितीयो द्वादशमात्रः पुनर्गीतिभेदोऽयम् । अथच ''वयसा सह यच्छ्रुतयस्त्वयि'' इतीयान् पञ्चमः पादः पञ्चदशमात्रः । अपिचैकाक्षरोनं तोटकं चेदं भवति । तत उत्तरः ''सफलं पतन्ति न पतन्ति बन्धनाः'' इति षष्ठः पादः स्फुटं मितभाषिणी । तथाहि तल्लक्षणम्–''ओजो सजूसजगा युक्ते सजूससा मितभाषिणी'' इति । अथ पुनरयं पञ्चपाद एव वा श्लोकाश्चतुर्थपञ्चमयोरेकीकारेण । तथाचाऽदौ नगणमध्ये पञ्चाक्षराधिकं नर्कुटकमेव । तदेवं नर्कुटकगर्भानन्यान्यच्छन्दोलयान् प्रतिपद्यं प्रतिपादं निबध्नतश्छन्दश्चातुरीं को विवरीतुमीष्टे ।

न तुषावरणा इव रजांसि
वान्ति वयसा सह यच्छ्रुतय-
स्त्वयि सफलं पतन्ति न पतन्ति बन्धना:[1] ॥ ४० ॥ २७ ॥

परमेश्वरस्यावगमात् तदवगमा श्रीः। तयाऽवगम्यत्वादर्थः[2] परमः। तेन बद्धत्वात् सिता श्रीः। गुणात्मिका च। सगिरः वाक्पूर्वकाणीन्द्रियाणि। श्रियो विष्णोश्च नाऽनुकूल्येन ययुः। अनुययुश्च हंसकुलगीतपरम्परया। यथा तुषावृतानां तण्डुलानां रजःस्पृष्टिर्नास्ति, एवं रजोरूपान्मनुष्यान्न यान्ति श्रुतयः। वयसा सह महता कालेनापि। अतस्त्वयि सफलं पतन्ति न पतन्ति च विधिनिषेधरूपेण बन्धनात्मिकाः।

॥ * ॥ "[3]जानाति प्रकृतिर्विष्णुं ज्ञेयो विष्णुस्तु निर्गुणः। तावुभौ न विजानन्ति ऋते ब्रह्मपरम्पराम्" इति महोपनिषदि ॥ * ॥

"अन्ये सर्वे श्रिया बद्धाः श्रीर्बद्धा विष्णुनैव तु। बन्धश्च विष्णुतन्त्रत्वं मुक्तानां च श्रियस्तथा। अमुक्तानां च बद्धत्वं[4] जन्ममृत्यादिदुःखिता। हेयो बन्धश्च सैव

---

१ अयं श्लोकार्थः—देहभृतां सगिरः गिरा सहिताः प्राणाः वाक्पूर्वकाणीन्द्रियाणि गुणविगुणयोर्नानुययुः। गुण इति गुणाभिमानिनी लक्ष्मीः। विगुणस्त्रिगुणातीतो नारायणः। तयोर्विषये। द्वितीयार्थे विषयसप्तमी। लक्ष्मीनारायणौ नाऽनुकूल्येन ययुः। "यतो वाचो निवर्तन्ते" इत्यादिश्रुतेः। कीदृशयोस्तयोः। तदवगमार्थयोः सितासितयोः। तत् परं ब्रह्म अवगमयन्ति वेदा इति तदभिमानिनी रमा तदवगमा। स्वयं तदवगमाच्च। तदवगमानां वेदानामर्थभूतो रमाज्ञेयश्चेत्यर्थो नारायणः। तदवगमा चार्थश्च तदवगमार्थौ। सिता नारायणेन बद्धा, तन्मात्राधीनेति यावत्। असितो केनाप्यबद्धः स्वतन्त्रो नारायणः। वेदमुख्यार्थेन नारायणेनैव सिता नान्येनेति सूचनार्थैव "अर्थसित-" इति समस्तप्रयोगः। अन्यथा तदवगमार्थयोः सितासितयोरित्येवावक्ष्यत्। अथापि हंसकुलपरम्परयाऽत्र संसारे केचित् तमनुययुः। हंसो ब्रह्मा। ब्रह्मणां कुलमिति ऋजुगणः। तस्य गीतमुपदेशः। तत्परम्परया। साक्षात्परम्परया वा तदुपदेशसम्प्रदायेन तावनुजानीयुरिति। तद्यथा तुषावृतास्तण्डुला न रजांसि वान्ति न रजोभिर्दुष्यन्ति तथाऽऽवृतार्थाः श्रुतयः-रजांसि रजोभूयिष्ठान् मनुष्यान्, तमांसि च, तमःप्रधानानसुरांश्च न वान्ति न स्पृशन्ति, नान्तरङ्गं विवृणते वयसा कालेन सहापि, बहुकालं श्रवणे मनने च कृतेऽपीत्यर्थः। तस्मात् विधिनिषेधाभ्यां बध्नन्तीति बन्धन्यः श्रुतयस्त्वयि विषये देवानां सफलं पतन्ति। तेषामर्थानावरणात्। रजःप्रकृतीनां मनुष्याणां सफलं पतन्ति न पतन्ति च। तमःप्रकृतीनामसुराणां तु सफलं न पतन्त्येव। सदा तेषामावरणात्।

२ "तया च गम्यत्वादर्थः" इति प्र. पाठः। "तयाऽवगम्यत्वात् तदर्थः" इति पाठान्तरम्।

३ एतत्पद्यमूलश्रुतिमाह—जानाति। ऋते ब्रह्मपरम्पराम्। ब्रह्मोपदेशसम्प्रदायप्राप्तां ज्ञानपरम्परामृते। ब्रह्मणः सकाशान्मनुष्यपर्यन्तं परम्परया यो ज्ञानप्रवाहः प्रवहति।

४ "अमुक्तानां तु बद्धत्वम्" इति पाठान्तरम्। प्र. पाठोऽपि तथा। श्रियो मुक्तानां च बन्धो नाम विष्णुतन्त्रत्वमेव। न दुःखित्वम्। अमुक्तानां पुनर्विष्णुतन्त्रत्वं दुःखित्वं च।

स्यान्नतु स्वोच्चवशे स्थितिः। गुणात्मिका च सा देवी निर्गुणः पुरुषोत्तमः। सैव विष्णुं विजानाति ज्ञेयो ज्ञाता च केशवः। न तावन्ये विजानन्ति[1] विना हंसपरम्पराम्। [2]तथाऽपि नैव जानन्ति मानुषा [3]असुरास्तथा। निष्फलैवासुरे तस्माच्छ्रुतिर्बन्धाय केवलम्[4]। निषेधविध्युत्क्रमणात् तमस्येव विनिक्षिपेत्। निष्फला सफला चैव मानुषाणां तु मध्यतः[5]। सफलैव तु देवानां नियतं मुक्तिदायिनी। गरुडः[6]। के हंसाः कः परो हंसः के च पारावता गणाः। के च तित्तिरयस्तत्र[7] के शुकाः के च वायसाः। श्रीभगवानुवाच। परो हंसोऽहमेवैको हंसा ब्रह्माण एव तु। पारावता देवतास्तु मुनयस्तित्तिराः स्मृताः। मानुषास्तु शुकाः प्रोक्ता असुराश्चैव[8] वायसाः। प्राप्यं प्राप्तं यतो नित्यं पूर्णं सर्वोत्तमं मया। अतः परमहंसोऽहं[9] मदनन्तरमेव तु। यतः प्राप्तमिवाशेषं सर्वजीवोत्तमं शुभम्। अतो ब्रह्मपदे योग्या जीवा हंसाः प्रकीर्तिताः। तेषां परम्पराप्राप्तं यैर्ज्ञानं नियमेन तु। ते मुच्यन्ते नचैवान्ये[10] गुरुर्ब्रह्मा यतो नृणाम्। दैवतं त्वहमेवैको मामविस्वा न मुच्यते। [11]परं प्रति यतो नीचा ब्रह्मणः सर्वदेवताः। पारावतास्ततः प्रोक्तास्तै[12]स्तीर्णा संसृतिर्यतः। तित्तिरा मुनयस्तस्मात् कासुखत्वात्तु मानुषाः। [13]शुका इति समुद्दिष्टा वयोमात्र-

---

१ "न तावन्ये विजानाति" इति प्र. पाठः प्रामादिकः। "न तावन्यो विजानाति" इति क्वचित् पाठान्तरम्।

२ "तथाऽपि" इति प्र. पाठः।

३ "आसुरास्तथा" इति क्वचित्।

४ "केवला" इति प्र. पाठः।

५ मध्यतः मध्यमत्वात्। न नितरां सात्विकः। नापि केवलं तामसः। किन्तु मध्यगतः। सत्त्वेन तमसा चोभयतः संसृष्टः, मध्यमेन रजसोपप्लुतः।

६ "श्रीगरुड उवाच" इति प्र. पाठः।

७ "तित्तिरयस्त्वत्र" इति पाठान्तरम्।

८ "आसुराश्चैव" इति प्र. पाठः। क्वचित् कोशेषु च तथा।

९ हन्ति गच्छति प्राप्नोतीति हंसः। येन सर्वोत्कृष्टं परिपूर्णं सर्वं प्राप्तं स परमहंसः। हन्ति सर्वम्, हन्ति सारमिति वा। "एकेनाक्षरेण निर्ब्रूयात्" इति श्रवणात्। सर्वजीवेभ्योऽधिकं शुभं ब्रह्मा हन्ति प्राप्नोतीति स हंसः। तत्पदयोग्याश्च सर्वे।

१० "नैव चान्ये" इति प्र. पाठः।

११ परमात्मानं प्रति देवाः ब्रह्मणः सकाशान्नीचाः अवाक् स्थिताः। ब्रह्मणो यावद् विष्णुसामीप्यं न तावत्। ते ततो दूरस्थिताः। ततश्च परं प्रति अवाग् गताः परावता एव पारावता उच्यन्ते। यद्वा परसमीपगत्वात् परस्यायं पारो ब्रह्मा। ततोऽवराः पारावताः।

१२ तैः मुनिभिः। मनुष्येभ्योऽतिशयेन संसारसागरमतितरन्तीति तित्तिरास्तित्तिरयश्च मुनयः।

१३ शं सुखम्। कुत्सितं शं येषां ते कुशा एव व्यत्यासेन शुकाः। अथच सु इति सुखम्। सस्य शः। तेन 'शु' इत्यपि सुखवाचकं पदम्। 'शवस्' इति यथा। अथवा शं सुखम् तद्वान् शुः। अल्पार्थे कुत्सायां वा कन्। देवादिसुखापेक्षयाऽत्यल्पतया कुत्सिताः सुखिनः शुकाः।

सुखित्वतः[१] । वयसोऽन्ते[२] तु दुःखित्वादसुरा वायसाः स्मृताः । एवं पञ्चविधा जीवाः षष्ठोऽहं परमेश्वरः । न मत्समोऽधिको वाऽपि कश्चिदस्ति द्विजोत्तम'' इति गारुडे ॥ * ॥

इत्यशेषसमाम्नायपुराणोपनिषद्रसः ।
समुद्धृतः पूर्वजैस्तैर्व्योमायनमहात्मभिः[३] ॥ ४२ ॥

[४]व्योमायनमहात्मभिः ब्रह्माश्रयेषूत्तमैः ॥ * ॥

इत्याद्यमृषिमामन्त्र्य तच्छिष्यांश्चामलात्मकान्[५] ।
ततोऽगादाश्रमं साक्षात् पितुर्द्वैपायनस्य मे ॥ ४६ ॥
सभाजितो भगवता कृतासनपरिग्रहः ।
तस्मै तद् वर्णयामास नारायणमुखाच्छ्रुतम् ॥ ४७ ॥

''कथाः कथयतीशस्य व्यासस्यान्ते स नारदः । स्तुत्यर्थं तस्य देवस्य ज्ञापनाय नतु क्वचित् । पूर्णज्ञानामृतस्यास्य नतु ज्ञतिः पराद्[६] भवेत् । ऋषिषु प्रीयते विष्णुः[७] स्वयमेव जनैः श्रुतः'' इति ब्राह्मे ॥ * ॥

[८]यो ह्यात्मा जगदादिमध्यनिधनो योऽव्यक्तजीवेश्वरो
यः सृष्ट्वेदमनुप्रविष्ट[९] ऋषिणा चक्रे पुनः संहिताम्[१०] ।

---

१ ''–सुखत्वतः'' इति प्र. पाठः । वयःसम्बन्धित्वात् कामसुखं वायसम् । तस्मिन् कामसुख एव पुरुषार्थ-बुद्ध्यो वायसाः । वायसमेवैषामस्तीति ।

२ ''वयसोऽन्तेऽतिदुःखित्वा–'' इति क्वचित् । वय इति संसारकालः ।

३ ''पूर्वजातैर्व्योमयानैर्महात्मभिः'' इति प्र. पाठः ।

४ व्योतत्वात् जगति वितत्वादोङ्कारवाच्यं ब्रह्म व्योम । तदयनमाश्रयो येषां ते व्योमायनाः । तेष्वपि महात्मानो महत्तमाः ।

५ ''–मृषिमानम्य तच्छिष्यांश्च महात्मनः'' इति प्र. पाठः । आद्यमृषिमृषिरूपं ज्ञानरूपत्वादृषिपदवाच्यं च नारायणमानम्य, तच्छिष्यांश्च कलापग्रामवासिनो यथासम्भवं प्रणामादिनाऽऽमन्त्र्य, नारदो मे पितुराश्रममगात् । स्त्रीव्यवधानमन्तराऽरणेरेव साक्षाज्जातत्वात् शुकस्य साक्षात् पिता व्यास इति वदन्ति । ''व्यासादरण्यां सम्भूतो विधूमोऽग्निरिव ज्वलन्'' इति हि पुराणवचनम् । साक्षात् प्रकटं प्रसिद्धमाश्रममित्यन्ये ।

६ ''पराग् भवेत्'' इति क्वचित् ।

७ ''ऋषिरूपी यतो विष्णुः'' इति पाठान्तरम् । प्र. पाठोऽपि तथा । ऋषिषु कथयत्सु स्वयं विष्णुः प्रीयते । अतस्तत्प्रीतिकामनयैव कथयन्ति । नतु तज्ज्ञापनाय । तदनुग्रहार्थमेव च स्वयमन्यैः श्रुत एवापि ऋषिभ्यः संशृणुते । पाठान्तरे ज्ञानप्रसारायैव ऋषिरूपी विष्णुरिति ज्ञानिजनैः शास्त्रादिभिः श्रुतोऽवगतः ।

८ ''योऽस्योत्प्रेक्षक आदिमध्यनिधने'' इति प्र. पाठः ।

९ ''–प्रविश्य'' इति प्र. पाठः ।

१० ''चक्रे पुरः शास्ति ताः'' इति च । ''चक्रे पुरः संहिताः'' इति सुदर्शनसूरिः ।

यं सम्पद्य जहात्यजामनुशयी सुप्तः कुलायं यथा
तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम्[1] ॥ ४९ ॥

ऋषिणा ऋषिरूपेण ॥ * ॥

[इति दशमस्कन्धे चतुर्नवतितमोऽध्यायः[2]]

[3]रामा गृहे विहरतः पुरतः कराभ्यां बद्धेक्षणाः स्वदयितस्य मुदा हसन्त्यः।
गात्रान्तराण्यपिदधुर्निजपूरुषस्य क्लेशावहान्यपि तदङ्गजभङ्गभीताः[4] ॥

१ यः परमात्मा, जगतां सृष्टिस्थितिनिधनहेतुः, प्रकृतिपुरुषयोरीश्वरः पुरुषोत्तमः, य इदं सर्वं सृष्ट्वा तन्नियन्तुमन्तरनुप्रविष्टः। यश्च ऋषिणा ऋषिरूपेण पुराणसंहितां चक्रे ज्ञानदानाय, मोहनाय चासुराणाम्। तदेवं सृष्टिस्थितिसंहारनियमनज्ञानाज्ञानान्युक्तानि। बन्धमोक्षौ च तत एवेत्याह-यं सम्पद्य। अनुशयी जीवः यं सम्पद्य अजां पूर्वोक्तामुभयविधां मायां जहाति। तत्र दृष्टान्तः-सुप्तः। यथा कुलाये सुप्तः पतगः सूर्योदये कुलायं जहाति। यथा सुप्तः पुरुषः कुलायं देहं तदभिमानं जहातीति वा। तत एव प्रकृतिबन्धस्तत्सम्पत्त्या च बन्धत्याग इति यावत्। कैवल्येन असमाधिकेन स्वभावेन निरस्तत्रिगुणम्। मोक्षदानेन जीवानां च निरस्तप्रकृतिम्। तमभयं हरिं ध्यायेत्।

२ प्राचीनकोशेष्वत्राध्यायसमाप्तिर्न पठ्यते। श्रीधरीयादिरीत्या चात्र सप्ताशीतितमोऽध्यायः। प्रचलिततात्पर्यपाठे त्वत्रैव दशमस्कन्धतात्पर्यसमाप्तिः।

३ इदमुत्तरं च पद्यम् भागवतकोशेषु विजयध्वजीयादिरीत्या च षट्सप्ततितमेऽध्याये पठ्यते। एतत्पद्यद्वयतात्पर्यं च प्र. पाठे तत्रैव पठितमिति नात्र पठ्यते। श्रीधरीयादिरीत्या चेदम्—"रामा गृहे-" इत्यादि पद्यं न पठ्यते। उत्तरपद्यं तु तद्रीत्या एकषष्टितमेऽध्याये पठ्यते। परन्तु सर्वत्र प्राचीनकोशेष्वेतत्पद्यद्वयव्याख्यानरूपाणि तात्पर्यवचनानि दशमस्कन्धान्त एव पठ्यन्ते। न क्वापि षट्सप्ततितमेऽध्याये। न ज्ञायते श्रुतिगीतोत्तरं कस्मिन्नध्याय इमे पद्ये निवेशनीये इति। द्विशततमेऽध्याये प्रथमस्य त्रिशततमे च द्वितीयस्य सङ्गतिदर्शनात् तत्र पठिते स्यातामिति सम्भाव्यते। विजयध्वजीये तु पूर्वतनाध्यायगतस्य पद्यस्यान्ते व्याख्याने गमनिकान्तरमुट्टङ्कितम्—"अत्र श्रीमद्भगवत्पादैः सिंहावलोकनन्यायेन अध्यायेयत्तासूचनाय चेदं प्रमाणमुक्तम्" इति। अस्तु सिंहावलोकनन्यायः। अध्यायेयत्तासूचनं कथमिति चिन्त्यम्।

४ गृहे विहरतः स्वदयितस्य कराभ्यां दासीजनपुरतो बद्धेक्षणा रामाः कृष्णाङ्गस्पर्शेनान्तर्मुदा हसन्त्यः बाह्यं गात्रान्तराण्यपिदधुः। पिधातव्येभ्य उरऊर्वादिभ्योऽन्यानि मुखादीनि गात्राणि गात्रान्तराणि। तान्यपि अपिदधुरित्यपिशब्द उभयान्वयी। सर्वं गात्रं जवनिकादिभिः पिधाय निलीय तस्थुरित्यर्थः। न केवलं दासीजनस्य सकाशादात्मानमपिदधुः। किंतु निजपूरुषस्य निजभर्तुरपि। कृष्णेन पिहितनयनास्तत आत्मानमुन्मोच्य दूरे निलीय स्थिताः। किं कृष्णादात्ममोचनं प्रियं तासाम्? नेत्याह—क्लेशावहान्यपि। यद्यपि पिधानेन क्लेशावहानि गात्रान्तराणि। कृष्णदर्शनेन स्पर्शनेन च वञ्चितत्वात्। अथाप्यपिदधुः। किमर्थम्? तदङ्गजभङ्गभीताः। तस्य कृष्ण-

गात्रान्तराणि[1] पिधातव्येभ्योऽन्यान्यपि । येषां पिधानेन क्लेशो भवत्यात्मनः । निजभर्तुरप्यपिदधुः । निर्लज्जा इत्यकामो भवत्यसाविति भयात् ॥ * ॥

निहते रुग्मिणि स्याले[2] नाब्रवीत् साध्वसाधु वा ।
रुग्मिणीबलयो राजन् स्नेहभङ्गभयाद्धरिः ॥

"न स्नेहभङ्गो देव्यास्तु न भयं केशवस्य च[3] । स्नेहभीत इवाथापि नोचे रुग्मिवधे हरिः" इति ब्रह्माण्डे ॥ * ॥

"[4]सर्वोत्तमोऽपि भगवान् गुणभावं[5] जनार्दनः । दर्शयेद् वसुदेवादेरात्मनो जीवतामपि । [6]अज्ञाशक्तादिभावस्तु कुतस्तस्याखिलेशितुः । [7]कुतश्च जीवता तस्य प्रधानपुरुषेशितुः । कुतो दोषाः सर्वगुणपूर्णस्या[8]ऽनन्दवारिधेः" इति वामने ॥ * ॥ * ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते
श्रीभागवततात्पर्यनिर्णये
दशमः स्कन्धः समाप्तः

स्याङ्गजः कामोऽभिलाषः । तस्य भङ्गेन भीताः । कृष्णकराभ्यां नयनस्पर्शमात्रेणोत्पुळकगात्रा दासीजनसमक्षमेव तं सोरोजविमर्दमालिङ्ग्य चुम्बितुकामा अपि, तथा करणे "निर्लज्जा इमाः" इत्यस्मासु निरभिलाषो भवेदिति भियाऽऽत्मानमपिदधुरिति । अनावरणमिच्छन्त्य आवृता अभूवन्निति भावः ।

१ "गात्रान्तराण्यपिदधुः पिधातव्येभ्यो-" इति प्र. पाठः ।

२ "रुक्मिणि स्याले" इति प्र.पाठः । स्याले रुग्मिणि बलरामेण निहते सति । हरिः साध्वसाधु वा नाब्रवीत् । साधु कृतमित्युक्ते रुग्मिणी न स्निह्यति । असाधु कृतमित्युक्ते बलरामः क्रुध्यतीति । इदम्-"प्राप्ते नरेषु जनने नरवत् प्रवृत्तिः" इति तात्पर्ये स्फुटम् । ३ "केशवस्य तु" इति प्र· पाठः ।

४ इदं समग्रं वामनवचनं प्र. पाठे पूर्वार्धान्ते त्रिचत्वारिंशाध्यायतात्पर्यतया पठितमिति नात्र पठ्यते । सर्वत्र प्राचीनकोशेष्वत्रैव पाठः । अयमाशयः—नेदं प्रमाणवचनं कस्यचिदध्यायविशेषस्य श्लोकविशेषस्य वा विशिष्य व्याख्यानरूपम् । किन्तु सर्वोत्तमस्य हरेः कथं नरवदज्ञवद् बालवाच्च वर्तनमिति तत्रतत्र कथाप्रसङ्गेषु सम्भावितशङ्कापनोदनेनोपसंहाररूपमिति युक्ततममन्त एव निवेशनम्, न मध्ये क्वापीति । तदिदमुक्तं विजयध्वजीयेऽपि स्कन्धान्ते—"सर्वोत्तमोऽपि भगवानित्येतत् प्रमाणमज्ञजनेन कृष्णे क्रियमाणसर्वशङ्कानिराकरणार्थं भगत्पादैः स्कन्धान्ते दर्शितमिति ज्ञातव्यम्" इति ।

५ "गुणाभावम्" इति प्र. पाठः प्रामादिकः । गुणभावमप्रधानभावम् । पुत्रादिभावम् ।

६ "अज्ञाशक्त्यादि-" इति प्र. पाठः ।

७ "कुतश्चित्" इति क्वचित् । "कुतश्च-" इत्यादिश्लोकार्धं प्र. पाठे न पठ्यते ।

८ "पूर्णात्मानन्द-" इति क्वचित् ।

एकादशः स्कन्धः

[द्वितीयोऽध्यायः]

ॐ ॥ भूतानां देवचरितं दुःखाय च सुखाय च ।
सुखायैव हि साधूनां त्वादृशामच्युतात्मनाम् ॥ ५ ॥

भजन्ति ये यथा देवान् देवा अपि तथैव तान् ।
छायेव कर्मसचिवाः साधवो दीनवत्सलाः ॥ ६ ॥

"आत्मनो भजने बुद्धिमुत्पाद्य फलदाः सुराः । उत्तमानां जनानां तु निकृष्टानां विपर्ययाः[1] । शुभाशुभफलानां तु कर्मणां विबुधाः सदा । प्रवर्तका यथायोग्यमृषयः करुणाः सदा । सुखमिच्छन्ति भूतानां प्रायो दुःखासहा नृणाम् । तथाऽपि तेभ्यः प्रवरा देवा एव हरेः प्रियाः" इत्युद्दामसंहितायाम् ॥ * ॥

[2]अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथो यथा[3] ।
तत्कर्म सङ्कल्पविकल्पकं मनो बुधो निदध्यादभयं ततः स्यात् ॥ ३८ ॥

---

१ "विपर्ययः" इति प्र. पाठः ।

२ "ईश्वरध्यानसाधनेषु मन एव प्रधानम् । अतः परमात्मनि मनोनियमनमेव कर्तव्यमित्याह—अविद्यमान इति । धिया मनसा ध्यातुः विषयान् स्मरतः स्वप्नः मनोरथः अर्थः जाग्रद्वस्तुत्वेन अविद्यमानः (जाग्रत्त्वेन अवभाति । एवं देहगेहादिरूपः द्वयः अर्थः ईश्वराधीनतया स्ववशत्वेन अविद्यमानोऽपि स्वाधीनतया) अवभाति । अयं स्वाधीन एवेति भ्रमविषयो भवतीत्यर्थः । तत् देहगेहादि कर्म विषयः यस्य तत् तत्कर्म । सदा विषयेषु प्रवर्तमानमित्यर्थः । सङ्कल्प इदं करोमितीच्छा । विकल्प इदं न करोमीतीच्छा । सङ्कल्पः विकल्पश्च यस्य तत् सङ्कल्पविकल्पकम् । सदा किञ्चिद्व्यापारोपेतमित्यर्थः । मनः, बुधः, मनसः विषयेषु प्रसक्त्याऽनिष्टं भवतीति ज्ञानवानित्यर्थः । अथवा बुधः मनस ईश्वरे विन्यासेन इष्टं भवतीति ज्ञानवानित्यर्थः । न विद्यते भयं यस्माद् तदभयं अन्तर्यामिरूपं प्रति निदध्यात् विषयेभ्य आकर्षणपुरस्सरं परमात्मनि न्यसेदित्यर्थः । निरन्तरं मनोनियमनस्य फलमाह—तत इति । ततः ज्ञानानन्दादिस्वरूपगुणैः क्रमेण पूर्णः स्यादित्यर्थः । अभयमित्यस्याऽवृत्तिर्वा । तस्मात् परमात्मनि मनोविन्यासादभयं स्यात्" इति यादवेन्द्रतीर्थाः । तत् तस्मात् कर्म सङ्कल्पयति विकल्पयति चेति तादृशं मनः बुधो भगवति निदध्यात्, ततश्चाभयं स्यादिति वा ।

३ "–मनोरथौ यथा" इति प्र. पाठः ।

76

"आत्मनो देहगेहादि द्वयशब्देन भण्यते। अविद्यमानं जीवस्य प्रतिभाति तदीयवत्। जाग्रद्वत्तु यथा स्वप्नः प्रतिभाति मनोरथः। [1]विद्यमानवदेवैवं देहादीशवशे स्थितम्। [2]विभाति स्ववशत्वेन सैषा संसृतिरुच्यते। तस्मात् तद्विषयं त्यक्त्वा मनो विष्णौ निवेशयेत्" इति हरिवंशेषु।

[3]एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः।
हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥ ४० ॥

"केचिदुन्मादवद् भक्ता बाह्यलिङ्गप्रदर्शकाः। केचिदान्तरभक्ताः स्युः केचिच्चैवो-भयात्मकाः। मुखप्रसादात् दार्ढ्याच्च भक्तिर्ज्ञेया नचान्यतः" इति वाराहे ॥ * ॥

खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन्।
सरित्समुद्रांश्च हरेः शरीरं यत् किञ्च भूतं प्रणमेदनन्यम्[4] ॥ ४१ ॥

"सर्वं हरेर्वशत्वेन शरीरं तस्य भण्यते। अनन्याधिपतित्वाच्च तदनन्यमुदीर्यते। नचाप्यभेदो जगता विष्णोः पूर्णगुणस्य तु" इति हरिवंशेषु ॥ * ॥

सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष[5] भागवतोत्तमः ॥ ४५ ॥

ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥ ४६ ॥

---

१ "विद्यमानवदेवैतद्—" इति प्र. पाठः। अहं राजा भवानीत्यादिमनोरथमयः स्वप्नः जाग्रद्वत् विद्यमानवदेव यथा प्रतिभाति तथा देहादीशवशे स्थितं स्ववशत्वेन विभाति।

२ "भ्रमन्ति स्ववशत्वेन" इति क्वचित्।

३ "एवंव्रतश्च प्रिय-" इति कोशेषु पाठान्तरम्। "एवंव्रतः विषयपरित्यागे दृढव्रतः। श्रवणध्यानादौ दृढव्रतो वा। स्वप्रियः श्रीकृष्णः तस्य नामकीर्त्या जातानुरागः प्रवृद्धभक्तिः सन् द्रुतचित्तः परमात्मगुणानुसन्धाने मनःप्रसादविशेषवान् उच्चैर्हसति, रोदिति आनन्दाश्रूणि मुञ्चति, रौति शब्दं करोति श्रीकृष्णदर्शनापेक्षयेति भावः। नारायणादीनि नामानि गायति, हर्षोद्रेकादिति भावः। उन्मादोपेतजन इव नृत्यति। इति लोकबाह्यः सन् वर्तते" इति यादवेन्द्रतीर्थाः। रामकृष्णाद्यनन्तनामसु स्वस्य यत् प्रियं नाम तत्कीर्त्या वा।

४ "-दनन्यः" इति प्र· पाठः। "भूतं विद्यमानं यत् किञ्च गजमनुष्यादिकम्, एतत् सर्वम्, न विद्यतेऽन्योऽधिपतिर्यस्य तदनन्यम्, विष्ण्वेककर्तृकम्, हरेः शरीरम्, श्रीहरिवशत्वात प्रतिमावदधिष्ठानं प्रणमेत्, सर्वत्रान्तर्याम्यनुसन्धानेनेति भावः" इति यादवेन्द्रतीर्थाः।

५ "—त्यात्मन् ज्ञेयो भाग-" इति पाठान्तरम्।

अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः[1] ॥ ४७ ॥

"पूर्णत्वादात्मशब्दोक्तः कश्चित् सर्वनरोत्तमः । सोऽपि[2] नारायणो नान्यः स च सर्वेषु संस्थितः । तद्वशा इतरे सर्वे श्रीब्रह्मेशंपुरःसराः । स एव तु स्वभक्तेषु स्थित्वाऽनुग्रहकारकः । अज्ञेष्वज्ञानयन्ता च द्विषत्सु द्वेषकारकः । तत्प्रेरितास्तदन्ये तु प्रियद्वेषाधिकारिणः । अतस्तत्प्रेरणादेव प्रेमाद्या मम जज्ञिरे । इति पश्यति यो बुद्ध्या स तु भागवतोत्तमः ॥ * ॥ सर्वाधिकं पृथग् विष्णुं क्षीरसागरवासिनम् । ज्ञात्वा [3]तत्र प्रेमयुक्तस्तद्भक्तेषु च मैत्रयुक्[4] । कृपावांश्च तदज्ञेषु तद्द्वेषीणा[5]मुपेक्षकः । तद्वशत्वं न जानाति[6] सर्वस्य जगतोऽपि तु । तमाहुर्मध्यमं भक्तमर्चायायेव संस्थितम । विष्णुं ज्ञात्वा तदन्यत्र नैव जानाति यः पुमान् । तारतम्यं च तद्भक्ते न[7] जानाति कथञ्चन । अवजानंश्च तद्भक्तानात्मनो भक्तिदर्पतः[8] । उपेक्षकोऽपिवा तेषु न स्मरेदथवाऽपि तान् । मानुषेषु यथा कश्चित् किञ्चिदुच्चः प्रदृश्यते । एवमेवोच्चतां बिष्णोरल्पां पश्यति चान्यतः । ते तु भक्ताधमाः प्रोक्ताः स्वर्गादिफलभोगिनः[9] । तैर्विघ्निता अधो यान्ति तद्भक्तानामुपेक्षकाः[10] । कुर्युर्विष्णावपि द्वेषं देवा देवावमानिनः[11] । पूजिता विष्णुभक्तिं च नावज्ञेयास्ततः सुराः । उपेक्षकेषु

---

१ श्लोकत्रयं यादवेन्द्रतीर्थीये विवृतम्—"परमात्मनः सर्वांशेषु पूर्णत्वसर्वोपजीव्यत्वज्ञानवान् परमभागवत इत्याह—सर्वभूतेष्विति । सर्वभूतेषु सर्ववस्तुषु सर्वशक्तिप्रेरणार्थं स्थितस्य, आत्मनः आदानादिकर्तुः, सर्वगुणपूर्णस्येति वा, अन्तर्यामिणः भगवद्भावं पूर्णैश्वर्यादिमत्त्वम्, स्थानवैचित्र्यप्राप्तशक्तिन्यूनतादिराहित्यमिति भावः । यः पश्येत् । भूतानि पृथिव्यादीनि चेतनाश्च भगवति पूर्णवीर्यादिसम्पन्न आत्मनि समातिशयरहिते सन्तीति च यः पश्येत् एष भागवतोत्तमः ॥ * ॥ भागवताभाससङ्गपरित्यागाय तदाभासं दर्शयति—ईश्वर इति । ईश्वरतद्भक्तद्वेषिषूपेक्षां यः करोति ॥ * ॥ अर्चायां साळग्रामसुवर्णविग्रहादौ यः पूजामीहते करोति । तद्भक्तेषु देवादिषु पूजां न करोति विष्णुभक्तत्वेन तेष्वादरस्याभावादिति भावः" इत्यादि ।

२ "स च नारा–" इति पाठान्तरम् ।

३ "तत्प्रेमयुक्तस्तु तद्भक्तेषु" इति क्वचित् ।

४ "प्रेमयुक्" इति च क्वचित् ।

५ "तद्द्वेषिणा–" इति प्र. पाठः । इन्नन्त इदन्तोऽपि भवति । यथा बली बलिः । गली गलिः । "सुखं स्वपिति गौर्गलिः" । केशी केशिः । 'अथ हतयोर्गलिकेश्योः" । केसरी केसरिः । "नृकेसरिम्" । तेन द्वेषीणामिति साधु भवति । द्वेषेऽतिशय द्योतनाय दैर्घ्यं वा संहितायाम् । द्वेषिणामित्येव पदपाठः । वेद इव वैदिकेष्वप्येतद् भवति । "आधिक्येऽवेकम्" इति च सूत्रम् । "संहितायां यत्र दैर्घ्यम्–" इत्यादि च ।

६ प्रेमादेस्तद्वशत्वं न जानाति । सर्वस्य जगतोऽपि तु तद्वशत्वं न जानाति ।

७ "तद्भक्तेर्न" इति प्र. पाठः ।

८ "भक्तिदर्पितः" इति च ।

९ "–फलभागिनः" इति प्र. पाठः ।

१० तद्भक्तानां देवादीनामुपेक्षकाः तैः स्वोपेक्षितैर्देवैः विघ्निता अधो यान्ति ।

११ "देवावमानिनः" इति क्वचित् । देवावमानिनः पुरुषस्य विष्णावपि द्वेषं देवाः कुर्युर्जनयेयुः ।

देवानां भक्तिनाशं स्वयं हरिः। करोति तेन विभ्रष्टाः संसरन्ति पुनःपुनः। अधो वा यान्ति विद्वेषात् पूज्या देवास्ततः सदा। यस्तान् द्वेष्टि स तं द्वेष्टि यस्ताननु स चानु तम्। ऐकात्म्यमागतं विद्धि देवैस्तं[1] भक्तिपूरितैः। उपेक्षकस्तु देवानां यदैव निरयोपगः। [2]तदा तु किमु वक्तव्यमुपेक्षायां जनार्दने। विष्णोरुपेक्षकं सर्वे विद्धि-षन्त्यधिकं सुराः। पतत्यवश्यं तमसि हरिणा तैश्च पातितः। भुङ्क्ते स्वर्गफलं नित्यं निरयं नैव गच्छति। विष्णोस्तु मध्यमो भक्तो जायते मानुषेषु वा[3]। अस्मरन् देवता यस्तु भजते पुरुषोत्तमम्[4]। योग्यः संस्मरते देवानयोग्यो द्वेष्टि केशवम्। यस्तूत्तमो भागवतः स मुक्तिं परमां व्रजेत्। विष्णुना सर्वदेवैश्च मोदते स हि[5] नित्यदा'' इति च ॥ * ॥

गृहीत्वाऽपीन्द्रियैरर्थान् यो न द्वेष्टि[6] न हृष्यति ।
विष्णोर्मायामिमां[7] पश्यन् स वै भागवतोत्तमः ॥ ४८ ॥

[8]विष्णुमायां विष्णिवच्छाधीनाम्।

''विष्णोरिच्छानुसार्येतज्ज्ञात्वा योग्यान्नचाधिकम्[9]। हृष्यति द्वेष्टि वा यस्तु स वै भागवतोत्तमः'' इति च। ''सतां वृद्धिकरो धर्मस्त्वसतां ह्रासकारणः[10]। अयं तु निश्चितो धर्मो ह्यधर्मोऽन्यो विनिश्चितः। [11]हर्षः सत्सु तथाऽसत्सु धर्मो धर्मविपर्ययः। तेषां वृद्धौ तथा हानौ[12] सर्वं ज्ञेयमशेषतः। एतदर्थं च धर्माणां मर्यादा वैदिकाऽमला। [13]नित्यधर्मविरुद्धा तु सा न ग्राह्या कथञ्चन'' इति च ॥ * ॥

---

१ ''देवैस्तद्भक्ति-'' इति प्र. पाठः। तं हरिं देवैरैकात्म्यं एकमतत्वमागतं विद्धि।

२ ''तदाऽपि'' इति क्वचित्।

३ ''मानुषेषु च'' इति प्र. पाठः।

४ देवताः परिवारत्वेनास्मरन् यः केवलं पुरुषोत्तमं भजते स मध्यमभक्तः। योग्यस्तु देवानपि परिवार-त्वेन संस्मरते। अयोग्यस्तु केशवमपि द्वेष्टि।

५ ''स ह नियद इति च'' इति प्र. पाठः प्रामादिकः।

६ ''यो नो द्वेष्टि'' इति पाठान्तरम्।

७ विष्णोर्मायामिदम्'' इति प्र. पाठः। ''महाभागवतस्य गुणान्तराण्याह—गृहीत्वाऽपीति। अर्थान् भोग्यान् विष्णुद्वेषप्रातान् गृहीत्वाऽपि यः न हृष्यति। विष्णुद्वेषयोग्यान्न हृष्यति च। अर्थान् विषयान् निष्ठुरवचना-दीनि गृहीत्वाऽपि न द्वेष्टि। स्नेहयोग्यं भक्तं च न द्वेष्टि। इमां जगतः प्रवृत्तिं विष्णोर्मायां कर्मप्रेरकविष्णिवच्छा-धीनां पश्यन् भक्ताभक्तयोः स्नेहद्वेषावेव करोतीति भावः'' इत्यादि यादवेन्द्रतीर्थीये।

८ ''विष्णोर्मायाम्'' इति प्र. पाठः। कोशेषु सर्वत्रापि विष्णुमायामित्येव। अर्थतोऽनुवाद इति वक्तव्यम्। तथैव मूलपाठस्तात्पर्याभिमतो वा स्यात्।

९ ''योग्यं नचाधिकम्'' इति प्र. पाठः।

१० ''ह्रासकारकः'' इति च।

११ सत्सु हर्षः धर्मः। असत्सु तथा हर्षः धर्मविपर्ययोऽधर्मः।

१२ चतुर्थ्यर्थे विषयसप्तमीयम्। सतां वृद्ध्यर्थमसतां हान्यर्थं च सर्वं ज्ञेयम्।

१३ ''वैदिकादिका। मूलधर्म-'' इति पाठान्तरम्। प्र. पाठोऽपि तथा।

देहेन्द्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ।
संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः[१] ॥ ४९ ॥

"देहेन्द्रियप्राणधियां त्रिधैव त्वभिमानिनः । तत्रोत्तमा देवतास्ताः सर्वदोषविवर्जिताः । गुणैः सर्वैः सुसम्पन्ना विरिञ्चादोत्तरोत्तरम्[२] । मध्यमा गुणदोषेता अधमा[३] असुरा मताः । ते [४]सर्वे दोषसंयुक्ता आ [५]चित्तादुत्तरोत्तम् । तेभ्येऽन्यो[६] मानुषो जीवस्ताभ्यां देवासुरावपि[७] । जीवाभिमानिनश्चैव[८] त्रिविधाः सम्प्रकीर्तिताः । [९]जीवमान्युत्तमो ब्रह्मा मध्यमः स्वयमेव तु । अधमः कलिरुद्दिष्टस्तत्र मध्यमनीचयोः । मृतिजन्मक्षुधादुःखप्रभृत्यखिलमेव तु । नोत्तमस्य तु जीवस्य देहादेश्च कथञ्चन । जन्मादिकृतदुःखं तु देहमान्यसुरस्य ह[१०] । सुप्त्याद्यप्ययजं दुःखमसुरेन्द्रियमा-

---

१ अत्र द्वितीयपादे "जन्माप्ययक्षुद्भयतर्षतोऽन्यः" इति यादवेन्द्रतीर्थाभिमतः पाठ इति भाति । तथाहि तद्व्याख्यानम्—"संसारे जीवस्य स्थूलदेहसम्बन्धेन प्राप्तैः धर्मैः । देहस्य जन्मादि । इन्द्रियाणामप्ययः उपचयनाशः, अन्नाद्यलाभेनेति भावः । प्राणानां क्षुदादि । मनसः भयम् । तादृशकारणदर्शनादिति भावः । धियः अन्तःकरणप्रभेदस्य तर्षः विषयतृष्णा । एभिः देहादीनां जन्मादिभिः अन्यः । अन्तःकरणगतदुःखस्य स्वस्मिंस्तदाऽऽरोपरहित इत्यर्थः । ततः नीचताद्विकाभिमानि(नियमन)रहित इति भावः । अविमुह्यमान इति देहस्थो (जीव एव) देहेन्द्रियादीनामभिमानीति प्रतीतिपरिहाराय । 'अभिमानिनो बहवः सन्ति, ते कर्मफलभोक्तारश्च' इत्यवान्तरविषयज्ञापनाय तात्पर्यम्—"देहेन्द्रियप्राणधियां त्रिधैव त्वभिमानिनः" इत्यादि" इति ।

२ "विरिञ्चादुत्तरोत्तरम्" इति प्र. पाठः प्रामादिकः । आ विरिञ्चादुत्तरोत्तरम् ।

३ "दोषेता असुरा अवमा मताः" इति प्र· पाठः । मध्यमाः पुरञ्जनादयः ।

४ "सर्वदोषसंयुक्ता–" इति क्वचित् ।

५ आ चित्तात् चित्ताभिमानिकलिपर्यन्तम् ।

६ उत्तमाभिमानिभ्यो देवेभ्यः, मध्यमाभिमानिभ्यः पुरञ्जनादिभ्यः, अधमाभिमानिभ्योऽसुरेभ्यश्चान्यः मानुषो जीवः भोगार्थं स्वकर्मनिर्मितदेहगतः सोऽपि तद्देहाभिमानी मध्यम एव । एवं पुरञ्जनो मानुषो जीवश्चेति द्वौ मध्यमाधिकारिणौ मानुषदेह एव । देवासुरयोस्तु ताभ्यामन्यौ देवासुरावेव मध्यमाभिमानिनौ । अपिशब्देन उत्तमाधमावभिमानिनो समुच्चिनोति । अयमर्थः—यस्मिन् देवदेहे यो देवः स तस्य मध्यमाभिमानी । तत उत्तमा देवा उत्तमाभिमानिनः । अधमा असुरा इति । एवं यस्मिन्नासुरदेहे योऽसुरः स तस्य मध्यमाभिमानी । देवा उत्तमाभिमानिनः । अधमा असुरा इति । तथाच देवदेहे मध्यमोत्तमाभिमानिनौ देवावेव, असुरदेहे मध्यमाधमाभिमानिनावसुरावेव इति देवासुरौ द्वावेवाभिमानिनौ । मनुष्यदेहे तु मनुष्यजीवा अपि मध्यमाभिमानिन इत्यभिमानित्रैविध्यमिति ।

७ "ताभ्यो देवासुरावपि" इति क्वचित् । "ताभ्यां देवासुरा अपि" इति च ।

८ "-मानिनश्चेति त्रिविधाः" इति क्वचित् ।

९ देहेन्द्रियाद्यभिमानिन उक्ताः । इदानीं जीवाभिमानिनस्त्रिविधा उच्यन्ते—जीवमान्युत्तमो ब्रह्मा ।

१० "हि' इति क्वचित् ।

निनः[1]। क्षुन्निमित्तं तु यद् दुःखं प्राणमान्यसुरस्य तत्। भयतर्षादिजं दुःखं मनोमान्यसुरस्य च[2]। केवलं त्वान्तरं दुःखं[3] बुद्धिमान्यसुरस्य तत्। नीचोऽस्मीति तु यद् दुःखमहम्मान्यसुरस्य तत्। अतीतादिस्मृतेर्दुःखं चित्तामान्यसुरस्य च[4]। जीवमान्यसुरस्य स्यात् सर्वं तत् समुदायतः। एवमेव सुखं देवेषूभयं मध्यमेषु च। [5]असुराणामधर्मस्य वृद्धया सुखमपीष्यते। देवानां नैव केनापि दुःखं प्रीतिस्तु धर्मतः। अधर्मोऽपि प्रीतये स्यादसुराणां तमोगतेः[6]। देवानां पुण्यपापाभ्यां सुखमेवोत्तरोत्तरम्। तेषां दुःखादिकं किञ्चिदसुरावेशतो भवेत्। प्राणस्य नासुरावेश आखणाद्समसमो हि सः। सम्पूर्णानुग्रहाद् विष्णोः प्राणः पूर्णगुणो मतः। असुराणां सुखाद्याश्च देवावेशादुदीरिताः। स्वतस्तु निर्गुणाः सर्वे सर्वदोषात्मका मताः। विविच्यैवं जगत् सर्वं स्वात्मानं च पृथक् स्थितम्। सर्वतश्च पृथक् सन्तं विष्णुं सर्वोत्तमोत्तमम्। जानन्ति ये भागवतास्त उक्ता उत्तमा इति[7]" इति ब्रह्मतर्के।

देहेन्द्रिययोर्जन्माप्ययौ[8] ॥ * ॥

न यस्य स्वः पर इति चित्ते स्वात्मनि वाऽभिदा[9]।
सर्वभूतसमः शान्तः स वै भागवतोत्तमः[10] ॥ ५२ ॥

---

१ असुरेन्द्रियमानिनः इन्द्रियमान्यसुरस्य सुप्त्याद्यप्ययजं दुःखम्। एतेन मूले अप्ययपदस्य सुप्त्याद्यप्यय इत्यर्थो विवृतः। आदिपदगृहीतमर्थान्तरम् "अन्नाद्यलाभेनोपचयनाशः" इति यादवेन्द्रतीर्थीयोक्तम्।

२ "तु" इति क्वचित्।

३ आन्तरं दुःखमित्याधिः।

४ "तु" इति क्वचित्।

५ न केवलमसुराणां दुःखमेव। किन्तु लोकेऽधर्मस्य वृद्धया सुखमपीष्यते। ननु यथाऽसुराणामधर्मवृद्धया सुखं तथा देवानां दुःखमपीष्यताम्। नहि देवा अधर्मेणापि प्रीयन्त इति युक्तमत आह—देवानां नैव केनापि दुःखम्। यथा योग्येषु धर्मवृद्धया तथाऽयोग्येष्वधर्मवृद्धयाऽपि तेषां प्रीतिरेव स्यान्न दुःखम्। नहि भगवद्द्वेषिणामधर्मवृद्धया तमोगतिस्तेषामनिष्टा।

६ "-दसुराणामधोगतेः" इति प्र. पाठः।

७ "उत्तमोत्तमा इति ब्रह्मतर्के" इति प्र. पाठः प्रामादिकः। "उत्तमास्त्विवतीति ब्रह्मतर्के" इति क्वचित्।

८ इदं वाक्यमेव क्वचित् कोशेषु न पठ्यते। "जन्मापायौ" इति क्वचित् पाठः। देहस्य जन्माप्ययौ, इन्द्रियस्य त्वप्यय इति देहेन्द्रिययोराहत्य जन्माप्ययाविति यादवेन्द्रतीर्थाभिमतोऽर्थः।

९ "इति चित्तेष्वात्मनि वा भिदा" इति प्र.पाठः।

१० यस्य चित्ते सति विद्यमाने, प्राक् चित्तसम्बन्धलक्षणसंसारावस्थायामित्यर्थः। अहं स्वः स्वतन्त्र इति परमात्माभेदप्रतीतिर्नास्ति। स्वयमेवाऽऽत्मा तस्मिन् स्वात्मनि केवलात्मनि प्राकृतचित्तविनिर्मुक्ते मोक्षे वा परोऽह पूर्णोऽहं भविष्यामीति अभिदा परमात्माभेदप्रतीतिर्नास्ति। यः सर्वभूतेषु समः यथोचितं वर्तमानः। यथोचितं बहुमानादिकर्ता सर्वभूततारतम्यज्ञानवानिति भावः। शान्तः परमात्मनि न्यस्तचित्तः भागवतोत्तमः" इति यादवेन्द्रतीर्था। यद्यपि स्वः स्वयमेव परः परमात्मेति जीवपरयोरभिदाप्रतीतिर्यस्य नेत्यपि व्याख्यातुं शक्यम्। तथाऽपि

चित्ते विद्यमाने, स्वात्मनि केवलात्मभावे[1] मोक्षे च, यस्य जीवपरयोरभेदो नास्ति।

"न क्वापि जीवं विष्णुत्वे संसृतौ मोक्ष एव वा[2]। यः पश्यति सुरादींश्च यथोत्कर्षं प्रपश्यति। स सर्वभूतसमदृग्[3] विष्णुं सर्वोत्तमं स्मरन्" इति हरिवंशेषु। "नैवं[4] त्वया नु मन्तव्यं दृष्टो जीवो मयेति ह। सर्वभूतगुणैर्युक्तं देवं त्वं ज्ञातुमर्हसि" इति च मोक्षधर्मेषु[5]। "नैवं त्वया नु मन्तव्यं जीवात्माऽहमिति क्वचित्। सर्वैर्गुणैः सुसम्पन्नं देवं[6] मां ज्ञातुमर्हसि"[7] इति वाराहे[8] ॥ * ॥

इत्येकादशस्कन्धे द्वितीयोऽध्यायः

[तृतीयोऽध्यायः]

एभिर्भूतानि भूतात्मा महाभूतैर्महाभुजः[8]।
ससर्जोच्चावचान्यादौ स्वयमात्मप्रसिद्धये[9] ॥ ३ ॥

आत्मप्रसिद्धये भूतानां भगवज्ज्ञानार्थम् ॥ * ॥

स्वयमित्यर्थे "स्वमात्मनि" इति नपुंसकत्वश्रवणाद् यादवेन्द्रतीर्थैः स्वः स्वतन्त्र इति व्याख्यातमिति भाति। "स्वः पुमानात्मनि" इत्यपि श्रवणात् तथाऽपि शक्यं व्याख्यातुम्। "स्वातन्त्र्यात् स्व इतिप्रोक्तः" इति हि स्मरन्ति।

१ स्वयमेव स्वस्य आत्मा शरीरं च यस्य स स्वात्मा। पञ्चदशजडकलाभिर्विनिर्मुक्तः केवलचैतन्यस्वरूपः षोडशकलात्मको जीवः स्वयमेव स्वरूपशरीरेण मोक्षेऽवतिष्ठते हि। तदुक्तम्—"शरीरं जायते तेषां षोडश्या कलयैव हि" इति।

२ "एव च" इति प्र. पाठः।

३ यः सुरादीन् यथोत्कर्षं तारतम्यानुसारेण पश्यति स सर्वभूतसमदृगिति सर्वभूतसम इति मूलपदं विवृतम्। एतदेवोक्तं यादवेन्द्रतीर्थीये — "सर्वभूततारतम्यज्ञानवान्" इति। असमयोरसमत्वेन दर्शनमेव हि समदर्शनम्। न समत्वेन दर्शनम्। नहि पुत्रीं पत्नीं मातरं च समत्वेन पश्यन् समदृग् भवति। "यथा सुहृत्सु कर्तव्यं पितृशत्रुसुतेषु च। तथा करोति पूजादिं समबुद्धिः स उच्यते" इति हि स्मरन्ति। शान्त इत्यस्य विवरणम्—"विष्णुं सर्वोत्तमं स्मरन्" इति। वक्ष्यति हि—"शमो मन्निष्ठता बुद्धेः" इति।

४ नरलोकविडम्बं कृष्णादिरूपं भगवन्तं दृष्ट्वा कश्चन जीवोऽयं दृष्ट इति त्वया न भ्रमितव्यम्। सर्वैः पूर्णैः भूतैः सदा विद्यमानैः साधुगुणैर्युक्तं देवं नारायणमेव तं त्वमर्हसि ज्ञातुम्। "जीवो मया दृष्टः अहमित्यनुभवात्। तेन परमात्माऽपि ज्ञात एव तदभेदादिति त्वया नानुमन्तव्यम्। यतस्तं जीवादन्यमेव देवं ज्ञातुमर्हसि" इत्यपि व्याचक्षते।

५ "मोक्षधर्मे" इति क्वचित्।

६ "देवम्" इति क्वचित्।

७ भगवद्वचनमिदम्। अहं परमात्मैव जीवात्मेति न त्वया मन्तव्यम्। किन्तु मां ततोऽन्यं गुणपूर्णं देवोत्तमं ज्ञातुमर्हसीति।

८ "इति च वाराहे" इति प्र. पाठः।

८ "महाभुज" इति सम्बुद्ध्यन्तं पाठान्तरम्।

९ "-वचान्याद्यः स्वमात्रात्मप्रसिद्धये" इत्यर्वाचीनाः। भूतात्मा भूतान्तर्यामी। "भूतात्मा भूतभावनः" इति

एवं सृष्ट्वा स भूतानि स्थविष्ठैः पञ्चधातुभिः[१] ।
एकधा दशधाऽऽत्मानं विभजन् जुषते गुणान् ॥ ४ ॥

गुणैर्गुणान् स भुञ्जान आत्मप्रद्योतितैः प्रभुः ।
मन्यमान इदं सृष्टमात्मानमिह सज्जते[२] ॥ ५ ॥

एवं गुणान् भुञ्जानो भगवान् । तं सृष्टं मन्यमानो जीव इह सज्जते ।

"शरीरे दोषहानेन[३] गुणभोक्तारमीश्वरम् । शरीरस्थतया जीवं मन्यमानः पतत्यधः । तत्सृष्टा हि सदा जीवा देहादेर्जनिमत्त्वतः । नित्यानन्दैकदेहोऽसौ विष्णुस्तत् कैकताऽनयोः" इति च[४] ॥ * ॥

इत्थं कर्मगतीर्गच्छन् बह्वभद्रवहः[५] पुमान् ।
आ भूतसम्प्लवात् सर्गप्रळयावश्नुतेऽवशः ॥ ७ ॥

हि विष्णुनामसु । "एभिः महदहङ्कारादिसृष्टिक्रमेण ब्रह्माण्डसृष्ट्यनन्तरं सृष्टैः महाभूतैः । महाभुजः महान्तः भुजा यस्य सः । विराण्मूर्तिः स्वयं चतुर्मुखात् पूर्वमिति भावः । उच्चावचानि भूतानि सुरादीन् चेतनान् ज्ञानाधिकारेन्द्रियसङ्घातलक्षणदेहोपेतान् आत्मप्रसिद्धये भूतानां भगवज्ज्ञानार्थं ससर्ज" इति यादवेन्द्रतीर्थाः । महाभुजो महाभोग इति वा ।

१ "सृष्टानि भूतानि प्रविष्टः पञ्चधातुभिः" इत्यर्वाचीनाः ।

२ श्लोकद्वयार्थः यादवेन्द्रतीर्थीये यथा—"स्थविष्ठैः घनीभूतैः धातुभिः भूतैः । एवं चतुर्मुखस्थः सन्नपि भूतानि सृष्ट्वा स सर्वभोक्ता श्रीहरिः आत्मानं एकधा मनोनियामकत्वेन दशधा दशेन्द्रिनियामकत्वेन विभजन् गुणान् शब्दस्पर्शादीन् जुषने भुङ्क्ते। मनोगतस्य स्मृतिविषयसुखं विषयः । अथवा स्वप्नभोक्तृतैजसवत् मनोगतः परमात्मा प्रविविक्तमनोरथभोक्ता । यः अन्तर्यामी आत्मनि स्वसामर्थ्येन प्रद्योतितैः ज्ञानोन्मुखैः गुणैः स्वाधीनैरिन्द्रियैः गुणान् विषयान् भुञ्जानः प्रभुः विषयभोगप्राप्तदोषनिरसनसमर्थः देहकरणेषु य आस्ते स परमात्मा । इन्द्रिये देहे च परमात्मव्यापारमुक्त्वा जीवव्यापारमाह—मन्यमान इति । इदं विषयभोजनमुद्दिश्य सृष्टं स्वात्मनं अहमेव भोक्तेति स्वातन्त्र्येण भोक्तारमात्मानं मन्यमानः सन् आस्ते । इदं विषयजातं सृष्टं परमात्माधीनं आत्मानं स्वाधीनमेवेति मन्यमान इति वा । इह नरकभूम्योस्तमसि वा सज्जते । स्वस्मिन् स्वातन्त्र्यारोप एव परमात्मत्वारोप इति भावः" इति । इदं सृष्टं जीवजातमात्मानं परमात्मानं मन्यमानः सज्जत इति वा ।

३ "शरीरदोषहानेन" इति क्वचित् ।

४ इतः परं क्वचित् "देहेन्द्रियेण जन्माप्ययौ । आत्मनि बुद्धौ" इति वाक्यद्वयमधिकं पठ्यते । अन्यत्र पठितव्यमेतदत्र प्रमादपतितमिति स्फुटम् ।

५ "बह्वभद्रवहाः" इति प्र. पाठः । "बह्वभद्रावहः" इति यादवेन्द्रतीर्थीये । तथाहि तद्व्याख्यानम्—"इत्थं दुःखमनुभवन्, कर्मगतीः, गम्यत इति गतिः, कर्मप्राप्यतिर्यगादीनि गच्छन् पुमान् बह्वभद्रावहः रागद्वेषादिना बहु-

"आभूतसम्प्लवाज्जन्म जीवेशत्वं विजानतः। ततः पतत्यधो यस्मादुत्थानं नैव तु क्वचित्" इति च ॥ * ॥

धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकम् ।
अनादिनिधनः कालो ह्यव्यक्ताय विकर्षति[1] ॥ ८ ॥

"कालाख्यः कालनाद्[2] विष्णुर्व्यक्तमव्यक्ततां नयन्" इति च ॥ * ॥

[3]ततो विराजमुत्सृज्य वैराजः पुरुषो नृप ।
अव्यक्तं विशते सूक्ष्मं निरिन्धन इवानलः ॥ १२ ॥

[4]वारिणा हृतगन्धा भूः सलिलत्वाय कल्प्यते[5] ।
सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्प्यते[5] ॥ १३ ॥

हृतरूपं तु तमसा वायौ ज्योतिः प्रळीयते[6] ।
हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते ॥ १४ ॥

अव्यक्तं विशतीत्युक्त्वा तस्य विस्तारो वारिणा हृतगन्धेत्यादि ।

"सङ्क्षेपविस्तराभ्यां तु कथयन्ति मनीषिणः। बहुवारस्मृतेस्तस्य फलबाहुल्यकारणात्" इति शब्दनिर्णये ॥ * ॥

पापकर्ता सन्, आभूतसम्प्लवात्, सम्प्लवो नाशः, भूतसम्प्लवपर्यन्तम्, महाप्रळयपर्यन्तं सर्गप्रळयौ जन्ममरणे अवशः अस्वेच्छाधीनः कर्मवशः अश्नुते । जन्मादिप्राप्तदुःखादिकं भुङ्क्ते ।

१ "—क्तायापकर्षति" इति प्र. पाठः । "आदिरुत्पादकम्, निधनं नाशः, ताभ्यां कदाऽपि रहितः कालः संहारणसमर्थः परमात्मा धातूनां भूतादीनामुपप्लवे नाशे आसन्ने सति, लयकाले प्राप्ते सति, द्रव्याणि भूतानि, गुणाः रूपरसादयः, सत्वादयो वा, एतत्समुदायरूपं ब्रह्माण्डं अव्यक्ताय प्रकृतिमात्रेणावस्थानाय विकर्षति ब्रह्माण्डावयवान् शिथिलीकरोतीत्यर्थः" इति यादवेन्द्रतीर्थाः ।

२ "कलनाद्—" इति प्र. पाठः प्रामादिकः । कालनात् संहारणात् संहरणाद्वा ।

३ "ततः ब्रह्माण्डनाशानन्तरं वैराजः विराट्पुरुषः ब्रह्मा विराजं स्वाधिष्ठानं ब्रह्माण्डमुत्सृज्य अव्यक्तं कारणे स्थितं सूक्ष्मं परमात्मानं विशते । निरिन्धनः आश्रयरहितः अनलः वह्निः अव्यक्तं भूतकारणं प्रधानवह्निमिव" इति यादवेन्द्रतीर्थीयम् ।

४ "वायुना" इति प्र. पाठः ।

५ "कल्पते" इति च । ज्योतिषा हृतरसं सलिलं ज्योतिष्ट्वाय कल्प्यते ।

६ "प्रलीयते" इति प्र. पाठः । तमसा तमोगुणानुस्यूतेन वायुना हृतरूपं ज्योतिर्वायौ प्रळीयते ।

77

[1]कालात्मना हृतगुणं नभ आत्मनि लीयते ।
इन्द्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप ।
प्रविशन्ति ह्यहङ्कारं स्वगुणैरहमात्मनि ॥ १५ ॥

नभ आत्मनि लीयत इत्युक्त्वा इन्द्रियाणीत्याद्यपि विस्ताराय । आत्मनि बुद्धौ[2] ॥ * ॥

[3]एषा माया भगवतः सर्गस्थित्यन्तकारिणी ।
त्रिवर्णा वर्णिताऽस्माभिः किं भूयः श्रोतुमिच्छसि ॥ १६ ॥

[4]यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः ।
तरन्त्यञ्जः स्थूलधियो महर्ष इदमुच्यताम् ॥ १७ ॥

---

१ "कालात्मना संहारमूर्तिना श्रीहरिणा हृतशब्दलक्षणगुणं नभ आत्मनि परमात्मनि लीयते । बुद्धिरन्तःकरणप्रभेदः । वैकारिकैः देवैः । अहमहङ्कारं त्रिविधं विशति । अहं स्वगुणैः स्वापेक्षयाऽप्रधानैः स्वस्मिन् प्रविष्टैः आकाशादिभिः सह आत्मनि बुद्धौ प्रविशति" इति यादवेन्द्रतीर्थाः । अयमत्र विवेकः—भूतस्रष्टा तामसाहङ्कारः । तस्मात्तत् तामसाहङ्कारं विशति । इन्द्रियाणि तैजसापरनामानं राजसाहङ्कारम् । तदभिमानिनो देवा वैकारिकापरनामानं सात्विकाहङ्कारमिति । तत्र मनोबुद्ध्योस्तु वैकारिके तैजसे च क्रमाल्लय इति । एवं स्वस्मिन् विलीनैः स्वकार्यैः सह अहङ्कार आत्मनि बुद्धौ विशति । ननु किमिदमुच्यते । "इन्द्रियाणि मनो बुद्धिः" इति अहङ्कारकार्यं बुद्धिरहङ्कारे लीयत इत्युक्तम् । पुनरहङ्कारो बुद्धाविति । सेयमन्योन्याश्रयता । मैवम् । पूर्वोक्ता हि बुद्धिः स्थिरसंशयादिरूपा । तदुक्तम्—"अचलः संशयो बुद्धेश्चलो मानस उच्यते" इति । तदभिमानिन्युमा । साऽहङ्कारमानिनि रुद्रे लीयते । स च व्यवसायात्मिकायां बुद्धौ तदभिमानिन्यां सरस्वत्याम् । सा च पुनरात्मनि महत्तत्वमानिनि ब्रह्मणि । स चाऽत्मनि परमात्मनीति ।

२ बुद्धौ सरस्वत्यामिति साक्षाल्लयप्रदर्शनार्थम् । तदनन्तरमात्मनि महत्तत्वे परमात्मनि चेत्यप्यर्थो विवक्षित एव । वस्तुतस्त्वयं भाष्यकारस्यान्तरो भाव इति भाति । नभ आत्मनि लीयत इत्यत्रापि नभः तदभिमानी विनायकः साक्षाद् आत्मनि बुद्धौ तदभिमानिन्यामुमायां लीयते । सा च बुद्धिरहङ्कारे शिवे । स च पुनरात्मनि बुद्धौ तदभिमानिन्यां सरस्वत्यामित्येकयैवाभिधयोभयव्याख्यानलाघवाय भगवान् भाष्यकार एवमाहेति ।

३ भगवतः अधीना जडमाया भगवत्स्वरूपभूता चिद्रूपमाया च । ईश्वरेच्छा ज्ञानं वा । "तवेच्छाऽनन्त कथ्यते" इति स्मरणात् । "माया वयुनं ज्ञानम्" इत्यभिधानाच्च । सृष्ट्याद्यर्थं त्रयाणां गुणानां वरणात् स्वीकरणात् त्रिवर्णा स्वरूपमाया । शुक्लं रक्तं कृष्णमिति त्रिवर्णात्मकगुणरूपत्वात् त्रिवर्णा जडमाया । इति द्विविधाऽपि माया वर्णिता । एतेन मायाया अनिर्वर्णनीयत्वं वर्णयन्तः परास्ताः । शुकदेवोऽप्याह—"वर्णितेत्यनेनानिर्वचनीया विष्णुमायेति पक्षस्य निर्मूलत्वं ज्ञायते" इति । "किं भूयः श्रोतुमिच्छसि? रसज्ञस्य तव मुखप्रसादविशेषः प्रश्नाभिलाषं ज्ञापयतीति भावः" इति यादवेन्द्रतीर्थाः ।

४ पूर्वत्रोभे माये प्रस्तुते । तत्र जडमायाविषये कञ्चन प्रश्नमुपक्षिपति—यथैताम् । ईश्वराधीनां जडमायाम् ।

"त्रिवर्णा वरणादुक्ता त्रिगुणानां हरेर्मतिः । गुणात्मकत्वात् प्रकृतिस्त्रिवर्णेति प्रकीर्त्यते[1] । तत्र तु प्रकृतिस्तार्या [2]तारका तु हरेर्मतिः । उभयं विष्णुमायोक्तं[3] ज्ञातव्यमुभयं तथा" इति च । "बहूनां सह निर्देश एकयाऽभिधयैव तु । तयैवाभिधया तेषां परामृश्यैकमुच्यते । [4]तामेतामान्तरीं रीतिं विदुः शब्दविदो जनाः" इति च ॥ * ॥

[5]कर्माण्यारभमाणानां दुःखहत्यै सुखाय च ।
पश्येद् पाकविपर्यासं मिथुनीचारिणां नृणाम् ॥ १८ ॥

[6]नित्यार्तिदेन वित्तेन दुर्लभेनाऽऽत्ममृत्युना ।
गृहापत्याप्तपशुभिः[7] का प्रीतिः साधितैश्चलैः ॥ १९ ॥

[8]एवं लोकं परं विद्यान्नश्वरं[9] कर्मनिर्मितम् ।
अतुल्यातिशयध्वंसाद् यथा मण्डलवर्तिनाम् ॥ २० ॥

नन्वत्रापि स्वरूपमाया किं नोच्यते ? तरन्तीति तार्यत्वकथनात् । तेन स्वरूपभूता तारकमाया नोच्यते । किन्तु तार्या जडमायैवेति ज्ञायते । तदिदं भाष्योदाहृते शब्दनिर्णयवचने स्फुटम् ।

१ "प्रकीर्तिता" इति क्वचित् । २ "तारिका" इति प्र. पाठः ।

३ उभयमपि विष्णुमायापदोक्तमित्यर्थः ।

४ नन्वेतां मायामिति पूर्वप्रस्तुतं परामृश्यते । उभे अपि माये पूर्वप्रस्तुते । उभे अप्यत्राप्युच्येयाताम् । नह्येकतरग्रहणेनान्यतरपरामर्शः शब्दवित्सम्मतः । आह— बहूनां सह निर्देशे । यथैकयाऽभिधया पूर्वं बहूनां निर्देशः कृतः तयैवाभिधया एकं परामृश्योत्तरवचनं प्रवर्तते । सेयमान्तरी रीतिरित्युच्यते ।

५ "मिथुनीचारिणां स्त्रीपुंसानां विषयासक्तानामिति भावः । दुःखहत्यै (सुखाय च) कर्माणि परद्रव्यापहारादीन्यारभमाणानां फलपरिपाकस्य विपर्यासं अनिष्टनिवृत्त्यर्थं कृतस्यानिष्टकारकत्वादि पश्येत् । एतादृशान् दृष्ट्वा स्वयं न कुर्यादिति भावः" इति यादवेन्द्रतीर्थाः ।

६ "ननु परवित्तापहर्तॄणां तेन सुखमपि दृश्यत इत्याशङ्क्याऽऽह—नित्यार्तिदेनेति । वित्तेन साधनेन साधितैः (सम्पादितैः) पोषितैर्वा । गृहं भार्या । अपत्यपश्वादिभिश्चलैः नाशादिदोषग्रस्तैः का प्रीतिः? न काऽपि । ततः सुखमल्पं शतं दुःखानीत्यर्थः । जायादिहेयतोक्तिः देवादिव्यतिरिक्तानामिति भावः" इति च ।

७ "—पतिभिः" इति क्वचित् ।

८ "इह द्रविणादिप्रेयसां यथा दुःखनियतत्वं तथा स्वर्गादीनामपीत्याह—एवमिति । अतुल्यातिशयैः देवैः ध्वंसात् स्वर्गादधःपातनात् । पुण्यकर्मक्षये देवा इतो गतान् पातयन्तीति भावः । मण्डलवर्तिनां युद्धरङ्गस्थानां यथा ध्वंस एवमिति भावः" इति च । ९ "विद्वान्नश्वरम्" इति पाठान्तरम् ।

[1]मण्डलवर्तिनः युद्धरङ्गस्थाः ।

"देवाः सजाया मुच्यन्ते मानुषा[2] उभयात्मकाः । विजाया एव योगेशास्तेषां[3] यायैव योग्यता । तथातथैव मुच्यन्ते नान्यथा तु कथञ्चन" इति सन्दृश्ये[4] ॥ * ॥

[5]सर्वतो मनसोऽसङ्गमादौ सङ्गं च साधुषु ।
दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम् ॥ २३ ॥

"सन्तस्तु त्रिविधाः प्रोक्ता उत्तमा मध्यमाधमाः[6] । उत्तमा देवतास्तत्र ऋष्याद्या मध्यमा मताः[7] । अधमा मानुषोत्कृष्टास्ते चापि त्रिविधा मताः । [8]तत्राधमेषु येषां तु सङ्गो विघ्नाय वै भवेत् । तेषामुत्तमसङ्गस्य तेषां सङ्गं परित्यजेत् । आदौ तु

---

१ एतेन अतुल्यातिशयध्वंसादिति मूलस्य श्लेषो ध्वनितः । तथाहि रणमण्डलवर्तिनां राज्ञां स्वतोऽतुल्यातिशयबलैः शत्रुराजभिः पराभवलक्षणात् ध्वंसात् पौरुषनिर्मितं राज्यादिकं यथा नश्वरं तथा पुण्यक्षयेऽतुल्यातिशयैर्देवैः पातनात् कर्मनिर्मितं स्वर्गादिकमपि नश्वरमिति । अत एव देवैरिति मुखतोऽनुक्त्वा अतुल्यातिशयपदमुपादत्त ।

२ "मानुषास्तूभया–" इति क्वचित् ।

३ "योगेशा तेषाम्" इति प्र. पाठः प्रमादिकः ।

४ "सादृश्ये" इति क्वचित् ।

५ अत्र आदाविति पूर्वोत्तरान्वयि । आदौ सर्वतो मनसोऽसङ्गं सङ्गं च साधुषु इत्येकोऽन्वयः । साधुष्वप्यधमेष्वादौ सङ्गं परस्तात् तेष्वप्यसङ्गमिति द्वितीयः । तथाहि यादवेन्द्रतीर्थीयम्—"सर्वतः परमात्मज्ञानानुपयुक्तविषयेभ्यः मनसोऽसङ्गं आदौ शिक्षेत् स्वयमभ्यसेत् । साधुषु देवादिस्वोत्तमेषु सङ्गं शिक्षेत् । अन्येषु साधुषु प्रयोजनं चेत् सङ्गः" इति । द्वितीयपक्षेऽर्थविशेषो भाष्ये स्फुटः । यथोचितम् । उत्तमेषु प्रश्रयं विनयम् । समेषु मैत्रीम् । नीचेषु दयाम् ।

६ "उत्तमाधममध्यमाः" इति प्र. पाठः । "उत्तमा मध्यमाधमौ" इति कोशेषु पाठान्तरम् ।

७ "मध्यमाः स्मृताः" इति क्वचित् ।

८ तत्र त्रिविधेषु मानुषसत्स्वपि येऽधमास्तेषु मध्ये येषामधमसतां सङ्गस्तेषां सकाशादुत्तमसतां सङ्गस्य विघ्नायैव भवेत् तेषां तादृशानां सङ्गं परित्यजेदित्यर्थः । साधनपक्वानामेव अपक्वसाधुभिः सहवासः साधनप्रत्यवायहेतुः । स्वयमपक्वानां तु पाकसाधनत्वात् तेषामपि सङ्ग इष्यते । यतोऽधमसतां सङ्गोऽप्युत्तमसङ्गनिःश्रेणितां भजते । यदा तु साधनमार्गेऽधमसाधुसङ्गेनापि किञ्चित् प्रयोजनं स्यात् तदा तस्मै प्रयोजनाय तेषां सङ्ग इष्यत एव । साधनपरिपन्थी सङ्ग एव हि निराक्रियते । देहादिवर्तनरूपाय ऐहिकप्रयोजनाय तेषां सङ्ग इष्यत इति वा । केवलं साधनमार्गे तेषां सङ्गो नातीवापेक्षित इति भावः । स्वयमपक्वत्वात् । ये स्वयमनुत्तीर्णाः कथमन्यांस्तारयेयुः । तीरस्थो वा नावारूढं कथं पारं गमयेत् । ननु यद्युत्तमसङ्ग एव विहितस्तत् कथमिन्द्राद्या देवोत्तमाः स्वनीचैरग्न्यादिभिः सङ्गं कुर्वते ? आह—स्वनीचेषु । इन्द्रादिदेवेषु तु स्वनीचैरपि देवैः सङ्गः साधनपूर्तिं प्रति विहितः । अतः सप्रयोजनत्वात् सङ्गो युक्ततरः । उक्तं हि पुरैव–"प्रयोजनाय तेषां तु सङ्गः सर्वात्मनेष्यते" इति ।

तेषामपिच[1] सङ्ग उत्तमसङ्गतेः। साधनत्वान्नतु त्याज्यो यदि त्यक्तुं न शक्यते। तदा तेऽपि तथा नेया यथा विघ्नो नचै भवेत्। तदुच्चसङ्गतेः क्वापि तदा दोषो न जायते। प्रयोजनाय तेषां तु सङ्गः सर्वात्मनेष्यते। सर्वथा चैव देवेषु सङ्गो मुनि गणेषु च। भाव्यो हि तं विना नैव पुरुषार्थः क्वचिद् भवेत्। विशेषतः स्वोत्तमेषु विना सङ्गं न मुच्यते। स्वनीचेषु तु देवेषु विना सङ्गं न पूर्यते। तस्मात् सत्सूत्तमेष्वेषु सङ्गः कार्यो विशेषतः। अनाद्यनन्तकालेषु नच हाप्यः कथञ्चन। [2]सतां सदुत्तमेशेशे किमु विष्णौ परायणे'' इति गारुडे। ''बह्वपेक्षो हि जिज्ञासुरतो देहादिवृत्तये। [3]किञ्चित्सत्स्वपि सङ्गी स्यादशक्ये सति वर्तने। कृतकृत्यस्त्यजेत् सङ्गं[4] सदा गुरुसुरादिषु। सङ्गी स्यान्नहि तत्सङ्गं विना तु सुखभाग् भवेत्। तस्मादनाद्यनन्तैव सक्तिर्गुरुसुरादिषु। अन्यत्र कृत्यापेक्षा स्यादिति सङ्गविनिर्णयः'' इति भविष्यत्पर्वणि ॥ * ॥

[5]श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि।
[6]मनोवाक्कायदण्डं च सत्यं शमदमावपि॥ २६ ॥

''श्रद्धा भागवते तन्त्रे[7] वेदे भारतपञ्चमे। विष्णोरव्यवधानेन वक्तृत्वात्[8] सर्वथा भवेत्। [9]कलाविद्यास्वनिन्दा च व्यवधानेन केशवे। प्रवेशाद् यतिभिः कार्या ह्यन्यथा

---

१ ''आदौ च तेषामपि तु'' इति क्वचित्।

२ ''सतां तदुत्तमेशेशे किमु विष्णौ परात्परे'' इति प्र. पाठः। मानुषोत्कृष्टाः सन्तः। तत उत्तमा ऋष्याद्याः। तेषामपीशा देवाः। तेषामपीशे। अत एव सर्वसतां परायणे। सत्सु उत्तमा देवाः। तेषामीशा ब्रह्माद्यास्तेषामप्ययमीश इति वा।

३ किञ्चिदेव ये सन्तः। किमित्यल्पार्थे कुत्सायां वा। अधमसन्त इत्यर्थः।

४ कृतकृत्यः सन् त्यजेत् सङ्गमधमसताम्। उत्तमसत्सु गुरुसुरादिषु तु सदा सङ्गी स्यात्।

५ ''अत्रोक्तमस्ति, ममात्रास्ति प्रयोजनमिति बुद्धिद्वयं श्रद्धा। सा भागवते शास्त्रे कर्तव्या। अन्यत्र ज्योतिःशास्त्रादावनिन्दा अत्रोक्तमस्तीति बुद्धिमात्रं कर्तव्यमित्यर्थः। अन्यत्र दुःशास्त्रे तु निन्दैव कर्तव्या। मनोदण्डः विषयेभ्यो निवर्तनम्। वाग्दण्डोऽसम्भाषणम्। कायदण्डः प्राणायामः। सत्यं यथार्थवचनम्। शमः परमात्मासक्तिः। दम इन्द्रियाणां विषयेभ्य आकर्षणम्'' इति यादवेन्द्रतीर्थाः।

६ ''मनोवाक्कर्मदण्डम्'' इति प्र. पाठः।

७ तन्त्रे पञ्चरात्रे। भागवते भगवत्परे सात्विके तन्त्रे पुराणादाविति वा।

८ अव्यवधानेन विष्णुप्रतिपादकत्वात।

९ व्याकरणाद्याः कलाविद्याः। अङ्गविद्या इति यावत्। ता वेदाङ्गतया वेदार्थनिर्णयसहकारित्वेन परम्परया भगवन्तं स्पृशन्ति। न वेदादिरिव साक्षात्।

निरयं व्रजेत्[१]। श्रद्धा त्वास्तिक्यबुद्धिः[२] स्यात् सा चैव द्विविधा मता। अत्रोक्त-मस्तीत्येका तु[३] ममात्रास्ति प्रयोजनम्। इत्यन्या तत्र पूर्वा तु यतेः कार्या कलास्वपि। द्वितीया[४] तु न कर्तव्या [५]पञ्चरात्रविरोधिषु। सदैव निन्दा सर्वैश्च ब्रह्मादिस्थावरान्तकैः[६]। सम्यक् कार्या [७]तद् विना च तमो याति[८] विनिश्चयात्। कुर्वन्त्येव सुरास्तत्र[९] तदन्येषां तमो भवेत्। पञ्चरात्रं च वेदाश्च मूलरामायणं तथा। पुराणं भागवतं चैव भारतं च न भिद्यते[१०]। एतेष्वपि यथा विष्णोराधिक्यप्रतिपादनम्। तद्भक्तानां च क्रमशः स एवार्थो नचापरः। अन्यथा दृश्यमानं तु मोहायैव विनिर्दिशेत्। तस्मात् सर्वेषु शास्त्रेषु विष्णोराधिक्यमेव तु। क्रमेण च तदीयानां प्रतिपाद्यं नचापरम्'' इति ब्रह्माण्डे। ''अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायां रताः'' इत्यादि च[११]। ''गृहिणोऽप्यल्पबोधस्य न कलासु प्रयोजनम्। आवर्तयेद् वेदतन्त्रान्[१२] मुख्योक्तो हरिरत्र हि'' इति हरिवंशेषु ॥ * ॥

[१३]एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम्।
परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥ २९ ॥

---

१ ''नरकं व्रजेत्'' इति पाठान्तरम्। प्र. पाठोऽपि तथा।

२ ''श्रद्धामास्तिक्यबुद्धिः'' इति प्र. पाठः प्रामादिकः। ''श्रद्धाह्यास्तिक्यबुद्धिः'' इति केचित्।

३ ''—त्येकाऽत्र ममात्रास्ति'' इति प्र. पाठः। ''—त्येकाऽत्र ममास्त्यत्र'' इति क्वचित्।

४ ''द्वितीया नतु कर्तव्या'' इति प्र. पाठः।

५ एतावत्पर्यन्तं मूले अनिन्दामिति च्छेदमङ्गीकृत्य व्याचख्यौ। सम्प्रति निन्दामित्यपि च्छेदं विवक्षित्वाऽर्थमाह—पञ्चरात्रविरोधिषु सदैव निन्दा।

६ एतेन स्थावरजीवानामपि केषाञ्चित् ज्ञानविशेषाधिकारमाह। आतृणाद्धि सज्जीवाः श्रूयन्ते।

७ तदिति सामान्ये नपुंसकम्। निन्दां विना। ८ ''यान्ति'' इति प्र. पाठः।

९ तत्र ब्रह्मादिस्थावरान्तेषु सुराः कुशास्त्रनिन्दां नियमेन कुर्वन्ति। तेन नियमेन तमो न यान्ति। तदन्येषां जीवानां कुशास्त्रनिन्दया तमो भवेत्। अत्र निन्दा निन्द्यत्वज्ञानम्। ''अयथार्थस्य निन्दां च ये विदुः'' इत्याचार्यैरेवान्यत्र व्याख्यानात्।

१० ''भारतं च विभिद्यते'' इति प्र. पाठः प्रामादिकः। ११ ''इति च'' इति प्र. पाठः।

१२ ''वेदतन्त्रम्'' इति च। तन्त्रशब्दः पुल्लिङ्गेऽपि वर्तते। स्वतन्त्र इति यथा। वेदान् तन्त्राख्यान् पञ्चरात्रभारतादींश्च।

१३ ''कृष्णः पूर्णसुखः आत्मा अन्तर्यामी नाथः स्वामी न येषां तेषु मनुष्येष्वपि सौहृदं शिक्षेत्। किमु महत्सु देवादिषु भक्तिं शिक्षेदिति। उभयत्र भगवति भागवतेषु च परिचर्यां नृषु साधुषु दयां शिक्षेत्'' इति यादवेन्द्रतीर्थाः। मनुष्येषु चेति पूर्वं चकारेणोक्तमेवोत्तरार्धे स्फुटमाह—परिचर्याम्। साधुषु स्वोत्तमेषु मनुष्येषु, महत्सु देवेषु चेत्युभयत्र परिचर्यां शिक्षेत्। अन्तर्मनसि बहिः प्रतीके चेत्युभयत्रेति वा।

कृष्णात्मनाथेषु मनुष्येष्वपि सौहृदम्, किमु देवादिषु[1]? महत्सु देवादिषु[2] ॥ * ॥

[3]स्थित्युद्भवप्रळयहेतुरहेतुरस्य
[4]यः स्वप्नजागरसुषुप्तिषु सन् बहिश्च[5] ।
देहेन्द्रियासुहृदयानि चरन्ति येन
सञ्जीवितानि तदवैहि[6] परं नरेन्द्र ॥ ३५ ॥

अहेतुः स्वस्य हेतुरन्यो नास्ति । बहिः मुक्तौ च[7] ॥ * ॥

[8]नैनं मनो विशति वागुत चक्षुरात्मा
प्राणेन्द्रियाण्यपि[9] यथाऽनलमर्चिषः स्वाः ।
[10]शब्दोऽप्यबोधकनिषेधतयाऽऽत्ममूल-
मर्थोक्तमाह यदृते न निषेध्यसिद्धिः[11] ॥ ३६ ॥

---

१ "किमु देवेषु" इति प्र. पाठः ।

२ किमु देवादिष्विति चशब्दलब्धोऽर्थः । उत्तरत्र देवादिष्विति महत्पदव्याख्यानम् । "किमु देवादिषु महत्सु?" इतीयदेव क्वचित् ।

३ "जगज्जन्मादिकारणत्वम्, जाग्रदाद्यवस्थाप्रेरकत्वम्, जीवतद्देहेन्द्रियान्तर्यामित्वं चेति लक्षणान्याह— स्थित्युद्भवेति । न विद्यते हेतुः प्रवृत्त्यादिकारणं यस्य सोऽहेतुः । स्वतन्त्रः सन् स्वयं प्रकृत्यादीनां व्यापारजनक इति भावः । अस्य विश्वस्य य उद्भवस्थित्यादिहेतुः । यः जागरादिषु सन् प्रेरकत्वेन स्थूलप्रविविक्ताद्यर्थभोक्तृत्वेन च वर्तते । यः बहिः प्रळये मुक्तौ च सन् । हृद्ययनात् हृदयं जीवः । देहेन्द्रियासुहृदयशब्दैस्तन्नियामका देवाश्च ग्राह्याः । देहेन्द्रियप्राणजीवाः तद्देवताश्च, येन सञ्जीवितानि चरन्ति स्वस्वव्यापारेषु प्रवर्तकं तत् विविधमूर्तिभिर्विविधव्यापारकर्तृ परं सम्पूर्णसर्वकल्याणगुणं ब्रह्मेति अवैहि जानीहि" इति यादवेन्द्रतीर्थाः । "हृदयं मनः" इति विजयध्वजीयम् ।

४ "यत् स्वप्न—" इति प्र. पाठः ।

५ "सद् बहिश्च" इति न ।

६ "तदवेहि" इति च । "अवैहीति पाठस्त्वसभ्यः । वृद्धेः साधुत्वात्" इति वदन् राधारमणदासश्चिन्त्य इति पूर्वमेवाऽवेदितम् । वस्तुतस्तु अवेहीति प्रयोग एवासभ्यः । प्राचीनग्रन्थेषु क्वाप्यदर्शनात् । नहि व्याकरणमस्तीति प्रयोगो भवति । किंतु प्रयोगोऽस्तीति व्याकरणम् ।

७ "मुक्तौ वा" इति क्वचित् ।

८ "नैतन्मनो–" इति प्र. पाठः ।

९ "प्राणेन्द्रियाणि च यथा" इति च ।

१० "शब्दोऽपि बोधक–" इति च ।

११ "निषेधसिद्धिः" इति च । "ननु विश्वसृष्ट्यादिकर्ता कुतो न दृश्यते? अव्यक्तत्वादित्याह–नैनमिति । मन-इन्द्रियं महेशादयस्तन्नियामका देवाश्च एनं देहादिगतं परमात्मानं न विशन्ति स्वसामर्थ्यान्न विषयीकुर्वन्ति ।

"ब्रह्माद्या यं न जानन्ति करणाद्यभिमानिनः । जानन्त्यनुग्रहाच्चास्य प्रधानाग्निं यथाऽर्चिषः । अग्निपुत्रा नमस्तस्मै यमाह श्रीश्च न स्फुटम्[१] । वेदरूपा परं देवं वैलक्षण्यात् समस्ततः । आनन्दो नेदृशानन्द इत्युक्ते[२] लोकतः परम् । प्रतिभाति नचाऽभाति यथावद् दर्शनं विना" इति ब्रह्मतर्के ।

बोधकः परमेश्वरः । ईदृशानन्दो[३] न भवतीति निषेधवचनार्थ एव न सिद्ध्यति विलक्षणानन्दाभाव इत्यर्थतः सिद्धि[४] ॥ * ॥

सत्त्वं रजस्तम इति त्रिवृदेकमादौ
सूत्रं महानहमिति प्रवदन्ति जीवम् ।
ज्ञानक्रियार्थफलरूपतयोरुशक्ति[५]
ब्रह्मैव भाति सदसच्च तयोः परं यत्[६] ॥ ३७ ॥

वागिन्द्रियं तद्देवताश्च । चक्षुस्तद्देवता सूर्यादिः । आत्मा जीवस्तन्नियामको ब्रह्माऽपि एनं न विशति न जानाति । प्राणा वायुदेवता एनं न विशन्तीति किमु? नन्वलौकिकस्यापीश्वरस्य वेदलक्षणेन शब्देन बोधो भविष्यतीत्याशङ्क्याऽऽह—शब्दोऽपीति । वेदस्तद्देवता लक्ष्मीर्वा एनं स्वसामर्थ्यान्न विषयीकरोति । अथापि तदनुग्रहेण विषयीकरोति । तर्हि किमीश्वरं स्पष्टं वदति? नेत्याह– अबोधकेति । यदि स्पष्टं न वदति तदा तदर्थेऽलौकिके संशयाद्यभावः कथं स्यादित्यत आह -अर्थोक्तमिति । कीदृश्यर्थापत्तिरिति जिज्ञासायामाह—यद्वत इति । ततश्चायमर्थः— वेददेवता आत्ममूलं स्वस्योपजीव्यं परमात्मानं विलक्षणानन्दादिस्वरूपमाह । यद्वते विलक्षणानन्दाभावे निषेध्यस्य ईदृशो न भवतीति निषेधवचनार्थस्य सिद्धिर्न स्यात् । धर्मिविशेषासिद्धौ तत्र तत्सापेक्षधर्मविधानासम्भवात् । तथाच तन्निषेधवचनप्रामाण्यं न स्यात् । एवंरूपयाऽर्थापत्त्या उक्तं संशयविरोधितया प्राप्तम् । बोधः पूर्णज्ञानम् । कं पूर्णसुखम् । ताभ्यामन्यस्मिन् जीवज्ञानानन्दादौ निषेधो यस्मिन्, तस्य भावः, तया तन्निषेधतया तद्विलक्षणत्वेन आह प्रतिपादयति । अथवा निषेधवचनार्थे विशेषणस्य जीवानन्दादेरसिद्धिः स्यात् । ततश्च विशिष्टासिद्धिः स्यादित्यर्थः । बिम्बाभावे प्रतिबिम्बजीवासिद्धिः स्यात् । अतो बिम्बसिद्धिरिति भावः" इति यादवेन्द्रतीर्थाः । अत्र अबोधकः संशयः, वस्तुन इत्थम्भावस्याबोधनात् । तन्निषेधतया निश्चयरूपत्वेनेत्यप्यर्थः प्राचीनटीकासम्मत इति भाति ।

१ "श्रीश्च तत् स्फुटम्" इति प्र. पाठः प्रामादिकः ।
२ "इत्युक्तो–" इति क्वचित् ।
३ "ईदृश आनन्दो–" इति च ।
४ "सिद्धः" इति क्वचित् ।
५ "—शक्तिः" इति क्वचित् ।
६ "परं तत्" इति च । अत्र यादवेन्द्रतीर्थीयम्—"सदसत्पक्षविवेकायान्यथाज्ञानिनां मतभेदानाह–सत्त्वं रज इति । केचित् सत्त्वादिकं ब्रह्मेति वदन्ति । सत्त्वादिरूपेण ब्रह्मणः परिणाममङ्गीकृत्य वा सत्त्वादिरूपं ब्रह्मेति वदन्ति । केचिदादौ सर्वोत्पत्तेः पूर्वं स्थितं त्रिवृद् गुणत्रयात्मकम्, एकं प्रधानं ब्रह्मशब्दार्थ इति वदन्ति । चेतनस्य कारणत्ववादिमतमाह—सूत्रमिति । सूत्रं वायुः, महान् ब्रह्मा, अहमहङ्कारो रुद्रः ब्रह्मेति वदन्ति । जीवव्य-

"[1]त्रिगुणात्मकं प्रधानं च रजः सत्त्वं तमस्तथा। प्राणो महानहङ्कारो जीवास्तदभिमानिनः। ज्ञानात्मकानीन्द्रियाणि तथा कर्मात्मकानि च। शब्दाद्यर्थाः सुखं दुःखमिति प्रोक्तं द्विधा फलम्। एतत् सर्वं हरे रूपमित्याहुर्ज्ञानदुर्बलाः। स एव बहुशक्तित्वाद्[2] भाति तेषां[3] तथातथा। एवं कारणकार्याख्यं समस्तं हरिमेव तु। केचित् पश्यन्ति च व्यस्तं केचिदाहुरपण्डिताः। एवं कारणकार्येभ्यः परमानन्दरूपिणम्। अज्ञानाद् बहुधा प्राहुरेकं सन्तं सुदुर्जनाः। रूप्यत्वात् तद्वशत्वाच्च तद्रूपं चैतदीर्यते। नतु तस्य स्वरूपत्वान्निर्दोषानन्दरूपिणः। कथं जडाजडैक्यं स्यात् कुतः[4] पूर्णाल्पमोदयोः। पूर्णाल्पज्ञानयोश्चैव पूर्णशक्त्यल्पशक्तयोः। निर्दुःखदुःखान्वितयोः स्वतन्त्रपरतन्त्रयोः। अतः सर्वगुणैर्युक्तं सर्वदोषविवर्जितम्। अन्याभेदेन विज्ञाय तम एव प्रपद्यते। [5]निष्कृष्टं सर्वतो विष्णुं सर्वतश्च विलक्षणम्। ज्ञात्वा पूर्णगुणं याति[6] मुक्तिं नास्त्यत्र संशयः" इति तन्त्रभागवते। "अहं हि [7]जीवसंज्ञो वै मयि जीवः सनातनः।", "मैवं त्वया नु मन्तव्यं दृष्टो जीवो मयेति ह", "अहं श्रेयो विधास्यामि यथाधीकारमीश्वरः" इत्यादि मोक्षधर्मेषु[8] ॥ * ॥

तिरिक्तं चैतन्यं नास्तीति वादिनः जीवं ब्रह्मेति वदन्ति। ज्ञानं ज्ञानेन्द्रियम्। क्रिया कर्मेन्द्रियम्। अर्थाः शब्दस्पर्शादयः, आदातव्यगन्तव्यादयश्च। फले सुखदुःखे। एतेषां रूपतया तादात्म्येन ब्रह्मैव भातीति च वदन्ति। नन्वेवं ज्ञाने किं निमित्तमिति जिज्ञासायामाह–उरुशक्तीति। तत्तद्वस्तुसदृशगुणोपेतत्वाद् ब्रह्म तत्तदात्मतया प्रतिभातीति भावः। एवं सदसत् सर्वकार्यकारणात्मकं ब्रह्मेति च वदन्ति। नन्वेतेषां मतानां कुतोऽनुपादेयत्वमिति जिज्ञासायामाह—ब्रह्मेति। सम्पूर्णसर्वकल्याणगुणसम्पन्नमिति यत् निमित्तं तेन तयोः कार्यकारणरूपेभ्य उक्तजडचेतनेभ्यः परं भिन्नम्। अत उक्तमतानि भ्रान्तिकल्पितानीति भावः" इति। सूत्रं महानहमित्यादिरूपेण ब्रह्मैव जीवं प्रवदन्तीत्येकान्वयो वा। ब्रह्मैव प्राणादिजीवरूपं वदन्तीति यावत्। जीवं जीवनप्रदं ब्रह्मैव प्राणादिजीवरूपेण वदन्तीति च तात्पर्यसूचितमर्थान्तरम्। "तयोः कार्यकारणयोः परं विलक्षणं भिन्नं ब्रह्मेति यत् तस्मात् तदात्मना दर्शनमविद्येत्यर्थः" इति विजयध्वजीयम्। परमिति भिन्नमुत्तमं च। प्रवदन्तीति च विविधैः प्रकारैर्वदन्तीत्येवार्थः। नतु प्रकर्षेण वदन्तीति। प्रेति तेषां तत्राभिनिवेशं वाऽऽह। प्रवाद एवायमज्ञानां न वस्तुतत्त्वमिति वा।

१ "गुणात्मकम्" इतीयदेव क्वचित्। २ "बहुरूपत्वाद्–" इति क्वचित्।
३ "भाति चैषाम्" इति प्र. पाठः। ४ "स्यात् कथं पूर्णा-" इति क्वचित्।
५ "निगूढं सर्वतो–" इति क्वचित्। ६ "यान्ति" इति प्र. पाठः।
७ "अहं ह जीव–" इति क्वचित्। मयि जीवः समाश्रित इत्यहमेव जीवाश्रयत्वान्मुख्यतो जीवपदवाच्य इत्यर्थः।
८ "इति मोक्षधर्मेषु" इति प्र. पाठः। "इत्यादि मोक्षधर्मे" इति क्वचित्।

78

[1]नासौ जजान न मरिष्यति नैधतेऽसौ
न क्षीयते नच स विध्यति चारिणा हि[2] ।
सर्वत्र शश्वदनपाय्युपलब्धिमात्रं
प्राणो यथेन्द्रियबलेन विकल्पितं सत्[3] ॥ ३८ ॥

"यथेन्द्रियगतः प्राणस्तेषां शक्त्या विकल्प्यते । दृष्टिदः श्रुतिदश्चेति 'मतिदोऽज्ञानदस्तथा । इत्यादिभेदतो वाच्य एक एव महाबलः । दृष्ट्यादिशक्तिस्तस्यैव[5] यतो नान्यस्य कस्यचित् । एवं सद्रूपकं ब्रह्म तत्तच्छक्त्या विकल्प्यते । एवमेव महाशक्ति प्राणस्यापि बलप्रदम्" इति हरिवंशेषु ॥ * ॥

[6]अण्डेषु पेशिषु तरुष्ववनिश्थितेषु
प्राणेन जीव उपधावति तत्रतत्र[8] ।
[9]छन्ने मतीन्द्रियगणे[10]ऽहमि च प्रसुप्ते ।
कूटस्थ आस यमृते तदनुस्मृतिर्न[11] ॥ ३९ ॥

---

१ "नाम्ना जजान" इति प्र. पाठः । २ "न क्षीयते सवनविद् व्यभिचारिणां हि" इति च ।

३ अत्र यादवेन्द्रतीर्थीयम्—"चेतनाचेतनेभ्यो भेदं ब्रह्मणि स्पष्टमुपपादयति— नासाविति । अथवा देहादिस्थितस्यान्तर्यामिणो जननादिविकाराः कथं न सन्तीति जिज्ञासायामाह— नासाविति । सर्वत्र देहादिषु विद्यमानः । नैधते न क्षीयते अवयवोपचयापचयप्राप्तविकारोपेतो न भवति । अवतारेषु विद्धत्वादिना प्रतीयमानोऽपि न विध्यति (अरिणा) इषुभिर्विद्धो न भवति । सर्वदोषराहित्ये कारणमाह—उपलब्धिमात्रम् । शश्वत् सदा विद्यमाना अनपायिनी सम्पूर्णा उपलब्धिरेवोपलब्धिमात्रम् । ज्ञानमात्रस्वरूपम् । ननु जडविकारोपेतमिति मात्रशब्दः । ननु विविधेन्द्रियेषु स्थितस्यापि ब्रह्मण एकत्वात् दृष्टिदः श्रुतिद इत्यादिव्यवहारभेदः कुत इत्यत आह— विकल्पितमिति । सत् निर्दोषं ब्रह्म इन्द्रियबलेन, इन्द्रियाणां बलं शक्तयस्तद्भेदेन, विकल्पितं व्यवस्थितव्यवहारविषयः । अत्रानुरूपं निदर्शनमाह—प्राण इति । यथा प्राणश्चक्षुषि विद्यमानः दृष्टिद इति व्यपदिश्यते न श्रुतिद इति । एवं श्रोत्रे विद्यमानः श्रुतिद इति न दृष्टिद इति । एवं ब्रह्मण्यपि व्यवस्थया व्यवहार इत्यर्थः" इति ।

४ मतिदः ज्ञानदः । अज्ञानदश्च । अज्ञानं ज्ञानापोहनं संशयो विपर्ययश्च । "मत्तः स्मृतिर्ज्ञानमपोहनं च" इति हि गीतायाम् । मूले ज्ञानद इत्येव वा च्छेदः । ज्ञानदो मननदश्च ।

५ "ततो नान्यस्य" इति प्र. पाठः । अन्यस्य जीवस्येन्द्रियगणस्य वा ।

६ "आण्डेषु" इति केचित् पठन्ति । ७ "तरुष्वविनिश्रितेषु" इत्यर्वाचीनाः ।

८ "यत्रतत्र" इति क्वचित् । ९ "सन्ने" इति प्र. पाठः ।

१० "–गुणे" इति विजयध्वजीयादिसम्मतं पाठातरम् ।

११ "आशयमृते तदनुस्मृतिर्नः" इत्यर्वाचीनाः । अत्र यादवेन्द्रतीर्थीयम्—"जीयनियामकप्राणस्यापि परमात्मनियम्यत्वमस्तीत्याह—अण्डेष्विति । पेशो जरायुः । तत्संवृतेषु पेशिषु । अवनिस्थितेषु स्वेदजेषु । तत्रतत्र

"पेशो जरायुरुद्दिष्टः सुवर्णं पेश उच्यते[1]। मृदुपिण्डश्च पेश[2] स्यात् क्वचिद् भद्रमपीष्यते[3]" इत्यभिधानम्।

अवनिस्थितेषु स्वेदजेषु। भूस्वेदेन हि प्रायो जायन्ते। तदा कूटस्थे परमात्मन्यास जीवः। यं परमात्मानमृते सुप्त्यनुस्मृतिरेव न।

"देहाद् देहान्तरगतौ प्रविशेत् प्राणमेव तु। जीवः प्राणः परात्मानमेवं सुतावपि स्फुटम्। तदन्या देवताः सर्वाः प्राणस्यैव वशे स्थिताः। ईषच्च सुतवद् यान्ति नैव मानुषजीववत्। स्वर्गस्थानां नतु स्वापः प्रायो देहेऽपि नाज्ञता। मृतिसुति[4]प्रबोधादेर्नियन्ता हरिरेकराट्। तमृते नैव चावस्था नावस्थावान् नच स्मृतिः। ततस्तु देवदेवेशः प्राणः प्राणेश्वरो हरिः। न हरेरीशिता त्वन्यः स हि सर्वाधिको मतः" इति हरिवंशेषु ॥ * ॥

[5]एतत्प्रश्नमृषीन् पूर्वमपृच्छं पितुरन्तिके।
नाब्रुवन् ब्रह्मणः पुत्रास्तत्र कारणमुच्यताम् ॥ ४२ ॥

[6]कर्माकर्मविकर्मेति वेदवादो न लौकिकः।
वेदस्य चेश्वरात्मत्वात् तत्र मुह्यन्ति सूरयः ॥ ४३ ॥

स्थावरजङ्गमेषु उप परमात्मसहितेन प्राणेन नीतः जीवः धावति देहाद् देहान्तरं गच्छति। मतिः बुद्धिकरणम्, इन्द्रियाणि च तेषां गणे समूहे। 'गुणे' इति पाठे गुणः इन्द्रियाणां ज्ञानलक्षणव्यापारः, तस्मिन् छन्ने सुषुप्त्या प्रतिबद्धे। अहमि देहाभिमाने च प्रसुप्ते तिरोहते, इन्द्रियदेवानामीषत्स्वाप्रोऽस्तीति भावः। प्राणेन नीतो जीवः कूटस्थे, कूटं नित्याकाशं तद्वत् स्थिते, तत्तदवस्थायां प्राप्तविकाररहिते परमात्मनि आस। तदधीनत्वेन तिष्ठति। यमवस्थाप्रवर्तकं परमात्मानमृते तस्याः सुप्त्यवस्थाया अनुस्मृतिः सुखमस्वाप्समिति स्मरणं न भवति" इति। अवस्थाप्रेरकमृते अवस्थाया अवस्थावतश्चासम्भवात्। तदेतदुक्तं तात्पर्योदाहृतप्रमाणे—"तमृते नैव चावस्था नावस्थावान् नच स्मृतिः" इति। अवस्थाया एवाभावे कथं तस्य स्मरेत्।

१ "पेशमुच्यते" इति क्वचित्। वस्तुतस्तु पेश इति सान्तं नपुंसकं सुवर्णवाचि।

२ "पेशं स्यात्" इति प्र. पाठः। मृदुपिण्डः पेशः पुंसि। स्त्रियां तु पेशी।

३ तद्यथा पेशलमित्यादि। ४ "-सुतप्रबोधा-" इति क्वचित्।

५ "एवं प्रश्न-" इति पाठान्तरम्। पितुरिक्ष्वाकोरन्तिके। निमेर्हि वचनमिदम्। ऋषीन् सनकादीन्। कर्मयोगविषयं प्रश्नमपृच्छम्। ते तु प्रश्नोत्तरं नाब्रुवन्। यादवेन्द्रतीर्थास्तु "पितुरन्तिके ब्रह्मणः समीपे स्थितान् सनकादीन् प्रति अहमपृच्छम्" इति व्याचक्षते।

६ "सनकादिभिः परिहारानुक्तौ कारणमाह—कर्माकर्मेति। कर्म धर्मः सर्वजनसाधारणः। अकर्म अधर्मः। अकरणं वा। न करोमीति सङ्कल्पो वा। विकर्म विविधो धर्मः वर्णाश्रमभेदानुसारी। कर्मान्यद् विकर्मेति वा।

"[1]जानन्तोऽपि हि दुर्ज्ञेयः प्रश्नोऽयं ज्ञानिनामपि। इति वेदयितुं ब्रह्मपुत्रा नोचुर्निमेः पुरा[2]" इति तन्त्रभागवते।

ईश्वरात्मत्वात् ईश्वरविषयत्वात्॥ * ॥

[3]नाऽऽचरेद् यस्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रियः।
विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः॥ ४५ ॥

वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे।
[4]नैष्कर्म्यं लभते सिद्धिं रोचनार्थं फलश्रुतिः॥ ४६ ॥

इति वेदे वादः व्यवहारः। न लौकिकः। एवं कर्मविभागो लोकप्रात्तस्मृत्यादिसिद्धो न। अतः सूरयः स्वतन्त्र-परतन्त्रतत्वज्ञा अपि कर्मवैलक्षण्यज्ञाने मुह्यन्ति। ननु वेदेन तद्भेदज्ञानं भविष्यतीत्याशङ्क्याह—वेदस्येति। ईश्व-रात्मत्वात् ईश्वरविषयत्वात्। ईश्वरप्रीत्यनुसारेण कर्माकर्मविभागज्ञानजनकत्वात्, तत्र कर्मणामीश्वरसम्मतत्वे असम्मतत्वे च ज्ञातव्ये मुह्यन्ति सूरयः चित्तक्षोभवन्तो भवन्ति इति ज्ञापनाय सनकादयः सर्वज्ञा अपि परिहारं नोचुरिति भावः" इति च। "कर्म विहितम्, अकर्म तद्विपरीतं निषिद्धम्। विकर्म विगतं कर्म विहिताकरणम्" इति श्रीधरस्वाम्यादयः। "कर्म काम्यकर्म। अकर्म कामनारहितत्वादफलं ज्ञानपूर्वकं कर्म। विकर्म निषिद्धम्" इति सुदर्शनसूरिप्रभृतयः। "कर्म प्रशस्तम्। अकर्म कर्तुमयोग्यम्। विकर्म विरुद्धं कर्म" इति विजयध्वजीयम्। "अकर्म कर्माकरणम्। कर्माकर्मान्यद् विकर्म निषिद्धम्" इति च गीताभाष्ये स्वयमाचार्यवचनम्।

१ प्रश्नपरिहारं जानन्तोऽपि ब्रह्मपुत्राः सनकादयः तस्य दुर्ज्ञेयत्वं वेदयितुं पृष्टवतोऽपि निमेः परिहारं नोचुरित्यर्थः। २ "पुरः" इति प्र. पाठः।

३ आपातप्रतीत्या धर्मतया ज्ञातस्य आचरणे बाधकं चाऽह-नाऽऽचरेदिति। अज्ञः सर्ववेदानां विष्णुपरत्व-ज्ञानरहितः सन् यदि ना पुरुषः कर्माचरणे पौरुषवान्। अजितेन्द्रियः सन्, ऐश्वर्यादिकामवानिति भावः। इदं वेदोक्तमिति मन्वानः कर्म आचरेत् फलमुद्दिश्य कुर्यात् सः विकर्मणा ज्ञानिसम्मतकर्मविलक्षणेन अधर्मेण हिंसा-दिरूपेण मृत्योः सकाशात् मृत्युं दुःखमुपैति" इति यादवेन्द्रतीर्थीयम्। "मृत्योर्मृत्युमतीव दुःखम्" इति विजय-ध्वजीयम्। "मृत्योरनन्तरम् मृत्युं मृत्युपरम्परारूपं संसारम्" इति श्रीधरस्वाम्यादयः।

४ "नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः" इति प्र. पाठः। अत्र प्राचीनटीका— "ज्ञानिसम्मतं कर्माऽह—वेदोक्तमेवेति। निःसङ्गः फलाभिसन्धानरहितः सन् अत एव मनोदोषरहितो ज्ञान्येव वेदोक्तं कर्म ईश्वरेऽर्पितं यथा तथा कुर्वाणः, नैष्कर्म्यमपवर्गम्, तल्लक्षणां सिद्धिं लभते। नैष्कर्म्यं ज्ञानमिति वा। कर्मफलं परित्याज्यं चेत् श्रुतिः किमर्थं तद्वक्ति इति जिज्ञासायामाह—रोचनार्थमिति। फलश्रुतिः फलवचनं रोचनार्थं अलसानां कर्माचरणे रुच्युत्पादनार्थम्। नतु फलस्योपादानार्थम्" इति।

अज्ञः सन्नाचरन् ना[1] । विकर्मणा मृत्योर्मृत्युमुपैति । स एवेश्वरार्पितं कुर्वाणः[2] सिद्धिं लभते ।

"अज्ञात्वा कुर्वतः कर्म स्खलनात् पापकारणम् । तदेवार्पयतो विष्णौ[3] नैव पापाय तद् भवेत् । मनोदोषविहीनस्य नतु दोषवतः क्वचित् । [4]सत्सु केशवपूर्वेषु क्रमशो भक्तिहीनता । असद्भक्तिस्तथा स्नेहो बहुमानमथापि वा । स्वोत्तमानां प्रियत्यागादात्मप्रियचिकीर्षुता[5] । अधिकेष्वेव नीचोच्चभक्तिव्यत्यास[6] एव वा[7] । स्वोत्तमस्याऽत्मनश्चैव समः स्नेहोऽथवा भवेत् । कार्येषु बहुमानो वा[8] स्वात्मनः समताऽपि वा । आधिक्ये किमु वक्तव्यमात्मनः शक्तिहापनम् । शक्तस्याशक्तवत् कर्म मनोदोषा इतीरिताः" इति कर्मतन्त्रे ॥ * ॥

[9]लब्ध्वा चाव्यग्रमाचार्यं तेन सन्दर्शितागमः ।
महापुरुषमभ्यर्चेन्मूर्त्याऽभिमतयाऽऽत्मनः ॥ ४८ ॥

---

१ "सन्नाचरन् । विकर्मणा" इति प्र. पाठः प्रामादिकः । "सन्नाचारन्नाऽपि । विकर्मणा" इति क्वचित् । अयमर्थः—यदि न आचरेदिति च्छेदः तर्हि कर्माकरणं नामाकर्म पूर्वार्धे प्रस्तुतं स्यात् । ततश्चोत्तरार्धेऽपि "अकर्मणा ह्यधर्मेण" इति वक्तव्यम् । न विकर्मणेति । विरुद्धं हि विकर्म । तथाच ना आचरेदित्येव च्छेदः । तेनाज्ञानेन फलकामनया चाऽचरणं नाम विकर्म पूर्वार्धे प्रस्तुतं भवति । ततश्च पूर्वोत्तरार्धयोरैकार्थ्यमिति ।

२ ईश्वरार्पितं यथा भवति तथा कुर्वाणः । तथाहि श्रुतिः—"कुर्वन्नेवेह कर्माणि" इति । "इह ईश्वरे । तदर्पितत्वेन" इति हि पण्डिताचार्यवचनम् ।

३ "विष्णोः" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

४ सत्सु स्वोत्तमेषु तारतम्यक्रमेण भक्तिर्गुणः । तद्धीनता दोषः । एवमसत्स्वयोग्येषु भक्तिः स्नेहो बहुमानं च दोषाः । स्वोत्तमानां प्रियं विरुद्ध्यापि स्वप्रियप्रवणता नामापरो दोषः । स्वाधिकेष्वपि उच्चेषु ब्रह्मादिषूच्चा तदवरेषु अग्न्यादिषु अवरा च भक्तिर्गुणः । तद्व्यत्यासो दोषः । उच्चेषु नीचा नीचेषूच्चा च भक्तिरिति । पूर्वं भक्तिहीनता दोष इत्युक्तम् । अत्र तु सत्यामपि भक्तौ तत्र क्रमहीनता दोष इत्युच्यत इति भेदः । स्वोत्तमस्याऽत्मनश्च समः स्नेहः, बहुमानाभाव इति यावत् । अयमेको दोषः । कार्येषु प्राप्तेषु बहुमानः, कार्यनिवृत्तौ पुनर्विस्मरणमपरो दोषः । आत्मसमानताबुद्धिरपरो दोषः । एवं सति आत्मन आधिक्यबुद्धिर्महत्सु च नीचत्वबुद्धिर्महत्तमो दोष इति किमु वक्तव्यम्? एवमात्मनः शक्तिहापनमपरो दोषः । स्वशक्तेरपरिज्ञानमित्येतत् । यथा वस्तुस्थितित आधिक्यज्ञानं दोषः तथा ततोऽवमत्वज्ञानमपि । स्वशक्तिं जानतोऽप्यशक्तवल्लोभादिना कर्मसङ्कोचनमपरो दोष इत्येते मनोदोषाः प्रकीर्तिताः ।

५ "-चिकीर्षया" इति प्र. पाठो नातिस्वरसः । ६ "-भक्तिर्व्यत्यास" इति क्वचित् ।

७ "एव च" इति क्वचित् ।

८ "बहुमाने वा" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

९ "लब्धानुग्रह आचार्यात् तेन" इति प्र. पाठः । अत्र प्राचीनटीका—"पूजोपयुक्तमन्त्रद्रव्यपूजाक्रमज्ञानं प्रथमं सम्पादनीयमित्याह—लब्ध्वेति । न विद्यते व्यग्रता यस्मिन् कर्मणि तद्यथा भवति तथा, त्वरां विनेत्यर्थः ।

अव्यग्रत्वेन आचार्यं लब्ध्वा ।

"परीक्ष्यैव गुरुः शिष्यं शिष्योऽपि गुरुमाव्रजेत् । अन्यथा नरकायैव प्रायश्चित्तं गुरोस्तथा" इति च ॥ * ॥

अर्चादौ हृदये वाऽपि[1] यथालब्धोपचारकैः ।
द्रव्यक्षित्यात्मलिङ्गानि निष्पाद्य प्रोक्ष्य चाऽऽसनम् ॥ ५३ ॥

"द्रव्यलिङ्गं शिलाद्यं स्यादात्मलिङ्गं मनोमयम् । अथवा स्थण्डिलं[2] चैव विष्णोर्लिङ्गं प्रकीर्तितम्" इति च ॥ * ॥

[3]आत्मानं तन्मयं ध्यायन् मूर्तिं सम्पूजयेद्धरेः ।
[4]शेषमाधाय शिरसि स्वधाम्न्युद्वास्य सत्कृतम् ॥ ५४ ॥

तन्मयं तत्प्रधानम्[5] ।

"विष्णोर्भृत्योऽहमित्येवं[6,7] सदा स्याद् भगवन्मयः । नैवाहं विष्णुरस्मीति विष्णुः सर्वेश्वरो ह्यजः" इति च ॥ * ॥

आचार्यस्य ज्ञानाचारान् परीक्ष्येति भावः । आचार्यमुपदेष्टारं लब्ध्वा प्राप्य । सन्दर्शिताः आगमाः पूजाविधयो यस्य सः । आत्मनः स्वस्याभिमतया मूर्त्या । श्रीकृष्णनरसिंहाद्यर्चायामित्यर्थः । महापुरुषमभ्यर्चेत्" इति ।

१ "हृदये चापि" इति प्र. पाठः । "अर्चादाविति । अर्चा प्रतिमा । हृदये वाऽपि हरिमर्चयेत् । यथा तत्तद्देशकालस्वद्रव्यानुसारेण लब्धैः पूजासाधनैः । प्रथममासन सुवर्णसिंहासनादि निष्पाद्य, प्रोक्ष्य मन्त्रेणापि शुद्धं कृत्वा । अधिकारिभेदमवलम्ब्याऽह—द्रव्येति । द्रव्यलिङ्गं सुवर्णप्रतिमादि । क्षितिलिङ्गं स्थण्डिलम् । आत्मलिङ्गं वासनामूर्तिः" इति प्राचीनटीका । २ "स्थण्डिले चैव" इति प्र. पाठः प्रामादिकः ।

३ "पूजादिकाले एवं बुद्ध्या भवितव्यमित्याह—आत्मानमिति । तन्मयम् ईश्वरप्रधानकम्, स्वात्मानमीश्वरभृत्योऽहमिति ध्यायन् पूजयेत् । सत्कृतं पूजितं स्वधाम्नि हृदये उद्वास्य निधाप्य, पूजार्थमर्चायामावाहितमिति भावः । शेषं पादोदकादि शिरसि आधाय" इति च । "शेषं भगवद्भुक्तावशिष्टं पावनमन्नं स्वीकृत्येति शेषः" इति वीरराघवः । "शेषमाधाय शिरसि पावनमन्नं भोचनार्थं ससत्कारं स्वीकृत्येत्यर्थः" इति सुदर्शनसूरिः ।

४ "शेषामाधाय" इत्यपि पठन्ति ।

५ राधारमणगोस्वामी चाऽह—"तन्मयं तदाविष्ट ध्यायन् । 'नारायणमयं धीराः पश्यन्ति परमार्थिनः । जगद् धनमयं लुब्धाः कामुकाः कामिनीमयम्' इतिवत्" इति । "तन्मयं तदन्तर्यामिकम्" इति सुदर्शनसूरिः । "तन्मयं हरिप्रधानम्" इति शुकदेवः ।

६ "विष्णुभृत्यो–" इति पाठान्तरम् । ७ "-मित्येव" इति च । प्र. पाठोऽपि तथा ।

एवमग्न्यर्कतोयादावर्चयेद्धृदये[1] च यः ।
[2]यजेश्वरं स्वमात्मानमचिरान्मुच्यते हि सः ॥ ५५ ॥

"[3]स्वादानात् स्वात्मनो व्याप्त्या विष्णुः स्वात्मेति कथ्यते । नतु जीवस्वरूपत्वात् स हि जीवेश्वरः[4] प्रभुः" इति शब्दनिर्णये ॥ * ॥

इत्येकादशस्कन्धे तृतीयोऽध्यायः

[चतुर्थोऽध्यायः]

भूतैर्यदा पञ्चभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् ।
स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः[5] ॥ ३ ॥

"विष्णोस्तु पुरुषाख्यानि त्रीणि रूपाण्यथो[6] विदुः । प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् । तृतीयं देहिनां देहे तानि ज्ञात्वा विमुच्यते" इति माहात्म्ये ॥ * ॥

यत्काय एष भुवनत्रयसन्निवेशो यस्येन्द्रियैस्तनुभृतामुभयेन्द्रियाणि ।
[7]ज्ञानांशकेन विशता बलमोज ईहा सत्त्वादिभिः स्थितिलयोद्भव आदिकर्ता[8] ॥
॥ ४ ॥

---

१ "-तोयादावतिथौ हृदये" इति प्र. पाठः । "-तोयादावर्चयन् हृदये" इति क्वचित् पाठान्तरम् ।

२ "यजतीश्वरमात्मान-" इति प्र. पाठः । अत्र प्राचीनटीका—"स्वं आदत्त इति वा स्वं आप्नोति व्याप्नोतीति वा स्वमात्मानं अर्चयेत् । मुच्यते बन्धककर्मभिः" इति । "आत्मानमन्तर्यामिणम्" इति शुकदेवादयोऽप्याहुः ।

३ "स्वस्य जीवस्य आदानात् स्वमादत्त इति स्वात्मा । स्वात्मनो जीवस्य व्याप्त्या विष्णुना व्याप्तत्वात् स्वमाप्नोतीति वा स्वात्मा विष्णुरित्यर्थः ।

४ "सर्वेश्वरः" इति क्वचित् ।

५ "आत्मनः पुरुषमूर्त्या सृष्टैः गुणात्ममहदहङ्कारभेदैः पञ्चभिर्भूतैश्च विराजं सर्वतः प्रकाशमानं ब्रह्माण्डपुरं सर्वदेवाश्रयं विरचय्य सृष्ट्वा तस्मिन् ब्रह्माण्डेऽन्तःप्रविष्टः पुरुषाभिधानमवाप । पुनः पुरुषाख्यो बभूव" इति प्राचीनटीका ।

६ "रूपाण्यतो-" इति प्र. पाठः ।

७ "ज्ञानं स्वतः श्वसनतो बल-" इति प्र. पाठः । "ज्ञानांशकेन विशतो-" इति पाठान्तरम् ।

८ "परमात्मनः पुरुषाख्यरूपेण देवादीनामुपकारमाह—यत्काय इति । यत्काये ब्रह्मान्तर्गतपुरुषरूपे एषः सर्वचेतनाश्रयः भुवनत्रयस्य चतुर्दशभुवनानां सन्निवेशः समुदायः वर्तते । सन्निवेशोऽवस्थानमिति वा । यस्य तृतीयपुरुषमूर्तेः विराण्मूर्तेर्वा इन्द्रियशक्तिभिः तनुभृतां देवादीनामुभयानि ज्ञानकर्मेन्द्रियाणि स्वस्वव्यापारेषु प्रवर्तन्ते ।

[1]यत्काये ॥ * ॥

आदावभूच्छतधृती रजसाऽस्य सर्गे विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः ।
रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु[2] ॥ ५ ॥

"ब्रह्मणिस्थोऽसृजद् विष्णुः स्थित्वा रुद्रे त्वभक्षयत् । पृथक् स्थित्वा जगत् पाति तद् ब्रह्माद्याह्वयो[3] हरिः" इति ब्राह्मे ।

रजसा तमसा च ब्रह्मरुद्रदेहसृष्टेः । रागक्रोधकारणत्वाच्च ॥ * ॥

धर्मस्य दक्षदुहितर्यजनि स्वमूर्त्या[4]
नारायणो नरसखः स्वतपःप्रभावः[5] ।
नैष्कर्म्यलक्षणमुवाच चचार योग-
मद्यापि[6] चाऽस्त ऋषिवर्यनिषेविताङ्घ्रिः ॥ ६ ॥

ज्ञानांशकेन विशता, ज्ञानप्रदानार्थमिति भावः, अन्तर्यामिणा देवादीनां ज्ञानं तथा बलाद्यंशैर्विशता बलादिकं भवति । बलं शक्तिः । ईहा इच्छा व्यापारो वा । विष्णुमूर्त्या सत्त्वेन स्थितिकर्ता । रजसा विषयरागकर्ता । तमसा द्वेषजनकः । एवं सत्वादिभिः स्थितिलयोद्भवः । आदिकर्ता प्रथमं कर्ता । आदौ महदादिकर्तेति वा" इति प्राचीनटीका । स्थितिलयोद्भवे विषये आदिकर्ता इति वा ।

१ भुवनत्रयं यत्कायः इत्यभेदभ्रान्तिं वारयति—यत्काये ।

२ "सवनं प्रजासु" इति पाठान्तरम् । विजयध्वजीयेऽपि तथेति भाति । अत्र प्राचीनटीका— "चतुर्मुखरुद्रयोः स्थित्वा सृष्टिलयावयं करोतीत्याह—आदाविति आदौ सृष्टेः पूर्वम् । पाद्मसृष्टेरादौ वा । अस्य देवतादेः लोकसमुदायस्य वा सृष्ट्यर्थं शतधृतिः चतुर्मुखोऽभूत् । द्विजानां धर्माणां सेतुराश्रयः क्रतुपतिर्विष्णुः स्थित्यर्थमभूत् । तमसा रुद्रोऽप्ययाय नाशायाभूत् । उक्तं च "अनेन सर्वगतत्वमायामयशब्दादिभ्यः" इति । उक्तरीत्या सततं साक्षात् अन्याधिष्ठानेन वा प्रजासु उद्भवस्थितिलयाः येन भवन्ति स आद्यः ब्रह्मरुद्राद्यपेक्षयाऽऽदौ भव इति ज्ञेय इत्यर्थः" इति । ३ "ब्रह्मेशाह्वयो-" इति क्वचित् ।

४ "-जनिष्ट मूर्त्याम्" इति प्र. पाठः । "-जनिष्ट मूर्त्या" इत्यन्ये ।

५ "नर ऋषिप्रवरः प्रशान्तः" इत्यर्वाचीनाः । "नर इति स्वतपःप्रभावः" इत्यन्ये ।

६ "चचार कर्म योऽद्यापि" इति प्र. पाठः । अत्र प्राचीनटीका—"धर्मस्य सकाशाद् दक्षदुहितरि स्वमूर्त्या निजानन्दमूर्त्या, नतु कारणजन्ययेति भावः । नारायणाख्योऽजनि । स्वतपःप्रभावः स्वविषयज्ञानरूपः प्रभावस्वरूपश्च । नराख्यस्य सखा । तत्सहितः । नरे आवेशावतारवानिति भावः । अवतारप्रयोजनमाह—नैष्कर्म्यलक्षणमिति । निष्कर्म अपवर्गः । तत्सम्बन्धि नैष्कर्म्यम् । लक्षणं स्वरूपम् । अपवर्गसम्बन्धिज्ञानस्वरूपं योगं ध्यानलक्षणोपायं च उवाच । योगं तपश्चचार च स्वजनहिताय । आस्ते बदर्याम्" इति ।

[1]स्वविषयज्ञानरूपः प्रभावरूपश्च ॥ * ॥

इन्द्रोऽपि नाक्यसुखमेष जिघृक्षतीति[2] कामं न्ययुङ्क्त सगणं स बदर्युपाख्यम् ।
गत्वाऽप्सरोगणवसन्तसुमन्दवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ॥ ७ ॥

"ज्ञानरूपानपि सुरान् विना प्राणं क्वचित् परे। [3]आविशन्ति [4]ह्यतस्तेषामज्ञानादि नतु स्वतः" इति देवतत्त्वे। "अथैनमेव नाऽप्नोद्[5] योऽयं मध्यमः प्राणः", "एवमेता देवताः पाप्मना विद्धाः", "तं हासुरा ऋत्वा [6]विदध्वसुर्यथाऽश्मानमाखणमृत्वा विध्वंसेतैवं हैव विध्वंसमाना विष्वञ्चो विनेशुः", "सा वा एषा देवतैतासां देवतानां [7]मृत्युमपहत्याथैनां मृत्युमत्यवहत्[8] सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत्" इत्यादिश्रुतिश्च ॥ * ॥

[9]त्वां सुन्वतां सुरकृता बहवोऽन्तरायाः
[10]कस्तान् विलङ्घ्य परमं व्रजतात् पदं ते[11] ।
नान्यस्य बर्हिषि बलिं ददतः स्वभागं[12]
धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि[13]॥ १० ॥

स्वभागं बलिं ददतो विघ्नमूर्ध्नि यदि भवान् पदं धत्ते तर्हि नान्यस्य बलिः ॥ * ॥

---

१ स्वस्य तपः स्वतपः। स्वविषयं ज्ञानम्। स्वयमेव ज्ञानं ज्ञानविषयश्चेति।

२ "इन्द्रो विशङ्क्य मम धाम जिघृक्षतीति" इति प्र॰ पाठः। अत्र प्राचीनटीका—"इन्द्रः, एष नारायण-ऋषिः नाक्यसुखं स्वर्गैश्वर्यमित्यर्थः, जिघृक्षति स्वीकर्तुमिच्छतीति बुद्ध्या, असुरावेशादिति भावः, वसन्तादिगण-सहितं कामम्, बदरीत्याख्या॰ उपपदं यस्य तमाश्रमं प्रति न्ययुङ्क्त प्रेषितवानित्यर्थः। अप्सरःप्रभृतिभिः सह स कामः गत्वा, तस्य नारायणस्य महि महित्वं महिमा, तन्न जानातीत्यतन्महिज्ञः सन् स्त्रीणामप्सरसां प्रेक्षणानि सविलासावलोकनानि, तान्येव विरागधैर्यभेदका इषवः। स्त्रीप्रेक्षणसहितैररविन्दादिस्वसायकैरिति वा, नारायण-ऋषिमविध्यत्" इति।

३ "प्रविशन्ति" इति क्वचित्।

४ "यतस्तेषा–" इति क्वचित्।

५. "अथैनमेवमाप्नोत्" इति प्र. पाठः प्रामादिकः।

६ "विदध्वंसुर्यथा–" इत्यपि प्रमाद एव।

७ "मृत्युमुपहत्या-" इति पाठान्तरम्।

८ "-मत्यवहत सा" इति प्र. पाठः।

९ "त्वां सेवताम्" इति प्र. पाठः।

१० "स्वौको विलङ्घ्य" इति च।

११ "व्रजतां पदं ते" इति च। "भजतात् पदं ते" इति यादवेन्द्रतीर्थसम्मतः पाठ इति प्रतिभाति।

१२ "बलीन् दधतः स्वभागान्" इत्यर्वाचीनाः।

१३ "बर्हिषि यज्ञे त्वामुद्दिश्य सुन्वतां सोमाभिषवणं कुर्वतां सुरकृताः बहुविधा अन्तराया विघ्नाः प्रवर्तन्ते। कः

79

हंसस्वरूप्यवददच्युत आत्मयोगं
दत्तः कुमार ऋषभो भगवान् पिता नः ।
विष्णुः शिवाय जगतां कलयाऽवतीर्ण-
स्तेनाऽहृता मधुभिदा श्रुतयो हयास्ये[1] ॥ १७ ॥

"कुमारनामा तु हरिर्ब्रह्मचारिवपुः स्वयम् । सनत्कुमाराय परं प्रोवाच जगदीश्वरः" इति स्कान्दे । "विष्णोः सनत्कुमाराख्याच्छुश्रुवुर्ज्ञानमुत्तमम् । सनत्कुमारप्रमुखा योगेशाः परमेश्वरात्[2]" इति प्रकाशसंहितायाम्[3]॥ * ॥

संस्तुन्वतोऽब्धिपतिताञ्छ्रमणानृषींश्च
[4]शक्रं च वृत्रवधतस्तमसि प्रविष्टम् ।
देवस्त्रियोऽसुरगृहे पिहिता अनाथा
जघ्नेऽसुरेन्द्रमभयाय सतां नृसिंहे[5] ॥ १९ ॥

पुमान् तान् विघ्नान् स्वसामर्थ्येन विलङ्घ्य परिहृत्य तव पादं भजतात्? न कोऽपि । बर्हिषि यज्ञेश्वरस्य तव भागं बलिं ददतः पुरुषस्य विघ्नमूर्ध्नि यदि त्वमविता सर्वरक्षकः सन् पदं धत्ते, यदि विघ्नपरिहारं भवान् करोतीति भावः । तर्हि नान्यस्य बलिः । अन्यस्य सकाशात् बलिः पूजा न विघ्नवती । बलिः नान्यस्य अन्यविषयोऽपि न भवति । तस्य यजमानस्य पूजा त्वय्येव सम्पन्नेत्यर्थः" इति यादवेन्द्रतीर्थाः । "त्वां सुन्वतां भजमानानाम्" इति विजयध्वजीयम् । "कस्तान् विलङ्घ्य ते परमं पदं व्रजतात्? न कोऽपि । व्रजति चेत् को वायुरेव नान्यः" इति च । "त्वमविता बर्हिषि स्वभागं ददतः पुंसो यदि विघ्नमूर्ध्नि पदं धत्ते तर्हि स बलिरन्यस्य न, तवैव" इति च । त्वम्पदयोगेऽपि धत्त इति प्रथमपुरुषः नायुक्तः । प्राचीनप्रयोगेषु बहुधा तादृशसाङ्कर्यदर्शनादिति पूर्वमेवाऽवेदितम् । यदि त्वमविता, यदि च भवान् विघ्नमूर्ध्नि पदं धत्त इति वाऽन्वयः । अत एव "भवान् पदं धत्ते" इति तात्पर्यम् ।

१ "अच्युतः अवतारेष्वप्युत्कृष्टः । हंसवत् स्वयं रूपोपेतः हंसावतारः वेदानवदत् । दत्तः आत्मयोगमवदत् । कुमारावतारः सनत्कुमारायाऽऽत्मयोगमवदत् । नः नवयोगिनां पिता भगवानृषभः नः योगमवदत् । यो विष्णुर्जगतां साधुजनानां शिवाय शुभाय कलया ऋषभाद्यंशैरवतीर्णः तेन मधुभिदा विष्णुना हयास्येऽवतारे श्रुतयोऽसुरनीता आहृता आनीताः" इति प्राचीनटीका । "अच्युत इति । सर्वरूपेष्वपि स्वरूपाप्रच्युत एव तत्तदाकारं प्रदर्शयतीत्यर्थः" इति वल्लभाचार्यः ।

२ "परमेश्वराः" इति प्र. पाठः प्रामादिकः ।

३ "प्रकाशिकायाम्" इति क्वचित् ।

४ 'इन्द्रं च" इति क्वचित् ।

५ अत्र प्राचीनटीका—"अब्धौ संसारे पतितान्, श्रमणान् सर्वविषयसञ्चारश्रमोपेतान्, संस्तुन्वतः अज्ञानमोचकत्वादिसर्वशक्त्युपेतं श्रीव्यासं प्रति स्तुतिं कुर्वतः, अज्ञानकर्मबन्धादमुञ्चत् व्यासावतारः सन् परिहृतवान् । नृसिंहावतारे वृत्रवधतः तमसि प्रारब्धे तामसकर्मणि प्रविष्टं तेन दुःखोपेतमित्यर्थः, शक्रममूमुचत् । तस्य प्रारब्ध-

"सुपर्णा ऋषयो व्यासं नाथमाना ययुः सदा । [1]भ्रान्ति निवारयास्माकं मुमुग्धीति च वादिनः[2]" इति व्यासतन्त्रे । "स्मरणात्तु नृसिंहस्य शक्रो मुक्तो बृहद्वधात् । हिरण्यकहृताश्चापि तथैवाप्सरसां गणाः" इति भयभञ्जने ॥ * ॥

देवासुरे युधि [3]स दैत्यपतीन् सुरार्थे
हत्वाऽन्तरेषु भुवनान्यदधात् कलाभिः ।
भूत्वाऽथ वामन इमामहरद् बलेः क्ष्मां
याच्ञाच्छलेन समदाददितेः सुतेभ्यः[4] ॥ २० ॥

"उपेन्द्ररूपी भगवान् प्रतिमन्वन्तरं विभुः । असुरान् हन्ति नियतं [5]श्राद्धदेवे च वामनः" इति वामने ॥ * ॥

इत्येकादशस्कन्धे चतुर्थोऽध्यायः

कर्मेहासमपि कृतवान् । प्रह्लादादीनामभयाय असुरेन्द्रं हिरण्यकशिपुं जघ्ने । अनाथा रक्षकरहिताः देवस्त्रियोऽप्सरसश्च असुरगृहे पिहिता बन्दीकृताः मोचिताः" इति ।

१ "ध्वान्तं निवारया–" इति प्र. पाठः ।

२ तथाहि श्रूयते—"वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः । उप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्य१स्मान् निधयेव बद्धान्" (१०-७३-११) इति । इन्द्रं व्यासरूपं भगवन्तं ऋषय उपसेदुः । कीदृशाः? वयः विशिष्टाः । वैशिष्ट्यमेवाऽह–सुपर्णाः । सुखरूपं परमात्मानं पतन्ति मनसा गच्छन्तीति सुपर्णाः सुपरं शिष्यादिषु नयन्तीति च सुपर्णाः । स्वयं सुष्ठुज्ञानादिपूर्णाश्च । अत एव प्रियमेधा प्रियज्ञाना ज्ञानमार्गोद्धारार्थं नाधमाना नाथमाना याचमाना इति । किं याचमानाः? ध्वान्तमज्ञानरूपम्, लोकस्यास्माकं च उप ऊर्णुहि निवारय । विज्ञानचक्षुः पूर्धि पूरय । यथा सुपर्णाः सुपतना वयः पक्षिणः निधया वागुरया बध्यन्ते तथा निधया कर्मपाशेन बद्धान् अस्मदादीन् साधुजीवान् मुमुग्धि बन्धान्मोचयेति मन्त्रार्थः ।

३ "युधि च दैत्य-" इति प्र. पाठः ।

४ "देवासुरे देवासुरैः क्रियमाणे युद्धे स उपेन्द्ररूपी दैत्यपतीन् अन्तरेषु प्रतिमन्वन्तरं हत्वा कलाभिः स्वावतारैः अदधात् पालितवान् । अथ बलिना इन्द्रराज्यापहारानन्तरं स विष्णुः वामनो भूत्वा बलेः सकाशात् याञ्चाच्छलेन व्याजेन क्ष्मां त्रिलोकीमहरत् । अदितेः सुतेभ्यः समदात् । स्वयमवाप्तसकलकामत्वादिति भावः" इति प्राचीनटीका ।

५ "श्राद्धदेव्ये" इति पाठान्तरम् ।

[पञ्चमोऽध्यायः]

वदन्ति तेऽन्योन्यमुपासितश्रियो[1] गृहेषु मैथुन्यपरेषु चाऽशिषः[2] ।
यजन्त्यसृष्टान्नविधानदक्षिणा[3] वृत्त्यै परं घ्नन्ति पशूनतद्विदः[4] ॥ ८ ॥

"ये तु विष्णुमविज्ञाय[5] श्रियमेव ह्युपासते । उपेक्ष्य वा हरिं ते तु भूत्वा याज्याः पतन्त्यधः" इति प्रवृत्तिसंहितायाम् ॥ * ॥

लोके व्यवायामिषमद्यसेवा नित्यास्तु जन्तोर्नहि तत्र चोदना ।
व्यवस्थितिस्तेषु विहाय यज्ञान् सुराग्रहैरासुरवृत्तिरिष्टा[6] ॥ ११ ॥

यद् घ्राणभक्षो विहितः सुरायास्तथा पशोरालभनं न हिंसा ।
एवं व्यवायः प्रजया न रत्यै इमं विशुद्धं न विदुः स्वधर्मम्[7] ॥ १३ ॥

---

१ "–सितस्त्रियो-" इत्यर्वाचीनाः ।

२ "चाऽशिषम्" इति पाठान्तरम् । ३ "–दक्षिणम्" इति प्र. पाठः ।

४ "गृहेषु स्थिताः, उपासिता श्रीः महालक्ष्मीर्यैस्ते । ऐश्वर्यार्थम् । विष्णुमवज्ञायेति भावः । अन्योन्यमाशिषोऽभिलषितान् वदन्ति । अतद्विदः धर्मविशेषज्ञानरहिताः वृत्त्यै परं जीवनायैव, केचित् असृष्टाः परित्यक्ताः अन्नं विधानं दक्षिणा च यैस्ते तथाविधाः सन्तः यजन्ति, पशून् घ्नन्ति परम्, घ्नन्त्येव, ततः पुण्यं नास्तीति भावः" इति प्राचीनटीका ।

५ "विष्णुमवज्ञाय" इति प्र. पाठः । कोशेष्वपि क्वचित् तथा । उत्तरार्धेन पुनरुक्तं तु भवति ।

६ "व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा" इत्यर्वाचीनाः । "व्यवस्थितिस्तेषु विहाय यज्ञान् सुराग्रहैरासुरवृत्तिरिष्टा" इति विजयध्वजीयाभिमतः पाठः । अत्र प्राचीनटीका—"लोके क्रियमाणाः व्यवायस्य मैथुनस्य, आमिषस्य मद्यस्य च सेवाः अनुभवाः जन्तोश्चेतनस्य नित्याः रागात् प्राप्ताः । यज्ञान् विहाय, यज्ञेषु तु चोदनाऽस्तीति भावः । सुराग्रहैः पात्रैः पानेन सह तत्र व्यवायादिषु विषये चोदना विधिः नहि । अथापि सुराग्रहैः सुरापात्रैः सह तेषु आमिषमद्यादिषु व्यवस्थितिरासक्तिः आसुरवृत्तिः असुरस्वभावानां वृत्तिर्जीवनं व्यापार इतीष्टा सम्मता । अतः अधर्मोऽयमिति भावः" इति । "लोके व्यवायादिसेवा नित्याः नित्यं क्रियन्ते । तथाऽपि यज्ञान् विहाय यज्ञत्वानुसंधानं विना तत्र व्यवायादौ चोदना कर्तव्यताविधिर्न । किन्तु यज्ञ एव ते कार्याः । अतस्तेषु व्यवायादिषु यज्ञं विनाऽन्यदा रागाद् व्यवस्थितिः सुराग्रहैः सुरापाने आग्रहवद्भिः पापिभिः क्रियमाणा आसुरवृत्तितयेष्टा" इति श्रीनिवासतीर्थीयम् । "यज्ञान् विहाय तेषु व्यवायादिषु स्थितिः, सुरैव गृहं शरणं येषां ते तथा, हरिविमुखाः, तैरिष्टा । ततः किम्? तत्राऽह—आसुरेति । निषिद्धक्रियात्वात् असुरजनस्य वृत्तिर्जीविका । 'न सुरां पिबेत्' इति श्रुतेः" इति विजयध्वजीयम् ।

७ "विदुश्च धर्मम्" इति पाठान्तरम् । "सुरायाः घ्राणभक्षः आघ्राणनं व्यवाययज्ञे यज्ञे सोम इव विहितः । यज्ञे देवतोद्देशेन पशुसञ्ज्ञपनं आलभनमित्युच्यते । पशोः स्वर्गस्य लाभात् । न हिंसा । यज्ञादन्यत्र हिंसा ।

"व्यवायामिषमद्यानि हरेः पूजार्थमेव तु । वामदेव्यो नाम यज्ञो व्यवायो हरिपूजनम् । पितृयज्ञो देवयज्ञो मांसेन हरिपूजनम् । व्यवाययज्ञे मद्यं तु सोमात्मकतयेष्यते । [1]क्षत्रियादेर्न विप्राणां विप्रो दोषेण लिप्यते । अरागतः प्रवृत्तिः स्याद् रागो दोषस्य कारणम् । [2]घ्राणभक्षोऽथवा यज्ञे दैवे सर्वस्य चेष्यते । पैष्टमद्यस्य [3]माध्व्यादि क्षत्रियस्य न दुष्यति । [4]दैवे रत्यैव च प्रीतिर्विष्णोः पुत्रात्तु मानुषे । तस्माद् विहितमात्रेषु रागं मुक्त्वा यथाविधि । समाहितो हरिं स्मृत्वा वर्तन् याजी हरेर्भवेत्" इति क्रियाविधाने ॥

यज्ञान् विहाय न चोदना ॥ * ॥

"[5]यज्ञेष्वालभनं प्रोक्तं देवतोद्देशतः पशोः। हिंसा नाम तदन्यत्र तस्मात् तां नाऽचरेद् बुधः । यतो यज्ञे मृता ऊर्ध्वं यान्ति [6]दैवे च पैतृके । अतो लाभादालभनं स्वर्गस्य नतु मारणम्" इति च ॥ * ॥

द्विषन्तः परकायेषु स्वात्मानं हरिमीश्वरम् ।
मृतके सानुबन्धेऽस्मिन् बद्धस्नेहाः पतन्त्यधः[7] ॥ १५ ॥

प्रजया सन्तानार्थं व्यवायः इति यत् तेन निमित्तेन एवं रागतः प्राप्तवद् दोषो न। एवं व्यवायोऽपि आलभनवद् दोषो नेति वा । रत्यै रागेण सुखार्थं प्राप्तः धर्मो न । विशुद्धं विष्णुसेवार्थं प्राप्तमिमं धर्मं स्वधर्मत्वेन न विदुः" इति प्राचीनटीका । एतदनुसारेण व्यवाये सुराया आघ्राणनं विप्रस्यापि विहितमिति प्रतीयते। तत्र मूलं मृग्यम्। वस्तुतस्त्वयमर्थः —"सौत्रामण्यां सुराग्रहान् गृह्णाति" इति यागविशेषे सुरापात्रग्रहणं श्रूयते। तत्रायं विशेष उच्यते। विप्रेण सौत्रामण्यां क्रियमाणायां सुरापात्रग्रहणं न पानार्थम्, किन्तु घ्राणभक्षार्थमिति । क्षत्रियादयस्तु पानेनापि न दुष्यन्ति ।

१ क्षत्रियादेर्व्यवाययज्ञे मद्यपानं सोमात्मकतयेष्यते ! न विप्राणाम् । क्षत्रियादेरपि मद्यपानादौ हरिपूजात्वेनारागत एव प्रवृत्तिरभ्यनुज्ञायते । रागतश्चेत् तेषामपि दोषायैव ।

२ दैवे यज्ञविशेषे यत्र सुराऽपि हविष्ट्वेन हूयते सौत्रामण्यादिके, सर्वस्य वर्णचतुष्टयस्य, विप्रस्यापीति यावत् । यज्ञशेषत्वेन सुराया घ्राणभक्षो विहितः। तत्रापि पुनर्विशेषमाह— पैष्टमद्यस्य । पिष्टकृतमद्यस्याऽऽघ्राणनमेव विप्रस्यैव क्षत्रियादेः सर्वस्यापि । या पुनः पुष्परसनिष्पन्ना सुरा माध्वी, आदिपदेन मृद्वीकादिनिष्पन्ना, तस्या अपि विप्रस्याऽऽघ्राणनमेव । क्षत्रियस्य तु पानमपि न दोषावहमिति ।

३ "मध्वादि" इति क्वचित् ।

४ मूले "व्यवायः प्रजया" इति हेतौ तृतीया । अध्ययनेन वसतीतिवत् । तथाच प्रजायै गृहमेध इत्युक्तं भवति । अत्रापि पुनर्विशेषमाह—दैवे । तथाच व्यवायः प्रजाया इति मनुष्यविषयमेतत् । देवानां केवलं रत्यै व्यवायो भवति । "देवै रत्यैव" इत्यपि क्वचित् पाठः ।

५ "यज्ञेष्वालम्भनम्" इति प्र. पाठः ।

६ "दैव्ये च" इति क्वचित् ।

७ "मृतके मृत्युग्रस्ते सानुबन्धे कळत्रादियुक्तेऽस्मिन् देहे बद्धस्नेहाः सन्तः परकायेषु स्थितं स्वात्मानं

स्वात्मानं स्वस्मिन्नाप्तं च ।

"आप्तत्वादात्मशब्दोक्तं स्वस्मिन्नपि परेषु च । जीवादन्यं न पश्यन्ति [1]श्रुत्वैवं विद्विषन्ति च । एतांस्त्वमासुरान् विद्धि लक्षणैः पुरुषाधमान्" इति हरिवंशेषु ॥ * ॥

एवं युगानुसारेण[2] भगवान् युगवर्तिभिः ।
मनुजैरिज्यते राजन् श्रेयसामीश्वरो हरिः ॥ ३५ ॥

"ध्रुवं तथैव मुच्यन्ते यां मूर्तिं प्रदिशेद् गुरुः । शिष्याणां योग्यताभिज्ञो विघ्नहानिस्तु तद्युगे । अवतीर्णहरेर्मूर्त्या तत्पूर्वयुगजेन च । नृसिंहमूर्त्या च तथा यां चान्यां प्रदिशेद् गुरुः" इति स्वाभाव्ये ॥ * ॥

देवर्षिभूताप्तनृणां पितॄणां[3] न किङ्करो नायमृणी च राजन् ।
सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिचर्यया च[4] ॥ ४१ ॥

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ।
विकर्म यच्चोत्पतितं कथञ्चिद् धुनोति सर्वं हृदि सन्निविष्टः[5] ॥ ४२ ॥

स्वस्मिन् परेषु चाऽप्तं व्याप्तं ईश्वरं सर्वशक्तिसम्पन्नं द्विषन्तः आतिथ्यादिकर्माकृत्वा तिरस्कुर्वन्तः, जीवातिरिक्तमन्तर्यामिणमपलपन्तो वा अधः पतन्ति" इति प्राचीनटीका ।

१ "श्रुत्यैवम्" इति क्वचित् । जीवादन्यं परमात्मानं स्वयं न जानन्ति । श्रुत्या ज्ञानिभिर्वा जीवादन्यत्वेन प्रोच्यमानं श्रुत्वाऽपि तं न तांश्च द्विषन्त्येव ।

२ "युगानुरूपाभ्याम्" इति प्र. पाठः । "युगानुरूपेण" इति पाठान्तरम् । "युगानुसारेण तत्तद्युगप्राप्तमन्त्रैः द्रव्यैश्चेत्यर्थः । इज्यते युगानुसारेणाऽचारादिना । अथवा युगानुरूपेण (रूपेण) स्वमूर्त्या सम्पन्नः । तत्तदुचितश्रेयसां ईश्वरः प्रदानसमर्थः" इति प्राचीनटीका ।

३ प्राचीनकोशेऽयं प्रथमपादः "देवर्षिपितृभूताप्तनृणाम्" इति पठ्यते ।

४ "परिहृत्य कर्तम्" इति प्र. पाठः । "परिहृत्य कृत्यम्" इति वीरराघवः । अत्र प्राचीनटीका—"देवर्ष्यादीनां पूजाकराश्च भविष्यन्ति । नृणामातिथ्यादिकर्तृत्वेऽपि अयं सर्वात्मना भक्तः किङ्करो न भवति । उपकृतत्वेन तदधीनत्वलक्षणं यदृणित्वं तद्वांश्च न भवति । श्रीहरिभक्त्या स्वावरान् प्रति किङ्करादिर्न भवतीत्यर्थः । हरिभक्तेषूत्तमाः क इति जिज्ञासायामाह—सर्वात्मनेति । परिचर्यया श्रीहरिनियमितसेवया मुकुन्दं यः सर्वात्मना, सर्वव्यापारान् हरिविषयान् कृत्वा, शरणं गतः, एकवचनं समुदायार्थे, देवेशाः, स न किङ्करः । भक्त्या तदवरा ये ते देवेशादीनां किङ्करा ऋणिनश्च, मुक्तावपि देवेशैरुपकृतत्वादिति विभागः" इति ।

५ "ननु सर्वात्मना भक्तानामपि परमात्मन्यपराधकर्तृत्वश्रवणात् कथं तेषां भक्त्या उत्तमत्वमित्यत आह—स्वपादेति । त्यक्ताः श्रीहर्यधीनतया ज्ञाताः, ममकारेण परित्यक्ता रहिता वा अन्ये भावा ऐश्वर्यादिविषया येन

"[1]सर्वात्मना हरेर्भक्ता देवेशा एव केवलम् । देवास्तु सर्वथा भक्ता भक्ता एवेतरे स्मृताः । हरिभक्त्यधिकेष्वेव[2] किङ्करश्चाप्यृणी तथा । हरिभक्तो नेतरेषां वासुदेवव्यपाश्रयात् । द्विधैव स्वोत्तमर्णानि दातव्यानीतराणि च । [3]दातव्येभ्यो विमुच्येत नेतरेभ्यः कथञ्चन । कथं हि देवाद्यनुपकृतो मोक्षेऽपि वर्तयेत्[4] । बिम्बत्वात् तदधीनं हि स्वरूपं सर्वेशो यतः" इति जीवनिर्णये ॥ * ॥ "[5]उदकैश्च नमस्कारैः स्तुतिभिर्मनसा तथा । यतिभिश्चापि सम्पूज्या देवा मोक्षं यियासुभिः[6] । मध्ये विष्णुमनुस्मृत्य नान्यथा तु कथञ्चन" इति समयाचारे[7] । "[8]प्राधान्येन हरिर्ध्येयस्तत्सम्बन्धात् सुरादयः । ध्येया नान्यत् क्वचिद् ध्यायेद्धरावनुपयोगि यत्" इति हरिसंहितायाम् ॥ * ॥

> वैरेण यं नृपतयः शिशुपालपौण्ड्र-
> [9]साल्वादयो गतिविलासविलोकनाद्यैः ।
> ध्यायन्त आकृतधियः[10] शयनासनादौ
> तत्साम्यमापुरनुरक्तधियः पुनः किम्[11] ॥ ४८ ॥

तस्य । कथञ्चित्, विषयासक्तिलक्षणकारणं विनाऽपि, प्रारब्धेनेति भावः । विकर्म यदुत्पतितं तत्, हृदि सन्निविष्टः सदा ध्यायमानः हरिः स्वयं धुनोति परिहरति" इति च ।

१ देवेशाः सर्वप्रकारेणापि भक्ताः । सर्वमपि हरिविषयमेव पश्यन्ति । सर्वाणि नामानि हरिपराणि, सर्वाणि च वस्तूनि हर्यधीनानीति । न क्वापि स्वत्वबुद्धिस्तेषाम् । अन्ये देवाः सर्वथा भक्ताः, भक्ता एव । न केनापि प्रकारेणाभक्ताः । अथापि क्वचिद्विषयादिषु कथञ्चित् स्वत्वबुद्धिस्तेषां स्यादिति न सर्वात्मना भक्ताः । इतरे भक्ता एव, केवलं भक्ताः । न सर्वात्मना, नापि सर्वथा भक्ताः । यतो भक्तिविरोधी च प्रकारः क्वचित् तेषु सम्भवेत् ।

२ "हरिभक्त्याऽधिकेष्वेव" इति प्र. पाठः ।

३ यथा धनं प्रतिनिवर्त्य ऋणाद् विमुच्यते । यथा वा पुत्रोत्पादनेन पितृऋणाद् विमुच्यते । यथा वा वृष्ट्यादिना देवैः कृतमुपकारं यज्ञेषु हविर्दानेन प्रतिनिवर्त्य देवऋणाद् विमुच्यते । तदिदं दातव्यमृणमुच्यते । मोक्षसाधनार्थं तत्वाभिमानिभिर्देवैः क्रियमाण उपकारोऽदातव्यमृणम् । तेनर्णेन मोक्षेऽप्यृण्येव भवति । नहि ततो विमुच्यते । नहीदृशमृणित्वं नाम दोषः । गुण एव हि प्रतिबिम्बस्य बिम्बाधीनत्वम्, सहजधर्मत्वात् ।

४ "कथं देवाद्यनुपकृतो भक्तो मोक्षेऽपि वर्तयेत्" इति प्र. पाठः प्रामादिकः । "कथं देवानुपकृतो मनो मोक्षेऽपि" इति पाठान्तरम् ।

५ उदकैस्तर्पणदण्डोदकादिना ।

६ "मोक्षमियासुभिः" इति प्र. पाठः प्रामादिकः ।

७ "समाचारे" इति क्वचित् ।

८ ननु मध्ये विष्णुस्मरणमिति कोऽर्थः? आह—प्राधान्येन ।

९ "–शाल्वादयो–" इति प्र. पाठः ।

१० "आकृतिधियः" इति प्राचीनकोशे पाठान्तरम् ।

११ "–धियां पुनः किम्" इति प्र. पाठः । अत्र प्राचीनटीका "साल्वादयः सजीवाः वैरेण स्वस्वदेहगतासुरकृतवैरेणेति भावः । यं श्रीकृष्णं गतिविलासादिभिः श्रीकृष्णव्यापारैः सह ध्यायन्तः शयनासनभोजनादावपि

"पौण्ड्रकादिषु दैत्येषु सुरांशाः सन्ति सर्वशः । बहुमानफलं विष्णोस्ते यान्त्यादाय सद्गतिम् । विद्वेषस्य फलं यत्तु[1] तदादायासुरास्तमः । यान्त्यतो नैव विद्वेषो विष्णोः कार्यः कथञ्चन" इत्यंशविवेके ॥ * ॥

इत्येकादशस्कन्धे पञ्चमोऽध्यायः

[षष्ठोऽध्यायः]

त्वं मायया त्रिगुणयाऽऽत्मनि दुर्विभाव्यं
व्यक्तं सृजस्यवसि लुम्पसि तद्गुणस्थः ।
नैतैर्भवानजित कर्मभिरज्यते वै
[2]यः स्वे सुखेऽव्यवहितेऽभिरतोऽनवद्यः ॥ ८ ॥

[3]यः प्रकाशरूपः ॥ * ॥

आकृतधियः तत्रैव न्यस्तबुद्धयः तत्साम्यं स्वोचितमापुः । देहस्य सदसज्जीवयोः साधारणत्वात् असज्जीवस्य द्वेषपूर्वकस्मरणसमये सज्जीवस्य स्वभावसिद्धादरपुरःसरं सदा श्रीकृष्णानुसन्धानं भवति । तेन सज्जीवस्य श्रेयःप्राप्तिरिति बहुप्रमाणैः सिद्धोऽयमर्थः । अनुरक्तधियः भवादृशाः वैरं विना ध्यायन्तस्तत्साम्यं प्राप्स्यन्तीति किमु वक्तव्यम्" इति । "तत्साम्यमिति मोक्षेऽपि साम्योक्त्या ऐक्यमनादृतम् । 'इदं ज्ञानमपाश्रित्य मम साधर्म्यमागताः' इति गीतोक्तेः । 'निरञ्जनः परमं साम्यमुपैति' इति मोक्षेऽपि भेदप्रतिपादकश्रुतेश्च" इति राधारमणगोस्वामी ।

१ "यत्तत् तदा-" इति क्वचित् ।

२ "यत् स्वे" इति प्र. पाठः । अत्र प्राचीनटीका—"हे श्रीकृष्ण त्वं पुरुषरूपः सन् त्रयो गुणा यस्यास्तया मायया चेतनाचेतनप्रकृत्या, दुर्विभाव्यं चिन्तयितुमशक्यम्, तत्वदेवैः स्वतः कर्तुमशक्यम्, व्यक्तं ब्रह्माण्डम्, आत्मनि स्वाधारे सृजसि, तद्गुणस्थः सत्वनियामकः सन्नवसि । एतैः सृष्ट्यादिकर्मभिः, हे अजित केनाप्यवशीकृत, भवान् नाज्यते न बद्ध्यते, श्रमचिन्तादिमान् न भवति । चिन्ताद्यभावे कारणमाह—यः स्व इति । यः प्रकाशरूपः । अतः अनवद्यः अज्ञानादिचिन्ताकारणविरोधिस्वभावः । अव्यवहिते अप्रतिबद्धे नित्यमनुभूयमाने, स्वे स्वतः सिद्धे सुखे पूर्णानन्दे सति अभिरतः सृष्ट्यादिलक्षणक्रियावान् । असर्वज्ञेन फलार्थं क्रियमाणे चिन्तादिसम्भवः । सर्वशक्त्युपेतेन सर्वज्ञेन स्वानन्दोद्रेकात् क्रियमाणे न चिन्तादिसम्भव इति भावः" इति ।

३ अयमर्थः-- याति सर्वमवगच्छतीति यः । प्रकाशरूपः । ज्ञानमय इति यावत् । स्वे सुखेऽभिरत इत्यानन्दमयः । अनवद्य इति सद्रूपः । "सत्वं निर्दोषत्वम्" इति पण्डिताचार्यवचनात् । तेन सच्चिदानन्दस्वरूपत्वात् कर्मभिर्नाज्यत इति सूक्तम् । एतादृशार्थविशेषलाभायैव यः प्रकाशरूप इति व्याख्यातम् । अन्यथा यच्छब्दोऽयमित्यङ्गीकारेऽपि न कोऽपि दोषः । अथवा "यः स्वे सुखेऽव्यवहितेऽभिरतोऽज्ञवद् यः" इत्याचार्यसम्मतः प्राचीन-

[1]पर्युष्टया पतितया वनमालयेयं
संस्पर्धिनी भगवती प्रतिपक्षवच्छ्रीः[2] ।
यः सुप्रणीतममुयाऽर्हणमाददानो[3]
भूयात् सदाऽङ्घ्रिरशुभाशयधूमकेतुः[4] ॥ १२ ॥

"अस्पर्धिनी स्पर्धिनीव श्रीरास्ते वनमालया । नहि स्पर्धादयो दोषाः संविद्रूपां स्पृशन्ति[5] ताम्" इति वामने ॥ * ॥

नस्योतगाव इव यस्य वशे भवन्ति[6]
देवाश्च यस्तनुभृदायुषि रज्यमानाः ।
कालस्य ते प्रकृतिपूरुषयोः परस्य
शं नस्तनोतु चरणः पुरुषोत्तमस्य[7] ॥ १४ ॥

पाठः सम्भाव्यते । तथाच तत्रैको यच्छब्दोऽपरो ज्ञानवाची यशब्द इति न पौनरुक्त्यमित्याह—यः प्रकाशरूप इति । केचित्त्विदं तात्पर्यवचनं दशमश्लोकव्याख्यानरूपमिति व्याचक्षते । तथाहि तद्रीत्या दशमश्लोकपाठः—"स्यान्नस्तवाङ्घ्रिरशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः । यः सात्वतैः समविभूतिभिरात्मविद्भिर्व्यूह्यार्चितः सवनशः समविक्रमैर्यः" इति । अत्र यच्छब्दद्वयस्यान्वयः । तृतीयस्तु व्यर्थः । अतो या प्रापण इति धातुनिष्पन्नत्वेन प्रकाशरूप इत्यर्थान्तरमुदितमिति वर्णयन्ति । प्राचीनकोशेषु तु "समविक्रमैश्च" इत्येव पाठः पठ्यते । तदा तु यच्छब्दद्वयमेवेति नात्र वैयर्थ्यशङ्कावकाशः ।

१ "पर्युष्टया तव विभो वन—" इति प्र. पाठः । २ "प्रतिपत्निवच्छ्रीः" इति च ।

३ "—माददन्नो—" इति च ।

४ अत्र प्राचीनटीका—"इयं वक्षःस्थिता भगवती सर्वोत्कृष्टा, पतितया वक्षसि, अपतितया (वा) । पर्युष्टया वर्जितम्लानभावया, महासौरभ्योपेतयेति भावः । वनमालया वैजयन्त्या, प्रतिपक्षे इव संस्पर्धिनीव स्थिता या श्रीः अमुया सुप्रणीतं भक्त्या सर्वपूजाद्रव्यैश्च सम्यक् कृतं अर्हणमाददानः स्वीकुर्वन् यः ज्ञानरूपः तवाङ्घ्रिः अशुभाशयानां बन्धकप्राकृतमनसां धूमकेतुरिव स्यात् । त्वद्भक्तानां दुःखोपादानान्तःकरणनाशकः स्यादित्यर्थः" इति । एतेन "यः प्रकाशरूपः" इति तात्पर्यवचनमत्राप्यन्वेतीत्यवगम्यते । विजयध्वजीयेऽप्येतदुक्तम्—"अवयविनो धर्मे आदानादिरवयवस्य कथं युज्यत इत्यत्राऽऽह—य इति । यः प्रकाशरूपः । अनेन लोकविलक्षणत्वेन हरेरवयवस्य पादस्यावयविवत् स्वातन्त्र्येणाऽऽदानादिधर्मो युक्त इति ज्ञातव्यम्" इति ।

५ "विशन्ति ताम्" इति क्वचित् ।

६ "भवन्ति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः" इत्यर्वाचीनाः पठन्ति ।

७ अत्र प्राचीनटीका—"नसि नासाग्रे ओताः रज्ज्वा प्रोताः गावः भारवाहका इव देवाः यस्य ते वशे भवन्ति, यो भवान् तनुभृतामायुषि यथासम्भवं शतवर्षलक्षणे रज्यमानः सम्बद्धः । स चाग्नौ अश्च पूर्णगुणश्च ।

80

तनुभृदायुषि सम्बद्धः अश्चेति तनुभृदायुषि रज्यमानाः।

"ब्रह्मणा सम्परित्यक्तो मृत इत्युच्यते नरः" इति भारते॥ * ॥

अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि कालमात्रः[१] ।
सोऽयं [२]त्रिनाभिरखिलापचये प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वम्[३]॥ १५॥

कालमात्रः कालनिर्माता ज्ञाता च[४]। सृष्टिलयाद्यर्थम्। नित्यत्वेन च। [५]अव्यक्तस्यापि स्रष्टृत्वात्।

देहे स्वावस्थानेन शतायुःसम्पादकः षडूर्मिरहितश्चेति भावः। तस्य कालस्य असुरसंहर्तुः। अथवा कालदेवतायाः, प्रकृतेश्चित्प्रकृतेः, पूरुषस्य विरिञ्चस्य च सकाशात् परस्य पूर्णस्य विलक्षणस्य वा, स्वतोऽद्भुतशक्त्युपेत्वादिति भावः। पुरुषोत्तमस्य देहस्थतत्वदेवानामुत्तमस्य शक्तिप्रेरकस्य। पुरुषश्चासावुत्तमश्चेति वा। तव चरणः नः शं सुखमभीष्टं तनोतु" इति। अथच तनुभृदायुषि रज्यमानः मुख्यप्राणोऽपि भवति । तद्वारणायासाधारणं नामाऽह—अ इति। "अः इति ब्रह्म" इति श्रुतेस्तस्यैव हीदमसाधारणं नाम। तेन रज्यमानाः स एव। आब-न्तोऽयं शब्दः। तद्यथा नारायणश्रुतौ "विश्वतः परमां नित्यं विश्वं नारायणं हरिम्" इति। परमश्चासावश्चेति हि परमाः। एवं प्रकृतिः पुरुषः काल इति भूश्रीदुर्गा वा। तथाच त्रिगुणमानिन्याः परस्य। "मम योनिरप्स्वन्तः" इति श्रवणात्।

१ "कालमाहुः" इत्यर्वाचीनाः। २ "त्रिणाभि—" इति पाठान्तरम्।

३ अत्र प्राचीनटीका—"त्वं कालमात्रः उत्पत्तिकालस्थितिकालादीनां निर्माता, उत्पत्तिकालादिविभागज्ञाता च। तन्त्रेणार्थद्वयं सिद्ध्यति। आवृत्त्या वा। मा निर्माणे माङ् मान इति धातुव्याख्यानात्। अस्य ब्रह्माण्डतदन्त-र्गतविश्वस्य उदयादीनां हेतुरसि। अण्डाद् बहिःस्थितानामपि त्वमेव कारणमित्याह- अव्यक्तेति। अव्यक्तं प्रकृतिः, तन्नियामकदेवता। जीवः मायादेवता, महान् महत्तत्वं तन्नियामकदेवता। महतामिति बहुवचनेनाहङ्काराद-योऽपि ग्राह्याः। एतेषां देवादीनामपि यथासम्भवमुदयादिकर्ता। गभीररयः अज्ञातवेगः। चातुर्मास्यत्रयं सृष्ट्यादि-कालत्रयं वा नाभिर्यस्य सः। अखिलानामपचये नाशार्थं प्रवृत्तः यः कालः दुर्गादिः। तस्यापि उदयादिकर्तासि। अतस्त्वमुत्तमपूरुषोऽसि" इति। अत्र प्रकृतिस्तन्नियामकदेवतेति भूरुच्यते। जीवः मायादेवतेति पुरुषशब्दिता श्रीरुच्यते। कालो दुर्गेति स्फुटमुदितम्। त्रिरूपा लक्ष्मीः ब्रह्मादयश्च तत उत्पन्ना इति। यद्वा प्रकृतिः काल इति स्रष्टृ संहर्तृ च श्रियो रूपद्वयम्। जीवो महानिति जीवाभिमानि महत्तत्वाभिमानि च ब्रह्मणो रूपद्वयम्। "त्रिनाभिः समन्यूनाधिकाहोरात्रनाभिः" इति सुदर्शनसूरिः।

४ "मानं ज्ञानं लयश्चैव निर्माणं चापि कथ्यते" इति ह्यभिदधति। मातृत्वान्मात्रः। पातृत्वात् पात्रमितिव-दित्युक्तं पुरस्तात्। किमिति कालज्ञानम्? आह सृष्टिलयाद्यर्थम्। यः सृष्टिकालं लयकालं वा न जानीयात् स कथं सृष्टेरीष्टे लयस्य वा। तथाच सृष्ट्यादिकालं जानन् सृष्ट्यादिकालं निर्माय सृष्ट्यादि करोति। ननु काल-प्रवाहो नित्यः? सत्यमित्याह—नित्यत्वेन च। यः कालं नित्यत्वेन चकार स कथं न कालस्रष्टा। "नित्यं नित्या-त्मना यतः" इत्यादिवचनात्। "भगवतः नित्यत्वेन त्रिकालस्थायित्वेन तस्य कालज्ञातृत्वमावश्यकम्" इति केचित्। "मात्रशब्दः कात्स्न्र्यवाची। तथाच नित्यत्वेन कृत्स्नकालव्यापित्वेन कालमात्र इति मूलपदस्य व्याख्या नान्तरम्" इत्यन्ये व्याचक्षते।

५ नित्यस्यापि कालप्रवाहस्य निर्मातृत्वं भगवतो युक्तमित्याह—अव्यक्तस्यापि स्रष्टृत्वात्। अव्यक्तं प्रकृतिः।

[1]काल एवम्भूतः। तस्मादप्युत्तमस्त्वम्।

"[2]कालाज्जीवात् तथाऽव्यक्तान्महतश्चोत्तमो यतः। उत्तमः पुरुषस्तस्माद् भगवान् विष्णुरुच्यते[3]" इति च ॥ *॥

त्वत्तः प्रधानमधिकृत्य पुमान् स्ववीर्यं[4]
धत्ते महान्तमिव गर्भममोघवीर्यः।
[5]सोऽयं त्वयाऽनुगत आत्मन आण्डकोशं
हैमं ससर्ज बहिरावरणैरुपेतम्[6] ॥ १६ ॥

"नारायणाख्यः परमः शेते लक्ष्म्याऽन्वितो लये। स एव पुरुषाख्यं तु द्वितीयं

नित्यं हि तन् चिदचिद्भेदम्। तस्यापि स्रष्टृत्वं भगवत उक्तं पुरस्तात् "अव्यक्तजीवमहताम्" इति। तद्वदेव कालस्रष्टृत्वं च युक्तमुक्तमिति। अपिचाव्यक्तमानिनी रमा। तस्यास्तावदुत्पत्तिविशेषः श्रूयते–"तस्मादव्यक्तमुत्पन्नम्" इत्यादि। सैव च कालमानिनी। "पुरुषाव्यक्तकालानां रमैवैकाऽभिमानिनी" इति श्रवणात्। तथाचाभिमानिनोऽव्यक्तस्यापि स्रष्टृत्वात् अभिमन्यमानः कालस्तेन सृष्ट इति किमु वक्तव्यम्?

१ पूर्वोत्तरार्धयोः सङ्गतिमाह—काल एवम्भूतः। त्वं कालमात्रः कालनिर्माता। यश्च त्वया निर्मितः कालः सोऽयमेवम्भूतः त्रिनाभिरित्यादि। अतस्तस्मादप्युत्तमः पुरुषस्त्वम्। यद्वा गभीररयः कालोऽप्येवम्भूतः भगवता निर्मित इति कालमात्रपदव्याख्यानमुपसञ्जहार।

२ कालाद् दुर्गायाः। जीवात् पुरुषशब्दितायाः श्रियः। अव्यक्तात् प्रकृतिशब्दिताया भुवः। यद्वा जीवात् जीवाभिमानिनः महतस्तदभिमानिनश्च चतुर्मुखात्। समतीतक्षराक्षर इत्येतत्।

३ "विष्णुरच्युतः" इति प्र· पाठः।

४ "त्वत्तः पुमान् समधिगम्य यया स्ववीर्यम्" इति प्र. पाठः। ५ "सोऽयं तया—" इति च।

६ "त्वत्तः नारायणांशात् पुरुषात् जातः पुमान् ब्रह्मा अमोघवीर्यः, प्रधानमधिकृत्य, प्रधाने गायत्र्यामित्यर्थः। स्ववीर्यं धत्त इव। अन्तर्यामिणः स्वातन्त्र्यादस्यास्वातन्त्र्यादिवशब्दः। प्रधानं महान्तं गर्भं सुषुवे। स महान्, त्वयाऽनुगतः प्रविष्टः आत्मनः स्थानं हैममाण्डकोशं ससर्ज। बहिरण्डसंश्लिष्टतया सप्तावरणैरुपेतं चकार। गुणत्रयमेकम्, महान्, अहम्, अबादयश्चत्वार एवमावरणानि। विशेषलक्षणा पृथिवी अबात्मिका आवरणरूपा वा। तस्मात् कारणेषु स्थित्वा पृथक् च स्थित्वा विविधरूपैः सर्वस्वतन्त्रकर्ता त्वमेवेति भावः" इति प्राचीनटीका। "त्वत्तोऽवतीर्णः पुमान् पुरुषनामा भवान् प्रधाननाम्न्यां रमायां महान्तमिव स्थितं स्ववीर्यं गर्भं धत्ते। पुरुषनामानं चतुर्मुखं प्रधानाख्यां गायत्रीं च सृष्टवानित्येकोऽर्थः। स पुमांश्चतुर्मुखो महान्तमिव गर्भं महत्तत्वाभिधमात्मानं श्रद्धाभिधां गायत्रीं च प्रधाननाम्न्यां गायत्र्यां धत्ते सृष्टवानित्यपरः" इति विजयध्वजीये विशेषः। "आत्मनः परमात्मनः प्रवेशादुत्पादनसमर्थैः बहिर्नवभिरावरणैरुपेतं हैममाण्डकोशं ससर्ज" इति च।

रूपमात्मनः[1]। कृत्वा रमायां पुरुषनामानं तु चतुर्मुखम्। प्रधानाख्यां[2] च गायत्रीं ससर्ज पुरुषात्मकः। चतुर्मुखः स पुरुषो महत्तत्वाभिधं पुनः। प्रधाननाम्न्यां गायत्र्यां ससर्जाऽत्मानमेव तु। श्रद्धाभिधां च गायत्रीं ताभ्यां शेषोऽन्वजायत" इत्यादि सृष्टिविक्षेपे ॥ * ॥

तत् तस्थुषश्च जगतश्च भवानधीशो
यन्माययोत्थगुणविक्रिययोपनीतान्।
अर्थान् जुषन्नपि हृषीकपते न लिप्तो
येऽन्ये स्वतः परिहृतानपि[3] बिभ्यति स्म ॥ १७ ॥

येऽन्ये ज्ञानिनः स्वतः परिहृतान् विषयान् बिभ्यति ॥ * ॥

[4]बिभ्रत्तवामृतकथोदवहास्त्रिलोक्याः
पादावनेजसरितः शमलानि हन्तुम्।
आनुश्रवं श्रुतिभिरङ्घ्रिजमङ्गसङ्गै-
स्तीर्थद्वयं शुचिषदस्त उपस्पृशन्ति[5] ॥ १९ ॥

सर्वं बिभ्रतस्तव ॥ * ॥

---

१ "रूपमास्थितः" इति क्वचित्। २ "—नाख्यां तु गायत्रीम्" इति क्वचित्।

३ "परिहृतादपि" इत्यर्वाचीनाः। अत्र प्राचीनटीका—"तत् तस्मात् अव्यक्तगुणकालमहदादीनामपि त्वदधीनत्वात्, भवान् तस्थुषः स्थावरस्य जगतः जङ्गमस्य च अधीशः ईशानामपीशः। यस्य तव मायया त्वदधीनप्रकृत्या उत्थाः विकृताः ये गुणाः रजःप्रभृतयस्तेषां विक्रिया विकारः तया उपनीतान् गुणकार्यैर्जातानित्यर्थः। अर्थान् सुवर्णप्रमदादीन् शब्दस्पर्शादीन् वा जुषन्नपि, हे हृषीकपते सर्वेन्द्रियज्ञानक्रियाशक्तिप्रेरक, भवान् न लिप्तः विषयकृतदोषरहितः। विषयबद्धेभ्यः अन्ये ये उन्मूलितविषयवासनाः स्वतः परिहृतान् तिरस्कृतान् विषयान् दृष्ट्वा बिभ्यति स्म। विषयपरित्यागवतामपि विषया भयजनकाः, किमुत विषयसेवकानामिति भावः। तस्मादसङ्गत्वं गुणस्तवैव" इति। "विषयांस्तत्तदिन्द्रियेषु स्थित्वा जुषन्नपि" इति विजयध्वजीयम्। "अधिष्ठाय मनश्चायं विषयानुपसेवते" इति हि गीता। "परिहृतानिति द्वितीया पञ्चम्यर्थे" इति च विजयध्वजीयम्।

४ "विभ्वस्तवामृत—" इत्यर्वाचीनाः।

५ अत्र प्राचीनटीका—"त्रिलोक्याः बिभ्रत् त्रिलोकीं बिभ्रतः। सर्वं बिभ्रत इत्यर्थः। शुचिषदः शुचित्वेन स्थितस्य, शुचौ सूर्ये विद्यमानस्य वा, तवामृतवद् विद्यमानाः कथा एव उदवहा नद्यः, तव पादावनेजः पादप्रक्षाळनं तेन जाताः सरितः, इति यत् तीर्थद्वयं तदानुश्रवं अभीष्टदातृत्वेन श्रुत्यादिप्रसिद्धम्, ते मुमुक्षवस्त्रिलोक्याः शमलानि पापानि हन्तुं परिहर्तुं, तत्र तीर्थद्वये आनुश्रवं, श्रवः कीर्तिः, तदनुसृत्य वर्तमानं कीर्तिप्रतिपादकं ऋगादि-

यदुवंशेऽवतीर्णस्य भवतः पुरुषोत्तम ।
शरच्छतं व्यतीयाय पञ्चविंशाधिकं प्रभो[1] ॥ २५ ॥

"वत्सराणां शतं चैव ऋतूनां पञ्चविंशकम् । अवतीर्णस्य कृष्णस्य यदा प्रागात् तदा हरिम् । स्वस्थानगमनापेक्षी ब्रह्मा तुष्टाव सामरः । संवत्सरद्वयं चैव पश्चात् स्थित्वा जनार्दनः । अभिपेदे परं स्थानं [2]चतुर्मासाधिकं पुनः" इति भविष्यत्पुराणे ॥
॥ * ॥

तदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतम् ।
लोकं जिघृक्षत्यूर्ध्वं मे वेलामिव महार्णवः[3] ॥ २९ ॥

[4]उपसंहृत्य दृप्तानां यदूनां विपुलं कुलम् ।
गन्तास्म्यनेन लोकोऽयमुद्धणेन[5] विनङ्क्ष्यति ॥ ३० ॥

"सतामपि कलौ प्राप्ते विकारो मनसो भवेत् । तस्मात् यदूंश्च सञ्जह्रे नैते स्युः पापिनस्त्विति । पुनर्लोकविवृद्ध्यर्थमौत्तरेयादिकान् हरिः । आविश्य रक्षामकरोज्जगतः पुरुषोत्तमः । स्वात्मनः सहयानेन पुरुषार्थोऽधिको भवेत् । इत्यनुग्रहबुद्ध्या च सञ्जह्रे स्वकुलं विभुः" इति च ॥ * ॥

भारतादिशास्त्रं श्रुतिभिः श्रवणैरुपस्पृशन्ति । सम्यक् शृण्वन्ति । अङ्घ्रिजं तीर्थमङ्गसङ्गैः शिरःस्नानादिभिरुपस्पृशन्ति'' इति । ''सप्तसु प्रथमेति सूत्रात् बिभ्रदिति प्रथमा षष्ठ्यर्थे'' इति विजयध्वजीयम् । ''शुचावग्नौ सीदति'' इति च । शुचौ वायौ वा ।

१ ''पञ्चविंशतिसङ्ख्याकऋतुभिरधिकं शरदां शतं व्यतीयाय'' इति प्राचीनटीका । चतुरुत्तरशतवर्षाणि मासद्वयं चेत्यर्थः ।

२ ''चातुर्मास्याधिकम्'' इति प्र. पाठः । तथाच सार्धषडुत्तरशतवर्षाणि श्रीकृष्णस्य भूमिवासकालः ।

३ ''जिघृक्षद् रुद्धं मे वेलयेव महार्णवः'' इति प्र. पाठः । ''यादवकुलम्, वेलां मर्यादार्थं कृतं सैकतं सेतुं महार्णवः प्रळयार्णव इव मे मम गमनादूर्ध्वं लोकं सर्वां भुवं जिघृक्षति ग्रहीतुमिच्छति प्राप्तुमिच्छति वा'' इति प्राचीनटीका । ४ ''यद्यसंहृत्य'' इति प्र. पाठः ।

५ ''—मुद्वेलेन विनङ्क्ष्यति'' इति च । ''अतः यदूनां विपुलं समृद्धं कुलं उपसंहृत्य वैकुण्ठं गन्तास्मि । अथ यदुकुलोपसंहारो न क्रियते तदा लोकस्य नाश इत्याह—अनेनेति'' इति प्राचीनटीका । अनेन अनुपसंहृतेन लोको विनङ्क्ष्यति । ''अनेन उद्धणेन द्विजशापेन अयं लोको यदुसमुदायः विनश्यति'' इति चार्थान्तरं प्राचीनटीकायाम् ।

वयं त्विह महायोगिन् भ्रमन्तः कर्मवर्त्मसु ।
त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः[1] ॥ ४८ ॥

"[2]आत्मनोऽवमतां ब्रूयुरुत्तमा अपि सर्वशः । कदाचिदेव स्वगुणान् स्निग्धेष्वेव हि साधवः" इति नारदीये ॥ * ॥

इत्येकादशस्कन्धे षष्ठोऽध्यायः

[सप्तमोऽध्यायः]

यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ।
नश्वरं गृह्यमाणं च विद्धि मायां मनोमयीम्[3] ॥ ७ ॥

विद्धि मायां मनोमयीम् । मन्मनःप्रधानप्रकृतिनिर्मितम्[4] ।

---

१ "—कैर्दुस्त्यजं तमः" इति पाठान्तरम् । "इह भूमौ कर्माणि वर्त्मानि प्रापकाणि येषां तेषु देहेषु भ्रमन्तः वयं तु तावकैः त्वद्भक्तैः सहिताः त्वद्वार्तया दुस्तरमपि तमोगुणं तरिष्यामः" इति प्राचीनटीका । कर्मवर्त्मसु । अज्ञानप्रचुरेषु कर्ममार्गेष्विति वा । "प्लवा ह्येते अदृढा यज्ञरूपाः" इति श्रवणात् ।

२ ननु ज्ञानी किलोद्धव उत्तमाधिकारी । तत् किमात्मानं 'कर्मवर्त्मसु भ्रमन्तः' इति निन्दति? आह—आत्मनोऽवमतां ब्रूयुः । "आत्मनोत्तमतां ब्रूयुः" इति प्र. पाठः प्रामादिकः । एतेनैव प्रमाणवचनेन पुरस्तात् प्रस्तुतं कृष्णवचनं च गदिताभिप्रायम् । तथाहि कृष्णवचनं यदून् प्रति—"वयं च तस्मिन्नाप्लुत्य तर्पयित्वा सुरान् पितॄन् । भोजयित्वाऽर्थिनो विप्रान् नानागुणवताऽन्धसा । तेषु दानानि पात्रेषु श्रद्धयाऽर्प्य महान्ति वै । व्रजिनानिस्तरिष्यामो दानैर्नौभिरिवार्णवम्" (३७–३८) इति । अत्र कृष्णः सुरपितृद्विजपूजनेन स्वस्यापि व्रजिनतरणमाह । तस्यापीदं विवरणम्—सर्वश उत्तमाः सर्वोत्तमाः कृष्णाद्या अपि स्वात्मनः अवमतां क्वचित् प्रकटं ब्रूयुरिति । ननु कथं तर्हि उत्तराध्याये कृष्ण उद्धवाय स्वगुणानाविश्चकार—"ब्रह्मा भवो लोकपालाः सर्वे मामभिकाङ्क्षिणः" इत्यादिना? आह—कदाचिदेव स्वगुणान् । तदपि उद्धवादिषु स्निग्धेष्वेव । असाधुष्वात्मसङ्गोपनमिव साधुष्वात्माविष्कारोऽपि युक्त एवेति भावः ।

३ "मायामनोमयम्" इत्यर्वाचीनाः । "मनसा सहितैः चक्षुरादीन्द्रियैर्गृह्यमाणं विषयजातम्, वाचा शब्देन गृह्यमाणं परोक्षं च स्वर्गादिकं यदिदं सर्वं मनोमयीं मन्मनःप्रधानां मम मनोऽनुसारिणीं मायां प्रकृतिं विद्धि । प्रकृतिकर्तृकं विद्धि । कार्यकारणयोरभेदोक्तिः । अतो नश्वरमनित्यं च विद्धि । साक्षादहं सर्वकर्ता सर्वस्वामी च । अतो जीवानां स्वतो द्रविणादिस्वामित्वं नेति भावः" इति प्राचीनटीका ।

४ "-निर्मिताम्" इति प्र. पाठः प्रामादिकः । ईश्वरेच्छाधीनप्रकृतिनिर्मितमिदं सर्वमित्यर्थः ।

"प्रकृतिः सा परा मह्यं रोदसी लोकधारिणी। ऋता सत्याऽमराऽजय्या लोकानामात्मसञ्ज्ञिता[2]" इति मोक्षधर्मेषु ॥ * ॥

पुंसोऽयुक्तस्य नानार्थे[3] भ्रमः स गुणदोषकृत् ।
कर्माकर्मविकर्मेति गुणदोषधियो भिदा[4] ॥ ८ ॥

"स्वर्गाद्याश्च गुणाः सर्वे दोषाः सर्वे तथैव च । आत्मनः कर्तृताभ्रान्त्या जायन्ते नात्र संशयः । परमात्मानमेवैकं कर्तारं वेत्ति यः पुमान् । स मुच्यतेऽस्मात् संसारात् परमात्मानमेति च" इति भारते ।

इदं मया क्रियते, इदं मया न क्रियते[5], इदं मया विपरीतं क्रियत इति बुद्धिभेदः रजस्तमोगुणनिमित्तो भ्रमः । सर्वं हि परमेश्वरः करोति ॥ * ॥

तस्माद् युक्तेन्द्रियजयो युक्त[6]चित्त इदं जगत् ।
आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे[7] ॥ ९ ॥

---

१ ननु जडप्रकृतेरुपादानत्वेन युक्ताऽभेदोक्तिः । मृद् घट इतिवत् । चेतनप्रकृतेस्तु कथम् ? आह — प्रकृतिः सा परा । परा प्रकृतिः मह्यं मदर्थं स्थिता, मदिच्छाधीना स्थिता । रोदसी व्याप्य स्थितत्वात् सैव रोदसी । उक्तं हि– "अहं द्यावापृथिवी आविवेश" इति । ऋतं सत्यं परं ब्रह्म । तेन नित्यावियोगाद् ऋता सत्या । लोकानामात्मसञ्ज्ञिता लोककारणत्वाल्लोकात्मकत्वेन लोकाभेदेन व्यवह्रियते शास्त्रेष्वित्यर्थः ।

२ "–संस्थिता" (?) इति क्वचित् ।

३ "नानार्थो भ्रमः स गुणोदोषभाक्" इति प्र. पाठः ।

४ "युक्तः मयि मनोयोगवान्, सर्वकर्तृत्वादिज्ञानवान्, तद्रहितस्य नानार्थे विविधभोग्येषु अहमेव कर्ता मदीयमेवेदमिति भ्रमो भवति । स भ्रमः गुणदोषकृत् स्वर्गनरकयोः सुखदुःखप्रापकः । गुणदोषधियः रजस्तमोगुणाभ्यां जाताया दोषधियः अहङ्कारलक्षणभ्रमात्, इदं कर्म मया क्रियते, अकर्म, इदं मया न क्रियते, इदं विरुद्धं मदधीनं विकर्म, इदं कर्म अन्यथा करोमीति भिदा तस्मिन्नतद्भ्रमः भवति । निषिद्धेऽपि करोमीति बुद्धिः । विहितेऽपि न करोमीति । नित्येऽपि कर्मणि फलाय करोमीति । तत्प्राप्तपुण्यपापाभ्यां दुःखादिकमिति भावः" । इति प्राचीनटीका ।

५ अत्र बहवः पाठभेदाः–क्वचित् "इदं मया न क्रियते" इतीयान् भागः न पठ्यते । क्वचित् "इदं मया विपरीतं क्रियते" इति वाक्यभागो न पठ्यते । क्वचित्तु तृतीयवाक्ये "मया" इति न पठ्यते । "इदं विपरीतं क्रियते" इतीयदेव । प्र. पाठोऽपि तथा ।

६ "युक्तेन्द्रियग्रामो युक्त–" इत्यर्वाचीनाः ।

७ "तस्मात् जीवे स्वातन्त्र्यभ्रमादिना दुःखप्राप्तेः तत्परिहाराय युक्तचित्तः मयि न्यस्तचित्तः सन् युक्तः ज्ञानोपाययुक्तः इन्द्रियजयः विषयपरित्यागो यस्य सः । देहधारणाय युक्तान्नस्वीकारवतः सर्वभोग्यपरित्यागः भ्रमकारणदोषनिवर्तक इति भावः । इदं विततं जगत् आत्मनि विरिञ्चे ईक्षस्व । जगत् तत्सृष्टं तदधीनं चेति बुद्धिं सदा कुरु । आत्मानं विरिञ्चमधीश्वरे, विरिञ्चेश्वरी या प्रकृतिस्तस्या अपीश्वरे मयीक्षस्व । विरिञ्चः परमात्मना सृष्टस्तदधीन इति बुद्धिं कुरु" इति प्राचीनटीका ।

"आत्मशब्दोदितो ब्रह्मा परमात्माभिधो ह्यहम् । सर्वं ब्रह्मणि वीक्षेत मयि ब्रह्माण-मेवच" इति कालसंहितायाम् ॥ * ॥

ज्ञानविज्ञानसंयुक्त आत्मभूतः शरीरिणाम् ।
आत्मानुभवतुष्टात्मा नान्तरायैर्विहन्यसे[1] ॥ १० ॥

आत्मभूतः अत्मवद् भूतः ।

"आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन" इति वचनात् ॥ * ॥

दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते ।
गुणबुद्ध्या च विहितं न करोति यथाऽर्भकः[2] ॥ ११ ॥

सर्वभूतसुहृच्छान्तो ज्ञानविज्ञाननिश्चलः[3] ।
पश्यन् मदात्मकं विश्वं न विपद्येत वै पुनः[4] ॥ १२ ॥

"कर्तृत्वमात्मनो [5]यस्माज्ज्ञाननिष्ठो न मन्यते । अतोऽकुर्वन्नपि[6] सदा दोषबुद्ध्या न

---

१ "प्रकृतेः महदादिसर्वतत्त्वानां तन्नियामकदेवानां च ज्ञानं ज्ञानम् । विज्ञानं सर्वतत्त्वाधीश्वरज्ञानम् । ताभ्यां सम्पन्नः । शरीरिणामात्मवत् भूतः विद्यमानः । आत्मौपम्येन साधूनां हितकर्तेत्यर्थः । आत्मनः मर्वादानादिकर्तुः अनुभवेन कल्याणगुणावधारणेन, अपरोक्षेण वा तुष्ट आत्मा मनो यस्य स त्वं ज्ञानविघातकैरन्तरायैर्न विहन्यसे । विशेषदर्शनपाटवे सत्यहङ्कारादौ भ्रमजननशक्तिः प्रतिबद्धा भवतीति भावः" इति च । अत्र "ज्ञानविज्ञान-सम्पन्नः" इति यादवेन्द्रतीर्थाभिमतः पाठ इति भाति ।

२ "उभयातीतः पुण्यपापाभ्यामतीतः अपरोक्षज्ञानी दोषबुद्ध्या अनिष्टं भविष्यतीति बुद्ध्या निषिद्धं कर्म न करोतीति न। किन्तु श्रुतिस्मृतिप्राप्तेशप्रेरणालक्षणानुज्ञां निश्चित्य निवर्तते। गुणबुद्ध्या स्वर्गादि भविष्यतीति बुद्ध्या विहितं च न करोति । किन्त्वीशप्रेरितोऽहं करोमीति बुद्ध्या करोति । अर्भकः यथा गुणदोषबुद्ध्या विधिनिषेध-योः प्रवृत्तिनिवृत्तिमान् न भवति । किन्तु पित्रादिप्रेरणया, तथेहापीत्यर्थः । अतः विषयरागादिना कर्माकर-णान्न कर्मापि ज्ञानविरोधीति भावः" इति च । ३ "–निश्चयः" इति प्र. पाठः ।

४ "सर्वभूतानां साधूनां सुहृत् हितकर्ता । शान्तः भगवति न्यस्तचित्तः । ज्ञानेन विज्ञानेन च निश्चलः मनः-स्थैर्यवान् । भोग्यस्मरणरहित इति भावः । मदात्मकम्, अहमेव सर्वस्याऽदानादिकर्ता भोक्ता जीवानां भोजकश्च यस्य तत् । एवंविधं विश्वं पश्यन् पुनः पूर्वमिव न विपद्येत" इति च ।

५ "यस्तु ज्ञाननिष्ठो–" इति क्वचित् ।

६ "अतः कुर्वन्नपि" इति प्र. पाठो न स्वरसः । निन्दितं अकुर्वन्नपि दोषबुद्ध्या न करोतीति न । किन्त्वी-शो मया न कारयतीति मन्यते। एवं गुणबुद्ध्या विहितं करोतीति च न। किन्तु "नाहं कर्ता हरिः कर्ता तत्पूजा कर्म चाखिलम्" इति करोति ।

निन्दितम् । गुणबुद्ध्या न विहितं किन्त्वीशप्रेरितो ह्यहम्[१] । स एव च मयि स्थित्वा निन्द्यानिन्द्ये करोत्यजः । न मे दोषो नच गुणः कर्तृत्वाभावतः स्फुटम् । स्वतन्त्रत्वान्नचेशस्य येऽज्ञास्तेषु भवेदपि । इति मत्वा निवर्तेत निन्द्यात् कुर्याद् गुणानपि" इति बोद्धव्ये । "[२]अनित्या मे गुणा न स्युर्दोषा नैव कथञ्चन । इति मत्वा शुभं कुर्यान्निवर्तेताशुभादपि[३] । ज्ञानी त्वकर्तृतामानादीशकर्तृत्वनिश्चयात् । किन्तु पूर्णगुणायैव नतु दोषापनुत्तये । नचाल्पगुणसिद्ध्यर्थं बालवत्[४] कृतनिश्चयः" इति वैशाख्ये । "वैलक्षण्याद्धरेर्भिन्न तत्तन्त्रत्वात् तदात्मकम् । इति विश्वं प्रपश्यन्ति ज्ञाननिष्ठा हरेः प्रियाः" इति सार्वेश्ये ॥ * ॥

योगेश योगिविन्यास योगात्मन् योगसम्भव[५] ।
निःश्रेयसाय मे प्रोक्तस्त्यागः सन्न्यासलक्षणः ॥ १४ ॥

योगो देवादिषु तेन न्यस्त इति योगविन्यासः ।

"ज्ञानं तु योगशब्दोक्तं युज्यतेऽनेन यत् सुखम्[६] । क्वचिद् योग उपायः स्यात् क्वचित् चित्तनिरोधनम्" इति दत्तात्रेययोगे ॥ * ॥

अत्र ज्ञानमुपायश्च ॥ * ॥

---

१ "प्रेरितोऽस्म्यहम्" इति प्र. पाठः । क्वचित् कोशेषु च ।

२ ननु ज्ञानी निषिद्धमपि कुर्यात्; विहितमपि न कुर्यात्; विधिनिषेधबाह्यत्वादित्यर्थः किं न स्यात् ? न स्यात्, प्रमाणविरोधादित्याह–अनित्या मे गुणाः । ज्ञानी तु शुभकरणेन मम अनित्याः स्वर्गाद्या गुणा न भवन्ति, अशुभकरणेन दोषा अपि न भवन्ति, अश्लेषादिति मत्वाऽपि ईशप्रेरणया तत्पूजेति कर्माणि करोमीति शुभं कुर्यादशुभाच्च निवर्तेत । कुतः ईशकर्तृत्वनिश्चयादिति । तथाच कर्तृत्वाभिमान एव निषिद्ध्यते न कर्तृत्वम् । तर्हि निष्फलं किमितीशप्रेरणयाऽपि करोति ? कुतो वा निष्फले कर्मणीशः प्रेरयति ? आह– किन्तु । न निष्फलं विहितकरणम् । किन्त्वानन्दवृद्धिरूपपूर्णगुणायैव । अहिताकरणमपि न नरकादिदोषापनुत्तये । ज्ञानिनस्तदसम्भवात् । किन्तु पूर्णगुणायैव । आनन्दह्रासरूपदोषापनुत्तये तु भवति च । तथाच स्वर्गाद्यल्पफलबुद्ध्या विहितं न करोति, नरकादिभिया निषिद्धान्न निवर्तेत इति न करोति न निवर्तेत इत्युच्यत इति । तथाच द्वेधा तस्याकर्तृत्वमुक्तं भवति—अहं कर्तेत्यमिमानाभावादकर्तृत्वम्, अल्पफलकामनयाऽकरणाच्चाकर्तृत्वमिति ।

३ "-वर्तेदशुभादपि" इति प्र. पाठः । क्वचित् कोशेषु च ।

४ एतेन "यथाऽर्भकः" इसि मूलं व्यतिरेकदृष्टान्तपरतयाऽपि योजितं भवति— यथा बालकः क्षुद्रफलसिद्ध्यर्थमपि प्रवर्तते निवर्तते च न तथा ज्ञानीति ।

५ "योगानां यमनियमादीनां ईश नारायणाद्यवतारैः प्रवर्तक । योगस्य ज्ञानस्य विन्यासः देवादिषूपदेशो यस्य सः । योगात्मन् ज्ञानदेह । योगानां सर्वदुःखनिवृत्त्युपायानां शास्त्राणां सम्भवः येन" इति प्राचीनटीका ।

६ सुखं स्वरूपसुखम् ।

81

सत्यस्य ते स्वदृश आत्मन आत्मनोऽन्यं[1]
वक्तारमीश विबुधेष्वपि नानुचक्षे ।
सर्वे विमोहितधियस्तव माययेमे
ब्रह्मादयस्तनुभृतो बहिरर्थभावाः[2] ॥ १७ ॥

[3]अभगवत्स्वरूपत्वात् तनुभृत्त्वम् । बहिरर्थापेक्षैव[4] च तेषां मोहः । परमसुखसाधनादन्योऽर्थो बहिरर्थः ।

"[5]अशरीरः सदा विष्णुः पूर्णानन्दत्वतः सदा । इच्छा च क्रीडयैवास्य न फलाय यतो विभोः । अतो बाह्यार्थकामोऽपि निष्काम इति कथ्यते । ब्रह्मा [6]निरभिमानत्वाच्छ-

---

१ "आत्मतोऽन्यम्" इति पाठान्तरम् ।

२ "सत्यस्य बलज्ञानसमाहाररूपस्य, मुक्तामुक्तनियामकस्य, सर्वदोषविरोधिसर्वकल्याणगुणपूर्णस्य वा । स्वयमेव पश्यतीति स्वदृक् । स्वविषयप्रकाशो वा । आत्मनः सर्वभोग्यानामादानादनादिकर्तुः । आत्मनः परमात्मनः त्वत्त इत्यर्थः । अन्यं विबुधेषु वक्तारं देवानामुपदेष्टारं नानुचक्षे न पश्यामि । देवानामुपदेष्टा त्वं ममाप्युपदेशं कुर्विति भावः। अथवा विबुधेषु मध्ये त्वामिव वक्तारं विबुधं नानुचक्षे ।कुत इत्यत आह—सर्व इति । ब्रह्मादयः ब्रह्मा आदिः प्राथमिको येषां ते । अतद्गुणसंविज्ञानबहुव्रीहिः। ब्रह्मणो भारत्याश्च मायामोहो नास्तीति भावः। रुद्रादिदेवाः विमोहितधियः क्वचिदन्यथाज्ञानवन्तः । परमसुखसाधनादन्योऽर्थः बहिरर्थः । कदाचिद् विषयचित्ताः । तनुभृतः कदाचिद् देहाभिमानोपेताः" इति प्राचीनटीका । यद्वा सत्यस्येत्यादिषष्ठ्यन्तानां वक्तारमित्यनेनान्वयः । प्रथममात्मन इति षष्ठ्यन्तम् । द्वितीयं पञ्चम्यन्तम् । प्राचीनटीकायां तु सर्वाणि षष्ठ्यन्तानि पञ्चम्यर्थानि । "आत्मनः जीवस्याप्यात्मनः अन्तरात्मनः" इति वीरराघवः । "ते इत्यार्षत्वात् षष्ठी व्यत्ययेन" इति च "सत्यस्येति षष्ठी आर्षी, सत्यात्" इति च विश्वनाथचक्रवर्ती ।

३ कोशेषु तु "भगवत्स्वरूपत्वात्" इति पठ्यते । लिपिकृत्प्रमादः स्यात् । भगवत इव स्वं रूपं शरीरं येषां ते भगवत्स्वरूपाः । तद्भिन्नत्वात् । भौतिकशरीरवत्त्वादित्यर्थः । अस्मिन्नर्थे ब्रह्मादय इति ब्रह्मणोऽपि ग्रहणम् । अथच भगवदर्थमेव स्वं रूपं शरीरं येषां ते भगवत्स्वरूपाः । बाह्यार्थविधुरत्वात् । शरीराभिमानरहिताः । तद्भिन्नत्वात् शरीराभिमानित्वात् तनुभृतः । अस्मिन्नर्थे ब्रह्मादय इति रुद्राद्या एव गृह्यन्ते ।

४ "–पेक्षयैव" इति प्र. पाठः ।

५ तनुभृत इत्यस्य विवक्षाभेदेनोक्तमर्थद्वयं प्रमाणतः समाख्यापयति—अशरीरः । भौतिकशरीररहितः । कुतः ? पूर्णानन्दत्वतः । ज्ञानानन्दमयशरीरत्वात् । सृष्ट्याद्यर्थं बाह्यानर्थानुपादित्सति क्वचित् । सा चेच्छा केवलं क्रीडार्थम्; न फलाय । तदुक्तम्—"न प्रयोजनवत्त्वात्, लोकवत्तु लीलाकैवल्यम्" इति । अस्मिन्नर्थे भगवानेक एवातनुभृदबहिरर्थभावश्च । तदन्ये ब्रह्माद्याः सर्वेऽपि तनुभृतः । बहिरर्थभावाश्च । वस्तुतस्तु शरीराभिमान एव शरीरित्वं नाम । तेन ब्रह्माऽप्यतनुभृदेवेत्याह—ब्रह्मा । एवं स्वरूपानन्दाविर्भावोपयोगि यच्छ्रवणमननादिकं तदन्य एवार्थो बहिरर्थ इत्युच्यते । नहि भगवदुपासनादिकं बाह्योऽर्थः । तस्माद् ब्रह्माऽपि बहिरर्थकामो न भवति भगवदेकतानत्वात् । तेन मूले ब्रह्माद्या इत्यनेन रुद्राद्या एवोच्यन्त इत्यर्थः ।

६ "निरभिमानित्वा—" इति प्र. पाठः ।

रीर्यप्यशरीरवान् । नित्यानन्दोपयोग्यन्यकामस्योज्झिततः सदा । बहिरर्थविनिर्मुक्तस्तथाऽपि[1] तनुधारणात् । अमूढो मूढ इतिवदुच्यते च सरस्वती । [2]रुद्राद्यास्तन्वभीमानाद् बहिरर्थयुजस्तथा । [3]सर्वेषां ब्रह्मपदवीयोग्यानां पूर्वमेव तु । अभावस्त्वपरोक्षस्य मोहो ज्ञानस्य भण्यते । [4]ब्रह्मणस्त्वंशरूपेषु भारत्या ज्ञानवर्जनम । ब्रह्मगायत्रिभावे तु नांशावतरणं क्वचित् । [5]शतजन्मसु पूर्वं तु ज्ञानोदय उदीर्यते । [6]आपरोक्ष्येण पारोक्ष्यात् [7]पूर्णं ज्ञानं सदैव तु । [8]शतजन्मगतायाश्च [9]आपरोक्ष्या-

---

१ ननु मूले ब्रह्माद्या इति ब्रह्मणोऽपि ग्रहणपक्षे तनुभृत्त्वं बहिरर्थभावश्च कथञ्चिदुक्तरीत्या युज्येयाताम् । विमोहितधिय इति तु कथम्? नहि जगत्स्रष्टा मूढः शक्यं वक्तुम् । आह—तथाऽपि तनुधारणात् । यतो लोके शरीरित्वं मोहेन समानाधिकरणमेव दृष्टं, यः शरीरी स मूढो भवतीति तेन शरीरित्वसाम्यादुपचारतो मूढवदुच्यते । न वस्तुतो मोहवत्त्वात् । तथाच ब्रह्मणो मायया विमोहितत्वं नाम मोहजनकमायोपादानकशरीरवत्त्वमेव, न मोहवत्त्वम् । उक्तन्यायः सरस्वत्यामपि समानः परशुक्लत्रयान्तर्भावादित्याह—सरस्वती चेति । साऽपि अनभिमानादशरीरिण्येव । अबहिरर्थकामा, अमोहितधीश्च । यदि क्वचित् शरीरं बाह्यार्थकामो मोहश्च तस्या अप्युच्यन्ते तदुपचारादेव ।

२ रुद्रादीनां मुख्यत एवेदं सर्वं युज्यत इत्याऽह—रुद्राद्यास्तन्वभीमानात् । तथाच रुद्राद्या न भवानिव मुख्यवक्तारः । यद्यपि ब्रह्मा मुख्यवक्ता स्यादनभिमानात् । तथाऽपि तस्यापि प्राकृतशरीरबन्धोऽस्त्येव । त्वमेक एव मायातीतः । अतस्त्वत्तोऽन्यं वक्तारं विबुधेष्वपि नानुपश्यामीति मूलार्थः ।

३ इदानीं प्रसङ्गवशादपूर्वं किञ्चित् प्रमेयजातमाह—सर्वेषाम् । ब्रह्मपदयोग्याः शतं ह्यृजवः । तेषां ब्रह्मपदप्राप्तेः शतजन्मतः पूर्वमपरोक्षज्ञानम् । तदैव च शतगणप्रवेशः । ततः पूर्वं तु परोक्षज्ञानमेव तेषाम् । तेन तदानीं तेषामपरोक्षज्ञानाभावो मोहो नाम । नहि ज्ञानाभावमात्रम् । तथाच ब्रह्मपदवीयोग्यानां सर्वेषां जीवानां शतगणप्रवेशात् पूर्वमेव तु अपरोक्षस्य ज्ञानस्याभाव एव मोह इति भण्यत इत्यन्वयः । पूर्वमेव अनादित एवेति वा ।

४ ब्रह्मणो भारत्याश्च रीत्यन्तरेण मोहं घटयति—ब्रह्मणस्तु । ब्रह्मणः आवेशावतारेषु सोमादिष्विति तावत् । तत्र ज्ञानाद्यभावः स्फुटः । अथ ब्रह्मा वायुः । तस्य भारत्याश्च अंशरूपेषु अवतारेषु मूलरूपे यावत् तावतो ज्ञानस्य वर्जनं ज्ञानह्रास इति यावत् । स एव च तस्य तस्याश्च मोहो नाम । भारत्या सह ब्रह्मणो वायोरिति वा । हनुमदादिषु वाय्ववतारेषु विप्रकन्यादिषु भारत्यवतारेषु च मूलरूपापेक्षया किंचिदिव ज्ञानह्रासो विद्यत इत्यर्थः । ब्रह्मत्वे तदपि नास्तीत्याह—ब्रह्मागायत्रिभावे । वायोः ब्रह्मभावे भारत्याश्च गायत्रीभावे नांशावतरणं न तन्निमित्तो ज्ञानह्रासश्च । "नांशावतरणे क्वचित्" इति क्वचित्पाठः प्रामादिकः सम्भाव्यते ।

५ ब्रह्मपदवीयोग्यानामपरोक्षज्ञानाभावो मोह इत्युक्तम् । तर्हि कदा तेषामपरोक्षज्ञानम्? आह—शतजन्मसु । शतजन्मसु मध्ये पूर्वं प्रथमजन्मनि । पञ्चम्यर्थे वा सप्तमी । अपरोक्षज्ञानोत्तरं शततमे जन्मनि तेषां ब्रह्मभाव इति भावः । आपरोक्ष्येण ज्ञानोदय इत्यन्वयः । पारोक्ष्यात्तु सदैव स्वरूपत एव पूर्णं ज्ञानमिति ।

६ "अपरोक्षेण" इति क्वचित् पाठः । ७ "पूर्णज्ञानम्" इति प्र. पाठः । क्वचित् कोशेषु च ।

८ एवं सरस्वतीपदयोग्यानामृजुस्त्रीणामपि ज्ञाने क्रमविशेषमाह—शतजन्मगतायाश्च । अपरोक्षानन्तरं भारतीभावात् पूर्व यानि द्व्यूनानि शतजन्मानि तत्र गतायाः सरस्वत्याः सरस्वतीपदयोग्याया ऋजुस्त्रिया अंशावतरणेषु क्वचित्क्वचिदापरोक्ष्योज्झितिरपि भवेत् । अवतारेष्वावृतं भवत्यपरोक्षज्ञानं तासामिति । इतिशब्दं ऋजुज्ञानव्यवस्थोपसंहरमाह । ९ "अपरोक्षोज्झिति–" इति प्र. पाठः ।

जिज्ञतिर्भवेत् । क्वचित्क्वचित् सरस्वत्या अंशावतरणेष्विति[1]" इति शक्तिविवेके । "अशरीरो वायुरभ्रं[2] विद्युत् स्तनयित्नुरशरीराणि वा एतानि" इति च श्रुतिः । "श्रुतिभिः [3]स्तनितत्वात्तु स्तनयित्नुर्हरिः स्मृतः । अभ्रं भूतानि [4]भरणाच्छ्रीर्वायुर्भरतः स्मृतः । विद्युत्तु भारती प्रोक्ता एत एवाशरीरिणः । [5]व्यत्यासेनापि नाम स्यादेतेषां महतां सदा" इत्युभयनिरुक्ते[6] ॥ * ॥

तस्माद् भवन्तमनवद्यमनन्तपारं
सर्वज्ञमीश्वरमखण्डविकुण्ठधिष्ण्यम्[7] ।
[8]निर्वेदधीरहरहर्वृजिनाभितप्तो[9]
नारायणं नरसखं शरणं प्रपद्ये[10] ॥ १८ ॥

"विष्णोर्वायोरनन्तस्य त्रिभिरंशैर्नरः स्मृतः । सेन्द्रैश्चतुर्भिः पार्थस्तु द्वाभ्यां तु बललक्ष्मणौ" इत्यंशविवेके ॥ * ॥

---

१ प्र. पाठे श्लोकान्ते इतिशब्दो न पठ्यते । "अंशावतरणेषु" इतीयदेव पठ्यते । स प्रमाद इति स्फुटम् ।

२ ब्रह्माद्या इत्यतद्गुणसंविज्ञानेन रुद्राद्या एव मुख्यत उच्यन्ते न ब्रह्मपदयोग्या इत्यत्र श्रुतिमप्याह—अशरीरो वायुः ।

३ स्तनितत्वात् सभरं प्रतिपादितत्वादित्यर्थः ।

४ भूतानि भरतीति भरम् । वर्णविपर्ययेणाभ्रम् । अपो भूतानि बिभर्तीति वा । भूतानि भूतानाम् ।

५ विद्युदिति श्रीरपि क्वचिद् भवति । अभ्रमिति भारती च भवति । स्तनयित्नुरिति वायुरपि भवतीत्यादिव्यत्यासेन ।

६ "इत्यभयनिरुक्ते" इति प्र. पाठः प्रामादिकः ।

७ "—मकुण्ठविकुण्ठधिष्ण्यम्" इति प्र. पाठः ।

८ "निर्विण्णधी—" इति प्र. पाठः ।

९ "—रहमु ह वृजिनाभितप्तो—" इति च । "—रहरहर्व्रजिनाभितप्तो—" इति प्राचीनकोशपाठः । वृजिनं व्रजिनमिति च भवति । "व्रजिनं वृजिनं दुःखम्" इत्यभिधानम् । "अकिञ्चन न किञ्चन व्रजिनमस्त्यभस्मीभवत्" इति पण्डिताचार्यप्रयोगः ।

१० "अनवद्यं स्वस्मिन् प्रतीतसर्वदोषरहितम् । तत्र कारणमाह—नारायणमिति । सर्वदोषविरोधिसर्वकल्याणगुणाश्रयम् । अत एवान्तः ह्रासः पारं इयत्ता ताभ्यां रहितम् । स्तुतित्वादार्थिकपुनरुक्तिः सामान्येनोक्तस्य विशेषेणोक्तिश्च युज्यते । सर्वज्ञम्, अतिस्पष्टं स्वपरगतदोषविशेषज्ञानसम्पन्नम् । (अत्र स्वमिति उद्धवः । परेऽन्ये ज्ञानयोग्याः) । उपदेश्यस्योचितज्ञानप्रदानकुशलमिति भावः । तव सर्वाश्रयत्वादहमपि शरणं गत इत्याह—अखण्डेति । अखण्डं पूर्णं विकुण्ठं प्रतिबन्धरहितम् । तव परमप्रसादे सतीति भावः । धिष्ण्यमाश्रयं भवन्तं अहरहः वृजिनैः प्रारब्धैरभितप्तः पुनर्दुःखवान् । निर्वेदः दुःखदर्शनप्राप्तविरागः तेन युक्ता धीः विषयपरित्यागधीर्यस्य सः । अहमीश्वरं अनिष्टपरिहारे इष्टप्रदाने च समर्थं नरसखं शरणं प्रपद्ये । विष्णोर्वायोरंशयुक्तोऽनन्तो नरः" इति प्राचीनटीका । "अखण्डमपरिच्छिन्नं अविकुण्ठमविनाशि च धिष्ण्यं धाम यस्य स तथा । नञ् उभयत्र सम्बध्यते" इति विजयध्वजीयम् । "कालादिभिरकुण्ठो विकुण्ठलोको धिष्ण्यं स्थानं यस्य" इति श्रीधरस्वा-

प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः[1] ।
समुद्धरन्ति ह्यात्मानमात्मनैवाशुभाशयात् ॥ २९ ॥

लोके तत्त्वे च विचक्षणाः ।

पारोक्ष्येणैव तत्त्वं तु लोकं चापि विदन्ति ये । [2]तेऽपि सत्स्नेहनिर्मुक्तास्तमो यान्ति विनिश्चयात् । [3]आपरोक्ष्यान्नच ज्ञानं तेषामुत्पद्यते क्वचित्'' इति षाड्गुण्ये[4] ॥ * ॥

त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्यानन्दकारणम् ।
ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः[5] ॥ ३० ॥

केवलात्मनः शरीरमात्रपरिग्रहस्य ॥ * ॥

शश्वत्परार्थसर्वेहां[6] परार्थैकान्तसम्भवम्[7] ।
[8]साधुः शिक्षेत भूमेश्च अनुशिक्षं व्रतान्तरम्[9] ॥ ३८ ॥

म्यादयः । ''अकुण्ठेति सम्बुद्धिः'' इति सुदर्शनसूरिः । निर्वेदे धीर्मनो यस्येति वा । नरसखमर्जुनस्य सखायमिति वा । एतेन यथाऽर्जुने वात्सल्यातिशयाद् भवानात्मतत्वमाविश्चकार । तथा भक्तवत्सलो मामपि भगवाननुगृह्णात्विति ध्वनयति ।

१ ''लोके विविधजनेषु मध्ये लोकेषु तत्वेषु च विषये विचक्षणाः कुशलाः । स्वतन्त्रपरतन्त्रज्ञाने बन्धमोक्षकारणज्ञाने च कुशला भवादृशाः आत्मनैव सात्विकमनसैव । एवशब्देन प्राधान्यमुच्यते । अशुभाशयात् राजसतामसान्तःकरणभागात् आत्मानं स्वस्वरूपं समुद्धरन्ति विश्लिष्टं कुर्वन्ति । ईश्वरापरोक्षं सम्पादयन्तीति भावः । यद्यप्यसुराः क्वचिद् वैष्णवसिद्धान्तज्ञानोपेताः । अथापि श्रीहरिभक्त्यादिराहित्यात् विष्णौ वैष्णवसिद्धान्ते च विद्वेषात् तेषामनुद्धार इति भावः'' इति प्राचीनटीका ।

२ ''तेऽपि स्नेहविनिर्मुक्ता—'' इति क्वचित् । सति निर्दुष्टे भगवति सत्सु च वैष्णवेषु स्नेहविनिर्मुक्ताः । भगवति भागवतेषु च द्वेषयुक्ता इति यावत् । सति सत्वगुणे स्नेहोऽभिनिवेशः । तद्विनिर्मुक्ताः । तामसा इत्यर्थः ।

३ ''अपरोक्षान्नच'' इति क्वचित् । ४ ''सद्गुणे'' इति क्वचित् ।

५ ''केवलं आत्मा देहः यस्य सः । तस्य शरीरमात्रपरिग्रहस्य । स्पर्शः विषयभोगः । तद्रहितस्य । भवतः आत्मनि चेतने विद्यमानस्य आनन्दस्य कारणं ब्रूहि'' इति प्राचीनटीका ।

६ ''—सर्वेहः'' इत्यर्वाचीनाः । ७ ''—सम्भवः'' इति च ।

८ ''साधु शिक्षेत'' इति क्वचित् ।

९ ''साधुः शिक्षेत भूभृत्तो नगशिष्यः परात्मताम्'' इत्यर्वाचीनाः । ''शश्वत् परार्थां विष्णुतद्भक्तसेवोपयुक्तां सर्वेहां स्वस्य सर्वव्यापारं शिक्षेत नियमयेत् । ईश्वरसेवार्थमेव व्यापारं कुर्यादित्यर्थः । परार्थैकान्तसम्भवम् । एकान्तशब्द एवशब्दार्थः । परार्थमेव स्वस्य श्रेयःसम्भवं साधुः सात्विकजनः शिक्षेत । ईश्वरतद्भक्तसेवार्थमेव

परार्थैकान्तसम्भवम् । आत्मनो वृद्धिश्च परार्थ इति[1] ।

"सज्जनार्थेऽनुमन्येत ऐहिकीं वृद्धिमात्मनः । पारत्रिकीमैहिकीं च प्रीतये गुरुदेवयोः ।
[2]देवतानां च सर्वेषां स्वोत्तमानां च सर्वशः" इति च ॥ * ॥

[3]अन्तर्बहिश्च स्थिरजङ्गमेषु ब्रह्मात्मभावेन समन्वयेन ।
व्याप्त्याऽव्यवच्छेदमसङ्गमात्मनो [4]मुनिर्नभोवद् विततस्य भावयेत् ॥ ४२ ॥

"जीवान्तर्यामको विष्णुरात्मनामा समीरितः । तस्य तु ब्रह्मरूपत्वाद् बहिरन्तस्तथैव च । पश्येदाकाशवद् व्याप्तिमसङ्गत्वं च नित्यशः" इति तन्त्रभागवते ॥ * ॥

तेजोऽबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः ।
न स्पृश्यते नभस्तद्वत् कालसृष्टैर्गुणैः पुमान्[5] ॥ ४३ ॥

मम श्रेयः प्राप्तिर्नतु भोगार्थमिति नियमयेदिति बुद्ध्याऽहं भूमेः व्रतान्तरमनुशिक्षमभ्यस्तवान्" इति प्राचीनटीका । अथचैवं व्याख्येयम्—परार्थ एवाऽत्मनः सर्वाऽपि चेष्टा, परार्थ एवचाऽत्मनः समृद्धिरित्येतमर्थं साधुः शश्वत् सदा शिक्षेताभ्यसेत् । इत्येतद् व्रतान्तरं च भूमेः सकाशादहमनुशिक्षं अन्वशिक्षम् । तद्यथा भूमेः तृण[illegible]ादिजननप्रवृत्तिः सस्यादिसमृद्धिश्च परार्थैवेति । क्वचित् "अन्वशिक्षम्" इत्येव पाठः ।

१ "परार्थेति" इति प्र. पाठः ।

२ न केवलं मुख्यगुरुदेवयोः । किन्तु सर्वासां देवतानां सर्वेषां च स्वोत्तमानां गुरूणां सर्वप्रकारेणापि प्रीतये वृद्धिमनुमन्येत । ऐहिकीं द्रव्यादिरूपाम् । पारत्रिकीं ज्ञानभक्त्यादिरूपाम् ।

३ "अन्तर्हितश्च" इति प्र. पाठः ।

४ "मुनिर्नभस्त्वं विततस्य" इति च । अत्र प्राचीनटीका—"नभोवद् विततस्य व्याप्तस्य परमात्मनः स्थिरजङ्गमेषु वस्तुषु अन्तः आत्मभावेन अन्तर्यामित्वेन बहिः सर्वत्र ब्रह्मभावेन व्याप्तरूपेण जीवान्तर्यामिणि व्यवस्थिताणुत्वाभावं भावयेत् । अणुत्वव्यवस्था कुतो नास्तीति जिज्ञासायामाह—व्याप्त्येति । अणुरूपस्यापि व्याप्तिनिमित्तेन । बहिः सर्वत्र ब्रह्मभावेन व्याप्तेरिति । अणुत्वमपि महत्त्वसमानाधिकरणमिति भावः । ननु दृष्टान्तमात्रेण कथमलौकिकगुणावधारणमिति जिज्ञासायामाह—समन्वयेनेति । श्रुतिभिस्तथा प्रतिपादितत्वेन, तथा निर्णीतत्वेनेति भावः । उक्तं च–'अन्यभावव्यावृत्तेश्च' इति । अव्यवच्छेदं भावयेत् । असङ्गं गुणलेपाभावं च भावयेत्" इति । अन्तर्यामित्वेनान्तः, व्याप्तरूपेण बहिरित्यन्तर्बहिश्च व्याप्त्या परमात्मनोऽव्यवच्छेदमियत्ताभावं सङ्गाभावं च नभोवद् भावयेदिति स्वरसम् । योऽन्तर्यामिरूपेणान्तस्तस्यैव ब्रह्मभावेन बहिर्व्याप्त्या, यश्च बहिस्तस्यैवाऽत्मभावेनान्तर्व्याप्त्या चेति ।

५ "तेजोबन्नमयैरिति । अन्नं पृथिवी । एभिर्भावैः वस्तुभिः नभः न स्पृश्यते । शीतोष्णादिभिर्विकारि न भवति । वायुनेरितैः मेघाद्यैरशनिपातादिभिः न स्पृश्यते । यथा तथा तत्तत्कालसृष्टैः शीतोष्णादिभिः पुमान् देहस्थः परमपुरुषः न विक्रियते" इति प्राचीनटीका ।

"[1]गुणान् जीवस्य चेष्टव्यान् सिद्धान् विष्णोर्गुणांस्तथा। तत्तत् [2]दृष्ट्वा विचिन्वीत पृथगेव सुधीः सदा" इति लोकतत्त्वे ॥ * ॥

स्वच्छः प्रकृतितः स्निग्धो मधुरस्तीर्थवन्नृणाम्[3] ।
मुनिः पुनात्यपां[4] मित्रमीक्षोपस्पर्शकीर्तनैः[5] ॥ ४४ ॥

"मधुनाम सुखं [6]विद्यान्माधुर्यं सुखहेतुता[7]। सुखे रतिर्वा सम्प्रोक्ता शब्दतत्त्वविचक्षणैः" इति शब्दनिर्णये ॥ * ॥

तेजस्वी तपसा दीप्तो दुर्धर्षो दूरभाजनः[8] ।
सर्वभक्षोऽपि युक्तात्मा नाऽदत्ते पापमग्निवत्[9] ॥ ४५ ॥

दूरत एव भजनीयः।

"पराभवो धर्षणं[10] स्यादवज्ञानमथापि वा। न तत् सत्सु सदा[11] कुर्यात् सहाऽसा शयनं नच[12]" इति सद्गुणे ॥ * ॥

---

१ तथा च मूले पुमानिति परमपुरुष इति स्थितम्। पुनर्जीवपरतयाऽपि व्याख्यातुं शक्यमिति प्रमाणेन ध्वनयति—गुणान्। जीवस्य च एष्टव्यान् गुणान्, विष्णोश्च सिद्धान् गुणान् तत्तत् नभआदिकं दृष्ट्वा विचिन्वीत। कालसृष्टैः गुणैः परमपुरुषः न स्पृश्यत इत्यविकारित्वं विष्णोः सिद्धो धर्मः। पुंसः जीवस्य त्वेष्टव्यो धर्मः। नभोवत् कालसृष्टैर्गुणैरविकारिणा मयाऽपि भाव्यमिति।

२ "-दृष्टया" इति प्र. पाठः। ३ "माधुर्यस्तीर्थभूर्नृणाम्" इति प्र. पाठः।

४ "पुनात्यघान्मित्र-" इति क्वचित्। "पुनात्ययं मित्र-" इति पाठान्तरम्।

५ "तीर्थवत् गङ्गादिवत् मुनिः स्वच्छः रागादिकालुष्यरहितः स्यात्। स्निग्धः वैष्णवेषु स्नेहोपेतः स्यात्। प्रकृतितः स्वभावतः। लौकिकमुपकारमनपेक्ष्येत्यर्थः। मधुरः स्यात् वैष्णवानां सुखकारणं स्यात्। नृणां मित्रमनिष्टपरिहर्ता च स्यात्। स ईक्षोपस्पर्शादिभिः पुनातीति अपां गुणान् शिक्षितवान्" इति प्राचीनटीका।

६ "विन्द्यान्मा-" इति प्र. पाठः।

७ मधु राति ददातीति मधुरः सुखहेतुः। मधुनि सुखे रमते वा मधुरः सुखे रतः।

८ "दुर्धर्षोदरभाजनः" इत्यर्वाचीनाः।

९ "नाऽदत्ते मलमग्निवत्" इति च। अत्र प्राचीनटीका-"तपसा मननेन दीप्तः ज्ञानलक्षणप्रकाशविशेषवान्। तेजस्वी अज्ञाननिरसनशक्तिमान् भवेत्। दुर्धर्षः पराभवावज्ञानविषयो न स्यात्। न विद्यते धर्षणं यस्य सः। महत्सु तत्कर्ता न भवेत्। वशीकर्तुमशक्य इति वा। निस्पृहत्वेनेति भावः। दूरभाजनः दूरत एव भजनीयः। ऐश्वर्योपेतैः सहवासं न कुर्यादिति भावः। स सर्वभक्षः निषिद्धान्नभक्षणवानपि अग्निवत् पापं नाऽप्नोति। तत्कृतलेपरहितो भवति। तत्र निमित्तम्-युक्तात्मेति। परमात्मन्येव न्यस्तचित्तो यतोऽतो न दोष इति भावः" इति।

१० "धर्षणः" इति प्र. पाठः प्रामादिकः। ११ "सत्सु तदा" इति क्वचित्।

१२ "सहशय्याऽऽसनं नचेति षाड्गुण्ये" इति प्र. पाठः। सत्सु विषये सह आसा आसनं सह शय्या च न करणीया। दूरत एव ते भजनीयाः।

क्वचिच्छन्नः क्वचित् स्पष्ट उपास्यः श्रेय इच्छताम् ।
भुङ्क्ते सर्वत्र दातॄणां दहन् पूर्वोत्तराशुभम्[१] ॥ ४६ ॥

स्वमायया सृष्टमिदं सदसल्लक्षणं विभुः ।
प्रविष्ट ईयते तत्र[२] सरूपोऽग्निरिवैधसि ॥ ४७ ॥

"[३]जीवस्य च्छन्नतां शिक्षेत् प्रविष्टत्वं परात्मनः । तत्तद्गुणविडम्बं च वह्नेः सर्वमथापि च[४]" इति च[५] । "[६]अल्पदारौ यथाऽल्पोऽग्निरेवमल्पशरीरगः । दृश्यते परमात्माऽपि स्थूलः स्थूलशरीरगः" इति वैभवे ॥ * ॥

कालनद्योघवेगेन[७] भूतानां प्रभवाप्ययौ ।
नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथाऽर्चिषाम्[८] ॥ ४९ ॥

---

१ "अग्निवत् मुनिः क्वचित् असाधुषु च्छन्नः स्यात् । क्वचित् साधुषु स्पष्टः स्यात् । ज्ञानप्रकटनं कुर्यात् । ज्ञानलक्षणं: श्रेयः इच्छतां उपास्योऽपि स्यात् । ज्ञानदाता स्यात् । दातॄणां प्रागुत्तराशुभं दहन् सर्वत्र निषिद्धजातिष्वपि, प्रकारान्तरेण देहधारणस्यासम्भवे भुङ्क्ते । उक्तं च—'सर्वान्नानुमतिः प्राणात्यये तद्दर्शनात्' इति" इति प्राचीनटीका ।

२ "तत्तत्स्वरूपो–" इति प्र. पाठः । "तत्र स्वरूपो–" इति क्वचित् । "तत्तत्सरूपो–" इति विजयध्वजीये । स्वमायया परमात्माधीनप्रकृत्या सृष्टं सदसल्लक्षणं कार्यकारणात्मकं मूर्तामूर्तात्मकं वा इदं जगत् तत्तच्छक्तिप्रेरकरूपैः प्रविष्टः तत्र स्थूलसूक्ष्मेषु वस्तुषु सरूपः तत्तद्वस्तुसमानाकारपरिमाणयुक्तः ईयते । एधसि नानाविधदारुषु सरूपोऽग्निरिव । अणुत्वमहत्त्वादीनामन्यत्र विरुद्धगुणानामीश्वरे समावेश इति भावः" इति प्राचीनटीका ।

३ एतेन "क्वचिच्छन्नः" इत्याद्यः श्लोको जीवपर इत्युक्तम् । "प्रविष्टत्वं परमात्मनः" इत्यनेन "स्वमायया प्रविष्ट ईयते" इत्यादिर्द्वितीयः श्लोक ईश्वरपर इति । तत्तद्गुणविडम्बं स्थूलसूक्ष्मादितत्तद्वस्तुसमानाकारादिमत्त्वं च भगवतः सर्वं धर्मजातं वह्नेः सकाशात् शिक्षेत जानीयादिति ।

४ "सर्वमथापि वा" इति प्र· पाठः । क्वचित् कोशे च । तदनुसारेण सर्वं छन्नत्वादिकं सर्वं विष्णुविषयं वा इति पक्षान्तरकथनमिति व्याचक्षते । तदाऽऽद्यपद्यं जीवेश्वरोभयपरमिति ज्ञेयम् ।

५ प्र. पाठे "इति च" इति न पठ्यते ।

६ अल्पदारावल्पदारुणि । "दार्वा वा शिलयाऽपि वा" इति तन्त्रसारप्रयोगः ।

७ "कालेन ह्योघवेगेन" इति प्र. पाठः ।

८ "अग्नेः अर्चिषां प्रभवाप्ययाविव भूतानां चेतनानां आत्मनः देहस्य, कालाः क्षणादयः, त एव नदी, तस्या ओघः प्रवाहः, तस्य वेगेन प्राप्तौ प्रभवाप्ययौ नित्यावपि क्षणव्यवधानं बिना प्राप्यमाणावपि । अवयवोपचयापचयरूपौ प्रभवाप्ययौ, क्षणविशिष्टाकारस्य प्रभवाप्ययौ वा न दृश्येते । यथा बाल्यदेहापगमेन यौवनदेह-

"[1]अवयव्यवयवानां च गुणानां गुणिनस्तथा। शक्तिशक्तिमतोश्चैव[2] क्रियायास्तद्वत-स्तथा। स्वरुपांशांशिनोश्चैव नित्यामेदो जनार्दने। जीवस्वरूपेषु तथा तथैव प्रकृता-वपि। चिद्रूपयामतोऽनंशा अगुणा अक्रिया इति। हीना अवयवैश्चेति कथ्यन्ते ते ह्यमेदतः[3]। पृथग् गुणाद्यभावाच्च नित्यत्वादुभयोरपि। विष्णोरचिन्त्यशक्तेश्च सर्वं सम्भवति ध्रुवम्। क्रियादेरपि नित्यत्वं व्यक्तयव्यक्तिविशेषणम्। भावाभावविशे-षेण व्यवहाराश्च तादृशः। विशेषस्य विशिष्टस्याप्यमेदस्तद्वदेव तु। सर्वं चाचिन्त्य-शक्तित्वाद् युज्यते परमेश्वरे। तच्छक्त्यैव तु जीवेषु चिद्रूपप्रकृतावपि। [4]मेदामेदौ तदन्यत्र ह्युभयोरपि दर्शनात्। कार्यकारणयोश्चापि निमित्तं कारणं विना" इति ब्रह्मतर्के। "[5]आत्मनि चैवं विचित्राश्च हि", "सर्वोपेता च तद्दर्शनात्", "सर्व-धर्मोपपत्तेश्च", "स्वाभाविकी ज्ञानबलक्रिया च", "[6]यत्रा सप्त ऋषीन् पर एक-

---

प्राप्तौ न चिन्ता, एवं स्थविरदेहापगमेन देहान्तरप्राप्तावपि न चिन्ता कर्तव्येति भावः। विशेष्यरूपस्य देहस्य विशिष्टापगमेऽप्यवस्थानं भेदाभेदाद् युज्यते" इति प्राचीनटीका।

१ देहावयवानां धर्माणां वा नाशेऽपि धर्मिणो देहस्यावस्थानं भेदाभेदाद् युज्यत इति वक्तुं अवयवावय-विनां धर्मधर्मिणां च समग्रां व्यवस्थां तावद् विनेयानुजिघृक्षयाऽह—अवयव्यवयवानाम्।

२ "-मतोश्चाऽपि क्रिया-" इति क्वचित्।

३ "तेऽत्यमेदतः" इति प्र. पाठः। "तदमेदतः" इति क्वचित्।

४ एवं प्रसङ्गागतं प्रमेयजातमुक्त्वेदानीं शरीरादिषु जडेषु धर्मधर्मिणोर्भेदाभेद इति प्रकृतमाह—मेदामेदौ तदन्यत्र।

५ नन्विदं सर्वमकुड्ये चित्रितम्। सत्सु हि धर्मेषु ब्रह्म धर्मि स्यात्। धर्मवति च ब्रह्मणि धर्मधर्मिणोर्भेदामेद-वादः स्यात्। अत्र तु मूलमेवोच्छिन्नम्। निर्गुणं निराकारं निष्क्रियं च हि ब्रह्माऽमनन्ति। तत् कुतो नु धर्मादिभि-रभेदवार्ता शशस्य शृङ्गेनेव? मैवम्। सगुणं साकारं सक्रियं च हि ब्रह्माऽमनन्ति परावरविद इत्याह—आत्मनि चैवम्। द्वितीयस्य प्रथमे सूत्रम्। परमात्मनि विचित्राश्च शक्तयः सन्ति नान्येषामिति। सर्वोपेतेति च तत्रैव। न केवलं विचित्रशक्तिः, किन्तु सर्वशक्त्युपेता च सा परदेवता। अन्यत्र विरुद्धानामपि सर्वधर्माणां तस्मिन्नुपपत्ते-श्चेति च तत्रैव।

६ तथाहि दशममण्डले मन्त्रः— "विश्वकर्मा विमना आद् विहाया धाता विधाता परमोत सन्दृक्। तेषामि-ष्टानि समिषा मदन्ति यत्रा सप्तऋषीन् पर एकमाहुः"(१०-८२-२)इति। विश्वकर्मण आर्षं विश्वकर्मदैवत्यं सूक्त-म्। विश्वकर्मा सर्वकर्ता। विश्वतः कर्मेन्द्रियाणि यस्य वा। "विश्वतोबाहुरुत विश्वतस्पात्" इति पूर्ववचनात्। विमनाः विभूतमनाः सर्वज्ञः। विश्वग्गतानि मनांसि ज्ञानेन्द्रियाणि यस्येति वा। "विश्वतश्चक्षुः" इति पूर्ववच-नात्। मनसोऽतीतो वा। मनसाऽग्राह्यः। आदिति समुच्चयेऽवधारणे च। विहायाः सर्वगतः। विजिहीते। हा गतौ। विशिष्टाः मुक्ताः। तैः हायते गम्यते वा। मुक्तोपसृप्यः। विः सुपर्णो वा। तेन जिहीते गच्छति। "मुक्तिगा ये विशिष्टाः" इति, "वयः सुपर्णा इति वा" इति चर्म्भाष्ये। धाता सर्वाभीष्टदाता। धाञ् दाने। सर्वधर्ता वा। विधा-ता ज्ञानिनामुद्धर्ता पोष्टा च। ज्ञानदाता मोक्षदाता चेति यावत्। "पोषणं च ज्ञानमोक्षदानेन" इति तत्त्वदीपिका। उतेति च समुच्चयेऽवधारणे च। परमा सन्दृक् परमं ज्ञानम्। तद्रूपः। परमो द्रष्टा साक्षीति वा। यत्र विश्वकर्मणि

माहुः" इत्यादेश्च । "विना दोषान् श्रुतमद्धाऽवगम्यं[1] तथा स्मृतं परमे सत्यरूपे[2] ।
नैवासत्यं क्वचिदस्मिन् परेशे सर्वं युक्तं पूर्णशक्तेः सदैव" इति विश्वम्भरश्रुतिः[3] ।

[4]तस्मादेकस्मिन्नपि शरीरे भेदाभेदात् प्रभवाप्ययौ युज्येते । नच विरोधः । स्थूलसूक्ष्मत्ववत्[5] । आपेक्षिकत्वमत्रापि[6] युज्यते ॥ * ॥

[7]बुद्धिसंस्थेन भेदेन व्यक्तस्थ इव तद्गतः ।
लक्ष्यते स्थूलमतिभिरात्मा चाम्बुस्थितार्कवत्[8] ॥ ५१ ॥

विषये सप्तऋषीन् ज्ञानेन्द्रियाणि तदुपलक्षितसर्वेन्द्रियाणि एकमेकत्वेन अभेदेनाऽहुस्तद्विदः । कथम् ? परः परमात्मैवावयवोऽवयवी चेति । अथच सप्तऋषयः ज्ञानेन्द्रियाभिमानिनो देवाः । "ऋषयः पूर्वे जरितारो न भूना" इति वक्ष्यमाणत्वात् । यत्र यस्मिन् भगवति आश्रितान् ब्रह्मादिदेवान् परः परस्तात् मुक्तिप्राप्त्यनन्तरं देहेन्द्रियादिभिः एकमाहुः एकीभूतानाहुः । स्वरूपमेव हि तेषां शरीरम् । तेषां भगवदिन्द्रियाणाम्, तत्स्वरूपाणां भगवद्रूपाणां इष्टानि प्रियाणि जीवजातानि इषा इच्छामात्रेण सं मदन्ति मोदन्ते । ये भगत्प्रीतिपात्राणि तेषां भगवत उद्दिधीर्षैव भवति तारणी—एते मत्प्रियमाचरन्ति एनानुद्धरिष्यामीति । अथच तेषामिष्टानि इच्छामात्रेण तत्तल्लब्ध्वा रमन्ते । "स यदि पितृलोककामो भवति–" इत्यादेः । अथच यत्र विश्वकर्मणि अन्ततोऽर्पणबुद्ध्या, तेषामिन्द्रियाभिमानिनां ब्रह्मादीनां इषा अन्नादिना इष्टानि यजनानि मदन्ति मोदयन्ति यष्टारम् ।

१ श्रुतमध्यावगम्यम्" इति कोशेषु पठ्यते । न स्फुटोऽर्थः ।

२ "सत्यरूपम्" इति पाठान्तरम् । प्र. पाठोऽपि तथा । साधुगुणस्वरूपे परमात्मनि श्रुतं स्मृतं वा सर्वं गुणजातं अद्धा सम्यगवगम्यम् । ज्ञेयं ध्येयं च । विना दोषान् । आपततः श्रुता इव प्रतीयमाना अपि दोषा नैव ज्ञेयाः ।

३ "इति च विश्वम्भरश्रुतिः" इति प्र. पाठः ।

४ तस्मान्मूले 'आत्मनः' इत्यात्मशब्दः शरीरवचन इत्याह—तस्मात् ।

५ "स्थूलसूक्ष्मवत्" इति प्र. पाठः । नच भेदाभेदयोः सहानवस्थानं नाम विरोधः । स्थूलत्वं सूक्ष्मत्वं च यथा विरुद्धे अप्येकस्मिन्नधिकरणे भवतः तथा भेदाभेदावपि भवेताम् । ननु स्वतः स्थूलमपेक्ष्य सूक्ष्मः, सूक्ष्ममपेक्ष्य च स्थूल इत्यापेक्षिकत्वान्न विरोधः । तर्हि भेदाभेदयोरपि न विरोधः । आपेक्षिकत्वादेव । पृथगदर्शनापेक्षयाऽभेदः । खण्डितत्वापेक्षया भेद इतीति मूलाक्षरार्थः ।

६ "आपेक्षिकमत्रापि" इति प्र. पाठः प्रामादिकः । ७ "बुध्यते स्वेन भेदेन व्यक्तिस्थ इव" इत्यर्वाचीनाः।

८ "चावस्थितोऽर्कवत्" इति च । "अर्कबिम्बः अम्बुस्थितार्कवत् प्रतिबिम्बवत् स्थूलमतिभिः सूर्यस्वरूपानभिज्ञैः वर्तुलमण्डलमात्रत्वेन ज्ञायते । पुरुषरूपेण न ज्ञायते । एवं तद्गतः शरीरस्थः आत्मा अन्तर्यामी व्यक्तस्थ इव जीव इव बुद्धिसंस्थेन भेदेन आत्मभेदेन प्रकारान्तरेण लक्ष्यते । अयं परमात्मा न भवति; जीव इव कश्चिदिति ज्ञायते । सूक्ष्मबुद्धिसम्पन्नैः परमात्मत्वेनैवान्तर्यामी ज्ञातव्य इति भावः" इति प्राचीनटीका । "बुद्धिसंस्थेन बाह्यान्तःकरणगतमिथ्याज्ञानेन, व्यक्तं शरीरं तत्स्थो जीव इव सादृश्येन सुखी दुःखीति लक्ष्यते" इति विजयध्वजीयम्

“[1]बुद्धिसंस्थस्त्वात्मभेदो व्यक्तस्थो जीव उच्यते । तेनैव सह संस्थानात् परात्मा स्थूलबुद्धिभिः । [2]जीववल्लक्ष्यते विष्णुर्यथैवाम्बुस्थितार्कवत् । परमार्कः [3]पारिमाण्याद् वर्तुलत्वादिना तथा । अर्कस्वरूपानभिज्ञैः शिरःपाण्यादिवर्जितः[4] । अचेतनश्च कल्प्येत तत्तेजोमात्रदर्शिभिः । सूर्यदेहादिभिन्नं हि तेजोमण्डलमेव तु । दृश्यते स्थूलमतिभिरेवमेव जनार्दनः” इति प्रभासके ॥ * ॥

इत्येकादशस्कन्धे सप्तमोऽध्यायः

[अष्टमोऽध्यायः]

दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः ।
प्रलोभितः पतत्यन्धे तमस्यग्नौ पतङ्गवत्[5] ॥ ७ ॥

“[6]महतां वनिताकामः पतत्यन्धे तमस्यलम्[7] । अन्यत्र निरयं याति दुःखवान् स्याद् विपर्यये” इति धर्मसंहितायाम् ॥ * ॥

---

१ “बुद्धिसंस्थात्मभेदो वा” इति क्वचित् । बुद्धिसंस्थः बाह्यान्तःकरणस्थितः आत्मविषयकः भेदोऽन्यथाज्ञानम् । तेन अन्यथाज्ञानेनैव परात्मा जीववल्लक्ष्यते । भ्रमकारणमाह–व्यक्तस्थः । व्यक्ते शरीरे स्थितत्वाद् व्यक्तस्थो यो जीव उच्यते तेनैव सहस्थितेः परमात्मनः । एकस्थानस्थत्वमेव भ्रमकारणमिति । तथाच तेनैवेति तन्त्रेण आत्मभेदेनेति जीवेनेति चार्थद्वयवाचि ।

२ “जीववद् दृश्यते” इति क्वचित् ।

३ पारिमाण्यात् जलान्तःपरिमितपरिमाणविशेषवत्तयेत्यर्थः । “धर्मधर्म्यभेदादुभयी चोक्तिर्न विरुध्यते” इति तत्वदीपिका । अतः पारिमाण्यमिति परिमितत्वम् । परिमितं मानं यस्य स परिमाणः । तस्य भावः पारिमाण्यमिति वा ।

४ “शिरःपादादिवर्जितः” इति प्र. पाठः ।

५ “अग्नौ पतन्तं पतङ्गं दृष्ट्वा वनिताकामनाद्ययोग्यकर्म न कर्तव्यमिति बुद्धिं शिक्षेतेत्यर्थ.” इति प्राचीनटीका । देवनिर्मितां मायां मोहिनीं शक्तिम् । भावैर्विलासैः ।

६ ननु वनिताकामनामात्रं न दोषः ? दोष एव । यतोऽयोग्यां वनितां कामयन्नेव कामी कथ्यते । नहि स्वां कामिनीं कामयन् कामी कथ्यत इत्याह—महताम् । महतां वनितां कामयन् नीचस्तमसि पतति । समानानां वनितां कामयन् निरयं याति । नीचानां वनिताकामः महांस्तु केवलमैहिकदुःखवान् स्यात् । न निरयभाक् ।

७ “-कामस्तमस्यन्धे पतत्यलम्” इति क्वचित् ।

[1]योषिद्धिरण्याभरणाम्बरादिद्रव्येषु मायारचितेषु मूढः ।
प्रलोभितात्मा ह्युपभोगबुद्ध्या पतङ्गवन्नश्यति नष्टदृष्टिः[2] ॥ ८ ॥

"[3]मोहकारणभूतां तु मायेत्याहुर्मनीषिणः । अविद्यमानं मेत्युक्तं तज्ज्ञापयति यत् स्वयम् । [4]कुत्रचिज्ज्ञानरूपं सल्लाभरूपं च भण्यते । मयं प्राचुर्यमुद्दिष्टं माया स्यात् प्रचुरेत्यपि" इति तन्त्रनिरुक्ते । "[5]स्वतन्त्रं परमार्थाख्यं स्वतन्त्रैका हरेर्मतिः । सैव माया समुद्दिष्टा मुख्यतस्तत्स्वरूपका[6] । मतिमन्मतिभेदोऽपि न विष्णोः क्वचिदिष्यते । [7]पारमार्थ्येन नास्त्येव तदन्यत् तद्वशं यतः । अनाद्यनन्तकालेऽपि[8] विद्यमानमपि ध्रुवम् । अतो मायामयं चाऽऽहुः[9] सर्वं तद्वशगं यतः" इति मायावैभवे ॥

---

१ "योषित्सु तल्पशरणाम्बरादि–" इति, "योषित्सु तल्पाभरणाम्बरादि–" इति च पाठान्तरम् ।

२ "माया ईश्वरस्य मोहकारणशक्तिः । तया रचितेषु मोहकारणशक्तियुक्तेषु योषिदादिषु द्रव्येषु । उपभोगाः, भुज्यन्त इति भोगाः, महाभोज्यानि महासुखसाधनानीत्यर्थः । इति बुद्ध्या प्रलोभितः विषयासक्तिं प्राप्तः आत्मा मनो यस्य सः । पतङ्गवत् शलभवत् नष्टदृष्टिः श्रीहरिज्ञानरहितो भवति । नश्यति दुःखवान् भवति" इति प्राचीनटीका ।

३ देवमायामिति स्त्रीणां मायारूपत्वमुक्तम् । उत्तरत्र मायारचितेष्विति मायानिर्मितत्वम् । अथच हिरण्यादिद्रव्येषु मायारचितेष्विति भोग्यप्रपञ्चस्य मिथ्यात्वमुक्तमिति प्रतीयते । तदेतद् सर्वमेकयोक्त्या सम्यग् व्याख्याति– मोहकारणभूताम् । तथाच देवमाया देवनिर्मिता माया, पुरुषस्य मोहजननी शक्तिः । कथम् ? मा अविद्यमानं मृषाभूतं यापयति ज्ञापयतीति । स्त्रीसुखमेव परमपुरुषार्थ इत्यादिभ्रमं जनयतीति । तेन मां यथार्थविषयं ज्ञानं यापयत्यपगमयतीति च सूचितम् । तथाच मायारचितेष्वित्यत्रापि मायया मोहकारणभूतया शक्त्या सह रचितेषु, तादृशशक्त्युपेतेषु इत्येवार्थः ।

४ ननु दुरुक्तमेतन्निरुक्तम् । यतो मायेतीश्वरज्ञानमप्युच्यते । "माया वयुनं ज्ञानम्" इति हि नैरुक्ताः । तत्कथमीश्वरज्ञानमविद्यमानं ज्ञापयति ? सत्यम् । तत्रान्यैव निरुक्तिः क्रियत इत्याह–कुत्रचित् । मा ज्ञानम् आयो लाभः । तदुभयरूपत्वात् माया । सर्वशुभधर्मलाभः । पूर्णता वा । या प्रापण इति धातोः, या लाभ इति वा । मयं प्राचुर्यमिति निर्वचनान्तरम् । प्राधान्यमित्यर्थः । प्रचुरा प्रधाना सर्वोत्कृष्टा माया भगवदिच्छा ज्ञानं वा । तथाच मायारचितेष्विति अयोग्यानां मोहः स्यादिति भगवदिच्छारचितेष्वित्यप्यर्थः ।

५ इदानीं मायामात्रमिदं द्वैतमित्यादिश्रुतिरप्येतमेवार्थं वदतीति प्रसक्तमर्थमुपक्षिपति–स्वतन्त्रं परमार्थाख्यम् । अन्यथा तादृशश्रुतिबलादत्रापि मायिकत्वमेवार्थ इति शङ्का स्यात् । तथाच परमः सर्वाधिकः स्वतन्त्रोऽर्थः परमार्थः । परमार्थतः परमार्थापेक्षया भगवन्माया अद्वैतमेकमेव वस्तु । अन्यत् सर्वं मायामात्रं तन्निर्मितं तदधीनमिति ।

६ "–स्तत्स्वरूपिका" इति प्र. पाठः । क्वचित् कोशे च ।

७ "पारमार्थेन" इति प्र. पाठः प्रामादिकः ।

८ "–कालेषु" इति प्र. पाठः ।

९ "मायामयं प्राहुः" इति प्र. पाठः । क्वचित् कोशे च । मायामयं मायाप्रधानम् । तन्निर्मितं वा ।

"[1]स्वाधीनं सदिति प्रोक्तं पराधीनमसत् स्मृतम् । अविद्यमानमेतस्माज्जगदाहुर्विपश्चितः । अनाद्यनन्तकालेषु[2] विद्यमानमपि ध्रुवम् । [3]अस्वातन्त्र्यात्तु नास्त्येवेत्येवं वाच्यं जगत् सदा । [4]सदा वृत्तेर्विद्यमानमिति ब्रूयाद् यदि क्वचित् । तथाऽपि नाशवद्धीदं प्रवाहाद्ध्यस्य[5] नित्यता । अतो निवर्त्यमित्याहुः प्रपञ्चं ह्यस्ति[6] यद्यपि । विष्णोरिच्छावशत्वाच्च मायामात्रमिति स्फुटम् । परमार्थं त्वेकमेव स्वातन्त्र्याद् विष्णुमव्ययम् । यदि कल्पयतीदं स स एव विनिवर्तयेत् । विष्णुस्तस्मात् तद्वशत्वान्नास्तीति द्वैतमुच्यते[7] । स्वातन्त्र्येण हरौ ज्ञाते पराधीनत्वनिश्चयात् । इत्याहुरुपदेष्टार आचार्यास्तत्त्ववेदिनः । यथैव राजनि[8] ज्ञाते नान्योऽस्तीति स्फुटं वचः । स्वातन्त्र्यात् पारतन्त्र्याच्च तद्भृत्यादिषु सत्स्वपि । [9]यथैकच्छत्रवांश्चैव एकवीर इतीव च । तथैव सर्वप्राधान्याददद्वितीयो हरिः स्मृतः । एवं मुक्ता विजानन्ति सायुज्यं प्रापिता विभोः । अनन्तकालं पश्यन्तो जगदेतच्चराचरम् । तस्यैतस्य ह्यविज्ञानात् केवलभ्रान्तिरूपकम्[10] । जगदुक्त्वा तमो यान्ति[11] हीशितव्येशशापतः" इति च । "पुत्रा मे यदि विद्यन्ते मरिष्यन्त्येव ते ध्रुवम् । यदि राज्यं करोत्येष

---

१ अनयैव दिशा जगदविद्यमानमसदित्यादिशास्त्रव्यवहारोऽपि घटनीय इति प्रमाणेनैवाऽह—स्वाधीनम् ।

२ "–कालेऽपि" इति क्वचित् ।

३ अस्वातन्त्र्यादेव, स्वातन्त्र्येण नास्तीत्येव हेतोः क्वचिच्छास्त्रेषु नास्तीति वाच्यं भवति । नास्तीत्युच्यत इत्यर्थः । नतु सर्वथाऽविद्यमानत्वात् ।

४ ननु तर्हि क्वचित् सदिति क्वचिदसदिति किमिति द्वेधोच्यते? आह—सदा वृत्तेः । यद्यपि सदा विद्यमानत्वाज्जगतः जगद् सदिति क्वचिच्छास्त्रं ब्रूयात् वदति । तथाऽपि नाशवत्वाद्धेतोः निवर्त्यं चाविद्यमानं च वदति । अद्य विद्येत, श्वो न विद्येतेति । "श्वोऽभावाः" इति हि श्रुतिः । अत एव जगदश्वत्थ उच्यते । तर्हि कथं सदा वृत्तेर्विद्यमानमिति? प्रवाहात् । तथाच श्रुत्यर्थः—स्वातन्त्र्येणाविद्यमानोऽपि प्रपञ्चः यदि विद्येत, प्रवाहतः सदा वृत्तेर्विद्यत इत्युच्येत तथाऽपि निवर्तेत न संशयः । यतः अद्य विद्यमानोऽपि श्वो निवर्तेत । स्वरूपतोऽनित्यत्वादिति ।

५ "प्रवाहाद् यस्य नित्यता" इति क्वचित् ।

६ "प्रपञ्चो ह्यस्ति" इति प्र. पाठः । क्वचित् कोशे च । यद्यप्यस्ति प्रपञ्चः प्रवाहतः । अथापि स्वरूपतोऽनित्यत्वात् प्रपञ्चं निवर्त्यमाहुरिति । अतो मायामात्रमिति श्रुत्या मायया विष्णोरिच्छया मितं त्रातं च जगदिति तदिच्छाधीनत्वमेव जगत आहुर्ऋषयो वेदद्रष्टारः, नतु मिथ्यात्वम् । तथा अद्वैतं परमार्थत इति च विष्णुमेकमेव स्वातन्त्र्यात् परमार्थमाहुः । नतु द्वितीयस्याभावम् ।

७ "विकल्पो विनिवर्तेत कल्पितो यदि केनचित्" इति पूर्वार्धमुत्तरार्धानुगुणतया व्याख्याति- यदि कल्पयति । यदि प्रपञ्चः केनचित् स्वतन्त्रतत्वेन कल्पितः कृत इति निश्चितं तर्हि तत एव हेतोस्तेनैव तन्निवर्तत इति च स्फुटम् । अन्यस्य स्वतन्त्रस्याभावात् । अतः सृष्ट्यादौ तदधीनं तन्मायामात्रमिदमिति ।

८ स्वतन्त्रं द्वैतं द्वितीयं नास्तीत्युच्यते—"ज्ञाते द्वैतं न विद्यते" इति ।

९ "राजन् विज्ञाते" इति प्र. पाठः ।

१० अन्येऽपि च्छत्रिणो वीराश्च स्युः । अथापि प्राधान्यादेव एकच्छत्रवानेकवीर इत्युच्यते । तद्वदित्यर्थः ।

११ "केवलं भ्रान्तिरूपकम्" इति क्वचित् ।

१२ "यान्ति ईशितव्येश–" इति प्र. पाठः ।

नश्यत्येतदसंशयम्[१]" इति धृतराष्ट्रवचनवत्[२] "प्रपञ्चो यदि विद्येत" इत्यादि ।
"[३]यदिशब्दस्त्ववस्तुत्वे चास्वातन्त्र्ये च संशये । अवस्तुशब्दश्चाशक्ते ह्यल्पशक्तौ च कीर्त्यते" इति शब्दनिर्णये ॥ * ॥

सुहृत् प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम् ।
तं विक्रीयाऽत्मनैवाहं रमेऽनेन यथा रमा[४] ॥ ३४ ॥

"भगवद्भार्यतायोग्याः[५] काश्चिदप्सरसः स्त्रियः । रमावेशात् कदाचित् स्युस्तास्वेका पिङ्गलाऽभवत् । तदन्यासां महान्[६] दोषो भगद्भार्यतास्मृतौ" इति स्वाभाव्ये ॥ ॥ * ॥

इत्येकादशस्कन्धेऽष्टमोऽध्यायः

[नवमोऽध्यायः]

[७]वासे बहूनां कलहो भवेद् वार्ता द्वयोरपि ।
एक एव चरेत् तस्मात् कुमार्या इव कङ्कणः ॥ १० ॥

"असज्जनैस्तु संवासो न कर्तव्यः कदाचन[८] । यावद्यावच्च बहुभिः सज्जनैः सह मुक्तिदः" इति सद्गुणे[९] ॥ * ॥

---

१ "नश्यत्येव न संशयः" इति क्वचित् ।
२ "धृतराष्ट्रवचनात्" इति प्र. पाठः प्रामादिकः ।
३ यदि शशशृङ्गमस्ति दृश्येतेत्यवस्तुत्वे । प्रपञ्चो यदि विद्येतेत्यस्वातन्त्र्ये । यदि धनमस्ति दीयतामिति संशये ।
४ "नाथः स्वामी अयं विष्णुः सुहृत् अनिमित्तोपकारी । प्रेष्ठतमः सर्वस्मात् प्रियतमः । स्वस्वचेतनस्वरूपादिप्रदत्वात् शरीरिणामात्मा च विषयभोगादिकर्ता च यस्तं आत्मना चेतनस्वरूपेण विक्रीय क्रयेण लब्ध्वा, अनेन लब्धेन प्रियतमेन सहाहं रमा यथा तथा रमे । पिङ्गलायाः अप्सरस्त्वेन परमात्माङ्गसङ्गयोग्यत्वादियं बुद्धिर्युक्ता" इति प्राचीनटीका ।
५ भरणीयतायोग्याः भार्यात्वयोग्या इति यावत् ।
६ "महद्दोषः" इति क्वचित् । "महादोषः" इति च ।
७ "वासो बहूनां कलहो-" इति क्वचित् । "वासो बहूनां कलहे" इति यादवेन्द्रतीर्थाभिमतः पाठः । तथाहि तद्व्याख्यानम्— "वासः दुर्जनैः सहसंवासः कलहे निमित्तम्" इति ।
८ "कथञ्चन" इति प्रं. पाठः ।
९ "षाड्गुण्ये" इति च ।

यस्मिन् मनो लब्धपदं यदेत-
च्छनैःशनैर्मुञ्चति कर्मरेणून् ।
सत्त्वेन वृद्धेन रजस्तमश्च
विधूय निर्वाणमुपैत्यनिन्धनम्[१] ॥ १२ ॥

"बाह्यं मनो विलीनं स्यान्मुक्तौ चिन्मात्रकं मनः । तेनैवानुभवेत् सर्वं स्वात्माभिन्नेन मुक्तिगः[२]" इति मुक्तितत्वे ॥ * ॥

[३]एको नारायणो देवः पूर्वसृष्टं स्वमायया ।
संहृत्य कालकलया कल्पान्त इदमीश्वरः ॥ १६ ॥

एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः ।
कालेनाऽत्मानुभावेन साम्यं नीतासु शक्तिषु ।
सत्त्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः ॥ १७ ॥

"[४]कालप्रकृतिजीवादौ लयेऽसत्यप्रवर्तनात् । तन्निमित्तस्य कार्यस्य विष्णुरेक इतीर्यते। स हि कालादिकं सर्वं वर्तयत्यमितद्युतिः" इति तत्त्वलये । "प्रकृतिश्च गुणाश्चैव

---

१ "यस्मिन् परमात्मनि मनः लब्धपदं लब्धास्पदं सत्, तत्र सक्तमित्यर्थः । कर्मरेणून् ज्ञानप्रतिबन्धककर्माणि शनैःशनैः ध्यानाभिवृद्धिक्रमेण मुञ्चति नाशयति। ततः तन्मनः वृद्धेन सत्वभागेन रजस्तमो भागौ स्वसंस्थौ विधूय निर्वाणं स्थूलपरिमाणनाशमुपैति । तदा चिन्मनःप्राधन्येन प्रवर्तत इति भावः। अनिन्धनं शुष्ककाष्ठवर्जितं तेज इव लीनं भवतीत्यर्थः" इति प्राचीनटीका । "बाह्यमचिन्मनो निर्वाणं नाशमुपैति। कथमिव? अनिन्धनं ज्योतिरिवेति लुप्तोपमम्" इति विजयध्वजीयम् । २ "मुक्तिदः" इति प्र. पाठः प्रामादिकः ।

३ "नारायणः सम्पूर्णसर्वकल्याणगुणः, देवः प्रकाशमानः, एकः सहायरहित एव स्वमायया स्वाधीनप्रकृतिप्राकृतैरित्यर्थः । पूर्वं सृष्टं ब्रह्माण्डतदन्तर्गतपाताळादिलोकगतासुरादिसमूहं कालाख्यस्वांशेन ब्रह्मकल्पान्ते संहृत्य, देवानां प्रकृतिबन्धपरिहारायेति भावः । ईश्वरः सर्वसामर्थ्यसम्पन्नः, अद्वितीयः गुणेन स्वसमरहितः आत्मानुभावेन स्वसामर्थ्येन कालेन दुर्गादिरूपेण शक्तिषु ईश्वरशक्तिविषयेषु सत्वादिषु साम्यं नीतासु, गुणानां गुणान्तरानुप्रवेशेन साम्यमित्यर्थः । एक एवाभूत् सर्वकार्यरहितोऽभूत् । आत्मभिः स्वमूर्तिभिः, तत्तद्वेदनियामकमहालक्ष्मीमूर्तिषु सन्निहितासु, आ यथेष्टं रमत इत्यात्मारामः । अखिलानां मुक्तामुक्तानां आश्रयः उदरे पोषकः । आदिपुरुषः सर्वकार्यापेक्षया प्रथमं विद्यमानः पूर्णसार्वज्ञ्यादिगुणः । प्रधानस्य सरस्वत्याः पुरुषस्य विरिञ्चस्य ईश्वरः सृष्ट्यादिकरणसमर्थः" इति प्राचीनटीका ।

४ प्रळयकाले कालादौ स्वतः सत्यपि, तन्निमित्तस्य कार्यस्याप्रवर्तनादसति, असत्त्वेन विवक्षिते सति विष्णुरेक इति युक्तं वक्तुम् ।

शक्यत्वाच्छक्तयः स्मृताः । विष्णोः स्वरूपभूता तु शकनाच्छक्तिरुच्यते" इति शक्तितत्त्वे[1] ॥ * ॥

यत्रयत्र मनो देही धारयेत् सकलं धिया ।
स्नेहाद् द्वेषाद् भयाद् वाऽपि याति तत्तत्सरूपताम्[2] ॥ २२ ॥

कीटः पेशस्कृतं ध्यायन् कुड्यं येन[3] प्रवेशितः ।
याति तत्साम्यतां[4] राजन् पूर्वरूपं स सन्त्यजन्[5] ॥ २३ ॥

"भयादपि हरिं भक्त्या चिन्तयंस्तत्सरूपताम्[6] । पेशस्कारिवदायाति[7] द्विषन् द्वेषसरूपताम्[8] । सुखरूपस्य हि द्वेषो दुःखरूप इतीर्यते[9] । तस्माद् दुःखं सदा याति द्वेषवान् पुरुषोत्तमे । नृसिंहद्वेषतो दुःखं रक्षोरूपेण रावणः । अगाच्च रामविद्वेषाच्छिशुपालस्तथैवच । ततो भक्त्या परं यातो द्वेषरूपे त्वधोगते[10] । तस्मात् सर्वगुणोद्रेकिविद्वेषात् सर्वदोषवान् । भवेदिति सरूपत्वं द्वेषादेः पुरुषस्य हि" इति भागवततन्त्रे ।

---

१ "शक्तिविवेके" इति प्र. पाठः ।

२ "तत्तत्स्वरूपताम्" इति पाठान्तरम् । "यो देही जीवः यत्र यस्मिन्, सकलं व्यासङ्गरहितं यथा भवति तथा, मनः भयात्, भयेन युक्तादित्यर्थः, स्नेहात् धारयेत् सः तत्सरूपतां ध्येयसमानरूपं भयधिया ध्यानेन याति । द्वेषादसुरः मनो धारयेत् स तत्सरूपतां द्वेषलक्षणदोषरूपतां तया धिया याति । अत एतन्नियमभङ्गो नास्तीति भावः" इति प्राचीनटीका । "तत्तत्स्वरूपताम् । स्वरूपमसाधारणधर्मः । तत्तुल्यतां यातीत्यर्थः" इति सुदर्शनसूरिः ।

३ "कुड्यां तेन" इति प्र. पाठः । "कुड्यं तेन" इति पाठान्तरम् । येन पेशस्कृता कुड्यं कुड्यविवरं प्रवेशितः तं पेशस्कृतं मृदुपिण्डकर्तारं कीटः ध्यायन् प्रतिदिनं आहारप्रदानप्राप्तस्नेहादिति भावः" इति च प्राचीनटीका ।

४ "तत्सात्मताम्" इति प्र. पाठः । "तत्समताम्" इति क्वचित् । "साम्यतामिति पाठे त्वार्षता" इति श्रीधरस्वाम्यादयः । "तेन साम्यं यस्य तस्य भावस्तत्ता ताम्" इति वीरराघवः ।

५ "पूर्वरूपमसन्त्यजन्" इति प्र. पाठः । "पूर्वरूपमपि त्यजन्" इति क्वचित् ।

६ "–स्तत्स्वरूपताम्" इति क्वचित् । उभयथाऽपि साम्यमित्यर्थः ।

७ पेशस्कारिवत् पेशस्कारिण इव सरूपतां कीटः ।

८ "द्वेषिसरूपताम्" इति क्वचित् ।

९ "उदीर्यते" इति क्वचित् ।

१० "द्वेषरूपस्त्वधोगतिम्" इति प्र. पाठः । "द्वेषिरूपे त्वधोगते" इति क्वचित् । ततः द्वेषरूपे अ[illegible]जीवे अन्धं तमो गते सति सज्जीवः परं ब्रह्म यातः प्राप्त इति ।

"तं यथायथोपासते तदेव भवति[1]", "तं भूतिरिति देवा उपासाञ्चक्रिरे ते [2]बभूवुस्तस्माद्धाप्येतर्हि[3] सुप्तो भूर्भूरित्येव प्रश्वसित्यभूतिरित्यसुरास्ते[4] हं पराबभूवुः" इत्यादि च ॥ * ॥

"सत्यप्यत्यल्पविद्वेषे भोजनं दास्यतीति तु । स्नेहबाहुल्यतः कीटः पेशस्कारिसमो भवेत् । द्वेषे सर्वात्मना नष्टे स्नेहे चैव विवर्धति । सरूपता तदैव स्यात् कीटस्यैवं[5] हरेरपि । अत्यल्पोऽपि हरेर्द्वेषः स्नेहस्यानुदयङ्करः । सोऽयं विशेषोऽत्रान्यश्च[6] फलदाता हि केशवः[7] । नहि पेशस्कृतः किञ्चित् फलदातृत्वमिष्यते । स्वातन्त्र्याद् विद्विषां चैव [8]केशवो न सुखप्रदः" इति स्वातन्त्र्यविवेके ॥ * ॥

देहो गुरुर्मम विरक्तिविवेकहेतु-
बिभ्रत् स्म सत्त्वनिधनं सततात्युदर्कम्[9] ।
तत्त्वान्यनेन विमृशामि यथा तथाऽपि
पारक्यमित्यवसितो विचराम्यसङ्गः ॥ २५ ॥

सत्त्वनिधनः सत्त्वं निधीयतेऽस्मिन् परमेश्वर इति । सततमतिशयेनोच्चैररं कंरूप[10] इति सततात्युदर्को भगवान् ॥ * ॥

---

१ तं यथा येन प्रकारेणोपास्ते तदेव तद्रूप एव भवति । तस्मात् द्विषन् द्वेषरूपो भवति । सुखरूप इति स्निह्यन् सुखरूपो भवति ।

२ भूतिमन्तो बभूवुरित्यर्थः ।

३ "-स्तस्माद्धाऽप्येतर्हि" इति पाठान्तरम् ।

४ "-त्यभूरित्यसुरास्ते" इति प्र. पाठः प्रामादिकः ।

५ "कीटमोक्षो हरे-"(?) इति क्वचित् ।

६ "विशेषो नान्यस्य" इति प्र. पाठः । "विशेषोऽत्रान्यः स्यात्" इति क्वचित् । अत्र हरौ अन्यः पेशस्कृदादिष्वदृष्टः कश्चन विशेषोऽप्यस्ति । कोऽयम्? आह—फलदाता हि केशवः ।

७ "-दाता च केशवः" इति प्र. पाठः ।

८ "विद्विषाणाय केशवो-" इति पाठान्तरं क्वचित् ।

९ "सततात्र्युदर्कम्" इत्यर्वाचीनाः ।

१० "-चैरर्करूप-" इति प्र. पाठः । अयमपि पाठो यादवेन्द्रतीर्थसम्मत इति भाति । तथाहि तद्व्याख्यानम्—"सत्त्वं बलज्ञानसमाहारः निधीयतेऽस्मिन् परमेश्वर इति सत्त्वनिधनः बलज्ञानसमाहारसम्पन्न इत्यर्थः । सततं सर्वदा अतिशयेनोच्चैः ऋक्स्वरः ज्ञानम्, कं सुखं च, एतत्स्वरूपम् । अप्रतिभटप्रकाशरूपं वा । अरं सान्द्रं कमिति वा भगवन्तं बिभ्रद् दधानः देहः । पूर्णस्यापि मुक्तब्रह्मानन्दस्य सातिशयत्वमस्ति । पूर्णस्यापीन्दिरानन्दस्य सातिशयत्वमस्ति । तद्वत् सातिशयत्वशङ्कापरिहाराय अति उत् इति विशेषणम् । पराधीनत्वशङ्कापरिहाराय सततमिति । विवेकः विषयाणां दुःखलक्षणसदोषत्वज्ञानम् । विरक्तिहेतुत्वं च विषयानुभवप्राप्तदेहालस्यानुभवात् । तस्माद् गुरुः । स्वतन्त्रपरतन्त्रतत्वानि यथा यथार्थतः अनेन देहेन विमृशामि मननेन निश्चिनोमि । अतश्च गुरुः । देहस्य तत्वज्ञानहेतुत्वादेतत्संरक्षणे यत्नं कुतो न करोषीत्यत आह—तथाऽपि । तत्वज्ञानहेतुत्वेऽपि पारक्यं कर्मप्रेरकपरमात्माधीनं शरीरं ननु मदिच्छाधीनमित्यवसितः निश्चयवान् असङ्गः देहादिष्वभिमानरहितः सन् विच-

83

जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्
पुष्णाति यः[1] प्रियचिकीर्षया[2] वितन्वन् ।
सोऽन्ते सुकृच्छ्रमवरुद्धमनाः स्वदेहं
[3]सृष्ट्वा स्वबीजमिव सीदति वृक्षधर्मा[4] ॥ २६ ॥

[5]बीजार्थमारोहणादिकं कुर्वन्निति ॥ * ॥

नह्येकस्माद् गुरोर्ज्ञानं सुस्थितं[6] स्यात् सुपुष्कलम् ।
ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः[7] ॥ ३१ ॥

रामि लोकविलक्षणश्चरामि" इति । तथाचार्कशब्दस्य त्रयोऽर्थाः कथिता भवन्ति । ऋ गताविति धातोः सुखवाचिना कशब्देन च ज्ञानसुखरूप इति । अर्च्यत्वादर्कः सूर्यवत्प्रकाशरूप इति । अरं अलं सम्यक् सान्द्रं कं सुखं तद्रूप इति । ऋग्भाष्येऽप्यरं अलं कमित्येव व्याख्यातम्—"शंसन्त्यृग्वेदिनोऽतिकम्" इति ।

१ "यत्प्रिय–" इति प्र. पाठः ।

२ 'चिकीर्षया' इति विश्लेषेण छन्दःपूरणं वैदिकसम्प्रदायसिद्धम् । क्वचित्तु "–चिकीर्षुतया" इति पाठान्तरम् । "–चिकीर्षतया" इति च । तदा तु प्रियस्य चिकीर्षा यस्य स प्रियचिकीर्षः । तस्य भावः प्रियचिकीर्षता । तयेत्यर्थः ।

३ "सृष्ट्वाऽस्य बीजमवसीदति" इति प्र. पाठः ।

४ अत्र प्राचीनटीका—"यः ज्ञानविरागाभ्यां रहितश्चेतनः प्रियचिकीर्षया जायादीनां सन्तोषकरणेच्छया अवरुद्धं प्रतिबद्धं मनो यस्य सः । परमात्मनि निवृत्तमनाः सन् सुकृच्छ्रं अतिकष्टं पापं कर्म वितन्वन्, धनधान्यलाभार्थमिति भावः । जायादीन् पुष्णाति अन्नवस्त्रादिदानेन यथासम्भवं रक्षति स वृक्षधर्मा वृक्षसदृशः । बीजमिवेत्यल्पार्थम् । स्वस्य बीजमल्पाकारसम्पादकं स्वदेहं सृष्ट्वा कर्मभिरुत्तरदेहं सम्पाद्य, बीजकार्यं स्वर्गनरकाद्यारोहणादिकं कुर्वन्, अथवा स्वस्य बीजं विकारबीजं दुःखं सृष्ट्वा, बीजार्थं दुःखार्थमारोहणादि कुर्वन्, आरोहणं देहसम्बन्धमिति वा । अन्तेऽवसीदति नित्यसौख्येन रहितो भवति" इति ।

५ कुतो वृक्षधर्मा? आह—बीजार्थमरोहणादिकं कुर्वन्निति । इतिशब्दो हेत्वर्थः । इति हेतोर्वृक्षधर्मा । तद्यथोप्तं बीजं वृक्षो भवति । वर्धमानश्चोर्ध्वमूर्ध्वमारोहति । पुनर्बीजं निष्पाद्य निपतति । अन्ततो बीजमात्रमवशिष्यते । ततश्च पुनर्वृक्षः पुनर्बीजमिति । तथा जीवोऽपि पूर्वशरीरकर्मणोप्तं नवं शरीरं प्राप्य वर्धते । पुण्यादिकर्मणा स्वर्गमारोहति । क्षीणे पुण्ये पुनरवरोहति । पुनर्बीजमिव शरीरं प्रविश्य वर्धते । एवंच वृक्षस्यारोहो पुनर्बीजभावायैवान्ततो यथा तथाऽस्य स्वर्गाद्यारोहसंरम्भोऽपि पुनरधःपाताय बीजशरीरप्राप्तये च भवतीति वृक्षधर्मा । "बीजार्थमारोपणादिकम्" इति केचित् पठन्ति ।

६ "सुस्थिरम्" इति पाठान्तरम् ।

७ "एकस्मादिति । एकशब्दः अन्यवाची । आदिगुरुचतुर्मुखेन तु पुष्कलं ज्ञानं भवतीति भावः । बहुगुरूपदेशोऽन्येषामावश्यक इत्यत्र साधकमाह— बहुधेति । ऋषिभिः बहुधा विविधगुणशक्त्यादिविशिष्टतया गीयते । बहवो बहु जानन्ति । लौकिकः सर्वं न जानातीति भावः । अद्वितीयं ब्रह्मत्वेन द्वितीयरहितम्" इति प्राचीनटीका ।

"एकमात्तु गुरोर्ज्ञानं जायते नैव कस्यचित् । एकस्मादेव जायेत योग्याद् ब्रह्मपदस्य तु । [1]स्वयं तूपदिशन् ज्ञानं [2]वैरिञ्चपदयोगिनि । अनुग्रहात् तेन चापि ज्ञानं दत्वा विमुक्तिदः । [3]ज्ञानं प्राप्य बहुभ्योऽपि नर्ते मुक्तिश्चतुर्मुखात् । ज्ञानमप्राप्य [4]तेषां तु ज्ञानदो विष्णुरेव हि" इति गुरुविवेके ॥ * ॥

इत्येकादशस्कन्धे नवमोऽध्यायः

[दशमोऽध्यायः]

सुप्तस्य विषयालोको ध्यायतो वा मनोरथः ।
नानात्मकत्वाद् विफलस्तथाऽभेदः स्वधीगुणैः [5] ॥ ३ ॥

बुद्धिगुणैः कामक्रोधादिभिरभेदो विफलः ।

"वस्तुस्थितेरन्यथात्वं नानात्वमिति कीर्तितम् । ज्ञानस्यैवं तु[6] नानात्वात् न स्यात् कामाद्यहम्मतिः । कामादिषु स्वधीस्थेषु केवलं जीवसंस्थितिः । इति बुद्धिरभेदः

१ "स्वयं चोपदिशेत्" इति प्र. पाठः । "स्वयं चोपदिशन्" इति क्वचित् ।

२ "वैरिञ्चिपद–" इति प्र. पाठो न स्वरसः । वैरिञ्चपदयोग्ये ऋजुगणे अनुग्रहात् अनुग्रहबुद्ध्या तस्मै स्वयं ज्ञानमुपदिशन् भगवान् तत्र सन्निहितः तेन द्वारभूतेन अन्येषामपि सज्जीवानां ज्ञानं दत्वा विमुक्तिदः । अतो विष्णुरेव मुख्यतः "अज्ञानां ज्ञानदः" इत्युच्यते ।

३ बहुभ्यो गुरुभ्यो ज्ञानं प्राप्यापि चतुर्मुखादृते न मुक्तिः । तदेव स्फुटं विव्रियते—चतुर्मुखाज्ज्ञानमप्राप्य । तथाच चतुर्मुखादृते न मुक्तिरिति चतुर्मुखेन साकमेव मुक्तिरिति नार्थः । किन्तु चतुर्मुखोपदेशादृते न मुक्तिरितीति स्ववचनं व्याख्यातं भवति । अथवा बहुभ्यो ज्ञानं प्राप्यापि ऋते ज्ञानस्वरूपे भगवति विषये चतुर्मुखात् ज्ञानमप्राप्य न मुक्तिरित्यर्थः । "ऋतं सत्यं परं ब्रह्म" इति श्रुतिः ।

४ तेषां विरिञ्चपदयोग्यानाम् ।

५ "–स्तथा भेदात्मधीर्गुणैः" इत्यर्वाचीनाः । अत्र प्राचीनटीका—"स्वाधीना धीः बुद्धिलक्षणं करणम् । तत्र भवैः गुणैः विषयकामक्रोधादिभिः अभेदः केवलं चेतनधर्मत्वबुद्धिः विफलः । कुत इत्यत आह—नानात्मकत्वादिति । वस्तुस्थित्यपेक्षया अन्यथाज्ञानरूपत्वादित्यर्थः । विफलत्वे दृष्टान्तमाह—सुप्तस्येति । विषयालोकः स्वाप्नविषयाणां जाग्रद्विषयाभेदज्ञानं यथा विफलम्, मनोरथः मानसवासनारूपार्थानुसन्धानं यथा विफल तथा भ्रमः" इति ।

६ "ज्ञानस्यैव तु" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

स्यात् स न कार्यः कथञ्चन । अदुष्टकामश्चिद्रूपो जीवाभिन्नः स्वरूपतः । दुष्टकामो मनोधर्मस्तस्माद्धेयः[१] सदैव तु[२]" इति विवेके ॥ * ॥

निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत् ।
जिज्ञासायां सम्प्रवृत्तो नाऽद्रियेत् कर्मचोदनाम्[३] ॥ ४ ॥

"निष्कामं ज्ञानपूर्वं च निवृत्तमिति[४] चोच्यते । निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनम्" इति भारते ॥ * ॥

यमानभीक्ष्णं सेवेत नियमान् मत्परः क्वचित् ।
मदभिज्ञं गुरुं शान्तमुपासीत मदात्मकम्[५] ॥ ५ ॥

"मामेव नित्यं ध्यायेद् यो मदात्मा सम्प्रकीर्तितः[६]" इति च ॥ * ॥

निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान् गुणान् ।
[७]अनुप्रविष्ट आधत्ते एवं देहगुणान् परः[८] ॥ ६ ॥

---

१ "-तस्माद् ध्येयः" इति प्र. पाठः प्रमाद एव ।

२ "सदैव सः" इति प्र. पाठः ।

३ "तस्मात् निवृत्तं कर्म प्रीतिफलकं सेवेत । प्रवृत्तं स्वर्गादिफलापेक्षं त्यजेत् । जिज्ञासायां वेदतात्पर्यविषयार्थनिश्चये सम्प्रवृत्तः वेदार्थमननवान् कर्मचोदनां कर्मफलप्रतिपादकवचनं नाऽद्रियेत् । तत्र निष्ठां न कुर्यात् । किन्तु ब्रह्मप्रतिपादकः सर्वोऽपि वेदः ब्रह्मज्ञानोपयुक्त इति जानीयादित्यर्थः" इति प्राचीनटीका ।

४ "-पूर्वं तु निवृत्तमिह" इति प्र. पाठः ।

५ "अभीक्ष्णं सदा यमान् सेवेत । क्वचित् तत्तत्काले नियमान् सेवेत । यमा अहिंसादयः । नियमाः शौचादयः । वक्ष्यन्ते चोत्तरत्र । श्रुतवेदार्थोऽपि पुनः श्रवणे प्रवर्तेतेत्याह–मदभिज्ञमिति । मयि सम्यग्ज्ञानेन सम्पन्नम् । शान्तं विषयकामादिशान्त्युपेतम् । मदात्मकं मद्ध्यानपरं गुरुमुपासीत" इति प्राचीनटीका । मयि आत्मा मनो यस्य स मदात्मा ।

६ "स प्रकीर्तितः" इति प्र. पाठः ।

७ 'अन्तःप्रविष्ट-" इति प्र. पाठः ।

८ "अनुप्रविष्टः देहस्थितः जीवः, निरोधो मरणम्, अणुत्वं बृहत्त्वम्, एतानि, नानात्वं नरतिर्यगादिजातिम्, तत्कृतान् गुणान् हेयत्वोपादेयत्वादीन् आधत्ते प्राप्नोति । विविधदेहगुणैर्विविधविकारवान् भवति, ईश्वरेच्छयाऽभिमानाच्च । एवं परः परमात्माऽपि देहगुणानाधत्त इति यद्यपि प्रतीयते । अथापि जीवपरमात्मनोर्जिज्ञासा युज्यते । विशिष्टाकाराद् भिन्नत्वात् । अथवा तत्कृतान् दारुप्राप्तान् गुणानग्निर्यथाऽऽधत्ते एवं परोऽपि आधत्त इव प्रतीयत इत्यर्थः" इति प्राचीनटीका ।

'योऽसौ गुणैर्विरचितो देहोऽयं पुरुषस्य हि ।
संसारस्तन्निबन्धोऽयं पुंसोऽविद्याऽस्थितात्मनः'[2] ॥ १० ॥

"अदेहधर्मवान् विष्णुर्देहधर्मवदीयते[3] । जीवस्त्वदेहधर्माऽपि परतो देहधर्मवान् । स्वयं त्वनभिमानः सन्नज्ञानामेव दर्शयेत् । विष्णुर्जीवस्त्वभीमानी यावन्मुक्तिपदं[4] व्रजेत्" इति विष्णुसंहितायाम् ॥ * ॥

तस्माज्जिज्ञासयाऽऽत्मानमात्मस्थं केवलं परम् ।
सङ्गम्य निरसेदस्य वस्तुबुद्धिं[5] यथाक्रमम् ॥ ११ ॥

"अवस्त्वशक्तमुद्दिष्टं शक्तं वस्त्विह भण्यते । तस्मादेकं परं ब्रह्म वस्तुशब्दोदितं सदा" इति लक्षणे[6] ॥ * ॥

वैशारदी [7]साऽतिविशुद्धबुद्धि-
र्धुनोति मायां गुणसम्प्रसूतिम्[8] ।
गुणांश्च सन्दह्य यदात्म्यमेतत्[9]
स्वयं च शाम्यत्यसमिद् यथाऽग्निः[10] ॥ १२ ॥

---

१ "पुरुषस्य सम्बन्धी योऽसौ कर्मप्राप्तो देहोऽस्ति अयं गुणैर्विरचितः । तामसैर्भूतैः निर्मितः । पञ्चपर्वाविद्यया आस्थितः आवृतः आत्मा ज्ञानसुखादिस्वभावो यस्य तस्य पुंसः अयं संसारः तन्निबन्धः देहसम्बन्धप्राप्तः । अविद्याकर्मणोरपगमे बन्धोऽपि गच्छतीति भावः" इति च ।

२ "पुंसो विद्या च्छिदात्मनः" इत्यर्वाचीनाः । "पुंसो विद्याचिदात्मनः" इत्येके ।

३ "–धर्मवदीर्यते" इति प्र. पाठः । "–धर्मिवदिष्यते" इति क्वचित् ।

४ "यावद् विष्णुपदम्" इति प्र. पाठः ।

५ "निरसेदेतद्वस्तुबुद्धिम्" इति प्र. पाठः । "जिज्ञासया वेदपुराणादिश्रवणावृत्या आत्मस्थं जीवादिषु विद्यमानं केवलं देहादिप्राप्तदोषरहितं परं जीवाद् विलक्षणं सङ्गम्य सम्यग् ज्ञात्वा अस्य बद्धस्य जीवस्य वस्तुबुद्धिं ईश्वरप्रेरणां विना कार्येषु शक्तत्वबुद्धिं यथाक्रमं श्रवणमननक्रमेण निरसेत् परिहरेत् । कार्येष्वहमेव कर्तेति बुद्धिं देहादिषु ममैवेदमित्यभिमानं च परित्यजेदिति भावः" इति प्राचीनटीका । अत्र यथाक्रममित्ययं क्रमविशेषः प्रतीयते—आदौ तावज्जिज्ञासया आत्मनि देहे स्थितमथापि देहदोषविधुरं देहाद् विलक्षणमात्मानं जीवं सम्यगधिगत्य अस्य देहस्य वस्तुत्वबुद्धिं निरसेत् । ततश्च जीवस्थं तद्विलक्षणं परमात्मानमधिगत्य जीवेऽपि वस्तुत्वबुद्धिं निरसेदिति । आदौ पञ्चदशकलाविरहिततया जीवस्वरूपसाक्षात्कारस्तत ईश्वरसाक्षात्कार इति ।

६ "इति च लक्षणे" इति क्वचित् ।

७ "सा तु विशुद्ध–" इति क्वचित् कोशे ।

८ "–सम्प्रसूताम्" इति प्र. पाठः ।

९ "यदात्ममेतत्" इति च ।

१० "विशारदः सृष्टिपालनादौ कुशलः परमात्मा तद्विषया वैशारदी । विविधं शारं बन्धलक्षणं संसारं द्यतीति

"पिशाचवत् स्थिता माया [1]मुच्यते जीवगा सदा। दह्यन्ते तद्गुणाः सर्वे सा च प्रातिस्विकी नरे" इति वैभाव्ये। "एतच्छब्देन दुःखादिरपरोक्षतयोच्यते। क्वचिद् विश्वं क्वचिद् ब्रह्म क्वचिन्निन्द्यमुदीर्यते" इति तन्त्रनिरुक्ते। "बाह्यान्तःकरणाज्जन्यं ज्ञानं नश्यति मुक्तिगे। स्वरूपज्ञानतो भोगान् मुक्तो[2] भुङ्क्ते यथेष्टतः" इति मुक्तितत्त्वे॥ *॥

अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः।
नानात्वमथ नित्यत्वं लोककालागमात्मनाम्[3]॥ १४॥

मन्यसे सर्वभावानां संस्था ह्यौत्पत्तिकी यथा।
तत्तदाकृतिभेदेन जायते भिद्यते च धीः[4]॥ १५॥

[5]एवमुद्धव सर्वेषां देहिनां देहयोगतः।
कालावयवतः सन्ति भावा जन्मादयोऽसकृत्[6]॥ १६॥

वा विशारदः। अतिविशुद्धबुद्धिरपरोक्षरूपा। गुणान् रागद्वेषादीन् तन्निमित्तरजस्तमोभागौन् सन्दह्य, एतत् प्रत्यक्षं दुःखान्यथाज्ञानादिकं यदात्म्यं यत्स्वरूपेण प्राप्तं तां गुणसम्प्रसूतिं कामक्रोधादिजननीं मायां जीवगुणाच्छादिकां सन्दह्य प्राकृतं मनश्च सन्दह्य स्वयं च शाम्यति। स्वरूपज्ञानाभिव्यक्त्याऽतिशयेन मुक्तौ सुखभोग इति भावः। काष्ठादिरहितः अग्निर्यथा शाम्यति एवम्" इति प्राचीनटीका। "मायां पिशाचवत् स्थितां जीवस्वरूपाच्छादिकां निरस्य परमाच्छादिकां विधुनोति उद्घाटयति" इति विजयध्वजीयम्।

१ "माया तूच्यते" इति प्र. पाठः। जीवान्मुच्यते। जीवं विमुच्य स्वयं तमो यातीति भावः।

२ "मुक्तौ" इति प्र. पाठः।

३ "काललोकागमात्मनाम्" इति क्वचिन कोशे।

४ "यथा परमात्मनः जीवभेदः तथा जीवानां परस्परं च भेद इत्याह—अथैषामिति। अथ अथाऽपि ज्ञानरूपत्वेऽपि (कर्मकर्तॄणां सुखदुःखयोः) भोक्तॄणां च, एकस्मिन् समये एको दुःखं भुङ्क्ते एकः सुखमतः जीवानां परस्परं नानात्वम्। अथ अन्यदपि ज्ञेयम्। नित्यत्वं देहापगमेऽपि जीवानां सदा स्थायित्वम्। लोकानां (कालस्य) आगमानां व्याप्तानां आकाशप्रकृतिपरमात्मनां एतेषां सर्वभावानां तत्कार्यगुणमहदादिना भेदेन संस्था स्थितिः औत्पत्तिकी स्वभावसिद्धेति। तत्तदाकृतिभेदेन तिर्यङ्मनुजसुरादिभेदेन सात्त्विकादिस्वभावभेदेन धीः भिद्यत इति हे उद्धव त्वं मन्यसे। तद् वस्तुषु वैलक्षण्यं मया न वक्तव्यमिति भावः। एवं भेदज्ञानमावश्यकमिति यावत्" इति प्राचीनटीका। लोककालागमात्मनामिति मूले लोकशब्देनाप्राकृतवैकुण्ठादिलोकग्रह इति प्राचीनटीकाभिप्रायः। "लोके काले आगमे वेदे चाऽत्मा मतिर्येषाम्। लोककालवेदज्ञानामित्यर्थः" इति विजयध्वजीयम्। एतत् प्रमेयजातं त्वं यथा यथावत् मन्यसे जानासि। अतो न मया पुनर्वक्तव्यम्।

५ "एवमप्यङ्ग" इत्यर्वाचीनाः।

६ "देहजीवयोर्भेदः प्रत्यक्षसिद्धश्चेत्याह—एवमुद्धवेति। देहिनां जीवानां देहयोगतः यथा जन्मादयः भवन्ति तथा कालेभ्यः क्षणादिभ्यः अवयवेभ्य उपचयापचयकारणेभ्यः अन्नादिभ्यश्च जन्मादयः भावाः धर्माः असकृत्

"देहापेक्षमनित्यत्वं जीवानां जननं तथा । स्वतस्त्वजाश्च नित्याश्च बहवः सुखरूपिणः । उत्तमा जीवसङ्घास्तु नीचा वै नित्यदुःखिनः।"[१] इति जीवतत्त्वे[२] ॥ * ॥

[३]तत्रापि कर्मणां कर्तुरस्वातन्त्र्यं च लक्ष्यते ।
[४]भोक्तुश्च सुखदुःखानां को न्वर्थो विवशं भजेत् ॥ १७ ॥

"स्वाधिकानां वशत्त्वात्तु परमं सुखमेव तु । तदन्येषां वशो[५] यस्तु किं सुखं तस्य भण्यताम् । स्वाधिकानां वशत्वं च तेषु भक्तिमतः सुखम्[६] । तदन्येषां तु दुःखाय यस्माद् भक्तोऽधिको भवेत्" इति च ॥ * ॥

न देहिनां सुखं किञ्चिद् विद्यते विदुषामपि ।
तथाच दुःखमूढानां तथाऽहङ्कारिणां परम्[७] ॥ १८ ॥

एकस्मिन्नपि दिने बहुशः सन्ति । क्षणविशिष्टाकारेण देहेन उपचयविशिष्टाकारेण च जीवानामुत्पत्त्यादिकमिति भावः । बालदेहाद् यौवनयुक्तदेहाच्च स्थविरस्य स्वस्य भेदः प्रत्यक्षसिद्ध इति भावः" इति प्राचीनटीका ।

१ एतेन नित्यसुखस्य भोक्तारः नित्यदुःखस्य भोक्तारः सुखदुःखयोर्भोक्तार इति जीवानां नानात्वं नानाविधत्वं चेति मूलस्यार्थान्तरं च ध्वनितम् ।

२ "मुक्तितत्त्वे" इति क्वचित् ।

३ "अत्रापि" इति प्र. पाठः ।

४ "भोक्तुश्च दुःखसुखयोः को न्वर्थो–" इति च । "तत्रापि मनुष्यदेहेऽपि कर्मणां कर्तुः अस्वातन्त्र्यं परनियम्यत्वं लक्ष्यते हिताकरणादहितकरणाच्च । भोक्तुर्जीवस्य सुखभोगेच्छायामपि दुःखभोक्तृत्वदर्शनादस्वातन्त्र्यम् । विवशं पापकर्मप्रेरकासुरवशं जीवं को नु को वा अर्थः, किं वा सुखं भजेत् प्राप्नुयात् ? दुःखासहचरितं सुखं परमात्मप्रसादादेव भवेदिति भावः" इति प्राचीनटीका ।

५ "वशे" इति प्र. पाठः ।

६ सुखमिति सुखहेतुः । तथाच विवेकमपहाय यस्यकस्यचिन्नीचस्यासुरादेर्वशं, तथा स्वोत्तमाधीनत्वेन स्वस्य यो लाभस्तदुपकारस्मरणाभावेन केवलमवर्जनीयतयोत्तमवशं च किं सुखं भजेत् इति विवशमित्यस्यार्थद्वयमुक्तं भवति । तथाच अप्रज्ञापूर्वकं वैवश्यं दुःखहेतुरिति फलितोऽर्थः ।

७ "दुःखं मूढानां वृथाऽहङ्करणं परम्" इत्यर्वाचीनाः । "दुःखमूढानां वृथाऽहङ्कारिणां परम्" इत्यन्ये । "दुःखमूढानां तथाऽहङ्कारिणां पुनः" इति क्वचित् । "विदुषामपि देहिनां सुखं नास्ति । देहाभिमानस्य सत्त्वात् । तथा ज्ञानिवत् दुःखयुक्ताः ज्ञानेन रहिता दुःखमूढाः, तेषां परं केवलमहङ्कारलक्षणाभिमानयुक्तानां तथा प्रस्तुतं सुखं न विद्यते" इति प्राचीनटीका । यथा ज्ञानिनां देहाभिमानेन सुखं नास्ति तथाऽज्ञानिनामपि तथेति किमु वक्तव्यमेतत् ? अनुक्तिसिद्धमित्यर्थः । तथाशब्दस्तदेत्यर्थे वा । यदा ज्ञानिनामपि सुखं नास्ति तदाऽज्ञानिनां तथेति किमु वक्तव्यमिति ।

यदि प्राप्तिं विघातं च जानन्ति सुखदुःखयोः ।
तेऽप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद् यथा[1] ॥ १९ ॥

विदुषामपि देहमानिनां यदा[2] सुखं न विद्यते तदा दुःखमूढानामहङ्कारिणां च किम्वित्यर्थः ।

"[3]पुनःशब्दे प्रस्तुतार्थे तथाशब्द उदीर्यते" इति शाब्दे ।

ये तु विद्वत्त्वेन प्रसिद्धाः प्राकृतानां तेऽप्यद्धा न विदुः । देहाभिमानिनश्चेत् । दुःखमूढा अधीराः । अहङ्कारिणो विशेषतोऽप्यविद्यमानगुणाभिमानिनः[4] ॥ * ॥

गुणाः सृजन्ति कर्माणि [5]कालोऽनुसृजते गुणान् ।
जीवस्तु गुणसंयुक्तो भुङ्क्ते कर्मफलान्यसौ[6] ॥ ३१ ॥
यावत् स्याद् गुणवैषम्यं तावन्नानात्वमात्मनः ।
नानात्वमात्मनो यावत् पारतन्त्र्यं तदैव हि ॥ ३२ ॥
यावदस्यास्वतन्त्रत्वं तावदीश्वरतो भयम् ।
य एतत् समुपासीरंस्ते मुह्यन्ति शुचाऽर्पिताः[7] ॥ ३३ ॥

---

१ "ये प्राकृतानां मध्ये विद्वत्त्वेन प्रसिद्धाः तेऽपि, यद्यपि सुखप्राप्त्युपायं दुःखविघातोपायं च जानन्ति पापस्याकरणेन दुःखाभावः पुण्यकरणेन सुखमिति जानन्ति, अथाऽपि यथा येन ईश्वरप्रसादलक्षणेन मृत्युः पूर्वजन्मसु प्राप्तः कर्मबन्धः न प्रभवेत् तं योगं ईश्वरप्रसादनं न विदुः" इति च । प्राकृतानां मूर्खाणां विद्वत्त्वेन प्रसिद्धाः, नतु वस्तुतो विद्वांसः इति व्याख्यानान्तरम् ।

२ "यदा न विद्यते सुखं तदा" इति प्र. पाठः ।

३ "पुनःशब्दः" इति क्वचित् । क्वचित् पुनःशब्दे उदीरितव्ये तथाशब्द उदीर्यते । पुनःशब्दार्थेऽपि तथाशब्दः प्रयुज्यत इति यावत् । यदि पुनःशब्दः प्रस्तुतार्थः । तद्यथा—"पण्डिता अपि दुःखिनः । किम्पुनरपण्डिताः" इति उदीरितव्ये "अपण्डितास्तथेति किमु ?" इत्युदीर्यते । पुनःशब्दार्थे प्रस्तुतार्थे चेति वा । पुनःशब्दे यथा—सकृद् गतम् तथाऽपि जगाम । अत्र पुनःशब्दगर्भस्तथाशब्दः । प्रस्तुतार्थे पुनरपि शब्दतो वक्तव्ये तत्स्थाने तथाशब्दः प्रयुज्यत इति वा । यथा-देवदत्तः पण्डितः । यज्ञदत्तोऽपि तथा ।

४ अविद्यमानगुणा निर्गुणा अपि स्वान् गुणिनो मन्यन्त इत्यर्थः ।

५ "कर्माणि गुणोऽनु-" इति प्र. पाठः ।

६ "गुणाः कर्माणि सात्विकराजसतामसानि जीवे सृजन्ति । कालः कल्याणगुणसम्पन्नः परमात्मा अनु प्रकृतिलक्षणोपादानमादाय गुणान् सृजते । जीवस्तु, देहगतत्वेऽपि कर्मकर्तृत्वेऽपि परमात्मा न भुङ्क्त इति ज्ञापनाय तुशब्दः । जीवो गुणसंयुक्तः सन् भुङ्क्ते" इति प्राचीनटीका । कालः परमात्मा अनु तत्तद्योग्यतानुगुणम् इति वा । सात्विके सत्वं प्रसञ्जयति, राजसे रज इत्यादि ।

७ "परमात्मकल्याणगुणजिज्ञासया कर्मबन्धः परिहर्तव्य इत्युक्तम् । तद्विरोधितया प्रसक्तं कुमतं दूषयितुमनु-

यावत् स्याद् गुणवैषम्यमित्यादि य उपासीरन् ते मुह्यन्ति ॥ * ॥

[1]गुणसंयुक्तः कर्मफलानि भुङ्क्ते ॥ * ॥

काल आत्माऽऽगमो लोकः स्वभावो धर्म एव च ।
इति मां बहुधा प्राहुर्गुणव्यतिकरेऽसति[2] ॥ ३४ ॥

असति गुणव्यतिकरे [3]कालादिनामानं मामेवाऽऽहुरिति स्वसिद्धान्तः ।

"कालः सर्वगुणोद्रेकादाप्तत्वादात्मनामकः । आगमोऽवगतेरस्य लोको ज्ञानस्वरूपतः ।
स्ववशत्वात् स्वभावोऽयं धारणाद् धर्म इत्यपि । उपासते [4]तदा मुक्ताः परानन्दैक-

---

वदति—यावत् स्यादिति । गुणवैषम्यं गुणविकारः यावत् स्यात् तावत्पर्यन्तमात्मनः अविच्छिन्नस्य नानात्वं औपाधिकभेदः स्यात् । आत्मनः जीवो ब्रह्मेति नानात्वं यावत् तावत् अस्य जीवस्य पारतन्त्र्यं ईश्वराधीनता । जीवस्यास्वतन्त्रत्वं यावत् तावदीश्वरतः प्रबलाद्वा भयम् । दुःखानुभवरूपत्वमित्यर्थः । इत्येतन्मतं ये समुपासीरन् आदरेण ध्यायन्ति ते मुह्यन्ति भ्रान्ता भवन्ति । शुचा नित्यदुःखेन अर्पिता भवन्ति । सुखानुभवरहिता भवन्ति । तस्माज्जीवपरौ स्वभावतो भिन्नौ; परमात्मा स्वाभाविकानन्तकल्याणगुणवांश्चेति भावः" इति च । जीवगोस्वामी चाऽऽह—"तदेतत् पूर्वोक्तं मतान्तरं निन्दति—य एतदित्यर्धकेन" इति । "य एतन्मतमुपासीरन् सेवन्ते तेऽन्धे तमसि मुह्यन्ति दुःखोद्रेकात्" इति विजयध्वजीयम् ।

१ ननु यावत् स्यादित्यादि सिद्धान्तवचनमेव किं न स्यात्? न स्यात् । अव्यवहितपूर्वश्लोके जीवस्य भेदेन निर्देशादिति स्मारयति—गुणसंयुक्तः । जीवस्तु गुणसंयुक्तः । ईश्वरो गुणातीतः । गुणबद्धत्वादेव जीवः कर्मफलानि भुङ्क्ते । अबद्धत्वादेवेश्वरो गुणस्रष्टाऽपि कर्मनिर्माताऽपि न कर्मफलभोक्तेति पूर्वश्लोके स्फुटं जीवेश्वरभेदस्य स्वसमयत्वेन प्रतिपादनादत्र परसमयानुवाद एवायमिति विज्ञायते दर्शनभाषाविदामिति ।

२ ननु काललोकागमात्मादीनां सर्वभावानामीश्वरस्वरूपत्वं वदन्ति "सर्वं खल्विदं ब्रह्म" इति । तत्कथं भेद उच्यते? आह—काल आत्मा । तथाच तत्तद्गुणयोगेन मुख्यतस्तत्तत्पदवाच्यत्वमेव । नतु तदात्मकत्वमिति भावः । अत्र प्राचीनटीका—"कालोऽनुसृजते गुणानित्युक्तम् । स कालः क इति जिज्ञासायामहमेवेत्याह-काल इति । पूर्णानन्तगुणत्वात् काल इति मां प्राहुः । तत्र निमित्तमाह—आत्मत्वात् । अन्तर्यामिमूर्तिभिः सर्ववस्तुषु व्याप्त्या निमित्तेन । अथवा सर्वकामैः प्राप्तत्वात् । गुणैः प्राप्तत्वादिति वा । चेतनाचेतनसर्वविषयज्ञानवत्त्वादागमः । अवगच्छति विश्वमिति । ज्ञानस्वरूपत्वाल्लोकः । स्वयमेव भवति सदेति स्वतन्त्रः स्वभावशब्दार्थः । सर्वस्य धारणात् धर्मः । इति बहुधा बहुनाममिर्मां प्राहुः । ननु कालादिशब्दानामन्यत्रापि व्यवहारदर्शनात् कथं भवानेवार्थ इत्यत आह—गुणव्यतिकरे सृष्टावसति प्रळये मुक्ता मामेव प्राहुरित्यर्थः" इति । "गुणव्यतिकरे असति मुक्तिदशायां बहुधा कालादिभिर्नामभिर्मामुपासत इति प्राहुर्वेदादयः" इति विजयध्वजीयम् । "कल कामधेनुः" इति धातुपाठः ।

३ "कालादिगुणनामानम्" इति क्वचित् । ४ "उपासते सदा" इति प्र. पाठः ।

84

भोगिनः[१]। तदेतत् तत्त्वमज्ञात्वा प्राहुर्दुर्मतयः परे। यावत्तु गुणवैषम्यं तावन्नानात्वमात्मनः। भेदबुद्धिस्तु यावत् स्यात् तावदीश्वरतन्त्रता। यावदीश्वरतन्त्रत्वं तावत् तस्माद् भयं भवेत्। उपासते य एवन्तु नित्यशोके पतन्ति ते। महातमस्यनानन्दे तस्मान्नैवं विचिन्तयेत्। तस्मान्नित्यं तु नानात्वं जीवानामीशतन्त्रता। स्वाधिकानां वशत्वं च मुक्तावपि सदेष्यते। एवं ज्ञात्वा विमुच्यन्ते परानन्दं व्रजन्ति च" इति तन्त्रभागवते ॥ * ॥

गुणेषु वर्तमानोऽपि देहजेष्वनपावृतः।
गुणैर्न बद्ध्यतेऽदेही बद्ध्यते वा कथं प्रभो[२] ॥ ३५ ॥

अदेही परमात्मा। बद्ध्यते चेत् कथं बद्ध्यते? ॥ * ॥

एतदच्युत मे ब्रूहि प्रश्नं प्रश्नविदां वर।
नित्यमुक्तो नित्यबद्ध एक एवेति मे मतिः[३] ॥ ३७ ॥

नित्यमुक्तो नित्यबद्ध इत्येकजीववादिमतानुसारेण चोदयति[४]—

"न मे मोक्षो न बन्धनम्", "एकस्यैव ममांशस्य जीवस्यैवं महामते। बन्धोऽस्याविद्याऽनादिर्विद्यया च तथेतरत्। अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते" इत्यादिपरिहारात्। "शिष्योऽपि पूर्वपक्षस्थस्तदेवाऽऽत्ममतं ब्रुवन्। नैव दुष्यत्यसत्येन स्थिरत्वार्थं हि तद् वचः" इति विवेके[५] ॥ * ॥

इत्येकादशस्कन्धे दशमोऽध्यायः

---

१ "–भागिनः" इति च।

२ "कथं विभो" इति प्र. पाठः। "गुणेषु रसादिविषयेषु प्राप्तेषु। देहजेषु देहाधिकरणजन्येषु विषयानुभवेषु वर्तमानः। अदेही स्वतः देहरहितः परमात्मा गुणैर्न बद्ध्यते अनपावृतः सन्। बद्ध्यते चेत् कथं बद्ध्यते? वाशब्दश्चेच्छब्दार्थे" इति प्राचीनटीका।

३ "मे भ्रमः" इत्यर्वाचीनाः। "तवायं प्रश्नः किमर्थमित्याशङ्कयाऽऽह—मे मतिरिति। एकजीववादिमतानुसारेणाहमित्थमुक्तवानिति। सम्यगवधारणार्थं पूर्वपक्षप्रसङ्गेन सिद्धान्तं पुनः पृच्छामीति भावः" इति प्राचीनटीका।

४ इतः परं प्र. पाठे "शिष्योऽपि—" इत्युत्तरत्र पठितं प्रमाणवचनमादौ पठित्वा ततः परम्—"न मे मोक्ष...." इत्यादि "....परिहारात्" इत्यन्तं पठ्यते। क्वचित् कोशेषु चायं व्यत्यासः।

५ "विक्षेपे" इति प्र. पाठः।

[एकादशोऽध्यायः]

बद्धो मुक्त इति ह्याख्या[१] गुणतो मे न वस्तुतः ।
गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम् ॥ १ ॥

मे गुणतः । मद्वशसत्वादेः[२] ।

"अमायत्वान्निर्गुणोऽहं बन्धमोक्षौ नचापि मे । मदधीनस्य जीवस्य बन्धमोक्षौ मदेव तु[३]" इति स्वाभाव्ये ॥ * ॥

[४]शोकमोहौ सुखं दुःखं देहोत्पत्तिश्च[५] मायया ।
[६]स्वप्ने यथाऽऽत्मनः ख्यातिः संसृतिर्नतु वास्तवी ॥ २ ॥

---

१ "इति व्याख्या" इति प्र. पाठः । "मे गुणतः मदधीनसत्त्वादेः । रजोनिमित्तात् जीवस्य बद्ध इत्याख्या व्यपदेशः । वस्तुतः स्वभावतः जीवो बद्धो न । ननु सादिः गुणोऽपि चेतनबन्धकश्चेत् अविशेषादीश्वरस्य कुतो न बन्धक इत्यत आह—गुणस्येति । तमोगुणस्य रजोगुणस्य च माया प्रकृतिरूपाज्ञानम्, तन्मूलं कारणं यस्य तस्य भावः, तस्मात् । अज्ञस्य जीवस्य अनादितः बन्धो भवति । मे सर्वज्ञस्य बन्धनं न । अतः मोक्षो बन्धनिवृत्तिश्च न । अहं नित्यमुक्त इति भावः" इति प्राचीनटीका । मे मदधीनस्य गुणतः अप्रधानस्य जीवस्य गुणतः रजआदि गुणसम्बन्धेन बद्ध इत्याख्या भवति । यद्यपि गौणः । अथापि सोऽस्त्येव जीवस्य । अतस्तद्विरहे मुक्त इति चाऽऽख्या युज्यते ।

२ "मद्वशत्वादे." इति केचित् पठन्ति । अत्र श्रीधरस्वामी—"मे गुणतः मदधीनसत्त्वादिगुणोपाधितः" इति । "गुणतो बद्धः गुणतो मुक्त इत्याख्या जीवस्येव मे वस्तुतः सत्यमेव नास्ति" इति सुदर्शनसूरिवीरराघवौ । "जीवः गुणतो बद्ध इति मे मतः" इति शुकदेवः ।

३ "बन्धमोक्षौ सदैव तु" इति प्र. पाठः प्रामादिकः ।

४ "जीवस्य बद्ध इत्याख्या न वस्तुत इत्युक्तम् । तत् स्पष्टं प्रतिपादयति— शोकमोहाविति । मायया अज्ञानेन आत्मनः जाग्रद्देहस्य स्वप्ने स्वप्नदेहे ख्यातिः जाग्रद्देहाभेदप्रतीतिः तया शोकः दुःखं रोदनं वा मोहश्चिन्ता तौ भवतः । तथा मायया आत्मनः जीवस्य देहोत्पत्तिः सुखं दुःखं च भवति । आत्मनः ख्यातिश्च अन्तःकरणगतदुःखस्य स्वीयतया भ्रान्तिश्च । तया संसृतिर्भवति । सा नतु वास्तवी । वस्तुनो जीवस्य ज्ञानस्वरूपत्वात् । अविद्यास्वभावसिद्धाऽनित्या सा वास्तवी न भवति इत्यवास्तवी निवर्त्यत्वादिति भावः" इति प्राचीनटीका । "मायया स्वप्नोऽयमित्यज्ञानेन यथाऽऽत्मनः स्वप्ने शोकमोहादिख्यातिः तथा स्वरूपाज्ञानेन शोकादि । नतु स्वरूपस्य । तस्य सुखात्मकत्वात् । तस्मादर्थक्रियाकारित्वेन संसृतिः सत्यपि न वास्तवी प्रतिहन्तुमशक्या न भवतीत्यर्थः" इति विजयध्वजीयम् ।

५ "देहापत्तिश्च" इति प्र. पाठः ।　　　　　　　　　　६ "स्वप्नो–" इति च ।

"स्वप्नोऽयमित्यविज्ञानात् [1]स्वाप्नदुःखमुपाश्नुते । निजस्वरूपानुभवराहित्यात् तद्व देव तु । जाग्रद्दुःखमपि प्रोक्तं विष्णुतत्त्वं नपश्यतः[2] । तस्मात् तदस्वभावत्वात् सदप्येतदवास्तवम्" इति लोकसंहितायाम् ॥ * ॥

[3]विद्याविद्ये मम तनू विद्धयुद्धव शरीरिणाम् ।
मोक्षबन्धकृती[4] आद्ये मायया मे विनिर्मिते ॥ ३ ॥

"विद्याविद्ये मम तनू प्रतिमावत् सदोदिते । सदा तद्व्यतिरिक्तस्य नित्यज्ञानसुखात्मनः । मदिच्छावशगे नित्यमविद्यानिर्मिता गुणाः । सत्त्वाद्या मदधीनत्वादविद्याया न मे गुणाः[5] । अविद्या चैव विद्या च गुणाः सत्त्वादिका अपि । [6]देहोत्पत्तिः सुखं दुःखं सर्वमेतन्मदिच्छया । अतोऽहं बन्धमोक्षाभ्यां रहितो नित्यमेव तु । मुक्तशब्दोदितो बन्धराहित्यान्न विमोकतः[7]" इति कालसंहितायाम् । "श्रीस्तु विद्या समुद्दिष्टा दुर्गाऽविद्या प्रकीर्तिता । ते त्वनादी हरेरिच्छानियते सर्वदैव तु" इति मायावैभवे ॥ * ॥

एकस्यैव ममांशस्य जीवस्यैवं[8] महामते ।
बन्धोऽस्याविद्ययाऽनादिर्विद्यया च तथेतरत्[9] ॥ ४ ॥

---

१ "स्वप्ने दुःख–" इति प्र. पाठः । "स्वप्नदुःख–" इति क्वचित् ।

२ "विष्णुतत्त्वमपश्यतः" इति च क्वचित् । एतेन आत्मनः स्वरूपस्य माययाऽज्ञानेन स्वप्ने यथा शोकादिख्यातिस्तथा आत्मनः परमात्मनः माययाऽज्ञानेन संसृतिरिति मूलाभिप्राय उक्तो भवति ।

३ "विद्याविद्ययोः नियामकदेवते श्रीदुर्गे आद्ये प्राथमिके मम तनू इव तनू । ममाधिष्ठाने । ते श्रीदुर्गे शरीरिणां मोक्षबन्धकृती स्यातामिति मे मायया मदिच्छया विनिर्मिते नियमिते इत्यर्थः । रूपाभिव्यक्त्यपेक्षया विनिर्मितत्वोक्तिर्वा । जडस्याप्यज्ञानस्य प्रबलचेतनसहकृतत्वाद् बन्धकत्वम् । जडस्यापि ज्ञानस्य प्रबलचेतनसहकृतत्वान्मोचकत्वम् । तदपि न स्वतः । किन्त्वीश्वरेच्छावशादिति भावः" इति प्राचीनटीका ।

४ "मोक्षबन्धकरी" इति प्र. पाठः ।

५ अविद्याया मदधीनत्वादविद्यानिर्मिताः गुणाः सत्त्वाद्या न मे सन्ति ।

६ एतेन "शोकमोहौ–" इति पूर्वश्लोकः प्रकारान्तरेणापि व्याख्यातः । तथाहि—स्वप्ने यथा मायया ईश्वरेच्छया शोकमोहादिख्यातिः न स्वेच्छया तथा जाग्रद्दशायामपि मायया ईश्वरेच्छयैव ख्यातिरिति संसृतिरवास्तवी । जीवस्य न स्वेच्छोपात्तेति । "य एष सुप्तेषु जागर्ति कामङ्कामं पुरुषो निर्ममाणः" इति हि श्रुतिः । तथाच स्वप्नवत् सदा संसारे पारतन्त्र्यमेव जीवस्यानेनोच्यत इति ।

७ "विमोक्षतः" इति क्वचित् पाठान्तरम् । ८ "जीवस्यैव" इत्यर्वाचीनाः ।

९ "तथेतरः" इति च । "ममांशस्य मद्वत्तज्ज्ञानादिभिः ईषत् मम सदृशस्य जीवस्य चेतनस्य एकस्यैव जडापे-

"भिन्नांशस्यैव जीवस्य बन्धमोक्षौ न मे क्वचित्[1] । अभिन्नांशास्तु मत्स्याद्यास्तेजसः कालवह्निवत् । जीवा भिन्नांशकास्तत्र तेजसः प्रतिबिम्बवत्" इति वैलक्षण्ये । "[2]मुक्तस्य तु न मे मोक्षो बन्धाभावात् कथञ्चन । मुक्त इत्यपि नामैतत् दीप्यतेऽसौ दिवाकरः । इतिवद् बन्धराहित्यान्नतु वृक्षादिदीप्तिवत् । कादाचित्कतया वाच्यं बन्धाभावादमोक्षतः[3] । जीवस्य बन्धमोक्षस्तु[4] मत्प्रसादात् कदाचन" इति तत्त्वोदये ॥ * ॥

अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते ।
विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि[5] ॥ ५ ॥

मुक्तस्य विष्णोः--

'नित्यशुद्धबुद्धमुक्तसत्यसुखाद्वयप्रत्यगेकपूर्ण[6] इत्यतः पदान्वयात्" इत्यादिवचनात् ।

बद्धो जीवः[7]—

"[8]बद्धा जीवा इमे सर्वे पूर्वबन्धसमन्वयात् । नित्यमुक्तत्वतो विष्णुर्मुक्तनामा सदोदितः । अबद्धत्वादमोक्षोऽपि दीप्यतेऽसौ रविर्यथा" इति ब्रह्मसंहितायाम् ॥ * ॥

क्षया मुख्यस्यैव अविद्यया मदिच्छानियमितया बन्धः । विद्यया च मदिच्छाविशेषनियमितया इतरत् मोक्षः" इति प्राचीनटीका । "जीवः परमात्मेति द्विविधं तत्त्वम् । तयोरेकस्य जीवस्यैव" इति विजयध्वजीयम् । केवलार्थो वा एकशब्दः । एकस्य केवलस्य जीवस्यैव, केवलं जीवस्यैवेति ।

१ एतेन स्वरूपांशभिन्नांशयोर्मध्ये एकस्यैव भिन्नांशस्येति चार्थान्तरं ध्वनितम् ।

२ मुक्तस्येति नित्यमुक्तस्य । बन्धाभावान्न बन्धान्मोक्षो मे । यत्रक्वचिदहं मुक्त इत्युच्ये तत्र बन्धात्यन्ताभाव एव मोक्षपदार्थो नतु बन्धध्वंसः ।

३ बन्धाभावादेव अमोक्षतः बन्धध्वंसस्याप्यभावात् । प्रतियोगिसत्तासापेक्षो हि ध्वंसः ।

४ "बन्धमोक्षौ तु" इति क्वचित् पाठो न स्वरसः । बन्धान्मोक्षः बन्धध्वंसः ।

५ "अथ कात्स्न्र्येन विरुद्धधर्मिणोः, विरुद्धौ स्वरूपगुणशक्त्यादिभ्यः परस्परं भिन्नौ च तौ धर्मिणौ च । निर्धर्मकत्वमप्रामाणिकमिति भावः । एकधर्मिणि देहे स्थितयोः वैलक्षण्यं भिन्नानि लक्षणानि वदामि" इति प्राचीनटीका । "यतो जीवस्यैव बन्धमोक्षावथ तस्मात्" इति विजयध्वजीयम् । अथ जीवस्यैव बन्धमोक्षाविति निरूपणानन्तरमीश्वरस्य ततो वैलक्षण्यनिरूपणमारभ्यत इति वा । एतेनैवाथशब्देन जीवेश्वरवैलक्षण्यज्ञानस्य परममाङ्गलिकत्वं चाऽह । "विरुद्धधर्मिणोः अल्पज्ञत्वसर्वज्ञत्वादिधर्मवतोः । एकधर्मिणि समानस्थाने नियम्यनियन्तृत्वादिना स्थितयोः" इति शुकदेवः ।

६ "–प्रत्यगेक इत्यतः" इति क्वचित् । "–प्रत्यगेकगुणपूर्ण इत्यतः" इति च । इत्यादीनि पदानि विष्णोरेव हि वाचकानि । अतः अस्मिन्नेव विष्णौ पदान्वयात् पदस्य अर्थेन सह सामर्थ्येणान्वयसम्भवादिति वाक्यार्थः ।

७ तथाच बद्धस्य मुक्तस्येति न संसारिमुक्तजीवावुच्येते । किन्तु जीवेश्वरौ ।

८ ननु बन्धाभावान्मुक्त इति विष्णुरुच्यताम् । बद्ध इति तु न जीवपर्यायः । मुक्तस्य तदसम्भवात् । अतो

सुपर्णावेतौ सयुजौ[१] सखायौ यदृच्छया कृतनीळौ[२] च वृक्षे ।
एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान्[३] ॥ ६ ॥

आत्मानमन्यं च स वेद विद्वानपिप्पलादो नतु पिप्पलादः ।
[४]योऽविद्ययाऽन्धः स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः[५] ॥
॥ ७ ॥

"अनत्तृत्वं हरेर्दुःखानत्तृत्वादुच्यते सदा । विषयान् विनाऽपि पूर्णत्वात् स्वरूपानन्द-भोगिनः । [६]शुभमत्त्येव हि सदा सर्वत्रापि स्थितं विभुः । स्वादोरदनवद्भ्यत्ति जीवो-

---

बद्ध इति संसार्येवोच्येत । तेन मुक्तजीवाद् वैलक्षण्यं न लब्धमित्यत आह—बद्धा जीवाः । मुक्ता अपि बद्धा उच्यन्ते पूर्वबन्धसमन्वयात् । यद्यपि न बन्धविशिष्टाः किन्तु बन्धेनोपलक्षितास्तदाऽपि भवन्ति । विशेषणतयो-पलक्षणतया वा बन्धयोगो बद्धपदार्थ इति युज्यते मुक्तानामपि बद्धपदवाच्यत्वम् । अन्यच्च वक्ष्यति "बद्धत्वं विष्ण्वधीनत्वम्" इति ।

१ "सदृशौ" इति प्र. पाठः । २ "यदृच्छयैतौ कृतनीडौ च" इति च ।

३ "सुपर्णौ सुपरानन्दस्वरूपौ, सयुजौ नित्ययुक्तौ, सखायौ परस्परमादरवत्त्वादिति भावः । यदृच्छया ईश्वरे-च्छया । वृक्षे, वृश्च्यते छिद्यत इति वृक्षः अनित्यो देहः, तत्र कृतनीडौ कृताश्रयौ, स्थितावित्यर्थः । तयोः एकः पूर्णबलसुखज्ञानादिरहितः पिप्पलान्नं पिप्पलं कर्मफलरूपमन्नं भोग्यं स्वाद्विति बुद्ध्या खादति अनुभवति । अन्यः अपूर्णचेतनाद् विलक्षणः ज्ञानसुखबलादिभिः पूर्णः निरन्नोऽपि अन्ननिबन्धफलरहितोऽपि, नित्यमशनायापिपासा-रहितत्वादिति भावः । निजबलेन भूयान् पूर्णः लीलया विषयभोक्ता चेति भावः" इति प्राचीनटीका । "पृ पाल-नपूरणयोरिति धातोः सुष्ठु पालकत्वात् पूर्णत्वाच्च हरिः, पाल्यत्वादपूर्णत्वाच्च जीवोऽपि सुपर्णः" इति विजय-ध्वजीयम् । "वृक्षसमानधर्मे देहे स्थितत्वात् सखायौ" इति च । "सखायौ उपकार्योपकारकभावेन स्थितौ" इति सुदर्शनसूरिः । "सखायौ सहयोगात्" इति विश्वनाथः । "सखायौ प्रवर्त्यप्रवर्तकत्वात्" इति शुकदेवः । तथाच मूलश्रुतिः "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्यो अभिचाकशीति" इति । "सुष्ठु परमानन्दत्वात् तं परमणतीति च द्वा सुपर्णावितीशजीवौ । तयोः साधारणो वृक्षो वृश्च्यमानत्वाद् देहः । पिप्पलं तद्गं कर्मफलम्" इति वामनपण्डिताचार्यव्याख्यानम् ।

४ "योऽविद्यया युक् स तु" इत्यर्वाचीनपाठः ।

५ "सः स्वभावसिद्धपूर्णकल्याणगुणः अपिप्पलादः कर्मप्रसञ्जितभोगरहितः आत्मानमन्यं च अशेषविशेषैः सह वेद । अतः विद्वान् स एव । पिप्पलादः कर्मप्राप्तविषयभोगवांस्तु नतु विद्वान् । किञ्चिज्ज्ञ इति भावः । यः नित्यबद्धः नित्यं विष्ण्वधीनः सः अविद्यया अन्धः ईश्वरापरोक्षरहितश्च । विद्यामयः पूर्णज्ञानादिस्वरूपः यः सः नित्यं अज्ञानबन्धाद् विमुक्तः । अतः जीवपरयोः स्वरूपतः गुणतश्च परस्परं भेदः । अन्यथा एकस्यैव बन्धो न स्यादिति भावः" इति च प्राचीनटीका ।

६ "सुखमत्त्येव" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

ऽस्वाद्वपि यत् सदा। अनारतं पारवश्यात् स्वाद्वत्तीति ततः श्रुतिः" इति भोगनिर्णये। "अस्वादु स्वादुवद्ध्यत्ति[1] जीवो नैवं जनार्दनः। अतो नात्तीति वचनमश्नतोऽपि शुभं सदा[2]" इति परभोगे। "साशनानशनत्वेन [3]नरदेवौ यथोदितौ। अत्तिं विनाऽप्यदौर्बल्यात् तथाऽनत्तिर्हरेर्भुजः" इति स्वाभाव्ये।

[4]तदेवात्रोक्तम्—निरन्नोऽपि बलेन भूयानिति। स्वयं त्वत्त्येव, तथाऽपि नादननिबन्धनं तस्य बलमित्यर्थः।

"[5]यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाऽभिस्वरन्ति। इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश। यस्मिन् वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे। तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद् यः पितरं न वेद" (तत् न उत् नेशद्)
इत्यादिवाक्यशेषात्।

---

१ "स्वादुवद् व्यत्ति" इति क्वचित्। "स्वादुवद् वर्ति" इति च क्वचित्। न स्वरसोऽर्थः।

२ "सुखं सदा" इति पाठान्तरम्। प्र. पाठोऽपि तथा।

३ "ततो विष्वङ् व्यक्रामत् साशनानशने अभि" इति श्रुतौ साशनशब्देन मनुष्यः अनशनशब्देन सुरवर्गश्चोच्यते। तत्र यथा साशना अपि देवा अत्तिं विनाऽप्यदौर्बल्यादनशना उच्यन्ते नतु सर्वथाऽनशनादेवं विवक्षाविशेषेणैव भुजः भोक्तुरपि भगवतोऽनत्तिः अनशनमुच्यते।

४ "तदेव प्रोक्तम्" इति प्र. पाठः।

५ प्रथममण्डले १६४तमे सूक्ते विंशो मन्त्रः—"द्वा सुपर्णा–" इत्यादिः। तदुत्तराविमौ मन्त्रौ—"यत्रा–" इति (१–१६४–२१), "यस्मिन् वृक्षे –" इति च (१–१६४–२२)। अयं मन्त्रार्थः—विदथमिति यज्ञस्य ज्ञानस्य वा नाम। विदथानि। प्रथमा सप्तम्यर्थे। यज्ञेषु यस्मिन्नीश्वरेऽर्पिततया हुतं अमृतस्य हविषः सोमस्य वा भागं सुपर्णा देवा अनिमेषतया स्वीकर्तुमभिस्वरन्ति अभिगच्छन्ति। ईश्वरार्पितमेव तेऽपि स्वीकुर्वन्ति, न साक्षादिति यावत्। एवं सोमाधिकारिणां देवानां सर्वस्य भुवनस्य चेनः स्वामी, सर्वेश्वरः सर्वगोप्ता च स भगवान्, धीरः सर्वज्ञः मय्यनुग्रहधीमांश्च, अत्र यज्ञे मां प्रत्याविवेश आगच्छतु। किमर्थम्? मयाऽर्पितं पाकं हविरादि स्वीकर्तुम्। अत्र भगवानेव मुख्यतो यज्ञभोक्ता। देवादयस्तन्निवेदितान्नभोक्तार इत्युच्यते। तेन ज्ञायते अत्तिं विनाऽप्यदौर्बल्यादेव पूर्वमन्त्रेऽनश्नन्नित्युक्तः, नानशनादिति। द्वितीयमन्त्रो भगवत्पादैनैव व्याख्यातः। चतुर्थचरणस्य चायमर्थः। यः जगत्पितरं न वेद अतो नशत् नश्यन् नरकाद्यनर्थभाजनमिति यावत्। तस्य तत् पिप्पलं नोत् न स्वाद्वेव। यः पितरं न वेद सः स्वादुफलं न उत् नैव नशत् प्राप्नोतीति वा। नशतिं प्राप्तौ पठन्ति। नेतीवार्थे च। अथापि तन्न तदिव स्वाद्विव भुङ्क्त इति। अत्रार्थविशेषं त्रैविक्रमार्यदासाः प्रकटीचक्रुः— "यस्मिन् हरौ मध्वदः साक्षान्मोक्षसुखभोक्तारः सम्यक् पराणनात् सुपर्णशब्दिता नित्यं निविशन्ते, यस्मिन् स्थितास्ते पुनरपि मानसयज्ञं कुर्वाणा अस्मा एव भक्त्याद्यलङ्कृतं मनआख्यं सोममधिकं सुवन्ति। चशब्दात् कदाचित् स्वेच्छया द्रव्ययज्ञमपि कुर्वाणा अधिकाय विष्णवे सोममप्यभिषुवते। तस्य विष्णोरेव हि पिप्पलमग्रे प्रथमं स्वाद्वाहुः। पश्चात् तेन दत्तमेव ह्यन्येषां स्वल्पमपि स्वादु भवेत्। अत एव तदज्ञस्य तद्भोगासिद्धिः" इत्यादि। एतेन न उन्नशत् नाश्नातीति चार्थान्तरमुक्तं भवति।

वृक्षे स्थित्वा मध्वदः सुपर्णाः यस्मिन्नश्नति[1] निविशन्ते, तदाधारत्वेन सुवते च, तस्यैव सुपर्णस्य स्वादु पिप्पलम्। अन्यस्तु स्वादुवदश्नाति, न स्वादु। यावत् पितरं परमात्मानं न वेदेत्यर्थः।

"सुपर्णौ द्वौ शरीरस्थौ जीवश्च परमस्तथा। पारवश्यादनाज्जीवस्तत्राऽत्तीति श्रुतौ श्रुतः। स्ववशेनादनाद् विष्णुर्नात्तीत्यत्ताऽपि सन् श्रुतः[2]। स एव हि शुभस्यात्ता जीवोऽत्ताऽस्यैव[3] वेदनात्" इति कूर्मसंहितायाम्। "सर्वं वा अत्तीति तददितेरदितित्वम्", "यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः", "अत्ता चराचरग्रहणात्", "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इत्यादेश्च।

"जीवो मुक्तोऽपि नो जीवान् परमात्मानमेव च। वेत्ति सर्वात्मना विष्णुर्वेत्त्येकः पुरुषोत्तमः। तस्य प्रसादतः किञ्चिद् ब्रह्माद्या अपि जानते। अन्यजीवानपेक्ष्यैको जानाति तु[4] चतुर्मुखः। सामस्त्येन तदन्ये तु लेशज्ञानाः क्रमात् स्मृताः" इति निर्णये। "तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप" इत्यादि च। "[5]अज्ञा जीवास्तु कथ्यन्ते मुक्ता अप्यल्पवेदनात्। ज्ञ इत्येवोच्यते नित्यं सर्ववेत्तृत्वतो हरिः" इति वैशेष्ये। "अनाद्यविद्ययाऽन्धत्वं जीवस्य यदि योग्यता। प्रयत्नश्चानुकूलः स्यादन्तवद् भवति ध्रुवम्। नित्यमेवान्यथाऽन्धत्वमयोग्या मानुषादयः। बद्धत्वं सर्वजीवानां नियमान्नित्यमेव च। बद्धत्वं विष्णवधीनत्वमन्धत्वं तददर्शनम्। अतः क्वचिदनित्यत्वमन्धताया भविष्यति। मुक्तस्यापि तु बद्धत्वमस्ति यत् स हरेर्वशः। मुक्ताख्या दुःखमोक्षात्[6] स्याद् बद्धाख्या हर्यधीनतः[7]। नित्यबद्धा अपि ततो मुक्ता दुःखविमोक्षतः। नित्यमुक्तस्त्वेक एव हरिर्नारायणः प्रभुः। 'स्वतन्त्रत्वात् स्वतन्त्रत्वं तस्यैकस्य नचापरे" इति मुक्तिविवेके[8]। "शतं सहस्राणि चतुर्दशेह परा गतिर्जीवगणस्य दैत्य। आरोहणं तत्कृतमेव विद्धि स्थानं तथा निःसरणं च तेषाम्[10]", "कृष्णो मुक्तैरिज्यते

---

१ "यस्मिन्नश्नन्ति" इति प्र. पाठः प्रामादिक एव।

२ "–त्यत्राऽपि संश्रुतः" इति प्र. पाठोऽपि प्रमाद एव।

३ "जीवोऽत्त्यस्यैव" इति च क्वचित्।

४ "जानाति च चतु–" इति प्र. पाठः।

५ एतेन "योविद्ययाऽन्धः स तु नित्यबद्धः" इत्यादि द्वितीयपद्यं व्याख्याति। अनेनैव "ज्ञाज्ञौ द्वावजावीशानीशौ" इति श्वेताश्वतराणां श्रुतिश्चात्र संवादितया स्फोरिता भवति।

६ "बन्धमोक्षात्" इति क्वचित् पाठान्तरम्।

७ "हर्यधीनता" इति प्र. पाठः प्रामादिकः। हर्यधीनतः हर्यधीनत्वात्।

८ स्वतन्त्रत्वात् हरिरेक एव नित्यमुक्तः। स्वतन्त्रत्वं च तस्यैकस्यैव। नापरे पुरुषे स्वतन्त्रत्वम्। नापरे स्वतन्त्रा इति वा।

९ "मुक्तविवेके" इति प्र. पाठः।

१० चतुर्दशशतं सहस्राणि चतुर्दशलक्षाणि जीवस्य परलोकसम्बन्धिन्यो गतयः सन्ति। तन्निबन्धनमेव स्वर्गाद्यारोहणं तत्रावस्थानं ततो निःसरणं च जीवनम्।

वीतमोहैः", "मुक्तानां परमा गतिः" इत्यादि[1] भारते। "कलाः पञ्चदश त्यक्त्वा श्वेतद्वीपनिवासिनाम्[2]। मुक्ताख्या विष्णवधीनास्ते स्वाधिकानां वशे स्थिताः। [3]नचास्मादधिकं किञ्चित् सुखमस्ति हरेर्विना। नित्यमुक्तः स एवैकः [4]स्वतन्त्रः सन् यतः सदा" इति माहात्म्ये ॥ * ॥

[5]देहस्थोऽपि न देहस्थो विद्वान् स्वप्नाद् यथोत्थितः।
अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृग् यथा ॥ ८ ॥

"शरीरस्थोऽपि विद्वत्त्वान्न विष्णुर्बध्यते क्वचित्। अविद्वत्त्वात्तु तत्रैव देहे जीवस्तु बध्यते। स्वप्नदृग्वदिमे जीवा हरिः स्वप्नोत्थितो यथा। [6]सदा तमोविहीनोऽपि ज्ञापनार्थमुदीर्यते" इति विवेके ॥ * ॥

[7]इन्द्रियैरिन्द्रियार्थेषु गुणैरपि गुणेषु च।
गृह्यमाणेष्वहङ्कुर्यान्न विद्वान् यस्त्वविक्रियः ॥ ९ ॥

गुणैरपि गुणेषु। अप्रधानैर्जीवैरप्रधानेषु विषयेषु।

---

१ "इति भारते" इति प्र. पाठः।

२ श्रद्धादिनामान्ताः पञ्चदश कलाः त्यक्त्वा केवलं षोडश्याः कलाया जीवस्वरूपस्य श्वेतद्वीपनिवासो नाम मुक्तिरित्यर्थः।

३ मुक्तसुखादधिकं सुखं नास्ति हरेः सुखं विना। "हरिं विना" इति प्र. पाठः।

४ "स्वतन्त्रः स यतः" इति प्र. पाठः। "स्वतन्त्रोऽयं यतः" इति क्वचित्। हरिरेक एव नित्यमुक्तः। यतः स एक एव स्वतन्त्रः सन्, परानधीनसत्ताक इत्येतत्। पराधीनतया स्थितिर्बन्ध इति ह्युक्तम्।

५ "विद्वान् सर्वज्ञः ईश्वरः स्वेच्छया देहस्थोऽपि न देहस्थः। देहस्थात् जीवाद् विलक्षणः। दुःखविकारवान् न भवतीत्यर्थः। कुत इत्यत आह—स्वप्नादिति। स्वप्नदुःखादुत्थित इव। स्वस्मिन् दुःखारोपरहितत्वादिति भावः। अदेहस्थोऽपि देहस्थासुरादन्योऽपि जीवः देहस्थः सन् कुमतिर्भवति। स्वस्मिन् देहादिगतधर्मारोपवान् भवति। तेन नीचतादिविकारवानिति भावः। स्वप्नदृक् स्वप्नदेहे जाग्रद्देहाभेदभ्रमवान् दुःखी यथा तथेति भावः" इति प्राचीनटीका। विष्णुः स्वातन्त्र्येण देहस्थोऽपि तन्निबन्धनविकाराभावान्न देहस्थः। जीवस्तु स्वातन्त्र्येण न देहस्थः, अथाप्यभिमानाद् देहस्थ इति वा।

६ 'हरिः स्वप्नोत्थितो यथा' इत्युक्तम्। ननूत्थानं पूर्वं स्वप्नमपेक्षते। तेन हरेरपि स्वप्नाद्यज्ञानं प्राप्तम्? न प्राप्तम्। स्वप्नशीलस्य जीवस्य बुद्ध्यारोहाय हीदमीदृगुदाहरणमुपात्तम्। नैतावता दृष्टान्ते सर्वसाम्यमित्याह—सदा तमोविहीनोऽपि।

७ "गुणैः ईश्वराधीनैर्जीवैः कर्तृभिः इन्द्रियैः इन्द्रियार्थेषु गृह्यमाणेषु सत्सु ये गुणा दुःखादयः प्राप्नुवन्ति तेषु गुणेषु ईश्वराधीनेषु दुःखादिषु अहङ्कुर्यात्। जीवः अहं दुःखीति दुःखं स्वस्मिन्नारोपयेदित्यर्थः। तेन विक्रियते च। यो विद्वान् तत् न कुर्यात् स्वस्मिन् दुःखारोपं न करोति, अतः अविक्रियः नीचताविकारलक्षणसंसाररहितः" इति

85

"आत्मनो वशगैर्जीवैरात्मनो वशगेषु च । [1]दुःखेषु गृह्यमाणेषु मनआदिभिरिन्द्रियैः । अहं दुःखीति [2]नैवेशस्त्वहङ्कुर्यात् परः पुमान् । जीवगं त्वेव तद् दुःखं विष्णुः पश्यति सर्वदा । अतो न दुःखभाग् विष्णुः स्वातन्त्र्यात् पुरुषोत्तमः । पारतन्त्र्यादहं दुःखी-त्येवं जीवः प्रपश्यति । तस्मात् स दुःखभागुक्तो यावदीशः प्रसीदति" इति स्वातन्त्र्ये ॥ * ॥

[3]दैवाधीने शरीरेऽस्मिन् गुणभाव्येन कर्मणा ।
वर्तमानोऽबुधस्तत्र कर्तास्मीति निबद्धयते ॥ १० ॥

गुणभाव्येन कर्मणा । गुणभूतः अस्वतन्त्रोऽहमस्मिन् कर्मणीति भावनीयेन ।

"अस्वतन्त्रः स्वतन्त्रोऽस्मीत्येवं[4] जीवः प्रभावयन् । बद्धयते हीशकोपेन राजभावन-भृत्यवत्[5]" इति च ॥ * ॥

[6]एवं विरक्तः शयन आसनाटनमज्जने[7] ।
दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ॥ ११ ॥

प्राचीनटीका । अथच गुणैरीश्वराधीनैर्जीवैः कर्तृभिः, गुणैरीश्वराधीनैरिन्द्रियैः करणैः, गुणेष्वीश्वराधीनेषु इन्द्रियार्थेषु दुःखहेतुषु विषयेषु गृह्यमाणेष्विति वा ।

१ अन्ततः प्रतिकूलतया दुःखसाधनेष्वित्यर्थः ।

२ "नैवेशो ह्यहङ्कुर्यात्" इति क्वचित् । "नैवेश अहङ्कुर्यात्" इति च ।

३ "दैवं अदृष्टप्रेरकः परमात्मा, तस्याधीने, सर्वव्यापारेषु तेन प्रेर्यमाणे अस्मिन् शरीरे स्थितः जीवः गुणभाव्येन, गुणः अप्रधानः, अस्वतन्त्रोऽहमस्मिन् कर्मणि इति भावनीयेन अनुसन्धानार्हेण कर्मणा सह वर्तमानः, तत्वदेवैः क्रियमाणं कर्म कुर्वन्नित्यर्थः । अबुधः सर्वव्यापारेष्वीश्वरस्य स्वातन्त्र्यमजानन् अहमेव कर्तास्मीति स्वातन्त्र्यारोपेण निबद्धयते स्वस्मिन्नविद्यमानमीश्वरस्वातन्त्र्यमनुसन्दधानः तदपराधादीशेन बन्धवान् भवतीति भावः" इति प्राचीनटीका ।

४ "-स्मीत्येव जीवः" इति पाठान्तरम् ।

५ "राजभावेन भृत्यवत्" इति प्र. पाठः । आत्मानं राजानं भावयतीति राजभावनः । स चासौ भृत्यस्तद्वत् ।

६ "एवं विद्वान्, अन्तर्यामिणः सर्वव्यापारेषु स्वातन्त्र्यं जीवस्य पारतन्त्र्यं च विद्वान् अनुसन्दधानः, शयनादिषु विषयभोगव्यापारादिषु विरक्तः । स्वेच्छामात्रेण विषयाणामलाभादिति भावः । गुणान् विषयान् आददत् अनुभवन्नपि, तथा परमात्मनि स्वातन्त्र्यादिज्ञानरहित इव बध्यते इति न । प्रकृतिस्थोऽपि भूतबन्धवानपि, देहस्थोऽपीत्यर्थः । असंसक्तः विषयासक्तिरहितो भवति । यथा वाय्वादिदेवानां विषयसम्बन्धकृतविकारो नास्ति" इति प्राचीनटीका । यथा खमाकाशः अनिलश्च सर्वगतावप्यसंसक्तौ । यथा सविता जलादिषु प्रतिबिम्बितोऽपि चलनपङ्कादिनाऽसंसक्तस्तथेति वा ।

७ आसनानि अटनानि मज्जनानि च । तेषां समाहारः । क्वचित् कोशे—"आसनाशनमज्जने" इति पठ्यते । तत्तु "-भोजनश्रवणादिषु" इत्युत्तरत्र श्रवणात् पुनरुक्तम् ।

न तथा बद्धयते[1] विद्वांस्तत्रतत्राऽददद्[2] गुणान् ।
प्रकृतिस्थोऽप्यसंसक्तो यथा खं सविताऽनिलः ॥ १२ ॥

एवं विरक्तः शयने । [3]एवमस्वातन्त्र्येण नित्यबद्धोऽपि । एवमात्मनोः स्वातन्त्र्यपारतन्त्र्ययोर्विद्वान् जीवोऽप्यविद्वज्जीववन्न बद्धयते । [4]एवं विद्वानित्यन्वयः ।

"नित्यबद्धोऽपि जीवो य आत्मनो नित्यबद्धताम् । [5]विष्णुना नित्यमुक्तत्वं तस्य वेत्ति स मुच्यते । तदधीनत्वबन्धे तु विद्यमानेऽप्यदुःखभाक् । देहस्थोऽपि न दुःखी स्यादन्यवत् किमु मुक्तिगः" इति परायणे[6] ॥ * ॥

वैशारद्येक्षयाऽसङ्गशितया च्छिन्नसंशयः ।
प्रतिबुद्ध इव स्वप्नान्नानात्वाद् विनिवर्तते[7] ॥ १३ ॥

"नानात्वमिति वै मिथ्याज्ञानं कुत्रचिदुच्यते । वस्तुयाथात्म्यतोऽन्यत्वाज्ज्ञानस्योज्झे [8]विवक्षिते" इति वाल्लभ्ये ॥ * ॥

---

१ "वध्यते" इति पाठान्तरम् । बध्यत इत्येवार्थः ।

२ "तत्राऽदयन्" इति प्र. पाठः । "तत्राऽददन्" इति केचित् पठन्ति ।

३ एवंशब्दस्य प्रथमं तावदपिशब्दाध्याहारेणार्थमाह— एवमस्वातन्त्र्येण । अथच उत्तरश्लोके विद्वानित्यनेन अन्वाय्य अध्याहारनिरपेक्षमर्थान्तरमाह—एवमात्मनोः । आत्मनोः परात्मजीवात्मनोः । परमात्मनः स्वस्य चेति यावत् ।

४ पूर्वस्मिन्नर्थेऽपिशब्दवदत्रापि विद्वानित्यध्याहार इति भ्रमं वारयति—एवं विद्वानित्यन्वयः । नत्वध्याहार इति ।

५ आत्मनः स्वस्य विष्णुना नित्यबद्धताम् । तस्य विष्णोर्नित्यमुक्तत्वं च ।

६ "इति प्राथम्ये" इति प्र. पाठः ।

७ "वैशारद्या योगकुशलेन सम्पादितया, परमविपश्चिण्या वा, असङ्गेन विषयेषु दृढविरागेण शितया अतिसमर्थया ईक्षया अपरोक्षज्ञानेन छिन्नः संशयः यस्य सः । स्वप्नात् प्रतिबुद्धः स्वाप्नभ्रान्तिरहित इव नानात्वात् भ्रमात्, तस्मिन्नतदिति ग्रहणात् बन्धमूलकारणात् विनिवर्तते रहितो भवति" इति प्राचीनटीका ।

८ कुत्रचिदित्युक्तमेव मुखत आह—"ज्ञानस्योज्झे विवक्षिते । यत्र ज्ञानस्योज्झः वर्जनं विवक्षितम्, यत्राज्ञानं निरुरूपयिषितं तत्र नानात्वमिति मिथ्याज्ञानरूपमज्ञानमुच्यते । नानात्वज्ञानस्य उज्झे वर्जने विवक्षिते, यत्र नानात्वं निवर्तनीयतया निन्द्यत इति यावत्, तत्र सर्वत्रापि नानात्वमिति मिथ्याज्ञानमुच्यते न भेद इति वा । "–स्योज्झो विवक्षितः" इति प्र. पाठः । क्वचित् कोशेषु च ।

[1]न स्तुवीत न निन्देत कुर्वतः साध्वसाधु वा ।
वदतो गुणदोषाभ्यां वर्जितः समदृङ् मुनिः ॥ १६ ॥

"दोषश्चैव गुणश्चोभावीशतन्त्रौ न मे वशौ । इति जानन्नदोषः स्याद् वर्जितोऽल्पगुणेन[2] च" इति प्राथम्ये ॥ * ॥

न कुर्यान्न वदेत् किञ्चिन्न ध्यायेत् साध्वसाधु वा ।
आत्मारामोऽनया वृत्त्या विचरेज्जडवत् स्थितः[3] ॥ १७ ॥

"[4]स्थितिशब्देन नियमः क्वचिज्जीवनमुच्यते । उत्थितत्वं क्वचिच्चैव क्वचिद्

---

१ "समदृक् शत्रुमित्रयोः साम्यदृक् । इष्टानिष्टयोः स्वकर्मप्राप्तत्वनिश्चयवानिति भावः । साधु वा असाधु वा कुर्वतः वदतश्च जनस्य गुणदोषान् न स्तुवीत न निन्देत । गुणेन अल्पगुणेन वर्जितः । महागुणवानिति भावः । दोषेण च वर्जितः । गुणदोषयोरीश्वराधीनत्वबुद्धिमानिति भावः" इति प्राचीनटीका ।

२ अल्पत्वापादकेन लौकिकगुणेन वर्जितः । मोक्षोपयुक्तमहागुणसम्पन्नत्वात् । गुणेन प्रशंसादिना दोषेण निन्दादिना च वर्जितोऽलिप्त इति च । "साध्वसाधुकर्तृवक्तृनिष्ठाभ्यां गुणदोषाभ्यां वर्जितः अनभिभूतः" इति शुकदेवः । "गुणदोषाभ्यां वर्जितः मानापमानयोस्तुल्यदृष्टिः" इति वीरराघवः ।

३ "–जडवन्मुनिः" इति सर्वत्र प्रचुरः पाठः । "स्थितः" इति तु तात्पर्यकृत्सम्मत इति भाति । यादवेन्द्रतीर्थसम्मतश्चायं पाठः । तथाहि तद्व्याख्यानम्–"अपरोक्षज्ञानी आत्मारामः आत्मध्यानादिप्राप्तानन्दवानिति भावः । अनया वृत्त्या देहादावभिमानाभावलक्षणव्यापारेण, 'जडवत् स्थितः' इति पाठः । स्थितिः उक्तनियमः । तत्सम्पन्नः स्थितः । विचरेत् परमात्मानं स्मरेदित्यर्थः । देहपोषणादौ विशेषतो यत्नरहितः सन् न कुर्यात् दर्थार्जनादिकम् । अन्नादिदातारं प्रति जडवत् न वदेत् । किञ्चिदपि कार्यं न ध्यायेत् विषयलाभार्थम् । अन्नाद्यप्राप्तौ वा इदमसाध्विति न ध्यायेत् । किन्तु साधु कुर्यात् । विष्णुप्रीतिकरं ध्यानादिकं कुर्यादित्यर्थः । उक्ताः सर्वे गुणा अपरोक्षिणः सिद्धाः । जिज्ञासुभिरवश्यं साधनीया इति भावः" इत्यादि । अथचापुरुषार्थहेतुं साधकः साध्वसाधु वा केवललौकिकं कर्म न कुर्यात् । लौकिकीं वाचं न वदेत् । लौकिकमर्थं न ध्यायेत् । एवं लोकव्यवहारेऽनभिज्ञ इव जडवत् अज्ञवत् स्तब्धवच्च विचरेदिति वा । "स्वस्मिन् साध्वसाधुकारिषु स्वयं मनोवाक्कायैर्न साध्वसाधुकारी" इति सुदर्शनसूरिः । "स्वयमपि किञ्चिल्लौकिकं कर्म साध्वसाधु वा न कुर्यान्न वदेन्न ध्यायेच्च" इति वीरराघवः । "किञ्चिदैहिकामुष्मिकफलविषयं साध्वसाधु वा न कुर्यात् न वदेत् न ध्यायेत् । देहवाङ्मनसां नियमनं भगवति कुर्यात्" इति शुकदेवः । "दैहिके कर्मण्युदासीनो मुक्तः, इतरो बद्ध इत्यर्थः" इति । श्रीधरस्वामी ।

४ इदं तात्पर्यवचनं कस्य श्लोकस्य व्याख्यानाय प्रवृत्तमित्यत्र बहवो विभ्रान्ताः "शब्दब्रह्मणि निष्णातः" इत्युत्तरश्लोकव्याख्यानरूपमिति विजयध्वजीयं तात्पर्यदीपिका च । तत्र स्थितिपदाश्रवणात् स्फुटमस्वारस्यम् । "क्षित्युद्भवत्राण–" इति विंशे श्लोके श्रुतस्थितिपदविवरणमित्यन्ये । उचितं तत् । अथापि पौर्वापर्यभङ्गो भवति ।

गतिविरोधि च[1]'' इति शब्दनिर्णये ॥ * ॥

शब्दब्रह्मणि निष्णातो न निष्णायात् परे यदि।
श्रमस्तस्य [2]श्रमफलो ह्यधेनुमिव रक्षतः॥ १८॥

गां दुग्धदोहामसतीं च भार्यां
देहं पराधीनमसत्प्रजां च।
वित्तं त्वतीर्थीकृतमङ्ग वाचं
हीनां मया रक्षति दुःखदुःखी[3] ॥ १९॥

तदा तु ''दुग्धदोहाम्-'' इत्येकोनविंशश्लोकव्याख्यानानन्तरं हीदं पठितव्यम्। ततश्च विंशं पद्यं कटाक्षयन् 'जडवत् स्थितः' इति सप्तदशं श्लोकं व्याचख्याविति तु युक्ततमम्। तथा च प्रकृते स्थितिपदेन नियमो जीवनं चोच्यते। स्थितः नियममास्थितः। जडवदुदरपोषणाद्यर्थं प्रयत्नमकुर्वन्नेव स्थितः जीवनं यापयन्निति।

१ ''गतिविरोधिता'' इति प्र. पाठः। गतिविरोधि अगमनमित्यर्थः। नियमे यथा—ब्रह्मचर्ये तिष्ठति। जीवने यथा—वने तिष्ठन्ति व्याधाः। उत्थितत्वं यथा– ''आ सूर्यदर्शनात् तिष्ठेत्''। अगमनं यथा– किमत्रैव तिष्ठसि?

२ ''श्रमफलो–'' इति प्र. पाठः। शब्दब्रह्मणि वेदे निष्णातः वेदाध्ययनादिलक्षणनियमवान् परे सम्पूर्णकल्याणगुणे ब्रह्मणि यदि न निष्णायात्, परमात्मगुणानुसन्धाने नियमवान् न स्यात्, यदि परमात्मध्यानासक्तो न भवेदित्यर्थः। तस्य पुरुषस्य श्रमः गुरुकुले वेदपाठादिश्रमः भ्रमफलः स्वर्गभूभ्रमणफलकः। श्रमः दुःखानुभवेन मनःक्षोभलक्षणं भ्रमणं वा फलं यस्य स तथाविधो भवति। नतु नित्यसौख्यसम्पादकः। परब्रह्मणि निष्णातस्य फलं नित्यसौख्यमिति भावः। अधेनुं क्षीरदोहरहितां गां रक्षतः रक्षणश्रमवतः क्षीरवणिजः तद्रक्षणायाटव्यां तृणाहरणार्थं भ्रमणं यथा दुःखफलं तथा'' इति प्राचीनटीका। अधेनुरित्यदोग्ध्री चिरप्रसूता वन्ध्या वा गौर्वेदेषूच्यते। तथाहि—''अधेन्वा चरति मायया वाचं शुश्रुवाँ अफलामपुष्पाम्'' इत्यृग्वेदे(१०–७१–५)। ''अधेनुं दस्रा स्तर्यं विषक्तामपिन्वतं शयवे अश्विना गाम्'' (१–११७–२०) इति च।

३ अत्र यादवेन्द्रतीर्थीयम्–''दुग्धायाः पूर्वं सञ्जातदोहायाः दोहः पुनर्दोहनं यस्याः सा दुग्धदोहा क्षीररहिता(?)। (अस्मिन् पक्षे दुग्धादोहेति वक्तव्ये पूर्वपदह्रस्वत्वं छान्दसमिति वक्तव्यम्।) पूर्वदुग्धा सती पुनर्दोहनवतीति वा। तां क्षीररहितां गां क्षीरमात्रप्रयोजनः यः वणिक् रक्षति स दुःखदुःखी यथा। योऽसतीं भार्यां रक्षति स यथा। यः पराधीनं नित्यं मृत्युगृहीतं ईश्वरसेवानर्हं वा देहं रक्षति स यथा। असत्प्रजाम्, असन्तं पुत्रं यः रक्षति स यथा। अतीर्थीकृतं महत्सु असमर्पितं वित्तं यः रक्षति स यथा। तथा मया हीनां कर्ममात्रपरतया योजितां वेदवाचं यः रक्षति सः दुःखादपि पुनर्दुःखमेवाप्नोति'' इति। अथच दुग्ध एव दोहः पयो यस्याः सा दुग्धदोहा निःक्षीरा गौः। ''पराधीनं परप्रेष्यम्'' इति विजयध्वजीयम्। ''प्रतिक्षणं दुःखहेतुम्'' इति श्रीधरस्वाम्यादयः। ''अतीर्थीकृतमपात्रे दत्तं पात्रे च न दत्तम्'' इति शुकदेवः। ''न्यायागतस्य वित्तस्य बोद्धव्यौ द्वौ व्यतिक्रमौ। अपात्रे प्रतिपत्तिश्च पात्रे यच्चैव दीयते'' इति भारते।

यस्यां न मे पावनमङ्ग कर्म [1]स्थित्युद्भवत्राणनिरोधमस्य ।
लीलावतारेप्सितकर्म[2] वा स्याद् वन्ध्यां गिरं तां बिभृयान्न धीरः[3] ॥ २० ॥

"दुग्धदोहां तु गां रक्षेत् क्षीरमात्रप्रयोजनः । यथा तद्वद्धरेरन्यद्[4]वाचो धारणमिष्यते" इति हरिवंशेषु ॥ * ॥

एवं जिज्ञासयाऽपोह्य नानात्वभ्रममात्मनि ।
उपारमेत विरजं मनो मय्यर्प्य सर्वगे[5] ॥ २१ ॥

[6]अर्थादन्यथात्वेन मनसः परिवर्तनं नानात्वभ्रमः ।

"जीवस्येशत्वविज्ञानं जीवानामेकता तथा । ईशस्य बहुताज्ञानमीशस्यानीशता तथा । जगतोऽसत्यताज्ञानं नानात्वभ्रम उच्यते" इति विवेके ॥ * ॥

---

१ "स्थित्युद्भवप्राण–" इति प्र. पाठः । २ "लीलावतारेप्सितजन्म" इति च ।

३ अत्र पद्ये द्वितीयचरणे "स्थित्युद्भवत्राणनिरोधनस्य" इति च पाठान्तरं यादवेन्द्रतीर्थाभिमतम् । तथाहि तद्व्याख्यानम्– "(स्थितिः नियमनम्, उद्भवः उत्पत्तिः, त्राणं) पोषणम्, निरोधनं सर्वकार्यनाशः । एतानि येन सः स्थित्यादिकर्ता तस्य मे कर्म स्वरूपसत्ताप्रदानादिव्यापारः । अस्य जगतः स्थित्यादिनिरोधमुद्दिश्य यत् कर्मेति वा । स्थित्युद्भवत्राणनिरोधाः यस्य(सकाशात्) तत् कर्मेति वा । यस्यां वाचि न प्रतिपाद्यम् । मे लीलावतारैः एधितं प्रकाशितं अभिवृद्धं वा कर्म असुरनिग्रहेण देवपरिपालनादि वा यस्यां न प्रतिपाद्यम् । तां वन्ध्यां निष्फलां गिरं ग्राम्यगाथाः, वृथालापाः, कलाविद्या वा न बिभृयात् (धीरः) जितभ्रमः । कदाचित् मनसः तत्र प्रवृत्तावपि धीरः स्यात् मनोनिवर्तने धैर्यवान् स्यादिति वा" इति । अत्र स्थितित्राणशब्दयोः पौनरुक्त्यशङ्का "स्थितिशब्देन नियमः" इति पूर्वश्लोकतात्पर्येणैव परिहृतः । सृष्टिस्थितिसंहारा उद्भवत्राणनिरोधपदैरुक्ता इति स्थितिपदेनात्र नियमनमुच्यत इति ।

४ "–रन्यवाचो–" इति प्र. पाठः । "–रन्या वाचो–" (?) इति क्वचित् । यथा क्षीरमात्रप्रयोजनो जनः दुःखमात्रफलाय दुग्धदोहां गां रक्षेत् तद्वत् हरिविषयाद् वाचः अन्यद् वाचो धारणं दुःखमात्रफलमिष्यते । अन्यद् अन्यस्या वाच इति वा । क्रियाविशेषणं वा । अन्यदन्यविषयत्वेन । एतेनैव "अधेनुमिव रक्षतः" इति पूर्वश्लोकोऽपि व्याख्यातः । अधेनुं दुग्धदोहां गामिति । वेदवाचः हरेरन्यविषयत्वेन धारणमिति च ।

५ "एवं विविधविषयविरागसम्पत्त्यनन्तरं जिज्ञासया श्रवणाद्यावृत्त्या आत्मनि नानात्वभ्रमं जीवस्येशत्वभ्रमं स्वातन्त्र्याद्यारोपलक्षणभ्रमं कुसमयसञ्जनितभ्रमं वाऽपोह्य निराकृत्य सर्वगे जीवादिषु स्वमूर्तिभिः व्याप्ते मयि, विरजं रजोभागेन तत्कार्येण च रहितं मयि ध्यानातिशयेनेति भावः । मनः समर्प्य समाधिं सम्पाद्येति भावः । उपारमेत बन्धरहितः स्यात् । समाधिप्राप्तादपरोक्षादिति भावः" इति यादवेन्द्रतीर्थाः ।

६ पूर्वं "नानात्वाद् विनिवर्तते" इत्यत्र नानात्वं नाम भ्रम इति व्याख्यातम् । तदयुक्तम् । अत्र नानात्वभ्रम इति प्रयोगादिति मन्दाशङ्कामपाकर्तुं स्फुटं विवक्षितमर्थमाह—अर्थादन्यथात्वेन । तथाच नानात्वेन वस्तुस्थितितोऽन्यथाऽन्यथा मनसो भ्रमणं नानात्वभ्रम इत्युक्तं भवति ।

[1]त्वं ब्रह्म परमं व्योम पुरुषः प्रकृतेः परः ।
अवतीर्णोऽसि भगवान् स्वेच्छोपात्तपृथग्वपुः ॥ २७ ॥

स्वेच्छोपात्तपृथग्वपुः । वसुदेवादिशरीरं स्वेच्छयाऽनेन[2] स्वीकृतमिति ।

"नित्यानन्दशरीरोऽपि वसुदेवादिदेहगः । प्रदर्शयेज्जनिं स्वस्य नित्यं देहविवर्जितः[3] । वसुदेवादिदेहेषु प्रवेशस्तस्य[4] भण्यते । देहोपादानमिति तु नह्यन्यो देह[5] इष्यते । अन्याभिमतदेहेषु प्रविष्टः सर्वदा हरिः । नान्यानभिमतो देहो विष्णोरस्ति कदाचन । अतोऽशरीरो भगवान् [6]पुत्रताभिमतिस्तु या । वसुदेवादिकानां तु सैव मिथ्यामतिर्भवेत् । [7]अन्याहम्भावयुग्देह एवासौ हरिरास्थितः । न तदन्येषु देहेषु क्वचित् तस्य प्रवेशनम् । मम पुत्रस्त्वयमिति भ्रामणाय[8] यदा हरिः[9] । वसुदेवादिदेहेषु

---

१ "त्वं परमं ब्रह्म निरतिशयज्ञानानन्दादिपूर्णः । उत्तरवक्ता त्वत्सदृशो नास्तीति भावः । परमं व्योम । "व्योतं जगदिदं यस्यां सा व्योम श्रीरुदाहृता" । तस्याः प्रकृतेरपि परमः त्वं पुरुषश्च । स्वेच्छया कर्माधीनतां विना उपात्तं स्वीकृतं पृथक् अन्याभिमानविषयं वसुदेवादिसम्बन्धि वपुः शरीरं येन सः । पूर्वं वसुदेवादिषु स्थित्वेति भावः । अवतीर्णोऽसि । अतः भवान् सर्वगुरूत्तम इति भावः" इति यादवेन्द्रतीर्थीयम् । अथच त्वं परमं ब्रह्म । त्वं व्योम । त्वं पुरुषः । ननु "प्रकृतिः परमं ब्रह्म", 'व्योम श्रीरुदाहृता", "द्वाविमौ पुरुषौ" इत्यादिना मूलप्रकृतिरप्येतैः पदैरुच्यते ? अत आह– प्रकृतेरपि परो विलक्षण उत्तमश्च । यतः प्रकृतेरपि पुरुषः पतिर्भर्ता । "मम योनिरप्सु" इति श्रवणात् । अतश्च पुरुषादिपदैरपि त्वमेव मुख्यत उच्यसे । "स्वेषां स्वीयानामिच्छया" इति श्रीधरस्वाम्यादयः । "स्वेषां सर्वेषामेव भक्तानामिच्छायै तां पूरयितुम्" इति जीवगोस्वामी । "स्वेच्छया उपात्तानि पृथक् नानाविधानि वपूंषि येन" इति वीरराघवः । "पृथक् नानाकाराणि वपूंषि" इति शुकदेवः । सर्वोऽप्ययमर्थः सम्मत एव । कञ्चनापूर्वमर्थविशेषं लम्भयितुं हि तात्पर्यं प्रवृत्तम् ।

२ "स्वेच्छया तेन" इति प्र. पाठः । ३ जडेन भिन्नेन वा देहेन विवर्जित इत्यर्थः ।

४ "प्रवेशः स्वस्य" इति क्वचित् ।

५ अन्यः अन्यादृशः देहो देहप्रवेशो नेष्यते । स्वरूपादन्यो देहो वोपादेयतया नेष्यते ।

६ ननु वसुदेवाज्जातस्य शरीरस्याभावे कथं वसुदेवपुत्रः ? भ्रान्तिरेवेयमित्याह—पुत्रताभिमतिस्तु या ।

७ उक्तमेव पुनर्दार्ढ्याय तात्पर्यद्योतनाय चोपसंहरन्नाह—अन्याहम्भावयुग्देहे । अहम्भावः । अहमनेन देहेन देहीति भावः । अभिमान इति यावत् ।

८ "भ्रमणाय" इति क्वचित् । प्र. पाठोऽपि तथा ।

९ "हरेः इति प्र. पाठः । मम पुत्रोऽयमिति भ्रामयितुं यदा हरिः वसुदेवादिशरीरेषु भवतीति शेषः । व्यक्तो भवतीति यावत्, तदा सा गतिः वसुदेवादिदेहप्रवेशः, तत्राभिव्यक्तिरिति यावत्, तस्य तनूपादानमित्युच्यते । स्वाभिव्यक्त्यर्थं वसुदेवादितनोरुपादानात् । तदेव पुनर्व्यक्तमुच्यते—अनुपात्तशरीरस्य । वसुदेवादितनुमुपादत्ते पितृतनुत्वेनेति ।

तनूपात्तिस्तु सा गतिः । अनुपात्तशरीरस्य तनूपात्तिरितीष्यते । तद्देहं पितृदेहत्व उपादत्ते यतो हरिः'' इति प्रकाशिकायाम्[1] ॥ * ॥

[2]ज्ञात्वाज्ञात्वाऽथ ये वै मां यावान् यश्चास्मि यादृशः ।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः ॥ ३२ ॥

[3]ज्ञात्वाज्ञात्वेति वीप्सा—

"ज्ञात्वाऽपि मम माहात्म्यं तत्रोत्सुकतया पुनः । विशेषाच्च विशेषेण ज्ञात्वा माम- श्नुतेऽधिकम्" इति विज्ञाने ॥ * ॥

[4]वैष्णवे बन्धुसत्कृत्या हृदि खे ध्याननिष्ठया ।
वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ॥ ४३ ॥

[5]स्थण्डिले मन्त्रहृदयैर्भोगैरात्मानमात्मनि ।
क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत माम् ॥ ४४ ॥

---

१ "प्रकाशसंहितायाम्" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

२ "अथ गुणसम्पत्त्यनन्तरं मां ज्ञात्वा जगदुत्पत्तिपालनादिकर्तारं ज्ञात्वा । वेदादिभिः गुरूपदेशैरिति भावः । अहं यावान् यादृशमहत्त्वोपेतः, यश्च यत्स्वरूपः, यादृशः यद्गुणसम्पन्नश्चास्मि तेनैव प्रकारेण मामथ पुनरपि ज्ञात्वा । परमात्मगुणोत्सुकतया पुनःपुनः श्रवणे प्रवृत्ता भवन्तीति भावः । अनन्यभावेन, अन्यस्मिन् देवान्तरेऽपि समतया विद्यमाना भक्तिः अन्यभावः, सा न भवति, परमात्मनि सर्वोत्कृष्टा भक्तिरनन्यभावः । तेन भजन्ति सेवन्ते ते भक्ततमाः'' इति यादवेन्द्रतीर्थीयम् ।

३ ज्ञात्वा अज्ञात्वा वेति केचिद् व्याचक्षते । सा भ्रान्तिरित्याह– ज्ञात्वाज्ञात्वेति । तत्र प्रमाणसंवादमप्याह– ज्ञात्वाऽपि । अश्नुते प्राप्नोति ।

४ "वैष्णवे बन्धुसत्कृत्या । बन्धौ या सत्कृतिः सत्कारस्तया । वैष्णवे शूद्रेऽपि स्थितं मां बन्धुमिव उपेक्षां विना पूजयेत् । प्रणामं विनेति भावः । हृदि खे हृदयाकाशे स्थितस्य अन्तर्यामिणः उक्तध्यानेन सह वासनावस्तुभिः पूजा कार्या । वायौ देवतायां मुख्यधिया वायुः सर्वदेवोत्तम इति बुद्ध्या मां तत्र पूजयेत् । तोये स्थितं मां तोयपुरस्कृतैः द्रव्यैः चन्दनपुष्पादिभिरर्चयेत्'' इति यादवेन्द्रतीर्थीयम् । "मुख्यधिया मुख्यप्राण इति बुद्ध्या" इति सुदर्शनसूरिः । भगवतो मुख्यप्रतीकमिति बुद्ध्या च । "तोयादिभिर्द्रव्यैस्तर्पणादिना" इति श्रीधरस्वामी ।

५ "स्थण्डिले भुवि कृतमण्डले मन्त्रहृदयैः नमोऽन्तैर्मन्त्रैः । आत्मनि स्वदेहे स्थितमात्मानं मां भोगैः आश्रमोचितान्नादिविषयैः अर्चयेत् । सर्वभूतेषु स्थितं क्षेत्रज्ञमन्तर्यामिणं मां यजेत । समत्वेन स्थानप्राप्तगुणवैलक्षण्यबुद्धिं विना सर्वगुणैः समत्वबुद्ध्या, उत्तमाधिकारिविवक्षयेयमुक्तिः'' इति यादवेन्द्रतीर्थाः । "स्थण्डिले भुवि मन्त्रहृदयैः रहस्यमन्त्रन्यासैः'' इति श्रीधरस्वाम्यादयः । "भूशब्देन चक्राब्जादिमण्डलसंस्कृतो देशो विवक्षितः'' इति वीरराघवः । "आत्मनि स्वशरीरे मनसि वा'' इति विजयध्वजीयम् ।

"सर्वदेवोत्तमो वायुरिति ज्ञानान्नचापरम् । प्रियमस्ति हरेः किञ्चित् तथा वायोर्हरेर्विदः[1] । भारतीवायुलक्ष्मीणामात्मनश्च यथाक्रमम् । आधिक्यज्ञानतो विष्णुः सर्वतः सम्प्रसीदति" इति माहात्म्ये । "वायुर्भीमो भीमनादो महौजाः सर्वेषां च प्राणिनां प्राणभूतः । [2]अनावृत्तिर्देहिनां देहपाते तस्माद् वायुर्देवदेवो विशिष्टः" इति मोक्षधर्मेषु । "तस्माद् वायुरेव व्यष्टिर्वायुः समष्टिरप[3] पुनर्मृत्युं जयति य एवं वेद" इति च । "पञ्चभूतमनोबुद्धिरुद्राणां प्रतिदेहकम् । बाह्यतश्चापि नेतृत्वाद् वायुर्व्यष्टिः समष्टिकः[4]" इति प्रभञ्जने ॥ * ॥

"[5]स्वात्मनिस्थो हरिः पूज्य आत्मनामाऽशनादिकैः । तत्सम्बन्धादात्मशब्दो जीवे स्यादुपचारतः" इत्यात्मसंहितायाम् ॥ * ॥

इत्येकादशस्कन्धे एकादशोऽध्यायः

[द्वादशोऽध्यायः]

न रोधयति मां योगो न साङ्ख्यं धर्म उद्धव[6] ।
न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा ॥ १ ॥

व्रतानि यज्ञाश्छन्दांसि[7] तीर्थानि नियमा यमाः ।
यथाऽवरुन्धे मत्सङ्गः सर्वदुःखापहो हि माम्[8] ॥ २ ॥

---

१ हरेर्विदः ज्ञानादपरं प्रियं नास्ति । "हरेर्विदः विष्णुज्ञानिनः" इत्यपि व्याचक्षते ।

२ देहिनां देहपाते सति तस्मिन् देहे अनस्य प्राणस्य अवृत्तिरवर्तनं भवति । अत एव प्राणनिर्गमात् स देहो मृत इत्युच्यते । अथच देहादुत्क्रान्तेन जीवेन सह प्राणस्याप्यावृत्तिरनुगमनमस्ति । जीवमादाय प्राण एव निष्क्रामतीत्यर्थः । अथच प्राणिनां प्राणोपासकानां सज्जीवानां चरमदेहपाते सति अनावृत्तिः अपुनरावृत्तिहेतुश्चायं भवति । "स एतान् ब्रह्म गमयति", "वायुश्च तदनुज्ञया" इत्यादिश्रुतिस्मृतिभ्यः ।

३ "-रथ पुनर्मृत्युम्" इति प्र. पाठः प्रामादिकः । अपमृत्युं जयतीत्यन्वयः ।

४ "-र्व्यष्टिसमष्टिकः" इति प्र. पाठः । रुद्रान्तानां सकलतत्त्वदेवानां जीवानां च प्रतिदेहमन्तर्नेतृत्वाद् व्यष्टिः । बहिर्नेतृत्वात् समष्टिरित्यर्थः । सर्वेषां सामूह्येनेशः समष्टिः । प्रतिव्यक्ति विशिष्येशो व्यष्टिः । परैरप्युक्तम्—"समष्टिरीशः सर्वेषाम्" इत्यादि । अष्टिरिति व्याप्तिर्नियमनार्था ।

५ "भोगैरात्मानमात्मनि" इत्येतत् प्रमाणेनैव व्याचष्टे—स्वात्मनिस्थ आत्मनामा हरिरशनादिकैर्भोगैः पूज्य इति । स्वात्मनि स्वशरीरे मनसि जीवे वा । तदेवाऽह—तत्सम्बन्धात्मशब्दो जीवे स्यात् । उपलक्षणमेतत् । शरीरे मनसि च स्यात् । तत्सम्बन्धादेव ।

६ "धर्म एवच" इति प्र. पाठः । ७ "यज्ञश्छन्दांसि" इति च ।

८ "यथाऽवरुन्धेन्मत्सङ्गः" इति पाठान्तरम् । "-रुन्धे सत्सङ्गः सर्वसङ्गापहो हि माम्" इति प्र. पाठः ।

86

"सङ्गस्तु गुणसम्प्रीतिर्गुणवत्त्वेऽतिनिश्चयात् । स चेद्धरौ भवेत् तेन मुच्यते नात्र संशयः । अपरोक्षदृशेर्हेतुर्भवेत् स स्याद् यदि क्षमः[१] । अन्यथा सुखभागेव यद् दृशिर्मोक्षकारणम्" इति दर्शने ॥ * ॥

ते नाधीतश्रुतिगणा नोपासितमहत्तमाः ।
अव्रतातप्ततपसो मत्सङ्गान्मामुपागताः[२] ॥ ७ ॥

केवलेन हि भावेन गोप्यो गावो नगा मृगाः ।
येऽन्ये मूढधियो नागाः सिद्धा मामापुरञ्जसा[३] ॥ ८ ॥

यं न योगेन साङ्ख्येन दानव्रततपोऽध्वरैः ।
व्याख्यास्वाध्यायसन्न्यासैः प्राप्नुयाद् यत्नवानपि[४] ॥ ९ ॥

"योगः वायुजयादिः । साङ्ख्यं तत्वज्ञानम् । स्वाध्याय उपनिषदः । छन्दांसि वेदाः । नियमाः शौचप्रभृतयः । यमाः अहिंसासत्यादयः । मयि सङ्गः गुणसम्प्रीतिर्भक्तिरित्यर्थः । यथा मामवरुन्धे प्रापयति तथा एते यज्ञादयः न रोधयन्ति न प्रापयन्तीत्यर्थः" इति यादवेन्द्रतीर्थाः । "धर्मः सामान्यतोऽहिंसादिः । स्वाध्यायो वेदजपः । तपः कृच्छ्रादि । त्यागः सन्यासः । दक्षिणाशब्देन सामान्यतो दानम् । व्रतानि एकादश्युपवासादीनि । यज्ञो देवपूजा । छन्दांसि रहस्यमन्त्राः । अवरुन्धे वशीकरोति" इति श्रीधरस्वामी । "योगः वर्णाश्रमोचितकर्मयोगः । स्वाध्यायो वेदाध्ययनम् । तपोऽनशनादि । इष्टं यागादि वैदिकम् । पूर्तं स्मार्तं कर्म । त्यागः सामान्यतो दानम् । दक्षिणा क्रत्वादिसाद्गुण्यार्थं दानम् । यज्ञाः पञ्चमहायज्ञाः" इति वीरराघवः । "योगो ध्यानम्" इति विजयध्वजीयम् । "व्रतानि चातुर्मास्यादीनि" इति विश्वनाथचक्रवर्ती । "तपः आलोचनात्मकं ज्ञानम् । त्यागो वैराग्यम् । दक्षिणा दानम्" इति शुकदेवः ।

१ स सङ्गः भक्तिरिति यावत्, यदि क्षमः समर्थः परिपूर्णतया, तदा अपरोक्षदृशेर्हेतुर्भवेत् । अन्यथा केवलं सुखं भाजयतीति स्वर्गादिसुखमात्रप्रापकः स्यात् । अपरोक्षज्ञानमन्तरा मोक्षासम्भवात् । यद् दृशिः साक्षान्मोक्षकारणम् । अपरोक्षद्वारैव भक्तिर्मोक्षकारणमिति । अथवा स साधको यदि क्षमः अपरोक्षज्ञानयोग्यपरिपाकवान् तदा अपरोक्षदृशेर्हेतुः भवेत् । अन्यथा तदभावे साधकः केवलमैहिकसुखभागेव स्यादिति । "मद्दृशिर्मोक्ष–" इति केचित् पठन्ति ।

२ "सत्सङ्गान्मामुपागताः" इत्यर्वाचीनाः । "मत्सङ्गा मामुपागताः" इति क्वचित् । "मत्सङ्गात् मद्गुणसम्प्रीत्या भक्त्येति यावत्" इति यादवेन्द्रतीर्थाः । अव्रता अतप्ततपसश्च ।

३ "मामीयुरञ्जसा" इति प्र. पाठः । "केवलेन अध्ययनादिसहकारिरहितेन भावेन मुख्यभक्त्या सिद्धा इव मामापुः" इति यादवेन्द्रतीर्थाः । "केवलेनेति विशेषणान्न द्वेषयुक्ता भक्तिर्मुक्तिसाधनम्" इति विजयध्वजीयम् ।

४ "यं मां योगादिभिः व्याख्यास्वाध्यायादिभिश्च यत्नवान् प्राप्तुमुत्साहवानपि न प्राप्नुयात् तं तादृशं मां गोप्यो गाव एतदादय आपुः । स्वर्गादौ ज्ञानाधिक्यं सम्पाद्येति भावः" इति यादवेन्द्रतीर्थाः ।

मत्कामा रमणं जारमस्वरूपविदोऽबला:[1] ।
ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः ॥ १३ ॥

तस्मात् त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम्[2] ।
प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च ॥ १४ ॥

मामेकमेव शरणमात्मानं सर्वदेहिनाम् ।
याहि सर्वात्मभावेन यस्मिन्नस्त्यकुतोभयम्[3] ॥ १५ ॥

"[4]ज्ञात्वाऽपि हरिविद्वेषी तमो याति न संशयः । विशेषरूपस्याज्ञोऽपि गुणवत्त्वेऽतिनिश्चितः[5] । गुणसम्प्रीतिमान् नित्यं तं दृष्ट्वा मुक्तिमेष्यति[6] । अथवा सुखभागेव स्याद् यावद् दर्शनोपगः" इति व्यक्ते । "हरिसङ्गविहीनस्तु हरेर्दर्शनवानपि । न मुच्यतेऽखिलज्ञोऽपि[7] तमो याति च निश्चयात्[8] । गुणैरन्यैर्विहीनोऽपि

---

१ "जारं मत्स्वरूपाविदोऽबलाः" इति कोशे पाठान्तरम् । "मत्स्वरूपविदः" इत्यन्ये । "शतसहस्रशः अबलाः गोप्यः मां रमणं जारमिव प्रथमं मत्वा, मयि कामः अभिलाषो यासां ताः सत्यः सङ्गात् मद्गुणसम्प्रीत्या अस्वरूपविदः स्वदेहादिज्ञानरहिताः मयि ध्यानातिशयादिति भावः । मां मदभिन्नं परमं ब्रह्म प्रापुः" इति यादवेन्द्रतीर्थाः । "अस्य विलक्षणस्वभावस्य विष्णोः स्वरूपं विदन्तीत्यस्वरूपविदः" इति च विजयध्वजीयम् ।

२ "प्रतिचोदिताम्" इति विजयध्वजीयादिसम्मतं पाठान्तरम् । "प्रतिचोदितम्" इति क्वचित् । "प्रतिकर्मचोदितां चोदनां नानाकर्मविधिमुत्सृज्य" इति विजयध्वजीयम् ।

३ "-भावेन मया स्या ह्यकुतोभयः" इत्यर्वाचीनाः । "तस्मात् भक्तेः मुख्योपायत्वात् सर्वात्मा इति भावेन, सर्वस्यापि आत्मा सुखभोगस्य कर्तेति माहात्म्यज्ञानसहितेन भावेन भक्त्या, चोदनां यागादिविधिं प्रतिचोदनां निषेधशास्त्रं प्रवृत्तं प्राणाग्निहोत्रादि निवृत्तं नित्यकर्म श्रोतव्यमागमेन ज्ञातव्यं सर्वं मां प्रत्युत्सृज्य समर्प्य सर्वं मदाज्ञारूपमिति निश्चित्य, स्वयमेव सर्वव्यापारकर्तेति भ्रान्तिं परित्यज्य कर्माणि कुर्वन्निति भावः । आत्मानमन्तर्यामिणं एकं प्राप्येषु मुख्यं यस्मिन् मयि सक्तस्य कुतोऽपि भयं नास्ति तं मां शरणं याहि" इति यादवेन्द्रतीर्थाः ।

४ "यं न योगेन-" इत्यादिना ज्ञानिनामपि भगवदप्राप्तिः । "ते नाधीतश्रुतिगणाः-" इत्यादिना "केवलेन हि भावेन-" इत्यादिना चाज्ञानिनामपि भगवत्प्राप्तिरुच्यते । ज्ञानस्य भक्तिसहभावाभावाभ्यां तद् युक्तमिति प्रमाणत एवाऽह—ज्ञात्वाऽपि ।

५ "-निश्चयः" इति क्वचित् । ६ "मोक्षमेष्यति" इति च ।

७ "-ऽखिलाज्ञोऽपि" इति प्र. पाठः प्रामादिकः ।

८ "याति विनिश्चयात्" इति क्वचित् । हरिभक्तिविहीनः कंसादिरसुरश्चेतनः कृष्णादिरूपेण हरिदर्शनवानपि तम एव यातीति भावः । "हरेर्दर्शनवान् निर्गुणत्वादिरूपेण हर्यपरोक्षज्ञानी" इत्यपि व्याचक्षते ।

[1]तद्भक्तेष्वपि च क्रमात् । सङ्गवान् सुखभागेव स्याद् गुणैर्मुक्तिमेति वा । स्वभक्त-सङ्गहीनस्य [2]व्युत्क्रमात् सङ्गिनोऽपिवा । स्वसङ्गविघ्नकृद् विष्णुस्तत् सज्जेत् तेषु तत्र च[3]" इति सत्सङ्गे ॥ * ॥

"[4]गोपिकाद्या दिवं गत्वा हरिं ज्ञात्वा यथातथम् । परं पदं ययुः पूर्वसङ्गादेव शुभो-चिताः" इति च ॥ * ॥

"[5]श्रोतव्यं च श्रुतं चैव वक्तव्यं कार्यमेव च । निवर्त्यं च हरेः पूजेत्येवं कुर्यान्नचाक्रमात् । [6]एवं कर्ता तु सन्न्यासी [7]सर्वोत्सर्गाद्धरौ स्मृतः । अन्यथा नैव सन्न्यासी निष्क्रियोऽपि शिला यथा" इति कर्मविवेके । "नाहं कर्ता तु सर्वस्य कर्तैको [8]विष्णुरव्ययः । इति वित्त्वा तु[9] सन्न्यासी नान्यथा तु कथञ्चन[10]" इति निवृत्ते । "मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा । निराशीर्निर्ममो भूत्वा युद्धयस्व विगत-ज्वरः" इति च ॥ * ॥

---

१ इदानीं "सङ्गाच्छतसहस्रशः" इत्यत्र सङ्गादिति मत्सङ्गात् मद्भक्तसङ्गाच्चेत्युभयमपि विवक्षितमित्याह— तद्भक्तेष्वपि च तारतम्यक्रममनुसृत्य सङ्गवानिति ।

२ व्युत्क्रमात् सङ्गिन इत्यभक्तेषु सङ्गिनः । तारतम्यक्रममपहायाल्पभक्तेष्वधिकसङ्गिनोऽधिकभक्तेष्वल्प-सङ्गिनश्च ।

३ "विष्णुः सज्जेतैतेषु तत्र च" इति प्र. पाठः । तत्र विष्णौ तेषु तद्भक्तेषु च सज्जेत् ।

४ "मत्कामा रमणं जारम्" इति गोपीनां जारबुद्धयाऽपि ब्रह्मप्राप्तिरुच्यते । तस्याप्याशयं प्रमाणेनाऽह— गोपिकाद्याः । आदिपदेन गवाद्याः । पूर्वं हरिसङ्गादेव स्वर्गादिशुभोचिता अत एव दिवं गत्वा पुनश्च यथातथं हरिं पूर्णगुणत्वेन ज्ञात्वा तत एव मोक्षाख्यशुभोचिताः परं पदं ययुः ।

५ इदानीं पूर्वानुगुणतया "तस्मात् त्वमुद्धवोत्सृज्य" इत्यादिश्लोकद्वयं व्याख्याति—श्रोतव्यं च । वक्तव्यं वचनं प्रवचनं वा कार्यं चोदनाविहितं कर्तव्यम् । प्रतिचोदनानिषिद्धं कर्म निवर्त्यम् । सर्वं हरेः पूजेत्येवं कुर्यात्, कार्ये प्रवृत्तिं कुर्यात्, निवर्त्यान्निवृत्तिं कुर्यादित्यर्थः । नह्यकरणं कर्मसन्न्यासः । किन्तु भगवत्पूजाबुद्धया करणमिति ।

६ "एवं कृत्वा तु" इति प्र. पाठः ।

७ "सर्वोत्सङ्गाद्धरौ" इति प्र. पाठः प्रामादिकः । तथाच हरौ कर्मणां न्यासोऽर्पणमेव सन्न्यासः । न कर्मणां जडवत् सर्वात्मना त्यागः । नापि दण्डधारणं काषायाम्बरमात्रं वा । एतेन "व्याख्यास्वाध्यायसन्न्यासैः" इति मूलमपि गदिताभिप्रायम् । सर्ववेदानां भगवत्परत्वानुसन्धानरहितव्याख्यास्वाध्यायाभ्याम् । सर्वकर्मणां भगवदर्पितत्वानुसन्धानरहितकर्मसन्न्यासेन चेति ।

८ "हरिरव्ययः" इति क्वचित् ।

९ "वित्त्वास्तु" इति च पाठान्तरम् । इति वित्त्वात् ज्ञातृत्वादेव सन्न्यासी सन्न्यासी भवति ।

१० "नान्यथेति कथञ्चन" इति प्र. पाठः प्रामादिकः ।

संशयः शृण्वतो वाचं तव योगेश्वरेश्वर ।
न निवर्तत आत्मस्थो येन भ्राम्यति मे मनः[1] ॥ १६ ॥

"वायौ मुख्यधिया" इत्युक्त्वा विशेषतो गोपिकाप्रशंसनात्[2] "संशयः शृण्वतः" इति चोदयति ॥ * ॥

[3]य एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमयं सूक्ष्ममुपैति रूपं[4] मात्रा स्वरो वर्ण इति स्थविष्ठम्[5] ॥ १७ ॥

यथाऽनलः खेऽनिलबन्धुरूष्मा बलेन दारुण्यपि[6] मथ्यमानः ।
अणुः प्रजातो हविषा समिद्ध्यते तथैव मे व्यक्तिरियं हि वाणी ॥ १८ ॥

[7]एवं गतिः कर्म रतिर्विसर्गो घ्राणो रसो दृक् स्पर्शः श्रुतिश्च ।
सङ्कल्पविज्ञानमथाभिमानः सूत्रं रजः सत्त्वतमो विकारः ॥ १९ ॥

---

१ "वाचं उभयविधां वायूत्कर्षप्रतिपादनरूपां गोपिकाप्रशंसनरूपां च शृण्वतः । येन संशयेन मनः भ्राम्यति तत्वनिर्णयरहितं भवति । संशयः आत्मस्थः मनसि वर्तमानः न निवर्तते । वाक्यतात्पर्यापरिज्ञानादिति भावः" इति यादवेन्द्रतीर्थाः ।

२ "गोपिकाशंसनात्" इति क्वचित् । ३ "स एष–" इत्यर्वाचीनाः । ४ "–मुपेत्य रूपम्" इति च ।

५ "स्थविष्ठः" इति च । "यः पूर्वं वायुरेष जीवः ब्रह्मा विवरप्रसूतिः, देववरा इन्द्रादयः तेषां प्रसूतिः, प्राणेन सर्वप्रेरकेण परमात्मना घोषेण वेदात्मिकया प्रकृत्या लक्ष्म्या सरस्वत्या च सह गरुडादीनां हृदयगुहां प्रविष्टः । मनोमयं गरुडशेषादेर्मनःप्रेरकं सूक्ष्मं प्रेरकरूपान्तरैः परस्परं प्रतिघातरहितमणु वा रूपमुपैति । (मात्रा स्वरो वर्ण इति स्थविष्ठं रूपमुपैति) मात्रादिषु लक्ष्मीः विष्णुः वायुश्च युक्ता भवन्तीत्यर्थः । तस्माद् वायुरेवोत्तम इति भावः" इति यादवेन्द्रतीर्थाः । मात्रा ह्रस्वादिः । स्वर उदात्तादिः । वर्णोऽकारादिः । एतत्त्रितयात्मकवेदगतं स्थविष्ठं व्यक्तं रूपमुपैतीत्यर्थः ।

६ "दारुण्यभिमथ्य–" इति प्र. पाठः । "ब्रह्मलक्ष्म्यपेक्षया विशेषतः परमात्मन एव व्यक्तिस्थानं वेद इत्याह– यथाऽनल इति । अनिलः बन्धुरिवाग्निवृद्धिकरः यस्य सः । ऊष्मा उष्णस्पर्शवान् अनलः वह्निः दारुणि खे अवकाशे सति मथ्यमानः अणुत्वेन प्रजातः हविषाऽऽज्येन समिद्ध्यते अभिवृद्धो भवति । तथा इयं स्वरवर्णसमुदायरूपा वाणी वेदादिवाक् मथिता उपक्रमादिभिर्विमर्शविषया सती मे व्यक्तिः प्रकाशकारणं भवति । अथवा मथितः विमर्शविषयः वेदादिषु स्थितोऽहं सम्प्रदृश्ये । अतः सा व्यक्तिस्थानमित्यर्थः" इति यादवेन्द्रतीर्थाः ।

७ "एवं गदिः कर्म गतिर्विसर्गो–" इति प्र. पाठः । "प्रसङ्गात् इन्द्रियादीन्यपि परमात्मनः विशेषतः व्यक्तिस्थानानीत्याह—एवं गतिरिति । अखेन्द्रियविषया इन्द्रियाणि च व्यक्तिस्थानानीति ज्ञापनाय गतिरित्याद्युक्तिः । गतिः पादः । कर्म पाणिः । रतिर्लिङ्गम् । विसर्गः पायुः । गत्यादिविषयाश्च वागिन्द्रियं च । रसः रसना । श्रुतिः

अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको जगतामथाऽद्यः[1] ।
विश्लिष्टशक्तिर्बहुधैव[2] भाति बीजानि योनिं प्रतिपद्य यद्वत् ॥ २० ॥

[3]तस्मिन्निदं प्रोतमशेषमोतं पटे यथा तन्तुवितानसंस्था[4] ।
य एष संसारतरुः पुराणः कर्मात्मकः पुण्यफले प्रसूते ॥ २१ ॥

गोपिका अपि मामापुः किमु वाय्वाद्या इति दर्शयितुं गोपिकाप्रशंसनम्,[5] [6]सर्वगुणैः सर्वोत्तमस्तु वायुरेव, स एव च[7] हिरण्यगर्भ इति दर्शयितुमाह—य एष जीवो [8]विवरप्रसूतिरित्यादि । विशेषेण [9]वराणामहङ्कारादीनामपि प्रसूतिः [10]उत्पत्तिकर्ता । प्राणेन विष्णुना । घोषेण वेदात्मकप्रकृत्या[11] ॥ * ॥

श्रोत्रम् । एतद्विषयाश्च मेऽभिव्यक्तिस्थानानि । सङ्कल्पस्तत्कारणं मनः । विज्ञानं बुद्धिः । अभिमानोऽहङ्कारः । एते व्यक्तिस्थानानि । सूत्रं वायुः विशेषतः व्यक्तिस्थानम् । रजोगुणः, सत्त्वसहितं तमः व्यक्तिस्थानम् । विकारः एतेषां विपरिणामः सुवर्णकोशश्चाभिव्यक्तिस्थानम्'' इति यादवेन्द्रतीर्थाः ।

१ ''एको वयसां स आद्यः'' इति प्र. पाठः । ''पुनर्वायुं विरिञ्चं स्तौति— अयं हीति । त्रिवृत् अभिव्यक्तज्ञानानन्दबलरूपः । अब्जयोनिः कमलसम्भवः जीवः गरुडशेषरुद्रादीनां प्राणधारणकर्ता सन् अव्यक्तः सूक्ष्मरूपः जगतामाद्यः प्राथमिकः सर्वकर्ता एकः सर्वजीवेषूत्तमः । विशेषेण श्लिष्टाः शक्तयो यस्य सः अनपगतसामर्थ्यः । बहुधा विवधकार्येषु कारणेषु च बहुरूपैः स्थितः भाति ऋजुभिः प्रतीयते । बीजानि, बहुवचनमाद्यर्थकम्, कलमादिबीजं योनिं भूविशेषं प्रतिपद्य, उप्तमित्यर्थः, यद्वत् प्रथममेकाकारमनन्तरं बह्वाकारोपेतं भवति तथा ब्रह्माऽपि बहुशक्तिभिः अहङ्कारादिषु बहुधा भवति'' इति यादवेन्द्रतीर्थाः ।

२ ''–र्बहुधेव'' इति पाठान्तरम् । ३ ''यस्मिन्निदम्'' इति प्र. पाठः ।

४ ''पटो यथा तन्तुवितानसंस्थः'' इति च । ''इदमशेषं जगत् विराड्ब्रह्मणि महदादिरूपे वा प्रोतमन्ततः लग्नम् । ओतमुपरि च स्थितं संश्लिष्टं च । तन्तुभिर्विताना विस्तृता रचिता संस्था पटाद्याकारस्थितिः पटे आधारे यथा स्थिता तथेत्यर्थः । परतन्त्रतया जगत्स्वरूपज्ञानाय जगद्वृक्षस्थितिमाह—य एष इति । यः परतन्त्रः एषः दुःखकारणं कर्मात्मकः कर्मणा आत्मा स्वरूपं यस्य कर्मप्राप्तः । संसारः चेतनस्याचेतनेनानुबन्धविशेषः स एव तरुः वृक्षः पुष्पफले प्रसूते जनयति । पुष्पमैहिकं फलमित्यर्थः । स्वर्गमोक्षौ फलम्'' इति यादवेन्द्रतीर्थाः । तन्तूनां वितानस्य पद्माद्याकारस्य संस्थाऽवस्थितिः । पटाधारतया तन्तुविरचितपद्माद्याकारस्य पटाद् यथा भेदः प्रत्यक्षसिद्धस्तथा विरिञ्चाधारं जगद् विरिञ्चाद् भिन्नम्'' इति विजयध्वजीयम् । ''पुष्पफले स्वर्गमोक्षौ प्रसूते'' इति च । ५ ''गोपिकाद्याप्रशंसनम्'' इति क्वचित् ।

६ ''सर्वैर्गुणैः'' इति प्र. पाठः । ७ ''स एव हिरण्य–'' इति क्वचित् ।

८ ''विपरप्रसूति-'' इति क्वचित् ९ ''विशेषेण पराणा-'' इति च ।

१० ''प्रसूतिकर्ता'' इति प्र. पाठः । ''प्रसूतिः कर्ता'' इति क्वचित् ।

११ ''वेदात्मिकया प्रकृत्या'' इति पाठान्तरम् । प्र. पाठोऽपि तथा । प्रकृतिरिति लक्ष्मीः सरस्वती च । एवमुत्तरत्र देव्या इत्यत्रापि ।

मनो मात्रादयश्च हिरण्यगर्भस्य देव्याः परमात्मनश्च व्यक्तिस्थानानीत्युक्तम्–प्राणेन घोषेण च सह विवरप्रसूतिर्मनोमयं रूपमुपैतीत्यादिना। तत्रापि[1] विशेषतो भगवत एव व्यक्तिस्थानमित्याह[2]—यथाऽनल इत्यादिना ॥ * ॥

विशेषेण श्लिष्टशक्तिः अनपगतसामर्थ्यः[3]। यथैकं [4]कळमादिबीजं भूमावुप्तं बह्वङ्कुरं भवति, एवं परमात्मानुगृहीतो ब्रह्माऽहङ्कारादिषु बहुधा व्यक्तीभवति ॥ * ॥

"सुपर्णशेषरुद्रादिप्रसूतिस्तु[5] चतुर्मुखः। सर्वजीवोत्तमो जीवो[6] गुणैर्ज्ञानसुखादिभिः। विष्णुभक्त्यादिभिः सर्वैर्नियमात् [7]सार्वकालिकम्। मुक्तावपि न सन्देहः स हि देवेन विष्णुना। प्राणप्राणेन जगतामीशेन रमया तथा। वेदात्मिकया च सहितः सूक्ष्मः सन् मनसि स्थितः। वीन्द्रादीनां तु सर्वेषां [8]मात्रावर्णस्वरेषु च। स्थूलरूपी सदा तिष्ठन्नेवं श्रोत्रादिखेषु[9] च। सर्वेषां प्रेरको ह्येको ज्ञानानन्दबलैस्त्रिवृत्। नित्यशक्तिः सर्वगः सन् बहुधैव[10] प्रतीयते। [11]तस्मिन्नोतमिदं सर्वं पटे लक्षणतन्तुवत्[12]। स एव वायुरुद्दिष्टो वायुर्हि ब्रह्मतामगात्। विशेषतो हरेर्व्यक्तिस्थानान्येतानि सर्वशः। [13]मनआदीन्यहङ्कारो [14]ब्रह्मा वेदात्मिका रमा। त्रिगुणात्मिका च सैव श्रीः सैवोक्ता संविदात्मिका। तस्या अपि नियन्तैको विष्णुः सर्वेश्वरेश्वरः। यथा दारुषु सूक्ष्मः सन् मथितोऽग्निः समिद्ध्यते। तथा वेदादिषु हरिर्मथितः सम्प्रदृश्यते। व्यक्तिस्थानान्यथैतानि

---

१ "तत्रापि भगवतो विशेषत एव" इति क्वचित्।

२ व्यक्तिस्थानं वेद इति विशिष्याऽहेति भावः।

३ "अनपगसामर्थ्यः" इति पाठान्तरम्। ४ "कलमादि–" इति प्र. पाठः।

५ "–सूतिश्च चतु–" इति प्र. प्राठः। "–सूतिस्तच्चतु–" इति क्वचित्।

६ जीवेषु यस्मादधिकोऽन्यो नास्ति स एव "मुख्ये सम्प्रत्ययः" इति न्यायेन जीवशब्देनोच्यत इत्यर्थः। "मुख्यस्य निर्विशेषेण शब्दः" इति ह्युक्तम्।

७ "सर्वकालिकम्" इति प्र. पाठः। सर्वेष्वपि कालेषु। तदेवाह—मुक्तावपि।

८ मात्रावर्णस्वरेषु तदात्मके वेदे। "मात्रावर्णः स्वरेषु" इति प्र. पाठः प्रामादिकः।

९ "श्रोत्रादिकेषु" इति पाठान्तरम्। श्रोत्रादिषु खेषु इन्द्रियेषु।

१० "बहुधेव" इति पाठान्तरम्। ११ "तस्मिन् प्रोतमिदम्" इति क्वचित्।

१२ पटोपरि लक्षणार्थं अलङ्कारार्थं पद्माद्याकारेण विन्यस्तवर्णतन्तुवत्। 'कसूति' इति भाषायाम्।

१३ मूले सङ्कल्पविज्ञानशब्दाभ्यां मनआदीन्युच्यन्ते। आदिना बुद्धिचित्तचेतनाः। सङ्कल्प इति मनः। विज्ञानमिति बुद्धिश्चित्तं चेतना च। अभिमान इत्यहङ्कारः। मनआदीनि सर्वेन्द्रियाणीति वा।

१४ विष्णुपरत्वेऽर्थविशेषं चाऽह—ब्रह्मा। सूत्रमिति ब्रह्मा। वाणीति वेदात्मिका रमा। ब्रह्मपरतायां तु वाणी सरस्वती। सत्वं रजस्तम इति च तदभिमानिनी श्रीः। ब्रह्मपरतायां त्वभिमन्यमानमात्रग्रहणम्। विष्णुपरत्वे विज्ञानमिति संविदात्मिका रमैवोच्यते। ब्रह्मपरत्वे चित्ताद्यभिमानिनः गरुडाद्याः।

वेदादीनि हरेर्विदुः" इति तन्त्रभागवते[1]। "मनसि व्यक्ततां[2] यामि तस्माद् व्यक्तिर्हि मे मनः" इति भारते। "यथैव वस्त्रे दीर्घं च तिर्यक् चापि सुसंश्रिता[3]। तन्तुभिः क्रियमाणैव पद्माद्याकारसंस्थितिः। [4]यथा जीर्णानि वस्त्राणि तन्त्वाधाराणि वा पुनः। कन्थावयवभूतानि तद्वदेतच्चतुर्मुखे। सोऽपि तद्वद्धरौ नित्यं संश्रिता[5] श्रीरपि स्फुटम्" इति प्रातिस्विके ॥ * ॥

द्वे अस्य बीजे शतमूलस्त्रिनाळः[6] पञ्चस्कन्धः पञ्चरसप्रसूतिः ।
दशैकशाखो द्विसुपर्णनीळ[7]स्त्रिवल्कलो द्विफलः खं[8] प्रविष्टः ॥ २२ ॥

अदन्ति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः ।
हंसा य एवं बहुरूपमिष्टं[9] मायामयं वेद स वेद वेदम् ॥ २३ ॥

---

१ "भागवततन्त्रे" इति क्वचित्। २ "व्यक्तिताम्" इति क्वचित्।
३ "सुसंस्थिता" इति प्र. पाठः।
४ प्रकारान्तरेण पटतन्तुसंस्थयोराधाराधेयभावं योजयति— यथा जीर्णानि।
५ "संस्थितः" इति प्र. पाठः। ६ "-स्त्रिनालः" इति प्र. पाठः।
७ "-नीड-" इति च। ८ "द्विफलोऽर्कम्" इति च।

९ "य एकं बहुरूपमिज्यैः" इति च। अयं श्लोकद्वयार्थो यादवेन्द्रतीर्थीये-" अस्य तरोः द्वे ब्रह्मा सरस्वती च बीजे आदिकारणे। शतं बहूनि बहुविधानि वा कर्माणि मूलं यस्य सः। नाळः वृक्षस्याधोभागः। त्रयः अहङ्कार-बुद्धिमनोदेवताः नाळा यस्य सः। पञ्चभूतानि तद्देवताः स्कन्धा यस्य सः। पञ्चानां रसानां प्रसूतिर्यस्मिन् सः। शब्दादिविषयाः पञ्च रसाः। दशेन्द्रियाणि एकं मनश्च शाखा यस्य सः। द्वयोः सुपर्णयोः प्रवृत्तिमार्गनिवृत्तिमार्ग-स्थयोः पक्षिणोः नीडमावासस्थानं यस्मिन् सः। त्रिगुणाः वल्कलास्त्वचो यस्य सः। खमाकाशं विष्णुं प्रविष्टः व्याप्तः। विष्णुनाऽभिवृद्धश्चेत्यर्थः। प्रवृत्तिफलं स्वर्गादि। निवृत्तिफलं नित्यसौख्यमिति द्वे फले यस्य सः ॥ * ॥ एतादृशो यः संसारतरुः अस्यैकं फलं प्रवृत्तिकर्मजन्यं स्वर्गादिफलं ग्रामे असुरजनसमुदाये चराः असुरवशे देहे-वर्तमानाः गृध्राः विषयाकाङ्क्षायुक्ताः सन्तः अदन्ति। तदनुषक्तं दुःखमनुभवन्तीति भावः। हंसाः तिरस्कृतवि-षयाः परमात्मासक्ताः अरण्यवासाः अरण्यमसुरजनव्यापाररहितो देहः। तत्र स्थिताः। अराख्यण्याख्यसुधास-मुद्रयोस्तीरवासा इति वा। एकं निवृत्तिकर्मसहितज्ञानफलं अदन्ति नित्यसौख्यं भुञ्जते। यः विषयविरागसम्पन्नः एवमुक्तरीत्या बहुरूपं विचित्रविविधदेहलोकादिकार्यस्वरूपम्, इष्टं विवेकिनामपवर्गोपादनायानुकूलं देहादिजगत् मायामयं प्रकृतिजन्यं ईश्वरेच्छाधीनं च वेद जानाति स सकलतत्वज्ञानवान् वेदं ज्ञानरूपं परमात्मानं वेद अपरोक्षीकरोति ध्यानादिक्रमेणेति भावः। वेदं वेदार्थं वेदेति वा। अथवा यः वेदं वेद वेदार्थज्ञानसम्पन्नः स एव-मुक्तरीत्या मायामयं ईश्वरेच्छाधीनं वेद नान्य इत्यर्थः" इति। अथच विषयग्राम एव ये चरन्ति ते ग्रामेचरा विष-यलोलुपाः। तथा अरमलं ण्यं सुखं ज्ञानं च यस्मात् तादृशं शरीरमरण्यमुच्यते।

[1]एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः ।
विवृश्च्य जीवाशयमप्रमत्तः सम्पद्य चाऽत्मानमथ त्यजास्त्रम् ॥२४॥

"जगद्वृक्षस्य बीजे द्वे ब्रह्मा चैव सरस्वती । मूलभूतानि कर्माणि,मनो बुद्धिरहङ्कृतिः[2] । नाळत्वेन[3] समुद्दिष्टाः,खमाद्याः[4] स्कन्धसञ्ज्ञिताः । एकादशेन्द्रियाण्येव शाखास्तु त्रिगुणास्त्वचः । प्रवृत्तं च निवृत्तं च फले अस्य प्रकीर्तिते । पुष्पमैहिकमुद्दिष्टं रसाः शब्दादयस्तयोः । प्रवृत्ताश्च निवृत्ताश्च पक्षिणस्तत्र संस्थिताः । वृक्षस्य पृथिवीव[5] श्रीर्विष्णुराकाशवायुवत्[6] । तस्या अपि सदाऽऽधार एवं ज्ञात्वा विमुच्यते" इति निवृत्ते ॥ * ॥

"प्राकृतान्तःकरणजं ज्ञानमस्त्रं सृतिच्छिदम् । तदेव तेन सञ्छेद्यं चित्तं प्रकृतिसम्भवम्[7] । तेनैव सह सन्त्याज्यं नैव पूर्वं कथञ्चन । ज्ञानं प्रकृतिजं [8]वाऽपि मूलनाशे विनश्यति । ततः परं स्वरूपेण ज्ञानेनैव जनार्दनम् । वेत्ति मुक्तस्तथाऽऽत्मानं जीवानन्यांश्च सर्वशः" इति माहात्म्ये ॥ * ॥

"बीजभूतावपि ह्यस्य ब्रह्मा चैव सरस्वती । न रिष्यतो जगत्सृष्टौ वटवृक्षादिबीजवत् । स्वकार्यतो महान्तौ च गुणतो रूपतस्तथा । पृथिव्युदकवत् तस्माद् बीजत्वं

---

१ "धीरः विषयभोगपरित्यागे धैर्यसम्पन्नः समर्थः, अप्रमत्तः ज्ञानसम्पादने जागरूकः सन् एवं अमान्यमत्सर इत्याद्युक्तगुणसम्पत्त्या सह गुरूपासनया गुरुभिः प्राप्तशास्त्राभ्यासेन प्राप्तेन, शितेन तीक्ष्णेन, अपरोक्षरूपेणेति भावः, विद्या परमात्मज्ञानं कुठार इव । तेन प्राप्तया एकभक्त्या, तया प्राप्तेन प्रसादेनेति भावः। जीवस्य चेतनस्य आशयं अन्तःकरणमहङ्कारं तामसं सर्वदुःखकारणमिति भावः । विवृश्च्य छित्त्वा आत्मानं परमात्मानं सम्पद्य अपरोक्षीकृत्य, अस्त्रं सात्त्विकान्तःकरणजज्ञानाख्यकुठारं अथ विरजास्नानानन्तरमित्यर्थः । त्यज, स्वरूपज्ञानस्यातिशयेन व्यक्तत्वादिति भावः" इति यादवेन्द्रतीर्थाः । "जीवाशयं जीवे स्थितं संसारवृक्षम्" इति सुदर्शनसूरिप्रभृतयः । "जीवाशयं लिङ्गशरीरम्" इति श्रीधरस्वामिप्रभृतयः ।

२ नाळेष्वेकं मनः । तदेव पुनः दशैकशाखमिति शाखास्वप्येकमुच्यते । तदेवमानाळमाशाखमस्य व्याप्त्युक्तेः संसारेऽस्य प्राधान्यमुक्तं भवति । एतदेव चोक्तम्—"मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इति । अत्रापि पूर्वमुक्तम् "मनोमयं पञ्चदशारम्" इति ।

३ "नालत्वेन" इति प्र. पाठः ।

४ खमाद्याः आकाशाद्याः । खं कं शमित्येतानि मान्तान्यव्ययान्यपि सन्ति । तेन खमाद्या इति युक्तम् ।

५ "पृथिवीवत्" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

६ यथा निरालम्बा पृथिवी वायुना धृताऽकाशे तिष्ठति एवं जगद्वृक्षस्य पृथिवीवदाधारभूता श्रीः आकाशस्थानीयेन वायुस्थानीयेन च विष्णुना धृतेत्यर्थः ।

७ प्राकृतं चित्तं प्राकृतज्ञानेन सहैव सन्त्याज्यम् । मूलनाशे प्राकृतान्तःकरणनाशे तज्जन्यं ज्ञानं स्वत एव नश्यतीत्यर्थः ।

८ "चापि" इति प्र. पाठः ।

नतु बीजवत् । व्यञ्जकत्वान्नचाल्पत्वान्महाक्ष्मावद् रमा स्मृता[1] । अण्डो महाक्ष्मा[2] सम्प्रोक्तस्ततः पृथ्व्युदकं तथा । [3]जायते नित्यशस्तस्माद् भुक्तम्भुक्तं न हीयते । तत्राप्युदकवद् ब्रह्मा मृद्वच्चापि सरस्वती । जलाधारा[4] यतो मृच्च सर्वत्रापि व्यवस्थिता । अन्यथा तु रजोभूता नीयते वायुनाऽखिला । अथवा सर्वनाशः स्याज्जलाधारा ततः स्मृता । वटादिबीजवत् तस्य पुण्यापुण्यमुदीरितम् । बाह्योदवच्चाग्निवच्च विष्णुरेव प्रकीर्तितः" इति सत्यसंहितायाम् ॥

श्रियादेरप्याप्यायनाद्[5] बाह्योदवत् । ब्रह्मादेरपि लयकर्तृत्वादग्निवत् । आधारत्वात् सुखदत्वाच्च वायुवत् । अवकाशप्रदत्वाद् व्योमवद् विष्णुः ।

"व्रीह्यादिवत्तु मूलत्वं कर्मणां जगतः स्मृतम् । उदवत् पृथिवीवच्च ब्रह्मणो वाच एवच । मूलभूवच्छ्रियश्चैव मूलभूरण्डमुच्यते । बाह्योदाग्नीरखंवत्तु[6] विष्णोर्बीजत्वमिष्यते" इति विश्वसंहितायाम्[7] ॥ * ॥

"देहेन्द्रियमनोवाक्षु स्थितो भक्त्यादिसाधकः । सुपर्णशेषरुद्रादेरपि ब्रह्मा चतुर्मुखः । अतो भक्त्यादिकाः सर्वे गुणास्तस्यैव सर्वगाः[8] । अतिरिक्ताश्च सम्पूर्णाः सुपर्णादेः शताधिकाः । सुपर्णादिभिरज्ञातास्तदभीमानवर्जिताः । ब्रह्मणस्तु पुनः सन्ति तेषां कर्ता जनार्दनः । तस्मात् सर्वाधिको ब्रह्मा गुणैः सर्वैर्न संशयः । वर्णस्थो वर्णनामाऽसौ स्वरस्थः स्वरनामकः । मनस्थश्च मनोनामा तन्नामा चक्षुरादिगः[9] । तस्य सर्वाणि नामानि मुख्यतः कवयो विदुः । तत्स्थानत्वादिन्द्रियादेर्वर्णादेश्चोपचारतः । एवमस्योपचारेण विष्णोः साक्षात्तु मुख्यतः" इति शब्दनिर्णये ॥ * ॥

"कृष्णप्रियाभ्यो गोपीभ्यो भक्तितो द्विगुणाधिकाः । महिष्योऽष्टौ[10] विना यास्ताः कथिताः कृष्णवल्लभाः । ताभ्यः सहस्रसमिता यशोदा नन्दगेहिनी । [11]ततोऽप्य-

---

१ "रमा मता" इति क्वचित् । वृक्षस्य यथा ब्रह्माण्डो मूलाधारस्तथा जगद्वृक्षस्य रमा । यथा वृक्षस्य पृथिवी तथा सरस्वती । यथा जलं तथा ब्रह्मा । जलस्य पृथिव्यामपि गतत्वेन मुख्यत्वात् ।

२ "अण्डो महान् क्ष्मा" (?) इति क्वचित् । ततः महाक्ष्मातः पृथिवी उदकं च नित्यशः जायते । अतः नित्यशः प्राणिभिर्भोगेऽपि ते न हीयेते ।

३ "जायेते" इति क्वचित् ।

४ जलमाधारो यस्याः सा ।

५ "श्रियादेरप्ययनत्वात्" इति प्र. पाठः प्रामादिकः । "श्रियादेरप्याप्यायनत्वात्" इति क्वचित् ।

६ खंवत् खवत् । उपपत्तिस्तूक्ता ।

७ "विश्वज्ञसंहितायाम्" इति क्वचित् ।

८ सर्वगाः सर्वे गुणास्तस्यैव । नियन्तृत्वात् । ततोऽतिरिक्ताश्च तस्य गुणाः सन्ति । ते च गुणाः गरुडशेषरुद्रेभ्यः शताधिकाः ।

९ चक्षुरादिगस्तन्नामा चक्षुरादिनामा ।

१० अष्टौ विना याः शतोत्तरषोडशसहस्रपरिमिताः कृष्णभार्यास्ता गोपीभ्यो द्विगुणाधिकाः । गोप्योऽप्सरसः । भार्या अग्निपुत्राः । ताभ्यः सहस्रसमिता यशोदा या सुरभिरवतीर्णा । ततोऽपि देवकी अधिका याऽदितिः । ततो वसुदेवः काश्यपः । ततो जिष्णुरिन्द्रः । ततो रामः शेषः ।

११ "अतोऽप्यभ्य–" इति क्वचित् ।

भ्यधिका देवी देवकी भक्तितस्ततः । वसुदेवस्ततो जिष्णुस्ततो रामो महाबलः । न ततोऽभ्यधिकः कश्चिद् भक्त्यादौ पुरुषोत्तमे । विना ब्रह्माणमीशेशं स हि सर्वाधिकः स्मृतः" इत्यन्तर्यामिसंहितायाम् । "पापद्वेषादिका दोषा अवराणां न संशयः । भक्त्यादिगुणपूगस्तु पराणामा विरिञ्चतः । स्वातन्त्र्यात् सर्वदेहेषु स्थितानामपि सर्वशः । स्पृश्यन्ते नैव दोषैस्ते[1] गुणादानैकतत्पराः[2]" इति विवेके । "यदु किञ्चेमाः प्रजाः शोचन्त्यमैवासां[3] तद् भवति पुण्यमेवामुं गच्छति न ह वै देवान् पापं गच्छति" इति च ॥ * ॥

इत्येकादशस्कन्धे द्वादशोऽध्यायः

[त्रयोदशोऽध्यायः]

सत्त्वाद् धर्मो भवेच्छुद्धात्[4] पुंसो मद्भक्तिलक्षणः ।
[5]सात्त्विकोपात्तया ज्ञानं ततो धर्मः प्रवर्तते ॥ २ ॥

धर्मात् पुनः सत्त्वोद्रेकः । सत्त्वोद्रिक्तया बुद्ध्या पुनः सत्त्वोद्रेकाद् धर्मोद्रेकः ॥ * ॥

वेणुसङ्घर्षजो वह्निर्दग्ध्वा शाम्यति तद्वनम् ।
एवं गुणव्यत्ययजो वेदः शाम्यति तद् यथा[6] ॥ ७ ॥

---

१ 'दोषैस्तु" इति च ।

२ "गुणादानैकतत्पराः" इति क्वचित् ।

३ "शोच्यन्त्यमैवासाम्" इति प्र. पाठः प्रामादिकः । आसां प्रजानां सहैव तत् शोचनं भवति । न देवान् गच्छति ।

४ "भवेद् वृद्धात्" इति प्र. पाठः ।

५ "सात्त्विकोपासया सत्त्वं ततो–" इति च । "शुद्धात् विषयरागवासनारहितात् सत्त्वात् ज्ञानादित्यर्थः । भक्तिलक्षणधर्मो भवेत् । सात्त्विकज्ञानेन उपात्तया प्राप्तया भक्त्या ज्ञानं पुनरधिकं प्रवर्तते ततः ज्ञानात् धर्मः निवृत्तधर्मः प्रवर्तते । फलापेक्षाभावादिति भावः" इति यादवेन्द्रतीर्थाः ।

६ "–जो देहः शाम्यति तत्क्रियः" इति प्र. पाठः । "वह्निः यथा शाम्यति इन्धनरूपकारणभावात् एवं वेदः वृत्तिज्ञानं सत्त्वं दग्ध्वा शाम्यति स्वरूपज्ञानेन मुक्तौ पुनर्नोत्पद्यत इति भावः । कुत इति जिज्ञासायामाह— गुणव्यत्ययजः । सत्वगुणस्य व्यत्ययेन उपचयेन जातः । सूक्ष्ममनसः सत्त्वेऽप्युपचितस्य ज्ञानजनकत्वात् । वेदेन सत्त्वनाशे सति उपचितमनसोऽपि नाशान्न पुनर्वृत्तिज्ञानोत्पत्तिः" इति यादवेन्द्रतीर्थाः । अथच रजस्तमोगुणयोर्व्यत्यये नाशे सति सत्त्वगुणेन सात्त्विकान्तःकरणेन जातो वेदः वृत्तिरूपं वेदनम्, वृत्तिज्ञानमिति यावत्, स्वमूलं सात्त्विकान्तःकरणं दग्ध्वा स्वयमपि शाम्यति । तद् यथा वेणुसङ्घर्षजो वह्निः स्वमूलं वेणुवनं दग्ध्वाऽन्ते स्वयमपि शाम्यति तथेति भावः ।

वेदो मुक्तिज्ञानम् ।

"मुक्ताश्चाधीयते वेदान् जडज्ञानबहिष्कृताः । स्वरूपभूतज्ञानेन पश्यन्तः सर्वमञ्जसा" इति तात्त्विके ॥ * ॥

[1]गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो ।
कथमन्योन्यसन्त्यागो मुमुक्षोः सन्तितीर्षोः[2] ॥ १७ ॥

एवं पृष्टो महादेवः स्वयम्भूर्भूतभावनः ।
ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः[3] ॥ १८ ॥

[4]स मामचिन्तयद् देवः प्रश्नपारविनिश्चयम्[5] ।
तस्याहं हंसरूपेण सकाशमगमं तदा ॥ १९ ॥

प्रश्नो बीजमस्येति प्रश्नबीजं परिहारम्[6] । गुणानां चेतसश्च कर्म कारणमिति मन्वानः कर्मधीः ।

"ब्रह्मा पृष्टस्तु योगीन्द्रैः सनकाद्यैर्मनोगतैः । कारणं विषयेष्वद्धा कर्मेति प्रत्यपद्यत । हेतुरन्योऽपि तत्रास्तीत्येवं जानन्नपि प्रभुः । विशेषतो मनस्तत्र नाधाज्ज्ञानन् हरेः प्रियम् । स्वात्मना परिहारोक्तिस्तदा नैव हरेः प्रिया[7] । अतः स तत्प्रियं जानन् नाकरोत्

१ "चेतः गुणेषु रसादिविषयेषु आविशते स्वतः शीघ्रं प्रवर्तते । गुणाः चेतसि आविशन्ते अविळम्बेन विषया भवन्ति । मुमुक्षोः विषयसम्बन्धमोचनमिच्छोः सन्तितीर्षोः सम्यक् भगवद्द्वेषादिकं तर्तुमिच्छोः, बन्धसमुदायं वा तर्तुमिच्छोः पुरुषस्य अन्योन्यसन्त्यागः मनोविषययोः परस्परं सम्बन्धराहित्यं कथं स्यात्? अन्यथा रागद्वेषादिदुःखपरिहारो न स्यादिति भावः" इति च । २ "मुमुक्षोरतितितीर्षोः" इत्यर्वाचीनाः ।

३ "महादेवः देवोत्तमः स्वयम्भूः ब्रह्मा भूतभावनः सर्वसृष्टिकर्ता सर्वज्ञोऽपीति भावः । प्रश्नः बीजं प्रतिवचनकारणं यस्य तं परिहारं नाभ्यपद्यत नानुसमधत्त । आलोचनं न कृतवानिति भावः । कर्मधीः गुणानां चेतसश्च सम्बन्धे कर्म कारणमिति मन्वानः । कर्तृत्वात् मातृत्वाच्च कर्म परमात्मा । तस्मिन् धीर्यस्य सः । परमात्मानं ध्यायमान आसीत् । ईश्वरोऽस्य प्रश्नस्य परिहारकर्ता । अस्माभिः परिहारे न प्रयतितव्यमिति बुद्ध्या स्थितवानिति भावः" इति यादवेन्द्रतीर्थाः ।

४ "सः ब्रह्मा प्रश्नस्य पारः अन्तः तस्य विनिश्चयो यस्मात् तं परिहारमुद्दिश्य मामचिन्तयत् । हंसरूपेण हंसावतारेण" इति च । ५ "प्रश्नपारतितीर्षया" इति प्र. पाठः ।

६ वीरराघवोऽप्याह—"प्रश्नो बीजं कारणं यस्य तत् प्रतिवचनम्" इति । "प्रश्नबीजं प्रश्नविषयम् । काव्यस्य बीजमितिवत्" इति सुदर्शनसूरिः ।

७ स्वात्मना ब्रह्मणा स्वयं परिहारोक्तिः तदा हरेः प्रिया नासीत् । यतः स्वयं भगवानेव परिहारं वक्तुमैच्छत् । "तदा ह्यासीद्धरेः प्रिया" इति पाठान्तरम् । प्र. पाठोऽपि तथा । तदा स्वात्मना स्वयमेव परिहारोक्तिः हरेः प्रियाऽऽसीदित्यर्थः ।

तद्विचारणाम्[1] । तमेवाचिन्तयद्[2] देवः प्रश्ननिर्णयकारणात् । [3]भ्रमतीव मनः क्वापि ब्रह्मणो विष्णुमायया । सर्वज्ञस्यापि यत्राऽत्मा[4] वक्तुमिच्छेज्जनार्दनः । तज्ज्ञात्वा चिन्तितं तस्य चिन्तयत्यमुमेव तु । न स्वयं चिन्तयत्यर्थं स हि तद्भाववित् सदा । अन्ये त्वज्ञानसंयुक्ता मोहमीयुर्यथाक्रमम् । तस्य मध्यन्दिने सूर्ये[5] क्षोभवत् क्षोभमात्रकम् । नैवाज्ञानं यथा सूर्ये तमो नास्ति कदाचन" इति भावविवेके ॥ * ॥

वस्तुनो [6]यद्यनानात्वमात्मनः प्रश्न ईदृशः ।
कथं घटेत वो विप्रा वक्तुं वाऽनेक[7] आश्रयः ॥ २२ ॥

पञ्चात्मकेषु भूतेषु समानेषु च वस्तुतः ।
को भवानिति वः प्रश्नो वाचारम्भो निरर्थकः[8] ॥ २३ ॥

मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपीन्द्रियैः ।
अहमेव न मत्तोऽन्यदिति बुद्ध्यध्वमञ्जसा[9] ॥ २४ ॥

---

१ "तद्विचारणम्" इति प्र. पाठः । २ "तमेव चिन्तयद्–" इति प्र. पाठः प्रामादिकः ।

३ ननु कथं सर्वज्ञस्य ब्रह्मणोऽप्रतिपत्तिरित्यत्र आह—भ्रमतीव । यत्र विष्णुरात्मा स्वयं वक्तुमिच्छेत् तदा ब्रह्मणो मनः भ्रमतीव । न स्वतोऽप्रतिपत्तिः । किन्त्वप्रतिपन्न इवाऽत्मानं दर्शयति ब्रह्मा । कुतः? विष्णुमायया । तथाविधया हरेरिच्छया । अत्र जीवगोस्वामी चाऽह–"यावानहं यथाभावो यद्रूपगुणकर्मकः । तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहादिति, एतन्मतं समातिष्ठ परमेण समाधिना । भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचिदिति, ऋषिमाद्यं न बध्नाति पापीयांस्त्वां रजोगुणः इति च लब्धभगवद्वरत्वेऽपि, न भारती मेऽङ्ग मृषोपलक्ष्यते इत्यादिना व्यञ्जिततादृशस्वानुभावत्वेऽपि ब्रह्मणः कर्मधीत्वं सम्प्रति स्वमहिमव्यञ्जनाय श्रीभगवदिच्छयैव ज्ञेयम्" इति । ४ "तत्राऽत्मा" इति प्र. पाठः ।

५ "सूर्यक्षोभवत्" इति क्वचित् । मध्यन्दिने सूर्ये दृश्यमानः क्षोभो नाम द्रष्टुर्नरस्याशक्तिनिमित्तं दृष्टिक्षोभ एव । नहि सूर्ये कश्चिद् विशेषः । एवं ब्रह्मणोऽप्रतिपत्तिर्नाम इतरेषां तथा प्रतीतिरेव ।

६ "यद्यनानात्व आत्मनः" इति पाठान्तरम् । ७ "वक्तुर्वा मे क–" इति प्र. पाठः ।

८ "वाचारम्भो ह्यनर्थकः" इति च । "वाचाऽऽरब्धो निरर्थकः" इति पाठान्तरम् ।

९ तदयं श्लोकत्रयार्थो यादवेन्द्रतीर्थीये—"लोके प्रश्नः निर्णयकारणेऽसति अनेककोट्यवलम्बनेन प्रवर्तते । अयं प्रश्नो न तथेत्याह—यद्यनानात्वम् । आत्मनः वस्तुनः एकत्वं यद्यङ्गीकृतं भवद्भिः तदा ईदृशः ब्रह्माभिवन्दनलक्षणनिर्णयकारणे सत्यपि प्रश्नः कथं घटेत? ईदृशः एककोटिको वा कथं घटेत? परिहारो वा वक्तुं कथं घटेत? ननु अनेकाश्रयोऽयं प्रश्नः । ब्रह्मवन्द्यानामनेकेषां सम्भवादित्यपक्वबुद्धेः शङ्कामाशङ्क्याऽह—अनेक आश्रयश्चेदिति । पञ्चात्मकेषु देवमनुष्यपितृगन्धर्वासुररूपपञ्चविधेषु सर्वेषु प्राणिषु वस्तुतः वस्तुस्वभावात् हिरण्यगर्भावरत्वात् निमित्तात् समानेषु हिरण्यगर्भवन्द्यत्वाभावेन समानेषु सत्सु । हिरण्यगर्भवन्द्यानामनेकेषामभावात् को

आत्मनो वस्तुनः परमात्मवस्तुनः एकत्वं यद्यङ्गीकृतम्, तदा कथं प्रश्नो घटेत ? नहि परमात्मनोऽन्यो ब्रह्मणा पूज्यः स्यादभिवन्दनादिना[1]। तस्माद् [2]ब्रह्मणो वन्द्यः परमात्मैव। स चैक एव। अतः कथं प्रश्नः परिहारो वा ? ॥ * ॥

वस्तुतः समानेषु हिरण्यगर्भावरत्वात् तद्भन्यत्वाभावापेक्षया[3]। तस्माद् ब्रह्मणो वन्दनानन्तरं विचारो न घटते। तस्मात् को भवानिति वाचा प्रारब्धः[4] प्रश्नो निरर्थकः ॥ * ॥

[5]तस्मान्मनआदिभिर्गृह्यमाणमहं न भवाम्येव। स्वयमपि प्रसादात् कथञ्चिद् गृह्यत इत्यत आह —मत्तोऽन्यदिति। यन्मनआदिभिर्विचार्य मत्तोऽन्यत्वेन[6] ज्ञायते तदहं न भवाम्येवेति बुद्ध्यध्वम्[7]। विचारितस्यापि पुनः संशयकारणं परिकल्प्य संशयो न कर्तव्यः। अतः को भवानिति नाऽऽरब्धव्यः। गुणेष्वाविशते चेत इत्येव प्रश्न आरब्धव्यः ॥ * ॥

"न युष्माकं मयि प्रश्नो घटतेऽयं[8] कथञ्चन। मामृते नहि वन्द्योऽस्ति विरिञ्चेः क्वापि कश्चन। अभिवन्दितपादं मां विरिञ्चेन कथं पुनः। पृच्छथान्ये समा यस्माद्वरत्वे चतुर्मुखात्। देवा मनुष्याः पितरो गन्धर्वा असुरास्तथा। इति पञ्चात्मकं सर्वं ब्रह्मणस्त्ववरं यतः। यन्मदन्यद् विचारेण गृह्यते तन्नचास्म्यहम्। इति जानीध्वमद्धैव मत्प्रसादाद्धि मद्दृशिः। अन्यत् स्वभावतो दृश्यं मम प्रेरणयैव तु। तस्माद् विवक्षितार्थे तु[9] प्रश्नारम्भो न मद्गतः[10]" इति तन्त्रभागवते। "इदं हि विश्वं[11]"

भवानिति वः सनकादीनां प्रश्नः वाचयैव आरम्भ उत्पत्तिर्यस्य सः। कुत इत्यत आह—निरर्थकः। कोटिद्वयादिलक्षणविषयरहितः प्रयोजनरहितश्च। सर्वज्ञत्वेन सम्मतानां भवादृशानामेतत् प्रश्नवचनमयुक्तमिति भावः। लोकविलक्षणे मयि लोकसाधारण्यं परिकल्प्य संशयो न कार्य इत्याह—मनसेति। यत् वचसाऽऽगमेन, मनःप्रवृत्तिभिः, इन्द्रियैः, दृष्टया व्याप्तिदर्शनेन साक्षिणा वा मत्तोऽन्यत्वेन व्यक्तत्वादिनैव सह गृह्यते तत् प्राकृतं प्रकृतिर्वा अहं न भवाम्येव। स्वतन्त्रे मयि केनापि धर्मेण लोकसादृश्यं नास्तीति भावः। इति जानन्तोऽपि भवन्तः पुनर्लोकरीत्या संशयं कुरुथ। अतः इति अमुमर्थं सर्वगुणैर्लोकविलक्षणत्वं मयि अञ्जसा बुध्यध्वम्। ब्रह्माभिवन्दिते मयि एतादृशज्ञानदार्ढ्ये सति संशयकारणलोकसाधारणत्वज्ञानं न प्रवर्तेत इति भावः" इति।

१ "–वदनादिना" इति मुद्रितः प्र. पाठः प्रामादिकः। २ "ब्रह्मणा" इति क्वचित्।

३ "तद्भन्याभावापेक्षया" इति क्वचित्। ४ "वाचाऽऽरब्धः" इति च।

५ "यस्मान्मन–" इति प्र. पाठः। ६ "–त्वेनैव ज्ञायते" इति च।

७ "अहमेव न मत्तोऽन्यत्। सर्वान्तरात्मत्वादहमेव सर्वशब्दवाच्य इति बुध्यध्वमित्यर्थः" इति सुदर्शनसूरिर्वीरराघवश्च। "सर्वमहमेव यतो न मत्तोऽन्यत् परमकारणम्। मां विना तन्नास्त्येवेत्यर्थः" इति जीवगोस्वामी। "सर्वस्य चेतनाचेतनपदार्थस्य मदात्मकत्वान्मद्व्याप्यत्वान्मदधीनत्वादहमेव सर्वं मत्तोऽन्यत् पृथक्स्थितिप्रवृत्तियोग्यं नास्तीत्यञ्जसा बुध्यध्वम्" इति शुकदेवः। एतदप्यर्थान्तरं ग्राह्यमविरोधात्। तात्पर्यकृता त्वपूर्वमर्थान्तरमाविष्कृतं स्वरसप्रतीतमर्थमूरीकृत्यैव।

८ "न युष्माकमपि प्रश्नो घटेतायम्" इति प्र. पाठः।

९ "विवक्षितार्थेषु" इति क्वचित्। १० न मम हृद्गतः। अभिमत इति यावत्।

११ "इदं हि सर्वम्" इति प्र. पाठः प्रामादिकः।

भगवानिवेतरः" इति च। "प्रकृतेर्व्यतिरिक्तो यः पुरुषश्चेति कथ्यते। तं विद्यात् परमात्मानं वासुदेवेति यं विदुः" इति भारते। "प्रकृतेः प्राकृताच्चैव व्यतिरिक्तं गुणाधिकम्। ये विदुः परमात्मानं ते यान्ति परमं पदम्" इति च। "नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह। बहूनां पुरुषाणां हि यथैका योनिरुच्यते। तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम्" इति च ॥ * ॥

गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः[1]।
जीवस्य देह उभयं गुणाश्चेतो मदात्मनः[2] ॥ २५ ॥

मय्येव मनो यस्य स मदात्मा। तस्योभयं देहे दग्धमभवत्[3] ॥ * ॥

गुणेषु [4]चाऽविशेच्चित्तमभीक्ष्णं गुणसेवया।
गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् ॥ २६ ॥

मत्स्वरूपे तदुभयं त्यजेत् मयि स्थिताश्चेतो गुणाश्चेति।

"विष्णुस्था विषयाः सर्वे विष्णावेव मनो मम। इति मय्यर्प्य[5] तत् सर्वं त्यजेत् तत् तं न बाधते" इति साम्ये ॥ * ॥

---

१ "-श्चेतसि वः प्रजाः" इति पाठान्तरम्।

२ "हे प्रजाः ब्रह्मपुत्राः, यद्यपि गुणचेतसोः सम्बन्धः दुष्परिहरः। अथापि जीवस्य मदात्मनः सतः चेतो गुणाश्च परमात्माधीना इति मयि ध्यानवतः गुणाः चेतश्चेत्युभयं देहे दग्धमभवत्। ध्यानप्राप्तेश्वरानुग्रहेणेति भावः। एवमीश्वरध्यानात् मनसः रजोभागादिनाशे सति विषयवासना नश्यन्तीत्यर्थः" इति यादवेन्द्रतीर्थाः।

३ दह दाहे। देहे अदह्यत। लिङर्थोऽविवक्षितः। दह्यत इत्यर्थः। एष्यतोऽपि निश्चितत्वाद् भूतकालनिर्देशः। "अस्तिशब्दवदासीच्छब्दोऽपि सार्वकालिकः" इत्यन्यत्रोक्तम्।

४ "चाविशच्चित्त-" इति प्र. पाठः। "गुणेष्वाविशते चित्तम्-" इत्येव यादवेन्द्रतीर्थाभिमतः पाठ इति भाति। तथाहि तद्व्याख्यानम्—"विरक्तिश्च विषयवासनानाशे रजोभागनाशे च सहकारिणीत्याह—गुणेष्वाविशत इति। अभीक्ष्णं पुनःपुनः गुणसेवया विषयभोगेन। गुणाः चित्ते वासनानां प्रभवः येषां ते चित्तप्रभावा भवन्ति। अतो गुणसेवा न कर्तव्येत्यर्थः। मद्रूपे इन्द्रियविषयप्रेरकेषु मम रूपेषु गुणाश्चेतश्चेत्युभयं त्यजेत्। मदधीनतया ध्यायेत्। एवं ध्यानकर्ता उभयं मनोविषयसम्बन्धप्रयोजकं पुण्यं पापं च त्यजेत्। उभयं गुणमनसोः सम्बन्धलक्षणं बन्धं च त्यजेत्। मुक्तो भवतीत्यर्थः" इति।

५ "मय्यर्पयन् सर्वम्" इति प्र. पाठः।

यर्हि संसृतिबन्धोऽयमात्मनो गुणवृत्तितः[१] ।
मयि तुर्ये स्थितो जह्यात् त्यागस्तु[२] गुणचेतसाम्[३] ॥ २९ ॥

[४]गुणचेतसां त्याग एव बन्धत्यागः ॥ * ॥

यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः ।
[५]जाग्रत्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा[६] ॥ ३० ॥

"भिन्नस्य त्वेकभावेन तथैकस्य च भेदतः । ज्ञानं नानार्थधीः प्रोक्ता नानात्वादर्थतद्धियोः" इति ब्रह्मतर्के ॥ * ॥

असत्त्वादात्मनोऽन्येषां भावानां[७] किङ्कृताऽभिदा ।
गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥ ३१ ॥

---

१ "–वृत्तिदः" इति प्र. पाठः । २ "त्यागस्तद्–" इति च ।

३ "यर्हि यदा अयं संसृतिबन्धः भूतबन्धः तद्युक्तः कर्मबन्धः, आत्मनः मनसः जीवस्य वा गुणानां वृत्तिः विषयानुसन्धानं तस्मात् गुणवृत्तितो भवति । गुणवृत्तितः रजोगुणव्यापारादिति वा । तदा तुर्ये गुणत्रयव्यापारातीते मयि स्थितः समाधिमान् जह्यात् कर्मबन्धभूतबन्धादिकं तिरस्कुर्यात् । ततः गुणानां चेतसां चित्तवृत्तिप्रभेदानां त्यागस्तु विशेषतः स्यात्" इति यादवेन्द्रतीर्थाः । अथच यर्हि यस्मादयं बन्धो गुणवृत्तिनिबन्धनस्तस्माद् गुणातीते तुर्ये मयि स्थितस्तं जह्यात् । ननु तदा गुणचेतसां त्याग एव स्यान्न बन्धत्यागः स्यात् ? स्यादेवेत्याह— त्यागस्तु । यतो गुणचेतसां त्याग एव बन्धत्यागो नाम, न ततोऽन्य इति ।

४ इदं तात्पर्यवचनं यादवेन्द्रतीर्थरीत्या पूर्वश्लोकस्यैव व्याख्यानरूपमिति तद्व्याख्यानेन स्फुटम् ।

५ "जागर्त्यपि" इति प्र. पाठः ।

६ "स्वप्ने जागरणं यथा आरोप्यते तथा यः जाग्रत्यपि जाग्रदवस्थायामपि, ज्ञानप्रकाशे प्रसक्ते सत्यपि स्वपन्निव ज्ञानमसम्पाद्य वर्तते तस्य पुंसः नानार्थधीः परतन्त्रे परतन्त्रभेदबुद्धिः स्वातन्त्र्यारोपः युक्तिभिः यदि स्वतन्त्रः स्यात् तदा अहितकारणं न स्यादित्यादिभिः न निवर्तेत स पुमान् यावत् साकल्येन अज्ञः मूढतमः" इति यादवेन्द्रतीर्थाः । अथच यावत् पुंसः नानार्थधीः न निवर्तेत तावत् जाग्रत्यपि स्वपन्नज्ञ इति योजनान्तरम् ।

७ "भावानां तत्कृता" इति प्र. पाठः । "ननु स्वातन्त्र्यज्ञानं कथमारोपः । कुलालादेः घटादिकरणस्वातन्त्र्यदर्शनादित्यत आह—असत्त्वादिति । आत्मनः अनन्तकल्याणगुणशक्त्यादिपरिपूर्णादन्येषां भावानां पदार्थानां असत्त्वात् स्वतःशक्तिरहितत्वात् अभिदा स्वतःशक्तिसद्भावप्रतीतिः किङ्कृता ? केन प्रकारेण प्राप्ता । न केनापि । तस्मात् स्वातन्त्र्यादिज्ञानं भ्रम इत्यर्थः । ननु "न जीवात् कारणं परम्" इति वचनात् । इदं मत्कृतिसाध्यम्, मदन्येनासाध्यत्वे सति साध्यत्वादिति हेतुना च जीवस्य स्वातन्त्र्यं ज्ञायत इत्यत आह— गतय इति । गम्यते ज्ञायतेऽर्थोऽनेनेति गतिः वचनम् । गतयः वचनानि मृषा बाधितार्थानि । हेतवश्च बाधितार्थाः । अस्य जीवस्य

"अभिदा किङ्कृतैतेषां भावानां परमेश्वरे। यतोऽसत्त्वमशक्तत्वाद् भावानां तस्य शक्तता[1]। ततः सत्त्वं [2]साधुभावः सत्त्वमित्युच्यते बुधैः। [3]साधुभावश्च शक्तिः स्यात् ततोऽन्याऽसाधुता ततः। अभेदे जगतो विष्णोर्या वाचो ये च हेतवः। स्वप्नजाग्रत्कल्पकवत् सर्वे ते भ्रमदर्शिनः[4]" इति शश्वत्संहितायाम्[5] ॥ * ॥

यो जागरे [6]बहुविधान् क्षणधर्मिणोऽर्थान्
भुङ्क्ते समस्तकरणो[7] हृदि तत्सदृक्षान्।
स्वप्नेऽथ सुप्त[8] उपसंहरते स एकः
स्मृत्यन्वयात् त्रिगुणवृत्तिदृगिन्द्रियेशः[9] ॥ ३२ ॥

स्वप्नदृशः स्वाप्नज्ञानानि स्वप्ने जाग्रदभेदज्ञानानि यथा मृषा एवं स्वतः सामर्थ्यरहिते स्वतः कर्तृत्वादिज्ञानं भ्रम इत्यर्थः" इति यादवेन्द्रतीर्थाः। भावानां जीवानामिति वा।

१ भावानामशक्तत्वादसत्त्वम्। तस्य यतः शक्तता ततः सत्त्वम्। अत एव शक्तः पुरुषः सत्त्ववानुच्यते।

२ रीत्यन्तरेणापि शक्तत्वं सत्वमित्युपपादयति— साधुभावः सत्वमित्युच्ते बुधैः। "सद्भावे साधुभावे च" इत्यादिस्मरणात्। साधुभावः समीचीनमस्तित्वम्। ततश्च स्वातन्त्र्येण सत्ताशक्तिरेव मुख्यतः साधुभाव इत्याह— साधुभावश्च शक्तिः स्यात्। ततश्च ततोऽन्या अशक्तिरेवासाधुतेति सर्वं समञ्जसम्।

३ अत्र बहवः पाठभेदाः। "साधुभावश्च शक्तस्य ततोऽन्याऽसाधुता ततः" इति प्र· पाठः। "साधुभावश्च शक्तस्य ततोऽन्याऽसाधुता यतः" इति क्वचित्। "साधुभावश्च शक्तस्य ततोऽन्यत् साधुता ततः" इति च क्वचित्। "साधुभावश्च शक्तिः स्यात् ततोऽन्यासाधुभावतः" इति चैकत्र। "साधुभावश्च शक्तस्य ततोऽन्यत् साधुभावतः" इत्येके।

४ "भ्रमदर्शिताः" इति क्वचित्। प्र. पठोऽपि तथा।

५ "शाश्वत्संहितायाम्" इति प्र. पाठः प्रामादिकः।

६ "बहिरनुक्षण–" इति प्र. पाठः।

७ "–करणैर्हृदि" इति च।

८ "स्वप्ने सुषुप्त–" इति च।

९ "त्रिगुणवृत्तिः जीवस्य सत्त्वादिगुणप्राप्तव्यापारः तं पश्यतीति त्रिगुणवृत्तिदृक्। इन्द्रियेशः सर्वेन्द्रियनियामकः यः परमात्मा जागरे क्षणधर्मिणः क्षणेक्षणे विकारविशिष्टान् बहुविधान् भोग्यान् भुङ्क्ते। विश्वमूर्तिः सन् दक्षिणाक्षिस्थः विषयान् सर्वाननुभवति। अथ जागरावस्थानन्तरं स्वप्ने हृदि मनसि स्थितः तैजसमूर्तिः सन् तत्सदृक्षान् जाग्रत्पदार्थसदृशविविधपरिमाणाद्युपेतान् अर्थान् भुङ्क्ते। सुप्तः सुषुप्त्यवस्थां गतः सम्यगस्तानि निर्व्यापाराणि करणानि इन्द्रियाणि येन सः हृदि स्थितः प्राज्ञः उपसंहरते जीवसुखं समुपाहरत्यनुभवति। ननु वायोरपि स्वप्नादिद्रष्टृत्वमस्ति, जीवस्यापि प्रत्यभिज्ञायते। तत्कथमीश्वरस्यैव तदुच्यत इत्यत आह— स एक इति। स स्वतन्त्र एकः स्वप्नादिद्रव्यप्रधानः जीवानां स्वप्नादिप्रदर्शकश्च। कुतः? स्मृतिसहितश्रुतेरन्वयात्। अस्मिन्नर्थे तात्पर्यसम्बन्धादित्यर्थः" इति यादवेन्द्रतीर्थाः। अथच सत्वेन जाग्रदवस्थां रजसा स्वप्नं तमसा सुप्तिं च स्वयं साक्षित्वेन पश्यति जीवस्य दर्शयतीति च त्रिगुणवृत्तिदृक्। एतादृशो यो जागरेऽर्थान् भुङ्क्ते भोजयति च जीवस्य। य एव च समस्तकरणः इन्द्रियाणामुपहतबाह्यव्यापारः स्वप्ने बाह्यार्थसदृशान् वासनामयानर्थान् भुङ्क्ते

88

"दक्षिणाक्षिस्थितो विष्णुर्भुङ्क्तेऽर्थान् जाग्रदास्थितान् । कण्ठसंस्थस्तथा [1]स्वाप्नान् जीवानन्दं च सुप्तिगः । श्रुत्यन्वयात् स्मृतिभ्यश्च स एकः परमेश्वरः । अस्वतन्त्रस्य जीवस्य स्वतन्त्रो जाग्रदादिदः । स्वयं स्वप्नादिहीनः सन् क्रीडते पुरुषोत्तमः" इति सत्तत्वे[2] । "स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभि चाकशीति" इत्यादि च ॥

॥ * ॥

[3]वीक्षेत विभ्रममिमं[4] मनसो विलासं
दृष्टं विनष्टमतिलोलमलातचक्रम् ।
विज्ञानमेकमुरुधेव विभाति माया
स्वप्ने यथा त्रिगुणसर्गकृतो विकल्पः[5] ॥ ३४ ॥

जाग्रदादिषु परमात्मभेदं विभ्रमं वीक्षेत ।

"जाग्रदादिकरो देवः परमात्मैक एव तु । इति वीक्षेत[6] सततं मुच्यते संसृतेरतः" इति प्रकाशिकायाम्[7] ।

भोजयति च । अथ सुप्तिनियामकः सन् सर्वेन्द्रियव्यापारमुपसंहरते । केवलं जीवानन्दं भुङ्क्ते भोजयति च जीवं सोऽयं व्यवस्थाप्रेरकस्त्रिरूपो भगवानेक एव । न स्थानभेदाद् व्यापारभेदाद् वा भेद इति । कुतः? स्मृत्यन्वयात् । स्मृतिभ्यः । श्रुतिसमन्वयाच्च । स्मृतीति श्रुत्युपलक्षणं वा । श्रुतिस्मृतीनामन्वयादिदं तात्पर्यमवगम्यत इति योजनान्तरम् ।

१ "स्वप्नान्" इति प्र. पाठः ।
२ "इति तत्त्वे" इति प्र. पाठः । क्वचित् कोशे च ।
३ "ईक्षेत" इति पाठान्तरम् ।
४ "विभ्रममिदम्" इति प्र. पाठः ।

५ "जाग्रदाद्यवस्थाप्रवर्तकपरमात्ममूर्तिषु प्रसक्तं भेदं निषेधति—वीक्षेतेति । यः विकल्पः विविधः कल्पः कल्पना परमात्मनि भेदप्रत्ययः तमिमं विभ्रमं वीक्षेत भ्रमत्वेन जानीयात् । कथं तस्य भ्रमत्वम्? आह–दृष्टमिति । आरोपाधिष्ठानं यदा सम्यग् दृष्टं भ्रमत्वेन उपदेशैर्ज्ञातं तदा विनष्टं अलातचक्रभ्रमवत् । अतिलोलं गुरूपसत्त्या श्रुत्यादिभिर्यथार्थज्ञाने सति शीघ्रं नश्यतीत्यर्थः । नित्यानुवृत्तस्य कथं विनाशः? आह— मनसो विलासमिति । अमुं भ्रमं मनसो विलासं कार्यं वीक्षेत । अतो भ्रमस्य नाश इति भावः । यथाऽवस्थाप्रेरकेषु भेदभ्रमः एवमिन्द्रियादिशक्तिप्रेरकमूर्तिष्वपीत्याह—विज्ञानमिति । एकं स्वमूर्तिषु भेदवर्जितं विज्ञानं ब्रह्म उरुधा भिन्नतया विभाति तद् भानं माया अज्ञानकार्यं भ्रमः । यथा स्वप्ने भ्रमः भवति तथेहापीति भावः । अयं भ्रमः कस्माद् भवतीति जिज्ञासायामाह- त्रिगुणेति । गुणत्रयेण तत्कार्येण च पापादिना अज्ञानादिना च यस्य विकल्पो बन्धः कृतः तस्य विविधः कल्पो भवतीत्यर्थः" इति यादवेन्द्रतीर्थाः । अथच योजनान्तरम्—त्रिगुणैः सर्गो येषां तैः, त्रिगुणैस्तत्सर्गैः पापादिभिश्चेति वा कृतः विविधः कल्पः भेदप्रतीतिर्या तमिमं विभ्रमं वीक्षेत । यत एकमेव ब्रह्म उरुधेव विभाति । यथैकैव स्वाप्नी माया गजाद्याकारेण उरुधा विभातीति । विषयध्वजीये चैवम् ।

६ "वीक्ष्येत" इति प्र. पाठः प्रामादिकः ।
७ "प्रकाशसंहितायाम्" इति प्र. पाठः ।

[1]यदा विभ्रमोऽयमिति दृष्टस्तदैव विनष्टः । श्रुतियुक्तिभिर्विचारितेऽतिलोलः[2] । क्षिप्रं विनश्यतीत्यर्थः । [3]अलातस्य चक्राकारत्वभ्रमवत् परमात्मभेदभ्रमः । त्रिगुणैस्तत्कार्यैः[4] पापादिभिश्च बद्धः सन् विज्ञानरुपं[5] परमात्मानं भ्रान्त्या बहुधा[6] पश्यति ।

"देहभेदेष्ववस्थासु प्रादुर्भावेषु चैकलम्[7] । ज्ञानानन्दैकसद्रूपं भ्रान्त्या भिन्नं प्रपश्यति । सा च भ्रान्तिर्विनश्येत यदा भ्रान्तित्ववेदनम् । अतिक्षिप्रं विनश्येच्च न स्थिरं[8] दिग्भ्रमादिवत् । त्रिगुणैर्बन्धिता[9] जीवा ज्ञप्तिमात्रं जनार्दनम् । पश्यन्ति बहुधा स्वप्ने यथैकं बहुधा क्वचित्[10] । अभिन्नोऽपि[11] विभिन्नेषु व्यवहारो यथा भवेत् । तथैव व्यवहाराय शक्तत्वान्नैव दूषणम् । ईशस्य तु तदन्येषामपि यच्छक्तिदायकः" इति ब्रह्मतर्के ।

---

१ विभ्रम इति दृष्टम्, अनन्तरमेव विनष्टं भवन्तमत एव तद्विनाशार्थं विभ्रम इति वीक्षेतेत्यर्थः ।

२ "-ऽतिलोलं क्षिप्रम्" इति क्वचित् ।

३ एतेन मूलेऽलातचक्रमिति लुप्तोपमेत्युक्तम् । अग्रेऽग्निनाऽर्धदग्धा दारुशलाका अलात इत्युच्यते । स यथा केनचित् पुरुषेण निरन्तरं भ्राम्यमाणः चक्राकारः प्रतीयते । परिभ्रामकेण च निरस्ते परिभ्रमणे स्थिर एकाकारः प्रतीयते । एवं भ्रमनिरासकेन गुरूणोपदेशे भगवानप्येकरूपः प्रतीयते । यदा चायमलातपरिभ्रम इत्यवगतं तदा क्षिप्रमेव तस्य चक्राकारत्वभ्रमः विनश्यति । तथाऽत्रमपि गुरूपदेशेन ज्ञानमनु विनश्यति । तदेतदलातचक्रसाम्यम् । ननु-कोऽयं विशेषः? सर्वोऽपि भ्रमः भ्रमत्वदृष्टिमनु क्षिप्रं विनश्यति । न विनश्यति । तद् यथा दिग्भ्रमः । प्राचीं प्रतीचीं मन्वानः, केनचिदियं प्रतीचीति बोधितोऽपि दाढर्याय सूर्योदयपर्यन्तं प्रतीक्षते । नात्र तथा स्वयन्दर्शनपर्यन्तं प्रतीक्षते । यतोऽयं भ्रमः गुरुपदेशेन दृष्टः सपद्येव विनश्यति । तदेतदुत्तरत्र प्रमाणवचने स्फुटम् ।

४ त्रिगुणैः सर्गो येषां ते त्रिगुणसर्गाः त्रिगुणकार्याणि पापादीनीत्यर्थः ।

५ एकं केवलं विज्ञानम् । विज्ञानरूपमिति यावत् । सर्वरूपेष्वेकमिति च ।

६ उरुधेव इति मूलस्य विवरणं भ्रान्त्या बहुधेति । उरुधेव पश्यति अबहुं बहुमिव पश्यतीत्यर्थः ।

७ "वैकलम्" इति क्वचित् ।

८ अतिक्षिप्रमितिवत् स्थिरमिति च क्रियाविशेषणम् । स्थिरत्वेन न तिष्ठेदिति ।

९ "त्रिगुणैर्बद्धिता-" इति प्र. पाठः प्रामादिकः । "त्रिगुणैर्बाधिता-" इति क्वचित् ।

१० एकं गजादिकं स्वप्ने पश्यति । क्षणान्तरे तदेव क्वचित् तुरगो भवति । नरो भवति । वानरो वा भवति । वस्तुतस्तु वासनामयं सर्वमेकमेव । तथा परमात्मभेदभ्रमोऽपीति भावः ।

११ ननु यद्यभिन्नः कथं तर्हि दक्षिणाक्षिगतः कण्ठगतो हृद्गत इत्यादिस्थानभेदेन व्यवहारः, जाग्रत्प्रवर्तक इत्यादिक्रियाभेदेन वा? यद्यभिन्नः, सर्वं सर्वत्र कुर्यात् । तथा च स्थानक्रियादिभेदव्यवहार एव लुप्येत । सत्यं लुप्येत यद्यशक्तो भगवान् । शक्तो हि भगवान् विशेषबलादभिन्नेऽपि भेदव्यवहारं घटयितुम् । योऽन्यत्रापि लोकेऽभिन्नेषु गुणक्रियादिषु भेदप्रतिनिधिं निधाय भेदव्यवहारं घटयति, स कथं स्वस्मिन् न घटयेदित्याह- अभिन्नोऽपि । विभिन्नेषु स्थानेषु स्वयमभिन्नोऽपि विभिन्नतया यथा व्यवहारः स्यात् । तथा व्यवहारं घटयितुं स्वयं शक्तत्वादघटितघटनापटोरीशस्य न किञ्चिदयुक्तमित्यर्थः ।

अलातभ्रामको यदा निवर्तते तदैव भ्रमो निवर्तते । तद्वद् यदा भ्रमनिवृत्तिमिच्छति तदैव गुरूपसदनान्निवर्तयितुं शक्यः[1] ।

"अशक्योऽप्यतिशक्योऽयं विनिवर्तयितुं भ्रमः । ईशस्थो[2] गुरुसम्पत्त्या यदि शुद्धमनाः पुमान्" इति सम्यग्ज्ञाने ॥ * ॥

दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततर्ष-[3]
स्तूष्णीं भवेन्निजसुखानुभवो निरीहः ।
सन्दृश्यते क्वच यदीदमवस्तुबुद्धया
त्यक्तं भ्रमाय न भवेत् स्मृतिरा निपातात्[4] ॥ ३५ ॥

निपातमन्धन्तमः । मोक्षमारभ्य तावत्पर्यन्तं स्मृतिर्यस्माज्ज्ञानिनो विद्यते, अतो मूढेषु स्थितो भ्रमो यद्यपि सन्दृश्यते तेन, तथाऽपि भ्रमाय न भवति । फलं हि निपातं स्मरति ॥ * ॥

देहं च नश्वरमनुज्झितमुज्झितं[5] वा
सिद्धो न पश्यति यतोऽध्यगमत् स्वरूपम् ।

---

१ तथाचायं भ्रमः स्वबुद्धया निवर्तयितुं शक्यः । नान्यो भ्रमस्तादृश इति विशेषं द्योतयितुमलातचक्रभ्रमस्य दृष्टान्तत्वेनोपादानमिति ।

२ ईशस्थ इतीशविषय इत्यर्थः । ३ "निवृत्ततृष्णस्तूष्णीम्" इति प्र. पाठः ।

४ "यदि यद्यपि इदं परमात्ममूर्तिषु मिथो वैलक्षण्यज्ञानं मूढेषु सन्दृश्यते । ज्ञानिभिस्तु अवस्तुबुद्धया त्यक्तं तिरस्कृतं वैलक्षण्यं भ्रमाय भ्रमविषयत्वाय न भवेत् । तत्र कारणमाह—स्मृतिरिति । निपातमन्धन्तमः । मोक्षमारभ्य निपातपर्यन्तं लोकेषु स्थितज्ञानिनां भ्रमविरोधिनी स्मृतिरस्ति । निवृत्ततर्षः विषयतृष्णारहितः निरीहः देहानुबन्धिषु आदानेच्छारहितः । ततः असम्यग्ज्ञानात् दृष्टिं मनः प्रतिनिवर्त्य प्रपञ्चविषये परमात्मविषये चान्यथाज्ञानमत्यन्तं तिरस्कृत्य निजसुखानुभवसम्पन्नः संस्तूष्णीं भवेत् मनोवेगादीनि परमात्मन्येव निवेशयेदित्यर्थः" इति यादवेन्द्रतीर्थीयं नात्यन्तं भाष्यानुगुणम् । अयं तु भाष्यानुगुणः श्लोकार्थः—क्वचिन्मूढेषु विद्यमानमिदं ईश्वरमूर्तिषु भेदज्ञानं यदि यद्यपि ज्ञानिना सन्दृश्यते ज्ञायते । कुतः? यतः स्मृतिरा निपातात् । मोक्षमारभ्य तमःपर्यन्तं सर्वामपि लोकस्थितिं स स्मरति जनाति हि । अत ईश्वरमूर्तिषु भेदज्ञानं मूढेषु विद्यमानत्वेन सोऽपि स्मरत्येव । अथापि तन्न तस्य पुनर्भ्रमहेतुः संसारभ्रमणहेतुर्वा भवेत् । यतोऽपरमार्थबुद्धया पूर्वमेव परित्यक्तम् । यतश्च तत्फलं निपातरूपं स स्मरति । आ निपाताद्धि तस्य स्मृतिः । तेन तस्य मिथ्यात्वनिश्चयेन अनर्थहेतुत्वनिश्चयेन च न तत् तं बाधते । अतस्ततो दृष्टिं प्रतिनिवर्त्य भगवदेकतानतया लौकिकव्यवहारेषु तूष्णीमेव भवेदिति ।

५ "–मवस्थितमुत्थितं वा" इति प्र. पाठः ।

दैवादुपेतमथ दैववशादपेतं[1]
वासो यथा परिवृतं[2] मदिरामदान्धः ॥ ३६ ॥

"त्रिगुणसर्गकृतो विकल्पः" इत्युक्तम्। ज्ञानिनोऽपि देहवत्त्वेन त्रिगुणित्वाद्[3] विकल्पो भवतीत्यत आह— देहं च नश्वरमिति ॥ * ॥

देहोऽपि दैववशगः खलु कर्म यावत्
स्वारम्भकं प्रतिसमीक्षत[4] एव सासुः।
तं सप्रपञ्चमधिरूढसमाधियोगः
स्वाप्नं पुनर्न भजते प्रतिबुद्धवत् सः[5] ॥ ३७ ॥

"[6]आदरो भजनं भक्तिर्बहुमानं च सेवनम्। पर्यायवाचकाः सर्वे स्मृतिस्तज्जन्यकर्म[7] च" इति शब्दनिर्णये ॥ * ॥

---

१ "दैवादपेतमथ दैववशादुपेतम्" इति च।

२ "परिकृतम्" इति पाठान्तरम्। "सिद्धः अपरोक्षी अनुज्झितं विद्यमानं उज्झितं त्यक्तं वा देहं न पश्यति मम देहो गतः मम देहोऽस्तीति। यतोऽध्यगमत् स्वरूपम्। स्वरूपमन्तर्यामिरूपं अध्यगमत् स्वामित्वेनापरोक्षीकृतवान्। स्वरूपं चेतनदेहं स्वीयं रूपं वस्तु च तत् सर्वं अध्यगमत् परमात्मपरतन्त्रतया निश्चितवान्। परिवृतं परिकृतं वा। देहाच्छादकतया स्थितं वासः" इति यादवेन्द्रतीर्थाः।

३ "त्रिगुणत्वात्" इति क्वचित्। ४ "प्रतिसमीहत–" इति क्वचित्।

५ "–बुद्धवस्तुः" इति प्र. प्राठः। "सासुः प्राणवाय्वादिसहितः देहः कर्म यावत्पर्यन्तं स्वारम्भकं स्थितिकारणं भवति तावत्पर्यन्तं दैववशगः अदृष्टप्रेरकपरमात्मप्रेषितः प्रतिसमीक्षते अवतिष्ठते। देहावस्थाने पुनर्ममता कदाचित् स्यादित्यत आह—तमिति। सप्रपञ्चं विषयसन्निकृष्टेन्द्रियसहितं तं देहं अधिरूढः अत्यन्तं दृढः समाधिः निजमनसा स्वत एव परमात्मध्यानं स एव योगः उपायः सर्वभ्रमनिवृत्तिकारणं यस्य सः पुनः न भजते आदरविषयं न करोति। ममताभ्रमस्तु दूरोत्सारित इति भावः। यथा स्वप्नात् प्रतिबुद्धः स्वाप्नं देहं न भजते तत्राभिमानवान् न भवति तथेहापि" इति यादवेन्द्रतीर्थाः।

६ ननु ज्ञान्यपि प्रारब्धभावे पुनर्देहं भजते। तत् कथं न भजत इत्युक्तम्? शब्दार्थाबोधमूलोऽयमाक्षेप इत्याह—आदारो भजनम्। तथाच देहं न भजत इति न प्राप्नोतीति नार्थः। किन्तु प्राप्तमपि नाऽद्रियत इत्येवेति न दोषः। ननु देहे कोयमादरो नाम? आह— स्मृतिस्तज्जन्यकर्म च। स्मृतिरेवाऽदरो नाम। यो देहमाद्रे स स्वदेहमेव निरन्तरं प्रियं स्मरति यथा भक्तो भगवन्तम्। तज्जन्यं कर्म चाऽदर इत्युच्यते। यथा देहमेव प्रियं स्मरन् तत्पोषकमेव कर्म कुरुते। तदेतदाद्यूनत्वं देहेष्वादरो नाम। यथा भगवन्तमाद्रियमाणः तत्पूजादिकमेव स्मरणफलं कर्म कुरुते।

७ "–स्तज्जन्म कर्म च" इति प्र. पाठः।

[1]मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् ।
सुहृदं प्रियमात्मानं साम्यासङ्गादयोऽगुणाः ॥ ४० ॥

"अपूर्णगुणरूपास्तु सम्पूर्णगुणरूपकम । भजन्ति परमं ब्रह्म देवास्त्रिगुणवर्जितम्" इति कालसंहितायाम् ॥ * ॥

इत्येकादशस्कन्धे त्रयोदशोऽध्यायः

[चतुर्दशोऽध्यायः]

[2]तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा ।
ततो भृग्वादयोऽगृह्णन् सप्त ब्रह्ममहर्षयः ॥ ४ ॥

"रुद्रमिन्द्रं कुमारं च विनैवान्याग्रजो मनुः । ब्रह्मपुत्रेष्वादिसृष्टावन्यथात्वं पुनर्जनेः[3]" इति स्कान्दे । "[4]आदिसृष्टौ पूर्वजा ये तेऽधिकाः सर्वदा गुणैः[5] । अनाद्यनन्तकालेषु मुक्तावपि यथाक्रमम्" इति निबन्धे ॥ * ॥

---

१ "निर्गुणं प्रकृतिगुणेभ्यो निष्क्रान्तम् । सर्वानन्दपूर्णत्वात् निरपेक्षकम् । आत्मानमन्तर्नियामकम् । सुहृदमनिमित्तोपकारिणम् । प्रियं सर्वस्मात् प्रीतिविषयम् । साम्यं मे सर्वमूर्तिषु पूर्णत्वम् । असङ्गः निर्दोषत्वम् । एतदादयः प्रधानगुणाः मां भजन्ति" इति यादवेन्द्रतीर्थीयम् । साम्यासङ्गादयः अगुणाः, गुणाः अप्रधाना न भवन्तीति अगुणाः प्रधानाः गुणाः कल्याणगुणा मां भजन्तीत्यर्थः । इदमर्थान्तरं भाष्यानुक्तमप्यविरोधाद् ग्राह्यमेव । ननु निर्गुणं कथं साम्यादयो गुणा भजन्ति ? आह—अगुणाः । यतस्ते अगुणा न प्रकृतिगुणजन्याः प्राकृतगुणभिन्नाश्च अतो युक्तमप्राकृतगुणैर्गुणिनोऽपि निर्गुणत्वम् । भाष्यरीत्या त्वयमर्थः—गुणा अप्रधाना ब्रह्मादिजीवा निर्गुणं मां भजन्ति । ननु सुहृदमिति सर्वत्र साम्येन प्रीतिः, आत्मानमित्यसङ्गतयाऽन्तर्नियमनमित्यादयो गुणा उच्यन्ते । तत्कथं निर्गुणः ? आह—साम्यासङ्गादयोऽगुणाः । ते त्वप्राकृता गुणाः इत्यगुणा उच्यन्ते । प्रधानत्वाच्च । अतो युक्तमुक्तं निर्गुणत्वमिति । साम्यासङ्गादयः गुणाः इति वा च्छेदः । गुणा ब्रह्मादयश्च मां भजन्ति साम्यासङ्गादयः कल्याणगुणाश्च मां भजन्तीति ।

२ "तेन ब्रह्मणा, पूर्वजः आदिसृष्टौ इन्द्राद्यपेक्षयाऽन्येभ्यः पूर्वं जातः । तस्मै मनवे वेदवाणी प्रोक्ता" इति यादवेन्द्रतीर्थाः । मनवे स्वायम्भुवाय । भृगुर्मरीचिरत्रिरङ्गिराः पुलस्त्यः पुलहः क्रतुः इति सप्त ब्रह्माणः प्रजापतयश्च ते महर्षयश्च । ततः स्वायम्भुवात् ।

३ आदिकल्पे या सृष्टिस्तत्रैवायं क्रमः । तदनन्तरकल्पेषु देवानां पुनर्जनने तस्याः पुनर्जनेः आदिसृष्टिक्रमादन्यथात्वं च सम्भवति । ननु तर्हि तारतम्यं भज्येत । जननक्रमानुगुणं हि गुणतारतम्यं श्रूयते । सत्यं श्रूयते । किन्त्वादिसृष्टौ प्रथमजननक्रमानुसारेण । नहि पाश्चात्यजननेष्वयं नियम इत्याह— आदिसृष्टौ । नहि सर्वासु जनिषु गुणाधिकः पूर्वं जायते ।

४ "पूर्वसृष्टौ" इति प्र. पाठः ।

५ "सर्वतो गुणैः" इति च । "सर्वसद्गुणैः" इति क्वचित् । सर्वदेत्येतदसङ्कुचितवृत्तीत्याह- अनाद्यनन्तकालेषु मुक्तावपीति ।

एवं प्रकृतिवैचित्र्याद् भिद्यन्ते मतयो नृणाम् ।
पारम्पर्येण केषाश्चित् [1]पाषण्डमतयोऽपरे ॥ ८ ॥

[2]अनेन पारम्पर्येण केषाञ्चिदेव देवादीनाम् ॥ * ॥

मन्मायामोहितधियः पुरुषाः पुरुषर्षभ ।
श्रेयो वदन्त्यनेकान्तं यथाकर्म यथारुचि ॥ ९ ॥

धर्ममेके यशश्चान्ये कामं सत्यं दमं शमम् ।
अन्ये वदन्ति स्वार्थं वा ऐश्वर्यं त्यागभोजनम् ।
केचिद् यज्ञतपोदानं व्रतानि नियमान् यमान् ॥ १० ॥

आद्यन्तवन्त एवैषां लोकाः कर्मविनिर्मिताः ।
दुःखोदर्कास्तमोनिष्ठाः क्षुद्रानन्दाः शुचाऽर्पिताः[3] ॥ ११ ॥

"मद्भक्तिवर्जिते[4] श्रेयो ये मन्यन्ते दुराशयाः । [5]तेषामन्ते तमो घोरमनन्तं प्राप्यते ध्रुवम्" इति मान्यसंहितायाम् ॥ * ॥

---

१ "पाखण्ड–" इति प्र. पाठः । "एवं वेदानामपि विषये प्रकृतिवैचित्र्यात् मतयो भिद्यन्ते । नन्वेवमुपदेशपरम्पराप्राप्तं ज्ञानं किं नष्टम्? नेत्याह—पारम्पर्येणेति । अनेन उपदेशपारम्पर्येण केषाञ्चिद् देवादीनां सम्यग्ज्ञानम्, नान्येषाम् । अपरे पाषण्डे मते मतिर्येषां ते, वेदपरित्यागेन, तत्स्वीकारे वा स्वयमुत्प्रेक्षितार्थसाधकाः" इति यादवेन्द्रतीर्थाः ।

२ "तेभ्यो मुनिभ्यस्तत्पुत्रा देवदानवगुह्यकाः । मनुष्याः सिद्धगन्धर्वाः सविद्याधरचारणाः"(५) इत्यादिपूर्वश्लोकप्रस्तुतेन पारम्पर्येण । केषाञ्चिदेवेति शुद्धबुद्धीनां दौर्लभ्यमाह । अल्पवेदिनः पाषण्डमतय एव बहवः ।

३ "माया बन्धकशक्तिः । तया मोहितधियः श्रेयः अनेकान्तं बहुधा वदन्ति यथारुचि स्वप्रीत्यनुसारेण ॥ * ॥ बहुधा वर्णनं दर्शयति–धर्ममेक इति । वेदार्थान् साधनानि फलानि च विविधानि वदन्तीति भावः ॥ * ॥ एते पक्षा हेया एतत्फलानां हेयत्वादित्याह—आद्यन्तवन्त इति । तमोनिष्ठाः अज्ञानप्रचुराः तेषां नृणां लोकाः फलत्वेन प्राप्ताः दुःखोदर्काः अधिकदुःखानुषङ्गोपेताः । शुचा चिन्ताप्राप्तमनःखेदेन अर्पिताः सम्पादिताः" इति च ।

४ मद्भक्तिवर्जितम्" इति प्र. पाठः । ननु कथं धर्मस्य सत्यादीनां यज्ञादीनां यमादीनां वा दुःखोदर्कतया निन्दा क्रियते । "शान्तो दान्तः", "यज्ञदानतपः कर्म न त्याज्यम्" इत्यादिना तेषां स्वमतेऽपि श्रेयस्त्वादित्यत आह–मद्भक्तिवर्जिते । मूले चैतदुक्तमनेकान्तमिति । एको विष्णुरेव अन्तो निष्ठा यस्य तदेकान्तम् । तन्न भवतीत्यनेकान्तमविष्णुविषयं तद्भक्तिवर्जितं च । तथाचावैष्णवं धर्मादिकमेवात्र हेयत्वेनोक्तमिति न दोष इति भावः । तदुक्तम्—"धर्मो भवत्यधर्मोऽपि यो न भक्तैः कृतो हरेः" इत्यादि ।

५ तेषां तैः तमः प्राप्यते । एतेन दुःखोदर्कास्तमोनिष्ठा इति व्याख्यातम् । क्षुद्रधर्माचरणेन प्रथमं क्षुद्रानन्दा

न तथा मे प्रियतम आत्मयोनिर्न शङ्करः ।
नच सङ्कर्षणो न श्रीर्नैवाऽत्मा च यथा भवान्[1] ॥ १५ ॥

"कृपानिमित्ता या प्रीतिर्नीचभक्तेषु साऽधिका । [2]आन्तरैव तु या प्रीतिः सा तूच्चेषु यथाक्रमम् । यथा कश्चित् स्वमात्मानं प्रियां पुत्रमथापि वा । अतिहाय कृपायुक्तो भिक्षवेऽन्नं ददात्यपि । कदाचिदेव न पुनः स्वात्मादेः सार्वकालिकम् । योगक्षेमवहत्वं च नित्यं स्वात्मादिषु स्फुटम्[3] । एवमेव परेशस्य भक्तेषु श्रियजादिषु[4]" इति प्रियविवेके । [5]यादवेभ्यस्तु सर्वेभ्य [6]उद्धवो भगवत्प्रियः । उद्धवाच्च प्रियतमः प्रद्युम्नस्तु महारथः । तस्मादपि प्रियतमो रामः कृष्णस्य सर्वदा । नैव तस्मात् प्रियतमो विनैकं तु चतुर्मुखम्[7] । सर्वेभ्योऽपि प्रियतमा हरेः श्रीरेव वल्लभा[8] । नैव तस्याः प्रियतमो विना स्वात्मानमेव तु" इति यादवाध्यात्मे ॥ * ॥

निरपेक्षं मुनिं शान्तं निर्वैरं प्रियदर्शनम् ।
अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः[9] ॥ १६ ॥

स्वाङ्घ्रिरेणुभिस्तं शोधयामीत्यनुव्रजामि ।

आद्यन्तवन्तश्च लोका भवेयुः । अन्ते पुनर्दुःखोदर्काः । अन्ततः दुःखमात्रफलाः । यतस्तम एव निष्ठा काष्ठा येषां ते तादृशाः ।

१ "भवान् उद्धवः यथा प्रियतमः तथा । आत्मयोनिः ब्रह्मा । आत्मा मम देहः प्रियतमो न । श्रीब्रह्मादिषु नित्यं यथोचितपरमप्रीतिसद्भावेऽपि तत्कालीना उद्धवे कृपाप्रीतिर्महतीति भावः" इति यादवेन्द्रतीर्थाः ।

२ "आन्तरेव" इति प्र. पाठः प्रामादिकः ।

३ नहि स्वात्मादेरिव सदा भिक्षोर्योगक्षेमं वहति । कृपायां सत्यामपि । वारंवारं भिक्षोरागमने न तस्मा अन्नं दद्यात् । प्रत्युत भर्त्सयेदपि । तेन ज्ञायते तात्कालिकी कृपैव तस्मिन् नान्तरा प्रीतिरिति ।

४ "श्रीयजादिषु" इति क्वचित् । श्र्यजादिष्विति वक्तव्ये श्रवणमधुरताया एवं क्लैप्रसंयोगविश्लेषो विदितचरो वैदिकसम्प्रदायविदाम् । ५ "यादवेभ्यश्च" इति प्र. पाठः ।

६ उद्धवो बृहस्पतेरवतारभूतः अनिरुद्धसमः दशमकक्ष्यापठितः । तस्मादष्टमकक्ष्यापठितः कामावतारः प्रद्युम्नः प्रियतमः । तस्मादपि पञ्चमकक्ष्यापठितः शेषावतारो बलरामः ।

७ पुंसु विनैकं तु चतुर्मुखम् । चतुर्मुखपदयोग्यम् । ८ वल्लभा भार्येत्यर्थः ।

९ "स्वाङ्घ्रिरेणुभिः भक्तं पवित्रं करोमीति बुद्ध्या अनु पश्चात् व्रजामि । भक्तस्य पादस्पर्शः स्वाङ्घ्रिरेणौ न भवेदिति पश्चाद् गमनमिति भावः" इति यादवेन्द्रतीर्थाः । पूयेय पुनीय । शोध इव शोधनेऽपि दिवादिर्युज्यत इति भावः । अन्तर्णीतणिज् वा । अत एव श्रीधरस्वाम्यादयोऽपि "पवित्रीकुर्याम्" इत्येवार्थं वर्णयन्ति ।

"अनुगच्छति विष्णुस्तु स्वभक्तं तस्य शुद्धये । तस्याङ्घ्रिरेणुभिर्वातनीतैरग्रेसरः[1] शुचिः । अग्रतो गमने विष्णोः पादस्पृष्टं[2] रजो भवेत् । अतः स्वभक्तं पूयेयेत्यनुव्रजति केशवः" इति सङ्ख्याने[3] ॥ * ॥

कथं विना रोमहर्षं द्रवता चेतसा विना ।
विनाऽऽनन्दाश्रुकळया तुष्येद् भक्त्या विनेश्वरः[4] ॥ २३ ॥

[5]वाग् गद्गदा द्रवते यस्य चित्तं हसत्यभीक्ष्णं रुदति क्वचिच्च[6] ।
विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥ २४ ॥

"चित्तद्रवस्तथा स्थैर्यं प्रसादो भक्तिलक्षणम् । आधिक्येन तु तत्रापि स्थैर्यमेव विशेषतः । [7]डम्भस्य चलभक्तेश्च यस्मादश्वादिकं भवेत् । [8]डम्भादिपरिहारार्थं निगृह्णीयाच्च धीरधीः । अत आध्यात्मिकैः क्लेशैराधिभूताधिदैविकैः । [9]वाक्यैश्च वेदतन्त्राद्यैरुपदेशैश्च तादृशैः । बलवच्छासनैर्वाऽपि यस्य भक्तिर्न चाल्यते । स एव परमो भक्तो विष्णोर्हृदयवल्लभः" इति भक्तिविवेके ॥ * ॥

---

१ "–सरैः शुचिः" इति प्र. पाठः । वातनीतै रेणुभिरग्रेसरो भक्तः शुचिर्भवति ।

२ "पदा स्पृष्टम्" इति प्र. पाठः । विष्णोरग्रतो गमने विष्णोः पादरजः भक्तपादस्पृष्टं भवेत् । अतोऽनुव्रजति केशवः ।

३ "संस्थाने" इति क्वचित् पाठान्तरम् ।

४ "–कलया शुद्धयेद् भक्त्या विनाऽऽशयः" इति प्र. पाठः । "चित्तद्रवादिकं विना प्राप्ता कथं भक्तिः? भक्त्याभास इति भावः" इति यादवेन्द्रतीर्थाः । रोमहर्षादिना विनाभूता कथं भक्तिः स्यात्? भक्त्या विना कथमीश्वरस्तुष्येत् ?

५ "यस्य विषये दृढविरागेण दृढभक्तिसम्पन्नस्य चित्तं द्रवते भक्तेरुदारत्वावस्थायां तस्य वाक् अभीक्ष्णं प्रति पदं स्खलनोपेता भक्तैः सह सम्भाषणसमय इति भावः । अभीक्ष्णं हासादिमान् भवति । क्वचिद् रुदति । अपरोक्षलाभादिति भावः । मद्भक्तियुक्त एतादृशः भुवनं सज्जनसमुदायं पुनाति" इति च ।

६ "रुदत्यभीक्ष्णं हसति क्वचिच्च" इति प्र. पाठः ।

७ "दम्भस्य" इति प्र. पाठः । डम्भभक्तेः । वस्तुतस्तदभावेऽपि तत्प्रदर्शनं डम्भः । डम्भस्य चलभक्तेश्च सकाशात् । यद्वा लक्षणमित्यनुवर्तते । अश्वादिकं डम्भस्य चलभक्तेश्च लक्षणं ज्ञापकमपि भवेत् । न स्थिरभक्तेरेव । अतो डम्भादिसम्भावनापरिहारार्थमश्वादिकं निगृह्णीयात् । किमिदं सहजमश्रुदर्शनमाहो डम्भमूलं प्रदर्शनमिति विमृश्य डम्भमूलत्वे चलभक्तिमूलत्वे वा तन्निवारणाय यतेत । नहि प्रदर्शनं भक्तिः । किन्तु सहजदर्शनम् ।

८ "दम्भादि–" इति प्र. पाठः ।

९ वाक्यैश्च भ्रमविप्रलम्भाभ्यामन्यथागृहीतैः । उपदेशैश्च तादृशैः भ्रमविप्रलम्भमूलैरयोग्यगुरुकृतैः ।

89

[1]स्त्रीसङ्गसङ्गिनां सङ्गं त्यक्त्वा दूरत आत्मवान् ।
क्षेमे विविक्त आसीनश्चिन्तयेन्मामतन्द्रितः[2] ॥ २९ ॥

न तथाऽस्य भवेत् क्लेशो बन्धश्चान्यप्रसङ्गतः ।
योषित्सङ्गाद् यथा पुंसो यथा तत्सङ्गिसङ्गतः[3] ॥ ३० ॥

"केशवे त्वन्यथाबुद्धिः सैव स्त्री सम्प्रकीर्तिता । त्रिकालदुःखदत्वेन पुंसां सह[4] निवासनात् । जुष्टत्वाद् योषिदित्युक्ता वननाद् वनितेति च[5] । प्रमादकरणत्वात्तु प्रमदेति च गीयते । त्यजेत् [6]तत्सङ्गिनां सङ्गं बुभूषुः पुरुषः सदा । न तादृशः क्वचिद् दोषः पुरुषस्यासुखावहः । क्षुद्रपापानि पापानि चोपपातकपातके । महापातकनामानि सुमहापातकान्यपि[7] । तथा स्वतिमहान्तानि[8] पातकानि विदो विदो विदुः । पिपीलिकावधादीनि क्षुद्रपापोदितानि च । पापमस्थिमतां हत्या फलचौर्यादिरेव वा । [9]परदारादिकं चापि ह्युपपातकसंज्ञितम् । पातकं शूद्रहत्यादि ब्रह्महत्यादिकं महत् । देवस्वहरणादीनि सुमुहान्ति विदो विदुः । देवावज्ञा सतां चैव ततोऽपि सुमहत्तरा । महन्महत्तरा तस्या[10] अवज्ञा केशवे तु या । केशवस्य समोऽस्तीति केशवोऽस्म्यहमित्यपि । [11]ब्रह्माद्याः केशवात्मानः श्रीर्वा निर्गुण इत्यपि । मुक्तस्य

---

१ "स्त्रीणां स्त्रीसङ्गिनां सङ्गम्" इति प्र. पाठः ।

२ "स्त्री केशवे अन्यथाबुद्धिः । तस्याः सङ्गः सादरं सम्बन्धः यस्य स स्त्रीसङ्गः तामसजनः । तत्सङ्गिनो राजसाः । उभयविधानां सङ्गं आदरेण अवलोकनादिकं दूरतः त्यक्त्वा आत्मवान् प्रसन्नमनाः सन् । विषयविरागात् तामसज्ञानादिराहित्याच्च । विविक्ते विषयासक्तजनरहिते क्षेमे ध्यानस्यानुकूले स्थले आसीनः अतन्द्रितः आलस्यादिमनोदोषरहितः मां चिन्तयेत् ध्यायेत्" इति यादवेन्द्रतीर्थाः ।

३ "योषित् केशवेऽन्यथाज्ञानम् । तद्योगाद् यथा क्लेशादिर्भवति अन्यप्रसङ्गतः रस्यादिविषयासक्त्या तथा क्लेशादिर्न भवति" इति च ।

४ "पुंसा सह" इति पाठान्तरम् । प्र॰ पाठोऽपि तथा । पुंसां त्रिकालदुःखदत्वेन सहवासात् स्त्री । तथाच निर्वचनम् । गतिवाची इकार ईकारो वा दौर्गत्यं दुःखं च वक्ति । ईतिरिति यथा । त्रिषु कालेषु दुःखं यस्याः सा त्री नित्यदुःखदा । आद्यः सकारः सहवासवाची । नित्यं दुःखं ददती सह वसतीति स्त्री । क्वचित् प्रमदास्वपीयं निरुक्तिः समाना । क्वचित्तु सततं रमयतीति स्त्री । एवं विषयासक्तैः जोष्यत इति योषित् । वननाद् भजनात् । आदरेण सेवनात् । प्रमादयतीति प्रमदा ।

५ "वनितेति वा" इति क्वचित् ।

६ तस्या अन्यथामतेः सङ्गिनाम् । अन्यथाज्ञानिनाम् । मूलानुसारेणान्यथाज्ञानिसङ्गिनां च सङ्गम् ।

७ "-पातकानि च" इति क्वचित् ।

८ "स्वस्तिमहान्तानि" इति प्र. पाठः प्रामादिकः । स्वतिमहान्तानि स्वतिमहापातकान्तानि ।

९ परदारगमनादिकमित्यर्थः ।

१० "तस्य अवज्ञा" इति प्र. पाठः प्रामादिकः ।

११ ब्रह्माद्याः श्रीर्वा केशवात्मान इति मतिः केशवो निर्गुण इति मतिश्च केशवावज्ञा ।

तद्भावमतिररूपत्वमतिस्तथा । त्रिगुणात्मकदेहोऽस्याप्यस्तीत्यपि तु या मतिः । जन्ममृत्यादिबुद्धिर्वा दुःखाज्ञानादिबोधनम्[१] । तस्यापि परतन्त्रत्वविज्ञानं च तदुत्तमः । अस्तीति या मतिस्तस्य[२] वशादन्यस्य कस्यचित् । अस्तीति भावनेत्याद्या अवज्ञाः सम्प्रकीर्तिताः[३]" इति धर्मविवेके ॥ * ॥

"[४]अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्", "अपि चेत् सुदुराचारो भजते मामनन्यभाक्" इत्यादि च । "बाध्यमानोऽपि मद्भक्तः" इत्यादि च ॥ * ॥

"[५]परदारदृशिः प्रोक्ता क्षुद्रपातकसञ्ज्ञिता । उपपातकं तद्गतिश्च वर्णबाह्येषु पातकम् । महापातकसञ्ज्ञं तु पित्रादेर्दारधर्षणम् । दारदृष्टिः स्वोत्तमानां मानुषाणां स्वभावतः । सुमहापातकं प्रोक्तं तद्गतिः सुमहत् ततः[६] । ऋषिदारेषु मनसो गतिरेव ततोऽधिका । देवदाराभिकामानां सङ्गिसङ्गस्ततोऽधिकः । किमु विष्णोस्ततो योषित्सङ्गस्य[७] व्यत्ययस्थितेः । न समं पातकं क्वापि नहि स्वस्त्र्यभिकामतः[८] । अवज्ञाता

---

१ "दुःखज्ञानादिसाधनम्" इति प्र. पाठः प्रामादिकः । बोधनं ज्ञानम् । विष्णुर्दुःखी अज्ञानी चेति मतिस्तथाऽन्येषां बोधनं च ।

२ तदुत्तमः कश्चिदस्तीति मत्वा तस्य अनुत्तमत्वमतिः, अत एव स केशवोऽन्यस्य कस्यचित् वशात् वशो भूत्वा अधीनत्वेनास्तीति भावना मतिः इत्याद्याः केशवावज्ञाः ।

३ "अवज्ञा सम्प्रकीर्तिताः" इति प्र. पाठः प्रामादिकः ।

४ भगवदवज्ञैव महत्तमं पातकम्, यस्य नास्ति निष्कृतिः । विषयासक्त्यादिरूपं अन्यत् सर्वं पातकं भगवद्भक्तौ सत्यां प्रविलीयते न लिप्यते वेति गीतावचनाभ्यामाह— अवजानन्ति । अपि चेत् सुदुराचारः । साधुरेव स मन्तव्य इत्युत्तरार्धेनान्वयः । किं ग्रन्थान्तरान्वेषणेन ? अत्रैव किलोक्तम्— "बाध्यमानोऽपि मद्भक्तो विषयैरजितेन्द्रियः । प्रशस्तया हि मद्भक्त्या विषयैर्नाभिभूयते" (११–१४–१८) इति ।

५ परदाराणां स्वभोग्यत्वदृशिः मानससम्भोगः । परदारेषु गतिर्गमनं दैहिकः सम्भोगः उपपातकम् । वर्णबाह्येषु परदारेषु गमनं तु पातकम् । पितृत्वादिभिरुपाधिभिरुत्तमानां दारधर्षणं महापातकम् । स्वभावत उत्तमानां दारेषु स्वभोगार्हत्वदृष्टिः सुमहापातकम् । तेषु गतिः सम्भोगस्तु ततः सुमहापातकादपि सुमहत् पातकम् । स्वतिमहापातकम् ।

६ "सुमहत्तमः" इति पाठः प्रामादिकः ।

७ योषित्सङ्गस्य क्षुद्रपातकमारभ्य सुमहत्तमपातकपर्यन्तं व्यत्ययेन व्यत्यासेन बहुविधतयाऽवस्थितेः न तत्समं पातकं क्वापि । पातकेषु यावत्यो विधास्तासु सर्वास्वपि प्रविष्टत्वात् । मनुष्यलोके दुःखमारभ्यान्धन्तमःपर्यन्तं सर्वविधानर्थहेतुत्वाच्च । यासां सङ्गो विहितस्ततो व्यत्ययेन स्थितिर्यस्य तस्य योषित्सङ्गस्येति वा । अविहितपरयोषित्सङ्गस्येति यावत् । उक्तरीत्या स्वतिमहत्तमपातकान्तत्वेन न समं पातकं क्वापि । एवञ्च मूले स्त्रीसङ्गसङ्गिनामिति योषित्सङ्गादिति च स्वोत्तमस्त्रीविषयतया यथाश्रुतार्थपरत्वेऽपि न नो हानिरिति भावः । ननु किमित्येवं व्याख्यायते? स्त्रीसङ्गमात्रस्य भगवन्मार्गपरिपन्थित्वं किं न स्यात्? न स्यादेवेत्याह– नहि स्वस्त्र्यभिकामतः क्वापि पातकमिति । नहि स्वदारगमनं दोषः । दृश्यन्ते च हि दारैः सह मोक्षपदवीमारुरुक्षवो देवादयः । नहि स्वस्त्र्यभिकामतः माधवादेरवज्ञाता वा भवति । किन्तूत्तमस्त्रीकामत एव क्रमादुत्तमानामवज्ञाता भवति । अन्ततो भगवदवज्ञाहेतुत्वमेव हि दोषाणां दोषत्वं नाम । तस्मात् भगवदवज्ञामूलं तं परस्त्रीकामं अवज्ञातारं कामिनं च दूरतस्त्यजेत् ।

८ "स्वस्त्र्यभिकामिनाम्" इति प्र. पाठः प्रामादिकः ।

माधवादेस्तस्मात् तं दूरतस्त्यजेत् । मानुषेषु तु दुःखित्वं क्षुद्रपापफलं स्मृतम् । पापात्तु वर्णबाह्यत्वं तिर्यग्योनिगतिस्तथा । सहस्रवर्षनरकं[1] क्षुद्रपातकजं फलम् । उपपातकतश्चापि नरकं युगमात्रकम् । चतुर्युगावसानं तु पातकस्य फलं स्मृतम् । महापातकजन्यं च कल्पावधि समीरितम् । सुमहापातकाच्चापि यावद्ब्रह्मलयो भवेत् । तत्पराणां पातकानां फलमन्धन्तमः स्मृतम् । अधोऽधो दुःखबहुलं विष्णुदाराभिमर्शनात्[2] । वधादपि हि दाराणां[3] धर्षणं कोपकारणम् । [4]तस्माद् देव्यः सदा वन्द्या अग्निवन्नाभिकामतः" इति धर्मतत्त्वे ॥ * ॥

[5]एवं प्रणवसंयुक्तं प्राणसंयममभ्यसेत् ।
दशकृत्वस्त्रिषवणं मासादर्वाग् जितोऽनिलः[6] ॥ ३५ ॥

"[7]उपास्य प्राणतोऽनुज्ञां हृदिस्थात् प्राप्य सेवकः[8] । अनुज्ञानन्तरं मासाद् वशेप्राणो भविष्यति । प्रसादभाक्त्वं सम्प्रोक्तं प्राणविष्ण्वोर्जयस्त्विति । नहि सर्वविजेतारौ विजेयौ केनचित् क्वचित् । अपेक्षितं फलं येन दीयते तज्जितं त्विति । यथा जिता वसुमती यथा मोक्षपदं जितम्" इति प्रभञ्जने ॥ * ॥

[9]तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् ।
तच्च त्यक्त्वा मदारोहो न किञ्चिदपि चिन्तयेत् ॥ ४४ ॥

---

१ "–वर्षं नरकम्" इति क्वचित् ।

२ अभिमर्शनं बलादपहरणादिकम् । अभिमर्शनमिति चाभिमर्शनेच्छैव । न वस्तुतोऽभिमर्शनम् । असम्भवात् । आविष्णुदाराभिमर्शनादधोधो दुःखबहुलम् ।

३ "दारस्य धर्षणम्" इति प्र. पाठः । क्वचित् कोशेषु च ।

४ तस्माद् देव्यः अग्निवत् दूरत एव वन्द्याः । यतः स्पृष्टा निर्दहेयुः । अत एव न स्पर्शनाद्यभिकामतो द्रष्टव्या वन्द्या वा ।

५ "एवमर्थानुसन्धानसहितप्रणवेन संयुक्तं प्राणसंयमं पुनःपुनरभ्यसेत् । त्रिषवणम् । सवनः कालः । प्रातर्मध्याह्ने सायाह्ने चाभ्यसेत् । दशकृत्वः दशप्रणवपर्यन्तं प्रथमः प्राणायामः एवं क्रमेण सङ्ख्यामधिकां कुर्यात् । अथवा दशवारं प्राणायामाभ्यासः प्रातः । मध्याह्ने सायाह्ने च तथा । एवमभ्यासं कुर्वतः अनिलः मासात् पूर्वं जितः प्रसन्नो भवति" इति यादवेन्द्रतीर्थाः ।

६ "जितानिलः" इति प्र. पाठः ।

७ सेवकः प्राणमुपास्य हृदिस्थात् स्वोपासितात् प्राणादनुज्ञां प्राप्य पुनरप्युपास्य अनुज्ञानन्तरं मासात् पूर्वं स्ववशे प्राणो यस्य स वशेप्राणो भविष्यति । वशीकृतप्राणः सम्पादितप्राणप्रसाद इत्येतत् ।

८ "सेवतः" इति क्वचित् । तदा उपास्यप्राणत इत्येकं वा पदम् । स्वोपास्यात् प्राणतः अनुज्ञां प्राप्य सेवतः सेवमानस्य मासादर्वाक् प्राणो वशे भविष्यतीति ।

९ "तत्र एकैकावयवे लब्धपदं सक्तं दृढवासनोपेतमित्यर्थः । व्योम्नि व्याप्ते सर्वावयवैः सम्पन्ने रूपे धारयेत् ।

"व्योमेति व्याप्तशब्दः स्याद् विशेषादोतता यतः" इति शब्दनिर्णये ।

व्योम्नि धारयेत् सर्वाङ्गेषु धारयेदित्यर्थः । तच्च धारणं त्यक्त्वा स्वत एव मनसस्तत्रैव समाहितत्वादन्यत् किमपि न चिन्तयेत् ।

"यावत् समग्रस्मरणमचलं केशवे भवेत् । समग्रं चिन्तयेत् तावद् यदा तु विचलेत् ततः । [1]प्रत्यङ्गं धारणं कुर्यान्मनो यावत् समग्रगम् । प्रत्यङ्गाभ्यासतो यावत् समग्रे सुस्थिरं मनः । तदा पुनः समग्रं तु धारयेद् यत्नतो बुधः । यदा तु धारणोत्साहं विना तत्राचलं मनः । तिष्ठेत् त्यक्त्वा तमुद्योगं शङ्खचक्राम्बुजाङ्किते । आरूढचेताः परमे शृङ्गाराद्येकधामनि । नैवान्यच्चिन्तयेत् तस्मात् पूर्णानन्दाच्चतुर्भुजात् । यतोऽन्यस्मरणे तस्मान्मनश्चलति सुस्थिरम् । [2]धारणार्थं प्रयत्ने च तस्मात् तदुभयं त्यजेत् । यावत् स्वारूढचेताः स्याद् विष्णो रूपे चतुर्भुजे" इति ध्यानयोगे ॥

॥ * ॥

[3]एवं समाहितमतिर्मामेवाऽत्मानमात्मनि ।
विचष्टे मयि सर्वात्मन् ज्योतिर्ज्योतिषि संयुतम् ॥ ४५ ॥

परमात्मानं मां स्वदेहे[4] पश्यति । जीवज्योतिर्मयि संयुतं पश्यति ।

"समाधियोगे सम्पूर्णे हृदि[5] पश्यति केशवम् । जीवं तत्प्रतिबिम्बं च तेनैव सह संस्थितम् । तदाधारं तदन्तस्थं तेनैव सदृशं सदा[6] । आनन्दज्ञानशक्त्याद्यैः सदा तदवरं गुणैः । जीवन्मुक्तौ च मुक्तौ वा सततं तद्वशे स्थितम्" इति[7] तत्त्वप्रतिपत्तौ ॥

॥ * ॥

सर्वाङ्गेषु चित्तं धारयेदित्यर्थः । एवं प्रयत्नेन प्राप्तध्यानस्य फलमाह—तच्च त्यक्त्वा । मदारोहः मयि आरोहः मनसः प्रयत्नं विना स्वतः सक्तिर्यस्य सः योगी यद् ध्यानार्थं प्रयत्नादिसाधनं तत् त्यक्त्वा किञ्चित् बाह्यार्थं न चिन्तयेत् न स्मरति । परमात्मानमेव स्मरतीति भावः" इति यादवेन्द्रतीर्थाः ।

१ "प्रत्यङ्गधारणम्" इति क्वचित् ।

२ "धारणार्थप्रयत्नेन" इति प्र. पाठः । "धारणार्थप्रयत्ने च" इति क्वचित् । धारणार्थं प्रयत्ने च मनश्चलति । तस्मात् तदुभयं अन्यस्मरणं धारणार्थं प्रयत्नं च त्यजेत् । कदा ? यावद् यदा स्वारूढचेताः ।

३ "समाहितमतिः मयि स्थिरमतिः योगी आत्मनि स्वदेहे आत्मानं परमात्मानं मां विचष्टे पश्यति । सर्वात्मन् सर्वस्वामिनि ज्योतिषि मयि संयुतं ज्योतिः जीवं पश्यति । तत्वदेवांश्च उपदेशध्यानादिना पश्यतीति भावः" इति यादवेन्द्रतीर्थाः ।

४ "स्वदेहे पश्यन्ति । जीवं ज्योतिर्मयि संयुतं पश्यन्ति" इति प्र. पाठः प्रामादिकः ।

५ "हृदि पश्यन्ति" इति प्र. पाठः ।

६ "तदा" इति च ।

७ इतः परं प्र. पाठे "स्वयम्प्रकाशरूपत्वाज्जीवोऽपि ज्योतिरुच्यते इति च" इत्यधिकम् ।

[1]ध्यानेनेत्थं सुतीव्रेण युञ्जतो योगिनो मनः ।
संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमम्[2] ॥ ४६ ॥

[3]द्रव्यज्ञानक्रियाविषये भ्रमरूपं मनो विलयं याति[4] ॥ * ॥

इत्येकादशस्कन्धे चतुर्दशोऽध्यायः

[पञ्चदशोऽध्यायः]

सिद्धयोऽष्टादश प्रोक्ता धारणायोगपारगैः ।
तासामष्टौ मत्प्रधाना [5]अष्टैव गुणहेतवः ॥ ३ ॥

मय्येव प्राधान्येन सन्त्यन्येषूपचारत इति मत्प्रधानाः ।

"सर्वाधिका [6]अणीमाद्या विष्णोर्नान्यस्य कस्यचित् । स्वाभाविका विरिञ्चस्य तत्प्रसादात् पराधिकाः[7]" इति स्वाभाव्ये ।

गुणभूतानामन्यासामपि सिद्धीनां ता एव हेतवः । स्वतस्तास्वेवाष्टस्वन्यासामन्तर्भावात् ।

---

१ "इत्थं स्वतः प्राप्तेन ध्यानेन साधनेन युञ्जतः अपरोक्षयोगवतः योगिनः द्रव्येषु ज्ञानेषु क्रियासु अहमेव कर्तेति भ्रमः यस्मात् तत् अहङ्काररूपं मनः निर्वाणं नाशं यास्यति" इति यादवेन्द्रतीर्थाः । "द्रव्ये देहादावहमित्यादिरूपः, ज्ञाने स्वपरयोः स्वरूपैक्यादिरूपः, क्रियायां कर्मणि स्वर्गादिपरत्वरूपश्च भ्रमः" इति शुकदेवः । "द्रव्यविषये ज्ञानेन्द्रियविषये कर्मेन्द्रियविषये च भ्रमः" इति विजयध्वजीयम् ।

२ "–भ्रमः" इति पाठान्तरम् ।

३ द्रव्यज्ञानक्रियासु भ्रमतीति भ्रमम् । भ्रमं रूपयतीति भ्रमरूपं भ्रमात्मकं वा ।

४ "मनो लयं याति" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

५ "दशैव" इत्यर्वाचीनाः । "धारणा सात्विकमनसः परमात्मनि स्वतः प्रवृत्तिस्थैर्यम् । सैव योगः उद्रिक्तभक्तेरुपायः तस्याः पारं पूर्तिं अविलम्बेनापरोक्षं च तत्फलं प्राप्तैः । सिद्धयोऽष्टादश प्रोक्ताः । तासामष्टादशसिद्धीनां मूलभूताः अष्टौ सिद्धयः । मत्प्रधानाः मय्येव प्रधानाः सन्ति । मयि स्वभावतः पूर्णाः । देवादिषु मया दत्ताः स्वल्पाः सिद्धय इति भावः । एता गुणहेतवश्च । गुणानामुपसर्जनानामनूर्मिमत्त्वादीनां सिद्धीनां हेतवः" इति यादवेन्द्रतीर्थाः ।

६ "अणिमाद्या-" इति प्र. पाठः । अणीमेत्यक्षराधिक्येनाणिम्नः परिपूर्णत्वमाह । "आधिक्येऽधिकम्" इति स्मरणात् । तदेव स्फुटमाह—सर्वाधिका इति ।

७ इतरेभ्यः रुद्रादिभ्योऽधिका इत्यर्थः ।

"निस्सीमाष्टगुणाभावात् सिद्धयोऽष्टादश स्मृताः। देवेभ्योऽन्यत्र देवानां सिद्धयोऽ-ष्टैव सम्मताः" इति प्राकाश्ये ॥ * ॥

अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिन्द्रियैः।
[1]प्राकाश्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ॥ ४ ॥

गुणेष्वसङ्गो वशिता यत्कामस्तदवाप्स्यति[2]।
एता मे सिद्धयः सौम्य अष्टावौत्पत्तिका मताः[3] ॥ ५ ॥

शक्तिप्रेरणमेवेशितृत्वम्। असङ्ग एव वशित्वम्।

"यादृशानन्दकामः स्याद् तादृशानन्दसम्भवः। भोगान् विनैव प्राकाम्यमणिमादेः पृथक् ततः[4]" इति च ॥ * ॥

अनूर्मिमत्त्वं देहेऽस्मिन् दूरश्रवणदर्शनम्।
मनोजवः कामरूपं परकायप्रवेशनम् ॥ ६ ॥

स्वच्छन्दमृत्युर्देवानां सहक्रीडानुदर्शनम्।
यथासङ्कल्पसंसिद्धिराज्ञाऽप्रतिहतागतिः ॥ ७ ॥

त्रिकालज्ञत्वमद्वन्द्वं परचित्ताद्यभिज्ञता।
अग्न्यर्काम्बुविषादीनां प्रतिस्तम्भोऽपराजयः[5] ॥ ८ ॥

---

१ "प्राकाम्यम्" इत्यर्वाचीनाः। २ "-स्तदवस्यति" इति च।

३ "व्यावृत्ततया ज्ञानार्थं सिद्धीनां नामान्याह—अणिमेति। मूर्तेः स्वरूपस्याणिमादिसिद्धयो ज्ञेयाः। इन्द्रियैर-न्येन्द्रियैः विषयप्राप्तिः। श्रुतेषु दृष्टेषु वस्तुषु प्राकाश्यम्। शक्तिप्रेरणमेवेशितृत्वम्। गुणेष्वसङ्ग एव वशित्वम्। यत् यादृशे आनन्दे कामः अपेक्षा तदवाप्स्यति तत् प्राप्नोति चेत् सा प्राप्तिः प्राकाम्यसिद्धिः। एताः अणिमा महिमा लघिमा प्राप्तिः प्राकाश्यं ईशिता वशिता प्राकाम्यमित्येताः सिद्धयः मे औत्पत्तिकाः स्वभावसिद्धाः कारण-प्राप्ता न भवन्तीति" इति यादवेन्द्रतीर्थाः। "यस्मिन् कामो यस्य स तत्काममवाप्स्यति" इति विजयध्वजीयम्।

४ "पृथङ् मतः" इति क्वचित्। "पृथग् यतः" इति च।

५ "प्रतिष्टम्भोऽपराजयः" इति प्र. पाठः। "प्रधानसिद्ध्यतिरिक्तसिद्धीनां प्रभेदानाह–अनूर्मिमत्त्वम्। अप्र-तिहता आ समन्ताद् गतिर्यस्याः आज्ञायाः सा अप्रहितागतिः। विषादीनामित्यादिशब्देन शार्दूलनखशस्त्रादिकं गृह्यते। योगधारणाप्राप्ताः सिद्धयः प्रधानाप्रधानाः सर्वा अपि गरिम्णा सह सप्तविंशतिरिति भावः" इति याद-

अनूर्मिमत्त्वं प्राकाम्येऽन्तर्भूतम् । दूरश्रवणदर्शनं त्रिकालज्ञत्वं परचित्ताद्यभिज्ञता च प्राकाश्यान्तर्भूतानि । मनोजव इत्यादिषट्कं प्राप्त्यन्तर्भूतम् । अन्यत् सर्वमीशित्वान्तर्भूतमपि[1] परमेशित्वाभावे पृथगित्यष्टादश । अग्न्यर्काम्बुविषादीनामित्यादिशब्दोक्ता[2] शस्त्रास्त्रनखदन्तताडनशापादिभिरप्रतिहतिः पृथगेव सिद्धिः सप्तदशमी[3] । अप्रतिहता आ समन्ताद् गतिर्यस्या आज्ञायाः साऽप्रतिहतागतिः । अद्वन्द्वमप्रतिहतं त्रिकालज्ञत्वम्[4] । अग्न्यर्काम्बुविषाणां प्रतिस्तम्भाः[5] पृथक् चतस्रः सिद्धयः । दूरश्रवणदर्शने द्वे सिद्धी[6] ॥ * ॥

> "गरिम्णः सैव हेतुः स्यान्महिमाहेतुधारणा[7] । प्रायोऽष्टसिद्धिकथनेष्वथो न पृथगुच्यते" इति च । "प्राप्तिप्राकाश्ययोश्चापि धारणैकाऽपि सम्भवेत् । अत ऐक्येन तामुक्त्वा[8] गरिमाणं पृथक् क्वचित्" इति च । "मूलभूतास्तु सिद्धीनां देवानामष्टसिद्धयः । अष्टस्वन्तर्गतास्तास्तु तदपेक्षतया[9]ऽल्पकाः" इति च ।

वेन्द्रतीर्थाः । तथाचेमा अष्टादशाप्रधानसिद्धयः— १) क्षुत्पिपासादिषड्डूर्मिनिमित्तदुःखराहित्यरूपमनूर्मिमत्त्वम् २) दूरश्रवणम् ३) दूरदर्शनम् ४) मनोवेगः ५) कामरूपत्वम् ६) परकायप्रवेशः ७) स्वच्छन्दमृत्युता ८) देवैः सह विहारः ९) यथासङ्कल्पसिद्धिः १०) अप्रतिहताज्ञत्वम् ११) अद्वन्द्वं प्रतिद्वन्द्विरहितमप्रतिहतं त्रिकालज्ञत्वम् १२) परचित्ताद्यभिज्ञता १३) अग्निस्तम्भः १४) अर्कस्तम्भः १५) जलस्तम्भः १६) विषस्तम्भः १७) आदिपदोक्तानां शस्त्रास्त्रशापादीनां प्रतिस्तम्भः १८) अपराजितत्वं चेति ।

१ "सर्वमीशत्वान्तर्भूतमपि परमेशत्वाभावे" इति प्र. पाठः । "–मीशित्वान्तर्भूतम् ।" इत्यत्रैव क्वचिद् वाक्यसमाप्तिः । ततः परम्—"अपि परमेशित्वाभावे पृथगित्याष्टादश" इतीयान् भागः न पठ्यते ।

२ "-शब्दोक्ताः" इति सविसर्गः प्र. पाठः प्रामादिकः ।

३ "सप्तदशी" इति प्र. पाठः ।

४ अद्वन्द्वमिति न सिद्ध्यन्तरम्; किन्तु त्रिकालज्ञत्वविशेषणमिति नाष्टादशत्वभङ्ग इति भावः ।

५ "–स्तम्भाश्चतस्रः" इति प्र. पाठः ।

६ इदं वाक्यं प्राचीनकोशेषु प्रायोऽत्र न पठ्यते । उत्तरत्र प्रमाणवचनद्वयोदाहरणानन्तरं "पृथक् क्वचित् इति च" इत्यतः परं पठ्यते । ततश्च "मूलभूतास्तु सिद्धीनाम्–" इत्यादि । औचित्यादत्र पाठ एव साधीयान् ।

७ या महिम्नो हेतुभूता धारणा सैव गरिम्णोऽपि हेतुरिति अथो तस्मात् धारणैक्यात् प्रायो न गरिमा पृथगुच्यते ।

८ "तावुक्त्वा" इति पाठान्तरम् । अतः प्राकाश्येन एकतया तां प्राप्तिमुक्त्वा क्वचिद् गरिमाणं पृथग् वदन्ति । तथाच त्रयः पक्षाः—महिमगरिम्णोरैक्येन–अणिमा, महिमा, लघिमा, प्राप्तिः, प्राकाश्यम्, ईशित्वम्, वशित्वम्, प्राकाम्यमित्यष्टौ सिद्धय इत्येकः । अयमेव च भागवतोक्तः पक्षः । प्राप्तिप्राकाश्ययोरैक्येन—अणिमा, महिमा, गरिमा, लघिमा, प्राप्तिः, ईशित्वम्, वशित्वम्, प्राकाम्यमित्यष्टावित्यपरः । अथचोभयोरपि भेदेन नव सिद्धय इत्यन्यः । आद्यद्वितीयपक्षयोराहत्य षड्विंशतिः सिद्धयः । तृतीयपक्षे तु सप्तविंशतिरिति ।

९ तदपेक्षतया तदपेक्षत्वात् तदधीनत्वादल्पतमा इत्यर्थः ।

कामरूपत्वस्याणिमादित्रयेऽ[1]प्यन्तर्भावः । [[2]अष्टसिद्धिपक्षेऽग्न्यर्कस्तम्भ एकैव सिद्धिः । अदाहत्वात्[3] ।] अग्न्यादिप्रतिस्तम्भस्य[4] वशित्वेऽपि । [[5]अनूर्मिमत्त्वाद्यष्टादशपृथक्सिद्धिपक्षेऽग्न्यर्कस्तम्भयोः पृथक्त्वम् । तस्मिन् पक्षे तासां सकाशात् प्रधानाष्टौ मत्प्रधाना इति व्याख्या ।]

"अनूर्मिमत्त्वसिद्धिस्तु प्राकाम्यान्तर्गता स्मृता[6] । दूरश्रुतिर्दूरदृष्टिस्त्रिकालज्ञत्वमेव च । परचित्ताद्यभिज्ञानं प्राकाश्यान्तर्गतानि च । अणिमादित्रयान्तश्च कामरूपत्वमिष्यते । अग्न्यर्काम्बुविषादीनां प्रतिस्तम्भो वशित्वगः[7] । मनोजवः कामरूपं परकायप्रवेशनम् । स्वच्छन्दमृत्युता देवैः सहक्रीडेष्टसाधनम्[8] । प्राप्तावन्तर्गतान्याहुराज्ञाऽप्रतिहतिस्तथा । अग्निस्तम्भो रविस्तम्भ उदकस्तम्भ एव च । विषस्तम्भस्तथा शस्त्रशापादिस्तम्भ एव च । 'ईशित्वान्तर्गतान्याहुरपराजयमेव च[10] । एवमष्टादशाष्टभ्यो जायन्ते सिद्धयः क्रमात् । अष्टादशभ्यश्चान्यास्तु जायन्ते सिद्ध-

---

१ न केवलं पूर्वोक्तरीत्या प्राप्तावेव । किन्तु अणिमादित्रयेऽप्यन्तर्भाव इत्यर्थः । एवं न केवलमग्न्यादिप्रतिस्तम्भस्येशित्वे, किन्तु वशित्वेऽपि । उभयविधधारणयाऽपि तत्सम्भवात् ।

२ [ ] एतच्चिह्नान्तर्गतं वाक्यं केषुचित् कोशेषु न पठ्यते । प्रतनतमस्तु कोशो लुप्तः । वस्तुतस्तु इदं वाक्यं नातीव सङ्गतं प्रक्षिप्तमिव भाति । अग्न्यर्कस्तम्भयोरेकत्वस्य अष्टसिद्धिपक्षेऽप्यनपेक्षितत्वात् । यतः सर्वेऽपि प्रतिस्तम्भा वशित्वान्तर्भावेनैकैव सिद्धिः । नह्यनयोर्विशिष्याभेदकथने कारणं पश्यामः । अन्यथा स्तम्भनीयत्वसाम्येन पञ्चानामपि स्तम्भानामेकत्वं स्यात् । दूरस्थग्रहणसाम्येन दूरदृष्टिदूरश्रवणयोरपि ।

३ "अदाहकत्वात्" इति क्वचित् । ४ "अग्न्यादिस्तम्भस्य" इति च ।

५ आवरकान्तर्गतमिदमपि वाक्यद्वयं बहुषु प्राचीनकोशेषु न पठ्यते । पूर्ववाक्यवदिदमपि प्रकृतासङ्गतं प्रक्षिप्तमित्येव सुवचम् । अष्टादशसिद्धिष्वेव अग्न्यर्कस्तम्भावुक्तौ । तौ च भिन्नाविति पुरस्तादेव व्याख्यातमिति नेदमत्र वक्तव्यम् । यच्च "तासामष्टौ मत्प्रधानाः" इति मूले तासामष्टादशसिद्धीनां मध्ये अष्टौ मत्प्रधाना इत्यर्थप्रतीत्याऽष्टादशस्वेवाष्टानामन्तर्भावो युक्तः, नत्वष्टस्वष्टादशानामिति शङ्कापरिहारार्थम्— तस्मिन् पक्षे इत्यादिवाक्यमिति, तदपि न स्वरसम् । नह्यष्टसिद्धिपक्षेऽन्या व्याख्या वर्तते येन तस्मिन्नष्टादशसिद्धिपक्षे इति व्याख्येति विशिष्योच्येत । असम्मतं चेदं तासां सकाशात् प्रधाना इति व्याख्यानं प्राचीनानाम् । अत एव "तासां मुलभूताः" इति यादवेन्द्रतीर्थीये विजयध्वजीये च व्याख्यातम् । न क्वापि तासां सकाशादिति । अत इदमपि वाक्यद्वयं प्रक्षिप्तमिति निश्चीयेत । ६ "मता" इति प्र. पाठः ।

७ "वशित्वतः" इति प्र. पाठः प्रामादिकः । वशित्वगः वशित्वान्तर्गतः ।

८ देवैः सह क्रीडा, इष्टसाधनं चेति द्वे "देवानां सह क्रीडानुदर्शनम्, यथेष्टकामसम्प्राप्तिः" इति मूलोक्ते । एतेन देवानां देवैः सह क्रीडाया अनुदर्शनमनुभव इति मूलं गदितार्थम् ।

९ सामान्ये नपुंसकम् । आज्ञाप्रतिहतिरित्येकं अग्निस्तम्भादीनि पञ्च अपराजयमेकं चेति सप्त ईशित्वान्तर्गतान्याहुः । १० "-जय एवच" इति प्र. पाठः ।

90

योऽमिताः[1]। अनूर्मिमत्त्वं दुःखस्याभावमात्रमुदाहृतम्। यथेष्टानन्दसम्प्राप्तिः प्राकाम्यमिति कीर्त्यते। दुःखाभावोऽपि प्राकाम्ये[2] नेतरे सुखितेष्यते। प्राकाश्यं सर्ववेदादिज्ञानमेव विदो विदुः। सहस्रयोजनान्तं[3] तु दूरदर्शनमिष्यते। दूरश्रवणमप्येवं तस्मिन्नेव युगे स्थिते[4]। वेदादिकं विना प्रोक्ता[5] त्रिकालज्ञानिता बुधैः। [6]शरीरस्थं विना देहे परचित्ताद्यभिज्ञता। [7]अन्येन्द्रियैर्दर्शनादि [8]तथा सङ्कल्पवेगिता। प्राप्तिरित्युच्यते सद्भिः स्वमनःसमवेगिता। मनोजव इति प्रोक्तः पश्वाद्याकारता तथा। कामरूपत्वमुद्दिष्टं स्वदेहत्यागतः परे[9]। परकायप्रवेशः स्याद् युगादर्वाक्तना स्मृता। स्वच्छन्दमृत्युता देवैः क्रीडा चेन्द्रादिभिर्विना। यथासङ्कल्पसिद्धिश्चाप्यन्नपानसुतादिषु। [10]चक्षुर्दृश्येष्वणुत्वं तु अणिमा सम्प्रकीर्तिता। महिमा चापि सम्प्रोक्ता त्रिलोकान्तरपूरणात्[11]। चक्षुर्दृश्यैर्विवाह्यत्वं लघिमा चापि कीर्तिता। त्रिलोकसमभारस्तु गरिमा चापि कीर्तिता। [12]पूर्वशक्तेः कोटिगुणशक्त्युद्रेकस्तथेशिता। भुविस्थैः प्राणिभिः[13] प्रोक्तकरणं चापि कीर्त्यते। आज्ञाऽप्रतिहतिर्ब्राह्मादर्वा-

१ मिता इति वा च्छेदः। अष्टसिद्धिभ्यो मितसामर्थ्या अष्टादशसिद्धयः। ततोऽपि मिता अन्यसिद्धयोऽष्टादशभ्योऽपि जायन्त इति।

२ दुःखाभावोऽपि प्राकाम्येऽन्तर्भूतः। यतः इतरे दुःखिनि सुखिताऽपि नेष्यते।

३ "योजनान्ते तु" इति प्र. पाठः। सहस्रयोजनपर्यन्तं दूरदर्शनम्। दूरश्रवणमप्येवं सहस्रयोजनपर्यन्तमेव।

४ वेदादिकं विना तस्मिन्नेव युगे स्थिते विषये ज्ञानिता त्रिकालज्ञानिता। नहि युगान्तरविषयेऽपि ज्ञानिता। वेदादिकं विनेति वेदादिसहकारं विना स्वप्रतिभयैव वैदिकलौकिकार्थज्ञानितेत्यर्थः।

५ "प्रोक्तम्" इति प्र. पाठः प्रामादिकः।

६ शरीरस्थं स्वेन्द्रियं विना, तत्सहकारं विना, स्वदेह एव स्थित्वा परचित्तादिज्ञानं परचित्ताद्यभिज्ञतोच्यते। आदिना परश्रवणदर्शनादिज्ञानम्। स्वदेह एव स्थितः पश्यतीत्यादि। परशरीरस्थत्वं विनेति भावप्रधानो निर्देश इत्यपि व्याचक्षते। परदेह एव स्थित्वा दर्शने पराकयप्रवेश एव स्यादिति स्वदेह इत्युक्तम्।

७ दूरदर्शनादिचतुष्टयं प्राकाश्यान्तर्गतमिति विवृतम्। इदनीं मनोजवादिषट्कं प्राप्त्यन्तर्गतमिति स्फुटयितुं प्राप्तिशब्दार्थमाह–अन्येन्द्रियैर्दर्शनादि। न केवलं स्वेन्द्रियैः किन्तु यत्र दर्शनेच्छा तत्तदिन्द्रियप्राप्तिस्तत्र दर्शनादिप्राप्तिश्च प्राप्तिः। अन्येन्द्रियप्राप्तिरपि न विवक्षितेत्याह–तथा सङ्कल्पवेगिता प्राप्तिः। यद्यत् कामयते तत्तत् सङ्कल्पमात्रेण प्रापयतीति प्राप्तिः। अन्येन्द्रियैर्दर्शनादीत्यनैव परचित्ताद्यभिज्ञतादिकं प्राप्तावप्यन्तर्भवतीति सूचितम।

८ "यथासङ्कल्प–" इति पाठान्तरम्। प्र. पाठोऽपि तथा।

९ स्वदेहं त्यक्त्वा परे काये प्रवेशः परकायप्रवेशः। नतु स्वदेह एव स्थित्वा।

१० इदानीमणिमादित्रयेऽपि कामरूपत्वमन्तर्गतमिति स्फुटयितुं योगिजनसाधारणमणिमादित्रयस्य गरिम्णा सह लक्षणमाह— चक्षुर्दृश्येष्वणुत्वं तु।

११ "–पूरणा" इति प्र. पाठः।

१२ अथेशित्वं योगिजनसाधारणम्, तदन्तर्गतं आज्ञाप्रतिहत्यादिसप्तकं चाऽह—पूर्वशक्तेः।

१३ "प्राणिभिश्चोक्त–" इति प्र. पाठः।

गस्त्रविघातनम् । विना महातपस्वींश्च[1] शापाप्रतिहतिः स्मृता । अपराजयो मनुष्येभ्यो [2]वशित्वं चाप्यलोलता । दाहादिसहनं चापि प्रतिस्तम्भ इतीर्यते । इति षड्विंशतिः प्रोक्ता गरिम्णा सह सप्त वा । विंशतिश्च [3]सुरेभ्योऽन्यद् देवेष्वष्टैव सिद्धयः । [4]एता निस्सीमकास्तेषां देवानामष्ट सिद्धयः । अतोऽष्टादशसिद्धीनां तदन्तर्भाव इष्यते । देवेष्विन्द्रेशवायुश्रीविष्णूनामुत्तरोत्तरम्[5] । सिद्धयः परिपूर्णास्तु विष्णोरेकस्य नान्यगाः" इत्यैश्वर्ये । "[6]श्रुतेषु तु यथायोगं क्षिप्रग्रहणमेव तु । उक्तं प्राकाश्यमन्येषां देवानामश्रुतेष्वपि । ऋषीणां मिश्रभावेन भासते किञ्चिदश्रुतम् । [7]विषयेभ्योऽधिकसुखव्यक्तिः प्राकाम्यमेव तु । इतरेषां सुराणां तु निस्सीमानन्दभोजनम् । एवमेव तु निस्सीमा देवानामष्टसिद्धयः । उत्तरोत्तरमत्रापि यावद्विष्णुः '[8]सुपूर्णभुक्' इति हरिवंशेषु । "[9]अग्न्यादिशक्तिसंस्तम्भस्त्वग्निसंस्तम्भ[10] इष्यते" इति कौर्मे ॥ * ॥

भूतसूक्ष्मात्मनि मयि तन्मात्रं[11] धारयन्मनः[12] ।
अणिमानमवाप्नोति तन्मात्रोपासको मम ॥ १० ॥

---

१ तपस्विरिति तपस्वी । नृकेसरिरिति यथा । केशिरिति वा यथा ।

२ अग्न्यादिस्तम्भः वशित्वेऽप्यन्तर्भूत इति दर्शयितुं वशित्वनिर्वचनपूर्वकं अग्न्यादिस्तम्भपदार्थमाह— वशित्वं चाप्यलोलता । दोषैरविचालितत्वम् ।

३ सुरेभ्योऽन्यत् अन्यत्रर्ष्यादिषु इति षड्विंशतिः सप्तविंशतिर्वा सिद्धयः । अत एव ऋष्यादिसाधारणं लक्षणमुक्तं पूर्वम् । देवेषु त्वप्रधानानां प्रधानास्वेवान्तर्भावादष्टैव सिद्धयः । सप्त वा विंशतिरित्यैकपद्येऽपि विश्लेषेण प्रयोगः नरा वा शंसमित्यादिवैदिकप्रयोगवत् । सप्त च विंशतिश्चेति वा ।

४ "यतो निस्सीम–" इति प्र. पाठः ।

५ उत्तरोत्तरं यथायोग्यं निस्सीमकाः सिद्धयः । विष्णोरेकस्यैव परिपूर्णाः ।

६ मूले प्राकाश्यं श्रुतदृष्टेष्विति अश्रुतादृष्टेषु प्राकाश्यं नास्तीति प्रतीयते । तद्वारणाय व्यवस्थामाह– श्रुतेषु ।

७ विषयेभ्यो यत् सुखं ततोऽधिकसुखव्यक्तिः विषयान् विनाऽपीत्यर्थः ।

८ "स पूर्णभुक्" इति प्र० पाठः ।

९ दाहादिसहनं स्तम्भ इत्युक्तम् । जातस्यापि दाहस्य कृच्छ्रेण कथञ्चित् सहनमित्यपि तेन भ्रान्तिः स्यात् । अतः स्फुटवचनेन तदर्थमाह—अग्न्यादीति । अग्न्यादिशक्तिस्तम्भ एव अग्निस्तम्भ इत्यादिशब्दार्थ इष्यते तथाच असह्यस्य दाहस्य सह्यताकरणमित्यादिरेव दाहादिसहनं नाम नतु कृच्छ्रेण सहनमित्यर्थः ।

१० "–संस्तम्भ अग्न्यादिस्तम्भ–" इति प्र. पाठः स्वरसः ।

११ "तन्मात्रे" इति पाठान्तरम् । तथाहि यादवेन्द्रतीर्थीयम्—"भूतसूक्ष्मः पृथिव्यादेरणुः । तस्मिन् स्थिते आत्मनि तन्नियामके तन्मात्रे पृथिव्यणुसदृशपरिमाणे मयि मनः धारयन् योजयन् मम तन्मात्रोपासकः अणुसदृशपरिमाणोपासकः तथाऽपरोक्षवान् अणिमानं स्वदेहस्याणुत्वमवाप्नोति" इत्यादि ।

१२ "धारयेन्मनः" इति प्र. पाठः ।

"[1]एकस्मात् सिद्धयो विष्णोः स्थानभेदात् पृथग्विधाः । एकस्थानगताद् वा स्युः सुस्थिरोपासना यदि" इति भारते ।

भूतसूक्ष्माणामात्मनि परमाणुस्थितेऽणुरूपे ।

"तन्मात्रावयवे सूक्ष्मे परमाण्वभिधानके । प्रत्येकमणुरूपं तु विष्णुं ध्यायन्नणुर्भवेत्" इति कापिलेये । "आकाशवत् सूक्ष्मतां यो व्यापित्वेनैव मन्यते । [2]तन्मात्राव्यापिनं विष्णुं चिन्तयन्[3] स तथा भवेत्" इति च ॥ * ॥

[4]महत्यात्मन् मयि परे यथासंस्थं मनो दधत् ।
महिमानमवाप्नोति भूतानां च पृथक्पृथक् ॥ ११ ॥

महति व्याप्ते[5] । महत्तत्त्वस्य पृथगुक्तेः । अस्मात् स्थूलतां प्राप्नवानीत्यपेक्षयां तस्मात् प्राप्नोति । ततोऽन्यस्मादित्यपेक्षयां तस्मादिति पृथक्पृथक् ॥ * ॥

परमाणुमये चित्तं भूतानां मयि रञ्जयन् ।
[6]कालसूक्ष्मात्मके योगी लघिमानमवाप्नुयात्[7] ॥ १२ ॥

परमाणुमये । [8]भूतानां सकाशादतिशयेनाणुस्वरूपे[9] । कालसूक्ष्माणामात्मनि ॥ * ॥

---

१ स्थानभेदेषूपासनेन विभिन्नाः सिद्धय इति मूले स्थितम् । एतावता न स्थानतोऽपि शक्तिभेदः शङ्कनीय इत्याह—एकस्मात् । तथाचाभिव्यक्तिभेद एवायम् । न शक्तिभेदः ।

२ "तन्मात्रव्यापिनम्" इति प्र. पाठः । एतेन तन्मात्रोपासक इति मूलस्य गमनिकान्तरमुक्तम् —शब्दादितन्मात्रागतभगवद्रूपोपासक इति ।

३ "चिन्तयेत् स" इति क्वचित् ।

४ यादवेन्द्रतीर्थीये चार्थविशेषः—"महति (भूते) स्थिते आत्मनि आकाशादिनियामके परे मयि यथासंस्थं सूक्ष्मत्वेन महत्सदृशपरिमाणत्वेन च मनो दधत् ध्यानं कुर्वन् अप्रतिघातं देहमहत्त्वमवाप्नोति । अणुत्वमहत्त्वपरिमाणे प्राप्नोति । तत्र विशेषमाह—भूतानामिति । भूतानामवाधिप्राणिनां सकाशात् । पृथग् विलक्षणमणुत्वं पृथग् विलक्षणं महत्त्वं वाऽवाप्नोति । ननु ईश्वरवदणुत्वमहत्त्वप्राप्तिरिति भावः । पृथिवीलक्षणगुरुपदार्थगतस्य गुरुत्वेन ध्यानाद् गरिमाणमवाप्नोतीति भावस्तात्पर्यं" इत्यादि ।

५ स्थूले बृहति चेत्यर्थः । भूतसूक्ष्मे पूर्वमुपासनमुक्तम् । भूतस्य स्थूलरूप उपासनमत्रोच्यते ।

६ "कालसूक्ष्मार्थताम्" इत्यर्वाचीनाः । "कालसूक्ष्मात्मताम्" इत्यन्ये ।

७ "कालसूक्ष्मात्मके अणुकालस्य लघुत्वनियामके परमाणुमये कालवदणुत्वोपेते मयि चित्तं रञ्जयन् लघुतया ध्यायन् भूतानां सकाशादपेक्षितं लघिमानमवाप्नोति" इत्यर्थविशेषो यादवेन्द्रतीर्थीये ।

८ भूतानां परमाणुमये इत्यन्वयेनार्थमाह— भूतानां सकाशात् ।

९ "–नाणुरूपे" इति प्र. पाठः ।

[1]धारयन् मय्यहन्तत्त्वे मनो वैकारिकेऽखिलम् ।
सर्वेन्द्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः ॥ १३ ॥

[2]अहन्तत्त्वे स्थिते मयि ॥ * ॥

[3]महत्यात्मनि यः सूत्रे धारयेन्मयि[4] मानसम् ।
[5]प्राकाश्यं पारमेष्ठ्यं मे विन्दतेऽव्यक्तजन्मनः ॥ १४ ॥

सूत्रे स्थिते मयि। 'गृहे पीठे' इतिवत्। अव्यक्तजन्मनः अव्यक्तस्यापि किञ्चित् स्थूलत्वस्य कर्तुः[6]।

"तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम" इति मोक्षधर्मेषु । "अजरादमरादमूर्तितः शाश्वततमसः" इति च। "अव्यक्तस्याजन्मवतो विकारो जनिरुच्यते" इति हरिवंशेषु।

मे सकाशाद्[7] विन्दते । परमेष्ठिप्रसादादन्येषां भवतीति पारमेष्ठ्यम् । सर्वगुणानां ज्ञान-मूलत्वादुपलक्षणत्वेन प्राकाश्यं पारमेष्ठ्यमित्युक्तम् ।

"सर्वे गुणास्तु प्राणस्य परमात्मप्रसादतः । प्राणविष्ण्वोः प्रसादेन भारत्याः सम्प्रकीर्तिताः। प्रसादात् तत्त्रयाणां [8]चाप्यनन्तादेः सदा गुणाः" इति माहात्म्ये ॥
॥ * ॥

विष्णौ [9]चाधीश्वरे चित्तं धारयन्[10] कालविग्रहे ।
स ईशित्वमवाप्नोति क्षेत्रक्षेत्रज्ञचोदनम्[11] ॥ १५ ॥

---

१ "वैकारिकरूपे अहन्तत्त्वे स्थिते मयि अखिलं मनो धारयन्, इन्द्रियोपजीव्यतया मां ध्यायन्, सर्वेन्द्रियाणाम्, अन्येन्द्रियाणां च, आत्मत्वं स्वेच्छया प्रवृत्तिनियामकत्वमाप्नोति । अनन्तरं मन्मना योगी प्राप्तिं अन्येषामिन्द्रियैः विषयप्राप्तिं विषयानुभवं प्राप्नोति" इति यादवेन्द्रतीर्थाः ।

२ "अहन्तत्त्वस्थिते" इति प्र. पाठः प्रामादिकः ।

३ "महति स्थिते सूत्रे ब्रह्मणि स्थिते आत्मनि अन्तर्यामिणि मयि यः योगी मानसं धारयेत्, ब्रह्मणः यत् सर्वज्ञानं तत्प्रदातृत्वं मयि ध्यायेदित्यर्थः । अव्यक्तस्य प्रकृतेः जन्म परिणामलक्षणविकारः येन तस्य मे सकाशात् पारमेष्ठ्यं ब्रह्मप्रसादात् प्राप्यं प्राकाश्यं वेदतदर्थज्ञानप्रकाशरूपां सिद्धिं विन्दते" इति यादवेन्द्रतीर्थाः ।

४ "धारयन्मयि" इति पाठान्तरम्।

५ "प्राकाम्यम्" इत्यर्वाचीनाः ।

६ "स्थूलत्वकर्तुः" इति प्र. पाठः ।

७ "सकाशान् विन्दते" इति प्र. पाठः प्रामादिकः ।

८ "वाऽप्यनन्तादेः" इति प्र. पाठश्च प्रमाद एव ।

९ "विष्णौ ह्यधीश्वरे" इति प्र. पाठः।

१० "धारयेत्" इति च ।

११ "-चोदनाम्" इति च । "कालः विग्रहः अधिष्ठानं यस्य सः । तस्मिन् स्थितिकालनियामके । विष्णौ अधीश्वरत्वसम्पन्ने मनः ध्यायन्, अधीश्वरत्वगुणं ध्यायन्नित्यर्थः, क्षेत्रे शरीरे स्थितः यः क्षेत्रज्ञः जीवः तस्य

सर्वत्राधीश्वरत्वादौ विद्यमानेऽपि तत्रतत्रोक्ताधीश्वरत्वादिगुणविशिष्टत्वेन तत्रतत्रोपासनमिति विशेषः।

"तं यथायथोपासते तदेव भवति" इति च श्रुतिः[१]। "उपासतः सत्य इति सत्यसङ्कल्पता भवेत्। [२]ईशित्वमीश्वर इति गुणं तन्तं यथा हरिम्" इति विशेषे ॥ * ॥

श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि।
धारयन् श्वेततां याति षडूर्मिरहितोऽमरः[३] ॥ १८ ॥

"शुद्धः श्वेतः सुखी श्वेतः श्वेतवर्णः क्वचिद् भवेत्" इति [४]शब्दनिर्णये ॥ * ॥

[५]मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन्।
तत्रोपलब्धाभूतानां हंसो वाचः शृणोत्यसौ ॥ १९ ॥

आकाशस्याऽत्मनि। [६]तत्राऽकाश उपलब्धानामा समन्तात् स्थितानां भूतानां वाचः। हंसः जीवः।

"त्यागात् पूर्वशरीराणां नवानां सञ्चयेन च। जीवं हंस इति प्राहुस्तद्धेतुत्वाद्धरिं परम्" इति भारते ॥ * ॥

चोदनं व्यापारेषु प्रेरणलक्षणं नियमनं येन तत् क्षेत्रक्षेत्रज्ञचोदनरूपमीशित्वं सिद्धिमाप्नोति" इति यादवेन्द्रतीर्थीयम्। "क्षेत्राणां शरीराणां क्षेत्रज्ञानां जीवानां च" इत्यन्ये।

१ "श्रुतेः" इति प्र. पाठः। २ "ईशत्व-" इति च।

३ "-रहितो नरः" इति प्र. पाठः। "धर्मः श्रवणादिलक्षणः प्रधानः यस्मिन् विषये तस्मिन्। शुद्धे दुःखादिप्राप्तविकाररहिते मयि। षडूर्मिरहितः। पितृदेहे रेतसि अस्ति, जायते, वर्धते, क्षीयते, अपक्षीयते, म्रियत इति षडूर्मयः। तद्रहितः। तन्निरसनसमर्थः अमरः अमरसदृशः योगी चित्तं धारयन्, दुःखादिदोषरहिततया मां ध्यायन् श्वेततां निर्दुःखत्वलक्षणमनूर्मिमत्त्वं याति" इति यादवेन्द्रतीर्थीयम्। अथच श्वेततां यातीत्यस्यैव विवरणं षडूर्मिरहितोऽमर इति। "षडूर्मिरहितः क्षुधापिपासादिरहितः" इति शुकदेवः। "शोकमोहौ जरामृत्यू क्षुत्पिपासे षडूर्मयः" इति हि वदन्ति। ४ "इति च शब्दनिर्णये" इति क्वचित्।

५ "हंसः अहङ्कारभ्रमपरित्यागवान् असौ उपासकः आकाशात्मनि आकाशनियामके प्राणे स्थिते मयि घोषं आकाशशब्दकर्तृत्वं मनसा उद्वहन् ध्यायन् तत्र आकाशे उपलब्धानि प्राप्तानि यानि आभूतानि समन्तात् स्थितानि भूतानि तेषां वाचः शृणोति दूरश्रवणसिद्धिसम्पन्नो भवति" इति यादवेन्द्रतीर्थाः।

६ उपलब्धा भूतानामिति भिन्ने पदे इत्यन्ये व्याख्यातारः। आपाततः स्वरसं चैतत् भाति। तत्पक्षे तावद् द्वेधा योजना सम्भवति—भूतानामुपलब्धा ज्ञाता सन् हंसो वाचः शृणोतीत्येकः। तत्राऽकाशे उपलब्धाः वाचः शृणोतीत्यपरः। न तावदाद्यः। नह्यत्रोपासने भूतानामुपलब्धिः। किन्तु वाचामेव। भूतोपलब्धेर्दूरदर्शने

मनो मनसि संयोज्य[1] देहं तदनु वायुना ।
मद्धारणानुभावेन तत्राऽऽत्मा यत्र वै मनः ॥ २१ ॥

मनसि मनस्तत्त्वे । वायुना संयोज्य । मनोऽनु देहम् । मनस्तत्त्वे मद्धारणम्[2] ॥ * ॥

यदा मन उपादाय यद्यद् रूपं बुभूषति ।
तत्तद् [3]भजेन्मनोरूपं मद्योगबलमाश्रितः[4] ॥ २२ ॥

परकायं विशन् सिद्ध आत्मानं तत्र भावयेत् ।
पिण्डं हित्वा विशेत् प्राणो वायुभूतः षडङ्घ्रिवत्[5] ॥ २३ ॥

गतत्वात् । नच वाचामुपलब्धा सन् वाचः श्रृणोतीति शक्यं वक्तुम् । अविशेषात् । श्रवणमेव हि वाचामुपलब्धिर्नाम । अत एव न द्वितीयः । ननु च भोः क्वाऽऽकाशादन्यत्र वाच उपलभ्येरन्, यदर्थं तत्राऽऽकाशे उपलब्धाः वाच इति विशेषणं सावसरं स्यात् । तस्मात् प्रातीतिकमर्थमपहायैकपद्येनार्थान्तरमाह—तत्राऽऽकाशे उपलब्धानाम् । तथाच न केवलं मनुष्याणाम्, किन्तु आकाशे वातावरण उपलब्धानि यानि सूक्ष्मयोनीनि भूतानि तेषामपि वाचः श्रृणोति । पुनः कीदृशानां भूतानाम् ? आभूतानाम् । आ भवन्ति समन्ताद् भवन्ति इत्याभूतानि । परितः सहस्रयोजनपरिमिते देशे विद्यमानानीत्येतत् । उक्तं हि पुरस्तात्—"सहस्रयोजनान्तं तु दूरदर्शनमिष्यते । दूरश्रवणमप्येवम्" इति ।

१ "मनो मयि सुसंयोज्य" इत्यर्वाचीनाः । मनसि मनस्तत्वनियामके मनः संयोज्य, तदनु देहं च वायुना द्वारभूतेन मनसि संयोज्य, मनस्तत्वे मम या धारणा ध्यानं तत्सामर्थ्येन यत्र मनो याति तत्राऽऽत्मा देहोऽपि यातीति । यादवेन्द्रतीर्थीये तु—"मनोलक्षणं देहं देहस्येन्द्रियसङ्घातरूपत्वात् मनसि मनस्तत्वे इन्द्रे प्राणवायुना सह संयोज्य तदधीनं ज्ञात्वा । वायुधारणया सहेति वा । तत्र मनोनियामके स्थितमद्धारणा मनोनियामकत्वध्यानं तत्सामर्थ्येन यत्र देशे स्थातव्यमिति बुद्धिं मनः करोति तत्र आत्मा देहोऽपि गच्छति । इयं मनोजवसिद्धिः" इति रीत्यन्तरेण व्याख्यातम् ।

२ "मद्धारणा" इति प्र. पाठः । "मद्धारणाम्" इति क्वचित् पाठः प्रामादिकः ।

३ "भवेन्मनो–" इति प्र. पाठः ।

४ "–माश्रयः" इति च । "योगी मन उपादाय ध्याने नियम्य मद्योगबलं सिंहगजादिगतसिंहगजाद्याकारध्यानलक्षणं बलमाश्रितः यदा यद्यद् रूपं सिंहगजादिरूपं बुभूषति सिंहादिरूपी स्यामितीच्छति तत्तत् मनोरूपं अपेक्षितं देहं तदा भजेत् प्राप्नुयात्" इति यादवेन्द्रतीर्थीयम् ।

५ "सिद्धः योगी यं परस्य कायं विशन् स्यात् तत्र परकाये आत्मानं स्वान्तर्यामिणं भावयेत् । प्राणः सर्वव्यापारकर्ता परमात्मा वायुभूतः प्राणवायुस्थितः योगिनमादाय पिण्डं देहं हित्वेव आविशेत् (परकायम्) । षडङ्घ्रिः षट्पदः यथाऽवकाशं प्रविशति तथा स्वेच्छयाऽनायासेनेति भावः" इति च ।

पार्ष्ण्याऽऽपीड्य गुदं प्राणं हृदुरःकण्ठमूर्धसु ।
आरोप्य ब्रह्मरन्ध्रेण ब्रह्म नीत्वोत्सृजेत् तनुम्[1] ॥ २४ ॥

यो वै मद्भावमापन्न ईशितुर्वशितुः पुमान् ।
[2]न कुतश्चन हन्येत तस्य चाऽऽज्ञा यथा मम ॥ २७ ॥

मद्भक्त्या शुद्धसत्त्वस्य योगिनो धारणाविदः ।
तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता[4] ॥ २८

अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः ।
मद्योगश्रान्तचित्तस्य यादसामुदकैर्यथा[5] ॥ २९ ॥

''गजादिरूपमाकाङ्क्षन् गजादिस्थितमीश्वरम् । ध्यायन् गजादिरूपः स्यात् ॥ * ॥ परकायस्थितं हरिम् । ध्यायन् विशेत् परे काये वायावन्तर्गतः पुमान् । प्राणनामा हरिः प्रोक्तस्तस्मिन् वायुः समाश्रितः । वायावन्तर्गतो जीवो देहाद् देहं प्रयास्यति ॥ * ॥ षडाधारस्थितं विष्णुं ध्यायन्नायुःक्षयं विना । यदि मृत्युमभीप्सेत तथा प्राप्नोत्यसंशयम् ॥ * ॥ त्रिकालप्रेरकं विष्णुं ध्यातुः कालत्रयज्ञता ॥ * ॥ अग्न्यादिषु हरिं ध्यायंस्तत्प्रतिस्तम्भको भवेत्'' इति हरिसंहितायाम् ॥ * ॥

---

१ ''गुदं पार्ष्ण्या पादस्यापुरोभागेन आपीड्य सम्यक् निरुद्धय हृदुरःकण्ठमूर्धसु स्थाने प्राणं वायुमारोप्य ब्रह्म नीत्वा बहिस्थे ब्रह्मणि प्राणं स्मृत्वा ब्रह्मरन्ध्रेण प्राणं नीत्वा तनुमुत्सृजेत् । इदं स्वच्छन्दमृत्युत्वम्'' इति च ।

२ ''कुतश्चिन्न विहन्येत'' इति प्र. पाठः । ''यः पुमान् योगी ईशितुः सर्वेश्वरस्य वशितुः सर्ववशीकरणसमर्थस्य मत् मम भावं ईशित्ववशित्वगुणध्यानमापन्नः तस्य योगिनः आज्ञा कुतश्चन उत्तमदेवव्यतिरिक्तेभ्यः न हन्येत ममाऽऽज्ञा यथा परैर्न हन्यते तथा'' इति च ।

४ ''शुद्धसत्त्वस्य रजस्तमोविकाररहितचित्तस्य धारणाविदः कालत्रयगतवस्तुनियामकत्वध्यानवतः त्रैकालिकी त्रिकालगतवस्तुविषयिणी बुद्धिर्भवति । जन्ममृत्युप्रभृतिगुणोपबृंहिता एतद्विषयिणी च भवति । भुविस्थस्यापि स्वजातिस्मरणं भवतीति वा । इदं त्रिकालज्ञत्वम्'' इति च ।

५ ''-दकं यथा'' इति प्र. पाठः । ''मद्योगेन अग्निस्थस्य दाहकत्वादिशक्त्यभिभावकशक्तिध्यानेन श्रान्तं पूर्णं चित्तं यस्य तस्य मुनेः योगमयं प्रचुरध्यानसम्पन्नं वपुः अग्न्यादिदाहकशक्तिभिर्न हन्येत । यादसां मत्स्यादीनां वपुर्यथा उदकैर्न हन्यते तथा'' इति च ।

आत्मानं परमात्मानं तत्र परकाये[१] भावयेत् । तदा वायौ स्थितः प्राणः परमात्मा तत्र गच्छति। तमनु जीवोऽपि तत्र गच्छति[२]। वायौ भूतो वायुभूतः ॥ * ॥

प्राणं परे ब्रह्मणि नीत्वा ।

"प्राणस्थं प्राणनामानं बहिस्थे[३] ब्रह्मनामके । विष्णुं विष्णावनुस्मृत्य विसृजेद् देहमञ्जसा" इति प्रभञ्जने । "अनेयस्य हरेर्नीतिस्तद्गतस्य हरेः स्मृतिः । नहि नेयः क्वचित् क्वापि केनचित् स्ववशत्वतः" इति च ॥ * ॥

मम भावना मद्भावः ।

"भावो मनश्च भक्तिश्च क्वचिदभ्यास इष्यते" इति शब्दनिर्णये ॥ * ॥

[४]उपासकस्य मामेवं योगधारणया पुनः ।
सिद्धयः पूर्वकथिता उपतिष्ठन्त्यशेषतः ॥ ३१ ॥

जितेन्द्रियस्य दान्तस्य जितश्वासात्मनो मुनेः ।
मद्धारणां धारयतः का नु सिद्धिः[५] सुदुर्लभा[६] ॥ ३२॥

अन्तरायान् वदन्त्येतान्[७] युञ्जतो योगमुत्तमम् ।
मया सम्पद्यमानस्य कालक्षपणहेतवः[८] ॥ ३३ ॥

उपासनयाऽऽपरोक्ष्यं कृतवतः पुनरुपासनं कार्यकाले कुर्वतः कार्यसिद्धिरित्यतो योगधारणया पुनरित्युक्तम् ।

---

१ "परमात्मानं तत्रतत्र परकाये" इति प्र. पाठः प्रामादिकः ।

२ "जीवोऽपि गच्छति" इति प्र. पाठः । ३ "बहिष्ठे" इति च ।

४ "एवं योगधारणया वायुपरमात्मोपासनया वायुपरमात्मापरोक्षं प्राप्य पुनः तत्तदभीष्टप्राप्तीच्छया काले एवं मामुपासकस्य सिद्धयः अपेक्षानुसारेण उपतिष्ठन्ति" इति च ।

५ "का सा सिद्धिः" इति प्र. पाठः ।

६ "मद्धारणा मय्यप्रयत्नध्यानं धारयतः दीर्घकालं निरन्तरं कुर्वतः । अपवर्गमपि साधयति, लौकिकसिद्धिः का दुर्लभा? सर्वाः सिद्धयः सुलभा एव" इति च । ७ "वदन्त्येताः" इति प्र. पाठः ।

८ "एवं सत्यपि योगिनामुक्तसिद्धिष्वादराभावः कुत इति जिज्ञासायामाह—अन्तरायानिति । उत्तमं योगं स्वयोग्यज्ञानपूर्तिमुद्दिश्य युञ्जतः सद्गुणध्यानं कुर्वतः योगिनः एतान् अन्तरायान् ज्ञानपूर्तेर्व्यवधायकान् वदन्ति ज्ञाननिपुणाः । कारणान्तरं चाऽह—मया सम्पद्यमानस्येति । मत्समीपं प्राप्तुकामस्य कालविलम्बे हेतवश्च" इति च ।

91

"उपास्य वायुं प्रथमं वायौ सुष्टुवपरोक्षिते । अनुज्ञातस्ततस्तद्वं तत्रतत्र हरिं स्मरेत् । कृत्वाऽपरोक्षं तं चापि कालेकाले स्मरेत् पुनः । अभीष्टकार्यसिद्धिः स्यात् तस्य नास्त्यत्र संशयः । अकामो यदि वायुं च ध्यात्वा दृष्ट्वा हरिं तथा । न किञ्चित् कामयेत् पश्चात् स क्षिप्रं मुक्तिमेष्यति । यदि योगैः फलं भुङ्क्ते पुनः कामममपास्य तु[1] । तेनैव क्रमयोगेन प्राणं[2] दृष्ट्वा हरिं तथा । एषैव्या मुक्तिपदवी नान्यथा तु कथञ्चन । पूर्वदृष्टिर्हि कामार्थे[3] पश्चान्मोक्षार्थमिष्यते । येषां तु जन्मतः सिद्धिस्तेषां दोषो नतु क्वचित्[4]" इति निवृत्ते ॥ * ॥

जन्मौषधितपोमन्त्रैर्यावतीरिह सिद्धयः ।
योगेनाऽप्नोति ताः सर्वा यैर्यैर्योगगतिं व्रजेत्[5] ॥ ३४ ॥

यैर्यैः कैश्चित्कैश्चिदेव जन्मादिभिर्योगगतिं व्रजेत् ।

"जन्मादिभिः कैश्चिदेव[6] प्राप्यते योगजं फलम् । योगेन सर्वैः प्राप्येत योगे यत्नं ततः कुरु" इति च । "कश्चिदर्थेऽपि[7] यच्छब्दः प्रश्नार्थे च क्वचिद् भवेत् । क्वचित् परामर्शवाची क्वचिदाक्षेपवाचकः" इति तन्त्रनिरुक्ते ॥ * ॥

इत्येकादशस्कन्धे पञ्चदशोऽध्यायः

---

१ "कामममवाप्य तु" इति क्वचित् ।

२ "–योगेन वायुं दृष्ट्वा" इति प्र. पाठः ।

३ "कामार्थम्" इति क्वचित् ।

४ "दोषो न विद्यते" इति प्र. पाठः ।

५ "सर्वा नान्यैर्योगगतिं व्रजेत्" इति प्र. पाठः । जन्मादिभिः यावत्यः सिद्धयः तत्र यैर्यैः यैःकैश्चन जन्मादिभिरतिविरळतया याङ्काश्चिदेव योगगतिं कश्चित्कश्चिदेव व्रजेत् । भगवद्ध्यानयोगेन पुनस्ताः सर्वा व्रजेदिति । अत्र यादवेन्द्रतीर्थीये विशेषः—"इह लोके यैर्यैः कैश्चित्कैश्चिदेव जन्मौषधितपोमन्त्रैः, जन्मानि देवेषु गन्धर्वादिषु उत्पत्तयः, ओषधिः विशल्यकरणादिः, तप ऐश्वर्यप्राप्तये क्रियमाणम्, अग्निस्तम्भनादिमन्त्राश्च, तैर्योगगतिं योगप्राप्यफलं व्रजेत् ताः सर्वाः सिद्धयः योगी योगेन ध्यानेन आप्नोति । विविधलौकिकमण्योषध्यादिसाधनानुसरणमायासकरमिति भावः । अथवा यैर्यैः देवविशेषैर्यायाः सिद्धयः प्राप्याः स देव एव तान्तां योगगतिं सिद्धिं धारणां विनाऽपि व्रजेत् । देवयोग्यसिद्धिमन्ये नाऽप्नुवन्तीत्यर्थः" इति ।

६ कैश्चिदेव जन्मादिभिः कैश्चिदेव च पुरुषैर्योगजं फलं प्राप्यते । भगवद्ध्यानयोगेन तु सर्वैः प्राप्येतेत्यर्थः । अत एव यादवेन्द्रतीर्थीये 'यैर्यैः' इति मूलं द्वेधाऽपि व्याख्यातम् ।

७ "–दर्थे च यच्छब्दः" इति प्र. पाठः । कश्चिदर्थे प्रयोगान्तरं मृग्यम् । प्रायः कश्चित्पदसहचर एवायं दृश्यते । यथा यःकश्चिदिति । प्रश्नार्थ इति किंशब्दार्थे । यथा–भवत्सु यः पण्डितः? कः पण्डित इत्यर्थः । परामर्शवाची यथा–"यः कौमारहरः स एव हि वरः" । आक्षेपवाचको यथा–यत्तु कैश्चिदुक्तम् । यद्यप्ययं परामर्शवाची भवति । तथाऽप्याक्षेपगर्भः परामर्श इति विशेषः । आक्षेपो हि विवक्षितः । परामर्शोऽवर्जनीयसन्निधिः ।

[षोडशोऽध्यायः]

[1]अहमात्मोद्धवामीषां भूतानां सुहृदीश्वरः ।
अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ॥ ९ ॥

"सृष्टिस्थित्यादिहेतुत्वाद् भूतानि हरिरुच्यते । नतु भूतस्वरूपत्वात् स हि सर्वेश्वरे-श्वरः" इति वस्तुतत्त्वे ॥ * ॥

अहं गतिर्गतिमतां कालः कलयतामहम् ।
[2]गुणानामप्यहं सौम्यं गुणिन्यौत्पत्तिको गुणः ॥ १० ॥

गुणिनामप्यहं सूत्रं महतां च महानहम् ।
सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः ॥ ११ ॥

---

१ "हे उद्धव, ईश्वरः सर्वशक्तिपूर्णः सुहृत् अनिमित्तोपकारी सन् अमीषां भूतानामात्माऽन्तर्यामी, अन्नादि-विषयादानादिकर्ता शिशोर्मातेव । ननु सर्वं खल्विदं ब्रह्मेति श्रुत्या जडचेतनैक्यश्रवणात् कथं तव सर्वोपकारकत्व-मित्यत आह– अहं सर्वाणीति । तेषां मया व्यापारेषु प्रवर्त्यमानानां भूतानां स्थितिः उद्भवः अप्ययश्च येन सः । स्थित्यादिकर्तृत्वादहं सर्वाणि भूतानीति व्यपदेशविषयः । नत्वैक्यं श्रुत्यर्थ इति भावः" इति यादवेन्द्रतीर्थाः ।

२ "गुणानां चाप्यहं साम्यम्" इत्यर्वाचीनाः । "गतिमतां विविधज्ञानसम्पन्नानां या गतिः जगदीश्वरत्वादि-निश्चयः, तदभिमानी ब्रह्मा तत्र स्थितविभूतिरहमित्यर्थः । कलयतां संहर्तॄणां यः कालः संहारशक्तिस्तत्र स्थित-विभूतिरहम् । गुणानां मध्ये सौम्यम् । उमा उत्कृष्टानुभवः । स चाऽनन्दानुभवः । उमया सहितः सोमः । तस्य भावः सौम्यम् । (तदभिमानी) ब्रह्मा । तत्र विभूतिरहम् । गुणिनां मध्ये यो गुणी अत्यन्तं गुणी तस्मिन् स्थितः सर्वशुभानां प्राप्तिनियामकः औत्पत्तिकगुणः योग्यतालक्षणः तन्नियामकः सूत्रं वायुः तत्र विभूतिरहम् । ब्रह्मण एकस्य विविधस्थाने स्थितत्वोक्तिः विविधबहुमूर्तिभिर्युज्यते । महतां स्थूलानां मध्ये महान् महत्तत्त्वम् । अहं तत्र विभूतिः । सूक्ष्माणामप्रतिघातानां मध्ये जीवः । अप्रतिघातोऽणुर्वा । तत्राहं विभूतिः" इति यादवेन्द्रती-र्थीयम् । प्राचीनव्याख्यानेष्वस्फुटं किञ्चिदत्र वक्तव्यम् । अयं श्लोकद्वयार्थः-ब्रह्मणो वायोश्च सर्वदेवाधिकत्वं सम कक्ष्यत्वं च भगवद्विभूतिविशेषसन्निधानादिति श्लोकद्वयेनाह–अहं गतिः । सर्वज्ञानिनां प्रधानः सर्वज्ञानमानी च ब्रह्मेति यत् तदहम् । मम ज्ञानविभूतिविशेषस्य तत्र व्यक्तं सन्निधानादेव तस्य तादृक् श्रैष्ठ्यमिति यावत् । एवं संहर्तॄ रुद्रस्यापि प्रधानः सर्वसंहारशक्तिमानी च ब्रह्मेति यत् तदप्यहं मदधीनम् । मम संहारविभूतिविशेषस्य तत्र सन्निधानात् । एवं भगवत्कथाश्रवणादिष्वेव निरन्तररतिरूपो य आनन्दानुभवः सौम्यं नाम तद्वतां प्रधानस्त-द्गुणमानी च ब्रह्मेति यत् तदप्यहम् । ममाऽनन्दविभूतेस्तत्र सन्निधानात् । एवं ज्ञानानन्दाभ्यां सर्वजगन्नियमनेन ब्रह्मणः सर्वजीवोत्तमत्वमभिधाय भगवद्विभूत्या प्राणस्यापि तदाह—गुणिनि । गुणिनां गुणिनि य औत्पत्तिको गुणः सूत्रं तदप्यहमित्येकान्वयः । गुणिनां मध्ये गुणिनि गुण्यधिके यः गुणानां मध्ये सर्वगुणाधिकः औत्पत्तिको गुणः शुभप्राप्त्येकयोग्यतालक्षणः तत् सूत्रम् । तदभिमानी सूत्रात्मा प्राण इत्यर्थः । तदप्यहम् । अथवा गुणिनि

"स्वस्वजात्युत्तमत्वं तु भवेद् यद्रूपसन्निधेः। विभूतिरूपं तत् प्रोक्तमिन्दिरादिषु संस्थितम्। तथा बहिः स्थितं रूपं विभूतीत्येव शब्दितम्। सर्वसाधारणं रूपमन्तर्यामीति चोच्यते । यथा कृष्णात्मना दुष्टहन्ता व्यासात्मना समः। असमोऽप्येकरूपोऽपि सामर्थ्यात् पुरुषोत्तमः" इति च ॥ * ॥

"ब्रह्मरुद्रेन्द्रजीवेभ्यः पृथगेव व्यवस्थितम्। विभूतिरूपं विष्णोस्तु [1]तद्वं श्रैष्ठ्यैककारणम्। तदेव ब्रह्मरुद्रादिनामभिर्वाच्यमञ्जसा। तदेव देवेष्विन्द्रोऽस्मि तथा रुद्रेषु शङ्करः। इत्यादिनोक्तं कृष्णेन नेन्द्राद्या जीवसञ्चयाः" इति गीताकल्पे ॥ * ॥

गतिर्ज्ञानम्।

"प्रधानो ज्ञानिनां ब्रह्मा ज्ञानमानी हृदि स्थितः। स एव कालमानी तु संहर्तॄणां प्रभुः स्मृतः" इति विभूतौ।

"आनन्दानुभवस्तूम [2]उत्कृष्टानुभवात् स्मृतः। तद्युक्तत्वं [3]तथा सौम्यं गुणानामधिकं हि तत्। भक्त्यादिगुणपूगोऽपि दुःखहेतुत्वभावनात्। निष्फलो भवति ह्यद्धा प्रीतस्य सफलो भवेत् । तस्मादानन्दमानं[4] तु गुणेषूत्कृष्टमुच्यते । तस्याभिमानी ब्रह्मैको भक्तिज्ञानाधिकस्य च[5]। श्रद्धाभिमानिनी देवी तथैव तु सरस्वती। तदन्येषां गुणानां तु तदन्ये विबुधाः स्मृताः। गुणानां तु प्रभुर्ब्रह्मा तस्मादेकश्चतुर्मुखः। औत्पत्ति-

---

शुभगुणवति य औत्पत्तिको गुणः योग्यतालक्षणस्तन्मानी प्राणः। सोऽप्यहम्। शुभगुणविभूत्या तत्र व्यक्तोऽहम्। तदेव भङ्ग्यन्तरेणाऽह – गुणिनामप्यहं सूत्रम्। शुभगुणवतां मध्ये सूत्रं प्राणः सर्वगुणाधिक इति यत् तदप्यहं मदधीनम् । महतां महत्त्ववतां स्थूलानां मध्ये महान् महत्तत्त्वं सर्वकारणत्वान्महत्तमम्, तदभिमानी च ब्रह्मा महत्तम इति यत् तदप्यहम्। तत्र मम महाविभूतिसन्निधानात्। सूक्ष्माणामणूनां मध्ये सूक्ष्मतमो जीवस्तन्मानी ब्रह्मा वायुर्वेति यत् तदप्यहम्। तत्र मम सूक्ष्मविभूतिसन्निधानात्। एवं दुर्जयानां यन्मनस्तन्मानी ब्रह्मा वायुश्च तदप्यहम्। ममाजेयविभूतिसन्निधानात्। ब्रह्मणो मनोमानित्वं तात्पर्ये एव सूचितम्—'ज्ञानमानी हृदि मनसि स्थित.' इति। प्राणस्याप्येतत् प्रसिद्धम्—"या ते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि। या ते मनसि सन्तता" इत्यादौ। स्वविभूतिबलात् ब्रह्मवाय्वोरेवं सर्वगुण्यधिकत्वं गुणमुखतोऽभिधाय तदेवोत्तरश्लोके मुखत आह—हिरण्यगर्भो देवानामिति।

१ "तद्ध्रैष्ठ्यैककारणम्" इति प्र. पाठः। तद्वं ब्रह्मरुद्रादिगतम्। किन्तु तेभ्यः पृथक्।

२ उकार उत्कर्षवाची। मकारो ज्ञानवाची। माङ् माने। "मानं ज्ञानम्" इति श्रवणात्। तेन उम इत्युत्कृष्टानुभवः। स चानन्दानुभव इति।

३ "यथा" इति प्र. पाठः प्रामादिकः।

४ आनन्दमानमित्यानन्दज्ञानम्। भगवद्भक्त्यादिष्वानन्दानुभवः।

५ "–ज्ञानादिकस्य" इति प्र. पाठो न स्वरसः। भक्तिज्ञानाभ्यामधिकस्याऽनन्दानुभवस्य ब्रह्मैवैकोऽभिमानी। यथायथा भक्तिर्ज्ञानं च वर्धेते तथाऽऽनन्दोऽपि वर्धते। भक्तिज्ञानाभ्यां विधुर आनन्दो न गुणः। नाप्यानन्दपरिवर्जिते भक्तिज्ञाने।

कगुणो नाम शुभप्राप्त्येकयोग्यता[1]। तस्याभिमानी प्राणस्तु "स हि सर्वगुणाधिकः"[2] इति च।

[3]गुणिनां मध्ये गुणिनि स्थितमौत्पत्तिकगुणरूपं सूत्रमित्यर्थः।

"[4]गुणिनां गुणयोग्यत्वं यत् सर्वगुणिषु स्थितम्। वायुस्तदभिमान्येकः सर्वगुण्यधिकस्ततः" इति प्रभञ्जने।

[5]रूपान्तरत्वादेकस्यापि बहुस्थानेषु प्राधान्योक्तिर्न [6]विरुद्ध्यते। गुणान्तरोक्तेश्च। "रामः शस्त्रभृताम्", "वृष्णीनां वासुदेवः" इत्यादिवत्॥ * ॥

हिरण्यगर्भो देवानां[7] मन्त्राणां प्रणवस्त्रिवृत्।
अक्षराणामकारोऽस्मि पदानि च्छन्दसामहम्[8] ॥ १२ ॥

पदानि वाच्यानि च्छन्दसाम्।

"स्वयूथानामथाऽधिक्ये[9] स्वजातीनामथापि वा। यत् कारणं विभूत्याख्यं विष्णोस्तद् रूपमुच्यते" इति प्राधान्ये। "[10]वर्णेशानि पदान्याहुः पादाश्चापि तदीश्वराः। पादानामीश्वरार्धर्चा[11]स्तदीशा ऋच एव तु[12]। ऋचामधीशा वर्गाश्च तेषां सूक्तम-

---

१ "–प्राप्त्यैकयोग्यता" इति प्र. पाठः। क्वचित् कोशेषु च। न स्वरसोऽयं पाठः।

२ स औत्पत्तिकगुणो हि सर्वगुणाधिकः।

३ अत्र द्वेधा व्याख्यानं दृश्यते। गुणिनां मध्येऽधिकगुणिनि य औत्पत्तिको गुण इति यथाश्रुतान्वय इति यादवेन्द्रतीर्थीये स्थितम्। गुणिनि य औत्पत्तिको गुणस्तद्रूपं तन्मानी सूत्रं प्राणो गुणिनां मध्येऽहमिति व्यस्तान्वय इत्यन्ये। यादवेन्द्रतीर्थीयं तु तात्पर्योदाहृतप्रभञ्जनवचनानुगुणम्।

४ गुणिनां मध्ये ये सर्वगुणिनः। सर्वं पूर्णम्। शुभगुणपूर्णा मुक्तियोग्यास्तेषु यद् गुणयोग्यत्वं वायुस्तदभिमानीत्यर्थः। केचित्तु "गुणानां गुणयोग्यत्वम्" इति पठित्वा व्याचक्षते। तन्निर्मूलम्।

५ नन्वेकस्यैव चतुर्मुखस्य बहुस्थानेषु प्राधान्योक्तिः किन्निमित्ता? आह—रूपान्तरत्वात्। गुणान्तरोक्तेश्चेति।

६ "–क्तिर्नो विरुध्यते" इति प्र. पाठः। ७ "वेदानाम्" इति प्र. पाठः।

८ "त्रिवृत् अकारोकारमकारसमुदायः प्रणवः। तत्राहं विभूतिः। छन्दसां वेदनियामकदेवीनां सकाशात् पदानि उत्तमानि। पद्यन्त इति कर्मव्युत्पत्त्या पदानि अर्थाः देवाः। तत्राहं विभूतिः। स्वयूथानामाधिक्यकारणमपि विभूतिरिति भावः" इति यादवेन्द्रतीर्थाः।

९ हिरण्यगर्भो देवानामित्यादि स्वजात्याधिक्यम्। पदानि छन्दसामिति स्वयूथाधिक्यम्। वेदमानिनीनां वेदवाच्यानां च यूथे वेदवाच्या अधिका इति। १० वर्णाभिमानिभ्योऽधिकाः पदाभिमानिन इत्यादि।

११ ईश्वरा अर्धर्चाः इति च्छेदः। सन्धिगर्भः सन्धिरार्षसम्प्रदायसिद्धः।

१२ "एव च" इति प्र. पाठः।

धीश्वरम् । सूक्ताधीशास्तथाऽध्यायास्तेषामीशास्तथा[1]ऽष्टकाः । तदधीशास्तथा शाखा वेदाश्चापि तदीश्वराः । वेदानामीश्वरा वाच्या वाच्यानामीश्वरो हरिः । न हरेरीश्वरः कश्चित् कदाचिद् क्वापि विद्यते" इति च ।

पद्यन्त इति पदानि वाच्यानि ।

"पदं पदसहस्रेण यश्चरन् नापराध्यते" इतिवत् । "पदं तु वाचकं प्रोक्तं क्वचिद् वाच्यमपीष्यते" इति शब्दनिर्णये ॥ * ॥

"सर्ववेदाभिमानिन्यो देव्यो[3] लक्ष्मीस्ततोऽधिका । वेदाभिमानिनी साक्षात् सा विष्णोर्दूरवत् स्थिता[4] । यज्ञाख्या सैव विस्णोस्तु या तूरःस्थलमाश्रिता । हरिणा रतियोगस्था दक्षिणाख्याऽपि सैव तु । उत्तरोत्तरतः साऽपि विशिष्टा दक्षिणा सुखे । एवं वेदाभिधानाभ्यो[5] देवीभ्यः सर्व एव तु । तदर्थरूपाः पतयस्तस्यास्तस्या-

---

१ "-ध्यायास्तदधीशास्तथा-" इति च ।

२ पदं गम्यं रणस्थानं पदसहस्रेण चरन्नपि नापराध्यत इति ।

३ उषास्वाहादिसरस्वत्यन्ता देव्यस्तावद् यथायोगं सर्ववेदाभिमानिन्यः । लक्ष्मीस्तु ताभ्यः सर्वाभ्योऽधिका मुख्यतो वेदाभिमानिनी । तथाच छन्दसामिति अवान्तरवेदमानिन्यो देव्यो यदि विवक्ष्यन्ते तदाऽवान्तरवेदार्थभूता देवास्ततोऽधिकाः । यदा सर्वाधिका वेदमानिनी रमा विवक्ष्यते सर्वाधिको वेदार्थो भगवांस्ततोऽप्यधिक इति तरतमभावेनार्थक्रमोऽवगन्तव्यः ।

४ अयमर्थः । लक्ष्म्यास्तावत् त्रीणि रूपाणि । एकं वेदाभिमानिरूपम् । तदेतत् प्रळयार्णशायिनं नारायणमुद्बोधयत् श्रुतिवचनैः स्तुतिकर्तृ बन्दिवत् दूर इव स्थितम् । अपरं यज्ञाख्यं विष्ण्वङ्कसंश्रितम् । ज्ञेन नारायणेन युतत्वात् यज्ञः । यज्ञाभिमानित्वाच्च । तथाहि तात्पर्यनिर्णये—"युक्ता यदाऽहं ज्ञेन नारायणेन यज्ञक्रियामानिनी यज्ञनाम्नी तदोत्तमा तत्प्रवेशात् तदाख्या । विष्ण्वाविष्टा यज्ञनाम्नी तदङ्कस्थिता" (म. भा. ता. नि. २०-७०) इत्यादि । तथाचास्मिन् रूपे विष्ण्वङ्कगत्वेन सामीप्यातिशयात् विष्ण्वावेशातिशयाच्च सुखाधिक्यं रमाऽनुभवतीति भावः । यद्यप्यत्र 'उरःस्थलमाश्रिता' इत्युच्यते । तथाच विरोध इव भाति । उरःशब्द ऊरुवाची व्याख्येयः, तेनाविरोध इति केचित् । अङ्कसंश्रयमात्रे तात्पर्यम्, नाङ्कविशेषे विवक्षा इत्यपि वदन्ति । वस्तुतस्तु यज्ञाभिधा रमाऽपि पुनर्द्विरूपा श्रीश्च लक्ष्मीश्चेति । "अङ्काश्रिता श्रीः । वक्षसि लक्षणभूता लक्ष्मीः" इति तत्वदीपिका । अतो न कोऽपि विरोधः । अथच तृतीयं दक्षिणाख्यं रूपम् । तदिदमर्धनारीनारायणस्य वामार्धम् । दक्षार्धे इनः यस्याः सा हि दक्षिणा । तदिदमुक्तम्—"हरिणा रतियोगस्था" इति । हरेर्वामार्धयोगेन हरिणा सह रममाणेत्यर्थः । केवलं विष्ण्वङ्कसंश्लिष्टादपि विष्णुवामार्धव्यापि दक्षिणारूपं सुखाधिकमिति युक्तम् । एकस्या अपि अवस्थाभेदेन भगवत्सामीप्यातिशयेन सुखातिशय इति भावः । एतदप्युक्तं तात्पर्यनिर्णये– "यदा तु सा मे वामार्धगा दक्षिणानामधेया । यस्मात् तस्या दक्षिणतः स्थितोऽहं तस्मान्नाम्ना दक्षिणेत्येव सा स्यात् । सा दक्षिणामानिनी देवता च सा च स्थिता बहुरूपा मदर्था । वामार्धो मे तत्प्रविष्टो यतो हि ततोऽहं ख्यामर्धनारायणाख्यः" (म. भा. ता. नि. २०. ७३-४) इत्यादि ।

५ "वेदाभिमानिभ्यो–" इति प्र. पाठः प्रामादिकः ।

स्तथोत्तमाः। शच्या इन्द्रस्ततश्चोमा तस्या रुद्रस्ततस्तथा। भारती प्राण एवास्यास्ततः श्रीस्तद्वरो हरिः'' इति वैशेष्ये[1] ॥ * ॥

इन्द्रोऽहं सर्वदेवानां वसूनामस्मि हव्यवाट्।
आदित्यानामहं विष्णू रुद्राणां नीललोहितः[2] ॥ १३ ॥

[3]उच्चैःश्रवास्तुरङ्गाणां धातूनामस्मि काञ्चनम्।
यमः संयमतां चाहं सर्पाणामस्मि वासुकिः ॥ १८ ॥

"ऋते रुद्रादिकानिन्द्रः सर्वदेवाधिकः स्मृतः। ऋते भीमं [4]फल्गुनश्च पाण्डवेभ्यो वरस्तथा। तथा शुक्रः कवीशस्तु बृहस्पत्यादिकानृते[5]। यमः संयमतामीशः शङ्करादीन् विनैव तु'' इति गीताकल्पे ॥ * ॥

---

१ "वैशिष्ये" इति प्र. पाठोऽपि प्रमादायातः।

२ विष्णुं ब्रह्मवायू गरुडशेषरुद्रान् तत्पत्नीश्च विहाय सर्वदेवानामिन्द्रः। "हव्यवाट् प्रधानाग्निः। विष्णुः सूर्यः स्वयमेव। नीलः कण्ठे लोहितो ललाटे, अङ्के वा'' इति यादवेन्द्रतीर्थाः। अष्टौ वसवः—१) द्रोणः २) प्राणः ३) ध्रुवः ४) अर्कः ५) अग्निः ६) दोषः ७) (द्युनामा) वसुः ८) विभावसुश्चेति। तत्राग्निः प्रधानः पञ्चदशकक्ष्याप्रविष्टः। अवशिष्टा अष्टादशकक्ष्यागताः। एकादश रुद्राः— १) भीमः २) भवः ३) रैवतः ४) ओजाः ५) महादेवः ६) वृषाकपिः ७) अजैकपात् ८) अहिर्बुध्न्यः ९) विरूपाक्षः १०) उग्रः ११) भवश्चेति। तत्र नीललोहितो भवः प्रधानः पञ्चमकक्ष्यागतः। अवशिष्टास्तु पूर्ववदष्टादशकक्ष्यागताः। द्वादशाऽदित्याः— १) धाता २) अर्यमा ३) मित्रः ४) वरुणः ५) इन्द्रः ६) विवस्वान् ७) त्वष्टा ८) उरुक्रमः ९) सविता १०) भगः ११) पूषा १२) पर्जन्यश्चेति। तत्रोरुक्रमो विष्णुः स्वयमेव। 'इन्द्रोऽहं सर्वदेवानाम्' इति पृथगुक्त इन्द्रस्त्वष्टमकक्ष्यागतः। विवस्वान् द्वादशकक्ष्यायाम्। वरुणस्त्रयोदश्याम्। मित्रः सप्तदश्याम्। पर्जन्यवर्जमन्येऽष्टादशाः। पर्जन्यो विंश इति। तदेवं वसुरुद्रादित्यभेदेन सर्वदेवोपसङ्ग्रहः कृतो भवति। त्रयो हि देवाः, अन्येषामत्रैवान्तर्भाव इति पूर्वमुदितम्।

३ "उच्चैःश्रवा अश्वः। अहं तत्र विभूतिमान्। धातूनां लोहानाम्। गैरिकाणामिति वा। संयमतां धर्मेण नियमकर्तॄणां मध्ये यमः। तत्र विभूतिरूपवान्'' इति यादवेन्द्रतीर्थाः। "सर्पाणामेकशिरसां वासुकिरस्मि। नागा अनेकशिरसः। तेषां मध्येऽनन्तः'' इति वीरराघवः।

४ "फाल्गुनश्च'' इति प्र. पाठः।

५ एतेन प्रमाणोदाहरणेन—"कवीनां काव्य आत्मवान्'' (२८) इति, "वीराणामहमर्जुनः'' (३५) इति च वक्ष्यमाणं विभूतिवचनं व्याख्यातम्।

[1]नागेन्द्राणामनन्तोऽहं मृगेन्द्रः शृङ्गिदंष्ट्रिणाम् ।
[2]आश्रमाणामहं तुर्यो वर्णानां प्रथमोऽनघ ॥ १९ ॥

"गार्हस्थ्यं च यतित्वं च देवेष्वेकत्वमागतम् । प्राधान्योक्तिर्यतित्वस्य गार्हस्थ्यस्य क्वचित्क्वचित्" इत्याश्रमविवेके ॥ * ॥

[3]पुरोधसां वसिष्ठोऽहं ब्रह्मिष्ठानां बृहस्पतिः ।
स्कन्दोऽहं सर्वसेनान्यामग्रण्यां भगवानजः ॥ २२ ॥

"[4]वसिष्ठोऽभ्यधिकस्तेषु मानुषाणां पुरोधसाम्" इति त्रैकाल्ये ॥ * ॥

[5]योगानामात्मसंरोधो मन्त्रोऽस्मि विजिगीषताम् ।
आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनाम् ॥ २४ ॥

जीवेशादिभेदवादी विकल्पः । ख्यातिवादिनां ज्ञानवादिनाम् ।

"जीवेशादिविशेषं यो याथार्थ्येन प्रकल्पयेत् । कलिमारभ्य [6]चाऽविष्णोराधिक्यादुत्तरोत्तरम् । नियमेनैव केनापि न हेयः स विकल्पकः[7] । सर्वज्ञानिविशेषेभ्यः स ज्ञानी

---

१ "नागेन्द्राणां सर्पविशेषाणां अनन्तनामकः नागोऽहम् । शृङ्गिणो महिषादयः । दंष्ट्रिणो व्याघ्रादयः (आरण्या मृगा इति यावत्) । तेषां मध्ये श्रेष्ठः मृगेन्द्रः सिंहः । तुर्यः यत्याश्रमः देवेषु विद्यमानः । वर्णानां ब्रह्मक्षत्रादीनां प्रथमो ब्राह्मणवर्णः । तत्रत्यविभूतिरहम्" इति यादवेन्द्रतीर्थाः । "शृङ्गिणां मध्ये मृगेन्द्रः कृष्णसारः । दंष्ट्रिणां मध्ये मृगेन्द्रः सिंहः" इति विश्वनाथचक्रवर्ती ।

२ विवक्षाभेदेन क्वचिद् गार्हस्थ्यस्य क्वचिद् यतित्वस्य च प्रशंसा भवति । उभयथाऽप्युभयलिङ्गिनां देवानामाधिक्ये मुख्यतात्पर्यं पर्यवसीयत इति ।

३ "वसिष्ठः राज्ञां पुरोहितः । ब्रह्मिष्ठानां ब्रह्मज्ञानाम् । सर्वसेनान्यां सर्वसेनापतीनां स्कन्दः षण्मुखः । अग्रण्यां श्रेष्ठानामजो ब्रह्मा" इति यादवेन्द्रतीर्थाः ।

४ तेषु पुरोधस्सु ये मानुषाणां पुरोधसस्तेषां प्रधानो वसिष्ठः षोडशकक्ष्यागतः । अतस्ततोऽपि ब्रह्मिष्ठः देवपुरोधाः बृहस्पतिर्दशमकक्ष्यागतः ।

५ "योगानां मोक्षोपायानां आत्मसंरोधः मनसो विषयेभ्यो नियमनम् । आत्मध्यानं वा । विजिगीषतां वशीकर्तुमिच्छूनां मन्त्रः अतिगोप्यसम्भाषणम् । कौशलानां कुशलविद्यानां आन्वीक्षिकी ब्रह्मतर्कः । ख्यातिवादिनां ज्ञानपरीक्षकाणां विकल्पः जीवेशभेदसमर्थनमित्यर्थः । तद्वान् विकल्पः अहम्" इति यादवेन्द्रतीर्थाः ।

६ "-रभ्य वाऽऽविष्णो-" इति प्र. पाठः प्रामादिकः ।

७ बः नियमेनैव तारतम्यक्रमेणैव, नियतमेव च, आ विष्णोर्विशेषं भेदं कल्पयेत् स विशेषं कल्पयतीति विकल्पको भेदवादी केनापि बुभूषुणा न हेयो न परित्याज्य इत्यर्थः । "न हेयं स विकल्पकः" इति प्र. पाठः ।

सर्वथाऽधिकः" इति विज्ञाने । "भेददृष्ट्याऽभिमानेन" इत्युक्तम् । "विद्याऽऽत्मनि भिदाबोधः" इति च वक्ष्यति ॥ * ॥

[1]स्त्रीणां तु शतरूपाऽहं पुंसां स्वायम्भुवो मनुः।
नारायणो मुनीनां च कुमारो ब्रह्मचारिणाम् ॥ २५ ॥

"शतरूपा वरा स्त्रीणां पुंसामभ्यधिको मनुः । [2]तयोरभ्यधिकौ नित्यमिन्द्राणीन्द्रौ शुभैर्गुणैः" इति वैशेष्ये ॥ * ॥

[3]वासुदेवो भगवतां त्वं तु भागवतेष्वहम् ।
[4]किम्पुरुषाणां च हनुमान् विद्याध्राणां सुदर्शनः ॥ २९ ॥

"[5]ऐश्वर्यादिगुणैः षड्भिः सामग्र्यात् सर्वदेवताः । भगवच्छब्दवाच्याश्च साक्षात्तु भगवान् हरिः । निरपेक्षं तु सामग्र्यं तस्य सर्वाधिकं यतः" इति च ।

अतो भगवतां देवानाम् ।

"सर्वभागवताधीश उद्धवो भगवत्प्रियः[6] । तस्मादभ्यधिको जिष्णुः प्रियत्वे भक्तितो हरेः। तस्मादभ्यधिको रामः कृष्णा त्वभ्यधिका ततः । तस्या अभ्यधिको भीमो

---

१ "शतरूपा मनोः पत्नी । तत्र विभूतिरहम् । नारायणः ऋष्यवतारः स्वयमेव लीलया तत्र विभूतिः । कुमारः (सनत्कुमारश्च) स्वयमेव" इति यादवेन्द्रतीर्थाः ।

२ "तयोरप्यधिकौ" इति क्वचित् । ब्र. पाठोऽपि तथा । देवेन्द्रपत्नीं शचीं कामपत्नीं रतिं च विहाय अन्यासु देवस्त्रीषु शतरूपैवाधिका द्वादशकक्ष्याप्रविष्टा । एवं इन्द्रकामौ आहङ्कारिकप्राणं चातिहाय दशमकक्ष्याप्रविष्टस्य स्वायम्भुवमनोरधिको न कश्चिद् देवेषु ।

३ "भगवतां सातिशयज्ञानविज्ञानाद्यैश्वर्योपेतानां देवा(दी)नां मध्ये वासुदेवः अहम् । भागवतेषु त्वम् । त्वय्यहं विभूतिमूर्त्या स्थितः । किम्पुरुषाणां किम्पुरुषखण्डे स्थितानां स्वयूथ्यानां मध्ये हनुमानहम् । सुदर्शनाख्यविद्याध्रः अहम्" इति यादवेन्द्रतीर्थाः । ४ "किम्पुरुषाणां हनुमान्" इति पाठान्तरम् ।

५ "कवीनां काव्य आत्मवान्"(२८) इति पूर्वश्लोकभागस्य पूर्वमेव विवृतत्वादुत्तरश्लोकतात्पर्यमुपस्थापयति— ऐश्वर्यादिगुणैः । "कवीनां निपुणवचसां मध्ये काव्यः शुक्रः । बृहस्पतिमृते । शुक्रं स्तौति—आत्मवान् । धैर्यसम्पन्नः । असुरैर्नित्ययोगेऽपि विष्णौ स्थिरभक्तिरिति भावः" इति यादवेन्द्रतीर्थाः ।

६ उद्धवो ह्यनिरुद्धावतारः । दशमकक्ष्याप्रविष्टः स्वायम्भुवसमानः । तत इन्द्रावतारो जिष्णुरर्जुनोऽष्टमकक्ष्यागतोऽधिकः । प्रद्युम्नश्च कामावतारः । ततः शेषावतारो रामः पञ्चमकक्ष्यागतः । ततोऽपि कृष्णारूपा भारती चतुर्थकक्ष्यागा । ततोऽपि तृतीयकक्ष्यागतो वायुर्भीम इति ।

नतु तत्सदृशः क्वचित्" इति च । "यत्किञ्चाऽऽत्मनि कल्याणं सम्भावयसि पाण्डव । सहस्रगुणमप्येतत् त्वयि सम्भावयाम्यहम् । धर्मो ज्ञानं तथा मोक्षो यशः कीर्तिस्तथैव च । त्वय्यायत्तमिदं सर्वं लोकस्यापि न संशयः" इति भारते ॥
॥ * ॥

[1]ओजः सहोबलवतां कर्माहं विद्धि सात्त्वताम् ।
सात्त्वतां नवमूर्तीनामादिमूर्तिरहं पुरा ॥ ३२ ॥

"विष्णोः श्रियो ब्रह्मणश्च वायोः सङ्कर्षणस्य च । सुपर्णस्य च सम्प्रोक्ताः प्रत्येकं नव मूर्तयः । पूज्याः सात्वततन्त्रेषु तत्राऽऽद्या मूर्तयो हरेः । प्रधानास्ता हि सर्वासां मूर्तीनां हरिमूर्तयः । अभेदादेव मूर्तीनामेकमूर्तिश्च[3] सा स्मृता" इति सहस्रावरणे ।

श्रियादि[4]नवमूर्तीनां मध्ये स्वकीयनवमूर्तिरहमित्यर्थः ।

"स्वरूपतश्च गुणतो न विशेषः कथञ्चन । विष्णोस्तु नवमूर्तीनां पूजा च नवधेष्यते[5]" इति च ।

अतो न स्वनवमूर्तीनाम्[6] । अन्येभ्योऽन्यनवमूर्तीनामपि[7] प्राधान्यकारणं[8] सन्निधानमात्मनस्ता-

---

१ भीमं प्रति कृष्णवचनमिदम् ।

२ "सहः अवष्टम्भनशक्तिः बलं च आभ्यां युक्तानां ओजः अवष्टम्भनशक्तिरहम् । ओजः बलं चाहम् । ओजःशब्दस्य नानार्थस्याऽऽवृत्तिः । सात्वतां सत्वप्रधानानां परमभागवतानां कर्म विष्णुपूजादि तत्राहं विभूतिरिति मां विद्धि । नव मूर्तयः प्रत्येकं येषां तेषां सात्वतां ब्रह्मवाय्वादीनां मध्ये, पुरा पूर्वं प्राप्ता, पूजाविषयत्वेनेति भावः । आदिमूर्तिरहम् । सात्वतपञ्चरात्रोक्तकर्मभिः पूजाविषयाणां देवानां मध्ये पुरा पूज्या आदिमूर्तिः प्राथमिकी स्वकीयनवमूर्तिः । तत्राऽहं विभूतिर्लीलयेति भावः" इति यादवेन्द्रतीर्थाः ।

३ "मूर्तिस्तु सा" इति क्वचित् ।

४ आदिपदेन विष्णुः ब्रह्मवायू सङ्कर्षणसुपर्णौ च गृह्यन्ते ।

५ "नवधोच्यते" इति क्वचित् ।

६ नारायणादिस्वकीयनवमूर्तीनां मध्ये याऽऽदिमूर्तिर्नारायणाख्या साऽहमिति नार्थः । "न विशेषः कथञ्चन । विष्णोस्तु नवमूर्तीनाम्" इति पूर्वोदाहृतसहस्रावरणवचनविरोधादिति । एतेन यत् श्रीधरस्वाम्यादिभिरुट्टङ्कितम्—"नवव्यूहार्चने वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववराहनृसिंहब्रह्माण इति या नव मूर्तयस्तासां मध्ये वासुदेवाख्या" इति तदप्यपास्तं भवति ।

७ "अन्येभ्यो नवनवनमूर्तीनामपि" इति क्वचित् । "अन्येभ्योऽन्यनवनवमूर्तीनामपि" इति च । अयमर्थः—विष्णोरन्येषां श्रियादीनां पञ्चानां या नव मूर्तयः तासामपि तेषामेव पञ्चानां देवानामन्येभ्यो रूपविशेषेभ्यः विशिष्य पूज्यत्वेन प्राधान्यकारणम्, अन्येभ्यो रुद्रादिदेवेभ्यश्च प्राधान्यकारणं तासु विष्णोः स्वकीयनवमूर्तेः सन्निधानमिति सा विष्णोर्नवमूर्तिः पुरा पूर्वं पूज्येति ।

८ "प्राधान्ये कारणम्" इति क्वचित् ।

स्वप्यस्तीति पुरेति विशेषणम् । प्रथमपूज्यास्ता[1] इत्यर्थः ।

"[2]नारायणः परं ब्रह्म वासुदेवादिकास्तथा । नारसिंहवराहौ च परञ्ज्योतिर्हरेर्नव । इन्दिरा च रमा लक्ष्मीर्हिरण्या गगना तथा । रक्ता रक्ततमा[3] भूतिर्विभूतिश्च श्रियो नव । ब्रह्मा चतुर्मुखो धाता विधाता विधिरेव च । कर्ता विरिञ्चो भूतेशः शतानन्दश्च ता नव[4] । धनञ्जयमृते चैव वायोस्तु[5] नव मूर्तयः । शेषोऽनन्तो नरश्चैव लक्ष्मणो बल एव च । सङ्कर्षणो नीलवासा जगद्रक्षो[6] जलेशयः । सुपर्णो गरुडश्चैव वैनतेयो महाशनः । नववर्णः पञ्चवर्णः पन्नगाशोऽमृताकरः । तथैव सर्ववेदात्मा सुपर्णो नवधा स्मृतः" इति च ॥ * ॥

[7]विश्वावसुः पूर्वचित्तिर्गन्धर्वाप्सरसामहम् ।
भूधराणामहं स्थैर्यं गन्धमात्मनमहं भुवः ॥ ३३ ॥

[8]अपां रसश्च परमस्तेजिष्ठानां विभावसुः ।
प्रभा सूर्येन्दुताराणां शब्दोऽहं नभसः परः ॥ ३४ ॥

यस्ययस्य स्वभावो यस्तत्तन्नामा हरिः परः । नियामकः स्वभावस्य ततः शब्दादिनामवान्[9] । वैशेष्याख्या[10] विभूतिश्च विभूतिश्च स्वभावजा । द्विधा विभूतिर्विज्ञेया विष्णोस्तु परमात्मनः" इति च ॥ * ॥

---

१ "प्रथमतः पूज्यास्ता–" इति क्वचित् ।

२ षण्णामपि नवमूर्तीनां क्रमेण नामान्याह । प्रथमतश्च विष्णोः—नारायणः । वासुदेवादिकाः वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाश्चत्वारः । परञ्ज्योतिरेव हयग्रीवः ।

३ "रक्ततरा" इति क्वचित् । प्र. पाठोऽपि तथा ।

४ इति नव ताः मूर्तयः ब्रह्मण इति पूरणीयम् ।

५ "वायोश्च" इति पाठान्तरम् । प्राणापानव्यानोदानसमानाः नागकूर्मकृकलदेवदत्ताश्च वायोर्नव मूर्तय इत्यर्थः ।

६ "जगद्रक्षो–" इति प्र. पाठः । जलेशय इत्यनन्तरम्—"इति शेषस्य नव मूर्तयः" इति पूरणीयम् ।

७ "गन्धर्वाणां विश्वावसुः । अप्सरसां पूर्वचित्त्याख्या अहम् । स्थैर्यमचलत्वं काठिन्यं वाऽहम् । गन्धमात्वं सुगन्धः" इति यादवेन्द्रतीर्थाः ।

८ "परमो रसः स्वादुरसः । तेजिष्ठानां प्रकाशवतां मध्ये विभावसुः सूर्यः । ताराः नक्षत्राणि । तेषां सम्बन्धिनी प्रभा" इति च । विभावसुरित्यग्निर्वा ।

९ "तत्तच्छब्दादिनामवान्" इति प्र. पाठः प्रामादिकः । आकाशादीनां शब्दादिस्वभावस्य भगवान् नियामक इति स एव मुख्यतः शब्दादिनामवान् ।

१० "वैशेषाख्या" इति कोशेषु पाठान्तरम् ।

[1]पृथिवी वायुराकाशमापो[2] ज्योतिरहं महान् ।
विकारः पुरुषोऽव्यक्तं रजः सत्त्वं तमः परः[3] ।
अहमेतत्प्रसङ्ख्यानं ज्ञानं तत्वविनिश्चयः ॥ ३७ ॥

[4]मयेश्वरेण जीवेन गुणेन गुणिना विना ।
सर्वात्मनाऽपि सर्वेण न भावो विद्यते क्वचित् ॥ ३८ ॥

"[5]सत्त्वादिनाम विष्णोस्तु सत्त्वादिस्थस्य केवलम् । जीवस्थस्य च[6] तन्नाम जीवादेरुपचारतः" इति च ॥ * ॥

सङ्ख्यानं परमाणूनां कालेन क्रियते मया ।
न तथा मे विभूतीनां सृजतोऽण्डानि कोटिशः[7] ॥ ३९ ॥

---

१ "अहं अहङ्कारतत्वम् । महान् महत्तत्वम् । विवक्षाभेदेन पुनरुक्तिः । विकारः पृथिव्यादिविकारो ब्रह्माण्डम् । पुरुषः अण्डान्तःस्थितो ब्रह्मा । अव्यक्तं प्रकृतिः । सत्त्वादिगुणाश्च, एतेषु स्थिता विभूतयः तत्तन्नामवांश्चाहम् । ननु चलन्त्यां शाखायां स्थितस्य यथा चलनं एवं विकारेषु स्थितस्य तव किं विकारः? नेत्याह—पर इति । पूर्णशक्तिसम्पन्नत्वाद् विकारादिनिरसनेन पूर्ण इति भावः । एतेषां प्रकृतितत्वदेवानां प्रसङ्ख्यानं सङ्ख्याविभागादिव्यवस्था यस्मात् तत् ज्ञानं सर्वतत्वविषयज्ञानमहं तत्र विभूतिः । तत्वविनिश्चयः तत्वस्याविकारिणः मम विनिश्चयः सर्वतत्वेश्वरत्वेन निश्चयः" इति यादवेन्द्रतीर्थाः ।

२ "-काश आपो" इति प्र. पाठः । ३ "परम्" इति च ।

४ "सजातीयोत्कर्षप्रापकविभूतीरुक्त्वा स्वभावविभूतीराह—मयेश्वरेणेति । भावः वस्तु किमपि क्वचित् कदाचिदपि मया विना नास्ति । सर्वं वस्तु सदा मदधिष्ठितमित्यर्थः । नन्वन्यदीयवस्तुनि तव स्थितिः कथं स्थिरेत्यत आह—सर्वेण सर्वस्वामिनेत्यर्थः । ननु तव वस्तुषु स्थितिः किमर्थमित्यत आह –सर्वात्मना । अन्तर्यामिणा । वस्तुशक्तिप्रेरणार्थमन्तर्याम्यहमिति भावः । ननु प्रेरणार्थं कदाचिदुत्साहादिना भाव्यम् । स किं त्वय्यस्तीति जिज्ञासायामाह– गुणिना । गुणव्यक्तिसम्पन्नेन । एतादृशस्य तव किं स्वरूपमिति जिज्ञासायामाह– गुणेन । ज्ञानानन्दादिगुणरूपेणेत्यर्थः । नन्वचेतनस्य स्वतः व्यापारादर्शनात् प्रेरकापेक्षाऽस्तु नाम । चेतनस्य तदपेक्षा कुत इत्यत आह– जीवेन प्राणादिधारकेण । मया विना चेतनो वा ज्ञानादिव्यापारो वा नास्तीत्यर्थः । ननु प्रेरणार्थं ज्ञानादिना भाव्यम् । कथं ज्ञानरूपस्य ज्ञानसम्बन्ध इत्यत आह-ईश्वरेण । अघटितघटनासामर्थ्यसम्पन्नेन" इति च ।

५ "वीराणामहमर्जुनः" (३९) इत्यादेः पूर्वमेव व्याख्यातत्वात् उत्तरश्लोकतात्पर्यं तावदाह– सत्वादिनाम । पुनश्चैतेनैव प्रमाणेन 'ब्रह्मण्यानां बलिरहं वीराणामहमर्जुनः' इत्यादेरपि भावः स्फुटतरं प्रतिपादित इति तमप्यंशमुद्धरति– जीवस्थस्य । ६ "-स्थस्य तु तन्नाम" इति क्वचित् ।

७ "परमाण्वानन्त्यं सातिशयमिति ज्ञानमिव विभूतीनां तथा लोक इव सङ्ख्यानं नास्ति । अतः न क्रियते निरतिशयानन्तत्वादिति भावः । तत्र निमित्तमाह—सृजत इति । कोटिशब्दो बहुत्ववचनः । बहुधाऽण्डानि

कालेन सर्वगुणात्मकेन मया । असङ्ख्यत्वात् तथा न क्रियते । नाविज्ञानात् ।

"अनन्तमिति वेत्तीशस्त्वनन्तं त्वन्तवत् तथा । अनन्तस्य हि सङ्ख्याने नतु सर्वज्ञता भवेत् । अनन्तमपि वेत्तीशः प्रत्येकं च विशेषतः । सर्वज्ञत्वान्न सङ्ख्यानमसङ्ख्यस्य कुतो हि सा" इति च ॥ * ॥

[1]एतास्ते कीर्तिताः सर्वाः संक्षेपेण विभूतयः ।
मनोविकारा एवैते[2] यथा वाचाऽभिधीयते ॥ ४१ ॥

यथा वाचाऽभिधीयतेऽन्यैः[3] नामादिकं जीवादीनां ते सर्वे शब्दा मनोविकाराः ॥ * ॥

वाचं यच्छ मनो यच्छ प्राणं[4] यच्छेन्द्रियाणि च ।
आत्मानमात्मना यच्छ न भूयः कल्प्यसेऽध्वने[5] ॥ ४२ ॥

'सृजतः बह्व्यो मे विभूतयः असंख्याता इत्यर्थः" इति यादवेन्द्रतीर्थाः । "कालेन सर्वज्ञेन" इति वीरराघवः । "कालेन सर्वान्तर्यामिणा" इति जीवगोस्वामी । "मया महता कालेन संख्यानं क्रियते" इति व्याख्यान्तः शोच्या एव । यन्नन्तं कथं महताऽपि कालेन गणयेत्? यदीश्वरत्वाद् गणयेत् कथमल्पेन कालेन न गणयेत्?

१ "सर्वाः स्वस्वजात्युत्तमत्वहेतवः, वस्तुस्वभावशक्तिप्रेरणहेतवः, वस्तुषु गुणविशेषहेतवश्चेति त्रिविधा विभूतयः कीर्तिताः । यथा मां मुख्यार्थमनतिक्रम्येत्यर्थः । वागिन्द्रियेणाभिधीयते नामादिकं ज्ञानिभिर्व्यवह्रियते । तर्हि भवानिन्द्रादिश्चोभावपि किं नामादिमुख्यार्थौ? नेत्याह—मनोविकाराः । एते इन्द्रादिनाम्नामिन्द्रादिषु मुख्यत्वमित्यादिव्यवहाराः मनःकारणकृतभ्रमप्राप्ता इत्यर्थः । अतः परमात्मा नामादिपरममुख्यार्थः" इति यादवेन्द्रतीर्थाः ।   २ "एते वै" इति पाठान्तरम् ।

३ "–धीयते नामादिकम्" इति प्र. पाठः । यथा जीवादीनामयं यज्ञदत्तोऽयं देवदत्त इति वाचा सङ्केतः क्रियते तथा भगद्विभूतिविवक्षामन्तराऽन्यत्रेन्द्रादिषु प्रयुज्यमानाः सर्वे शब्दा मनोविकारा एवेत्यर्थः । नामादिकमित्यादिपदेन गुणक्रियादिकम् । तद्वाचिनः सर्वे शब्दाः ।   ४ "प्राणान्" इति प्र. पाठः ।

५ "कल्पसेऽध्वने" इति प्र. पाठः । "तस्माद् वाचं इन्द्रादिसूक्तनामघोषात्मकशब्दान् मय्येव यच्छ । मद्विषयमेव कुरु । मनश्च यच्छ मद्विषयं कुरु । प्राणं सर्वव्यापारं आत्मानं प्रति यच्छ । मद्विषयं कुरु । इन्द्रियाणि श्रोत्रादीनि मद्विषयाणि कुरु । एवमात्मना मत्सहायेन आत्मानं परमात्मानं यच्छ सर्वव्यापारलक्ष्यं कुरु । वागादिकं बहिरर्थविषयं न कर्तव्यमित्यर्थः । एवं सति आत्मना परमात्मना अध्वने दुःखमार्गाय न कल्प्यसे" इति यादवेन्द्रतीर्थीयम् । "आत्मना प्रयत्नेनाऽऽत्मानं परमात्मानं लक्ष्यत्वेनाऽऽत्मानं जीवमपि सर्वात्मना यच्छ" इति विजयध्वजीयम् । उभयमपि नातीव तात्पर्यानुगम् । वस्तुतस्तु तात्पर्यानुगुण्येनायं मूलश्लोकार्थः—मूल आत्मानमिति द्वितीयान्तं परमात्मवाचि । आत्मनेति जीववाचि । तथाचाऽऽत्मानं परमात्मानं लक्ष्यभूतं स्वात्मना शरभूतेन यच्छ विध्य । शरवत् तन्मयो भवेत्यर्थः । जीवं भगवति लक्ष्यभूते यच्छ भगवदेकनिष्ठं कुर्विति यावत् । "शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते" इति श्रुतेः । तेन न भूयः संसाराध्वपरिभ्रम-

स्वतो मय्येव सर्वशब्दाः, तस्मान्मय्येव वाचं यच्छ । [1]आत्मानं परमात्मानम् । मय्येव लक्ष्यत्वेन यच्छ ॥ * ॥

यो वै वाङ्मनसी सम्यङ् न संयच्छेद् धिया[2] यतिः ।
तस्य व्रतं तपो ज्ञानं[3] स्रवत्यामघटाम्बुवत् ॥ ४३ ॥

यो मयि न संयच्छति तस्य ज्ञानं स्रवति ॥ * ॥

[4]तस्माद् वचोमनःप्राणान् नियच्छेन्मत्परायणः ।
मद्भक्तियुक्तया बुद्ध्या ततः परिसमाप्यते[5] ॥ ४४ ॥

"वाङ्मनःप्राणबुद्ध्यादि[6] नियच्छेत् केशवे परे । सर्वशब्दाभिधेयत्वं तस्य ज्ञात्वा विशेषतः । [7]मुख्यवृत्त्याऽभिधेयत्वमन्येषां मनसो भ्रमात् । तस्मात् तथा चिन्तयतः स्रवेज्ज्ञानं यथातथम्[8] । तस्मान्मनोवचःप्राणान् माधवैकपरायणान् । कुर्यात् तद्धि तपो ह्यर्घ्यं[9] महाधर्मोत्तमश्च सः" इति धर्मविवेके । "यच्छेद् वाङ् मनसी[10]"

णाय कल्प्यसे । एवमात्मनियमनोपायमाह—वाचम् । तदर्थं वाचं मनः प्राणमिन्द्रियाणि च मय्येव यच्छ । सर्वेन्द्रियव्यापाराणां मामेव लक्ष्यीकुरु । विषयेभ्यः प्रत्याहृत्य मदेकतानतया नियच्छेति ।

१ नन्वात्मानं यच्छेति नाऽत्मा मनः । मनो यच्छेति पुनरुक्तेः । नापि जीवः । आत्मनाऽत्मानं जीवेन जीवमित्यास्वारस्यात् । सत्यम् । नायमात्मा मनः जीवो वा किन्तु परमात्मेत्याह—आत्मानम् ।

२ "सम्यगसंयच्छन् धिया"; इति प्र. पाठः । "यः वाक् च मनश्च वाङ्मनसे धिया अस्तीति बुद्ध्या न संयच्छेत् मद्विषये एव न कुर्यात् तस्य व्रतादिकं स्रवति नश्यति विषयसेवयेति भावः" इति यादवेन्द्रतीर्थाः ।

३ "तपो दानम्" इत्यर्वाचीनाः । ४ "तस्मान्मनोवचःप्राणान्" इति पाठान्तरम् ।

५ "ततः दुःखात् परिसमाप्यते निवर्तितो भवति" इति यादवेन्द्रतीर्थीयम् । "ततः ज्ञानसामग्र्यानन्तरं परिसमाप्यते संसार इति शेषः" इति विजयध्वजीयम् । "परिसमाप्यते कृतकृत्यो भवति" इति श्रीधरस्वामी । "परिसमाप्यते मोक्षोपायः सम्पूर्णो भवति" इति सुदर्शनसूरिः । "परिसमाप्यते संसारमुक्तो भवति" इति शुकदेवः । वस्तुतस्तु परिसामाप्यते परिपूर्णो भवतीत्यर्थः । मुक्तिरेव हि परिपूर्णता नाम । "समाप्तिशब्दः पूर्तिवाची" इति भगवत्पादैरेवोक्तम्—"ज्ञाने परिसमाप्यते"(४-३३) इति गीताव्याख्याने ।

६ "–बुद्ध्यादीन्" इति प्र. पाठः । ७ अन्येषां मुख्यवृत्त्याऽभिधेयत्वं मनसो भ्रमादित्यन्वयः ।

८ यथा वस्तु तथा स्थितं यथार्थज्ञानं स्रवेत् । अन्यथाज्ञान्येव भवेदित्यर्थः ।

९ "तपो ग्राह्यम्" इति प्र. पाठः प्रामादिकः ।

१० "वाङ् मनसी वाचं मनसि यच्छेदित्यर्थः । वाचोऽधिकरणान्तराद्दृष्टेः । तद् यच्छेज्ज्ञान आत्मनीति मनसस्तद्दृष्टेः । "वाङ्मनसि सम्पद्यते" इत्यादेश्च" इति पण्डिताचार्यवचनम् । वाचमुमां मनसि रुद्रे । तं च ज्ञाने सरस्वत्याम् । तां महति ब्रह्मणि । तं चान्ततः परमात्मनि नियच्छेत् ।

प्राज्ञस्तद् यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेच्छान्त आत्मनि"
इति च ॥ * ॥

इत्येकादशस्कन्धे षोडशोऽध्यायः

[सप्तदशोऽध्यायः]

[1]वक्ता कर्ताऽविता नान्यो धर्मस्याच्युत ते भुवि ।
सभायामपि वैरिञ्च्यां यत्र मूर्तिधराः कलाः ॥ ५ ॥

"विना प्रसादं विष्णोन धर्मं ब्रह्माऽभिवक्ष्यति । तत्प्रसादेन वक्तुं तु ब्रह्मा शक्ष्यति नापरः" इति प्रधाने[2] ।

कलाः प्राणाद्याः—

"[3]स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद् वीर्यं तपो मन्त्राः कर्म लोका[4] लोकेषु नाम च । ता इमाः षोडषकलाः पुरुषायणाः" [5]इत्यादिश्रुतेः ॥ * ॥

---

१ "कपिलादिरूपेण धर्मस्य वक्ता, नरनारायणादिरूपेण धर्मस्य कर्ता, कृष्णादिरूपेण धर्मस्याविता त्वमेव । त्वदन्यः धर्मस्य प्रवचनादौ समर्थो न । यत्र प्राणादिषोडशकलाः तत्र वैरिञ्च्यां चतुर्मुखसम्बन्धिन्यां सभायामपि स्वसामर्थ्येन वक्ता कोऽपि नास्ति । ब्रह्माऽपि परमात्मप्रसादप्राप्तसामर्थ्येन देवानां धर्मवक्तेति भावः" इति यादवेन्द्रतीर्थाः ।

२ "प्राधान्ये" इति प्र. पाठः । "प्रध्याने" इति क्वचित् ।

३ प्राण इति जीवकलाभिनी मुख्यप्राणः । श्रद्धामानिनीति सरस्वती भारती च । खमित्याकाशमानी विघ्नेशः । वायुरिति भूतवायुः प्रवहः । ज्योतिरिति भूताग्निः । आप इति जलाभिमानी बुधः । पृथिवीमानी शनिः । "सोमवित्तपसूर्याप्पा अश्व्यग्नीन्द्रेन्द्रसूनवः । यमो दक्षश्च" इति दशेन्द्रियमानिनः । मन इति गरुडशेषरुद्राः कामानिरुद्धौ च । अन्नमानी सोमः । वीर्यदेवता वरुणः । आलोचनाख्यस्य तपसः मानी वह्निः । मन्त्रो वाग्व्यवहारस्तद्देवता स्वाहा । पुष्करो वरुणपुत्रः कर्मदेवता । लोकाभिमानी पर्जन्यः । उषा अश्विनोर्भार्या नामाभिमानिनी । एवं प्राणादिपुष्करान्ताः सर्वदेवा यत्र धर्मजिज्ञासां कुर्वते तत्र वैरिञ्च्यां सभायामपीत्यर्थः । कलानामव्यक्ततया सर्वदेहेष्वपि सन्निधानात् मूर्तिधरा इत्युक्तम् ।

४ "कर्म लोकेषु नाम च" इति प्र. पाठः प्रामादिकः ।

५ " इति श्रुतेः" इति प्र. पाठः ।

[1]वेदाध्यायी स्वधास्वाहाबल्यन्नाद्यैर्यथोदयम् ।
[2]नृदेवपितृभूतानि मद्रूपाण्यन्वहं यजेत् ॥ ५० ॥

"प्रतिमावद्धरे रूपं [3]तिर्यङ्नरसुरादयः । साक्षाद्रूपाणि मत्स्यादीन्यभिन्नान्येव सर्वदा" इति च ॥ * ॥

इत्येकादशस्कन्धे सप्तदशोऽध्यायः

[अष्टादशोऽध्यायः]

विप्रस्य वै सन्न्यसतो देवा दारादिरूपिणः ।
[4]विघ्नं कुर्वन्त्ययं ह्यस्मानाक्रम्य समियात् परम् ॥ १४ ॥

"असम्पूज्य न्यसिष्णुं[5] तु देवा वै पातयन्त्यधः । सुसम्पूज्य [6]न्यसिष्णोस्तान् देवा एवानुजानते । अथवा तद्यशोवृद्ध्यै विघ्नन्तीव पुनःपुनः । तात्पर्याद् विघ्नितो देवैर्नोत्थातुं शक्नुयात् क्वचित्" इति देवहार्दे ॥ * ॥

---

१ "वेधाध्यायस्वधा–" इति प्र. पाठः ।

२ "देवर्षिपितृभूतानि" इति च । "गृहस्थधर्मानाह—वेदाध्यायीति । यथोदयं धनधान्यादिसमृद्धिमनुसृत्य गृहस्थः वेदाध्यायी सन्, बलिः पूजा, तदर्थं दातव्यैरन्नाद्यैः पयोदध्याद्यैः मद्रूपाणि प्रतिमावत् मम सान्निध्योपेतानि भूतानि यजेत् । कानि भूतानीति जिज्ञासायामाह– नृदेवेति । नृन् अन्नैः । पितृन् स्वधाशब्दसहितान्नाद्यैः । देवान् स्वाहाशब्दसहितान्नाद्यैः दध्यादिभिः अन्वहं यजेत्" इति यादवेन्द्रतीर्थाः । पञ्चयज्ञा वा अनेनोच्यन्ते । तथाहि वेदाध्ययनेन ऋषियज्ञः । नृदेवपदेन ऋषयोऽप्युच्यन्ते तन्त्रेण नृणां देवा इवोत्तमा इति । स्वधाकारः पितृयज्ञः । स्वाहाकारो देवयज्ञः । बलिहरणं भूतयज्ञः । अन्नादिदानं नृयज्ञ इति ।

३ तिर्यगिति भूतानीति मूलं विवृतम् । ऋषयः पितरश्चाऽऽदिपदोक्ताः ।

४ "विघ्नान्" इति प्र. पाठः । दारादिरूपिणः दारदिषु स्थिताः देवाः, दारादिरूपान्निमित्तादिति वा । विघ्नं कुर्वन्तीव । किमर्थम् ? अयं सन्यासग्रहणेच्छुः अस्मान् देवान् आक्रम्य अविगणय्य परं पुरुषार्थं परमात्मानं वा समियादिति बुद्ध्या विघ्नं कुर्वन्तीव । असाधूनां सन्न्यासभ्रंश एवेति भावः" इति यादवेन्द्रतीर्थाः ।

५ "न्यसिष्णूंस्तु" इति प्र. पाठः ।

६ तान् देवान् सुसम्पूज्यैव न्यसिष्णोः पुरुषस्य तु ते देवाः सन्तुष्टा अनुज्ञां ददतीति । "न्यसिष्णूंस्तान्" इति क्वचित् पाठान्तरम् । "न्यसिष्णूंस्तु" इति प्र. पाठः ।

यदेतदात्मनि जगन्मनोवाक्प्राणसम्भृतम्[1] ।
सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत् स्मरेत् ॥ २७ ॥

"त्रिगुणा प्रकृतिर्माया तज्जत्वाद् विश्वमीदृशम् । अनाद्यनन्तकालेषु मायेत्याहुर्विपश्चितः । अचेतनत्वान्नैवैतत् प्रयोजकतया स्मरेत् । चेतनत्वं स्वतन्त्रत्वं स चैको विष्णुरेव तु । आयस्तु फलमुद्दिष्टं प्रोक्तं मायेति निष्फलम् । फलाल्पत्वाच्च मायैषा सम्प्रोक्ता त्रिगुणादिका । महाफलप्रदत्वात्तु विष्णुराय इतीरितः[2]" इति निरुक्ते[3] ॥ * ॥

वेदवादरतो न स्यान्न पाषण्डी न हैतुकी[4] ।
शुष्कवादविवादेन कञ्चित् पक्षं न संश्रयेत्[5] ॥ ३० ॥

"वेदेन सह वादो यो वेदवाद इतीरितः । तर्केण वेदस्यान्यार्थकल्पनं तद्[6] विदो विदुः । तन्न कुर्यात् कदाचिच्च तत् कुर्वन् वेदहा भवेत्" इति च । "योगसाङ्ख्यकणादाक्षपादा वै हेतुवादिनः । [7]पश्वीशशाक्तबुद्धाद्याः पाषण्डा इति कीर्तिताः" इति च ॥ * ॥

---

१ "-संहतम्" इति प्र. पाठः। "प्राणः देहबलम् । मनोवाक्प्राणाः जनकाः यस्य तत् कर्म तेन सम्भृतं जीवकर्मणोत्पन्नं आत्मनि परमात्माधारतया स्थितं जगत् सर्वं माया नित्यसुखलक्षणफलरहितं भवति । ईश्वरोपासनमेव नित्यसुखसम्पादकमिति भावः । कुतो नित्यसौख्यकारणत्वं जगतो नास्तीति जिज्ञासायामाह—मायेति । यतः गुणात्मकप्रकृतिजन्यं तस्मात् । तमोगुणकार्यस्य दुःखजनकत्वादिति भावः । इति तर्केण सर्वस्मिन्नसत्त्वानुमानेन त्यक्त्वा विषयजातं परित्यज्य तद् विषयजातं मनसाऽपि न स्मरेत् । बन्धहेतुत्वादिति भावः । एवं दृढज्ञानस्य नित्यसौख्यसम्पादकमाह–स्वस्थ इति । स्वतन्त्रे परमात्मनि समाधिना स्थितः" इति यादवेन्द्रतीर्थाः । तत् जगत् नित्यसुखप्रयोजकत्वेन न स्मरेदिति वाऽर्थः । तात्पर्यानुगुण्यात् । "सर्वं माया सर्वमिदं प्रकृतिपरिणामः" इति सुदर्शनसूरिः । "माया मायागुणकार्यम्" इति विश्वनाथचक्रवर्ती । "माया मच्छक्तिरूपा प्रकृतिः, तत्कार्यम्" इति शुकदेवः ।

२ "इतीर्यते" इति क्वचित् ।

३ "निवृत्ते" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

४ "पाखण्डी न हैतुकः" इति प्र. पाठः ।

५ "-विवादे न कञ्चित् पक्षं समाश्रयेत्" इतिच । "तर्कमात्रेण वेदार्थस्य विरोधं प्रतीत्य वेदस्यान्यार्थकल्पना वेदवादः । तत्र रतः न भवेत् । किन्तु इतिहासपुराणवेदाङ्गसहितोपक्रमादिवेदवाक्यानुसारेण वेदार्थं जानीयादिति भावः । पाषण्डवान् पाषण्डी । पाशुपतशाक्तबौद्धादिमतानि पाषण्डशब्दार्थः । पाषण्डे आदरवान् न भवेदित्यर्थः । हैतुकी हेतुवादी । कणादगौतमादिमते आदरवान् न भवेदित्यर्थः । शुष्कवादलक्षणविवादेन, शुष्कवादो नाम परमात्मगुणज्ञानानुपयुक्तवादः, वार्तिकसूत्रयोः वैयर्थ्यविवादः, प्रभाकरभट्टयोः सत्त्वासत्त्वविवादः, एवमादिविवादः, तेन, इत्थम्भूतलक्षणे तृतीया, तेन सहेति वा, कञ्चिद् पक्षं न संश्रयेत्" इति यादवेन्द्रतीर्थाः ।

६ "तं विदो–" इति प्र. पाठः ।

७ अत्र पश्वीशपदेन पाशुपतमतमुच्यते । बुद्धपदेन च बुद्धदर्शनम् ।

93

एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः ।
[1]खं यद्वदुदपात्रेषु भूतान्येकात्मकानि च ॥ ३२ ॥

"भूतानामेक एवात्ताऽथैको भूतेषु सन्ततः । एको भूतानि चाऽदत्ते [2]तस्मादेकात्मकानि तु" इति भद्रमाने । "घटादिषु महाकाशो निर्विशेषश्च सन्ततः । [3]घटावयवरूपस्तु तथैवान्यो घटानुगः । घटनाशेऽप्यनाशः सन् मध्यमाकाश इष्यते । एकदेशाभिमानित्वादित्याकाशास्त्रयः स्मृताः । महाकाशो विघ्नराजो विघ्नास्तत्र तु मध्यमाः । क्षुद्रविघ्नास्तदितर एवमात्मा त्रिधा स्मृतः । महाखवत् परस्त्वात्मा जीवा मध्यखवत् स्मृताः । [4]घटानुगखवत् प्रोक्ता असुरा नित्यदुःखिनः । महाकाशवशाः सर्वे आकाशा इतरे स्मृताः । परमात्मवशे तद्वज्जीवाः सर्वेऽपि संस्थिताः । एवं [5]विष्णवात्मकमिदं जगत् पश्येद् यतिः सदा" इति विनिर्णये ॥ * ॥

शौचमाचमनं स्नानं नतु चोदनया चरेत् ।
अन्यांश्च नियमान् ज्ञानी यथाऽहं लीलयेश्वरः[6] ॥ ३६ ॥

---

१ "यथेन्दुरुदपात्रेषु" इति प्र. पाठः । "परः सम्पूर्णकल्याणगुणः आत्माऽन्तर्यामी एक एव एकविध एव । वैषम्यनैर्घृण्यादिरहित एवेत्यर्थः । भूतेषु आत्मनि च आस्थितः । उदपात्रेषु घटादिषु स्थितं खं महाकाशः यद्वत् यथा भूतानामुपजीव्यम् । अवकाशे सति हि घटादेरवस्थानमिति भावः । तथा भूतानि एकात्मकानि । एक आत्माऽन्तर्यामी उपजीव्यः येषां तानि" इति यादवेन्द्रतीर्थाः ।

२ तथाचैक एव आत्मा अत्ता आततः आदाता च येषां तान्येकात्मकानि भूतानीत्येकोऽर्थः । अथच भूतानि शरीराणि एक एव परमात्मा आत्मा स्वामी अवान्तरजीवद्वयसहितानां च येषां तानीत्यर्थान्तरं च प्रमाणत आह— घटादिषु । तथा च "खं यद्वत्" इत्यादिमूलं केवलाकाशपरतयाऽभिमानिपरतया चेति द्वेधा व्याख्येयमित्युक्तं भवति । खं महाकाशं यथा घटशरावादिषु एकमेव सन्ततं तथा सर्वभूतेष्वेक एव परमात्मा सन्तत इत्येकोऽर्थः । यथा महाकाशमानी गणपतिः घटावकाशपूरकाणां मध्यमाकाशानामभिमानिनां विघ्नदेवानां घटावयवभूताकाशाभिमानिनां क्षुद्रविघ्नदेवानां च स्वामी नियामकः सन् सर्वत्र घटादिषु सन्ततः एवं परमात्मा शरीरेषु स्थितानां मध्यमात्मनां जीवानां अधमात्मनामसुराणां च नियामकः सन् सर्वत्र गत इति ।

३ घटानुग इति भूताकाशः । तथाच प्रथमं तावदाकाशो द्वेधा—महाकाशो भूताकाशश्चेति । भूताकाशश्च द्वेधा—एकस्तु घटावयवरूपः सन् घटानुगः । अपरः घटनाशेऽप्यनाशः सन् घटावकाशपूरणतया घटानुगः मध्यमाकाश इत्युक्तः । ननूभयोरपि भूताकाशत्वात् कथं द्वैविध्यम्? आह—एकदेशाभिमानित्वात् । सत्यमभिमन्यमानविवक्षयाऽऽकाशत्रैविध्यं न युज्यते । अभिमानिविवक्षया त्वत्र त्रैविध्यमुदितम् । एकदेशेऽवयवत्वांशेऽभिमानी यः क्षुद्रविघ्नः सोऽधमाकाश इति, एकदेशेऽवकाशांशेऽभिमानी यो विघ्नः विघ्नराजभृत्यः स मध्यमाकाश इति ।

४ घटावयवभूतघटानुगखवदित्यर्थः ।

५ विष्णुस्वामिकं विष्णुवशमित्यर्थः ।

६ "चोदनया विधिचकिततया नाऽचरेत् । तर्हि कया बुद्ध्या कर्तव्यम् ? आह—यथाऽहम् । अहं यथा लीलया जगद्व्यापारं नियमांश्च करोमि, नतु परभयात्, तथा चरेत्" इति यादवेन्द्रतीर्थाः ।

"स्वभावतो धर्मपरो न विधेश्चकितश्चरेत् । अल्पं फलं[1] हि चकिते स्वभावे फलमुत्तमम्" इति च ॥ * ॥

नहि तस्य विकल्पाख्या [2]क्रिया मद्दीक्षया हता ।
[3]आदेहान्तं क्वचित् ख्यातिस्ततः सम्पद्यते मया ॥ ३७ ॥

[4]विधिविरुद्धत्वेन कल्पनं विकल्पः ।

"निषिद्धं मनसा कल्प्य भीतो विहितमाचरेत् । अज्ञो ज्ञस्य तु सङ्कल्पः स्वभावाद् विहितानुगः । शरीरधर्मिणः क्वापि निषिद्धेऽपि मनो व्रजेत् । तथाऽपि तस्य नानर्थो मोक्षे नैवान्यथा[5] व्रजेत्" इति धर्मतत्त्वे ॥ * ॥

[6]तावत् परिचरेद् भक्तः श्रद्धावाननसूयकः ।
यावद् ब्रह्म विजानीयान्मामेव गुरुमादृतः ॥ ३९ ॥

"[7]शुश्रूषेत् सहितस्तावद् यावज्ज्ञानोदयो गुरुम् । ततः परं च शुश्रूषेद् यथा तस्य प्रियं भवेत्" इति च ॥ * ॥

इत्येकादशस्कन्धेऽष्टादशोऽध्यायः

---

१ "फलं च चकिते" इति प्र. पाठः ।

२ "–ख्या या च मद्दीक्षया" इति प्र. पाठः । तस्यापरोक्षज्ञानिनः विकल्पाख्या विधिविरुद्धतया कल्पनरूपा क्रिया नहि युक्ता । यतस्तस्य सर्वाऽपि निषिद्धक्रिया मद्दीक्षामात्रेण हता । अथच यावद् देहपातं क्वचित् ख्यातिः निषिद्धक्रियाबुद्धिः स्याच्चेदपि साऽपि मद्दीक्षयैव हता भविष्यति । ततो देहपाते च सति सम्पद्यते मया । यादवेन्द्रतीर्थीये तु प्रकारान्तरेण व्याख्यातम्—"मद्दीक्षया मम दयादृष्ट्या तस्य ज्ञानिनः ममापरोक्षेणेति वा । क्रिया पापादिरूपा हता हि । अतः तस्य ज्ञानिनः आदेहान्तं क्वचित् ख्यातिः अधर्मबुद्धिश्चेदपि विकल्पः विधिविरुद्धत्वेन कल्पनमित्याख्या व्यपदेशः नहि । ज्ञानी अधर्मं करोतीति व्यपदेशो नहि । ततः प्रारब्धकर्मावसानसहितापरोक्षेण मया सम्पद्यते सालोक्यादिमान् भवति" इति । ३ "आदेहान्तात्" इति प्र. पाठः ।

४ "विधिरुद्धत्वेन" इति क्वचित् । "विरुद्धत्वेन" इतीयदेव क्वचित् ।

५ "मोक्षे चैवान्यथा" इति प्र. पाठः प्रामादिकः । शरीरधर्मिणः क्वापि मनो निषिद्धेऽपि व्रजेत् । मोक्षे तु अन्यथा विधिविरुद्धत्वेन निषिद्धे कदाऽपि मनो न व्रजेदेवेत्यर्थः ।

६ "श्रद्धावान् शास्त्रेषु विश्वासवान् सन् तावद्वत्सरपर्यन्तं तं गुरुं तत्र स्थितं मां च प्रति परिचरेत् सेवां कुर्यात् यावद् ब्रह्म विजानीयात् तावत्पर्यन्तम् । विद्याप्राप्त्यनन्तरमपि यथोचितं शुश्रूषां कुर्यात्" इति यादवेन्द्रतीर्थाः ।

७ 'तावत् परिचरेत्' इत्यादिमूलं ब्रह्मज्ञानपर्यन्तं विशेषतो गुरुशुश्रूषां प्रशस्य विधत्ते नतु तदनन्तरभाविनीं शुश्रूषां सर्वात्मना निषेधतीत्याह—शुश्रूषेत् । सहितः गुरुणा सह गुरुकुल एव स्थित इत्यर्थः । अथ ज्ञानोदया-

[एकोनाविंशोऽध्यायः]

योविद्याश्रुतसम्पन्न आत्मवानानुमानिकः[1] ।
मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि सन्न्यसेत् ॥ १ ॥

"त्रिगुणा प्रकृतिर्माया पश्येत् तन्मात्रकं जगत् । निर्मिमीते जगत् सर्वमतो मायेति सा स्मृता" इति प्रभवे । "इदं ज्ञानं हरेः पूजा हरेरेवोदितं सदा । हर्यधीनं च[2] सर्वत्रेत्येवं न्यासो हरौ स्मृतः" इति च ॥ * ॥

त्वय्युद्धवाऽविशति[3] यस्त्रिविधो विकारो
मायाऽन्तराऽऽपतति नाद्यपवर्गयोर्यः[4] ।
जन्मादयोऽस्य वद मां[5] तव तस्य किं स्यु-
राद्यन्तयोर्यदसतोऽस्ति तदेव मध्ये[6] ॥ ७ ॥

नन्तरं गुरुणा सहित एव वा तिष्ठेत्, स्थानान्तरं वा तदनुज्ञातो गच्छेदिति भावः । श्रद्धादिगुणपूगसहित इत्येके । "संहितस्तावत्" इति क्वचित् पाठः ।

१ "आत्मवान् नाऽनुमानिकः" इति प्र. पाठः । "आत्मवान् परमात्मभक्तियुक्तः विद्याया वेदादिरूपायाः श्रुतेन अर्थज्ञानेन सम्पन्नः। आनुमानिकः उपक्रमादियुक्तिभिर्निरस्तविपर्ययादिः इदं कार्यजातं मायामात्रं त्रिगुणात्मकप्रकृतिजन्यं इति ज्ञात्वा आत्मवान् सर्वेश्वरावधारणवान् सन् ज्ञानं मद्विषयं परोक्षापरोक्षरूपं मयि सन्न्यसेत् । मदायत्तमिति जानीयात् । स्वशक्तिसम्पादितत्वबुद्धिं त्यजेदित्यर्थः । एतादृशः ज्ञानस्य न्यासो मम पूजेति भावः" इति यादवेन्द्रतीर्थाः ।

२ "तदधीनं च" इति क्वचित् ।

३ "–वाऽश्रयति" इति प्र. पाठः ।

४ "–वर्गयोर्यत्" इति च ।

५ "–ऽस्य यदमी तव" इति च ।

६ "उद्धव, त्वयि सात्विकस्वभावे यः त्रिविधः सत्वजन्यः ज्ञानसुखरूपः, रजोजन्यः विषयतृष्णादिरूपः, तमोजन्यः अन्यथाज्ञानदुःखादिरूपः, एवं त्रिविधः विकारः आविशति प्राप्नोति सः माया। गुणत्रयात्मकप्रकृतिबन्धजन्य इत्यर्थः । अतः सः अन्तरा मध्ये सृष्टिकाले आपतति । यः विकारः आदौ गुणोत्पत्तेः पूर्वं अपवर्गे गुणनिवृत्त्यनन्तरं च नाऽपतति सः अन्तराऽपि न स्वाभाविक इत्यर्थः । ननु क्षीरस्य तक्रयोगेन यथा क्षीरत्वापगमः एवं गुणसम्बन्धेन जीवस्य सुखस्वभावापगमो भवेदित्याशङ्क्याऽह—जन्मादय इति । तस्य प्राकृतस्य वैकृतस्य वा देहस्य जन्मादयः अस्य विकारस्वभावरहितस्य ज्ञानानन्दरूपस्य तव स्युः किम्? मां प्रति वद । जीवस्य स्वरूपेणोत्पत्त्यभावः नित्यत्वं तवापि जातिस्मरणादिना सिद्धम् । अतः असतः अवस्तुनः अनित्यस्य जगतः आद्यन्तयोर्यज्जीवस्यास्ति ज्ञानानन्दादिस्वरूपं सृष्टिकालेऽपि तदेवास्ति । आनन्दस्य सुषुप्तावनुभूयमानत्वादिति भावः। बन्धस्याभिमानलक्षणभ्रमप्राप्तत्वात् मदनुग्रहयुक्तं ज्ञानं भ्रमनिवृत्तये सम्पादनीयमित्यर्थः" इति यादवेन्द्रतीर्थाः । "त्रिविधः जन्मस्थितिसंहारलक्षणो विकारः" इति विजयध्वजीयम् ।

"अन्यस्थं निर्मितं जीवे जन्मादि हरिणा यतः। तस्मान्मायेति तत् प्राहुर्माया निर्माणमुच्यते। नहि जीवस्य जन्मादि स्वतो नित्यस्य सम्भवेत्। सृष्टेः प्राक् प्रळये[1] चैव यतो जन्मादि नास्य हि। तस्मान्मध्येऽपि नास्यास्ति देहादिस्थं तु विष्णुना। कर्मभिर्निर्मितं जीवे प्रळये[1] यन्न जीवगम्। यन्न विद्येत हि लये यन्न विद्येत मुक्तिगे। जीवस्य न स्वभावोऽसौ प्रायेणेति विनिश्चितः" इति प्रकाशिकायाम्। "मायेत्युक्तं निर्मितं तु यतो जन्मादि निर्मितम्। देहादिगं परेशेन माया जन्मादि तेन तु" इति प्रकृते।

मां प्रति वद। तस्य देहादेर्जन्मादयोऽस्य चिदानन्दरूपस्य तव स्युः किम? अस्वतन्त्रत्वादवस्तुनो जगतः आद्यन्तयोर्यज्जीवस्यास्ति तदेव तस्य[2] स्वाभाविकं संसारेऽपि। अन्यदभिमाननिमित्तम्। प्रळये[3] विद्यमानस्य कथं जन्मादि स्यादिति भावः। तदा नाशाद् देहादेस्तु युज्यते। मुक्तिगमेव जीवस्य स्वाभाविकम्। किमु[4] प्रळयेऽप्यविद्यमानं स्वतः स्यादित्यर्थः।

"[5]आद्यन्तयोरननुगमाद्यन्तरहितस्य तु। आद्यन्तभाविनो[6] मध्ये कथमन्यादृशं वपुः" इति ब्रह्मतर्के। "अनित्यत्वात्तु देहस्य [7]तस्य जन्मादिकं भवेत्। [8]मुक्तिप्रळयसम्बन्धे कथं जीवे तदिष्यते" इति च। "अनित्यस्य गुणा मध्ये भवेयुः स्वत एव तु। नतु स्वतस्तु नित्यस्य कादाचित्कगुणैर्युतिः" इति च ॥ * ॥

नवैकादश पञ्च त्रीन् भावान् भूतेषु येन वै।
[9]ईक्षतेऽन्वेकमप्येषु तज्ज्ञानं मम निश्चितम् ॥ १४ ॥

---

१ "प्रलये" इति प्र. पाठः। २ "तदेतस्य" इति प्र. पाठः प्रामादिकः।
३ "प्रलये" इति प्र. पाठः। ४ "किमु लयेऽप्यवि-" इति प्र. पाठः।
५ "आद्यन्तयोरनुगमादाद्यन्त-" इति प्र. पाठो न स्वरसः।
६ "आद्यन्ते भाविनो-" इति प्र. पाठः। ७ "तस्माज्जन्मादिकम्" इति क्वचित्।
८ "मुक्तिप्रलय-" इति प्र. पाठः। मुक्तिप्रळयाभ्यां सम्बन्धवति जीवे।

९ "ईक्षेताथैक-" इति प्र. पाठः। "ईक्षेतान्वेक-" इति च पाठान्तरम्। "नव विवक्षाभेदेन बुद्धिरहङ्कारश्चित्तं मूलप्रकृतिश्च भूतानि पञ्च च। एवं मनसा सह श्रोत्रादीनि एकादश। गुणाः सत्वादयस्त्रयः। शब्दादयः पञ्च। एवमष्टाविंशतिसंख्याकान् भावान् तत्वानि तत्तन्नियामकदेवैः सहितानि" इति यादवेन्द्रतीर्थाः। एतानि तत्वानि भूतेषु येनान्वीक्षते, अथचैष्वेकं प्रधानं तत्वेशं भगवन्तं येनान्वीक्षते तज्ज्ञानमिति निश्चय इति। अत्र मूले पञ्चेतिपदेन कर्मेन्द्रियविषयपञ्चकं ज्ञानेन्द्रियविषयपञ्चकं चेति पञ्चकद्वयं ग्राह्यम्। तेन त्रयस्त्रिंशत् तत्वानीत्येके व्याचक्षते।

[1]एतदेव हि विज्ञानं न तथैकेन येन यत् ।
[2]स्थित्युत्पत्त्यप्यया नः स्युर्भावानां त्रिगुणात्मनाम् ॥ १५ ॥

आदावन्ते च मध्ये च[3] यज्ज्ञं सृज्यं यदन्वियात् ।
पुनस्तत्प्रतिसङ्क्रामे यच्छिष्येत तदेव सत् ॥ १६ ॥

[4]एतदेव हि विज्ञानम् । तथाऽपि न तथैव[5]—

"ज्ञात्वा तत्वानि तेष्वीशं सर्वतत्त्वेश्वरं प्रभुम् । जानन् ज्ञानी भवेत् स्वस्य योग्यं ध्यानं[6] विशेषतः । पूर्वोक्त एव यो जानन् स विज्ञानी भवत्युत" इति प्रभासे ॥ * ॥

नः तत्वानां मध्ये येन यद् यत्र स्थित्वा च स्युः तदेव सत् ।

"सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णे नचापरे । अस्वातन्त्र्यात् [7]तदन्येषामसत्त्वं विद्धि भारत" इति भारते ॥ * ॥

---

१ "विज्ञानलक्षणमाह—एतदेवेति । तर्हि ज्ञानविज्ञानयोः को भेदः? आह—न तथेति । तथाऽपि ज्ञानविज्ञानयोरेकताप्राप्तावपि तथा तावन्मात्रं न विज्ञानम् । किन्तु स्वयोग्यबिम्बज्ञानलक्षणविशेषणान्तरविशिष्टमेव विज्ञानमित्यर्थः । ज्ञानलक्षणे स्वयोग्यध्यानलक्षणविशेषणाभावात् ज्ञानविज्ञानयोर्भेद इति भावः । तत्वेषु स्वतन्त्रास्वतन्त्रलक्षणो विशेषो वर्णितः । तत्र किं स्वतन्त्रमिति जिज्ञासायां तल्लक्षणमाह— एकेन । येनेति । नः तत्वानां मध्ये एकेन मुख्येन, सर्वशक्तीनां सत्त्वादिति भावः । येन तत्वेन यत् यत्र प्रकृतौ स्थित्वा, प्रकृतिक्षोभार्थमिति भावः । त्रिगुणात्मनां गुणात्मकप्रकृतिकार्याणां भावानां वस्तूनां कार्यकारणात्मनामित्यर्थः । स्थित्युत्पत्त्यप्ययाः स्युः क्रियन्ते, ज्ञं सर्वज्ञं यत् तत्त्वं सृज्यमुद्दिश्य आदौ सृष्टिसमये अन्वियात् कारणानि विवेश । कारणशक्तीनां फलौन्मुख्यार्थमिति भावः । मध्ये स्थितिकाले सृष्टमन्वियात् अनुप्रविशति । अन्ते अन्त्यकाले संहारार्थं सृष्टं रूपान्तरेणान्वियात् । पुनश्च सर्वकालेष्वित्यर्थः । अतो विरिञ्चादीनां न स्वातन्त्र्यमित्यर्थः । एवं गुणपूर्णत्वं प्रतिपाद्य निर्दोषत्वमप्याह—तत्प्रतिसङ्क्रामे प्रळयेऽपि यत् सर्वज्ञं शिष्येत विकाररहिततया वर्तते तत् सत् स्वतन्त्रतत्वमित्यर्थः" इति च । यच्च तत्वमादावन्ते सृष्टेः प्राक् प्रळयादूर्ध्वं मध्ये स्थितिकाले च ज्ञं सर्वज्ञं पुनस्तत्प्रतिसङ्क्रामे तस्य सृष्टस्य संहारे च सृज्यं जगदन्वियात् प्रविशति, यच्च शिष्येत, अवशिष्टमविनाशि तदेव सत् स्वतन्त्रम्" इति विजयध्वजीयम् ।

२ "स्थित्युत्पत्त्यप्ययान् पश्येद् भावानाम्" इत्यर्वाचीनाः ।

३ "मध्ये च सृज्यात् सृज्यम्" इति च । यज्ज्ञमिति प्राचीनपाठे यत् ज्ञमिति च्छेदः ।

४ "एतदेव च विज्ञानम्" इति प्र. पाठः । "एतदेव त्रिज्ञानम्" इति पाठान्तरम् ।

५ एकस्मिन् प्राचीनकोशे इदं वाक्यद्वयम्—"एतदेव हि विज्ञानं तथाऽपि न तथैव च" इति प्रमाणश्लोकभागत्वेन पठ्यते । तदा त्विदं प्रमाणवचनमेव ।

६ "ज्ञानम्" इति प्र. पाठः प्रामादिकः ।

७ "नचान्येषा–" इति प्र. पाठोऽपि प्रामादिक एव ।

[1]श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम् ।
प्रमाणेष्वनवस्थानाद् विकल्पात् स विरज्यते ॥ १७ ॥

विकल्पात् विरुद्धकल्पनात् ॥ * ॥

[2]धर्मो मद्भक्तिकृत् प्रोक्तो ज्ञानं चैकात्म्यदर्शनम् ।
गुणेष्वसङ्गो वैराग्यमैश्वर्यं चाणिमादयः ॥ २७ ॥

"एकः प्रधान[3] उद्दिष्टो विष्णोः प्राधान्यदर्शनम् । ऐकात्म्यदर्शनं प्रोक्तं सर्वज्ञानोत्तमं च तत्" इति त्रैकाल्ये ॥ * ॥

[4]दरिद्रो यस्त्वसन्तुष्टः कृपणो योऽजितेन्द्रियः ।
[5]गुणेष्वसक्तः स्ववशो गुणसङ्गो विपर्ययः ॥ ४४ ॥

"विषये दोषबुद्धिः सन्निन्द्रियाणां वशे स्थितः । कृपणः स तु सम्प्रोक्तो [6]गुणबुद्धिर्विपर्ययः" इति विवेके । "पुरुषार्थमतिर्यस्य विषयेष्वेव देहिनः । विपरीतः [7]स तु ज्ञेयः स्वात्मनो विपरीततः[8]" इति निवृत्ते ।

[9]वित्तासन्तोषमात्राद् दरिद्रः । सर्वविषयसङ्गी विपरीतः ॥ * ॥

इत्येकादशस्कन्ध एकोनविंशोऽध्यायः

---

१ "स्वतन्त्रास्वतन्त्रतत्वे प्रमाणमाह—श्रुतिरिति । पौरुषेयापौरुषेयागमविवक्षाभेदाच्चतुष्टयम् । चेतनमेकमेव तत्वमिति कश्चित् । अचेतनमेकमेव तत्वमित्यन्यः । एवमादिकुमतिनिरासायाऽह—प्रमाणेष्विति । उक्तेषु प्रमाणेषु अनवस्थानात् प्रतिपाद्यत्वेनोक्तमतानामभावात् विकल्पात् प्रमाणविरुद्धमतकल्पनात् सः प्रमाणैरर्थनिश्चयवान् ज्ञानी विरज्यते निवृत्तो भवति" इति यादवेन्द्रतीर्थाः ।

२ "इदानीं धर्मज्ञानार्थं शब्दार्थमाह—धर्म इति । मद्भक्तिकृत् निवृत्तधर्म इति भावः । ज्ञानशब्दार्थमाह—ज्ञानम् । विष्णुः सर्वेभ्यः प्रधान इति ज्ञानमैकात्म्यदर्शनम् । गुणेषु विषयेषु असङ्गः मनसः सक्तिराहित्यम्" इति च । "ऐकात्म्यदर्शनं सर्वत्र एकस्य निःसमानातिशयस्य कारणस्य आत्मनः परमात्मनः मम दर्शनम्" इति शुकदेवः । "सर्वेषामात्मनामेकेन परमात्मना आत्मवत्त्वदर्शनम्" इति सुदर्शनसूरिः ।

३ "प्रधानमुद्दिष्टो-" इति प्र. पाठः ।

४ "असन्तुष्टः दरिद्रः । वित्तासन्तोषमात्राद् दरिद्रः । विषयेषु दोषज्ञानेऽपि तद्भोक्ता कृपणः । विषयेष्वसक्तः स्ववशः समर्थ इत्यर्थः । विपर्ययः विषयेषु पुरुषार्थत्वबुद्ध्या भोक्ता विपरीतः असमर्थः बाल इत्यर्थः" इति यादवेन्द्रतीर्थाः ।

५ "गुणेष्वसक्तधीरीशो-" इति प्र. पाठः ।

६ विषये गुणबुद्धिः सन्निन्द्रियाणां वशे स्थित इत्यर्थः ।

७ "स विज्ञेयः" इति प्र. पाठः ।

८ स्वात्मनः विपरीतत्वादनर्थापादकत्वादित्यर्थः ।

९ वित्तेष्वलम्बुद्धिरहितो दरिद्रः । विषयेष्वलम्बुद्धिरहितो विपरीत इत्यर्थः । एतेन 'गुणेष्वसक्तः स्ववशः' इति

[विंशोऽध्यायः]

गुणदोषभिदादृष्टिर्नियमात् तेन हि स्वतः[1] ।
[2]नियमेनापवादश्च भिदाया इति हि भ्रमः[3] ॥ ५ ॥

॥ श्रीभगवान् ॥

[4]योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥ ६ ॥

निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु ।
तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कर्मिणाम्[5] ॥ ७ ॥

[6]यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥ ८ ॥

पूर्वोक्तस्ववशविपरीतो नात्रोच्यते । गुणेष्वसक्तः स्ववशश्चेत् गुणसक्तस्तद्विपरीत इति स्वतःसिद्धतयाऽवक्तव्यत्वात् । किन्तु स्वभावान्तरमिदम्, 'विपरीतं च सत्पते' इत्युद्धवप्रश्नस्योत्तरमित्युक्तं भवति । ननु क ईश्वर इति पृष्टम् । नतु कः स्ववश इति । कथं तस्येदमुत्तरं गुणेष्वसक्तः स्ववश इति? नैष दोषः । अर्थैक्यात् । यः स्वमात्मानं वशीकर्तुमीश्वरः स एव हि स्ववशो नाम ।

१ "–दृष्टिर्निगमात् ते नहि स्वतः" इति प्र. पाठः । २ "निगमेनाप–" इति च ।

३ "इति ह भ्रमः" इति च । "स्वतः प्रमाणेन तेन वेदेन नियमात् गुणदोषभिदादृष्टिः ज्ञानं जायते । त्वद्वचनेन तु गुणदोषभेदस्य अपवादः अभावः नियमेन प्रतिपाद्यते । इति वचनद्वये विरोधभावात् निमित्तात् मम भ्रमः अव्यवस्थितकोटिविषयकः संशयः । वचनस्यार्थविशेषाज्ञानादिति भावः" इति यादवेन्द्रतीर्थाः ।

४ "निःश्रेयसं प्रति श्रीनारायणप्रसादः परमसाधनम् । स च परमभक्त्या भवति । अतः प्रसादसम्पादको गुणः । तदन्यो दोषः । वेदोऽपि प्रसादसाधकातिरिक्तं गुणतया न प्रतिपादयतीत्याशयेनोपोद्घातमाह—योगास्त्रय इति । ज्ञानं कर्म निवृत्तधर्मः भक्तिश्चेति त्रयो योगा उपायाः । एतदन्यः परमप्रसादं प्रति उपायः नास्ति" इति च ।

५ "कामिनाम्" इति प्र. पाठः । "परमप्रसादं प्रत्यधिकारिणो दर्शयति—निर्विण्णानामिति । कर्मसु ज्योतिष्टोमादिषु निर्विण्णानां विरक्तानां सनकादीनां न्यासिनां ज्ञानलक्षणः योगः परमप्रसादं प्रति भक्तिसहितः उपायः । तेषु कर्मसु अनिर्विण्णचित्तानां आसक्तानां कर्मिणां विधिनियतानां मनुष्योत्तमानां कर्मलक्षणः यज्ञादिलक्षण-उपायः भक्तिसहितः प्रसादं प्रत्युपायः" इति च ।

६ "यदृच्छया ईश्वरेच्छया कर्मसु न निर्विण्णः यज्ञादिकर्मकर्ता, नातिसक्तः मनुष्यवत् कर्मबद्धो न भवतीत्यर्थः । मत्कथादौ जातश्रद्धः स्वतःप्राप्तश्रद्धः यः देवेशः अस्य देवेशस्य भक्तियोगः सिद्धिदः परमप्रसादसम्पादकः ।

"स्वतः सर्वगुणात्मा तु विष्णुरेकः सनातनः । [1]अन्यत् सर्वं तत्प्रियत्वाद् गुणो दोषस्तथाऽप्रियम् । [2]एवं ज्ञानवतो दृष्टिरज्ञस्तन्नावगच्छति । कालदेशविशेषेषु प्रीतिभेदमपेक्ष्य तु । अविज्ञानवतस्तस्य मर्यादा वेदतः कृता । गुणदोषभिदा नास्ति भगवत्प्रियमन्तरा[4] । गुणदोषदृशेर्दोषो ह्यन्यत्र भगवत्प्रियात् । [5]गुणाश्च दोषतामीयुर्दोषाश्च गुणतां क्वचित् । अतो दोषो न दोषः स्यान्न[6] गुणोऽपि गुणो भवेत् । भगवत्प्रीतिविज्ञानाद् गुणदोषभिदां यदि । पश्येत् तत्तु गुणायैव विपर्यासं न कारयेत् । गुणदोषभिदा क्वापि स्वातन्त्र्येण नतु[7] क्वचित्" इति ब्रह्मये[8] । "स्वतस्तु गुणदोषत्वदृशेर्भेदेन वस्तुतः । दोषोऽपि[9] गुण एव स्याद् भगवत्प्रीतितो

मनुष्याः कर्मबद्धाः कर्मयोगिन इत्युच्यन्ते । मनुष्येभ्यो ज्ञानाधिका ज्ञानयोगिन इत्युच्यन्ते । तेभ्यो भक्त्या अधिका भक्तियोगिन इति" इति च ।

१ ततः विष्णोरन्यत् सर्वमाविरिञ्चमन्ततो दोषात्मकमेवेति जगत्ययं गुणोऽयं दोष इति विभाग एव न सम्भवतीति तदुभयवर्जनमेव गुण इति परमार्थः । अथ जगत्यपि गुणदोषदृशिर्यदि कथञ्चिदिष्यते तथाऽपि यद् विष्णोः प्रीतिकरं स गुणः, यदप्रीतिकरं स दोष इत्येव व्यवस्था । नतु स्वस्य प्रियमप्रियं वा । ततः स्वदृष्ट्या तदुभयवर्जनं गुणः । श्रेयःप्रेयसोः श्रेय एव गुणो न प्रेय इत्यर्थः । अत एव मूले श्रेयोविधित्सयेत्युक्तम् ।

२ ननु विष्णोः प्रियमप्रियं वा ज्ञानी विजानीयात् । अज्ञस्तु कथम्? सत्यमुक्तम् । अथ तत्कृपयैव वेदाः प्रवृत्ता इत्याह – एवं ज्ञानवतो दृष्टिः । "ज्ञानवतां दृष्टिः" इति प्र. पाठः । यद्यप्यज्ञः विष्णोः प्रियमप्रियं वा स्वतो नावगच्छति । अतस्तस्य भगवद्विज्ञानविधुरस्य कृते प्रियाप्रियव्यवस्था वेदैः कृता । वेदेषु वा कृता । कालविशेषेषु देशविशेषेषु च पुरुषविशेषैरेवं करणीयम, तेन विष्णुः प्रीयते; एवमेवञ्च न करणीयम, यतस्तेन विष्णुर्न प्रीयत इत्यादि । तथाचाज्ञस्यापि विष्णुप्रियाप्रियत्वाभ्यामेव वेदतो विदिताभ्यां गुणदोषनिर्णय इति न कस्यचित्स्वरुचिः । स्वरुचिमात्रेण गुणदोषदृशिर्दोष एवेति भावः । ३ "भेदमवेक्ष्य" इति पाठान्तरम् ।

४ "भगवत्प्रीतिमन्तरा" इति क्वचित् । भगवत्प्रियमप्रियं चान्तरा विहायान्येन विधानेन गुणदोषभिदा नास्ति । अतः भगवत्प्रियादप्रियाच्चान्यत्र गुणदोषदर्शनाद् दोष एव भवति । तस्मात् "गुणस्तूभयवर्जनम्" इति सूक्तम् ।

५ "गुणा यद् दोषता–" इति प्र. पाठः । क्वचित् कोशेषु च तथा । एतदेवोक्तमन्यत्रापि—"धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत" इत्यादि । कविवचनं चात्र भवति—"विषमप्यमृतं क्वचिद् भवेदमृतं वा विषमीश्वरेच्छया" इति । ६ "स्यादगुणोऽपि" इति प्र. पाठः प्रामादिकः ।

७ "नहि क्वचित्" इति प्र. पाठः । ८ "ब्रह्मनये" इति च ।

९ "वस्तुनाम् । दोषोऽथ" इति पाठान्तरम् । प्र. पाठोऽपि तथा । तदयं प्रमाणवचनार्थः–नहि स्वेच्छामात्रेण गुणदोषव्यवस्था शक्यं कर्तुमित्युक्तम् । तत् कुतः? आह–स्वतस्तु । स्वरुचिमात्रेण गुणदोषत्वदर्शनात् यतः दोषोऽपि गुण एव स्यात् । गुणश्च दोष एव स्यादित्यपि वक्तव्यम् । तदपि कुतः? भेदेन वस्तुतः । वस्तुषु रुचिभेदेन । कस्यचिदप्रियमेव कस्यचित् प्रियम् । तद् यथा पयः प्रियमनामयस्य । अप्रियमामयाविनः । कारवेल्लस्य काटवात् कश्चित् प्रीयते । कश्चिन्नासां सङ्कोचयति । तथाच कस्यचिद् दोषोऽप्यन्यस्य गुण एवेति गुणदोषव्यवस्थैव न स्यात् ।

94

गुणः । दोषस्तु तद्वैपरीत्यादिति दृष्ट्या भवेद्गुणः । कालदेशविशेषेण प्रीत्यज्ञानाज्जगत्स्थितेः[1] । मर्यादा गुणदोषाणां कृता वेदेषु 'सर्वशः'' इति परायणे ।

[3]एतदेवोच्यते –

''स्वेस्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः । विपर्ययस्तु दोषः स्यादुभयोरेष निर्णयः'' इति[4] ॥ * ॥

''सनकाद्या ज्ञानयोगा भक्तियोगास्तु देवताः । मानुषाः कर्मयोगाश्च[5] त्रिधैते योगिनः स्मृताः । सर्वेषां सर्वयोगैश्च प्राप्या मुक्तिर्न संशयः । तथाऽपि तु विशेषेण सस तेषां विधीयते । भगवद्गुणानुसारेण वेदार्थो नीयते हि यैः । भक्तियोगास्तु ते प्रोक्तास्तादृशा हि सुराः[6] सदा । अङ्गानुसारिवेदार्थं ज्ञात्वा तदनुसारतः । भगवद्गुणा यैर्नीयन्ते ते प्रोक्ता ज्ञानयोगिनः । कर्माणि शास्त्रतो ज्ञात्वा तत्प्राधान्यानुसारतः । विज्ञाता यैर्गुणा विष्णोर्ज्ञेयास्ते कर्मयोगिनः । [7]भक्तिर्ज्ञानं च किञ्चित्तु पश्चात् तेष्वपि जायते । तथाऽपि[8] कर्मयोगास्ते कर्मपूर्वत्वकारणात् । [9]भगवद्गुणरागित्वमधिकं भक्तियोगिनाम् । तस्मात् तेऽभ्यधिका ह्येषु देवा एव विशेषतः । ईषद्वैराग्यमन्यत्र[10] पूर्वं देवेषु जायते । पश्चाद् विरागोऽप्यधिको[11] देवानां नात्र संशयः । ज्ञानाधिक्यं तु देवानां भक्त्याधिक्यं तथैव च । [12]विरागोऽप्यधिकस्तेषां सदैव सनकादिनाम्[13] । ज्ञानाधिक्या-

---

अथच वस्तुतः दोषोऽपि गुण एव स्यादिति वाक्यान्तरमवान्तरम् । यो भगवदप्रियत्वेन वस्तुतो दोष एव सोऽपि तामसस्य प्रिय इति गुण एव स्यात् । एवं गुणोऽपि दोषः स्यात् । उभयथाऽपि न व्यवस्थाबीजम् । तर्हि किमन्ततो गुणदोषयोर्व्यवस्थापकम्? आह–भगवत्प्रीतितो गुणः, दोषस्तु तद्वैपरीत्याद् भगवदप्रीतित इति । एवं भगवत्प्रीत्यप्रीतिभ्यामेव गुणदोषदृष्ट्या स्वतो गुणदोषदृष्टिवर्जनादुभयवर्जनं नाम गुणो भवेदिति ।

१ अज्ञानां कालदेशविशेषेण भगवत्प्रियाप्रियाज्ञानात् अज्ञजगतः स्थितेः कृते भगवत्प्रियाप्रियानुसारेण गुणदोषाणां मर्यादा वेदेषु कृता ।

२ ''सर्वदा'' इति प्र· पाठः ।

३ नन्वयमर्थो बलादाकृष्यते । न भागवते दृश्यते । मैवम् । यत उत्तरत्र भागवतेऽप्येतदेव स्फुटमुच्यत इत्याह—एतदेवोच्यते । ''स्वेस्वेऽधिकारे'' (२०–२६) इत्यस्मिन्नेवाध्याये कृष्णेनाप्ययमर्थः स्फुटमुच्यते । तथाच स्वाधिकारनिष्ठा भगवत्प्रिया, स्वयोग्यतातिक्रमो भगवदप्रिय इति ह्यन्ततो वेदानामपि परमार्थः । तथा चाग्न्याधानादिर्गृहस्थस्य गुणः । स एव यतेर्दोष इत्यादि ज्ञेयम् ।

४ ''इति च'' इति कोषेषु पाठान्तरम् । प्र. पाठोऽपि तथा ।

५ ''कर्मयोगास्तु'' इति प्र. पाठः ।

६ ''तादृशास्तु सुराः'' इति पाठान्तरम् ।

७ ''भक्तिर्ज्ञानं तु किंचित्तु'' इति क्वचित् ।

८ ''तथाऽपि ते कर्मयोगाः कर्मपूर्वत्व–'' इति प्र. पाठः ।

९ ''भगवद्गुणानुरागित्व–'' इति प्र. पाठः । ''भगवद्गुणानुसारित्व–'' इति क्वचित् पाठान्तरम् ।

१० ''ईषद्वैराग्यमल्पं तु'' इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

११ ''विरागोऽभ्यधिको–'' इति प्र. पाठः ।

१२ ''विरागोऽभ्यधिकस्तेषाम्'' इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

१३ सनकादीनां मनुष्येभ्यो ज्ञानाधिक्यात् ते ज्ञानयोगिनो भवन्त इत्युत्तरान्वयः ।

न्मनुष्येभ्यो भण्यन्ते ज्ञानयोगिनः । नतु ज्ञानाधिकास्ते वै देवेभ्यस्तु कथञ्चन । देवनामपि कर्मित्वं विद्यते यद्यपि स्फुटम् । तथाऽपि [1]प्रत्यवायित्वान्मनुष्याः कर्मयोगिनः । त्रियोगाभ्यधिको ब्रह्मा सर्वेभ्यः परमो विभुः । महायोगेश्वरेशेशस्तस्माद् ब्रह्मा चतुर्मुखः[2]" इति त्रियोगे ॥ * ॥

नृदेहमासाद्य सुदुर्लभं च यः[3]
प्लवं सुकल्यं[4] गुरुकर्णधारम् ।
मयाऽनुकूलेन नभस्वतेरितं
[5]पुमान् भवाब्धिं न तरेत् स मार्गणः ॥ १७ ॥

मार्गणवच्छरीरान्ते पतति ॥ * ॥

[6]कर्मणां जात्यशुद्धानामनेन नियमः कृतः ।
गुणदोषविधानेन त्वंहसां त्याजनेच्छया ॥ २७ ॥

स्वतोऽशुद्धानां कर्मणामनेन गुणदोषविधानेन नियमः कृतः । स्वतोऽशुद्धत्वेऽपि कर्मणां विध्यनुसारेणानुष्ठाने गुणत्वमेवेत्यर्थः ॥ * ॥

---

१ देवानामकरणे प्रत्यवायो नास्ति । मनुष्याणामस्तीति ते प्रत्यवायिनः ।

२ त्रियोगाधिकारात् महायोगाः देवाः । तेषामीश्वर इन्द्रः । तस्यापीशा गरुडशेषरुद्राः । तेषामपीशो ब्रह्मा चतुर्मुख इति ।

३ "नृदेहमाद्यं सुलभं सुदुर्लभम्" इति प्र. पाठः । ४ "सुकल्पम्" इति पाठान्तरम् ।

५ "पुमान् भवाब्धिं न तरेत् स आत्महा" इति च । "पुमान् भवाब्धेर्न तरेत् स मार्गणः" इति विजयध्वजीयाद्यभिमतः पाठः । "सुकल्यं अत्यन्तं दृढं यौवनसम्पन्नत्वादिति भावः । गुरुः धर्मज्ञानाद्युपदेष्टैव कर्णधारः यस्य तम् । अनुकूलेन ज्ञानादिसम्पादने प्रेरणाकर्त्रा । नभस्वान् तत्वदेवता मुख्यवायुस्तेन ईरितम् । नृदेहलक्षणं प्लवं नावं सुदुर्लभमपि मया आसाद्य यदृच्छया प्राप्य यः पुमान् भवाब्धेः, भवः सम्भवः दुःखसन्ततिसम्भव एव अब्धिः तं न तरेत् सः मार्गणवत् इषुरिव । इषुर्यथा वेगेनोर्ध्वं गच्छन् वेगापगमे गौरवादधः पतति तथा चेतनः ज्ञानविशेषेण ऊर्ध्वलोकप्राप्तौ देहलक्षणपुष्कळकारणवानपि विषयभोगप्राप्तज्ञानतिरोधनेन विकर्मणा देहनाशेऽधः पततीत्यर्थः" इति यादवेन्द्रतीर्थाः । "मयाऽनुकूलेन नभस्वता वायुनेरितं नृदेहं प्राप्य यः पुमान् भवाब्धेर्मध्यं न तरेत् स मार्गण इति लुप्तोपमा । वेगाख्यसंस्कारनाशे शरवत् शरीरनाशे अधः पततीत्यन्वयः" इति विजयध्वजीयम् ।

६ "जात्या पशुसोमयागत्वादिना अशुद्धानां विष्णुप्रीत्यर्थमकरणे हिंसारूपत्वादिना शुद्धिरहितानां अनेन स्वर्गादिजनकत्वलक्षणगुणदोषविधानेन प्रवृत्तिनिवृत्तिनियमः कृतः देवेन सम्पादितः । ज्ञानसम्पादने कौशलरहि-

[1]भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि ॥ ३१ ॥

हृदयग्रन्थिरन्तःकरणाख्यो बन्धः ॥ * ॥

[2]तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ।
[3]न ज्ञानान्नच वैराग्यात् प्रायः श्रेयो भवेदिह ॥ ३२ ॥

मद्भक्तियुक्तस्य भक्त्यनुसारिज्ञानवैराग्ये विनाऽन्यस्माज्ज्ञानाद् वैराग्याच्च न श्रेयो भवेत् ।

"रागिणोऽपि विमुच्यन्ते देवा नास्त्यत्र संशयः । रागापनोदनार्थं च ज्ञानं साध्यं यतीश्वरैः" इति च । स्मर्तव्या विषये दोषा यतिभिर्नतु दैवतैः । हरिरेव सदा पूज्य इत्यर्थं दैवतैरपि[4]" इति च ।

वैराग्यार्थमपि विषयदोषादिज्ञानं सनकादीनां भाव्यम् । देवानां तदपि भगवद्भजनस्यैव सारतापरिज्ञानार्थमेवेत्यर्थः ॥ * ॥

तानां बालानामिति भावः । नियमकरणस्य प्रयोजनमाह—अंहसामिति । अंहसां स्वेच्छया व्यर्थहिंसाकरणानां त्याजनेच्छया नियमः कृतः । कर्मणामशुद्धत्वेऽपि बालानां विध्यनुसरणं गुणः । ज्ञानाकुशलान् प्रति विष्णुप्रीतिसम्पादकत्वं गुणः तदसम्पादकत्वं दोष इति वेदः प्रतिपादयति । अतो न विरोध इति भावः" इति यादवेन्द्रतीर्थाः ।

१ "हृदयस्य ग्रन्थिः अन्तःकरणाख्यो बन्धः । रजस्तमोभागावित्यर्थः । ध्यानोत्कर्षेण अखिलात्मनि चेतनदेहाद्यन्तर्यामिणि मयि दृष्टे सत्येव। क्षीयन्ते सर्वाण्यनभिमतकर्माणि अश्लेषादिलक्षणं क्षयं यान्तीत्यर्थः" इति यादवेन्द्रतीर्थाः । "हृदयग्रन्थिरज्ञानम्" इति पञ्चरात्रेषु ।

२ "अवतारापरोक्षस्य असुरेष्वपि सत्त्वात् तेषां पापक्षयः कस्मान्न भवति? आह—तस्मादिति । मदात्मनः मां ध्यायतः वैराग्याद् भक्तिप्रासात्, भक्तिप्रासादपरोक्षाच्च श्रेयः कर्मक्षयादिनिःश्रेयसं इह मनुष्यदेहे भवेत् । प्रायः प्रारब्धलक्षणप्रतिबन्धाभावे [इत्यर्थः । भक्तिरहितात् ख्यातिलाभपूजार्थं सम्पादितात् वैराग्यात् ज्ञानाच्च श्रेयो न भवेदित्यर्थः । तस्मात् साधनेषु भक्तिः प्रधानमिति भावः" इति च । तस्मादित्यादि पूर्वार्धमेकं वाक्यमुत्तरार्धं चापरम् । मद्भक्तियुक्तस्य योगिनः ज्ञानाद् वैराग्याच्च श्रेयो भवेदिति वर्तते । उत्तरार्धे तद्विपर्ययमाह—भक्तिरहितस्य तु केवलाज्ज्ञानाद् वैराग्याद् वा न श्रेयो भवेदिति । "भक्तेरन्यनिरपेक्षत्वादन्यस्य च भक्तिसापेक्षत्वाद् भक्तियोग एव श्रेष्ठः" इति श्रीधरस्वामी । "मय्यात्मा चित्तं यस्य स मदात्मा" इति च । "अहमात्मा आश्रयो यस्य स मदात्मा" इति शुकदेवः ।

३ "न ज्ञानं नच वैराग्यम्" इति प्र. पाठः ।

४ यथा ज्ञानयोगिनां सनकादीनां विषयदोषज्ञानं ततो वैराग्यं च मोक्षार्थमपेक्षितं न तथा भक्तियोगिनां देवानाम् । तेषां स्वस्वपदरागेऽपि तद्भोगेष्ववैराग्येऽपि मोक्षस्यानपायात् । एतमर्थविशेषं सूचयितुं न ज्ञानान्नच वैराग्यादिति मूलं प्रवृत्तमिति भावः । भक्त्युपयुक्तं ज्ञानं वैराग्यं च तेषां स्वत एव सिद्धम् ।

सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ।
[1]स्वर्गापवर्गं मद्धाम कथञ्चिद् यदि वाञ्छति ॥ ३४ ॥

[2]न किञ्चित् साधवो धीरा भक्ता ह्येकान्तिनो मम ।
वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम् ॥ ३५ ॥

[3]नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमकल्मषम्[4] ।
तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ॥ ३६ ॥

[5]न मय्येकान्तभक्तानां गुणदोषोद्भवा गुणाः ।
साधूनां समचित्तानां बुद्धेः परमुपेयुषाम् ॥ ३७ ॥

[6]रागिणोऽपि ते भक्तियोगिनो भक्तिफलत्वेन किमपि नापेक्षन्ते ।

---

१ "अन्यो भक्तः कदाचित्, कथञ्चित् लज्जापुरःसरम्, भक्तस्य पुरुषार्थापेक्षा लज्जाकारणमिति भावः, मद्धाम स्वर्गं अपवर्गादिकं वा वाञ्छति तत् सर्वं अञ्जसा प्रतिहतिं विना लभते" इति यादवेन्द्रतीर्थाः ।

२ "एकः परमात्मैव मम परमाभीष्टमिति अन्तः निर्णयः येषां ते एकान्तिनस्तु किञ्चिदप्यभीष्टं, दुःखचिन्तादेः पुनर्नाशानन्तरमपि भाव उत्पत्तिः, तद्रहितं अपुनर्भवं (कैवल्यमपि) न वाञ्छन्ति । कुतो वाञ्छाभावः? भक्त्या । तेषां परमात्मनि परमादरेण पुरुषार्थे उपेक्षेति भावः । यद्यपि न वाञ्छन्ति, अथापि मया दत्तं कैवल्यं गृह्णन्ति मयि गौरवादिति भावः" इति च । "मया दत्तमपि न गृह्णन्ति, किं वक्तव्यं न वाञ्छन्तीति" इति श्रीधरस्वामिव्याख्यानं चिन्त्यम् ।

३ "तस्मात् अधिकारविशेषात् निराशिषः कैवल्यसुखमप्यनपेक्षमाणस्य भक्तिः परमासक्तिः भवेत् । तस्माद् भक्तिविशेषात् नैरपेक्ष्यं स्वत एव सदा प्राप्तं निःश्रेयसं श्रेयस्सु श्रेष्ठं अकल्मषं प्रारब्धासहचरितं परं पूर्णं सुखं भवतीति प्राहुः" इति यादवेन्द्रतीर्थाः । नैरपेक्ष्यं निरपेक्षैः प्राप्यम् । मोक्षेच्छुभिः प्राप्यादपि मोक्षसुखात् तदनपेक्षैः प्राप्यं सुखं परममाहुः । तस्मात् निराशिषः सुकृतफलत्वेन ऐहिककामभोगमप्यनिच्छतः, मे मम सकाशादपवर्गेऽपि निरपेक्षस्यैव मे मम भक्तिः परा भवेदिति । ४ "–मनल्पकम्" इति प्र. पाठः ।

५ "ननु देवादीनां सदसद्विषयभोक्तृत्वात् कथमेकान्तभक्तत्वमिति जिज्ञासायामाह—न मयि । गुणेभ्यः सात्विकविषयेभ्यः दोषेभ्यः राजसतामसविषयेभ्यः उद्भवाः गुणाः हर्षशोकादयः मय्येकान्तभक्तानां न सन्ति । तत्र निमित्तमाह—बुद्धेः प्राकृतान्तःकरणात् परं विलक्षणं स्वरूपमुपेयुषां साक्षात्कृतवतां समचित्तानां गुणदोषानुभवादौ समम्, समे सर्वत्र एकरूपे मयि वा, चित्तं येषां ते, तेषाम् । विधिबन्धरहितानां दोषो नेति भावः" इति यादवेन्द्रतीर्थाः । "गुणा विषयाः गुणदोषोद्भावका न भवन्ति" इति विजयध्वजीयम् । "गुणदोषैर्विहितप्रतिषिद्धैरुद्भवो येषां ते गुणाः पुण्यपापादयः" इति श्रीधरस्वामी । "बुद्धेः प्रकृतेः परं परमात्मानमाप्तुकामानाम्" इति च व्याचक्षते ।

६ देवा यद्यपि स्वर्गादिषु रागिणः । स्वर्गाद्यर्थं असुरनिग्रहादिषु प्रयतनात् । तथाऽपि ते भक्तिफलत्वेन स्वर्गादिकं नापेक्षन्त इति न कामिन इत्यर्थः ।

"यदि दद्याद् भक्तियोगफलं मोक्षमपीश्वरः। भक्तियोगफलत्वेन न तद् गृह्णीयुरेव ते। कामिनोऽपि स्वयं कामान् भुञ्जते न फलात्मना। तस्माद् विरागेऽप्यधिका देवा एव हि[1] तादृशाः" इति च ॥ * ॥

"उत्तमो भक्तियोगस्तु ज्ञानयोगस्तु मध्यमः। अधमः कर्मयोगश्च ब्रह्मैको मुख्यभक्तिभाक्। ज्ञानमभ्यधिकं[2] तेषां नियतं भक्तियोगिनाम्। उदेति भगवद्भक्त्या तद्वन्न ज्ञानयोगिनः। [3]भक्त्यंशकं यतो ज्ञानं ज्ञानस्नेहात्मिका हि सा[4]। तथाऽपि ज्ञानयोगित्वं मानुषज्ञानतोऽधिकम्। भक्तियोगे ततो यत्नः कार्यो विद्वद्भिरञ्जसा" इति च ॥ * ॥

इत्येकादशस्कन्धे विंशोऽध्यायः

[एकविंशोऽध्यायः]

शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु।
द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभे[5] ॥ ३ ॥

भूम्यम्ब्वग्न्यनिलाकाशा भूतानां पञ्च धातवः।
आब्रह्मस्थावरादीनां [6]शरीरा आत्मसंयुताः ॥ ५ ॥

---

१ "देवा अपि हि" इति क्वचित्। २ "ज्ञानमप्यधिकम्" इति प्र. पाठः।

३ माहात्म्यज्ञानपूर्वो हि स्नेहो भक्तिः। तेन ज्ञानं भक्त्यंशः। तेन यत्राधिका भक्तिस्तत्र ज्ञानमपि नियमेनाधिकम्। नहि भक्तिर्ज्ञानांशः। तेन ज्ञानयोगिनां न भक्त्याधिक्यनियम इति भावः।

४ "-स्नेहात्मिका च सा" इति प्र. पाठः।

५ "शुभाशुभौ" इति पाठान्तरम्। "पञ्चभूतात्मकत्वेन समानेषु एकविधेष्वपि वस्तुषु यागोपयुक्तेषु शुभाशुभसंज्ञोपेते शुद्ध्यशुद्धी ईश्वरसान्निध्य(विशेषतदभाव)लक्षणौ गुणदोषौ च विधीयेते श्रुत्या स्मृत्या च। किमर्थम्? द्रव्यस्य यागीयद्रव्यादेः विचिकित्सार्थम्। उपादेयत्वानुपादेयत्वयोः ज्ञानार्थमित्यर्थः। ज्ञात्वाऽनुष्ठाने फलाधिक्यादिति भावः" इति यादवेन्द्रतीर्थाः। तथाच नात्र विचिकित्सा नाम संशयः। किन्तु विमर्शः। "विचिकित्सा इदं योग्यमयोग्यं वेति सन्देहः। तन्निवर्तनार्थम्। मशकार्थो धूम इतिवत्" इति विश्वनाथचक्रवर्ती। इदमपि युज्यते। "संशयार्थं गुरोर्वचः" इति हि तत्वनिर्णये। संशयनिवृत्त्यर्थमिति तदर्थ इति नरहरितीर्था अप्याहुः।

६ "शारीरा-" इति प्र. पाठः।

[1]भेदेन नामरूपाणि विषमाणि समेष्वपि ।
[2]धातुशुद्धया विकल्प्यन्त एतेषां स्वार्थसिद्धये[3] ॥ ६ ॥

विवेकेन नैपुण्याधिक्यं भवतीति विचिकित्सार्थं गुणदोषौ विधीयेते ।

"पञ्चभूतात्मकत्वेन समता सर्ववस्तुषु । हरिसन्निधिवैशेष्याद् विशेषश्च महान् सदा" इति वैशेष्ये ॥ * ॥

धातुः परमेश्वरः ।

"यद्यद् हरेः[4] सन्निहितं तत्तच्छुद्धतरं मतम् । स्वतः शुचितमो विष्णुः [5]सान्निध्यं च स्वभावतः" इतिच ।

एतेषां जीवानाम् ॥ * ॥

[6]कृष्णसारोऽथ देशानां ब्राह्मणानां शुचिर्भवेत् ।
कृष्णसारोऽप्यसौवीरकीकटासंस्कृतेरिणः[7] ॥ ८ ॥

---

१ "वेदेन" इति च ।

२ "धातुशूद्धव कल्प्यन्ते" इति प्र. पाठः । "धातुशुद्धयै विकल्पन्ते" इति प्राचीनकोशे पाठान्तरम् । विजयध्वजीयेऽप्येवम् । "धातुः परमेश्वरः तस्य सन्निधानविशेषात् शुद्धयै असन्निधानविशेषादशुद्धयै च" इति हि तद्व्याख्यानम् ।

३ "भूम्यम्बग्न्यनिलाकाशा इति भूतानां ये पञ्चधातवः कार्यभागाः ते आब्रह्म ब्रह्मपर्यन्तं ये स्थावरादिजीवाः तेषां ये शरीराः देहाः ते च सर्वे चेतनास्तत्सम्बन्धिनश्च आत्मसंयुताः परमात्मसंयुताः । एवं चेत् सर्वं वस्तु सर्वैरुपादेयं प्रसज्येतेत्याशङ्कयाऽऽह—धातुशुद्धया । धातुः परमेश्वरः । तेन प्राप्तया शुद्धया नामानि दधि मधु घृतमापो धान्यं तण्डुल इत्यादीनि, रूपाण्याकृतयः विषमाणि स्वरूपाणि च भेदेन विकल्प्यन्ते प्रतिपाद्यन्ते । एवं भेदवर्णनस्य प्रयोजनमाह-एतेषां ब्रह्मादीनां स्वार्थाः श्रौतस्मार्तादिधर्माः । तेषां सिद्धये" इति यादवेन्द्रतीर्थाः । 'स्वार्थसिद्धये स्वस्वयोग्यपुरुषार्थसिद्धये" इति विजयध्वजीयम् ।

४ हरेः सन्निहितं सन्निधानयुक्तम् । हरेरिति तृतीयार्थे वा षष्ठी । हरिणा सन्निहितम् । यथायथाऽतिशयेन सन्निहितं तथातथा शुद्धतरं भवेत् ।

५ ननु तर्हि सान्निध्यवैषम्येण विष्णोरपि वैषम्यं स्यात् । यद्यविषमः, अविशेषेण सन्निहितः स्यात्? नेत्याह—सान्निध्यं च स्वभावतः । तत्तदभिमानिदेवानां स्वभाव एव हि वस्तूनां स्वभावो नाम । यथाऽग्नेर्दाहकत्वम् । स च तत्तद्देवानां स्वाभाविको गुण इति तत्तदनुसारेण तत्रतत्र सन्निधत्त इति न वैषम्यम् । येषामधिगुणः स्वभावस्तत्राधिकं सन्निधत्ते । तेन ते शुद्धतरा भवन्ति । अत एव "तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः" इत्यादिवचनानि भवन्ति ।

६ "अकृष्णसारो देशानामब्रह्मण्योऽशुचिर्भवेत्" इति प्र. पाठः ।

७ "-तेरिणम्" इति च । "नद्यादिरहितानां देशानां मध्ये कृष्णसारमृगेणाध्युषितः देशः शुचिः । कृष्णसारा-

"नदीसमुद्रगिरय आश्रमाश्च वनानि च। [1]नगराणि च दिव्यानि [2]साळग्रामादयस्तथा। तेषां समीपगाश्चैव देशा योजनमात्रतः। कर्मण्यास्तु समाख्यातास्तदन्ये कीकटाः[3] स्मृताः। तदन्येऽपि तु ये देशाः कृष्णसारोषिताः स्वतः[4]। कर्मण्या एव विज्ञेया[5] यदि नाध्युषिताः खलैः। खलैरध्युषिताश्चापि यदि सद्भिरधिष्ठिताः। कर्मण्या इति विज्ञेया विष्णुलिङ्गानि[6] यत्र च" इति स्कान्दे। "आन्तरः[7] सन्निधिर्विष्णोर्बाह्यसन्निधिरेव च[8]। द्विविधः सन्निधिः प्रोक्तः कृत्रिमो बाह्य उच्यते। स्वाभाविकस्त्वान्तरः स्यात् प्रतिमाजीवगो यथा[9]" इति च॥ * ॥

ध्युषितोऽपि वक्ष्यमाणदेशभिन्न एव शुचिः, न सर्व इत्याह— असौवीरेति। ऊषरप्रचुरः ईरिणः। लावणिक उपद्वीपो वा। सौवीरदेशः कीकटदेशः असंस्कृतदेशः ईरिणदेशश्च एतद्भिन्नः असौवीरकीकटासंस्कृतेरिणः कृष्णसारेण संश्रितो देशः शुचिर्गुणवान् प्रशस्तः शुद्ध इत्यर्थः" इति यादवेन्द्रतीर्थाः। अत्र मूले क्वचित् "ईरिणः" इति, क्वचित् "ईरणः" इति पठ्यते। विजयध्वजीयेऽपि ईरणपदमेव दृश्यते। लिपिकृत्प्रमादः स्यात्। अत्र सौवीरः सौराष्ट्रदेशः। कीकटः 'बिहार' इतीदानीं प्रसिद्धः। "बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति" इति श्रवणात्। असंस्कृतो म्लेच्छदेशादिः। कृष्णसार इति मत्वर्थीयः। कृष्णसारः कृष्णसारवान् देश इत्यर्थः। "कृष्णः कृष्णमृगः सारः श्रेष्ठो यत्र स देशः कृष्णसारः" इति च श्रीधरस्वामी। वस्तुतस्तु अयं तात्पर्यानुगुणः श्लोकार्थः-कृष्णसारोऽथ। अथशब्दो माङ्गलिकतामाह। स्वतः कृष्णसारोषितत्वेन यो माङ्गलिको देशः स ब्राह्मणानां कर्मकरणाय शुचिर्भवेत्। विषयान्तरारम्भार्थश्चायमथशब्दः। नदीसमुद्रादिपर्यन्तभूमिः साळग्रामादिपुण्यक्षेत्राणि च ब्राह्मणानां शुचिर्देश इति तावत् स्वतः सिद्धम्। अथ शुचि देशान्तरं वक्तुमारभते--कृष्णसारोऽथ। नदीसमुद्रादिभिन्नोऽपि कृष्णसारोषितश्चेत् शुचिरेवेत्यर्थः। तस्य पुनरपवादमाह— कृष्णसारोऽपि। सौवीरः कीकट इति न देशविशेषविवक्षया। किन्तूपलक्षणार्थम्। सद्भिरनधिष्ठितोऽधर्मबहुलः प्रदेश इति निर्गलितोऽर्थः। तथाऽसंस्कृतः संस्कारहीनैः खलैरधिष्ठितः प्रदेशः। ईरिणं यत्र यज्ञोपयोगि न किञ्चित् प्ररोहति, एतेषु कथञ्चित् कृष्णसारवासेऽपि न शुचित्वमिति।

१ दिव्यानि नगराणि मधुरादीनि।

२ "शालग्रामादय–" इति प्र· पाठः। स्वयंव्यक्तभगवत्सन्निधानानि साळग्रामादीनि क्षेत्राणि। तदुक्तम्— "आद्यं स्वयंव्यक्तमिदं विमानं रङ्गसंज्ञितम्। श्रीमुष्णं वेङ्कटाद्रिश्च साळग्रामश्च नैमिशम्। तोताद्रिः पुष्करं चैव नरनारायणाश्रमम्। अष्टौ मे मूर्तयः सन्ति स्वयंव्यक्ता महीतळे" इत्यादि।

३ तथाच कीकटशब्दः न मगधकळिङ्गादिदेशविशेषवाची। किंन्तु सामान्यतोऽकर्मण्यदेशवाचीत्युक्तं भवति। प्रकृते तु सौवीरकीकटशब्दावाहत्योपलक्षणतयाऽकर्मण्यं नदीपर्वतादिस्वभावशुद्धादन्यं देशं वदत इति भावः।

४ "–सारोषितास्ततः" इति क्वचित्।

५ "एव ते ज्ञेया–" इति प्र. पाठः।

६ विष्णोर्लिङ्गानि प्रतिमादीनि यत्र तानि विष्ण्वायतनानि।

७ "अन्तरः" इति क्वचित्।

८ ".–बाह्यः सन्निधिरेव च" इति च क्वचित्।

९ "–जीवगौ तथा" इति च। प्रतिमागतो बाह्यः सन्निधिः। आवाहनादिसापेक्षः। जीवगत आन्तरः सहजः।

क्वचिद् गुणोऽपि दोषः स्याद् दोषोऽपि विधिना गुणः ।
गुणदोषार्थनियमस्तद्भिदामेव[1] बाधते ॥ १६ ॥

तद्भिदामेव । न तिर्यगादीनाम् ।

"वर्षाच्चतुर्दशादूर्ध्वं[2] ये न विदुः शुभाशुभम् । तेषामज्ञानजो दोषः सुमहान् कर्मजादपि । तिरश्चामिन्द्रियासक्तेर्न[3] दोषोऽज्ञानजो भवेत् । गुणोऽपि नैव कश्चित् स्याद् यतो ज्ञानबहिष्कृताः" इति च ।

अतो मूर्खाणामदोष इति न ॥ * ॥

समानकर्माचरणे[4] [ऽ]पतितानां न पातकम् ।
औत्पत्तिको गुणैः[5] सङ्गो न शयानः पतत्यधः ॥ १७ ॥

---

१ "–स्तद्भिदामेव" इत्यर्वाचीनाः । "एकत्रापि द्रव्यादौ गुणदोषव्यवस्था देशकालवर्णाश्रमादिव्यवस्था वा ईश्वरसन्निधानविशेषभावाभावाभ्यां ज्ञातव्येत्याह—क्वचित् । गुणोऽपि गुणत्वेन सम्मतोऽपि अविधिना आश्रमाद्यनुसारिविधिं विना दोषो भवति । परधर्मो भयावह इति भावः । दोषोऽपि दोषत्वेन सम्मतोऽपि विधिना गुणः । एवं गुणदोषयोः अर्थेषु द्रव्येषु नियमः तद्भिदां आश्रमादिव्यवस्थया परमात्मसान्निध्यविशेषभावाभावविदामेव भवति । तदवित्त्वं तु गुणमपि बाधते । अतो मूर्खाणां गुणोऽदोषो नेत्यर्थः । अथवा गुणादिनियमः तद्भिदां मनुष्याणाम् । कर्मणि षष्ठी । मनुष्यान् बाधते । ज्ञानायोग्यान् पशून् न बाधत इत्यर्थः । अतः कर्मादिस्वरूपविशेषाज्ञानं निषिद्धकरणादपि महान् दोष इति भावः" इति यादवेन्द्रतीर्थाः ।

२ "–र्दशादूर्ध्वाः" इति क्वचित् ।　　　　　　३ "–याशक्तेर्न" (?) इति क्वचित् ।

४ "–चरणम्" इति प्र. पाठः ।

५ "गुणः सङ्गो–" इति च । "एतदेवोदाहरणेन सन्दर्शयति—समानेति । समानकर्माचरण इत्यस्याऽवृत्तिः । समानं स्ववर्णाश्रमोचितं कर्म तस्याऽचरणे सति पूर्वमपतितानां प्रमादेन प्राप्तं पातकं न भवति । कुत इत्यत आह—समानकर्माचरण इति । समानस्य तत्पापनिवर्तने समर्थस्य कर्मणः प्रमादप्रायश्चित्तस्याऽचरणे पातकं न भवतीत्यर्थः । ब्राह्मणादितरेण ब्राह्मणापेक्षया निषिद्धस्य करणेऽपि न दोष इति एकस्यैव दोषत्वादोषत्वे दर्शयति—औत्पत्तिकः वर्णादिप्राप्तः लशुनभक्षणादिभिः गुणैः सङ्गः, अतः शयानः अवैष्णवः शूद्रः न पतति लशुनभक्षणेन पापवान् न भवति । तस्मात् श्रीहरीच्छयैव गुणदोषव्यवस्थेति भावः" इति यादवेन्द्रतीर्थाः । अत्र तन्त्रन्यायेन पतितानामिति अपतितानामिति च च्छेदः । पूर्वमपतितानामकस्मात् प्रमादात्कृतपापानां तेन च पतितानां तत्समानस्य तत्परिहारायोग्यस्य प्रायश्चित्तरूपस्य कर्मण आचरणे सति न पातित्यमिति हृदयम् । स पूर्वमिवापतित एव सन् वैदिककर्मयोग्यो भवतीत्येतत् । गुणैः सङ्ग इति विषयसङ्ग इत्यर्थः । "गुणा गुणेषु वर्तन्ते" इत्यादिप्रयोगात् ।

95

समानकर्माचरणे। आत्मयोग्यकर्माचरणे। पूर्वमपतितो येन पतति [प्रायश्चित्तत्वेन[1]] तत्समान-कर्माचरणेऽपि[2] न दोषः। तप्तसुरापानवद्[3] देहत्यागिनः। तथा शयानः शूद्रोऽपि न पतति लशुनभक्षणादिभिर्ब्राह्मणादिपातकैः[4]। औत्पत्तिको यतस्तस्य तादृशो गुणसङ्गः। अतः स्वायोग्य एव कर्मणि पतति।

"त्रैवर्णिकाः सञ्चरन्तो वेदकर्मप्रवर्तनात्। शयानः शूद्र उद्दिष्टो वेदकर्माप्रवेशनात्[5]। न तस्याभक्ष्यजो दोषः[6] शुश्रूषायां प्रवर्ततः। यथा सुवर्णस्य मलं शुक्लं ताम्रस्य[7] नैव तत्। एवं विप्रादिदोषैस्तु न शूद्रो दोषितामियात्। मलं तु तस्यापि मलं यथैवं शूद्रजन्मनः। 'स्वधर्मप्रतिरूपस्याऽचरणं[8] दोषदं मतम्" इति समयाचारे[10]।
"[11]शूद्रस्यापि हरेर्दीक्षां प्रविष्टस्य तु विप्रवत्। अभक्ष्यादिकृतो दोषः स हि शूद्रो हि मुख्यतः" इति विष्णुतन्त्रे॥ * ॥

---

१ [ ] एतच्चिह्नान्तर्गतं क्वचित् कोशेषु न पठ्यते। अत्रापि तत्समानमिति तद्योग्यं कर्मेत्यर्थः। प्रायश्चित्त-रूपतया तत्परिहाराय कर्तुं योग्यमिति यावत्।

२ यथाऽकृतपातकानां न दोषः, तथा प्रायश्चित्तरूपसमानधर्माचरणे सति अकस्मात् कृतपातकानामपि न दोष इत्यपेरर्थः। इदं यादवेन्द्रतीर्थाभिमतम्। अथ चार्थान्तरम्— येन कर्मणा पतितो भवति तत्परिहाराय प्राय-श्चित्तत्वेन तत्सदृशकर्माचरणेऽपि तस्य पुनः पातकान्तरं न भवति, किन्तु पातकात्यय एव भवति। तत्र दृष्टान्त-माह—तप्तसुरापानवत्। पूर्वमपतितस्य प्रमादात् कृतसुरापानस्य ततश्च पश्चात्तापदग्धस्य तत्प्रायश्चित्तार्थं तप्तसुरा-पानेन देहं जिहासोः तत् तप्तसुरापानं सुरापानत्वेन पूर्वकृतप्रमादसमानमपि न पातकं किंन्तु पातकाद् विशो-धकं यथा तथेत्यर्थः। "प्रायः पापं समुद्दिष्टं चित्तं तस्य विशोधनम्" इति हि स्मरन्ति। एवं आत्महत्या यद्यपि दोषः तथाऽपि सुरापानप्रायश्चित्तत्वेन तप्तसुरापानेन देहत्यागो न दोषः, तद्वत् प्रायश्चित्तत्वेन समानकर्माचरणे-ऽपि सर्वत्र न पातकम्। तथाच क्वचिद् गुणोऽपि दोषः दोषोऽपि विधिना गुण इति पूर्वोक्तं विवृतं भवति। सुरा-पानं यद्यपि दोषः तथाऽपि प्रायश्चित्तत्वेन देहत्यागे विहितत्वाद् गुण एवेत्यादि।

३ "तप्तसुरापानाच्च देहत्यागिनः" (?) इति क्वचित् पाठः। अर्थस्तु न स्फुटः। "सुरापानं सकृत् कृत्वा योऽग्निवर्णां सुरां पिबेत्। स पावयत्यथाऽऽत्मानमिह लोके परत्र च" इति भारते (शां. ३५–३६)।

४ "–भक्षणादिब्राह्मणादिपातकैः" इति क्वचित्। ५ "वेदकर्माप्रवर्तनात्" इति प्र. पाठः।

६ ब्राह्मणादीनां यदभक्ष्यं तद्भक्षणजो दोष इत्यर्थः।

७ "–शुल्बं ताम्रस्य" इति प्र॰ पाठः प्रामादिकः। "शुक्लं ताम्रस्य" इति केचित् पठन्ति। अयमर्थः— शुक्लं तगरम्, 'तवर' इति भाषान्तरम्। तत् सुवर्णस्य मलम्। नहि तगरलिप्तं सुवर्णं ग्राह्यं भवति। तदेवान्तस्तगरेण लिप्तं ताम्रं पाकादिषु प्रशस्ततरं भवति। यतस्ताम्रकिट्टं पाकदूषकं तगरेण निवार्यते। शुक्लापरनाम्ना तगरेण ताम्रपात्रलेपः 'कलायि' इति भाषायां प्रसिद्धः। एवं ब्राह्मणस्य यदपवित्रं तच्छूद्रस्यापि तथेति न नियम इति।

८ "सद्धर्म–" इति क्वचित्।

९ "–रूपस्य चरणम्" इति प्र. पाठः। क्वचित् कोशेषु च।

१० "इति च समाचारे" इति प्र. पाठः। "इति समाचारे" इति क्वचित्। "इति च समयाचारे" इति क्वचित्।

११ "शूद्रस्यापि–" इत्यादिविष्णुतन्त्रवचनं क्वचित् न पठ्यते। "समाचारे" इत्यनन्तरं "सर्वतोऽप्यमिमान–" इत्याद्युत्तरपद्यतात्पर्यमेव पठ्यते।

[1]यतोयतो निवर्तेत विमुच्येत ततस्ततः ।
एष धर्मो नृणां क्षेमः शोकमोहभयापहः ॥ १८ ॥

सर्वतोऽप्यभिमानविमोकेन [2]परमेश्वरसमर्पणमेव दोषहानिदमित्याह—यतोयत इत्यादिना ।

"मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा" इत्यादेश्च ॥ *॥

विषयेषु गुणध्यानात्[3] पुंसः सङ्गस्ततो भवेत् ।
[4]सङ्गादेव भवेत् कामः कामादेव कलिर्नृणाम् ॥ १९ ॥

कलेर्दुर्विषहः क्रोधस्तमस्तदनुवर्तते[5] ।
तमसा ग्रस्यते पुंसश्चेतना व्यापिनी द्रुतम् ॥ २० ॥

[6]तया च रहितः साधो जन्तुः शून्याय कल्प्यते[7] ।
ततोऽस्य स्वार्थविभ्रंशो[ऽ]मूर्च्छितस्य मृतस्य च ॥ २१ ॥

विषयाभिनिवेशेन नाऽत्मानं वेद नापरम् ।
वृक्षजीविकया जीवन् व्यर्थं भस्त्रेव यः श्वसन्[8] ॥ २२ ॥

---

१ "यतः यस्मिन् कर्मणि निवर्तेत अहमेव कर्तेत्यभिमानान्निवर्तेत ततः कर्मणः विमुच्येत । भगवति एषः अहङ्कारादित्यागः नृणां चेतनानां परमधर्मः । क्षेमः सौख्यसन्ततिकरः । अनिष्टनिवर्तकश्चेत्याह— शोकमोहेति । दुष्कर्मनिवर्तकापरोक्षपुरःसरं आत्यन्तिकक्षेमसम्पादकश्चेति भावः" इति यादवेन्द्रतीर्थाः ।

२ "परमात्मसमर्पण-" इति प्र. पाठः ।

३ "गुणाध्यासात्" इति प्र. पाठः ।

४ "सङ्गात् तत्र भवेत्" इति च ।

५ "-स्तमनुवर्तते" इति च ।

६ "तया विरहितः" इति च ।

७ "कल्पते" इति च ।

८ "व्यर्थं ग्रस्तवयाः श्वसन्" इति पाठान्तरम् । अयमेव च पाठः विजयध्वजीयादिसर्वव्याख्यानसम्मतः । किन्तु "दृतिवत् प्रश्वसित्यपि" इति तात्पर्यानुसारात् "भस्त्रेव यः श्वसन्" इत्येव पाठः समादृतः । यादवेन्द्रतीर्थास्तु ग्रस्तवया इति भस्त्रेवेति पदद्वयमपि व्याचक्रुरिति कस्तदभिमतः पाठ इत्यन्ततोऽप्यनिर्णय एव । तथाहि तद्व्याख्यानम्—"गुणध्यानात् सुखसाधनत्वानुसन्धानात्, ततः अहङ्कारादितः सङ्गः विषयसुखासक्तिः । कामः विषयसङ्ग्रहेच्छा । कलिः विषयविघटनादिना । कलेः सम्बन्धात् मर्मप्रहतवचनेभ्यः दुर्विषहः तूष्णीमवस्थानविघटक इत्यर्थः । तदनु सत्सु विषये क्रोधमनु तमः पञ्चपर्वाविद्याभागः अनुवर्तते अभिवृद्धं भवति । तमसा चेतना सुखानुभवशक्तिः व्यापिनी ज्ञानवत् व्याप्तिसम्पन्नाऽपि ग्रस्यते प्रतिबध्यते, मणिना वह्निदाहकशक्तिवत् । हे साधो कल्याणगुण उद्धव । तया सुखानुभवशक्त्या रहितः जन्तुः चेतनः शून्याय अनुभूयमानसुखराहित्याय

"दोषिणो[1] गुणवत्त्वेन श्रूयन्ते विषयाः सदा । असतां सङ्गतेस्तेषु[2] दोषाः श्रोतुं सुदुर्लभाः । अतो नित्यगुणध्यानात् [3]तद्गुणे प्रीतिमान् भवेत् । अतस्तत्र भवेत् कामः कामिनं कलिराविशेत् । [4]अधर्माज्ञानरूपेण कलिनाऽऽविष्टदेहिनः । सत्सु क्रोधो दुर्विषहस्ततस्तमसि पात्यते । [5]अन्धे तमसि मग्नस्य चेतनेन्द्रियसन्तता । [6]सुखानुभवशक्तिर्या सा विनश्यति सर्वदा । तदा शमूनभावेन[7] शून्य इत्युच्यते नरः । सर्वा-

---

कल्प्यते सुखराहित्येन क्लृप्तो भवतीत्यर्थः । ततः चेतनाराहित्येन अस्य संसारिणः स्वार्थस्य हरिध्यानादेः विभ्रंशश्च यदा ततः सुखानुभवशक्तिः प्राचुर्येण नश्यति । सदा मूर्छितस्य दुःखमग्नस्येत्यर्थः, मृतस्यापि तथैव । तस्माद् विवेकवता विषयविरागो महान् सम्पादनीय इति भावः । अन्यथा तु विषयासक्त्या महापातकसम्पादनपुरस्सरं दुःखसन्ततिरनिवर्त्या भवतीत्याह—विषयाभिनिवेशेन । दुःखाख्यविषयावेशेन वृक्षजीविकयेव जीवन् तमसा आत्मानमन्तर्यामितया कदाऽपि न वेद । अपरं तद्भक्तांश्च न वेद । व्यर्थं ज्ञानादिसम्पादनं विना ग्रस्तवयाः दुःखग्रस्तायुः श्वसन् दुःखानुभवेन श्वासं विसृजन् वर्तते भस्त्रेव कारुकस्य चर्मदृतिवत्" इति । अस्मिन् पक्षे कलिरिति कलहः । "अधर्माज्ञानरूपेण कलिना" इति तात्पर्यानुरोधेन विजयध्वजीयेऽन्यथा व्याख्यातम्—"कल द्रावण इति धातोः चेतनधर्मज्ञानद्रावणहेतुरधर्माज्ञानात्मा कलिः" इति । क्रोध इति कलहनिमित्तो द्वेष इत्यर्थः । तम इत्यन्धन्तम इत्यपि ।

१ दोषिणः पुरुषस्य असतां सङ्गतेः सदा सुलभत्वात् दोषिणः विषयाः गुणवत्त्वेन श्रूयन्ते । यतः सतां सङ्गस्तैर्विषयाणां दोषश्रवणं च सुदुर्लभमिति भावः ।

२ तेषु विषयेषु । तेषु असत्सु असत्समाजे विषयाणां दोषा इति वा ।

३ सङ्गशब्दार्थमाह– तद्गुणे प्रीतिमान् । तेषां विषयाणां गुणे तादृशारोपितगुणके विषये च प्रीतिः सङ्ग इति ।

४ "अधर्मज्ञानरूपेण" इति प्र. पाठः प्रामादिकः । अज्ञानादेव धर्मविरोधी सत्सु कलिः कलहः प्रवर्तत इति अधर्माज्ञानरूपेण कलिनेत्युक्तम् ।

५ अन्धयतीत्यन्धे तमस्यविद्यायामिति यादवेन्द्रतीर्थसम्मतोऽर्थः । तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्रश्चेति पञ्चविधेष्वविद्यापर्वसु इति यावत् । पञ्चकष्टे, नित्यनरके इत्यन्ये । "तमस्तु शार्वरं विद्यान्मोहश्चैव विपर्ययः । तदाग्रहो महामोहस्तामिस्रः क्रोध उच्यते । मरणं त्वन्धतामिस्रमविद्या पञ्चपर्विका" इति हि स्मर्यते । तदर्थस्तु श्रीपद्मनाभतीर्थभट्टारकैरभिहितः— "शर्वरीभवतमःसदृशं जीवेश्वरवैलक्षण्याज्ञानाख्यं तम एकम् । जीवेश्वराभेदज्ञानाख्यो विपर्ययापरपर्यायो मोह एकः । तदाग्रहो महामोहः सम्मोहापरपर्याय एकः । जीवेश्वराभेदनिराकर्तृषु क्रोधस्तामिस्र एकः । जीवेश्वरभेदवादिभिः सह मरणपर्यन्तविग्रहोऽन्धतामिस्र एक इत्यविद्या पञ्चपर्विका" इति ।

६ व्यापिनी चेतनेत्यस्य व्याख्यानम्--"इन्द्रियसन्तता सुखानुभवशक्तिः" इति ।

७ शमिति मान्तमव्ययं सुखवाचि । शमूनं यस्य स शमूनः । सुखहीनः । तस्य भावेन सुखहीनत्वेन हेतुनेत्यर्थः । नरः शून्य उच्यते । वर्णलोपेन शमून एव शूनः । शूनस्य भावः शून्यम् । शून एव वा शून्यः । सुखस्य ऊनं ऊनत्वं हीनत्वमर्हतीति वा शून्यः ।

त्मना तु [1]शम्भ्रंशस्तस्य [2]दुःखविवर्धनः। [3]अमूर्च्छितस्यैव भवेन्मृत्यनन्तरमेव च। [4]दुःखाख्यविषयावेशान्नाऽत्मानं परमेव च। यथावद् वेत्ति पतितस्तमस्यन्धे कदाचन। [5]वृक्षवद् वृश्च्यते नित्यं [6]निष्प्रयोजनजीवनः। नित्यदुःखपरीतायुर्दृतिवत्[7] प्रश्वसित्यपि" इति तन्त्रभागवते।

[8]स्वार्थस्य सुखस्य भ्रंशो विपरीतमतिशयेन जनयतीति स्वार्थविभ्रंशः ॥ * ॥

---

१ "संभ्रंश-" इति प्र. पाठः प्रामादिकः। स्वार्थस्य विष्णुध्यानादिजन्यस्य सुखस्य भ्रंश इति स्वार्थविभ्रंशपदं विवृतं भवति।

२ न केवलं भ्रंशः किन्तु विभ्रंश इति मूले उपसर्गयोगेन सूचितमर्थमाह—दुःखविवर्धनः।

३ मरणपर्यन्तं नित्यं दुःखमूर्छितस्य, मृतस्य च पुनर्मृत्यनन्तरं तु अमूर्छितस्यैव दुःखविवर्धनः स्वार्थभ्रंश इत्यर्थः। एतेन मूले मूर्छितस्यामूर्छितस्येति द्वेधा च्छेदः सूचितः। देहबद्धो हि दुःखातिरेके मूर्छामापद्यते। येन दुःखानुभवमपि न स्मरति। तथाच यावज्जीवं दुःखभरेण पुनःपुनर्मूर्छामापद्यते। दुःखह्रदनिमग्नत्वेन मूर्छित इव निश्चेष्टितो जीवतीत्यर्थः। अथच मरणानन्तरं दुःखविस्मरणहेतुर्मूर्छाऽपि दुर्लभा। स्वरूपदेहेन नित्यं यातनामनुभवन्नपि न विसंज्ञतामापद्यत इति भावः।

४ विषयाभिनिवेशेनेत्यस्यार्थमाह—दुःखाख्यविषयावेशात्। तमसि नित्यं दुःखमनुभवन्नपि न कदाचित् पश्चात्तापेन तप्यते। किन्तु स्वानुभवविषये दुःख एवाभिनिविष्टो भवति। तदुक्तं विष्णुपुराणे—"भ्रान्तिज्ञानावृताक्षाणां दुःखमेव सुखायते" इति। एतादृशस्तामसः नात्मानं न परं वेद। स्वपरविषयकयथार्थज्ञानविधुरो भवतीत्येकोऽर्थः। अथच आत्मानं परमात्मानमपरं तद्भक्तगणं च प्रियत्वेन यथावत् कदाऽपि न वेद किन्तु नित्यं द्वेष्ट्येवेत्यर्थः। अथवाऽत्मानं परमात्मानं ततोऽपरं विलक्षणं जीवं च यथावन्न वेद। परमात्मानमन्तर्यामित्वेन पूर्णत्वेनापरं च जीवं नियम्यत्वेनापूर्णत्वेन च न वेदैव।

५ वृक्षजीविकया जीवन्नित्यस्यार्थः—वृक्षवद् वृश्च्यते नित्यम्। यथा वृक्षः परशुना इध्मार्थिभिर्वृश्च्यते छिद्यते तथा तमोगश्चेतनो वायुगदया यमकिङ्करैश्च पोथ्यते खण्डशश्छिद्यते चेत्यर्थः।

६ व्यर्थं जीवन्नित्यस्यार्थः– निष्प्रयोजनजीवनः। तत् कुतः? यतः नित्यदुःखपरीतायुः। मूले ग्रस्तवशा इति पाठे तस्य विवरणमिदम्।

७ भस्त्रेव यः श्वसन्नित्यस्यार्थः—दृतिवत् प्रश्वसित्यपि। दृतिः, 'तिदि' इति भाषायाम्। निष्प्रयोजनजीवनत्वादेव दृतिवत्।

८ स्वार्थविभ्रंश इति मूले वीत्युपसर्गेण लब्धमर्थविशेषं स्वपदेन वर्णयति—स्वार्थस्य सुखस्य। स्वार्थस्य विशेषेण भ्रंशो हि स्वार्थविभ्रंश.। तत्र सुखभ्रंशे को नाम विशेषः। आह—विपरीतमतिशयेन जनयतीति। तथाच सुखविपरीतस्य दुःखस्यातिशयेन जननमेवात्र विवक्षितो विशेषः। तथाच दुःखातिशयानुभवविशिष्टो भ्रंशो विभ्रंश इत्यर्थः। यद्वा दुःखं तदतिशयः तद्वैशिष्ट्यं चेत्येतत् सर्वं वीत्येकेनैवाक्षरेण तन्त्रन्यायेन लभ्यत इत्याह—विपरीतम्। वीति विपरीतमित्येकोऽर्थः। वीति विशेषतोऽतिशयेनेत्यपरोऽर्थः। तज्जनकतया तद्विशिष्ट इत्यपरः। तथाच वि विशेषतः, अतिशयेनेति यावत्, वि स्वार्थविपरीतेन दुःखेन विशिष्टः भ्रंशः स्वार्थविभ्रंश इति। तदेतत् "सर्वात्मना तु शंभ्रंशस्तस्य दुःखविवर्धनः" इति प्रमाणलब्धम्।

फलश्रुतिरियं नृणां नः[१] श्रेयोरोचनं परम् ।
[२]श्रोतुर्विवक्षया प्रोक्तं यथा भैषज्यरोचनम्[३] ॥ २३ ॥
उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु[४] च ।
आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु ॥ २४ ॥
[५]न तानविदुषः स्वार्थं भ्राम्यतो व्रजिनाध्वनि[६] ।
कथं युञ्ज्यात् पुनस्तेषु तांस्तमो विशतो बुधः[७] ॥ २५ ॥

तस्मात् स्वर्गादिविषयेष्वपि नेच्छेत्[८] । [९]फलश्रुतिरेवेयं न कामकुसुमश्रुतिः[१०] ॥ * ॥

---

१ "न श्रेयो रोचनम्" इत्यर्वाचीनाः । २ "श्रेयोविवक्षया" इति प्र. पाठः ।

३ "इयं फलश्रुतिः । मोक्षफलश्रावकत्वेन चरितार्थत्वात् । न स्वर्गादिकुसुमश्रुतिः" इति विजयध्वजीयम् । "ननु यदि विषयरागेण महान् दोषः तदा स्वर्गादिविषयोक्तिः कथमिति पुनर्जिज्ञासायामाह—फलश्रुतिरियम् । नः अस्मत्सकाशात् यच्छ्रेयो मोक्षाख्यं तदेव रोचयति । निःश्रेयसं प्रति रोचनं प्रीतिजनिका । अन्तराळगतोऽपि स्वर्ग एवंविधः । किमु साक्षात्फलरूपो मोक्ष इति रोचको वेदः (साक्षात् फलश्रुतिः) इति भावः । ननु भक्तानां वेदादौ किमर्थमनाकाङ्क्षितस्वर्गाभिधानम्? आह— श्रोतुः । ईषदुत्तमस्य श्रवणादौ प्रवृत्तस्य मनुष्याधिकारिणो विवक्षया । तस्य विहितं कर्म कर्तव्यमिति रोचयितुं बालस्येव तस्य स्वर्गादिफलं दर्शनीयमित्याह—यथा । भैषज्ये औषधदानकर्मणि रोचनमौषधग्रहणे रुच्युत्पादकं इक्षुदण्डादिप्रदर्शनं यथा तथा स्वर्गादिफलोक्तिः" इति यादवेन्द्रतीर्थाः ।

४ "कामेषु पश्वादिषु । प्राणेषु आयुरिन्द्रियबलवीर्यादिषु । स्वजनेषु पुत्रादिषु" इति श्रीधरस्वामी । "कामाः स्वर्गादयः पश्वादयश्च" इति शुकदेवः ।

५ स्वार्थं स्वहितमविदुषः अजानतस्तान् मर्त्यान् अनर्थहेतुषु वेदो न युञ्ज्यात् । तमो विशतः अविद्यानिमग्नान् तेन च नरकाद्यनर्थं भजमानान् तान् मर्त्यान् बुधः जानन् वेदः कथं युञ्ज्यात् । वञ्चको हि स स्यात् । स्वार्थमविदुषः स्वर्गादिफलप्रेप्सया नतान् प्रह्वान् कथं बुधो वेदः युञ्ज्यादित्येकवाक्यतयाऽपि व्याचक्षते ।

६ "वृजिनाध्वनि" इति पाठान्तरम् ।

७ "यांस्तमो विशते बुधः" इति यादवेन्द्रतीर्थसम्मतः पाठः । तथाहि तद्व्याख्यानम्–"साधून् प्रति स्वर्गादिप्रवचनं न प्रवृत्तमित्याह— उत्पत्त्यैव हीति । स्थूलदेहोत्पत्त्यैव । व्रजिनाध्वनि पापमार्गे भ्राम्यतः तान् मनुष्योत्तमान् अनर्थहेतुषु स्वर्गादिविषयेषु न युञ्ज्यात् न प्रेरयेत् । बुधः विवेकी वेदः यान् स्वर्गादिकामान भुञ्जन् तमः विशते श्रीहरिस्मरणरहितो भवति तेषु कामेषु सुजनं कथं युञ्ज्यात् । स्वप्रयोजनं परप्रयोजनं वा नास्तीति भावः" इति ।

८ "नेच्छेत" इति प्र. पाठः । क्वचित् कोशेष्वपि तथा । स्वर्गादिविषयेष्वपि, द्वितीयार्थे विषयसप्तमीयम् । स्वर्गादीनपि न कामयेदित्यर्थः ।

९ प्र. पाठे तु इदं वाक्यं "फलस्य श्रुतिरेवेयं न कामकुसुमश्रुतिः" इत्युत्तरत्रोदाहरिष्यमाणप्रमाणश्लोकभागतया पठ्यते । तत्पक्षे तु इदमपि तन्त्रभागवतवचनम् ।

१० क्वचित् कोशेषु "न कुसुमश्रुतिः" इतीयदेव पठ्यते ।

"[1]स्वर्गादिकामनायुक्तस्त्वैहिकेष्वपि सज्जते । तत्रापि देवकामेभ्यो विशेषं चापि वाञ्छति[2]। ततस्तमसि पातः स्यादतो वेदः कथं हि तान्। काम्यत्वेनाभिचक्षीत सर्वं जानन्[3] स्वयं सदा" इति च[4]॥ * ॥

नः श्रेयोरोचनम्। अस्मत्सकाशाद्[5] यच्छ्रेयो मोक्षाख्यं तदेव रोचयति फलश्रुतिः। [6]कुसुमस्यानित्यतादिदोषज्ञानान्मोक्षस्यादोषताज्ञानाच्च[7]। ईषदुत्तमस्य श्रोतुर्विवक्षया। बुधो वेदः कथं युञ्ज्यात्? [8]अन्तराळागतोऽपि स्वर्ग एवंविधः, किमु साक्षात् फलरूपो मोक्ष इति रोचकः। [9]अनेकब्रह्मकालप्राप्यत्वान्मोक्षस्य तावन्तं कालं तप एव कर्तुं न शक्यत इति मन्दाधिकारिणां [10]स्वर्गादिष्वभिरुचिर्भवति। तान् प्रत्यन्ते मोक्ष एव भवति। [11]अन्तरालेऽप्येवंविधं स्वर्गादिकं सुखं भवति। तस्माद् विहितं कर्म कर्तव्यमिति रोचयति। उत्तमानां तु यस्मादेतादृशम[12]नित्यत्वादिदोषवत् स्वर्गादिकं तस्मान्मोक्षफल एव वेद इति दर्शयति। नहि सर्वप्रमाणोत्तमो वेदोऽल्पफले पर्यवसितः।

"मन्दाधिकारिणां नित्यं तपसैव प्रतीक्षितुम्[13]। मोक्षो न शक्यतेऽधैर्यात् ततः स्वर्गादिकं भवेत्। स्वर्गादिष्वल्पफलतां ज्ञापयित्वा विमोक्षदम्। [14]ज्ञानं वक्तुं तूत्तमानां नित्यो वेदः प्रवर्तते। इक्षुदण्डं ददानीति यथा भैषज्यरोचनम्। एवं मन्देषूत्तमेषु मोक्षमाहात्म्यमुच्यते। नह्यल्पफलभाग् वेदो[15] वासुदेवैकसंश्रयः" इति विचारे॥ * ॥

---

१ स्वर्गादिकं कामयन् अन्ततः ऐहिककामेष्वपि सज्जते। न केवलमेतावत्। किन्तु तत्र स्वर्गेऽपि देवभोगेभ्योऽप्यधिकं भोगं प्रेप्सति। एवं विषयप्रसङ्गेन तमःपातहेतुरेवेति स्वर्गादिष्वपि नेच्छां कुर्यादित्यर्थः।

२ "चाभिवाञ्छति" इति प्र. पाठः। "वाऽभिवाञ्छति" इति क्वचित्।

३ बुध इत्यस्य व्याख्यानम्—सर्वं जानन् वेद इति। अभिमानिविवक्षयेदम्।

४ प्र. पाठेऽत्र 'च'कारो न पठ्यते।

५ "–सकाशाच्छ्रेयो–" इति प्र. पाठः।

६ कथं मोक्षमेव रोचयति ज्योतिष्टोमादिना स्वर्गादिवाचिनी श्रुतिः? आह—कुसुमस्य। कुसुमस्थानीयस्य स्वर्गादेरित्यर्थः। ज्ञानादिति ल्यब्लोपनिमित्ता पञ्चमी। स्वर्गादिकुसुमस्य अनित्यतादिदोषज्ञानं मोक्षाख्यफलस्यादोषताज्ञानं च सम्पाद्य श्रोतुरधिकारिण इत्यर्थः। वेदपुरुषस्य स्वर्गादेरनित्यताज्ञानात् मोक्षस्यादोषताज्ञानाच्च कथमेवं सर्वं जानन् बुधो वेदः स्वर्गादिषु युञ्ज्यादिति च व्याचक्षते।

७ "–स्यादोषत्वज्ञानाच्च" इति प्र. पाठः।

८ "अन्तरालागतो–" इति च। कुसुम इवान्तराळागतः फलोद्गमे स्वयं नष्टः।

९ देवाद्यपेक्षयेदम्। मनुष्याणां त्वेकस्मिन्नेव मोक्षनियमात्। यद्वा ब्रह्मकाल इति ब्रह्मणो दिनमुच्यते।

१० "स्वर्गादिष्वप्यभि–" इति पाठान्तरम्। प्र. पाठोऽपि तथा।

११ "अन्तरालेऽप्येवंविधस्वर्गा–" इति प्र. पाठः।

१२ "–दृशमप्यनित्य–" इति पाठान्तरम्। प्र. पाठोऽपि तथा।

१३ अनेकब्रह्मकालं प्रतीक्षापूर्वकं प्राप्तुमित्यर्थः।

१४ "एवं वक्तुं तूत्तमानाम्" इति प्र. पाठः प्रामादिकः। "वेदं वक्तुम्" इति क्वचित्।

१५ "वेदा वासुदेवैकसंश्रयाः"(?) इति क्वचित्।

"[1]अयोग्यभार्यापुत्रादिकामिताऽनर्थसाधनी[2]। योग्यकामाद्धरेः प्रीतिरतो ब्रह्मादयोऽमलाः। भार्यापुत्रादिसंयुक्ता वासुदेवमुपासते" इति च ॥ * ॥

एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः ।
फलश्रुतिं कुसुमितामवेदज्ञा[3] वदन्ति हि ॥ २६ ॥

एवं वेदव्यवसितम्[4]। फलश्रुतिं कुसुमिताम् । फलं मोक्षस्तद्विषयां श्रुतिं स्वर्गादिकुसुमविषयां वदन्ति ।

"[5]नित्यानन्दहरेर्भक्तिज्ञानाद्याः स्वर्गशब्दिताः[6]। पुत्रभार्याप्तवित्ताद्यं[7] सर्वं मोक्षगतं फलम् । उद्दिश्य स्वर्गकामस्य यजनं श्रुतिचोदितम् । तदविज्ञाय पुष्पाख्यमनित्यं स्वर्गमिच्छवः । यजन्ति मन्दमतयो वेदवादपरायणाः" इति च । "स्त्रीभिर्वा यानैर्वा ज्ञाति-

---

१ ननु गृहस्था एव देवाः क्षत्रियर्षभाश्च मोक्षयोग्याः श्रूयन्ते । तत् कथम् "आत्मनोऽनर्थहेतुषु स्वजनेषु" इत्युच्यते ? आह—अयोग्येत्यादि ।

२ "–साधिनी" इति प्र. पाठः ।

३ "कुसुमितां न वेदज्ञा–" इति प्र. पाठः । "तामसानां वेदार्थनिश्चयमाह—एवं व्यवसितमिति । कुबुद्धयः कुत्सितस्वरूपज्ञानाः एवं व्यवसितम्, स्वर्गशब्दस्य परमसुखमर्थः, नतु वैषयिकसुखे तात्पर्यमिति ज्ञानिनां निश्चयमविज्ञाय फलश्रुतिं मोक्षविषयां श्रुतिं कुसुमिताम्, अल्पत्वात् कुसुमसदृशं यत् स्वर्गादिसुखं तद्विषयां अवेदज्ञाः वेदार्थज्ञानरहिताः सन्तो वदन्ति" इति यादवेन्द्रतीर्थाः । "वेदस्यैवमुक्तं व्यवसितं निश्चयम्" इति विजयध्वजीयम् । तात्पर्यानुगुणोऽयमर्थः । "व्यवसितं वेदस्याभिप्रायम्" इति श्रीधरस्वाम्यादयः । य एवं वदन्ति ते अवेदज्ञा इति वा ।

४ "वेदस्य व्यवसितम्" इति प्र. पाठः ।

५ "नियानन्दो हरे–" इति प्र. पाठः । "नित्यानन्दो हरेर्भक्तिर्ज्ञानाद्याः" इति क्वचित् । नित्यानन्दस्य हरेर्भक्तिज्ञानाद्याः वेदेषु स्वर्गपदेनोच्यन्ते "स्वर्गकामो यजेत" इत्यादिषु । सुखेन वरः स्वः, नित्यानन्द इति यावत् । तद्वाः तद्विषयाः भक्तिज्ञानाद्याः स्वर्गशब्दिताः । स्वः सुखरूपं परमात्मानं गमयतीति वा स्वर्गः । स्वःपदाभिधेन भगवता गम्यते प्राप्यत इति स्वरूपसुखमपि स्वर्गपदार्थः । तदेतदादिपदोदितम् ।

६ "स्वगसंज्ञिताः" इति क्वचित् ।

७ नन्वस्तु स्वर्ग इति भक्तिर्ज्ञानं मोक्षो वा । "नहास्य प्रजा क्षीयते" इति पुत्रादिकमपि फलत्वेन श्रूयते । तत् कथं मोक्षपरता ? आह —पुत्रभार्याप्तवित्ताद्यम् । एतादृशो ज्ञानी गृहस्थश्चेत् मोक्षेऽपि पुत्रादिभिः सहैव मोदत इत्येव तत्राप्यर्थः । नतु सांसारिकपुत्रादिमात्रविषया श्रुतिः । "स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वा" इति श्रुत्यन्तरे स्फुटं मोक्षे तदभिधानादित्यर्थः । एवं मोक्षगतमेव सर्वं फलमुद्दिश्य यजनं श्रुतिचोदितम् ।

भिर्वाऽज्ञातिभिर्वा" इत्यादि च[१]। "मोक्षाख्यं फलमेवाऽहुः [२]स्वर्गादिवचनं तु यत्। [३]पुष्पं स्वर्गादिवत् [४]तस्य वचनं मन्दरोचनम्" इति च। "[५]आसुराणामयं स्वर्गशब्दः [६]पुष्पात्मकं वदेत्। देवानां हरिसम्प्राप्तिं वेदो विष्णुपरो यतः" इति च ॥ * ॥

कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः।
अग्निमुग्धा धूमतान्ताः स्वं लोकं न विदन्ति ते ॥ २७ ॥

[७]स्वं लोकं स्वाश्रयम्[८] ॥ * ॥

---

१ "स्त्रीभिर्वा यानैर्वेत्यादि च" इतीयानेव प्र. पाठः। "स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वेत्यादि च" इति क्वचित्। पुत्रादिज्ञातिभिः। वित्तमित्युक्तं भोगसाधनं यानैरित्युच्यते। अत एव भार्यापुत्रादिसंयुक्ता वासुदेवमुपासत इत्युक्तं पूर्वम्। यतस्तथोपासते ततस्तथैव भार्यापुत्रादियुक्ता एव मुक्तावपि भवन्ति।

२ "फलमेवात्र स्वर्गादि-" इति प्र. पाठः। "फलमेवाऽह स्वर्गादि-" इति क्वचित्। अयमर्थः यत् स्वर्गादिवचनं स्वर्गादिपदैरुच्यमानं तत् मोक्षाख्यं फलमेव न पुष्पं स्वर्गादिकमित्याहुः ज्ञानिनः यत् स्वर्गादिवचनं पदं वेदेषु श्रूयते तेन मोक्षाख्यं फलमेव मुख्यत आहुर्वेदा इति वा।

३ ननु तर्हि मोक्षकाम इत्येव स्फुटमुच्यताम्। किमिति स्वर्गपदेन मोक्षं विवक्षित्वा श्रोतारः सन्देहे विगाह्यन्ते? आह —पुष्पं स्वर्गादिवत्। स्वर्गपशुपुत्रवित्तादिरेव यथा श्रुत्यर्थत्वेन प्रतीयेत तथा स्वर्गादिवत् यदाहुः, मोक्षकाम इत्यनुक्त्वा स्वर्गकामो यजेत इत्यादि यदाहुरिति यावत्, तेन पुष्पमेवाऽहुः, न फलम्। तथाच पुष्पं फलमित्युभयमप्यत्र विवक्षितमिति तदुभयबोधाय स्वर्गपदमेव प्रायोजि न मोक्षपदमिति। तेन मुख्यतया मोक्षोऽमुख्यतया स्वर्गश्च बाध्यत इति भावः। "पुष्पस्वर्गादिवत्" इति पाठान्तरम्। प्र. पाठोऽपि तथा।

४ ननु फल मोक्ष इत्येव पर्याप्तम्। किमिति पुष्पवचनम्? आह—तस्य वचनम्। उभयी हि लोके रुचिर्दृश्यते। केचित् चूतलतिकां जलेन सिञ्चन्तः फलपर्यन्तं प्रतीक्षन्ते। अपरे पुष्पवतीमेव तां दृष्ट्वा चरितार्थाः प्रियतमां नवमञ्जरीमिरवतंसयन्ति। कामुकाः कामिन्याः पुष्पमेवापेक्षन्ते न फलम्। साधवस्तु फलार्थं पुष्पिणीगामिनः। उक्तं हि "प्रजायै गृहमेधिनाम्" इति। तथा शास्त्रेष्वपि तावदुभये ह्यधिकारिणः। तत्र ये प्रवृत्ताः फलपर्यन्तां प्रतीक्षां न क्षमन्ते पिकप्रायाः तेषां कृते तस्य स्वर्गादेः पुष्पस्यापि वचनम्। मन्दानामपि यथा तत्र रोचनं स्यादिति। तेन च क्रमेण फलेप्सवोऽपि भवेयुरिति। ये च निवृत्ताः फलपर्यन्तगामिनः शुकप्रायाः तेषां साक्षान्मोक्षस्य फलस्यैव वचनमिति।

५ "असुराणा—" इति प्र. पाठः

६ पुष्पात्मकमिन्द्रलोकादिकम्। हरिसम्प्राप्तिं सालोक्यादिलक्षणं मोक्षम्।

७ "स्वलोकम्" इति पाठान्तरम्। "कामिनः विषयकामुकाः कृपणाः विषयप्राप्तये दैन्योपेताः पुष्पेषु अनित्याल्पफलेषु फलबुद्धयः महाफलत्वबुद्धयः अग्नौ अग्निविषये मुग्धाः अन्यथाज्ञानिनः। अग्निरेव पूज्यः यागफलदाता चेति भ्रान्ता इत्यर्थः। विष्ण्वादिदेवतापलापिन इति यावत्। धूमतान्ताः धूमेन म्लानाः। अजस्रं यागाचरणात् वृथा क्लेशोपेता इति भावः। स्वं लोकं मां मम स्थानं सकलनित्याभीष्टसम्पन्नं न विदन्ति" इति यादवेन्द्रतीर्थाः। अत्र कामिन इत्येतत् पदं पूर्वमेवाऽचार्यैर्व्याख्यातम्-"अयोग्यभार्यापुत्रादिकामिताऽनर्थसाधनी" इति। तथाच कामिन इत्ययोग्यकामिनः। अस्मिन् श्लोकार्थे श्रुतिवचनं च भवति—"कश्चित् स्वं लोकं न प्रतिजानाति अग्निमुग्धो धूमतान्तः" इति। धूमता धूममार्गोऽन्ते येषां ते धूमतान्ता इत्यपि व्याचक्षते।

८ राधारमणगोस्वामी चाह—"स्वं लोकं स्वाश्रयं परमात्मतत्त्वम्" इति। जीवगोस्वामी चैवम्।

96

न ते मामङ्ग जानन्ति हृदिस्थं य इदं यतः ।
[1]उक्थशासो ह्यसुतृपो यथा नीहारचक्षुषः ॥ २८ ॥

कोऽसावाश्रयः? माम् । ते ये उक्थेन प्राणेन शास्याः[2] ।

"विष्णवभक्तान् सदा वायुः शासयेत्[3] तमसि क्षिपन् । विष्णुभक्तान् [4]विमोक्षाय प्रापयित्वा सुखं नयेत्" इति च । "[5]पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनाम्" इति च ॥ * ॥

ते मे मतमविज्ञाय परोक्षविषयात्मकाः[6] ।
हिंसायां यदि कामः[7] स्याद् यज्ञ एव न चोदना ॥ २९ ॥

---

१ "उक्थशस्त्रा–" इत्यर्वाचीनाः । "विष्णुरस्तीति केषाञ्चिदसुराणां ज्ञानसद्भावेऽपि मम माहात्म्यज्ञानं नास्तीत्याह– न ते मामिति । असुभिः प्राणैरिन्द्रियैर्वा तृप्ताः असुतृपः । इन्द्रियसुखेनैवालम्बुद्ध्युपेताः । अत एव नीहारचक्षुषः । नीहारः हिमम् । स चक्षुषि येषां ते यथा पर्वतादि न जानन्ति तथा । यः गुणपूर्णः इदं जगत् । जगतः स्वरूपसत्तादिप्रद इत्यर्थः । इदं जगद् यतः सृष्टं संरक्षणादिकर्तारं तं तथाविधं हृदिस्थं मां न जानन्ति । उक्थशासः उक्थेन प्राणेन शासनं दुःखं येषां ते तथाविधा भवन्ति" इति यादवेन्द्रतीर्थाः । नीहारं तमो वा । तेन प्रावृतं चक्षुर्येषां ते । तथाहि विश्वकर्मश्रुतिः—"न तं विदाथ य इमा जजानान्यद् युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति" इति । जजान जनयामास । अन्तरं हृदिस्थम्

२ उक्थेन शास्यन्त इत्युक्थशासः । उक्थेन शाः शासनं येषां त इति वा ।

३ "शाश्वते तमसि क्षिपन्" इति क्वचित् ।

४ विमोक्षाय विमोक्षं प्रापयित्वा सुखं नयेत् । सुखं प्रापयित्वा विमोक्षाय नयेदिति वा । मुखं व्यादाय स्वपितीति यथा ।

५ ऋग्वेदेऽष्टममण्डले द्विपदेयमृक् पठ्यते (८–२९–८) । अयमर्थः—एकः मुख्यप्राणः पापस्य पुण्यस्य च पथो मार्गान् पीपाय । पापकृतः पापे मार्गे नयति, तमश्च प्रापयति । पुण्यकृतः पुण्यमार्गे नयति, मोक्षं च प्रापयति, मध्यमान् संसारमार्गे परिवर्तयतीत्येतत् । कुतः? यत एष निधीनां शास्त्रेषु पिहितानां ज्ञानानां पथो वेद जानाति । तद्यथा तस्करः भूमौ निहितानां निधीनां वेद । अयमपि प्राणिनिधिरूपस्य ज्ञानस्य दानेन भक्तानां पापस्य दुष्टानां पुण्यस्य च चोरयितृत्वात् तस्कर इवेत्युपमीयते । तेन च स्तुतिरेव व्यज्यते न निन्दा । "नारायणो नाम नरो नराणां प्रसिद्धचोरः कथितः पृथिव्याम्" इत्यादिवत् ।

६ "परोक्षं विषयात्मकाः" इत्यर्वाचीनाः । इतः परं "वृथा पशून् विहिंसन्ति हिंस्यन्ते प्रेत्य तैस्तु ते" इति श्लोकार्धमधिकं पठ्यते वीरराघवादिभिः । अपरे तु इदमर्धं पठित्वा "हिंसायां यदि—" इत्याद्यर्धं न पठन्ति ।

७ "यदि रागः स्याद्—" इति प्र. पाठः । "ननु तामसत्वेऽपि विधिप्राप्तकर्मकर्तृत्वात् किमर्थं निन्दा? आह—ते मे मतमिति । परोक्षविषयात्मकाः । परोक्षमन्धन्तम इत्यर्थः, तस्य विषयः आत्मा स्वरूपं येषां ते ।

[1]मे मताविज्ञानात् परोक्षविषयात्मकाः । परोक्षमन्धन्तमः तद्विषयस्वरूपाः,[2] [3]तद्गमनार्थ-स्वरूपाः ।

"अन्धन्तमः परोक्षं च पञ्चकष्टं तथोच्यते" इति सुव्यक्ते[4] ।

[5]तेषामासुराणां यदा कामस्तदा यज्ञ एव, न चोदना[6] । यद्यदात्मनो हिंसितुमिष्टं तत्तद् विहित-मिति प्रापयन्ति कुतर्कैः ।

आसुरोऽविहितां हिंसां विहितत्वेन वर्णयेत् । आसुरा याज्ञिकाः सर्वे नारायणपरा-ङ्मुखाः" इति च ॥ * ॥

हिंसाविहारा [7]आलब्धैः पशुभिः स्वसुखेच्छया ।
[8]यजन्ते देवता यज्ञैः पितृभूतपतीन् खलाः ॥ ३० ॥

अन्धन्तमोयोग्या इत्यर्थः । ते तामसाः मे मतं मम निश्चितं निवृत्तकर्मणा ज्ञानपुरस्सरं निःश्रेयसं भवतीति वेदा-र्थमविज्ञाय ये वर्तन्ते तेषामसुराणां यदा हिंसायां कामः तदा यज्ञ एव । स्वेच्छया यज्ञे प्रवृत्तिरिति भावः । तेषां न चोदना । विधिवचनस्य स्वेच्छयाऽर्थं परिकल्प्य प्रवर्तन्त इत्यर्थः" इति यादवेन्द्रतीर्थाः ।

१ यथा ल्यपः स्थाने पञ्चमी तथा पञ्चम्याः स्थाने ल्यबपि भवतीत्याह—मे मताविज्ञानात् । अविज्ञानाद्धे-तोः परोक्षविषयात्मकाः अन्धन्तमोयोग्या इति । प्रसिद्धश्चैतादृशः प्रयोगः । तद्यथा– पीत्वा मत्तः । पानाद्धेतोः मत्तः । भुक्त्वा ज्वरितः । अपथ्यभोजनाद्धेतोः ज्वरितः । ल्यपा ह्यानन्तर्यं बोध्यते । पूर्वो हेतुर्भवति । अनन्त-रस्तु हेतुमान् भवतीत्यर्थः ।

२ परोक्षस्य विषयः प्राप्तियोग्यः आत्मा येषां त इति व्याचक्षते । परोक्षं तमः विषयः गमनविषयः यस्य ता-दृश आत्मा येषामिति वा ।

३ "तद्गमनार्हस्वरूपाः" इति पाठस्तु सम्भाव्यते । परन्तु सर्वत्र कोशेषु "गमनार्थ-" इत्येव पठ्यते । प्रा-चीनतमः पाठस्त्वत्र नोपलब्धः । तमोगमनमेव अर्थः फलं यस्य तादृशं स्वरूपं येषामिति व्याख्येयम् । तमोग-मनमेव तेषां जीवितफलमित्यर्थः ।

४ "इति च सुव्यक्ते" इति क्वचित् । ५ "तेषामसुराणाम्" इति च ।

६ नहि चोदना विधिरस्तीति यज्ञः क्रियते । किन्तु मांसभक्षणे कामो जात इति जिह्वालौल्यादेव यज्ञः क्रियते । तदेवोत्तरत्र हिंसाविहारा इति स्फुटमुच्यते । तथा च यथा स्वकामः पूर्येत तदनुगुणमेव विधिवाक्यम-वतारयन्तीत्यायातम् । न वेदतात्पर्यं तेऽनुसरन्ति, किन्तु स्वतात्पर्यं वेदेष्ववारोपयन्तीति भावः । वीरराघवोऽप्याह— "यागमपदिश्य मांसभक्षणाय पशून् हिंसन्ते" इति, "स्वसुखेच्छया यागो व्याजीकृत इत्यतस्ते खला इत्यर्थः" इति च । "यागमपदिश्य मांसभक्षणार्थं पशून् हिंसन्तो नास्तिका " इति सुदर्शनसूरिः ।

७ "–विहारा ह्यालब्धैः" इति प्र. पाठः ।

८ यद्यपि देवता यजन्ते । अथापि विष्णुं विहायान्यदेवता एव स्वातन्त्र्येण यजन्ते विष्णुं वाऽन्यदेवतासाम्येन अन्यदेवताश्च विष्णुसाम्येन यजन्त ते खला एवेति भावः । अन्ये पुनः पितॄन् भूतपतीन् वा यजन्तीति । "ननु-यज्ञे विष्णोरपीज्यत्वात् कथं निन्देत्यत आह —यजन्त इति" इति यादवेन्द्रतीर्थाः ।

"विष्णुं विहाय ये देवान् पितॄन् [1]भूतेशमेव वा। साम्येन वा पूजयन्ति ते ज्ञेया आसुरा गणाः" इति च ॥ * ॥

रजःसत्त्वतमोनिष्ठा रजःसत्त्वतमोजुषः ।
उपासते इन्द्रमुख्यान् देवादीनयथैव[2] माम् ॥ ३२ ॥

तामसेष्वेव रजःसत्त्वतमोविशेषाः[3] ।

"तामसेषु तु ये सत्त्वा निरयप्रचुरास्तु ते । ईषत्स्वर्गादिसंयुक्ता एवंनिष्ठाश्च[4] ते स्मृताः । केवलं निरये निष्ठा ये ते तामसराजसाः । [5]अन्धे तमसि ये निष्ठास्ते वै तामसतामसाः । एवं त्रिभेदयुक्तास्तु याज्ञिका विष्णुवर्जिताः" इति हरिवंशेषु ॥ * ॥

---

१ भूतेशं शिवं भूतगणांश्च ।

२ "देवादीन् न यथैव" इति प्र. पाठः । "तामसानां प्रभेदमाह– रजःसत्त्वतमोनिष्ठा इति । ईषत्सात्त्विकतामसाः राजसतामसाः तामसतामसा इति । तत्र ईषत्सात्त्विकतामसाः स्वर्गाभासप्राप्तियोग्याः । केवलं निरययोग्या राजसतामसा इत्यादि । ते सात्त्विका न भवन्तीति ज्ञापनाय निष्ठा इति । निष्ठा व्यवस्था । तेषां स्वरूपं तथा व्यवस्थितमित्यर्थः । रजःसत्त्वतमोजुषः राजसादि विषयान् भुञ्जते । यदि रजःसत्त्वतमोनिष्ठा मदुपासनं कुर्युः तदा अयथा मत्स्वभावमतिक्रम्य रुद्रादिसाम्येन मामुपासते । अतस्तेषामधःपात इति भावः" इति च ।

३ "–तमोनिष्ठाः" इति प्र. पाठः । तथा च रजःसत्त्वतमोनिष्ठा इति रजोनिष्ठाः सत्त्वनिष्ठास्तमोनिष्ठा इति नार्थः । सत्त्वनिष्ठानां निन्दाया अनपेक्षितत्वात् । किन्तु त्रयोऽपि तमोनिष्ठा एव । तत्र केचिद्रजसा ईषत्सत्त्वेन च स्पृष्टास्तमोनिष्ठाः । अपरे तु केवलं तमोनिष्ठा इति । अत एव वीरराघवोऽप्याह–"अत्र रजस्तमोभ्यां मिश्रितं सत्त्वं विवक्षितम्" इति ।

४ एवंनिष्ठा इतीषत्सत्त्वयुक्ततमोनिष्ठाः ।

५ इदमुक्तं भवति । द्वौ तावन्नित्यनरकौ तमश्चान्धन्तमश्चेति । "तामिस्रश्चान्धतामिस्रो द्वौ नित्यौ परिकीर्तितौ" इति स्मरणात् । इमावुभावपि परोक्षमिति पञ्चकष्टमिति चोच्येते । अनित्यनरकेभ्यः पञ्चभ्योऽपि रौरवमहारौरववह्निवैतरणीकुम्भीपाकेभ्योऽतिकष्टत्वात् । पञ्चेन्द्रियेभ्योऽपि नितरां कष्टानुभवाच्च । तदिदं ज्ञानिनां भक्तानां सदा परोक्षमेवेति परोक्षमित्येवोच्यते । तत्र ये तामसतामसाः तेऽन्धतमो विशन्ति । अतोऽन्ततोऽन्धे तमसि निष्ठाः । तामससात्विकास्तामसराजसाश्चेत्युभयेऽपि तमोनिष्ठाः । नान्धन्तमोनिष्ठाः तयोरवान्तरभेदस्तु तमःप्राप्तेः पूर्वमीषत्स्वर्गादिसंयुक्ताः तामसेषु सात्विकाः, केवलं निरयगास्तामसेषु राजसा इति । तथाच त्रैविध्यमुपपन्नम् । अन्यथाऽन्ते त्रयाणामपि तमोनिष्ठत्वात् त्रैविध्यमनुपपन्नं स्यात् । त्रिविधाश्चैते तामसाः पूर्वमेवाऽऽचार्यैः प्रमाणत उदीरिताः—"तामसास्तामसा दैत्याः प्रधाना देवशत्रवः । तामसा राजसास्तेषामनुगास्तेषु सात्विकाः । अनाख्यातासुराः प्रोक्ताः" इति द्वितीयतात्पर्ये । अथवा गीतातात्पर्योक्तदिशा मनुष्याधमा अपि तामसेषु सात्विकाः । तथाहि तद्वचनम्—"नराधमास्तामसेषु सात्विकास्तेषु राजसाः । दैत्यभृत्या महादैत्या मुख्यतामसतामसाः" इत्यादि ।

वेदा ब्रह्मात्मविषयास्त्रिकाण्डविषया अपि[1] ।
[2]परोक्षवादो वेदोऽयं परोक्षं मम च प्रियम् ॥ ३५ ॥

"ब्रह्मत्वं पूर्णता प्रोक्ता तद् यस्य स्वत एव तु । स ब्रह्मात्मा समुद्दिष्टो वासुदेवः सनातनः" इति च ॥ * ॥

शब्दब्रह्म सुदुर्बोधं प्राणेन्द्रियमनोमयम् ।
अनन्तपारं गम्भीरं दुर्विगाह्यं समुद्रवत्[3] ॥ ३६ ॥

प्राणेन्द्रियमनोभिर्मीयते ।

"मेयत्वान्मय उद्दिष्टो वेदः प्राणादिभिः सदा" इति वाराहे । "अन्तो विनाश उद्दिष्टः पारः परिमितिस्तथा । अनन्तपारो वेदोऽयं ताभ्यां स रहितो यतः" इति व्यासस्मृतौ ॥ * ॥

---

१ "–विषया इमे" इति प्र. पाठः ।

२ "परोक्षवादा ऋषयः परोक्षम्" इति च । "नित्यसंसार्यपेक्षया स्वर्गादिफलप्रापककर्मप्रतिपादका वेदाः मोक्षयोग्यानुत्तमाधिकारिणः प्रति किमर्थं न प्रतिपादयन्तीति पुनर्जिज्ञासायामाह—वेदा इति । काण्डो भागः । त्रिकाण्डविषयाः ब्रह्मदेवताकर्मलक्षणार्थत्रयप्रतिपादका अपि वेदाः । ब्रह्मात्मा स्वत एव पूर्णो वासुदेवस्तद्विषयाः । सर्वाणि वेदपदानि स्तुतिरूपेण श्रीनारायणं प्रतिपादयन्ति । सर्वे वेदाः महतात्पर्येण श्रीनारायणं प्रतिपादयन्तीति वा । तर्हि स्पष्टं स्वार्थं प्रतिपादयन्तः संशयं कुतो न निवर्तयन्ति ? आह—परोक्षेति । अधिकारिभेदेनाऽर्थज्ञानजनको वेदः । यतः परोक्षं अर्थे स्पष्टताराहित्यं राजसादीन् प्रतीति भावः । मम प्रियं अतः परोक्षवादः । परोक्षोऽस्पष्ट इत्यर्थः । मां स्पष्टं न प्रतिपादयति" इति यादवेन्द्रतीर्थाः । "ब्रह्मात्मविषयाः सर्वान्तरात्मभूतब्रह्मविषयाः" इति सुदर्शनसूरिः । "ब्रह्मैवाऽऽत्मा सर्वेषामन्तरात्मा तद्विषयाः" इति वीरराघवः । "सर्वतो बृहत्तमो य आत्मा परममूलस्वरूपो भगवानहं तत्परा एवेत्यर्थः" इति जीवगोस्वामी । "ब्रह्मैव योऽयमहमात्मा तद्विषयाः । ब्रह्मस्वरूपमदाराधनपराः" इति विश्वनाथचक्रवर्ती । "ब्रह्मात्मविषयाः । बृहत्स्वरूपप्रतिपादकाः" इति शुकदेवः । सर्वेऽप्येतेऽर्थाः अविरोधाद् ग्राह्या एव ।

३ "शब्दब्रह्म पदवर्णस्वराद्यात्मको वेदः । अनन्तपारम् । अन्तो विनाशः । पारः परिमितिः । न विद्येते अन्तपारौ यस्य तत् । सुदुर्बोधं उपदेशं विना ज्ञातुमशक्यम् । प्राणादिदेवैः मीयते ज्ञायत इति प्राणेन्द्रियमनोमयम् । गम्भीरमस्पष्टतात्पर्यम् । समुद्रवदपारत्वादेव विरिञ्चेतरैः दुर्विगाह्यम्" इति यादवेन्द्रतीर्थाः । प्राण इति मुख्यप्राणः । मनोदेवा गरुडशेषरुद्राः इन्द्रकामौ च । इन्द्रियदेवास्तदन्ये सोमवित्तपसूर्याद्यास्तात्त्विकाः । तैरेव मुख्यतो मीयते शब्दब्रह्मेत्यर्थः । प्राणेन्द्रियमनसां प्रयत्नैर्मीयत उच्चार्यत इति प्रातीतिकोऽर्थः । "मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्" इत्यादिवचनात् । शब्दमात्रसाधारणमिदं न शब्दब्रह्मणो वेदस्य असाधारणो गुण इति नाऽऽचार्यैस्तथा व्याख्यातम् ।

[1]मयोपबृंहितं भूम्ना ब्रह्मणाऽनन्तशक्तिना ।
भूतेषु घोषरूपेण बिसेषूर्णेव[2] लक्ष्यते ॥ ३७ ॥

भूम्ना ब्रह्मणा अतिमहापरिपूर्णेन ॥ * ॥

यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् ।
आकाशाद् घोषवान् प्राणो मनसाऽऽस्पर्शरूपिणा ॥ ३८ ॥

छन्दोमयोऽमृतमयः सहस्रपदवीं प्रभुः ।
[3]ओङ्कारेष्वञ्जितां स्पर्शस्वरोष्मान्तस्थभूषिताम् ॥ ३९ ॥

बिचित्रभाषाविततां छन्दोभिश्चतुरुत्तरैः ।
अनन्तपारां बृहतीं सृजत्याक्षिपते स्वयम्[4] ॥ ४० ॥

---

१ "भूम्ना ब्रह्मणा अतिमहापरिपूर्णेन, अत एवानन्तशक्तिना अप्रतिबद्धसामर्थ्येन मया उपबृंहित व्याप्तं पदादिशक्तिप्रेरकमूर्तिभिरिति भावः। प्रतिपाद्यमूर्तिभिर्वा व्याप्तम् । वेदे निरर्थकः शब्दो नास्तीति भावः। विसेषु कमलनाळेषु ऊर्णेव तिरोहितमिति भावः । भूतेषु अध्यापकेषु घोषरूपेण ध्वन्यात्मकशब्दप्रभेदेन लक्ष्यते" इति च । "भूम्ना पूर्णतमेन ब्रह्मणा बृहत्स्वरूपगुणादिमता" इति शुकदेवः ।

२ "बिस ऊर्णेव" इति क्वचित् पाठान्तरम् ।

३ "ओङ्कारान् व्यञ्जितस्पर्श–" इति प्र. पाठः । "ओङ्कारे व्यञ्जिताम्" इति यादवेन्द्रतीर्थाभिमतः पाठ इति भाति ।

४ "अविद्यावश्यानां शक्त्यभावात् कस्य घोषेण व्यज्यत इति जिज्ञासायामाह—यथेति । हृदयात्, विश्लिष्टां पूर्वं हृदये तिरोहितामिति भावः। ऊर्णां तन्तुमुद्वमते व्यक्तं करोतीत्यर्थः। तथा प्राणः महाबलः आकाशात् स्वीयसहायात् घोषवान् व्यञ्जकविविधध्वनिसम्पन्नः । आस्पर्शरूपिणा, आ समन्तात् स्पर्शा भोगा अस्यैवेत्यास्पर्शः विष्णुः । तं रूपयति प्रकाशयतीति आस्पर्शरूपि प्राणस्य मनः। तेन मनसा। प्राणस्य वेदव्यञ्जकत्वे निमित्तमाह—छन्दोमयः । मीयन्ते ज्ञायन्ते छन्दांसि अनेनेति प्राणश्छन्दोमयः । तस्य प्रथमं वेदद्रष्टृत्वात्। अमृतमयः, अमृतं निःश्रेयसम्, तदुपायेषु प्रधानः। उपदेशादिना वायोर्मोक्षदातृत्वादिति भावः । एतादृशः प्राणः प्रभुः ज्ञानाच्छादकासुरनिरसनसमर्थः सन् बृहतीं श्रुतिं सृजति। श्रुतिगुणविशेषानाह—सहस्रपदवीम् । सहस्राणि अनन्तानि पद्यन्त इति पदानि रूपाणि अनया प्रतिपाद्यानि सन्तीति अनन्तपदवतीम् । अथवा सहस्राणां रूपविशेषाणां पदवीं प्रतिपादकत्वेनाऽश्रयभूताम् । ओङ्कारे ओङ्कारसन्निधौ ओङ्कारोच्चारणं विना वेदोच्चारणं नास्तीति भावः । व्यञ्जितां व्यक्ताम् । स्पर्शाः कादयो मावसाना वर्णाः । स्वरा अचः । ऊष्माणः शषसहाः । अन्तस्था यरलवाः । एभिर्वर्णैर्भूषितां यथोचितं सम्पन्नाम् । विचित्रभाषाभिः समाधिभाषादर्शनभाषागुह्यभाषादिभिः भाषाभिर्विततां युक्ताम्। चतुरुत्तरैः गायत्रीच्छन्दोपेक्षया चतुर्वर्णाधिकोष्णिगादिच्छन्दोभिः सहिताम्।

गायत्र्युष्णिगनुष्टुप् च[1] बृहती पङ्क्तिरेव च ।
त्रिष्टुब्जगत्यतिच्छन्दो [2]ह्यष्टयत्यष्टी जगद् विराट् ॥ ४१ ॥

आस्पर्शरूपिणा । आस्पर्शो विष्णुस्तं रूपयति प्रकाशयतीत्यास्पर्शरूपि प्राणस्य मनः । आ समन्तात् स्पर्शा भोगा अस्यैवेत्यास्पर्शः ।

"भुङ्क्ते यदखिलान् स्पर्शानास्पर्शो विष्णुरुच्यते । तस्य प्रकाशकं नित्यं नमस्ये प्राणमेकलम् । प्राणस्यैव मनो नित्यं वासुदेवं प्रकाशयेत्" इति वायुप्रोक्ते ॥ * ॥

"मीयन्तेऽनेन छन्दांसि प्राणश्छन्दोमयस्ततः" इति च । "त्रिमात्रमादितः कृत्वा यावच्चानन्तमात्रकः[3] । प्रणवास्ते विभेदेन ह्यनन्ताः परिकीर्तिताः । एकमात्रोत्तराः सर्वे वासुदेवाभिधायकाः । तेषां व्याख्यानरूपा हि सर्वे वेदाः प्रकीर्तिताः । [4]ओङ्कारेणाञ्चितास्तस्मात् सदोच्चार्या हरेः प्रियैः" इति प्रणवमाहात्म्ये ॥ * ॥

"गुह्यदर्शनभाषे च भाषा चैव समाधिका । तिस्रस्तु मूलभाषाः स्युरेकैका च त्रिधा पुनः । गुह्यदर्शनसञ्ज्ञा च गुह्यगुह्या तथाऽपरा । एवमादिक्रमेणैव त्वेकाशीतिविभेदिताः[5] । भाषास्तत्र च गुह्या च प्रसिद्धार्थेष्वनन्विता । गुह्यार्थतत्परैवान्धो मणिमित्यादिका च[6] सा । दर्शनान्यवलम्ब्यैव पशुपत्यादिनां तु या । बहुश्रुतिविरुद्धं तु

जगत्यन्तानामेव चतुरुत्तरत्वनियम इति भावः । एतादृशीं उच्चारणेनाभिव्यज्य आक्षिपते च तिरोहितं करोति" इति यादवेन्द्रतीर्थाः ।

१ क्वचित् कोशे 'च' कारः न पठ्यते । तदा एकाक्षरोनः पादः ।

२ "ह्यत्यष्टयतिजगद् विराट्" इति प्र· पाठः । चतुर्विंशत्यक्षरा गायत्री । ततश्चतुरुत्तरा अष्टाविंशत्यक्षरा उष्णिक् । एवं जगत्यन्तं चतुरुत्तरत्वमिति अष्टचत्वारिंशदक्षरा जगती । एतानि सप्त च्छदांसि । ततः परेऽतिच्छन्दांसि । छन्दसामेव चतुरुत्तरत्वनियमो नातिच्छन्दसामिति भावः । अतिच्छन्दांसि कानिचिद् दर्शयति-अष्टयत्यष्टी । चतुःषष्ट्यक्षराऽष्टिः । ततश्चतुरुत्तराऽत्यष्टिः । पुनश्चतुरक्षराधिकं द्वासप्तत्यक्षरं जगत् । अष्टाक्षरैर्नवभिः पादैर्जगत् । विराडिति चातिच्छन्दनां नामान्तरम् । तदुक्तमृग्भाष्ये—"अतिच्छन्दांसि सर्वाणि सर्वदेव्यः प्रकीर्तिताः । विराळिति च नामाऽसाम्" इति । अथ विराडिति च्छन्दोभेदोऽपि । द्व्यक्षरोनं छन्दो विराडित्युच्यते । यथा द्वाविंशत्यक्षरा गायत्री । तथाहि कात्यायनः-"ऊनाधिकेनैकेन निचृद्भुरिजौ । द्वाभ्यां विराट्स्वराजौ" इति ।

३ "-मात्रकाः" इति प्र. पाठः प्रामदिकः । त्रिमात्रं प्रणवमारभ्य यावदनन्तमात्रकः प्रणवः तावत्पर्यन्तं विविधमात्राभेदेनानन्ताः प्रणवा इत्यर्थः । एवमनन्तमात्राभिरनन्तो वेदो व्यज्यते ।

४ "ओङ्कारव्यञ्जिता-" इति प्र. पाठः । यद्यपि मूलानुसारेण "ओङ्कारेणाञ्जिताः" इति वक्तुमुचितम् । परन्तु सर्वत्र प्राचीनकोशेषु 'अञ्चिताः' इत्येव पठ्यते ।

५ गुह्यं दर्शनं समाधिरिति तिस्रस्तावत् भाषाः । तत्रैकैकाऽपि भाषा पुनस्त्रिविधेति नव भाषाः । सा चैकैकाऽपि नवधेति पुनरेकाशीतिधेति विभागक्रमः ।

६ अन्धो मणिमविन्ददिति श्रूयते । अज्ञानेनान्धः उत्तमं ज्ञानाख्यं मणिमविन्ददित्यर्थः । येन. मणिनाऽन्धोऽनन्धो बभूव ।

वदेत् सा दर्शनात्मिका । अन्ते निषेधसंयुक्ता भस्मस्नानादिका च सा । यथाप्रदृश्यमानार्था समाधिः सा प्रकीर्तिता । 'विष्णुः परम इत्याद्या[1] सा च विद्वद्भिरीरिता" इत्यादि[2] भाषाविवेके । "भस्मस्नानविधानं तु श्रुत्युक्तं दर्शनानुगम् । भस्मस्नानं ततोऽग्राह्यं विधानं तु नृसिंहगम्[3]" इति स्कान्दे ॥ * ॥

गायत्र्या उष्णिक् चतुर्वर्णाधिकेत्यादि चतुरुत्तरैः ॥ * ॥

जगत्यन्तानामेव चतुरुत्तरत्वनियमः—

"[4]छन्दस्तु नवपादं यज्जगदित्युच्यते बुधैः" इति च्छन्दोविधाने ॥ * ॥

[5]किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ।
इत्यस्या हृदयं[6] साक्षान्नान्यो मद् वेद कश्चन ।
मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्य इत्यहम्[7] ॥ ४२ ॥

---

१ "अग्निर्वै देवानामवमः । विष्णुः परमः" इत्याद्या ऐतरेयी श्रुतिः ।

२ "इति भाषाविवेके" इति प्र. पाठः । "इति त्रिभाषविवेके" इति क्वचित् ।

३ श्रुत्युक्तं नृसिंहपुराणगतं च भस्मस्नानं दर्शनानुगत्वादग्राह्यमेव । श्रुतेरनुवादित्वेन तत्र तात्पर्याभावात् ।

४ अष्टाक्षरैर्नवभिः पादैरुपेतं द्वासप्तत्यक्षरं छन्दो जगदित्युच्यत इत्यर्थः ।

५ "वेदस्य सुदुर्बोधत्वं दुर्विगाह्यत्वं चार्थतोऽपीत्याह—किं विधत्त इति । किंवा विविधत्वेन कल्पयेत् । प्रतिपादयेत् । लोके ज्ञानाधिकारिसमुदायमध्ये मत्तः अन्यः कश्चन स्वत एव एवंविधान् विधानाभिधानादीन् हृदयं तात्पर्यं च न वेद । एवं सति वेदज्ञानप्राप्तिः कथमित्यत आह— मां विधत्ते । स्वाध्यायोऽध्येतव्यः इत्यादिविधिः मां विधत्ते । मामुद्दिश्य अध्ययनमिष्टमिति प्रतिपादयति । इष्टसाधनत्वात् मुख्येष्टत्वाद्वा अहमपीष्टमिति भावः । सत्यं ज्ञानमित्यादिपदजातं मुक्तामुक्तनियामकत्वादिगुणसम्पन्नं माममिधत्ते महायोगेन प्रतिपादयति । विकल्पः वागित्यनुवादेन चत्वारीति विकल्पः । विविधत्वेन वासुदेवसङ्कर्षणादिरूपविशेषैः कल्पः वेदे समर्थनीयः प्रतिपादनीय इत्यर्थः । अपोह्यः न सुरां पिबेदित्यादिनिषेधवाक्येन असुराणामनिष्टत्वेन प्रतिपाद्यः । सुरा ऐश्वर्यादिगुणाः, तेषां पानं स्वस्मिन्नारोपः सुरापानं तन्न कु[illegible] कदाचन । वेदस्य एवमाद्यर्थमहं वेद" इति यादवेन्द्रतीर्थाः । पण्डिताचार्यास्त्वेवं व्याचख्युस्तत्त्वदीपिकायाम्— "आत्मानमेव लोकमुपासीत, ज्योतिष्टोमेन स्वर्गकामो यजेत, ब्राह्मणो न हन्तव्य इत्यादि मामुद्दिश्यैव विधत्ते [illegible]तः । न ते विष्णो जायमानो न जातः, अग्न इन्द्र वरुण मित्र देवा इत्यादि माममिधत्ते । द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च, द्वे वाव ब्रह्मणो रूपे आत्मा चैवानात्मा चेति विविधं कल्पयित्वा, नेति नेति, तत्र यस्स आत्मा स नित्यः शुद्धः केवलो निर्गुणश्च । अथ ह योऽनीदृशः सोऽनात्मत्यादिना दोषादपोह्यः । निर्दोषत्वेन विधेयोऽप्यहमेवेत्यस्या अभिप्रायमहमेव वेदेति" इति ।

६ यद्यपि "हृदयं लोके नान्यो–" इत्येव सर्वत्र पाठः । यादवेन्द्रतीर्थीयेऽप्येवम् । तथा[illegible]पि भगवत्पादैः "साक्षान्नान्यः" इति पाठः सूत्रभाष्ये स्वयमुद्धृत इति स एवात्र स्वीकृतः । "लोके नान्यः" इति पाठ इति पक्षे तु भाष्ये न. साक्षात्[illegible]तीग्रहणं किन्त्वर्थतोऽनुवाद इति वक्तव्यम् । अत एव पण्डिताचार्यैरपि "भागवतवचनार्थं दर्शयति" इत्युक्तमिति सम्भा[illegible]

७ "विकल्प्यापोह्यते ह्यहम्" इत्यर्वाचीनाः । "विकल्पोऽपोह्य इत्यहम्" इति यादवेन्द्रतीर्थ[illegible]ाभिमतः पाठ

विविधरूपत्वेन कल्पना[1] विकल्पः—"चत्वारि वाक्[2]" इत्यादि । तत्र वागित्यनुवादः ।

> "विधिभागे हरेः पूजैवाभिधाने च तद्गुणाः । विकल्पे तद्बहुत्वं चाप्यपोहे च तदप्रियम् । उच्यते सर्ववेदेषु तच्च वेद स एव हि" इत्यागमतात्पर्ये । "सुरा हरेर्गुणाः प्रोक्तास्ते मे स्युरिति चिन्तनम्[3] । सुरापानमिति प्रोक्तं तन्न कुर्यात् कथञ्चन । ब्राह्मणो विष्णुरुद्दिष्टः स नास्तीत्यभिचिन्तनम् । ब्रह्महत्या समुद्दिष्टा तां न कुर्यात् कथञ्चन । इत्याद्यपोहवाक्यार्थश्चिन्त्यो विष्णुर्बुधैर्जनैः[4]" इत्यादि च ।

[5]मदन्यः कश्चन कोऽपि न वेद ॥ * ॥

एतावान् सर्ववेदार्थः शब्द आस्थाय माऽभिदाम्[6] ।
मायामात्रमनूद्यान्ते प्रतिषिध्य प्रशाम्यति[7] ॥ ४३ ॥

इति भाति । "विकल्पापोह्य इत्यहम्" इति केचित् । "विकल्प्योऽपोह्य इत्यहम्" इति जयतीर्थसम्मतः पाठ इत्यन्ये मन्यन्ते । "विकल्प्यापोह्य इत्यहम्" इत्येव तु सर्वप्राचीनकोशसम्मतः भगवत्पादैः स्वयमुद्धृतः पण्डिताचार्यादिसम्मतश्च पाठः ।

१ "कल्पनं विकल्पः" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

२ तथाहि मन्त्रः—"चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति" (ऋ. १-१६४-४५) इति । उच्यत इति वाक् । यासा वेदवाच्या भगवन्मूर्तिः तस्याश्चत्वारि पदानि रूपाणि । कीदृशानि ? परिमिता परिमितानि । परितः मितानि प्रमितानि "पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" इत्यादिवेदवचनैर्ज्ञानिभिश्च । एतदेवाऽह—तानि विदुर्ब्राह्मणा वेदपरमार्थज्ञा ये मनीषिणः मनसामीशनशीला विद्वांसः । त्रीणि गुहायामव्यक्ततया निहितानि । 'त्रिपादस्यामृतं दिवि' इत्युक्तानि । तानि लीलयैव नेङ्गयन्ति लोकनियमनार्थं स्वात्मानं न व्यापारयन्ति । तर्हि कथं लोकयात्रा? तुरीयं वाचो रूपं लोकनियमनार्थं भूतेषु प्रविष्टं मनुष्या मननशीला ज्ञानिनो जानन्ति तथा वदन्ति च । "पादोऽस्येहाभवत् पुनः" इत्यादि ।

३ "चिन्तना" इति क्वचित् । ४ "विष्णौ बुधैर्जनैः" इति क्वचित् ।

५ मदन्यः कोऽपि मत्सकाशात् मदनुग्रहादपि न वेदेति नार्थ इत्याह—मदन्यः ।

६ "मां मिदाम्" इति प्र. पाठः ।

७ "प्रसीदति" इति च । "शब्दः वेदः अभिदं सर्वावतारेषु वैलक्षण्यरहितम्, अं सर्वगुणशक्तिभिः पूर्णम्, अभिदश्चासावश्च तमभिदां मामास्थाय निर्दोषं पूर्णगुणं मां प्रतिपादयन्, मायामात्रं मदिच्छानिर्मितं पालितं च शरीरादिकमनूद्य विकर्मणा बन्धकारणमिति बहुधा वर्णयित्वा कल्याणगुणोपासनादिकं विधाय अन्ते अपरोक्षतः कर्मपरिहारार्थं प्रतिषिध्य मुक्तिर्भवतीत्युक्त्वा प्रशाम्यति विधिनिषेधवचनव्यापारं परित्यज्य परमात्मस्तुतिमात्रव्यापारेण वर्तते । सर्वगुणपूर्णोपास्त्या निःश्रेयसं भवतीत्येतावान् । सर्ववेदार्थः । अथवा सर्ववेदार्थः एतावान् विष्णोः सर्वोत्तमत्वमन्यस्य तदुपजीवकत्वमित्येतावान् । अतः अभिदां (जीवेश्वराभेदं) आस्थायावलम्ब्य कोऽपि शब्दः नास्तीत्यर्थः" इति यादवेन्द्रतीर्थाः ।

[1]अभिदश्च स एव अश्च अभिदाः[2]। तं अभिदां मामास्थाय, मायामात्रं मदिच्छानिर्मितं शरीरादिकं अनूद्य, उपासनादिकं विधाय, मोक्षरूपेण तच्छरीरादिकं प्रतिषिध्य प्रशाम्यति।

"सर्वावतररूपेषु निर्भेदत्वाददोषतः[3]। अभिदा विष्णुरुद्दिष्टस्तमेवोक्त्वा तदिच्छया। निर्मितं दैहिक बन्धं तस्योपासनयैव तु[4]। प्रतिषिध्य विमोक्षे तु स्वभावोपास्तिरूपतः। प्रतिशाम्यति वेदोऽयं वासुदेवैकसंश्रयः" इति च।

[5]अभिदामास्थाय कोऽपि शब्दो मेति वा[6] ॥ * ॥

इत्येकादशस्कन्ध एकविंशोऽध्यायः

[द्वाविंशोऽध्यायः]

[7]युक्तयः सन्ति सर्वत्र भाषन्ते ब्राह्मणा यथा।
मायां मदीयामुद्गृह्य[8] वदतां किं नु दुर्घटम् ॥ ४ ॥

नैतदेवं यदात्थ[9] त्वं यदहं वच्मि तत् तथा।
एवं विवदतां हेतुः[10] शक्तयो मे दुरत्ययाः[11] ॥ ५ ॥

---

१ स्वयं सर्वरूपेष्वभिन्नत्वादभिदः। ब्रह्मादिसकलजीवैरन्यत्वादः। निर्दोषत्वाच्च।

२ "अभिदा तम्" इति प्र. पाठः प्रामादिकः। "विश्वतः परमाम्" इतिवदभिदा इति रूपम्।

३ "निर्भेदत्वादशेषतः। अभिदो विष्णु-" इति क्वचित्।

४ "तस्योपासन एव तु" इति प्र. पाठः।

५ इदं वाक्यं क्वचित् कोशेषु न पठ्यते।

६ "नेति वा" इति क्वचित्।

७ "युक्तं च सन्ति" इति प्र. पाठः।

८ "-मुद्ग्राह्य" इति क्वचित्। "ब्राह्मणाः ब्रह्मज्ञानिनः यथा याँयां तत्वसंख्यामवलम्ब्य भाषन्ते तत्र सर्वत्र युक्तयः सन्ति। कथमिति जिज्ञासायामाह—मायामिति। मदीयां मायां विचित्रबहुविधकार्यानुकूलविचित्रसामर्थ्यानीत्यर्थः। उद्गृह्य अवलम्ब्य सामर्थ्यप्राप्तविविधविचित्रकार्याण्यवलम्ब्येति यावत्। सत्वभेदान् वदतां किं दुर्घटम्? सर्वं सुशकमित्यर्थः" इति यादवेन्द्रतीर्थाः।

९ "यथाऽऽत्थ" इति पाठान्तरम्।

१० "हेतुम्" इत्यर्वाचीनाः। "हेतुशक्तयो-" इति सुदर्शनसूरिः।

११ "त्वं यदात्थ 'इदं नो वक्तुमर्हसि' इति एतत् संख्यामतवैलक्षण्यं एवं मदङ्गीकारविषयं मतमेकं अपरं मतमनङ्गीकारविषयं इति न। अहं यद् वच्मि विवक्षाभेदेन सर्वाणि मतानि युक्तानीति तत् तथा। तर्हि तत्वसंख्याविवादः कुतः? आह—शक्तय इति। दुरत्यया अप्रतिबद्धाः मे शक्तयः विविधकार्यानुकूलविचित्रशक्तयः विवादे मूलकारणम्" इति यादवेन्द्रतीर्थाः। "अतो यत् संख्यानमात्थ विरुद्धमित्युक्तवानसि तदेतदेवं न, विरुद्धं

यासां व्यतिकरादासीद् विकल्पो वदतां पदम् ।
प्राप्ते शमदमेऽप्येति वादस्तमनु शाम्यति[1] ॥ ६ ॥

मायां मदियां मत्सामर्थ्यम्[2] ।

"विष्णोः सामर्थमालम्ब्य तत्त्वसङ्ख्यां मुनीश्वराः । चक्रुर्हि तदविज्ञाय विवदन्त्यल्पबुद्धयः । तत्रापि कारणं विष्णोः शक्तिर्यस्या[3] विकारतः । अव्यक्तादेर्विकल्पोऽयं मनसः सम्प्रजायते । विरुद्धकल्पनं तच्च वासुदेवैकनिष्ठया । निरहङ्कारया नश्येद् विवादैकाश्रयं हि तत्" इति तन्त्रभागवते ।

यासां सकाशादव्यक्तादिव्यतिकराद् विकल्पो विरुद्धकल्पः[4] । स हि विवादाश्रयः ॥ * ॥

परस्परानुप्रवेशात् तत्त्वानां पुरुषर्षभ ।
पौर्वापर्यप्रसङ्ख्यानं यथा वक्तुर्विवक्षितम्[5] ॥ ७ ॥

न भवति । यत् संख्यानं तत् तथाऽविरुद्धं यथा भवति तत् तथाऽहं वच्मि वक्ष्यामि" इति वीरराघवः । "त्वं यथाऽऽत्थ एतदेवं न भवति दुष्टत्वात्, अहं यद् वच्मि तत् तथा निर्दोषत्वादिति विवदन्त्यल्पबुद्धयः" इति तु विजयध्वजीयम् ।

१ "यासां शक्तीनां सकाशात् जातात् व्यतिकरात् अव्यक्तादिकार्यात् तामसाहङ्कारात् विकल्पः मनोविकारः विविधभ्रम इत्यर्थः । ऋषीणां विवक्षाभेदानजानतामिति भावः । पदं विवादे निमित्तमासीत् । शमश्च दमश्च तस्मिन् । दमे विषयविरागे, शमे तत्प्राप्तपरमात्मध्याने च प्राप्ते सति अप्येति, मनसस्तमोभागो नश्यति । भ्रमश्च नश्यति । तमनु वादः अविवेकिनां विवादः शाम्यति । विवक्षाभेदज्ञानादिति भावः" इति यादवेन्द्रतीर्थाः ।

२ "मदीयां मायां मच्छक्तिम्" इति शुकदेवः । "मायाऽत्राचिन्त्यशक्तिः । नत्वसद्व्यञ्जिकाऽविद्या" इति जीवगोस्वामी ।

३ यस्याः विष्णुशक्तेः सकाशादुत्पन्नादव्यक्तादेर्विकारत इत्यन्वयः ।

४ "–व्यतिकराद् विरुद्धकल्पः" इति क्वचित् ।

५ "तत्वानां परस्परं अनुप्रवेशात् । रजसि तमसोऽनुप्रवेशः । तमसि रजसोऽनुप्रवेशः । भूतानां च परस्परमनुप्रवेशः । त्रिवृत्करणप्रक्रियया कारणानामुत्तरोत्तरं कार्यश्चाभेदः । कारणतत्वेऽपि कार्यस्यानुप्रवेशः इति भावः । तस्मात् पौर्वापर्यं कारणनिष्ठं कार्यनिष्ठं प्रसंख्यानमिति वा । पूर्वभावयुक्तमपरभावयुक्तं प्रसंख्यानं गणनेति वा । अधिकसंख्यातः स्वल्पसंख्या पूर्वभावयुक्ता कार्यकारणाभेदविवक्षया प्राप्ता सप्तनवादिसंख्या । अपरभावयुक्ता कार्यस्य कारणात् पृथग्भावविवक्षया प्राप्ता एकादशादिसंख्या । एवं संख्याविभेदो वक्तुः ऋषेः विवक्षितं विवक्षा यथा तत्वानामन्तर्भावविवक्षा बहिर्भावविवक्षा वा यथा वर्तते तथा भवति । तत्वानां परस्परानुप्रवेशाद् विवक्षाभेदश्च युज्यत इति भावः" इति यादवेन्द्रतीर्थाः । अस्मिन् पक्षे पौर्वापर्यरूपं प्रसंख्यानम् । "पौर्वापर्यं च प्रसंख्यानं च वक्तुर्विवक्षाभेदेन भवति" इति शुकदेवः । पौर्वापर्येण प्रसंख्यानमिति वा ।

एकस्मिन्नपि दृश्यन्ते प्रविष्टानीतराणि च ।
पूर्वस्मिन् वा परस्मिन् वा तत्त्वे तत्त्वानि सर्वशः[१] ॥ ८ ॥

पौर्वापर्यमतोऽमीषां प्रसङ्ख्यानमपीच्छताम्[२] ।
यथा विविक्तं यद् युक्तं[३] गृह्णीमो युक्तिसम्भवात्[४] ॥ ९ ॥

अनाद्यविद्यायुक्तस्य पुरुषस्याऽत्मवेदनम् ।
स्वतो न सम्भवेद् यस्मात् तदन्यः पुरुषो भवेत्[५] ॥ १० ॥

'तत्त्वसङ्ख्या विवक्षाभेदेन बहुधा भवन्ति'[६] ॥ * ॥

सर्वथा[८] जीवादन्यः परमेश्वरोऽङ्गीकर्तव्यः । जीवस्य स्वत एव ज्ञानायोगात्[९] ॥ * ॥

तथाहि विजयध्वजीयम्—"पौर्वापर्यप्रसंख्यानं न्यूनाधिकत्वेन तत्वानां गणनं वक्तृविवक्षितं यथा तथा क्रियते । पूर्वासंख्याऽल्पा । अपरा बह्वी । तत्सम्बन्धित्वं पौर्वापर्यम्" इति ।

१ "तत्त्वानि पूर्वस्मिन् कारणे वा परस्मिन् कार्ये वा एकस्मिन् तत्वे इतराणि विलक्षणान्यपि प्रविष्टानि दृश्यन्ते" इति यादवेन्द्रतीर्थाः ।

२ "-मभीप्सताम्" इति प्र· पाठः । ३ "यद्वक्त्रम्" इति च ।

४ "अमीषां तत्वानां अतः परस्परानुप्रवेशान्निमित्तात् यथा विविक्तं यादृशं वैलक्षण्यं विवक्षितं तथा पौर्वापर्यं न्यूनाधिकं प्रसंख्यानमिच्छतां पुरुषाणां मतेषु युक्तिसम्भवात् युक्तं यत् तत् गृह्णीमः । अयुक्तं यत् निरीश्वरत्वादिं तन्न गृह्णीम इति भावः" इति च ।

५ "स्वतो न सम्भवादन्यस्तत्वज्ञो ज्ञानदो भवेत्" इति प्र. पाठः । "ईश्वरराहित्येन तत्वसंख्यानं तामसानां रोचते । सात्विकानां तु ईश्वरापेक्षा सर्वदा वर्तत इत्याह— तदन्यः पुरुषो भवेदिति । स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्वमिति भावः" इति च । तत् तस्मात् जीवस्य स्वतो ज्ञानासम्भवात् परमपुरुषोऽन्य एवाङ्गीकार्यो भवेत् । तदन्यस्ततो जीवादन्य इत्येकं वा पदम् । "अनादिभूता या अविद्या प्रकृतिरूपा लिङ्गशरीरसंज्ञा तया युक्तस्य पुरुषस्य देहिनः आत्मवेदनं स्वस्वभावस्य सुखादेः ज्ञानं वा स्वतः स्वशक्त्या न सम्भवेत् । प्रतिबद्धा दाहशक्तिर्नहि काष्ठं दहतीति भावः । इति यस्मात् प्रतिबद्धज्ञानात् पुरुषात् अन्यः अप्रतिबद्धज्ञानाद्यैश्वर्यसम्पन्नः पुरुषः देहस्थितः जीवस्य ज्ञानदो भवेत् अपेक्षितः । स च पुरुषनामकोऽन्तर्यामीति भावः" इति च ।

६ श्लोकत्रयस्य भावमेकेन वाक्येन संगृह्णन् तस्योत्तरश्लोकेन सम्बन्धमवतारयति— तत्वसंख्या इति ।

७ "भवति" इति क्वचित् । प्र· पाठोऽपि तथा ।

८ याकाऽपि विवक्षा भवतु, यद्यस्तीश्वरविवक्षा, सा तत्वगणना स्वीक्रियेत । यदीश्वरनिरपेक्षा विवक्षातर्ह्ययुक्तेति गर्ह्यैव सेत्याह—सर्वथा ।

९ "स्वतो ज्ञानायोगात्" इति पाठान्तरम् ।

पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि ।
तदन्यकल्पनाऽपार्था ज्ञानं च प्रकृतेर्गुणः[1] ॥ ११ ॥

स च पुरुषरूपेणान्तःस्थितो[2] ज्ञानमुत्पादयति । ईश्वररूपेण बहिस्थः[3] फलं ददाति । नच तयोः स्वरूपयोः किञ्चिद् वैलक्षण्यम् । तयोश्चान्यत्वकल्पना तत्स्वरूपादपगमनप्रयोजनाऽनर्थकारिणीत्यर्थः । ज्ञानस्वरूपस्य जीवस्य कथं ज्ञानोत्पादनमित्यतो वक्ति—ज्ञानं च प्रकृतेर्गुण इति । जन्यज्ञानं प्रकृतेर्गुणः ।

"स्वरूपभूतं[4] ज्ञानं तु सदा जीवस्य विष्णुना । नियतं प्राकृतं ज्ञानं भक्त्या तेनैव दीयते" इति च ॥ * ॥

प्रकृतेर्गुणसाम्ये तु[5] प्रकृतेर्नाऽत्मनो गुणाः ।
सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः ॥ १२ ॥

जन्यज्ञानस्य प्राकृतत्वं साधयति—प्रकृतेर्गुणसाम्ये त्वित्यादिना ॥ * ॥

---

१ "ननु देहसम्बन्धरहितस्येश्वरस्य ज्ञानदानशक्तिर्भवतु । पुरुषस्य तु देहसम्बन्धात् कथमप्रतिबद्धा शक्तिरिति जिज्ञासायामाह—पुरुषेश्वरयोरिति । वैलक्षण्यं प्रतिबद्धत्वाप्रतिबद्धत्वादि सामर्थ्यवैलक्षण्यं अण्वपि ईषदपि न । परमात्मनि न्यूनाधिकज्ञानमनिष्टसाधनमित्याह—तदन्येति । तयोः देहस्थबहिस्थपुरुषेश्वरयोः अन्यकल्पना अन्यत्वकल्पना वैलक्षण्यकल्पना अपार्था सुखविरोधिनी दुःखकारणं चेत्यर्थः । अतः सर्वावतारेषु गुणपूर्णः परमात्मेति भावः । ननु ज्ञानदातृत्वमन्तर्यामिणो वर्णितम् । तत् कथं ज्ञानस्वरूपे ज्ञानस्याभूत्वाभावलक्षणोत्पत्तिरित्यत आह—ज्ञानं चेति । ज्ञानं प्रकृतेः मनोरूपयाः गुणः कार्यरूपमज्ञाननिवर्तकं भवति । विष्णुसामर्थ्यादुत्तेजकात् स्वरूपज्ञानस्याप्यभिव्यक्तिर्भवतीति भावः" इति च ।

२ "–रूपेण तत्स्थितो–" इति प्र. पाठः । ३ "बहिःस्थितः" इति प्र. पाठः । "बहिष्ठः" इति क्वचित् ।

४ "–भूतज्ञानम्" इति प्र. पाठः ।

५ "प्रकृतिर्गुणसाम्यं वै प्रकृते–" इत्यर्वाचीनाः । "स्थित्यादिहेतवः सत्त्वमित्यादिसंज्ञोपेताः प्रकृतेर्गुणाः आत्मनः जीवविशिष्टसूक्ष्ममनसः गुणा न भवन्ति । कुतो न भवन्ति ? आह – गुणसाम्ये । प्रकृतेर्गुणस्य साम्ये सति रजोगुणानुप्रवेशलक्षणगुणान्तरसाम्ये सति । प्रळये सतीत्यर्थः । रजोभागादिभिर्जीवविशिष्टमनसः उपचयाभावात् । उपचितमनोजन्यं ज्ञानं सुतरां जीवस्य स्वभावगुणो न भवति । किन्तु प्राकृतमिति भावः" इति च । अयं भावः—स्थित्यादिहेतवः सत्त्वं रजस्तम इति ये गुणास्ते प्रकृतेरेव गुणा नाऽत्मनः । ततश्च "सत्वात् सञ्जायते ज्ञानम्" इति जन्यज्ञानमपि प्राकृतमित्यायातम् । तत्र स्फुटामुपपत्तिमाह—प्रकृतिगुणानां साम्ये प्रळये प्रकृतेः सकाशादात्मनो ज्ञानादयो गुणा न भवन्तीति तेन ज्ञायते जन्यज्ञानादयः प्रकृतेर्गुणा नाऽत्मन इति । किंच सृष्टौ तावत् स्वरूपज्ञानस्य जन्यज्ञानस्य च सङ्कीर्णतया स्फुटमविवेकेऽपि प्रकृतेर्गुणसाम्ये प्रळये त्विदं स्फुटमवगम्यते–ये प्रकृतेर्गुणास्ते नाऽत्मनः । ये चाऽत्मनो गुणास्ते न प्रकृतेरिति ।

"अन्तःस्थः पुरुषो नाम ज्ञानदः सर्वदेहिनाम्। बहिस्थ ईश्वरो नाम ज्ञानादिफलदो हरिः" इति मात्स्ये। "पुरुषाख्यो हृद्गतस्तु विष्णुर्जीवविबोधकः। फलदात्रा तु बाह्येन य ईशेन भिदां वदेत्। तथैवान्यस्वरूपेषु विष्णोर्यो भेददर्शकः। यश्च जीवेश्वराभेदं पश्येत्[1] तेऽनर्थभागिनः" इति ब्राह्मे ॥ * ॥

सत्त्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते।
गुणव्यतिकरः कालः स्वभावः सूत्रमेव च[2] ॥ १३ ॥

कालो भगवान् ॥ * ॥

[3]पुरुषः प्रकृतिर्व्यक्तमहङ्कारो नभोऽनिलः।
ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव ॥ १४ ॥

---

१ "ये च जीवेश्वराभेदं पश्यन्तोऽनर्थ—" इति प्र. पाठः प्रामादिकः।

२ अत्र प्राचीनटीका—"गुणवैषम्ये सति मनः प्रविष्टानां सत्त्वादिनां कार्याण्याह – सत्त्वं ज्ञानमिति। इह सृष्टौ सत्त्वं ज्ञानमित्युच्यते। कार्यकारणयोरभेदात्। रजः कर्मेत्युच्यते। तमः अज्ञानं अन्यथाज्ञानमित्युच्यते। अस्तु ज्ञानादितत्त्वं सत्त्वादिगुणतः, प्रथमं स्वतो व्यापारसम्पन्नं कारणं किमिति जिज्ञासायामाह—काल इति। स्वभावः स्वत एव भावः स्वसामर्थ्येन सत्त्वप्रतीतिप्रवृत्त्यादिर्यस्य सः स्वतन्त्रः, ज्ञानादौ परानपेक्ष इति भावः। गुणानां व्यतिकरः सृष्टिः येन स कालः साधूनामभीष्टप्रदः परमात्माऽऽदिकारणमित्यर्थः। स्वः परमात्मा तेनैव भावः सत्तादिर्यस्याः सा महालक्ष्मीरनन्तरकारणम्। सूत्रं वायुश्च तदनन्तरकारणमिति भावः। अथवा सूत्रस्य वायोः प्रथमकारणत्वश्रवणात् कथं विष्णोः प्रथमकारणत्वमित्यत आह—सूत्रमिति। सूत्रशब्दार्थोऽपि परमात्मैवेत्यर्थः" इति।

३ "ऋषिभिर्विवक्षाभेदेन बहुधा संख्यातानि तत्वानि दर्शयति—पुरुष इति। पुरुषो हिरण्यगर्भः। प्रकृतिर्गायत्री। व्यक्तं रुद्रः। अहङ्कारः स्कन्दः। भूतानि पञ्च। एवं नव ॥ * ॥ एकादश श्रोत्रादीनि मनसा सह। ज्ञानशक्तयः ज्ञानजनिकाः शक्तयो येषां तानि ज्ञानेन्द्रियाणीत्यर्थः। हे अङ्ग प्रेमास्पद उद्धव। कर्माणि कर्मेन्द्रियाणीत्यर्थः। कार्यकारणयोरभेदादियमुक्तिः। उभयं सङ्कल्पविकल्पजनकं मनः ॥ * ॥ इन्द्रियविषयानाह—शब्द इति। अर्थः। विषयत्वाभिव्यञ्जकोद्भूतत्वादिजातयो येषां ते। कर्मेन्द्रियविषयानाह– गत्युक्त्युत्सर्गेति। उत्सर्गः द्विविधत्वाद् गुह्यद्वयकार्यम्। शिल्पानि कर्माणि हस्तविषयाः। कर्मायतनात् कर्मेन्द्रियात् सिद्धिरुत्पत्तिः येषां ते कर्मेन्द्रियार्थाः। एवं नवैकादश पञ्चपञ्च ज्ञेयाः ॥ * ॥ त्रीणीत्यस्यार्थः गुणाः इति वक्तुं प्रकृतिव्यापारमाह- सर्गादाविति। प्रागुक्तः अन्योन्यानुप्रवेशः कार्यकारणभावाद् युज्यत इति वक्तुं सृष्ट्युक्तिश्चेति भावः। अथवा यदा पुरुषः अव्यक्तं प्रकृतिमीक्षते तदाऽस्य जगतः सत्वादिभिः सर्गादौ सति कारणनियामकत्वात् कारणेषु रूपवती चित्प्रकृतिः नियमनार्थमेव कार्येष्वपि रूपवती। जडप्रकृतिस्तु कार्यरूपा उपादानत्वेन कार्याभेदात्। एवंविधा प्रकृतिर्धत्ते लोकपालनं करोति। ततः पुरुषः हिरण्यगर्भः अव्यक्तं सरस्वतीमीक्षते प्रेरयति रुद्रादिसृष्ट्यर्थमिति

श्रोत्रं त्वग् दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः ।
वाक्पाण्युपस्थपाय्वङ्घ्रि[1] कर्माण्यङ्गोभयं मनः ॥ १५ ॥

शब्दः स्पर्शो रसो गन्धो रूपं चेत्यर्थजातयः ।
गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः ॥ १६ ॥

सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी ।
सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्तमीक्षते[2] ॥ १७ ॥

व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्षया[3] ।
लब्धवीर्याः सृजन्त्यण्डं संहताः प्रकृतेर्बलात्[4] ॥ १८ ॥

"नवैकादश पञ्च त्रीणि" इत्युक्तानि पुरुषः प्रकृतिरित्यादीनि ॥ * ॥

उत्सर्गस्य द्विविधत्वात् पञ्चकद्वयम् ॥ * ॥

[5]त्रीनिति गुणानिति वक्तुं गुणप्रवृत्तिमाह—सर्गादावित्यादिना ॥ * ॥

कार्यकारणभावादन्योन्यानुप्रवेशो युक्त इति वक्तुं सृष्टयुक्तिः ।

"सृज्यस्रष्टृस्वरूपत्वादन्योन्यानुप्रवेशिनः । तिष्ठन्ति तात्त्विका देवा [6]विशेषप्रातिकारणात्" इति [7]निसर्गे ॥ * ॥

भावः" इति च । "उभयात्मकं मनः उभयेन्द्रियसाधारणमित्यर्थः" इति श्रीधरस्वामी । "उभयात्मकं ज्ञानकर्मात्मकम्" इति राधारमणदासगोस्वामी ।

१ "-पाय्वङ्घ्रिः कर्मा-" इति पाठान्तरम् । "पाय्वन्तानि द्वन्द्वैक्येनोक्तानि चत्वारि अङ्घ्रिश्च" इति श्रीधरस्वामी वीरराघवादयश्च । २ "पुरुषोऽव्यक्त ईक्षते" इत्यर्वाचीनाः ।

३ "पुरुषेच्छया" इति यादवेन्द्रतीर्थाभिमतः पाठ इति भाति । तथाहि तद्व्याख्यानम्—"प्रसङ्गादण्डसृष्टिमाह—व्यक्तादय इति । व्यक्तादयः अहङ्कारादिनियामका रुद्रादयः प्रकृतेर्बलात् विकुर्वाणाः विकारं प्राप्ताः कार्यरूपाः सन्तः प्राप्तविशिष्टाकाराः । धातवः स्वयमपि विश्वकर्तारः विश्वधारणशीलाः । परमपुरुषेच्छया संहताः समेताः । लब्धवीर्याश्च सङ्घे शक्त्युपेताश्च । उभयविधप्रकृतेः सकाशात् बलात् बलं प्राप्य अण्डं सुवर्णकोशं सृजन्ति । अतस्तत्वानुप्रवेशवत् तात्त्विकदेवानामप्यन्योन्यानुप्रवेशोऽस्ति । अतस्तत्वानां विवक्षाभेदेन न्यूनसंख्याऽपि युज्यते । तत्रानुक्तमन्यतो ग्राह्यम्" इति । ४ "संयताः प्रकृतेर्बलात्" इति क्वचित् ।

५ "त्रीनिति त्रिगुणानिति" इति प्र. पाठः । "त्रीनिति गुणा इति" इति क्वचित् ।

६ भगवदाज्ञाकरणेन ज्ञानादिविशेषप्राप्तिनिमित्तादिति भावः । "विशेषप्रीतिकारणात्" इत्येके ।

७ "इति नैसर्गे" इति प्र. पाठः ।

"अन्वेकमप्येषु[1]" इत्युक्तत्वात् पुरुषो हिरण्यगर्भः ।

"यदा पुरुषशब्देन विरिञ्चस्यैव वाच्यता । परस्य पृथगुक्त्यैव व्यक्तस्तत्र तु शङ्करः । तदाऽहङ्कारशब्देन स्कन्दस्यैव वचो भवेत्" इति विवेके ॥ * ॥

[2]सत्त्वादीन् गत्यादींश्च विना परमात्मना सह षड्विंशतिः । महदहङ्कारौ ब्रह्मरुद्रावङ्गीकृत्य स्कन्दं विना परमात्मना सह पञ्चविंशतिः ।

"विषयेन्द्रियप्रकृतिदेवताः[3] परमात्मना । पञ्चविंशतितत्त्वानि संख्यातानि विदो विदुः" इति च ॥ * ॥

सप्तैव धातव इति [4]यत्रार्थाः पञ्च खादयः ।
ज्ञानमात्मोभयाधारस्ततो देहेन्द्रियासवः[5] ॥ १९ ॥

---

१ तथह्येकोनविंशेऽध्याये—"नवैकादश पञ्च त्रीन् भावान् भूतेषु येन वै । ईक्षतेऽन्वेकमप्येषु तज्ज्ञानं मम निश्चितम्" (१४) इति । अत्र एषु तत्वेषु निहितमन्यदेकं भगवत्तत्वं कथितमिति तद्विवरणरूपेऽत्रपठिते तत्वविभागेऽपि तत्वमध्यपठितः पुरुषो न भगवान् किन्तु हिरण्यगर्भ एवेति निश्चीयेतेत्यर्थः ।

२ त्रयस्त्रिंशत् तत्वानि पूर्वमुक्तानि । पुरुष इति ब्रह्मणाऽभिमन्यमानं जीवजातम् । प्रकृतिरिति गायत्र्याऽभिमन्यमानं त्रिगुणमयं प्रधानम् । व्यक्तमिति तस्य प्रथमो विकारः रुद्रेणाभिमन्यमानः । तदिदं प्रथमविकारि सूक्ष्मावस्थं जगत् । तेन स्कन्देनाभिमन्यमानोऽहङ्कारः । एवं चत्वारि पञ्च भूतानि चेति नव । तत एकादशेन्द्रियैः सह विंशतिः । पञ्चभिःपञ्चभिर्ज्ञानेन्द्रियविषयैः कर्मेन्द्रियविषयैश्च सह त्रिंशत् । त्रिगुणैः सह त्रयस्त्रिंशत् । तत्र सत्त्वादीन् त्रीन् गुणान् प्रकृतावेवान्तर्भाव्य गत्यादीन् कर्मेन्द्रियविषयांश्च कर्मेन्द्रियेष्वेवान्तर्भाव्य शक्यं तत्वविभागे तेषां परित्यागः कर्तुम् । प्रकृतेर्गुणमयत्वात् । कर्मणां च कर्मेन्द्रियाविनाभावात् । अस्ति हि रूपं चक्षुषा विनाऽपि । नहि गतिः पदाभ्यां विना । ततश्चाष्टौ तत्वानि विहाय पंचविंशतिरवशिष्टानि । तानि परमात्मना सह षड्विंशतिर्भवन्ति । एवं व्यक्तस्य प्रहाणेनाहङ्कारपदेनैव रुद्रस्वीकारे पञ्चविंशतिरेवेत्याह—सत्त्वादीनित्यादिना । अत्र प्रथमपक्षे रमायाः प्रकृतिशब्देनैव ग्रहणं परमात्मन्यन्तर्भावो वा । द्वितीयपक्षे पुरुष इति परमात्मा । प्रकृतिरिति रमा । व्यक्तमिति महत्तत्त्वमानी ब्रह्मा । अहङ्कारो रुद्रः । पञ्चभूतैः एकादशेन्द्रियैः पञ्चज्ञानेन्द्रियविषयैश्च सह पंचविंशतिः ।

३ अत्र विषया इति शब्दाद्याः पञ्च । इन्द्रियाण्येकादश । प्रकृतिपदेन षोडशकस्य विकारस्य प्रकृतिभूताः सप्त मूलप्रकृतिश्चेत्यष्टौ तत्वान्युच्यन्ते । पञ्चभूतानि, महदहङ्कारौ, मूलप्रकृतिश्चेति । सदेवता एताः सह परमात्मना पञ्चविंशतिः । एतेन "केचित् षड्विंशतिं प्राहुरपरे पञ्चविंशतिम्" (२) इत्युद्धवशङ्काऽपि दत्तोत्तरा ।

४ "तत्रार्थाः" इति प्र. पाठः ।

५ "सप्तसंख्याकानि तत्वानि कथयति—सप्तैवेति । खादयः, धातवः कार्यधारणसमर्थाः इन्द्रियादयः, अर्था विषयाः यत्र यस्यां विवक्षायां सर्वेऽप्येकत्वेन स्वीकृताः सन्तः पञ्च भवन्ति ते, ज्ञान ब्रह्मा, उभयाधारः अभिमा-

"ज्ञानशब्दोदितो ब्रह्मा तदाधारो हरिः स्मृतः" इति च ।

[1]तत्र ज्ञानं विना परमात्मानं[2] चाङ्गीकृत्यैव देह[3] इन्द्रियाण्यसुश्च नव तत्त्वानि ।

"सर्वदेहाभिमानी तु देहिनां हि[4] दिवाकरः" इति, "इन्द्रियात्मेन्द्र एवैकः प्राणो नाम प्रजापतिः[5]" इति च ॥ * ॥

[6]चत्यार्येवेति तत्रापि तेज आपोऽन्नमात्मनः ।
जातानि तैरिदं जातं जन्मावयविनः खलु ॥ २१ ॥

अवयविनो जन्म तैः खलु ॥ * ॥

न्यभिमन्यमानयोराधार आत्मा परमात्मा च इति सप्त । नवतत्वान्याह– ततो देहेति । इन्द्रियाण्येकत्वेन विवक्षितानि, देहः, असवः पञ्च प्राणाः, ततः ताभ्यां ब्रह्मपरमात्माभ्यां सहिताः नव तत्वानि । अत्र देहशब्देन तदभिमानी दिवाकरो ग्राह्य." इति यादवेन्द्रतीर्थाः । उभयाधार इति खादिपञ्चकस्य ज्ञानाख्यब्रह्मणश्चाऽधार इति वा । अत्र नवत्वसंख्याविवरणं तात्पर्येऽन्यथा कृतम् । तदुत्तरत्र स्फुटीभवति ।

१ "ततो ज्ञानम्" इति क्वचित् पाठान्तरम् । प्र. पाठोऽपि तथा ।

२ "परमात्मानमङ्गीकृत्यैव" इति च । अनेन वाक्येन नव तत्वानीत्येतत् त्रेधा सङ्गमयति । तथाचायमर्थः— ज्ञानं विना परमात्मानं चाङ्गीकृत्य नव तत्वानीत्येकः पक्षः । ज्ञानं परमात्मानं च विना नवेत्यपरः । ज्ञानं परमात्मानं चाङ्गीकृत्यैवेत्यन्यः । प्रथमपक्षे ज्ञानं विना पञ्च खादयः परमात्मा चेति षट् पूर्वोक्ताः । देहः, इन्द्रियाण्येकम्, असवश्चैकमिति त्रीणि तत्वानि, आहत्य नव । द्वितीयपक्षे ज्ञानं परमात्मानं च विहाय पूर्वोक्ताः पञ्च खादयः । देहः, कर्मज्ञानात्मकं बाह्यमान्तरं चेति वा द्विविधमिन्द्रियम् , असुश्चेति नव तत्वानि । तृतीयपक्षे खादीन् पञ्च विहाय ज्ञानमात्मा च द्वे तत्वे, देहः, मनसा सह दशेन्द्रियाण्येकम्, असवः प्राणाः पञ्चेति नव तत्वानि । तदेतदिन्द्रियात्मेन्द्र एवैक इति सूचितम् । पञ्चप्राणानामेकीकरणेन इन्द्रियाणि वा पञ्च । तदेतदिन्द्रियाण्यसुश्चेति बहुवचनेन सूचितम् । तदेवमनेकाकूतगर्भितमिदं वाक्यम् । "तत्र ज्ञानं परमात्मानं चाङ्गीकृत्यैव देह इन्द्रियाण्यसुश्च नव तत्वानि" इतीयानेव विनाशब्दरहितः पाठः यादवेन्द्रतीर्थादिप्राचीनाचार्यसम्मत इति भाति ।

३ "देहेन्द्रियाण्यसुश्च" इति प्र. पाठः ।

४ "देहिनां तु दिवाकरः । इन्द्रिया–" इति प्र. पाठः ।

५ तथाचासव इति प्राणतत्वाभिमानी ब्रह्मा, इन्द्रियाणीतीन्द्रः, देह इति दिवाकरः । पञ्चभूतैः परमात्मना सह नव भवन्ति । असुपदेनैव ब्रह्मणो ग्रहणात् ज्ञानं विनेति तात्पर्यम् । प्रजापतिरिति दक्षो वा ।

६ " (यदि) चत्वार्येवेति पक्षः, तत्रापि तस्मिन्नपि पक्षे, तेजः, आपः, अन्नम्, पृथ्वीत्यर्थः, आत्मा—एवं चत्वारि । आत्मनः सकाशात् तेजःप्रभृतीनि जातानि । तैः तेजःप्रभृतिभिः इदं ब्रह्माण्डं जातम् । तत्रान्तरवयविनः चतुर्मुखादेः जन्म खलु" इति यादवेन्द्रतीर्थाः । वस्तुतस्तु तात्पर्यानुसारेणैवं व्याख्येयम्—अवयविनः कार्यस्य सर्वस्यापि तैः मूलावयवभूतैः कारणैरेव जन्म खल्विति । "अवयविन इदं जन्म तैः तेजआदिभिः जातं व्यक्तं खलु" इति विजयध्वजीयम् ।

98

[1]सङ्ख्याने सप्तदशके भूतमात्रेन्द्रियाणि च ।
पञ्चपञ्चैकमनसा आत्मा सप्तदशः स्मृतः ॥ २२ ॥

"भूतानि मात्राश्च परस्तत्वैकादशकं स्मृतम्" इति च ।

भूतमात्रेत्यारम्भात् तत्सिद्धेरेकादशानां पृथगनुक्तिः ॥ * ॥

तद्वत् षोडशसङ्ख्यानि[2] आत्मना मन उच्यते ।
भूतेन्द्रियाणि पञ्चैव मन आत्मा त्रयोदश ॥ २३ ॥

इति नाना प्रसङ्ख्यानं तत्त्वानामृषिभिः कृतम् ।
[3]सर्वं न्याय्यं युक्तिमत्वाद् विदुषां किमशोभनम् ॥ २४ ॥

आत्मना सहैव मन उच्यते ।

"आत्मनः सन्निधिस्थत्वान्मनसस्तु तदुक्तितः । उक्तो भवेत् परात्माऽपि तत्त्वषोडशकं यदा" इति च ॥

आत्मशब्देन च ब्रह्मा परमात्मा चोभावुच्येते ।

"भूतेन्द्रियाणि च मनो ब्रह्मा विष्णुस्तथैव च । एवं त्रयोदशैवाऽहुस्तत्त्वानि मुनयो वराः" इति च । "आत्मेति परमात्मा च विरिञ्चश्चापि कथ्यते । वायुर्मनश्च[4] देहश्च स्वयमित्यपि कुत्रचित्" इति प्रत्यये ॥ * ॥

---

१ "सप्तदशके सप्तदशसंख्यासम्बन्धिनि संख्याने कर्तव्ये पञ्चभूतानि, मात्राः शब्दस्पर्शादयः पञ्च, इन्द्रियाणि पञ्च । एकमनसा बुद्ध्यादिभिरेकतामापन्नेन मनसा युक्तानि षोडश । सप्तदशसंख्यापूरक आत्मा स्मृतः" इति यादवेन्द्रतीर्थाः ।

२ "-संख्यान आत्मैव मन-" इति प्र. पाठः । "तद्वत् पूर्वसंख्यानवत् भूतानि पञ्च, मात्राः पञ्च, बाह्येन्द्रियाणि पञ्च, आत्मसन्निधौ स्थितस्य मनसः अन्तस्थत्वेनाऽत्मना गृहीतेन मनश्च सङ्गृहीतमित्युच्यते । अत आत्मना सहैव मन उच्यते । एवं षोडशसंख्यानि तत्वानि । मन आत्मेति यौ ताभ्यां हिरण्यगर्भेण च सह इन्द्रियाणि भूतानि च पञ्चपञ्च । इति त्रयोदश ज्ञेयाः" इति यादवेन्द्रतीर्थीयम् ।

३ "ननु तत्वानां बहुविधानामङ्गीकारः कथं युक्त इति जिज्ञासायामाह—सर्वमिति । युक्तिमत्त्वात् तत्त्वसंख्याविवक्षाभेदसाधकयुक्तीनां सत्त्वात् सर्वं तत्वानां विविधसंख्यानं न्यायादनपेतं न्याय्यमङ्गीकर्तुमुचितमित्यर्थः । अतः विदुषां तत्वानामन्तर्भावबहिर्भावसाधकपरिज्ञानयुक्तानां अशोभनमयुक्तं किम् ? तेषामयुक्तवचनं किमपि नास्तीति भावः" इति च ।

४ एतेन आत्मना सह मनसो ग्रहणं पूर्वमुक्तं रीत्यन्तरेणापि समर्थितं भवति । न केवलं सन्निधिस्थत्वात्, किन्त्वात्मशब्दस्य मनोवाचित्वाच्चाऽत्मशब्देनैव मनसोऽपि ग्रहणमिति ।

॥ उद्धवः ॥

प्रकृतिः पुरुषश्चोभौ यद्यप्यात्मविलक्षणौ ।
अन्योन्यापाश्रयात् कृष्ण दृश्यते न भिदा तयोः[१] ।
प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथाऽऽत्मनि ॥ २५ ॥

यद्यपि परमात्मा प्रकृतिश्च विलक्षणौ । तथाऽपि तयोर्वैलक्षण्यं न लक्ष्यते ।

"अन्तरं च भिदा चेति वैलक्षण्यं प्रकीर्तितम्" इति च ।

तद्वैलक्षण्यं कुतो न दृश्यत इति प्रश्नाभिप्रायः । अन्योन्याधारत्वमेव दृश्यते । नतु परमेश्वरस्यानन्याधारत्वेन प्रकृत्याधारत्वं मन्दमतीनामित्यर्थः ।

"आधारः प्रकृतेर्विष्णुर्नाऽधारस्तु हरेः क्वचित् । तथाऽप्यव्यक्तगो यद्वद् दृश्यते मन्दचेतसाम्" इति पाद्मे ॥ * ॥

॥ श्रीभगवान् ॥

[२]प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ ।
एष वैकारिकः सर्गो गुणव्यतिकरात्मकः ॥ २८ ॥

प्रकृतिः पुरुषश्च इत्येव अन्योन्यविलक्षणावेव । एष विकल्पः । वैलक्षण्यादर्शनं विरुद्धकल्पनमेव । यस्माद् गुणव्यतिकरात्मकः सर्गो विकारनिमित्तः । स च गुणव्यतिकरस्त्रिविधः सत्त्वरजस्तमसामेकैकप्राधान्येन । तत्र तमःप्रधानानामेव विरुद्धकल्पनम् । तस्मात् तम एवात्र कारणमित्यर्थः ॥ * ॥

---

१ "भिदाऽनयोः" इति विजयध्वजीयादिसम्मतं पाठान्तरम् । अत्र यादवेन्द्रतीर्थीयम्—"प्रकृत्यपेक्षया पुरुषस्य सर्वगुणैरुत्तमत्वं प्रकटयितुं पृच्छति–प्रकृतिरिति । यद्यपि प्रकृतिः पुरुषः परमात्मा चेत्येतौ आत्मना स्वभावतः विलक्षणौ भिन्नौ । अथापि प्रकृतावाधारे आत्मा लक्ष्यते प्रकृतिः आत्मनि लक्ष्यते । एवमन्योपाश्रयात्तयोः प्रकृतिपुरुषयोः भिदा परमस्यानन्याधारत्वेन आधारमनपेक्ष्य प्रकृत्याधारत्वम्, प्रकृतेश्च परमात्मानाधारत्वं चेति या भिदा वैलक्षण्यं सा मन्दानां न दृश्यते कुत इति भावः" इति ।

२ "प्रकृतिः पुरुषश्च उभौ इति एवंप्रकारकौ । अन्योन्यविलक्षणावेवेत्यर्थः । एवमपि एषः वैलक्षण्यादर्शनसहितं प्रकृतौ पुरुषाधारत्वज्ञानं विकल्पः । विरुद्धकल्पनं विकल्पः । भ्रम इत्यर्थः । अस्मिन् भ्रमे कारणं विविच्य वक्तुं सृष्टिभेदमाह—सर्ग इति । गुणव्यतिकरात्मकः गुणवैषम्यरूपः सर्गः वैकारिकः विकारनिमित्तः । गुणविकारप्राप्तः । अतो भ्रमस्तमःप्राप्त इत्यर्थः" इति च ।

ममाङ्ग माया गुणमय्यनेकधा [1]विकल्पबुद्धिं च गुणैर्विधत्ते ।
वैकारिकस्त्रिविधोऽध्यात्ममेकमथाधिदैवं त्वधिभूतमन्यत्[2] ॥ २९ ॥

तत्रापि प्रकृतिरेव कारणम् । ईश्वरेच्छा च । विकाराज्जातत्वाद् वैकारिक इत्युच्यतेऽहङ्कारस्त्रिविधोऽपि ।

"वैकारिको महांश्चैव[3] तथाऽहङ्कार एव च । तथैव सात्विकश्चांशो वैकारिक इति त्रिधा" इति शब्दनिर्णये ॥ * ॥

दृग् रूपमर्कश्च परत्र[4] रन्ध्रे परस्परं सिद्ध्यति न स्वतोऽसौ[5] ।

---

१ "विकल्पबुद्धिश्च" इति पाठान्तरम् ।

२ "-दैवमधिभूतमन्यत्" इति प्र. पाठः । अत्र यादवेन्द्रतीर्थीयम्-"भ्रमकारणानि विविच्याह-ममाङ्गेति । हे अङ्ग, प्रिय उद्धव, गुणमयी गुणादिभ्यः प्रधाना मम माया अघटितघटनासामर्थ्यादिरूपाः शक्तयः विकल्पबुद्धिं अन्यथाज्ञानं अनेकधा विविधप्रकारोपेततया गुणैः अप्रधानैस्तमोविकारैः विधत्ते करोति । स च भ्रमहेतुः गुणव्यतिकरः गुणविकारः त्रिविध इत्याह—वैकारिक इति । प्रकृतिगुणविकारप्राप्तः त्रिविधोऽहङ्कार इत्यर्थः । एतद्भ्रमकारणं विवृणोति—अध्यात्ममिति । देहे विद्यमानानि इन्द्रियाणि अध्यात्मशब्दार्थः । एतानि तैजसाहङ्कारजन्यान्यपि अहङ्कारलाभेन भ्रमकारणानीति भावः । अधिदैवं वैकारिकं सूर्यादिषु विद्यमानं तेजः । मरुमरीचिकादेर्भ्रमहेतुत्वदर्शनादिति भावः । तामसाहङ्कारजन्यमधिभूतं भूविकारः । अयमपि सादृश्यभ्रमहेतुरिति भावः" इति । अथचैवं व्याख्येयम्—गुणविकारनिमित्तो भ्रमः । तमसोऽज्ञानमेवचेति तमोगुणस्य तथात्वश्रवणादिति पूर्वमुक्तम् । इदानीं मूलादारभ्य समग्रं कारणजातं विविच्याऽह– ममेति । मम मदधीना सत्त्वादिगुणमयी मूलप्रकृतिः मूलतः विकल्पबुद्धिं विधत्ते । ज्ञानानन्दादिगुणमयी मम माया मदिच्छा च प्रधानकारणं सद् भ्रमबुद्धिं जनयति । गुणैः सत्त्वादिभिर्निमित्तैः । गुणैरप्रधानैरहङ्कारादिभिर्वा । ननु कथं सत्वादिभिर्भ्रमजननम् । तम एव कारणमिति पूर्वोक्तिविरोधात् । विवक्षाभेदेनोभयं सङ्गच्छते । परम्परया स्वकार्यद्वारा गुणत्रयस्यापि तत् सम्भवतीत्याह— वैकारिक इति । वैकारिकः महत्तत्वविकारभूतोऽहङ्कारः सात्विकादिभेदेन त्रिविधोऽपि भ्रमहेतुरिति युक्तं परम्परया त्रिविधस्यापि गुणस्य भ्रमहेतुत्वम् । अध्यात्ममिन्द्रियाणि राजसाहङ्कारजन्यानि । अधिदैवमिन्द्रियाभिमानिशरीरं वैकारिकाख्यसात्विकाहङ्कारकार्यम् । अधिभूतं पञ्चभूतविकारः शरीरादिः तामसाहङ्कारजन्यः । एवं अभिमानिदेवताप्रेरणया देहेन्द्रियसङ्घातः अहङ्कारद्वारेश्वरेच्छया च भ्रमं जनयतीति युक्तं त्रिगुणमयप्रकृतिमूलत्वं सर्वस्य भ्रमजातस्येति ।

३ "महांश्चापि" इति क्वचित् । प्रथमं तावत् वैकारिक इति महान् महत्तत्वमुच्यते । साक्षात् प्रकृतिविकारत्वात् । तदनन्तरभाविनां सर्वविकाराणां मूलत्वाच्च । तदनन्तरं महत्तत्वाद्विकुर्वाणाज्जातोऽहङ्कारः वैकारिक उच्यते । तत्रापि त्रिविधेष्वहङ्कारेषु सात्विकोऽहङ्कारः देवताशरीरसृष्टिहेतुर्विशिष्य वैकारिक उच्यते । एवं त्रिधा शास्त्रेषु वैकारिकशब्दप्रयोगो भवतीत्यर्थः ।

४ "रूपमार्कं वपुरत्र रन्ध्रे" इति प्र. पाठः । ५ "सिद्ध्यति यः स्वतः खे" इति च ।

आत्मा यदेषामुपराम आद्यः[1] स्वयाऽनुभूत्याऽखिलसिद्ध्यसिद्धिः[2] ।
एवं त्वगादि श्रवणादि चक्षुर्जिह्वादि नासादि च चित्तयुक्तम्[3] ॥ ३० ॥

अध्यात्ममिन्द्रियाणि । तैरेव विपरीतज्ञानं[4] जायते ।

"अहङ्कारे विद्यमाने भ्रमो भवति नान्यदा । सम्यग्ज्ञानं हरेः शक्त्या तन्मुक्तस्य विशेषतः । [5]देवतानुग्रहो नित्यो मुक्तस्यापि ह्यपेक्ष्यते[6] । नित्यं तत्प्रतिबिम्बत्वाज्जीवा-

---

१ "यदेषामपरो य आद्यः" इति च । "यदैषामुपराम आद्यः" इति पाठान्तरम् ।

२ "-सिद्धसिद्धिः" इति च । "-सिद्धिसिद्धः" इत्येके ।

३ "अध्यात्मादिकं विविच्याऽह—दृग्रूपमिति । रन्ध्रे देहगतगोळके विद्यमाना दृक् चक्षुरादीन्द्रियमध्यात्ममित्यर्थः । इन्द्रियप्रयोजनमाह—यदा एषामिन्द्रियाणामात्मा अहङ्काराख्यं मनः सहकारि तदा परस्परमिन्द्रियमनसोरन्योन्यमहायेन सिद्ध्यति । विषयज्ञानं भवतीत्यर्थः । असौ वृत्तिज्ञानतद्विषयसमुदायः न स्वतः सिद्ध्यति । किन्तु परतो जायते । अधिदैवमाह—परत्र देहादन्यत्र स्थितः अर्कः अधिदैवम् । अधिभूतमाह—रूपमिति । देहादिकार्यरूपेण विकृतं पृथिव्यादि अधिभूतमित्यर्थः । तर्हि कस्य ज्ञानस्य स्वतः सिद्धिरित्यत आह—एषामुपराम इति । एषामात्मेत्यनयोरावृत्तिः । एषां प्राकृतेन्द्रियादीनामुपरम एवोपरामः । उपरतावित्यर्थः । आत्मा चेतनः स्वतः सिद्ध्यति स्वप्रकाशज्ञानविषयो भवति, ईश्वरसामर्थ्येनेति भावः । परमात्मनः ज्ञानादिव्यापारे सर्वोत्कर्षमाह—आद्य इति । अखिलानां चेतनाचेतनानां सिद्धिः ज्ञानं असिद्धिरज्ञानं जन्मस्थित्यादि च येन भवन्ति सोऽखिलसिद्ध्यसिद्धिः । आद्यस्तु आदौ विद्यमानः, सर्वमूलकारणमित्यर्थः, परमात्मा तु स्वया स्वतन्त्रया स्वविषयिण्या वा अनुभूत्या सिद्ध्यति ज्ञानविषयो भवति । यथा चक्षुरहङ्कारसहितं सद् भ्रमजनकं एवं त्वगिन्द्रियादिकमपि अहङ्कारसहितं भ्रमजनकमित्याह—एवं त्वगादीति । आदिशब्दैस्त्वगिन्द्रियादीनां सहकारिणो गृह्यन्ते । अधिष्ठानसन्निकर्षस्यापि भ्रमहेतुत्वात् तत्सङ्ग्रहायाऽऽदिशब्दस्य बहुधोक्तिः । त्वगादि चित्तयुक्तं सत् एवं चक्षुर्वद् भ्रमकारणम् । चक्षुरिति पुनर्वचनमवधारणार्थम्" इति यादवेन्द्रतीर्थीयम् । अथचैवं व्याख्येयम्—रूपं शरीरम् । तत्र रन्ध्रे गोळके दृक् । परत्र दिवि तदभिमानी अर्कश्चेत्यध्यात्मादित्रयम् । रूपमिति चक्षुर्विषयो वा गृह्यते । तदेतत् त्रयं परस्परं सिद्ध्यति ज्ञानमज्ञानं वा साधयति जनयतीत्येतत् । न स्वतोऽसौ जीवात्मा ज्ञानस्येष्टे । तर्हि मुक्तौ ज्ञानं न स्यात् । बाह्यानामिन्द्रियाणामभावात् । स्वतश्चानीशत्वात् । स्यादेवेत्याह—आत्मा । यद् यस्मात्, एषामिन्द्रियादीनामुपरामे मुक्तौ आद्य आत्मा परमात्मा स्वया स्वरूपभूतयाऽनुभूत्यैव जीवस्य सिद्ध्यति ज्ञानविषयो भवति । जीवं सिद्ध्यति ज्ञापयतीति वा । यतः स एव संसारे मुक्तौ च अखिलानां चेतनानामचेतनानां च मुक्तानाममुक्तानां च ज्ञानस्य सिद्धेरसिद्धेश्च हेतुः । एवं त्वगादि । सर्वत्राऽऽदिपदेन तत्तदभिमानी तद्विषयश्च गृह्येते । चित्तयुक्तमहङ्कारयुक्तमिन्द्रियं सर्वत्र भ्रमहेतुः । अहङ्कारयुक्तत्वं चक्षुषोऽपि सममित्यवधारयितुं चक्षुषः पुनर्ग्रहणम् ।

४ "विपरीतं ज्ञानम्" इति प्र. पाठः । तैरेव इन्द्रियैरेव । इन्द्रियतदभिमानितद्विषयैर्मिलितैरिति वा ।

५ यद्यप्यभिमानिदेवतासहकारो मुक्तस्याप्यपेक्ष्यते । तथाऽपि जीवानां तत्प्रतिबिम्बत्वादनुग्राहकत्वेनैव नतु बाह्येन्द्रियप्रेरकत्वेनेति विशेष इत्याह—देवतानुग्रहो नित्यः ।

६ "ह्यपेक्षते" इति प्र. पाठः प्रामादिकः ।

नामेव कृत्स्नशः। "बाह्यज्ञानं च मुक्तस्य न जडाहङ्कृतेः क्वचित्। किन्तु स्वरूप-शक्त्यैव देवेभ्यश्चाभिजायते" इति ब्रह्मतर्के। "पश्यन्नपि जगत् सर्वं चिद्बलेनैव पश्यति। कुतो मुक्तस्य तु जडं चिद्रूपस्य व्यपेक्ष्यते[2]" इति च।

एषामुपरमे मुक्तौ। चक्षुरिति पुनर्वचनमवधारणार्थम्॥ * ॥

योऽसौ गुणक्षोभकृतो विकारः प्रधानमूलो जगतः प्रसूतिः[3]।
अहं त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामस ऐन्द्रियश्च ॥ ३१ ॥

योऽसौ भ्रमहेतुर्विकारः स गुणक्षोभकृतः॥ * ॥

[4]आत्मा परिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदाऽर्थनिष्ठः।
व्यर्थोऽपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात्॥ ३२ ॥

आत्मा तु परिज्ञानस्वरूपो न गुणक्षोभकृतः। भिदा[5] विपर्ययेण विद्यमानं नास्ति, अविद्यमान-मस्तीति विवादः।

---

१ ननु स्वरूपज्ञानं स्वयाऽनुभूत्या भवतु, ईश्वरज्ञानं वा। बाह्यज्ञानं तु जडाहङ्कारेणैव स्यान्मुक्तानामपि। नेत्याह—बाह्यज्ञानं च।

२ "व्यपेक्षते" इति प्र. पाठोऽपि प्रामादिकः।

३ "प्रधानमूलान्महतः प्रसूतः" इति प्र. पाठः। "भ्रमहेतुत्वेन पूर्वं प्रसक्तस्य अहङ्कारस्योपादानमाह—योऽसाविति। यः असौ भ्रमकारणत्वेन प्राप्तः विकारः कार्यं तामसाहङ्कारः सः गुणक्षोभेण महदहङ्काराभ्यां कृतः। कारणान्तरमाह—प्रधानमूल इति। अहङ्कारस्य प्रकृतिः मूलकारणमित्यर्थः। अहङ्कारकार्यमाह - जगत इति। प्रसूयते अनेनेति प्रसूतिर्जनक इत्यर्थः। अहं अहङ्कारः। मोहहेतुः। तथा विकल्पस्य संशयस्य च हेतुः। त्रिवृत् त्रिरूपः। त्रैविध्यं दर्शयति— वैकारिक इति। ऐन्द्रिय इन्द्रियजनकः। तैजस इत्यर्थः" इति यादवेन्द्र-तीर्थीयम्।

४ "परमात्मनि जीवादिवैलक्षण्यमाह– आत्मेति। आत्मा तु परिज्ञानस्वरूपो न गुणक्षोभकृत इत्यर्थः। भिदा विपर्ययेण सत इदं नास्तीति असत इदमस्तीति विवादः अर्थनिष्ठः अर्थे ईश्वरे निष्ठा यस्य स प्रवर्तते, एवं स्वभ्रा-न्त्या ईश्वरमाहात्म्यापलापं कुबुद्धयः कुर्वन्तीत्यर्थः। एवं विवादादिमुख्यकारणमहमेवेत्याह– व्यर्थोऽपीति। अथ-वा एतद्भ्रान्तिपरिहारः कुत इत्यत आह—व्यर्थोऽपीति। स्वलोकात् स्वाश्रयात् स्वतन्त्रप्रकाशरूपाद् वा मत्तः श्रीकृष्णात् परावृत्ता निवृत्ता धीर्येषाम्, मम माहात्म्यज्ञानरहितानामित्यर्थः। व्यर्थोऽपि विरुद्धार्थोऽपि नरका-दिदुःखहेतुरपि नैवोपरमेत, विवेकाभावादिति भावः, न निवर्तते। मद्भक्तियुक्तानां तु निवर्तेत इत्यर्थः" इति च। परमात्मा परिज्ञानमयः अतस्तत्प्रतिबिम्बभूतो जीवात्माऽपि ज्ञानमयः। तथाऽप्ययं सति नास्तीति, असति अस्तीति वस्तुयाथात्म्यापेक्षया भिदा भेदेन विपरीततया पदार्थनिष्ठः विवादः जीवानामनुवर्तत एव। भगवद्विमुख-त्वात्। यदि भगवन्निष्ठाः तदैव तेषां परिज्ञानमयत्वमभिव्यज्यते निवर्तते च विवादः।

५ "भिदया विपर्ययेण" इति क्वचित्। स एव च विजयध्वजीयसम्मतश्च पाठः।

"असदस्ति च सन्नास्तीत्येवं [1]भेदाद् विवादनम् । सदैव हरिपादाब्जविमुखानां प्रवर्तते" इति च ॥ * ॥

विषयाभिनिवेशेन नाऽत्मानं यत् स्मरेन्मनः[2] ।
जन्तोर्वै कस्यचिद्धेतोर्मृत्युरत्यन्तविस्मृतिः[3] ॥ ३७ ॥

विषयाभिनिवेशेन उत्तरदेहाभिनिवेशेन पूर्वदेहास्मरणं यत् तन्मृत्युः ॥ * ॥

[4]ईदृशायास विज्ञाय त्रैविध्यं भाति वस्तुनि ।
बहिरन्तर्भिदाहेतुर्जनोऽसज्जनकृद् यथा ॥ ॥ ४० ॥

---

१ "—त्येव भेदाद्—" इति क्वचित् ।　　　२ "स्मरेत् पुनः" इति प्र. पाठः । "स्मरेन्मुनिः" इत्यन्ये ।

३ "श्रीहरिस्मरणस्यात्यन्तमभावे महद् दुःखं स्यादित्याशयेनाऽह—विषयाभिनिवेशेन । उत्तरदेहाभिनिवेशेन तदभिमानदार्ढ्येन, आत्मानं पूर्वदेहं मनः न स्मरेत् । पूर्वमनुभूतस्य विविच्य स्मरणं कुतो नास्तीत्याशङ्कयाऽह—कस्यचिदिति । लोकविलक्षणस्य श्रीहरेरधीनात् हेतोः विकर्मादिलक्षणकारणात् जन्तोस्तामसजीवस्य अत्यन्तं पूर्वदेहादेः विस्मृतिः यत् तत् मृत्युरत्यन्तदुःखकारणमित्यर्थः" इति यादवेन्द्रतीर्थीयम् । "कस्यचित् कर्महेतोः उत्तरदेहं प्रविशतः जन्तोर्मनः विषयाभिनिवेशेन उत्तरदेहाभिनिवेशेन आत्मानं पूर्वदेहं न स्मरेत् स्मरणसमर्थं न स्यादिति यत् साऽत्यन्तविस्मृतिर्मृत्युरित्यन्वयः" इति विजयध्वजीयम् । "भगवन्मायालक्षणहेतोः" इत्यन्ये । "विष्णुमाया तदा तेषां मनो बाह्यं करोति हि " इति हि स्मरन्ति ।

४ "इन्द्रियासनसृष्ट्येदं त्रैविध्यम्—" इत्यर्वाचीनाः । "इन्द्रियार्थौ मनश्चेति त्रैविध्यम्—" इत्यन्ये । "अभिमानस्य निवर्तकं देहस्यानित्यत्वेन जीवस्य नित्यत्वेन भेदज्ञानमित्याह—ईदृशेति । ईदृशं वर्तमानम् । आयः एष्यन् । यकारे दीर्घलोपः । सः अतीतः । इति त्रैविध्यं त्रिकालसम्बन्धित्वं विज्ञाय विचारे कृते सति वस्तुनि जीवे भाति । तत् त्रिकालसम्बन्धित्वं बहिर्विद्यमानाद् देहादन्तर्विद्यमानस्य जीवस्य स्पष्टं भेदज्ञानजनने हेतुः । बाल्यकौमारयौवनादिना देहभेदेऽपि जीवस्य स्थायित्वानुभवादिति भावः । तत्र निदर्शनमाह—जन इति । जनः पितृजनः असाधुः प्रायः असज्जनपुत्रकृत् यथा सज्जनाद्भिन्न इति ज्ञायते एवं देहभेदज्ञानस्पष्टतासम्पादकं चेतननित्यत्वज्ञानम् । देहानित्यताज्ञानात् देहे नित्यचेतनभेदः स्पष्टं ज्ञायत इति वा" इति यादवेन्द्रतीर्थीयम् । अथचैवं व्याख्येयम्—आत्मवस्तुनि भूतं भवद् भविष्यदिति त्रैविध्यं भाति । कथम्? ईदृशायास इति । योऽयमीदृशो युवा सम्प्रति प्रतीयते स एवाऽयः उत्तरकालवर्ती च वार्धक्यमनुभवन् भविष्यति । स एव च सः पूर्वकालवर्ती बालकश्चाऽसीदिति । ईदृशश्चासावायश्चासौ स च ईदृशायसः । संहितायां दैर्घ्ये सति ईदृशायासः । पदपाठे दीर्घलोपे सति ईदृशायस इत्येव भवति । उत्तरः काल आयतिः । आयत्यां भव आयः । यः पूर्वमास स एव हि सः । एवं व्युत्पत्तिप्रदर्शनायैव आसेति संहितायां दीर्घाक्षरपाठः । एतेन सश्चेति व्याकुर्वन्तो निरस्ताः । तच्छब्दस्य हीदं रूपम् । एतेन ईदृशायासेत्यविभक्तिको निर्देश इति व्याख्यान्तोऽपि भ्रान्ता एव । तच्छब्दरूपस्य संहितायां विसर्गलोपस्य स्वर-

[1]ईदृशं वर्तमानम्, आयः एष्यन्[2], सः अतीत इति त्रैविध्यं भाति । विज्ञाय वस्तुनि[3] विज्ञाते सति । दीर्घलोपः[4] "अत्रा ते[5]" इतिवत् । "क्षैप्ये दीर्घलोपः" इति सूत्रम्[6] । अयमेवाऽत्मा-

---

सिद्धत्वात् । नन्वज्ञानां नैतत् प्रतीयते । अत एव ते नित्यमात्मानं नाङ्गीकुर्वते । आह–विज्ञाय । ज्ञात्वा विचारिते सति त्रैविध्यं भाति । नह्यज्ञानिनामकृतविचाराणां न भातीति विद्यमानमविद्यमानं भवति । यतो विज्ञाते सति भाति । तदिदं जीवस्य त्रैविध्यं नाम त्रिकालवर्तित्वं बाह्यादनित्याद् देहादन्तस्थस्य जीवस्य भिदा-हेतुर्भेदज्ञापकः । देहस्यानात्मत्वं दृष्टान्तेन द्रढयति–जनः । जनो जनकः असन्निति वर्तते । असज्जनकृदित्युपस्था-नात् । असज्जनकः असन्तमेव जनं जातं प्रायः करोति जनयतीति लोके तावद् दृष्टम् । तथाऽनित्यं पितृशरीरं अनित्यमेव तनयशरीरं जनयेदिति अनित्यत्वादनात्मत्वमेव युक्तं देहस्येति । यदा निमित्तस्य चेतनस्य स्वभावोऽपि प्रायः पुत्रचेतने सङ्क्रामति तदा किमु वक्तव्यमुपादानस्य शरीरस्य स्वभावोऽनित्यत्वमुपादेये शरीरे सङ्क्राम-मतीति । एवमनेन दृष्टान्तेन कैमुत्यमाह ।

१ ईदृशं वर्तमानमिति सामान्ये नपुंसकम् । वस्तुनीति विशेष्यश्रवणात् । ईदृशः आयः स चेत्येव विग्रहः ।

२ "एष्यत्" इति प्र. पाठः प्रामादिकः ।

३ "वस्तुनि ज्ञाते सति" इति क्वचित् । विज्ञाय भातीति क्रियान्वयादर्शनादेवं व्याख्यानम् । तात्पर्यकथनमे-वेदं, न ल्यबर्थः । विज्ञाय वस्तुनि त्रैविध्यं भातीत्युक्ते विज्ञाते सति वस्तुनि त्रैविध्यं भातीत्येव ह्यर्थः पर्यवस्यति । तद् यथा —"बहुधा विचार्य मम त्वेवं प्रतिभाति" इति । विचारे कृते सत्येवं प्रतिभातीति किलार्थः । अथवा विज्ञाय ज्ञात्वा, विचारे कृते सतीति शेषः । फलितमाह– विज्ञाते सति । विज्ञाय विशेषज्ञायेति षष्ठ्यर्थे चतुर्थी वा । रहस्यार्थाविष्करणाय चेदमपूर्वं विवरणान्तरं तात्पर्यकृतोत्थापितं बुभुत्स्वनुजिघृक्षया । यतस्तत्र स्वयमेव प्रभव-ति भगवत्पादः । तदनुगुणमन्यच्चार्थान्तरं स्फुटप्रतीति ग्राह्यमेव । तद्यथा– ईदृशायासविज्ञायेत्येकं पदम् । वक्ष्यति हि—"न धर्माय न कामाय यस्यार्थायास ईदृशः" (२३-१४) इत्युपरितनाध्याये । योऽयमायासः अर्थसम्पाद-नप्रयासः स ईदृशः, केवलमनित्यदेहभरणकारणं नात्मोद्धारहेतुरिति यो विजानाति स ईदृशायासविज्ञः । तस्यास्य विदुषः जीवनित्यत्वं स्फुटं प्रतिभातीति । तदेवमनेकार्थगर्भत्वादेव 'ईदृशायास-' इति क्षैप्ये दीर्घः प्रायुज्यतेत्यादि सुधीभिरनुसन्धानीयम् । स्फुटत्वाद् भगवत्पादो न जगाद ।

४ ईदृशायास इति संहितायां यकारोत्तरं पठ्यमानस्य दीर्घस्वरस्य पदपाठे लोप इत्यर्थः । ततश्च ईदृशायस इत्येव पदपाठः । सोऽयं संहितापदपाठयोः स्वरव्यत्यासः श्रौतसम्प्रदायसिद्ध इत्याह—अत्रा ते । "अत्रा ते भद्रा रशना अपश्यम्" (ऋ॰ १॰ १६३. ५.) "अत्रा ते रूपमुत्तममपश्यम्" (१. १६३॰ ७.) इत्याद्यृग्वेदे । 'अत्र ते' इति हि पदपाठः । "संहितायां यत्र दैर्घ्यं पदे यत्र न दृश्यते । उक्तार्थस्य महाधिक्यम्" इत्याद्यृग्भाष्ये ।

५ केचित्तु "यत्रा त इतिवत्" इति पाठं पठन्ति ।

६ "क्षैप्रे दीर्घलोप इति सूत्रात्" इति प्र. पाठः । क्षैप्रः क्षैप्य इति चैकोऽर्थः । 'यरलवाः क्षैप्राः' इति वैदिक-सम्प्रदायः । त एव च क्षैप्याः । ये संयुक्ततया संहितायां संक्षिप्यन्ते छन्दोनुगुण्याय च विश्लिष्योच्चार्यन्ते ते हि क्षैप्याः । तद् यथा वरेण्यम्—वरेणियम्, अर्हणम्- अरहणम् इत्यादि । क्षैप्येषु यरलवेष्वक्षरेषु संहितायां यदि दीर्घः पठ्यते स लुप्यते पदपाठ इति सूत्रार्थः । अत्र तु यकारः क्षैप्य इति युक्तं संहितादैर्घ्यम् । "क्षैप्रः स्वरविशे-षः" इति वदन्तः केचिच्चिन्त्याः । अत एव यद् विजयध्वजीये पठ्यते— "यज्ज्ञानमन्तरेण पुरुषार्थो न स्यात्

नात्मनोर्विशेषहेतुः। यथा 'प्रायोऽसज्जनोऽसज्जनमेव जनयतीति पितृज्ञानात् पुत्रदौरात्म्यं ज्ञायते, एवमनित्यत्वादनात्मत्वं देहादेरित्यर्थः ॥ * ॥

यथाऽर्चिषां स्रोतसां च फलानां वा वनस्पतेः ।
तथैव सर्वभूतानां वयोऽवस्था च तत्कृता[२] ॥ ४१ ॥

सोऽयं दीपोऽर्चिषां यद्वत् स्रोतसां तदिदं जलम् ।
सोऽयं पुमानिति नृणां मृषा गीर्न मृषायुषाम्[३] ॥ ४२ ॥

सोऽयमेवेति मृषा ।

"स चायमिति तु ज्ञानं न मृषाऽयं स एव तु । इति ज्ञानं मृषैव स्याद् भेदाभेदौ यतस्तनोः[४] । अभेद एव जीवस्य नित्यं प्रत्येकशः पृथक्[५] । दीपदेहनदीवारिफलादीनां पृथक् स्वतः[६] । भेदाभेदौ परिज्ञेयौ कार्यकारणयोरपि । गुणस्य गुणिनश्चैव जातिव्यक्त्योस्तथैव च । तथाऽवयव्यवयवयोः क्रियायास्तद्वतस्तथा । एवं जडेषु नियमश्चिद्रूपेष्वभिदैव तु" इति च । "[७]ये धर्मा नियमेनैव धर्मिणो न वियोगिनः । जडस्था अप्यभिन्नास्ते भिन्नाभिन्ना वियोगिनः" इति च ॥ * ॥

तत्र क्षिप्रं प्रवर्तनीयमिति ज्ञापनाय प्रयुक्तो दीर्घो लुप्यते" इति तदसंगतं वैदिकव्याकरणापरिज्ञानमूलं चेति स्फुटतरं प्रक्षिप्तम् । १ प्रह्लादादयोऽपवादभूता इति प्राय इत्युक्तम् ।

२ "वयोवस्थादयः कृताः" इति प्र. पाठः । "वयोवस्थाश्च तत्कृताः" इत्यन्ये ।

३ "मृषा गीर्धीर्मृषायुषाम्" इति प्र. पाठः । "मृषा गीर्भिर्मृषायुषाम्" इति विजयध्वजादयः । "न मृषा गीर्मृषायुषाम्" इति, "मृषा गीर्न मृषायुषाम्" इति च द्वेधा पाठो यादवेन्द्रतीर्थाभिमत इति भाति । तथाहि तद्व्याख्यानम्— "एवं सति सोऽयं देह इति प्रत्यभिज्ञानं भ्रमः स्यादित्याशङ्क्याऽऽह– सोऽयं दीप इति । दीपार्चिषां दीपेन भिन्नानामपि सोऽयं दीप इति ज्वालाविशिष्टेन विशेष्यस्याभेदप्रत्यभिज्ञानं यथा, (स्रोतसां) गतागतजलयोर्भेदेऽपि तदिदं जलमिति यथा प्रत्यभिज्ञानम्, एवं सोऽयं पुमानिति (साम्प्रत)देहेन पूर्वदेहस्याभेदप्रत्यभिज्ञानं न मृषा । मृषायुषां विशेष्यदेहस्थैर्योपेतानां नृणाम् । मृषाऽल्पमिति वा । अल्पायुषामित्यर्थः । गीः अभेदव्यवहारश्च न मृषा । परिणताद् विशिष्टाद् विशेष्ये भेदाभेदयोः सत्त्वादित्यर्थः । स एवायमिति तु प्रत्यभिज्ञा भ्रान्तिरिति भावः । 'मृषा गीर्न मृषायुषाम्' इति क्वचित् पाठः" इत्यादि । "मृषायुषां अस्थिराणाम्" इति सुदर्शनसूरिः । "अस्थिरायुषाम्" इति वीरराघवः । "मृषा व्यर्थमायुर्येषां तेषाम्" इति शुकदेवः ।

४ तनोरिति पूर्वकालभाविन उत्तरकालभाविनश्च शरीरस्य ।

५ पृथग् भूतकालावच्छेदेन वर्तमानकालावच्छेदेन भविष्यत्कालावच्छेदेन च प्रत्येकशोऽभेद एव ।

६ दीपादीनां तु स्वतः स्वस्मादेव स्वस्य पृथक् पूर्वकालावच्छेदेनोत्तरकालावच्छेदेन च पृथगंशावच्छेदेन च भेदाभेदौ परिज्ञेयौ । एवं कार्यकारणयोर्गुणगुण्यादीनां च । कार्यकारणयोरित्युपादानोपादेययोः ।

७ उक्तं च तत्त्वविवेके– "खण्डिते भेद ऐक्यं च यावद्वस्तु न भेदवत्" इति ।

99

आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ ।
भवाप्ययौ हि वस्तूनामभिज्ञाद्वयलक्षणौ[1] ॥ ४७ ॥

अभिज्ञाद्वयलक्षणौ अभिमानमात्रौ ॥ * ॥

तरोर्बीजविकाराभ्यां[2] यो विद्वान् जन्मसंयमौ ।
तरोर्विलक्षणो[3] दृष्ट एवं द्रष्टा तनोः पृथक्[4] ॥ ४८ ॥

तरोर्बीजविकारदृष्टान्तेन विद्वान् देहाभिमानं त्यक्त्वा संयमं याति[5] । परमात्मनश्च भेदं जानाति प्रकृत्यादेः[6] ।

---

१ "न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः" इत्यर्वाचीनाः । "श्रुत्यादिसिद्धे देहोत्पत्त्यादावनुमानं चाऽह—आत्मन इति । देहस्य भव उत्पत्तिः, अप्ययो लयः । एतौ आत्मनः स्वस्य पुत्रेण जातेन दृष्टान्तेन, स्वस्य पितुरप्ययेन चानुमातुं शक्याविल्यर्थः । अतः सामान्यतः श्रुतिप्राप्ते स्वदेहोत्पत्त्यादौ स्वेनादृष्टत्वादविश्वासो न कर्तव्य इति भावः । देहगता भवाप्ययादयः देहविलक्षणस्य जीवस्य कथं भवन्तीति शङ्कापरिहारं द्रढयितुमुक्तं मूलकारणं स्फोरयति—भवाप्ययाविति । अभिज्ञाद्वयं देहादौ अहङ्कारममकार(रूपं)लक्षणं स्वरूपं ययोस्तौ । देहाभिमानप्राप्ताविल्यर्थः" इति यादवेन्द्रतीर्थीयम् । "वस्तूनां नित्यानां जीवानां भवाप्ययौ अभिज्ञाद्वयलक्षणौ । अभिज्ञाद्वयं जातो मृत इत्यभिमानद्वयमेव लक्षणं ययोस्तौ" इति विजयध्वजीयम् ।

२ "–विपाकाभ्याम्" इत्यर्वाचीनाः ।

३ "–लक्षणो द्रष्टा एवं द्रष्टा" इति च ।

४ "देहात्मनोः स्फुटतरविवेकज्ञानाय निदर्शनान्तरमाह—तरोरिति । तरुः बीजेन जन्म प्राप्नोति, विकारेणावयवापचयेन च्छेदादिना संयमं नाशं प्राप्नोतीति भावः । इत्येवं विद्वान् यः स चेतनः तरोर्विलक्षण इति स्वेन दृष्टः । एवं दर्शनेन तनोः स्वदेहस्य पुत्रादिदृष्टान्तेन जन्मसंयमौ विद्वान् पूर्वोक्तरीत्या स्वनित्यत्वज्ञानी चेतनः देहात् पृथक् अहं भिन्न इति स्वयं स्पष्टं जानीयादित्यर्थः । एवं तनोः सकाशाद् द्रष्टा च तनौ स्थित्वा सर्वसाक्षी परमात्मा च पृथगेव ज्ञात इत्यर्थः" इति यादवेन्द्रतीर्थीयम् । "बीजाद् विकाराच्च तरोर्जन्मसंयमौ यो विद्वान् जानाति तेन विदुषा तर्वन्तःस्थित आत्मा तन्नियामकः परमात्मा च तरोर्विलणो दृष्टः, एवं देहस्य जन्मसंयमौ द्रष्टा जीवस्तन्नियामकः सर्वज्ञः परमात्मा च तनोः पृथग् भिन्न इत्यर्थः" इति विजयध्वजीयम् । बीजविकाराभ्यां जन्मसंयमौ विद्वान् अनुभवन् तरुजीवः, विद्वान् साक्षित्वेन पश्यन् परमात्मा च यथा तरोर्विलक्षणौ शास्त्रदृष्टौ तथा देहेऽपि जीवः परमात्मा च पृथगिति जानीयादिति वा ।

५ अनेन तात्पर्यवचनेन "तरोर्बीजविकाराभ्यां यो विद्वान् याति संयमम्" इत्यपि मूलपाठः स्यादिति सम्भाव्यते । श्रीनिवासतीर्थीयं चात्र संवदते । तथाहि तद्वचनम्—"तरोर्वृक्षस्य यौ बीजविकारौ ताभ्यां दृष्टान्तभूताभ्याम् । तद्दृष्टान्तेनेति यावत् । तरोर्वृक्षाद् विलक्षणः वृक्षशरीराधिष्ठितो जीवस्तत्प्रेरको भगवांश्च दृष्टो ज्ञायते । तरोरादौ बीजत्वावस्था वर्तते । उत्पत्त्यनन्तरं शाखादिना विकारित्वाद्यवस्था भवति, एवमवस्थाद्वयानुभविता तदन्तस्थोऽवस्थाद्वययुक्तवृक्षशरीरानुस्यूतो जीवस्तत्प्रेरको हरिश्चास्ति । 'अस्य यदेकां शाखां जीवो जहात्यथ सा शुष्यति' इत्युक्तेः । एवं तनोः शरीरात् पृथग् विलक्षणो द्रष्टा शरीरादिज्ञाता जीवस्तत्प्रेरको हरिश्चास्तीति शरीराद् वैलक्षण्यम्, उपलक्षणमेतत्, प्रकृत्यादिवैलक्षण्यं च यो विद्वान् जानाति स देहाभिमानं त्यक्त्वा संयमं मोक्षं याति प्राप्नोतीति" इति ।

६ "प्रकृतेरेवमात्मानमविविच्याबुधः पुमान्" इत्युत्तरश्लोकानुगुण्यायैवमुदितम् ।

"बीजाद्यवस्थासंयुक्ताद् वृक्षाद् द्रष्टा यथा पृथक् । एवं विकारिणो विष्णुर्जीवश्च[१] पृथगेव तु" इति च ॥ * ॥

नृत्यतो गायतः पश्यन् यथैवानुकरोति तान् ।
एवं बुद्धिगुणान् पश्यन्ननीहोऽप्यनुकार्यते[२] ॥ ५१ ॥

"[३]दुःखशोकादयः सर्वे ज्ञेया बुद्धिगुणा इति । सुखज्ञाने तु जीवस्य भक्तिः स्नेहस्तथैव च । विपर्ययेणासुराणां जीवबुद्धिगुणा मताः" इति च[४] । "आत्मनोऽपि गुणा बुद्धिकृता बुद्धिगुणा[५] इति । उच्यन्ते सुखदुःखाद्याः परमात्मकृता यथा" इति त्रैकाल्ये ॥ * ॥

यथा मनोरथधियो विषयानुभवो मृषा ।
[६]स्वप्नदृष्टश्च दाशार्ह तथा संसार आत्मनः ॥ ५२ ॥

---

१ 'द्रष्टा' इति पूर्वार्धोक्तस्यैव व्याख्यानम्—विष्णुर्जीवश्चेति ।

२ "विषयापेक्षाविनिर्मुक्तस्वभावस्य साधुचेतनस्य स्पर्शसम्मूढता कथमिति जिज्ञासायामाह–नृत्यत इति । तान् नृत्यादिकर्तॄन् अनुकरोति तद्वन्नर्तनादौ प्रवर्तते यथा तथा अनीहोऽपि, स्वभावतः विषयेच्छारहितोऽपि अनुकार्यते विषयेषु प्रवर्तते । अन्तःकरणविशिष्टरूपेणेति भावः । अन्तःकरणदुःखस्य सुखस्य च स्वगतत्वबुद्ध्येति भावः" इति यादवेन्द्रतीर्थीयम् । "अनीहोऽपि दुःखाद्यनुभवायोग्योऽपि बुद्धिगुणान् दुःखादीन् पश्यन्ननुभवन् अहं दुःखीत्यादि ममत्वेनानुकार्यते हरिणेति शेषः" इति विजयध्वजीयम् ।

३ "सुखशोकादयः"(?) इति क्वचित् । सज्जीवस्य दुःखशोकादयो बुद्धिगुणाः । सुखज्ञानादयः सर्वे स्वरूपगुणाः । एवमासुराणामसज्जीवानां विपर्ययेण जीवबुद्धिगुणा मताः । सतां जीवगुणाः सुखज्ञानादयस्तेषां बुद्धिगुणाः । सतां बुद्धिगुणाः दुःखशोकादयस्तेषां स्वरूपगुणा इत्यर्थः । क्षुदादिजं दुःखम् । बन्धुनिधनादिजः शोक इति विवेकः ।

४ "इति त्रैकाल्ये" इति क्वचित् ।

५ यद्यप्यात्मनोऽनुभवितृत्वेनाऽत्मन एव ते गुणा इति शक्यं वक्तुम् । तथाऽपि बुद्ध्युपादानका इति ते बुद्धिगुणा एवोच्यन्त इत्यर्थः । तत्र दृष्टान्तमाह–परमात्मकृता यथा । यथा भगवतो निमित्तकारणत्वेन गुणा भगवत्कृता उच्यन्ते तथा बुद्धेरुपादानत्वेन ते बुद्धिकृता इति बुद्धिगुणा उच्यन्ते । न तत्र जीवस्य किञ्चित् स्वत्वं नाम । "आत्मनोऽपि गुणा बुद्धिकृतबुद्धिगुणा इति" इति प्र॰ पाठः प्रामादिकः ।

६ "स्वप्नदृष्टाश्च" इति प्र. पाठः । "मनोरथानां पुरुषप्रयत्नजन्यवासनारूपविकृतविषयाणां धीः यस्य तस्य चेतनस्य स्वप्ने दृष्टः विषयानुभवः बाह्यविषयाभेदज्ञानं मृषाऽर्थरहित आरोपः, तथाऽऽत्मनः आत्मनि प्रतीयमानः संसारः चेतने दुःखतादात्म्यप्रतीतिर्मृषा मिथ्या । अथवा मृषा वृथा । तत्कालेऽल्पतमहर्षादिजनक इत्यर्थः । अथवा संसारः दुःखसम्बन्धः जीवे स्वत एव भवतीति बुद्धिर्मृषा । दुःखादेरौपाधिकत्वादिति भावः" इति यादवेन्द्रतीर्थीयम् । "यथा मनोरथधियः मनोरथविषयाः धियः मृषा वृथा, यथाच स्वप्नदृष्टो विषयानुभवोऽपि मृषा तथा हे दाशार्ह उद्धव, जीवस्य संसारोऽपि वृथाऽल्पप्रयोजनः" इति विजयध्वजीयम् । "मनोरथधियः मनोरथबाह्यपदार्थाभेदबुद्धिमतः" इत्येके ।

मृषा वृथा ।

"अल्पप्रयोजनं यत्तन्मृषेत्येव तदुच्यते" इति शब्दनिर्णये ।

आत्मनः स्वत एव दुःखाद्याः सुखादिवदिति मिथ्याबुद्धिरिति वा ॥ * ॥

इत्येकादशस्कन्धे द्वाविंशोऽध्यायः

[त्रयोविंशोऽध्यायः]

मनोवशेऽन्ये हि भवन्ति देवा[1] मनो हि नान्यस्य वशं समेति ।
भीमो हि देवः सहसः सहीयान् नात्याविशत् तत् स हि देवदेवः[2] ॥
॥ ४८ ॥

तं दुर्जयं शत्रुमसँह्यवेगमरुन्तुदं तन्न विजित्य केचित् ।
कुर्वन्त्यसद्विग्रहमत्र मर्त्यैर्मित्रैरुदासीनरिपुं[3] विमूढाः ॥ ४९ ॥

---

१ "—न्ये ह्यभवन् स्म देवा मनश्च नान्यस्य" इति प्र. पाठः ।

२ "युञ्ज्याद् वशे तं स हि देवदेवः" इति च ।

३ "–र्मित्राण्युदासीनरिपून्" इत्यर्वाचीनाः । "–र्मित्रार्युदासीनरिपून्" इत्यन्ये । अत्र यादवेन्द्रतीर्थीयम्— "अन्ये विष्णुश्रीब्रह्मसरस्वतीभ्योऽन्ये तत्वदेवाः मनोनियामकरुद्रवशे भवन्ति । भीमो देवः भयङ्करो रुद्रः नान्यस्य वशं समेति । कुत इत्यत आह— सहसः सहनशक्त्युपेतात् सहीयान् सहनशक्तिमान् स सात्विकमनोनियामको रुद्रः देवदेवः सर्वदेवोत्तमो हि । अतः तं मनोनियामकमन्यः नात्याविशत् नातिक्रान्तवान् । अतो ज्ञानार्थं रुद्रानुग्रहः सम्पादनीय इत्यर्थः ॥ * ॥ यथाऽनुग्रहः एवं मनोनियामकस्य जयोऽपि सम्पादनीय इत्याह—तं दुर्जयमिति । असँह्यवेगमनिवार्यवेगमत एव दुर्जयं विषयेभ्यो निवर्त्य वशीकर्तुमशक्यं अरुन्तुदमिव मर्मप्रदेशं विभिद्य दुःखजनकमिव बहुदुःखजनकविषयासक्तिप्राप्तदुष्कर्मपुरःसरमिति भावः । शत्रुं (रिपुं) शासितारं वा तं तादृशं तामसमनोनियामकम् । ननु मनसो दुर्जयत्वे तामसत्वे वा कथं मुनीनामीश्वरध्यानादि भवेदित्याशंक्याऽह—उदासीनरिपुम् । उदासीनाः विषयासक्ततया ईश्वरध्यान उपेक्षकाः तेषामेव रिपुम् । केचिद् रागिणः विमूढा ज्ञानरहिताः मनः अविजित्य मर्त्यैर्मित्रैर्वा सह असति, स्वाधीनतयाऽविद्यमानविषयजातसिद्ध्यर्थमिति भावः, विग्रहं विरोधं कुर्वन्ति । पूर्वश्लोके देव इत्यत्र शत्रुमिति व्यपदेशः सात्विकतामसमनोविवक्षया युज्यते" इति । सहसः सहीयान् बलिभ्योऽपि बलीयान् । "सहसः वायोः सकाशात् तदनुग्रहेण सहीयान्" इत्यन्ये । भीमो रुद्रः । "व्योमकेशो भवो भीमः" इत्यभिधानम् । "देवदेवः देवस्य सात्विकमनसः देवः अभिमानी" इति विजयध्वजीयम् । श्रुतिं चात्र पठन्ति—"मनसो वशे सर्वमिदं बभूव नान्यस्य मनो वशमन्वियाय । भीष्मो हि देवः सहसः सहीयान्" इत्यादि ।

सात्विकमनोविवक्षया देवशब्दः । तामसमनोविवक्षया[1] शत्रुशब्दः ।

"[2]एकस्थानाधिपत्ये तु भिन्नानामपि युज्यते । अभेदेन परामर्शः सादृश्ये चापि[3] वस्तुनोः" इति प्रयोगे । "ऋते द्वे ब्रह्मणी[4] कस्य मनो याति वशं क्वचित् । श्रियं सरस्वतीं वाऽपि याति वा तत्प्रसादतः" इति पाद्मे ।

उदासीनानां रिपुम् । [5]सम्यग् यततां न रिपुत्वं शक्यत इत्यर्थः॥ * ॥

देहं मनोमात्रमिदं[6] गृहीत्वा ममाहमित्यन्धधियो मनुष्याः ।
एषोऽहमन्योऽयमिति भ्रमेण दुरन्तपारे तमसि भ्रमन्ति[7] ॥ ५० ॥

अभिमानमात्रेण जीवस्य देहेन सम्बन्ध इति मनोमात्रम् । मनसा निर्माणमिति[8] । अहमन्य इत्यपि देहमात्रे मन्यन्ते ।

---

१ "तामसविवक्षया" इति क्वचित् पाठान्तरम् ।

२ ननु सात्विकमनोभिमानी रुद्रः पूर्वश्लोके देवशब्देन प्रस्तुतः । तामसमनोभिमानी कालनेमिरुत्तरत्र शत्रुपदेनोच्यते । तस्य च न पूर्वश्लोके प्रसक्तिः । तत् कथं "तं दुर्जयं शत्रुम्" इति तच्छब्देन परामृश्यते? आह—एकस्थानाधिपत्ये तु । पूर्वं सात्विकं मनः प्रस्तुतम् । उत्तरत्र तामसं परामृश्यत इत्यभिमन्यमानविवक्षायामपि न दोषः । उभयोरपि हि समानं मनस्त्वम् । एतदप्युक्तम्—"सादृश्ये चापि वस्तुनोः" इति ।

३ "सादृश्येनापि" इति प्र. पाठः । "सादृश्ये वाऽपि" इति च क्वचित् ।

४ ब्रह्म च ब्रह्मा च द्वे ब्रह्मणी । विष्णुर्विरिञ्चश्च । विरिञ्च इति वायुरप्युक्तः । एवं सरस्वतीति भारती च । कस्य स्वशक्त्या मनो वशं याति ? न कस्यचित् । कथं तर्हि जितमनसो ज्ञानिनः ? आह-याति वा तत्प्रसादतः । तेषां विष्णुश्रीब्रह्मवायूनां प्रसादे सति मनोऽभिमानी रुद्रोऽपि स्वयं प्रसन्नो वशं याति । तस्य मनसः तदभिमानिरुद्रस्य प्रसादत इति वा । प्रसन्नः सन् स्वयमेवोपासकस्य वशे तिष्ठति । न तु कस्यचित् स्वशक्तिबलेनेति ।

५ "सम्यग्ज्ञानवतां न रिपुत्वम्" इति प्र. पाठः नातिस्वरसः । भगवन्मार्गे प्रयतमानानां विषये न मनः शत्रुवद् वर्तेत । तामसमनोऽभिमानी कालनेमिस्तान् विरोद्धुं न शक्नोति चेति ।

६ "-मिमं गृहीत्वा" इति प्र. पाठः । देहशब्दः क्लीबेऽपि पठ्यते । तेनेदं देहमिति साधु । "कायो देहः क्लीबपुंसोः" इत्यमरः ।

७ "मनोमात्रम्, अभिमानरूपमनसा निर्मितम् । कर्मपुरःसरमिति भावः । इदं देहं गृहीत्वा प्राप्य, एतद्धनादिकं ममैव, अहमेव सर्वव्यापारकर्तेति भ्रमेण अन्धधियः आवृतसम्यग्ज्ञानाः, एषः सौन्दर्योपेतः देहः अहमित्यभेदभ्रमेण । सात्विकानां देहाभेदभ्रमाभावेऽपि तामसानामेष भ्रमोऽस्तीति भावः । पशुदेहाद् भिन्नदेहः अहमिति भ्रमेण तमज्ञात्वा ईश्वरतद्भक्तापराधं च कृत्वा अन्धे तमसि भ्रमन्ति पतन्तीत्यर्थः" इति यादवेन्द्रतीर्थीयम् । एतेन "एषोऽहमन्योऽहमिति भ्रमेण" इति यादवेन्द्रतीर्थाभिमतः पाठः स्यादिति सम्भाव्यते । वस्तुतस्तु एष देह एवाहं यज्ञदत्तः, अयमन्यो देह एवायं देवदत्त इति भ्रमेणेति व्याख्येयम् । तात्पर्यानुगुण्यात् ।

८ मनसा हि देहस्य निर्माणं भवतीति हेतोरित्यर्थः । स्मर्यते हि—"यँयं वाऽपि स्मरन् भावम्-" इत्यादि ।

"देहमात्रं स्वमात्मानं यः परं चाभिपश्यति[1]। अन्धे तमसि मग्नस्य नोत्तारस्तस्य[2] कुत्रचित्" इति च ॥ * ॥

जनोऽस्य[3] हेतुः सुखदुःखयोश्चेत्
किमात्मनश्चात्र हि [4]भौमयोस्तत्।
जिह्वां क्वचित् सन्दशति स्वदद्भि-
स्तद्वेदनायां कतमाय कुप्येत्[5] ॥ ५१ ॥

"[6]जनशब्दः स्वतो जीवे क्वचिद् देहे [7]च वर्तते" इति प्रयोगे ॥ * ॥

---

१ "परं च प्रपश्यति" इति क्वचित्।

२ "नोत्तरस्तस्य" इति च। "नोत्थानं तस्य" इति च क्वचित्।

३ "जनस्तु हेतुः" इति प्र. पाठः। "-श्चात्र ह भौमयोस्तत्" इति च।

५ 'नायं जनो मे सुखदुःखहेतुर्न देवताऽऽत्मा ग्रहकर्मकालाः' इति 'मनः परं कारणमामनन्ति' इति च पूर्वमुक्तम् (श्लो. ४३)। तत्र मनसः सुखदुःखमयसंसारकारणत्वमेतावता प्रबन्धेन प्रतिपादितम्। सम्प्रति जनादीनां षण्णामकारणत्वमाह। जन्यत इति जनो देहः। देहे सति सुखं दुःखं च। तस्माद् देह एव कारणमिति शङ्कां तावन्निराह--जनोऽस्य। अस्य जीवस्य सुखदुःखयोर्हेतुः जनो देहश्चेत्, अत्र अस्मिन् पक्षे, अत्र अस्मिन् देहे विद्यमानस्येति वा, आत्मनः किमायातम्? न किमपि। हीत्यात्मनो देहविलक्षणस्वभावमास्वादयति। तदेवाह—भौमयोस्तत्। पार्थिवयोः शरीरयोर्हि तत् सुखं दुःखं वा स्यात्। शरीरेण पीडयति। शरीरमेव हि पीडितं भवति। निर्मुक्ताभिमानस्याऽऽत्मनो न किमपि हीयते। ननु कथं तर्ह्यहं दुःखीत्यनुभवः? तत्रापीदमेवोत्तरम्—भौमयोस्तत्। भौमविकारभूतयोर्मनसोः सतोरेव हि तथाऽनुभवः। अन्नविकारो हि मनः। "अन्नमशितं त्रेधा विधीयते....योऽणिष्ठस्तन्मनः", "अन्नमयं सौम्य मनः" (छा. ५. ५.) इत्यादेः। कश्चिदेनं पीडयामीत्यभिमानेन मनसा पीडयितुमिच्छति। अपरः पीडितोऽहमनेनेति अभिमानरूपे मनसि सत्येव मन्यते। एवमभिमाने सति सुखदुःखे तदभावे सत्यपि देहे तदभाव इत्यन्वयव्यतिरेकाभ्यां मनस एव हेतुत्वं न देहस्येति। ननु तर्हि कथं पीडकाय कुप्यन्ति? व्यर्थ एवायं कोप इत्याह—जिह्वाम्। स्वदन्तैः स्वजिह्वामेव कश्चित् सन्दशति। तदा तस्यां जिह्वावेदनायां कतमाय कुप्येत्? किं स्वदन्तेभ्यः कोऽपि कुप्यति? यथा पृथिवीविकारयोर्जिह्वादन्तयोः पीड्यपीडकभावे सत्यपि न कोपः एवं पार्थिवयोः स्वपरशरीरयोरपि। अथ च दन्तानां जिह्वायाश्च स्वत्वाभिमान एव तत्राकोपहेतुः। अन्यशरीरे च न स्वत्वाभिमान इति। तर्हि स्वः पर इत्यभिमानरूपं मन एव कारणमित्यन्ततोऽस्मत्समय एव शरणं पूर्वपक्षिणोऽपि। तस्मान्न जनो हेतुरिति स्थितम्।

६ जनशब्दस्याऽऽत्मा देह इति चार्थः। न तावदात्माऽत्र विवक्षितः। "नायं जनो मे सुखदुःखहेतुर्न देवताऽऽत्मा" इति तस्य पृथग् ग्रहणात्। तस्माज्जनो देह इति सिद्धम्।

७ "देहेऽपि वर्तते" इति क्वचित् पाठान्तरम्।

[1]दुःखस्य हेतुर्यदि देवताऽस्तु किमात्मनस्तत्र विकारयोस्तत् ।
यदङ्गमङ्गेन [2]विहन्यते क्वचित् क्रुध्येत कस्मै पुरुषः स्वदेहे ॥ ५२ ॥

अयोग्यक्रोधादेर्मन एव कारणम् ।

"अविकाराश्च ते देवा विकारा इति शब्दिताः । अभिमानाद् विकारस्य स्वतः शक्ता अपि ध्रुवम्" इति च ॥ * ॥

आत्मा यदि स्यात् सुखदुःखहेतुः
किमन्यतस्तत्र निजः स्वभावः[3] ।
[4]नह्यात्मनोऽन्यद् यदि तन्मृषा स्यात्
क्रुध्येत कस्मै न[5] सुखं न दुःखम्[6] ॥ ५३ ॥

---

१ ननु जडस्य देहस्य मा नाम हेतुत्वं भूत् । तत्वाभिमानिनो देवास्तु स्युः । तत्तदिन्द्रिदेषु स्थितास्तत्तत् सुखं दुःखं वा दद्युरिति । नेत्याह—दुःखस्य हेतुः । देवता तत्वदेवगणः दुःखस्य सुखस्य वा यदि हेतुरित्यभ्युपेयते, अस्त्वेवम्, तथाऽपि कथमुक्तदोषनिस्तारः? यतस्तत्र देवतायां नियामिकायां सत्यामप्यात्मनः किमायातम् । विकारयोर्हि तत् स्यात् । विकार इति विकाराभिमानिनी देवतोच्यते । "अभिमानिव्यपदेशस्तु–" इति शास्त्रसम्प्रदायात् । तथाचैकया पञ्चभूतविकारेन्द्रियाभिमानिदेवतया पीडिताऽपरेन्द्रियाभिमानिदेवतैव स्यात् । आत्मनस्तु किं हीयते? ननु नैवमस्ति । नहि देवता क्वापि दुःखभाजनं भवितुमर्हति । किन्त्वात्मैव दुःखमनुभवति । सत्यमेवम् । तत्रास्मदुक्तमेव कारणं न भवदुक्तमित्याह – विकारयोस्तत् । अन्नविकारयोः राजसतामसविकारयोर्वा पीड्यपीडकयोरुभयमनसोः सतोरेव हि तथाऽनुभवः । नतु जितमनसस्त्यक्ताभिमानस्य । तस्मान्मनोविकार एव सुखदुःखहेतुरिति युक्तः पन्थाः । तदेव स्फुटं विव्रियते—यदङ्गमङ्गेन । यदि स्वमेवाङ्गं स्वेनैवाङ्गान्तरेण विहन्येत तदा कस्मै तत्वदेवाय कुप्येत्? किं विहताङ्गाभिमानिने? आहोस्विद् विहन्त्रङ्गाभिमानिने? यदि कदाचिच्चक्षुरङ्गुल्या विहन्यते तदा किं हस्ताभिमानिन इन्द्राय कोऽपि कुप्यति? यदि कोऽपि कोपमर्हति चक्षुरभिमानी सूर्यस्तावदर्हेत् । आत्मनः किमायातम् । एवं पीडकं परं प्रत्यप्ययोग्य एव क्रोधः । यद्ययोग्यमपि क्रोधं करोति तत्रापि मन एव कारणमिति सूक्तम्–"मनः परं कारणमामनन्ति" इति । तस्मान्न देवता सुखदुःखहेतुरिति स्थितम् ।

२ "निहन्यते" इति प्र. पाठः । ३ "निजस्वभावः" इति पाठान्तरम् ।

४ "नैवात्मऽनोऽन्यद्–" इति क्वचित् । ५ "कस्मान्न सुखम्" इति प्र. प. पाठः ।

६ ननु तर्ह्यात्मैवास्तु सुखदुःखहेतुः। नेत्याह—आत्मा यदि स्यात् यद्यात्मा स्वयमेव सुखदुःखहेतुस्तत्र तर्हि तत्र सुखदुःखानुभवे अन्यतः बाह्येन स्रक्चन्दनादिताडनादिसाधनान्तरान्वेषणेन किं फलम्? यतो निज एव हि स्वभावस्तत्र प्रवर्तते । न बाह्यसाधनापेक्षाऽत्मनः । तर्ह्यस्तु स्वभावत एव सुखं वा दुःखं वाऽनुभवतीति । तदपि न सम्भवतीत्याह– नह्यात्मनोऽन्यत् । सुखं ह्यात्मनो निजः स्वभावः । नहि स्वभावादन्यत् दुःखं तस्य युज्येत । ततश्च यद्यात्मैव सुखदुःखहेतुः तर्हि सुखमेव केवलमनुसन्दध्यात्, न दुःखम् । ननु दुःखं दृश्यते । अहं दुःखी-

नह्यात्मनः स्वभावादन्यद् भवति । यदि दृश्यते तथाऽपि मृषा स्यात् । सुखरूपं दुःखं न भवति । अतो मन एव तथा दर्शयति ।

"जीवस्य सुखरूपस्य न दुःखं क्वचिदिष्यते । अतो मनोऽभिमानेन दुःखी भवति नान्यथा" इति भारते ॥ * ।

ग्रहा निमित्तं सुखदुःखयोश्चेत्
किमात्मनोऽजस्य जनस्य ते वै ।
ग्रहैर्ग्रहस्यैव भवन्ति पीडाः[१]
क्रुध्येत कस्मै पुरुषस्ततोऽन्यः[२] ॥ ५४ ॥

गृह्यमाणत्वाद् ग्रहो देहः[३] ॥ * ॥

त्यनुभवात् । सत्यं दृश्यते । अत एव त्वदुक्तं दुरुक्तमित्याह—यदि तन्मृषा स्यात् । दृश्यते चेदपि त्वत्पक्षे स दुःखानुभवो मृषा मिथ्यैव स्यात् । स्वभावस्यानपायात् । तदेवाऽह—न सुखं न दुःखम् । यत् सुखरूपं तन्न दुःखरूपं यद् दुःखरूपं तन्न सुखरूपमित्यावृत्त्याऽन्वयः । एतेनेदमप्याह यो दुःखरूपस्तामसः स सुखं यः सुखरूपः सात्विकः स दुःखं नानुसन्दध्यादेवेति नोभयहेतुत्वं कथञ्चिदप्यात्मन इति । तस्मात् कस्मै कुप्येत्? न हि स्वयमेव स्वस्मै कोऽपि कुप्यति । न युज्यते च दुःखहेतुत्वं स्वस्येत्युक्तम् । ननु सत्यं मृषैव दुःखरूपत्वमात्मनः । किन्तु मनोऽभिमानेनाऽऽत्मनि प्रतीयते? तर्ह्यस्मत्पक्षमेव समाश्रयसे । तेन सूक्तं 'मनः परं कारणमामनन्ति' इति । यतो मनोऽभिमानमन्तरा केवलमात्मन एव सुखदुःखहेतुत्वे बाह्येन स्रक्चन्दनादिना सुखम्, ताडनादिना दुःखं च न स्यात् । तस्मान्नाऽऽत्मा सुखदुःखहेतुरिति स्थितम् । तात्पर्यानुगुण्येन "कस्मै नु सुखं न दुःखम्" इति वा पाठः ।

१ "-स्यैव वदन्ति पीडाम्" इति प्र॰ पाठः ।

२ आदित्यादयो ग्रहाः सुखदुःखयोर्निमित्तमिति चेत् । तदाऽप्यजातस्याऽऽत्मनः किमायातम् । यतो जन्यत इति जनस्य देहस्यैव हि ते जननक्षणानुगुणं सुखदुःखयोर्निमित्तं भवन्ति । यो यदा जातस्तस्य तत्तत् फलमिति दैवज्ञाः सङ्गिरन्ते । तेन जातकमेव ग्रहाः पीडयन्ति । तत् कथमजातं ग्रहाः पीडयेयुः । तदेव स्फुटमाह—ग्रहैः । आदित्यादिभिर्ग्रहैः ग्रहस्य देहस्यैव पीडा भवन्तीति लोकसिद्धमेतत् । भोगार्थं जीवेन गृह्यत इति व्याध्यादिभिर्गृह्यत इति वा ग्रहो विग्रहः शरीरमिति यावत् । ततश्च शरीरादन्य आत्मा कस्मै ग्रहविशेषाय कस्मै कारणाय वा क्रुध्येत? ननु तर्हि "अहं ग्रहदोषेण पीडितः" इति प्रतीतिः कथं घटते? अस्यापीदमेवोत्तरमित्याह—ग्रहैर्ग्रहस्यैव भवन्ति पीडाः । अस्त्वीयं स्वीयत्वेन गृह्णातीति ग्रहो मनः । तस्य सत एव ग्रहैः पीडा भवन्ति । अभिमान एव निमित्तमिति यावत् । तस्मान्न ग्रहाः सुखदुःखहेतव इति स्थितम् ।

३ "गृहो देहः" इति प्राचीनकोशेषु पठ्यते । तदनुगुणम्— "गृहैर्गृहस्यैव भवन्ति पीडाः" इति भागवतमूलकोशेषु च । लिपिकृत्प्रमादः स्यात् । 'ग्रहा निमित्तम्' इति श्लोके ग्रहा इति देहा उच्यन्ते । नाऽदित्यादिग्रहा इति यद् विजयध्वजीयादिव्याख्यानं तत् तात्पर्यवचनानवगतिमूलमसङ्गतार्थं चेति स्फुटं प्रक्षिप्तम् ।

कर्मास्तु हेतुः सुखदुःखयोर्वै[1]
　किमात्मनस्तद्धि जडेऽजडत्वे[2] ।
[3]देहे स्ववित् पुरुषोऽयं सुपर्णः
　क्रुध्येत कस्मै नहि कर्म मूलम्[4] ॥ ५५ ॥

अजडत्वे । आत्मनः ॥ * ॥

कालोऽस्तु हेतुः सुखदुःखयोश्चेत्
　किमात्मनस्तत्र तदात्मनोऽसौ[6]
नाग्नेर्हि तापो न हिमस्य तत् स्यात्
　क्रुध्येत कस्मै न परस्य बोद्धुः ॥ ५६ ॥

---

१ "—दुःखयोश्चेत्" इति प्र. पाठः । 　　　　　　२ "जडाजडत्वे" इति च ।

३ "देहस्त्वचित्" इति च ।

४ तर्हि कर्म हेतुर्भवति । नेत्याह-कर्मास्तु । वायिति प्रसिद्धिमाह । प्रसिद्धं हि लोकशास्त्रयोः कर्म हेतुः संसारस्येति । यदि प्रसिद्धेः कर्म सुखदुःखयोर्हेतुरित्युच्यते । अस्तु नामेयं कथा। यतस्तत् तथापि आत्मनः किमायातम्? तद्धि कर्म जडे देहे दृश्यते । देहं किल सुखसाधनैश्चन्दनादिभिरुपलिम्पन्ति । ताडनादिना वा पीडयन्ति। नाऽऽत्मानम् । तदेवाऽऽह-अजडत्वे। आत्मनः पुनरजडत्वे सिद्धे सति न तस्य जडकर्मस्पर्शो युक्तः । कथं तर्हि तथाऽनुभवः ? इदमेवोत्तरमित्याह– जडे मनसि सत्येव । तस्मान्मन एव कारणमित्यवसीयते । अभिमानाभावे नाऽऽत्मनः कर्मलेप इत्यैतदेव स्पष्टयति-देहे। नहि देहो जीवः । किन्तु देहे । देहादन्यं स्वमात्मानं जानातीति स्ववित् । स्वं स्वतन्त्रं स्वान्तर्यामिणं परमात्मानं जानातीति च । तादृशो ह्ययं पुरुषः कथं देहसम्बद्धकर्मणा दुःखं भजते। सुपर्णो ह्ययम् । सुपरानन्द इति सुपर्णः । तादृशो भगवान् । तत्प्रतिबिम्बत्वाज्जीवोऽपि परानन्दरूप एवेति सुपर्ण उच्यते । सुपरमणतीति च जीवः सुपर्णः । "द्वा सुपर्णा–" इति हि श्रुतिः । तादृशं च स्वात्मानं स्वयमयं वेत्ति । तत् कस्मै कुप्येत् ? तस्मान्नहि कर्म सुखदुःखयोर्मूलमिति स्थितम् ।

५ "कालस्तु" इति प्र. पाठः । 　　　　　　६ "तदात्मकोऽसौ" इत्यर्वाचीनाः ।

७ "परस्य द्वन्द्वम्" इति च । कालः सुखदुःखयोर्हेतुश्चेदस्तु नामैतदपि यतस्तत्रापि पक्षे कालकृतविकाररहितस्याऽऽत्मनः किमायातम् ? किन्तु तदात्मनः कालाधीनस्य देहस्यैव सुखदुःखे स्याताम् । तत्र देहदेहस्थयोर्मध्ये इति वा । स कालः आत्मा नियन्ता यस्य स कालात्मा देहः । कालो यत्र प्रभवति तद्धि कालात्मकम् । तर्हि देहस्यैव भवतु । तदप्याशामात्रमित्याह—नाग्नेः । अग्नेः सकाशाद् यस्तापः स स्वयमग्नेर्न भवति । एवं हिमनिमित्तं दुःखं स्वयं हिमस्य न भवति । जडत्वात् । एवं जडत्वादेव न देहस्य सुखदुःखे सम्भवतः । यदा कालाधीनस्य देहस्यैव न सम्भवति तदा कथं परस्य देहाद् विलक्षणस्य कालानधीनस्य बोद्धुर्जिवस्य तत् स्यात् । यदा जीवस्यापि न स्वतः सुखदुःखमयो बन्धः सम्भवति तदा किमु वक्तव्यं ततोऽपि परस्य विलक्षणस्योत्तमस्य च कालाती-

100

तदात्मनः कालाधीनस्य।

"स्वातन्त्र्यमात्मशब्दोक्तं स्वरूपमपि[1] कुत्रचित्" इति विवेके।

यथाऽग्नेर्हिमस्य च नैव दुःखं तावन्निमित्तम्[2]। जडत्वात्। एवं जडत्वाद् देहस्यापि कालादिसम्बन्धे विद्यमानेऽपि न दुःखं युक्तम् ॥ * ॥

"सदा कालादिसम्बन्धाद् दुःखं देहस्य युज्यते। तथाऽपि नैव दुःखी स जडत्वान्नियमेन तु। आत्मनः सुखरूपत्वान्न दुःखं युज्यते क्वचित्। तस्मान्मनोभ्रमेणैव[3] दुःखी जीवो नचान्यथा। [4]सर्वेषां मनसो नेता मनोरूपस्त्रिलोचनः। [5]तद्वशाः सर्वेदेवाश्च तेनैव सुखदुःखिनः। [6]नियन्ता तस्य च प्राणस्ततोऽपि बलवत्तरः। तन्नियन्ता हरिः साक्षात् परमानन्दलक्षणः[7]" इति तात्पर्ये ॥ * ॥

न केनचित् क्वापि कथञ्चनास्य द्वन्द्वोपरागः परतः परस्य।
यथाऽऽत्मनः[8] संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति भूतैः[9] ॥५७॥

आत्मनः मनसः ॥ * ॥

तस्य बोद्धुः सर्वज्ञस्य स न सम्भवतीति। परमात्मैव मायया संसरन् भवतीति महतीं मायां निवारयितुमेवमुपसञ्जहार। तस्मात् कस्मै क्रुध्येत? किं कालाय? उत देहाय? किमात्मने? तर्हि कथमात्मन्यनुभवः? अत्राप्येतदेवोत्तरम्—तदात्मनोऽसौ। कालाधीनस्य मनसः सत एव ह्यात्मनः सुखदुःखे। तदेवमन्वयव्यतिरेकौ। तस्मान्न कालः सुखदुःखहेतुरिति स्थितम्।

१ "स्वरूपमिति कुत्रचित्" इति क्वचित्।

२ "तापनिमित्तम्" इति प्र॰ पाठः प्रामादिकः। तावत् तापहिमादिकं निमित्तं यस्य तत् तावन्निमित्तम्।

३ "तस्मान्मनोभिमानेन दुःखी" इति क्वचित्।

४ 'मनोवशेऽन्ये हि भवन्ति देवाः' इत्यादि पूर्वोक्तं न जडमनोमात्रपरम्, किन्त्वभिमानिपरमपीत्येतत् प्रमाणेन द्रढयत्युपसंहरन् सिंहावलोकनयेन—सर्वेषां मनसो नेता। मनो रूपयति निरूपयतीति मनोरूपः।

५ "तद्वशात्" इति क्वचित्।

६ सर्वे देवा मनोवश इत्युक्तम्। तस्यापवादमाह—नियन्ता। तथाच सर्वे देवा इतीन्द्रादय एव विवक्ष्यन्ते। सहसः सहीयानित्यस्यार्थमाह—ततोऽपि बलवत्तरः। सहसः बलवतः सकाशादपि सहीयान् बलवत्तरः। स च वस्तुतः प्राण एव। तस्मान्मनोदेवे रुद्रे यत् सहसोऽपि सहीयस्त्वमुच्यते 'भीमो हि देवः सहसः सहीयान्' इति तत् सङ्कुचितार्थं प्राणातिरिक्तविषयमवगन्तव्यमित्यपि स्फुटम्।

७ सुपर्णशब्दार्थोऽयम्। सुपरानन्दलक्षण इति। हरिः साक्षात् परमानन्दलक्षणः। तत्प्रतिबिम्बत्वाज्जीवोऽपि सुपर्ण इति।

८ "यथाऽहमः" इति प्र. पाठः।

९ जीवस्यापि न स्वतो द्वन्द्वोपरागः। किमुत मनोतीतस्य परमात्मन इत्युपसंहरति—न केनचित्। देहात् परो जीवः। ततोऽपि परस्य, ब्रह्मादिसकलदेवोत्तमस्य वा परमात्मनः न क्वापि केनापि कारणेन द्वन्द्वोपरागः

[1]भौमयोर्विकारयोः [2]पीड्यपीडकयोरुभयमनसोः सतोः दुःखं भवति ॥ * ॥
ग्रहस्य ग्रहणरूपस्य मनसः सत एव[3] ॥ * ॥
जडे मनसि सत्येव ॥ * ॥
तदात्मनो मनसः सतः ॥ * ॥
[4]संसृतिरूपिणः आत्मनो जीवस्य यथा तथा नहि परस्य[5] । अमनस्त्वात् । अतो मनोऽन्वय-व्यतिरेक इति भावः ॥ * ॥

इत्येकादशस्कन्धे त्रयोविंशोऽध्यायः

[चतुर्विंशोऽध्यायः]

आसीज्ज्ञानमथो अर्थं[6] एकमेवाविकल्पितम् ।
यदा विवेकनिपुणा आदौ कृतयुगे जनाः[7] ॥ २ ॥

सम्भवति । तत्र व्यतिरेकदृष्टान्तमाह—यथाऽऽत्मनः । यथा आत्मनः मनसः द्वन्द्वोपरागः स्यात् तथा । कीदृशस्य मनसः? संसृतिरूपिणः । संसृतिं रूपयतीति तादृशस्य । संसारकारणस्य । ननु कथं तर्हि जीवस्य बन्धमोक्षौ? अत्राप्याह—यथाऽऽत्मनः । संसृतिमभिमानमात्रेणाऽऽत्मनि निरूपयतीति तादृशस्याऽऽत्मनो जीवस्य यथा न तथा परस्य स्यात् । स्वतोऽविद्यमानोऽपि बन्धः जीवस्य मनःसम्पर्केणैव हि भवति । तत्कथं भगवति सम्भवेदमनस्त्वादिति । एवं मनोभिमाननिमित्त एव संसारः, स्वयमात्मा तु भगवत्प्रतिबिम्बत्वात् तदतीत इति जानन् प्रबुद्धः न बिभेति भूतैः । यतस्तदत्ययस्तस्य हस्तगतः । संसारमूलं मन एव हि भगवदनुग्रहेण सोऽतीयाय ।

१ भौमयोर्देहयोः, विकारयोर्विकाराभिमानिनोर्देवयोरित्यादि व्यतिरेकपरतया पूर्वं व्याख्यातम् । इदानीं मनसोऽन्वयसिद्ध्यर्थं मनःपरतयाऽपि तान्येव पदानि व्याख्याति—भौमयोर्विकारयोः । उभयथाऽपि श्लोकार्थः पूर्वमेव विवृतः ।

२ "भौमयोर्विकारयोरुभयमनसोः" इतीयदेव क्वचित् प्र. पाठः । क्वचित् कोशे च । क्वचित्तु कोशेषु "आत्मनः मनसः" इत्यतः परम्, "भौमयोर्विकारयोः...." इत्यारभ्य आऽध्यायान्तं पठ्यमानानि "अतो मनोऽन्वयव्यतिरेक इति भावः" इत्यन्तानि समग्राणि तात्पर्यवचनानि न पठ्यन्ते । तत्पक्षे "आत्मनः मनसः" इत्येतदनन्तरमध्यायसमाप्तिः ।

३ "सत एव तु" इति क्वचित् ।

४ "यथाऽऽत्मनः संसृतिरूपिणः" इत्यत्राऽऽत्मशब्दो मनोवचन इति पूर्वं व्याख्यातम् । जीवपरतयाऽपीदानीं व्याख्याति—संसृतिरूपिणः ।

५ "नहि परमस्य" इति क्वचित् ।

६ "-मथो ह्यर्थ-" इति प्र. पाठः ।

७ "कृतयुगेऽयुगे" इति च । अत्र "आसीज्ज्ञानमयो ह्यर्थ एक एवाविकल्पितम्" इति पूर्वार्धपाठो यादवेन्द्रतीर्थाभिमतः । तथाहि तद्व्याख्यानम्— "ज्ञानार्थनियामकदेवतासृष्टिं वक्तुं ज्ञानार्थस्वरूपे तावदाह–आसी-

"यथैवार्थस्तथा ज्ञानं ज्ञानार्थैक्यमुदाहृतम् । तथा कृतयुगे प्रायस्तदन्येषु तु[1] कुत्र-चित्" इति ब्रह्मतर्के ॥ * ॥

तन्मया फलरूपेण केवलेन विकल्पितम्[2] ।
वाङ्मनो(ऽ)गोचरं सत्यं द्विधा समभवद् बृहत्[3] ॥ ३ ॥

फलं रूपयतीति फलरूपः । ज्ञानार्थैक्येन [4][स्थितं] सत्यम् । पश्चाद् [5]द्विधा समभवत् । तत् [6]शब्दार्थात्मकमुभयं महत्तरम्[7] ॥ * ॥

तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ।
ज्ञानं त्वन्यतमो भागः[8] पुरुषः सोऽभिधीयते ॥ ४ ॥

दिति । अविकल्पितम् । विकल्पः विविधकल्पना संशयविपर्ययादिः । तद्रहितः स्वयं यथा भवति तथा । एक एव-सत्त्वासत्त्वादिभेदरहित इत्यर्थः । अर्थः ज्ञानविषयः ज्ञानमयः ज्ञानेनैकतामापन्नः । यथैवार्थः तथा ज्ञानमासीत् । सम्यग्ज्ञानमेवाऽसीदित्यर्थः । कृतयुगे आदावासीत् । जनाः विवेके सदसदर्थविवेचने निपुणाः भ्रमादिरागादिल-क्षणदोषरहिताः कुशला यदा तदा तेन निमित्तेनार्थभ्रमो नाऽसीदिति भावः" इति । अथो इति पाठे कात्स्न्यं-माह । कृत्स्नमपि ज्ञानं यथार्थमेवाऽसीदिति ।

१ "तु कस्यचित्" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

२ "तन्मायाफलरूपेण केवलं निर्विकल्पितम्" इत्यर्वाचीनाः ।

३ "युगान्तरे ज्ञानार्थयोर्द्वैविध्यमाह—तन्मयेति । सत्यं कृतयुगादौ सत्यतया प्राप्तं बृहत् अभिमानिविवक्षया वा महत्, शब्दार्थात्मकत्वाद् वा बृहत् तज्ज्ञानं फलरूपेण फलं ज्ञानफलं रूपयति सम्पादयतीति फलरूपः तेन केवलेन वैषम्यादिरहितेन मया सृष्ट्यादिकर्त्रा विकल्पितं राजसफलादिप्राप्त्यर्थं विकल्पितं विरुद्धं कृतं सत् वाङ्म-नसोः गोचरः विषयः यस्य तत् ज्ञानं द्विधाऽभवत् । अर्थोऽपि सन्नसन्निति द्विधाऽभवत् " इति यादवेन्द्रतीर्थाः । वस्तुतस्तु एवं व्याख्येयम्—ज्ञानमिति करणसाधनम् । ज्ञायतेऽनेनेति । तेन शास्त्रं तदर्थश्चेति द्वयमपि पुरा एक-मेवाऽसीत् । कृतयुगे यथाशास्त्रमेवार्थावगम आसीत् । ततः फलनिरूपकेण मया राजसतामसानां तत्त्वावगमो न भवेदिति विविधतया विरुद्धतया च कृतम् । तेन प्रवक्तुराचार्यस्य शिष्यस्य च वाङ्मनसयोरगोचरं सत् तत् शास्त्र-तदभिधेयरूपं महत्तरं सत्यं द्विधा समभवत् । शास्त्रमन्यद् बोधयति । बोद्धा चान्यदवगच्छतीति । एवं शास्त्रा-णामपार्थकरणमपाकारणं च बहुधा प्रवृत्तमिति । वाङ्मनसोरगोचरमिति शास्त्रतदर्थानामानन्त्यात् । अभिमानि-विवक्षया वा । विविधतया कल्पितं सदेव वाङ्मनसोः गोचरमभवदिति वा ।

४ "स्थितम्" इति प्र. पाठे न पठ्यते । क्वचित् कोशेषु च । पूर्वं यथाशास्त्रमर्थावगम इत्युभयमपि सत्यमा-सीत् । पश्चात् शास्त्राभिमतात् सत्यादर्थादन्योऽर्थः शास्त्रस्य कल्पित इति सत्यत्वमपकृष्टम् ।

५ "पश्चात् तद् द्विधा" इति प्र. पाठः ।

६ एतेन ज्ञानशब्दः करणव्युत्पत्त्या शब्दराशिरूपशास्त्रपर इति सूचयति ।

७ "बृहत्तरम्" इति प्र. पाठः ।

८ "भावः" इति च । "ज्ञानार्थयोर्नियामकदेवतासृष्टिमाह—तयोरिति । तयोः सत्यज्ञानसत्यार्थयोः एकतरः

तमो रजः सत्त्वमिति प्रकृतेरभवन् गुणाः ।
मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च[1] ॥ ५ ॥

तेभ्यः समभवत् सूत्रं मत्सूत्रेण च संयुतम्[2] ।
ततो विकुर्वतो जातो योऽहङ्कारो विमोहकः[3] ॥ ६ ॥

वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत् ।
तन्मात्रेन्द्रियमनसां कारणं चिदचिन्मयः[4] ॥ ७ ॥

"ज्ञानाभिमानी पुरुषः स ब्रह्मा समुदाहृतः । अर्थाभिमन्त्री[5] प्रकृतिर्गायत्री सा प्रकीर्तिता । तयोर्नियामको विष्णुः श्रीश्चानुग्राहिका स्मृता । वायुश्च[6] ब्रह्मणः पुत्रः प्रकृतौ समजायत । त्रिगुणात्मा स उद्दिष्टः[7] प्रायः सत्त्वात्मकस्तथा । गायत्री चैव सावित्री तथैव च सरस्वती । एवं त्रिरूपा प्रकृतिरेका सत्त्वादिभेदतः । तासु वीर्यं समुत्सृष्टं ब्रह्मणैकत्वमागतम्[8] । स सूत्रात्मा समुद्दिष्टो वायुर्लोकप्रणायकः । तस्यापि

अर्थः प्रकृतिः गायत्री । सा गायत्री च उभयात्मिका । श्रिया विष्णुना च नियम्येत्यर्थः । नियम्यनियामकयोरभेदोक्तिः । तयोरन्यतमो भागः ज्ञानं पुरुषः ब्रह्मा । नियामक इत्यभिधीयते । स ब्रह्मा चोभयात्मकः विष्णुना लक्ष्म्या च नियम्यः" इति यादवेन्द्रतीर्थाः । उभयमात्मा नियामकं यस्याः सोभयात्मिकेति वा । अर्थ इत्यर्थाभिमानिनी । ज्ञानं ज्ञानाभिमानी । अभिमान्यभिमन्यमानयोरैक्यव्यपदेशः ।

१ "— मतेन वा" इति विजयध्वजीयाद्यभिमतं पाठान्तरम् । तत्रापि वाशब्दश्चार्थे । "मया संक्षोभ्यमाणायाः" इति यादवेन्द्रतीर्थाभिमतः पाठः स्यात् । तथाहि तद्व्याख्यानम्—"मया संक्षोभ्यमाणायाः कार्यात्मना परिणामार्थं क्षोभलक्षणव्यापारं प्राप्तवत्याः प्रकृतेः । पुरुषस्य विरिञ्चस्यानुमतेन प्रेरणया गुणा अभवन् उत्पन्नाः । तदभिमानिन्यश्च उत्पन्ना इति भावः । सर्वं श्रीतात्पर्ये स्पष्टम्" इति ।

२ "महान् सूत्रेण संयुतः" इति प्र. पाठः । अयमपि पाठस्तात्पर्यकृत्सम्मतः स्यादिति भाति—"सूत्रात्मना महांश्चापि सह जातश्चतुर्मुखः" इति तात्पर्योदाहृतप्रमाणसंवादात् ।

३ "जातोऽहङ्कारो यो विमोहनः" इति प्र. पाठः । "तेभ्यः गुणेभ्यः गायत्र्यादिभ्यः तिसृभ्योऽपि सूत्रं वायुः समभवत् सम्यगभवत् । गायत्र्यादिस्थगर्भाणामेकत्वप्राप्त्या ब्रह्मा वायुश्चाभूतामित्यर्थः । सूत्रस्य सर्वाधारत्वशक्तिनियामकः परमात्माऽपि अन्तर्याम्यभूदित्याह–मत्सूत्रेणेति । सूत्रेण परमात्मना संयुतः सन् समभवत् । सूत्रपुत्रस्त्वहङ्कारो रुद्रः । तत्त्वदेवतयोरुत्पत्तिविस्तारः श्रीतात्पर्ये स्पष्टः" इति यादवेन्द्रतीर्थाः ।

४ "त्रिवृत् वैकारिकादिनियामकरूपत्रयोपेतः चिदचिन्मयः चेतनाचेतनजगन्नियामकः अहं अहङ्कारः तन्मात्राणां शब्दादीनां इन्द्रियाणां मनसश्च कारणम्" इति च ।

५ "अर्थाभिमानी" इति प्र. पाठो न स्वरसः ।　　६ "वायुस्तु" इति पाठान्तरम् । प्र. पाठोऽपि तथा ।

७ "समुद्दिष्टः" इति प्र. पाठः । क्वचित् कोशे च ।

८ ब्रह्मणा तासु समुत्सृष्टं वीर्यं यदोत्पन्नं तदैकत्वमागतम् । स सूत्रात्मा वायुरभवत् ।

सूत्रं भगवान् धारणाद् विष्णुरव्ययः । सूत्रपुत्रस्त्वहङ्कारः स रुद्रः समुदाहृतः । सूत्रात्मना महांश्चापि सहजातश्चतुर्मुखः । तस्यापि पुत्रोऽहङ्कारः स चानन्त उदाहृतः । अनन्तादपि रुद्रोऽभूद् ब्रह्मणश्चेति[1] स त्रिधा । वैकारिको ब्रह्मजस्तु तैजसो वायुजः स्मृतः । तामसोऽनन्तजश्चैव स एको[2] गुणभेदतः'' इत्यादि[3] प्राथम्ये । ''चिदचिद् यद्वशे सर्वं स रुद्रश्चिदचिन्मयः'' इति च ॥ * ॥

तस्मिन्नहं समभवमण्डे सलिलसंस्थिते[4] ।
मम नाभ्यामभूत् पद्मं विश्वाख्यं तत्र चाऽत्मभूः ॥ १० ॥

''चिदानन्दशरीरस्तु प्रविष्टोऽण्डे हरिः स्वयम् । तन्नाभेर्भूतदेहोऽभूत् पद्मादपि चतुर्मुखः । चतुर्मुखस्तु सर्वाण्डव्याप्तदेहो महातपाः । हरिस्तु सर्वव्याप्तोऽपि भूतदेहो नतु क्वचित् । नैवास्य प्राकृतो देहः प्रादुर्भावेष्वपि क्वचित्'' इति निवृत्ते ॥ * ॥

योगस्य तपसश्चैव ज्ञानस्य[5] गतयोऽमलाः ।
महर्जनस्तपः सत्यं भक्तियोगस्य मद्गतिः ॥ १४ ॥

---

१ ''ब्रह्मणश्चैव स त्रिधा'' इति क्वचित् पाठान्तरम् । अनन्तात्, ब्रह्मणश्च, चशब्दाद् वायोश्च जात इति स त्रिधा ।

२ ''स एव गुण–'' इति क्वचित् । ३ ''इति प्राथम्ये'' इति प्र. पाठः । क्वचित् कोशेषु च ।

४ ''—संस्थितौ'' इति प्र॰ पाठः । तस्मिन्नण्डेऽहं समभवमप्राकृतदेह एव प्रविष्टः । मम नाभ्यां जाते पद्मे चाऽत्मभूर्भूतदेहः समभूदुत्पन्नः ।

५ ''—श्चैव न्यासस्य'' इत्यर्वाचीनाः । ''मात्रा सूक्ष्मकालः । एकमात्रया युक्तया, तावत्काले सम्पन्नया अपरोक्षदृशा युक्तं ध्यानं योगो नाम । तस्य जनलोकः । तेन प्राप्य इत्यर्थः । षण्मात्रकाले सम्पन्नया अपरोक्षदृशा युक्तं ध्यानं तपः । तस्य तपोलोकः । मुहूर्तं भगवदपरोक्षं ज्ञानम् । तस्य सत्यलोकः । एकमात्राकालस्य चतुर्भागः पादः । तस्मिन् काले सम्पन्नया अपरोक्षदृशा युक्तं ध्यानं पादयोगः । तेन महर्लोकः प्राप्य इत्यर्थः । महर्जनस्तपःसत्यमित्येता गतयो निर्भक्तयोगस्य । उद्रिक्तभक्तिलक्षणोपायस्य मद्गतिः वैकुण्ठादिः प्राप्या'' इति यादवेन्द्रतीर्थाः । तात्पर्यानुसारेण चायं निर्मथितार्थः– भूर्भुवः स्वरिति लोकत्रयमपरोक्षज्ञानविधुराणां कर्मिणामपि प्राप्यम् । तदेतदुक्तं पूर्वश्लोके–''त्रिलोक्यां गतयः सर्वाः कर्मणां त्रिगुणात्मनाम्'' इति । तदुपरि चत्वारो लोका महर्जनस्तपः सत्यमिति । परमपदं च वैकुण्ठाख्यम् । अपरोक्षज्ञानिनामेवात्र सञ्चार इत्येतदत्रोच्यते– योगस्येत्यादि । योगो द्विविधः पादयोगो योग इति । ज्ञानं च द्विविधम्–ज्ञानं महाज्ञानं चेति । ज्ञानं विज्ञानमिति वा । तत्र पादयोगेन महर्लोकः । योगेन जनलोकः । तपसा तपोलोकः । ज्ञानेन सत्यलोकः । महाज्ञानेन विष्णुलोक इति व्यवस्था । मात्राकालस्य चतुर्थभागावच्छेदेन विद्युच्चपलं भगवदापरोक्ष्यं येनोपासनेन भवति तावदुपासनं तदनुगुणा भक्तिश्च पादयोगशब्देनोच्यते । ततोऽधिका भक्तिः, अधिकं च साधनम् । ततश्च मात्राकालावच्छेदेनापरोक्षज्ञानं च योगशब्देनोच्यते । ताभ्यां महर्जनलोकौ । ततोऽधिका भक्तिः, अधिकं चोपासनम्, ततः षण्मात्राकालमपरोक्ष–

[1]महरादीनामपि भक्तियोगोऽपेक्षित एव । आधिक्येनापेक्षितत्वात् "भक्तियोगस्य मद्गतिः" इत्युक्तम् ।

"नैव विष्णावभक्तस्य महर्लोकादिका गतिः । भक्त्युद्रेकात् क्रमादूर्ध्वं यावद् विष्णोः प्रवेशनम्[2] । एवं ज्ञानं विना नापि[3] महर्लोकादिका गतिः । ज्ञानोद्रेकात् क्रमादूर्ध्वं यावद् विष्णोः[2] प्रवेशनम् । नित्यशो भगवद्रूपस्याऽपरोक्ष्येण दर्शनम् । मुहूर्तमात्रं[4] ज्ञानं स्यान्महाज्ञानं ततोऽधिकम् । ज्ञानेन ब्रह्मलोकः स्यान्महाज्ञानाद्धरेर्गतिः । सदैवाखण्डितध्यानं[5] तप इत्युच्यते बुधैः । अपरोक्षदृशा युक्तं नित्यं षण्मात्रकालया[6] । अपरोक्षदृशा नित्यमेकमात्रायुजा[7] युतम् । योगनाम्ना समुद्दिष्टं ध्यानं नित्यमखण्डितम् । [8]तच्चतुर्भागया नित्यमपरोक्षदृशा युतम् । पादयोगाख्यमुद्दिष्टं ध्यानं नित्यमखण्डितम् । पादयोगान्महर्लोको [9]जनलोकस्तु योगतः । तपसस्तु तपोलोकः प्राप्यते नान्यतः क्वचित्" इति ध्यानयोगे ॥ * ॥

[10]मया कालात्मना धात्रा कर्मयुक्तमिदं जगत् ।
गुणप्रवाह एतस्मिन्नुन्मज्जति निमज्जति ॥ १५ ॥

दर्शनं तप इत्युच्यते । तदीदृशं तपस्तपोलोकं प्रापयति । ततोऽप्यभिवृद्धया भक्त्योपासनया च यन्मुहूर्तस्थाय्यपरोक्षज्ञानं तत् ज्ञानम् । तद्वान् सत्यलोकमर्हति । ततोऽप्यतिवृद्धया परिपूर्णया भक्त्या परिपूर्णमपरोक्षज्ञानं भवतीति तदेतन्महाज्ञानमुच्यते । तदेतत्पूर्णभक्तिरूपं महाज्ञानं मोक्षं गमयतीति । नन्वपरोक्षाभावेऽपि महरादिप्राप्तिः श्रूयते । तथाहि सूत्रभाष्ये—"कर्मणा त्वधमः प्रोक्तः प्रसादः श्रवणादिभिः । मध्यमो ज्ञानसम्पत्त्या प्रसादस्तूत्तमो मतः । प्रसादादधमाद् विष्णोः स्वर्गलोकः प्रकीर्तितः । मध्यमाज्जनलोकादिरुत्तमस्त्वेव मुक्तिदः" इति । तत्र श्रवणादिजनितेन परोक्षज्ञानेन जनलोकादिप्राप्तिः श्रूयते । मैवम् । एतदनुगुणं तत्राप्यपरोक्षपर्यन्तत्वमभ्युपेयम् । श्रवणादिसहकृतेन क्षणिकापरोक्षेण जनलोकादिः । ज्ञानस्य सम्पूर्णतया परिपूर्णापरोक्षेण तु मोक्ष इति न कोऽपि विरोधः ।

१ मोक्षं प्रति ज्ञानमनपेक्षितम्, भक्तिरेव पर्याप्तेति, तथा सत्यान्तलोकाः भगवद्भक्तिं विनाऽपि ज्ञानबलेनैव प्राप्या इति च मन्दानां भ्रान्तिं निवारयन् मूलभावं स्ववचनेन प्रमाणतश्च स्फुटमाह–महरादीनाम् ।

२ "विष्णुप्रवेशनम्" इति प्र. पाठः ।

३ "साऽपि" इति पाठान्तरम् । तदा नैवेति पूर्वश्लोकादनुवर्तते ।

४ घटिकाद्वयपरिमितं मुहूर्तमेवात्र विवक्षितमिति भाति ।

५ "–वाखण्डितं ध्यानम्" इति प्र. पाठः ।

६ षट् मात्राः यस्य परिमितिः स कालः षण्मात्रः । स कालो यस्यास्तया षण्मात्रकालव्यापिन्याऽपरोक्षदृशा युक्तं तपः ।

७ एकमात्राकालव्यापिन्येत्यर्थः ।

८ तस्य एकमात्राकालस्य चतुर्थो भागो यस्याः सा तच्चतुर्भागा । तया तावन्मात्रस्फुरणयाऽपरोक्षदृशा युतं ध्यानं पादयोगो नाम ।

९ "जनो लोकस्तु" इति प्र. पाठः प्रामादिकः ।

१० "सृष्टिप्रयोजनमाह – मया । कालात्मना ज्ञानाद्यात्मना । इदं जगत् असुरतिर्यगादिरूपम्, एतस्मिन्

कालात्मना ज्ञानाद्यात्मना[1] ॥ * ॥

यस्तु यस्याऽदिरन्तश्च स वै मध्यं च तस्य तत्[2] ।
विकारो व्यवहारार्थो यथा तैजसपार्थिवाः ॥ १७ ॥

गुणप्रवाहे संसारे निमज्जति मग्नं भवति, दुःखादिकमनुभवतीत्यर्थः। धात्रा पालनकर्त्रा मया इदं जगत् सात्विकजनः उन्मज्जति दुःखसम्बन्धरहित इत्यर्थः" इति यादवेन्द्रतीर्थाः। "कालात्मना धात्रा कारकेण प्रेरितकर्मयुक्तमिदं जगत् एतस्मिन् गुणप्रवाहे उन्मज्जति सृष्टं भवति निमज्जति संहृतं भवति" इति विजयध्वजीयम्। "उन्मज्जति आसत्यलोकमुत्तमा गतीः प्राप्नोति। पुनर्निमज्जति आस्थावरं नीचा गतीः प्राप्नोति" इति विश्वनाथचक्रवर्ती।

१ "ज्ञानात्मना" इति क्वचित्। कलयति गुणसङ्कुलैः कलितो भवतीति कालः। ज्ञानादिशुभगुणमयस्वरूपः।

२ "तस्य सन्" इत्यर्वाचीनाः। "स वै मध्ये च तस्य तत्" इति विजयध्वजीयपाठ इति भाति। "जगतः स्वतन्त्रकारणमुपादानं चाऽह–यस्त्विति। यः निमित्तकारणं यस्य कार्यस्य सकाशात् आदिः पूर्वं वर्तते। अन्तः लयेऽपि वर्तते। एकप्रकारेणेति भावः। स ईश्वरस्तस्य कर्तेत्यर्थः। उपादानमाह–विकारः। व्यवहारार्थः हानोपादानाद्यर्थः यः विकारः महदादिः परिणामः यस्य सकाशाद् भवति सः उपादानं तेनोपादेयेनाभिन्नमित्यर्थः। उपादानस्य कार्याभेदे निदर्शनमाह–यथा। यथाऽरण्यादिगतसूक्ष्मवह्निजन्यः स्थूलवह्निः उपादानेनाभिन्नः दृष्टः एवं प्रकृतिजन्यः गुणमहदादिः अव्यक्तादभिन्नः। यथा पार्थिवमृदादिलक्षणस्थूलव्यक्तोपादानकः घटादिः एवं स्थूलपृथिव्याद्युपादानकः पृथिव्यादिरुपादानेन भिन्नाभिन्न इति भावः। अभेदे सति भेदो न विरुद्धः। वस्तुसामर्थ्यात्। यद्वा यस्तु यस्याऽदिः उपादानरूपः स विकार इत्यन्वयः। परिच्छिन्नस्योपादानस्य सर्वांशेनाभेदः। सर्वस्यापि परिणतत्वात्। अपरिच्छिन्नायाः एकदेशेन परिणतायाः प्रकृतेः कोट्यंशेनाभेद इति भावः" इति यादवेन्द्रतीर्थाः। "तैजसाः कटककुण्डलादयः पार्थिवा घटशरावादयः" इति विश्वनाथादयः। अयमत्र निर्गलितार्थः–यः किल जगत आदावन्ते च स्थाता स एव धारकत्वेन मध्येऽपि तिष्ठतीति निमित्तकारणं नित्यं निर्विकारं भगवत्स्वरूपमाह। अत एव च सोऽत्यन्तविलक्षणो जगत इति स्थितम्। उक्तं हि गीताभाष्ये नान्तो नचाऽदिर्न च सम्प्रतिष्ठेत्यत्र "अन्तादिर्विष्णुः" इति। "त्वमादिरन्तो जगतोऽस्य मध्यम्" इति च भागवत एव। उपादानमप्येतेनैवाऽह — यस्तु यः पूर्वमासीदन्ते चावशिष्यते स एव कार्यात्मनाऽपि मध्ये परिणत इति स एव तत्। इति सविकारमभिन्नमुपादानकारणमाह। ननु यदाऽभेदः कथं कार्योत्पत्तेः पूर्वमन्ते च स्यात्? आह– विकारः। कार्यात्मना विकारः लोके यथा तैजसः पार्थिवो वा विकारोऽनुभूयते तद्वदेव व्याख्येय इति। तद्यथा मृदेव घटः। न घट एव मृत्। मृदभिन्नेन घटान्तरेणास्य भेदात्। तस्माद् तद्घटोपादानभूततावन्मृदपेक्षयाऽत्यन्ताभेदः। मृत्सामान्यापेक्षया तु भेदाभेदौ। एवं प्रकृतेर्विकाराणां च भेदाभेदाविति भावः। ननु विकारे सति तस्य विकारिणा भेदाभेदचिन्ता स्यात्। स एव मृषा। "मृत्तिकेत्येव सत्यम्" इति श्रुतेरिति केचिदपलपन्ति। तन्निरासाय व्यवहारार्थ इति विकारविशेषणम्। अर्थक्रियाकारित्वात् सत्य एव विकारोऽपीति।

"प्रकृतेस्तु विकाराणां कोट्यंशाभेद इष्यते[1]। तथैवैकांशतो[2] भेदः सोऽपि नाभेद वर्जितः। भेदाभेदमतः[3] प्राहुरभेदं वा तयोर्बुधाः" इति विवेके ॥ * ॥

यदुपादाय पूर्वस्तु भावो विकुरुतेऽपरम्।
[4]आदिरन्तो यतो यस्मिंस्तत् सत्यमभिधीयते[5] ॥ १८ ॥

"पारमार्थिकसत्यत्वं स्वातन्त्र्यमभिधीयते। तद् विष्णोरेव नान्यस्य तदन्येषां सदाऽस्तिता" इति च।

यद् ब्रह्मोपादाय। पूर्वः प्रकृत्यादिः। आदिरन्तश्च यद्[6] ब्रह्मणि[7] तस्मात् तद् ब्रह्म परमार्थसत्यम् ॥ * ॥

---

१ "कोट्यंशोऽभेद इष्यते" इति क्वचित्। प्र॰ पाठोऽपि तथा। "कोट्यंशो भेद इष्यते" इत्येके। कोटिशब्दो बहुत्ववचनः। बह्वंशेषु एकोंऽशः कोट्यंश उच्यते। तदवच्छेदेनाभेद इत्यर्थः। बहवो हि प्रकृतिभागाः। तत्र येन भागेन यो विकारः प्रारब्धस्तस्य तेनाभेद इष्यत इति यावत्। तद्यथा घटो मृदभिन्नः। किन्तु घटभिन्नोऽपि मृदंशो वर्तते। तथाच येन मृदंशेन घटः कृतः तेन तस्याभेदो युक्तः न सर्वैरंशैः। एवमेकस्मिन्नपि विकारे बहवोऽवयवांशा वर्तन्ते। बहवो हि पार्थिवाणव एकस्मिन् घटे। तत्रैकक एवांशः न सर्वात्मना घट इति स एकोंऽशः समग्राद् घटाद् भिन्नोऽपि भवति। अथापि न भिन्नः। तस्यैव घटात्मना परिणतत्वात्। तेन भेदाभेदमेवांशांशिनोः प्राहुरिति। तयोर्भेदांशमविवक्षित्वाऽभेदमेव वा क्वचित् प्राहुरिति। उक्तं हि—"तन्तुभ्योऽन्यः पटः साक्षात् कस्य दृष्टिपथं गतः" इति। वितानविशेषविशिष्टास्तन्तवः पटः। न तन्तुरेव पट इति। अत्र 'कोट्यंशः भेदः भिन्न इष्यते' इत्यादि केषांचिद् व्याख्यानमस्वारस्यादेवोपेक्ष्यम।

२ "तथैवाऽकाशतो–" इति प्र. पाठः प्रामादिक एव।

३ "भेदाभेदमिति प्राहु–" इति क्वचित्। ४ "आदिरन्तो यदा यस्य तत्" इत्यर्वाचीनाः।

५ "सृष्टौ तु सत्यां चेतनाचेतनं सर्वं विकारोपेतम्। परमात्मा तु निर्विकार इत्याह—यदुपादायेति। पूर्वः कारणं भावः वस्तु प्रकृत्यादिलक्षणम्। यद् ब्रह्म उपादाय स्वसहकारितया प्राप्य (अ)परं कार्यमुद्दिश्य विकुरुते विकारवान् भवति। अचेतनस्य स्वतो व्यापाराभावादिति भावः। (तस्य) कार्यस्य यतः ब्रह्मणः आदिरुत्पत्तिः अन्तः लयश्च यस्मिन् ब्रह्मणि स्थितिश्च तत् सत्यं परमार्थसत्यं स्वतन्त्रमित्यर्थः। अन्यत् परतन्त्रं विकारीति भावः" इति यादवेन्द्रतीर्थाः।

६ यतो यस्मिन्निति मूलं व्याख्याति— यद् यस्माद् ब्रह्मणीति। निमित्तसप्तमी। आदिरन्तश्च ब्रह्मणि ब्रह्मनिमित्तं ब्रह्माधीनमित्यर्थः। यद्ब्रह्मणीत्येकं वा पदम्। यस्मिन् पूर्वप्रकृते ब्रह्मणीति। एवं मूले तदित्यपि पदं द्वेधा व्याख्याति—तत् तस्मात् तद् ब्रह्मेति।

७ "ब्रह्मणि यस्मात् तस्मात् तद् ब्रह्म" इति प्र. पाठः। "ब्रह्मणि यस्मात् तद् ब्रह्म" इति क्वचित्।

प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः ।
[1]सतो हि व्यञ्जकः कालो ब्रह्म तत् त्रितयं त्वहम्[2] ॥ १९ ॥

परः पुरुषो हिरण्यगर्भः । कालोऽपि रूपान्तरेण स एव ।

"कालाभिमानी ब्रह्मा तु काल इत्यभिशब्दितः । सर्वजीवाभिमानी स परः पुरुष उच्यते । प्रकृतिर्नाम तत्पत्नी प्रकृतेरभिमानिनी । सा प्रसूते जगत् सर्वं सूत्रमारभ्य सर्वशः" इति च । "आधारो व्यञ्जकश्चैव [3]प्रसवीता च केशवः । कालप्रकृतिपुंसां च तन्मूलप्रकृतेरपि । [4]आधारो व्यञ्जकश्चैव सर्वस्यापि नियामकः" इति च ॥ ॥ * ॥

सर्गः प्रवर्तते तावत् पौर्वापर्येण नित्यशः ।
महान् गुणविसर्गोऽर्थः[5] स्थित्यन्तो यावदीक्षणम्[6] ॥ २० ॥

---

१ "सतोऽभिव्यञ्जकः" इति प्र. पाठः । विजयध्वजादिष्वप्येवम् ।

२ अयमर्थः— प्रकृतिस्तदभिमानिनी सरस्वती सतः सत्यस्यास्य प्राणादिजगत उपादानम् । मातृवत् प्रसवित्री । तदभिमन्यमाना जडप्रकृतिरुपादानम् । तत्पतिश्चतुर्मुख एव पुरुषकालाख्येन रूपद्वयेन पितृवद् व्यञ्जकः, निमित्तकारणं जनक इति यावत्, धारणपोषणकर्ता च । जीवाभिमानि पुरुषाख्यम् । कालाभिमानि कालाख्यम् । पुरुषसूक्तवाच्यभगवद्रूपव्यावृत्तये पर इति । ततोऽन्यः । "तस्माद् विराडजायत विराजो अधि पूरुषः" इत्युक्तो विराट्पुरुष इत्यर्थः । तदेतत् त्रितयं प्रसवितृत्वं जनकत्वमाधारत्वं च वस्तुतः ब्रह्म पूर्णोऽहमेव । मदधीनमेव । मत्त एव तेषां तत् । तत एतत् त्रितयं प्रकृतिपुरुषकालाख्यं चाहमेव मदधीनमेव । यतः प्रकृतिपुरुषकालाख्यरूपत्रयवती श्रीर्भूर्दुर्गेति गदिता मूलप्रकृतिरप्यहं मदधीना । किमु वक्तव्यमवान्तरप्रकृत्यादेः । ततश्च मुख्यतः प्रसविता जनको धारकश्चेत्येतत् त्रयमहमेव नान्य इति परमार्थः । अत्र यथापाठक्रमं पुरुषरूपेण धारकः कालरूपेण जनक इति प्रतीयते । एवमेव व्याचक्षते च विजयध्वजादयः । क्रमव्यत्यासेन प्रकृतिपुरुषयोर्मातापितृत्वम्, कालस्य धारकत्वमिति तु यादवेन्द्रतीर्थाः । तथाहि तद्व्याख्यानम्–"चेतनापेक्षयाऽपि परब्रह्म स्वतन्त्रकारणमिति स्पष्टमाह—प्रकृतिरिति । विरिञ्चपत्नीनियम्या प्रकृतिरस्य जगत उपादानम् । परः विलक्षणः पुरुषो हिरण्यगर्भः अस्य व्यञ्जकः निमित्तकारणम् । सतः विद्यमानस्य जगतः परः रूपान्तरमापन्नः कालनियामको ब्रह्माऽऽधारः । तत् उपादानादित्रितयं ब्रह्म पूर्णः अहम् । मत्तः पूर्णात् स्वस्वशक्त्युपेतमित्यर्थः" इति ।

३ "प्रसविता" इति प्र. पाठः । मुख्यतः प्रसविता प्रसवीता ।

४ मूलप्रकृतेराधारो व्यञ्जकश्च, न प्रसविता । तस्याः सर्वप्रसवमूलत्वात् । न प्रसूयते हि सा । किन्तु प्रसूते । तदन्येषां न केवलमाधारो व्यञ्जकश्च किन्तु प्रसविता च । तदितरगतप्रसवितृत्वादेः सर्वस्य नियामकश्चेति ।

५ "–विसर्गार्थः" इति प्र. पाठः ।

६ "स्थितिकालेऽपि सृष्टिरस्तीत्याह—सर्ग इति । यावत् ईक्षणं जगतः प्रळयः स्यादिति भगवत ईक्षणं स्मरणं यावत् यस्मिन् काले भवेत् तावत्पर्यन्तं नित्यशः दिनेदिने च सर्गः सृष्टिः पौर्वापर्येण सजातीयासजातीयोत्पत्तिरूपक्रमेण प्रवर्तते । गुणादेः सकाशाद् विसर्गो यस्य सः महान् अर्थः महदादिकार्यं स्थित्यन्तः स्थितिसमयमात्र-

याबत् स्थितिरस्ति तावदुत्पत्तिरप्यस्त्येव[1]। यावदीक्षणं यावत्[2] प्रळयः स्यादिति भगवतः स्मरणम् ॥ * ॥

विराण्मयाऽऽसाद्यमानो लोककल्पविकल्पकः ।
पञ्चत्वायाविशेषाय कल्प्यते[3] भुवनैः सह ॥ २१ ॥

"विशेषेण गुणोद्रेकाद् विशेषः पृथिवी स्मृता" इति प्रवृत्ते ।

पञ्चत्वानन्तरमविशेषाय ॥ * ॥

अन्ने प्रलीयते मर्त्यमन्नं[4] धानासु लीयते ।
धाना भूमौ प्रलीयन्ते भूमिर्गन्धे प्रलीयते ॥ २२ ॥

"देव्यामोषधिमानिन्यां लीयतेऽन्नाभिमानिनी" इत्यादि च ॥ * ॥

वर्ती । लयसमये नास्तीति भावः" इति यादवेन्द्रतीर्थाः । अथ चार्थान्तरम्—गुणविसृष्टः पितृपुत्रादिरूपोऽयं महान् सृष्टिप्रपञ्चः तावन्नित्यं प्रवर्तते यावत् स्थितिरस्ति । स्थितेरन्ते सृष्टेरप्यन्तः । कदा तर्हि स्थित्यन्तः? आह—स्थित्यन्तो यावदीक्षणम् । यावद् यदा प्रक्षयः स्यादिति भगवत ईक्षणमिच्छा जायते तदा स्थितेरन्तः । तदैव च सर्गस्याप्यन्त इति ।

१ "–दुत्पत्तिरस्त्येव" इति प्र॰ पाठः । २ "तावत्" इति क्वचित् ।

३ "पञ्चत्वाय विशेषाय कल्पते" इत्यर्वाचीनाः । "बन्धलयोऽपि स्वस्मादित्याह-विराडिति । लोककल्पः चतुर्दशभुवनसृष्टिः, विकल्पः विविधसुरादिसृष्टिः यस्मिन् स विराट् ब्रह्माण्डम् । मयाऽऽसाद्यमानः अवयवविशेषं प्राप्नुवानः भुवनैः सह पञ्चत्वाय आकाशादिकारणमात्ररूपेणावस्थानाय, अनन्तरमविशेषाय, शब्दस्पर्शादिसर्वगुणोपेतत्वाद् विशेषः पृथिवी, तन्नाशाय च कल्प्यते प्रवृत्तो भवति । लयं प्राप्नोतीत्यर्थः" इति यादवेन्द्रतीर्थाः । "आसाद्यमानः विनाशाय प्रेर्यमाणः" इति विजयध्वजीयम् । "व्याप्यमानः" इत्यन्ये । "विराण्मया व्याप्यमानः" इत्येव केचित् पठन्ति । "विराण्मया साद्यमानः" इति सुदर्शनसूरिः । लोकानां कल्पः स्थूलसृष्टिः विकल्पः विविधा सूक्ष्मसृष्टिश्च यस्मिन् स लोककल्पविकल्पकः । "साद्यमानः विशीर्यमाणः । अविशेषाय कल्प्यते खर्परभूतपृथिवीनाशो भवतीत्यर्थः" इति श्रीनिवासतीर्थीयम् ।

४ "मर्त्यं अन्नम्" इति पाठान्तरम् । "लयं विविच्याऽऽह—अन्ने प्रलीयते । मर्त्यमन्नोपजीवनेन स्थितं प्राणिजातम् । शरीराणि तदभिमानिनश्चेत्यर्थः । अन्ने प्रलीयते । सर्वत्र कारणजडेषु कार्यजडानां लयः । कारणचेतनेषु तज्जडाभिमानिषु तत्कार्याभिमानिचेतनानां प्रवेशो ज्ञातव्यः । अन्नमन्नाभिमानिनी धानासु विविधबीजविकृतास्वोषधीषु तदभिमानिन्यां लीयते । धानाः धानाविकृता ओषधयः भूमौ स्वकारणे लीयन्ते प्रविशन्ति । लयशब्दो देवताविवक्षायां प्रवेशार्थकः । गन्धे स्वकारणे भूमिः प्रलीयते" इति यादवेन्द्रतीर्थाः ।

योनिर्वैकारिके सौम्य लीयते महतीश्वरे[1] ।
शब्दो भूतादिमप्येति[2] भूतादिर्महति प्रभुः[3] ॥ २५ ॥

"[4]विकारजत्वात्तु महान् वैकारिक उदाहृतः । ईशनादीश्वरश्चैव ब्रह्मा बृंहणतः स्मृतः" इति च ॥ * ॥

स लीयते महान् स्वेषु गुणेषु गुणवत्तमः ।
तेऽव्यक्ते सम्प्रलीयन्ते तत् काले लीयतेऽव्यये ॥ २६ ॥

कालो मायामये जीवे जीव आत्मनि मय्यजे ।
आत्मा केवल आत्मस्थो विकल्पापायलक्षणः[5] ॥ २७ ॥

"गायत्री चैव सावित्री तथैव च सरस्वती । एवं त्रिरूपा प्रकृतिर्ब्रह्मपत्नी प्रकीर्तिता । महत्तत्त्वात्मको ब्रह्मा तज्जत्वात् तत्र लीयते । गुणाधिकः पतिरपि तस्याः[6] सत्त्वादिभेदतः । त्रिविधा मूलरूपायां प्रकृत्यां सा प्रलीयते । प्रकृतिर्मूलरूपा सा ब्रह्मपत्नी

---

१ "मनसीश्वरे" इत्यर्वाचीनाः । २ "-मभ्येति" इति क्वचित् ।

३ "योनिः (इन्द्रियाणां) कारणं वैकारिकस्तैजसश्चाहङ्कारः ईश्वरे स्वामिनि वैकारिके गुणविकारजन्ये महति महत्तत्वे लीयते हे सौम्य आनन्दानुभवसम्पन्न । अम्बरोपादानस्य शब्दस्य लयमाह— शब्दः । भूतानामादिं कारणं तामसाहङ्कारमप्येति प्राप्नोति । तत्र लीनं भवतीति वा । भूतादिस्तामसः प्रभुः ज्ञानाच्छादनसमर्थः महति तत्त्वे विलीयते" इति यादवेन्द्रतीर्थाः ।

४ "विकारजं यत्तु महत्" इति क्वचित् ।

५ "गुणवत्तमः आनन्दादिमहागुणसम्पन्नः सुवर्णवर्णो महान् स्वेषु स्वकारणेषु गुणेषु तद्देवतासु लीयते । ते गुणाः गुणदेवताः गायत्रीसावित्रीसरस्वतीसंज्ञाः स्वमूलरूपेऽव्यक्ते ब्रह्मपत्न्यां लीयन्ते । तदव्यक्तं पुरुषे विरिञ्चे लीयते । [स पुरुषाख्यः विरिञ्चः काले कालाख्ये विरिञ्चे लीयते ।] विरिञ्चरूपान्तरस्य रूपान्तरे लयः । कालः विरिञ्चः जीवे जीवसम्बन्धिनि मायामये प्रकृतौ महालक्ष्म्याम् । स जीवः अजे आत्मनि मयि लीयते । मत्समीपस्था जीवमाया प्रकृतिप्रेरणां विना तिष्ठतीत्यर्थः । लक्ष्म्यां रूपान्तरविवक्षया हरेरत्यन्तसामीप्यं लय इति भावः । परमात्मनि लयशङ्का न कार्येत्याशयेनाऽह—आत्मेति । केवलः अपूर्णतादिदोषरहितः आत्मस्थः स्वतन्त्र इत्यर्थः । विकल्पः विविधसृष्टिः । तस्यापायः नित्यमभावः । तदेव लक्षणं यस्य सः उत्पत्त्यादिदोषरहितः । आत्मा पूर्णशक्त्यादिसम्पन्नः । अतो लयादिरहित इति भावः" इति च । "आत्मा पूर्णगुणः । केवलः प्रकृतिसम्बन्धविधुरः असमाधिकश्च । आत्मस्थः अनन्याधारः । अत एव लयविहीनः । विकल्पापायलक्षणः सम्यग्ज्ञानस्वरूपः । मिथ्याज्ञानापगमो लक्षणं यस्य स तथेति वा" इति विजयध्वजीयम् । "विकल्पापायौ विश्वसृष्टिसंहारौ शास्त्रद्वारा लक्ष्येते यस्मात्" इति शुकदेवः ।

६ तस्याः पतिरपि गुणाधिकोऽपि तत्र लीयते । एतेन 'गुणवत्तमः' इति मूलं व्याख्यातम् ।

जगन्मया । पुरुषाभिधे विरिञ्चे तु स स्वस्मिन् कालसञ्ज्ञके[1] । कालाभिधो विरिञ्चस्तु महालक्ष्म्यां विलीयते । [2]जीवमायेति यामाहुः सा च सत्त्वादिभेदतः । त्रिविधैकत्वमापाद्य विष्णावेव प्रलीयते[3] । हरेरत्यन्तसामीप्यं लयो लक्ष्म्याः प्रकीर्तितः । [4]पुरुषेणापि सामीप्यं प्रकृतेर्लय उच्यते । ब्रह्मा च प्रकृतिश्चैव मुक्तिगौ विलये[5] यतः । अतस्तौ भिन्नदेहौ तु ज्ञानमात्रौ समीपगौ" इत्यादि च ॥ * ॥

इत्येकादशस्कन्धे चतुर्विंशोऽध्यायः

[पञ्चविंशोऽध्यायः]

काम ईहा मदस्तृष्णा स्तम्भ आशीर्भिदाऽसुखम् ।
[6]मानोत्साहो यशःप्रीतिर्धार्ष्ट्यं[7] वीर्यं बलोद्यमः ॥ ३ ॥

---

१ "-संज्ञिते" इति प्र. पाठः ।

२ यां जीवमायेत्याहुः । अत एव जीवयतीति जीव इति मायेति चाऽहुः । तेन मूले "मायामये जीवे" इति युक्तमुक्तम् ।

३ "विष्णावेव विलीयते" इति प्र. पाठः । क्वचित् कोशे च । "विष्णावेकत्वमागता" इति च क्वचित् ।

४ पुरुषेणेति चतुर्मुखेन । प्रकृतेरिति सरस्वत्याः ।

५ "मुक्तिगौ प्रळये यतः" इति क्वचित् । ननु सरस्वतीपर्यन्तमवरदेवानां स्वोत्तमदेवे लय उक्तः । सरस्वत्यास्तु लक्ष्म्या विष्णुनेव ब्रह्मणा सामीप्यमेव न तद्देहप्रवेश इत्युक्तम् । लक्ष्म्यास्तु नित्यमुक्ताया चिद्देहतया लिङ्गभङ्गप्रसङ्गाभावात् सामीप्यं विष्णुना लय इति युज्यते । सरस्वत्यास्तु ब्रह्मणि प्रवेशाभावे कथं प्राकृतदेहनाशः? तदभावे कथं मुक्तिः? आह– ब्रह्मा च प्रकृतिश्चैव । अयमर्थः । महदभिमानी ब्रह्मा महन्नामा त्रिगुणमानिन्यां सरस्वत्यां लीयते । सा पुनस्त्रिगुणनियमनादिव्यापारान्तरविरता केवलं ब्रह्मैकताना जीवाभिमानिना पुरुषरूपेण ब्रह्मणा देहार्धेनेव केवलं सङ्गता भवति । सच पुरुषनामा स्वस्मिन्नेव कालनाम्नि विलीयते । तदा सरस्वती कालेनात्यन्तसङ्गता भवति । ततश्च कालनामा ब्रह्मा प्रकृतिश्च सहैव नारायणाग्नौ स्वदेहविलये सति मुक्तिगौ भवत इति । यत एवं सहैव मुक्तिगावतः पुरुषेण सामीप्यमेव प्रकृतेर्लयः । पूर्वमेव विलये सहयोगायोगात् । अतस्तौ भिन्नदेहौ सन्तौ सृष्ट्यादिक्रियां विहाय ज्ञानमात्रतया समीपगावित्येव तयोरेकस्या अपरस्मिन् लयशब्दार्थः । ननु ब्रह्मण्यपि लयोऽस्तु? नेत्याह—ब्रह्मा च प्रकृतिश्चैव । यथा ब्रह्मा तथा प्रकृतिरपि विलयोत्तरक्षणमेव मुक्ता भवतीति शास्त्रसम्प्रदायः । ततो न मध्ये ब्रह्मणि प्रवेशस्तस्याः । किन्तु नारायणाग्नौ भस्मीभूतप्राकृतदेहायाः साक्षान्मुक्तिरिति ।

६ "मदोत्साहो-" इति प्र. पाठः ।

७ "-प्रीतिर्हास्यम्" इति प्र. पाठः । "अमिश्ररजोगुणव्यापारमाह—कामः विषयाकाङ्क्षा । ईहा विषयसिद्ध्यर्थं व्यापारः । तृष्णा विषयासक्तिः । स्तम्भः विनयराहित्यम् । भिदा सौहार्दपरित्यागः । असुखम्, तमोगुणेन ता-

"राजसेऽपि यदा दुःखं तामसे किमुतेति तत्[1] । राजसे दुःखवचनं तामसेऽतिविवक्षया" इति प्रद्योते ॥ * ॥

कैवल्यं सात्त्विकं ज्ञानं कर्मनिष्ठं तु राजसम्[2] ।
प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम् ॥ २४ ॥

"नैर्गुण्यसाधनं[3] यत् तन्निर्गुणं परिकीर्तितम्" इति च । "[4]यथाशास्त्रोक्तविज्ञानं केवलं ज्ञानमुच्यते । स्वदृष्टशास्त्रानुकूल्याददृष्टानां च भक्तितः । गुणानां तु[5] हरौ भावं विनिश्चित्यैतदाश्रयात्[6] । यथाशास्त्रानुसन्धानं ज्ञानं तु हरिसंश्रयम्[7]" इति च ॥ * ॥

सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी ।
तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा[8] ॥ २७ ॥

मसे दुःखाधिक्यद्योतनाय राजसे दुःखोक्तिः । धाष्टर्यं वैयात्यम्, स्वपक्षादचलनम्, भयाभावो वा" इति यादवेन्द्रतीर्थाः । "मदो दर्पश्चित्तोन्नतिरूपः" इति श्रीधरस्वामी । "आशीर्धनाकाङ्क्षा" इति विजयध्वजीयम् । "कलत्रापत्यादिलिप्सया देवादिप्रार्थना" इति शुकदेवः । मानोत्साहः स्वमानने स्वप्रशंसायामधिकोत्साहः । 'निःस्तुतिः' इति पूर्वोक्तस्य विरुद्धो गुणः । अत एव यशःप्रीतिः । स्तुतिप्रियता । "वीय प्रभावाविष्कारः । न न्यायेन, किन्तु बलेनोद्यमः" इति श्रीधरस्वामी । "अभिजनविद्यादिबलेनैवोद्यमः । ननु स्वविहितमार्गेण" इति शुकदेवः ।

१ "किमु नेति तत्" इति क्वचित् ।

२ "ज्ञानं रजो वैकल्पिकं च यत्" इति प्र॰ पाठः । "ज्ञानविभेदमाह—कैवल्यमिति । कैवल्यम्, यथाशास्त्रमर्थज्ञानम्, शास्त्राविरुद्धं शास्त्रजन्यं ज्ञानमित्यर्थः । केवलमेव कैवल्यं ज्ञानं कैवल्यसाधनमिति वा, सात्त्विकम् । ज्योतिष्टोमादिकर्मासक्तियुक्तं तद्विषयं ज्ञानं राजसम् । प्राकृतम्, अर्थकाममात्रसाधनविषयम्, न धर्मविषयम्, तत् तामसम् । मन्निष्ठम्, मम निष्ठा स्वयम्प्रतिभातगुणोत्कर्षो यस्य तत् । शास्त्राभ्यासयोगाद्यतिशयप्राप्तं मम विचित्रमाहात्म्यविषयं ज्ञानमित्यर्थः । निर्गुणस्य सात्विकत्वेऽपि अव्यवधानेन कैवल्यहेतुर्निर्गुणमित्युच्यते" इति यादवेन्द्रतीर्थाः । अहं निष्ठा आश्रयः यस्य तन्मन्निष्ठमिति वा । मय्येव निष्ठा यस्येति ।

३ नैर्गुण्यसाधनमिति साक्षान्मोक्षसाधनमित्यर्थः । वीरराघवोऽप्याह—"निर्गुणमत्युद्रिक्तसत्त्वप्रचुरम्" इति ।

४ "यथाशास्त्रोद्भवं ज्ञानम्" इति क्वचित् ।

५ "गुणानां च" इति पाठान्तरम् ।

६ "भावं निश्चित्यैव सदाश्रयात्" इति क्वचित् ।

७ मन्निष्ठमिति मूलपदस्य व्याख्यानं हरिसंश्रयमिति ।

८ "आध्यात्मिकी परमात्मविषये शास्त्रश्रवणेन ममात्रास्ति प्रयोजनमित्येवंरूपा श्रद्धा सात्त्विकी । अधर्मे भूतहिंसायाम् । मत्सेवायां स्वभावेन प्राप्ता श्रद्धा निर्गुणा" इति यादवेन्द्रतीर्थाः । "अधर्मे धर्म इति या श्रद्धा सा तामसी" इति श्रीधरस्वामी । "अधर्मे परधर्मे" इत्यन्ये ।

"श्रुतशास्त्रानुसारेण या श्रद्धा परमात्मनि । सा सात्त्विकी [1]तदन्यस्याप्यनुसारेण निर्गुणा । [2]अश्रुत्वाऽपि प्रमाणं यो वासुदेवैकसंश्रयः । स निर्गुणो भगवतः समुद्दिष्टो मनीषिभिः" इति च ॥ * ॥

सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम् ।
तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयम्[3] ॥ २९ ॥

"[4]परोक्षज्ञानमात्मोत्थमापरोक्ष्येण दर्शनम् । विष्ण्वाश्रयं सुखं नित्यं गमयेत् तत्प्रसादतः । नतु विष्णोः स्वरूपं तु सुखं केनचिदाप्यते । [5]तस्यैव विषयत्वाच्च तत्सुखं चेति भण्यते[6] । परोक्षज्ञानगे[7] यस्माद् विषयः स्वमनोगतः । अत आत्मोत्थमित्येव सुखमाहुर्विपश्चितः" इति च ॥ * ॥

---

१ तदिति श्रुतशास्त्रम् । तदन्यस्य अश्रुतशास्त्रस्यानुसारेण या श्रद्धा सा निर्गुणा । स्वयम्प्रतिभया अश्रुतशास्त्रोक्तानपि गुणांस्तदविरोधेनैवानुसन्दधती श्रद्धेत्यर्थः ।

२ एतेनैव प्रद्योतप्रमाणवचनशेषेण "सात्त्विकः कारकोऽसङ्गी रागान्धो राजसः स्मृतः । तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः" इति पूर्वश्लोकस्य चरमचरणमपि व्याख्याति-अश्रुत्वाऽपि । मदपाश्रयः शास्त्रश्रवणमन्तराऽपि स्वभावत एव भगवदाश्रयः निर्गुणः कर्तेत्युक्तं भवति । "मदुपाश्रयः" इति सुदर्शनसूरिवीरराघवौ । "अहमुपाश्रयः शरणं यस्य स कारकः निर्गुणः निरतिशयोल्लाससत्त्वगुणयुक्तः" इति वीरराघवः । "निर्गुणो मोक्षगामी" इति विजयध्वजीयम् । "मदपाश्रयः, नाहं स्वतन्त्रकर्ता, हरिः स्वतन्त्रकर्तेति ज्ञानवान् विधिनिषेधभयरहितः निर्गुणः कर्ता" इति यादवेन्द्रतीर्थाः ।

३ "आत्मोत्थम्, आस्तिकस्य शास्त्रपरोक्षज्ञानजन्यं सुखं सात्त्विकम् । मोहेन द्रविणादौ स्वीयत्वभ्रमेण उत्थं तामसम् । मदपाश्रयं मम ध्यानापरोक्षप्राप्तं निर्गुणम्" इति च । "मादकवस्त्वनुभवचित्तपारवश्यं मोहः" इति वीरराघवः । "दैन्योत्थं पुत्रकलत्राद्युपच्छन्दनप्रभवम्" इति च । "निर्गुणं नैर्गुण्यावहसत्त्वोद्रेकातिशयप्रयुक्तम्" इति च ।

४ परोक्षज्ञानं अत्मोत्थं सुखं गमयेदित्यन्वयः । तेन परोक्षज्ञानजन्यं सुखमात्मोत्थमित्युच्यते । एवमापरोक्ष्येण दर्शनं विष्ण्वाश्रयं सुखं गमयेत् । तेन निर्गुणं सुखं विष्ण्वाश्रयमित्युच्यते । विष्णुप्रसादजन्यत्वादेव च विष्ण्वाश्रयं न तत्स्वरूपत्वादित्याह—तत्प्रसादतः ।

५ नन्वात्मोत्थं सुखमपि तत्प्रसादत एव भवतीत्यतोऽसाधारणं निमित्तान्तरं चाऽह— तस्यैव । तद्विषयकापरोक्षानुभूतिजन्यत्वादेव च तद्विषयमुच्यत इति ।

६ "फण्यते" इति क्वचित् ।

७ नन्वपरोक्षज्ञानजं सुखमप्यात्मोत्थम् । तत् किं परोक्षज्ञानमेवाऽमोत्थं सुखं गमयेत्? आह—परोक्षज्ञानगे । शास्त्रजन्यं मानसं हि ज्ञानम् । अतस्तदुत्थं सुखमपि मानसम् । तथाचात्र आत्मेति मन उच्यते । आत्मोत्थमिति मानसम् । परोक्षज्ञानगे परोक्षज्ञानजन्ये सुखे । "परोक्षज्ञानगो-" इति प्र. पाठो नातिस्वरसः ।

सर्वे गुणमया भावा पुरुषाव्यक्तनिष्ठिताः[१] ।
दृष्टं श्रुतमनुध्यायेद्[२] बुद्ध्या वा पुरुषर्षभ ॥ ३१ ॥

[३]दृष्टं श्रुतम् । बुद्ध्या दृष्टं चानु [४]परं ब्रह्म ध्यायेत् ॥ * ॥

"[५]सत्त्वाद् गुणाज्जातमपि व्यवधानं विनैव तु । मुक्तिदं निर्गुणं प्रोक्तं व्यवधानेन सात्त्विकम्" इति ब्राह्मे[६] ॥ * ॥

इत्येकादशस्कन्धे पञ्चविंशोऽध्यायः

[षड्विंशोऽध्यायः]

गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया ।
गुणेषु मायामात्रेषु दृश्यमानेष्ववस्तुतः ।
वर्तमानोऽपि न पुमान् युज्यतेऽवस्तुभिर्गुणैः[७] ॥ २ ॥

---

१ "-धिष्ठिताः" इति प्र. पाठः ।

२ "-मनुध्यातं बुद्ध्या" इत्यर्वाचीनाः । "एते भावाः ज्ञानिनामहेयाः परमात्माधिष्ठितत्वादित्याशयेनाऽह— एते गुणमयाः । पुरुषाव्यक्ताभ्यां विष्णुश्रीभ्यां निष्ठिता व्याप्ताः सर्वे पदार्थाः । एतत् श्रुतं बुद्ध्या मननेन दृष्टं विषयीकृतं अनु पुनरपि ध्यायेत्" इति यादवेन्द्रतीर्थाः । "न केवलं पुरुषाव्यक्ताभ्यां ब्रह्मसरस्वतीभ्यां निष्ठिताः । किन्तु श्रुतं शास्त्रेषु बुद्ध्या च दृष्टं परं ब्रह्म च तत्र धिष्ठितं ध्यायेत्" इत्यन्ये ।

३ तथाच दृष्टं श्रुतमिति व्यत्यासेनान्वयः । आदौ शास्त्रतः श्रुतम् । ततः बुद्ध्या वा बुद्ध्या च मननेन दृष्टमनुभूतं ब्रह्म अनु अनन्तरमपि निरन्तरं ध्यायेदिति ।

४ "दृष्टं चापि परम्" इति क्वचित् ।

५ इदानीं समग्राध्यायार्थमुपसंहरन् मूले कर्मकर्त्रादिषु सात्त्विकादिभेदेन त्रैविध्यमुक्त्वा सात्त्विकप्रभेदस्यैव निर्गुणस्य पुनः पृथगुक्तेराशयमाह—सत्त्वात् ।

६ "इति पाद्मे" इति क्वचित् ।

७ "ज्ञाननिष्ठया ज्ञानोत्कर्षेण, श्रवणाद्यावृत्त्या सम्पादितयेति भावः । मायामात्रेषु प्रकृत्यादिनिर्मितेषु देहेषु । अवस्तुतः, वस्तु आनन्दः, तद्विरोधितया दृश्यमानेषु सत्सु तत्र विरागवानिति भावः । वर्तमानोऽपि देहे वर्तमानोऽपि गुणमय्या रजस्तमोविकृतया जीवयोन्या देहेनेत्यर्थः । विमुक्तो भवति । देहाभिमानरहितो भवतीत्यर्थः । अवस्तुभिरस्वतन्त्रैः । चेतनप्रेरणां विना जडत्वेन स्वतोऽबन्धकैरिति भावः । गुणैः रजस्तमोभागैः न बध्यते । ईश्वरानुग्रहसहितेन वृत्तिज्ञानेन गुणह्रासो भवतीति भावः" इति यादवेन्द्रतीर्थाः । "पुमान् ज्ञानी अवस्तुभिरमङ्गलैः गुणैः शब्दादिभिर्न युज्यते न सम्बध्यते । योग्यतातिरेकेणासेवनात् । तत्र कारणमाह— अपरोक्षज्ञाननिष्ठया

"वस्तु स्वतन्त्रमुद्दिष्टमस्वतन्त्रमवस्तु च" इति माहात्म्ये[1] ॥ * ॥

सन्तो दिशन्ति चक्षूंषि बहिरर्कः समुत्थितः ।
देवता बान्धवाः सन्तः पिता माताऽहमेव च[2] ॥ ३४ ॥

भगवतोऽपि सतां मध्ये प्रधानत्वात् सन्तोऽहमेव चेत्युक्तम्—

"विष्णोश्च सत्प्रधानत्वान्न सतां विद्यते परम् । इत्याहुर्वेदविदुषः[3] स हि सर्वेश्वरेश्वरः" इति च ॥ * ॥

इत्येकादशस्कन्धे षड्विंशोऽध्यायः

गुणमय्या सत्त्वादिगुणरूपया जीवयोन्या लिङ्गशरीराख्यमायया विमुक्तस्तदभिमानरहित इत्यर्थः । मायामात्रेषु प्रकृतिनिर्मितेषु अवस्तुतः अस्वातन्त्र्येण दृश्यमानेषु गुणेषु देहेषु वर्तमानोऽपि" इति विजयध्वजीयम् । ज्ञाननिष्ठया गुणमय्या जीवयोन्या गुणमयशरीरेण विमुक्त इव विमुक्तोऽभिमानाभावेन । अत एवावस्तुषु गुणेषु शब्दादिषु प्रवर्तमानोऽपि तैरवस्तुभिर्न बध्यत इति वा । "अवस्तुभिर्हेयैः" इति सुदर्शनसूरिः ।

१ तथाच अवस्तुतः अस्वतन्त्रतया दृश्यमानेषु गुणेषु। अवस्तुभिरस्वतन्त्रैर्गुणैरित्युभयत्राप्यर्थः । अथवा गुणेष्ववस्तुषु, गुणैरवस्तुभिरिति द्विः प्रयोगो व्यर्थ इत्याशङ्कापरिहारायाऽह—वस्तु स्वतन्त्रम् । तथाचैकत्रावस्तुशब्दः हेयत्ववचन इति प्रसिद्ध एवार्थः । अपरत्रास्वातन्त्र्यवचन इति न पौनरुक्त्यमिति।

२ "सन्तः सन्त आत्माऽहमेव च" इति प्र. पाठः । "समुत्थितः उदितः अर्कः बहिरर्थविषयकं ज्ञानं दिशति । सन्तस्तु चक्षूंषि सर्वार्थविषयज्ञानानि दिशन्ति प्रददति । देवतादयः सर्वे सन्तः अहमेव । एवमुपकर्तृषु अहं प्रधान इत्यर्थः । स्वातन्त्र्यलक्षणप्राधान्यज्ञापनाय ऐक्यव्यपदेशः" इति यादवेन्द्रतीर्थाः । यद्वा अहमेव हि सर्वेषां मुख्यतो देवता बन्धुः पिता माता च । सत्सु प्रधानत्वात् । मदनन्तरं सर्वेऽपि सन्तो लोकानां देवता बान्धवाः पितृमातृस्थानीयाश्चेति । सन्तः देवता बान्धवा न केवलम् । किन्तु सन्तो नामाहमेव । मत्प्रधानाः सन्त इति यावत् । यथाऽत्र ग्रामे पण्डितो नामायमेव । पण्डितेष्वयं प्रधान इत्यर्थः । एवं सत्सु साधुगुणेष्वयं प्रधान इति वा । सतां मत्प्रीत्यतिशयविषयत्वाच्च सन्तोऽहमेव । उक्तं हि "ज्ञानी त्वात्मैव मे" इति ।

३ वेदविदुष इति प्रथमार्थे द्वितीया । इत्याहुर्वेदविद्वांसः । सज्जनप्रशंसार्थं वेदविदुषः सज्जनान् न सतां विद्यते परमिति परत्वेनाऽहुरिति वा । विष्णोः सतां मध्ये प्रधानत्वादेव न सतां विद्यते परमित्याहुः । नत्वभेदात् । कुतः ? यतः वेदविदुषो वेदज्ञस्य मते स हि सर्वेश्वरेश्वर इति वा ।

102

[सप्तविंशोऽध्यायः]

पिण्डे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम ।
अण्वीं जीवकलां ध्यायेन्नादान्ते सिद्धभाविताम्[1] ॥ २२ ॥

जीवः कला यस्याः सा जीवकला भगवन्मूर्तिः[2]—

"हृदिस्था या हरेर्मूर्तिर्जीवो यत्प्रतिबिम्बकः । यद्वशे वर्तते जीवः[3] सा तु जीवकला स्मृता । शब्दैः सर्वात्मनाऽनुक्तेर्नादान्तस्था च सा[4] मता" इति विवेके ॥ * ॥

तयाऽऽत्मभूतया पिण्डे व्याप्ते सम्पद्य[5] तन्मयः ।
आवाह्यार्चादिषु स्थाप्य न्यस्ताङ्गं मां प्रपूजयेत्[6] ॥ २३ ॥

"व्याप्तो भूतश्च नित्यं यदात्मभूतो हरिस्ततः[7] । जीवस्य तत्प्रधानत्वं तन्मयत्वमुदा-

---

१ "पिण्डे देहे अन्तःकुम्भकोत्पन्नाभ्यां वाय्वग्निभ्यां संशुद्धे सति । जीवः कला भिन्नांशः यस्याः सा जीवकला बिम्बमूर्तिः ताम् । नादान्ते । नादः शब्दः, तस्यान्ते स्थिताम् । सर्वप्रकारैर्विशिष्याप्रतिपाद्याम् । सिद्धैः ऋषिभिः (भावितां ध्यायेत्)" इति यादवेन्द्रतीर्थाः । "वाय्वग्निभ्यां शोषणदहनाभ्याममृतप्लावनेन च संशुद्धे देहे" इत्यन्ये । हृत्पद्मस्थामिति । अण्वीमिति । तदेतदुक्तं नारायणोपनिषदि—"पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम् । तस्यान्ते सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् । तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता । नीवारशूकवत् तन्वी पीता भास्वत्यणूपमा । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः" इत्यादि । नादान्ते शब्दानामुपरमे सति सिद्धैर्मनसि भाविताम् । "यतो वाचो निवर्तन्ते", "यद् वाचाऽनभ्युदितम्" इत्यादेः ।

२ विश्वनाथचक्रवर्ती चाऽह— "जीवः कला यस्यास्तां श्रीनारायणमूर्तिम्" इति ।

३ एतेन जीवं स्ववशे कलयतीति जीवकलेति निर्वचनान्तरं च सूचितम् ।

४ "–न्तस्था तु सा मता" इति पाठान्तरम् ।

५ "संपूज्य" इति प्र० पाठः ।

६ "(आत्मा व्याप्तैव सती भूता सदा विद्यमाना तया । सर्वदा सर्वत्र विद्यमानयाऽपि तया भगवन्मूर्त्या पुनः पिण्डे) व्याप्ते सति (तत्र सम्पद्य तथा प्रतिपद्य, मम देहे विष्णुर्व्याप्त इति प्रतिपत्तिं कृत्वेति यावत्) तन्मयः स्वयं सर्वव्यापारेषु तत्प्रधानक इति बुद्ध्या पूजाकर्ता अर्चादिषु प्रतिमादिषु आवाहनेन स्थाप्य न्यस्ताङ्गं मातृकादिन्यासोपेतं मां प्रपूजयेत्" इति यादवेन्द्रतीर्थाः । तया पिण्डे व्याप्ते साधकेन स्वदेहे भगवद्व्याप्तौ विज्ञातायां सत्यामत एव तन्मयः सम्पद्य तन्मयो भूत्वेति वा । स एव स्वात्मानं मयि स्थितः पूजयतीत्यादि तन्मयः । उक्तं हि-"मयि स्थितो मदङ्गेषु स्वतन्त्रो व्याप्तवान् हरिः । सर्वशः स्वात्मतन्त्रो मां स्वेच्छया वर्तयत्यजः । स्वात्मनस्तस्य पूजाः स्युर्मनोवाक्कायवृत्तयः । ममैता इति कर्तारमुद्देश्यं च हरिं स्मरेत्" इति । "न ऋते त्वत् क्रियते किञ्चनारे महामर्कं मघवन् चित्रमर्च" इत्यादि च । "आत्मभूतया परमात्मस्वरूपया" इति विश्वनाथचक्रवर्ती ।

७ "हरिः स्मृतः" इति क्वचित् ।

हृतम्" इति तन्त्रभागवते । "व्याप्तोऽपि भगवान् विष्णुर्देहे सर्वगतत्वतः ।
[1]तज्ज्ञस्य फलदो यस्माद् व्याप्तिकृत् तस्य तेन सः" इति च ॥ * ॥

[2]स्वस्य घर्मानुवाकेन महापुरुषविद्यया ।
पौरुषेणापि सूक्तेन धामनीराजनादिभिः[3] ॥ ३० ॥

[4]स्वस्य विष्णुसूक्तेन । धामसूक्तम् "समुद्रादूर्मिः-[5]" इति ।

"नितरं रञ्जयेद् यस्मा पावमानं तु मण्डलम् । विष्णुनीराजनं तस्माद् विद्वद्भिः समुदाहृतम्" इति च ॥ * ॥

उपगायन् गृणन् नृत्यन् कर्माण्यभिनयन् मम ।
मत्कथाः श्रावयञ्छृण्वन् मुहूर्तक्षणिको भवेत्[6] ॥ ४३ ॥

---

१ "भक्तस्य फलदो-" इति प्र. पाठो न स्वरसः । यद्यपि सदा विष्णुः सर्वगतः । तथाऽपि देहे व्याप्तत्वेन तज्ज्ञस्य तं विजानत एव फलद इत्यवश्यमुपासकेन मानसपूजायां देहे व्याप्तिरनुसन्धेयेत्यर्थः ।

२ "स्वर्णघर्मानुवाकेन" इत्यर्वाचीनाः ।

३ "सामनीराजनादिभिः" इति च । "स्वस्य सूक्तेन विष्णुसूक्तेनेत्यर्थः । घर्मानुवाकेन 'घर्मा समन्ता-' इत्याद्यनुवाकेन । महापुरुषविद्यया जितन्तेस्तोत्रेण । सहस्रनाम्ना वा । धामसूक्तम्—"समुद्रादूर्मिः-" इति । विष्णुं नितरां रञ्जयतीति नीराजनं पवमानसूक्तम्, तेन च" इति यादवेन्द्रतीर्थाः ।

४ स्वस्य विष्णोः सूक्तेनेत्युत्तरत्र वक्ष्यमाणमत्राप्यनुवर्तते । तथाहि प्रथममण्डले "विष्णोर्नु कम्-"(१५४), "प्र वः पान्तमन्धसो-"(१५५), "भवा मित्रो न शेव्यो-"(१५६) इति त्रीणि सूक्तानि औचथ्येन दीर्घतमसा दृष्टानि वैष्णवानि । मध्यममैन्द्रवैष्णवम् । षष्ठमण्डले "सं वां कर्मणा समिषा-"(६९) इति सूक्तमिन्द्रविष्णुदैवत्यं बार्हस्पत्येन भारद्वाजेन दृष्टम् । सप्तममण्डले च "परो मात्रया तन्वा वृधान-"(९९) इति, "नू मर्तो दयिते सनिष्यत्-"(१००) इति च वैष्णवं सूक्तद्वयं मैत्रावरुणिना वसिष्ठेन दृष्टम् । तथा प्रथममण्डले द्वाविंशे सूक्ते काण्वेन मेधातिथिना दृष्टे "इदं विष्णुर्विचक्रमे-" इत्यादिरन्त्यो वर्गश्च । घर्मानुवाक इति "घर्मा समन्ता त्रिवृतम्-"(१०-११४) इति सूक्तमिति मुखत एव स्फुटमिति न व्याख्यातम् । अनुवाक इति सूक्तमुच्यतेऽत्र । अथवा "सुवर्णं घर्मं परिवेद वेनम्" इत्यादिर्याजुषः सुवर्णघर्मानुवाक एवात्र घर्मानुवाकपदेनोच्यते । "जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन । सुब्रह्मण्य नमस्तेऽस्तु महापुरुषपूर्वज" इत्युपक्रमान्महापुरुषविद्या जितन्तेस्तोत्रम् ।

५ धाम च नीराजनादयश्च तैः । धामेति तत्पदघटितं सूक्तम्-"समुद्रादूर्मिर्मधुमान्-"(४-५८)। अत्र ह्यन्तिमे मन्त्रे "धामन् ते विश्वं भुवनमधिश्रितम्-" इति धामशब्देन भगवान् स्तुतः। एवं नितरां भगवत्प्रीतिहेतुत्वान्नीराजनं पावमानं नवमं मण्डलम् । तत्रापि विशिष्याऽद्यमनुवाकत्रयमध्यायचतुष्टयात्मकम् । आदिपदेन श्रीसूक्तमन्युसूक्तविश्वकर्मसूक्तादीनां ग्रहणम् ।

६ "मुहूर्तं क्षणिको भवेत्" इति प्र. पाठः । मुहूर्तं क्षणमिवास्येति मुहूर्तक्षणिकः। मुहूर्तं क्षणमिव नयन् भवेदि-

मम कर्माणि कीर्तयित्वाऽभितो नयन्, सर्वेषां प्रकाशयन्, मत्कथाः श्रावयन्नित्यभिनयशब्दार्थः[1] ॥ * ॥

प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयम् ।
पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥ ५१ ॥

मामेव नैरपेक्ष्येण भक्तियोगेन विन्दति ।
भक्तियोगं स लभते एवं यः पूजयेत माम्[2] ॥ ५२ ॥

नैरपेक्ष्येण भक्तियोगेनैव साम्यमित्यर्थः ।

"निर्दुःखत्वं हरेः साम्यं न तादृशसुखात्मता । सर्वोत्तमः सदानन्दः कथं कस्य कदेष्यते[3]" इति प्रवृत्ते । "आधिपत्यं त्रिलोकस्य योग्यानामिन्द्रता स्मृता । अयोग्यानां त्रिलोकेऽपि पूज्यत्वं समुदाहृतम् । तद् भवेत् परया भक्त्या विष्णोरालयकारिणः । ततोऽप्युद्रिक्तया भक्त्या विष्णुं पूजयतः[4] सदा । अवाप्यते ब्रह्मलोकस्तदुद्रिक्तश्च[5] मुच्यते" इति च ॥ * ॥

इत्येकादशस्कन्धे सप्तविंशोऽध्यायः

दित्यर्थः । "मुहूर्तं क्षणिको नयेत्" इति यादवेन्द्रतीर्थाभिमतः पाठ इति भाति । तथाहि तद्व्याख्यानम्—"मम कर्माणि गृणन् स्तुवन् सन् कर्माण्यभिनयन् अभितो नयन् सर्वेषां प्रकाशयन् इत्येतद्विवृणोति—मत्कथाः श्रावयन्निति । एवं मुहूर्तकालं क्षणिकः क्षणवानिव नयेत्, क्षणमिव नयेदित्यर्थः" इति ।

१ "–नयपदार्थः" इति प्र. पाठः । मम कर्माणि प्रकाशयन्नित्यभिनयशब्दार्थः । मत्कथाः श्रावयन्निति स एवार्थः मूले च स्फुटमुक्तः ।

२ "(सद्मना देवमन्दिरनिर्माणेन) भुवनत्रयं तत्र पूज्यत्वं वा । त्रिभिः प्रतिष्ठासद्मपूजाकरणैः । ननु कर्मणः कथं मुक्तिसाधनत्वम्? सत्यम् । भक्तियोगेन साध्यमेतदित्याह—मामेव । तर्हि पूजादेः किं फलमित्यत आह—एवं यः । स पूजाकर्ता भक्तियोगं उद्रिक्ततरभक्तिं लभते । ततः मां लभते । तेन निर्दुःखत्वलक्षणं साम्यमियात् प्राप्नोतीत्यर्थः" इति यादवेन्द्रतीर्थाः । "साम्यमित्यर्थे साम्यतामित्यार्षम्" इति श्रीधरस्वाम्यादयः । "मत्साम्यतां मत्सारूप्यम् । स्वार्थे ष्यञ्" इति शुकदेवः । "मया साम्यं यस्य स मत्साम्यः । तस्य भावो मत्साम्यता" इति सुदर्शनसूरिः ।

३ "कदाऽऽप्यते" इति पाठान्तरम् । प्र॰ पाठोऽपि तथा । सर्वोत्तमः आनन्दः कदा, मुक्तावपि कस्य वा कथं वेष्यते । न कथमपि न कस्यापि न कदाऽपि ।

४ तृतीयार्थे षष्ठी । पूजयताऽवाप्यते । अपरोक्षिणां भक्तानामेवेदं फलम् । अत्र स्वयमेवाऽचार्यः प्रमाणम् । यत् स्वयं कृष्णमन्दिरं निर्माय, तत्र कृष्णं प्रतिष्ठाप्य पूजयामास । अवाप्स्यति च ब्रह्मताम् ।

५ "–स्ततोद्रिक्तश्च" इति प्र. पाठः प्रामादिकः ।

[अष्टाविंशोऽध्यायः]

परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् ।
विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च[1] ॥ १ ॥
परस्वभावकर्माणि यः प्रशंसति निन्दति ।
स आशु भ्रंशते स्थानादसत्याभिनिवेशतः[2] ॥ २ ॥

[3] "न प्रशंसेत निन्द्यांस्तु प्रशंस्यान्नैव निन्दयेत् । उभयं यः करोत्येतदसत्यात्[4] स पतत्यधः । यः[5] प्रशंस्यान्न प्रशंसेन्निन्द्यो येन न निन्द्यते । सोऽपि तद्वदधो याति यतोऽरिवदुदासकः" इति तत्कारे ।

प्रकृत्या पुरुषेण च सह[6] । एकेन परमात्मना व्याप्तमेकात्मकम् । तथा पश्यत एव यथार्थज्ञानं भवति[7] ॥ * ॥

---

१ "अहङ्कारकारणस्वप्रशंसां द्वेषादिकारणपरनिन्दां च मुमुक्षुः परित्यजेदित्याह—परेति । प्रकृत्या सरस्वत्या पुरुषेण हिरण्यगर्भेण च सह । चित्प्रकृत्या सहेति वा । एकात्मकम् । एकः सर्वदेवेषु प्रधानो नारायणः आत्मा व्याप्तो यस्मिन् तत् विश्वं पश्यन् । विश्वस्य सर्वव्यापारप्रवर्तकान्तर्यामिमूर्तिभिर्व्याप्तं विश्वं पश्यन् । परस्य विष्णुद्वेषिणः स्वभावं नित्यसिद्धं गुणं कर्माणि विहितानि न प्रशंसेत् । भक्तस्य तु प्रशंसेदेव । निषिद्धान्यपि न गर्हयेत् । तेनाहङ्कारभ्रमनिरास इति भावः" इति यादवेन्द्रतीर्थाः । अत्रावतरणिकाया व्याख्यानस्य च मातीव सङ्गतिः । प्रकृत्या पुरुषेण च सह विष्णुर्व्याप्त इति ब्रह्मसरस्वत्योरपि विष्णुवद् विश्वान्तर्व्याप्तिरुच्यत इति च तदाशयः । प्रकृत्या पुरुषेण च सहेदं विश्वमेकात्मकं विष्णुना व्याप्तमिति वा । न केवलं जगति किन्तु प्रकृतौ पुरुषे च विष्णुर्व्याप्त इत्यर्थः । गुणकर्माणि यदि स परो विष्णुद्वेषी तर्हि न प्रशंसेत् । यदि स विष्णुभक्तस्तर्हि न गर्हयेदिति च ।

२ "भ्रश्यते स्वार्थादसत्याभिनिवेशतः" इति प्र. पाठः । "एवमकर्तुः विपरीतं फलमाह—सः प्रशंसानिन्दाकर्ता असत्ये स्तुतिनिन्दारूपे अभिनिवेशतः अन्यथाज्ञानदाढर्यात् । अभक्ते गुणस्य दोषत्वात् ; भक्तेऽगुणस्यादोषत्वादिति भावः । स्थानात् स्वपुण्यलोकात् भ्रंशते पततीत्यर्थः" इति यादवेन्द्रतीर्थाः ।

३ एतेन परेषां निन्द्यानां स्वभावकर्माणि न प्रशंसेत् । परेषां प्रशंस्यानां न गर्हयेदिति विवृतं भवति । परशब्दो वैवक्षिक इति ।

४ निन्द्यान् यदि प्रशंसति सेयमविद्यमानप्रशंसा । प्रशंस्यान् यदि निन्दति सेयमविद्यमाननिन्दा भवति । तेनासत्यभाषणेन कथमधःपातो न भवेदिति ।

५ असत्यस्य वचनमिव सत्यस्यावचनमपि असत्यपोषकतया दोषावहमित्याह—यः प्रशंस्यान् । यतः उदासकः सत्यासत्ययोरुदासीनः सत्यं न प्रशंसन् असत्यं च न निराकुर्वन् तटस्थ इत्यर्थः । सोऽप्यरिवद् सत्यविरोधिवद् दोषपात्रमेव । यथा द्रौपदीवस्त्रापहारे दुर्योधनस्य दोषमनुद्घाटयन्तो धृतमौना द्रोणादयः । उक्तं हि— "न ते वृद्धा ये न वदन्ति धर्मम्" इत्यादि ।

६ राधारमणदासोऽप्याह—"प्रकृत्या गुणसाम्यरूपया पुरुषेण प्रकृतीक्षणकर्त्रा च सह एकात्मकम् । एकः परमात्मा आत्मा मूलस्वरूपं यस्य" इति । "एकात्मकं भगवदन्तर्यामिकम्" इति सुदर्शनसूरिः । "विश्वं प्रकृत्या पुरुषेण च युक्तं चिदचिन्मिश्रप्रपञ्चमेकात्मकं पश्येत् । एक ईश्वरः" इति च ।

७ न केवलमनिन्द्यानामनिन्दामात्रेण अप्रशंस्यानामप्रशंसामात्रेण वा यथार्थज्ञानं भवति । किन्तु विश्वमेका-

तैजसे निद्रयाऽपन्ने पिण्डस्थो नष्टचेतनः ।
मायां प्राप्नोति मृत्युं वा तद्धि नानार्थदं मनः[१] ॥ ३ ॥

तैजसाहङ्कृतेर्जात इन्द्रियग्रामके परात् । निद्रया वशमापन्ने जीवः स्यान्नष्टचेतनः । अतो विष्णोर्वशे सर्वं तेन व्याप्तमिदं[२] स्मरेत्" इति च । "निद्रा चैव सुनिद्रा च द्विधा निद्रा प्रकीर्तिता । तत्र निद्रा भवेन्नित्या सुनिद्रा मृतिकालगा" इति पाद्मे[३] ।
"मनोमात्रस्वरूपत्वात् स्वप्नो[४] मायेति कथ्यते[५]" इति च ।

[६]तथा ननाविषयदं[७] मन एव । मनसा हि विषयाः प्रतीयन्ते ॥ * ॥

किं[८] भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत् ।
वाचोदितं तदनृतं मनसा ध्यातमेव च[९] ॥ ४ ॥

त्मकं पश्यत एव । अत एतत् त्रयमप्यधिकारिणा सम्पाद्यम् । एवं पश्यत एव च निन्द्यानिन्द्यविवेकज्ञानं च युज्यते ।

१ "तद्वन्नानार्थदृक् पुमान्" इति प्र. पाठः। "ननु देहेन्द्रियादिषु जीवस्य स्वातन्त्र्यं भवेत्, अतः कथमहङ्कारादिर्भ्रम इत्याशङ्कयाऽह—तैजस इति । तैजसाहङ्कारजन्ये इन्द्रियसमूहे निद्रया आपन्ने सति, पिण्डस्थः देहस्थः जीवः नष्टचेतनः बाह्यज्ञानशक्तिप्रतिबन्धवान् भवति । मायां स्वप्नं प्राप्नोति । ननु स्वप्ने विषयसद्भावे किं कारणम्? आह— तद्धि। हि यस्मात् मनः नानार्थदम् । विविधविषयप्रापकम् । विषयज्ञानजनके मनसि तथातथा वासनानां सद्भावादिति भावः । देहो न जीवाधीन इति स्पष्टमाह—मृत्युमिति । कदाचित् सुनिद्रां मृत्युमाप्नोति । अतो देहेन्द्रियतद्व्यापारादिः परतन्त्र इति भावः" इति यादवेन्द्रतीर्थाः । तैजसे इन्द्रियगणे निद्रया ग्रस्ते जीवः मायां स्वप्नमाप्नोति । सुनिद्राख्यया मृतिकालीननिद्रया ग्रस्ते सति मृत्युमाप्नोति । वाशब्दो व्यवस्थितविकल्पे।

२ "व्याप्तमिति स्मरेत्" इति प्र. पाठः। एतेन "विश्वमेकात्मकम्" इति व्याख्यातम् ।

३ "इति साम्ये" इति क्वचित् । ४ वासनामयत्वान्माया स्वप्नं इति यावत् ।

५ "मायेति भण्यते" इति क्वचित् ।

६ तदेवं जीवतः स्वप्नसुषुप्ती मरणं च परायत्तमित्युक्तम् । इदनीं जाग्रद्दशायामपि न तस्य स्वातन्त्र्यमित्याह—तथा। नानार्थदं नानाविषयप्रदर्शकं जाग्रद्दशायामपि तन्मन एव हि येन स्वप्नं पश्यति । जाग्रति बाह्यार्थान् दर्शयति । स्वप्ने तु मानसानेवेतीयानेव भेदः । मनसश्च न स्वाधीनत्वम्, किन्तु परमात्माधीनत्वमिति स्वप्नदृष्टान्तेनैव स्फुटम् । तथाचावस्थात्रयमयं जीवनं मरणं च परस्य विष्णोः सकाशादेवेति विश्वमेकात्मकं पश्येदिति युक्तम् । ७ "नानार्थदम्" इति प्र. पाठः।

८ "ननु विष्णुद्वेषिषु प्रशंसा न कार्येत्युक्तम् । तत्र किं निमित्तमिति जिज्ञासायामाह-किं भद्रम् । वस्तु निर्विकारम्, तद्भिन्नमवस्तु जीवः सविकारः। न विद्यते वस्तु सुखं यस्येति वा। तस्य द्वैतस्य अशुभरूपस्य भद्रं मङ्गलं किम-

"[1]एकं तु शुभमुद्दिष्टमशुभं द्वैतमुच्यते । पुंसोऽशुभस्य किं भद्रं किमभद्रं विशेषतः ।
सर्वदाऽशुभरूपत्वाद् विशेषोऽत्यल्प एव हि" इति भारते ।

द्वैतस्याशुभस्य पुरुषस्य कियदत्यल्पमेव[2] हि भद्रमभद्रं वा स्वयोग्यादाधिक्येन भवति[3] यत्नवतोऽपीत्यर्थः । अतस्तद्विषये ध्यातमुक्तं च शुभमनृतमेव ।

"उच्यते ध्यायते वाऽपि कुनरं प्रति यच्छुभम् । असत्यमेव भवति स्वभावोऽसत्त्वमेव[4] यत्" इति प्रद्योते ॥ * ॥

[5]छायाप्रत्युदकाभासा ह्यसन्तोऽप्यर्थकारिणः ।
एवं देहादयो भावा यच्छन्त्यामृत्युतो भयम् ॥ ५ ॥

स्वभावतोऽशुभस्याशुभदेहादिकं नाशुभकारणं तर्हीत्यत आह—छायाप्रत्युदकाभासा इति ।

"व्यपेक्ष्य जीवं देहादि निःशक्तत्वादवस्त्वपि । पुनः शुभाशुभनृणां यच्छेदेव शुभाशुभम् । छायानीहारकाभासा निःशक्ता अपि कार्यदाः । एवं शुभादिदेहादेर्भवेत्

स्ति ? न किमपि । यथा कर्मप्राप्तमशुभं तथा शुभमपि भवेदित्याशङ्कयाऽह— किमभद्रं वा । द्वैतस्य स्वभावतोऽत्यन्तमशुभरूपस्य कर्मप्राप्तमभद्रं वा कियत् । तत्स्वरूपापेक्षयाऽल्पम् । गण्यं न भवतीत्यर्थः । महाऽशुभरूपे तस्मिन् शुभमप्यशुभमेवेति भावः । तत् तेन निमित्तेन मनसा अशुभे पुरुषे ध्यातं शुभं अनृतं नास्ति । वाचोदितमपि शुभं नास्ति । अतः असज्जनप्रशंसा असत्यरूपा न कार्येति भावः" इति यादवेन्द्रतीर्थाः । द्वैतस्य तामसत्वेनाशुभरूपस्य अवस्तुनः असत्पुरुषस्य भद्रमभद्रं वा किं स्यात्? न तावत् तस्य किमपि भद्रम् । स्वतोऽशुभरूपत्वात् । अत एव स्वतोऽशुभेऽशुभान्तरेण किं विशिष्यते ? तात्कालिकं किंचित् स्याच्चेदपि तत् कियत् ? अत्यल्पमस्थिरं च । नह्याहितेन शुभेनाशुभेन वा तत्स्वरूपं हीयते वर्धते वा । तस्मादशुभविषये ध्यातमुदितं च शुभमनृतमन्ततोऽसत्यमेव भवति । तस्मान्न प्रशंसेत् ।

१ ज्ञानार्थैक्यादेकं यथार्थज्ञानं शुभम्, एकश्च यथार्थज्ञानी शुभः । एवं ज्ञानर्थयोर्द्विधाभावाद् द्वैतमयथार्थज्ञानमशुभम् । अयथार्थज्ञानी द्वैत उच्यते । अत एवाशुभः ।

२ "कियदल्पमेव" इति प्र. पाठः ।

३ "स्वयोग्यादाधिक्येन न भवति" इति प्र. पाठः प्रामादिकः । स्वयोग्यादाधिक्येनात्यल्पमेव भवतीति ह्यपेक्षितोऽर्थः ।

४ "स्वभावोऽसत्यमेव" इति प्र. पाठो न स्वरसः ।

५ "छायाप्रत्याह्वयाभासा-" इत्यर्वाचीनाः । तर्हि स्वभावतोऽशुभस्य जीवस्य अशुभदेहादिकमशुभसंसारकारणं न स्यात्, अशुभस्य स्वतःसिद्धत्वादित्यत आह—छायेति । देहच्छाया, प्रत्युदकं नीहारः, आभासः व्याघ्रादिप्रतिबिम्बः । एते यद्यपि असन्तः चेतनाद्यपेक्षया स्वतः व्यापारशक्तिरहिताः, अथापि अर्थकारिणः भयादिजनकाः । एवं यद्यपि असन्तः स्वतो व्यापारशक्तिरहिताः तथाऽपि देहादयो भावाः पदार्थाः आमृत्युतो देहावसानपर्यन्तं भयं यच्छन्ति । तस्मादशुभस्यापि चेतनस्य संसार इति भावः" इति यादवेन्द्रतीर्थाः । यथा च्छाया

कार्यं शुभादिकम्" इति सुमते। "नीहारः प्रत्युदं चैव धूम इत्यपि शब्द्यते[१]" इति शब्दनिर्णये ॥ * ॥

आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः।
त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः[२] ॥ ६ ॥

इदं विश्वं सृजति त्राति हरति च; स्वयं स्वात्मनैव सृज्यते त्रायते ह्रियते च।

"दीपाद् दीपान्तरं यद्वत् सृष्टिरीशस्य कीर्त्यते। एतावत्कालमासिष्ये[३] मानुषेष्विति[४] चिन्तनम्। विष्णोस्त्राणं समुद्दिष्टं स्वस्यैव स्वेच्छयैव तु। दीपे दीपान्तरस्येव ह्येकीभावश्च[५] संहृतिः[६]"। "पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते[७]। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" इति च ॥ * ॥

तस्मान्नह्यात्मनोऽमुष्मादन्यो[८] भावो निरूपितः।
[९]अनिरूपितेयं त्रिविधा निर्मूला [१०]मतिरात्मनि।

राक्षसत्वबुद्धया भयजननी, प्रत्युदकं धूमबुद्धयाऽग्न्यादिभयजनकम्, व्याघ्रादिप्रतिबिम्बश्च जीवद्व्याघ्रबुद्धया भयजनक एवमेव देहादयोऽप्यहम्ममत्वाभिमानेन भयं यच्छन्त्यशुभजीवानाम्। अभयं वा शुभजीवानाम्।

१ "धूम्रमित्यभिशब्दयते" इति प्र. पाठः। "धूम्रमित्यपि शब्द्यते" इति क्वचित् कोशे।

२ "ननु जडस्य चेतनापेक्षयाऽशक्तत्वेऽपि चेतनस्य जडं प्रति प्रभुत्वात् देहादिकं प्रति जीवस्य यथेष्टविनियोजकत्वाभावः कुत इति जिज्ञासायामाह—आत्मैवेति। महदहमादिकमिदं ब्रह्माण्डतद्गतलोकादिकं विश्वं आत्मैव पूर्णसर्वकल्याणगुणशक्त्युपेत एव सृजति। स्वेन स्वयं सृज्यते। शक्तिवैलक्षण्यं विना दीपाद् दीपान्तरवदिति भावः। व्यज्यते। गुणमहदादिषु वस्तुषु ब्रह्मादिदेहेषु च स्थित्वा सर्वव्यापारकरणार्थमिति भावः। विश्वेषु वस्तुषु आत्मनः अन्तर्यामिमूर्तयो यस्य स विश्वात्मा विश्वं त्राति। स्वयं च स्वेन त्रायते। एतावत्कालं तेषुतेषु वस्तुषु अंशैः स्थास्यामीति सङ्कल्पवान् भवतीत्यर्थः। विश्वं हरति भक्तानामनिष्टपरिहारं करोति। स्वेन स्वस्मिन् ह्रियते एकीभवतीत्यर्थः" इति यादवेन्द्रतीर्थाः। परमात्मैव इदं विश्वं सृजति त्राति संहरति च। नान्यः। स तु आत्मैव स्वयमेव सृज्यते त्रायते ह्रियते च। नान्येन।

३ "–माशिष्ये" इति प्र. पाठः। ४ "मनुष्येष्विति" इति क्वचित्।

५ "ह्येकीभावश्च" इति प्र. पाठः प्रामादिकः। ६ इतः परम् "इति च" इत्यधिकं प्र. पाठे।

७ "–मुदुच्यते"(?) इति बहुलं कोशेषु। "पूर्णमदो मूलरूपम्। पूर्णमिदमवताररूपम्। अमुष्मादिदं सङ्ख्यामात्रेण उदच्यते उद्रिच्यते। एकमेव बहुसङ्ख्याकं भवति विशेषादेव। स्वस्य पूर्णस्य पूर्णमिदमवताररूपमादाय तन्मूलमेवावशिष्यते" इति पण्डिताचार्यः। ८ "–त्मनोऽन्यस्मादन्यो–" इत्यर्वाचीनाः।

९ "निरूपितेयं त्रिविधा" इति प्र. पाठः। "अनिरूपितेयं विविधा" इति च पाठान्तरं यादवेन्द्रतीर्थीये।

१० "भातिरात्मनि" इति च।

इदं गुणमयं विद्धि त्रिविधं मायया कृतम्[1] ॥ ७ ॥

आत्मनः परमेश्वरस्य तस्मादन्यो भावो नास्ति।

"सृष्टिः स्थितिश्च संहारो भावनं समुदाहृतम् । तद् यः करोति पुरुषः स भाव इति कीर्तितः[2]" इति विवेके।

अन्येन सृष्टिः स्थितिः संहार इति त्रिविधा मतिर्विद्वद्भिर्नैव निरूपिता निर्मूला प्रमाणवर्जिता।

"अन्यस्मात् सृष्टिसंहारौ स्थितिश्च परमात्मनः। निरूपिता न विद्वद्भिः प्रमाणाभावतो हरेः[3]" इति ब्रह्मतर्के।

अन्यतः [4]सृष्टिः स्थितिः संहार इति त्रयं [5]गुणप्रधानं सत्त्वादिगुणाधीनम्।

---

१ "तस्मादमुष्मात् सर्वशक्त्युपेतात् अन्यश्चेतनः आत्मनः परमेश्वरस्य भावयतीति भावः सृष्ट्यादिकर्ता न निरूपितः। विद्वद्भिर्न निर्णीतः। (अमुष्मादात्मनः परमेश्वराच्च अन्यो भावः सृष्ट्यादिकर्ता जगतो नास्ति।) तस्माज्जीवापेक्षया देहादिषु यथेष्टविनियोगार्हत्वं स्वतो नास्तीति भावः। नन्वहं पुरादिनिर्माता, सर्वशत्रुहन्ता, सर्वप्रजापालक इति कर्तृत्वस्वामित्वादीनामनुभवात् कथमादिसृष्टावपि अन्यभावराहित्यमित्याशङ्क्याऽह–अनिरूपितेति। आत्मनि जीवे विद्यमाना विविधा सृष्टिकर्तृत्वादिविषया मतिः अनिरूपिता प्रमाणजन्यत्वेन विद्वद्भिर्नाङ्गीकृता। अतः निर्मूला। प्रमाणजन्या न भवति। अतः स्वस्मिन् मुख्यतः कर्तृत्वस्वामित्वबुद्धिः भ्रम इति भावः। चेतनत्वाविशेषेऽपीश्वरस्यावतारोऽभिव्यक्तिः जीवस्य तु देहेनोत्पत्तिरिति विभागः कथमिति जिज्ञासायामाह— इदं गुणमयम्। इदं जीवजातं गुणमयं सत् सात्विकादिगुणप्रचुरं सत् सात्विकादिगुणभेदेन त्रिविधं देवमायया ईश्वरेच्छया कृतम्, विकारकारणदेहयुक्तं कृतम्" इति यादवेन्द्रतीर्थाः। तात्पर्याविरुद्धमिदमर्थान्तरम्। तात्पर्यानुसारेण त्वेवं व्याख्येयम्—आत्मनः परमेश्वरस्य तस्मादमुष्मात् परमेश्वरादन्यः भावः सृष्ट्यादिकर्ता नहि नैव निरूपितः। या च परमात्मनि विषये अन्यकर्तृकसृष्टिस्थितिसंहारविषया त्रिविधा मतिः केषाञ्चिद् सा अनिरूपिता, हेतुगर्भम्, विद्वद्भिरनङ्गीकृतत्वादेव निर्मूला प्रमाणवर्जिता। इदं अन्यतः सृष्टिसंहारादि त्रिविधं कार्यजातं गुणमयं गुणप्रधानम्। सत्त्वादिगुणाधीनं मायया प्रकृत्या कृतम्। तत् कथं मायातीतस्य निर्गुणस्यान्यतः सृष्ट्यादि सम्भवेत्? अथच भाष्यध्वनितमर्थान्तम्—तस्मादमुष्मात् परमात्मनोऽन्यः भावः सृष्ट्यादिकर्ता अस्य जगतोऽपि न निरूपितो नाङ्गीकृतो विद्वद्भिः। अत एवाऽत्मनि स्वस्मिन् अहं करोमि हन्मीत्यादिः सृष्ट्यादिविषया त्रिविधा मतिर्विद्वद्भिरनिरूपिता निर्मूलैव। तस्मादिदं जीवनिष्ठं त्रिविधं सृष्ट्यादिकं गुणाधीनम्। गुणमयप्रकृत्यधीनमीश्वरेच्छाधीनं च। न कदाऽपि स्वतन्त्रमिति।

२ "कीर्त्यते" इति प्र. पाठः। क्वचित् कोशेषु च। ३ हरेरन्यस्मादित्यन्वयः।

४ "सृष्टिस्थितिसंहारः" (?) इति बहुलं कोशेषु पठ्यते।

५ "गुणमयं सत्त्वादिगुणाधीनम्" इति प्र. पाठः।

103

"गुणसम्बन्धयोग्यानामुत्पत्त्याद्याः स्युरन्यतः। सर्वदा निर्गुणस्यास्य सर्गाद्याः स्युः कुतोऽन्यतः" इति च ॥ * ॥

प्रत्यक्षेणानुमानेन निगमेनाऽऽत्मसंविदा ।
आद्यन्तवदसज्ज्ञात्वा निःसङ्गो विचरेदिह[1] ॥ ९ ॥

"[2]असमर्थमसत् प्रोक्तं सत् समर्थं प्रकीर्तितम्" इति च ॥ * ॥

यावद् देहेन्द्रियप्राणैरात्मनः सन्निकर्षणम् ।
संसारः फलवांस्तावदपार्थोऽप्यविवेकिनः[3] ॥ १२ ॥

"[4]फलवान् मोक्षहेतुत्वान्नित्यानन्दादपार्थकः। जीवात्मनस्तु संसारः स्वप्नवच्चञ्चलत्वतः" इति तत्त्वविवेके ॥ * ॥

[5]अर्थेऽप्यविद्यमाने हि संसृतिर्न निवर्तते ।
ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ १३ ॥

---

१ "महावैराग्यमेव नित्यसौख्यकाणभक्तिज्ञानादौ मुख्यकारणमित्याह—प्रत्यक्षेण। निगमेन अपौरुषेयेण च। आत्मसंविदा स्वानुभवेन स्वर्गादिविषयजातमाद्यन्तवत् उत्पत्तिनाशवत्, असत् दुःखासहचरितसुखसम्पादनेऽसमर्थमिति ज्ञात्वा निःसङ्गो विषयसङ्गरहितः इह परमेश्वरे चरेत् सक्तो भवेत्" इति यादवेन्द्रतीर्थाः। "इह जगति निःसङ्गो निर्लेपो विचरेत्" इति विजयध्वजीयम्।

२ "स्वतन्त्रसत्ताभ्युपगमे तु मिथ्याभूतमेव" इति राधारमणदासः। "असदसमर्थमस्वतन्त्रम्" इति विजयध्वजीयम्। "असदकिञ्चित्करमनित्यं वा" इति शुकदेवः।

३ "जीवस्य स्वप्रकाशस्यापि अहङ्काररूपमनःसङ्गात् ज्ञानशक्तिप्रतिबन्धे सति विषयरागादिप्राप्तदुष्कर्मादिबन्धः संसारः भवतीत्याह—यावदिति। स्थूलसूक्ष्मदेहाभ्यां स्थूलसूक्ष्मेन्द्रियैः प्राणैश्च आत्मनः जीवस्य सन्निकर्षणं संश्लेषः यावत्पर्यन्तं तावत्पर्यन्तं अविवेकिनः स्वस्मिन् दुःखादितादात्म्यं मन्यमानस्य दुःखसान्निध्यप्राप्तः चेतने नीचतालक्षणः संसारः अपार्थः नित्यानन्दाभिव्यक्तेरहेतुरीश्वरप्रसादस्यैव तद्धेतुत्वादिति भावः। विवेकिनां दुःखाविनाभूतं विषयसुखमर्थत्वेन न विवक्षितमिति भावः। विवेकिनस्तु फलवान् संसारनिवृत्तिलक्षणफलसम्पादक इति भावः" इति यादवेन्द्रतीर्थाः। मोक्षाख्यफलविवक्षया यद्यपि विवेकिनामपार्थः संसारः। अथाप्यविवेकिनः यो विषयसुखमेव परमार्थं मन्यते तस्य फलवान्। अनित्यास्थिरफलदर्शनात्। अथच विवेकिनां फलवान्। अन्ततो मोक्षहेतुत्वात्। मोक्षार्थं साधनं हि संसार एव भवति। ये तु न मोक्षपर्यन्तास्तेषामपार्थम्, क्षुद्रफलत्वात्।

४ जीवात्मनः मोक्षहेतुत्वात् संसारः फलवान्। अथापि जीवस्य नित्यानन्दात् नित्यनन्दरूपत्वात् दुःखमयः संसारोऽपार्थोऽप्युच्यते। यत्किञ्चित् सुखं दृश्यते तदपि स्वप्नचञ्चलमिति न गण्यम्। यद्वा नित्यानन्दादिति ल्यबर्थे पञ्चमी। नित्यानन्दमपेक्ष्य संसारोऽपार्थक इति।

५ "अर्थे ह्यविद्यमानेऽपि" इति प्र. पाठः। "अर्थेऽप्यविद्यमानेऽपि" इति क्वचित्। "अर्थे नित्यसुखा-

संसृत्यभावस्यैव फलरूपत्वान्निरर्थ[1] एव संसार इत्यवधारयति—अर्थेऽपीति ।

"उच्यते निष्फलत्वेन यदत्यल्पफलं भवेत्" इति च ॥ * ॥

[2]यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थकृत्[3] ।
स एव प्रतिबुद्धस्य न वै मोहाय कल्प्यते[4] ॥ १४ ॥

[5]अतोऽल्पफलत्वावधारणार्थं च पुनर्वचनम् ॥ * ॥

शोकहर्षभयक्रोधलोभमोहस्पृहादयः ।
अहङ्कारस्य दृश्यन्ते जन्म मृत्युश्च नाऽत्मनः[6] ॥ १५ ॥

अहङ्कारस्य सकाशाद् दृश्यन्ते । नाऽत्मनः स्वतः ।

"अहङ्कारात्तु संसारो भवेज्जीवस्य न स्वतः । कुतश्चिदानन्दतनोः स्वरूपेच्छायुतस्य सः[7]" इति तन्त्रभागवते ॥ * ॥

भिव्यक्तिलक्षणे प्रयोजने अविद्यामाने असत्यपि । यद्यपि संसारः जीवेन निवर्तनीयः अथापि विषयान् ध्यायतः जीवस्य रागद्वेषादिसम्पन्नस्येति भावः । संसृतिर्न निवर्तते । जीवापराधेनानुवर्तते ! जीवापराधेनैव संसारः प्रवर्तत इत्यत्र दृष्टान्तमाह—स्वप्न इति । अस्य निद्रावशस्य स्वप्ने प्राप्तेऽनर्थागम इव केनचिन्निमित्तेन दुःखप्राप्तिरिव" इति यादवेन्द्रतीर्थाः ।

१ "– न्निरर्थकं एव" इति क्वचित् । २ "यथा त्वप्रति– " इति पाठान्तरम् ।

३ "–नर्थभृत्" इति प्र· पाठः ।

४ "कल्पते" इति च । "जाग्रतस्तु यथा न (स्वाप्नं) दुःखं तथा स्वतन्त्रपरतन्त्रविषयकज्ञानसम्पन्नस्य अभिमानलक्षणः संसारः नास्तीति भावेनाऽह— यथा ह्यप्रतिबुद्धस्य । अप्रतिबुद्धस्य अनर्थप्रापकः स्वप्नः प्रतिबुद्धस्य मोहाय स्वस्मिन् दुःखितादात्म्यारोपाय यथा नैव कल्प्यते न भवति एवमिति भावः" इति यादवेन्द्रतीर्थाः ।

५ "अतोऽफलवत्त्वावधारणार्थम्" इति प्र. पाठः प्रामादिकः । "अतोऽल्पफलवत्त्वावधारणार्थम्" इति क्वचित् । "अतोऽल्पफलत्वादवधारणार्थम्" इति च पाठान्तरम् ।

६ "ननु जीवप्रकृत्योः नित्यत्वात् प्रकृतिसम्बन्धेन प्राप्तः संसारः कथं निवर्तत इति जिज्ञासायामाह–शोकेति । शोकादयो विकाराः अहङ्कारेण प्राप्ता इति भावः । अहङ्कारस्य सकाशात् अहङ्कारसंश्लिष्टस्य आत्मनः दृश्यन्ते, अनुभूयन्ते । आत्मनः अहङ्काररहितस्य तु न दृश्यन्ते । केवलप्रकृतिसम्बन्धोऽप्रयोजक इति भावः" इति यादवेन्द्रतीर्थाः । "अहङ्कारस्य दृश्यन्त इत्युपचारात्" इति सुदर्शनसूरिः । "अहङ्कारस्याहङ्कारयुक्तस्य आत्मनः । नतु तद्वियुक्तस्य । मत्वर्थीयाशआद्यजन्तोऽत्राहङ्कारशब्दः" इति वीरराघवः ।

७ एतेन योऽहंकारोति तस्य जीवस्यैव संसारो न नित्यशुद्धस्याऽत्मनः परमात्मन इति चार्थान्तरं सूचितम् ।

देहेन्द्रियप्राणमनोऽभिमानो जीवोऽन्तरात्मा गुणकर्ममूर्तिः ।
सूत्रं महानित्युरुधेह[1] गीतः संसार आधावति कालतन्त्रः[2] ॥ १६ ॥

देहेन्द्रियप्राणमनसामभिमानयुक्तः । सूत्रं महानित्याद्यधिकारनामभिर्युक्तः । प्रधानजीवो हिरण्यगर्भोऽप्याधावति संसारे किमुतान्य इत्याशयः ।

"संसारयुग्[3] यद् ब्रह्माऽपि सर्वजीवेश्वरेश्वरः । विष्णवधीनः सदा ज्ञानी किमुतान्ये-ऽल्पचेतनाः[4]" इति सत्तत्वे ॥ * ॥

अमूलमेतद् बहुरूपरूपं[5] मनोवचःप्राणशरीरकर्म ।
ज्ञानासिनोपासनया शितेन च्छित्वा मुनिर्गां विचरत्यतृष्णः[6] ॥
॥ १७ ॥

अमूलं विष्णुमूलम् । बहुरूपेण तेनैव रूप्यते[7] । मनआदीनां विषयः[8] ॥ * ॥

---

१ "उरुधेव गीतः" इति प्र. पाठः । "उरुधैव गीतः" इति क्वचित् ।

२ "ननु ज्ञानरूपस्य कथमन्यथाज्ञानलक्षणः संसार इत्याशङ्क्य अन्यथाज्ञानरहितस्य हिरण्यगर्भस्याप्यस्ति संसारः किमुतान्येषामित्याह—देहेन्द्रियेति । कालतन्त्रः । कालः दुर्गा । तदधीनः । गुणाभ्यां कर्मभिश्च इष्टपुण्यैः प्राप्ता मूर्तिः देहो यस्य सः । प्रधानजीवः अन्तरात्मा अन्तर्यामी सन् देहादीनां नियामकः देवानामभिमाननियामकः, सूत्रं महानित्याद्यधिकारनामभिः युक्तः उरुधा शास्त्रे गीतः संसारे आधावति प्रवर्तते" इति यादवेन्द्रतीर्थाः । देहेन्द्रियप्राणमनसामभिमानो यस्य सः ।

३ "–युग् यो ब्रह्माऽपि" इति प्र. पाठः । "युग्धि ब्रह्माऽपि" इति क्वचित् ।

४ "–ऽल्पचित्तिनः" इति प्र. पाठः । कोशेषु च क्वचित् । ५ "–रूपरूपितम्" इत्यर्वाचीनाः ।

६ "विचरेदतृष्णः" इति पाठान्तरम् । यादवेन्द्रतीर्थाभिमतश्चायम् । तथाहि तद्व्याख्यानम्–"अचेतनापेक्षया समर्थस्य जीवस्य जडमात्रान्न संसारः । किन्तु परमात्मलीलया प्राप्त इत्याह–अमूलम् । अः विष्णुः मूलं कारणं यस्य तत् । एतत् गुणादिबन्धः । उपासनया शितेन निरन्तरध्याने स्वकार्ये समर्थेन अपरोक्षज्ञानाख्येन असिना छित्त्वा, ईश्वरप्रसादेनेति भावः । मुनिः अतृष्णः विषयसान्निध्येऽपि तृष्णारहितः सन् गां विचरेत्" इति ।

७ बहुरूपेण तेन सन्निहितेनेदमपि बहुरूपतया निर्मितम् । "मनआदिषु सन्निहितबहुरूपेण तेन रूप्यते तदद्दृष्टानुगुणं निरूप्यते प्रेर्यत इति बहुरूपरूपम्" इति विजयध्वजीयम् । "बहुरूपेण तेनैव विष्णुना रूप्यते ज्ञायते" इति केचित् ।

८ मनआदीनां विषयो गोचरः । यथा पुरुषः पद्भ्यां ग्राममधिगच्छति एवं जीवः मनआदिभिः करणैः संसारमधिगच्छतीत्यर्थः । "मनोवचःप्राणशरीराणि कर्म विषयो यस्य स तथा" इति विजयध्वजीयं तु स्फुटं प्रक्षिप्तम् । तात्पर्यविरोधात् । यस्य तदिति वक्तव्ये स इति चासङ्गतम् ।

ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानम् ।
आद्यन्तयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये[1] ॥ १८ ॥

केवलं स्वतन्त्रम् । आद्यन्तयोर्यत् स्वतन्त्रं तदेव मध्येऽपि स्वतन्त्रम् । परं ब्रह्म । ज्ञानविवेकादिस्वरूपम् । परिपूर्णगुणत्वात्[2] । अन्यतो विविक्तत्वाद् विवेकः । सर्वं निगमयति प्रापयतीति निगमः । सर्वैरालोच्यत्वात् तपः । प्रतिप्रति अक्षेषु स्थितत्वात् प्रत्यक्षम् । आचार्यसम्प्रदायसिद्धत्वादैतिह्यम् । अनुमेयत्वादनुमानम् ॥ * ॥

यथा हिरण्यं स्वकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य ।
तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत्[3] ॥ १९ ॥

हिरण्यखचितत्वेन हिरण्यप्रधानं हिरण्मयम्[4] । शङ्खमञ्च[5]रथादिषु मध्येऽपि केवलं प्राधान्येन व्यवहार्यमाणं तदेव[6] ।

---

१ "नन्वयोध्यामधुरादिराज्यानां समयभेदेन बहवः स्वतन्त्रा दृश्यन्ते । एवं जगतोऽपि कालभेदेन बहवः स्वतन्त्रा नियमनकर्तारो भवेयुः? नेत्याह—ज्ञानं विवेकः । अस्य जगतः यत् केवलं स्वतन्त्रं आदौ उत्पत्तेः पूर्वमुपत्तिसमये हेतुः सृष्टिकर्तृ अन्ते नाशसमये यत् केवलं स्वतन्त्रं कालः लयकर्तृ च सद् वर्तते मध्येऽपि स्थितिकालेऽपि तदेव केवलं तत् स्वतन्त्रमेव पालनादिकर्तृ । उक्तं च —"अनेन सर्वगतत्वमायामयशब्दादिभ्यः" इति । तस्य केवलस्य लक्षणान्तराणि चाऽह–तत् ब्रह्म ज्ञानम् । स्वपरगताशेषविशेषविषयकज्ञानरूपम् । विवेक एव अन्येभ्यो विविक्तस्वरूपमेव । परिपूर्णगुणत्वात् । सर्वं निगमयति प्रापयति स्वाधीनं करोतीति निगमः । सर्वैरालोच्यत्वात् तपः । प्रत्येकमक्षेषु स्थितत्वात् प्रत्यक्षम् । ज्ञानजकत्वशक्तीनां प्रेरणार्थमिति भावः । तद् ब्रह्म आचार्यसम्प्रदायसिद्धत्वादैतिह्यमुच्यते । अनुमेयत्वात् श्रवणाद्यावृत्तिविषयत्वात् अनुमानम्" इति यादवेन्द्रतीर्थाः । श्रुतशास्त्रानुसारेण श्रवणादिना मेयत्वादनुमानम् । स्थितिकाले ज्ञानादिसर्वबुद्धिव्यापारप्रेरकत्वाच्च तज्ज्ञानं विवेक इत्यादि । उक्तं हि —"सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च" इत्यादि ।

२ "परिपूर्णगुणत्वात् कालः ।" इति प्र. पाठः प्रामादिकः । "परिपूर्णसुखत्वात्" इति क्वचित् ।

३ "ननु सुरादीननुसृत्य प्रवर्तमानस्य परमात्मनः कथं प्राधान्यमित्याशङ्क्य प्राधान्यज्ञापनाय दृष्टान्तमाह—यथा । अथवा जगद्देहविशिष्टस्य जगदभेदप्रसक्त्या कथं महावैलक्षण्यमित्याशङ्क्याऽह–यथा । पुरस्तात् पूर्वं पश्चात् सुवर्णालङ्कारस्य विसर्जनानन्तरं मध्ये अलङ्कारसमये सर्वस्य हिरण्मयस्य हिरण्याद्यलङ्कारप्रधानस्य दारुमयरथादिवस्तुनः सकाशात् हिरण्यं तदेव हिरण्यमेव, भिन्नमेवेत्यर्थः । किन्तु नानापदेशैः हिरण्यरथः हिरण्यशङ्खः इत्यादिव्यपदेशैर्व्यवह्रियमाणमपि स्वप्राधान्येन व्यवहार्यमाणं भवति यथा तद्वद् तथा अहमपि परमात्मा नानापदेशैः सुरनरादिशब्दैर्व्यवहार्यमाणोऽपि, अन्तर्यामिरूपापेक्षयेति भावः, अस्य विविधरूपस्य जगतः सकाशात् विवेक एव विविक्त एव । स्वप्रधान इत्यर्थः । परमात्मा जगद्देहविशिष्टोऽपि जगद्देहादत्यन्तं विलक्षण इति भावः" इति यादवेन्द्रतीर्थाः ।

४ क्वचित् "हिरण्मयम्" इमि न पठ्यते । ५ "शङ्खमञ्चकरथादिषु" इति प्र. पाठः ।

६ इदमुक्तं भवति—हिरण्यं स्वकृतम् । स्वयमेव कृतं पूर्णं स्वयम्पूर्णमित्यर्थः । रथादिकं हिरण्येनालङ्क्रियते

"[1]रथोपस्थे परिष्कारात् पूर्वं दारुमयाद् रथात् । सुवर्णं व्यवहाराय मुख्यं रथपरिष्कृतम् । मध्ये चान्ते रथोपस्थान्निष्कृष्य पृथगास्थितम् । यद्वदेवं हरिः साक्षाज्जगद्देहात्[2] पृथक् स्थितः । पूर्वं जगति संस्थश्च जगदन्ते पृथक् स्थितः । स एव मुख्यो जगतः स्वातन्त्र्यात् पुरुषोत्तमः[3]" इति ब्रह्मतर्के ॥

"[4]सुरपितृमनुजादिकल्पनाभिः[5]" इत्याद्यन्तर्याम्यपेक्षया ।

"यथा सुवर्णमकृतं क्रियते कुण्डलादिकम् । पुनरेकीभवत्यद्धा तद्वद् विष्णुरजोऽपि सन् । सुराद्यन्तःस्थितो भूत्वा पुनरेकीभवेद् विभुः" इति च । "तत्तन्नियामकस्यैव नाम सर्वं सुरादिकम् । तत्सम्बन्धादुदीर्येत व्यवहृत्यै सुरादिषु" इति शब्दनिर्णये । [6]एकलं केवलं चेति स्वतन्त्रमभिधीयते । स्वतन्त्रस्तु हरिः साक्षात् परिष्कृतहिरण्य-

---

नहि सुवर्णं वस्त्वन्तरेणालङ्क्रियते । ततस्तत् स्वसम्पूर्णम् । स्वयम्प्रधानमित्येतावत् । अत एव तत् पुरस्तात् रथादिष्वलङ्करणार्थमुपयोगात् पूर्वमपि स्वयम्प्रधानमेवाऽसीत् । पश्चादुन्मोचितं रथादिभ्यः स्वयम्पूर्णं पृथगेव तिष्ठति । तथा हिरण्मयस्य हिरण्यखचितस्य रथशङ्खादेः सर्वस्य वस्तुनः मध्ये रथादिषु खचिततादशायामपि हिरण्यं तदेव पूर्ववद् रथाद् विलक्षणं स्वयम्प्रधानं स्वसम्पूर्णमेव वर्तेत इति । अत एव हिरण्यरथः, हिरण्यशङ्खः इत्यादि स्वप्राधान्येन व्यवहार्यमाणं भवति । नहि दारुमयरथाद्यभेदेन तथा व्यवहार इत्यनुन्मत्तो वक्ति । एवमहं परमात्माऽस्य जगत आदावन्ते मध्ये जगदन्तःप्रवेशकाले च प्राधान्येन सर्वव्यवहारविषय इति ।

१ स्ववचनेन प्रस्थापितमर्थं प्रमाणतोऽपि प्रत्याययति—रथोपस्थे । रथमध्ये रथावयवेष्विति यावत् । परिष्कारात् पूर्वं दारुमयाद् रथात् पृथगास्थितमित्यन्वयः । मध्ये रथपरिष्कृततया रथोपस्थगतमपि व्यवहाराय मुख्यं सत् पृथगेवाऽस्थितम् । यद्यपि दारुमयो रथः । तथाऽपि न दारुमय इत्युच्यते । किन्तु हिरण्मय इति । अतस्तदेव हि मुख्यतो व्यवहाराय भवति । अन्ते च रथावयवेभ्यो निष्कृष्य पृथक्कृतं च पृथगेवाऽस्थितम् ।

२ जगद्रूपात् देहस्थानीयात् । "यस्य पृथवी शरीरम्" इत्यादेः । "जगतः देहाच्च" इत्यपि व्याचक्षते । पूर्वं पृथक् स्थितः । मध्ये जगति संस्थः । जगदन्ते च पुनः पृथक् स्थितः ।

३ "परमेश्वरः" इति प्र. पाठः ।

४ यथा सुवर्णेन रथः क्लृप्त इति सुवर्णसन्निधिमात्रेणोच्यते नतु रथस्य सुवर्णाभेदेन तथा सुरनरादिष्वन्तर्यामितया सन्निधिमात्रेण सुरनरादित्वेन कल्प्यते नतु तदभेदेनेत्येतदुक्तं भवति । अनेनैव वाक्येन मूलस्यार्थान्तरं च ध्वनयति । तथाहि—सु अकृतं अविकृतं हिरण्यं कुण्डलादिभावात् पुरस्तादप्यस्ति । पश्चादपि तदेवावशिष्यते । मध्ये च तदेव सर्वस्य हिरण्मयस्य विविधं कटककुण्डलाद्याकारं प्राप्य तत्तत्पदैर्व्यवहार्यमाणं च भवति । एवं भगवानपि पूर्वमविकृतः पूर्ण एवाऽसीत् । पश्चादपि पूर्ण एवावशिष्यते । मध्ये च स्वयं स्वेच्छया कृतं विविधमन्तर्यामिरूपमिति तैस्तैः सुरनरादिपदैः स्वयमेवान्तर्यामी मुख्यतो व्यवहार्यमाणो भवतीति । एतमेवार्थं "यथा सुवर्णम्-" इत्यादिना ब्रह्मतर्कवचनेनैव ग्राहयति ।

५ "—कल्पनादिभिः" इति प्र. पाठः प्रामादिकः ।

६ यत् पूर्वं परस्ताच्च तदेव मध्येऽपि केवलं स्वतन्त्रत्वात् प्राधान्येन व्यवहार्यमाणमिति पूर्वशोकस्थकेवलपदानुवृत्त्या पूर्वं व्याख्यातम् । "केवलं स्वतन्त्रम्" इति तदर्थश्च पूर्वश्लोक एव निगदितः । अथापि सन्दिहानं प्रमाणबुभुत्सुं कोशवचनोदाहरणेनाऽप्याययति—एकलं केवलं चेति ।

वत्[1]" इति प्रवृत्ते। "प्रत्येकं नतु दार्वादि स्वतन्त्रं विक्रियागतम्। महाफलं स्यात् स्वर्णं तु[2] स्वतन्त्रं विक्रियोपगम्। तद्वत् स्वतन्त्रो भगवान् प्रवृत्तावन्यदन्यथा" इति च ॥ * ॥

विज्ञानमेतत् त्रिपदस्थमङ्ग[3] गुणत्रयं कारणकार्यकर्तृ।
समन्वयेन व्यतिरेकतश्च येनैव तुर्येण तदेव सत्यम्[4] ॥ २० ॥

मोक्षदं संसारदं तमःप्रदं [चेति] त्रिपदस्थं[5] विज्ञानम्। तदिच्छायाः सत्त्व एतत् सर्वमस्ति, अन्यथा नास्तीत्यन्वयव्यतिरेकौ। तदेव केवलं सत्यमिति सर्वत्र सम्बध्यते[6]।

"[7]स्वातन्त्र्यमेव सत्यत्वं विष्णोरन्यस्य सत्यता। प्रवाहतः सदाऽस्तित्वं पुम्प्रकृत्योः सदाऽस्तिता" इति वस्तुतत्त्वे ॥ * ॥

---

१ रथे परिष्कृतस्य हिरण्यस्य रथाद् विनाऽपि स्वतन्त्रं सत्त्वमस्ति हि। न रथस्य तथा। तदेव पुनः प्रवृत्तवचनेनैव स्फुटयति– प्रत्येकं नतु दार्वादि। प्रत्येकमविकृतं दार्वादि रथाद्यात्मना विक्रियां गतं प्राप्तं परिणतं वा दार्वादि न स्वतन्त्रम्। क्षुद्रत्वात्। हेमपरिष्कारेण हि तस्य महत्त्वमाधीयते। स्वर्णं तु प्रत्येकमपि स्वतन्त्रम्, रथोपस्कारमन्तरेणापि बहुमूल्यत्वात्। रथाद्यात्मना विक्रियामुपगतमपि स्वतन्त्रमेव। महाफलत्वात्। बहुमूल्यत्वादेव। हेम्ना हि रथस्य मूल्यमुत्कृष्यते। न रथेन हेम्नः। तथा च येन यस्य महत्त्वमाधीयते तदेव तत्र प्रधानं स्वतन्त्रमुच्यते। तादृशं च स्वर्णं रथे। भगवांश्च जगति। येन विना जगदिदमकिञ्चित्करम्। यत्सन्निधानातिशयेन चेदमुत्तरोत्तरमुत्कृष्यते। ततश्च सूक्तमुक्तम्–भगवान् प्रवृत्तौ स्वतन्त्रस्तदन्यत् सर्वमन्यथाऽस्वतन्त्रमिति।

२ "स्यात् पूर्णं तु" इति क्वचित्।

३ "त्रियवस्थमङ्ग" इत्यर्वाचीनाः।

४ "परमात्मनः सर्वचेतनापेक्षया स्वातन्त्र्यमुपपादयति– विज्ञानम्। गुणत्रयं कारणं महदादीनि कार्यं ब्रह्माण्डादीनि कर्तृ जीवादिकं च येन तुर्येण वासुदेवेन पुरुषेणास्ति। वासुदेवाधीनसत्त्वमुपपादयति--समन्वयेन। जगदस्तु इति वासुदेवेच्छायाः सत्त्वे जगद् भवेत् इति समन्वयेन। तथा इच्छाशक्तेरव्यक्तत्वे जगतः व्यतिरेकतश्च असत्त्वाच्च। तस्मात् त्रिपदस्थं त्रिषु पदेषु स्थापयतीति तत् त्रिपदस्थम्। सात्विकराजसतामसानां (मोक्षसंसारतमआख्येषु) त्रिषु (स्थानेषु) स्थापकमित्यर्थः। विज्ञानं लोकविलक्षणज्ञानरूपं तद् ब्रह्म सत्यमेव स्वतन्त्रसत्यमित्यर्थः। सदाऽविकारेण विद्यमानत्वादिति भावः। तत् परमात्माधीनं जगदस्वतन्त्रं सत्यमित्यर्थः" इति यादवेन्द्रतीर्थाः। तथाच मुख्यामुख्यविवक्षया तदेव सत्यमिति द्वेधा व्याख्यातं भवति। तदेव ब्रह्मैव केवलं स्वतन्त्रसत्यमिति वा।

५ "तमःप्रदं त्रिपदस्थम्" इति क्वचित्। "तमःप्रदं च त्रिपदस्थम्" इति च।

६ "आद्यन्तयोरस्य यदेव केवलम्" (१८) इति पूर्वं पठितं केवलपदमुत्तरश्लोकेषु, "येनैव तुर्येण तदेव सत्यम्" इति अत्र पठित सत्यपदं पूर्वश्लोकेषु च सम्बध्यते। तेन च स्वतन्त्रसत्यत्वमाद्यन्तयोर्मध्ये च ब्रह्मण एवेत्युच्यत इति भावः।

७ "ननु ब्रह्मैव सत्यमित्युक्ते जगन्मिथ्येति चोक्तप्रायम्? नेत्याह—स्वातन्त्र्यमेव। विष्णोः स्वातन्त्र्येण सत्त्वं

न यत् पुरस्तादुत यन्न पश्चान्मध्ये च तन्न व्यपदेशमात्रम् ।
भूतं प्रसिद्धं च परेण यद्यत् [1]तदेव सत् स्यादिति मे मनीषा ॥ २१ ॥

मध्ये च तत् केवलं नेति सम्बध्यते ।

"तत् स्वातन्त्र्येण नैवास्ति यदुत्पत्तिविनाशवत् । स्वातन्त्र्येणास्तिता तस्य यत्[2] सत्ताज्ञानदं सदा" इति वैभवे ॥ * ॥

अविद्यमानोऽप्यवभासते यो वैकारिको राजससर्ग एषः ।
ब्रह्म स्वयञ्ज्योतिरतो विभाति ब्रह्मेन्द्रियार्थात्मविकारचित्रम्[3] ॥ २२ ॥

सत्यत्वम् । प्रधानपुरुषयोस्तु तदधीनतया सदा सत्त्वम् । प्रकृतिविकाराणां तु प्रवाहतः सदा सत्त्वं सत्यत्वमिति विवेक इति भावः । ततश्च न जगतो मिथ्यात्वदुराशा कार्येति ।

१ "तदेव तत्" इत्यर्वाचीनाः । "यत् पुरस्तात् सृष्टेः पूर्वं न, यत् पश्चात् लयानन्तरं न, उत मध्ये काले व्यपदेशमात्रम् । जगदस्तीति व्यपदेश एव । नतु जगतस्त्रिकालसम्बन्ध इति भावः । अतः जगत् केवलं न स्वतन्त्रं नेत्यर्थः । किञ्च येन परेण यज्जगत् भूतमुत्पन्नमिति प्रसिद्धं चेति यत् निमित्तं तेन निमित्तेन तदेव पर एव सर्वदेशकालगुणैः पूर्णं सत् स्वतन्त्रं सत्यं स्यात् इति मे मनीषा निश्चयः" इति यादवेन्द्रतीर्थाः । यत् पुरस्तान्नाऽसीत्, यदुत पश्चान्न भविष्यति, पराधीनोत्पत्तिविनाशवदिति यावत् । तदुत्पत्तिविनाशयोर्मध्यकालेऽपि न भवति । केवलं सत्यमिति चानुवर्तते । स्वतन्त्रसत्यं न भवति । यद्यपि तदानीं सत् । तथाऽपि पराधीनसत्ताकम् । केवलमितीयदेव वाऽनुवर्तते । स्वतन्त्रं न भवति । स्थितावपि पराधीनमेव । यथोत्पत्तिनाशयोः । सत्यमितीयदेव वाऽनुवर्तते । मुख्यतः सत्यपदार्थस्य स्वातन्त्र्यघटितत्वात् । मध्येऽपि सत्यं न स्वतन्त्रसत्ताकं नेति । ननु जगत्यपि स्वातन्त्र्येण सत्त्वव्यवहारो दृश्यते । अहमेव स्वतन्त्रः कर्तेत्यादि । सत्यम् । किन्तु व्यपदेशमात्रं तत् । न परमार्थम् । तथाच यद्यद् भूतं उत्पत्तिनाशवत्, न केवलं तावत् यच्च प्रसिद्धं नित्यत्वेन स्वत एव सिद्धं प्रकृतिजीवादि तत् सर्वं परेण ब्रह्मणा नित्यत्वेनानित्यत्वेन च कृतमिति तत् परं ब्रह्मैकमेव सत् स्वतन्त्रसत्यमिति मे मनीषा, निश्चय इति भावः ।

२ नन्वनित्यस्य पूर्वोत्तरकालयोरभावात् मध्येऽप्यस्तु परायत्तता । नित्यस्य तु प्रकृतिकालादेर्जीवस्य वा कथं सा? आह—यत् सत्ताज्ञानदं सदा । नित्यस्यापि प्रकृतिकालादेः सत्ता भगवदायत्ता, चेतनस्य सत्ता ज्ञानं च भगवदायत्ते इत्यनिवार्यैव नित्यस्यापि भगवदधीनतेति ।

३ अत्र पूर्वार्धे "अविद्यमानोऽप्यवभासने सवैकारिको राजस एष सर्गः" इति चतुर्थे चरणे च "ब्रह्मेन्द्रियार्थात्मविकारयुक्तम्" इति च यादवेन्द्रतीर्थाभिमतः पाठः स्यात् । तथाहि तद्व्याख्यानम्–वैकारिकदेवैः सहितः, राजसः रजोगुणजन्यः, एषः अहमेव स्वतन्त्र इति भासमानः सर्गः अविद्यमानोऽपि स्वाधीनतया असन्नपि अवभासते । तामसानां जगन्निरीश्वरमिति भासते । यद् ब्रह्म सर्वकल्याणगुणं स्वयञ्ज्योतिः स्वत एव प्रकाश्यं अतः ब्रह्मणः सकाशात्, ब्रह्म प्रकृतिर्वेदा वा । इन्द्रियाण्युभयविधानि । अर्थाः विषयाः । आत्मानश्चेतनाः । विकाराः

"जगतो नास्तिता सैव या पराधीनता सदा। अभावस्तु कुतस्तस्य यद् विभातीह[१] सर्वदा" इति प्राकाश्ये[२]। "अविद्यमानता नाम जगतः परतन्त्रता। यथाऽशक्तस्तु पुत्रादिरसन्नित्युच्यते जनैः" इति विवेके।

अतो ब्रह्मण एव विभाति[३]। [४]द्वितीयं ब्रह्म प्रकृतिः। आत्मा जीवः। प्रकृतीन्द्रियविषयजीवादि विचित्रं जगद् ब्रह्मत एव विभातीत्यर्थः॥ * ॥

नाऽत्मा वपुः पार्थिवमिन्द्रियाणि देवा ह्यसुर्वायुजलं हुताशः।
मनोऽन्नमात्रं धिषणा च सत्त्वमहङ्कृतिः खं [५]कृतिरर्थसाम्यम्॥ २४॥

विविधकार्याणि देवा वा। एभिः युक्तं जगद् विभाति। तस्मात् परतन्त्रमिति भावः" इति। प्रकृतिविकारभूत एष रजोगुणमूलः सर्गः स्वातन्त्र्येणाविद्यमानोऽपि, सदा भगवदधीन एव सन्नपि अविदुषां स्वत एव विद्यमानोऽपराधीन इत्यवभासते। न विदुषाम्। यतो ब्रह्मैव हि स्वयञ्ज्योतिः स्वप्रकाशम्। अन्यत् सर्वमतो ब्रह्मण एव हि विभाति प्रकाशते। "तस्य भासा सर्वमिदं विभाति" इति श्रुतेः। किं तत् सर्वम्? — ब्रह्मेन्द्रियार्थात्मविकारचित्रम्। प्रकृतीन्द्रियविषयजीवादिमयं विचित्रं जगत्। यतो विभाति अतः सर्वात्मनाऽविद्यमान इति वदन्तो मिथ्यावादिनो निरस्ताः। यतो ब्रह्मणः सकाशादेव विभाति अतः स्वातन्त्र्येण विभातीति वदन्तो नास्तिका निरस्ताः।

१ "यश्च भातीह सर्वदा" इति क्वचित्। २ "प्रकाश्ये" इति च।

३ "ब्रह्मण एव भवति" इति क्वचित्। ४ द्वितीयं 'ब्रह्मेन्द्रिय-' इत्यत्रोक्तम्।

५ "क्षितिरर्थसाम्यम्" इति प्र. पाठः। "आत्मा विकारादिदोषरहितः जगदीश्वरः पार्थिवं वपुः न भवति। कोशादिदेहविविक्ततयैव अन्नमयादिमूर्तिभिर्वर्तत इति भावः। इन्द्रियाणि देवाश्च न भवति। अल्पशक्तीनामिन्द्रियाणां देवानां च महाशक्तिपरमात्मनियम्यत्वादिति भावः। वायुर्जलं हुताशः एते यस्य वपुः स मुख्यप्राणः न भवति। अन्नं पृथिवी। मात्रं शब्दस्पर्शादयः न भवति। धिषणा वृत्तिज्ञानं न भवति। सत्त्वं मूलबुद्धिः। अर्थेषु विषयेषु साम्यं समता अनुस्यूतिर्यस्य तदर्थसाम्यं नाम। अहं पश्याम्यहं शृणोम्यहं जिघ्रामीति सर्वजनेष्वनुस्यूततया ज्ञायमानमित्यर्थः। अर्थसाम्यमहङ्कृतिश्चाऽत्मा न भवति। कृतिः सर्ववस्तुगताः विविधव्यापारशक्तयश्चाऽत्मा न भवति। परतन्त्रसर्वजगद्वैलक्षण्यस्य परमात्मनि प्रतिपादनार्थं तत्तद्वस्तुभेदोक्तिरिति भावः" इति यादवेन्द्रतीर्थाः। वस्तुतस्तु असुः पञ्चात्मा मुख्यप्राणः। वायुर्जलं हुताश इति भूतत्रयं च नाऽत्मा। पृथिव्याकाशयोः अन्नं खमिति वक्ष्यमाणत्वात्। भूतत्रयस्य च वायुदेहगतत्वरूपविशेषद्योतनाय प्राणेन सह पृथगुक्तिः। अन्नं पृथिवी च मात्राश्च शब्दाद्याश्च तेषां समाहारोऽन्नमात्रम्। यद्वाऽन्नमात्रमिति मनोविशेषणम्। "अन्नमयं हि सोम्य मनः" इति श्रुतेः। तदा पार्थिवमिति पृथिव्या अपि ग्रहणम्। "क्षितिरर्थसाम्यम्" इति वा पाठः। मन उक्तम्। धिषणेति बुद्धिः। अहङ्कृतिरित्यहङ्कारः। सत्त्वमिति चित्तं चेतना च। तदेवं पञ्चविधमप्यन्तःकरणं न परमात्मा। भूतचतुष्टयं पूर्वमुक्तम्। खमित्याकाशः। पञ्च भूतान्यपि न परमात्मा। यथा न भूतं तथा भौतिकं च नेत्याह— कृतिः विकृतिः। भूतविकार इति यावत्। भौतिकं समस्तं विश्वमपि नाऽत्मा। अर्थसाम्यमित्यहङ्कृतिविशेषणम्। अर्थसाम्यं नामाहङ्कारस्य गुणः। गुणमुखेन गुणी निर्दिश्यते गुणगुण्यभेदेनार्थेषु साम्यं नामाहङ्कृतिरिति। बहुव्रीह्याश्रयणे त्वहङ्कृतिविशेषणत्वादर्थसाम्येति स्यादित्यतश्छान्दसं नपुंसकत्वं वक्तव्यम्।

"[1]वायुरेव स्वयं प्राणस्तत्रस्थे चोदतेजसी। उदेन तेजसा चैव प्राणस्य हि कृतं वपुः" इति प्रकाशिकायाम्[2]। "[3]प्राणस्य वायुरूपस्य भूतत्रयकृतं वपुः। [4]यतो हि पार्थिवं नात्र खं[5] चात्यल्पमुदाहृतम्" इति सन्धारणे।

[6]सत्त्वं मूलबुद्धिः। अहं शृणोम्यहं स्पृशाम्यहं पश्यामीति सर्वार्थेषु समत्वादहङ्कारोऽर्थसाम्यम्[7]।

"न देहो नेन्द्रियप्राणमनोबुद्ध्यहमादयः। विष्णुश्चिदानन्दतनुः स हि जीवाधिपः[8] सदा" इति सत्तत्त्वे॥ *॥

समाहितैः कः करणैर्गुणात्मभि-
र्गुणो भवेत्[9] तत्सुविविक्तधाम्नः।
विक्षिप्यमाणैरुत किं नु दूषणं
घनैरुपेतैर्विगतै रवेः किम्॥ २५॥

---

१ भूतोत्पत्तेः पूर्वं योऽसुः प्राणमुख्यः उत्पन्नः स वायुजलं हुताशश्चेत्युच्यते। तच्छरीरत्वात् तदात्मकत्वम्। शरीरशरीरिणोरभेदोपचारः। तथा च यो वायुजलं हुताशश्च, तदात्मा तन्मयशरीर इति यावत्, सोऽसुरपि न परमात्मा। ननु भूतोत्पत्तेः पूर्वतनशरीरस्य कथं वायुजलादिभूतमयत्वम्? आह—स्वयं प्राण एव वायुरित्यादि। तथाच न भूतवायुर्वायुरत्रोच्यते। तथा वाय्वाश्रिते मूलप्रकृतिमये जलतेजसी एव चात्रोक्ते। न भूतजलं भूताग्निर्वा। बायुजलमिति च वायौ जलमिति विगृह्यते। वाय्वाश्रितं जलमिति। हुताशोऽपि वाय्वाश्रितो विवक्ष्यत इति न भूतवार्ताऽत्र। अपूर्वतत्त्वविशेषाविष्करणायेदमर्थान्तरमुक्तम्।

२ "प्रकाशसंहितायाम्" इति पाठान्तरम्।

३ अथ वायुजलं हुताश इति भूतत्रयविवक्षायामपि न दोष इति यथाप्रतीतमर्थमप्युपपादयति—प्राणस्य। यदा ब्रह्माण्डान्तर्वायोर्भौतिकशरीरेणोत्पत्तिस्तदा वायुर्जलं हुताश इति भूतत्रयमेव तच्छरीरम्। न पृथिवीलेशोऽपि तत्र। आकाशं तच्छरीरे सदप्यत्यल्पमिति न विवक्षितम्। तथाच पूर्वं वायौ जलमिति विगृह्य जलतेजोद्वयमयं शरीरमित्युक्तम्। इदानीं तु वायुसहितं जलमिति विग्रहेण वायुर्जलं हुताशश्चेति भूतत्रयमयं शरीरमिति। तथा च पञ्चसु भूतेषु अस्य भूतत्रयस्य वायुदेहारम्भकत्वरूपं विशेषं द्योतयितुमेव पृथगुक्तिरिति भावः।

४ "ततो हि" इति प्र. पाठः। ५ खं वाऽत्यल्प–" इति क्वचित्।

६ अहङ्कारजन्या बुद्धिर्धिषणा। तस्या अपि मूलभूता अहङ्कारोत्पत्तेः पूर्वं विद्यमाना महत्तत्वजन्या बुद्धिः सत्त्वमिति व्याचक्षते। चित्तं चेतना च हि सत्त्वम्।

७ श्रवणाद्याः क्रिया एव प्रतिप्रतीतिभिन्नाः। अहम्प्रत्ययस्तु सर्वत्र समोऽनुगत इत्यर्थः।

८ एतेन आत्मा जीवोऽपि नेति नाऽत्मेत्यस्यार्थान्तरं ध्वनितम्।

९ "भवेन्मत्सुविविक्त–" इति प्र. पाठः। "ननु वायुना शाखाविचालनमिव विषयभोक्त्रा जीवेन विकारिणा किमन्तर्यामिणो वैषयिकविकारः प्राप्नोति नवेति जिज्ञासायामाह–समाहितैः। गुणेषु विविधविषयेषु आत्मानः मनांसि येषां तैः विषयभोक्तृभिः विक्षिप्यमाणैः विषयभोगार्थं प्रापितैः करणैः इन्द्रियैः तत्सुविविक्तधाम्नः तेभ्यो

तथाऽपि सङ्गः परिवर्जनीयो गुणेषु मायारचितेषु तावत् ।
मद्भक्तियोगेन दृढेन यावद् रजो निरस्येत तमःकषायम्[1] ॥ २७ ॥

[2]भगवतो गुणदोषाभावेऽपि जीवस्य सङ्गोऽवर्जनीय एव मुक्तिपर्यन्तम् ।

"[3]समाहितेऽपि जीवेन विक्षिप्ते वा नतु[4] क्वचित् । विशेषो[5] विद्यते विष्णोस्तथाऽपि तु समाहिते । प्रीतो भवति वै नित्यं सर्वधर्मकृतोऽपि च" इति पाद्मे ॥ * ॥

तिष्ठन्तमासीनमुत व्रजन्तं [6]शयानमुद्यन्तमदन्तमन्नम् ।
स्वभावमन्यत् किमपीहमानमात्मानमात्मस्थमतिर्न वेद[7] ॥ ३१ ॥

भोक्तृभ्यः सुविविक्तानि धामानि विषयज्ञानानि तत्सामर्थ्यानि वा यस्य तादृशस्य परमात्मनः दूषणं किम् ? तिक्त-कटुविषयभोगप्राप्तदुःखादिकं भवेत् । उत समाहितैः निषिद्धविषयेभ्यः व्यावर्तितैः को वा गुणो भवेत्? परमात्मनः परप्राप्तातिशयरहितत्वादिति भावः । रवेः उपेतैः प्राप्तैः घनैः किम् ? को वा तस्य गुणः(? दोषः)? अपेतैः गतैः घनैः को वा गुणः ? एवं प्रकृतेऽपि" इति यादवेन्द्रतीर्थाः । "तत्सुविविक्तधाम्नः, तेभ्य इन्द्रियेभ्यो विषयेभ्यश्च पृथग्भूतस्वरूपस्य" इति विजयध्वजीयम् ।

१ "निरस्येत मनःकषायः" इति प्र. पाठः । " (तथाऽपि भगवतः गुणसङ्गाभावेऽपि जीवस्य तत्सम्भवात् मायारचितेषु माया) सर्वशक्त्यभिभावकशक्तिः तया प्राप्तेषु बन्धकेष्विति भावः । (गुणेषु विषयेषु) सङ्गः उपादेयत्वबुद्धिः परिवर्जनीयः । ननु विषयजीवयोर्नित्यसम्बन्धात् सदा तन्निरसनलक्षणव्यसनं स्यादित्याशङ्क्याऽह— तावत् । दृढेन श्रवणाद्यावृत्त्येति भावः, मद्भक्तियुक्तेन ध्यानयोगेन रजः विषयरागजनकं (तमःकषायं पापरूपं तमः) यावद् यस्मिन् काले निरस्येत तावत्पर्यन्तं विषयपरित्यागे जागरूकेण भाव्यमित्यर्थः" इति यादवेन्द्रतीर्थाः । "रजः तमः तज्जन्यं कषायं पापं च" इति विजयध्वजीयम् ।

२ भगवतः गुणसङ्गो नास्तीति पूर्वश्लोक उक्तम् । " तथाऽपि सङ्गः परिवर्जनीयः" किमसङ्गतमत्रोच्यते ? आह– भगवतो गुणदोषाभावेऽपि । तथाचायं न भगवद्विषयः । किन्तु जीवविषयः । भगवत इव तत्प्रतिबिम्बस्य जीवस्यापि गुणसङ्गो नास्तीति न भ्रमितव्यम् । किन्तु तन्निरासाय यावन्मुक्ति प्रयतितव्यमिति । यतः प्रतिबिम्बत्वेऽपि मुक्तिपर्यन्तं सङ्गोऽवर्जनीयसन्निधिरिति ।

३ अयमेव श्लोकद्वयभाव इत्यत्र गमकं पाद्मवचनसंवादमाह–समाहितेऽपि । "समाहितेन" इति प्र. पाठः प्रामादिकः । जीवेनेन्द्रियगणे समाहिते विक्षिप्ते वा ।

४ विक्षिप्ते वाऽनुभुः क्वचित्" इति कोशेषु पठ्यते । अर्थस्तु न स्फुटः ।

५ "विदोषो–"(?) इति क्वचित् ।

६ "शयानमुक्षन्त–" इति प्र. पाठः । "शयानमुञ्झन्त–" इति क्वचित् ।

७ "परमात्मगुणरसज्ञस्य स्थितिमाह– तिष्ठन्तमिति । उत्तिष्ठन्तम् । उद्यन्तं यतमानम् । अदन्तं भुञ्जानम् । स्वभावं स्वीयं वस्तु भूषणादिकं अन्यत् ईहमानमपेक्षन्तम् । आत्मानं देहम् । किमपि देहसम्बन्धि किमपि । आत्मस्थमतिः परमात्मनि स्थिरचित्तः सन् न वेद" इति यादवेन्द्रतीर्थाः ।

आत्मस्थमतिः परमात्मस्थमतिः । [1]परमात्मनोऽन्यत् । पारतन्त्र्यादेः ॥ * ॥

यदि स्म पश्यत्यसदिन्द्रियार्थं नानाऽनु मानेन विरुद्धमन्यत् ।
न मन्यते वस्तुतया मनीषी [2]स्वप्नं यथोत्थाय तिरोदधानम् ॥ ३२ ॥

"नानामानविरुद्धं हि स्वातन्त्र्यं जगतः सदा । स्वतन्त्रो भगवान् विष्णुरेक एव न संशयः" इति च ।

वस्तुतया स्वतन्त्रत्वेन विरुद्धं तथा न मन्यते ।

"अस्त्येव [3]स्वाप्नमखिलं वासनारूपमात्मनि । जाग्रदेतदेदिति[4] ज्ञानं यत् तदेव भ्रमात्मकम् । तद्वज्जगदिदं सर्वं विद्यमानं न संशयः । स्वतन्त्रमेतदिति तु यज्ज्ञानं तद् भ्रमात्मकम्" इति च । "उत्थितो नैव जाग्रत्त्वं क्वचित् स्वप्नस्य पश्यति । स्वातन्त्र्यमेव[5] जगतो ज्ञानवान् नैव पश्यति" इति विवेके ॥ * ॥

[6]पूर्वं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तमङ्ग ।
निवर्तते तत् पुनरीक्षयैव न गृह्यते नापि विसृज्य आत्मा ॥ ३३ ॥

---

१ मूले अन्यत् किमपीति कुतोऽन्यत् ? किं देहादुत जीवादथ परमात्मनः? अन्त्यः पक्षो युक्त इत्याह—परमात्मनोऽन्यदिति । अन्यत् किमपीत्यरुचिं निकृष्टतां च सूचयति । परमात्मनोऽन्यदेव हि परमात्मस्थमतये न रोचते । किमपि यत्किञ्चिदिति पारतन्त्र्यादेस्तस्यैव निकृष्टत्वं च युक्तमित्याह—पारतन्त्र्यादेः । इदमेव वाक्यद्वयम्—"विरुद्धमन्यत्" इत्युत्तरश्लोकव्याख्यानायापि प्रवृत्तम् । तच्चोत्तरत्र स्फुटम् ।

२ "स्वाप्नम्" इति प्र. पाठः । "प्रारब्धकर्मणा यदि विषयभोगः बलादापतति तदाऽपि परमात्मबुद्धिं न परित्यजतीत्याह—यदि स्म । मनीषी ज्ञानी असत् तामसं राजसं वा इन्द्रियार्थं विषयं जगत् यदि प्रारब्धेन अनुपश्यति अनुभवति तदाऽपि जगति स्वातन्त्र्यं नाना मानेन विरुद्धमिति जगद् वस्तुतया स्वतन्त्रतया न मन्यते । यथा मनीषी स्वप्नादुत्थाय तिरोदधानं तिरोहितं स्वप्नं मन्यते भ्रमोपेतं कादाचित्कं परतन्त्रं सदुःखं चेति एवमेव जगत्यपि स्वातन्त्र्यज्ञानं भ्रम इति मन्यत इत्यर्थः" इति यादवेन्द्रतीर्थाः । "यथा स्वप्नं जाग्रत्त्वेन न मन्यते तथा जगद् वस्तुत्वेन स्वतन्त्रत्वेन न मन्यते" इति विजयध्वजीयम् । "हरेरन्यत् इन्द्रियार्थममङ्गलमिन्द्रियविषयं वस्तुतया न मन्यते । यतस्तस्य वस्तुत्वं स्वातन्त्र्यं नानामानविरुद्धम्" इति च । "परमात्मनोऽन्यत् पारतन्त्र्यादेः" इति तात्पर्यवचनमत्राप्यनुवर्तते । परमात्मनोऽन्यत् जगत् पारतन्त्र्यादेर्हेतोरसदमङ्गलमुच्यते । अत एव चावस्तु चोच्यते । अतो ज्ञानिनो वस्तुतया न मन्यन्ते ।

३ "स्वप्नमखिलम्" इति कोशेषु पठ्यते ।

४ "जाग्रतस्तदिति" इति क्वचित् ।

५ "स्वातन्त्र्यमेवं जगतो—" इति प्र. पाठः ।

६ "संसारकारणस्य निवर्तकं दर्शयति—पूर्वम् । आत्मनि परमात्मनि परमात्मविषयकम् । गुणविषयं कर्मविषयं चेति चित्रं विविधं आत्मनि अविविक्तम्, जीवसम्बद्धम् । एतन्न जानाम्यहमिति जीवे प्रतीयमानत्वादिति भावः । एतादृशमज्ञानं पूर्वं जीवे प्रतीतमपि ईक्षया श्रवणादिप्राप्तपरमात्मापरोक्षज्ञानेन निवर्तते । अनन्तरं न गृह्य-

भगवद्गुणविषयं तत्कर्मविषयं चेति गुणकर्मचित्रम् । आत्मनि परमात्मविषयम्[१] । एतन्न जानामीत्यविविक्तम्[२] ।

"[३]अन्यैर्ज्ञातेऽपिवाऽज्ञाते[४] न विशेषो हरेः क्वचित् । तेषामेव[५] विशेषः स्यादज्ञानापगमेन तु" इति च ॥ * ॥

एष स्वयञ्ज्योतिरजोऽप्रमेयो महानुभूतिः सकलानुभूतिः ।
एकोऽद्वितीयो वचसां विरामो[६] येनेरिता वाग्रचनाश्चरन्ति[७] ॥ ३५ ॥

ते न प्रवर्तेत इत्यर्थः । अज्ञाने सत्यात्माऽनुपादेयतया प्रतीतः । तन्निवृत्त्यनन्तरमात्मा उपादेयो ज्ञात इत्याह—नापि । अज्ञाननिवृत्त्यनन्तरं आत्मा न विसृज्यः न परित्याज्यः । किन्त्वत्युपादेयः सम्पन्न इत्यर्थः" इति यादवेन्द्रतीर्थाः । अथचैवं व्याख्येयम्—आत्मनि यदज्ञानम्, विषयसप्तमीयम् । परमात्मविषयं यदज्ञानम्, यच्च परमात्मनः गुणेषु कर्मसु च विषये विचित्रं विविधमज्ञानम् । अविविक्तं इममंशं न जानामीति विषयविशेषविवेकमन्तरा सामान्याकारेण पूर्वं गृहीतं जीवसम्बद्धं तदज्ञानं पुनः भगवदपरोक्षेक्षयैव निवर्तते । न ततः पूर्वम् । परोक्षज्ञाने सत्यप्यज्ञानमनुवर्तेत एवेति यावत् । एवं ज्ञानेनाऽत्मा गृह्यते, विसृज्यते चाज्ञानेन । अथापि न गृह्यते नापि विसृज्यते परमात्मा । नहि जीवेन गृहीत इति तस्य किञ्चिदुत्कृष्यते । विसृष्ट इति किञ्चिद्धीयते । तथाच ज्ञाते न गुणः, अज्ञाते न दोष इति न गृह्यते नापि विसृज्यत इत्युच्यते । ननु तर्हि व्यर्थं तदवबोधाय प्रयतनम् ? न व्यर्थम् । जीवस्य फलभागित्वात् । जीवस्यैव हि ज्ञानेनोत्कर्षोऽज्ञानेनापकर्षो वा ।

१ "परमात्मविषये" इति क्वचित् ।

२ "जानामीत्यप्यविविक्तम्" इति प्र. पाठः प्रामादिकः । एतद् विशिष्य गुणविशेषं कर्मविशेषं वा न जानामिति विषयविशेषविषयतया विविक्तं पृथक्कृतं न भवतीत्यविविक्तम्, सम्मुग्धमित्यर्थः । किञ्चिद् भगवत्स्वरूपविषयमज्ञानम् । किञ्चित् तद्गुणकर्मविषयम् । किञ्चित् विषयाविवेकेन सम्मुग्धमज्ञानम् । यो भगवानस्तीति गुणपूर्ण इति सामान्यतो जानाति तस्य तद्गुणकर्मादिविषयमज्ञानं स्यात् । यो भगवानस्तीति सामान्यतोऽपि न जानाति तस्य कथं विशेषविषयमज्ञानं सम्भवेदित्यविविक्तं महत्तरमज्ञानम् । "एतन्नाम न जानामीत्यविविक्तम्" इति क्वचित् पाठः ।

३ "न गृह्यते नापि विसृज्य आत्मा" इति चतुर्थचरणं विवेकवचनेनैव व्याख्याति—अन्यैर्ज्ञाते । एतेन न गृह्यते ग्रहणेन स्वयं गुणवान् न भवति; नापि विसृज्यः विसर्गेण दोषवान् वा न भवत्यात्मा हरिरिति व्याख्यातम् ।

४ "–ऽपिचाज्ञाते" इति क्वचित् ।

५ यैर्ज्ञातः तेषां ज्ञानिनामेव अज्ञानापगमेन स्वरूपानन्दाविर्भावलक्षणो विशेषः स्यात् ।

६ "विरामे" इति प्र. पाठः ।

७ "येनेषिता वागसवश्चरन्ति" इति प्र. पाठः । "येनेहता वागसवश्चरन्ति" इत्यन्ये । "येनेरिता वागसवश्चरन्ति" इति यादवेन्द्रतीर्थाभिमतः पाठः । तथाहि तद्व्याख्यानम्—"एवं ध्यानादिकमुक्त्वा ध्येयगुणानाह—एष इति । एष मुक्तिदाता अहं अद्वितीयः समरहितः स्वयमेव पूर्णसर्वकल्याणगुणः सर्वोत्कृष्ट इत्यर्थः । अथापि मन्त्रादिना वशीकर्तुं शक्यो भवेदित्याशङ्क्याऽह—वचसां विरामः । वचसां पौरुषेयापौरुषेयाणां विरामः व्यापाराराहित्यं यस्मिन् सः । ननु ज्ञानशक्तिविषयो भविष्यतीत्याशङ्क्य

"ज्ञानानन्दाद्यभिन्नत्वादेकः सर्वोत्तमत्वतः । अद्वितीयो महाविष्णुः पूर्णत्वात् पुरुषः स्मृतः" इति च ॥ * ॥

एतावानात्मसम्मोहो यद् विकल्पस्तु केवले ।
[1]आत्माऽमृते स्वमात्मानमचलं यन्न पश्यति ॥ ३६ ॥

"एतावानात्मसम्मोहो यद् विरुद्धस्य कल्पनम् । यत्[2] परात्माश्रयान् जीवान् निश्चयेन न पश्यति" इति तन्त्रभागवते ।

अचलमिति क्रियाविशेषणम् ॥ * ॥

आह– अप्रमेय इति । सर्वव्यापाराणामन्तर्याम्यधीनत्वात् सर्वोऽप्येतदधीनः, परमात्मा न कस्याप्यधीन इत्याशयेनाऽऽह—येनेरिता इति । वाचः वेदादिदेवाः असवः प्राणादितत्त्वनियामकाः सर्वे चेतना येन परमात्मना स्वरूपसत्त्वादौ ईरिताश्चरन्ति ज्ञानादिव्यापारेषु प्रवर्तन्ते स एषोऽजः देहबन्धरहितः । तत्र निमित्तमाह–सकलानुभूतिः । स्वपरगताशेषविशेषसाक्षात्कारसम्पन्नः । अतो बन्धकारणमोहादिरहित इति भावः । महानुभूतिः पूर्णज्ञानसम्पन्नः । महत् अत्युपादेयं सुखम् । सदा पूर्णसुखानुभवरूप इति वा । तर्हि नित्यमव्यक्तस्य तव साक्षात्कारादि कथं स्यादित्याशङ्कयाऽऽह—स्वयञ्ज्योतिः । सूर्यादिवद् व्यक्तरूपश्चेत्यर्थः । अघटितघटनाशक्तिभिः सम्पन्ने मयि व्यक्तत्वाव्यक्तत्वादिगुणानां न विरोध इति भावः । सर्वगुणैः सर्वमूर्तिभिश्च एकः भेदरहितः । एवं ध्येय इति भावः" इति । "स्वयञ्ज्योतिः स्वत एव पूर्णप्रकाशः । महानुभूतिः सर्वज्ञः । सकलानुभूतिः पुर्णसुखानुभवः । अप्रमेयत्वाद् वेदादिवाचामगोचरः । वाग्रचनाः वैदिकलौकिकादिसर्ववाग्व्यवहाराः येनेरिताः" इति विजयध्वजीयम् । "अप्रमेयः साकल्येनाज्ञेयः । वचसां विरामः साकल्येन वागगोचरः" इति श्रीनिवासतीर्थीयम् । सर्वेषामपि वचसामन्ततो यमेवाभिधाय विरामः पूर्णार्थता कृतकृत्यता वा स इति वा । सर्वशब्दैर्मुख्यतः प्रतिपाद्य इति यावत् । "यतो वाचो निवर्तन्ते" इति वदन्ती श्रुतिः "नामानि सर्वाणि यमाविशन्ति" इत्यप्याह हि ।

१ "आत्मन्नृते स्वमात्मानमवलम्बो न यस्य हि" इत्यर्वाचीनाः । "संसारे प्रधानकारणं जीवस्य स्वातन्त्र्यभ्रम एवेत्याह–एतावानिति । अमृते नित्यमुक्ते केवले स्वतन्त्रे परमात्मनि स्थितं स्वं स्वरूपमात्मानं स्वभावधर्मांश्च, अचलं यथा भवति तथा, सन्देहं विनेत्यर्थः, आत्मा जीवः न पश्यति न जानातीति यत्, विकल्पस्तु जीवे स्वातन्त्र्यभ्रमः इति च यत्, एतावान् इदं द्वयमात्मसम्मोह आत्मनि विपरीतज्ञानम् । तस्मात् स्वातन्त्र्यभ्रमः परित्याज्य इति भावः" इति यादवेन्द्रतीर्थाः । "यद् विकल्पः प्रमाणविरुद्धं कल्पनम्, जीवस्वातन्त्र्यं परमात्मास्वातन्त्र्यं च एतावानात्मसम्मोहः मनोभ्रमः । आत्मा जीवः केवलेऽमृते परमात्मनि स्थितं मदाधारतया स्थितं स्वमात्मानं स्वस्वभावं अचलं स्थिरं यद् यावत् न पश्यति तावद् भ्रमो न निवर्तते" इति विजयध्वजीयम् । यद् विरुद्धकल्पनं एतावानात्मसम्मोहो नाम । यद् यस्मात् सम्मोहादेव कारणात् केवलेऽमृते स्थितं स्वमात्मानं जीवो न पश्यतीति वा ।

२ विरुद्धकल्पनमेव विवृणोति—यत् परमात्माश्रयान् जीवान् न पश्यतीति तदेव विरुद्धकल्पनं नामेति । यद् यस्माद् विरुद्धकल्पनात् जीवस्य पारतन्त्र्यं न पश्यतीति वा ।

यन्नामाकृतिभिर्ग्राह्यं पञ्चवर्णमबाधितम् ।
व्यर्थो नाप्यर्थवादोऽयं द्वयं विन्दन्ति सूरयः[1] ॥ ३७ ॥

अयं [2]व्यर्थवादो न भवति । किन्त्वर्थवादः । जगत् परमेश्वरं च द्वयं [3]विन्दन्ति ज्ञानिनः ।

"पञ्चभूतात्मकं विश्वं भ्रान्तिसिद्धमपण्डिताः । वदन्ति पण्डितास्त्वद्धा जगदाहुरबाधितम् । प्रवाहरूपेण सदा विष्णोरिच्छावशे स्थितम्" इति च ॥ * ॥

इत्येकादशस्कन्धेऽष्टाविंशोऽध्यायः

[एकोनत्रिंशोऽध्यायः]

इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः ।
गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेममनोहरस्मितः[4] ॥ ७ ॥

"[5]आत्माऽन्तरात्मा परमात्मेति मूर्तित्रयं हरेः । जाग्रत्स्वप्नसुषुप्तीनां सृष्ट्यादेश्च प्रवर्तकम्" इति त्रैकाल्ये ॥ * ॥

---

१ "व्यर्थेनाप्यर्थवादोऽयं द्वयं पण्डितमानिनाम्" इत्यर्वाचीनाः । "द्वयं विदन्ति सूरयः" इति केचित् पठन्ति । यादवेन्द्रतीर्थीयेऽपि तथा । तथाहि तद्व्याख्यानम्–"स्वस्मिन् स्वातन्त्र्यारोपेण परमात्मापलापो न कर्तव्यः । परमात्मनः विद्वद्भिः समर्थितत्वादित्याह– यन्नामेति । नामाकृतिभिः नामरूपैः गजमनुष्यादिभिः सहितं पञ्चवर्णं पञ्चभूतादिभिः वृतं जगत्, यत् स्वतन्त्रं ब्रह्म च द्वयं विदन्ति जानन्ति । वदन्ति च । स वादः व्यर्थो न । किन्त्वर्थसहितो वादः । तत्र कारणमाह– सूरयः मननकर्तारः द्वयं जगत् स्वतन्त्रं ब्रह्मेति द्वयं अबाधितं विदन्ति मननेन निश्चिन्वन्ति । तस्माज्जीवे स्वातन्त्र्यज्ञानं भ्रम इति भावः" इति । वस्तुतस्त्वेवं व्याख्येयम्–यदिदं नामरूपात्मना गृह्यमाणं पञ्चभूतमयं पञ्चधा भिन्नतया वर्णनीयं च जगत् तदबाधितं सत्यम् । "विश्वं सत्यम्", "यच्चिकेत तत् सत्यम्", "सत्यः सो अस्य महिमा" इत्यादिश्रुतिभ्यः । नचायं श्रुतिवादो व्यर्थो भवितुमर्हति । अतत्त्वावेदकत्वप्रसङ्गात् । अपि अपितु अर्थवादोऽयम् । अर्थवानेवायं वादः । यतः सूरयः साक्षात्कृतपरमार्थाः अस्वतन्त्रं जगत् स्वतन्त्रं ब्रह्म चेति तत्त्वद्वयमबाधितसत्यं विन्दन्ति उपलभन्ते । अवगच्छन्त्युपगच्छन्ति चेति ।

२ "व्यर्थो वादो–" इति पाठान्तरम् । ३ "विदन्ति ज्ञानिनः" इति क्वचित् ।

४ "स्वशक्तिभिः अघटितघटनासम्पादकस्वसामर्थ्यैः गृहीतं मूर्तित्रयं आत्मान्तरात्मपरमात्मलक्षणं येन तादृशः सन्, स्वशक्तिभिः जगत् विविधविचित्रवस्तुस्वरूपं क्रीडनकं क्रीडासाधनं यस्याभूत्, यो जगति क्रीडमानोऽभूदित्यर्थः । स ईश्वराणां सर्वशक्त्युपेतानामपि ईश्वरः । प्रेम्णा सहितं सप्रेम मनोहरं स्मितं यस्य स एतादृशः सन् जगाद" इति यादवेन्द्रतीर्थाः । "जगत्क्रीडनकस्वशक्तिभिः इत्येकं वा पदम्" इति विजयध्वजीयम् । "सप्रेम यथा तथा जगादेति भिन्नं वा पदम्" इति श्रीधरस्वामी ।

५ ब्रह्मरुद्रान्तर्गतं रूपद्वयं स्वस्यैव च विष्णुरूपं चेति मूर्तित्रयमिति प्रसिद्धमर्थमङ्गीकृत्यैव कञ्चनापूर्वमप्यर्थविशेषं प्रमाणत एवाऽह—आत्माऽन्तरात्मा ।

पृथक् सत्रेण वा मह्यं मम यात्रामहोत्सवम्[1] ।
कारयेद् [2]गीतनृत्ताद्यैर्महाराजविभूतिभिः ॥ ११ ॥

पृथक् स्वयमेव, सत्रेण बहुभिः सह वा, मम यात्रामहोत्सवं कुर्यात् ॥ * ॥

मामेव सर्वभूतेषु बहिरन्तरपावृतम्[3] ।
[4]यजेताऽत्मनि चाऽत्मानं यथा खममलाशयः ॥ १२ ॥

इति सर्वाणि भूतानि मद्भावेन महाद्युते ।
[5]सभाजयेन्मन्यमानो ज्ञानं केवलमाश्रयन्[6] ॥ १३ ॥

ब्राह्मणे पुल्कसे स्तेने [7]ब्रह्मण्येऽर्के स्फुलिङ्गके ।
अक्रूरे क्रूरके चैव समदृक् पण्डितो मतः[8] ॥ १४ ॥

---

१ "मह्यं पर्वयात्रामहोत्सवान्" इति प्र. पाठः । "मम यात्रामहोत्सवान्" इति क्वचित् । "बहुभिर्भक्तैः (सत्रेण) सह स्वयं मम यात्रामहोत्सवं कुर्यात् । पृथक् एक एव वा, बहूनामलाभे, मह्यं महोत्सवं कुर्यात् । यात्रा श्रीहरिक्षेत्राण्युद्दिश्य गमनम् । तत्सहितमुत्सवम् । स्वस्य उत्सवकरणे द्रव्यशक्त्यभावे अन्येन कारयेदित्याह —मह्यं महाराजविभूतिभिः महाराजोपचारैः सह उत्सवमर्थवता कारयेत्" इति यादवेन्द्रतीर्थाः । "मह्यं मत्प्राप्त्यर्थम्" इति विजयध्वजीयम् । मत्प्रीणनार्थमिति वा । यात्रामहोत्सवो रथोत्सवादिर्वा ।

२ "गीतनृत्याद्यै—" इति प्र. पाठः ।

३ "—रन्तरवस्थितम्" इति पाठान्तरम् ।

४ "ईक्षेताऽत्मनि" इति प्र. पाठः । "अमलाशयः विषयरागरहितचित्तः सर्वभूतेषु सर्ववस्तुषु प्राणिषु वा बहिरन्तश्च स्थितम् । अथाप्यपावृतं अविद्यावरणरहितम् । मां विष्णुं यजेत, उचितवस्तुभिरिति भावः । आत्मनि स्वस्मिंश्च यथाखं हृदयाकाशमनतिक्रम्य विद्यमानम्, आकाशमिव निर्मलं वा, आत्मानमन्तर्यामिणं यजेत, अनिषिद्धभोग्यैरिति भावः" इति यादवेन्द्रतीर्थाः । बहिरन्तरश्च अपावृतं व्याप्तमिति वा । सर्वभूतेष्वपावृतं मामेव बहिरन्तश्च यजेतेति वा । यथा खं आकाशवदमलाशय इति साधकविशेषणं वा । भूतेषु अचेतनेषु आत्मनि चेतनगणे चेति वा ।

५ "सभाजयन्मन्य—" इति प्र. पाठः ।

६ "केवलमाश्रितः" इति च । "हे महाद्युते ज्ञानलक्षणप्रकाशसम्पन्न, इति मद्भावेन, अपावृतः खमिव सर्वेषु भूतेषु परमात्मा वर्तत इति भावः बुद्धिः मद्भावः, तेन सहितः, केवलं अहङ्कारेण रहितं परमात्ममूर्तिषु न्यूनताद्यविषयकं वा ज्ञानमाश्रयन् सर्वभूतानि सभाजयेत् तत्तद्भूतानुसारेण बहुमानं कुर्यात्" इति यादवेन्द्रतीर्थाः । "सर्वाणि भूतानि मदालयत्वेन मन्यमानः" इति विजयध्वजीयम् । "मम श्रीकृष्णस्य यो भावस्तेष्वस्तित्वं तद्विशिष्टतया मन्यमानः" इति राधारमणगोस्वामी जीवगोस्वामी च । "केवलं ज्ञानमन्तर्यामिदृष्टिम्" इति च । "केवलमद्वितीयं ज्ञानरूपं ब्रह्माऽश्रितः" इति विश्वनाथचक्रवर्ती ।

७ "ब्रह्मण्यर्के" इति क्वचित् पाठान्तरम् ।

८ "परमात्मनः वैधर्म्यराहित्यं सर्वमूर्तिसाम्यं च दर्शयति—ब्राह्मणे । पुल्कस इति पापजातिः । स्तेनः वञ्चकः द्रव्यापहर्ता वा । ब्राह्मणेषु साधुर्ब्रह्मण्यः । स्फुलिङ्गकेऽग्निकणे । क्रूरके हिंसके । एतेषु स्थिते परमात्मनि समा

"सर्वभूतेष्वस्ति विष्णुरिति भावः सतां मतः। अर्चने सर्वभूतानामादित्ये तद्गतात्मना[1]" इति च ॥ * ॥

सर्वं ब्रह्मात्मकं तस्य विद्ययाऽऽत्ममनीषया ।
परिपश्यति च परं परमात्मानमच्युतम्[2] ॥ १८ ॥

"ब्रह्मणाऽऽत्तमिदं सर्वं यत्किञ्चित् सचराचरम्। इति पश्येत यो विद्वान् स हि ब्रह्मात्मविन्मतः" इति ब्राह्मे ॥ * ॥

[3]योयोऽपरो मनोधर्मः कल्प्यते निष्फलाय ते[4] ।
तदायासो निरर्थः स्यान्नयादेरिव[5] सत्तम ॥ १९ ॥

"नयादिर्दुर्नयः प्रोक्तो यन्नयं सोऽत्ति[6] सर्वदा" इति शब्दतत्वे ॥ * ॥

सर्वान्तर्यामिरूपेषु निर्दोषत्वादिविषयिणी न्यूनत्वाद्यविषयिणी च दृक् ज्ञानं यस्य स पण्डितः ज्ञानीति विदुषां मतः" इति यादवेन्द्रतीर्थीयम्। विषमेष्वपि ब्राह्मणादिषु समं परमात्मानं पश्यतीति वा समदृक्। ब्राह्मणे पुल्कस इति जातिकृतं वैषम्यम्। स्तेने ब्रह्मण्य इति कर्मकृतम्। अर्के स्फुलिङ्गक इति गुणकृतं प्रमाणकृतं वा। अक्रूरे क्रूर इति स्वभावकृतम्।

१ "सर्वभूतेषु केवलमधिष्ठितस्य भगवत एवानुसन्धानम्। आदित्ये च कश्चिद् विशेषः। तद्गतात्मना भाव इति। आदित्याधिष्ठितं भगवन्तं भगवदधिष्ठानत्वेनाऽदित्यं च ध्यायेदिति।

२ "परिपश्यन्नुपरमेत् सर्वतो मुक्तसंशयः" इत्यर्वाचीनाः। "सर्वभूतेषु परमात्मा वर्तत इति या विद्या उपासनालक्षणं ज्ञानं तया प्राप्तयाऽऽत्ममनीषया सर्वत्र परमात्मावधारणज्ञानेन सर्वं जगत् ब्रह्मात्मकं ब्रह्मणा आत्तं स्वीकृतमिति पश्यति। तस्य सर्वं ब्रह्माधीनमिति ज्ञानस्य सकाशात् परं सर्वविलक्षणं पूर्णं वा, परमात्मानं परिपश्यति अपरोक्षीकरोति" इति यादवेन्द्रतीर्थाः। वस्तुतस्त्वेवं व्याख्येयम्— आत्ममनीषया परमात्मा सर्वगत इति दृष्ट्या विद्ययोपासनया तस्योपासकस्य सर्वमपि जगत् ब्रह्मात्मकं नियमनार्थं ब्रह्मणा स्वीकृतं भगवदधीनमेव भवति। तथा निश्चलं प्रतीयत इत्येतत्। ततश्च यदधीनमिदं तं च परमात्मानं ततः परं परिपश्यति।

३ "योयो मयि परो धर्मः" इत्यर्वाचीनाः। ४ "निष्फलाय चेत्" इति च।

५ "स्याद् भयादेरिव" इति च। "मद्भावः सर्वकल्पानां सध्रीचीन इत्युक्तम्। तदुपपादयति—योयोऽपरः। मनोधर्मः मनसा सङ्कल्पितः अपरः देवतान्तरविषयकः पूजाध्यानादिः स निष्फलाय कल्प्यते। तदायासः तेन अन्याराधनेन आयासश्च भवति। किञ्च निरर्थः विरुद्धार्थः नरकादिकं च स्यात् हे सत्तम। नयं नीतिमत्तीति नयादिर्दुर्नयः। तस्माद् यथा विपरीतार्थः प्रकृतार्थासिद्धिरायासश्च एवमिहापीति भावः" इति यादवेन्द्रतीर्थाः। वस्तुतस्तु निष्फलाय कल्प्यत इत्युक्तमेव विव्रियते— तदायासो निरर्थः स्यात्। तेन परधर्माचरणेन य आयसः स निरर्थ एव हि भवति। आयास एव केवलं फलं नान्यत् किमपीति। यद्वा निष्फलायेति पारत्रिकं फलं निराह। निरर्थ इत्यैहिकम्। आयास एव केवलम्। नाऽयासतुल्यमैहिकं फलमपीति।

६ नयमत्ति नाशयतीति नयादिर्दुर्नय उच्यते। दुष्टो नय इति यावत्। "यन्नयं सोऽति सर्वदा" इति प्र. पाठः प्रामादिकः। "नयः सन्नयः आदिर्यस्य स दुर्नयः" इति केषाञ्चिद् व्यख्यानं च मूलपाठापरिज्ञानाद् भ्रममूलमेव।

एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम्[1]।
यत् सत्यमनृतेनेह मर्त्येनाऽप्नोति माऽमृतम् ॥ २२ ॥

"एकदा ज्ञातरूपेण यन्न तिष्ठति सर्वदा। चञ्चलत्वात्[2] सत्यमपि ह्यनृतं जगदुच्यते" इति च। "सर्वदैकप्रकारत्वात् सत्यं ब्रह्म सदोच्यते" इति च ॥ * ॥

इत्येकादशस्कन्ध एकोनत्रिंशोऽध्यायः[3]

[त्रिंशोऽध्यायः]

ब्रह्मशापोपसंसृष्टे स्वकुले यादवर्षभः।
प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत्[4] ॥ २ ॥

[5]तनुमत्यजत्, अतिशयेनाहरत्। 'अज हरणे' इति धातोः। भूलोकात् स्वर्गलोकं प्रत्यहरदित्यर्थः ॥ * ॥

---

१ "—र्मनीषा तु मनीषिणाम्" इति यादवेन्द्रतीर्थीयः पाठः। तथाहि तद्व्याख्यानम्—"एषा तु मयि भक्तिस्तु मनीषिणां ज्ञानिनां मनीषा मनसोऽपेक्षितोऽर्थः। बुद्धिमतां मननेन निश्चयवतां बुद्धिः निश्चितार्थः। स्वस्मिन् भक्तेः सफलत्वेनात्युपादेयत्वं चाऽह—यत् सत्यम्। अनृतेन चञ्चलेन विकारिणा मर्त्येन विनाशिना देहेन सत्यं कथञ्चिदपि विकाररहितम्, अमृतं नित्यमुक्तं मां यत् यया मद्भक्त्या आप्नोति सायुज्यं प्राप्नोतीत्यर्थः" इति। "बुद्धिर्विवेकः। मनीषा चातुर्यम्। मद्भजनमेव तत्फलम्" इति श्रीधरस्वामी। "अनृतेनानित्येन शरीरेण" इति सुदर्शनसूरिः शुकदेवश्च।

२ "चपलत्वात्" इति क्वचित्।

३ क्वचित् कोशेऽत्राध्यायपूर्तिर्न पठ्यते।

४ "स कृष्णः तनुं कथमत्यजत्? अतिशयेनाहरत्। भूलोकात् स्वर्गलोकं प्रति कथं देहेन सह गतवानित्यर्थः" इति यादवेन्द्रतीर्थाः। "कथमत्यजत्? वस्तुतस्तु नात्यजदेव। किन्तु लौकिकदृष्ट्या मायिकचरित्रं किमप्यकरोदेव। तद् ब्रूहीत्यर्थः" इति राधारमणगोस्वामी। "स्वतनुं कथमत्यजत्? किमत्र तत्त्यागः, किंवा तद्युक्त एव स्वपदमधिजगामेति प्रश्नाभिप्रायः" इति वीरराघवः। "कथमत्यजत्? नात्यजदेवेत्यर्थः" इति जीवगोस्वामी। तनुं कथमत्यजत्? केषाञ्चिन्मुनीनां मते यत् तस्य तनुत्यागः श्रूयते तत् कथं सम्भवेदित्यर्थः" इति विश्वनाथचक्रवर्ती। "तनुं शरीरवत् प्रियतराम्, 'यस्य पृथिवी शरीरम्' इति श्रुतेः, भूलोकं द्वारवतीं वा कथं केन प्रकारेणात्यजत्" इति शुकदेवः।

५ एवं सम्भवत्सु नानाविधेष्वर्थविशेषेषु कञ्चनापूर्वमर्थविशेषमाह—अत्यजत् अतिशयेनाहरदिति। अत्याजदिति वक्तव्येऽडभाव आर्ष इत्यर्थः।

प्रत्याक्रष्टुं नयनमबला यत्र[1] लग्नं न शेकुः
कर्णाविष्टं न सरति यशो[2] यत् सतामात्मलग्नम् ।
[3]यच्छ्रीवाक्यं जनयति रतिं कोऽनुमानः[4] कवीनां
दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः[5] ॥ ३ ॥

कः सुखरूपः । अनुमानः कवीनां मानानुसारी ॥ * ॥

इत्येकादशस्कन्धे त्रिंशोऽध्यायः[6]

[एकत्रिंशोऽध्यायः]

लोकाभिरामां स्वतनुं धारणाध्यानमङ्गलम् ।
योगधारणयाऽऽग्नेय्याऽदग्ध्वा धामाविशत् स्वकम्[7] ॥ ६ ॥

आग्नेय्या धारणया तनुमदग्ध्वा[8] स्वकं धामाविशत् ।

---

१ "यत्र मग्नम्" इति पाठान्तरं विजयध्वजीयादिसम्मतम् ।

२ "न मरति ततो यत्" इति प्र. पाठः ।

३ "यच्छ्रीर्वाचां जनयति" इति चः। "यच्छ्रीवासं जनयति" इति पाठान्तरम् ।

४ "किं नु मानं कवीनाम्" इति प्र. पाठः । "कीर्त्यमानं कवीनाम्" इत्यन्ये ।

५ "श्रीकृष्णस्य सौन्दर्यातिशयं महामाहात्म्यं स्तौति - प्रत्याक्रष्टुम् । यत्र श्रीकृष्णवपुषि लग्नम्, सौन्दर्यातिशयादिति भावः, प्रत्याक्रष्टुं आवर्तयितुम् । यशः श्रीकृष्णकीर्तिः कर्णाविष्टं सत् आत्मलग्नं मनोलग्नं न निस्सरति विस्मृतिं न प्राप्नोति। यत् श्रीवाक्यं श्रीकृष्णवचः तत्वोपदेशरूपं रतिं नित्यसुखं जनयति । कः सुखरूपः श्रीकृष्णः कवीनामनुमानः मानानुसारी, स्वतो ज्ञातुमशक्य इति भावः । जिष्णोरर्जुनस्य रथगतं यद् वपुः दृष्ट्वा सात्त्विकक्षत्रियाः तत्साम्यं निर्दुःखत्वलक्षणमीयुः प्रापुः" इति यादवेन्द्रतीर्थाः । "यत् यस्य यशः आत्मलग्नं सतां मनःसम्बद्धं सत् कर्णाविष्टं कर्णान्नापसरति । यो देहः कः सुखरूपः कवीनां मानगम्यश्च । देहस्य भगवदभेदज्ञापनाय पुल्लिंगप्रयोगः ।

६ क्वचित् कोशेऽत्राप्यध्यायपूर्तिर्नपठ्यते ।

७ "स्वकं धाम आविशत् । तस्मिन् समये कृष्णस्यासुरमोहकव्यापारमाह—योगधारणया । देवा इव आग्नेय्या योगधारणया स्वकां तनुमदग्ध्वा । स्वतनुमिव स्थितामन्यां तनुं प्रदर्श्य तत्काले योगेन सृष्टामति भावः" इति यादवेन्द्रतीर्थाः ।

८ "धारणया स्वतनुमदग्ध्वा" इति प्र. पाठः । श्रीधरस्वामी चाऽऽह– "योगिनो हि स्वच्छन्दमृत्यवः स्वां तनुमाग्नेय्या योगधारणया दग्ध्वा लोकान्तरं प्रविशन्ति। भगवांस्तु न तथा । किन्त्वदग्ध्वैव स्वतनुसहित एव

"[1]आग्नेय्याऽन्ये धारणया दग्ध्वा देहं परं पदम् । यान्ति देवाः समस्ताश्च तेषामन्यास्तनूर्हरिः[2] । नृसिंहरूपी सर्वेषां भित्त्वा ताभिरलङ्कृतः । नृत्यते प्रळये देवः स्वयं कृष्णादिरूपवान् । अदग्ध्वैव तनुं याति नित्यानन्दस्वरूपतः" इति तन्त्रभागवते ॥ * ॥

राजन् परस्य तनुभृज्जननाप्ययेहा[3] मायाविडम्बनमवैहि[4] यथा नटस्य ।
सृष्ट्वाऽऽत्मनेदमनुविश्य[5] विहृत्य चान्ते[6] संहृत्य चाऽत्ममहिनोपरतः[7] स आस्ते ॥
॥ ११ ॥

तनुभृद्वत् जननवदप्ययवच्च ईहा तनुभज्जननाप्ययेहा ।

"प्रजापतिश्चरति गर्भे अन्तः", "अजायमानो बहुधा विजायते[8]" इति च । "अजातो जातवद् विष्णुरमृतो मृतवत् तथा । मायया दर्शयेन्नित्यमज्ञानां मोहनाय च" इति पाद्मे[9] ॥ * ॥

स्वकं धाम वैकुण्ठाख्यमविशत्" इति । "स्वतनुमाग्नेय्याऽग्निसन्धुक्षणकारिण्या योगधारणया अदग्ध्वेति च्छेदः। दग्ध्वेति च्छेदेऽपि दहनं जगन्मोहनमात्रमित्यवगन्तव्यम्" इति वीरराघवः। "स्वतनुमदग्ध्वैव स्वकं धामाविशत्। तमिममर्थं श्रीभगवानिव यन्मुनिजनः परोक्षतया दर्शयति तत्तु युक्तमेव भगवदनुसारित्वात् । यथोक्तम्--'परोक्षवादा ऋषयः' इति" इति जीवगोस्वामी। "शुद्धं जाम्बूनदमिव स्वतनुं दग्ध्वा दाहोत्तीर्णं जाम्बूनदमिव स्वतनुमादायैव धामाविशत् । सन्दिहानान् वादिनस्तु वह्निना स्वतनोर्दाहासामर्थ्यं दर्शयामासेति तात्पर्यम्" इति विश्वनाथचक्रवर्ती। "स्वतनुं भूमिं स्ववियोगाधिना दग्ध्वा सन्तापयित्वा" इति शुकदेवः ।

१ स्वोत्तमदेवताप्रवेशद्वारा आग्नेय्या धारणया स्वदेहं दग्ध्वा देवाः परं पदं मोक्षाख्यं विशन्ति । विष्णोरन्ये समस्ताः देवाः । तत्पूर्वतनीरन्यास्तनूः नृसिंहरूपी हरिर्भित्त्वा ताभिरलङ्कृतः प्रळये नृत्यति ।

२ "तेषामन्यां तनुं हरिः" इति प्र. पाठः नातिस्वरसः । ताभिरिति परामर्शात् ।

३ "—प्ययेहाम्" इति पाठान्तरं विजयध्वजीयादिसम्मतम् ।

४ "—मवेहि" इत्यर्वाचीनः पाठोऽसाधुरेव । अवैहीत्येव साधु रूपमित्यसकृदावेदितम् ।

५ "—मनुशिष्य" इति क्वचित् ।

६ "विहृत्य वाऽन्ते" इति च ।

७ "—महिमोपरतः" इति पाठान्तरम् । विजयध्वजीये चैवम् । "श्रीकृष्णस्य देहान्तरदाहः किमर्थ इत्याशङ्क्य लीलयेत्याह—राजन् परस्य । तनुभृतां [इव] जननवत् अप्ययवच्च ईहा व्यापारः परस्य तनुभृद्विलक्षणस्य मायया स्वेच्छाशक्तिभ्यां विडम्बनमनुकरणं नटस्य यथा । तस्य तत्तद्व्यापारानुकरणं नतु स्त्रीत्वादिकं तस्य धर्मः, तथा जननादिकं न तस्य धर्म इत्यवैहि । जगत्सृष्ट्यादिकारणत्वेन सर्वसामर्थ्योपेतस्य जननादिदोषो नास्तीत्याह—सृष्ट्वाऽऽत्मना । इदं कारणं कार्यं चानुविश्य शक्तिप्रेरकरूपैः प्रविश्य, विहृत्य ज्ञानाज्ञानादिदानलक्षणं विहरणं च कृत्वा, [अन्ते च संहृत्य] उपरतः जगद्व्यापाररहितः सन् आत्ममहिना स्वसामर्थ्येनाऽस्ते" इति यादवेन्द्रतीर्थाः ।

८ विजायते जातवदीहते । आत्मनो जननमिव दर्शयति ।

९ "इति ब्राह्मे" इति क्वचित् ।

तथाऽप्यशेषस्थितिसम्भवाप्यये[1]ष्वनन्यहेतुर्यदशेषशक्तिधृक् ।
नैच्छत् प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्य गतिं प्रदर्शयन्[2] ॥ १९ ॥

[3]शेषितं वपुर्बलभद्रादीनाम् ।

"[4]जगतां मोहनार्थाय भगवान् पुरुषोत्तमः । दर्शयेन्मानुषीं चेष्टां तथा[5] मृतकवद् विभुः । प्रकाशयेददेहोऽपि मोहाय च दुरात्मनाम् । मायया मृतकं देहं तदा[6] सृष्ट्वा प्रदर्शयेत् । कुतो हि मृतकं[7] तस्य मृत्यभावात् परात्मनः[8]" इति च[9] ॥ * ॥

रामपत्न्यश्च तद्देहमुपगुह्याग्निमाविशन् ।
वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन् हरेः स्नुषाः ।
कृष्णपत्न्योऽविशन्नग्निं[10] रुग्मिण्याद्यास्तदात्मकाः[11] ॥ २० ॥

---

१ "—सम्भवाप्ययेऽप्यनन्य—" इति क्वचित् ।

२ "स्वस्थगतिं प्रदर्शयन्" इति पाठान्तरम् । "स्वच्छगतिं प्रदर्शयन्" इति विजयध्वजीये । "न विद्यतेऽन्यः सहायो यस्य सोऽनन्यः । स चासौ हेतुश्च । प्रणेतुं विप्रशापप्राप्तमिषुं व्यर्थं कर्तुं नैच्छत् । बलरामादिदेहं च भुवि शेषितमवशेषितं प्रणेतुं नैच्छत् । तत्कुत इत्यत आह—मर्त्येनेति । बलादीनां देवानां मर्त्येन देहेन किं स्यादिति बुद्ध्या, स्वस्य गतिं स्थानं प्रदर्शयन् शेषितं वपुः तदर्थमपि नैच्छदित्यर्थः" इति यादवेन्द्रतीर्थाः । यद्यपि सर्वशक्तः तथाऽपि बलभद्रादीनां वपुरूर्ध्वं प्रणेतुं नैच्छत् । कीदृशम् ? मर्त्येन मरणशीलेन शरीरेण तेषां किं फलमित्यत्रैवावशेषितम् । अन्तेऽपि नाशनैयत्यात् देहेष्वास्था न कार्येति स्वस्य गतिं ज्ञानयोगनियतिं ज्ञानिनां शिक्षयन्न प्रणेतुमैच्छत् । स्वस्थगतिमिति पाठे स्वस्थानां स्वनिष्ठानां भक्तानां स्वर्गस्थानां देवानां वा गतिं प्रदर्शयन् । ज्ञानिनामपि जीवितं मरणान्तमिति शिक्षयन्निति वा । "स्वच्छां गतिं स्वविषयज्ञानलक्षणयोगगतिं प्रदर्शयन्" इति विजयध्वजीयम् ।

३ ननु भगवान् स्वतनुमत्यजत् स्वर्गलोकं प्रत्यहरदित्युक्तम् । तत्कथमत्र पुनः 'वपुरत्र शेषितम्' इत्युच्यते ? नेदं भगवतो वपुरित्याह—शेषितं वपुर्बलभद्रादीनाम् । अन्ये तु "यादवनाशानन्तरं स्वं वपुरत्र भूमौ शेषितमवशेषितं प्रणेतुं कर्तुं कञ्चित् कालं स्थापयितुं नैच्छत्" इत्यपि व्याचक्षते । अविरोधादेतादृशमर्थान्तरमपि ग्राह्येत ।

४ "जगतो मोहना—" इति प्र॰ पाठः । क्वचित् कोशे च ।

५ "यथा" इति क्वचित् कोशेषु । ६ "देवस्तदा" इति च ।

७ मृतकं मृतदेहः कुतो मरणरहितस्येति । ८ "—भावान्महात्मनः" इति च कोशेषु पाठान्तरम् ।

९ अत्र क्वचित् कोशेषु एकोनत्रिंशाध्यायसमाप्तिः । लिपिकृत्प्रमादः स्यात् । क्वचित् "इति च" इत्यतः परम् —"जीवविष्ण्वोरभेदश्च–" इत्यादि द्वादशस्कन्धादौ पठ्यमानं ब्रह्माण्डवचनमत्र पठ्यते । यद्यप्यत्रैवार्थसाङ्गत्यमधिकं दृश्यते । तथाऽपि सर्वकोशसंवादाद् विजयध्वजीयसंवादाच्चोत्तरत्रैव निवेशितमित्यवगन्तव्यम् ।

१० "—विशन्नग्नीन्" इति यादवेन्द्रतीर्थीयपाठः ।

११ "रुक्मिण्याद्यास्तदात्मिकाः" इति प्र. पाठः । "स्नुषाः प्रद्युम्नादीनुपगुह्य अग्निमाविशन् । कृष्णपत्न्यः

"अग्नावन्तर्दधे भैष्मी सत्यभामा वने[1] तथा । नतु देहवियोगोऽस्ति तयोः सुखचिदात्मनोः[2]" इति च ॥ * ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते
श्रीभागवततात्पर्यनिर्णये
एकादशस्कन्ध एकत्रिंशोऽध्यायः[3]

एकादशः स्कन्धः समाप्तः

नीलाभद्रादयः अग्नीनाविशन् । रुग्मिणीसत्यभामे तदात्मकाः तेन कृष्णेन सहित आत्मा ज्ञानदेहो ययोस्ते । [गौरवाद्] बहुवचनम् । तयोर्ज्ञानदेहान्तर्धानमभूदिति भावः" इति यादवेन्द्रतीर्थीयम् । वस्तुतस्तु रुग्मिणीसत्यभामे विहाय अन्याः महिष्यस्तदात्मकाः कृष्णैकतानमनसोऽग्निमाविशन् । अथवा सत्यभामामेकां विहाय रुग्मिण्याद्याः सर्वाः । तत्र रुग्मिण्यास्तु अग्निं प्रविश्यान्तर्धानमेव । अन्यासां त्वग्निदाहेन तनुत्याग इति विशेषः ।

१ "सत्यभामाऽवनौ" इति क्वचित् पाठान्तरम् ।

२ शुद्धचिदात्मानोः" इति प्र. पाठः । क्वचित् कोशेषु च ।

३ "त्रिंशोऽध्यायः" इति क्वचित् कोशेषु । प्रमाद एवायम् ।

[तृतीयोऽध्यायः]

पृथुः पुरूरवा गाथिर्भरतो नहुषोऽर्जुनः[१] ।
मान्धाता सगरो रामः खट्वाङ्गो धुन्धुहा रघुः ॥ ९ ॥

"[२]जीवविष्णवोरभेदश्च देहयोगवियोजने[३] । विष्णोर्दुःखं व्रणित्वादि[४] पराभावस्तथैव च । अस्वातन्त्र्यं च वेदादावुक्तवद् भासते विभोः । क्वचित्क्वचिद् विमोहाय दैत्यादीनां दुरात्मनाम्[५]" इति ब्रह्माण्डे[६] ॥ * ॥

[इति द्वादशस्कन्धे तृतीयोऽध्यायः[७]]

---

१ "गाथिर्नहुषो भरतोऽर्जुनः" इति प्र. पाठः । पृथ्वादयो राजानः पृथिव्यां ममतां कृत्वा अकृतार्था एव मर्त्यधर्मिणः कालेन कथावशेषाः कृता इत्युत्तरश्लोकेनान्वयः ।

२ नन्वत्र मर्त्येषु मध्ये कथं रामः पठितः? कथं वा तस्य मर्त्यधर्मितया जननमरणादिकमुच्यते? अकृतार्थतया पराभवास्वातन्त्र्यादिकं वा? आह-जीवविष्णवोरभेदश्च। तथाच पूर्वस्कन्धान्ते कृष्णस्य देहवियोगादि नास्तीत्युक्तमेव पुनरप्यनेन प्रमाणेन द्रढयन् समानमेतद् रामावतारेऽपीत्यतिदिशति । तथाचासुरजनमोहायैव राजसु मध्ये रामस्य ग्रहणं मर्त्यस्येव । न परमार्थमिति भावः । श्रीधरस्वामी चाऽह– "रामो नाम कश्चिद् राजा । यद्वा लोकदृष्ट्या दाशरथिरेव निर्दिष्टः" इति । इदं ब्रह्माण्डवचनं कस्य श्लोकस्य व्यख्यानार्थमुदाहृतमित्यत्र सर्वेऽपि व्याख्यातारः सम्भ्रान्ताः । पूर्वाध्यायगतस्यैवेति श्रीनिवासतीर्थादयः । चतुर्थाध्याये कस्यचित् श्लोकस्येति विजयध्वजीयम् । न कश्चिदेतच्छ्लोकसङ्गतिं ददर्श । प्र. पाठे पुनः अत्राऽदौ–"न यत्र वाच इति कालाख्यस्य ब्रह्मणः स्वरूपम्" इति चतुर्थाध्यायसङ्गतं वाक्यं पठित्वा ततः "जीवविष्णवोरभेदश्च—" इत्यादि ब्रह्माण्डवचनं पठ्यते । तदेतत् सर्वं प्रामादिकं पाठसाङ्कर्यम् ।

३ "—विवर्जने" इति क्वचित् ।

४ "विष्णोर्दुःखव्रणित्वादिः" इति च ।

५ "दैत्यानां च दुरात्मनाम्" इति प्र. पाठः । "दैत्यानां सुदुरात्मनाम्" इति क्वचित् ।

६ "इत्यादि ब्रह्माण्डे" इति च क्वचित् ।

७ प्राचीनकोशेष्वत्राध्यायसमाप्तिर्न पठ्यते । न केवलमत्र । द्वादशतात्पर्यमध्ये न क्वापि ।

[चतुर्थोऽध्यायः]

[1]घटे भिन्ने यथाऽऽकाश आकाशः स्याद् यथा पुरा ।
एवं देहे मृते जीवो ब्रह्म सम्पद्यते पुनः[2] ॥ ४८ ॥

"[3]महाकाशो बहिस्थश्च घटाद्यन्तस्थ एव च । द्वेधा समुदितोऽन्यौ च द्वावाकाशौ[4] प्रकीर्तितौ । घटरूपस्तदन्यश्च महाकाशात् परो लघुः । महाकाशवदेवात्र परमात्मा सनातनः । घटान्तस्थमहाकाशप्रतिमोऽन्तर्गतो[5] हरिः । [6]घटस्यान्तर्गताकाशो महाकाशात् परो मतः । तद्वद् देवादयः सर्वे जीवा मुक्त्युपभोगिनः[7] । तमोगाश्चैव

---

१ श्रीधरस्वाम्यादिरीत्या चायं पञ्चमाध्याये पञ्चमः श्लोकः ।

२ अयमर्थः – घटे भिन्ने यथा घटान्तस्थो महाकाशः पूर्वमिव बहिस्थेनाकाशेनैकीभूत एक एव महाकाशः स्यात्, एवं जीवः जीवान्तर्यामी जीवन्तःस्थो भगवान् देहे नष्टे सति ब्रह्म सम्पद्यते बहिर्व्याप्तब्रह्मरूपेणैकीभवतीति । "एतेन जीवेनाऽत्मनाऽनुप्रणीतः" इत्यादिश्रुतेः जीवशब्दो जीवान्तर्यामिणि प्रसिद्धः । अथचार्थान्तरम् —अत्र च यथा आकाशे आकाशः इति च्छेदः । घटे भिन्ने घटोपादानभूतो भूताकाशः महत्यव्याकृताकाशे स्थितः स्याद् यथापूर्वम्, एवं देहे नष्टे भूताकाशस्थानीयः मुक्तजीवः स्वाश्रयत्वाय ब्रह्मैव सम्पद्यते प्राप्नोति । एवं घटान्तस्थः भूताकाशः यथा महाकाशे स्यादेवं देहे मृतेऽभिमानिदेवतागणोऽपि मुक्तजीवेन सह ब्रह्मण्याश्रितोऽवतिष्ठत इति । यद्यप्ययं श्लोकोऽन्ते पठितः । तथाऽपि महामल्लभञ्जन्यायेन प्रधानत्वादादौ व्याख्यातस्तात्पर्यंकृता । एतद्व्याख्यानतया पठिष्यमाणस्य प्रमाणवचनस्य समग्राध्यायसारोपसंहाररूपत्वाच्च प्राथम्यम् । अध्याये ततत्रत्र पठितानां कतीनाञ्चन श्लोकानामेकयैवोक्त्या व्याख्यानसौकर्याय च प्रथमोक्तिः । तच्चोपरिष्टाद् वक्ष्यते ।

३ प्र. पाठे तु "इति ब्रह्माण्डे" इत्यनन्तरम् "प्रत्येकं विष्णुरूपाणाम्........" इत्यादि पठ्यते । तदनन्तरं चोपरिष्टाद् पठिष्यमाणम्—"अवयव्यवयवाभेदात्........" इत्यादिवचनम् । तदन्ते च "महाकाशो बहिस्थश्च ...." इत्यादि । मूलश्लोकक्रमानुसारी च स पाठः । प्राचीनपाठे व्यत्यस्य पठने कारणं तूक्तम् ।

४ अन्यौ च द्वौ भूताकाशौ । एकः घटरूपः घटावयवभूतः । अपरस्तदन्यो घटान्तस्थावकाशस्थितः । स द्विविधोऽप्याकाशः महाकाशात् परो भिन्नः । लघुश्च असर्वगश्च । तत्र बहिस्थमहाकाशवत् परमात्मा सनातनः । सर्वगतं भगवद्रूपम् । सनेति सर्वत्रेत्यर्थे । सनातनः सर्वत्र ततः । घटान्तस्थमहाकाशवदन्तर्यामिहरिरूपम् । नानयोः कोऽपि भेदः ।

५ "—प्रतिमान्तर्गतो-" इति, "–प्रतिमान्तःस्थितो–" इति च कोशेषु पठ्यते । नूनं लिपिकृता स्खलितम् ।

६ "घटस्थान्तर्गता—" इति प्र. पाठः प्रामादिकः । घटस्यान्तर्गतो यो महाकाशाद् भिन्नो भूताकाशः तदुपमाः मुक्तावपि जीवसहभागिनस्तत्वाभिमानिनो देवाः, असुराश्चासदिन्द्रियादिप्रेरकाः ये जीवमुक्त्यनन्तरं स्वयं तमोगाः । घटावयभूतभूताकाशवन्नरो जीवः । तथाच घटोपमात् जीवात् तदन्तस्थमहाकाशोपमस्य न भगवतः कदाप्यैक्यमिति ।

७ "मुक्त्युपयोगिनः" इति प्र. पाठः । क्वचित् कोशेषु च ।

ये सर्वे घटरूपखवन्नराः" इति तत्त्वसंहितायाम् । "¹प्रत्येकं विष्णुरूपाणां भ्रान्तिमात्रा भिदा मता। जगतश्चैव विष्णोश्च सत्यो भेदः सदैव तु । यथाऽऽकाशघटौ नित्यं भिन्नावेव परस्परम् । एवमीशो जगच्चैव भिन्नावेव परस्परम्" इति च ॥ * ॥

²न यत्र वाचो न मनो न सत्त्वं तमो रजो वा महदादयोऽमी ।
न प्राणबुद्धीन्द्रियदेवता वा न सन्निवेशः खलु लोककल्पः ॥ २० ॥

---

१ इदं तत्वसंहितावचनं प्र. पाठे पूर्वमेव पठ्यत इत्यावेदितम् । प्रत्येकं विष्णुरूपाणां यथा घटान्तस्थानां महाकाशानां भ्रान्तिमात्रा भिदा मता। जगतश्चैव विष्णोश्च घटस्य महाकाशस्येव च सदा भेद एव । तदेव स्फुटमाह—यथाऽऽकाशघटौ । "यथाऽऽकाशघनौ" इति प्र. पाठः प्रामादिकः । एतेनैव प्रमाणद्वयेन "आकाश इव चाऽधारो ध्रुवो नानायितस्ततः" (५१) इत्याद्युत्तरश्लोकोऽपि व्याख्यातः। "अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम्"(५३)इत्यादि च । अहं मदन्तर्याम्येव ब्रह्म व्याप्तोऽपि भगवानिति । विभक्तिविपरिणामेन घटरूपोऽहं महाकाशरूपे ब्रह्मणीति वा। "आत्मानमात्मन्याधाय" इत्युत्तरवचनात्। एवमेव "बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्यते। मायामात्रमिदं राजन् नानात्वं प्रत्यगात्मनि । यथा जलधरा व्योम्नि भवन्ति न भवन्ति च। ब्रह्मणीदं तथा विश्वमुपयात्युदयाप्ययम्"(२५-२६)इति श्लोकद्वयमप्यनेनैव प्रमाणोपन्यासेन व्याचख्यौ । तथाहि बुद्धिशब्दो जीववाचीति पूर्वं व्याख्यातम् । बुद्धेर्जीवस्यैव जागरणाद्यवस्थात्रयम् । न तुरीयस्य भगवतः । नन्ववस्थाभेदेन तस्यापि विश्वादिरूपत्रयं श्रूयते? सत्यं श्रूयते। अथापि न तेषां भेद इत्याह–मायामात्रम् । प्रत्यगात्मन्यन्तरात्मनि नानात्वं रूपभेदेन स्वरूपभेदः मायामात्रं भ्रान्तिमात्रम्। नानात्वं मायामात्रं लीलामात्रमिति वा। लीलयैव बहुरूपो भवति, न वस्तुतो भेद इति । तदेतदुक्तम्–"प्रत्येकं विष्णुरूपाणां भ्रान्तिमात्रा भिदा मता" इति। अवस्थात्रयातीतादवस्थात्रयविशिष्टो जीवो भिन्न इति चात्रोदितम्। बुद्धेरेव जागरणं स्वप्नः सुषुप्तिश्च न परमात्मन इति । तदेतदुक्तम्–"जगतश्चैव विष्णोश्च सत्यो भेदः सदैव तु" इति। अयमेव भेदः द्वितीयश्लोकेन विव्रियते–यथा जलधरा इति । जलधरा मेघा घटा वा यथाऽऽकाशाश्रितास्तिष्ठन्ति उत्पत्तिविनाशवन्तश्च एवं जगदीश्वराश्रितमुत्पत्तिनाशयोगि चेति । तदेतदाह––यथाऽऽकाशघटौ नित्यमित्यादि । एवं "नहि सत्यस्य नानात्वमविद्वान् यदि मन्यते। नानात्वं छिद्रयोर्यद्वत् ज्योतिषोर्वातयोरपि" (३०) इत्ययमपि श्लोकोऽनेनैव प्रमाणवचनेन कटाक्षितः। नहि सत्यस्य भगवतो रूपेषु नानात्वं युक्तम्। यदि कश्चित् तथा मन्यते नूनमविद्वान् भ्रान्त एव सः। एतदप्युक्तम्–"प्रत्येकं विष्णुरूपाणां भ्रान्तिमात्रा भिदा मता"। तर्हि प्रतीयमानस्य नानात्वस्य का गतिः? आह–नानात्वं छिद्रयोर्यद्वत्। छिद्रमवकाशः। घटद्वयान्तस्थयोर्महाकाशयोः अन्तस्थबहिस्थयोर्वा महाकाशयोर्यथा नानात्वं भ्रान्तिस्तथा भगवद्रूपेष्वपीति । तदेतदुक्तम्— "महाकाशवदेवात्र परमात्मा सनातनः । घटान्तस्थमहाकाशप्रतिमोऽन्तगतो हरिः" इति । एवं बाह्यान्तर्ज्योतिषोर्वातयोरपि । अथचार्थान्तरम्– यदि क्वचिन्नानात्वमुच्यते। तत् छिद्रयोर्यद्वत् । घटान्तस्थमहाकाशभूताकाशयोरिव। तदेतदुक्तम्–"घटस्यान्तर्गताकाशो महाकाशात् परो मतः" इति । भगवतोऽत्यन्तभिन्नास्तत्वाभिमानिनो देवा असुराश्च भूताकाशस्थानीया देहान्तर्वर्तन्त इत्येतत् । अपिच–छिद्रयोः घटरूपस्याऽऽकाशस्य घटान्तस्थाकाशस्य च यद्वत् नानात्वं तथा जीवेशयोर्नानात्वमिति । तदेतदुक्तम्— "घटरूपखवन्नराः" इति । यथाऽऽकाशघटौ नित्यं भिन्नावेव परस्परम् । एवमीशो जगच्चैव" इत्यादि च । एवं सति सत्यस्याविकारिणः परमात्मनः स्वरूपाणां तु महाकाशस्येव न कथञ्चिन्नानात्वमिति सर्वं चतुरश्रम् ।

२ न यत्र वाचः प्रसरन्ति न मनो वा साकल्येन । "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति श्रव-

106

न स्वप्नजाग्रन्न च तत् सुषुप्तं न खं जलं भूरनिलोऽग्निरर्कः ।
[1]सुषुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनन्ति[2] ॥ २१ ॥

न यत्र वाच इत्यादि कालाख्यस्य ब्रह्मणः स्वरूपम्[3] ॥ * ॥

[4]एते ह्यवयवाः प्रोक्ताः सर्वावयविनामिह ।
विनाऽर्थेन प्रतीयेरन् पटस्येवाङ्ग तन्तवः ॥ २७ ॥

"[5]अवयव्यवयवाभेदात् कोट्यंशो भेद ईरितः । सोऽपि भेदो नचाभेदात् पृथगेव प्रव-

---

णात् । न सत्त्वं रजस्तमो वा । निर्गुणत्वात् । यत्र गुणा एव न प्रभवन्ति का कथा तत्कार्याणां महदादीनाम् । प्राणाः पञ्च, मनोबुद्धी, दशेन्द्रियाणि, तद्देवताश्चैतेनैव व्यख्याताः । एवं सति किमेतैरारब्धः भूरादीन् लोकान् कल्पयन् ब्रह्माण्डसन्निवेशः तत्र प्रळयकालवर्तिनि कालाख्ये भगवति सम्भवेत् ? "वागादयो यत्र कञ्चन विशेषं नाऽऽपादयन्ति" इति विजयध्वजीयम् ।

१ "संसुप्तवच्छून्य—" इति प्र. पाठः ।

२ न तत् स्वप्नजाग्रदवस्थोपेतम् । नापि सुषुप्तम् । अथवा तत् तत्र स्वप्नजाग्रदवस्थे न स्तः । सुषुप्तं सुषुप्तिश्च न । एतेन जीवाद् वैलक्षण्यमाह । न खादीनि पञ्चभूतानि तत् । नापि ज्योतिर्मयोऽर्कोऽपि । "स यश्चायं पुरुषे यश्चासावादित्ये" इत्यादिश्रुतेरर्कस्य विशेषप्रतीकत्वेन पृथग् ग्रहणम् । एतेन जडाद् वैलक्षण्यमाह । तर्हि तत् कीदृशम्—सर्वार्थनिरपेक्षत्वात् इन्द्रियनिरपेक्षत्वादानन्दानुभवमात्रत्वाच्च सुषुप्तवत् । अप्रतर्क्यत्वाच्छून्यवत् । निर्लिप्तत्वात् शून्यवदाकाशवदिति वा । स्थूलमिदं वचनम्–सुषुप्तवत् शून्यवदिति । वस्तुतस्तु इदमीदृशमित्यप्रतर्क्यमेव सर्वात्मना । सर्वस्यापि मूलभूतम् । पदं जगद्विलयस्थानं योगिभिर्ज्ञेयं मुक्तैर्गम्यं चाऽऽमनन्ति ।

३ कालचोदितमव्याकृतं प्रकृतितत्वं गुणान् प्रळये ग्रसत इत्युक्तं पूर्वश्लोके—"महान् ग्रसत्यहङ्कारं गुणाः सत्त्वादयश्च तम् । ग्रसतेऽव्याकृतं बीजं गुणान् कालेन चोदितम्" (१८) इति । ननु कथं जडस्य कालस्य प्रकृतिचोदकत्वमिति शङ्कायां नात्र जडः कालो विवक्ष्यते किन्तु प्रकृतीश्वरो भगवानेवेति वक्तुं न यत्रेत्यादि द्वाभ्यां श्लोकाभ्यां कालाख्यस्य ब्रह्मणः स्वरूपमाहेत्यर्थः । इदं वाक्यं प्र. पाठेऽध्यायादावेव पठ्यत इति पूर्वमुक्तम् ।

४ "सत्यं ह्यवयवः प्रोक्तः" इति प्र. पाठः । य एते सर्वेषामवयविनामिह जगत्यवयवा उपादानभूताः प्रोक्ता दृष्टा वा ते सर्वेऽपि पटस्यावयवभूतास्तन्तवः पटेनेवावयविभिरभिन्नाः । तत्र हेतुमाह—यतो विनाऽर्थेन प्रतीयेरन् । नह्युपादेयादन्योऽर्थ उपादानस्यास्ति । नहि पटस्य परिधानादिरूपादन्यः कश्चनार्थः संहतानां तन्तूनां क्वचिद् दृष्टः । अयमर्थः—ओतस्तन्तुसमुदायः पटेनाभिन्नः । तत्रैकैकस्तन्तुः भिन्नोऽपि । अत एव तन्तव इति बहुवचनं प्रायोजि । भगवता स्वकार्यस्य जगतोऽत्यन्तभेदः प्रागुक्तः । प्रकृतिमहदादिनोपादानभूतेन नैवं भेदः । किन्त्वभेदो भेदाभेदो वेति ज्ञापयितुमिदं प्रवृत्तम् ।

५ प्र. पाठे त्विदं वाक्यं व्यत्यासेन पूर्वमेव पठितमिति पुरस्तादावेदितम् । अयमस्य तत्त्वसंहितावचनस्यार्थः—अवयविनोऽवयवैरभेदात् यत्र क्वचिद् भेद ईरितः स कोट्यंशो भेदः । कोटिपदं बहुत्वमात्रवचनम् । अंशानां कोटिषु समुदाये एकोंऽशः यस्यानुयोगी भवति स कोट्यंशो भेदः । एकैकस्तन्तुः पटाद् भिन्न इत्यर्थः । तन्तव एव हि पटः ।

र्तते । अवयव्यवयवानां च कार्यकारणवस्तुनाम् । एक एव नियन्ताऽसौ हरिर्नारायणः परः" इति च ॥ * ॥

[[1]इति द्वादशस्कन्धे चतुर्थोऽध्यायः]

[[2]पञ्चमोऽध्यायः]

पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः ।
सहेन्द्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते[3] ॥ २० ॥

तच्छ्रुत्वाऽऽजुहुवुर्विप्राः सहेन्द्रं तक्षकं मखे ।
तक्षकाऽशु पतस्वेह सहेन्द्रेण मरुत्वता ॥ २१ ॥

इति ब्रह्मोदिताक्षेपैः स्थानादिन्द्रः प्रचालितः ।
बभूव सम्भ्रान्तमतिः सविमानः सतक्षकः ॥ २२ ॥

नहि तन्तुः पटः। अथापि नात्यन्तं भेद एव। किन्त्वभेदगर्भोऽयं भेद इत्याह—सोऽपि भेदो नचाभेदात् पृथगेव। तथाच भेदाभेद इत्यर्थः। अवयव्यवयवानामित्युपादानापेक्षया । कार्यकारणवस्तुनामिति निमित्तकारणापेक्षया। तथाचावयवी स्वावयवनियतः निमित्तकारणनियतश्च। सोऽप्यवयवः अन्यस्यावयवीति तेन नियतः। निमित्तकारणं चान्यस्य कार्यमिति तदप्यन्येन नियतम्। नन्वेवं परस्परनियतायाः कार्यकारणपरम्पराया अविरामात् किमनवस्थितिरेव? नेत्याह—एक एव नियन्ताऽसौ हरिः। स तु नान्येन नियत इति तत्र कारणपरम्पराया विश्रान्तिरिति। एतेन— "यत् सामान्यविशेषाभ्यामुपलभ्येत स भ्रमः । अन्योन्यापाश्रयात् सर्वमाद्यन्तवदवस्तु यत्"(२८) इति श्लोकार्थोऽपि कटाक्षितः। सामान्यं मृदादि कारणम्। विशेषो घटादिकार्यम्। यदिदं जगदेव केवलं कार्यकारणात्मना उपलभ्येत स्वातन्त्र्येण प्रतीयेत मृदेव स्वतन्त्रं घटकारणम्, कुलाल एव घटस्य स्वतन्त्रः कर्तेत्यादि स भ्रमः। "सम्भ्रमः" इति क्वचित्। तदा केवलं शाब्दं कोलाहलमात्रमित्यर्थः। कुतः ? अन्योन्यापाश्रयात्। तस्यापि कारणस्य पुनः कारणान्तराश्रयात् सर्वमपि परस्पराश्रितमुत्पत्तिनाशवच्च यतोऽतोऽवस्तु अस्वतन्त्रमेव। भगवानेव केवलं स्वतन्त्र इति।

१ प्राचीनपाठेऽत्राध्यायसमाप्तिर्न पठ्यत इत्युक्तम्।

२ श्रीधरस्वाम्यादिरीत्या चायं षष्ठोऽध्यायः ।

३ "पात्यताम्" इति पाठान्तरम्।

"स्वसन्तानोद्भवं कीर्त्या योजयन् जनमेजयम् । शक्तोऽप्यशक्तवद् [1]यष्टुरिन्द्र आसी-[2]दुपेक्षकः । [3]एवमेव ऋषीणां च कीर्तिं योजयताऽमुना । कृतोपेक्षा महेन्द्रेण [4]किमु विष्णुः परात्परः । तस्माद् विष्णोरशक्यं न[5] भूतभव्यभवत्स्वपि । नचानिष्टं गुणैरेष पूर्णो नारायणः सदा" इति वामने ॥ * ॥

नित्यादोषस्वरूपाय गुणपूर्णाय सर्वदा ।
नारायणाय हरये नमः प्रेष्ठतमाय मे ॥ * ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते
श्रीभागवततात्पर्यनि[illegible]
द्वादशः स्कन्धः समा[illegible]

समाप्तोऽयं ग्रन्थः

---

१ ननु पारीक्षिताज्जनमेयात् तत्पुरोहितेभ्यो वा कथमिन्द्रो बिभाय ? नह्यधिकशक्तयो देवाः स्वावरेभ्यो मनुष्येभ्यो बिभ्यतीति युक्तम् । किमुत देवानामपीन्द्रः ? अतस्तात्पर्यमाह— स्वसन्तानोद्भवम् ।

२ यष्टुर्यजमानस्य जनमेजयस्य उपेक्षकः भीत इव स्वेच्छया स्वसामर्थ्यमनाविष्कुर्वन्नासीत् । यथा बालकात् स्वयमात्मानं पराजितमिव दर्शयन् पिता सन्तुष्यति । यद्यपि प्राचीनकोशेषु सर्वत्र—"शक्तोऽप्यशक्तवद् विष्णुरिन्द्र आसीदुपेक्षकः" इति पठ्यते । अर्थस्तु न स्वरसः । प्रमाद एव स्यात् ।

३ अस्तु जनमेजये स्वसन्ततिरित्युपेक्षा । होतॄणामृषीणां तु का कथा ? किमिति तद्वचनात् सविमानः सतक्षक उच्चचाल ? आह—एवमेव ऋषीणां च ।

४ इन्द्रोऽपि कृपयैवं चकार नाशक्तयेति यदा महेन्द्र एवैतादृशो महाशक्तिस्तदा परात्परो विष्णुः सर्वशक्त इति किमु वक्तव्यम् ?

५ "विष्णोरशक्तिर्न" इति क्वचित् पाठान्तरम् । "विष्णोरशक्यं न भूतभव्यभवत्स्वपि । नचानिष्टं गुणैरेष पूर्णो नारायणः सदा" इति सर्वोपसंहारः । एतावान् सर्वभागवततात्पर्यसार इत्यतिमङ्गलम् ।